अदब्धधीतीन्=अहिंसिताऽध्ययनान् (सज्जनान्) ६ ५१ ३ [दभ्नोति वधकर्मा निघ० २ १९ तत क्त = दब्ध, तत्प्रतिषेध । धीतिम्=कर्माणि ॥ नि० १३ १४]

अदब्धम् अहिंसितम् (यानम्) ६ ५१ १ **अदब्धः**= अहिंसित (ईश्वर) १ ८९ ५ अहिंसक (अग्नि =विद्वान् राजा) ४ ४ ३ निरालस। (ईश्वर) आर्याभि० १ १० अस्माभिरहिंसितोऽतिरस्कृत (परमेश्वरो विद्वान् वा) १ ७६ २ हिंसारहित (परमेश्वर) आर्या भि० २ ५० अहिंसनीय (धर्म) ५ १९ ४ हिंसितुमनर्ह (अग्नि = अन्तस्थो विज्ञानस्वरूपो वा) ४ १५ अनलस सन् पालन-कर्त्ता (परमेश्वर) ऋ० भू० ८८ दम्भादिदोषरहित (सत्पुरुष) ऋ० भू० २१३. **अदब्धाः**=अहिंसितौ (सभासेनेशौ) ३ ५४ १६ **अदब्धान्**=अहिंसितानहिंसकान् (राज्ञ =नृपान्) ६ ५१ ४ **अदब्धानि**=अहिंसनीयानि १ २४ १० **अदब्धासः**=दम्भाऽहङ्काररहिता अनुपहिं-सिता (जना), प्र०—अत्र 'आज्जसेरसुक्' इत्य-सुगागम 'हिनस्ति दभ्नोतीति वधकर्मसु पठितम् निघ० २ १९ ३ १८ अहिंसनीया (देवा) १ ८९ १. अहिंसिता (ऋतव =यज्ञा प्रज्ञा वा) २५ १४ अहिंसिता अहिंसका वा (देवास =आप्ता विद्वास) ६ ६७ ५ **अदब्धाः**= अहिंसनीया (कवय =विपश्चित) ४ २ १२ अहिंसनीया सत्कर्त्तव्या (युवतय =प्राप्तयौवना स्त्रिय) ३ १ ६ हिंसितुमयोग्या (धेनव =गाव) १ १७३ १ अहिंसका (अदिते पुत्रा) ७ ६० ५ **अदब्धे**=अहिंसिते (अहनी= रात्रिदिने) ४ ५५ ३ **अदब्धेन**=सुखयुक्तेन (चक्षुषा= विज्ञानेन प्रत्यक्षप्रमाणेन) नेत्रेण १ ३० **अदब्धेभि.**= केनाऽपि हिंसितुमशक्यै (पायुभि =रक्षणै) १ ९५ ६ अहिंसनीयै (पायुभि =रक्षणोपायै) ३३ ८४ अहिंसकै (विद्वद्भि) १ १४३ ८ अहिंसितै (पायुभि =रक्षणै) ३३ ६९ **अदब्धैः**=अहिंसनै (शुभगुणै) ६ ४८ १० **अदभा**=अहिंसकौ (इन्द्राग्नी=नरेशसेनापती) ५ ८६ ५ (दभ्नोति वधकर्मा निघ० २ १९, तत क्तप्रत्यये दब्धम्, तत्प्रतिषेध । दम्भुदम्भने (स्वादि०) धातोर्वा क्त प्रत्यय]

अदब्धव्रतप्रमति अदब्धेन अहिंसितेन व्रतेन शीलेन प्रमति प्रज्ञान यस्य स (अग्नि =विद्युदादिकार्यकारणस्य स्वरूप) २ ९ १ अदब्धैरहिंसनीयैर्व्रतैर्धर्माचरणै प्रकृष्टा मतिर्मेधा यस्य स (सत्पुरुष) ११ ३६ [नञ्+ दभ्नोति वधकर्मा+क्त=अदब्ध । व्रतम्=शीलम् । प्र+ मनु अवबोधने धातो क्तिन्=प्रमति । एतेषा समास]

अदब्धायो ! अदब्धमहिंसितमायुर्यस्मात् तत्सम्बुद्धौ, अदब्धायुर्वा (अग्ने=जगदीश्वर भौतिकोऽग्निर्वा) २ २० [नञ्+दभ् (वधकर्मा)+क्त=अदब्ध । आयु =इण् गतौ धातो 'छन्दसीण' उणादि १ २ सूत्रेण उण् प्रत्यय । एनयो समासे सम्बुद्धौ रूपम्]

अदमयः दमय ६ १८ ३ [दमु उपशमने दिवादि, ततो णिचि लटि रूपम्]

अदम्भः दम्भादिदोषरहित परमेश्वर ऋ० भू० २०३ [दम्भु दम्भने (स्वादि०) ततोऽच् कर्त्तरि, तत्प्रतिषेध]

अदयः अविद्यमाना दया करुणा यस्य स, भा०— दुष्टेषु निर्दय (इन्द्र =सेनापति) १७ ३९ [दय दानगति-रक्षणहिंसादनेषु भ्वादि, 'षिद्भिदादिभ्योऽङ्' इत्यङ् प्रत्यये स्त्रिया दया रूपम् । ततो नञ्बहुव्रीहि]

अदर्दः विदृणाति ५ ३२ १ पुन पुनर्भृश विदारयति २ २४ २ **अदर्दृतम्**=भृश विदारयतम् ४ २८ ५ **अदर्धः**=भृश, विदारयति, प्र०—अत्र वर्णव्यत्ययेन दस्य स्थाने ध. २.३८ ४ **अदः**=विदृणीहि, प्र०—अत्र विकरणस्याऽलुक् लङ्प्रयोग १ १२१ १० [दॄ विदारणे क्र्यादि, तत क्रियासमभिहारे यङन्ताल् लङ् । अदर्द अदृणा निरु० १० ९]

अदर्शि दृश्यते ५ १.२ दृश्यताम् १ ४६ ११ [दृशिर् प्रेक्षणे भ्वादि, तत कर्मणि लुङ्]

अदहत् दहति भस्मीकरोति ४ २८ ३ **अदह.**=दह १ ३३ ७ दहति ७ १ ७ [दह भस्मीकरणे (भ्वादि०) धातोर्लङ्]

अदात् दद्यात् ६ ४७ २४ दिया है स० वि० १२१ अथर्व० १४ १ ५२ दत्तवान्, ददाति दास्यति वा प्र०— अत्र 'छन्दसि लुङ्लङ्लिट, इति सामान्यकाले लुङ् १ ३० १६ दूरीकुर्यात् ६ २७ ७ **अदाः**=प्रदेहि १९ ६६ [डुदाञ् दाने (जुहो०) धातो सामान्ये लुङ् । दाति दानकर्मा निघ० ३ २० दैप् शोधने धातोर्वा रूपम्]

अदानम् दानस्याऽकर्त्तारम् (राजपुत्रम्) ४ १९ ६ [डुदाञ् धातो 'कृत्यल्युटो बहुलम्' इति कर्त्तरि ल्युट् । तत्प्रतिषेध]

अदाभ्यः अहिंसनीय (राजन्) ७ १५ १५ दभितु

हिंसितु योग्यानि दाभ्यानि तान्यविद्यमानानि यस्य तत्सम्बुद्धौ, (अग्ने=सभाध्यक्ष) प्र०—अत्र 'दभेश्चेति वक्तव्यम्' अ० ३ १ **अदाभ्यम्**=अहिंसनीय सत्कर्त्तव्यम् १ २४ इत्यनेन वार्तिकेन दभ इति सौत्राद्धातोर्ण्यत् १ ३१ १० (बृहस्पति=राजानम्) ३ ६२ ६ **अदाभ्यः**=निष्कपट (मेधाविजन) ५ ५ २ अविनाशित्वान्नैव केनापि हिंसितु शक्य (विष्णु=विश्वान्तर्यामीश्वर) १ २२ १८ हिंसितुमनर्ह (विद्वान्) ३ ११ ५ उपक्षयरहित (अधिपति=अधिष्ठातृजन) १८ १६ अहिंसकत्वाद् दयालु (ईश्वर) ३४ ४३ अहिंसनीय (देव=परमेश्वर) ४ ५३ ४ उपक्षयरहित (परमेश्वर) १८ १६ **अदाभ्या**=हिंसितुमयोग्यौ (अध्यापकोपदेशकौ १ १५५ १ अहिंसनीयौ (स्त्रीपुरुषौ) ५ ७५ ७ **अदाभ्याः**=अहिंसनीया २ ३४ १० हिंसितुमनर्हा ३ २६ ४ [दभ्नोति वधकर्मा निघ० २ १६, तत कर्मणि ण्यत्, 'कृत्यल्युटो बहुलमिति' वा कर्त्तरि ण्यत् प्रत्यय । तत्प्रतिषेध । ते (देवा) होचु । अदभाम वाऽएनान् (असुरान्) इति तस्माददाभ्यो न वै (असुरा) नोऽदभन्निति तस्माददाभ्यो वाग्वाऽअदाभ्य श० ११ ५ ६ ४ वागेवादाभ्य श० ११ ५ ६ १]

अदामानः निर्बन्धना (प्रजा) ६ २४ ४ अदातार (प्रजाजना) ६ ४४ १२. [डुदाञ् दाने धातो 'अन्येभ्योऽपि दृश्यन्ते' अ० ३.२ ७५ सूत्रेणानुपपदेऽपि मनिन् प्रत्यय, तत्प्रतिषेध]

अदाशत् ददाति ४ ४२ ६ **अदाशन्**=ददति ७ १६ ६ [दाशति दानकर्मा निघ० ३ २० दाशृ दाने भ्वादि०, ततो लङ्]

अदाशुषः अदातु (प्रजाजनस्य) ७ १६ १ **अदाशुषाम्**=अदातॄणाम् (दुर्जनानाम्) १ ८१ ६ [दाशृदाने (भ्वादि०) धातो क्वसु प्रत्यय । तत्प्रतिषेध । दाशुषे=दत्तवते नि० ११ ११]

अदाशून्=अदातॄन् (शत्रून्) १ १७४ ६ [दाशृ दाने धातो कर्त्तरि ओणादि० उण् प्रत्ययो बाहुलकात्]

अदिक्षि आदिशामि ५ ४३ ६ [दिश अतिसर्जने (तुदादि०) धातोर्लुङ् । 'शल इगुपधात्०' इति च्ले स्थाने क्सादेश]

अदितयः अखण्डिता (मनुष्या) १ ५२ १ **अदितये**=मात्राद्याय ५ ८२ ६ पृथिवी मे न० प्र० ३३०/१ २४ २ अविनाशिने (आत्मने) २६ २६ अविनष्टायाऽन्तरिक्षाय ४ ३ ८ इस ससार मे म० प्र० ३३० १ २४ १ पृथिवीराज्याय प्र०—अदितिरिति पृथिवीनाम निघ० १ १ १२ १२ कारणरूपेण नाशरहिताया पृथिव्याम्, प्र०—अत्र सप्तम्यर्थे चतुर्थी १ २४ १ अखण्डितसुखाय १ २४ १५ **अदितिम्**=कारणरूपेण नित्याम् (मही=महती भूमिम्) १८ ३० अखण्डिता नीतिम् ६ ५१ ४ अमातरम् (देवी=विदुषीम्) ६ ५० १ अखिण्डता विद्या प्रकृति वा ६ ५१ ३ दिवम् १ १३६ ३ अखण्डिताम् (मही=भूमिम्) २१ ५ पृथिवीम् ४ ५५ ३ अविनाशिका विद्याम् १ १५२ ६ मातर पितर पुत्र, जात सकल जगत्, तत्कारण जनित्व वा १ १०६ १ आकाश भूमि वा ५ ४२ १ अविनाशिका प्रज्ञाम् २५ २ अन्तरिक्षम् ३३ ४६ अखिण्डतप्रज्ञम् (अश्विना=अध्यापकमुपदेशक च) २५ १६ सर्वविद्याप्रकाशवन्तम् (विद्वज्जनम्) १ ८६ ३ अविनाशिकारणम् ५ ६२ ८. अविनाशिन पदार्थम् १० १६ जनित्व कामम् (स्त्र्यासक्तिम्) ७ १८ ८ अखण्डिता कालविद्याम् ७ १०.४ अखिण्डनीया गाम्, अन्व०—धेनुम् ३३ ४६ अखण्डितबोधाम् (विदुषी स्त्रीम्) ५ ६६ ३ अखण्डिता विद्या पृथिवी वा ६ ५१ ३ नाशरहिता क्रियाम् ४ २ ११ कारणरूपेण नित्याम् (प्रकृतिम्) १८ ३० **अदिति**=स्वस्वरूपेणाऽखण्डिता (देवी=विदुषी स्त्री) ७ ४० २ पृथिवी ३४ ३० अविनाशि (अन्तरिक्षम्) २५ २३ अध्यापिका ११ ६१ कारणरूपेण नाशरहिता (देवा=पृथिव्यादय) २५ २३ विनाशरहिता (माता=प्रकृति) २५ २३ अखण्डिता (द्यौ=कारणरूपेण प्रकाश) २५ २३ अखण्डिता (विद्या) ५ ५१ ११ उत्पत्ति-नाशरहिता (कारणरूपा प्रकृति) विदुषी माता, भा०—सती विदुषी माता १० ६ चेतन ब्रह्म, ईश्वर के रचे लोक और नाम भी अविनाशी आर्याभि० १ १७ अविनाशिनी (प्रकृति) ४ १६ कारणरूपेणाविनाशिनी भूमि २५ ४५ स्वात्मरूपेण नित्यम्, भा०—स्वरूपेण नित्यम् (पञ्चजना=मनुष्या प्राणा वा) २५ २३ कारणरूपेण नित्यम्, भा०—अदृष्टकारणम् २५ २३ द्यौरिव विद्यागुणप्रकाशक (अग्नि=अध्यापक) २ १ ११ मातेव (विद्वान्) ३ ५४ १८ माता २८ २५ जननी ११ ५८ माता पिता वा ४ ३६ ३ अखण्डितैश्वर्यमन्तरिक्षमिवाक्षुब्धा (राजमहिषी) १३ १८ मातेव पालिका भूमि १४ २६ अन्तरिक्षम् ३३ ४२ अखिण्डतबुद्धि, भा०—गम्भीरबुद्धि (राजा) ३३ १६ अविनश्वरविनाशरहित (ब्रह्म) आ० वि० १ १७. अविकृत विकार को न प्राप्त

ईश्वर आर्याभि० १ १७ माता राजसभा च १ ४३ २ उत्पन्न वस्तुमात्र जनित्व कारण वा १ ६४ १६ प्रकाशमयी विद्या १ १०६ ७ विद्वत्पिता सूर्यदीप्तिर्वा १ १०७ २. अखण्डसुखप्रदा (माता) ५ ४२ २ अखण्डितमन्तरिक्षम् ४ १ २० अखण्डिता सभासदलङ्कृता सभा १७ ४८ अखण्डिता (धेनु=गौ) १ १५३ ३ नाशरहितो जगदीश्वर, प्र०—अदितिरिति पदनामसु पठितम् निघ० ५ ५ अनेन ज्ञानस्वरूपोऽर्थो गृह्यतेऽन्तरिक्ष वा १ १४ यज्ञस्यानुष्ठाता यजमान, अन्व०—नाशरहित, प्र०—पदनामसु पठितत्वादत्र यज्ञस्य ज्ञाता पालकोऽर्थो गृह्यते १ १६ अखण्डितज्ञाना (देवी=विदुषी माता) ४ ५५ ७ प्रकाशवन्नित्या (द्यौ), प्र०—अत्र 'अदितिर्द्यौरिति, प्रकाशकारकोऽर्थो गृह्यते ४ २१ पुत्र पुत्री वा, अन्व०—विद्या ११ ५६ अखण्डित (अग्नि=परमेश्वर) १ १६२ २२ अदीना देवमाता निरु० ४ २२/१ १६ ६ अविद्यमानखण्डन (विद्वज्जन) ५ ४६ ६ अखण्डिता नीति ७ ५१ २ नाशरहिता (विद्युत्) २६ ४ माता, प्र०—अत्रादितिर्द्यौरित्यादिना माता गृह्यते १ ४३ २ पितेव वर्त्तमान ७ ६ ३ नाशरहितो जगदीश्वर १ १४ अविद्यमाना दितिर्नाशो यस्या सा राजपत्नी ६ ३४ अध्यापिका ११ ६१ **अदिते !**=अखण्डितविद्य (विद्वज्जन) ५ ५१ १५ अखण्डितानन्ददे (स्त्रि) भा०—ब्रह्मचर्य ३८ २ अखण्डितज्ञानैश्वर्ये (मान) ६ ५१ ५ अखण्डिताऽऽनन्दे (सती स्त्रि) ११.५६ अविनाशिन् जगदीश्वर ४ ५५ १ भा०—सर्वसुखप्रापिके नाशरहिते राजनीति, प्र०—अदितिरिति पदनामसु पठितम् निघ० ४ १ अनेनाऽत्र प्राप्त्यर्थो गृह्यते ३ २७ अखण्डितस्वरूपविज्ञाने विदुषि स्त्रि) २ २७ १४ विनाशरहित (जगदीश्वर विद्वन्वा) १ ६४ १५ विदुषि मात २ २६ ३ आत्मस्वरूपेणाऽविनाशिनि (पत्नि) ८ ४३ **अदिते**=हे आत्मस्वरूपेणाऽविनाशिनि (पत्नि) ८ ४३ विदुषी मात २ २६ ३ विनाशरहित (जगदीश्वर) १.६४ १५ अखण्डितस्वरूपविज्ञाने (विदुषि स्त्रि) २ ७ १४ अखण्डितविद्य (विद्वन्) ५ ५१ १४ अखण्डितज्ञानैश्वर्ये (विदुषि स्त्रि) ६ ५१ ५ नाशरहिता राजनीति, प्र०—अदितिरिति पदनामसु पठितम् निघ० ४ १ अनेनाऽत्र प्राप्त्यर्थो गृह्यते ३ २७ अखण्डितानन्दे (विदुषि स्त्रि) ११ ५६ अखण्डितानन्ददे (विदुषि स्त्रि) ३८ २ **अदितेः**=ज्ञानस्याऽपत्यस्य, प्र०—अदितिर्जातमिति मन्त्रप्रमाणात् १ १३६ १६ अखण्डिताया कारणाख्यो ३ ३३ अन्तरिक्ष के स० वि० १५६/७ ४१ २ अखण्डितस्य विज्ञानस्य २ २८ ३ पृथिव्या सूर्यस्य वा १ १८५ ३ अखण्डितस्याऽन्तरिक्षस्य ४ ४२ ४ अविनाशिन कारणस्येव मातु ३४ ३५. पृथिव्या ४ १२ ४ अन्तरिक्षस्थाया भूमे प्रकाशस्य वा ७ ४१ २ **अदित्या**=विज्ञानदीप्तेर्वेदवाच सकाशादन्तरिक्षे मेघमण्डलस्य मध्ये, भा०—पृथिव्या, अन्व०—अन्तरिक्षस्य, प्र०—अदितिर्द्यौरदितिरन्तरिक्षमिति मन्त्रप्रामाण्यात् 'अदितिरिति वाङ्नामसु पठितम् निघ० १ ११, पदनामसु च निघ० ४ १ ११ पृथिव्या, भा०—शुद्धाया सर्वतोऽवकाशयुक्ताया पृथिव्या, प्र०—अदितिरिति पृथिवीनामसु पठितम् निघ० १ १ पृथिव्यादे ४ ३० प्रकाशस्य भा०—सूर्यप्रकाशस्य, अन्व०—अन्तरिक्षस्य पृथिव्याश्च १ १६ **अदित्यै**=पृथिव्यै, प्र०—अदितिरिति पृथिवीना० निघ० १ १२२ २० पृथिव्या अन्तरिक्षस्य वा, प्र०—अत्र षष्ठ्यर्थे चतुर्थी, अदितिरिति पृथिवीनामसु, पठितम् निघ० १ १ पदनामसु च निघ० ४ १ अनेन गमनाऽऽगमनव्यवहारप्राप्तिहेतुरवकाशोऽन्तरिक्ष गृह्यते १ ३० नाशरहितायै (मह्यै=वाचे) २२ २०. पृथिव्या, प्र०—अत्र 'चतुर्थ्यर्थे बहुल छन्दसि अ० २ ३ ६२ इति षष्ठ्यर्थे चतुर्थी २२ नित्यविज्ञानम् प्र०—अत्र कर्मणि चतुर्थी ३८ ३ नाशरहितायै नीत्यै ३८ १ अन्तरिक्षस्य २५ ४ दिवे प्रकाशाय, प्र०—अदितिर्द्यौरिति प्रमाणात् २५ ८ पृथिव्यादिसृष्टये ४ ३०

अखण्डितायाः अन्तरिक्षरूपायै (विष्णुपत्न्यै) २६ ६० जनन्यै २२ २० दिवे विद्याप्रकाशाय ११ ५६ अखण्डितायै जनित्वक्रियायै, प्र०—अदितिर्जनित्वमिति मन्त्रप्रामाण्याद्त्रादितिशब्देन गृह्यते, भा०—प्रजननाय २४ ६ प्रकाशस्य १४ २५ पृथिव्यादिसृष्टये ४ ३० नाशरहितायै जनन्यै २२ २० [अदिति शब्दो निघण्टौ पृथिवी, वाक् गो, पद, द्यावापृथिवीनामसु पठित । दो अवखण्डने धातो क्तिन् । 'द्यतिस्यति०' अ० ७ ४ ४० सूत्रेण इकारादेश । तत्प्रतिषध । दातु=छेत्तुम् अयोग्या अदिति । अदीना देवमाता नि० ४ २२ अग्निरप्यदितिरुच्यते नि० ११ २१ इय (पृथिवी) वाऽअदितिर्मही श० ६ ५ १ १० इय (पृथिवी) वै देव्यदितिर्विश्वरूपी तै० १ ७ ६ ७ अदित्यै पुनर्वसू तै० १ ५ १ १ एका न देव्यदितिरनर्वा विश्वस्य भर्त्री जगत प्रतिष्ठा । पुनर्वसू हविषा वर्धयन्ती । प्रिय देवानामप्येतु पाथ तै० ३ १ १ ४ अदितिर्वै प्रजाकामौदनमपचत्तत उच्छिष्टमश्नात् सा गर्भमधत्त तत आदित्या अजायन्त गो० पू० २ १५

सर्वं वा अत्तीति तददितेरदितित्वम् श० १० ६ ५.५ इय (पृथिवी) वाऽदितिरिय हीद सर्वं ददते श० ७ ४ २ ७ इय (पृथिवी) वा अदिति कौ० ७ ६ इय वै पृथिव्यदिति श० ११ ४ ५. इय वै पृथिव्यदिति सेय देवाना पत्नी श० ५ ३ १ ४ अदितिर्हि गौ श० २ ३ ४ ३४ मा गामनागामदिति वधिष्ट म० २ ८ १५ वाग्वाऽदिति श० ६ ५ २ २० आदित्या (अदितेरुत्पन्ना) वा इमा प्रजा ता० १३ ९ ५ अथ यत् प्रायणीयेन यजन्ते 'अदितिमेव देवता यजन्ते श० १२ १ ३ २ सा (अदिति) ऊर्ध्वा दिश प्राजानात् कौ० ७ ६ अदितिरच्छिन्नपत्रा काठ० १ ११, क० १ ११ अदिति सोमस्य योनि मै० ३ ७ ८ ९ १ प्रतिष्ठा वा अदिति प्रतिष्ठा पूपा० तै० ५ ३ ४ ४ यत् तदादत्त तद् अदिति काठ० ८ २]

अदितित्वे अखण्डितत्वे (कार्ये) ७ ५१ १. [अदिति प्राति० भावे त्व प्रत्यय]

अदित्यवाहः दितौ खण्डने भवा दित्या, न दित्या अदित्यास्तान् ये वहन्ति प्रापयन्ति ते अदित्यवाह (पशुपालका) २४ १२ [अदित्योपपदात् वह प्रापणे धातो. 'वहश्च' सूत्रेण ण्वि प्रत्यये अदित्यवाट्, तस्य बहुवचने रूपम्]

अदित्सन्तम् राजकर दातुमनिच्छन्तम् (पुरुषम्) ६ २४ दातुमनिच्छन्तम् (अदातृजनम्) ६ ५३ ३ [डुदाञ् दाने धातोरिच्छायामर्थे सन् । 'सनि घुमा०' इति सूत्रेणाच स्थाने 'इस्' आदेशोऽभ्यासलोपश्च । दित्स धातो शतृप्रत्ययस्ततो नञ्समास]

अदिद्युतत् प्रकाशितवान् प्रकाशयति वा ४ २५ द्योतते ६ ११ ४ [द्युत् दीप्तौ (भ्वादि०) ततो णिचि लुङि 'णिश्रि०' अ० ३ १ ४८ सूत्रेण च्ले स्थाने चङ् । 'द्युतिस्वाप्यो सम्प्रसारणम्' अ० ७ ४ ६७ सूत्रेणाभ्यासस्य सम्प्रसारणम्]

अदिष्ट दिशेत् ५ ३६ ६ [दिश अतिसर्जने धातोर्लुङ् । छान्दसत्वात् च्ले स्थाने क्सादेशो न भवति]

अदीदेत् प्रदीप्येत्, प्र०—दीदयतीति ज्वलतिकर्मसु पठितम् निघ० १ १६, अत्र दीदिर्धातोर्लेडि प्रथमैकवचने शपो लुक् १ ११२ १७ **अदीदेः**=प्रकाशये ७ ५ ३ [ज्वलनार्थकदीदधातोर्लिङ्]

अदीधयुः दृश्यन्ते, प्र०—अत्र व्यत्ययेन परस्मैपदम् ५ ४० ५ दीपयेयु ७ ३३ ५ [दीधीङ दीप्तिदेवनयो (अदादि०) धातो सामान्ये लुङ् । अदीधेत् =अन्वध्यायत् निरु० २ १२]

अदीनाः दीनतारहिता, भा०—अपराधीना, आत्मवशा (सज्जना) ३६ २४ स्वतन्त्रा (जना) प० वि० कभी पराधीन नही आर्याभि० २ ३७ ३६ २४ [दीङ् क्षये दिवादि, तत 'इणसिञ्' उणादि० ३ २. सूत्रेण नक् प्रत्यय । ततो नञ्समास]

अदीमहि क्षाययेम, नाशयेम, प्र०—अत्र दीङ् क्षय इत्यस्माल्लिङर्थे लङ् 'बहुल छन्दसि' इति श्यनो लुक् ३ ५८
अदीयम्=नि सरेयम् ४ २७ १ [अदीयम्—दीयति गतिकर्मा निघ० २ १४]

अदुग्धा इव दुग्धरहिता इव (धेनव =गाव इव) ७ ३२ २२ अविद्यमानपयस इव (धेनव =गाव इव प्रजा) २७ ३५ [दुह प्रपूरणे अदादि, तत क्त प्रत्यय । ततो नञ्समास]

अदुद्रोत् द्रवयति २ ३० ३ [द्रु गतौ भ्वादि, ततो णिजन्तात् सामान्ये लुङ्]

अदुवः अपरिचारका (कृतघ्ना जना) ७ ४ ६ [दुवस्यति परिचरणकर्मा निघ० ३ ५ ततो क्विप् कर्त्तरि, ततो नञ्समास]

अदुष्कृतौ अदुष्टाचारिणौ (स्त्रीपुरुषौ) ३ ३३ १३ [नञ्+दुस्+कृ+क्विप् । दुष्कृत =पापकृत नि० १० १२]

अदुहत् परिपूरयति, भा०=एधते १७ ७४ [दुह प्रपूरणे अदादि, ततो लङ्]

अदुः ददति २१ ६१ देवे स० वि० १३४, १०.८५ ४३ देते है स० वि० १२१, १० ८५ ३६ [डुदाञ् दाने (जुहो०) धातो सामान्ये लुङ्]

अदृक्षत दृश्यन्ते १ ४८ १३ [दृशिर् प्रेक्षणे धातोर्लुङ् कर्मणि]

अदृपिताय अमोहिताय (देवाय=नृपाय) ४ ३ ३
अदृपितेभिः=मोहादिदोषरहितै (विद्वज्जनै) १ १४३ ८

अदृप्तः मोहरहित (सज्जन) १ ६९ २

अदृप्यता हर्षमोहरहितेन (सज्जनेन) १ १५१ ८ [दृप हर्षणमोहनयो (दिवादि०) धातो क्त । ततो नञ्समास । 'रधादिभ्यश्च' तीड्विकल्प]

अदृप्तक्रतुम् अमोहितप्रज्ञम् (राजानमधिकारिण वा) ६ ४९ २ ['अदृप्तम्' अमोहितम् । क्रतुशब्द प्रज्ञानाम

निघ० ३ ६ कर्मनाम निघ० २ १ तयो समास]

अदृश्रन् पश्यन्ति ५ ३ ११ दृश्यन्ते १ १६१ ५. समीक्षेरन्, पश्येयु १ ६ ७ **अदृश्रम्**=प्रेक्षेयम् १ ५० ३ पश्येयम्, प्र०—अत्र लिङर्थे लुङ्, उत्तमैकवचनप्रयोगो 'वहुल छन्दसि' इति रुडागम 'ऋदृशोऽङि गुण' इति प्राप्तौ गुणाऽभावश्च ८ ४० [दृशिर् प्रेक्षणे (भ्वादि०) धातोर्लुङ् । 'इरितो वेति' अङ्प्रत्यय]

अदृष्टहा योऽदृष्टमन्धकार हन्ति स (सूर्य) १ १९१ ८ यो गुप्तान् विषान् हन्ति स (वैद्य) १ १९१ ९ [नञ्+दृष्ट+हन्+ड प्रत्यय 'अन्येष्वपि दृश्यते' अ० ३ २ १०१ सूत्रेण]

अदृष्टा: ये न दृश्यन्ते ते (सर्पादय) १ १९१ ५ ये न दृश्यन्ते ते विषधारिणो जीवा १ १९१ १. दृष्टिपथमनागता विषधरा विषा वा (सर्पादय) १ १९१ ४ अदृश्यमाना (विषधरा प्राणिन) १ १९१ ७ **अदृष्टान्**=दृष्टिपथमनागतान् (रोगान्) १ १९१ २ [दृशिर् प्रेक्षणे धातो क्त प्रत्यये नञ्समास]

अदृंहत् धरति २ १२.२ **अदृंहीत्**=धरेत् २८ २०. **अदृंही:**=प्राप्य वर्द्धस्व ६ २ [दृहि वृद्धौ (भ्वादि०) धातोर्लङ् । अदृंहीत्=दृहिधातोर् लुङ्]

अदेदिष्ट भृशमुपदिशत ३ ३१ २१ [दिश अतिसर्जने (तुदादि०) धातोर् यङ्लुक्, ततो लुङ्]

अदेवत्रात् देवान् त्रायते यस्मात्तद्विरुद्धात् (अराधस =अधनात्) ५ ६१ ६ [नञ्+देव+त्रैङ् पालने धातो क प्रत्यय]

अदेवम् अविद्यमानो देव प्रकाशो यस्मिँस्तम् (सर्वसामर्थ्यम्) प्र०—अत्राऽन्येपामपि दृश्यते, २ २२ ४ इत्यकारस्य दीर्घत्वम् प्रकाशरहितमविद्वास दुष्ट वा ३ ३२ ६ **अदेवयो:**=न देवौ अदेवौ तयोरदेवयो (अविदुषोरध्यापकोपदेशकयो) १ १५० २ **अदेवस्य**=असुरस्य शत्रुगणस्य १ १७४ ८ **अदेव:**=अविद्वान् (जन) ६ १८ ११ प्रकाशरहित (विद्याहीनो जन) ६ १७ ८ **अदेवान्**=अविदुष (जनान्) ३ १ १६ **अदेवानि**=अशुद्धानि (हेळासि=अनादराणि) ६ ४८ १० **अदेवेन**=अशुद्धेन (मनसा) २ २३ १२ [दिवु क्रीडा विजिगीषाव्यवहारद्युतिस्तुतिमोदमदस्वप्नकान्तिगतिषु (दिवादि०) धातो पचादिषु देवडिति पाठाद् इगुपधलक्षण क बाधित्वा अच् प्रत्यय । 'देवा' इति पदनाम निघ० ५ ६ देवो दानाद्वा दीपनाद्वा द्योतनाद्वा द्युस्थानो भवतीति वा नि० ७ १५]

अदेवी: असुरस्य दुष्टस्य नगरी १ १७४ ८ विद्यारहिता (विश =प्रजा) ६ ४९ १५ अशुद्धा (प्रज्ञा) ५ २.९ अप्रमदा क्रिया ५ २ १० अदिव्या (मिथती =हिंसती शत्रुसेना) ६ २५ ९ अविदुषी स्त्रिय ३ ३१ १९ अदिव्या अशुद्धा (माया =कपटछलयुक्ता प्रज्ञा) ७ १ १० समन्ताद् देदीप्यमाना विदुषी ६ ४९ १५ [दिवु+अच्=देव, स्त्रिया देवी, ततो नञ्समास.]

अदेवयन्तम् आत्मानमदेवमिच्छन्तम् (विद्वज्जनम्) २ २६ १ [देवाद् आत्मन इच्छाया क्यच्, 'न छन्दस्यपुत्रस्ये' ति ईत्वप्रतिषेध, ततो नञ्समास । देवयन्त =देवान् कामयमाना नि० ८ १८]

अदेवृघ्नि ! हे देवरसेविके (पत्नि) ऋ० भू० २१४ हे देवर को दुख न देने वाली स्त्रि स० प्र० १५३, अथर्व० १४ २ १८ [नञ्+देवृ+हन् हिंसागत्यो +टक्प्रत्ययश्छान्दस, स्त्रिया ङीप्, तत्सम्बुद्धौ रूपम्]

अद्धा साक्षात् ३ ५४ ५ प्रसिद्धम् ३३ ३९ [अद्धा इति सत्यनाम निघ० ३ १०)

अद्धि भुङ्क्ष्व १२ ६५ अशान १ १६४ ४० भक्ष ३ ५२ ७ [अद भक्षणे (अदादि०) धातोर्लोट्]

अद्भि: प्राणै १ ६५ ८ जलादिभि ६ ४९ १४ जलै १ १२२ ६ ससाधितैर्जलै १८ ३५ **अद्भ्य:**=जलाशयेभ्य १७ १ जलेभ्य ३१ १७ सुसस्कृतेभ्यो जलेभ्य १९ ७४ जलेभ्य प्रजाभ्यो वा १ ८० २ अप्सु गमनाय ३९ २ जलेभ्य प्राणेभ्यो वा ७ २१ [अप्+भिस 'अपो भि' इति तकारादेश]

अद्भुत. ! आश्चर्योत्तमगुणकर्मस्वभाव (अध्यापकोपदेशक) ५ १० २ आश्चर्यकर्मन्, भा०—आश्चर्यगुण (वायो=विद्वज्जन) २७ ३४ महाशय (विद्वज्जन), प्र०—अद्भुतमिति महन्नाम निघ० ३ ३ **अद्भुतम्**=आश्चर्यगुणकर्मस्वभावम्, भा०—सर्वशक्तिमन्त परमात्मानम् ३२ १३ आश्चर्यगुणकर्मस्वभावस्वरूपम् (परमेश्वरम्), प्र०—'अदि भुवो डुतच्' उ० ५ १ अनेन भू धातोरद्युपपदे डुतच् प्रत्यय १ १८ ६ अद्भुत, आश्चर्य, शक्तिमय ईश्वर को आर्याभि० २ ५२,३२ १३ आश्चर्यभूतमिव वर्त्तमानम् (परमेश्वरम्) १ १७० १ आश्चर्यस्वरूपम् (धनम्) १ १४२ १० आश्चर्यभूत रायस्पोषम् २७ २० **अद्भुतस्य**=आश्चर्यगुणयुक्तस्य (विज्ञानस्य) १ १२० ४ आश्चर्यगुणकर्मयुक्तस्य सैन्यस्य १ ७७ ३ **अद्भुत:**=आश्चर्ययुक्त (हेळ =अनादर) १ ९४ १२ आश्चर्यगुणकर्मस्वभावक (ईश्वर

सभाध्यक्षो वा) १ ६४ १३. आश्चर्यगुणकर्मस्वभाव (राजा) ५ २३ २ अत्यन्त आश्चर्यरूप ईश्वर आर्याभि० १४८ भा०—पवित्रस्वभाव (पति) ११७० आश्चर्य-स्वरूप (सवितादिलोक) ऋ० भू० १४१ आश्चर्ययुक्त (हेळ=अनादर) १ ६४ १२ **अद्भुता**=आश्चर्यरूपाणि (काव्या=कवीना कर्माणि) प्र०—अत्र 'शेश्छन्दसि०' इति लोप ५ ६६ ४, १ २५ ११ **अद्भुतान्**=आश्चर्यगुण-कर्मस्वभावान् (कवीन्=अध्यापकोपदेशकान्) ४ २ १२ ['अदि 'उपपदे भूधातोर्डुतच् प्रत्यय औणादिक । (अद्भुतम् इति महन्नाम निघ० ३ ३ अद्भुतम्=अभूतम् नि० १ ६ महत्सम्भृतम् नि० ६ २१]

अद्भुतक्रतू अद्भुता क्रतु प्रज्ञा कर्म्म वा ययोस्तौ (अध्यापकोपदेशकौ) ५ ७० ४ [अद्भुतम्=अभूतम्, क्रतु-शब्दो निघण्टौ प्रज्ञावाची कर्मवाची च । तयो समास]

अद्भुतैनसाम् अद्भुतानि महान्त्येनासि पापानि येषान्तेषाम् (दुष्टाना जनानाम्) ५ ८७ ७ [अद्भुतो व्याख्यात । एनस्=इण् गतौ धातो 'इण आगसि नुट् च' उणादि० ४ १९८ सूत्रेण असुन्प्रत्ययान्त]

अद्मन अत्तुमर्ह कर्मफलम् १ ५८ २. (अद भक्षणे धातो 'अन्येभ्योऽपि दृश्यते' अ० ३ २ ७५ सूत्रेण मनिन् । अद्म=अन्न भवति नि० ४ १६]

अद्मसत् योऽद्मानि सादयति परिपचति स (अग्नि) १ १२४ ४ [अत्र पर्णशुपिवण् णिलुक् । अद्मोपपदात् पद्लृ विशरणगत्यवसादनेपु धातो क्विप् । अद्मसादिनीति वान्नासनिनीति वा नि० ४ १६)

अद्मसदः येऽद्मसु अत्तव्येपु सीदन्ति ते (पर्वता=मेघा) ६ ३० ३ **अद्मसद्वा**=योऽद्मसु भोक्तव्येपु सीदति (अग्नि) पावक ६ ४ ४ [अद्म+पद्लृ+क्विप्]

अद्य अस्मिन्नहनि ८ ४५ इदानीम् ५ ५८ ३ इसी वर्त्तमान समय मे स० प्र० २४६,३२ १४ अस्मिन् दिने, प्र०—अत्र 'सद्य परुत्परार्यैषम० ५ ३ २२, अनेनाऽय निपातित १ २३ २३ अस्मिन् वर्त्तमाने समये १५ ४४ भा०—सदैव ३३ ५१ अस्मिन् वर्त्तमाने दिने १ ४७ ३ अधुना ६ ३७ १ अस्मिन् दिवसे ३३ १७ इसी समय मे आर्याभि० २५३,३२ १४ [अस्मिन्नहनि अद्य । इदमो ऽश्भावो द्यश्च प्रत्ययोऽह्नि । अद्य=अस्मिन् द्यवि नि० १ ६]

अद्यत अत्ति २८ २३ [अद् भक्षणे धातो रूपम्]

अद्यः अत्तु योग्य (पदार्थ) २ १३ ६ **अद्याय**=अत्तु-महीय (इष्टभोगाय) ७ ११ ५ [अद भक्षणे धातो क्यप् प्रत्ययश्छान्दस]

अद्युतः अप्रकाशकान् भूम्यादीन् ६ ३६ ३ **अद्युम्**=प्रकाशरहित व्यवहारम् ७ ३४ १२ [द्युत् दीप्तौ धातो क्विप् । ततो नञ्समास । द्युरित्यह्नो नामधेय द्योतत इति सत नि० १ ६]

अद्यूत्ये द्यूते भवो व्यवहारो द्यूत्यश्छलादिदूषितस्तद्भिन्ने (सद्व्यवहारे) १ ११२ २४. अविद्यमानानि द्यूतानि यस्मिँस्तस्मिन् भवे (अवसे=रक्षणाय) ३४ २९ [द्यूत प्राति० भवार्थे यत् प्रत्यय, ततो नञ् समास]

अद्यौत् द्योतयति १ १२३.७ प्रकाशयति १ १२२ १५ प्रकाशते ४ ५ १५ विद्योतयति प्रकाशते १ ११३ १४ द्योतते ३ ५ ९ [द्युत् दीप्तौ धातो रूपम्]

अद्रयः मेघा ४ १९ ५ मेघा पर्वता वा ३ ३२ १६. **अद्रिणा**=मेघेन सह १ १६८ ६ **अद्रिभिः**=शिलाखण्डा-दिभि १ १३० २ शैलाऽवयवैरुलूखलादिभि १ १३५ ५ प्रस्तरैर्मेघैर्वा १.१३७ ३ मेघै, प्र०—अद्रिरिति मेघना० १.१०,२०.३१ मेघै शैलैर्वा १ १२१ ८ **अद्रिम्**=मेघम्, प्र०—अद्रिरिति मेघना० १ १०, १ ७ ३ मेघमिव ४ २१ ६ पर्वताकारम् (मेघम्) १ ६१ ७ मेघमिव शत्रुम् ४ २ १५. पर्वतमिव १ ८८ ३ **अद्रिः**=मेघ, प्र०—अद्रिरिति मेघ-नामसु पठितम् निघ० १ १०, १ १४ **अद्री**=मेघविद्युतौ ७ ४२ १ आनन्दितौ पत्नीयजमानौ ७ ३९ १ यौ न द्रवतो विनश्यत कदाचित्तौ (इन्द्राग्नी=विद्युद्भौतिकाग्नी) १ १०९ ३ **अद्रेः**=मेघात् १ ९३ ६ **अद्रेः**=शैलस्य १ ११७ १६. मेघस्य ३ ३१ ६ **अद्रौ**=शैलादौ घने पदार्थे १ ७० २ मेघे ५ ८५ २ मेघे शैले वा ४ ३१ [अद भक्षणे (अदादि०) धातो 'अदिशदि०' उणादि० ३ ६५ सूत्रेण क्रिन् प्रत्यय । अद्रि मेघनाम निघ० १ १०. अद्रिरादृणात्येतेन अपि वाऽत्ते स्यात् नि० ४ ४ अद्रय आदरणीया नि० ६ ८ गिरिर्वाऽद्रि श० ७ ५ २ १८. ग्रावाणो वा अद्रय तै० स० ६ १ ११ ४ अद्रिरसि श्लोककृत् काठ० १ ५]

अद्रिजाः यो मेघपर्वत वृक्षादीन् जनयति स (परमेश्वर) १० २४ योऽद्रीन् मेघान् जनयति (ब्रह्म जीवश्च) १२ १४ योऽद्रेर्मेघाज्जात (जीवात्मा) ४ ४० ५. [अद्रि+जनी प्रादुर्भावे (दिवादि०) धातो 'जनसनखन०' अ० ३ २ ६७ सूत्रेण विट् प्रत्यय । 'विड्वनोरनुनासि-कस्यात्, अ० ६ ४ ४१ सूत्रेणाकारादेश । अथवा अद्रि-

आचारे क्विप्, तत गतृ प्रत्यय]

अद्वयाविनम् यो द्वयोर्न विद्यते त सरलगामिनम् (वह्निम्) २ २ १५ अद्वन्द्वभावरहितम् (विद्यार्थिनम्) ५ ७५ ५ **अद्वयाविनः**=न विद्यते द्वितीयो यस्मिँस्तस्य (पुत्रस्य) १ १५६ ३ **अद्वयावी**=छलकपटादिरहित (राजादिजन) ७ ५६ १८ [द्वयप्राति० मत्वर्थे 'छन्दसि विनिप्रकरणेऽष्ट्रामेखलाद्वयोभय०' अ० ५ २ १२२ वा० सूत्रेण विनि प्रत्ययो दीर्घत्वम् च नञ्समासे रूपम्]

अद्वयाः अविद्यमान द्वय यस्मिन् स (ईश्वर) १ १८७ ३ [नञ्+द्वि+तयप् । तयप्स्थाने अयजादेश]

अद्विषेण्यः अद्वेष्टा (ईश्वर) १ १८७ ३ [द्विष अप्रीतौ (अदादि०) धातो छान्दसत्वात् कर्त्तरि केन्य प्रत्यय । नञ्समासश्च]

अद्वेषः अविद्यमानो द्वेपो यस्मिन् स (ईश्वर) १ २४ ४ द्वेपभावरहिता (विद्वज्जना) १ १८६ १० द्वेपरहितान् (मनुष्यान्) ५ ८७ ८ **अद्वेषे**=द्वेष्टुमनर्हे प्रीतिविषये १२ २९ [द्विष अप्रीतौ धातोर्भावे घञ्]

अध अनन्तरे प्र०—अत्र पृषोदरादित्वात् थस्य ध ८ ५ अथ, प्र०—अत्र वर्णव्यत्ययेन थस्य ध १९ ६६ अथ, प्र०—अत्रापि वर्णव्यत्ययेन धकार. १ १० १ ६ अनन्तरम्, प्र०—अथेत्यस्यार्थे शब्दारम्भेऽधेत्यव्ययम् १ ७२ १० आनन्तर्ये ४ २ १६ निश्चयार्थे १ १५ १० मङ्गले, प्र०—अत्र वर्णव्यत्ययेन थस्य ध १५ ४५ [अधा=अथ इनि नि० ३ २]

अधत्त दधाति २ २२ २ धरति ६ ८ ३ **अधत्तम्**= दध्यातम् १ १८० ३ पोषयेतम् १ ११६ ८ धत्त, धारयत १ ६३ ५ भरतम् १ ११६ १५ पुष्येतम् १ ११६ १६ **अधत्थाः**=दध्या ५ ३२ २ [डुधाञ् धारणपोषणयो (जु०) धातो सामान्ये लङ्]

अधमम् निकृष्टम् (पाश=वन्धनम्) १२ १२ नीच तमोऽन्धकारम् ६ १६ **अधमान्**=पापाचारान् (नीचजनान्) ४ २८ ४ **अधमानि**=निकृष्टानि (वन्धनानि) १ २५ २१]

अधमत् धमति निराकरोति ४ ५० ४ धमति ३३ ६५ **अधमः**=धम कम्पय १ ५१ ५ शब्दै शिक्षय १ ३३ ५ शिक्षय, अग्निना सयोजयति वा, प्र०—अत्र लोडर्थे लडर्थे वा लुट् १ ३३ ६ [ध्मा शब्दअग्निसयोगयो (भ्वा०) धातोर्लङ् सामान्ये । 'पाघ्रा०' इत्यादिना सूत्रेण धमादेश । धमन्तिर्गतिकर्मा नि० ६ २]

अधयत् पिवति ५ १ ३. धयति पिवति ३ १ १०. [धेट् पाने (भ्वा०) धातोर्लङ्]

अधरकण्ठेन अधरस्थेन कण्ठेन २५ २

अधरम् अधोगतिम् (तम=अन्धकार कारागृहम्) १८ ७० निम्नम् (देशम्) २ १२ ४ **अधरः**=नीच (दुष्ट-कर्मैव द्वेष्यो जन) ३ ५३ २१ **अधरा**=नीचानि (पाप-फलानि) १ ३३ १५ **अधरान्**=अध पतितान् (दुर्जनान् शत्रून्) १७.६३ नीचान् (जनान्) १.१०१ ५ **अधरात्**= नीचे से ६ १९ ९ **अधरः**=अधस्थ (मेघ) १ ३२ ९ नीच (दुर्जन) ३ ५३ २१ **अधरेण**=मुखादधस्थेन (ओष्ठेन) २५ ५ [अधर=अधोर नि० ३ ११]

अधराक् दक्षिणस्या (दिश) ६ ३६ अधस्तात् १० १९ [अधराची+अस्ताति प्रत्यय । 'अञ्चेर्लुक्' अ० ५ ३ ३० सूत्रेणास्तातेर्लुक् 'लुक्तद्धितलुकि' सूत्रेण स्त्री-प्रत्ययस्यापि लुक्]

अधराचीनम् योऽधोऽञ्चति तम् (मेघम्) २ १७ ५ **अधराचीः**=या अधरान् नीचानञ्चन्ति ता (औषधय (स्त्रियो वा) १९ ५ [अधराच् प्राति० 'विभाषाञ्चेरदिक् स्त्रियामि' ति सूत्रेण ख-प्रत्यय स्वार्थे]

अधर्माय=धर्माचरणरहिताय (दुर्जनाय) ३० १० [धृञ् धारणे धातो 'अर्त्तिस्तु०' उणादि० १ १४० सूत्रेण मन् प्रत्यय । ततो नञ्समास]

अधवन्त धुन्वन्ति ७ १८ १५ [धूञ् कम्पने (क्र्या०) धातो लङ् । विकरणव्यत्ययेन श्ना न भवति]

अधस्तात् अधो निपात्य ३ ३० १६. [अधर प्राति० अस्ताति प्रत्यय । 'अस्ताति च' अ० ५ ३ ४० सूत्रेण अधरस्थाने अध् आदेश]

अधस्पदम् नीचाऽधिकारम् (पृतन्युम्—शत्रुम्) १५ ५१ [अधस्+पदम् 'अध शिरसी पदे' अ० ८ ३ ४७ सूत्रेण सकारादेश]

अधः अनन्तरम् १ १८० ७ अधोगामिन (जना) १६ ५७ अर्वाक् ३३ ७४ हीनताम् ७ ३८ ६ [अध=न धावतीत्यूर्ध्वगति प्रतिषिद्धा नि० ३ ११]

अधाक् दहति २ १५ ४ [दह भस्मीकरणे (अदा०) धातोर्लुङ् । 'मन्त्रे घसह्वर०' अ० २ ४ ८० सूत्रेण लेर्लुक्]

अधात् दधाति ४ ३४ १ दध्यात् ५ ४० ८ समा-दधाति १९ ९३ **अधातम्**=धारण करो २० ६६ **अधाताम्**=दध्याताम् २० ५७ डुधाञ् धारणपोषणयो धातोर्लुङ् । 'गातिस्थाघु०' इति सूत्रेण सिचो लुक्]

अधायि ध्रियते १ १६२ ७ धृता १ ११९ २ धीय-

ताम् १ १०४ ७ धीयते १ ६०.४ ध्रियेत ७ ३४ १४. [डुधाञ् धारणपोषणयो (जु०) धातो: कर्मणि लुङ्। अधायि=अध्यायि नि० ६ २२]

अधारयत् धारयेत्, धारयतु १३ २४ धारयति २ १७ ५ **अधारयतम्**=धारयतम् ५ ६२ ३ **अधारयन्**=धारयन्तु ३ २ ७ धारयन्ति ३३ ७५ **अधारयन्त**=धारयन्ति प्र०—अत्र लडर्थे लङ् १ २० ८ धृतवन्त १ १०३ १ **अधारयः**=धारय १ ५२ ८ धरति २ १३ ७ धारयसि ६ १७ ७ धरितवानसि ऋ० भू० १४४, ८ १२ ३० [धृञ् धारणे (भ्वा०) धातोर्णिजन्ताल् लुङ्]

अधारयः अधारयन् सन् (सूर्य) प्र०—अत्र नञुपपदात् 'धारिपारीति' श प्रत्यय १ ५१ ४ [नञ्+धारि+श । 'अनुसर्गाल् लिम्पविन्दधारि०' अ० ३.१ १३८ सूत्रेण कर्त्तरि श प्रत्यय]

अधि उपरिभावे, अधिष्ठातृभावे ३१ ५. उपरिभावे १६ ५४ उपरान्तसमये १ ४८ ७. उपरि विराजमाने १७ १४ उपरिभागे १ १६ ६ अधिकार्थे १ ६ १० अधीत्युपरिभावमैश्वर्यं वा प्राह निरु० १ ३, १ २२ अधिष्ठातृत्वेन सर्वोपरि विराजमाने १७ ३० उपरि ४ १८ १२ उपरित १ ६ ६ अव्यक्षतया १ ८४ १७. आधेयत्वे १ ८८ ३ आधाराऽर्थे १ १२६ १ अनन्तराऽर्थे २ ३० ३ उत्कृष्टे ३ १६ ५ मध्ये ४ ३० १२ अधिकार-योगे स० वि० १६५ १० ८५ ४६ [अधीत्युपरिभावम् ऐश्वर्यं वा नि० १ ३]

अधिकल्पिनम् अधिगतसामर्थ्ययुक्तम् (जनम्) ३० १८ [अधि+कृपु सामर्थ्ये धातोर्भावे घञ्, ततो मत्वर्थे इनि]

अधिकिरते विकिरति ४ ३८ ७ [कॄ विक्षेपे (तुदादि०) धातोर्लट्]

अधिकृण्वन्ते आधेयत्व कुर्वन्ति तदाचरणायाधिकार ददति, प्र०—व्यत्ययेनाऽत्रात्मनेपदम् १ ८८ ३ [अधि+डुकृञ्करणे धातोर्लट् । विकरणव्यत्ययश्च । कृण्वन्ति=कुर्वन्ति नि० ६ ३२]

अधिक्षियन्ति निवसन्ति ५ २० आधाररूपेण निवसन्ति १ १५४ २ [अधि क्षि निवासगत्यो धातोर्लट्]

अधिगमेम उपरिभावेन गच्छेम, भा०—आप्नुयाम, प्र०—अत्र 'बहुल छन्दसि, इति शपो लुक् १८ ५१. [अधि+गम्लृ गतौ धातो लिङ् । शपो लुक् च ।]

अधिगर्त्यस्य अधिकगुन्दरे गर्त्ते गृहे भवस्य (मद्य = मधुरादिपदार्थस्य) ५ ६२ ७. [अधि+गर्त्त प्राति० भवार्थे यत् प्रत्यय]

अधिचक्रिरे=उपरि कुर्वन्ति १.८५.२ [अधि+कृञ्+लिट्]

अधिजिगाति अधिगच्छति ५ ८७ ४ [अधि+जिगाति । जिगाति गतिकर्मा निघ० २ १४]

अधिजज्ञिरे अधिजायन्ते भा०—जाता ३२ २ अधिजज्ञे+प्रादुर्भवति १३ ३४ [अधि+जनी प्रादुर्भावे धातोर्लिट्]

अधिजातः उपरिजात (विद्वान्) ३५ २२. [अधि+जनीप्रादुर्भावे धातो क्त । नकारस्याकारादेश]

अधिजायसे उत्पन्न होता है म० प्र० १५६ [अधि+जनी प्रादुर्भावे धातोर्लट् । जनेर्जादेश]

अधित दधाति १ १४४ ५ दध्यात् २१ ४६. [डुधाञ् धारणपोषणयोर्धातोर्लुङ् । 'स्थाघ्वोरिच्च' सूत्रेणेकारादेश कित्वञ्च]

अधितस्थुः तिष्ठन्ति १ १६४ २ [अधि+ष्ठा गतिनिवृत्तौ धातोर्लिट् । अधितस्थु +अभिसन्तिष्ठन्ते नि० ४ २७]

अधितिष्ठति उपरि तिष्ठतु १ ८२ ४ ईश्वरत्वे नोपरिभावत्वेन प्रवर्त्तते १ ५१ ११ **अधितिष्ठन्**=उपरि स्थित सन् (इन्द्र +शिल्पविद्यैश्वर्ययुक्तो जन) ३ ३५ ४ **अधितिष्ठसि**=उपरि तिष्ठसि १८ ५५ [अधि+ष्ठा गतिनिवृत्तौ धातोर्लट्]

अधिथाः धारयेथा ४ १७.६. दध्या ६ ३१ १ [अधि+डुधाञ् धारणपोषणयो धातोर्लुङ । 'स्थाघ्वोरिच्च' सूत्रेणेकारादेश कित्वञ्च]

अधिधत्त अधिधरत १७ १ [अधि+डुधाञ्+लोट्]

अधिधायि उपरि ध्रियते ४ २८ २ **अधिधाः**=उपरि धेहि १ ५४ ११ **अधिधेहि**=उत्कृष्टतया स्थापय ३ १६ ५

अधिनिदधुः अधिकतया निनरा धरन्ति १ ७२ १० उपरि नितरा धरन्तु १ ७३ ४ [अधि+नि+डुधाञ्+लिट्]

अधिनिषेद उपरि निषीदन्ति, प्र०—अत्र वचनव्यत्ययेनैकवचनम् ४ ३५ ८. **अधिनिषेदुः**=स्थित है स० प्र०

२३६, १ १६४ ३६ स्थित हुए और होते है स० वि० २१५, १ १६४ ३६ अधिनिषीदन्ति १ १६४ ३६ [अधि+नि+षद्लृ विशरणगत्यवसादनेषु धातोर्लिट्]

अधिपतयः अधिष्ठातार (वसव+अग्न्याद्या) १५ १० स्वामिन १५ १२ अधिष्ठातार पालका (मन्यासिनो ब्रह्मचारिण) १६ ५६ उपरिष्टात्पालका (रुद्रा=बलवन्ता वायव) १५ ११ **अधिपतये**=सर्वाधिष्ठात्रे, भा०+प्रजाधिपतये (राज्ञे) २२ ३२ सर्वाधिष्ठातृणामुपरिवर्त्तमानाय (विद्वज्जनाय) ६ २० पतीना पालकानामधिष्ठात्रे, (राजपुरुषाय) १८ २८ सर्वस्वामिने राज्ञे २२ ३० **अधिपतिना**=अधिष्ठात्रा, भा०—अध्यक्षेण १५ ६ **अधिपतिः**=उपरिष्टात् पालक (पति) १५ १० स्वामी (पति) १३ २४ अधिष्ठाता (सोम=ओषधिराज) १४ ३१ द्योतकानामधिष्ठाता (सूर्य) १५ ११ अन्व०=सर्वस्य स्वामीश्वर, पत्यु पति (ईश्वर) १४ २८ [अधि+पति+जस्। प्रजापतिर्वाऽधिपति श० ८ २ ३ १२]

अधिपत्नीम् अधिष्ठातृत्वेन पालयिकाम्, अन्व०—सूर्य्याम् (स्त्रीम्) १४ ५ **अधिपत्नी**=अधिष्ठात्र्यौ (अहोरात्रे) १४ ३० अधिपतिना महिता (अदिति=भूमि) १४ २६ सर्वासा दिशामुपरि वर्त्तमाना (दिक्) १५ १४ गृहेऽधिकृता स्त्री १४ १३ [अधि+पति प्राति० 'पत्युर्नो यज्ञसयोगे' सूत्रेण ङीप् नकारादेशश्च]

अधिपतात् उपरि गच्छेत् १ ११६ ३ (अधि+पत्लृ गतौ धातोर्लेट्। 'लेटोऽडाटौ' सूत्रेणाडागम]

अधिपाः अधिक पालक [अग्नि=उपदेशक आचार्य) १२ ५८ (अधि+पा रक्षणे धातोर् अच् प्रत्यय]

अधिपिपिशे उपरिभावेनाऽऽश्रीयते ५ ५७ ६ [अधि+पिश अवयवे (तुदा०) धातोर्लिट्]

अधिपूरुषः अधि उपरि, पश्चाद् ब्रह्माण्डतत्त्वावयवै पुरुष सर्वप्राणिना जीवाऽधिकरणो देह ऋ० भू० १२२ [अधि+पुरुष। 'अन्येषामपि दृश्यते' इति दीर्घत्वम्]

अधिप्रभरे स्वीयचित्ते धरे १ १२६ १ [अधि+प्र+भृञ् भरणे (भ्वादि०) धातोर्लेट्]

अधिप्रवोचत् अधिप्रवदेत् १ १६४ १८ [अधि+प्र+वच परिभाषणे (अदादि०) धातोर्लुङ् सामान्ये। 'बहुल छन्द०' इत्यड् अभाव। 'अस्यति०' इत्यड् 'वच उम्' इति उम्]

अधिबुध्यमानौ सन्तानोत्पत्ति आदि की क्रिया को अच्छी प्रकार से जानने हारे (स्त्री पुरुष) स० वि० १४०, १४ २ ४३ [अधि+बुध अवगमने धातो कर्मणि शानच्]

अधिब्रवत् अध्यक्षतया ब्रूयात् १ ८४ १७. **अधिब्रवीतु**=उपरिभावेनोपदिशतु ६ ७५ १२ **अधिब्रुवन्**=अधिक ब्रुवन्तु, भा०—सत्यमुपदिशेयु १७ ५२. **अधिब्रुवन्तु**=अधिक ब्रुवन्तु १६ ५७. अधिष्ठातृभावेनोपदिशन्त्वध्यापयन्तु वा १६ ५८ **अधिब्रूहि**=अधिकतयाऽऽज्ञापय १ ११४ १० अधिकमुपदिश १५ १ उपरिभावेनोपदिश ३४ २७ विजयविधिमुपदिश १५ २ [अधि+ब्रूञ् व्यक्ताया वाचि (अदादि०) धातोर् लेट्]

अधि भव उपरि भव ४४ ५ अधिकारयुक्त हो अर्थात् सब से अविरोधपूर्वक प्रीति से वर्त्ता कर स० वि० १३५, १० ८५ ४६ [अधि भू सत्तायाम् (भ्वादि०) धातोर्लोट्]

अधिभोजना अधिकानि भोजनानि ६ ४७ २३ [अधि+भुज पालनाभ्यवहारयो (रुधादि०) धातो 'ल्युट् च' अ० ३ ३.११५ सूत्रेण ल्युट्। योर् अनादेश]

अधिभ्रशत् अधिक नष्ट स्यात् १२ ११ [अधि+भृशु अध पतने (दिवादि०) धातोर् लेट्]

अधिमन्थनम् उपरिस्थ मन्थनम् ३ २६ १. [अधि+मन्थ विलोडने (भ्वादि०) धातोर्ल्युट् भावे]

अधियेतिरे उपरि प्रयतन्ते १ ६४ ४ (अधि+यती प्रयत्ने (भ्वादि०) धातोर्लिट्। 'अत एकहल्मध्ये०' इति सूत्रेणेत्वाभ्यासलोपौ]

अधिराजम् सर्वेषामुपरि राजमानम् ३४ ४६ **अधिराजः** सर्वोपरिविराजमान (सभापति राजा) स० वि० १८३ राजाऽधिराज ऋ० भू० १४५ ('राजनि अधि' इति विभक्त्यर्थेऽव्ययीभावसमासे 'अनश्च' अ० ५ ४ १०८ सूत्रेण टच् समासान्त प्रत्यय]

अधिरोचने उपरि प्रकाशे १ १५५ ३ [अधि+रुच दीप्तावभिप्रीतौ च (भ्वादि०) धातोर्भावे ल्युट्]

अधिरोहय सन्तानो से अधिकाधिक बढा स० वि० १३६ अथर्व० १४ २ ३७ **अधिरोह**=उपरिभावेन रोह १ ५६ २ [अधि+रुह बीजजन्मनि प्रादुर्भावे च (भ्वा०) धातोर्णिजन्ताल् लोट्]

अधिवक्ता अधिक वदतीति स (इन्द्र =विद्वान्) १ १०० १६ सर्वेषामुपर्य्यधिष्ठातृत्वेन वर्त्तमान सन् वैद्यकशास्त्रस्याऽध्यापक, भा०—सर्वेषामधिष्ठाता (भिषग् =वैद्य) १६ ५ यथावदनुशासिता १ १०२ ११ **अधिवक्तारम्**=सर्वेषामुपरि उपदेशकम् २ ३८ ८ [अधि+ब्रूञ् व्यक्तायां वाचि धातोस्तृच् कर्त्तरि। 'ब्रुवो वचि' इति वचिरादेश]

अधिवपते उपरि स्थापयति १ ६२ ४ [अधि+डुवप् बीजसन्ताने छेदने च (भ्वा०) धातोर्लट्। 'अनेकार्था अपि धातवो भवन्ति' इति महाभाष्यवचनात् स्थापनार्थे ऽपि]

अधिवर्धत् उपरिभावेन वर्धयेत् ५ ६२ ५ **अधिवर्धताम्**=उपरिभाव वर्धताम् २७ ४ [अधि+वृधुवृद्धौ (भ्वा०) धातोर्लोट्]

अधिवासम् उपरि स्थापनीयम् (वस्त्रम्) २५.३६ [अधि+वस आच्छादने (अदादि०) धातोर्घञ् प्रत्यय]

अधिविक्षरन्ति अक्षराण्यधिवर्षन्ति १ १६४ ४२. [अधि+वि+क्षर सञ्चलने (भ्वा०) धातोर्लट्]

अधिविरप्शते उपरि विशेषेण राजते ४ ४५ १ विरप्शी महन्नाम निघ० ३ ३]

अधिविराजतः अधिक देदीप्येते १ १८८ ६ [अधि+वि+राजृ दीप्तौ (भ्वा०) धातोर्लट्]

अधिवोच उपरिभावेनोपदिश १ १३२ १ **अधिवोचत**=प्रवदत २ २७ ६ **अधिवोचः**=अधिकतया उच्याः। प्र०—अत्र लिडर्थे लुङ्। 'छन्दस्यमाङ्योगेऽपि' अ० ६ ४ ७५ इत्यडभाव ६ ३३. [अधि+ब्रूञ् व्यक्तायां वाचि धातोर्लुङ् सामान्ये। 'ब्रुवो वचि' रिति वचि। 'अस्यतिवक्ति०' इत्यङ् 'वच उम्' इत्युमागम। अडभावश्च]

अधिश्रितम् उपरि स्थितम् (भुवन=जगत्) ४ ५८ ११ अधिश्रित =प्रकाशित होता है स० प्र० ३१४ आश्रित सन् प्रकाशित (चन्द्र) ऋ० भू० १४३ [अधि+श्रिञ् सेवायाम् (भ्वा०) धातो क्त]

अधिश्रियः अधिका लक्ष्म्य १ १३६ ३ [अधि+श्री]

अधिषन्ति उपरि सन्ति १८ ६७ [अधि+अस भुवि अदादि०) धातोर्लट्। 'उपसर्गप्रादुर्भ्याम्०' अ० ८ ३ ८७ सूत्रेण मूर्धन्यादेश]

अधिषवणे सोमलताद्योपधिसाधके (मुशलोलूखले) १८ ११ [अधि+षुञ् अभिषवे (स्वा०) धातो, करणे ल्युट्। जिह्वाधिषवणम् मै० ३ ८ ८, ४.५ ६ त्वगधिषवण चर्म काठ० २५ ६]

अधिषवण्ये अधिगत सुवन्ति याभ्यान्तेऽधिषवणी तयोर्भवे (भक्ष्यपदार्थे), प्र०—अत्र 'भवेच्छन्दसि' इति यत् १ २८ २.

अधिष्ठः उपरिस्थ (सभाध्यक्ष) १ ४७ ७. [अधि+ष्ठा गतिनिवृत्तौ (भ्वा०) धातो 'सुपि स्थ' अ० ३ २ ४ सूत्रेण क]

अधिष्ठानम् अधितिष्ठन्ति यस्मिंस्तत् १७ १८ इस ससार की रचना करने वाला (ब्रह्म) आर्याभि० २ ३२ आधार इव (ब्रह्म) ७ १८ [अधि+ष्ठा गतिनिवृत्तौ धातोरधिकरणे ल्युट्]

अधिष्ठाम अधितिष्ठेम १ १३६ ४ [अधि+ष्ठा गतिनिवृत्तौ धातोर्लट्। छान्दसत्वात् तिष्ठादेशो न भवति]

अधिसन्दधुः अधिसन्दध्यु ३ ३ ३ [अधि+सम्+डुधाञ् धारणपोषणयो (जु०) धातोर्लिट्]

अधिसमोताः अधिकता से निवास और मित्रता करने वाले (सब दिव्य गुण और विद्वान्) स० वि० ८० अथर्व० ११ ५ २४.

अधिसादयामि उपरि स्थापयामि १३ १३. [अधि+षद्लृ विशरणगत्यवसादनेषु (भ्वा०) धातोर्णिजन्ताल्लट्]

अधिसीदत उपर्युपरिस्थिता भवत १५ ५४ उपरिभावेन सीदत १७ ७३ उपरिभावेन तिष्ठत १८ ६१ **अधिसीदन्**=उपरि गच्छन् (शिल्पविद्यावित्) १ ८५ ७ [अधि+षद्लृ विशरणगत्यवसादनेषु (भ्वा०) धातोर्लोट्। पाघ्रा०' इत्यादिसूत्रेण सीदादेश शिति]

अधीतम् पठन-पाठन आर्याभि० २ १ [अधि+इङ् अध्ययने (अदादि०) 'नपुसके भावे क्त' इति सूत्रेण क्त प्रत्यय]

अधीतौ अध्ययने २ ४ ८ [अधि+इङ् अध्ययने+क्तिन् स्त्रियाम्]

अधीत्य स्वर और पाठ मात्र को पढकर स० प्र० ६६ [अधि+इङ् अध्ययने+क्त्वा। क्त्वास्थाने ल्यप् च]

अधीथ स्मरण करो ७ ५६ १५ [अधि+इक् स्मरणे (अदादि०) धातोर्लट्]

अधीमसि सर्वोपरि विराजमान प्राप्नुम १८० १५ **अधीमहि**=प्राप्नुयाम ४ ३२ १६ **अधीयन्त**=

अधीयताम् १४ २८ [अधि+इण् गतौ (अदादि०) धातोर्लेट् । 'इदन्तो मसि' अ० ७ १.४६ सूत्रेण 'मसि' इकारान्तो भवति]

अधीरा धैर्यरहिता (स्त्री) १ १७९ ४ [धीर = धीमान् नि० ३ १२ धीरा प्रज्ञानवन्तो ध्यानवन्त नि० ४ ६]

अधीवासम् अधीवासमिव घासादिकम् १ १४० ६ अधि उपरि वास आच्छादन यस्य तम् (विद्युदग्निम्) १ १६२ १६ उपरि स्थापनीयम् २५ ३९ [अधि+वस आच्छादने (अदादि०) धातोर्घञ् । पूर्वपदस्य च दीर्घत्वम्]

अधीहि उपरि स्मर १ ७१ १० [अधि+इक् स्मरणे (अदादि०) धातोर्लोट्]

अधुक्षन् प्रपूरयन्तु २ ३६ १ **अधुक्षत्** प्रपिपूर्द्धि, प्र०—अत्र लोडर्थे लुङ् १ ३ [दुह प्रपूरणे (अदादि०) धातो सामान्ये लुङ् । 'शल इगुपधात्०' इति च्ले क्सादेश । 'हो ढ' 'पढो क सि' इति ढत्वकत्वे]

अधुक्षः दोग्धुमिच्छसि, भा०—प्रपूरयसि वा प्रपूरयितुमिच्छसि १ ३ प्र०—अत्र लडर्थे लुङ् [दुहप्रपूरणे (अदादि०) धातो सामान्ये लुङ्]

अधुः दध्यासु २ ६४ आच्छादयन्ति ४ १३ ४ [डुधाञ् धारणपोषणयो (जु०) धातोर्लुङ् । 'गातिस्थाघु०' सूत्रेण सिचो लुक्]

अधूनुतम् कम्पाती हैं ३ १२ ६ **अधूनोत्** कम्पयति १ ५९ ६ [धूञ् कम्पने (क्र्यादि०) धातो सामान्ये लङ्]

अधूर्षत् हिसन्तु ५ १२ ५ [धूरी हिसायाम् (दिवादि) धातोर्लुङ्]

अधूषत दुष्टान् दोषाश्च कम्पयन्ति, अन्व०—धुन्वन्ति प्र०—अत्र लडर्थे लुङ् ३ ५१ दूरीकुरुत १ ८२ २ [धू विधूनने (तुदादि०) धातोर्लुङ्]

अधृष्टम् अधर्षितम् (छर्दि = गृहम्) ६ ६७ २ **अधृष्टाः [अधृष्टासः]** अधर्षणीया (गिर = सुशिक्षिता वाच) ७ ३ ८ धृष्टतारहिता अप्रगलभा (वसव = जिज्ञासवो विद्यार्थिन) ६ ५० १५ अप्रगलभा (वसव = विद्वास) ६ ५० ४ शत्रुभिरधर्षणीया (मरुत = शूरवीरा जना) ६ ६६ १० [जिधृषा प्रागल्भ्ये (स्वा०) धातो क्त]

अधेनुम् अदोहयित्रीम् (गा = पृथिवीम्) १ ११७ २० [धेनुर्धयनेर्वा धिनोतेर्वा नि० ११ ४२ तत्प्रतिषेध]

अधेन्वा अविद्वान् ऋ० भू० ३१७ सुशिक्षा शब्द, अर्थ और सम्बन्ध के बोध से रहित वाणी प० वि० ॥ [अधेन्वा = नास्मै कामान् दुग्धे नि० १ २० धेनुरिति वाङ्नाम निघ० १ ११ धेना वाङ्नाम १ ११]

अधोअक्षाः अधोऽर्वाचीना अक्षा इन्द्रियाणि येषान्ते (विद्वज्जना), प्र०—अक्षा इति पदनाम० निघ० ५ ३, ३ ३३ ९

अधोक् प्रायात् ४ १९ ७

अधोरामः अध क्रीडी (पक्षी) २९ ५८ **अधोरामौ** अधोभागे श्वेतवर्णौ (पशू) २९ ५९ अधोरमण ययोस्तौ (अश्विनौ = पशू) २४ १ [अधोराम सावित्र इति पशु समाम्नाये विज्ञायते, कस्मात् सामान्याद् इत्यधस्तात् तद्वेलाया तमो भवति, एतस्मात् सामान्याद् अधस्ताद् राम = अधस्तात् कृष्ण । नि० १२ १४]

अध्यक्षः स्वामी (परमात्मा) स० प्र० २८१, १० १२९ ७ **अध्यक्षाय** अधिरुपरिभावेऽन्वेषणेऽक्षाण्यक्षिणी वा यस्य यस्माद्वा तस्मै (सभाध्यक्षाय) ४ १९. [अधि अक्षिपदयोर्बहुव्रीहिसमासे 'बहुव्रीहौ सक्थ्यक्ष्णो०' अ० ५ ४ ११३ सूत्रेण समासान्त षच्]

अध्यजायत अधिजायते १३ ४५ उत्पन्नम् प० वि० ॥ [अधि+जनी प्रादुर्भावे (दिवा०) धातोर्लङ् । 'ज्ञाजनोर्जा' इति जादेश]

अध्यतिष्ठत् अधिष्ठातृभावेन वर्त्तते १७ २० अधिष्ठाता भवति १ १६३ ९ सब के ऊपर विराजमान हो रहा है आर्याभि० २ ३६ १७ २० उपरि तिष्ठेत् २९ २० [अधि+ष्ठा गतिनिवृत्तौ (भ्वा०) धातो सामान्ये लङ्]

अध्यधत्तम् उपरि धरतम् १ ११७ ८ [अधि+डुधाञ् धारणपोषणयोर्धातो सामान्ये लङ्]

अध्यधारयः उपरि धरति २ १३ ७ [अधि+धृञ् धारणे धातोर्णिजन्ताल् लङ्]

अध्यवधीः अधिहन्या ४ ३० १५ [अधि+हन हिसागत्यो (अदादि०) धातो सामान्ये लुङ् । 'लुङि च' इति सूत्रेण वधादेश]

अध्यवोचत् उपदिशेत् १६ ५ [अधि+ब्रूञ् व्यक्ताया वाचि धातो सामान्ये लुङ् । 'ब्रुवो वचि' रिति वचिरादेश । अङ् उमागमश्च]

अध्यस्थात् अधितिष्ठेत् १७ ५४ अधितिष्ठति ५ ३१ १ [अधि+ष्ठा गतिनिवृत्तौ+लुङ् । 'गातिस्था०' सूत्रेण सिचो लुक्]

अध्यस्थाः अध्युपरि तिष्ठन्तीत्यध्यस्था (प्राणिन) १ ४६ २

अध्यागहि उपरितो गमयत्यागमयति वा, प्र०—अत्र लडर्थे लोट्, पुरुषव्यत्ययेन गमेर्मध्यमपुरुषैकवचने 'बहुल छन्दसि' इति शपो लुक्, हेर्ङित्वादनुनासिकलोपश्च १ ६ ९ [अधि+आ+गम्लृ गतौ+लोट् । शपो लुक् । अनुनासिक-लोपश्च]

अध्याभरत् स्वात्मनि परमात्मान धारितवान् ऋ० भू० १५६ [अधि+आ+भृञ् भरणे धातोर्लङ्]

अध्यारुहाम उपर्य्युत्कृष्टतया समन्तात् प्रादुर्भवेम, प्र०—अत्र विकरणव्यत्यय ८ ५२ [अधि+आ+रुह बीजजन्मनि प्रादुर्भावे च धातोर्लङ् । विकरणव्यत्ययेन शप स्थाने श]

अध्यालोहकर्णाः अधिगत च तल्लोह च सुवर्ण तद्वद्वर्णो यस्य स (पशु पक्षी वा), प्र०—लोहमिति हिरण्यनाम निघ० १ २, २४ ४

अध्यावक्षत् अध्यावहेत् ३ ५ ९ [अधि+आ+वह प्रापणे (भ्वा०) धातोर्लेट् । 'सिब्बहुल लेटि' सूत्रेण सिप्, हस्य ढत्वकत्वे]

अध्याशत उपरि व्याप्नुवन्ति १ ८५ २ [अधि+आ+अशू व्याप्तौ सघाते च (स्वा०) धातोर्लङ् । वहुल छन्दसी' ति विकरणलुक्]

अध्यासते उपरिभागे सन्ति १ ११ ६ [अधि=आस् उपवेशने (अदादि०) धातोर्लट्]

अध्युत्तरस्मिन् परलोके द्वितीये जन्मनि च ऋ० भू० ३०५ [अधिउत्तरपदयो समासे सप्तमी विभक्ति]

अध्युदितः उपर्युदय प्राप्त (सूर =सूर्य) ३२ ७ [अधि+उत्+इण् गतौ (अदादि०) धातो क्त प्रत्यय]

अध्येति स्मरण करता है स० वि० १४६, ३ ४२ स्मरति ४ १७ १२ **अध्येमि**=सर्वत स्मरामि ३ ४९ ९ [अधि+इक् स्मरणे धातोर्लट्]

अध्येधे प्रकाशयति ७ ३६ १ [अधि=एध वृद्धौ (भ्वा०) धातोर्लट्]

अध्यैरयन्त स्वेच्छापूर्वक विचरते है स० वि० ७, ३२ १० सर्वत्र स्वेच्छया विचरन्ति ३२ १० स्वच्छन्द स्वेच्छा से वर्त्तने है आर्याभि० २ ६ [अधि=ईर गतौ कम्पने च धातोर्णिजन्ताल् लङ् सामान्ये]

अध्रजन् धावन्ति १ १६६ ४. [ध्रज गतौ (भ्वा०) धातोर्लङ् । ध्रजत गतिकर्मा निघ० २ १४]

अध्रिगवे शत्रुभिरधृयोऽसहमाना वीराम्तान् गच्छति प्राप्नोति तस्मै (इन्द्राय=) १ ६१ १ **अध्रिगुम्**=इन्द्र परमैश्वर्यवन्तम्, प्र०—इन्द्रोऽप्यध्रिगुरुच्यते निरु० ५ ११, १ ११२ २० **अध्रिगुः**=सत्यगति (राजा) ६ ४५ २० **अध्रिगू**=अधिकगन्तारौ (वायुविद्युतौ) ५ ७३ २ **अध्रिगो**=योऽधृन् धारकान् गच्छन्ति तत्सम्बुद्धौ (विद्वज्जन) ५ १० १ योऽधृन् मन्त्रान् गच्छति जानाति तत्सम्बुद्धौ (अग्ने=सत्पुरुष) ३ २१ ४ [धृङ् अनवस्थाने (भ्वा०) धातोर्बाहुलकाद् औणादिकक्रिन्प्रत्यये ध्रि । न ध्रि =अध्रि । गाङ् गतौ (भ्वा०) धातोर् औणादिके कु प्रत्यये गु । तयो समास । अधिगुर्मन्त्रो भवति गव्यधिकृतत्वात् । अपि वा प्रशासनमेवाभिप्रेत स्यात् तच्छब्द-वत्त्वात् । अग्निरप्यध्रिगुरुच्यते अधृतगमनकर्मवन् । इन्द्रो-ऽप्यध्रिगुरुच्यते निघ० ५ ११ शमीध्व सुशमि शमीध्व शमीध्वमध्रिगवित्ति । अध्रिगुर्वै देवाना शमिता ऐत० ब्रा० २ १ ७ अध्रिगुश्चापापश्च । उभौ देवाना शमितारौ तै० ३ ६ ६ ४]

अध्रिगावः अधृता गावो रश्मयो यैस्ते (रुद्रा = वायव) १ ६४ ३ [अध्रिगोशब्दयो समास]

अध्रिजः अध्रिषु धारकेपु जात (राजा) ५ ७ १० [अध्रि+जनी प्रादुर्भावे धातोर्ड प्रत्यय]

अध्रुक् यो न द्रुह्यति (महाविद्वान्) ६ ५ १. द्रोह-रहित (भ्राता=बन्धु) ६ ५१ ५ य कदाचिन्न द्रोग्धि (अग्नि =परोपकारी विद्वज्जन) ६ ११ २ [द्रुह अभिकाक्षायाम् धातो कर्त्तरि क्विप् । नञ्समास]

अध्वन् अध्वनि ६ ५१ १५ **अध्वनः**=सन्मार्गान् १ १०४ २ शत्रोर्मार्गान् ९ १३ मार्गात् १ ७१ ९ मार्गान् १ ७२ ७ अन्व०—व्यवहारपरमार्थसिद्धिकरस्य मार्गस्य मध्ये ४ १९ मार्गस्य १ १४६ ३ **अध्वनाम्**=विद्याधर्म-शिल्पमार्गाणाम् ५ ३३ परमार्थ और व्यवहार मार्गो के आर्याभि० २ १८, ५ ३३ **अध्वनि**=मार्गे ६ ४६ १३ **अध्वभिः**=मार्गैं १ २३ १६ **अध्वसु**=मार्गेषु ३ ३२ **अध्वा**=मार्ग १ ११३ ३ सन्मार्गरूप १ १७३ ११ **अध्वानम्**=धर्म-मार्गम् १ ३१ १६ [अद भक्षणे (अदादि०) धातो 'अदेर्ध च' उणा० ४ ११६ सूत्रेण क्वनिप्-धकारादेशश्च अध्वन् अन्तरिक्षनाम निघ० १ ३ योजनशो हि मिमाना अध्वान धावन्ति श० ५ १ ५ १७]

अध्वपते धर्मव्यवहार-मार्गपालयित (विद्वज्जन)

५.३३ [अव्वा=मार्गस्तस्य पतिस्तत्सम्बुद्धौ]

अध्वनयत् धुनयति ६.१८.१० [ध्वन शब्दे (चुरा०) धातोर्लङ्]

अध्वरकृतम् अध्वरं करोति येन सामग्रीसमूहेन तम्, प्र०—अत्र 'कृतो बहुलम्' इति वार्तिकेन करणे क्विप् 'अध्वरो वै यज्ञो यज्ञकृतम्' शत० १.२.४.५, १.२४ [अध्वरोपपदे डुकृञ् करणे धातो क्विप्]

अध्वरम् हिंसाऽधर्मादिदोषरहितम् (यज्ञ=प्रथम-मन्त्रोक्त महिमान कर्म वा), प्र०—'ध्वरति हिंसाकर्मा तत्प्रतिषेधो निपात', निरु० १.८, १.१४ क्रियाजन्य जगत् १.१८.८ अहिंसनीय सुखरूप यज्ञम् १.२३.१७ अग्नि-होत्रादिकमिव विद्याविज्ञानवर्द्धक यज्ञम् १.७४.४ अहिंसादिलक्षण धर्मम्, यज्ञम् १.१३५.७ राज्यपालनाख्य यज्ञम् १.१३५.३ न्यायव्यवहारम् ४.६.७ पालनाख्य व्यवहारम् ५.४.८ अध्ययनाऽध्यापनाख्यमहिंसनीय यज्ञम् १.१०१.८ अहिंसनीय यज्ञम् १.४४.१३ अहिंसादि-व्यवहारयुक्त यज्ञम् ३.२४.२ अहिंसादिलक्षण धर्म्य व्यवहारम् ३.२८.५ अहिंसनीयराज्यव्यवहारम्, भा०—यथार्थं न्यायम् ३.३.१५ अहिंसनीय शिल्पसाध्य व्यवहारम् २.२.५ अहिंसनीय (यज्ञ=सङ्गमनीय व्यवहारम्) भा०—अहिंसाऽऽख्य धर्मम् २.६.२६ अहिंसनीय न्यायव्यवहारम् ६.५२.१२ पालक व्यवहारम् ३.५४.१२ अहिंसनीय सुखहेतुम् १.१४.११ अहिंसामय यज्ञम्, भा०—विद्या-धर्मदानम् ३.७.१६ क्रियामय यज्ञम्, भा०—यज्ञाऽनुष्ठानम् ३.११ अहिंसाधर्मयुक्तं व्यवहारम् १.१५१.३ अहिंसादि-गुणयुक्त व्यवहारम् ३.१७.५. सत्कर्तव्यं व्यवहारम् ४.१५.२ व्यवहारयज्ञम् १.६३.१२ अहिंसक (विचारम्) १.७४.१ उपदेशाख्य यज्ञम् ७.४२.५ अहिंसनीय सुखहेतुम् १.१४.११ क्रियाजन्य जगत् १.१८.८ त्रिविध यज्ञम् १.२६.१ अहिंसनीय गृहाश्रमादिव्यवहारम् ७.२.७ गृहाश्रमक्रियासिद्धिकर यज्ञम् ६.२४ अविनश्वर यज्ञम् ६.२५ निष्कौटिल्यम् ६.३० **अध्वरस्य**=अहिंसनीयस्य धर्म्यस्य व्यवहारस्य ४.६.१ अहिंसनीयस्य वर्धितु योग्यस्य यज्ञस्य १२.११० अहिंसामयस्य शिल्पव्यवहारस्य ३.२३.१ अहिंसामयस्य न्यायव्यवहारस्य ७.७.१ अहिंसनीयस्य (शिल्पिनो जनस्य) ४.७.८ अहिंसनीयस्य राज्यस्य ४.३.१ हिंसितुमनर्हस्य (यज्ञस्य) १.१२८.४ अहिंसनी-यस्य धर्मस्य व्यवहारस्य ४.६.१ अहिंसामयस्य यज्ञस्य ५.४१.४ सर्वव्यवहारस्य ७.११.१ यज्ञस्य मध्ये ७.१४.२

अध्वरः=अहिंसनीयो व्यवहार १५.३८ यज्ञ २८. **अध्वरा**=अहिंसनीयान् यज्ञान् २१.४७ **अध्वराणाम्**=अग्निहोत्राद्यश्वमेधान्ताना शिल्पविद्यासाध्याना वा सर्वथा रक्षणीया यज्ञानाम् ३.२३ यज्ञों और युद्धों के मध्य में आर्याभि० १.२६ यज्ञानाम् १.४४.६ अहिंसनीयाना यज्ञानाम् १.४४.२ अहिंसनीय-व्यवहाराख्यकर्मणाम् १.४५.४ अग्निष्टोमादियज्ञाना तत्कर्तॄणा धर्मात्मना मानवानाञ्च ऋ० भा० नमू० ८ पूर्वोक्ताना यज्ञाना धार्मिकाणा मनुष्याणा वा १.१.८ राज्यपालनाग्निहोत्रादि-शिल्पान्ताना यज्ञानाम् १.२७.१ **अध्वरान्**=अहिंसनी-यान् गृहाश्रमव्यवहारान् १.४८.११ अहिंसकान् (जनान्) १.१३५.५ **अध्वराय**=हिंसारहिताय धर्म्याय व्यवहाराय ७.४१.६ अहिंसाख्याय शिल्पमयाय यज्ञाय ३३.७५. अहिंसारूपयज्ञाय ३.२७ अहिंसनीयाय व्यवहाराय ४.७.७ **अध्वरे**=अहिंसनीये (दमे=दान्ते गृहे) ४.६.४ अहिंस-नीये धर्म्ये व्यवहारे ३.१०.१ अविद्यमानो ध्वरो हिंसन यस्मिन् रक्षणे १.१२१.७ अहिंसनीये प्रजापालनाख्ये व्यवहारे १.१२१.१ अहिंसनीये शिल्पव्यवहारे ७.३.१ अहिंसादिलक्षणे धर्माचरणे ७.१६.५ सङ्गते संसारे ३.२७.१२ सत्ये व्यवहारे ४.५५.१. अहिंसनीयेऽध्ययना-ऽध्यापनीये व्यवहारे ३.५३.१० अनुष्ठानव्ये क्रियासाध्ये यज्ञे १.१५.७ उपासनीये कर्त्तव्ये वा यज्ञे १.१२.७ उपासनाक्रियासाध्ये यज्ञे १.१६.३ अध्ययनाऽध्यापनराज्य-पालनादिव्यवहारे ३.८.१ ज्ञानादियज्ञ मे आर्याभि० १.४८ शिल्पादिव्यवहारे ५.५८.६ अहिंसायुक्ते व्यवहारे ५.४४.५ अहिंसनीयेऽहातव्य उपासनाख्ये कर्त्तव्ये सङ्ग्रामे वा १.६४.१३ अहिंसायज्ञे ५.२६.३ सङ्गते शिल्प-क्रियासिद्धे याने १.४७.२ सर्वथाऽनुष्ठानव्ये धर्म्ये व्यवहारे ६.१६.२ मित्रभावैरहिंसनीये यज्ञे वा २.४ अहिंसनीये विद्याप्राप्तिव्यवहारे ६.५०.६ व्यवहारे ४.१५.१ अहिंसादि-लक्षणे योगे ६.१६.४६ अहिंसनीये कर्त्तव्ये वा यज्ञे १.१२.७ अहिंसनीये धर्म्ये यज्ञे १.५७.३ दयामये व्यवहारे ३.२८.३ सङ्गन्तव्ये व्यवहारे ३.५७.८ सत्ये व्यवहारे ४.५५.१ **अध्वरेषु**=अहिंसनीयेषु विद्याप्राप्तिकर्मसु ३.६२.५ मित्रत्वादिगुणयुक्तव्यवहारेषु विधियज्ञेषु वा ३.२७.८ अग्निहोत्रादिक्रियामयव्यवहारेषु ७.१०.५ अहिंसनीयेषु यज्ञेषु २५.४०. राज्यपालनादिषु व्यवहारेषु ५.२८.४ उपासनाऽग्निहोत्राद्यश्वमेधान्तेषु शिल्पविद्या-ऽन्तर्गतेषु वा यज्ञेषु ३.१५ अनुष्ठानव्येषु क्रियामयेषु यज्ञेषु १.५८.७ सङ्गमनीयेषु व्यवहारेषु ३.२६.७ गृहाश्रम-

व्यवहारानुष्ठानेषु ४ ५ १ २ अहिंसनीयेषु प्रजापालनन्यायव्यवहारेषु ५ ४ १ अहिंसनीयेषु धर्म्येषु व्यवहारेषु ५ १४ २ अहिंसायुक्तेषु सङ्ग्रामादिव्यवहारेषु ७ १ १६ [ध्वरति वधकर्मा नि० २ १९ अध्वर इति यज्ञनाम ३ १७ अध्वरमिनिरन्तरिक्षनाम निघ० १ ३ अध्वरे यज्ञे नि० ६ १३ अध्वरेषु यज्ञेषु नि० १० १९ अध्वर इति यज्ञनाम, ध्वरति हिंसाकर्मा, तत्प्रतिषेध नि० १ ७ अध्वरम् यज्ञम् नि० ८ ६ अध्वरो वै यज्ञ श० १ २ ४ ५, ४ १ ३८ ३९, ५ ३ ४ १०, ३ ५ ३ १७, ६. २ ११ यज्ञो वा अध्वर काठ० ३१ ११ प्राणोऽध्वर श० ७.३ १ ५ रसोऽध्वर श० ७ ३ १ ६ ते स्मुरा अपक्रामन्तोऽनुवन्न वा इमे ध्वर्तवा अभवन्निति । तदध्वस्याध्वरत्वम् क० ३६ ४ देवान्ह वै यज्ञेन यजमानान्त्सपत्ना असुरा दुधूर्षाञ्चक्रु । ते दुधूर्षन्त एव न शेकुर्धूर्वितु ते पराबभूवुस्तस्माद् यज्ञोऽध्वरो नाम श० १ ४ १ ४०]

अध्वरश्रियः या अध्वरस्याऽहिंसनीयस्य चक्रवर्त्तिराज्यस्य लक्ष्मीस्ता १ ४७ ८ **अध्वरश्रियम्**= याऽध्वराणामहिंसनीयाना यज्ञाना श्री शोभा ताम् १ ४४ ३

अध्वरस्येव अहिंसामयस्य यज्ञस्येव ६ ६६ १० [अत्र 'इवेन सह समासो विभक्त्यलोपा०' अ० २ २ १८ वार्त्तिकेन समासो विभक्तेरलोपश्च]

अध्वराऽइव अहिंसनीयौ यज्ञाविव ३ ६ १०. [ध्वरति हिंसाकर्मा, तत्प्रतिषेधोऽध्वर नि० १ ७]

अध्वरीयताम् आत्मनोऽध्वरमिच्छतामस्माकम् (जनानाम्) प्र०—अत्र 'न छन्दस्यपुत्रस्य, अ० ७ ४ ३५ इत्यस्य 'अपुत्रादीनामिति वक्तव्यम्, इति वचनादीकारनिषेधो न भवति 'वाच्छन्दसि सर्वे विधयो भवन्ति, इति नियमात् 'कव्यध्वरपृतनस्यर्चि लोप ' अ० ७ ४ ३९ इत्यकारलोपोऽपि न भवति १ २३ १६ य आत्मनोऽध्वरमहिंसायज्ञ कर्त्तु मिच्छन्ति तेषा (जनाना=मनुष्याणाम्) ४ ६ ५ आत्मनोऽध्वरमिच्छताम् (विशा=प्रजानाम्) ६ २ १० [अध्वर सुबन्ताद् आत्मनेच्छायाम् क्यच् । 'क्यचि च' ईत्वम् क्यजन्ताच्छतृप्रत्यय]

अध्वर्यन्तः आत्मनोऽध्वरमिच्छन्त (देवा= विद्वज्जना) १७ ५६. **अध्वर्यन्ता**=आत्मनो ऽध्वरमिच्छन्तौ (अध्यापकोपदेशकौ) १ १८१.१ [अध्वर+क्यच् आत्मनेच्छायाम् । तत शतृ प्रत्यय । 'न छन्दस्य०' इति सूत्रेणेत्व न भवति]

अध्वर्यवम् य आत्मनोऽध्वरमिच्छति तम् (पुरुषम्) प्र०—अत्र 'वाच्छन्दसि' इत्यस्याऽपि गुणावादेशौ, (पुरुषम्) २८ १९ **अध्वर्यवः**=आत्मनोऽध्वरमहिंसा कामयमाना (विद्वज्जना) ३ ४६ ५ युद्धयज्ञमिद्धिकरा (सज्जना) २ १४ ६ सर्वस्य प्रियाचरणा (विद्वास) २ १४ ४ राजसम्बन्धिन (विद्वज्जना) २ १४ ११ महौषधिनिष्पादका (महावैद्या जना) २ १४ १० पुरुषार्थिन (जना) २ १४ ९ यज्ञसम्पादका (सज्जना) २ १४ ३ आत्मनोऽध्वर कामयमाना (सज्जना) २ १४ १ आत्मनोऽहिंसाख्ययज्ञमिच्छन्त , (भा०—अध्यापकोपदेशकाऽनिथय) २३ ४२ अध्वरमहिंसाधर्मकाममिच्छव (विद्वास) १ १५३ १ विद्यायज्ञसम्पादका (विद्वास) ५ ३१ १२ सर्वस्य प्रियाचरणा (सत्पुरुषा) २ १४ ४ **अध्वर्युभिः**=आत्मनो हिंसामनिच्छुभि (जनै) २ ३७ २ अध्वर यज्ञमिच्छद्भि (सत्पुरुषै) १ १३५ ६ हिंसाऽन्यायवर्जितै सह (प्रजाजनै सह) ३३ ७० य आत्मानमध्वरमिच्छन्ति तै (प्रजाजनै) १ १३५ ३ अध्वर निष्पादकै (होत्रध्वर्यूद्गातृब्रह्मसभ्यैर्ऋत्विग्भि) ३ ७ ७ **अध्वर्युः**= आत्मनोऽध्वरमहिंसाव्यवहार कामयमान (सज्जन) ६ ४१ २ अध्वर शिल्पविद्या कामयमान (विद्वान् शिल्पी) ५ ३७ २. अहिंसायज्ञमिच्छु (विद्वान्) २५ २८ अध्वरस्य योजको नेता कामयिता वा (परमेश्वर) प्र०— अत्राऽध्वरशब्दोपपदाद् युज्धातोर्बाहुलकात् क्यु प्रत्यय टिलोपश्च 'अध्वर्युरध्वरयु=अध्वर युनक्ति० नि० १ ८, १ ९४ ६ आत्मनोऽध्वरमहिसाधर्ममिच्छु (मित्र = सुहृज्जन) ३ ५ ४ य आत्मनोऽध्वरमहिंसनीय व्यवहार कर्त्तुमिच्छु (अग्नि=सूर्य) ४ ६ ४ यज्ञकर्त्ता (सज्जन) २ ५ ६ आत्मनोऽध्वरमहिंसनमिच्छु (सत्पुरुष) १ १६२ ५ **अध्वर्यू**=आत्मनोऽध्वरमहिंसामिच्छन्तौ (विद्वज्जनौ) ३३ ७३ आत्मनोऽध्वरमहिंसनीय गृहाश्रमादिक यज्ञमिच्छू (अश्विना=अध्यापकोपदेशकौ) १४ ७ **अध्वर्यो**!= योऽध्वरमिवाचरति तत्सम्बुद्धौ (राजन्) २३ २३ अहिंसक (राजप्रजाजन) ३ ५३ ३ योऽध्वर यज्ञ युनक्ति तत्सम्बुद्धौ (वैद्यराज) २० ३१ [अध्वर्यु=अध्वरयु । अध्वर युनक्ति अध्वरस्य नेता अध्वर कामयते वा । अपि वाऽधीयाने युरुपबन्ध नि० १ ७ पूर्वार्धो वै यज्ञस्याध्वर्यु जघनार्ध पत्नी श० १ ९ २ ३ प्रतिष्ठा वा एषा यज्ञस्य यदध्वर्यु तै० ३ ३ ८ १० वायुर्वा अध्वर्युर् अधिदैव प्राणोऽध्यात्मम् गो० १ ४.५ वह्निरध्वर्यु तै० १ १ ६ १० राज्य वा अध्वर्यु तै० ३ ८ ५ १ मनो-

ऽध्वर्यु श० १ ५ १ २ १ प्राणो यज्ञस्याध्वर्यु जै० १ ८५ प्राणापानावेवाध्वर्यू गो० १ २ १० श० ५ ५ १ ११ द्यौरध्वर्यु मै० १ ९.१ चक्षुरध्वर्यु कौ० १७ ७ आश्विनौ वाऽध्वर्यू काठ० २८ ५ आदित्यो मे ऽध्वर्यु ष० २ ५ अपानो मेऽध्वर्यु ष० २ ७ अश्विनौ हि देवानामध्वर्यु तै० ३ २ २ १ अध्वर्युरेव मह गो० पू० ५ १५ तमेतमग्निरित्यध्वर्यव उपासते श० १० ५ २ २० प्रतीचऽध्वर्यो श० १३ ५ ४ २४ पर्णमयेनाध्वर्युरभिषिञ्चति तै० १ ७ ८ ७]

अध्वरीयसि आत्मनोऽध्वरमहिंसामिच्छसि २ १ २ [अध्वरसुबन्ताद् आत्मनेच्छाया क्यच् । 'क्यचि चे' तीत्वम् । 'वा छन्दसि सर्वे विधयो विकल्प्यन्ते' इति वचनाद् 'न छन्दस्य०' इतीत्वप्रतिषेधो न भवति क्यजन्ताद्धातोर्लट्]

अध्वस्मभिः अपतनशीलैर्गुणकर्मस्वभावै २ ३५ १४ अध्वस्तै (पथिभि =मार्गै) २ ३४ ५ **अध्वस्मानः**= ये नाऽध पतन्ति ते (जना), प्र०—'ध्वसु अध पतने, १ १३९ ४ [नञ्+ध्वसु अवस्रसने (भ्वा०) धातोर्मनिन् प्रत्यय । छान्दसो नकारलोप]

अध्वानयत् धुनयति ६ १८ १० [ध्वन शब्दे धातोर्णिजन्ताल् लङ्]

अनक्ति कामयते ४ ६ ३ **अनक्तु**=सयुनक्तु ३७ ११. कामयताम् ७ ४३ ३ प्रकट करे २ ३ २ सिञ्चतु ६ २ [अञ्जू व्यक्तिम्रक्षणकान्तिगतिषु (रुधादि०) धातोर्लट्]

अनग्नाः सर्वतो वस्त्रभूषणादिभिराच्छादिता (युवतय =प्राप्तयौवना स्त्रिय ३ १ ६ [नञ्+नग्न-पदयो समास]

अनक् प्रकटीकरोति २ १५ ७ **अनक्ति**=कामयते १ १५३ २ **अनक्तु**=कामयताम् ७ ४३ ३ प्रकट करे २ ३ २ सिञ्चतु ६ २ सयुनक्तु ३७ ११ [अञ्जू व्यक्ति-म्रक्षणकान्तिगतिषु (रुधा०) धातोर्लङि लोटि लटि च रूपाणि]

अनग्नित्राः अविद्यमानज्वरेण रक्षका (रोगा) १ १८९ ३ [नञ्+अग्नि+त्रैङ् पालने धातो क प्रत्यय]

अनग्निष्वात्ताः अविद्यमानाऽग्निविद्याग्रहणा ज्ञान-निष्ठा पितर १९ ६० वायुजलभूगर्भादिविद्यानिष्ठा (पितर) ऋ० भू० २६२, १९ ६० [नञ्+अग्निष्वात्ता । अग्निष्वात्ता=अग्नि+सु+आ+दाञ् दाने (जु०) धातो क्त]

अनज उच्चरतोपदिशत, प्र०—अत्र व्यत्ययेनैकवचनम् ५ ५४ १ **अनजन्**=कामयेरन् ३ १९ ५

अनकुत्सु गवादिषु ३ ५३ १८ **अनड्वान्**= वृषभ (पशु) २९ ५९ हलशकटादिवहनसमर्थ (वृषभ) १८ २७ **अनड्वाहः**=शकटवहनसमर्था (पशव = (वृषभा २४ १३ **अनड्वाहम्**=योऽनासि शकटानि वहति तद्वद्वर्त्तमानम् (वह्नि कृषीवल वा) ३५ १३ शकटवाहकम् (गाम्=वृषभम्) २८ ३० [अनडुह् प्राति-पदिकस्य रूपाणि । सप्तम्या 'वसुस्र सु०' अ० ८ २ ७२ सूत्रेण दकारादेश । प्रथमाया चामागमे नुमि सयोगान्त-लोपे च रूपम् । अग्निरेष यदनड्वान् श० ७ ३ २ १ आग्नेयो वा ऽनड्वान् । श० ७ ३ २ १९, १३ ८ ४ ६ वह्निर्वा अनड्वान् तै० १ १ ६ १०, १ ८ २ ५ वोढा ऽनड्वान् तै० स० ७ ५ १८ १ अनड्वान् वै सर्वाणि वयासि पशूनाम् मै० ३ ७ ४ अनड्वान् वय पङ्क्ति-श्छन्द तै० स० ४ ३ ५ १]

अनत् प्राणत् १ १६४ ३० [अन प्राणने धातोर्लेट् । अनिति गतिकर्मा निघ० २ १४]

अनदतीः अविद्यमाना अतीव सूक्ष्मा दन्ता यासान्ता (युवतय =प्राप्तयौवना स्त्रिय) ३ १ ६ [नञ्+दन्त-पदयोर्वहुव्रीहौ 'छन्दसि चे' ति सूत्रेण दतृ-आदेशे ङीपि च रूपम् । अनजादावपि छान्दसत्वान्नुट्]

अननुदः योऽनुगत न ददाति तस्य १ ५३ ८. अप्रेरित (इन्द्र =विद्वान्) २ २१ ४. येऽनुददति तेऽनुदा, न विद्यन्तेऽनुदा यस्य स (विद्वज्जन) २ २३ ११ [अनु+दा+क, ततो नञ्समास । अथवा णुदप्रेरणे धातोर् इगुपधलक्षण क प्रत्यय, ततो नञ्समास]

अननुभूतीः अनुभवरहितान् (जनान्) ६ ४७ १७ [अनु+भू सत्तायाम्+क्तिन् भावे स्त्रियाम् । ततो नञ् वहुव्रीहि]

अन्तरिक्ष्याः अन्तरिक्षे भवा (पर्वता=मेघा) ५.५४ ९ [अन्तरिक्षप्राति० 'भवे छन्दसि' अ० ४ ४ ११० सूत्रेण यन् प्रत्यय]

अन्तरेति अन्तर्गच्छति ३४ १ [अन्तर् उपपदे इण् गतौ (अदा०) धातो लट्]

अन्तर्यामः योऽन्तर्मध्ये याति स वायु १८ १९ अन्तर्मध्ये यामा प्रहरा यस्मिन् समये स १३ ५५ **अन्तर्यामे**=यमनामय याम, अन्तश्चाऽसौ यामश्च तस्मिन् ७ ५ [अन्तरोपपदे या प्रापणे (अदा०) धातो 'अर्त्तिस्तुसु०' उ० १ १४० सूत्रेण मन् प्रत्यय]

अन्तर्वतीः अन्तर्मध्ये कारण विद्यते यासु ता (प्रजा) ३.५५ ५ [अन्तर् प्राति० मतुप् अन्तर् शब्दोऽधिकरणप्रधान प्रथमासमर्थता न सम्भवति अत 'अन्तर्वत्पतिवतोर्नुक्' अ० ४ १ ३२ सूत्रेण निपातनात् मतुप् ङीप् च 'वा छन्दसि तु नुग्विधि' इति नुङ् न भवति]

अन्तर्वावत् योऽन्तर्भृश वाति गच्छति (वैश्वानर = सूर्य) ६ ८ ३ [अन्तरोपपदे वा गतौ (अदा०) धातोर्यङ्लुगन्तात् क्विप्]

अन्तर्विद्वान् योऽन्तर्वेत्ति स (परमेश्वर) १ ७२ ७ [अन्तरोपपदे विद् ज्ञाने (अदा०) धातो शतृ 'विदे शतुर्वसु' रिति वसु 'वसो, सम्प्रसारणम्' इति सम्प्रसारणे नुमि दीर्घे च रूपम्]

अन्तस्पथा अन्तराभ्यन्तरे पन्था येषान्ते (विद्याधर्ममार्गा) ५ ५२.१० [अन्तर्पथिन्शब्दयोर्बहुव्रीहौ समासे 'ऋक्पूरब्धू पथाम्०' अ० ५.४ ७४ सूत्रेण समासान्तोऽकार । टिलोपे च रूपम्]

अन्तः पारम् १ ५४ १ हृदि ३१ १६ मध्ये ५ ६२ ५ आभ्यन्तरे १ १६३ ४ समीपे १० ७ शरीराऽभ्यन्तरे ७ ५ आकाशाऽभ्यन्तर इव ७ ५ आभ्यन्तरस्थान् प्राणादीन् ७ ४ भीतर आर्याभि० २ १२, ४० ५ सर्वस्य मध्ये १ ६६ ५ बीच मे स० वि० १६८, अथर्व० ९ २ ३ २२ अन्त करणम् ८ २५ शरीराऽन्तर्व्यवस्थितेन, भा०—शरीरस्थेन (मनसा) १७ ६४ सीमा ६ २६ ५ ब्रह्माण्डशरीरयोर्मध्ये ३ ७ सभामध्ये १२ ११ अभ्यन्तराकाश ७ ५ [अम गत्यादिषु (भ्वा०) धातो 'अमेस्तुट् च' उ० ५ ६० सूत्रेण अरन् प्रत्ययस्तुडागमश्च स्वरादित्वाद् अव्ययम् अन्तर् = अभ्यन्तरम् नि० १० १६]

अन्तःपर्शव्येन अन्त पार्श्वावयवभावेन ३९ ८ [अन्तर् उपपदे पर्शुप्राति० अवयवार्थे यत् प्रत्यय पर्शु = स्पृश धातो 'स्पृशे श्वण्शुनौ पृ च' उ०५ २७ सूत्रेण शुन् प्रत्यय धातोश्च पृ आदेश]

अन्तःपार्श्व्यम् अन्त पार्श्वे भवम् (शरीराङ्गविशेषम्) ३९ ९. [अन्तरोपपदे पार्श्व प्राति० भवार्थे 'शरीरावयवाच्च' अ ४.३.५५ सूत्रेण यत् प्रत्यय]

अन्तःश्लेषः मध्यस्पर्श १४ १६ मध्ये स्पर्शो यस्य (श्रावणो भाद्रपदो वा मास.) १४ १५. मध्य आलिङ्गनम् १४.६ मध्यप्रवेश (ईश्वर) १५ ५७ आभ्यन्तरे सम्बन्ध १३ २५ [श्लिष आलिङ्गने धातोर्घञ्प्रत्यये श्लेष ततोऽन्तर् शब्देन बहुव्रीहि]

अन्तःहृदा अन्त स्थितेनाऽऽत्मना ४ ५८.६ [अन्त स्थितेन हृदयेनेति विग्रहे शाकपार्थिवत्वादुत्तरपदलोपे शस्प्रभृतिषु परत 'पद्दन्नोमास्०' अ० ६ १ ६३ सूत्रेण हृदयस्य स्थाने हृदादेश]

अन्ता अन्ते समीपे ४ १.११ **अन्तात्** = समीपात् ३ ६१ ४ **अन्तान्** = समीपस्थान् (पदार्थान्) १ ९२ ११. समीपान् (भूगोलान्) ४ ५० १ **अन्ताय** = समीपाय ससीमाय वा (जनाय) ३० १९ **अन्ताः** = अन्ताऽवयवा. १७ २५ **अन्ते** = समीपे ४ १६.२. **अन्तेभ्यः** = समीपेभ्योऽहोरात्रेभ्य १ ४९ ३

अन्ति अन्तिके, प्र० अत्र परस्य लोप २ २७ ३ समीपे, प्र० अत्र 'सुपा सुलुग्०' इति डिविभक्तेर्लुक् 'छान्दसो वर्णलोपो वा' इति कलोपश्च १ ७९ ११ निकटे १३ ११ अन्तिके १.९४ ६ अनन्ति जीवन्ति विद्यादिसुखसाधनैर्येतेऽन्त्य प्र० अत्रान धातोरौणादिकस्तिन् प्रत्यय. सुपा सुलुगिति जसो लुक् च १ ८९ ९ **अन्तौ** = समीपे ५ ४७ ३ बन्धने १७ ६०

अन्तिके अत्यन्त निकट आर्याभि० २ २२, ४०५ [अन्तिक कस्मात् ? आनीत भवति निघ० ३ ६]

अन्तितः समीपात् ३ ५९ २ समीपत २ २७ १३ [अन प्राणने (अदा०) धातोरौणादिकस्तिन् प्रत्यय तत सार्वविभक्तिकस्तसि प्रत्यय]

अन्तिदेवम् अन्तिषु विद्वत्सु विद्वासम् १ १८० ७ [अन प्राणने (अदा) धातो रौणादिके तिन् प्रत्यये अन्ति अनन्ति जीवन्ति विद्यादिसुखसाधनैर्ये तेऽन्त्यो देवा = विद्वास तेषु देवम्]

अन्तिमित्रः अन्तौ समीपे मित्रा सहायकारिणो यस्य स, भा०—मित्रसेवी (गण = गणनीयो विद्वज्जन) १७ ८३

अन्त्याय अन्तेभवाय (जीवाय) ६ २० [अन्तप्राति० भवार्थे 'दिगादिभ्यो यत्' (अ० ४ ३ ५४) सूत्रेण यत्]

अन्त्यूतिम् अन्ति निकट ऊती रक्षणाद्या क्रिया यस्य तम् (विद्वज्जनम्) १ १३८ १ [अन्ति ऊति व्याख्यातौ, तयोर्बहुव्रीहि]

अन्धसः अन्नस्य रसान् ५ ५१ ५ अन्नानि पृथिव्यादीनि, अन्व०—अन्नाना पृथिव्यादीना प्रकाशेन, प्र०—अन्ध इत्यन्ननामसु पठितम् निघ० २ ७, १ ९ १ अन्नादेर्मध्ये २६ २४ शुद्धाऽन्नस्येच्छाहेतुम् ऋ० भू० ३०६ अन्नस्य १.८०.६ अन्नानि १ ८५ ६. अन्नादे सकाशात् ३६ ५ द्रवीभूतस्याऽन्नादे १ १५५ १ संस्कृतस्याऽन्नादे १९ ७९ अन्नादियोगात् १९ ७३ सुसंस्कृतस्याऽन्नस्य १९ ७४ अन्नात् २७.४० अन्नादे ३३ २३ **अन्धसा** = अन्नाद्येन

४ २० ४ अन्नादिनोदकादिना वा १.५२ ५ **अन्धः**=अन्नम् २ १४ १ अन्नम् भा०—वीर्यवान् वृक्षौषध्यादिः पदार्थ, प्र०—अन्ध इत्यन्ननामसु पठितम् निघ० २ ७ 'अदेर्नुम् धौ च' उ० ४ २०६ अनेनाऽदेरसुन्प्रत्ययो नुमागमो धकाराऽऽदेशश्च 'वा शर्प्रकरणे खर्परे लोपो वक्तव्य इति' विसर्जनीयलोप ३ २० प्राप्तु योग्यो रस, भा०—वीर्यकरमन्नम्, प्र०—अन्ध इति पदनामसु पठितम् निघ० ४ २ अनेन प्राप्तव्यो रसो गृह्यते ३ २० अद्यते यत्तदन्धोऽन्नम् प्र०—अदेर्नुम् धौ च उ० ४ २०६ अनेनादधातोरसुनि नुम् धश्च 'अन्ध' इत्यन्ननाम निघ० २ ७ उपलक्षणेन चाऽन्येषा पदार्थानाम् ८ ५४ सुसंस्कृतमन्नम् ३ ३५ १ अन्नादिकम् ५ ४५ ६ रसम् ६ ६३ २ **अन्धांसि**=अन्नपानादीनि ७ ५६ ५ **अन्धांसीव**=यथाऽन्नादीनि ५ ५१ ३ [अद भक्षणे (अदा०) धातो 'अदेर्नुम् धौ च' उणादि० ४ २०६ सूत्रेण असुन् प्रत्ययो नुमागमो धकारादेशश्च अन्ध अन्ननाम निघ० २ ७ अन्धासि अन्नानि नि० ६ ३४ अन्धसोऽन्नस्य नि० ११ ६ अन्धस =मन्त्रपूतस्य वाचा स्तुतस्य नि० १३ ६ अन्धस्पत इति सोमस्य पते इत्येतत् श० ६ ११ २४ अहर्व्वा अन्ध ता० १२ ३ ३ अन्धो रात्रि ता० ६ १ ७ अन्न वा अन्ध जै० १ ३ ३]

अन्धा अन्धकाररूपाणि (तमासि=रात्री) ४ १६ ४ **अन्धे**=अन्धकारके (तमसि) १ १०० ८ **अन्धेन**=आवरकेण (तमसा=रात्र्यन्धकारेण) १७ ४४ **अन्धाय**=दृष्टिनिरुद्धायेवाऽज्ञानिने (जनाय) १ ११७ १७ चक्षुर्हीनाय (पुरुषाय) १ ११७ १८ **अन्धाः**=ज्ञानदृष्टिहीना (दुर्जना) १ १४ ३ ५ **अन्धः**=ज्ञानशून्य (जीवात्मा) १ १६४ १६ नेत्रहीन (जन) १ ६४ ७ अन्धकारकृत् (सूर्य) ४ १६ ६ **अन्धम्**=अविद्यान्धकारयुक्तम् (पुरुषम्) १ ११२ ८ अविद्यायुक्तम् (अपत्यम्) १ १४७ ३ चक्षुर्विहीनम् (जनम्) १ ११६ १६ चक्षुर्विज्ञानविकलम् (जनम्) ४ ३० १६ आवरकम् (अविद्यान्धकारम्) ४० १६ दृष्ट्यावरकम् (अन्धकारम्) ४० १२ नेत्ररहितमिव (जनमिव) ४ ४.१३ **अन्धस्य**=अन्धकाररूपस्याऽन्यायस्य १६ ७५ अधर्माचरणस्य, आवरणस्य १६ ७६ [अन्ध पदनाम निघ० ४ २ तमोऽप्यन्ध उच्यते, नास्मिन् ध्यान भवति, न दर्शनम्, अयमपीतरोऽन्ध एतस्मादेव निघ० ५ २]

अन्धाऽहीन् अन्धान् सर्पान् २५.७

अन्नपते अन्नाना पालक अन्व०—यजमान पुरोहित वा सज्जन) ११ ८३ [वरुणोऽन्नपति श० १२ ७ २ २०]

अन्नभाग. खान-पान स० वि० १४२,अथर्व० ३ ३० ६

अन्नम् उत्तम चावलादि अन्न उसका उत्तम संस्कार स० वि० १४५ अथर्व० १२ ५ १० अन्नादि उत्तम पदार्थ को स० वि० १०४, २ ३५ ५ अत्तु योग्यमत्तुमर्ह वा (वस्तु) २ ३५ ७ भोज्यम् (वस्तु) १६ ५ सुशोधित भोक्तुमर्हम् (वस्तु) २ ३५ ११ अत्तव्यम् (वस्तु) ४ ११ १ अत्तु योग्यम् (वस्तु) ३ ४८.३ तण्डुलादिकमत्तव्यमिव १६ ६६ **अन्नस्य**=अत्तुमर्हस्योदनादे ३६ ४. प्राणधारणस्य निरन्तरसुखस्य च हेतो (पदार्थस्य) प्र०—'कृवृ०' उ० ३ १० इत्यनधातोर्न प्रत्यय 'धापृवस्यज्य०' उ० ३ ६ इत्यतधातोर्न प्रत्यय ३ ४३ अन्नादि पदार्थो के स० वि० १४७, ३ ४३ सर्वरोगनाशक ओषधि के आर्याभि० २.४६, ३ ४३ **अन्ना**=अत्तुमर्हाण्यन्नानि १ १२७ ४ सुसंस्कृतान्यन्नानि ११२२ १३ अन्नानि १ ६१ ७ अत्तव्यानि (अन्नानि) ४ ७ १० अन्नादीनि ४ ७ ११ **अन्नात्**=यवाऽऽदे. १६ ७५ अत्तु योग्यात् २ २५ **अन्नानाम्**=गोधूमादीनाम् १६ १८ **अन्नेन**=पृथिव्यादिना जगता सह ऋ० भू० १२० पृथिव्यादि जड से स० प्र० २८२, ३१ २ पृथिव्यादिना ३१ २ **अन्नेषु**=अत्तव्येषु पदार्थेषु १६ ६२ **अन्नैः**=सुसंस्कृतैरन्नादिभि २ ३५ १२ पृथिव्यादिभि २ १० ४ यवादिभि ११ २३ [अन प्राणने (अदा०) धातो 'कृवृ०' उ० ३ १० सूत्रेण न प्रत्यय । अद भक्षणे धातोर्वा क्त 'अन्नाण्ण' इति निपातनात् सज्ञाया न जग्ध्यादेश । अन्नम् उदकनाम निघ० १ १२ अन्न कस्मात् ? आनतम्भूतेभ्य, अत्तेर्वा नि० ३ ६ अर्को वै देवानामन्नम् श० १२ ८ १ २ तै० ११ ८.५ अन्न वै देवा अर्क इति वदन्ति ता० १५ ३ २३ अन्न वा अर्क ता० ५ १.६, १४ ११ ६, १५ ३ ३४. गो० उ० ४ २ अन्नमर्क श० ६ १ १ ४ अन्न वै वाज ता० १३ ६, १३ २१ १५ ११ १२ १८ ६८ त्रेधा विहितꣳ ह्यन्नम् श० ८ ५ ३ ३ त्रिवृद्ध्यन्नम् श० ३ २ ११२, ३ ७ १ २० त्रिवृद्धाऽन्न कृपिर्वृष्टिर्बीजम् श० ८ ६ २ २ विरूप (नानारूपम्) अन्नम् ता० १४ ६ ८ पाङ्क्त ह्यन्नम्। ता० ५ २ ७ सप्त वा अन्नानि तै० १.३ ८ १ सर्व वैतदन्न यदविमधुघृतम् श० ६ २ १ ११ एतदुपरममन्न यद्दधिमधुघृतम् श० ६ २ १ १२ शान्तिर्वा अन्नम् ऐ० ५ २७ ७ ३ अन्न वै सर्वेषा भूतानामात्मा गो० उ० १ ३ वैश्वदेव वा अन्नम् तै० १ ६ १ १० अन्न वा आयतनम् श० ६ २.१ १४ अन्नजीवनꣳ हीदꣳ सर्वम् श० ७ ५ १ २० अन्न प्राणमन्नमपानमाहु अन्न मृत्यु तमु जीवातुमाहु अन्न ब्राह्मणो जरस वदन्ति अन्नमाहु

प्रजननं प्रजानाम् तै० २८८३ अन्नमेव ग्रह. । अन्नेन हीद ꣳ सर्व गृहीतम् श० ४६५४ तस्मात्प्राणोऽन्नेन गृहीतो यो ह्येवान्नमत्ति स प्राणिति श० ७५११६ तस्मात् प्राणेनान्न गृहीत यो ह्येव प्राणिति सोऽन्नमत्ति श० ७५.११७ अन्न प्राण तै० ३२३४ अन्नꣳ हि प्राण श० ३८४८, ४३४२५ ता० (प्रजा) अन्नादेव सम्भवन्ति तस्मादन्नमेव प्रजा श० २५११६ अन्न पशव ऐ० ५१९ रेतो वा अन्नम् गो० पू० ३.२३ अन्नमु श्री श० ८६२१ अन्न वै ब्रह्मण पुरोधा ता० १२८६, १३९२७, १४९३८. अन्नमशीतय श० ९११२१ अन्नमशीति श० ८५२१७ अन्न वै चन्द्रमा तै० ३२३४ अन्न वा अपा पाथ श० ७५२६० अन्न वै प्रजापति श० ५१३७ अन्न वाऽअय प्रजापति श० ७१२४ यत्तदन्नमेप स विष्णुर्देवता श० ७५१२१ अन्न वै व्यन्ने हीमानि सर्वाणि भूतानि विष्टानि श० १४८.१३३ अन्न वै पूषा कौ० १२८ तै० १७३६, ३८३३२ अन्न वाज श० ५१११६, ८११९ अन्न वै वाज तै० १३६ २६,१३८५ श० ५.१४३, ६३२४ अन्न वै वाजा श० १४१९ अन्न वै वाजपेय तै० १३.२४ अन्न नम श० ६३११७ अन्नꣳ हि स्वाहाकार श० ६६३१७ अन्न वै स्वाहाकार श० ९१११३. अन्नꣳ श्रुष्टि श० ७२२५ अन्नꣳ रश्मि श० ८५३३ अन्न वै नृम्णम् कौ० २७४. भर्गो देवस्य कवयोऽन्नमाहु गो० पू० १३२ अन्न वै भद्रम् तै० १३३६. (मेघ) मेधाय इत्यन्नाये येतत् श० ७५२३२. अन्न प्रेति श० ८५३३. अन्न वै पितु श० १९२. २०, ७२११५ अथर्वपितु मे गोपायेत्याह अन्नमेवैतेन स्पृणोति तै० १.१.१०४ अन्न वै पितु ऐ० ११३ अन्न वै देवा पृश्नीति वदन्ति ता० १२१०२४. न अन्न वै पृश्नि तै० २२६१ श० ८७३.२१. अन्न वै रूपम् श० ९२११२ अन्न वै सुरूपम् कौ० १६३ अथ यत् कृष्ण तदपा रूपमन्नस्य मनसो यजुष जै० उ० १२५९ अन्न वै वयश्छन्द श० ८५२.६ अन्न वै गिरश्छन्द श० ८५२५ अन्न प्रच्छच्छन्द श० ८५२४ अन्न केत. श० ६३११६ अन्न पुरीषम् श० ८१४५, ८७३२ अन्न वै पुरीषम् श० ८५४४, ८६.१.२१, १४३१२३. अन्न वै कम् ऐ० ६२१ गो० उ० ६३ तदन्न वै विश्वम्प्राणो मित्रम् जै० उ० ३३६ अन्न व्रतम् ता० २३२३२ अन्नꣳ हि व्रतम् श० ६६४५ अन्न वै व्रतम् ता० २२४५ श० ७५१२५ अन्न भुजिष्या श० ७५१२१ अन्न हि गौ श० ४३४२५ जै० उ० ३३१३ अन्न वै गौ तै० ३९८३ अन्न पशव श० ६२.११५, ७५२४२ आपो वै सूदोऽन्न दोह श० ८७३२१ अन्न सोम कौ० ९६ ता० ६६१. अन्नꣳ सोम. श० ३३४३८ अन्न वै सोम श० ३९.१८, ७२२११ एष वै सोमो राजा देवानामन्न यच्चन्द्रमा श० १६४५ २४२७, ११ १४४ अन्नꣳ सुरा तै० १३३५ अन्न विश श० २१३८ अन्न वै विश. श० ४३३१२, ५१३३, ६७३७ अन्न वै श्रीर्विराट् गो० पू० ५४ गो० उ० ११९ अन्न विराट् कौ० ९६१२ ? तै० १६३४, १८२.२ ता० ४.८४. अन्न विराट् तस्माद् यस्यैवेह भूयिष्ठमन्न भवति स एव भूयिष्ठ लोके विराजति तद्विराजो विराट्त्वम् ऐ० १५ अन्न वै विराट् ऐ० १५, ४११, ५१९, ६२० श० ७५२१९ अन्न वै पङ्क्ति गो० उ० ६२ पङ्क्तिर्वा अन्नम् ऐ० ६२० पाङ्क्तमन्नम् ता० १२१९ पाङ्क्तꣳ (पञ्चविधम्) ह्यन्नम् (अश्य खाद्य चोष्य लेह्य पेयमिति सायण) ता० ५.२७ अन्न वा इडा ऐ० ८२६ कौ० ३७ अन्न वा आप श० २११३, ७४२३७, ८.२३६ तै० ३८२१, ३८१७५ अन्न वृष्टि गो० पू० ४४५ सप्तदशꣳ ह्यन्नम् श० ८४४७ अन्न वै सप्तदश ता० २७७, १७९२, १९ ११४, २०.१०१, २५६३ अन्न सावित्री गो० पू० १३३ अन्न वै० स्वयमातृण्णा (इष्टका) श० ७४२१ अन्नꣳ समिष्टयजु श० ११२.७३० अन्न वै यजुष्मत्य इष्टका श० ८७२८ अन्नमेव यजु श० १०३५६. अन्न याज्या कौ० १५३१६.४. गो० उ० ३२१ अन्न वै याज्या गो० उ० ३२२६८. अथो अन्न निविद इत्याहु कौ० १५३४. अन्नमुक्थानि कौ० ११८,१७७ अन्न वा उक्थ्यम् गो० पू० ४२०. अन्न वा ऽउक्थ्य श० १२२२७ अन्न वै स्तोमा श० ९३३६ अन्न पृष्ठानि ता० १९९४ अन्न न्यूङ्ख ' कौ० २२६८, २५१३, ३०५ अन्न वै न्यूङ्ख ऐ० ५३, ६२९, ३०३६. गो० उ० ६८१२ तस्मादाहु सामैवान्नमिति सा० सा० १.१३. साम देवानामन्नम् ता० ६४१३ एतद्वै साक्षादन्न यद्राजन (साम) पञ्चविध भवति पाङ्क्त ह्यन्नम् ता० ५२७ अन्न वै रथन्तरम् ऐ० ८१ अन्न वै मरुत तै० १७३५, १७५२, १७७३ अन्न वै गार्हपत्य श० ८६३५ एते हि साक्षादन्न यद्रूपा तै०

१ ३ ७ ६ अन्न वा ऊर्गुदुम्बर । श० ३ २.१ ३३, ३ ३ ४ २७. अन्नꣳ सम्मार्जनानि तै० ३ ३ १ ५ वरुणोऽन्नपतिः । श० १२ ७.२.२० अन्न ब्रह्मेति व्यजानात् तै० आ० ६ २ तै० उ० ३ २ अन्न वै पूषा तै० म० २ १ ६ १ श० ८ ५ ४ ४ अन्न वै पावकम् तै० सं० ५ ४ ४ ४ अन्न वा आदित्या तै० स० ५ ३ ४ ३ अन्न वा आप श० ६ २ १ १४

अन्नादम् योऽन्न यवादिक सर्वमत्ति तम् (अग्नि=भौतिकम् ३ ५ [अन्नोपपदे अद भक्षणे (अदा०) धातोर् अण् प्रत्यय. । अन्नादो अग्नि श० २ १ ४ २८ प्रजापतिर्वै देवानामन्नादो वीर्यवान् तै० ३ ८ ७ १ स यो हैवमेत वृत्रमन्नाद वेदान्नादो हैव भवति श० १ ६ ३.१७ ऋग्भिरन्नाद (इन्द्र) ज्योतिश्च वायुश्चान्नादमेताभ्या हीद सर्वमन्नमत्ति ऐ० आ० २ ३ १]

अन्नाद्यम् खाने के योग्य पदार्थ स० वि० १४५, अथर्व० १२ ५ १० **अन्नाद्याय**=अत्तु योग्यमाद्य, अन्नञ्च तदाद्यञ्च तस्मै यद्वाऽन्नमोदनादिक भोज्य यस्मिँस्तस्मै (सुप्रजास्त्वाय) ३ ६३ अत्तु योग्यायाऽन्नाद्याय २० ३. अत्तु योग्यमद्य, अन्नञ्च तदद्यञ्चाऽन्नाद्य तस्मै (अन्नाय) ३ ५ **अन्नाद्येन**=अन्नादिराज्यैश्वर्येण ऋ० भू० १६१, अथर्व० १३ ४ ५६ [अन्नोपपदे अद भक्षणे (अदा०) धातोर्ण्यत् प्रत्यय । एतद्वै परममन्नाद्य यत्सोम । कौ० १३ ७ यश उ वै सोमो राजान्नाद्यम् कौ० ६ ६ श्रीर्विराडन्नाद्यम् कौ० १ १ २ ३ श्रीर्वै विराड् यशोऽन्नाद्यम् गो० पू० ५ २० गो उ० ६ १५ विराडन्नाद्यम् ऐ० ४ १६ ८ ४ एतद्वै कृत्स्नमन्नाद्य यद्विराट् कौ० १४ २ सो-(प्रजापति) ऽब्रवीदेक वावेदमन्नाद्यमसृक्षि सामैव जै० उ० ३ १ ११ अन्नाद्य वा अमृतम् काठ० सक० ४६ ६ ५० १ आपो वा अन्नाद्यम् काठ० सक० ४६ ७ ऊर्ग्वा अन्नाद्य-मुदुम्बर ऐ० ५ २४ ८ ८ एतद्धि देवाना प्रत्यक्षमन्नाद्य यच्चन्द्रमा जै० १ २४६ वाग्वा अन्नाद्यम् ऐ० ४ १६ ८ ४ हिङ्कारेण ह्येव देवेभ्योऽन्ततोऽन्नाद्य प्रदीयते जै० १ २४६]

अन्नियते अदता नियते निश्चिते समये ४ २ ७.

अन्यकृतम् अन्येन कृतम् (एन =अपराधम्) ६ ५१ ७ **अन्यकृतेभ्यः**=यथाऽन्यैर्यानि क्रियन्ते तेभ्य (पापिभ्यो जनेभ्य) ४ ३५ [अन्योपपदे डुकृञ् करणे धातो क्त]

अन्यःजातम् अन्येनाऽन्यस्माद्वा समुत्पन्नम् (रेक्ण = धनम्) ७ ४.७ अन्यस्मादुत्पन्नम् (एन =पापम्) ७ ५२ २ [अन्योपपदे जनी प्रादुर्भावे धातो क्त. नकारस्याकारादेश]

अन्यत् द्वितीय भिन्नम् १ ५२ १४. द्वितीयम् १ ३० १९. भिन्नम् १ ११५ ५ अन्य ५ ३१.२ अपने से भिन्न आर्याभि० १ १५ कार्यकारणजीवेभ्यो भिन्नं ब्रह्म १७ ३१ अस्मद्भिन्नम् (ब्रह्म) ३३ ३८ वेद और युक्ति मे कभी सिद्ध न हो सकने वाली ब्रह्म से एकता आर्याभि० २ ४४, १७ ३१ **अन्यदन्यत्**=पृथक्-पृथक् ३ ३८ ७ [अन्यो नानेय नि० १ ६ अन्ये सपत्ना नि० १० २६]

अन्यतः भिन्नात् (देशात्) १ ४ ५ [अन्यप्राति० सार्वविभक्तिकस्तसि]

अन्यतः एन्यः या अन्यतो यन्ति प्राप्नुवन्ति ता (मैत्र्य =पशवो गाव) २४ ८ [अन्यतस् उपपदे इण् गतौ (अदा०) धातो केन्य. कृत् प्रत्यय । स च कृत्यार्थेऽपि सन् कर्त्तरि छान्दसत्वाद् भवति]

अन्यतः शितिबाहुः अन्यत शितयो बाह्वोर्यस्य स (पशु) २४ २ [अन्यतस् उपपदे शिति-बाह्वो बहुव्रीहि । शिति कृष्ण शुक्लवर्णो वा]

अन्यतःशितिरन्ध्रः अन्यतोऽन्यस्मिन् रन्ध्राणीव शितयो यस्य स (पशु), समन्ततो रन्ध्राणीव शितय श्वेत-चिह्नानि यस्य स (पशु) २४ २ [अन्यतस् उपपदे शिति-रन्ध्रयो समास । रन्ध्रशब्दस्य परनिपात]

अन्यतोऽरण्याय अन्यतोऽरण्यानि यस्मिन् देशे तद्विनाशाय ३०.१९ [अन्यतस् व्याख्यात, अरण्यम्= ऋ गतौ धातो 'अर्त्तेर्निच्च' उ० ३ १०२. सूत्रेण अन्य. प्रत्यय । तयोर्बहुव्रीहि]

अन्यत्र अन्य स्थान मे ७ ५९ ५ [अन्यप्राति० 'सप्तम्यास्त्रल्' अ० ५ ३ १० सूत्रेण त्रल् । 'तद्धितश्चासर्व०' इत्यव्ययत्वम्]

अन्यथा उल्टा पापरूप स० वि० १४५, ४ २ [अन्यप्राति० 'प्रकारवचने थाल्' इति थाल् प्रत्यय । तद्धितश्चासर्व०' इत्यव्ययसज्ञा]

अन्यवापः कोकिलाख्य पक्षिविशेष २४ ३७. [अन्यै काकादिभिर् उप्यन्ते सन्तानानि क्रियन्ते यस्येति बहुव्रीहि]

अन्यव्रतस्य धर्मविरुद्धाऽऽचरणस्य ५ २० २. अन्येषा पालने व्रत शील यस्य तस्य (विद्वज्जनस्येश्वरस्य वा) ३८ २० ईश्वर और उसकी आज्ञा से भिन्न को लेशमात्र भी ईश्वर न मानने रूप व्रत का आर्याभि० २ ४१, ३८ २०

[अन्यत् व्रत ,कर्म यस्य, अन्येषां पालने व्रत यस्मेति वा बहुव्रीहि । व्रतमिति कर्मनाम । नि० २ १३.]

अन्यान् शत्रून् ३ ४६ २.

अन्याऽन्या भिन्ना भिन्ना पृथक्-पृथक् सयुक्ते च (अहोरात्रे) प्र०—अत्र वीप्साया द्विर्वचनम् १ ६२ ८ भिन्ना भिन्ना एकैका कालभेदेन ३३ ५ परस्पर वर्त्तमाना (अहोरात्रे) १ ६५ १

अन्यादृङ् अन्येन समान (पुरुष) १७ ८१ [अन्योपपदे दृशिर् प्रेक्षणे धातो 'समानान्ययोश्चेति वक्तव्यम्' (अ० ३ २ ६०) वार्त्तिकेन क्विन् । 'क्विन्प्रत्ययस्य कु' रिति कुत्वम् । 'आ सर्वनाम्न ' इत्याकारादेश']

अन्योदर्य्यः अन्योदराज्जात (अन्यगोत्रजोऽनौरसो वा पुत्र) ७ ४ ८ [उदरप्राति० जातार्थे यत् प्रत्ययश्छान्दस । ततोऽन्येन सह समास]

अन्योऽन्यम् एक दूसरे से स० वि० १४१, अथर्व० ३ ३० १ ['कर्मव्यतिहारे सर्वनाम्नो द्वे भवत, समासवच्च बहुलम्' अ० ८ १ १२ वा० द्वित्वम् । बहुलवचनात् समासवन्न । उत्तरपदस्य चाम्]

अन्वचष्ट अनुख्यापयेत् ४ १८ ३ [अनु+चक्षिङ् व्यक्ताया वाचि (अदा०) धातो सामान्ये लङ् । 'स्को सयोगाद्यो' रिति सकारलोप]

अन्वचारिषम् धरेयम् २० २२ पश्चादनुतिष्ठामि, अन्व०—कर्माऽनुचरामि, प्र०—अत्र लडर्थे लुङ् १.२३ २३. [अनु+चर गतौ (भ्वा०) धातो. सामान्ये लुङ्]

अन्वजायथाः अनुजायेथा १ १४१ ६ [अनु+जनी प्रादुर्भावे धातो सामान्ये लङ् । 'ज्ञाजनोर्जा' इति धातोर्जादेश]

अन्वतक्षत् पश्चादतिसूक्ष्मा धिय कुर्वन्ति १.८६ ३ [अनु+तक्षू तनूकरणे (भ्वा०) धातो सामान्ये लङ् । 'तनूकरणे तक्ष' इति विकल्पेन श्नुविधानात् पक्षे शप्]

अन्वददुः अनुददति ५ २६ ५ [अनु+डुदाञ् दाने (जु०) धातो सामान्ये लङ् । 'आत' इति नित्य भेर्जुस्]

अन्वनयन्त प्राप्नुयु ३ ७ ६ [अनु+णीञ् प्रापणे (भ्वा०) धातोर्लङ् सामान्ये]

अन्वनोनवुः अनुकूलतया स्तुवत १ ८० ६ [अनु+णु स्तुतौ (अदा०) धातोर्यङ्लुगन्तात् लङ्]

अन्वपश्यत् अनुपश्यति १ १६४.६. [अनु+दृशिर् प्रेक्षणे (भ्वा०) धातोर्लट् । शिति पश्यादेश.]

अन्वमदन् अनुमदन्ति अनुहर्षन्ति ७ १८ १२ आनुकूल्येन हर्षन्ति १ ५२ ६ अनुहर्षयन्ति १ १०३ ७ अनुहृष्येयुरनुहर्षयेयुर्वा १ १०२ १. आनुकूल्येनाऽऽनन्देयु भा०—सत्यानुकूला सन्त स्वयमानन्दिता भूत्वाऽन्यानानन्दयन्ति ३३ २६ [अनु+मदी हर्षे (दिवा०) धातो सामान्ये लङ् । विकरणव्यत्ययेन शप्]

अन्वमन्यन्त पश्चाद् मन्यन्ताम् १ ११६ १७ (अनु+मन ज्ञाने (दिवा०) धातो सामान्ये लङ्]

अन्वमंसाताम् अनुकूल मन्येताम् ३८ १३

अन्वमंस्त=पश्चात् मन्यते ५ ४०. [अनु+मन ज्ञाने (दिवा०) धातो सामान्ये लुङ्]

अन्वरुहत् अनुवर्धयति १ १४१ ५ [अनु+रुह बीजजन्मनि प्रादुर्भावे च (भ्वा०) धातोर्लङ् । विकरणव्यत्ययेन श प्रत्यय]

अन्वर्चन् आनुकूल्येन सत्कुर्वन् (इन्द्र=सभाध्यक्ष) १ ८० ४ पश्चात् पूजयन् (सभापति) १ ८० १ [अनु+अर्च पूजायाम् (भ्वा०) धातो. शतृप्रत्यय]

अन्वविन्दत् अनुलभते २ १२.११. **अन्वविन्दन्**=अनुलभेरन् ५ ४० ६ अनुलभन्ते १७ ६२ प्राप्नुयु, भा०—सेवन्ताम् १५ २८ [अनु+विद्लृ लाभे (तुदा०) धातोर्लङ् । 'शे मुचादीनामि' ति नुमागम.]

अन्वविष्टन् व्याप्नुत ७ १८ २५ [अनु+विष्लृ व्याप्तौ (जु०) धातो रूपम् । 'बहुल छन्दसी' ति श्लुर्न । छान्दसत्वात्साधु]

अन्ववृत्सत अनुवर्त्तन्ते ५ ५१ १. [अनु+वृतु वर्त्तने (भ्वा०) धातोर् लुङ् । छन्दसि सर्वविधीना विकल्पेन इड् न भवति]

अन्ववेदम् पश्चाद्विजानामि ४ २७ १ [अनु+विद ज्ञाने (अदा०) धातो सामान्ये लङ्]

अन्वश्नोति पश्चाद् व्याप्नोति २ १६ ३ [अनु+अशू व्याप्तौ (स्वा०) धातोर्लट् । व्यत्ययेन परस्मैपदम्]

अन्वसत् अनुयोगेन भवेत् १ ५७ २ [अनु+अस भुवि (अदा०) धातोर्लङ् । 'बहुल छन्दसी' ति शपो लुङ् न । आडभावश्च]

अन्वागन्ता धर्ममन्वागच्छति य स (विद्वज्जन) १८ ५६ [अनु+आङ्+गम्लृ गतौ (भ्वा०) धातो कर्त्तरि तृच्]

अन्वागात् अन्वागच्छेत् १ १२६ ३ [अनु+आङ्+इण् गतौ (अदा०) धातोर्लुङ् सामान्ये । 'इणो गा लुङी' ति गादेश । 'गातिस्था०' इति सिचो लुक् च]

अन्वाततान आच्छाद्य विस्तारयति ८ ६२. [अनु+आङ्+तनु विस्तारे (तना०) धातोर्लिट् सामान्ये]

अन्वातांसीत् पश्चात् समन्तात्तनुताम्, प्र०—अत्र वचनव्यत्ययेन द्विर्वचनस्थाने एकवचनम् १५ ५३ [अनु+तनु विस्तारे (तना०) धातो सामान्ये लुङ्। छन्दसि सर्व-विधीना विकल्पेन इडागमो न भवति। हलन्तलक्षणा वृद्धि]

अन्वानशे आनुकूल्येन व्याप्नोति १ ८४ ६ [अनु+अशू व्याप्तौ (स्वा०) धातो सामान्ये लिट्। 'अत आदे'-रित्यभ्यासस्य दीर्घत्वे 'अश्नोतेश्चे' ति नुडागम]

अन्वापनीफणत् पश्चादत्यन्त गच्छति ४ ४० ४ [अनु+आङ्+फण+गतौ (भ्वा०) धातोर्णिचि लुङि च रूपम्। छान्दसोऽभ्यासस्य नीगागम]

अन्वापनीफणत् पश्चादतिशयेन गच्छन् (दधिक्रा = अश्व) ६ १४ [अनु+आङ्+फण गतौ (भ्वा०) धातो. यङन्तात् शतृ। नीगभ्यासस्य]

अन्वाभज अनुकूल समन्तात् स्थापय ४ २८ [अनु+आङ्+भज सेवायाम् (भ्वा०) धातो लोट्]

अन्वायन् प्राप्नुवन्ति ४ २६ २ **अन्वायम्**=प्राप्नुयाम् ५.३० २ **अन्वायातु**=आनुकूल्येन प्राप्नोतु २० ४६ [अनु+इण् गतौ (अदा०) धातोर्लङि लोटि च रूपाणि]

अन्वारभामहे हम आरम्भ करे, भा०—वर्द्धयामहे ६ २६ यानानि रचयित्वा तत्र स्थापयेम ३५ १३ [अनु+आङ्+रभ राभस्ये (भ्वा०) धातोर्लट्। धातूनामनेकार्थत्वा-दत्र वर्धनेऽपि]

अन्वालेभिरे अनुलभन्ते ३४ ४६ [अनु+आङ्+डुलभस् प्राप्तौ (भ्वा०) धातोर्लिट् 'अत एकहल्मध्ये०' इत्येत्वाभ्यासलोपौ]

अन्वावर्त्ते अनुगतेन समन्ताद्वर्त्तमानो भवेयम्.२ २७ पश्चादाभिमुख्येन वर्त्तमानो भवेयम् २ २६ [अनु+आङ्+वृतु वर्त्तने (भ्वा०) धातोर्लिङर्थे लट्]

अन्वित्या अन्वेषणेन १५ ६. [अनु+इण् गतौ (अदा०) धातोर्भावे स्त्रियां क्तिन्। धातूनामनेकार्थत्वा-दत्रान्वेषणार्थेऽपि। अन्नमन्विति श० ८ ५ ३ ३.]

अन्वियाय अनुप्राप्नोतु ४ ४ ११ [अनु+इण् गतौ (अदा०) धातोर्लिट्। 'अभ्यासस्यासवर्णे' इत्यभ्यासस्य इयङ्]

अन्विहि अनुगच्छ १२ ६२ [अनु+इण् गतौ (अदा०) धातोर्लोट्]

अन्वीयतुः अनुगच्छत ३३.६७ **अन्वीयुः**=प्राप्नुयु १.१६३ ८. [अनु+इण् गतौ)अदा०) धातोर्लिटि द्विवचन-बहुवचनयो रूपाणि]

अन्वूह्याते देशान्तर गम्येते ११२० ११ [अनु+ऊह वितर्के (भ्वा०) धातो कर्मणि लट्। छान्दसत्वाद् 'आतो ङित' इत्येत्व न]

अन्वेति आनुकूल्येन प्राप्नोति १११३ १० पुन प्राप्नोति १११३ ८ **अन्वेमि**=अनुगच्छामि ७ २. [अनु+इण् गतौ (अदा०) धातोर्लट्]

अन्वेतवे अन्वेतु विज्ञातुं प्राप्तु गन्तु वा ७.३३.८. [अनु+इण् गतौ (अदा०) धातोस्तुमर्थे तवेन् प्रत्यय]

अन्वेतवै अनुक्रमेण गन्तुम् ८.२३ अन्वेतुमनुगन्तुम् ७ ४४ ५ [अनु+इण् गतौ (अदा०) धातोस्तुमर्थे 'तुमर्थे सेसेनसेअसेन्०' अ० ३ ४ ६ सूत्रेण तवै प्रत्यय.]

अप क्रियायोगे १११.५ धात्वर्थे १.१०.७ दूरी-करणे ३४ २५. निवारणे ६ ३.१३६. दूरीकरणे वर्जने निषेधाऽर्थे वा २ १५ दूरार्थे ३ २१ पृथग्भावे १ ५०.२. विरुद्धाऽर्थे १ ८५ ३ अपराधे १ ४८ ८ [समित्येकीभावम् अपेत्येतस्य प्रातिलोम्यम् (पृथग्भावम्) नि० १ ३]

अपकामम् अपगतश्चाऽसौ कामश्च तम् (शत्रुम्=अरिम्) २६ ३६ काममविनाशनम् ६ ७५ २ [अप+कमु कान्तौ (भ्वा०) धातोर्घञ्]

अपगमत दूर गच्छति ६ ४५ २४ [अप+गम्लृ गतौ (भ्वा०) धातोर्लुङ्। 'पुषादिद्युताद्यॢदित०' इति च्ले स्थाने अङ् प्रत्यय। मध्यमबहुवचने]

अपगल्भम् प्रगल्भतारहितम् (जनम्) ३० १७ अपगतं दूरीकृत गल्भ धाष्टर्यं येन तस्मै (पुरुषाय) १६.३२. [अप+गल्भ धाष्टर्ये (भ्वा०) धातोर्भावे घञ्]

अपगात् दूर गच्छन्तु, भा०—दूरे भवत, प्र०—अत्र लोडर्थे लङ्, पुरुषव्यत्ययश्च ३ २१ [अप+इण् गतौ (अदा०) धातोर्लुङ्। 'इणो गा लुङि' ति गादेश। 'गातिस्था०' इति सिचो लुक्]

अपगूहळम् गुप्तम् (पद=पादचिह्नम्) ४ ५.३. [अप+गुहू संवरणे (भ्वा०) धातो क्त प्रत्यय.। छान्दसं रूपम्]

अपगूढम् अपगतश्चाऽसौ गूढश्च तम् (राजान=प्राण जीव वा) १ २३.१४ अपगत संवरणमाच्छादनं यस्मात्तत् (कर्म) १.११६ ११ **अपगूढा**=आच्छादितानि (द्रव्याणि) १.१२३.६ **अपगोहम्**=आच्छादकम् (अन्धकारम्) २ १५ ७ [अप+गुहू संवरणे (भ्वा०) धातोर्भूते क्त।

'हो ढ' इति ढत्वे धत्वे ष्टुत्वे च 'ढो ढे लोप' इति पूर्व-ढकारलोपे 'ढ्लोपे पूर्वस्य दीर्घ०' इति उकारस्य दीर्घत्वम्]

अपगूर्यम् उद्यम्य ५ ३२ ६ [अप+गुरी उद्यमने (तुदा०) धातो क्त्वा। समासे क्त्वो ल्यप्]

अपचत पचति ५ २६ ७ **अपचन्त**=पचन्ति १ १६४.४३. [डुपचष् पाके (भ्वा०) धातो सामान्ये लङ्। पच धातुरुभयपदी]

अपचितिम् सत्कृतिम् २१ ५८. सत्कारम् ४ २८ ४. **अपचितिः**=प्रजाजनकम् (भसत्=भगेन्द्रियम्) २० ८ [चायृ पूजानिशामनयो (भ्वा०) धातो स्त्रियां क्तिन्। 'क्तिनि नित्यमिति वक्तव्यम्' (वा० ७ २.३०) अनेन धातोरनिट्त्व चिभावश्च निपात्यते। अपपूर्वाद्वा चिञ् चयने (स्वा०) धातो क्तिन्]

अपचेतयातै दूर चेतयेत्, प्र०—'चिती सञ्ज्ञाने' इति ण्यन्तस्य लेट प्रथमपुरुषस्यैकवचने प्रयोगोऽयम् २ १७ [अप+चिती सञ्ज्ञाने (भ्वा०) धातोर् णिजन्ताल्लेट्। 'लेटोऽडाटौ' इत्याट् 'एत ऐ' इत्यैकारादेशश्च]

अपच्यवम् त्यागम् १ २८ ३. [अप+च्युङ् (भ्वा०) धातो 'ऋदोरप्' इत्यप् प्रत्यय]

अपजर्गुराणः आच्छादनात् पृथक् कुर्वन् (राजा) ५ २९ ४ [अप+गुरी उद्यमने (तुदा०) धातोर्यङ्लुगन्तात् शानच्]

अपजहि दूर नाशय, अ०—दूरीकुरु १२ ४७ हिंसय १ १७ [अप+हन हिंसागत्यो (अदा०) धातोर्लोट्। 'हन्तेर्ज' इति जादेश]

अपतिघ्नि! विवाहितपतिसेविके (स्त्रि) ऋ० भू० २१४ **अपतिघ्नी**=पति को दुख न देने वाली (स्त्री) स० प्र० १५२, अथर्व० १४ २ १८ [पत्युपपदे हन् हिंसागत्यो (अदा०) धातो। 'कृत्यल्युटो बहुलम्' इति बहुलवचनाट् टक् प्रत्यय.। स्त्रियां टिड्ढाण्०' इति ङीप्। नञ् समासश्च]

अपत्यम् सन्तानम् १ १७४ ६ **अपत्याय**=सन्तानाय १३ ३५ **अपत्ये**=सन्ताने=१ ६८ ४ [अपत्य कस्मात्? अपतत भवति नानेन पततीति वा नि० ३ १ अपत्यम्=अपत्यनाम निघ० २.२]

अपत्यसाचम् यदपत्ये सचति व्याप्नोति तत् (शरीरात्मबलम्) ६ ७२ ५ पुत्रपौत्रादिसमेतम् (पुरुषम्) १ ११७ २३. उत्तमाऽपत्यसंयुक्तम् (रयिं=धनम्) २ ३० ११ [अपत्योपपदे षच समवाये (भ्वा०) धातोरण् प्रत्यय]

अपदी अविद्यमानपादे (द्यावापृथिवी) १ १८५ २ [नञ्-पादपदयोर्बहुव्रीहौ 'कुम्भपदीषु च' सूत्रेण समासान्तलोप। 'पादोऽन्यतरस्याम्' इति ङीप्। 'पाद पत्' इति पदादेश]

अपदे न विद्यन्ते पदानि चिह्नानि यस्मिँस्तस्मिन्नन्तरिक्षे १ २४ ८. चौरादिनिष्पादितेऽप्रसिद्धे व्यवहारे ८ २३ [पद गतौ (दिवा०) धातोरधिकरणे घ प्रत्यय। ततो नञ्-बहुव्रीहि]

अपद्यहि प्राप्नुयाम् ४ २६ **अपद्यन्त**=प्राप्त होते हैं स० वि० १७०, १४ २ ३२ [पद गतौ (दिवा०) धातोर्लङ्। 'बहुल छन्दसी' ति श्यनो लुक्। द्वितीयप्रयोगे लुक् न]

अपद्रन् अपद्रवन्ति ६ २० ४ [अप+द्रु गतौ (भ्वा०) धातोर्लङ्। छान्दसो वकारलोप]

अपद्वेषः दूरीकर्त्तुं द्विषन्ति ये शत्रवस्ते १ ४८ ८ द्वेषरहित (ईश्वर) आर्याभि० २ ४१, ३८ २० [अप+द्विष अप्रीतौ (अदा०) धातो कर्त्तरि भावेऽपि विहितो घञ् बहुलवचनात् कर्त्तरि]

अपधमन्तः दूरीकुर्वन्त (मरुत=विद्वज्जना) २.३४ १ [अप+धम+शतृप्रत्यय। धमतिर्गतिकर्मा निघ० २ १४]

अपधा योऽपदधाति स (इन्द्र=सूर्यलोक) प्र०—अत्र 'सुपां सुलुग्०' इति विभक्तेर्डादेश २ १२ ३ [अप+डुधाञ् धारणपोषणयो (जु०) धातो 'आतश्चोपसर्गे' अ० ३ १ १३६ सूत्रेण क प्रत्यय। विभक्तेश्च स्थाने डादेश]

अपनुदताम् दूर प्रेरयत, प्र०—अत्र लडर्थे लोट् न प्रेरयत प्र०—अत्रापि लडर्थे लोट् २ १५ **अपनुदन्ताम्**=अपप्रेरयन्तु २८ १३ **अपनुदस्व**=दूरीकुरु ६ २१ ७ [अप+णुद प्रेरणे (तुदा०) धातोर्लोट्]

अपन्नगृहस्य अप्राप्तगृहस्य कुमारब्रह्मचारिण ६ २४. [पदगतौ धातो क्तप्रत्यये पन्न। न पन्नोऽपन्न=अप्राप्त। ग्रह उपादाने धातो 'गेहे क' इति कप्रत्यये गृहम्। ततस्तयो. समास]

अपपादि अपपाद्येत ६ २०.५ [अप+पद गतौ (दिवा०) धातो कर्मणि लुङ्। अडभावश्च]

अपपित्वम् अपचयम् ३ ५३ २४ [अपोपपदे पि गतौ (तुदा०) धातो कृत्यार्थे त्वन् प्रत्यय। अथवा अप+पद गतौ धातोर्बाहु० इत्वन् प्रत्ययो डिच्च]

अपप्तत् उदय होता है १ १६१ ३. **अपप्तन्**=उड्डी-

यन्ते ६ ६४ ६ पतन्ति गच्छन्ति ६ ६४ २ पतन्ति ७ ५९ ७ गच्छन्ति ६ ६४ २ [पत्लृ गतौ (भ्वा०) धातोर्लुङ् । 'पुषादि-द्युताद्यलृदित परस्मैपदेषु' इति च्लेर् अङ् । 'पत पुम्' इत्यङि पुमागम]

अपप्रोथ जेतु पर्याप्तो भव, शत्रूनसमर्थान् कुरु ६ ४७ ३०. [अप+प्रोथृ पर्याप्तौ (भ्वा०) धातोर्लोट्]

अपबाधताम् निवारयतु ७ ५० २ **अपबाधते**= दूरीकरोति ३४ २५ **अपबाधन्ते**=विरुद्धतया बाधन्ते १ ८५ ३ [अप+बाधृ लोडने (भ्वा०) धातोर्लोट् लट् च]

अपबाधमान अपबाधते स (बृहस्पति =सेनापति) १७ ३६ **अपबाधमाना**=निवारयन्ती (उषा) ५ ८० ५ **अपबाधमानाः**=निवर्त्तयन्त (विद्वज्जना) १९ ८४ [अप+बाधृ लोडने (प्रतिघाते) (भ्वा०) धातो शानच्]

अपभर्त्ता अपबिभर्त्ति दूरीकरोतीति (भेषज = भिषग्जन) २ ३३ ७ [अप+डुभृञ् धारणपोषणयो (जु०) धातो कर्त्तरि तृच्]

अपभवन्तु दूरीभवन्तु ३४ ४६ **अपभूत**=अपमान-युक्ता भवत ४ ३५ १ **अपभूतु**=अपभवतु १ ११३ १७ [अप+भू सत्तायाम् (भ्वा०) धातोर्लोट् । 'अपभूत' 'अपभूतु' इत्येनयो 'बहुल छन्दसी' ति शपो लुक् । 'भूसुवोस्तिङी' ति गुणप्रतिषेध]

अपभूतन विरुद्धा भवत ७ ५९.१० [अप+भू सत्तायाम् (भ्वा०) धातोर्लोट् । शपो लुक् । 'तप्तनप्त-नथनाश्च' इति तस्य तनादेश]

अपमृष्टः अपमृज्यते दूरीक्रियतेऽविद्यादिक्लेशै य स शुद्ध (योगिजन) ७ १२ दूरीकृत (मर्क =अनीति) ७ १७ [अप+मृजूष् शुद्धौ (अदा०) धातो क्त । 'क्विङति चे' ति मृजेर्वृद्धिर्न भवति]

अपयन्ति पृथक्त्वेन यन्ति १ ५० २ **अपयन्तु**= दूर गच्छन्तु ३५ १ [अप+इण् गतौ (अदा०) धातोर्लट् लोट् च]

अपयुयोति निवारयितु मिश्रयति १ ९२ ११. [अप+ यु मिश्रणेऽमिश्रणे च (अदा०) धातोर्यङ्लुक् । ततो लट् । गुणाऽभावश्च छान्दस]

अपरजाय अपरे जाताय ज्येष्ठाऽनुजायाऽन्त्यजाय वा १६ ३२ [अपरोपपदे जनी प्रादुर्भावे धातोर्ड प्रत्यय]

अपरम् भविष्यति काले ३३ ९४ अन्यम् (भयम्) १ १८९ ४ पश्चात् १ १८४ १. पश्चिमम् (दुष्टजनम्) ६ ४७ १५ द्वितीयम् २ २८ ८ श्वो दिन प्रति १ ३६ ६

अपरः=अन्यो (देशो) अन्य (शिल्पी वा) १.७४ ८. अन्य ३५ १५ **अपरा**=अपरौ १ १८५ १ अन्य कोई पीछे उत्पन्न हुई (छोटी बहिन) १ १२४ ६ **अपरा** =या जनिष्यन्ते (प्रजा) ३ ५५ ५ अन्या (अप =जलानि) ५.४८ २.

अपरासः पश्चाद् भूता (विद्वज्जना.) ५ ४२.६

अपराजितम् यो न केनाऽपि पराजेतु शक्यते तम् (इन्द्रम्=ईश्वर सभाऽध्यक्ष वा) १ ११.२ अन्यै पराजेतु-मशक्यम् (इन्द्र=परमैश्वर्यकारक राजानम्) २८ २ **अपराजिता**=शत्रुभि पराजेतुमशक्यौ (इन्द्राग्नी= सभासेनेशौ) ३ १२ ४ [परा+जि जये (भ्वा०) धातो. क्त । नञ्समास]

अपरितासः अन्यैरव्याप्ता (क्रतव.=यज्ञा प्रज्ञा वा) २५ १४

अपरिविष्टम् परिवेषरहितम् (कर्म्म) २ १३ ८. [परि+विष्लृ व्याप्तौ (जु०) धातो क्त. । नञ्समास]

अपरिह्वृतः परित सर्वतोऽनावृत. (अग्नि =विद्युत्) २ १०.३ [परि+वृञ् वरणे (स्वा०) धातो क्त । नञ्समास]

अपरिह्वृताः सर्वतोऽकुटिला ऋजवो भूत्वा (मनुष्या) प्र०—अत्र 'अपरिहवृताश्च' अ० ७ २.२३ इत्यनेन निपातना-च्छन्दसि प्राप्तो ह्वुभावो निषिध्यते १ १०० १९. अपरिवर्जिता (मनुष्या) १ १०२ ११ [परि+ह्वृ कौटिल्ये (भ्वा०) धातो क्त प्रत्यय । 'अपरिह्वृताश्च' (अ० ७ २ ३२) सूत्रेण 'हृ' आदेशाभावो निपात्यते । नञ्-समास]

अपरीतः अवर्जित (राजा) ५.२९ ४. **अपरीताः**= अवर्जिता (पन्थास) १ १०० ३ [परि+इण् गतौ धातो क्त । नञ्समास ।]

अपरीतासः अवर्जनीया (देवा) १ ८९.१ अन्यैर-व्याप्ता (क्रतव =यज्ञा प्रज्ञा वा) २५ १४. [नञ्+ परि+इण् गतौ (अदा०)+क्त]

अपरीभ्यः अपूर्णाभ्य सेनाक्रियाभ्य, प्र०—अत्र पृधातो 'अच इ' उ० ४ १४४ अनेन सूत्रेण इ प्रत्यय 'कृदिकारादक्तिन' अ० ४ १ ४५ इत्यनेन वार्तिकेन ङीप् प्रत्यय १ ३२ १३ **अपरीषु**=आगामिनीषूपस्सु १ ११३ ११ (पृ पालनपूरणयो) (जु०) धातो 'अच इ.' उ० ४ १४४ सूत्रेण इ प्रत्यय । स्त्रिया ङीष् नञ्-समास]

अपर्वन् अपर्वणि पर्वरहिते समये ४.१९.३.

[पृ पालनपूरणयो (जु०) धातो 'स्नामदि०' उ० ४ ११३. सूत्रेण वनिप्। नञ्समास। 'सुपा सुलुक्' इति डेर्लुक्]

अपवक्ता मिथ्यावादी (प्रजापुरुष) ८ २३ [अप+वच परिभाषणे (अदा०) धातो कर्त्तरि तृच्]

अपवध्यासम् हन्याम् १ २६ [अप+हन हिंसागत्यो (अदा०) धातोर्लिङ् 'हनो वध लिङि' (अ० २ ४ ४२) सूत्रेण वधादेश]

अपवर्त्तय दूरीकुरु २ २३ ७ [अप+वृतु वर्त्तने (भ्वा०) धातोर्णिजन्ताल्लोट्]

अपववर्थ अपवर्त्तते ३ ४३ ७ [वृञ् वरणे (स्वा०) धातोर्लिट्। 'बभूथाततन्थजगृम्भववर्थेति निगमे' इतीडभावो निपात्यते]

अपवः अपवृणुयात् १ १२१ ४ अपवृणोति २ १४ ३. [अप+वृञ् वरणे (स्वा०) वृङ् धातोर्वा लुङ्। 'मन्त्रे घसह्वरणशवृदह०' इति सूत्रेण लेर्लुक्। अडभावश्च]

अपव्रन् अपवृण्वन्ति ५ २९.१२ अपवृणोति ४ ५ ८. अपवृणुयु ४ २ १६ दूरीकुर्वन्तु १९ ६९ अपवृण्वन्ति ४ ५५ ६ [अप+वृञ् वरणे धातोर्लुङ् प्रथमा वहुवचने 'मन्त्रे घसह्वरणश०' सूत्रेण लेर्लुक् अडभावश्च]

अपवर्त्ता अपवारयिता (इन्द्र =राजा), प्र०—अत्र तृन् प्रत्यय ४ २० ८ [अप+वृञ् वरणे (स्वा०) धातोर्णिजन्तात् तृन् तच्छीलादिपु। णेर्लुक् च]

अपवाति अपगत वाति गच्छति १ १६२.१० अपगच्छति २५ ३३ [अप+वा गतिगन्धनयो (अदा०) धातोर्लट्]

अपवृधि अपवृणु, अपवृणोति वा, प्र०—अत्र पक्षान्तरे सूर्यस्य प्रत्यक्षत्वात् प्रथमाऽर्थे मध्यम 'श्रुशृणुपृकृवृभ्यश्छन्दसि' अ० ६ ४ १०२ अनेन सूत्रेण हेर्धि १ १० ७ दूरीकुरु ७ २७ २ [अप+वृञ् वरणे (स्वा०) धातोर्लोट्। 'श्रुशृणु०' इत्यादिना छन्दसि हेर्धिरादेश]

अपवेत्ति नश्यति ५ ६१ ८ [अप+विद ज्ञाने (अदा०) धातोर्लट्। धातूनामनेकार्थत्वादत्र विनाशे]

अपव्रतान् ब्रह्मचर्यसत्यभाषणादिव्रताऽऽचरणरहितान् (अविद्वज्जनान्) ५ ४२ ९ अपगतानि दुष्टानि मिथ्याभाषणादीनि व्रतान् कर्माणि येपा तान् दस्यून् १ ५१ ९. **अपव्रतेन**=अन्यथा वर्त्तमानेन (ब्रह्मणा=धनेन) ५ ४० ६ अनियमेन परुषकर्मणा १७ ४७ [अप-व्रतयोर्वहुव्रीहि। व्रतमिति कर्मनाम निघ० २ १]

अपशोशुचत् दूरीकुर्यात् १ ९७ १ दूरीकर्त्तु शोशुच्यात् १ ९७ ५. भृश शोपयतु, भा०—पृथक् कारयति ३५ ६ सव नष्ट हो जाये आर्याभि० १.३९, ऋ० १ ७ ५.६ [अप+शुच शोके (भ्वा०) ईशुचिर् पूतीभावे (दिवा०) धातोर्वा यङ्लुकि रूपम्। शोचतिर्ज्वलतिकर्मा निघ० १.१६]

अपश्चाद्दध्वने उत्तमेपु व्यवहारेष्वग्रगामिने (विदुषे=आप्ताय विपश्चिते) ६ ४२ १ [दघ पालने (स्वा०) धातोर्वाहुलकात् वनिप्। दघ्नोति गतिकर्मा नि० २ १४ 'पश्चात्' अ० ५ ३ ३२ सूत्रेणापरस्य पश्च भावो निपात्यते। पश्चात्=अपरम्। तद्विपरीतोऽग्रगामी]

अपश्यत् पश्यति ३ २ १२ पश्येत् ३ २६ ८ **अपश्यताम्**=पश्यत. ७ ३३.१०. **अपश्यन्**=पश्येयु १ ११३.११ **अपश्यन्त**=पश्यन्ति १.१४६ ४ **अपश्यम्**=पश्यामि प्र०—अत्र लडर्थे लङ् १ १८ ९ पश्येयम् ३७ १७. **अपश्याम**=सम्प्रेक्षेमहि १ १३९ २ (दृशिर् प्रेक्षणे (भ्वा०) धातोर्लङि रूपाणि शिति पश्यादेश। 'अपश्यन्त' प्रयोगे व्यत्ययेनात्मनेपदम्]

अपश्याः ये न पश्यन्ति ते (अन्धा जना) १.१४८ ५ [दृशिर् प्रेक्षणे (भ्वा०) धातो 'पाघ्राध्माधेट्दृश श' अ० ३ १ १३७ सूत्रेण कर्तरि श प्रत्यय। शिति पश्यादेश। तत्प्रतिषेध]

अपश्रितम् आसेवितम् (शिर=उत्तमाऽङ्गम्) १ ८४.१४ **अपश्रितः**=योऽपश्रयति स (सूर्य) ५.६१ १९ [अप श्रिञ् सेवायाम् (भ्वा०) धातो क्त। 'आदिकर्मणि क्त कर्त्तरि चे' ति कर्त्तर्यपि क्त]

अपसम् कर्म, प्र०—अप इति कर्मनामसु पठितम् निघ० २.१. 'व्यत्ययो वहुलम्', इति लिङ्गव्यत्यय, इदमपि सायणाचार्येण न बुद्धम् १ २९. **अपसः**=कर्माणि, भा०—अनेकविधानि कर्माणि ३३ ७५. अप कर्म तद्वन्त सदा कर्मनिष्ठा (धीरा जना) ३४ २ उत्तमानि कर्माणि १ ९२ ३ सुकर्म्माण (वरा जना) ५ ४२ १२ कर्म करने वाले लोग स० प्र० २४६,३४२ कर्मवन्त, भा०—कर्मसाधनानि (त्रिधातव.=जीवा), अत्र विन् प्रत्ययलुक् २१ ३७ कर्मठा (त्रय=अध्यापकोपदेशकवैद्या.) २८ ८. **अपसा**=कर्मणा ४ २ १४ **अपसाम्**=जलानाम् १ ९५ ४ कर्म्मणाम् १ १६ ४४ कर्मकर्तॄणाम् (सज्जनानाम्) ६ ६१ १३ **अपसि**=कर्म्मणि ३ १ ३ **अपः**=अन्तरिक्ष प्रति ३ ३२ ५ कर्माणि कर्त्तुम् १ १० ८ जलानीव व्याप्तविद्या (विद्वज्जना) ३ ३१ १९ व्याप्तान् प्रकाशान्

२३ १७. मुकर्म ७ ४० ४ जलानि प्राणान्वा १०.१. कर्म १.११० १. प्राणान् कर्म्माणि वा १ ६४.१ प्राणान् जलान्यन्तरिक्षाऽवयवान् १ ६४ ६ बलानि जलानि वा १ ६१ २२ कर्माणि जलानि वा १ १०३ ५ जलानि प्राणवती प्रजा वा १ १०५ १ प्राणान् वायून्वा ४.२६ २. विमानादिनिर्माणसाधक कर्म्म ४.३३.६ जलान्यन्तरिक्ष वा ४ ४२ ४. कर्म्माणि ४ १६ ६ अन्तरिक्षलोक और जल आर्याभि० १ १३, ऋ० १४.१४ १२ सुसंस्कृतानि जलानि अन्व०—प्राणान् ४ १३ या आप्नुवन्ति सर्वान् पदार्थान् ता (जलानि) १ २३ १८ जलानि वायून्वा १२ १०२ जलानीव कर्माणि ५ ३१ ८ जलानीव शत्रुप्राणान् ५.३१ ६ प्राणा इव वर्त्तमाना (प्रजा) १ १३१ ४ अन्तरिक्षम् ५ १४ ४ अपासि कर्माणि ५ ४१.१४ प्राणान् १४ ८ जलानि १ ५६ ६ उदकानि ६ ६० २ **अप इव**= जलानीव प्राणान् १ ५१ १ [अप इत्युदकनाम निघ० १ १२. कर्मनाम निघ० २ १ अपो यत्कर्म नि० ७.२७. अप प्रजननकर्म नि० ११ ३१ आप्यते सुखे येन तद् अप =अपस्य सुकर्म वा (उ० द० भा०) आप्लृ व्याप्तौ (स्वा०) धातो 'आप कर्माख्यायां ह्रस्वो नुट् च वा' उ० ४ २०८ सूत्रेण असुन् प्रत्यय]

अपसश्चिम दूरे प्राप्नुयाम गमयेम वा ३८ २०. [अप+सश्चति' गतिकर्मा निघ० २ १४ धातोर्लोट् लिडर्थे]

अपसुव दूर प्रापय, दूरीकुरु प्रेरय ३३ ११ [अप+ पु प्रसवैश्वर्ययो (भ्वा०) धातोर्लोट् विकरणव्यत्ययेन श प्रत्यय],

अपसेध अपनय ६ ४७ २६ [अप+षिधु गत्याम् (भ्वा०) धातोर्लोट्]

अपसेधन् दूरीकुर्वन्, भा०—तिरस्कुर्वन् (देव = सूर्य) ३४ २६. निवारयन् (सभापति) १ ३५ १० [अप+ षिधु गत्याम् (भ्वा०) धातो शतृ]

अपस्तमः अतिशयेन क्रियावान् (ईश्वर) १.१६०.४ **अपस्तमा**=अतिशयेन कर्मकर्त्री (सरस्वती=वाक्) ६ ६१ १३ [अपस् इति कर्मनाम निघ० २ १. तत आतिशयिकस्तमप् प्रत्यय। स्त्रियां टाप्]

अपस्पृधेथाम् स्पर्द्धेथाम् ६ ६९ ८ [स्पर्द्ध संघर्षे (भ्वा०) धातोर् लङि आथामि द्विवचन रेफस्य सम्प्रसारणमकारलोपश्च' 'अपस्पृधेथामानृचु०' अ० ६ १ ३६ सूत्रेण निपात्यते। अथवा—अप+स्पर्धेर्लङि आथामि सम्प्रसारणमकारलोपश्च निपात्यते छन्दसि]

अपस्फरीः अवृद्ध मा कुर्या ६.६१.१४.

अपस्यया आत्मन कर्मेच्छया ५ ४४.८ **अपस्यः**= अपस्सु कर्मसु साध्व्य (विदुष्य स्त्रिय) प्र०—अत्र 'सुपा सुलुग्०' इति शस स्थाने सु १० ७ **अपस्याम्**=आत्मन कर्मेच्छाम् ७ ४५ २. [कर्मवाचिनोऽपस्सुबन्तादात्मन इच्छायामर्थे क्यच्। 'अ प्रत्ययादि' ति क्यजन्तात् स्त्रियाम् 'अ' प्रत्यय.। ततष्टाप्]

अपस्यात् आत्मनोऽपासि कर्माणीच्छेत् १ १२१ ७ [अपस्+क्यच्। 'सनाद्यन्ता धातव' इति धातुसंज्ञाया लिङ्]

अपस्युवः आत्मनोऽपासि कर्माणीच्छन्त (कन्या.) १ ७९ १ [अपस्+क्यच् आत्मन इच्छायाम्। 'क्याच्छन्दसि' (अ० ३ २ १७०) सूत्रेण तच्छीलादिष्वर्थेषु 'उ' प्रत्यय। तत प्रथमाबहुवचने रूपम्]

अपहतम् नाशयतम् १ १३२ ६ [अप+हन हिंसागत्यो (अदा०) धातोर्लोट्]

अपहतम् विनाशितम् (रक्ष =दुर्गन्धादिदु खजातम्) १ ६ अपहन्यते यत्तत् (रक्ष =दस्युस्वभाव) १.१६. **अपहताः**=अपहिंसिता (असुरा =दुष्टस्वभावा प्राणिन) २ २६. [अप+हन हिंसागत्यो (अदा०) धातो क्त प्रत्यय]

अपहंसि दूरे प्रक्षिपसि १८ ५२ [अप+हन हिंसागत्यो (अदा०) धातोर्लट्। अत्र गत्यर्थे प्रयोग]

अपह्नुवे आच्छादयेयम् १.१३८ ४. [अप+ह्नुङ् अपनयने (अदा०) धातोर्लटि रूपम्]

अपह्वरः चलन कम्पन रहित हो आर्याभि० २.४१. ३८.२० [अप+ह्वृ कौटिल्ये (भ्वा०) धातोर्लङि मध्यमैकवचने रूपम्। अडभावश्छान्दस.]

अपाक् पश्चिमत. ३ ५३.११ पश्चिमाया ६.३६ [अपाची+अस्ताति। 'अञ्चेर्लुक्' इति अस्तातेर्लुक्। 'लुक्तद्धितलुकी' ति स्त्रीप्रत्ययस्यापि लुक्]

अपाकषन् प्रादुर्भूतोऽस्ति ऋ० भू० ६. प्रकाशित हुए है स० प्र० २७३, अथर्व० १० २३ ४ २० [अप+कष हिंसार्थे (भ्वा०) धातोर्लङ्। धातूनामनेकार्थत्वादत्र प्रादुर्भावेऽपि]

अपाकः अपरिपक्व (जन) ६ ११ ४ अप्रशस्य. (त्वष्टा=विद्युत्) प्र०—पाक इति प्रशस्यनाम निघं० ३ ८, २० ४४. **अपाकाः**=अपगतमविद्याजन्य दु खं यस्य

तम् (विद्वज्जनम्) १ १२६ १ **अपाकाः**=वर्जितपाकयज्ञा यतय १ ११० २ **अपाके**=अपरिपक्वे (राजनि) ६.१२ २. [पाक प्रशस्यनाम निघ० ३ ८ पाक पक्तव्यो भवति 'विपक्व प्राज्ञ आदित्य' इत्युपनिपद्वर्णो भवतीत्यधिदैवतम्। पाक पक्तव्यो भवति विपक्वप्रज्ञ आत्मेत्यात्मगतिमाचष्टे नि० ३ १२.]

अपाका अपगतमविद्याजन्य दुख यस्य तम् १ १२६ १. [अप+अकयोर्बहुव्रीहि। कम् इति सुखनाम निघ० ३ ६ तत्प्रतिपेधम् अकम्=दु खम्]

अपाऽघुक्षत् अपशब्दयेत् ५ ४० ८. [अप+घुपिर् अविशब्दने (भ्वा०) धातोर्लुङ् अनित्यमागमशासनमितीटोऽभावे 'शल इगुपधात्०' इति क्सादेशे रूपम्]

अपाङ् अपाऽञ्चतीति (जीव) १ १६४ ३८ [अपोपपदे 'अञ्चु' धातो 'ऋत्विग्दधृक्०' अ० ३ २ ५६ सूत्रेण क्विन्। 'अनिदिताम्०' इत्यादिना नलोपे नुमागमे हल्ङ्यादिसयोगान्तलोपयो' 'क्विन् प्रत्ययस्य कु' इति कुत्वे ङकारे रूपम्]

अपाचीने योऽधोऽञ्चति तस्मिन् (तमसि=अन्धकारे) ७ ६ ४ [अपाच्प्राति० 'विभाषाञ्चेर्०' अ० ५ ४ ८. सूत्रेण ख प्रत्यय खस्येनादेश]

अपाचीः या अधोऽञ्चन्ति (अप) ५ ४८ २. [अप+अञ्चु गतिपूजनयो धातो क्विन् 'अञ्चतेश्चो'-पसख्यानम्' इति ङीप्। अनिदितामिति नकारलोपे भसञ्ज्ञायाम् 'अच' इत्यकारलोपे 'चौ' इति पूर्वपदस्य दीर्घत्वे रूपम्]

अपात् पिवेत् २ ३७ ४ [पा पाने (भ्वा०) धातोर्लुङ् 'गातिस्थाघुपा०' इति सिचो लुक्]

अपात् अविद्यमाना पादा यस्या सा विद्या १ १५२ ३. पादरहिता (विद्युत्) ६ ५६ ६ अविद्यमानौ पादौ यस्या सा, भा०—वेगवती, पादशिर आद्यवयवरहिता (उषा) ३३ ६३ अविद्यमानौ पादौ यस्य स (वृत्र=मेघ) १ ३२ ७ पादरहित (अग्नि=परमात्मा) ४ १ ११ **अपादम्**=अविद्यमानपादम् (मेघम्) ५ ३२ ८ पादेन्द्रिय-रहितम् (वृत्र=मेघम्) १८ ६६ पादरहितम् (वृत्र=मेघम्) ३ ३० ८ (नञ्-पादयोर्बहुव्रीहौ छान्दसत्वात् समासान्तलोपे रूपम्]

अपातक्षन् उत्पन्नोऽस्ति ऋ० भू० ६ प्रकाशित हुए है स० प्र० २७३, अथर्व० २३ ४ २० [अप+आङ्+तक्षू तनूकरणे (भ्वा०) धातोर्लङ्]

अपाताम् रक्षेतम् ३८ १३ [पा रक्षणे (अदा०) धातोर्लङि प्रथमद्विवचने रूपम्]

अपादयत् विनाशयेत् २ ११ १० [पद गतौ (दिवा०) धातोर्णिचि लङि रूपम्। धातूनामनेकार्थत्वादत्र विनाशार्थे पदधातु]

अपाधमत् दूर धमति ३३ ६५ **अपाधमः**=दूरं धम कम्पय १ ५१ ५ [अप+ध्मा शब्दाग्निसयोगयो (भ्वा०) धातोर्लङ्। 'पाघ्रा०' इत्यादिना धमादेश शिति। धमति-र्गतिकर्मा। निघ० २ १४]

अपानती अपानमधोगमनशील वायु निष्पादयन्ती विद्युत् ३.७ [अप+अन प्राणने (अदा०) धातो शतृ-प्रत्यय स्त्रिया ङीप्]

अपानदाः या अपान दु खदूरीकरणसाधन प्रयच्छन्ति ता (हेतय=शस्त्राऽस्त्रोन्नतय) १७ १५ [अपानोपपदे डुदाञ् दाने धातो क प्रत्यय]

अपानपाः योऽपान पाति (विद्वज्जन) २० ३४ [अपानोपपदे पा रक्षणे (अदा०) क प्रत्यय वचनव्यत्ययेन वहुवचनम्]

अपानम् यो नाभेरर्वाग्गच्छति तम् (प्राणवायुम्) १४ ८ **अपानश्च**=सव दु ख दूर करने का उपाय और उसकी सामग्री स० वि० १४५, अथर्व० १२ ५ ६ **अपानः**=नाभेरधोगामी वात १८ २ अपानयति दु ख येन स (वायु) २२ ३३ वाह्याद् देशाच्छरीर प्रविशति स वायुरपान ऋ० भू० १०४, अथर्व० १२ ५ ६ **अपानाय**=अपानिति दु ख येन तस्मै (दु खनिवृत्तिहेतवे) १३ २४ दु खनिवारणाय १३ १६ यो वहिर्देशादाभ्यन्तर गच्छति तस्मै (वायवे) २२ २३ दु ख-निवृत्तये १५ ६४ [अप+अन प्राणने (अदा०) धातो 'हलश्चे' ति करणे घञ्। 'भुव इत्यपान तै० अ० ७.५ ३ तै उ० १ ५ ३ अपानो वा एतवान् श० १४ ३ ३. अपाना अनुयाजा श० ११ २ ७ २७ अन्तर्ह्यपान। ता० ७ ६ १४ अन्तर्यामौ अपान एव कौ० १२ ४ अग्निर-पान जै० ३ ४ २२ ६ अपानो वरुण श० ८ ४ २ ६ वरुणस्य साय (काल) आसवोऽपान तै० १ ५ ३ १ अपान प्रस्तोता कौ० १७ ७ गो० उ० ५ ४ अपान-स्त्रिष्टुप् ता० ७ ३ ८ अपानो रथन्तरम् ता० ७ ६ १४ अपानो याज्या श० १४ ६ १ १२ अपानो वै यन्ताऽपानेन ह्यय यत प्राणो न पराङ् भवति ऐ० २.४० अर्वाङपान तै० स० ६ ३ १ ५ अहरेव प्राणो रात्रिरपान ऐ० आ० २ १ १५ उपरिष्टाद् अपान तै० स० ३ ४ १ ४ एत्यपानस्त्वदसौ लोक जै० उ० २ ३ ३.४

ऐन्द्रोऽपान तै० स० ६ ३.११ २ घोपीव ह्ययमपान प० २ २ नाभ्या अपान, अपानान्मृत्यु ऐ० आ० २ ४ १ ऐ० उ० १ १ ४ मनसा ह्यपानो धृत काठ० २७ २]

अपापकाशिनी अपापान् सत्यधर्मान् काशितु शील-मस्या सा (तनू =विस्तृतोपदेशनीति) १६ २ [अपा-पोपपदे काशृ दीप्तौ (भ्वा०) धातोस्ताच्छील्ये णिनि स्त्रिया ङीप्

अपादधीत् अपहन्ति ५ ८ [अपपूर्वाद् हन्तेर्लुङ् । 'लुङि च' इति वधादेश]

अपापविद्धम् यत् पापयुक्त पापकारि पापप्रिय कदाचिन्न भवति तद् (ब्रह्म) ४० ८ नैव तद् ब्रह्म पापयुक्त पापकारि च कदाचिद् भवति ऋ० भू० ३६, ४० ८ जिससे पापाचरण का अभाव होने से क्लेश, दुख, अज्ञान कभी नही होता वह (ब्रह्म=परमेश्वर) स० प्र० २४४, ४० ८ परमात्मा कभी अन्याय नही करता क्योकि वह न्यायकारी ही हे आर्याभि० २ २, ४० ८ [अपाप+व्यध ताडने (दिवा०) धातो क्त । किति 'ग्रहिज्या०' इत्यादिना सम्प्रसारणम्]

अपापोहति दूरीकर्त्तु वितर्कयति ५ ३४ ३ [अप+ऊह वितर्के (भ्वा०) धातोर्लट् 'उपसर्गादस्यत्यूह्योर्वा वचनम्' इति वा परस्मैपदम् । अप शब्दस्य द्वित्वम्]

अपाऽभरत् अपभरति १ १६१ १० [अप+भृञ् भरणे (भ्वा०) धातोर्लङ्]

अपाऽभिचुच्यवत् अपाभिच्यावयति २ ४१ १० (अप+अभि+च्युङ् गतौ (भ्वा०) धातोर्णिचि लुङि रूपम् । अडभावश्च]

अपाऽभूत तिरस्कृता भवत ४ ३४ ११ [अप+भू सत्तायाम् (भ्वा०) धातोर्लुङि मध्यमवहुवचने रूपम् 'गाति-स्थाघुपाभूभ्य ०' इति सिचो लुक्]

अपाम आप्नुयाम १० २१ [पा पाने (भ्वा०) धातो-र्लुङि रूपम् 'गातिस्था०' इति सिचो लुक् । अनेकार्थत्वाद् धातूनामत्राप्नोत्यर्थे]

अपाम् प्राणिना जलानामिव ५ ४१ १० प्राणाना जलाना वा १ ६७ ५ व्यापकाना प्राणाना जलाना वा १३ २ प्राप्ताना मित्रशत्रूदासीनाना पुरुषाणाम् १ १०० ११. प्राणाना जलाना वा प्र०—आप इति पदनामसु पठितम् निघ० ५ ३ अनेन चेष्टादिव्यवहारप्रापका प्राणा गृह्यन्ते 'आप इत्युदकनामसु पठितम् निघ० १ २, ३ १२ ये व्याप्नुवन्ति सर्वान् पदार्थानन्तरिक्षादयस्तेपाम् १ २२ १६ अन्तरिक्षस्य जलस्य प्राणाना वा २ ४ २ आप्नुवन्ति याभिस्ता-सामुदकानाम् ८ २४ अन्तरिक्षस्य, प्र०—आप इत्यन्त-रिक्षनाम निघ० १ ३, १ १६४ ५२ विद्याविज्ञानयोगव्या-पिनाम् (सन्यासिनाम्) १ १५८ ६ व्याप्नुवता विद्युदादीनाम् १३ ५३. प्राप्तव्याना पदार्थानाम् १३ ५३. उदकानाम् १ ८५ ६ जलानाम् ७ १६ [आप =अन्तरिक्षनाम नि० १ ३ उदकनाम निघ० १.१२ पदनाम निघ० ५.३. आप्लृ व्याप्तौ (स्वा०) धातो 'आप्नोतेर्ह्रस्वश्च' उ० २ ५८ सूत्रेण रूपसिद्धि] तद्या एताश्चान्द्रमस्य आगामिन्य आपो भवन्ति रश्मयस्ता नि० ५ ४२ आप आयना (आयनानि वा) नि० १२ ३५ आप तद्यदब्रवीत् (ब्रह्म) आभिर्वा अहमिद सर्वमप्स्यामि यदिद किं चेति तस्मादापोऽभवप्त-दपामप्त्वमाप्नोति वै स सर्वान् कामान् यान् कामयते गो० पू० १ २ सेद सर्वमाप्नोद् यदिद कि च यदाप्नोत्तस्मादाप श० ६ १ १ ६ अद्भिर्वा इद सर्वमाप्तम् श० १ १ १ १४ आपो ह वा इदमग्रे सलिलमेवास ता अकामयन्त कथ नु प्रजायेमहीति श० ११ १ ६ १. प्राणा वा ऽआप तै० ३ २ ५ २ ता० ६ ६ ४ आपो वै प्राणा श० ३ ८ २ ४ प्राणो ह्याप जै० उ० ३ १० ६ अमृत वा आप श० १ ६ ३ ७, ४ ४ ३ १५ अमृतत्व वा आप कौ० १२.१ शान्तिराप श० १ २ २ ११ शान्तिर्वा आप ऐ० ७ ५ आपो हि शान्ति ता० ८ ७ ८ शान्तिर्वै भेषजमाप कौ० ३ ६ ७ ८ ६ गो० उ० १ २५ आपो ह वा ऽओपधीना रस श० ३ ६ १ ७ रसो वाऽआप. श० ३.३ ३ १८, ३ ६ ४ ७ आपो वै सर्वस्य शान्ति प्रतिष्ठा ष० ३ १ आपो वाऽअस्य सर्वस्य प्रतिष्ठा श० ४ ५ २ १४ आप सत्ये (प्रतिष्ठिता) ऐ० ३ ६ गो० उ० ३ २ श्रद्धा वा आप. तै० ३ २ ४ १ मेध्या वा आप श० १ १.१ १, ३.१ २ १० आपो वै क्षीररसा आसन् ता० १३ ४.८ ऊर्वा आपो रस कौ० १२ १. अन्न वा ऽआप श० २ १ १ ३, ७ ४ २ ३७ अन्नमाप कौ० १२ ३ ८. आपोऽन्नम् ऐ० ६ ३० आपो वै रक्षोघ्नी तै० ३ २ ३ १२ वज्रो वाऽआप श० १ १ १ १७ वीर्य वाऽआप श० ५ ३ ४ १ आपो वा ऽअर्क श० १० ६ ५ २ आपो वा ऽअवका श० ७ ५ १ ११ देव्यो ह्याप श० १ १ ३ ७ यज्ञो वा आप कौ० १२१ श० १ १ १.१२. आपो वै यज्ञ ऐ० २ २० आपो रेत श० ३ ८ ४ ११. पशवो वा एते यदाप ऐ० १ ८ आपो वै सर्वा देवता ऐ० २.१६ आपो वै सर्वे कामा श० १०.५ ४ १५ आपो वै सर्वे देवा श० १० ५ ४ १४ आपो वै देवाना प्रिय धाम तै० ३ २ ४ २. सौम्या ह्याप ऐ० १ ७ आपो वरुणस्य पत्न्य आसन् तै० १ १ ३ ८ अग्निना वाऽआप सुपत्न्य श० ६ ८ २.३.

अस्ति वै चतुर्थो देवलोक आप कौ० १८ २ अप्सु पृथिवी (प्रतिष्ठिता) जै० उ० १ १० २ आप स्थ समुद्रे श्रिता'। पृथिव्या प्रतिष्ठा तै० ३ ११ १ ५ प्रात सवनरूपा ह्याप. कौ० १२ ३. अथ यद्यप शूद्राणा म भक्ष ऐ० ७ २९ योषा वा ऽआपो वृषाग्नि. श० १ १ १ १८, २ १ १ ४ आपो वै सरिरम् श० ७ ५ २ १८ आपो वा इदमग्रे सलिलमासीत् तै० १ १ ३ ५ आपो वा इदमग्रे महत्सलिलमासीत् जै० उ० १.५६ १ आप एष वै रयिर्वैश्वानर श० १० ६ १ ५ आपो व्यान जै० उ० ४ २२ ९ शुक्रा ह्याप तै० १ ७ ६ ३ चन्द्रा ह्याप तै० १ ७ ६ ३ आपस्सावित्री जै० उ० ४ २७ ३ आपो वै पुष्करम् श० ६ ४.२ २, ७ ४ १ ८ आपो वै पुष्करपर्णम् श० ७ ३ १ ६ आपो वै प्रजापति परमेष्ठी यजु० १४ ९ आपो हि पय कौ० ५ ४ गो० उ० १ २२ अपामेष ओषधीना रसो यत्पय श० १२ ८.२ १३ आपो ह्येतस्य (सोमस्य) लोक श० ४ ४ ५ २१. आपो हि रेत ता० ८ ७ ९ आपो रेत प्रजननम् तै० ३ ३ १० ३. घर्मे ह्याप श० ११ १ ६ २४ आप प्रोक्षण्य ऐ० ५ २८ आपो वै सूदोऽन्न दोह. श० ८ ७ ३१ आप स्वरसमान कौ० २४.४ रेवत्य आप श० १ २ २ २ आपो वै रेवती तै० ३.२ ८ २ वज्रो वाऽआप. श० १ ७ १.२० आप इति तत् प्रथम वज्ररूपम् कौ० १२ २. आप वै विवा श० ८.२.२ ८. आपो वै द्यौ श० ६ ४ १ ९ आपो दिव ऊध श० ६ ७ ४ ५ आपो वै दिव्य नभ. श० ३.८.५ ३ आपो वै वरेण्यम् जै० उ० ४ २८ आपो वै सव. श० ६ १.३.११ आप एव सर्वम् गो० पू० ५ १५ आपो वै मरुत ऐ० ६ ३०. कौ० १२.८ अन्न वाऽअपा पाय श० ७ ५ २.६० आपो वै सहस्रियो वाज श० ७ १.१ २२ गिरिवुष्ना उ वा आप. श० ७ ५ २ १८ वै राजीर्वा आप कौ० १२ ३]

अपामतिम् अज्ञानम् १७.५४. [अप+आङ्+मन ज्ञाने (अदा०) धातो स्त्रियां भावे क्तिन् 'मन्त्रे वृषेष०' अ० ३ ३.९६ सूत्रेण निपात्यते]

अपामार्ग रोगनिवारकोऽपामार्ग ओषधिरिव पापदूरीकर्त्त (सत्पुरुष !) ३५ ११ [अप+मृजूष् शुद्धौ (अदा०) धातो. 'हलश्चे' ति सज्ञाया घञ् 'उपसर्गस्य घञ्यमनुष्ये०' इत्युपसर्गस्य दीर्घत्वम्। प्रतीचीनफलो वा अपामार्ग श० ५ २ ४.२०]

अपायि पाति ६ ४४ ८ पिबति ६ ४४ १६. पान किया २ १९ १ [पा पाने (भ्वा०) पा रक्षणे वा (अदा०) धातो कर्मणि लुङि चिणि रूपम्]

अपारम् अपारविद्यम्, गम्भीराऽऽशयम् (इन्द्र= राजानम्) ४ १७ ८ **अपार:**=पाररहित (महिमा) ५ ८७.६. **अपाराम्**=पाररहिताम् (भूमिम्) ३.३०.९. **अपारे**=पाररहितेऽपरिमिते (रजनी=द्यावापृथिव्यौ) ४.४२ ९ अगाधे द्यावापृथिव्यौ, प्र०—अपारे इति द्यावापृथिवीनाम निघ० ३ ३०, ३.१.१४ अविद्यमानाऽवधी (रोदसी=द्यावापृथिव्यौ) ३.३० ५. [अपारे द्यावापृथिवी नाम निघ० ३ ३० दूरपारे नि० ६ १]

अपारयत् दुःखात् पारयेत ४ ३० १७ [पारकर्मसमाप्तौ (चु०) धातोर्लङ्]

अपाऽवधीत् अपहन्ति, प्र०—अत्र क्रियापदे लडर्थे लुङ् 'व्यपेत्येतस्य प्रातिलोम्य प्राह नि० १ ३, ५ ८ पृथक्करणतया हन्ति ५ ८ [अप+हन हिंसागत्यो (अदा०) धातोर्लुङ् 'लुङि चे' ति हन्तेर्वधादेश]

अपावपत् अधो वपति २ १४ ९ **अपाऽवप:**=दूरे प्रक्षिप १ १३३ ४ [अप+डुवप् बीजसन्ताने (भ्वा०) धातोर्लङ्]

अपाऽऽव: आवृणोति ३ ५ १. दूरीकरोत्युद्घाटयति, प्र०—अत्र पुरुषव्यत्यय लडर्थे लुङ् 'बहुल छन्दसि' इत्याडभावश्च १ ११ ५. निवारयति १.११३ १४ **अपावृणोत्**=दूरीकरोति ३ ४४ ५ अपवृणोति १ १३० ३ आच्छादयति ४.२८ १ **अपावृणो:**=दूरीकर्त्तु वृणु १ ५१.३ अपवृणुया १ १३२ ४. दूर वृणुया १ ५१ ४ **अपावृत**=दूरीकुर्वन्ति ५ ४५ १ [अप+वृञ् वरणे (स्वा०) धातो सामान्ये लुङ्। 'मन्त्रे घसह्वरणशवृ०' सूत्रेण लेर्लुक् छान्दस आडागम अपावृणोत्=अप+वृञ् वरणे+लङ् अपावृत अप+वृञ् वरणे+लुङ्]

अपावृतम् दानाय भोगाय वा प्रसिद्धम् (राध =धनम्) १.५७ १ [अप+आङ्+वृञ् वरणे धातो क्त प्रत्यय]

अपाऽसेधत् अपसेधते ६ ४७ २१ **अपाऽसेध:**= निवारयतु ५ ३१ ७ [अप+षिधु गत्याम् (भ्वा०) धातोर्लुङ्]

अपाऽस्य दूरीकुरु ३ २४ १ [अप+असु क्षेपणे (दिवा०) धातोर्लोटि मध्यमैकवचने रूपम्]

अपांसि व्याप्यानि कर्माणि १.६८ ३ [अपस् इति कर्मनाम, तस्य प्रथमाद्वितीययोर्बहुवचने रूपम्]

अपा: पिब ३ ५३ ६. **अपिबत्**=पिबति, प्र०—अत्र लडर्थे लङ् १ ३२ ३. पिबेत् ३ ४८.४ गृह्णीयात् १९ ७५. **अपिब:**=पिब ५ २९.११ पिब ४ ३५ ७ पिबसि ३ ३२ १० पिबति ३ ३२ ९ ,पी चुके हो ७ ३५

अपु:=पिबन्ति १ १६४ ७. पिबन्तु २१.६०. [पा पाने (भ्वा०) धातोर्लुङ् । सिचो लुक् 'गातिस्थाघु०' इत्यादि-सूत्रेण । 'अपिबत्, अपिब.' इत्येनयोर्लङ्]

अपा: पाहि ६ ६६ १ [पा रक्षणे (अदा०) धातोर्लुङ् छान्दसत्वात् सिचो लुक्]

अपि निश्चयार्थे १ १४०.७ पदार्थसम्भावनायाम् ७ ३८ ३ निश्चय करके स० वि० ११०, १.१७६.१ भी स० वि० १६८, १४ २ २६, १ १२१ १३ कुछ भी प० वि० [अपीति ससर्गम् नि० १ ३]

अपिकक्षे पार्श्वे ४ ४० ४ निश्रितपार्श्वाऽवयवे ६ १४ [अपि+कष हिसार्थे (भ्वा०) धातो 'वृत्-कपिभ्य' उ० ३.६२ सूत्रेण स प्रत्यये रूपम् । कक्षो गाहते क्स इति नामकरण । ख्यातेर्वाऽनर्थकोऽभ्याम । किमस्मिन् ख्यान-मिति वा । कषतेर्वा तत्सामान्यान्मनुष्य कक्षो वाहुमूल-सामान्यादश्वस्य नि० २ २]

अपिकक्ष्यम् कक्षासु विद्याप्रदेशेषु भवा बोधा कक्ष्या-स्तान् प्रति वर्त्तते तत् (त्वाष्ट्रम्=विज्ञानम्) १ ११७ २२. [कक्ष्या रज्जुरश्वस्य नि० २ २ कक्ष्या प्रकाशयन्ति कर्माणि नि० ३ ६ अपि+कक्षाप्राति० भवार्थे यत्]

अपिकर्णे आच्छादितश्रोत्रे ६ ४८ १६. [अपिहितौ कर्णौ यस्येति बहुव्रीहौ 'प्रादिभ्यो धातुजस्य०' अ० २ २.२४ वार्त्तिकेनोत्तरपदलोप]

अपिजाय निश्चयेन जायमानाय (विजयाय) ६ २० स्वीकाराय १८ २८ उत्पन्नाय (गृहाय) २२ ३२ [अपि+जनी प्रादुर्भावे (दिवा०) धातोर्ड. प्रत्यय]

अपिजुवा प्रेरके (उपासानक्ता=अहोरात्रे) २.३१ ५ [अपि+जु गतौ (सौत्रो धातु) धातो. 'क्विप् वचिप्रच्छि-श्रि०' उ० २ ५७ सूत्रेण क्विप्]

अपिदधामि प्रक्षिपामि ११.७७ [अपि+डुधाञ् धारणपोषणयो (जु०) धातोर्लट्]

अपिधानवन्तम् आच्छादनयुक्तम् (विद्यैश्वर्यवन्त विद्वज्जनम्) ५ २६ १२ [अपि+डुधाञ् धारण-पोषणयोर्धातोर्ल्युट् । ततो मतुप्]

अपिधाना अपिधानानि मुखाच्छादनानि १ १६२ १३ आवरणानि १.५१ ४ आच्छादनानि (पात्राणि) २५ ३६. [अपि+डुधाञ् धारणपोषणयो (जु०) धातो करणे ल्युट्]

अपिधीन् सद्गुणधारकान् दु.खाऽऽच्छादकान् (विद्वज्जनान्) १ १२७ ७ [अपि+डुधाञ् धारणपोषणयो (जु०) धातो 'उपसर्गे घो किरि' ति कि प्रत्यये आल्लोपे रूपम्]

अपिन्वत् सेवते १ ६२ ६ सेवेत सिञ्चेत वा ४.१६ ७ **अपिन्वतम्** जलादिभि. सिञ्चतम् १ ११७ २० सेवन करो १ ११८ ८. **अपिन्वम्** सेवे ४ ४२ ४ **अपिन्व:** पिन्व २ ११ २. [पिवि सेवने (भ्वा०) धातोर्लङ्]

अपिन्वत् सिञ्चति सेवते वा ३ ५५ १३ विद्या और उपदेश से सयुक्त किया करो स० वि० १६८, १० ७२ ७ [पिवि सेवने (भ्वा०) धातोर्लङ् । व्यत्ययेनात्मनेपदम्]

अपिप्रत पूरयेत् ५ ३४ २ [पृ पालनपूरणयो (जु०) धातोर्णिचि लुङि रूपम्]

अपिप्राणी निश्चितप्राणबलप्रदा (वेदविद्या) १ १८६. ११ [अपि+प्र+अन प्राणने (अदा०) धातो 'हलश्च' इति करणे घञ् ततो मत्वर्थे 'छन्दसीवनिपावि' ति ईकार-प्रत्यय]

अपिप्रियम् प्रीणामि प्र०—ण्यन्तात्लुङ् प्रयोगोऽयम् २६ ७ [प्रीञ् तर्पणे कान्तौ (क्र्या०) धातोर्णिचि लुङि च्लेश्चङि रूपम्]

अपिमृष्ठा: अपिसहे प्र०—अत्र व्यत्ययेनाऽऽत्मनेपदम् ३ ३३.८. [अपि+मृष तितिक्षायाम् (दिवा०) धातोर्लङ् विकरणव्यत्ययेन श्यनो लुक् अडभावश्च]

अपियन्तम् म्रियमाणम् (विद्वज्जनम्) १ १६२ २०. योऽप्येतितम् (आत्मानम्=स्वस्वरूपम्) २५ ४३. [पि गतौ (तुदा०) धातो शतृ तत्प्रतिषेधेऽगतिशीलम् अथवा अपि+इण् गतौ धातो शतृ]

अपियन्ति प्राप्नुवन्ति ३४ ११ [अपि+इण् गतौ (अदा०) धातोर्लटि-प्रथमबहुवचने रूपम्]

अपिरिप्ताय सकलविद्योपचयनाय (कण्वाय=मेधाविने), प्र०—अत्र लिपधातोर्निष्ठा, कपिल-कादित्वाल्लत्वविकल्प १ ११८ ७ [अपि+लिप उपदेहे (तुदा०) धातो क्त प्रत्यय लकारस्य रेफ]

अपिवातयन्त: शीघ्र गमयन्त (विद्वज्जना) १.१६५.१३. [अपि+वात करोतीति विग्रहे 'तत्करोति०' वार्त्तिकेन णिच् ततश्शतृप्रत्यय]

अपिवृतम् सुखबलैर्युक्तम् (अनीक=सैन्यम्) १.१२१ ४. आच्छादितम् २ ११ ५ [अपि+वृञ् आवरणे (चु०) धातो: क्त णेर्लुक् च]

अपिशर्वरे निश्चिते रात्रावन्धकारे ३.६ ७ [अपि+शॄ हिंसायाम् (क्र्या०) धातो. 'कॄगॄशॄवॄ०' उ० २ १२१.

सूत्रेण ष्वरच् प्रत्यय शृणाति हिनस्ति प्रकाशमिति विग्रह द्वादशस्तोत्राण्यपि शर्वराणि ऐ० ४ ६ अपि शर्वराणि खलु वा एतानि छन्दांसि ऐ० ४ ५ तद्यदपि शर्वर्या अपि स्मसीत्यब्रुवस्तदपि शर्वराणामपि शर्वरत्वम् गो० २ ५ १ शर्वरी वै नाम रात्रि जै० १ २०६]

अपिस्थितम् स्थिर हुए (विद्वान्) को १ १४५ ४ [अपि+ष्ठा गतिनिवृत्तौ (भ्वा०) धातो क्त 'द्यतिस्यति०' इतीकारादेश]

अपिहितम् आच्छादितम् (विल=गर्त्तम्) १ ३२ ११ **अपिहितानि**=आच्छादितानि (अश्वा=भोक्तव्यानि वस्तूनि) ४ २८ ५ **अपिहितेव**=आच्छादितानीव (खानि=इन्द्रियाणीव) ४ २८ १ [अपि+डुधाञ् धारणपोषणयो (जु०) धातो क्त 'दधातेर्हिरि' ति धातोर्हिरादेश]

अपिंशत् अवयवयति २६ ३४ **अपिंशत**=अवयवीकुरुत १ ११० ८ विभक्तान् कुरुत १ १६१ ६ अवयवयन्ति, प्र०—अत्र 'बहुल छन्दसि' इति शविकरणेऽपि ३.६० २ **अपिंशन्**=साऽवयवान् कुर्वन्ति ४ ३३ ४ [पिश अवयवे (तुदा०) धातोर्लङ् मुचादित्वान् नुमागम अपिशत् अकरोत् नि० ८ १४]

अपीच्यम् येऽप्यञ्चन्ति प्राप्नुवन्ति तेषु साधुम् (प्रकाशरूप व्यवहारम्) १ ८४ १५ स्वगुणैर्निश्चितम् (नाम=आख्या), प्र०—अपीच्यमिति निर्णयाऽन्तर्हितनाम निघ० ३ २५, २ ३५ ११ **अपीच्येन**=येनाऽप्यमञ्चति तत्र भवेन (सहसा=बलेन) ७ ६० १० [अपीच्यमिति निर्णीतान्तर्हितनाम निघ० ३ २५ अपीच्यमपचित, अपगतम्, अपहितम् अन्तर्हित वा नि० ४ २४]

अपीजुवा प्रेरके (उपासानक्ता=प्रत्यूपरात्र्यौ) २.३१.५ [अपि+जु गतो (सौत्रो धातु) धातो क्विप् दीर्घश्च 'क्विप् वचिप्रच्छ्या०' वार्त्तिकेन]

अपीतम् अपि सयोगे इत प्राप्तम् (पाथ=अन्नम्), प्र०—अपीति ससर्ग प्राह निरु० १ ३, २ १७ [अपि+इण् गतौ+क्त]

अपीतेः विनाशनात् १ १२१ १० [अपि+इण् गतौ (अदा०) धातो स्त्रिया क्तिन्]

अपीत्य निश्चयेन प्राप्य २ ४३ २ निश्चय से प्राप्त होके आर्याभि० १ ५२ [अपि+इण् गतौ धातो क्त्वा। क्त्वो ल्यप् समासे]

अपीपयन्त प्याययन्ति ७ ३६ ३ [ओप्यायी वृद्धौ (भ्वा०) धातोर्यङ् 'लिड्यङोश्च' अ० ६ १ २९ सूत्रेण पी आदेशे लङि रूपम्]

अपीव समुच्चिता इव ३ ३८ ८ अतीव ७ १८.६ [अपि+इव]

अपीवृतम् आच्छादितम् (अहिं=मेघम्) २ ११ ५ [अपि+वृञ् आवरणे (चु०) धातो क्विप् 'नहिवृतिवृषि०' अ० ६ ३.११६ सूत्रेण दीर्घ]

अपीवृताः ये निश्चयेन वर्त्तन्ते (विद्वज्जना) १ १६० ६ [अपि+वृञ् वरणे (स्वा०) धातो क्त प्रत्यय 'अन्येषामपि दृश्यते' इति पूर्वपदस्य दीर्घ]

अपीहि निश्चयेन प्राप्नुहि जानीहि वा ८ ५० [अपि+इण् गतौ (अदा०) धातोर्लोट् 'सेर्ह्यपिच्चे' ति हिरादेश]

अपुपोत् पवित्र कुर्यात् ३ २६ ८ [पूञ् पवने (क्र्या०) धातोर्यङ्लुकि, अभ्यासस्यागुणत्वे रूपम्]

अपुनन् पवित्र करती है ३२ ६ [पूञ् पवने (स्वा०) धातोर्लङ् 'प्वादीना ह्रस्व' इति ह्रस्व]

सहसः ब्रह्मचर्यबलयुक्तस्य (जनकस्य) ५ ३ ६ बलादिगुणै सह वर्त्तमानस्य (ईश्वरस्य विद्युदग्नेर्वा) १ ८८ २ विद्याबलवत (विदुष) १ १४१ १ प्रशस्तबल-युक्तस्य (जनस्य) १ ७४ ५ बलस्य बलवतो वायोर्वा ३ २८ ३ सहनशीलस्य (सज्जनस्य) ६ १२ १ बलिष्ठस्य (पुरुषस्य) १५ ४७ शरीरात्मबलवतो विदुष ६ ५० ६ सहत इति सहो वायुस्तस्य बलरूपस्य १ २६ १० **सहसा**=बलेनोत्साहेन वा ६ ६६ ६ सामर्थ्येनाऽऽकर्षणेन वा १ ५१ १० **सहसे**=बलप्रदाय मार्गशीर्षाय २२ ३१ **सहः**=उत्तम बलम् ३.३८ उदक बल वा ३ ३६ अनन्तसहनस्वरूप अनन्तसहनशक्ति वाला (ईश्वर) आर्याभि० २ ६, १६ ६ बलकारी मार्गशीर्ष १४ २७ बलवान् (परमात्मा) १० १५ यस्सहते स (विद्वज्जन) ६ १ १ सहनम् २८ ५ पराभावुक (अग्नि =सभाध्यक्ष) १ ३६ १८ निन्दा-स्तुति और स्वाऽपराधियो को सहन करने वाला (ईश्वर) स० प्र० २४६, १६ ६ सहनस्वभावम् (ब्रह्म) ऋ० भू० १६२, अथर्व० १३ ४ ५० यत सर्व सहते तस्मात् स एवैष सह (ईश्वर) ऋ० भू० ६१, अथर्व० १३ ४ १८ शारीर बलम् १८.३ [षह मर्षणे (भ्वा०) धातोरौणा० असुन् । सह उदकनाम निघ० १ १२ बलनाम निघ० २ ६ सहस बलस्य नि० ५ २५ सहस्प्राति०मत्वर्थे 'लुगकारेकाराश्च वक्तव्या' अ० ४४ १२८ वा०सूत्रेण यत् प्रत्ययस्य लुक् । सह =बल वै सह श० ६ ३ २ १४ एतौ (सहश्च सहस्यश्च) एव हैमन्तिकौ (मासौ) श० ४ ३.१.१८]

सहसस्पुत्र बलस्य पालक (अग्ने=राजन्) ५ ३ ६ बलस्योत्पादक (अग्ने=वैद्यराज विद्वन्) ३ १८ ४ **सहसस्पुत्रः**=बलिष्ठस्य वायो पुत्र इव वर्त्तमान (अग्नि) २.७ ६ [सहस्-पुत्रपदयो समासे षष्ठ्या अलुक् । अयम-प्यग्निरोजसा बलेन मथ्यमानो जायते तस्मादेनमाह सहस-स्पुत्रम् सहस सूनु सहसो यहुम् नि० ८ २]

सहसस्सूनो बलवता पुत्रदुष्टाना हिंसक (अग्ने=राजन्) ३ २४ ३ [सहस्-सूनुपदयो समासात् सम्बुद्धौ रूपम् । षष्ठ्या अलुक्]

सहसानम् य सर्व सहते तम् (राजानम्) ५ २५ ६ **सहसानः**=सहमान (इन्द्र =राजा), प्र०—अत्र वर्ण-व्यत्ययेन मस्य स ४ १७ ३ [षह मर्षणे (भ्वा०) धातो शानच् । वर्णव्यत्ययेन मकारस्य सकार । षह मर्षणे (भ्वा०) धातोर्वा 'ऋञ्जिवृधि०' उ० २ ८७ सूत्रेण असानच्]

सहसावन् सहोऽधिक बल विद्यते यस्य तत्सम्बुद्धौ (राजन्) प्र०—अत्र प्रथमाऽर्थे तृतीयाया अलुक् ३४ २३ बलेन तुल्य (विद्वज्जन) ५ २० ४ अत्यन्तबलवन् (सेना-ध्यक्ष), प्र०—सहसा इत्यव्ययम्, भूमार्थे मतुप् च १ ६१ २३ प्रशस्तबलयुक्त (अग्ने=विद्वज्जन) ३ १ २२ बहु सहो बल सहन वा विद्यते यस्य तत्सम्बुद्धौ (विद्वज्जन) १ १८६ ५ [सहस्प्राति० प्रशसार्थे भूम्न्यर्थे वा मतुप् । समासे प्रथमार्थे तृतीयाया अलुक्]

सहस्विन् बहुबलयुक्त (अग्ने=राजन्) ४ ११ १. [सहस्प्राति० भूम्न्यर्थे छान्दस इनि]

सहसूक्तवाकः ऋग्यजुरादिलक्षणै सूक्तैर्वाकै सह वर्त्तमान (यज्ञ =गृहाश्रम) ८ २२ [सूक्त-वाकपदयो समासे तत सह-पदेन समास]

सहसोमाः सोमेन श्रेष्ठगुणसमूहेन सह वर्त्तमाना इव (गृहपतय =गृहाश्रमिण) ८ ११ [सह-सोमपदयो समास]

सहस्कृत य सहसा करोति तत्सम्बुद्धौ (अग्ने=विद्वज्जन) ६ १६ ३७ सहो बल कृत येन तत्सम्बुद्धौ (अग्ने) १ ४५ ६ **सहस्कृतम्**=य सह सहन करोति कारयति वा तम् (जगदीश्वर भौतिकमग्नि वा) ३ १८ **सहस्कृतः**=सहसा बलेन निष्पन्न (राजा प्रजाजनो वा) ३३ ८३ [सहस्-कृतपदयो समास । सहस् बलनाम निघ० २ ६ बल वै सह श० ६ ३ २ १४]

सहस्तमा अतिशयेन सोढारौ (इन्द्राग्नी=वायु-विद्युतौ) ६ ६० १ [सहस्प्राति० अतिशायने तमप् । ततो द्विवचनस्याकारादेश । सहस् =षह मर्षणे (भ्वा०) धातो-रसुन् औणादिक]

सहस्तोमाः स्तोमै श्लाघाभिस्सह वर्त्तमाना यद्वा सहस्तोमा शास्त्रस्तुतयो येषान्ते (ऋषय =रागद्वेषदोषान् त्यक्तवन्त परस्परस्मिन् प्रीतिमन्तो जना) ३४ ४६ [सह-स्तोमपदयो समास । स्तोम स्तवनात् नि० ७ १२]

सहस्त्रियम् सहप्राप्ता भार्याम् १२ ४७ [सह-स्त्री-पदयो समास]

सहस्य सहसि बले साधो (अग्ने=विद्वज्जन)

वा प्र०—अत्र 'भुज पालनाऽभ्यवहारयो', इत्यस्मात् लङि सिपि 'बहुल छन्दसि' इति शप स्थाने आदिष्टस्य श्नम स्थाने श्लु 'श्लौ' इत्यद्वित्व 'बहुल छन्दसि' इतीडागमश्च १.३३ ६]

अबूबुधत् बोधयेत् १ १६१ १३ [बुध अवगमने (भ्वा०) धातोर्णिचि लुङि च रूपम् 'दीर्घो लघो' रिति दीर्घत्वम् अभ्यासस्य]

अबोधयः बोधयसि १ १०३ ७ बोधय ५ ७६ १. **अबोधि**=बोधयति १ ९२ ११ बुध्यते विज्ञायते १ १५७ १ प्रबुध्यते १५ २४ बुध्यताम् ३ ५६ ४ [बुध अवगमने (भ्वा०) धातोर्णिजन्ताल्लङ्]

अब्जाम् अप्सु जातम् (अहिं=मेघम्) ७ ३४ १६. **अब्जाः**=योऽप प्राणान् जनयति (ब्रह्म जीवो वा) १२ १४ योऽपो जनयति (ईश्वर) १० २४ योऽद्भ्यो जात (जीवात्मा) ४ ४० ५ [अप् उपपदे 'जनी प्रादुर्भावे' धातोर्विट्। नकारस्याकारश्च। अब्जाम् अप्सुजाम् नि० १० ४२ एप (सूर्य) वा अब्जा अद्भ्यो वा एप प्रातरुदेत्यप साय प्रविशति। ऐ० ४ २०]

अब्जिते योऽप्सु जयति तस्मै (इन्द्राय=विद्वत्सभासेनेशाय) २ २१ १ [अप कर्मनाम (निघ० २ १) तदुपपदे जि जये धातो क्विप् तुगागमश्च]

अब्दया येऽपो जलानि ददति ते (मरुत=मानवा) ५ ५४ ३ [अप उदक नाम (निघ० १ १२) तदुपपदे डुदाञ् दाने (जु०) धातो क प्रत्यय। 'सुपा सुलुगि' ति जस स्थाने यादेश]

अब्दः सवत्सर १२ ७४ [अप् उपपदे दा धातो क]

अब्दिमान् जलदवान् (मेघ) ५ ४२ १४ [अब्द-प्राति० मतुप् अब्दशब्दस्य अब्दिभाव]

अब्रवम् उक्तवानस्मि १ १०८ ६ ब्रूयाम् ६ ५५ ५ **अब्रवीत्**=ज्ञापयति, प्र०—अत्र लडर्थे लडन्तर्गतो ण्यर्थ, प्रसिद्धीकरण धात्वर्थश्च १ २३ २० ब्रूयादुपदिशेत् १ १६१ १२ ब्रूते १ १६१ १६ **अब्रवीत**=उपदिशत ४ ३५ ३ **अब्रवन्**=ब्रूयुरुपदिशेयु १ १६१ २ ब्रुवन्तु उपदिशन्तु ऋ० भू० १३४, ३१ २१ [ब्रूञ् व्यक्ताया वाचि (अदा० उभ०) धातोर्लङ् 'ब्रुव ईट्' इति हलादौ पितीडागम]

अब्रवीतन उपदिशेत १ १६१ १२ ब्रूयु १ १६१ ८ ब्रूयात् १ १६१ ३ [ब्रूञ् व्यक्ताया वाचि (अदा०) धातोर्लङि मध्यमबहुवचने तस्य स्थाने 'तप्तनप्तनथनाश्चे' ति तनप्। हलादौ पितीडागम]

अब्रह्मता अधनता ५ ३३ ३ वेदेश्वरनिष्ठारहितता १० २२. [ब्रह्म धननाम। निघ० २ १० ततो भावे तल् प्रत्यय नञ्समास ब्रह्म च बृहि वृद्धौ धातो 'बृहेर्नोऽच्च' उ० ४ १४६ सूत्रेण मनिन् नकारस्याकार. यणादेशश्च]

अब्रह्मा अवेदवित् (दस्यु=दुष्टस्वभावो जन) ४ १६ ६ **अब्रह्माणः**=अचतुर्वेदविद (जना) ७ २६ १ [सिद्धि पूर्वपदे द्रष्टव्या तस्य पुसि 'ब्रह्मा' रूपम् नञ्समास]

अब्राह्मणाः न ब्राह्मणा, अब्राह्मणा, (प्राजापत्याजना), अविद्यमानो ब्राह्मणो येपा ते (प्राजापत्याजना) ३० २२ [ब्रह्मन्प्राति० 'तदधीते तद्वेद' इत्यण्। ब्रह्म वेदस्तधीते वेद वेति ब्राह्मण ब्रह्मणोऽपत्यमिति विग्रहे ब्रह्मन् अण् 'अन' प्रकृतिभावाट्टिलोपो न भवति। नञ्समासश्च समानार्थौ ब्रह्मन्शब्दो ब्राह्मणश्च महाभा० ५ १ १]

अभक्तम् असेवितम् (आयु=जीवनम्) १ १२७ ५ विभागरहितम् (धनादिकम्) ३ ३० ७ [भज सेवायाम् (भ्वा०) धातो क्त। नञ्समास]

अभक्त भजेत ३ ३० १२ **अभक्षि**=सेवे ४ ३१ ५ **अभजत्**=सेवते २ ३८ १ सेवेत १ १४६ ५ भजेत् २ २४ १४ **अभजन्त**=भजन्ति १ ९१ १ भजन्तु १६ ५२ नित्यमानन्द सेवन्ते, प्र०—अत्र लडर्थे लङ् १ २०८ **अभजः**=सेवेथा ३ ३५ ६ सेवस्व ३ ४७ ३ [भज सेवायाम् (भ्वा० उभ०) धातोर्लुङ् 'झलो झलि' ति सिचो लोप 'अभजत्.' 'अभज' इत्येतयो परस्मैपदे, 'अभजन्त' प्रयोगे आत्मनेपदे च लङ्]

अभयन्त डरते है ५ ३० ५ [ञिभी भये (जु०) धातोर् लङ् 'बहुल छन्दसी' ति शप श्लुर्न भवति]

अभयम् भयरहितम् (धार्मिक जनसमूहम्) ४ २६ ३ भयराहित्यम् १८ ६ निर्भयम् (प्राणिसमूहम्) ३६ २२ अविद्यमान भय यस्य यस्माद्वा (सज्जनम्) ६ २८ ४ भयवर्जितम् (ज्योति=प्रकाशम्) २ २७ ११ **अभयानि**=अविद्यमान भय येपु तानि (राज्यप्राणिन) ११ १५ **अभये**=भयरहिते व्यवहारे ३ ३० ५ [ञिभी भये (जु०) धातो 'एरच्' भावे इत्यच् प्रत्यय नञ्समास। 'अज्विधौ भयादीनामुपसख्यानम्' इत्युपसख्यानात् नपुसके ऽप्यच् भवति स्वर्गो वै लोकोऽभयम् श० १२ ८ १ २२]

अभयसनि अभय सनति सम्भजति येन (अपत्यम्)

३ १. प्रधने सग्रामनाम निघ० २.१७]

सहस्रभरम् य सहस्रमसङ्ख्य बिभर्त्ति तम् (श्रेष्ठ विजयम्) ६ २० १ [सहस्रोपपदे डुभृञ् धारणपोषणयो (जु०) धातो पचाद्यच्]

सहस्रभृष्टिम् भृष्टयो भर्ज्जनानि दहनानि यस्मात्तम् (वध=दुर्भिक्षम्) ५ ३४ २ सहस्राणा भृज्जक छेदकम् (वज्र =शस्त्रविशेषम्) ६ १७ १० सहस्रमसख्याता भृष्टय पाका यस्मात्तम् (वज्रम्) १ ८५ ६ **सहस्र-भृष्टिः**=सहस्रमसङ्ख्याता भृष्टय पीडा दाहा वा यस्मात् स (वज्र) १ ८० १२. सहस्राणि बहूनि भृष्टय पाका यस्मात् स सूर्यस्य प्रकाश १ २४ [सहस्र-भृष्टिपदयो समास । भृष्टि =भ्रस्ज पाके(तुदा०) धातो स्त्रिया क्तिन् । 'ग्रहिज्या०' इति सम्प्रसारणम्]

सहस्रम् असङ्ख्यातगुणसम्पन्नम् (इन्द्र =सभाध्यक्षम्) १.८० ६ असङ्ख्यम् (जगत्) १ १८८ ८ असङ्ख्याता (स्तोमा =स्तुतय) १ ११ ८ ' असख्या (रुह.=नाड्य-ङ्कुरा) १२ ७६ असख्यमतुल बोधम् १८ ६२ सर्वमिद जगत्सहस्रनामकम् ऋ० भू० ११६, अथर्व० ६ ५ १७ सब ससार को स० वि० २०८, अथर्व० ६ ५.१७ असङ्ख्यगृहाश्रमव्यवहारम् १५ ५५ **सहस्रस्य**=असङ्ख्य-पदार्थयुक्तस्य जगत, असङ्ख्यपदार्थविशेषस्य, असङ्ख्यात-स्थूलवस्तुन १५ ६५. **सहस्राय**=अतुलविज्ञानाय, भा०—पुष्कलविद्यायै १३ ४० [सहस्रम् बहुनाम निघ० ३ १ सहस्रम्=सहस्वत् नि० ३ १० सहस्र—सर्व वै सहस्रम् । श० ४ ६ १ १५ भूमा वै सहस्रम् श० ३ ३ ३ ८. परम सहस्रम् ता० १६ ६ २ तदाहु कि सहस्रमितीमे लोका इमे वेदा अथो वागिति ब्रूयात् ऐ० ६ १५. आयुर्वै सहस्रम् तै० ३ ८ १५ ३ पशव सहस्रम् ता० १६ १० १२]

सहस्रमीळ्हे सहस्राणि मीळ्हानि धनानि यस्मात् तस्मिन् (आजौ=सङ्ग्रामे) १.११२ १० [सहस्र-मीळ्ह-पदयो समास । मीळ्हे सग्रामनाम निघ० २ १७]

सहस्रमुष्क असङ्ख्यवीर्य (इन्द्र=सेनापते) ६ ४६ ३ [सहस्र-मुष्कपदयो. समास । मुष्क =मुष स्तेये (क्र्या०) धातो 'सृवृभूशुषि०' उ० ३ ४१. सूत्रेण कक्]

सहस्रमूतिः सहस्रमूतयो रक्षणादीनि यस्मात् स (राजप्रजाजन) १ ५२ २ [सहस्र-ऊतिपदयो समास । ऊति =अव रक्षणगत्यादिषु (भ्वा०) धातो स्त्रिया क्तिन्]

सहस्रम्भरः सहस्रस्य जगतो धर्त्ता पोषको वा (अग्नि =विद्युदादिकार्यकारणस्य स्वरूप) २.६.१. य सहस्रमसख्य शुभगुणसमूह बिभर्त्ति स (प्राप्तमनुष्यजन्मनर) ११ ३६ [सहस्रोपपदे डुभृञ् धारणपोषणयो (जु०) धातो 'सञ्ज्ञाया भृतॄवृजि०' अ० ३ २ ४६ सूत्रेण खच् । सहस्र-म्भर=एषा ह वाऽअस्य (अग्ने) सहस्रम्भरता यदेनमेक सन्त बहुधा विहरन्ति ऐ० १ २८]

सहस्रयोजने सहस्राण्यसख्यानि चतु क्रोशपरिमितानि यस्मिन् देशे तस्मिन् १६ ५४ एतत्सख्यापरिमिते देशे १६ ६३. [सहस्र-योजनपदयो समास । सहस्रम् बहुनाम निघ० ३ १ योजनानि अङ्गुलिनाम निघ० २.५ सहस्र-योजन—(यजु० १६ ५४) अयमग्नि सहस्रयोजनम् श० ६ १ १ २६ एतद्ध परम दूर यत्सहस्रयोजनम् श० ६ १.१ २८]

सहस्ररेताः अतुलवीर्य (विविद्वान्=श्रेष्ठो विद्वज्जन) ४ ५ ३ [सहस्र-रेतस्पदयो समास]

सहस्रवत् सहस्रमसङ्ख्यपरिमाण विद्यते यस्मिँस्तत् (सुवीर्यम्) ३ १३ ७ [सहस्रप्राति० मतुप्]

सहस्रवल्शम् सहस्राण्यसख्या वल्शा अङ्कुरा इव शास्त्रबोधा यस्मिँस्त विज्ञानमय व्यवहारम् ७ ३३ ६. **सहस्रवल्शाः**=यथा बहुमूला वृक्षा रोहन्ति तथा ५ ४३ सहस्राऽङ्कुरा वनस्पतय इवाऽङ्गोपाङ्गै सह वर्त्तमाना (दूर्वादय) ३ ८ ११ [सहस्र-वल्शपदयो समास]

सहस्रवीरम् सहस्राणि वीरा यस्मिँस्तम् (बर्हि = विज्ञानम्) १ १८८ ४ [सहस्र-वीरपदयो समास]

सहस्रवीर्या असङ्ख्यातपराक्रमा, भा०—जितेन्द्रिया (स्त्री) १३ २६ [सहस्रवीर्यपदयो समासे स्त्रिया टाप्]

सहस्रशः असख्याता बहव (रुद्रा =शूरवीरा जना) १६ ६ [सहस्रप्राति० वीप्सायां शस्]

सहस्रशीर्षा सहस्राण्यसख्यातानि शिरासि यस्मिन् स (पुरुष =परमात्मा) ३१ १ [सहस्र-शिरस्पदयो समासे शिरस शीर्षन्भाव. 'शीर्षंश्छन्दसि' सूत्रेण]

सहस्रशृङ्गः सहस्राणि शृङ्गाणि तेजासि किरणा यस्य सूर्यस्य स ७.५५ ७ [सहस्र-शृङ्गपदयो समास । शृङ्गाणि ज्वलतो नाम निघ० १ १७]

सहस्रसातमम् सहस्रमसङ्ख्यात सुख सनुते ददाति येन तदतिशयितम् (द्युम्न=ज्ञानम्), प्र०—'जनसनखन-क्रमगमो विट्' अ० ३ २ ६७ अनेन सहस्रोपपदात् सनोतेर्विट् 'विड्वनोरनुनासिकस्यात्' अ० ६ ४ ४१ अनेन नकारस्या-कारादेश, ततस्तमप् १ ६ ८ असख्याना पदार्थानामतिशयेन विभक्तारम् (सूरि=विद्वास शिल्पिनम्) ६ ४५ ३३.

सहस्रसातमः=य सहस्रमसङ्ख्य सनोति ददाति सोऽतिशयित (अग्नि=महाविद्वज्जन) ३ ३ ६ अतिशयेन सहस्रस्य विभाजक (वाजी=अश्व) १ १७५ १ [सहस्रोपपदपण सम्भक्तौ (भ्वा०) धातो 'जनसनखनक्रमगमो विट्' इति विट्। 'विड्वनोरनुनासिकस्यात्' इत्यात्त्वम्। सहस्रसाप्राति० अतिशायने तमप्]

सहस्रसातमाम् सहस्राणि बहूनि धनानि सुखानि वा सनोति ददाति यया साऽतिशयिता ताम् (ऊति=रक्षा प्राप्तिमवगमञ्च), प्र०—अत्र सहस्रोपपदात् षणु दाने इत्यस्माद्धातो 'जनसन०' इत्यनेन विट् 'विड्वनोरनुनासिकस्यात्' इति नकारस्याकारादेश, ततस्तमप्, ततष्टाप् १ १० १० [सहस्रोपपदे षणु दाने (तना०) धातोर्विट्। ततोऽतिशायने तमप्। ततष्टाप् स्त्रियाम्]

सहस्रसाम् सहस्राणि कार्याणि सनति सम्भजति (यस्तम् अश्व=विद्युतम्) १ ११८ ६ सहस्र बह्वीर्विद्या सनोति तम् (ऋषि=वेदमन्त्रार्थद्रष्टार, शुभगुणोपदेष्टार, सकलविद्याप्रत्यक्षकारिण जनम्) १ १० ११ या सहस्राणि असख्यातानि कार्याणि सनोति ताम् (द्युत=कारणस्था दीप्तिम्) ३ १६ **सहस्रसाः**=य सहस्राणि सनति विभजति स (राजा) ४ ३८ १० य सहस्राणि पदार्थान् सनोति विभजति स (अग्नि) १ १८८ ३ ये सहस्र विद्याविषयान् सनन्ति ते (राजपुरुषा) ६ १७ [सहस्रोपपदे षण सम्भक्तौ (भ्वा०) षणु दाने (तना०) धातोर्वा 'जनसनखनक्रमगमो विट्' अ० ३ २ ६७ सूत्रेण विट्। 'विड्वनोरनुनासिकस्यात्' इत्यात्त्वमनुनासिकस्य]

सहस्रसावे सहस्रस्याऽसख्यस्य धनस्य साव प्रसवो यस्मिन् सङ्ग्रामे ३ ५३ ७ [सहस्र-सावपदयो समास। साव =षु प्रसवैश्वर्ययो (भ्वा०) धातोर्घञ्]

सहस्रस्थूणम् सहस्रमसख्या वा स्थूणा यस्मिँस्तज्जगत्, राज्य, यान वा ५ ६२ ६ **सहस्रस्थूणे**=सहस्राणि स्थूणा स्तम्भा यस्मिँस्तस्मिन् (सदसि=सभास्थाने) २ ४१ ५. [सहस्र-स्थूणापदयो समास। स्थूणा=तिष्ठति छादनादिकमनया सा स्थूणेति विग्रहे ष्ठा गतिनिवृत्तौ (भ्वा०) धातो 'रास्नासास्नास्थूणावीणा' उ० ३ १५ सूत्रेण न-प्रत्यय आकारस्य ऊकारादेशो निपात्यते। तत स्त्रियां टाप्]

सहस्रा सहस्राण्यसख्यातानि (अवद्विष=शत्रून्) १ १३३ ७ बहुविधा (ऊतय=रक्षा) ४.३१ १०. [सहस्रम् बहुनाम निघ० ३ १ ततश्शेर्लोपश्छन्दसि]

सहस्राक्ष सहस्रेष्वसख्यातेषु व्यवहारेष्वक्षि विज्ञान यस्य तत्सम्बुद्धौ, भा०—असख्यप्राणिशरीराणि प्रविश्यानेकनेत्रादिभिरङ्गैः दर्शनादीनि कार्याणि कर्त्तुं समर्थ (अग्ने=योगिराज) १७ ७१. सहस्रेष्वसख्यातेषु युद्धकार्येष्वक्षिणी यस्य तत्सम्बुद्धौ, भा०—सर्वतो विदितसाम-दाम-दण्ड-भेदादिराजनीत्यवयवकृत्य (सेनाध्यक्ष) १६ १३ **सहस्राक्षः**=सहस्राण्यसख्यातान्यक्षीणि यस्मिन् स (पुरुष=परमात्मा) ३१ १. असख्यदर्शन' (अग्नि=मनुष्य) १३ ४७ **सहस्राक्षाय**=सहस्रेष्वसख्यातेषु शास्त्रविषयादिष्वक्षिणी यस्य तस्मै विदुषे ब्राह्मणाय १६ २६ सहस्रेषु भृत्येषु अक्षिणी यस्य तस्मै (सेनापतये) १६ ८. [सहस्र-अक्षिपदयो समास। 'अक्ष्णोऽदर्शनात्' अ० ५ ४ ७६ सूत्रेण 'वा छन्दसि' नियमेन छन्दसि दर्शनार्थेऽपि समासान्तोऽच्]

सहस्राक्षा सहस्राण्यसख्यातानि अक्षीणि साधनानि याभ्यान्तौ (इन्द्रवायू=विद्युत्पवनौ) १ २३.३ [सहस्राक्ष इति व्याख्यातम्। ततो द्विवचनस्याकारादेश]

सहस्राक्षरा सहस्राणि असख्यातान्यक्षराणि यस्या सा (विदुषी स्त्री) १ १६४ ४१ [सहस्र-अक्षरपदयो समासे स्त्रिया टाप्। सहस्राक्षरा बहूदका नि० ११ ४०]

सहस्रिणम् सहस्रमसख्यात प्रशस्त सुख विद्यते यस्मिँस्तम् (रयि=धनसमूहम्) १ ६४ १५ सहस्रमसख्याता गुणा विद्यन्ते यस्मिँस्तम् (वाज=बोधम्) १ १२४ १३ सहस्रमसख्या पदार्था विद्यन्ते यस्मिँस्तम् (रयि=धनम्) ४ ४९ ४ सहस्रैर्योद्धृभि सयुक्तम् (वाज=सङ्ग्रामम्) ६ ८ ६ असङ्ख्य बल विद्यते यस्मिँस्तम् (वाज=वेगम्) ३ २२ १ सहस्राण्यसख्यातानि सुखानि यस्मिन् सन्ति तम् (वाज=पदार्थविज्ञानम्), प्र०—'तप सहस्राभ्या विनीनी' अ० ५ २ १०२ इति सहस्रशब्दादिनि प्रत्यय १ ५ ६ **सहस्रिणः**=असख्यातसुखाङ्गयुक्तान् (पदार्थान्) २ २ ७ असख्यपुरुषधनयुक्तस्य (वायो=राज्ञ) ४ ४८ ५ सहस्रमसङ्ख्याता वेगादयो गुणा सन्ति येषान्ते (वायुवेगा) २ ४१ १ **सहस्री**=असङ्ख्य (रयि=धनम्) ७ ४ ६ सहस्राण्यसख्याता उत्तमा मनुष्या पदार्था वा विद्यन्ते यस्य स (सम्राट्=चक्रवर्त्ती राजा) ७ ५८ ४ सहस्र सर्व सुखमस्मिन्निति स (रयि=श्री) ६ १५ १२ [सहस्रमिति बहुनाम निघ० ३ १ तत 'तप सहस्राभ्या विनीनी' अ० ५ २ १०२ सूत्रेण इनि]

सहस्रिणी सहस्राण्यसख्याता विद्याविषया विद्यन्ते

यस्या सा (वेदचतुष्टयी) ७ १५ ९ असस्या पदार्था दीयन्ते यस्या सा (राति =दानक्रिया) ६ ४५ ३२ **सहस्रिणीभिः**=सहस्राण्यसस्या वेगा विद्यन्ते यासु गतिपु ताभि २८ २८ सहस्राणि वहूनि शूरवीरसङ्घा यासु ताभि (सेनाभि) १ १३५ ३ सहस्राणि प्रशस्तानि पदार्थप्रापणानि विद्यन्ते यासु ताभि (ऊतिभि =रक्षणादिभि) प्र०—अत्र प्रशसार्थ इनि १ ३० ८ **सहस्रिणीः**=असङ्ख्याता (इप =अन्नानि) २ ६ ५ वह्वी (इप) १ १८८ २. [सहस्रप्राति० मत्वर्थे 'तप सहस्राभ्या विनीनी' सूत्रेण इनि । तत स्त्रियाम् 'ऋन्नेभ्यो ङीप्' अ० ४ १.५ सूत्रेण ङीप्]

सहस्रियम् सहस्रे पु भवम् (प्रजाजनम्) ७ ५६ १४ **सहस्रियः**=सहस्रे णाऽसख्यातेन योद्धृसमूहेन सम्मितस्तुल्य (अग्नि =पावक इव सेनापति) १५ ५२ [सहस्रप्राति० भवार्थे 'समुद्राभ्राद् घ' अ० ४ ४ ११८ सूत्रेण घ]

सहस्रियासः सहस्राणि (ऊर्म्मय =तरङ्गा) १ १६८ ८ [सहस्रियमिति व्याख्यातम् । ततो जसो ऽसुगागम]

सहस्व अभिभव, तिरस्कुरु, प्र०—सह अभिभवे इत्यस्य प्रयोग ३ २४ १ वली भव, भा०—वशे नय १२ ९९ क्षमस्व ९ ३७ **सहः**=सहसे, प्र०—लडि मध्यमैकवचनेऽडभाव १ १७४ ८ [पह मर्पणे (भ्वा०) धातोर्लोट् । अन्यत्र लड् । अटोऽभाव । व्यत्ययेन परस्मैपदञ्च]

सहस्वत् सहोऽतिशयित सहन विद्यते यस्मिन् तद्यथा स्यात्तथा, (मख =पालनशिल्पाख्यो यज्ञ) प्र०—अत्राऽतिशये मतुप् १ ६ ८ [सहस्प्राति० अतिशायने तमप् । सहस् इति व्याख्यातम्]

सहस्वतः प्रशस्त सहो वल विद्यते यस्मिँस्तस्य (अग्ने) १ ९७ ५ वलवत (सेनेशस्य) २ १३ ११ **सहस्वन्तः**=सह सहन विद्यते येपा ते (जना) प्र०—अत्र भूम्न्यर्थे मतुप् ३ १८ **सहस्वान्**=सहनकर्त्ता (विद्वज्जन) ६ ५ ६ अत्यन्तवलयुक्त (परमेश्वर) ६ २२.१ सहो वहुवल विद्यते यस्य स (इन्द्र =सेनापति) १७ ३७ **सहस्वः**=वहुवलयुक्त, सकलविद्याविद्वा (विद्वज्जन) ३ १४ २ प्रशस्त वलयुक्त (वीरपुरुप) ७ ४४ सोढु शील (वैद्यजन) १.१८९ ४ वहुसहनादिगुणयुक्त (विद्वन्) ५ ९ ७ [सहस्प्राति० प्रशसार्थे भूम्न्यर्थे वा मतुप् । सह वलनाम निघ० २ ९]

सहावा सहन कर्त्ता (राजकर्मचारी) ६ १८ २ य सहैव वनति सम्भजति (देव =विद्वज्जन) ७ ४५ ३ सोढा (भूपति) ३ ४९ ३ [सह =पह मर्पणे (भ्वा०) धातोर् घञर्थे क । सहप्राति० मत्वर्थे, वनिप् । पूर्वस्य सहितायां दीर्घ । अन्यत्र सहोपपदे वन सम्भक्तौ (भ्वा०) धातो 'अन्येभ्योऽपि दृश्यन्ते' विच् । पूर्वस्य सहिताया दीर्घ, धातोर्नकारस्यात्त्वम्]

सहावान् वलवान् (सेनेश) प्र०—अत्राऽन्येपामपि० दीर्घ १ १७५ ३ सहो वहु सहन विद्यते यस्मिन् स (ओपधिसार) १ १७५ २ [सहप्राति० भूम्न्यर्थे मतुप् । सह.=पह मर्पणे (भ्वा०) धातोरच् । सहम्प्राति० वा मतुप् । वर्णव्यत्ययेन सकारस्याकार । सह वलनाम निघ० २ ९]

सहासः सहनशीला वलवन्त (मरुत =मनुष्या) ७ ३४ २४ [सहप्राति० जसोऽसुक् । सह =पह मर्पणे (भ्वा०) धातोरच्]

सहिष्ठ अतिशयेन सोढा (राजन्) ६ १८ ४ [पह मर्पणे (भ्वा०) धातो कर्त्तरि तृजन्तात् 'तुश्छन्दसि' इष्ठन् । तृचो लोप]

सहीयस अतिशयेन वलयुक्तान् सोढ़ृन् (नॄन्=मनुष्यान्) १ १७१ ६ अतिशयेन सहनशीलान् वलिष्ठान् (सज्जनान्) ४ ५५ १ **सहीयान्**=अतिशयेन सोढा (वीरजन) १ ६१ ७ [पह मर्पणे (भ्वा०) धातो कर्त्तरि तृजन्तात् 'तुश्छन्दसि' अ० ५ ३ ५९ सूत्रेणातिशायन ईयसुन् । 'तुरिष्ठेमेयस्सु' सूत्रेण तृचो लोप]

सहीयसि याऽतिशयेन सोढ्रि (साध्वि स्त्रि) ५ ७९ २ [सहीयस् इति व्याख्यातम् । तत स्त्रिया ङीवन्तात् सम्बुद्धौ रूपम्]

सहुरिः सहनशील (जन) ७ ५८ ४ सहनस्वभाव (शमादिशुभकर्माचारिजन) २ २१ ३ **सहुरी**=सोढारौ (इन्द्राग्नी=वायुविद्युतौ) ६ ६० १ **सहुरे**=सहनशीलेन्द्र (राजन्) ४ २२ ९ [पह मर्पणे (भ्वा०) धातो 'जसिसहोरुरिन्' उ० २ ७३ सूत्रेण-उरिन्]

सहूतिभिः समाना हूतय आह्वानानि च सहूतयस्ताभि. १ ४५ १० **सहूती**—समाना हूतिराह्वान ययोस्तौ (अग्नीपोमौ=वाय्वग्नी) १ ९३ ९ [समाना-हूतिपदयो समासे समानस्य सादेश । हूति =ह्वेञ् स्पर्धाया शब्दे च (भ्वा०) धातो स्त्रिया क्तिन्]

सहूती समानप्रशसया ७ २७ ४ समानया स्पर्द्धया २ ३३ ४ [समाना-हूतिपदयो समासे समानस्य सादेश ।

हूति =ह्वेञ् स्पर्धाया शब्दे (भ्वा०) धातो स्त्रिया क्तिन्। तत 'सुपा सुलुक्' सूत्रेण टास्थाने पूर्वसवर्णदीर्घश्छान्दस]

सहृदयम् सब के समान हृदय (गृहस्थजन) स० वि० १४१, अथर्व० ३ ३० १ [समान-हृदयपदयो समासे समानस्य सादेशश्छान्दस]

सहोजाः य सहसा बलेन प्रसिद्ध (दूत =जीव) १ ५८ १ य सहसा बलेन जात (इन्द्र =सेनापति) १७ ३७ [सहस् उपपदे जनी प्रादुर्भावे (दिवा०) धातोर्ड । वचनव्यत्ययेन सो स्थाने जस् । सह बलनाम निघ० २ ९.]

सहोदाम् बलप्रदम् (इन्द्र =राजानम्) ६ १७ १३ य सहो बल ददाति तम् (इन्द्र =सम्राजम्) ७ ३६ **सहोदाः**=बलप्रदा (राजक्रिया) १.१७४.१० बलप्रद (सभेश) १ १७१ ५ [सहसुपपदे डुदाञ् दाने (जु०) धातो कर्त्तरि क्विप् । सह बलनाम निघ० २ ९]

सहोभरिः य सहो बल बिभर्त्ति स (राजा) ५ ४४ ३ [सहसुपपदे डुभृञ् धारणपोषणयो (जु०) धातो 'फलेग्रहिरात्मम्भरिश्च' अ० ३ २ २६ सूत्रे चकार-स्यानुक्तसमुच्चयार्थकत्वाद् इन्]

सहोवृधम् य सहसा बलेन वर्धते त, बलस्य वर्धक वा (आप्त विद्वज्जनम्) ३ १० ९ सहो बल वर्धयतीति सहो वृधम् (अग्नि =सर्वाभिरक्षकमीश्वरम्) १.३६ २ [सहस् उपपदे वृधु वृद्धौ (भ्वा०) धातो कर्त्तरि क्विप्]

सहौजसः ओजसा बलेन सह वर्त्तमाना (स्त्रिय) १० ४ [सह-ओजस्पदयो समास]

सह्यसः सहीयसोऽतिशयेन बलवत (विद्वज्जनस्य) १.१२० ४ [प्र०—अत्र सहधातोरसुन् ततो मतुप् । तत ईयसुनि विन्मतोर्लुगिति मतुब्लोप । टेरिति टिलोप । छान्दसो वर्णलोपो वेतीकारलोप]

सह्याः सहन कुर्या १ १५२ ७ [षह मर्षणे (भ्वा०) धातोर्लिङि मध्यमैकवचने रूपम्]

सह्याः सोढु योग्या (दीक्षय) २ ११४ [षह मर्षणे (भ्वा०) धातो 'शकिसहोश्च' अ० ३ १ ९९ सूत्रेण यत्]

सह्योः सहनशीलस्य (सज्जनस्य) ६ १८ १२ [षह मर्षणे (भ्वा०) धातोर्बाहु० औणा० युच् युन् वा]

संयक्षतः सङ्गच्छत २ ३ ७ [सम्+यज देवपूजा-सगतिकरणदानेषु (भ्वा०) धातोर्लेटि सिपि प्रथमद्विवचने रूपम्]

संयत् सङ्गति १५ १८ सयम १५ ५ **संयतः**= सयमयुक्ता (प्रजा) ५ ३४ ९ **संयता**=सयमयुक्तेन (विज्ञानेन) १ १५१ ८ सयच्छन्ति येन तेन (द्युम्नेन= धनेन यशसा वा) ६ १६ २१ [सम्+यमु उपरमे (भ्वा०) धातो सम्पदादित्वात् 'अन्येभ्योऽपि दृश्यते' इति वा क्विप्। 'गम क्वौ' अ० ६ ४ ४० इत्यत्र 'गमादीनामिति वक्तव्यम्' इत्यनुनासिकलोपे तुगागम । सयत् सग्रामनाम निघ० २ १७]

संयतम् कृतसयमम् (स्वस्ति=सुखम्) ६ २२ १० **संयतः**=सम्यङ् नियमित (अग्नि =विद्वज्जन) २ २ २ [सम्+यमु उपरमे (भ्वा०) धातो क्त । 'अनुदात्तोपदेश०' अ० ६ ४ ३७ सूत्रेणानुनासिकलोप]

संयती सम्मिलिते (योगक्षेमसाधने) ५ ३७ ५ सयमेन गच्छन्त्यौ द्यावापृथिव्यौ २ १२ ८ [सम्+इण् गतौ (अदा०) धातो शत्रन्तान् ङीप्]

संयद्वसुः यज्ञस्य सङ्गतिकरण १५ १८ [सयत्-वसुपदयो समास]

संयद्वीरम् सयता सयमयुक्ता वीरा यस्मिँस्तम् (अग्न्यादिपदार्थबोधम्) २ ४ ८ [सयत-वीरपदयो समास । पूर्वपदस्यान्त्यलोपश्छान्दस]

संयन्ति प्राप्नुवन्ति २ ३५ ३ सम्यग् गच्छन्ति १ १९० ७ **संयन्तु**=सम्यक् प्राप्नुवन्तु १ १२५ ७ [सम्+इण् गतौ (अदा०) धातोर्लट् । अन्यत्र लोट्]

संयासाय सम्यग् गमनाय ३९ ११ [सम्+यसु प्रयत्ने (दिवा०) धातोर्घञ्]

संयेमुः सम्यक्तया यच्छेयु ३ ३८ ३ [सम्+यमु उपरमे (भ्वा०) धातोर्लिट्]

संयौमि सम्यङ् मिश्रयामि, अग्नौ प्रक्षिप्य वियोजयामि वा १ २२ [सम्+यु मिश्रणेऽमिश्रणे च (अदा०) धातोर्लट्]

संरभध्वम् सम्यक् प्रारम्भ कुरुत, भा०—मङ्गलान्याचरत ३५ १० **संरभस्व**=सम्यगारम्भ कुरु २७ ५. **संरभेमहि**=सम्यक्तया शत्रुभि सह युध्येमहि १ ५३ ५ [सम्+रभ राभस्ये (भ्वा०) धातोर्लोट । अन्यत्र लिङ्]

सँरराणः सम्यग् दातृशील (प्रजापति =परमेश्वर), प्र०—अत्र व्यत्ययेनाऽऽत्मनेपदम् 'बहुल छन्दसि' अ० २ ४ ७६ इति शप स्थाने श्लु ८ ३६ सम्यक् सुखानि राति ददाति स (यम =न्यायी सयमी सन्तान) १९ ५१ सम्यग् रममाण, भा०—व्याप्त (प्रजापति =ईश्वर) ३२ ५ सर्वप्राणिभ्योऽत्यन्त सुख दत्तवान् सन् (ईश्वर) ऋ० भू० ४४, ८ ३६ सत्यविद्याया सम्यग् दानकर्त्ता (परमेश्वर) ऋ० भू० २६०, १९ ५१ [सम्+रा दाने

(अदा०) धातो शानच् । व्यत्ययेनात्मनेपदम् । शप श्लुश्च छान्दस]

संरराणे ये सम्यक् सुख रातो दत्तस्ते (द्यावापृथिव्यौ) ६ ७० ६ [सरराण इति व्याख्यातम् । तत स्त्रिया टावन्तात् प्रथमाद्विवचनम्]

संराधयन्तः परस्पर मिल के धन-धान्य राज्य-समृद्धि को प्राप्त होते हुए (गृहस्थादि मनुष्यो) स० वि० १४२, अथर्व० ३ ३० ५ [सम्+राध ससिद्धौ (स्वा०) धातोर्णिजन्ताच्छतृ]

संरायस्पोषेण प्रशस्ताना रायो धनाना भोगपुष्ट्या ३ १९ [सम् रैपदयो समासे तत पोपपदेन सह समास । समासे विभक्तेरलुक्]

संरिणीथः सम्यक्क्रया हिस्तम् १ ११७ १९ **संरिणाति**=सम्यग्गच्छति ५ ३१ ११ [सम्+रि हिंसायाम् (स्वा०) धातोर्लट् । विकरणव्यत्ययेन श्ना । रिणाति गतिकर्मा निघ० २ १४]

संरिहाणे सम्यगास्वादकर्त्र्यौ (मातरा=मातृवद्वर्त्तमानेऽध्यापिकोपदेशिके) ३ ३३ ३ [सम्+लिह आस्वादने (अदा०) धातो शानजन्तात् स्त्रिया टाप् । ततो द्विवचने रूपम् । धातोर्लस्य रेफश्छान्दस]

संरोचते एकीभावेन प्रकाशते ३७ १४ [सम्+रुच दीप्तावभिप्रीतौ च (भ्वा०) धातोर्लट्]

संवतः ससेवमान (मनुष्य) ५ १५ ३ सविभक्तान् (अवरान्=नीचाननुत्कृष्टगुणकर्मस्वभावान् नरान्) ११ ७१ विभागवत्य (विषयजन्या व्याधय) १ १९१ १५ **संवतम्**=सम्यग् विभक्ताम् (यानगतिम्) ११ १२ [सम्+वन सम्भक्तौ (भ्वा०) धातो क्त । 'अनुदात्तोपदेश०' अ० ६ ४ ३७ सूत्रेणानुनासिकलोप । सवत सग्रामनाम निघ० २ १७]

संवत्सम् सङ्गत वत्समिव, एकीभूत वात्सल्येन पालित सन्तानम् ४ ३३ ४ [सम्-वत्सपदयो समास]

संवत्सरः क्षणादिलक्षण काल, प० वि० । ऋ० ८ ८.४८ २ सवत्सर इव नियमेन वर्त्तमान (विद्वज्जनो जिज्ञासुर्वा) २७ ४५ द्वादशभिर्मासैरलङ्कृत (वर्ष) १८ २३ **संवत्सराय**=वर्षाय २४ २५ चतुर्थ्याऽनुवत्सराय, प्र०—अत्राऽनो पूर्वपदस्य लोप ३० १५ [सम्+वस निवासे (भ्वा०) धातो 'सपूर्वाच्चित्' उ० ३ ७२ सूत्रेण सरन् । 'स स्यार्धधातुके' अ० ७ ४ ४९ सूत्रेण सकारादावार्धधातुके परतस्तकारादेश । सवत्सर = सवसन्तेऽस्मिन् भूतानि नि० ४ २७ षट्त्रिंशच्च ह वै त्रीणि च शतानि सवत्सरस्याहोरात्रा इति च ब्राह्मण समासेन नि० ४ २७ स ऐक्षत प्रजापति । सर्वं वाऽअत्सारिष य इमा देवता असृक्षीति स सर्वत्सरो ऽभवत् सर्वत्सरो ह वै नामैतद् यत् सवत्सर इति श० ११ १ ६ १२ य स भूताना पति सवत्सर स श० ६ १ ३ ८ सवत्सरो वै प्रजापति श० २ ३ ३ १८ सवत्सरो वै प्रजापतिरेकशतविध. श० १० २ ६ १ सवत्सर प्रजापति ऐ० १ १ ता० १६ ४ १२ गो० उ० ३ ८ तै० १ ४ १० १० स (सवत्सर) एव प्रजापतिस्तस्य मासा एव सह दीक्षिण ता० १० ३ ६ स वै सवत्सर एव प्रजापति श० १ ६ ३ ३५ प्रजापति सवत्सर ऐ० ४ २५ स एष प्रजापतिरेव सवत्सर कौ० ६ १५ सवत्सरो यज्ञ प्रजापति श० १ २ ५ १२ सवत्सरो वै यज्ञ प्रजापति तस्यैत द् द्वार यदमावास्या चन्द्रमा एव द्वारपिधान श० ११ १ १ १ सवत्सरो यज्ञ श० ११ २ ७ १ सवत्सरसमितो वै यज्ञ पञ्च वा ऋतव सवत्सरस्य त पञ्चभिराप्नोति तस्मात्पञ्च जुहोति श० ३ १ ४ ५ सवत्सरो वै पञ्चहोता तै० २ २.३ ६ सवत्सरो वाव होता गो उ० ६ ६ सवत्सरो वै होता कौ० २९ ८ सवत्सरो वै धाता तै० १ ७ २ १ पुरुषो वै सवत्सर श० १२ २ ४ १ पुरुषो वाव सवत्सर गो० पू० ५ ३. प्राणो वै सवत्सर ता० ५ १० ३ वाक् सवत्सर ता० १२ १२ ७ बृहती हि सवत्सर श० ६ ४ २ १० तदाहुस्सवत्सर एव मामेति जै० उ० १ ३५ १ सवत्सर स्वर्गाकार तै० २ १ ५ २ अग्नि सवत्सर ता० १७ १३ १७ अग्निर्वाव सवत्सर तै० १ ४ १० १ सवत्सरोऽग्नि श० ६ ३ १ २५ ता० १० १२ ७ सवत्सर एवाग्नि श० १० ४ ५ २ सवत्सर एषोऽग्नि श० ६ ७ १ १८ सवत्सरो वा अग्नि-र्वैश्वानर तै० १ ७ २ ५ श० ६ ६ १ २० सवत्सरोऽग्नि-र्वैश्वानर ऐ० ३ ४१ सवत्सरो वैश्वानर श० ५.२ ५ १५ सवत्सरो वै वैश्वानर श० ४ २ ४ ४ सवत्सरो वै पिता वैश्वानर प्रजापति श० १ ५ १ १६ सवत्सरो वै सोमो राजा (ऋ० ४ ५३ ७) कौ० ७ १० सवत्सरो वै सोम पितृमान् तै० १ ६ ८ २ सवत्सरो वा इन्द्राशुनासीर तै० १ ७ १ १ इन्द्राय शुनासीराय=(सवत्सराय पुरोडाश द्वादशकपाल निर्वपति तै० १ ७ १ १ सवत्सरो वै शुनासीर गो० उ० १ २६ स य स सवत्सरो ऽसौ स आदित्य श० १० २ ४ ३ एष वै सवत्सरो य एष (आदित्य) तपति श० १४ १ १ २७ एष वै मृत्युर्यत्सवत्सर एष हि मर्त्याना-महोरात्राभ्यामायु क्षिणोत्यथ म्रियन्ते श० १० ४ ३ १ सवत्सरो विश्वकर्मा ऐ० ४ २२ सवत्सरो वरुण श०

४ ४ ५.१८ सवत्सरो हि वरुण श० ४ १ ४ १० व्योमा (यजु० १४ १३) हि सवत्सर श० ८ ४ १ ११ सुमेक सवत्सर स्वेको ह वै नामैतद् यत् सुमेक इति श० १ ७ २ २६ सवत्सरो वै समस्त सहस्रवास्तोकवान् पुष्टिमान् ऐ० २ ४१ सवत्सरो वै परिक्षित् । सवत्सरो हीमा प्रजा परिक्षेति सवत्सर हीमा प्रजा परिक्षियन्ति ऐ० ६ ३२ सवत्सरो वै परिक्षि । सवत्सरो हीद सर्व परिक्षियतीति गो० उ० ६ १२ सवत्सरो वै प्रवत ग्रश्वीतीरप ता० ४ ७ ६ सवत्सरो वज्र श० ३ ६ ४ १९ सवत्सरो हि वज्र श० ३ ४ ४ १५ सवत्सरो यजमान श० ११ २ ७ ३२ ग्रभ्रातृव्या तत्सवत्सर ऐ० ५ २५ कौ० २७ ५ ग्रग्निष्टोम उक्थ्योऽग्निर्ऋतु प्रजापति सवत्सर इति । एतेऽनुवाका यज्ञक्रतूनामृतूनाञ्च सवत्सरस्य च नामधेयानि तै० ३ १० ४ सवत्सरो वै देवाना जन्म श० ८ ७ ३ २१ सवत्सर खलु वै देवाना पू तै० १ ७ ७ ५ तस्य (सवत्सरस्य) वसन्त एव द्वार हेमन्तो द्वार त वा एतं सवत्सर स्वर्गं लोक प्रपद्यते श० १ ६ १ १९ सवत्सर सुवर्गो लोक तै० २ २ ३ ६ श० ८ ४ १ २४ ता० १८ २ ४ मध्ये ह सवत्सरस्य स्वर्गो लोक श० ६ ७ ४ ११ सवत्सरो वाव नाक षट्त्रिंशस्तस्य चतुर्विंशतिरर्धमासा द्वादशमासास्तद्यत्तमाह नाक इति न हि तत्र गताय कस्मै च नाक भवति श० ८ ४ १ २४ सवत्सरो वै देवाना गृहपति ता० १० ३ ६ एक वा एतद् देवानामह । यत् सवत्सर तै० ३ ९ २२ १. सद्यो वै देवाना सवत्सर ता० १६ ६ ११ इमऽउ लोका सवत्सर श० ८ २ १७ १७ सर्व वै सवत्सर श० १ ६ १ १९ सवत्सर इद सर्वम् श० ८ ७ १ १ सवत्सरो वा ऽऋतव्या (इष्टका) श० ८ ६ १.४ ऋतव सवत्सर तै० ३ ९ ६ १ ऋषभो वा एष ऋतूनाम् । यत् सवत्सर । तस्य त्रयोदशो मासो विष्टपम् तै० ३ ८ ३ ३ त्रयो वा ऽऋतव सवत्सरस्य श० ३ ४ ४ १७ त्रेधा विहितो वै सवत्सर कौ० १९ ३ पञ्चऽर्त्तव सवत्सरस्य श० १ ५ २ १६ षड् वा ऽऋतव सवत्सरस्य श० १.२ ५ १२. सप्तार्त्तव सवत्सर श० ६ ६ १ १४ द्वादश वा वै त्रयोदश वा सवत्सरस्य मासा श० २ ९ ३ २७ सवत्सरस्य प्रतिमा वै द्वादश रात्रय तै० १ १ ६ ७ त्रयोदश वै मासा सवत्सरस्य श० ३ ६ ४ २४ एतावान् वै सवत्सरो यदेष त्रयोदशो मासस्तदत्रैव सर्व सवत्सर आप्तो भवति कौ० १९ २ एतावान् वै सवत्सरो यदेष त्रयोदशो मासस्तदत्रैव सर्व सवत्सर आप्तो भवति कौ० ५ ८ स एष सवत्सर प्रजापति षोडशकल श० १८.४ ३.२१ सवत्सर सप्तदश ता० ६ २ २ सप्तदशो वै सवत्सरो द्वादशमासा पञ्चर्तव श० ६ २ २ ८ सवत्सर एव सप्तदशस्यायतन द्वादशमासा पञ्चर्त्तव एतदेव सप्तदशस्यायतनम् ता० १० १ ७ द्वादश वै मासा सवत्सरस्य पञ्चर्तव एष एव प्रजापति सप्तदश श० १.३ ५ १० सप्तदशो वै प्रजापतिर्द्वादशमासा पञ्चर्तवो हेमन्तशिशिरयो समासेन तावान्त्सवत्सर । सवत्सर प्रजापति ऐ० १ १ सवत्सरो वाव प्रतूर्त्तिरष्टादश (यजु० १४ २३) तस्य द्वादशमासा पञ्चर्तव सवत्सर एव प्रतूर्त्तिरष्टादशस्तद्यत्तमाह प्रतूर्त्तिरिति सवत्सरो हि सर्वाणि भूतानि प्रतिरति श० ८ ४ १ १३ सवत्सरो वाव तपो नवदश (यजु० १४ २३) तस्य द्वादश मासा षड् ऋतव सवत्सर एव तपो नवदशस्तद्यत्तमाह तप इति सवत्सरो हि सर्वाणि भूतानि तपति श० ८ ४ १ १४ सवत्सरो वाव वर्चो द्वाविंश (यजु० १४ २३) तस्य द्वादशमासा सप्तर्तवो द्वेऽग्रहोरात्रे सवत्सर एव वर्चो द्वाविंशस्तद् यत्तमाह वर्च इति सवत्सरो हि सर्वेषा भूताना वर्चस्वितम श० ८ ४ १ १६ सवत्सरो वाव सम्भरणस्त्रयोविंश (यजु० १४ २३) तस्य त्रयोदश मासा सप्तर्तवो द्वेऽग्रहोरात्रे सवत्सर एव सम्भरणस्त्रयोविंशस्तद् यत्तमाह सम्भरण इति सवत्सरो हि सर्वाणि भूतानि सम्भृत श० ८ ४ १ १७ चतुर्विंशो वै सवत्सर ता० ४ १० ५ चतुर्विंशत्यर्धमासो वै सवत्सर ऐ० ८ ४ सवत्सरो वाव गर्भा पञ्चविंशस्तस्य चतुर्विंशतिरर्धमासा सवत्सर एव गर्भा पञ्चविंश श० ८ ४ १ १९ सवत्सरो वाव प्रतिष्ठा त्रयस्त्रिंश (यजु० १४ २३) तस्य चतुर्विंशतिरर्धमासा षड् ऋतवो द्वे ऽहोरात्रे सवत्सर एव प्रतिष्ठा त्रयस्त्रिंशस्तद्यत्तमाह प्रतिष्ठेति सवत्सरो हि सर्वेषा भूताना प्रतिष्ठा श० ८ ४ १ २२ सवत्सरो वाव ब्रध्नस्य विष्टप चतुस्त्रिंशस्तस्य चतुर्विंशतिरर्धमासा सप्तर्त्तवो द्वे अहोरात्रे सवत्सर एव ब्रध्नस्य विष्टप चतुस्त्रिंश (यजु० १४ २३) श० ८ ४ १ २३ सवत्सरो वाव विवर्त्तोऽष्टाचत्वारिंश (यजु० १४ २३) षड्विंशतिरर्धमासास्त्रयोदशमासा सप्तर्तवो द्वे अहोरात्रे तद्यत्तमाह विवर्त इति सवत्सराद् हि सर्वाणि भूतानि विवर्त्तन्ते श० ८ ४ १ २५ त्रीणि वै षष्टि शतानि सवत्सरस्याह्नाम् कौ० ११ ७ त्रीणि च ह वै शतानि षष्टिश्च सवत्सरस्याहोरात्राणि गो० पू० ५ ५ एतावान् वै संवत्सरो यदहोरात्रे कौ० १७ ५ विरूप (नानारूप) सवत्सर ता० १४ ९ ८ यस्मादेषा समाना सती षडह विभक्तिर्नानारूपा तस्माद् विरूप सवत्सर

ता० १० ६ ७ पडहो वा उ सर्व सवत्सर कौ० १६ १० नवाहो वै गवत्सरम्य प्रतिमा प० ३ १२ सवत्सरस्य प्रतिमा या (एकाष्टकारूपा) त्वा रात्रि यजामहे म० २ २ १८ सवत्सरस्य या पत्नी (एकाष्टकारूपा) सा नो अस्तु सुमङ्गली (अथर्व० ३ १० २) म० २ २ १६ एपा वै सवत्सरस्य पत्नी यदेकाष्टका ता० ५ ६ २ मुख वा एतत् सवत्सरस्य यत्फाल्गुनी पौर्णमासी कौ० ४ ४ ता० ५ ६ ८ गो० उ० ११६ मुख (सवत्सरस्य) उत्तरे फल्गुन्यौ पुच्छ पूर्वे गो० उ० ११६ एपा ह सवत्सरस्य-प्रथमा रात्रिर्यत् फाल्गुनी पौर्णमासी श० ६ २ २ १८ एषा वै प्रथमा रात्रि सवत्सरस्य यदुत्तरे फाल्गुनी तै० ११२६ एपा वै जघन्या रात्रि सवत्सरस्य यत्पूर्वे फाल्गुनी तै० ११२६ किं नु ते मयि (सवत्सरे) इति । अयम्म आत्मा स (आत्मा) मे त्वयि (सवत्सरे) जै० उ० ३ २४ ८ आत्मा वा एप सवत्सरस्य यद् विपुवान् ता० ४ ७ १ आत्मा वै सवत्सरस्य विपुवानङ्गानि पक्षौ=(दक्षिण पक्ष उत्तर पक्षश्च) गो० पू० ४ १८ आत्मा वै सवत्सरस्य विपुवानङ्गानि मासा श० १२ २ ३ ६ अथ ह वा ऽएप महासुपर्ण एव यत् सवत्सर । तस्य यान् पुरस्ताद्विपुवत पण्मासानुपयन्ति सोऽन्यतर पक्षोऽथ यान् पडुपरिष्टात्सो-ऽन्यतर आत्मा विपुवान् श० १२ २ ३ ७ सवत्सरो वै व्रत तस्य वसन्त ऋतुर्मुख ग्रीष्मश्च वर्पाश्च पक्षौ शरन्मध्य हेमन्त पुच्छम् ता० २१ १५ २ तस्य (सवत्सरस्य) वसन्त शिर तै० ३ ११ १० २ वर्पा उत्तर (पक्ष सवत्सरस्य) तै० ३.११ १० ३ वर्पा पुच्छम् (सवत्सरस्य) तै० ३ ११ १० ४. सवत्सरे सवत्सरे वै रेत सिक्त जायते ऐ० ४ १४. सवत्सरे सवत्सरे वै रेत सिक्तिर्जायते कौ० १६ ६. सवत्सरो वै प्रजननम् गो० पू० २ १५ सवत्सर हि प्रजा पशवोऽनुप्रजायन्ते ता० १० १ ६ तस्मादु सवत्सर ऽएव स्त्री वा गौर्वावडवा वा विजायते श० ११ १ ६ २ सवत्सर ऽएव कुमारो व्याजिहीर्पति श० ११ १ ६ ३ तस्मात्सवत्सर-वेलाया प्रजा· (शिशव) वाच प्रवदन्ति श० ७ ४ २ ३८ चक्षुर्वा एतत् सवत्सरस्य यच्चित्रापूर्णमास ता० ५.६ ११ प्रजापतेर्ह वै प्रजा ससृजानस्य पर्वाणि विसस्रसु । स वै सवत्सर एव प्रजापतिस्तस्यैतानि पर्वाण्यहोरात्रयो सन्धी पौर्णमासी चामावास्या चर्त्तुमुखानि श० १ ६ ३ ३५ सवत्सरोऽसि नक्षत्रेपु श्रित । ऋतुना प्रतिष्ठा तै० ३ ११ १ १४ (नक्षत्राणि) सवत्सरस्य प्रतिष्ठा तै० ३ ११ १ १३ तस्मादाहु सवत्सर सर्वे कामा इति श० १० २ ४ १ सवत्सरो वै सर्वस्य शान्ति ता० ६ ८ १३]

संवत्सरीणम् य सवत्सर भृतस्तम् (परमात्मानम्), प्र०='सम्परिपूर्वात् ख च' अ० ५ १ ६२ इति भृतार्थे ख १७ १३ [सवत्सरप्राति० 'सपरिपूर्वात् ख च' अ० ५ १ ६२ सूत्रेण निर्वृत्त अधीष्ट-भृत-भूत-भाव्यादिपु ख । खस्येनादेश]

संवदध्वम् सम्यक् सवाद प्रश्नोत्तर प्रीति ने करो स वि० १८७, १० १६१ २ सङ्गता भूत्वा परस्पर जल्पवितण्डादिविरुद्धवाद विहाय सम्प्रीत्या प्रश्नोत्तरविधानेन सवाद कुरुत ऋ० भू० ६२, १० १६१ २ [सम्+वद व्यक्ताया वाचि (भ्वा०) धातोर्लोट्]

संवननेन सम्यक्तया धर्मकृत्य के सेवन के साथ स० वि० १४३, अथर्व० ३ ३० ७, [सम्+वन सम्भक्तौ (भ्वा०) धातोर्ल्युट् । सवननप्राति० टा]

सवपामि सम्यग् विस्तारयामि १ २१ [सम्+ डुवप बीजसन्ताने (भ्वा०) धातोर्लट्]

संवयन्ती प्रापयन्त्यौ (उपासानक्ता) २० ४१ [सम्+वय गतौ (भ्वा०) धातो शत्रन्तान् ङीप्]

संवयन्ती निर्मिमाना (उपासानक्ता=रात्रिदिने) २ ३ ६ [सम्+वेञ् तन्तु सन्ताने (भ्वा०) धातो शत्रन्तान् ङीप्]

संवरणस्य स्वीकृतस्य (राय =धनस्य) ५ ३३ १० **संवरणात्**=सम्यक् स्वीकरणात् ७ ३ २ सम्यक्तया-ऽऽच्छादनात् १५ ६२ **संवरणेषु**=आच्छादकेपु व्यवहारेपु ४ २१ ६ [सम्+वृञ् वरणे (स्वा०) वृञ् आवरणे (चुरा०) धातोर्ल्युट्]

संवर्चसा सङ्गत्या विद्याध्ययनप्रकाशनेन ३ १६ [सम्-वर्चस्पदयो समास । वर्चम्=वर्च दीप्तौ (भ्वा०)+ असुन्]

संवर्तयन्तः सम्यग् वर्त्तमाना (किरणा) ५ ४८ ३ [सम्+वृतु वर्त्तने (भ्वा०) धातोर्णिजन्ताच्छतृ]

संववृत्वत् सवरणशीलम् (तम) ५ ३१ ३ [सम्+ वृञ् वरणे (स्वा०) वृञ् आवरणे (चुरा०) धातोर्वा छान्दस रूपम्]

सवसाना. सम्यगाच्छादका (स्वसार =अङ्गुलय.) ४ ६ ८ **संवसानौ**=सम्यक् सुवस्त्रालङ्कारेणाच्छादितौ (विवाहितौ स्त्रीपुरुषौ) १२ ५७ [सम्+वस आच्छादने (अदा०) धातो शानच्]

संवाक् विनयपुरस्सरार्थयो सम्यक प्रकाशिनी वाणी, राजनीतिनिष्ठा सम्यग् वाणी, भा०—यस्य वाणी सर्वदा

सत्याऽस्ति स सम्राट् ६ १२ [सम्-वाच्पदयो समासः। वाच्=वच परिभाषणे (अदा०) धातो 'क्विब्वचिप्रच्छ्यायतस्तु०' अ० ३ २ १७८ वा०सूत्रेण क्विप् दीर्घोऽसम्प्रसारणञ्च]

संवाजेभिः श्रेष्ठतया विज्ञानादिगुणैः सङ्ग्रामैर्वा १ ५३ ५ [सम्-वाजपदयो समासे भिस ऐस् न भवति छन्दसि। वाजे सङ्ग्रामनाम निघ० २.१७]

संवाजैः सम्यग् युद्धैरन्नैर्विज्ञानैर्वा १ ४८ १६ [सम्-वाजपदयो समास। वाज अन्ननाम निघ० २ ७ बलनाम निघ० २ ९ वाजे सङ्ग्रामनाम निघ० २ १७]

संवावशन्त सम्यक्तया पुन पुन प्रकाशयन्त (नर =मनुष्या) १ ६२ ३ [सम्+वाशृ शब्दे धातोर्यङ्लुगन्ताच्छतृ। 'बहुल छन्दसीति वक्तव्यम्' अ० ७ ३ ८७ वा०सूत्रेणोपधाया ह्रस्वत्वम्। धातूनामनेकार्थकत्वादत्र प्रकाशनेऽर्थे]

संविक्थाः एकीभावेन चल, अ०—विचल, प्र०—ओविजी भयचलनयो इत्यस्माल्लोटर्थे लट्, लटि मध्यमैकवचने 'बहुल छन्दसि' इति विकरणाभावश्च १ २३ भय कम्पन च कुर्य्या ६ ३५ [सम्+ओविजी भयचलनयो (तुदा०) धातोर्लङ्। अटोऽभावो विकरणस्य लुक् च छन्दसि]

संवित् प्रतिज्ञा १८ ७ [सम्+विद ज्ञाने (अदा०) धातो सम्पदादित्वात् क्विप्]

संविदधातु समाधन विधान करोतु २ २४ [सम्+वि+डुधाञ् धारणपोषणयो (जु०) धातोर्लोट्]

संविदानः प्रतिजानन् (सुमन्तान) १९ ५४. सम्यग् विज्ञान कुर्वन् (विद्वज्जन) ७ ४४ ४ सम्यग् ज्ञाता सन् (सोम =चन्द्रलोक) ऋ० भू० १३८, ऋ० ६ ४ १३ ३ सम्यग् ज्ञापयन् (प्रजापति =परमेश्वर) १२ ६१. **संविदानाः**=सम्यक् कृतप्रतिज्ञा (अ०—विद्वासो जना) १५ १३ सम्यग् विचारशीला (विद्वज्जना) १५ ११. समाननिश्चयाः (विद्वासो जना) १५ १० सम्यग् लब्धज्ञान (विद्वज्जना) १५ १२ [सम्+विद ज्ञाने (अदा०) धातो शानच्। 'समो गमादिषु विदिप्रच्छिस्वरतीनामुपसख्यानम्' अ० १ ३ २९ वा०सूत्रेणात्मनेपदम्]

संविदाना सम्यक् कृतप्रतिज्ञा (निर्ऋति=स्त्री) १२ ६३. **संविदाने**=सम्यग् विज्ञाननिमित्ते, भा०—सविदितक्रिये (धनुर्ज्ये) २९ ४१ प्रतिज्ञापालिके (योषा=पत्न्यौ) ६ ७५ ४ सम्यग् विज्ञापिके (उषासा=प्रात. साय- वेले) २६ ६ [सविदान इति व्याख्यातम्। तत स्त्रिया टाप]

संविदुः सम्यक्तया जानन्ति ५ ४४.११. **संविद्युः**= एकीभावेन विदन्ति, प्र०—अत्र लडर्थे लिट् १ ७३.७४ **संविदाम्**=सम्यक्तया विदन्ताम्, प्र०—विद ज्ञाने इत्यस्माल्लोटि प्रथमबहुवचने 'लोपस्त आत्मनेपदेषु' अ० ७ १.४१. अनेन तकारलोपे सवर्णदीर्घे विसर्गाभाव रूपम् ६.३९ **संविदेय**—एकीभावेन विन्देय ४ २३ [सम्+विद ज्ञाने (अदा०) धातोर्लेटि 'विदो लटो वा' इति सूत्रेण निपातेन णलादय आदेशा। अन्यत्र लिट्। 'सविदाम्' प्रयोगे विद ज्ञाने (अदा०) धातो सम्पूर्वकात् लोटि 'समो गमादिषु विदिप्रच्छिस्वरतीनामुपसख्यानम्' इत्यात्मनेपदे 'लोपस्त आत्मनेपदेषु' इति तलोपे रूपम्। सविदेय=सम्+विद्लृ लाभे (तुदा०) धातोर्लिट्। नुमभावश्छान्दस]

संविविक्तः सम्यक् पृथक् कुर्वन् (परमेश्वरस्य) ३ ५४ ८ [सम्+वि+विजिर् पृथग्भावे (जु०) धातो क्त.]

संविव्यानः सम्यग् व्याप्नुवन् (राजा) ५ २९ ४. सम्यक् प्राप्नुवन् (इन्द्र =विद्वज्जन) १.१३० ४ [सम्+व्येञ् सवरणे (भ्वा०) धातो शानच्। सप. श्लुश्च छान्दस]

संविव्ये सवृणोति १.१७३ ६ **संविव्ययुः**=सन्तनुत वेष्टयतम् ६ ७२ ५ [सम्+व्येञ् सवरणे (भ्वा०) धातोर्लिट्]

संविशस्व एकीभावेन विशस्व १४ ३ [सम्+विश प्रवेशने (तुदा०) धातोर्लोट्। व्यत्ययेनात्मनेपदम्]

संविश्वतुरा सम्यक्तया यद् विश्व सर्व तुरति त्वरयति तेन (गवा) १ ४८ १६. [विश्वोपपदे तुर त्वरणे (जु०) धातो कर्त्तरि क्विप्। तत सम्पदेन समास। ततष्टा प्रत्यय]

संवृक् य सवृक्ते स (विद्वज्जन) ३८ २८ य सम्यग् वर्जयति स (इन्द्र =सूर्यलोक) २ १२ ३ [सम्+वृजी वर्जने (अदा०) धातो कर्त्तरि क्विप्]

संवेशपतये सम्यग् विशन्ति ये ते पृथिव्यादय पदार्थास्तेषा पति पालकस्तस्मै (अग्नये=परमेश्वायर भौतिकाय वा) २.२०. [सवेश-पतिपदयो समास.। सवेश =सम् विश प्रवेशने (तुदा०) धातो कर्त्तरि 'कर्मण्यण्' इत्यण्]

संव्रता सत्यभाषणादीनि १२ ५८ [सम्+व्रतपदयो समासे शेर्लोपश्छन्दसि]

संशराय सम्यग्घिसनाय ३० १७ [सम्+शॄ हिंसायाम् (क्र्या०) धातो 'ऋदोरवि' ल्यप्]

संशाय सम्यक् सूक्ष्मवलान् कृत्वा १८ ७१ [सम्+शो तनूकरणे (दिवा०) धातो क्त्वा]

संशितम् सम्यक् तीक्ष्णवुद्धिस्वभावम् (राजानम्) २७ ८ प्रशसनीयम् (ब्रह्म=वेदविज्ञानम्) ११ ८१ **संशितः**=सम्यक् सूक्ष्मीकृत (रथ) २३ १४ स्तुत (हय=अश्व) २३ १४ [सम्+शो तनूकरणे (दिवा०) धातो क्त । 'शाच्छोरन्यतरस्याम्' अ० ७ ४ ४१ सूत्रेणेकारान्तादेश]

संशिशातु सम्यक्तया क्षयतु, प्र०—अत्र शो तनूकरणे इत्यस्मात् श्यन 'वहुल छन्दसि' श्लु, तत 'श्लौ' इति द्वित्वम् १ १११ ५ **संशिशीतम्**=सम्यक् तीक्ष्णीकुर्याताम् २ ३९ ७ **संशिशीमहि**=शत्रून् सूक्ष्मान् जीर्णान् कुर्म, प्र०—अत्र शो तनूकरणे इत्यस्माल्लटि श्यन स्थाने व्यत्ययेन श्लु 'छन्दस्युभयथा' इति श्लोरार्धधातुकत्वादाकारादेश १ १०२ १० **संश्यत्**=सम्यक् तनूकरोति ११३० ४ [सम्+शो तनूकरणे (दिवा०) धातोर्लोट् । 'वहुल छन्दसीति' श्लु । 'वहुल छन्दसि' अ० ७ ४ ७८ सूत्रेणाभ्यासस्येत्वम् । सशिशीतम् प्रयोगे 'छन्दस्युभयथे' त्यार्धधातुकसञ्ज्ञाया धातोराकारादेशे 'ई हल्यघो' अ० ६ ४ ११३ सूत्रेण हलादौ सार्वधातुके क्ङिति आत ईकारादेश । सशिशीमहि प्रयोगे लटि शप श्लौ व्यत्ययेनात्मनेपदम् । 'छन्दस्युभयथा' इत्यार्धधातुकत्वादात्वम् । सार्वधातुकत्वाच्चेत्वम् । सश्यत् प्रयोगे लङ् । 'ओत श्यनि' इत्याकारलोप । अडभावश्छान्दस]

संशिशाधि सम्यक् शिक्षस्व, भा०—एतान् दुर्व्यसनेभ्यो निवर्तयेत् सुशीलान् सम्पादयेत् २७ ८ सम्यक्तया शिक्षय ६ १५ ९ [सम्+शासु अनुशिष्टौ (अदा०) धातोर्लोट् । 'वहुल छन्दसी' ति शप श्लु । अभ्यासस्येत्वम् 'वहुल छन्दसि' अ० ७ ४ ७८ सूत्रेण]

संसत् सम्राट्-सभा ४ १ ८ **संसदः**=सम्यक् सीदन्ति यासु ता (सभा) २९ १ **संसदि**=ससीदन्ति विद्वासो यस्या तस्या सभायाम् १ ९४ १ [सम्+षदलृ विशरणगत्यवसादनेषु (भ्वा०) धातोरधिकरणे क्विप् सम्पदादित्वात्]

संसनिष्यदत् सम्यक्तयाऽतिशयेन प्रस्रवन् (दधिक्रा=अश्व), प्र०—अत्र स्यन्दू-धातोर्यङ्लुक् शतृप्रत्यये ऽभ्यासस्य निक् निपात्यते ९ १४ [सम्+स्यन्दू प्रस्रवणे (भ्वा०) धातोर्यङ्लुगन्तान्छतरि 'दार्धर्त्तिदर्धर्त्ति०' अ० ७ ४ ६५ सूत्रेणाभ्यासस्य निगागमो धातो सकारस्य षत्वञ्च निपात्यते]

संसन्नः सम्यक् गच्छन् प्राप्नुवन् (प्रजापति=जीव) ३९ ५. [सम्+षद्लृ विशरण गत्यवसादनेषु (भ्वा०) धातो क्त]

संसमायुवसे सम्यक्तया मिश्रय, प्र०—अत्र विकरणाऽऽत्मनेपदव्यत्यय १५ ३० [सम्+आङ्+यु मिश्रणेऽमिश्रणे च (अदा०) धातोर्लट् । व्यत्ययेनात्मनेपद शप्रत्ययश्च । समित्यस्य द्वित्वम् 'प्रसमुपोद पादपूरणे' अ० ८ १ ६ सूत्रेण]

संसमेतु एकीभावेन प्राप्नोतु, प्र०—अत्र 'प्रसमुपोद पादपूरणे' अ० ८ १ ६ इत्यनेन समित्यस्य द्वित्वम् ६ २० [सम्+इण् गतौ (अदा०) धातोर्लोट् । समित्यस्य द्वित्वम्]

संसर्पाय य सम्यक् सर्पति गच्छति तस्मै (गुप्तचराय) २२ ३० **संसर्पेण**=सम्यक् प्रापणेन १५ ७ [सम्+सृप्लृ गतौ (भ्वा०) धातो पचाद्यच् कर्त्तरि अन्यत्र घञ्]

संसहस्रम् सम्यक् सहस्रम् (वच=वचनम्) ७ ८.६ [सम्+सहस्रपदयो समास]

संसादि सम्पाद्यते २ ११ ८ [सम्+साध ससिद्धौ (स्वा०) धातो कर्मणि लुङ् । अडभावश्छान्दस । धस्य दकारश्छान्दस]

ससिसिचे ससिञ्चति ३ ३२ १५ [सम्+षिच क्षरणे (तुदा०) धातोर्लिट् । व्यत्ययेनात्मनेपदम्]

संसीदस्व सम्यगास्व ३८ १७ [सम्+षद्लृ विशरणगत्यवसादनेषु (भ्वा०) धातोर्लोट् । शित्प्रत्यये धातो सीदादेश]

संसृक्षाथाम् ससर्ग कुरुतम् १९ ७ **संसृज**=सम्यग् योजय १७ ५० सम्यग् युङ्ग्धि १७ ५१ अ०—सयुनक्ति, प्र०—अत्र व्यत्ययो लडर्थे लोट् च १ २३ २४ एकीभावेन सम्यक् सृजति १ २३ २३ **संसृजामि**=एकीभावेन सम्बध्नामि १८ ३५ सम्यक् निष्पादयामि १९ १ **संसृजेथाम्**=सम्यङ् निष्पादयेतम् १५ ५४ अच्छे प्रकार उत्पन्न करो स० वि० १३६, अथर्व० १४ २ ३७ [सम्+सृज विसर्गे (तुदा०) धातोर्लोट् । विकरणव्यत्ययेन श्न । आत्मनेपद च व्यत्ययेन । अन्यत्र लोट् लेट् च]

संसृज्य ससर्गीभूत्वा १२ ३८ समुत्पाद्य ११ ५४ [सम्+सृज विसर्गे (तुदा०) धातो. क्त्वा । समासे क्त्वो ल्यप्]

संसृष्टजित् य समृष्टान् मिलितान्छत्रून जयति स (इन्द्र =सर्वसेनाधिपति) १७ ३५ [समृष्टोपपदे जि जये (भ्वा०) धातो क्विप् । समृष्ट =सम्+सृज विसर्गे (तुदा०) धातो क्त]

संसृष्टान् सम्यग्गुणयुक्तान् (पदार्थान्) २४ १६ [सम्+सृज विसर्गे (तुदा०) धातो क्त]

संसृष्टाम् सम्यग् सुशिक्षया निष्पादिताम् (कन्याम्) ११ ५५ [सम्+सृज विसर्गे (तुदा०) धातो क्तान्ताट् टाप्]

संस्कृतत्रम् य सम्कृत त्रायते रक्षति तम् (विद्वज्जनम्) ६ २८ ४ [सस्कृतोपपदे त्रैङ् पालने (दिवा०) धातोर्ड]

संस्कृतम् कृतसस्कारम् (पदार्थम्) ५ ७६.२ शिल्पविद्यासस्कारयुक्त) सर्वर्त्तुकम् (उत्तमयानम्) ४ ३४. [सम्+डुकृञ् करणे (तना०) धातो क्त । 'सपर्युपेभ्य करोतौ भूषणे' इति कात्पूर्व सुट्]

संस्कृतिः विद्यासुशिक्षाजनिता नीति ७ १४ [सम्+डुकृञ् करणे (तना०) धातो स्त्रिया क्तिन् । कात् पूर्व सुडागम]

संस्तिरः सम्यगाच्छादक (विद्वज्जन) १ १४० ७. [सम्+स्तृञ् आच्छादने (क्र्या०) धातोर्मूलविभुजादित्वात् कर्त्तरि क]

संस्तुतेन सङ्गत्या प्रशसितेन (वर्चसा=विद्याध्ययनप्रकाशनेन) ३ १६ [सम्+ष्टुञ् स्तुतौ (अदा०) धातो क्त]

संस्तुप् सम्यक् स्तुम्नाति शब्दार्थसम्बन्धान् यया सा वाक् १५ ५ [सम्+स्तुम्भु (सौत्रो धातु) धातो क्विप्]

संस्थाम् सम्यक् तिष्ठन्ति यस्या ताम् (सभाम्) १६ २६ [सम्+ष्ठा गतिनिवृत्ती (भ्वा०) धातोर्घञर्थे क । तत स्त्रिया टाप् । यास्सप्त सस्था या एवैतास्सप्त होत्रा प्राचीर्वषट् कुर्वन्ति ता एव ता जै० उ० १ २१ ४]

संस्थे सम्यक् तिष्ठन्ति यस्मिँस्तस्मिन् राज्ये ५ ३ ८ जगति, प्र०—अत्र 'घञर्थे कविधानम्०' अ० ३ ३ ५८ इति वार्तिकेनाधिकरणे क प्रत्यय. १ ५ ४ [सम्+ष्ठा गतिनिवृत्ती (भ्वा०) धातोर्घञर्थे क]

संस्पृशः य सस्पृशति तस्मात् (दिव =प्रकाशाद्विद्युत) ३७ १३ सम्यक् स्पर्शात् ३७ ११ [सम्+स्पृश सम्पर्शने (तुदा०) धातो क्विप्]

संस्मयमाना सम्यङ् मन्दहासयुक्ता (उषा इव युवति.) १.१२३ १० [सम्+ष्मिङ् ईषद्धसने (भ्वा०) धातोर्णिजन्ताच्छानच् । तत स्त्रिया टाप्]

संस्रवभागाः सम्यक् स्रूयन्ते ये ते सस्रवा, भज्यन्ते ये ते भागा, सस्रवा भागा येषान्ते (देवा =विद्वासो दिव्या पदार्था वा) २ १८ [सस्रव-भागपदयो समास । सस्रव =सम्+स्रु गतौ (भ्वा०) धातो 'ऋदोरप्' ल्यप् । भाग =भज सेवायाम् (भ्वा०) धातोर्घञ् । सस्रवभागा वसवो वै रुद्रा आदित्या सस्रावभागा तै० ३ ३.६ ७]

संस्रष्टा श्रेष्ठाना सनुष्याणा शस्त्रास्त्राणा वा सगर्गस्य कर्त्ता (इन्द्र =सेनापति) १७ ३५. [सम्+सृज विसर्गे (तुदा०) धातो कर्त्तरि तृन् । 'सृजिदृशोर्झल्यमकिती' ति सूत्रेणामागमे यणादेश]

संहतः एकीभूता (धेनव.=गाव) ३ १ ७. [सम्+हन हिंसागत्यो (अदा०) धातो क्त]

संहन्मः सहितानि निमीलितान्यादर्शकानि कुर्म ७ ५५ ६ [सम्+हन हिंसागत्यो (अदा०) धातोर्लट्]

संहंसि एकीभावेन नाशयसि १.५३.७. [सम्+हन हिंसागत्यो (अदा०) धातोर्लट्]

संहानाय सहन्यते यस्मिँस्तस्मै (सग्रामाय) २२ ७ [सम्+हन हिंसागत्यो (अदा०) धातोर्घञ्]

संहाय सम्यक् त्यक्त्वा २ ३८ ४. [सम्+ओहाक् त्यागे (जु०) धातो क्त्वा । तत समासे क्त्वो ल्यप्]

संहितम् कृतसाधनम् (अ०—जगत्) १.१६८ ६ [सम्+डुधाञ् धारणपोषणयो (जु०) धातो क्त । 'दधातेर्हिरि' ति हिरादेश]

संहितः दृढाङ्ग (पशु) २६ ५८ सर्वैर्भूतैर्द्रव्यैः सत्पुरुषैर्वा सह मिलित (सूर्य.=सविता) १८.३६. [सम्+हि गतौ वृद्धौ च (स्वा०) धातो क्त । (यजु० १८ ३६) असौ वा आदित्य सहित एष अहोरात्रे सदधाति श० ७ ४ १.८ सहिनाम् (साम) तद्देवा सहितेन समदधुर्यत् समदधुस्तस्मात् सहिनम् ता० ८ ४ ६. सहित भवति द्व्यक्षरनिधन प्रतिष्ठायै प्रतिष्ठायै व सत्रमासते ता० ११.५ ४. सहित भवति द्व्यक्षरणिधन प्रतिष्ठायै ता० १५.११ ३]

सँहिता सर्वपदार्थै सह वर्त्तमाना विद्युत्, सर्वव्यापक ईश्वरो वा ३ २२ [सहितमिति व्याख्यातम् । ततष्टाप् स्त्रियाम् । पर सन्निकर्ष सहिता । पदप्रकृति सहिता नि० १ १७]

सँहिनोमि सम्यक्तया वर्धयामि १ ६१ ४ [सम्+हि गतौ वृद्धौ च (स्वा०) धातोर्लट्]

१६ ४८ [अभयोपपदे षरण सभक्तौ (भ्वा०) धातोर्बाहुलकात् करणे 'इ' प्रत्यय]

अभरत् धारयति ऋ० भू० २३८, ११ ५ १६ धरेत् ४ २६ ७ भरति १ १६१ १० बिभर्ति २० ५६ **अभरन्**=धरन्ति पुष्णन्ति वा ४ ३३ ४ **अभरिष्यत्**=भरति २ ३० २ [भृञ् भरणे (भ्वा०) धातोर्लङि लृङि च रूपाणि । अभरत् अहरत् निघ० ७ २६]

अभवत् भवेत् १ ११२ ४ भवति, भा०—उत्पादयति ३१ ४ होवे स० वि० १३७, अथर्व० १४ १ ६ **अभवत**=भवन्ति ४ ३५ ८ **अभवतम्**=भवेतम् १ ११७ १४ **अभवन्**=भवन्तु ४ १७ ६ भवेयु ३ ३५ ६ **अभवम्**=अस्मि ४ २६ १ **अभवः**=भूया भवति वा, प्र०—अत्र पक्षे व्यत्यय, लिड्लटोरर्थे लङ् च १ ४ ८ भवति १ ७२ ७ भव ३ १ १७ भवसि १ ६१ २ प्रसिद्धो भवसि २ १३ १० भवे ४ १७ ६ भवति प्र०—अत्र वर्त्तमाने लङ्—व्यत्यय १ ३२ १२ [भू सत्तायाम् (भ्वा०) धातो सामान्ये लङ्]

अभासि समन्तात् प्रकाशयति १ ४६ ४ [भा दीप्तौ (अदा०) धातो सामान्ये लङ् 'इतश्चे' ति लोपो न भवति छान्दसत्वात्]

अभाः पुष्णाति धरति वा, भा०—पालयति, रक्षति १२ ६१ [डुभृञ् धारणपोषणयो । (जु०) धातोर्लङि मध्यमैकवचने रूपम् । सिचो लुक् छान्दस]

अभार्ष्टाम् दहताम् २८ १७ [भ्रस्ज पाके (तुदा०) धातोर्लुङि प्रथमद्विवचने रूपम्]

अभि अभित ३ ४० आभिमुख्यार्थे १ ११ २ सर्वतो भावे प्र०—अभीत्याभिमुख्य प्राह निरु० १ ३, १ ११ ८. सर्वत ३३ ६ अभिलक्ष्य १ १६२ ११ [अभीत्याभिमुख्यम् निघ० १ ३]

अभिऽआयंसेन्या आभिमुख्यतया समन्तात् यम्येते गृह्येते यौ तौ (अश्विना=शिल्पिनौ) प्र०—अत्र सुपा सुलुगित्याकारादेश अभ्याङ् पूर्वाद् यमधातोर्बाहुलकादौणादिक सेन्य प्रत्यय १ ३४ १ [अभि+आङ्+यमु उपरमे (भ्वा०) धातोरौणादिक सेन्य 'सुपा सुलुग्' इति डादेश]

अभिऽआवर्ती यो विजेतुमभ्यावर्त्तते स (अग्नि=राजा) ६ २७ ८ **अभिऽआवर्तिने**=अभ्यावर्त्तितु शील यस्य तस्मै (उपदेशकाय) ६ २७ ५ [अभि+आङ्+वृतु वर्त्तने (भ्वा०) धातोस्ताच्छील्ये णिनि प्रत्यय]

अभीतिम् अभयम् ७ २१ ६ [ञिभी भये (जु०) धातो क्तिन् । नञ्समास]

अभिऽइती: अभित सर्वत इत्या प्राप्त्या २ ३३ ३ [अभि+इण् गतौ (अदा०) धातो क्तिन्]

अभिऽइत्य अभित प्राप्य ४ ३२ १० [अभि+इण् गतौ (अदा०) धातो क्त्वा । क्त्वो ल्यप्]

अभिऽइद्धः सर्वत प्रदीप्त (घर्म) १ १६४ २६ [अभि+ञिइन्धी दीप्तौ धातो क्त]

अभिऽउदेत्य प्राप्य अथर्व० १५ ११ २ [अभि+उत्+इण् गतौ (अदा०) धातो क्त्वा क्त्वो ल्यप्]

अभिऽउप्य अभितो वपन कृत्वा २ १५ ६ [अभि+टुवप् बीजसन्ताने (भ्वा०) धातो क्त्वा । क्त्वो ल्यप् यजादित्वात् सम्प्रसारणम्]

अभिऽऊर्ण्वाना आभिमुख्येनार्थानाच्छादयन्ती (उर्वशी=वृद्धि) ५ ४१.१६ [अभि+ऊर्णुञ् आच्छादने (अदा०) धातो शानच् । स्त्रिया टाप्]

अभिकल्पमानाः आभिमुख्येन समर्थयन्त (देवा=दिव्यगुणा) १४ २७ सम्पादयन्त (अग्नय=पावका) १५ ५७ अभित सुखाय समर्थयन्त (देवा.) १४ १५ [अभि+कृपु सामर्थ्ये (भ्वा०) धातो शानच्]

अभिक्रतूनाम् आभिमुख्येन क्रतु=कर्म येषान्तेषा बलीयसा शत्रूणाम् ३ ३४ १० [अभि+क्रतुपदयोर्बहुव्रीहि क्रतु कर्म नाम । निघ० २ १ प्रज्ञानाम । निघ० ३ ६]

अभिक्रन् पूर्णं कुर्वन् (वैश्वानर=परमेश्वर), प्र०—अत्र 'वाच्छन्दसि' इति विकरणाऽभाव ७ ५ ७ [अभि+डुकृञ् करणे (तना०) धातो शतृ । छन्दसि विकरणाऽभावे यणादेशे रूपम्]

अभिक्रन्द आभिमुख्येन क्रन्दति, प्र०—अत्र व्यत्यय ५ ८३ ७ [अभि+क्रदि आह्वाने रोदने च (भ्वा०) धातोर्लोट् । अथवा क्रन्दसातत्ये (चुरा०) धातो रूपम्]

अभिक्रमाम अभिमुखमनुक्रमेण प्राप्नुयाम ६ ४६ १५ [अभि+क्रमु पादविक्षेपे (भ्वा०) धातोर्लट् 'क्रम परस्मैपदेपु' इति दीर्घत्व न, छन्दसि सर्वविधीना विकल्पनात्]

अभिक्रम्य सर्वत उल्लङ्घ्य १ ८० ५ [अभि+क्रमु पादविक्षेपे (भ्वा०) धातो क्त्वा । क्त्वो ल्यप् समासे]

अभिक्रोशकम् योऽभित क्रोशति आह्वयति तम् (जनम्) ३० २० [अभि+क्रुश आह्वाने रोदने च (भ्वा०) धातो कर्त्तरि ण्वुल् वो. स्थानेऽकादेश]

अभिक्षत्तारः आभिमुख्येन योगस्य कर्त्तार (देवा=विद्वज्जना) २ २६ ३ **अभिक्षत्तः**=अभित. क्षयकर्त्तु-

साधत=साध्नुवन्तु ५ ४५ ३ **साधति**=साध्नोति, प्र०—विकरणव्यत्ययेनात्र श्नो स्थाने शप् १ ९४ २ **साधथः**=साध्नुत, प्र०—अत्र व्यत्यय ४ ५६ ७ **साधन्**=साध्नुवन्ति साधयन्ति वा १ ९६ १ **साधन्ताम्**= साध्नुवन्तु ६ ५३ ४ [साध ससिद्धौ (स्वा०) धातोर्लोट्। विकरणव्यत्ययेन श शप् वा। अन्यत्र लेट्, लट्, लड्, लोट् च]

साधदिष्टिभिः साधा ससिद्धा दिष्टयश्च ताभिः (व्यवहारविद्याभि) ३ ३ ६ [साध-दिष्टिपदयो समास। साध=साध ससिद्धौ (स्वा०) धातोर्घञ्। दिष्टि=दिश अतिसर्जने (तुदा०) धातो स्त्रिया क्तिन्। सज्ञाया क्तिज् वा]

साधदिष्टिम् साध्नुवन्तीष्ट येन तम् (अग्नि=पावकम्) ३ २ ५ [साधद्-इष्टिपदयो समास। साधत्= साध ससिद्धौ (स्वा०) धातो शतरि व्यत्ययेन शप्। इष्टि=इषु इच्छायाम् (तुदा०) धातो क्तिन्]

साधन् ससाध्नुवन् (विद्वज्जन) प्र०—अत्र व्यत्ययेन शप् ३ १ १७ [साध ससिद्धौ (स्वा०) धातो शतृ। विकरणव्यत्ययेन शप्]

साधनम् साध्नोति येन तत् (विद्वज्जनम्) १ ४४ ११ सिद्धिकरम् (अग्नि=पावकम्) ३ २७.२ **साधनः**= य साध्नोति स (वाजी=वेगयुक्तोऽग्नि) ३ २७ ८ [साध ससिद्धौ (स्वा०) धातो करणे ल्युट्। कर्त्तरि वा ल्युट् 'कृत्यल्युटो वहुलम्' इति सूत्रेण। साधधातोर्वा ण्यन्तान् नन्द्यादित्वाल् ल्यु]

साधन्ता सम्यक् साधयन्तौ (मित्रावरुणा=सूर्यवायू) १ २ ७ [साध ससिद्धौ (स्वा०) धातो शत्रन्ताद् द्विवचन-स्याकारादेश। व्यत्ययेन शप्]

साधयन्ती विद्याशिक्षाभ्यामन्यान् विदुष कारयन्ती (अध्यापिका स्त्री) २ ३ ८ [साध ससिद्धौ (स्वा०) धातो-र्णिजन्ताच्छत्रन्ताच्च स्त्रिया ङीप्]

साधवः अभीष्ट साध्नुवन्त (अश्वास=तुरङ्गा) १३ ३६ साधुगतय (अश्वास=वेगादयो गुणा) ६ १६.४३ **साधवे**=परोपकार-साधकाय, भा०—साधुत्वयुक्ताय (विद्वज्जनाय) ३७ १० **साधुना**=सुशिक्षितेन (शिष्येण) १ १५५ १ **साधुभिः**=सज्जनै सह १ १३८ ४ **साधुः**= सत्कर्मसेवी (इन्द्र=योगैश्वर्ययुक्तो जन) ७ ३७ ४ परोप-कारी सन्मार्ग-स्थितो विद्वान् (जन) १ ७७ ३ य परोप-कारी परकार्याणि साध्नोति स (सभाध्यक्ष) १ ७०.६ सत्यमानी, सत्यवादी, सत्यकारी (विद्वज्जन) १ ६७ १ श्रेष्ठ (क्षय=निवास) ५ १२ ६ साध्नुवन्ति धर्म यस्मिन् स (पन्था=वेदोक्तो मार्ग.) २ २७ ६. **साधू**=शुभ-चरित्रस्थौ (विद्वासौ स्त्रीपुरुषौ) २ २७ १५ **साधोः**= सन्मार्गस्थस्य (सज्जनस्य) ४ १०.२. [साध ससिद्धौ (स्वा०) धातो 'कृवापाजिमि०' उ० १ १ सूत्रेण उण्। साधु साधयिता नि० ६ ३३ साधु (यजु० ३७ १०.) अय वै साधुर्योऽय (वायु) पवनऽएष हीमाँल्लोकान्त्सिद्धोऽनुपवते श० १४ १ २.२३]

साधारणः सामान्येन व्याप्त (इन्द्र=परमेश्वर) ४.३२ १३. [सह धारणपदयो समासे सधारण। तत. स्वार्थेऽणि साधारण]

साधारण्येव यथा साधारण्या (क्रियया) १ १६७ ४ [साधारण्या-इवपदयो समास]

साधपतिकेभ्यः अधिपतिना जीवेन सह वर्त्तमानेभ्य. (प्राणेभ्य) ३९ १ [सह-अधिपतिपदयो समासे सहस्य सादेशे समासान्त कप्]

साधिष्ठः अतिशयेन साधु (क्रतु=प्रज्ञा) ५ ३५ १ [साधुप्राति० अतिशायन इष्ठन्]

साधिष्ठेभिः अधिष्ठोऽधिष्ठानम्, समानमधिष्ठान येषान्तै (पथिभि) १ ५८ १ [समान-अधिष्ठपदयो समासे समानस्य सादेशे भिस ऐसादेशो न भवति 'बहुल छन्दसि' सूत्रेण]

साधु श्रेष्ठम् (आचरणम्) २ २७ ३ समीचीनतया ७ ४३ २ उत्तम विज्ञानम् ५ ८० ४ सम्यक् यथा स्यात्तथा १ १२४ ३ [साधुरिति व्याख्यातम्]

साधु साधूनि (अपासि=कर्माणि) २ ३ ६ [साधु-रिति व्याख्यातम्। ततो जस शे 'सुपा सुलुक्०' सूत्रेण लुक्]

साधुकर्मा धर्म्यकर्माऽनुष्ठाता (सर्वाधिपती राजा) १७ २३ साधूनि श्रेष्ठानि कर्माणि यस्य स (सभापति) ८ ४५ [साधु-कर्मन्पदयो समास]

साधुया साधुना कर्मणा १ १७० १ श्रेष्ठै कर्मभि १७ ७३ साधु सत्यम् (विद्याप्रकाशम्) २३ ४३ साधव (नर=नायका जना) ५ ११ ४ साधुना धर्मेण सह १४ १ [साधुप्राति० 'सुपा सुलुक्०' सूत्रेण याच्]

साध्यान् साद्धु योग्यान् (पदार्थान्) ३९ ९ **साध्याः**=साधनसाध्या (देवा=विद्वासो जना) २९ ११ कृतसाधना (देवा) ३१ १६ साधन योगाभ्यासादिक

सेदिम् हिंसाम्, प्र०—'सेदिमनि०' अ० ३ २ १७१ इति वार्त्तिकेनास्य सिद्धि १२ १०५ नाशमुत्पत्तिर्वा २० २६, [पद्लृ विशरणगत्यवसादनेषु (भ्वा०) धातो 'किकिनावुत्सर्गश्छन्दसि' अ० ३ २ १७१ वा०सूत्रेण कि: प्रत्ययो लिड्वच्च]

सेदुषः ज्ञानवत (मनुष्यान्) ५ १५ २ [पद्लृ विशरणगत्यवसादनेषु (भ्वा०) धातोर्लिट क्वसु]

सेध शास्त्राणि शिक्षय १ १७ साध्नुहि ६ ४४ ६ अपनय ६ ४७ २६ दूरीकुरु २६ ५५ **सेधतम्**=गमयतम् ३४ ४७ मङ्गल सुख प्राप्नुतम् १ ३४ ११ दूरीकृतम् १ १५७ ४ **सेधति**=दूरीकरोति १ ७६ १२ साधयति ७ १५ १० **सेधन्ति** =निवर्त्तयन्तु १.१०५ ११ [षिधू शास्त्रे माङ्गल्ये च (भ्वा०) धातोर्लोट् । अन्यत्र लट् चापि]

सेनजित् य सेनया जयति स (सेनापति), प्र०—अत्र 'सञ्ज्ञाछन्दसोर्बहुलम्' इति ह्रस्वत्वञ्च १५ १६. य सेना जयति सः (गण =गणनीयो विद्वज्जन) १७ ८३ [सेनोपपदे जि जये (भ्वा०) धातो कर्त्तरि क्विप् । पूर्वपदस्य ह्रस्वत्व छान्दसम् । सेनेति व्याख्यास्यते । सेनजित्—(यजु० १५ १६) तस्य (पर्जन्यस्य) सेनजिच्च, सुषेणश्च सेनानीग्रामण्याविति हेमन्तिकौ तावृतू श० ८ ६ १ २०]

सेना इव यथा सुशिक्षिता वीरपुरुषाणा विजयकर्त्री सेनास्ति तथाभूत (सेनेश) १.६६ ४ [सेना-इव-पदयो समास । सेनेति व्याख्यास्यते]

सेनाजुवा वेगेन सेना गमयितारौ (अश्विनौ=जलाग्नी) १ ११६ १ [सेनोपपदे जु वेगिताया गतौ (सौत्रो धातु) धातो 'भ्राजभासधुर्विद्युतोर्जि०' अ० ३ २.१७७ सूत्रेण क्विप् धातोर्दीर्घश्च]

सेनानिभ्यः ये सेना नयन्ति तेभ्यो नायकेभ्य प्रधानपुरुषेभ्य, प्र०—अत्र वर्णव्यत्ययेन ईकारस्य इकार १६ २६ **सेनानीः**=य सेना नयति स (सेनाधिप प्रभु) ७ २० ५ **सेनान्ये**=य सेना शिक्षा प्रापयति तस्मै (सेनापतये) १६ १७ [सेनोपपदे णीञ् प्रापणे (भ्वा०) धातो कर्त्तरि 'सत्सूद्विषद्रुह०' अ० ३ २ ६१ सूत्रेण क्विप्]

सेनानीग्रामण्यो सेनानीश्च ग्रामणीश्च ताविव १५ १५ एतद्वद्वर्त्तमानौ मार्गशीर्षपौषौ मासौ १५ १६ [सेनानी-ग्रामणीपदयो समास]

सेनाभ्यः सिन्वन्ते वध्नन्ति शत्रून् याभिस्ताभ्य १६.२६. **सेनाः**=सिन्वन्ति वध्नन्ति शत्रून् याभिस्ता १७ ३३. बलानि २ ३३ ११ [षिञ् बन्धने (क्र्या०) धातो. 'कृवृजृसिद्रू०' उ० ३.१०. सूत्रेण न । तत स्त्रिया टाप् । अथवा सह इनपदयो. समास । सेना-सेना सेश्वरा समानगतिर्वा नि० २ ११ सेना-सेनेन्द्रस्य पत्नी । गो० उ० २ ६]

सेन्यः सेनासु साधु सेनाभ्यो हितो वा (सेनापति) १ ८१ २ [सेनेति व्याख्यातम् । तत साध्वर्थे हितार्थे वा यत्]

सेपुः शपथ कुर्यु ६ २६ १ [शप आक्रोशे (भ्वा०) धातोर्लिट् । शकारस्य सकारो वर्णव्यत्ययेन । षप समवाये (भ्वा०) धातोर्वा लिट्]

सैर्या तडागादितटेषु भवास्तृणविशेषस्था (मौञ्जा=मुञ्जपादपस्था जीवा) १ १६१ ३

सैलगम् सीलाङ्गस्य दुष्टस्याऽपत्यम् ३० १८

अश्वम् तुरङ्गम् ६ ४६ २ विद्युदाख्यमग्निम् १ ११७ ९ विद्युतम् १ ११७ ४ व्याप्तु शील (मेघम्) १३ ४२ शुक्लवर्ण वाष्पाख्यम् ऋ० भू० १९३ तुरङ्गादिकम् १२ ७८ व्यापनशील विद्युतम् १ ११८ ९ व्यापकत्ववेगादि-गुणसमूहम् ९ ७ अध्वव्यापिनमग्निम् १ ११६ ६ तुरङ्ग-मिवाशुगामिनीम् (विद्युतम्) ३ ५३ ११ अश्ववत् शीघ्र गमयितारम् (अग्निम्) १ १६२ १५ आशु सुखकर बोधम् ४ ३९ ५ आशुगामिनम् (वायुम्) २९ १३ वेगवन्तम् (अश्वम्) २५ ३७ वेगवन्तम् (पदार्थम्) १ १६१ ७ महान्तम् (भा०—शरीरात्मनोर्महद् वलम्) २२ ४ **अश्वस्य**=आशुगमकस्य द्रव्यस्य १ ११६ १२ महान् गृहस्थाश्रम के स० वि० १०५, २ ३५ ६ व्याप्तिकारका-ऽन्यादेस्तुरङ्गस्य वा १ ५३ २ महतो व्याप्तिविद्यस्य (उषस =प्रभातस्य) ४ ३९ ३ महत (मेघस्य) प्र० — अश्व इति महन्नाम निघ० ३ ३, ५ ८३ ६ सकलशुभगुण-व्याप्तस्य (राज्ञ) ४ ३९ ६ वह्न्यादे ३७ ९ तुरङ्गस्य २५ ४२ वलेन युक्तस्य जनस्य २३ ६२ वलवत, भा०— वलिनो जनस्य २३ ६१ वीर्यप्रदातुर्महत. (विद्वज्जनस्य) २.३५.६ तुरङ्गस्येवाग्निगृहस्य १ ११६ ७ व्याप्तुमर्हस्य

अश्नुहि=व्याप्नुहि, प्र०—अत्र व्यत्ययेन परस्मैपदम् १ ५४ ६ **अश्नोति**=व्याप्नोति, प्र०—अत्र व्यत्ययेन परस्मैपदम् १ ६४ २ प्राप्नोति २ २४ ८ **अश्नोतु**=व्याप्नोतु १ १७ ६ प्राप्नोतु, प्र०—अत्र व्यत्ययेन परस्मैपदम् ३ ५१ १२ [अशूङ् व्याप्तौ (स्वा०) धातोर्लटि लोटि च रूपाणि। व्यत्ययेन परस्मैपदम्। अश्नुते व्याप्तिकर्मा निघ० २ १८]

अश्नुवन् विद्यासुखेन व्याप्नुवन् (विद्वज्जन) १ ११६ २५ [अशूङ् व्याप्तौ (स्वा०) धातो शतृप्रत्यय]

अश्नेव योऽश्नाति भुङ्क्ते तद्वत् (राजपुरुष) २ ३० ४ [अश भोजने (क्र्या०) धातोर्बाहुलकाद् नक्, तद्वत्]

अश्मदिद्यव: मेघविद्याप्रकाशका (मरुत =मनुष्या) ५ ५४ ३. [अश्मा मेघनाम निघ० १ १० द्युत् दीप्तौ धातोश्छान्दस दिद्युरूपम्। तयो समास]

अश्मन् अश्मनि १७ १ मेघे, भा०—मेघमण्डले, प्र०—अश्मेति मेघनाम निघ० १ १०, १७ १ **अश्मन:**=पाषाणात् २ ११ मेघस्य ६ ४३ ३ पाषाणस्य मेघस्य वा ३ २९ ६ **अश्मना**=विषहरेण पाषाणेन १ १९१ ५ **अश्मनि**=मेघमण्डले १ १३० ३ **अश्मनो:**=पाषाणयोर्मेघयोर्वा २ १२ ३ **अश्मा**=अश्नुते व्याप्नोति स मेघ १७ ६० पाषाणवद् दृढम् (तनू =शरीरम्) ६ ७५ १२ पाषाण २९ ४९ **अश्मानम्**=मेघम् ४ १९ ६ व्यापनशील मेघम् १ १२१ ८ मेघमिव राजानम् ४ २२ १ अश्नुवन्त मेघम् ५ ३० ८ योऽश्नुते सहन्ति त मेघम् २ ३० ५ [अशूङ् व्याप्तौ सघाते च (स्वा०) धातोर्बाहुलकान् मन् प्रत्यय। अश्मा मेघनाम निघ० १ १० स्थिरो वो ऽश्मा श० ६ १.२ ५ शर्कराया अश्मानम् असृजन तस्माच्छर्करारश्मैवान्ततो भवति श० ६ १ ३ ५]

अश्मनेव यथाऽश्मना तथा २.१४ ६ [अश्मा मेघनाम निघ० १ १० तद्वत्]

अश्मन्मयीम् मेघप्रचुराणामिव पाषाणनिर्मितानाम् (पुरा =शत्रुनगरीणाम्) ४ ३० २० [अश्मन् प्राति० 'तत्प्रकृतवचने मयट्' अ० ५ ४ २१ सूत्रेण प्राचुर्ये मयट्। टित्वान् ङीप्। अश्मन्मयीभि =अश्ममयीभि नि० ४ १९]

अश्मन्वती बहवोऽश्मानो मेघा पाषाणा वा विद्यन्ते यस्या सृष्टौ नद्या वा सा ३५ १० [अश्मा मेघनाम निघ० १ १० ततो मयट्। 'मादुपधायाश्चे०' ति मस्य वकार]

अश्मव्रजा: येऽश्मसु मेघेषु व्रजन्ति (उस्रा =किरणा) ४ १ १३ [अश्मन् उपपदे व्रज गतौ (भ्वा०) धातोर् मूलविभुजादित्वात् कर्त्तरि क. प्रत्यय]

अश्मास्यम् अश्मनो मेघस्य मुख्यभागम् २ २४ ४ [अश्मा मेघनाम निघ० १ १० आस्यप्राति० भवार्थे 'शरीरावयवाच्च' इति यत्]

अश्याम् प्राप्नुयाम्, प्र०—अत्र व्यत्ययेन परस्मैपद 'बहुल छन्दसि' इति विकरणस्य लुक् १ ९२ ८ **अश्याम**=प्राप्नुयाम, प्र०—अत्र व्यत्ययेन श्यन् परस्मैपद च १ ११४ २ भुञ्जीमहि १ १३६ ७ प्राप्त हो आर्याभि० १ ४५, ऋ० १ ८५ २ भुञ्जमहि ५ ४१ १८ **अश्या:**=प्राप्नुया ४ ५ ७ भोग कुर्या १ ६० ३ व्याप्नुया, प्र०—अत्र व्यत्ययेन परस्मैपदम् १ ६६ ३ व्याप्नुहि १ ७० ३ **अश्यु:**=भुञ्जते १ ७३ ५ प्राप्नुयु २ १९ ८ [अशूङ् व्याप्तौ (स्वा०) धातोर्लिङ्। व्यत्ययेन श्यन् परस्मैपदञ्च]

अश्रथ्नन् विमुक्तानि भवन्ति २ २४ ३ [श्रन्थ विमोचने (क्र्या०) धातो शतृ। नञ्समास]

अश्रद्धान् श्रद्धारहितान् (अविदुषो जनान्) ७ ६ ३ [नञ्-श्रद्धयो समास। 'श्रदन्तरोरुपसर्गवत् वृत्ति' अ० ३ ३ १०६ वार्तिकेनोपसर्गवत् श्रद् उपपदे 'आतश्चोपसर्गे' अ० ३ ३ १०६ सूत्रेण दधातेरङ् प्रत्यय। स्त्रिया टाप्]

अश्रद्धाम् अप्रीतिम् १९ ७७ अप्रीति को स० वि० १८७ [श्रद्धापूर्वपदे व्याख्यातम्। तस्य नञा समास]

अश्रमास: श्रमरहिता (जना) ६ २१ १२ [नञ्-श्रमयोर्बहुव्रीहि। श्रमु तपसि खेदे च (दिवा०) धातोर्घञ्]

अश्रमिष्ठा: अतिशयेनाऽश्रान्ता श्रमरहिता (राजभृत्या) ४ ४ १२. [नञ्-श्रमयोर्बहुव्रीहि। ततोऽतिशायने इष्ठन् प्रत्यय]

अश्रवम् शृणोमि १ १०९ २ [श्रु श्रवणे (भ्वा०) धातोर्लङ्। व्यत्ययेन शप्। अश्रवम्=अश्रौषम् नि० ६ ६ अशृणवम् नि० ११ ३९]

अश्रायि श्रियेत सेव्येत १ ५१ १४ आश्रयति ६ ११ ५ [श्रिञ् सेवायाम् (भ्वा०) धातो कर्मणि लुङ्]

अश्रितम् असेवितम् (अग्नि=विद्युदाख्यम्) ४ ७ ६ [श्रिञ् सेवायाम् (भ्वा०) धातो क्त। नञ्समास]

अश्रीणीत श्रीणाति पचति ७ १७ [श्रीञ् पाके (क्र्या०) धातोर्लङ्]

अश्रीरम् अश्लीलममङ्गलमधर्माचरणम् ६ २८ ६ [अश्लीलम्=पापकम् नि० ६ २३ रलयोरभेद]

अश्रुभि: रोदनै २५.९ [अशूङ् व्याप्तौ (स्वा०)

श० ७ ३ २ १० तस्मा (आयास्यायोद्गात्रे) अमुमादित्यमश्व श्वेत कृत्वा (आदित्या) दक्षिणामानयन् ता० १६ १२ ४ तेऽङ्गिरस आदित्येभ्य अमुमादित्यमश्व श्वेत भूत दक्षिणामानयन् तै० ३ ९ २१ १. ते (आदित्या) अश्व श्वेत दक्षिणा निन्युरेतमेव य एप (सूर्य) तपति कौ० ३० ६ अग्निर्वा अश्व श्वेत श० ३ ६ २ ५ अग्निरेप यदश्व श० ६ ३ ३ २२ सोऽग्निरश्वो भूत्वा प्रथम प्रजिगाय गो० उ० ४ ११ अश्वो न देववाहन इति अश्वो ह वा एप (अग्नि) भूत्वा देवेभ्यो यज्ञ वहति श० १ ४ १ ३० यस्मात्प्रजापतिरालब्धोऽश्वोऽभवत् तस्मादश्वो नाम तै० ३ ९ २१ ४ प्राजापत्योऽश्व श० ६ ५ ३ ९ सौर्यो वा अश्व गो० उ० ३ १९ वारुणो हि देवतयाऽश्व तै० १ ७ २ ६ वारुणो वा ऽश्व तै० २ २ ५ ३ वारुणो ह्यश्व श० ७ ५ २ १८ वैश्वदेवो वा अश्व श० १३ २ ५ ४ अश्वे वै सर्वा दैवता अन्वायत्ता तै० ३ ८ ७ ३ अश्वश्चतुस्त्रिंश तै० २ ७ १ ३ अश्वश्चतुस्त्रिंशो दक्षिणानाम् ता० १७ ११ ३ अपूतो वाऽएपोऽमेध्यो यदश्व श० १३ १. ११ तस्मादश्वस्त्रिभि (पद्भि) तिष्ठंस्तिष्ठति श० १३ २ ७ ६ ईश्वरो वा अश्व प्रयुक्त परा परावत गन्तो तै० ३ ८ ९ ३ अश्वो वै बृहद्वय तै० ३.९ ५ ३ (हे ऽश्व त्व) हयोऽसि ता० १ ७ १ (हे ऽश्व त्व) सप्तिरसि ता० १ ७ १ (हे ऽश्व त्व) वृषासि ता० १ ७ १ वाजिनो ह्यश्वा श० ५ १ ४ १५ (हे ऽश्व त्व) वाज्यसि ता० १ ७ १ समुद्र एवास्य (अश्वस्य मेध्यस्य) बन्धु समुद्रो योनि श० १० ६ ४ १ जागतो ऽश्व प्राजापत्य तै० ३ ८ ८ ४ स हि वारुणो यदश्व श० ५ ३ १ ५ सोमो वै वृष्णो अश्वस्य रेत तै० ३ ९ ५ ५ अश्वस्य वा आलब्धस्य रेत उदक्रामत्। तत्सुवर्णंᳪ हिरण्यमभवत् तै० ३ ८ २ ४ अश्वमालभते "श्रीर्वा एकशफम्। श्रियमेवावरुन्धते तै० ३ ९ ९ २ अश्व चापि चोत्तरत, एतस्या तद्दिश्येतौ पशू दधाति तस्मादेतस्या दिश्येतौ पशू भूयिष्ठौ श० ७ ५ २ १५]

अश्वमिष्टे योऽश्वमिच्छति तत्सम्बुद्धौ (अग्ने=विद्वज्जन), प्र०—अत्र 'बहुल छन्दसि' इति सुमागम २ ६ २

अश्वमेधस्य चक्रवर्त्तिराज्यपालनस्य विद्याया ५ २७ ५ **अश्वमेधः**=राष्ट्रम् १८ २२ **अश्वमेधाय**=आशुपवित्राय (विद्वज्जनाय) ५ २७ ४. **अश्वमेधे**=राज्यपालनाख्ये व्यवहारे ५ २७ ६ [प्रजापतिरश्वमेध श० १३ २ २ १३ अग्निर्वा अश्वमेधस्य योनिरायतनम् तै० ३ ९ २१ ३. गोऽश्वमेधेनेन्द्र्या स्वर्गाति नागान गो० पू० ५ ८. सर्वस्यैप न वेद यो ब्राह्मण सन्नश्वमेधस्य न वेद, गोऽब्राह्मण श० १३.४ २ १७ असावादित्योऽश्वमेध. श० ९ ४ २ १८ असौ वाऽ आदित्य एकविंश गोऽश्वमेध. श० १३ ५ १.५ एप वाऽश्वमेधो य एप (सूर्य) तपति श० १०.६ ५.८. एप वाऽश्वमेधो यच्चन्द्रमा श० ११ २ ५ १. राष्ट्रमश्वमेध श० १३ २ २.१६ राष्ट्र वा अश्वमेध श० १३ १ ६ ३. श्रीर्वै राष्ट्रमश्वमेध श० १३ २.९ २. यजमानो वाऽश्वमेध. श० १३ २.२ १. राजा वा एप यज्ञाना यदश्वमेध श० १३ २ २ १ वृषभ एप यज्ञाना यदश्वमेध श० १३ १ २ २ ऋषभ एप यज्ञाना यदश्वमेध तै० ३ ८ ३ ३ अश्वमेधे सर्वा देवता अन्वायत्ता श० १३ १ २ ९ प्राणापानौ वा एतौ देवानाम्। यदर्काश्वमेधौ तै० ३ ९ २१ ३ ओजो बल वा एतौ देवानाम्। यदर्काश्वमेधौ तै० ३ ९ २१.३ एप (अश्वमेध) वै ब्रह्मवर्चसी नाम यज्ञ तै० ३ ९ १९ ३ एप (अश्वमेध) वै तेजस्वी नाम यज्ञ तै० ३.९ १९ ३ एप (अश्वमेध) वा अतिव्याधी नाम यज्ञ तै० ३ ९ १९ ३ एप (अश्वमेध) वा ऊर्जस्वान्नाम यज्ञ तै० ३ ९ १९ १ एप (अश्वमेध) वै प्रतिष्ठितो नाम यज्ञ तै० ३ ९.१९ २ एप (अश्वमेध) वै क्लृप्तो नाम यज्ञ तै० ३ ९ १९.३. एप (अश्वमेध) वै दीर्घो नाम यज्ञ तै० ३ ९ १९ ३ एप (अश्वमेध.) वै विधृतो नाम यज्ञ तै० ३ ९ १९ २ एप (अश्वमेध) वै व्यावृत्तो नाम यज्ञ तै० ३ ९ १९ २ एप (अश्वमेध) वै पयस्वान्नाम यज्ञ तै० ३ ९ १९ १. एप (अश्वमेध) वै० विभूर्नाम यज्ञ तै० ३ ९.१९ १ एप (अश्वमेध) वै प्रभूर्नाम यज्ञ तै० ३ ९ १९ १ प्रजापतिᳪ सर्व करोति योऽश्वमेधेन यजते ता० २१ ४ २ तरति सर्वं पाप्मान तरति ब्रह्महत्या योऽश्वमेधेन यजते श० १३ ३ १.१ यो ऽश्वमेधेन यजते। देवानामेवायनेनैति तै० ३ ९ २२ ३ तेजसा वा एप ब्रह्मवर्चसेन व्यृध्यते योऽश्वमेधेन यजते तै० ३ ९ ५ १ स यो हैव विद्वानग्निहोत्र च जुहोति दर्शपूर्णमासाभ्या च यजते मासि मासि हैवास्याश्वमेधेनेष्ट भवति श० ११ २ ५ ५]

अश्वयते अश्वमिवाचरते १ ४५ २६ [अश्वपदादाचारेऽर्थे क्यङ्। छान्दसत्वाद् दीर्घाऽभाव]

अश्वायन्तः आत्मनोऽश्वानिच्छन्त (विप्रा=प्राजा जना) ४ १७ १६ महतो विदुप कामयमाना (जना) ७ ३२ २३ [अश्वपदाद् आत्मन इच्छाया क्यच्। तत शतृ प्रत्यय]

राज्यस्य १ १२१ १२ सूर्यस्याऽग्नेर्वायोर्वा ऋ० भू० १४७ अश्ववद्वीर्यवत (जनस्य) १ १६४ ३४ शीघ्रगामी सूर्य के १ १६४ ३५ **अश्वः**=आशुगन्ता तुरङ्ग ६ ३ ४ महत्तत्त्वम्, भा०—महदाख्य द्वितीया परिणति २३ ५४ योऽश्नुते व्याप्नोति मार्गान् स (अग्नि=सूर्यरूप) २२ १६ व्याप्तिशील (प्राणी) २५ ४५ उत्तमस्तुरङ्ग ३ २९ ६ आशुगामी (विद्युदादि) १ १६१ ३ वाजी १५ ६२ आशुगामी वायुरग्निर्वा १ १६४ २ व्याप्तिशीलोऽग्नि १ १६२ २२ **अश्वयोः**=क्षिप्र गमयित्रो ६ ४७ ६ **अश्वा**=व्याप्तौ (इन्द्राग्नी=वायुविद्युतौ) ६ ५९ ३. आशुगामिनी (हरी=अग्निजले) ४ ३३ १० तुरङ्गौ महान्तौ जनौ वा ६ ६७ ४ वेगेनाऽध्वनि व्याप्तिशीलौ युग्मौ पदार्थौ ४ ३४ ९ अश्वी १ १७४ ५. **अश्वान्**=वेगवत किरणान् १ ९२ १५ शीघ्रगामितुरङ्गान् ७ ३४ ४ वेगवतस्तुरङ्गान् १ १०४ १ तुरङ्गादीन् ६ ४७ २३ आशुगामिनोऽग्न्यादीन् तुरङ्गान्वा ३ ३ ४ सद्योगामिनोऽग्न्यादीन् ४ ४३ ६ महत पदार्थान् १ १०३ ५ महतो वलिष्ठान् (शूरान् जनान्) ६ ७५ १३. अत्युत्कृष्टवेगवत (विद्वज्जनान्) १ १७१ १ घोडो को स० प्र० २४७, ३४६ अश्वादीनि सेनाऽङ्गानि १३ ७० **अश्वानाम्**=वेगवतामग्न्यादिपदार्थानाम् ५ १८ ५ **अश्वाय**=सद्यो गमनाय ५ ३१ ५ तुरङ्गाद्याय ३ ५९ अग्नये (विद्युते) १.१६२.१६. **अश्वाः**=आशुगामिनस्तुरङ्गा ३ ७ २ व्याप्तिशीला किरणा, प्र०—अश्व इति किरणनाम, निघ० १ ५, ३ ६ ८ वेगवन्त (देवा=विद्वास) ९ ६ महान्तो विद्वास, प्र०—अश्व इति महन्नाम निघ० १ १४, ६ २४ ६ विद्याव्याप्तिशीला (विद्वज्जना) ३ १ ४ आशुगामिनोऽग्न्यादय १ १६४ ३ **अश्वेभिः**=सुशिक्षितैस्तुरङ्गादिभि २० ७३ **अश्वेभ्यः**=हयेभ्य १६ २४ **अश्वेषु**=वाजिपु १ ११४ ८ अग्न्यादिवेगवत्पदार्थेपु प० वि०। वह्नितुरङ्गादिपु १८ ४७ तुरङ्गहस्त्युष्ट्रादिपु, भा०—अश्वादिपु १६ १६ गवादिपु १३ २३ **अश्वैः**=आशुकारिभि (जनै) ५ ५५ १ आशुगमनहेतुभिरग्निजलकलागृहरूपैरश्वै १ ८८ २ वेगादिभिर्गुणै १ १७५ ४ सर्वोत्तम घोडो सहित आर्याभि० २ ११, ३४ ३६ सर्वोत्तम अश्व विद्या विज्ञानादियुक्त घोडे आदि पशुओ से आर्याभि० १ ३५, ऋ० १ १ ३१ ९ आशुगमनहेतुभिरग्न्यादिभिस्तुरङ्गहस्त्यादिभिर्वा १ १६ ९. आशुगामिभिर्विद्युदादिना निर्मितैर्विमानादियानै १ ११७ १४ महावलिष्ठै पुरुषार्थयुक्तै (पतिभि) ४ ५१ ५ महद्भि किरणै ६ ६५ २ महद्भिर्वेगादिगुणै ६.६२ ३. तुरङ्गैरग्न्यादिभिर्वा ५ २९ ६ व्यापनशीलै किरणै १ ११३ १४ आशुकारिभि (जनै) ५ ५५ १ [अशूङ् व्याप्तौ (स्वा०) धातो 'अशूप्रुषि०' उ० १ १५१ सूत्रेण क्वन्। य कश्चाध्वानमश्नुवीताश्व स वचनीय नि० १ १३ अश्नुतेऽध्वानम्, महाशनो भवतीति वा नि० २ २७ प्रजापतेरक्ष्यश्वयत्। तत् परापतत्तनोऽश्व समभवद्यदश्वयत्तदश्वस्याश्वत्वम् श० १३ ३.१.१ तै० १.१ ५ ४ ता० २१ ४ २ (प्रजापति) चक्षुषाऽश्वम् (निरमिमीत) श० ७ ५ २ ६ तान् (असुरान्) अश्वा भूत्वा (देवा) पद्भिरपाघ्नत यदश्वा भूत्वा पद्भिरपाघ्नत तदश्वानामश्वत्वमश्नुते यद्यत्कामयते य एव वेद ऐ० ५ १ अथ यदश्रुसक्षरितमासीत् सो ऽश्रुरभवदश्रुर्ह वै तमश्व इत्याचक्षते परोऽक्षम् श० ६ १ १ ११ यद्वै तदश्रुसक्षरितमासीदेप सोऽश्व श० ६ ३ १ २८ अप्सुजा उ वा ऽअश्व श० ७.५ २.१८ अप्सुयोनिर्वा ऽअश्व तै० ३ ८ ४ ३ अद्भ्यो ह वा ऽअग्रेऽश्व सम्बभूव सोऽद्भ्य सम्भवन्नसर्व समभवद्० श० ५ १ ४ ५ अश्वो ऽस्यत्योसि मयोऽसि हयोऽसि वाज्यसि सप्तिरस्यर्वासि वृषासि ता० १ ७ १. अत्योऽसीत्याह। तस्मादश्व सर्वान् पशूनत्येति तै० ३ ८ ९ १ तस्मादश्वः सर्वेषा पशूना श्रैष्ठ्य गच्छति तै० ३ ८ ९ १ तस्मादश्व पशूना जविष्ठ। ऐ० ५ १. आशु सप्तिरित्याह। अश्व एव जव दधाति। तस्मात् पुराशुरश्वोऽजायत तै० ३.८ १३ २ अश्व पशूना त्विपिमान् हरस्वितम तै० ३ ८ ७ ३ अश्व पशूनामाशु सारसारितम तै० ३ ८ ७ २ तस्मादश्व पशूनामाशिष्ठ श० १३ १ २.७. अश्व पशूना यशस्वितम. श० १३ १ २ ८ तस्माद्ध हैतदश्व पशूना भगितम श० ६ ३ ३ १३ परमोऽश्व पशूनाम् श० १३ ३ ३ १ अन्तो वा अश्व पशूनाम् ता० २१ ४ ६ अश्व पशूनामपचिततम तै० ३ ८ ७ २ तस्मादश्व पशूनामोजस्वितम श० १३ १ २ ६. अश्व पशूनामोजिष्ठो वलिष्ठ तै० ३ ८ ७ १ तस्मादश्व पशूना वीर्यवत्तम श० १३ १ २ ५ अश्व पशूनामन्नादो वीर्यवत्तम तै० ३ ८ ७ १ वीर्य वा अश्व श० २ १ ४ २४ क्षत्र वाऽअन्वश्व श० ६ ४ ४ १२ क्षत्र वा ऽअश्वो विडितरे पशव श० १३ २ २ १५. यजमानो वा अश्व तै० ३ ९ १७ ५ वज्रो वा ऽअश्व श० ४ ३ ४ २७, १३ १ २ ९ वज्रो वा एप यदश्वः तै० १ १ ५ ५ वज्री वा अश्व प्राजापत्य तै० ३ ८. ४ २ इन्द्रो वा अश्व कौ० १५ ४ असौ वा आदित्यो-ऽअश्व तै० ३ ९ २३ २ असौ वा ऽआदित्य एपोऽश्व.

प्रभाता) प्र०—अत्र मतौ पूर्वपदस्य दीर्घ १ १२३ १२ अश्वा महान्त. पदार्था विद्यन्ते यासु ता (विदुष्य स्त्रिय) ७ ४१ ७ **अश्वावत्या**=प्रशस्ता वेगवलयुक्ता अश्वा विद्यन्ते यस्या तया (सेनया) १ ५३ ५ [अश्वप्राति० मतुप् । पूर्वपदस्य मतौ दीर्घ । स्त्रिया डीप् प्रत्यय]

अश्वावन्तम् प्रशस्ताऽश्वादिसहितम् (रयि=धनम्) ४ ४६ ४ प्रशस्ता अश्वा विद्यन्ते यस्मिँस्तम् (राज्यम्) १ ८३ ४ [अश्वप्राति० मतुप् । द्वितीयैकवचनम्]

अश्वास: वाजिन २० ७८ सुशिक्षितास्तुरङ्गा १३ ३६ आशुगामिनोऽग्न्यादय ६ ६३ ७ सद्यो गामिन (रथा =यानानि) ४ १४ ४ अश्वा इव महान्तो विद्युदादय पदार्था ६ २६ २ तुरङ्गा ४ ४५ २ वेगादयो गुणा ५ ७५ ६ व्याप्तिशीला वेगादयो गुणा २ १२ ७ महान्त (वीरजना) ६ ६६ ४ अग्न्याद्यास्तुरङ्गा वा ५ ६३ ४ शीघ्रगामिन (अत्या =विद्युदादय पदार्था) १ १८१ २ [अश्वो व्याख्यात । तस्य प्रथमावहुवचनम्]

अश्विनकृतस्य यौ सद्गुणमश्नुवाते तावश्विनौ तावेवाश्विनौ ताभ्या कृतस्य, भा०—विद्वद्भिरैश्वर्ययुवतैर्जनैरनुष्ठितस्य (कार्यस्य) २० ३५ [अत्राश्विन्शब्दात् स्वार्थे ऽण्, वृद्ध्यभावस्त्वार्ष । 'अश्विनपदस्य' कृतपदेन सह समास]

अश्विनम् वहूत्तमाऽश्वादियुक्तम् (रयि=धनम्) ४ ३७ ५ [अश्वप्राति० मत्वर्थे इनि प्रत्यय]

अश्विना अश्विनौ जलाग्नी, प्र०—अत्र 'सुपा सुलुग्०' इत्याकारादेश "या सुरथा रथीतमोभा देवा०"। "नहि वामस्ति दूरके०" ऋ० १ २२ २, ४ वय यौ सुरथौ शोभना रथा याभ्या तौ, रथीतमा भूयासो रथा विद्यन्ते ययोस्तौ रथी अतिशयेन रथी रथीतमौ, देवौ=शिल्पविद्याया दिव्यगुणप्रकाशकौ, दिविस्पृशा विमानादियानै सूर्य्यप्रकाशयुक्तेऽन्तरिक्षे मनुष्यादीन् स्पर्शयन्तौ, उभा=उभौ, ता=तौ, हवामहे=गृह्णीम ॥१॥ यत्र मनुष्या वा तयोरश्विनो साधिपित्वाचलितयो सम्वन्धयुक्तेन हि यतो गच्छन्ति तत्र गृह विद्याधिकरण दूर नैव भवतीति यावत् ॥२॥ "अथातो द्युस्थाना देवतास्तामामश्विनौ प्रथमागामिनौ···········भाग अदित्य," निरु० १२ १ "तथा अश्विनौ चापि भर्त्तारौ······भागो०" निरु० १२ १ (अथातो०) अत्र द्युस्थानोक्तत्वात्प्रकाशस्था प्रकाशयुक्ता सूर्याग्निविद्युदादयो गृह्यन्ते, तत्र यावश्विनौ द्वौ द्वौ गप्रयुज्येते यौ च, सर्वेपा पदार्थाना मध्ये गमनशीलौ भवत । तयामध्यादस्मिन्मन्त्रे ऽश्विशब्देनाऽग्निजले गृह्येते । कुत ? यद्यस्माज्जलमश्वै स्वकीयवेगादिगुणैं रसेन सर्वं जगद् व्यश्नुते=व्याप्तवदस्ति । तथाऽग्योऽग्नि स्वकीयै प्रकाशवेगादिभिरश्वै सर्व जगद्व्यश्नुते, तस्मादग्निजलयोरश्विसञ्ज्ञा जायते । तथैव स्वकीयस्वकीयगुणैर्द्यावापृथिव्यादीना द्वन्द्वानामप्यश्विसञ्ज्ञा भवतीति विज्ञेयम् । शिल्पविद्याव्यवहारे यानादिपु युक्त्या योजितौ सर्वकलायन्त्रयानधारकौ यन्त्रकलाभिस्ताडिनौ चेत्तदाहननेन गमयितारौ च तुर्फरीगव्देन यानेपु शीघ्र वेगादिगुणप्रापयितारौ भवत । "अश्विनाविति पदनामसु पठितम्" निघ० ५ ६ अनेनापि गमनप्राप्तिनिमित्ते अश्विनौ गृह्येते १ ३ १ प्रकाशितगुणयोरव्वर्यो, अ०—अश्विनो, प्र०—अत्र 'सुपा सुलुग्०' इत्याकारादेश १ २२ ३ यजमानर्त्विजौ ५ ७८ २ प्राणाऽपानौ २१ ६० व्यापिनौ (मित्रावरुणौ=प्राणोदानौ) ७ ३५ ४ अश्विभ्या युक्तेन (रथेन=विमानादियानेन) १ २२ ४ व्यवहारव्यापिनौ (शिल्पिजनौ) १ ४६ ७ सत्योपदेशकरक्षयितारौ (प्रशस्तदानशीलो पुरुपौ) १ १८१ ६ शरीराऽऽत्मवलयुतौ (कुमारौ) १ ११७ १३ राजाऽमात्यौ ४ ४५ ५ व्यापनशीले द्यावान्तरिक्षे ६ ६२ १ व्याप्तिगुणशीलौ (अग्निजले) १ २२ २ राजप्रजाजनौ ५ ४६ १ विद्यादिशुभगुणव्यापिनौ राजप्रजाजनौ ३३ ८८ व्याप्तिमन्तौ सूर्याचन्द्रमसौ, प्र०—अत्र 'सुपा सुलुग्०' इति आकारादेश १ १५ ११ अग्निजलाभ्याम् ऋ० भू० १६३ वायुविद्युतौ ३ ५८ ४ व्याप्तिशीलौ (इन्द्राग्नी=विद्युद्भौतिकाग्नी) १ १०६ ४ अग्निवायू २१ ३६ वायूसूर्यौ २१ ४६ अग्निजलसूर्यचन्द्रादिभि १ ५३ ४ जलाग्नी इव निर्मातृवोढारौ (शिल्पिचालकौ) १ १८२ ७ शिल्पविद्याविदावध्यापकोपदेशकौ ३ ५८ ५ सकलविद्याव्याप्तौ (शिल्पिनौ) ३ ५८ ८ शिल्पविद्याऽध्येत्रध्यापकौ (गुरुशिष्यौ) १ ८६ ४ आप्तावध्यापकोपदेशकौ १ ११२ २४ शिल्पविद्याऽध्यापकाऽध्ययन-क्रियायुक्तावग्निजलादिद्वन्द्व वा १ ८६ ३ विद्याव्यापनशीलौ (अध्यापकोपदेशकौ) १ ११२ १ सर्वशुभगुणव्यापनशीलौ (अध्यापकाऽध्येतारौ) १ १११ ४ विद्याप्रापकाऽध्यापकोपदेष्टारौ १ १२० ६ विद्याशिक्षकौ २० ६४ रक्षादिकर्मव्यापिनौ (अध्यापकोपदेशकौ) २० ७६ विद्यावलव्यापिनौ (अध्यापकोपदेशकौ) १ १८२ ४ व्याप्तविद्यौ (देवौ=विद्वासौ) ५ ७४ १ वैद्यकविद्यानिपुणावध्यापकोपदेशकौ २० ६६ विद्वासौ राजप्रजाजनौ, भा०—जगद्धितैषिणौ ३४ ४७ व्याप्तसकलविद्यावध्यापकोपदेशकौ, भा०—अध्यापिकोपदेशिके विदुष्यौ १४ १ द्यावापृथिव्याविवाऽध्यापकोपदेशकौ ५ ७३ ६ शिल्पिनौ १ ११७ ६ कृषिकर्मविद्याव्यापिनौ (सभासेना-

अश्वयुजः येऽश्वान् सद्योगामिन पदार्थान् योजयन्ति (विद्वज्जना) ५ ५४ २. [अश्वोपपदे युजिर् योगे धातो क्विप् प्रत्यय । अश्विनोरश्वयुजौ (नक्षत्रौ) तै० १ ५ १ ५]

अश्वयुः आत्मनोऽश्वानिच्छु (इन्द्र) १ ५१ १४ बह्वश्वबलयुक्त (रय =विमानादियानविशेष) ४ ३१ १४ [अश्वपदाद् आत्मन इच्छाया क्यच्। 'क्याच्छन्दसी' ति उ प्रत्यय]

अश्वयूपाय अश्वाना बन्धनाय १ १६२ ६ अश्वस्य बन्धनार्थाय स्तम्भाय २५ २९ [अश्वयूपयो समास । यूप =यु मिश्रणेऽमिश्रणे च धातो 'कुयुभ्या च' उ० ३ २७ सूत्रेण प प्रत्यय वित् दीर्घश्च]

अश्वयोगाः येऽश्वान् योजयन्ति ते (मतय =मनुष्या) १ १८६.७ [अश्वोपपदे युज सयमने (चुरा०) धातोरण् प्रत्यय]

अश्वराधसः विद्युदादिपदार्थससाधिका (गिर =वाच) ५ १० ४ [अश्वोपपदे राधससिद्धौ धातोरसुन् प्रत्यय]

अश्वश्चन्द्राः अश्वाश्चन्द्राणि सुवर्णानि येषान्ते (प्रजाजना) ६ ३५ ४ [अश्वो व्याख्यात । चन्द्रम्= हिरण्यनाम निघ० १ २]

अश्वसनिः अश्वानामग्न्यादिपदार्थाना वा सनिर्दाता (गृहपति) ८ १२ [अश्वोपपदे षण् सभक्तौ धातो 'खनिकष्यजि०' उ० ४ १४० सूत्रेण इ प्रत्यय]

अश्वसातमः योऽश्वान् सनति सम्भजति सोऽतिशयित (सभेश) १ १७५ ५ [अश्वोपपदे षण् सभक्तौ धातो क्विप्। ततोऽतिशायने तमप् । धातोर्नकारस्याऽऽकारा-देश]

अश्वसादम् योऽश्वान् सादयति तम् (पुरुषम्) ३०.१३ [अश्वोपपदे षद्लृ विशरणगत्यादिषु धातोर्णिचि अण्]

अश्वसाम् अश्वाना सविभाजिकाम् (धियं=प्रज्ञाम्) ६ ५३ १० [अश्वोपपदे षण् सभक्तौ धातो क्विप् । स्त्रियां टाप्]

अश्वसूनृते अश्वा महती सूनृता प्रिया वाग्यस्याम्त-त्सम्बुद्धौ (विदुषि स्त्रि), प्र०—अश्व इति महन्नाम निघ० ३ ६, ५ ७९.१ महाज्ञानयुक्ते (विदुषि स्त्रि) ५ ७९ ३ महदन्नयुक्ते (साध्वि स्त्रि) ५ ७९ २ [अश्वसूनृतापदयो समास]

अश्वा आशुगमनशीला बडवा २१ ३३ व्यापिका (पत्नी) ३७.१२ [अश्व+टाप्]

अश्वाजनि याऽश्वान् जनयति सुशिक्षितान् करोति तत्सम्बुद्धौ (अ०—विदुषि राज्ञि) २९ ५० अश्वाना प्रक्षेप्त्रि (राज्ञि) ६ ७५ १३ [अश्व+जनी प्रादुर्भावे धातोर्बाहुलकाद् ड प्रत्यय, स्त्रिया ङीप् । अथवा अश्व+अज गतिक्षेपणयोर्धातोर्ल्युट् स्त्रिया ङीप् । अश्वाजनी कशेत्याहु. नि० ९ १८]

अश्वाजनीव विद्युदिव (स्थूणा=दृढा नीति) ५ ६२ ७]

अश्वापयः शापय ७ १९ ४

अश्वायते अश्वमिवाचरते (सज्जनाय) ६ ४५ २६ [अश्वपदात् क्यङ् आचारेऽर्थे, तत शतृ । व्यत्ययेन परस्मै-पदम्]

अश्वायन्तः आत्मनोऽश्वमिच्छन्त (सज्जना) २७ ३६ आत्मनोऽश्वानिच्छन्त (विप्रा =मेधाविनो जना) ४ १७ १६ महतो विदुष कामयमाना (सत्पुरुषा) ७.३२ २३ [अश्वपदादिच्छायामर्थे क्यच् । तत शतृ]

अश्वायेव यथाऽश्वाय ११

अश्वावत् बह्वश्वयुक्तम् (राध =धनम्) ५ ५७ ७ बहव प्रशस्ता वेगप्रदा अश्वा अग्न्यादय सन्ति यस्मिंस्तत् (वाजम्) १ ४८ १२ प्रशस्ततुरङ्गयुक्तम् (नृपाय्यम्=नृणा पाय्य मानम्), प्र०—अत्र सोमाऽश्वेन्द्रिय०, इति दीर्घ २० ८१ **अश्वावतः**=बह्वश्वयुक्तस्य (जनस्य) प्र०—'मन्त्रे सोमाऽश्वेन्द्रियविश्वदेव्यस्य मतौ' इति अश्वशब्दस्य मतौ दीर्घ १.१२२ ८ [अश्वप्राति० मतुप् । 'मन्त्रे सोमाश्वेन्द्रिय०' सूत्रेण मतौ परत पूर्वस्य दीर्घादेश]

अश्वावत् अश्वेन तुल्यौ (वाय्वग्नी) २ ४१ ७ अश्वादिभि समानम् (यज्ञम्) ८ ६३ [अश्वप्राति० तुल्यार्थे वति प्रत्यय । पूर्वस्य च दीर्घत्वम्]

अश्वावति अश्वा अस्या सम्बन्धे सन्ति तत्सम्बुद्धौ (उष) प्र०—अत्र 'मन्त्रे सोमाऽश्वेन्द्रिय०' अ० ६ ३ १३१. इत्यश्वशब्दस्य दीर्घ, सम्बन्धाऽर्थे मतुप् १ ९२ १४ सम्बद्धा अश्वा यस्मिँस्तस्मिन् रये १ ८३ १ **अश्वावतीम्**=प्रशस्तशुभगुणयुक्ताम् (महौषधीम्) प्र०—अत्र मतौ दीर्घ १२ ८१ **अश्वावती.** =प्रशस्ता अश्वा विद्यन्ते यासान्ता (सूनृता =वाच) १ ४८ २ प्रशस्तान्यश्वानि व्याप्तिशीला-न्युदकानि विद्यन्ते यासु ता (उषाम =प्रभाता) ३४ ४०. प्रशस्ता अश्वा व्याप्तयो विद्यन्ते यासान्ता (उषम =

अश्विनी आशुगामिन स्त्री ५.४६ ८ [अश्विन्+ङीप् । अश्विनी=अश्विनो पत्नी नि० १२ ४६]

अश्विया अश्वादियुक्तानि (हिरण्या=धनानि) ४ ३७ ११

अश्वी बह्वश्व (अग्नि =विद्वज्जन) ४ २ ५ बहवो महान्तोऽश्वा वेगादयो गुणा विद्यन्ते यस्मिन् सोऽग्नि (विद्वज्जन) ७ १ १२ [अश्वप्राति० मत्वर्थे इनि]

अश्वीव यथा वडवा २ २७ १६ [अश्वस्य स्त्री अश्वी । अश्व+ङीप्]

अश्वेव अश्वावद्वर्त्तमाना (उषा) ४ ५२ २ [अश्व-शब्दात् स्त्रिया टाप्, तदिव]

अश्वे इव अश्ववडवाविव ३ ३३ १ [अश्व+टाप् । अश्वा शब्दस्य द्विवचनम्]

अश्वैत् व्याप्नोति १ ९२ १२ वर्धते १ १२४ ११ [टुओश्वि गतिवृद्ध्योः (भ्वा०) धातोर्लुङ् । सिचो लुक्]

अश्व्यम् अश्वेषु भवम् (गिर) १ ११७ २२ तुरङ्गेषु वेगादिषु वा साधुम् (वीरजनम्) १ ११२ १० अश्वेषु व्याप्तविद्येषु साधुम् (मन =विज्ञानम्) १ ११६ ६ अश्वेभ्यो हितम् (राय =धनम्) २७ २७ **अश्व्यस्य**= अश्वेष्वाशुगामिषु भवस्य (पुष्टे) ४ ४१ १० **अश्व्यः**= अश्वेषु आशु गच्छत्सु साधुरत्यन्तवेगकारी (विद्वज्जन) १ ७४ ७ योऽश्वेषु वेगादिगुणेषु साधु (वीरजनो मेघो वा) १ ३२ १२ **अश्व्या**=महत्सु भवानि (राधासि=धनानि) ७ १६ १० अश्वेभ्यो हितानि (राधासि=धनानि) ५ ३६ ७ अश्वेषु हितानि (राधासि=धनानि) ६ ४४ १२ **अश्व्यानि**=अश्वाना महतामिमानि (शीर्षाणि=शिरासि) ७ १८ १६ **अश्व्यैः**=अश्वेषु भवैर्गुणै ६ ६० १४ [अश्व-शब्दात् साधवर्थे भवार्थे वा यत् प्रत्यय]

अषतरा प्राप्ततराणि (च्यौत्नानि=स्तोत्राणि), ऋ०—अत्र छान्दसो रेफस्य लोप १ १७३ ४ [ऋषी गतौ (तुदा०) धातोर्भावे घञ् प्रत्यय । रेफस्य लोपश्छान्दस सर्वोऽतिशायने तरप्]

अषाळ्हम् सोढुमनर्हम् (राजान सेनापति वा) ३ १ २० [illegible] सोढुमशक्यम् (सह =बलम्) १ ५५ ८ [illegible] (सोम = सेनाध्यक्षम्) [illegible] (नानृगणम्) ६ १८ १ **अषा-**[illegible] सोढुमशक्य (उग्र = राजा) ७ २० ३ [illegible] (विद्वान् राजपुत्र) ३ १५ ४ [illegible] (तुरीयम्?) [illegible] (स्वाय = सुवीर्याय) ७ ४६.१ **अषाळ्हाः**=असोढव्या शत्रुसेना ७ २८ २. **अषाळ्हेन** शत्रुभिरसोढव्येन (शवसा=बलेन) ६ १९.२ [षह मर्षणे धातोस्तृचि 'साढ्यैसाढ्वासाढेति निगमे' अ० ६ ३ ११३ सूत्रेण निपात्यते । ततो नञ्समास]

अषाढा शत्रुभिरसह्यमाना (पत्नी) १३ २६ [षह मर्षणे धातो क्त, स्त्रिया टाप् । नञ्समास । अषाढा (इष्टका) (देवा) ताम् (इष्टका) उपधायासुरान्त्सपत्नान् भ्रातृव्यानस्मादसहन्त यदसहन्त तस्मादषाढा श० ७ ४ २ ३३ त एते सर्वे प्राणा यदषाढा श० ७ ४.२ ३६ ग्रीवा अषाढा श० ७ ५ १ ३५ इयं पृथिवी वाऽअषाढा श० ६ ५ ३ १ वागषाढा श० ६ ५ ३ ४ वाग्वाऽअषाढा श० ७ ४ २ ३४ (नक्षत्र) यन्नासहन्त तदषाढा तै० १ ५ २ ८ अपा पूर्वाषाढा तै० १ ५ २ ८ अपा पूर्वाषाढा तै० १ ५ १ ४ विश्वेषा देवानामुत्तरा (अषाढा) तै० १ ५ १ ४]

अष्टधा दिग्भिरष्टप्रकार (दोह =सामग्रीसमूह) ८ ६२ [अष्टन् प्राति० 'सङ्ख्याया विधार्थे धा' अ० ५ ३.४२ सूत्रेण धा प्रत्यय]

अष्टमम् अष्टसङ्ख्यापूरकम् (चेतन ब्रह्म) २५ २ [अष्टन् सङ्ख्यावाचिन पूरणार्थे 'नान्तादसङ्ख्यादेर्मट्' अ० ५ २ ४९ सूत्रेण डट् मडागमश्च]

अष्टमी अष्टाना पूरणा (क्रिया) २५ ४ [अष्टम शब्दात् ङीप् प्रत्यय]

अष्टवे व्याप्तुम् ४ ३० १९ [अशूङ् व्याप्तौ (स्वा०) धातो कृत्यार्थे तवेन् प्रत्यय]

अष्टा व्यापक (सूर्यलोक) १ १२१ ८ [अशूङ् व्याप्तौ (स्वा०) धातोस्तृच्]

अष्टाकपालः अष्टसु कपालेषु संस्कृत (चरु = पाक), अष्टसु कपालेषु ससाधित (चरु =पाक) २९ ६० [अष्टन् कपालयो संस्कृतार्थे तद्धितार्थे द्विगु समास । 'संस्कृत भक्षा ' अ० ४ २ १६ सूत्रेण प्राप्तस्याण् प्रत्ययस्य 'द्विगोर्लुगनपत्ये' अ० ४ १ ८८ सूत्रेण लुक् । 'छन्दसि च' इति पूर्वपदस्य दीर्घ]

अष्टाक्षरेण याजुष्याऽनुष्टुभा (छन्दसा) ९ ३२

अष्टाचत्वारिंशत् अष्टाधिकाचत्वारिंशत् (सङ्ख्या) १८ २५ [अष्टन् चत्वारिंशत् पदयोर्बहुव्रीहौ समासे 'द्व्यष्टन सङ्ख्यायाम्०' इति पूर्वपदस्याकारादेश]

अष्टाचत्वारिंशः अष्टाचत्वारिंशद्धा (धर्त्रम्= धारणम्) १४ २३

धीशौ) १.११७.५ सूर्याचन्द्रमसौ वैद्यावध्यापकौ वा ७ ४१.१. सत्योपदेशव्यापिनौ अध्यापकोपदेशकौ १.१८१ ७. शिल्पविद्याक्रियाशिक्षकौ (विद्वज्जनौ) १ १६१ ६ सद्गुण-कर्मस्वभावव्यापिनौ, भा०—पठितसाङ्गोपाङ्गवेदौ (सरस्वती=प्रशसिता गृहिणी तथा पुरुष) २० ५६. शुभ-गुणव्यापिनौ (विद्वांसौ स्त्रीपुरुषौ) ४ १५ १० विद्यान्याय-प्रकाशकौ (विद्वज्जनौ) १ १३६ ३ सिद्धसाधकौ (अ०—विद्वांसौ) १६ ६३ आयुर्वेदाङ्गव्यापिनौ (विद्वज्जनौ) १६ १२ सद्वैद्यौ २१ ४३ वैद्यकविद्याव्यापिनौ (भिषजा=वैद्यौ) २१ ३३ सर्वाधीश-सेनाधीशौ ३ ५८ ६ अग्निजले इव वर्त्तमानौ सभासेनेशौ १ ४७.२ सेनेशयोद्धारौ ४.४५ ३ शत्रुसेनाव्यापिनौ (सभासेनाधीशौ) १ ११६ १८ यज्ञा-नुष्ठानशीलौ (सभासेनेशौ) १ ११६ ८ जलपृथिव्याविवाशु-सुखदातारौ (सभासेनाध्यक्षौ) १ ११६ ६ सर्वविद्याव्याप्ति-मन्तौ सभासेनेशौ १ ११६.१० सूर्यवायुसदृक्कर्मकारिणौ सभासेनेशौ १ ४७ ३ सकलविद्यासुखव्यापिनौ (सभासेनेशौ) १ ४६ १५ गृहाश्रमधर्मव्यापिनौ स्त्रीपुरुषौ १ १२० १ शिल्पविदौ दम्पती १ ११८ १ पतिपत्नी सर्व-लोकाऽधिपती १ ११८ ६ भूगर्भविद्याविदौ स्त्रीपुरुषौ १ ११७ २० विद्यासुशिक्षितौ स्त्रीपुरुषौ, व्या०शुभगुणकर्म-स्वभावौ २०.५६ स्त्रीपुरुषौ १६ १८ ब्रह्मचर्येण प्राप्त-विद्यौ स्त्रीपुरुषौ ५ ७५ ८ व्याप्तसुखौ (स्त्रीपुरुषौ) ५ ७६ ३ गृहाश्रमव्यवहारव्यापिनौ (स्त्रीपुरुषौ) १६ ८८ सूर्योषसौ ५ ७७ २ शिल्पविद्याऽध्यापकाऽध्येतारौ स्वामि-सेवकौ वा ३ ५८ ७. सुसत्कृतौ पुरुषौ २१ ४२ विद्या-ज्योतिर्विस्तारमयौ १ ३४ ६ क्षत्रधर्मव्यापिनौ (सभासेनेशौ) १.४७ ४ वह्निजलवद्यानसिद्धि सम्पाद्य प्रेरकचालका-वध्वर्यू, प्र०—'अश्विनावध्वर्यू' १ ३४ ३ विद्यादाता-ग्रहीतारावध्वर्यू १ ३४.४ वायुसूर्याविव वर्त्तमानौ धर्मन्यायप्रकाशकौ (उपदेशकसेनेशौ) १ ४१ १० पशुपाल-कृषीवलौ २१ ४१ सूर्य और चन्द्र को स० वि० १५५, ७ १४ १ हे सूर्यचन्द्रवत्प्रकाशमानौ (अ०—योगाऽध्येत्रध्या-पकौ ७ ११ **अश्विनोः**=सभासेनेशयो १ १२० १० सूर्याचन्द्रमसो ३८ १ सूर्याचन्द्रमसोरध्वर्य्वोर्वा, प्र०—सूर्याचन्द्रमसावित्येके, निरु० १२ १, १ १० विद्वत्क्रिया-कुशलयो (सज्जनयो) १ १५७ ३ प्राणोदानयो ११ ६ प्राणापानयोरध्वर्य्वोर्वा ५ २२ वैद्यकविद्या प्राप्तयोरध्या-पनौपधिकारिणो (अध्यापकवैद्ययो) २० ३ सकलविद्या-व्याप्तयोरध्यापकोपदेशकयो २० ३ प्रकाशभूम्यो प्र०—द्यावापृथिव्यावित्येके, निरु० १२ १, १ २१ द्यावापृथिव्यो-राकर्षणधारणाभ्यामिव ११.२८. **अश्विनौ**=अश्विदेवताकौ (पशू) २४ १ सूर्याचन्द्रमसाविवाध्यापिकोपदेशिके १ ४६ १. सूर्याचन्द्रमसाविव राजराजपुरुषौ ६ ३१ सर्वपदार्थगुण-व्यापिनौ स्त्रीपुरुषौ १ १८० ७ सूर्याचन्द्रमसाविव वैद्यक-विद्याकार्ये प्रकाशमानौ (वैद्यजनौ) २० ५८ वायुजले १ ४४ ८ प्रजाराजानौ २५ ३ अध्वर्यू प० वि० । वायूदके इवोपदेष्टृ पदेश्यौ ५.७८ १ विद्याप्रीतिशीलौ (सभासेनेशौ) १ ११६ ५ यौ व्युपदेशकौ (अध्यापकोपदेशकौ) १ १८४ ६ अध्यापकपरीक्षकौ ५ ७५ १ शिल्पविद्याव्यापिनौ (अध्या-पकोपदेशकौ) १ १८३ ६ सुशिक्षितौ स्त्रीपुरुषौ ३८ १२. **अश्विभिः**=सूर्याचन्द्रमस् ? आदिभि ६ ४५ २१. **अश्विभ्याम्**=राज्यस्वामिपशुपालाभ्याम् २१ ४० बहु-भोजिभ्या स्त्रीपुरुषाभ्याम् १६ ८६ इन्द्राग्निभ्याम् २१ ३४ अग्निवायुभ्याम् २१ ५५ सूर्याचन्द्रमोभ्याम् २० ६० विद्या-व्यापिभ्याम् (योगिभ्याम्) १६ ६५ पूर्णविद्याऽध्यापको-पदेशकाभ्याम् २० ३३ व्याप्तविद्याभ्याम् (स्त्रीपुरुषाभ्याम्) १६ १ [अश्वशब्दात् मत्वर्थे इनि प्रत्यय । अश्विनौ (द्यावापृथिव्यौ) यद् व्यश्नुवाते सर्व रसेनान्यो ज्योतिषान्य नि० १२.१ अथवा अशूङ् व्याप्तौ (स्वा०) धातोर्बाहुलकाद् विनि । अश्विन् द्विवचने=अश्विनौ । इमे ह वै द्यावा-पृथिवी प्रत्यक्षमश्विनाविमे हीदꣳ सर्वमश्नुवाता पुष्कर-स्रजावित्यग्निरेवास्यै (पृथिव्यै) पुष्करमादित्योऽमुष्यै (दिवे) श० ४ १ ५ १६ श्रोत्रे अश्विनौ श० १२ ६ १ १३ नासिके अश्विनौ श० १२ ६ १ १४ तद् यौ ह वा ऽइमौ पुरुषा-विवाक्ष्यो । एतावेवाश्विनौ श० १२ ६ १ १२ अश्विना-वध्वर्यू ऐ० १ १८ अश्विनौ वै देवाना भिषजौ ऐ० १ १८. मुख्यौ वा ऽश्विनौ (यज्ञस्य) श० ४ १ ५ १६ श्वेताविव ह्यश्विनौ श० ५ ५ ४ १ सयोनी वा ऽअश्विनौ श० ५ ३.१.८ अश्विनाविव रूपेण (भूयासम्) म० २ ४ १४ आश्विन द्विकपाल पुरोडाश निर्वपति श० ५ ३ १ ८ आश्विनो द्विकपाल (पुरोडाश) ता० २१ १०.२३ वसन्तग्रीष्मा-वेवाश्विनाभ्याम् (अवरुन्धे) श० १२ ८ २ ३४ अश्विभ्या-ऽन्धाना तै० १ ५ ११ ३ अथ यदेन (अग्निम्) द्वाभ्या बाहुभ्या द्वाभ्यामरणीभ्या मन्थन्ति द्वौ वा अश्विनौ तद-स्याश्विन रूपम् ऐ० ३ ४ देवस्य त्वा सवितु प्रसवे । अश्विनोर्बाहुभ्याम् तै० २ ६ ५ २ गर्दभरथेनाश्विना उदजय-ताम् ऐ० ४ ६ तदश्विना उदजयता रासभेन कौ० १८ १. इममेव लोकमाश्विनेन (अवरुन्धे) श० १२.८ २ ३२. अश्विनमन्वाह तदमु लोक (दिव) आप्नोति कौ० ११ २ १८ २]

२.२८. १३ ३ निन्द्यात् (वचस) ५ १२ ४. **असता**= अवर्त्तमानेन (बलादिना) ४ ५ १४ [अस भुवि (अदा०) धातो शतृ । नञ्समास । मृत्युर्वाऽसत् श० १४ ४ १ ३१ तदाहु किं तदसदासीदित्यृषयो वाव तदग्रेऽसदासीत् श० ६ १ १ १ अस्य यदसत् सर्क सा वाक् सोऽपान जै० उ० १.५३ २]

असत्याः असत्याऽऽचरणा (पापिजना) ४ ५ ५ [नञ्-सत्यपदयोर्बहुव्रीहि । सत्य कस्मात् ? सत्सु तायते, सत्प्रभव भवतीति वा नि० ३ १३]

असदत् तिष्ठेत् २६ २६. स्वकक्ष्याया भ्रमति, प्र०— अत्र लडर्थे लुङ् ३ ६ प्राप्नुयात् ११ ४८ आसीदतु ३ ६२ १५ उपसीदति ६ ५७ २. सीदति २.६ १ आसीदति २८ ४. सीदेत् ११ ३७ सीद ११ ४० **असदन्**= सीदन्ति १ १६ १ ४ भवेयु प्र०—अत्र लिडर्थे लङ् 'वाच्छन्दसि सर्वे विधयो भवन्ति' इति सीदादेशो न २.६ [षद्लृ विशरणगत्यवसादनेषु (भ्वा०) धातोर्लङ् । छान्दसत्वात् सीदादेशो न भवति]

असदः जानीहि जानीया वा ५ २१.४ आस्व १२ १७ प्राप्नोषि १२ ३८ [षद्लृ विशरणगत्यवसादनेषु (भ्वा०) धातोर्लङ् । छान्दसत्वात् सीदादेशो न भवति]

असन् प्रक्षिपन्ति ४ ३ ११ [असु क्षेपणे (दिवा०) धातोर्लङ् । विकरणलुक् आडभावश्च छान्दस]

असनत् विभजति ५ ३० १४ **असनम्**=सम्भजेयम् १ १२०.१० [षण सभक्तौ (भ्वा०) धातोर्लुङ्]

असनाम् प्रक्षेपणा क्रियाम् १ १४८ ४ [असु क्षेपणे (दिवा०) धातोर्युच् प्रत्यय । स्त्रियां टाप्]

असनाय प्रक्षेपणाय १ १३० ४. **असने**=क्षेपणे १ ११२ २१. [असु क्षेपणे (दिवा०) धातोर्ल्युट्]

असनोत् सुनुयात् ३ ३४ १० [षुञ् अभिषवे (स्वा०) धातोर्लङ् । वर्णव्यत्ययेनोकारलोपश्च]

असन्दितः अखण्डित (अग्नि =सेनापति) १३ १०. [सम्+दो अवखण्डने+क्त 'द्यतिस्यति०' इत्यादि-सूत्रेणेत्वम् । नञ्समास]

असन्वन् याचन्ते ७ १८ १.

असपत्नम् अजातशत्रुम् (राजानम्) ६ ४०. शत्रू-द्रवरहित निष्कण्टकमुत्तमराजधर्मम् ऋ० भू० २२२ सर्वत्र पक्षपातरहित पूर्णविद्या-विनययुक्त सब के मित्र सभापति राजा को स० प्र० १८३, ६ ४० **असपत्नाः**=अजात-शत्रव (राजान) ७ २५ [नञ्-सपत्नपदयोर्बहुव्रीहि]

असपर्यन् सेवन्ते ३ ९.६. सेवेरन् ३३ ७ [सपर्यति परिचरणकर्मा निघ० ३.५. ततो लङ्]

असबन्धुः यथाऽसमाना बन्धवो यस्य स (जन.) ५.२३ [समानबन्धुपदयोर्बहुव्रीहि । समानस्य सादेश 'ज्योतिर्जनपद०' अ० ६ ३ ८५ सूत्रेण । नञ्समास.]

असमनाः असमानमनस्का (कृषीवला) १ १४० ४. पृथक् पृथग् वर्त्तमाना (अग्नितनी =नाडी) ८ ५ ३ [समान-मनसोर्बहुव्रीहि । समानस्य सादेश । नञ्समास]

असमने अविद्यमान समन सङ्ग्रामो यस्मिंस्तस्मिन् (पथि) ६ ४६.१३ [नञ्-समनपदयोर्बहुव्रीहि । समनम्= सङ्ग्रामनाम निघ० २ १७]

असमरथः अविद्यमान समो रथो यस्य स (ग्रामणी) १५ १७ [नञ्समरथपदयोर्बहुव्रीहि । असमरथ तस्य (आदित्यस्य) रथस्यौतस्यासन्धस्त सेनानी ग्रामण्या-विति कपिकौ तावृतू श० ८ ६ १ १८]

असमष्टकाव्यः असमष्ट न सम्यग् व्याप्त काव्य कवे कर्म यस्य स (इन्द्र =विद्याप्रकाशको जन) २ २१ ४ [असमष्टम्=नञ्+सम्+अशूङ् व्याप्तौ (स्वा०) +क्त काव्यम्=कविप्राति० भावे कर्मणि वा ष्यञ् तयोर्बहुव्रीहि.]

असमः नास्य सम सदृशो यस्य (ईश्वर) ६ ३९ ४ **असमा**=अतुल्यौ सर्वेभ्योऽधिकौ (अध्यापकोपदेशकौ) ६.६७ १. अविद्यमाना समा यस्या साऽनुपमा (मनीषा) १ ५४.८. [नञ्-समपदयोर्बहुव्रीहि]

असमात्योजः असमाति अतुल्यमोजो यस्य स (इन्द्र =ईश्वरोपासको राजा) ६.२६ ६. [असमाति-ओजस् पदयो समास समातिश्च समानार्थे]

असमानः असदृश (व्यक्ति) ५ २३ (नञ्-समानयो समास]

असमानि अन्येषा धनैरतुल्यान्यधिकानि यावत् ७ ४३ १ [नञ्समपदयो समास]

असमाः असदृशी (विद्युत =तडित) २ १३ ७ [नञ्-समपदयो समास । स्त्रियां टाप्]

असम्भवात् अनुत्पन्नात् कारणात् ४० १० [सम्भव =सम्+भू सत्तायाम् (भ्वा०) धातो 'ऋदोरप्' इति कर्तृभिन्ने कारकेऽप् । नञ्समास]

असम्भूतिम् अनाद्यनुत्पन्न प्रकृत्यास्य सत्त्वरजस्तमो-गुणमय जड वस्तु ४० ९ अनुत्पन्न अनादि प्रकृति कारण को स० प्र० ४३२, ४० ९ [सम्भूति =सम्+भू सत्तायाम् (भ्वा०) धातो क्तिन् । नञ्समास]

अष्टादशः अष्टादशधा (तप=सन्तापो गुण)

अष्टापक्षाम् चारो ओर दो दो शाला और उनकी चारो दिशाओ मे दो दो शाला स० वि० १६८, अथर्व० ६ ३ २१ [अष्टन्-पक्षयो समास]

अष्टापदी वेदोपवेदविद्यायुक्ता (विदुषी स्त्री) ११६४४१ **अष्टापदीभिः**=अष्टौ पादौ यासा ताभिर्वाग्भि २ ७ ५ **अष्टापदीम्**=अष्टौ ब्राह्मण-क्षत्रिय-वैश्य-शूद्राश्चत्वारो वर्णा, ब्रह्मचर्य-गृहस्थ-वानप्रस्थ-सन्यासाश्चत्वार आश्रमा पदानि प्राप्तव्यानि यस्यास्ताम् (स्वाहा=वाचम्) ८ ३० [अष्टन्-पादशब्दयोर्बहुव्रीहौ 'सङ्ख्यासुपूर्वस्य' अ० ५ ४ १४० सूत्रेण पादशब्दान्तस्य लोप। 'पाद पत्' इति पदादेशे 'पादोऽन्यतरस्याम्' इति ङीप्। 'छन्दसि चे' ति पूर्वपदस्य दीर्घादेश]

अष्टाविंशतिः अष्टाविंशका विंशति (सङ्ख्या) १८ २५ [अष्टन्-विंशत्यो समास। 'द्व्यष्टन सङ्ख्या-याम्०' इत्याकारादेश]

अष्टाविंशानि दशेन्द्रियाणि, दश प्राणा, मनोबुद्धि-चित्ताऽहङ्कारविद्यास्वभावशरीरबलञ्च ऋ० भू० १६० [अष्टन्-विंशत्यो समास। तत पूरणार्थे डट्। 'ति विंशते-र्डिति' अ० ६ ४ १४२ सूत्रेण तेर्लोप]

अष्टु प्राप्नोतु ८ ६० व्याप्नोतु ७ ३ [अशूङ् व्याप्तौ (स्वा०) धातोर्लोट्। 'बहुल छन्दसी' ति शपो लुक्]

अष्टौ अष्टत्वविशिष्टा सङ्ख्या १८ २५ चतस्रो दिश उपदिशश्च १ ३५ ८ [अष्टन्प्राति० परयो जश्शसो स्थाने 'अष्टाभ्य औश्' इत्यौशादेश]

अष्ट्रा व्यापिका (पशुवर्धनक्रिया) ६ ५३ ६ **अष्ट्राम्**=व्याप्ताम् (पदार्थविद्याम्) ६ ५८.२ कृपि-साधनाऽवयवम् ४ ५७ ४. [अशूङ् व्याप्तौ (स्वा०) धातो 'सर्वधातुभ्य ष्ट्रन्' उ० ४ १५६ सूत्रेण ष्ट्रन् प्रत्यय स्त्रिया टाप्]

अष्ठीवन्तौ ष्ठीवन कफादिकमत्यजन्तौ (कुल्फौ=गुल्फौ) ७ ५० २ [ष्ठिवु निरसने (भ्वा०) धातो शतृ। नञ्समास]

असश्चत सज्ज, प्र०—अत्र सज्जधातो 'बहुल छन्दसि' इति शपो लुक्, लोडर्थे लङ्, व्यत्ययेनाऽऽत्मनेपदञ्च १ ३३ ३ [षञ्ज सङ्गे (भ्वा०) धातोर्लङ्। व्यत्ययेनात्मने-पदम्। 'बहुल छन्दसी' ति शपो लुक्]

असक्राम् या सहन क्रामति ताम् (इषम्=अन्न विज्ञान च) ६ ६३ ८ [असक्राम्=असङ्क्रमणीत् नि० ६ २९]

असघ्नोः हिंस्या १ ३१ ३ [षघ हिंसायाम् (स्वा०) धातोर्लङ्]

असङ्ख्याता सङ्ख्यारहितानि (धन्वानि=धनूंषि) १६ ५४ [सम्+ख्या प्रकथने (अदा०) धातो क्त। नञ्-समास]

असचन्त समवयन्ति ३ ३१ ४ [षच समवाये (भ्वा०) धातोर्लङ् व्यत्ययेनात्मनेपदम्]

असजातः यथा य सह न जात (व्यक्ति) ५ २३ [सह+जनी प्रादुर्भावे (दिवा०) धातो क्त। सह स्थाने सादेश। नञ्समास]

असत् भवेत्, प्र०—अत्र 'अस' धातोर्लेट्-प्रयोग १ ९ ५ स्यात् ३३ ६८ अस्तु १२ ६८ है आर्याभि० २ ५०, २५ १८ **असति**=स्यात् ११२४ ११ भवेत् ६ २३ ९ भवति ५ ५३ १५ भवानि ५ ५३ १५ **असथ**=भवत १७ ४६ भवथ ३५.४ **असथः**=भवथ. ६ ६३ १ **असन्**=सन्तु, प्र०—अत्र लेट्-प्रयोग १ ८९.१ सन्ति ३५ १० भवन्ति ७ ८ ५ भवन्तु २५ १४ स्यु ३१ २१ भवेयु, प्र०—अत्र लेट्-प्रयोग १ ३८ १५ **असम्** भवेयम् ३४ ५२ **अससि**=असि प्र०—अत्र 'बहुल छन्दसि' इति शपो लुगभाव ४ ५७ ६ स्या २ २९.२ **असः**=भवेत् ६ ३६ ५ भवे ७ २४ १ **असाम**=भवेम १ ५३ ११ **असि**=भवेत् प्र०—अत्र पुरुषव्यत्ययो लिडर्थे लट् च १ २८ भवति, प्र०—अत्र पुरुषव्यत्यय १ २९ भवति वा, प्र०—अत्र पक्षे पुरुषव्यत्यय २ २१ अस्ति वा, प्र०—अत्र भौतिकपक्षे व्यत्ययेन प्रथमपुरुषो गृह्यते १.८ उत्पादको वर्त्तसे, प्रकाशको वर्त्तते वा १८ भव, प्र०—अत्र लोडर्थे लट् ३ ४८. अस्तु ७ १७. भवसि ४.३२ २ वर्त्तते ५.१ वर्त्तसे ५ २६. सुखदायक होती है स० वि० १६६, अथर्व० ९ २ ३ ७ हो आर्याभि० १ ३९ **अस्ति**=विद्यते १ १७० १ **अस्तु**=भवेत्, प्र०—अत्र लिडर्थे लोट् १ १६ ७ भवति, प्र०—अत्र लडर्थे लोट् १.१३.११ भवतु, भवति वा, प्र०—अत्र पक्षे व्यत्यय १ १३ १०. होवे स० प्र० १८४, १ ३९ २ हो, हो सकता है आर्याभि० २ ४३, ३४ १ **अस्मि**=भवामि, वर्त्ते २ २८ [अस भुवि (अदा०) धातो रूपाणि]

असत् शून्यमाकाशम् ऋ० भू० ११६ अनित्यम्-ऋ० भू० ३२८ अथ० १० ७ १० **असतः**=अविद्यमानस्या-ऽदृश्यस्याऽव्यक्तस्य कारणस्य १३ ३ अविद्या, चक्षुरादि इन्द्रियो से अगोचर इस विविध जगत् की आर्याभि०

असम्मृष्ट. सम्यगशुद्ध (विद्यार्थी जन) ५ ११ ३. [सम्मृष्ट=सम्+मृजूष् शुद्धौ (अदा०) धातो क्त:। नञ्समास]

असंयत: अजितेन्द्रिय (जन) १ ८३ ३ [सयत=सम्+यमु उपरमे (भ्वा०) धातो क्त। नञ्समास]

असरत् सरति गच्छति ४ ३८ ६ सरेत् प्राप्नुयात् ४.२४ १४ [सृ गतौ (भ्वा०) धातोर्लङ्]

असर्जि सृज्यते, प्र०—अत्र लडर्थे लुङ् १ ३८ ८ सृजति ४ २६ ५ सृज्येत ६ ६३ ७ रची गई १ १८१ ७ [सृज विसर्गे (तुदा०) धातोर्लुङ् कर्मणि]

असवे प्राणाय, भा०—प्राणादिशुद्धये २२ ३० [असुरिति प्राणनाम, अस्त शरीरे भवति नि० ३ ८]

असश्चतम् जानीतम्, प्र०—अत्र लोडर्थे लङ्, सश्चतीति गतिकर्मा निघ० २ १४, १ ११२ ६ अप्राप्तम् (धेनु=गामिव वाणीम्) २ ३२ ३ [सश्चतीति गतिकर्मा निघ० २ १४ ततो लङ्]

असश्चत: असज्यमाना (भद्रा वीरा) २ २५ ४ असमवेता (जना.) १ ११२ २ विभाग प्राप्ता (द्वार=द्वाराणि), प्र०—अत्र 'सस्ज गतौ' इत्यस्य व्यत्ययेन जकारस्य चकार १ १३ ६ परस्पर विलक्षणा (वाच) १.१४२ ६ **असश्चता**=विलक्षणस्वरूपे (भूमिसूर्यौ) १ १६० २ [षस्ज गतौ (भ्वा०) धातो शतृप्रत्यय। नञ्समास। वर्णव्यत्ययेन जकारस्य चकार]

असश्चन्ती असमवयन्ती (धारा=प्रवाहवद्वाणी) ३ ५७ ६. पृथक् पृथग् वर्त्तमाने (रोदसी=सूर्यभूमी) ६ ७० २ [षच समवाये (भ्वा०) धातो शत्रन्ताद् ङीप्। नञ्समास। असश्चन्ती असज्यमाने इति वा। अव्युदस्यन्त्याविति वा नि० ५ २]

अससन्त: जागृता (सिन्धव) १ १४३ ३ [षस स्वप्ने (अदा०) धातो शतृ प्रत्यय.। नञ्समास। सस्तिरवपितिकर्मा। निघ० ३ २२]

अशस्तन हिंसन १ १६१ ११ [असस्तन अस्वपथ नि० ११ १६]

असहन्त सहन्ते ३ २६ ६ [षह मर्षणे (भ्वा०) धातोर्लङ्]

असयो: भुजदण्डमूलयो ५ ५७ ६ [अस गत्यादिषु (भ्वा०) धातो 'असे सन्' उ० ५ २१ सूत्रेण सन् प्रत्यय। तत षष्ठी सप्तमी वा]

असादि आसद्यते ७ ७ ५ सद्यते १.६० २. सीदेत् ५.४६ ७ [षद्लृ विशरणगत्यवसादनेषु (भ्वा०) धातोर् कर्मणि लुङ्]

असानिषम् सम्भज्य प्राप्नुयाम् ६ ४७ २३. [षण सम्भक्तौ (भ्वा०) धातोर्लुङ्]

असामि अतुलम् (महाविद्वज्जनम्) ६.३८ ५. अनल्पम् (अतुला वृद्धिम्) ६ १६ २ सम्पूर्णम् (सुखम्) प्र०—सामीति खण्डवाची न सामि असामि १ ३९ ६ **असामिभि:**=क्षयरहिताभि ऊतिभि, प्र०—अत्र षै क्षये इत्यस्माद् बाहुलकादौणादिको मि प्रत्यय १ ३९ ६ [सामि खण्डवाची, स्वरादिषु पाठादव्ययम्। नञ्समास। असामि=सामिप्रतिषिद्धम्। सामि स्यते। असुसमाप्तम् नि० ६ २३ षो अन्त कर्मणि (दिवा०) धातोर्बाहुलकान् मि प्रत्यये सामि]

असामिशवस: अखण्डितबला (नर=नायका जना) ५ ५२ ५ [असामि व्याख्यातम्। शवम् बलनाम निघ० २.९ तयोर्बहुव्रीहि]

असावि उत्पाद्यते १ ८४ १. सूयते ७ २१ १. **असावीत्** सुनोति १ १२४ १ प्रसुवति १ १५७ १ [षु प्रसवैश्वर्ययो (भ्वा०) धातो कर्मणि लुङ्]

असिक्नी: रात्री, प्र०—असिक्नीति रात्रिनाम निघ० १ ७, ७ ५ ३ **असिक्न्याम्**=रात्रौ ४.१७ १५ [असिक्नी रात्रिनाम निघ० १ ७. असिक्न्यशुक्लाऽसिता नि० ९ २४ 'सितम्' शुक्लवर्णनाम, तत्प्रतिषेधोऽसितम्। क्तार्थे 'छन्दसि क्नमित्येके' अ० ४ १.३९ वार्ति० क्नम् ङीप् च]

असिञ्चत् सिञ्चति ३ ४८.२ **असिञ्चतम्**=सिञ्चतम् १ ११६ ७ **असिञ्चन्**=सिञ्चन्ति १ ८५ ११ [षिच् क्षरणे (तुदा०) धातोर्लङ्। 'शे मुचादीनाम्' इति नुमागम]

असितग्रीव: असिता कृष्णा ग्रीवा शिखा यस्य स (भा०—अग्नि) २३ १३ [असितो व्याख्यात:। ग्रीवा=निगलनि यया सा शरीरावयव, 'शेवायह्वजिह्वाग्रीवा०' उ० १ १५४ सूत्रेण निपातनात् साधु। तयोर्बहुव्रीहि.। अग्निर्वाअसितग्रीव श० १३ २ ७ २]

असितम् निकृष्टवर्ण तम. ४ ५१ ९ कृष्ण तम ४ १३.४ कृष्ण (रूपम्) १९.८९ **असित:**=कृष्णगुण पशुविशेष २४ ३७ बन्धनरहित (पशु) प० वि०। अबद्ध (सूर्य) १ ४६ १० [षिञ् बन्धने (स्वा०) धातो क्तप्रत्यये सित। तत्प्रतिषेधोऽसित। असितो धान्वो राजेत्याह

असूदयत् सूदयत् क्षरयेत् ३ ३१ ७ **असूदयतम्**=सञ्चालयेयु १ ७२ ३. [षूद क्षरणे (चुरा०) धातोर्लङ्]

असूम् याऽस्यति प्रक्षिपति ताम् (स्त्रियम्) ३०.१४ [असु क्षेपणे (दिवा०) धातोर्बाहुलकादु प्रत्यय. । स्त्रियाम् ऊङ्]

असूर्त्ते अप्राप्ते परोक्षे (रजसि=लोके), प्र०—अत्र सृधातो क्तान्त निपातनम् 'नसत्तनिषत्त०' इत्यनेन निपात्यते १७ २८ [सृ गतौ (भ्वा०) धातो क्तप्रत्यये 'नसत्तनिषत्त०' अ० ८ २.६१ सूत्रेणोत्त्वं निपात्यते । नञ्समास । असूर्त्ते असुमीरिता वातसमीरिता माध्यमिका देवगणा नि० ६ १५]

असूर्ये अविद्यमान सूर्यो यस्मिँस्तस्मिन् (तमसि=रात्रौ) ५.३२ ६ [नञ्सूर्यपदयो समास । सूर्य—षूङ् प्राणिगर्भविमोचने (अदा०) सृ गतौ धातोर्वा 'राजसूयसूर्य०' अ० ३ १ ११४ सूत्रेण क्यप् प्रत्यय, सुवते रुडागम, सर्त्ते-रुत्व वा निपात्यते]

असृक् रुधिरम् १ १६४ ४

असृक्षत सृजेयु १ १३५ ६ सृजन्तु ५ ५२ ६. **असृक्षि**=सृजति २ ३५ १ **असृक्ष्महि**=ससृजेम, प्र०—अत्र व्यत्ययेनात्मनेपदम् २० २२ **असृग्रम्**=सृजामि विविधतया वर्णयामि, प्र०—अत्र 'बहुल छन्दसि' अ० ७ १ ८ अनेन सृजधातोरुडागम वर्णव्यत्ययेन जकारस्थाने मकार, लडर्थे लङ् च १ ६ ४ **असृजत्**=सृजति ४ १८ ७ सृजते ३ १ ६ **असृजत**=युक्त करो १ ११० ८ **असृजन्त**=सृजन्ते ४ १६ २ **असृजः**=सृजे १ १३०.५ सृजति ५ ३२ १ सृजेत् ६ १७ ६ [सृज विसर्गे (तुदा०) धातोर्लुङ् । छान्दसत्वात् क्स प्रत्यय]

असृज्यत सृष्टम् १४ २६ सृष्ट १४ २८ **असृज्यन्त**=निर्मिता (वनस्पतय) १४ ३१. उत्पादिता १४ २६ सृज्यन्ते १४ २८ समृद्धानि कुर्वन्ति १४ २८ सृष्टा (सिंहादय पशव) १४ ३० **असृज्येताम्**=रचे हैं १४.३०. [सृज विसर्गे (तुदा०) धातो कर्मणि लङ्]

असृपत् सर्पति १३ ३१ [सृप्लृ गतौ (भ्वा०) धातोर्लङ् । विकरणव्यत्ययेन श प्रत्यय]

असेधः निवारयतु ५.३१ ७ **असेधत्**=सेधते ६ ४७ २१ [षिधु गत्याम् (भ्वा०) धातोर्लङ् । सेधति गतिकर्मा । निघ० २ १४ अत्र निवारणार्थेऽपि]

अस्कन्नम् अविक्षुब्धम् (आज्य=घृतादिकम्) २ ८, [स्कन्दिर् गतिशोषणयो. (भ्वा०) धातो. क्त । नञ्समास]

अस्कभायत् प्रतिबध्नाति ४ १८ स्तभ्नाति १ १५४ १ [स्कभि प्रतिबन्धे (भ्वा०) धातोर्णिचि लङ् । छान्दसत्वात् नुमभाव]

अस्कभ्नाः प्रतिबध्नामि प्रतिबध्नाति वा । ५ १६. [स्कम्भुरिति सौत्रो धातु । ततो लङि 'स्तम्भुस्तुम्भुस्कम्भु०' अ० ३ १ ८२ सूत्रेण श्नाप्रत्यय]

अस्कृधोयु य आत्मन कृधु ह्रस्वत्व नेच्छति, (विद्यार्थिजन), प्र०—अत्र 'सुपा सुलुक्०' इति सुलोप ६ ६७ ११ अस्थूलम् ७ ५३ ३ **अस्कृधोयुः**=अपरिच्छिन्न (परमात्मा) ६ २२ ३ [अस्कृधोयु अकृध्वायु । कृध्विति ह्रस्वनाम निकृत्त भवति नि० ६ ३ कृधु ह्रस्वनाम निघ० ३ २]

अस्तभायत् स्तभ्नाति स्थिरी करोति ६.४४ २२ **अस्तभाय**.=स्तभान १.६२ ५ **अस्तभ्नात्**=स्तभ्नाति धरति २ १२ २. स्तभ्नामि स्तभ्नाति धरति वा प्र०—अत्र लडर्थे लङ् ४ ३० स्तम्भितवानस्मि ऋ० भू० १४४ वे० को०, ६ ४७ ५ **अस्तभ्नाः**=स्तभ्नाति २ १३ १० [स्तम्भुरिति सौत्रो धातु । ततो णिचि लङि रूपम् । मकारलोपश् छान्दस । अन्यत्र—'स्तम्भुस्तुम्भु०' अ० ३ १ ८२ सूत्रेण श्नाप्रत्यय]

अस्तम् सुखमय गृहम्, भा०—दिव्यसुखयुक्त मोक्षाख्य व्यावहारिक चाऽऽनन्दम्, प्र०—अस्तमिति गृहनामसु पठितम् निघ० ३.४, ३ ४७ अस्यन्ति दूरीकुर्वन्ति दु खानि यस्मिँस्तद् गृहम् १ ११६.५ घर को स० वि० १३८, अथर्व० १४.२ २६ [अस्तं गृहनाम निघ० ३.४. गृहा वा अस्तम् श० २ ५ २.२६]

अस्तम् प्रक्षिप्ताम् (स्त्रियम्) ४.१६ १० प्रक्षिप्त प्रेरितम् (विद्युदग्निम्) ५ ६ १ क्षिप्त चालित यानम् ऋ० भू० १६३ [असुक्षेपणे (दिवा०) धातोर्बाहुलकात् त प्रत्यय]

अस्तमिव गृह प्राप्येव १ ११६ २५ [अस्त गृहनाम निघ० ३.४.]

अस्तमीके समीपे १ १२६ ६. [अस्तमीके अन्तिकनाम निघ० २.१६]

अस्तम्भीत् उत्तभ्नाति ३ ५ १०. [स्तम्भुरिति सौत्रो धातु, ततो लुङि रूपम् । 'जृस्तम्भु०' अ० ३ १ ५८ सूत्रेणाङभावे सिच्]

अस्तवे असितु प्रक्षेप्तुम्, प्र०—अत्र असधातोस्तुमर्थे तवेन् प्रत्यय १६ ३

अ० ३ २ ३ इत्यसूपपदाद् ग धानो क १ ३५ १० **असुरा**=प्राणवद् बलिष्ठौ (अध्यापकोपदेशकौ) १ १५१ ४ यावसुपु रमेते तौ (मित्रावरुणा=अध्यापकोपदेशकौ) ७ ३६ २ प्र०—अत्राऽऽकारादेशो 'बहुल छन्दसि' इति ७ ३६ २ **असुरान्**=दुष्टकर्मकारिणो मूर्खान् पाखण्डिनो जनान्, दैत्यरक्ष स्वभावान् (दुर्जनान्) ऋ० भू० २३७ **असुराय**=मेघाय ५ ४१ ३ **असुराः**=प्रकाशरहिता (सत्वन) १ ६४ २ अविद्वासो दुष्टस्वभावा (जना) २ २६ धर्माऽऽच्छादका (भा०—दुष्टा मनुष्या) २ ३०. **असुरैः**=अविद्वद्भि, अन्तकरूपाभि प्रजाभिर्वा १७ २६ विद्याहीनैर्मनुष्यै १ १०८ ६ [असुर=मेघनाम निघ० १ १० असुरा=असुरता स्थानेष्वस्ता स्थानेभ्य इति वा। अपि वा ऽसुरिति प्राणनामास्त शरीरे भवति, तेन तद्वन्त नि० ३ ८ देवाश्च वा असुराश्च प्रजापतेर्द्वया पुत्रा आसन् ता० १८ १ २ असुर, तेऽसुरा भूयासो बलीयाꣳस (प्रजापते पुत्रा) आसन् ता० १८ १ २ कनीयस्विन इव वै तर्हि (युद्धसमये) देवा आसन् भूयस्विनोऽसुरा ता० १२ १३ ३१ कनीयसा एव देवा ज्यायसा असुरा श० १४ ४ १ (असुरा) स्वेष्वेवास्येषु जुह्वतश्चेरु श० ११ १ ८ १ मायेत्यसुरा (उपासते) श० १० ५ २.२० असुर, असुरमायया कौ० २३ ४ असुर, आसुरी माया स्वधया कृतासीति प्राणो वा ऽसुस्तस्यैषा माया स्वधया कृता श० ६ ६ २ ६ असुर, (प्रजापति) तेभ्य (असुरेभ्य) तमश्च माया च प्रददौ श० २ ४ २ ५ अहर्वै देवा अश्रयन्त रात्रिमसुरा ऐ० ४ ५ अहर्वै देवा अश्रयन्त रात्रिमसुरा गो० उ० ५ १ (असुरा प्रजापतिमब्रुवन्) दयध्वमिति न आत्थेति श० १४ ८ २ ४ योऽपक्षीयते तम् (अर्धमासम्) असुरा उपायन् श० १ ७ २ २२ असुरा वा एषु लोकेष्वासꣳ स्तान् देवा ऊर्द्वसद्मनेन (साम्ना) एभ्यो लोकेभ्य प्राणुदन्त ता० ६ २ ११ ततोऽसुरा एषु लोकेषु पुरश्चक्रिरे ऽयस्मयीमेवास्मिंल्लोके रजतामन्तरिक्षे हरिणी (सुवर्णमयीम्) दिवि श० ३ ४ ४ ३ अर्वा (भूत्वा) असुरान् (अवहत्) श० १० ६ ४ १ मनो वा असुरम्। तद्धचसुषु रमते जै० उ० ३ ३५ ३]

असुरघ्नः दुष्टकर्मकारिणा हन्ता (विद्वज्जन) ६ २२ ४ **असुरघ्ने**=योऽसुरान् दुष्टकर्मकारिणो हन्ति तिरस्करोति तस्मै (यतये=सन्यासिने) ७ १३ १ [असुरो व्याख्यात। तदुपपदे हन हिंसागत्यो (अदा०) धातो 'कृत्यल्युटो बहुलमि' ति वार्त्तिकेन बहुलग्रहणाट् टक् प्रत्यय]

असुरत्वम् अस्यति प्रक्षिपति दूरीकरोति सर्वाणि दुःखानि तस्य भावम् (अद्वितीय ब्रह्म) ३ ५५ ४ प्रज्ञा, शास्त्रशिक्षायुक्तप्रज्ञा मे रमण के भावार्थ को स० प्र० ११०, ३.५५ १६ प्राणेषु क्रीडमानम् (सर्वान्तर्यामि ब्रह्म) ३ ५५ २ यदसुषु प्राणेषु रमते तत् (अद्वितीय ब्रह्म) ३ ५५ १. प्राणाधारम् (ऋत=सत्यम्) ३ ५५ ३. प्रक्षेप्तृत्वम् (असहाय ब्रह्मतेज) ३ ५५ ६ सर्वेषा प्रक्षेप्तारम् (चेतनमात्रस्वरूप ब्रह्म) ३ ५५ ५ [असुरप्राति० भावे कर्मणि वा त्व प्रत्यय। असुरत्वमेक प्रज्ञावत्त्व वा अनवत्त्व वा। असुरिति प्रज्ञानाम, अस्यत्यर्थान् अस्ताश्चास्यामर्था। अपि वा असुरत्वमादिलुप्तम् नि० १० ३४]

असुर्य ! असुरेषु प्रवासरहितेषु साधो (बृहस्पते=परमेश्वर) २ २३ २ **असुर्यम्**=असुरस्य मेघस्य भवम् (मेघाज्जलमिव बहुविधमैश्वर्यम्) ३ ३८ ७ असुरेषु अविद्वत्सु भवम् (सङ्गम्) ६ ३६ १ असुरेषु मेघेषु प्राणक्रीडासाधनेषु भव द्रव्यम् ८ २४ असुरस्य मेघस्येद स्वकीय स्वरूपम् ७ ५ ६ असुराणामविदुषा स्व धनम् २ २७ ४ असुरसम्बन्धिनम् (विद्योपदेशम्) ५ १० २ असुरस्य स्वम् (असुरभावम्) २ ३३ ६ असुरेभ्यो विद्वद्भ्यो हित (क्षत्र—धन राज्य वा) ५ ६६ २ असुराणा मूढाणा पापिनामिदमैश्वर्यम् ६ २० २ **असुर्यस्य**=असुरेषु मूर्खेषु भवस्य (अज्ञानस्य) ७ २२ ५ मेघे भवस्य (जलस्य) २ ३५ २ **असुर्यः**=असुभ्य प्राणेभ्यो हित (परमेश्वर) ३३ ४० **असुर्याणि**=असुराणा मेघानामिमानि चिह्नानि ४ ४२ २ **असुर्यात्**=असुराणा दुष्टाना निजव्यवहारात् १ १३४ ५ **असुर्याय**=असुरेषु अविद्वत्सु भवायाऽविदुषे (जनाय) ४ १६ ३ **असुर्याः**=असुराणा प्राणपोषणतत्पराणामविद्यादियुक्तानामिमे सम्बन्धिनस्तत्सदृशा पापकर्माणि (दुर्जना) ४० ३ [असुरप्राति० साध्वर्थे भवार्थे वा यत् प्रत्यय]

असुवत् ऐश्वर्ययोग कुर्यात् १ ११० ३ [षु प्रसवैश्वर्ययो (भ्वा०) धातोर्लङ्। विकरणव्यत्ययेन श प्रत्यय]

असुष्वीन् अभिषवस्याऽकर्त्तॄन् (दुर्जनान्) ६ ४४ ११ येऽसूनभिषुण्वन्ति तान् (आप्तान् जनान्) ४ २४ ५ [षुञ् अभिषवे (स्वा०) धातोर्वि प्रत्यय षुगागमश्च बाहुलकाद्। ततो नञ्समास]

असुष्वेः अलसस्याऽनिष्पादकस्य ४ २५ ६ [पूर्वपदे व्याख्यातम्]

असूत सूते जनयति ३ ३१ ३ [षूङ् प्राणिगर्भविमोचने (अदा०) धातोर्लङ्]

निन्दार्थे इनि प्रत्यय २ २७ [ष्ठा गतिनिवृत्तौ (भ्वा०) धातो 'स्थ किच्च' उ० ५ ४ सूत्रेण ऊरन् प्रत्यय.। ततो निन्दार्थे इनि प्रत्यय । नञ्समासश्च]

अस्ना रुधिराणि, २५ ६ [असृज् रुधिरम् । तस्य स्थाने टा प्रत्यये 'पद्दन्नोमास्हृन्निशसन्०' अ० ६ १ ६३ सूत्रेण 'असन्' आदेश]

अस्नातारा स्नानादिकर्मरहितौ (मनुष्यौ) ४ ३० १७ **अस्नातॄन्**=अस्नातकान् (अयज्ञस्नानकर्त्तृकान् जनान्) २ १५ ५ [ष्णा शौचे (अदा०) धातो. कर्त्तरि तृच्। नञ्समासश्च]

अस्नाविरम् नाड्यादिसम्बन्धरहितम् (ब्रह्म=ईश्वर.) ४० ८ नाड्यादिसम्बन्धरहितत्वाद् बन्धनावरणविमुक्तम् (ब्रह्म) ऋ० भू० ३६, ४० ८ जो नाडी आदि के बन्धन मे नही आता (ब्रह्म परमेश्वर) स० प्र० २४४, ४० ८ नाडी आदि का प्रतिबन्ध (निरोध) जिसका नही हो सकता और अतिसूक्ष्म होने से जिसको कोई आवरण भी नही हो सकता वह (ब्रह्म=ईश्वर) आर्याभि० २ २, ४० ८

अस्पन्दमानः किञ्चिच्चलित सन् (अग्नि=विद्युदिव राजा) ४ ३ १० [स्पदि किञ्चिच्चलने (भ्वा०) धातो शानच् । नञ्समासश्च]

अस्पष्ट स्पशते, प्र०—अत्र लडर्थे लड् 'बहुल छन्दसि' इति शपो लुक् १ १० २ [स्पश बाधनस्पर्शनयो (भ्वा०) धातोर्लङ् । 'बहुल छन्दसी' ति शपो लुक्]

अस्पः प्रीणय ५ १५ ५ [स्पृ प्रीतिपालनयो (स्वा०) धातोर्लङ् 'बहुल छन्दसीति' शपो लुक्, ततश्च श्नुरपि न भवति]

अस्पृक्षत् स्पृहेत् २८ १८ **अस्पृक्षः**=स्पृश, प्र०—अत्र लोडर्थे लङ् ६ २ [स्पृश सस्पर्शने (तुदा०) धातोर्लुङ् 'स्पृशमृश०' अ० ३ १ ४४ वार्त्तिकेन वा क्स प्रत्यय]

अस्पृध्रन् स्पर्द्धन्ताम् ६ ६६ ११ स्पर्द्धन्ते ७ ५६ ३. [स्पर्द्ध सघर्षे (भ्वा०) धातोर्लङ् छान्दस रूपम्]

अस्पृशत् स्पृशति ६ ८ २ **अस्पृशन्त**—स्पर्श करते है स० वि० १७० वे० को०, अय० १४ २ ३२ [स्पृश सस्पर्शने (तुदा०) धातोर्लङ्]

अस्फुरत् स्फुरति सञ्चालयति २ १२ १२ वर्धयति २ ११ ६ [स्फुर सञ्चलने (तुदा०) धातोर्लङ्]

अस्मत्रा अस्मासु १ १३२ २ अस्मासु मध्ये १ १३७ १ [अस्मद् सर्वनाम्न. 'देये त्रा च' अ० ५ ४ ५५, सूत्रेण तदधीनवचने त्रा प्रत्यय]

अस्मत्राञ्चः ये शत्रुभ्योऽस्मांस्त्रायन्ते तानञ्चन्ति प्राप्नुवन्ति ते (राज्यकर्माधिकारिणो जना) ६ ४४ १६ [अस्मत्रोपपदे अञ्चु गतिपूजनयो (भ्वा०) धातो 'ऋत्विग्-दधृक्०' अ० ३ २ ५६ सूत्रेण क्विन् प्रत्यय]

अस्मत्सखा अस्माक मित्रम् (राजा) ६ ४७ २६. वय सखायो यस्य स (राजा) ८ ५० [अस्मद्-सखि-शब्दयो समास]

अस्मद्र्यक् योऽस्मानञ्चति सर्वज्ञतया जानाति (इन्द्र=भगवान्) ७ ३६ अस्माक सम्मुखीभूत (इन्द्र=सूर्य.) ६ १६.१ योऽस्मानञ्चति स (इन्द्र=परमैश्वर्यप्रदो न्यायेश) ६ १६ ३ योऽस्मानञ्चति जानाति ज्ञापयति वा (राजा) ५ ४ २. योऽस्मानञ्चति प्राप्नोति (शक्ति=सामर्थ्यम्) ४.२२.८ **अस्मद्र्यञ्चः**=येऽस्मानञ्चन्ति प्राप्नुवन्ति ते (विद्वासोऽध्येतारश्च) ७ १६ १० [अस्मद्युपपदे अञ्चु गतिपूजनयोर्धातो क्विन् । 'विष्वग्देवयोश्च टेरद्र्य०' अ० ६ ३ ६२ सूत्रेण सर्वनाम्न टेरद्रिरादेश]

अस्मद्राता येऽस्मभ्य रान्ति शुभान् गुणान् ददति ते (राजसभासेनाजना) ७ ४६ [अस्मद्+रा दाने (अदा०) धातोस्तृच् प्रत्यय । व्यत्ययेनैकवचनम्]

अस्मध्रुक् योऽस्मान् द्रोग्धि (दुर्जन) १ १७६ ३ अस्मान् द्रुह्यति य स (मर्त्य.) १ ३६ १६ [अस्मद्+द्रुह जिघासायाम् (दिवा०) धातो क्विप् । छान्दसो दकार-लोपश्च]

अस्मयुम् अस्मान् पाययितारम् (अग्नि=प्रसिद्ध विद्युत वा) प्र०—अत्राऽस्मदुपपदाद्याधातोरौणादिक कु 'छान्दसो वर्णलोपो वा' इति दलोप ११ १३ **अस्मयुः**=योऽस्मान् याति स (शिल्पी जन) ५ ७४ ८ अस्मान् कामयमान (राजा) ६ ४८ २ अस्मान्वात्मानमिच्छु (विद्वज्जन) १.१३१ ७ अहमिवाऽऽचरन् (विद्वज्जन) १ १३५ २ योऽस्मान् कामयते (विद्यार्थी जन) २७ ४४ आत्मनोऽस्मानिच्छुरिव (इन्द्र=विद्वज्जन) ३ ४२ १ **अस्मयू**=आवामिवाचरन्तौ (इन्द्रवायू=सर्पपवनाविवा-ऽध्यापकोपदेशकौ १ १३५ ५ अस्मानिच्छन्तौ (अध्यापकोपदेशकौ) १ १५१ ७ [अस्मद् सर्वनाम्न 'उपमानादाचारे' अ० ३ १ १० सूत्रेण क्यच् प्रत्यय । 'क्याच्छन्दसि' अ० ३ २ १७० सूत्रेण उ प्रत्यय । छान्दसो दकारलोपश्च । अग्नि भरन्तमस्मयुमित्यग्नि भरन्तमस्मत्प्रेषितमित्येतत् श० ६ ३ २ ३]

अस्तः प्रक्षिप्त (राजजन) २ ११ २० योऽस्यति स (राजा) ७ १८ ११ [असु क्षेपणे (दिवा०) धातोर्बाहुलकात् त प्रत्यय]

अस्ता शस्त्राऽस्त्राणां प्रक्षेप्ता (इन्द्र =सर्वसेनाधिपति) १७ ३५ **अस्तारः**=प्रक्षेप्तार (नर =नायका जना) १ ६४ १० **अस्तुः**=शत्रूणां विजेतु प्रक्षेप्तु (वीरजनस्य) १ ६६ ४ प्रक्षेप्तु (शिल्पिनो विदुष) १ १४८.४ **अस्तृभिः**=सर्वशस्त्राऽस्त्रप्रक्षेपणदक्षै (शूरेभि =योद्धृभि शूरवीरै) १ ८ ४ [असु क्षेपणे (दिवा०) धातो कर्त्तरि तृच् प्रत्यय]

अस्ता इव यथा शस्त्राणां प्रक्षेप्ता (शूरवीरो जन) १ ७० ६ [असु क्षेपणे (दिवा०) धातोस्तृच्]

अस्तातिम् गृहस्थम् ५ ७ ६ [अस्त गृहनाम निघ० ३ ४ अाति =अत सातत्यगमने (भ्वा०) धातो 'अज्यतिभ्या च' उ० ४.१३१ सूत्रेण इण्। तयो समास]

अस्तारि तीर्यते ६ ६३ ३ [स्तृञ् आच्छादने (स्वा०) धातो कर्मणि लुङ्]

अस्तावि स्तूयते ६.२३ १० [ष्टुञ् स्तुतौ (अदा०) धातो कर्मणि लुङ्]

अस्तुतः अप्रशसित (सखा) ५.६७ ५ [ष्टुञ् स्तुतौ (अदा०) धातो क्तः]

अस्तुवत प्रशसत १४ ३१ प्रशसन्तु १४ २६ स्तुवन्तु १४ २८ स्तुवन्तु सङ्ख्यायन्तु १४ २६. [ष्टुञ् स्तुतौ (अदा०) धातोर्लङ्]

अस्तृणन् विस्तारयन्ति ३ ६ ६ आच्छादयन्तु ३३ ७ आच्छादयन्ति १ १८८ ४ [स्तृञ् आच्छादने (क्र्या०) धातोर्लङ्]

अस्तृतः अहिंसितस्सन् (मनुष्य) १ ४१ ६ **अस्तृतम्**=हिंसारहितम् (सत्यम्) १ १५ ५ [स्तृणाति वधकर्मा निघ० २ १६ तत क्त। नञ्समास]

अस्ते गृहे वा प्रक्षेपणे ७ १ २ [अस्त गृहनाम निघ० ३ ४]

अस्तेव गृहाणीव ४ ३१ ३ [अस्त गृहनाम, तदिव]

अस्तेव प्रेरक सारथिरिव ६ २० ६ [असु क्षेपणे (दिवा०) धातोस्तृच्]

अस्तोढ्वम् स्तुवत १ १२४ १३ **अस्तोषत**=स्तुवन्ति प्र०—अत्र लडर्थे लुङ् ३ ५१ स्तुत १ ८२ २ **अस्तोषि**=प्रशससि ५ ४१ १० स्तौमि १ १२२ १ **अस्तोष्ट**=स्तौति १ ७७ ५ [ष्टुञ् स्तुतौ (अदा०) धातोर्लुङ्]

अस्तोभयत् बन्धयति १ ८८ ६ [ष्टुभु स्तम्भे (भ्वा०) धातोर्णिचि लाङि रूपम्]

अस्त्रिधम् अहिंसनीयम् (अश्विना =अध्यापकमुपदेशक च) २५ १६ [नञ्पूर्वात् स्रिधक्षये धातोर्घञर्थे क प्रत्यय]

अस्थभिः अस्थिरैश्चञ्चलै किरणचलनै १ ८४.१३ **अस्थभ्यः**=शरीरस्थकठिनाऽवयवेभ्य, सूक्ष्माऽवयवाऽस्थिरूपेभ्य ३६ १० अस्थिभ्य, प्र०—छन्दस्यपि दृश्यते, इत्यनेन हलादावप्यनङ् २३ ४४ [असु क्षेपणे (दिवा०) धातो 'असिसञ्जिभ्या क्थिन्' उ० ३ १५४ सूत्रेण क्थिन् प्रत्यय। अस्यति प्रक्षिपति येन तदस्थि। 'छन्दस्यपि दृश्यते' अ० ७ १ ७६ सूत्रेणानङ्। षष्टिश्च ह वै त्रीणि च शतानि पुरुषस्यास्थीनि श० १० ५ ४.१२. अस्थि वा एतत् यत्समिध तै० १ १ ६ ४ अस्थीनि वै समिध श० ६ २ ३ ४६ अस्थीष्टका श० ८ १ ४ ५, ८ ७ ४ १६ अस्थि प्रतिहार जै० उ० १ ३६ ६ सप्त च ह वै शतानि विंशतिश्च सवत्सरस्याहानि च रात्रस्याहानि च रात्रयश्चेत्येतावन्त एव पुरुषस्यास्थीनि च मज्जानश्चेत्यत्र तत्समम् गो पू० ५ ५]

अस्थन्वन्तम् अस्थियुक्त देहम् १ १६४ ४ [अस्थिप्राति० मतुप् प्रत्यय। 'छन्दस्यपि दृश्यते' अ० ७ १ ७६. सूत्रेणानङ्]

अस्थात् तिष्ठेत् १ १६२.२१ तिष्ठति ३ ६१.६ उत्तिष्ठति उदेति ३४ २६. वर्त्तते ४ ५१ १ स्थितवानस्ति १ ३५ १० तिष्ठते २ ४ ७ **अस्थाम्**=तिष्ठेयम् ४ २८ [ष्ठा गतिनिवृत्तौ (भ्वा०) धातोर्लुङ्। 'गातिस्थाघु०' सूत्रेण सिचो लुक्]

अस्थित तिष्ठते १ ४० ७ **अस्थिरन्**=स्थिरा इवाचरेयु १ १३५ १ स्थिरा स्यु १ १३५ १ तिष्ठेरन्, प्र०—अत्र लिङर्थे लुङ् 'वाच्छन्दसि' इति झस्य रनादेश 'छान्दसो वर्णलोप' इति सिच सलोप १ ६४ ११ तिष्ठन्ति १ ८० ७ **अस्थु**=आतिष्ठन्ति ६ ४४ २० तिष्ठन्ति ७ ४३ २ तिष्ठेयु १७ ५६ सन्ति ५ ७६.१ तिष्ठन्तु १ १२३ ६ उत्तिष्ठन्तु ७ ६० ४ प्राप्नुवन्तु ४.४१ ८. [ष्ठा गतिनिवृत्तौ (भ्वा०) धातोर् लुङ्। व्यत्ययेनात्मनेपदम् 'स्थाघ्वोरिच्चे' ति कित्त्वमित्त्व च]

अस्थूरि अशिथिर यानम् ६.१५ १६ तिष्ठन्ति यस्मिस्तालस्थे तत्स्थूर, तन्निन्दित विद्यते यस्मिन् तत् स्थूरि, न स्थूरि यथा स्यात्तथा (गार्हपत्यानि कर्माणि), प्र०—अत्र

शापय ७ १६ ४ [जिप्वप् शये (अदा०) धातोर्णिचि लङ्]

अस्वाप्सम् शब्दयत २ ११ ७ [स्वृ शब्दोपतापयो (भ्वा०) धातोर्लुङ् । 'सनीवन्तर्द्धभ्रस्जदम्भु०' अ० ७ २ ४६ सूत्रेणेड्विकल्प]

श० ३ २ ३ ६ असौ वा आदित्य एकाकी चरति तै० ३ ९ ५ ४ आदित्यस्त्वेव सर्वऽऋतव । यदैवोदेत्यथ वसन्तो-यदा सगवोऽथ ग्रीष्मो यदा मध्यन्दिनोऽथ वर्षा यदा-पराह्णोऽथ शरद् यदैवास्तमेत्यथ हेमन्त श० २ २ ३ ९ आदित्य त्रिर्ह वा एष (मघवा=इन्द्र=आदित्य) एतस्या मुहूर्त्तस्येमाम्पृथिवी समन्त पर्येति जै० उ० १ ४४ ९ एष ह वा अह्ना विचेता योऽसौ (सूर्य) तपति गो० उ० ६ १४ एष (आदित्य) ह वा अह्ना विचेतयिता ऐ० ६ ३५ असौ वाऽ आदित्य पाप्मनोऽपहन्ता श० १३ ८ १ ११ स वा एष (आदित्य) न कदाचनास्तमेति नोदेति। तद् यदेन पश्चादस्तमयतीति मन्यन्ते अह्न एव तदन्त गत्वाथात्मान विपर्य्यस्यतेऽहरेवाधस्तान् कुरुते रात्री परस्तात् गो० उ० ४ १० ऐ० ३ ४४ तस्य (अर्कस्य=आदित्यस्य) एतदन्न तदर्क्यमेष चन्द्रमास्तदर्क्य यजुष्ट श० १० ४ १ २२ प्राङ् चार्वाङ् चादित्यस्तपति ता० १२ १० ६ यस्माद् गायत्रोत्तम-स्तृतीय (त्रिरात्र) तस्मादर्वाङ् आदित्यस्तपति ता० १० ५ २ सहस्र हैत आदित्यस्य रश्मय जै० उ० १ ४४ ५ स एष (आदित्य) एकशतविधस्तस्य रश्मय शत विधा एष एवैकशततमो य एष तपति श० १० २ ४ ३ षष्टिश्च ह वै त्रीणि च शतान्यादित्यस्य रश्मय श० १० ५ ४ ४ षष्टिश्च ह वै त्रीणि च शतान्यादित्य नाड्या समन्त परियन्ति श० १० ५ ४ १४ शतयोजने ह वा एष (आदित्य) इतस्तपति कौ० ८ ३ त (सावित्रमग्नि) स (भरद्वाज) विदित्वा। अमृतो भूत्वा। स्वर्ग लोकमियाय। आदित्यस्य सायुज्यम् तै० ३ १० ११ ५ असौ वा ऽआदित्यो विवस्वानेष ह्यहोरात्रे विवस्ते तमेष (मृत्यु) वस्ते सर्वतो ह्येनेन परिवृत श० १० ५ २ ४ विवस्वान् आदित्यैष ते सोमपीथ श० ४ ३ ५ १८ य (मार्तण्ड) उ ह तद् विचक्रु (देवा आदित्या) स विवस्वानादित्यस्तस्येमा प्रजा श० ३ १ ३ ४ असौ वाऽ आदित्य सूर्य श० ९ ४ २ २३ असावादित्यो देव सविता श० ६ ३ १ १८ आदित्य एष सविता गो० पू० १ ३३ जै० उ० ४ २७ ११ धातासौ स आदित्य श० ९ ५ १ ३७ स एष (आदित्य) सप्तरश्मि-र्वृषभस्तुविष्मान् जै० उ० १ २८ २ सप्त ह्येत आदित्यस्य रश्मय जै० उ० १ २९ ८ 'युक्ता ह्यस्य (इन्द्रस्य) हरयश्शता दश' (ऋ० ६ ४७ १८) इति सहस्र हैत आदित्यस्य रश्मय। तेऽस्य युक्तास्तैरिद सर्व हरति। तद्यदेतैरिद सर्व हरति। तस्माद्धरय (रश्मय) जै० उ० १ ४४ ५ स य स विष्णुर्यज्ञ स। स य स यज्ञोऽसौ स आदित्य (विष्णु=आदित्य) श० १४ १ १ ६ एष वै वृषा हरि (यजु० ३८ २२) य एष (आदित्य) तपति श० १४ ३ १ २६ असौ वै वैश्वानरो योऽसौ (आदित्य) तपति कौ० ४ ३ १९ २ स य स वैश्वानर। असौ स आदित्य श० ९ ३ १ २५ चक्षुस्त्वा ऽएतद् वैश्वानरस्य (यदादित्य) श० १० ६ १ ८ एष वै सुतंतेजा वैश्वानर (यदादित्य) श० १० ६ १ ८ एष (आदित्य) ह्येवाऽऽ-राम् प्रजानामृषभ जै० उ० १ २९.८ आदित्यो वाजी तै० १ ३ ६ ४. असौ वाऽआदित्यो अश्वोऽरुष श० १३ २ ६ १ असौ वा आदित्यो अश्व तै० ३.९ ४ १ आदित्यो वै वृषाकपि गो० उ० ६ १२ असावादित्यो वेन श० ७ ४ १ १४ स य स कूर्मोऽसौ स आदित्य श० ७ ५ १ ६ असौ वै षोडशी योऽसौ (आदित्य) तपति कौ० १७ १ एष (आदित्य) दीक्षित गो० पू० २ १. असौ वाऽ आदित्यो दिव्यꣳ रोचनम् श० ६ २ १ २६ असौ वाऽ आदित्यो दिव्यो गन्धर्व श० ६ ३ १ १९ असौ वाऽ आदित्यो विश्वव्यचा (यजु० १३ ५६) यदा ह्येवैष उदेत्यथेदꣳ सर्व व्यचो भवति श० ८ १ २ १ असौ वाऽ आदित्यो व्यचश्छन्द श० ८ ५ २ ३ असौ वा आदित्यो भा इति जै० उ० १ ४ १ असौ वा आदित्यो हꣳस शुचिषत् श० ६ ७ ३ ११ एष (आदित्य) वै हस शुचिषद् ऐ० ४ २० असौ वाऽ आदित्यस्तप श० ८ ७ १ ५ (आदित्यस्य) पुरुषो यजूꣳषि श० १० ५ १ ५ अथ य एष एतस्मिन् (आदित्य०) मण्डले पुरुष सोऽग्निस्तानि यजूꣳषि स यजुषा लोक श० १० ५ २ १ असौ वाऽ आदित्य एषो ऽग्नि श० ६ ४ १ १ आदित्यो वाऽ अस्य (अग्ने) दिवि वर्च श० ७ १ १ २३ अथ वाऽ अग्निर्ऋतमसावादित्य सत्य यदि वासावृतमयꣳ (अग्नि) सत्यमुभयम्वेतदयमग्नि श० ६ ४ ४ १० एष (आदित्य) वै सत्यम् ऐ० ४ २० सत्यमेष य एष (आदित्य) तपति श० १४ १ २ २२ असावादित्य सत्यम् तै० २ १ ११ १ तद् यत्तत्सत्यम्। असौ स आदित्यो य एष एतस्मिन्मण्डले पुरुष श० १४ ८ ६ २३ सत्य हैतद् यद्रुक्म। ... तद् यत्तत्सत्यम्। असौ स आदित्य श० ६ ७ १ १-२ तस्य (अश्वस्य श्वेतस्य) रुक्म पुरस्ताद् भवति। तदेनस्य रूप क्रियते य एष (आदित्य) तपति श० ३ ५ १ २० असौ वाऽ आदित्य एष रुक्म एष हीमा सर्वा प्रजा अतिरोचते श० ७ ४ १ १० आदित्यो वै भर्ग जै० उ० ४ २८ २ आदित्य एव चरण यदा ह्येवैष उदेत्यथेदꣳ सर्व चरति श० १० ३ ५ ३ आदित्य असौ वाऽ आदित्यो हृदयम् श० ९ १ २ ४० असौ वाऽ आदित्यो द्रप्स श० ७ ४ १ १० असौ वाऽ

नाश न हो और स्वप्रकाशस्वरूप हो वह (ईश्वर) आर्याभि० २४.३२ १ विनाशरहितो परमेश्वरो, जीव, कारणरूपेण प्राणो वा १ २५ १२ **आदित्या**=सूर्य-प्राणौ १ १३६ ३ अविनाशिनौ (सुहृदौ) ५ ६७ १ अखण्डितौ (सूर्याचन्द्रमसौ) २ ४१ ६ **आदित्यान्**=मासानिव वर्त्तमानान् पूर्णविद्यान् (आप्तान् जनान्) ४ २५ ३ सर्वान् मासान् ७ ४४ १ द्वादशमासान् १ १४ ३ कृताष्टचत्वारिंशद्ब्रह्मचर्येण पूर्णविदुष (राज्ञ =नृपान्) ६ ५१ १४ मुख्यान् विदुष २५ १ समाचरिताष्टचत्वारिंशत्सवत्सरब्रह्मचर्याऽखण्डितव्रतान् महाविदुप (जनान्) १ ४५ १ **आदित्यानाम्**=अखण्डितन्यायाधीशानाम् २५ ६ पूर्णब्रह्मचर्यविद्यावताम् सज्जनानाम् २ २७ १३ सूर्यादीना मासाना वा ३ ५६ ४ कालाऽवयवानाम् २४ ३६ मासानामुत्तमाना विदुपा वा १४ २५ सूर्यसम्बन्धिना मासानाम् २४ ६ पूर्णविद्याना विदुपाम् (जनानाम्) ७ ५१ १ **आदित्याः**=द्वादशा मासा, प्र०—कतम आदित्या इति ? द्वादशा मासा सवत्सरस्य एत आदित्या, एते हीद सर्वमाददाना यन्ति तस्मादादित्या इति, शत० १४ ६ ७ ६, २ ५ समाचरितेनाऽष्टचत्वारिंशद्वर्पपरिमितब्रह्मचर्येण गृहीतसमस्तविद्या, अन्व०—पूर्णविद्यया शरीरात्माखिलवला विद्वास (राजान्य) ६ ३४ चैत्रादयो द्वादशा मासा, प्रथम-मध्यमोत्तमविद्वासो वा १४ ३० द्वादशमासा वसुरुद्रादिसञ्ज्ञका विद्वासश्च १४ २० कालाऽवयवा ६ ६२ ८ विद्यायुक्ता प्राणाऽवयवा १५ १२ पूर्णकृतब्रह्मचर्यविद्या (महाविद्वासो जना) ६ ५१ ५. अन्तरिक्षस्य, प्र०—अदितिरित्यन्तरिक्षमित्यस्मादयमर्थो गृह्यते ४ २२ सूर्या २ २७ ८ सूर्यवद्विद्याप्रकाशा २ २७ १६ उत्तमा विद्वासोऽव्यापका ११ ६० उत्तमा विपश्चित ११ ६५ पूर्णविद्यावलप्राप्त्या विपश्चित ११ ५८ कारणरूपेण नित्या सूर्यादय पदार्था ११ ०६ २ द्वादशमासा, किरणास्त्रसरेणवो वा ऋ० भू० १४३ किरणा ऋ० भू० १४७, अथर्व० १४ १ २ वरुणादयो विद्वास (सज्जना) १ ४१ ५ **आदित्येभ्यः**=तेजस्विभ्य (भा०—आचार्येभ्य) ३४ ५४ सवत्सरेभ्य ८ ३ **आदित्यैः**=उत्तमकलैश्च विद्वद्भि, भा०—कालाऽवयवमासै २८ ४ पूर्णविद्यावद्भि (सज्जनै) २६ ८ पूर्णविद्यैर्मनुष्यैर्द्वादशभिर्मासैर्वा ११ ०७ २ सवत्सरस्य मासै कृताऽष्टचत्वारिंशद्वर्पब्रह्मचर्यै सह वा ५ ११ [दो अवखण्डने (दिवा०) धातोर्नञ्पूर्वात् क्तिन् प्रत्ययेऽदिति । 'द्यतिस्यति०' इति सूत्रेणेत्वम् । तत 'दित्यदित्यादित्य०' अ० ४ १ ८५ सूत्रेण ण्य प्रत्यय । आदित्य=आदत्ते रसानादत्ते, भाम ज्योतिपामादीप्तो भासेति वादिते पुत्र इति वा नि० २ १३ यदस्य दिवि तृतीय तदसावादित्य इति हि ब्राह्मणम् नि० ७ २८ आदित्य यदसुराणा लोकानादत्त । तस्मादादित्यो नाम तै० ३ ९ २१ २ तेपा (नक्षत्राणा) एष (आदित्य) उद्यन्नेव वीर्य क्षत्रमादत्ते तस्मादादित्यो नाम श० २ १ २ १८ तस्य यद् (प्रजापते) रेतस प्रथममुददीप्यत तदसावादित्योऽभवत् ऐ० ३ ३४ तस्य (प्रजापते) शोचन आदित्यो मूर्धनोऽसृज्यत ता० ६ ५ १ तत् (छिन्न विष्णोश्शिर) पतित्वासावादित्योऽभवत् श० १४ १ १ १० आदित्यो वा अर्क श० १० ६ २ ६ पर्जन्य आदित्य गो० पू० ४ ३ ज्योति शुक्रमसौ (आदित्य) ऐ० ७ १२ (हे आदित्य त्व) व्युपि सविता भवस्युदेष्यन् विष्णुरुद्यन्पुरुप उदितो बृहस्पतिरभिप्रयन्मघवेन्द्रो वैकुण्ठो माध्यन्दिने भगोऽपराह्ण उग्रो देवो लोहितायन्नस्तमिते यमो भवसि । अग्नसु सोमो राजा निशायाम् पितृराजस्स्वप्ने मनुष्यान् प्रविशसि पयसा पशून् । विरात्रे भवो भवस्यपररात्रे ऽङ्गिरा अग्निहोत्रवेलायाम्भृगु जै० उ० ४ ५ १-३. असौ वाऽ आदित्योऽस्मा पृश्नि श० ९ २ ३ १४ अप्रतिधृष्या (प्रजापतेस्तनूविशेप) तदादित्य ऐ० ५ २५ एप (आदित्य) वा अब्जा अद्भ्यो वा एप प्रातरुदेत्यप साय प्रविशति ऐ० ४ २० असौ वा आदित्य एपोऽ अश्व श० ६ ३ १ २९ आदित्यस्त्रिपात् तस्येमे लोका पादा गो० पू० २ २८ (९) अथ यत्तच्चक्षुरासीत् स आदित्योऽभवत् जै० उ० २ २ ३ चक्षुरादित्य श० ३ २ २ १३ आदित्यो वा उद्गाताऽधिदेव चक्षुरध्यात्मम् गो० पू० ४ ३ किं नु ते मयि (आदित्य) इति । ओजो मे वलस्मे चक्षुर्मे जै० उ० ३ २७ ८ प्राण आदित्य ता० १६ १३ २ अथैप एव यश य एष (आदित्य) तपति श० १४ १ १ ३२ एप (आदित्य) वै यश श० ६ १ २ ३ आदित्योऽसि दिवि श्रित । चन्द्रमस प्रतिष्ठा तै० ३ ११ १ ११ एप (आदित्य) स्वर्गो लोक तै० ३ ८ १० ३ (आदित्यलोक प्रशमति) तद्दैव्य क्षत्रम् । सा श्री । तद् ब्रध्नस्य विष्टपम् । तत्स्वाराज्यमुच्यते तै० ३ ८ १० ३ देवलोको वा आदित्य कौ० ५ ७ गो० उ० १ २५ आदित्य एषा भूतानामधिपति ऐ० ७ २० असावादित्य शिर प्रजानाम् तै० १ २ ३ ३ सर्वतोमुखो वा ऽअसावादित्य एप वाऽ इदꣳ सर्व निर्द्धयति यदिद किञ्च पुष्यति तेनैप सर्वतो मुखस्तेनान्नाद श० २ ६ ३ १४ आदित्यो वा उद्गाता गो० पू० २ २४ आदित्य उद्गीय जै० उ० १ ३३ ५ आदित्य उदयनीय.

३ १.३ ३ तदभ्यनूक्ता अष्टौ पुत्रासो अदितेर्ये जातास्तन्व परिदेवान् उपप्रैतु सप्तभि परा मार्तण्डमास्यदिति ता० २४ १२ ५-६ एताभिर्वा आदित्या द्वन्द्वमार्ध्नुवन् मित्रश्च वरुणश्च धाता चार्यमा चाꣳशश्च भगश्चेन्द्रश्च विवस्वांश्च ता० २४ १२ ४ कतमऽआदित्या इति ? द्वादशमासा सवत्सरस्यैतऽआदित्या , एते हीदꣳ सर्वमाददाना यन्ति ते यदिदꣳ सर्वमाददाना यन्ति तस्मादादित्या इति श० ११ ६ ३ ८ सप्तादित्या ता० २३ १५ ३ भूमोऽएष देवाना यदादित्या श० ६ ६ १ ८ प्राणा वा आदित्या । प्राणा हीद सर्वमाददते जै० उ० ४ २.९ घृतभाजना ह्यादित्या श० ६ ६ १ ११ आदित्यास्त्वा जागतेन छन्दसा समृजन्तु ता० १ २ ७ वर्षाभिर्ऋतुनादित्या स्तोमे सप्तदशे स्तुत वेरूपेण विशौजसा तै० २ ६ १९ १-२ सर्वे वा ऽआदित्या श० ५ ५.२ १० आदित्या वै प्रजा तै० १ ८ ८ १ एते खलु वादित्या यद् ब्राह्मणा तै० १ १ ९ ८ पशव आदित्या ता० २३ १५ ४ सर्प्या वा आदित्या ता० २५ १५ ४ आदित्या अदिति पुत्रकामा साध्येभ्यो देवेभ्यो ब्रह्मौदनमपचत् तस्या उच्छेषणमददु । तत्प्राश्नात् सा रेतोऽधत्त । तस्यै धाता चार्यमा चाजायेताम् । ···मित्रश्च वरुणश्चाजायेताम् । अशश्च भगश्चाजायेताम् ।··· इन्द्रश्च विवस्वाश्चाजायेताम् तै० १ १ ९ १-३ अदितिर्वै प्रजाकामौदनमपचत्तत उच्छिष्टमश्नात् सा गर्भमधत्त तत आदित्या अजायन्त । गो० पू० २ १५ (प्रजापते) रेतस उत्पन्न) यत्तृतीयमदीदेदिव त आदित्या अभवन् ऐ० ३ ३४ द्वयो ह वा इदमग्रे प्रजा आनु । आदित्याश्चैवाङ्गिरसश्च श० ३ ५ १ १३ विश्वकर्मा त्वादित्यैरुत्तरत पातु श० ३ ५ २ ७ वरुण आदित्यै (उदक्रामत्) ऐ० १ २४. वरुण आदित्यै (व्यद्रवत्) श० ३ ४ २ १ आदित्यास्त्वा पश्चादभिपिञ्चन्तु जागतेन छन्दसा तै० २ ८७ १५ ५ अथैन (इन्द्र) प्रतीच्या दिश्यादित्या देवा ···अभ्यपिञ्चन्··· स्वाराज्याय ऐ० ८ १४ गावो वा आदित्या ऐ० ४ १७ आदित्या. एव यश गो० पू० ५ १५ आदित्यानीमानि यजूꣳपीत्याहु श० ४४ ५ १९ आदित्यानीमानि शुक्लानि यजूꣳषि वाजसनेयेन याज्ञवल्क्येनाख्यायन्ते श० १४ ९ ४ ३३ आदित्याना तृतीय सवनम् कौ० १६ १ ३० १ श० ४ ३ ५ १ आदित्य हि तृतीयसवनम् ता० ९ ७ ७ अथेम विष्णु यज्ञ त्रेधा व्यभजन्ते । वसव प्रात सवनꣳ रुद्रा माध्यन्दिन सवनमादित्यास्तृतीयसवनम् श० १४ १ १ १५ जगत्यादित्याना पत्नी गो० उ० २ ९ आदित्याना वा एतद्रूप यल्लाजा तै० ३ ८ १४ ४ वसवो वै रुद्रा आदित्या सꣳसवभागा तै० ३ ३ ९ ८ तान् हादित्यानङ्गिरसो याजयाञ्चक्रु गो० उ० ६ १४. त एतेन सद्य क्रियाङ्गिरस आदित्यानयाजयन् श० ३ ५ १ १७ आदित्याश्चाङ्गिरसश्चैतन् सत्रꣳ समदधनादित्यानामेक-विनतिरङ्गिरसा द्वादशाह ता० २४ २ २ आदित्या ह उत उत्तरा सुवर्ग लोकमायन् ते वा उतो यन्त प्रतिनुदन्ते तै० १.१ ९ ८ । (आदित्या) स्वर्ग लोकमायन्नहीयन्ताङ्गिरसा ता० १६ १२ १. ते ह्यादित्या पूर्वे स्वर्ग लोक जग्मु पश्चेवाङ्गिरस षष्ठ्या वा वर्षेषु ऐ० ४ १७ तत उ हादित्या स्वर्गेयु कौ० ३०.६ तऽआदित्या । तर्तुभि स्तोमैश्चतुर्भि. पृष्ठैर्लेपुनि नामभि स्वर्ग लोकमस्यप्लवन्त श० १२ २ २ १०. तस्य (स्वर्गस्य लोकस्य) आदित्या अधिपतय तै० ३ ८ १८.२]

आदित्येभिः सवत्सरस्य नाम ७ ४४ ४ [आदित्यो व्याख्यात । तस्य भिसि रूपम् 'बहुल छन्दसि' अ० ७ १ १० सूत्रे बहुलवचनाद् ऐसादेशो न भवति]

आदिदीहि समन्तात् प्रकाशय ३ ५३.४. [दीदयति ज्वलतिकर्मा निघ० १ १६ तत आङ् पूर्वाल्लोट्]

आदिदेशति समन्तात् सम्यगुपदिशति ६ ५६ १. सर्वतोऽतिसृजेदस्मात् समन्तादतिदेश्य पीडयेत् १ ४२ २ [आङ्+दिश अतिसर्जने (तुदा०) धातो रूपम्]

आदिनवदर्शम् य आदौ नवान् पश्यति तम्, भा०—ज्योतिर्विदम् (महाविद्वज्जनम्) ३० १८ [आदि-नवोपपदे दृशिर् प्रेक्षणे (भ्वा०) धातोर्णमुल्]

आदिवम् द्योतनात्मक सूर्य लोक को । आर्याभि० १ १३, ऋ० १.४.१४ १२]

आदिशम् दिशमभिव्याप्यैव ७ १७ **आदिशः**=आभिमुख्या दिश ६ १९ **आदिशाम्**=समन्ताद् दीयमानानाम् (जनानाम्) ६ ४ ५ **आदिशे**=आज्ञापालनाय ६ ४८ १४ [आङ्-दिशो समास दिक्=दिश अतिसर्जने (तुदा०) धातो क्विप्]

आदिशे अभिप्रशसे ६ ५६ १.

आदीदिहि समन्तात् प्रकाशय ५ २३ ४ [आङ्+दीदयति ज्वलतिकर्मा निघ० १ १६ धातोर्लोट्]

आदीधयन् प्रदीपयन्ति ७ ७ ६ [आङ्+दीधीङ् दीप्तिदेवनयो (अदा०) धातोर्लङ् । 'बहुल छन्दसी' ति शपो लुक् न । व्यत्ययेन च परस्मैपदम्]

आदुरे शत्रूणा विदारक (राजन्) ४ ३० २४ [आङ्+दृ विदारणे (क्र्या०) 'आदृगमहनजन ०' अ०

आदित्य महित. (यजु० १८ ३९) एप अहोरात्रे सदधाति श० ६ ४ १ ८ असो वाऽ आदित्य एप रथ श० ६ ४ १ १५ तस्य (आदित्यस्य) रश्मप्रोतश्चासमरथश्च (यजु० १५ १७) सेनानीग्रामण्याविति वार्षिकौ तावृतू श० ८ ६ १ १८ तद्यदेप (आदित्य.) सर्वैर्लोकैर्स्समस्तरमादेप (आदित्य) एव साम जैं० उ० १ १२ ५ (प्रजापति) स्वरित्येव सामवेदस्य रसमादत्त। सोऽसौ द्यौरभवत्। तस्य यो रस प्राणेदत् स आदित्योऽभवद् रसस्य रस जैं० उ० १ १ ५ साम्नामादित्यो दैवत तदेव ज्योतिर्जागतच्छन्दो द्यौ स्थानम् गो० पू० १ २९ यदनूदित (आदित्य) स हिङ्कार जैं० उ० १ १२ ४ असावादित्यस्तोमभागा श० ८ ५ ४ २ स य स यज्ञो ऽसौ स आदित्य श० १४ १ १ ६ एप वै सवत्सरो य एप (आदित्य) तपति श० १४ १ १ २७ स य स सवत्सरोऽसौ स आदित्य श० १० २ ४ ३ आदित्य एव प्रायणीयो भवति श० ३ २ ३ ६ तदसौ वा आदित्य प्राण जैं० उ० ४ २२ ६ आदित्यो वै प्राण जैं० उ० ४ २२ ११ उद्यन्नु खलु वा आदित्य सर्वाणि भूतानि प्रणयति तस्मादेन प्राण इत्याचक्षते ऐ० ५ ३१ असौ वाऽ आदित्य कवि श० ६ ७ २ ४ आदित्यो वै घर्म श० ११ ६ २ २ असौ वै घर्मो योऽसौ (आदित्य) तपति कौ० २ १ आदित्यो निवित् जैं० उ० ३ ४ २ यन्महान्देव आदित्यस्तेन कौ० ६ ६ असौ वाऽ आदित्य शुक्र (यजु० १८ ५०) श० ६ ४ २ १ एप वै शुक्रो य एप (आदित्य) तपति श० ४ ३ १ २६ यद्वा ऽएप एव शुक्रो य एप (आदित्य) तपति तद्यदेप तपति तेनैप शुक्र श० ४ २ १ १ तत्र ह्यादित्य शुक्रश्चरति गो० पू० २ ६ असौ वा आदित्य शुक्र ता० १५ ५ ६ आदित्यो वाव पुरोहित ऐ० ८ २७ आदित्यो वै देवसस्फान गो० उ० ४ ६ असौ वा आदित्यो लोकम्पृणा (इष्टका) श० ८ ५ ४ ८ असौ वाऽ आदित्यो लोकम्पृणैप हीमाल्लोकान्पूरयति श० ८ ७ २ १ वायुर्वा एत (आदित्य) देवतानामानशे ता० ४ ६ ७. तदसावादित्य इमाल्लोकान्त्सूत्रे समावयते तद्यत्तत्सूत्र वायु स श० ८ ७ ३ १० सा या सा वागसौ स आदित्य श० १० ५ १ ४ आदित्य एव यश गो० पू० ५ १५ आदित्यो यश श० १२ ३ ४ ८ आदित्यो यूप तैं० २ १ ५ २ असौ वा अस्य (अग्निहोत्रस्य कर्त्तु) आदित्यो यूप ऐ० ५ २८ अथ यद्विपुवन्तमुपयन्ति। आदित्यमेव देवता यजन्ते श० १२ १ ३ १४ आदित्यो बृहत् ऐ० ५ ३० असौ वाऽ आदित्यो ब्रह्म श० ७ ४ १ १४ आदित्यो वै ब्रह्म जैं० उ० ३ ४ ६ असावादित्य सुब्रह्म प० १ १ आदित्य ह्येतेति चन्द्रमा ओमित्यादित्य जैं० उ० ३ ६ २ ओमित्यादित्य जैं० उ० ३ ३ १२ ओमित्यसौ यो ऽसौ (आदित्य) तपति ऐ० ५ ३२ यदेतत् (आदित्य) मण्डल तपति। तन्महदुक्थ ता ऋच स ऋचा लोक श० १० ५ २ १ (आदित्यस्य) मण्डलमेवार्च्च श० १० ५ १ ५ अग्निश्च ह वा आदित्यश्च रोहिणावेताभ्याꣳ हि देवताभ्या यजमाना स्वर्ग लोकꣳ रोहन्ति श० १४ २ १ २ छन्दोभिर्वै देवा आदित्यꣳ स्वर्ग लोकमहरन् ता० १२ १० ६ त्रैष्टुभो वा एप य एप (आदित्य) तपति कौ० २५ ४ त्रैष्टुब्जागतो वा आदित्य ता० ४ ६.२३ जगती छन्द आदित्यो देवता श्रेणी श० १० ३ २ ६ स (आदित्य) उद्यन्नेवामूम् (दिवम्) अविद्रवत्यस्त यन्निमाम् (पृथिवीम्) अविद्रवति श० १ ७.२.११]

आदित्यवते पूर्णविद्यायुक्तपाण्डित्यवते (इन्द्राय=सन्तानाय) ३८ ८ [आदित्य पूर्वपदे द्रष्टव्य। ततोऽतिशायनेऽर्थे मतुप्]

आदित्यवनिः या आदित्यान् मासान् वनति सम्भजति सा (स्वाहा=ज्योतिःशास्त्रसंस्कारयुक्ता वाक्) ५ १२ [आदित्योपपदे वन सम्भक्तौ (भ्वा०) धातोर् इ प्रत्यय]

आदित्यवर्णम् आदित्यस्य वर्ण स्वरूपमिव स्वरूप यस्य त स्वप्रकाशम्, भा०—स्वप्रकाशानन्दस्वरूपम् (पुरुषम्=ईश्वरम्) ३१ १८ स्वप्रकाशविज्ञानस्वरूपम् (पुरुष=परमेश्वरम्) ऋ० भू० १३१, ३१ १८ आदित्यादि का रचक और प्रकाशक परमात्मा, आर्याभि० २ ८, ३१ १८ [आदित्यवर्णपदयोर्बहुव्रीहि। उत्तरपदलोपश्च]

आदित्या याऽऽदित्यवदर्थविद्याप्रकाशिकाऽष्टचत्वारिंशत्सवत्सरपर्यन्ताऽनुष्ठितब्रह्मचर्य्ये स्वीकृता सा (वाग् विद्युद्वा) ४ २१ [आदित्यो व्याख्यात, ततस्स्त्रिया टाप्]

आदित्यासः अष्टचत्वारिंशद्वर्षपरिमितेन ब्रह्मचर्य्येण कृतविद्या मासा इव व्याप्ताऽखिलविद्या वा (विद्वज्जना) ५ ५१ १२ सूर्यवत्तेजस्विन, भा०—पूर्णविद्या राजकर्मकरा (जना) ३३ ६६ आदित्यवद्विद्यादिशुभगुणै प्रकाशमाना (गृहपतय) ८ ४ सूर्य इव पूर्णविद्या प्रकाशा (कवय=मेधाविजना) ३ ५४ १० द्वादशमासा इव विद्यार्थिन (जना) २ १ १३ पूर्णा विद्वास सवत्सरस्य मासा वा ७ ५१ २ [आदित्यो व्याख्यात। तस्य प्रथमाबहुवचने जसोऽसुगागमे च रूपम्। आदित्या=अष्टौ ह वै पुत्रा अदिते। यास्त्वेतद्देवा आदित्या इत्याचक्षते सप्त ह वै तेऽविकृतꣳ हाष्टम जनयाञ्चकार मार्तण्डम् श०

[आङ्+डुधाञ् धारणपोषणयो (जु०)+लुङ् । प्रथमा-बहुवचनम्]

आधूनोमि समन्तात् [कम्पयामि, प्र०—अत्रान्तर्गतो णिच् ८ ४८ [आङ्+धूञ् कम्पने (स्वा०) धातोर्लट् छान्दसत्वादुकारस्य दीर्घ]

आधृषः समन्ताद् धर्षणं कुर्वन्त (भ्रातृन् पितरश्च पितॄ श्च) २ १ ६ **आधृषे**=समन्ताद् धृष्णुवन्ति यस्मिन् व्यवहारे तस्मै १ ३९ ४ [आङ्+ञिधृषा प्रागल्भ्ये (स्वा०) धातो क्विप्]

आधृषे आधर्षितुम् ५ ८७ २ आधृषाय ५ ८ ५ [आङ्+ञिधृषा प्रागल्भ्ये (स्वा०) धातोस्तुमर्थे कसे प्रत्यय]

आधेहि समन्ताद् दधाति ४ १० सर्वथा उत्पन्न कर स० प्र० १४८, १० ८५ ५ [आङ्+डुधाञ् धारण-पोषणयो (जु०) धातोर्लोटि मध्यमैकवचनम् । 'घ्वसो-रेद्धाव०' इत्येत्वमभ्यासलोपश्च]

आध्यक्ष्याय अध्यक्षाणा भावाय ३० ११ [अध्यक्ष प्राति० भावे ष्यञ्]

आध्याः समन्ताद् ध्यायन्ति चिन्तयन्ति ये ते (सज्जना) १ १०५ ७ परस्य मनसि शोकादिजनका (जना) १ १०५ ८ आधि य समन्ताद् दधाति स्म् । २२ २० [आङ्+ध्यै चिन्तायाम् (भ्वा०) बाहुलकात् कर्त्तरि क्यप् । आध्य =कामा नि० ४ ६]

आध्रः य सर्वैस्समन्ताद् ध्रियते (परमात्मा) ७ ४१ २ अपुत्रस्य पुत्र ३४ ३५ सब ओर से धारणकर्त्ता (परमात्मा) स० वि० १५६, ७ ४१ २ समन्ताद् धृतेन (बलेन) ७ १८ १७ [आङ्+डुधाञ् धारणपोषणयो (जु०) धातोर्बाहुलकाद् रक् प्रत्यय । आध्र =आढ्यालु नि० १२ १४]

आध्वम् उपविशत, भा०—पुन पुन प्रयतध्वम् १७ ६५ [आस उपवेशने (अदा०) धातोर्लोट्]

आध्वर्यवम् य आत्मनोऽध्वरमिच्छति तम् (शिल्पि-जनम्) प्र०—अत्र 'वाच्छन्दसि' इत्यस्यपि गुणावादेशौ २८ १६ [अध्वर =अध्वर इति यज्ञनाम । ध्वरति हिंसा-कर्मा तत्प्रतिषेध नि० १ ८ अध्वर्यु =अध्वर युनक्ति, अध्वरस्य नेताध्वर कामयते इति वापि वाधीयाने युरुप-बन्ध नि० १ ८ अध्वरपदाद् इच्छायामर्थे क्यच् । 'क्याच्छन्दसि' इत्यु प्रत्यय]

आनक्तु कामयताम् ७ ४३ ३ [अञ्जू व्यक्तिम्रक्षण-कान्तिगतिषु (रुधा०) धातोराङ्पूर्वाल् लोट्]

आनजाना प्रसिद्धौ, प्रसिद्धिकारकौ (इन्द्राग्नी = वायुविद्युतौ) प्र०—अत्र अञ्जू धातोर्लिट व्यत्ययेन कानच् १ १०८ ४

आनजे व्यनक्ति ३३ २९ सर्व कामयते प्रकटयते विज्ञायते, प्र०—अत्राऽऽत्मनो कर्मणि लिट् १ १०२ १ अन्वेषणायेन १ १६१ ८, **आनञ्ज**=अन्वेषेन, कामयेत प्र०—अत्र लिडर्थे लिट् ८ ३० [अञ्जू व्यक्तिम्रक्षणकान्ति-गतिषु (रुधा०) धातोर्लिट् कर्मणि । क्वचित् व्यत्ययेनात्मने-पदम्]

आनञ्जे आनन्दयन्तु निवृत्तु, प्र०—अत्र व्यत्ययेना-त्मनेपदम् १ ८८ १ [अज गतिक्षेपणयो (भ्वा०) धातो-र्लिट् । नुडागमश्छान्दस.]

आनट् समन्ताद् व्याप्नोति, प्र०—अत्र व्यत्ययेन परस्मैपद लडन्च १ ७१ ८ आनटिनि व्याप्तिकर्मा, निघ० २ १४, ३३ ११ प्राप्नोति, प्र०—अत्र नशतेर्गतिकर्मणो लटि 'छन्दस्यपि दृश्यते' इत्यागम. १ १६३ ७ अनुवोत १ १२१ १ [नशूङ् व्याप्तौ गतौ च (भ्वा० आत्म०) धातोराङ् पूर्वात् लङ् । नशति गतिकर्मा निघ० २.१४ व्याप्तिकर्मा निघ० २ १८ धातोर्वा लङ्]

आनतिः आनमन्ति यया सा (आगति =आगमनम्) २० १३ समन्तान्नमनम् २० १३ [आङ्+णम प्रह्वत्वे शब्दे (भ्वा०) धातो क्तिन्]

आनन्दनन्दौ आनन्देन सम्भोगजनितसुखेन नन्दतस्तौ (आण्डौ=अण्डाकारौ वृषणौ) २० ६ [आङ्+टुनदि समृद्धौ (भ्वा०) धातोर्घञ्प्रत्यये=आनन्द । नदुपपदे नदि धातोरेव कर्त्तरि—अन्]

आनन्दम् आनन्द को स० वि० १६६, ऋ० ६ ११. ३ ६ **आनन्दाय**=परमसुखाय १६ ८ **आनन्दाः**=सम्पूर्ण समृद्धिया स० वि० १६७, ६ ११३ ११ [आङ्+टुनदि समृद्धौ (भ्वा०)+घञ्]

आनः अनन्ति येन तज्जीवनम् १ ५२ १५ [अन प्राणने (अदा०) धातोर्घञ्]

आनमम् समन्तात् सत्कृति कर्त्तुम् ४ ८ ३ [आङ्+णम प्रह्वत्वे शब्दे (भ्वा०) धातोस्तुमर्थे णमुल्]

आनसे समन्तान्नमामि ६ ५१ ६ [आङ्+णम प्रह्वत्वे शब्दे (भ्वा०) धातोर्लट् । व्यत्ययेनात्मनेपदम्]

आनय अपने मन को गृहाश्रम से इधर की ओर ला स० वि० १८६, अथर्व० ६ ५ १ [आङ्+णीञ् प्रापणे (भ्वा०) धातोर्लोट्]

३ २ १७१ सूत्रेण कि द्वित्वाऽभावश्चं छान्दसं । अथवा— आङ् पूर्वात् दृ विदारणे (क्र्या०) धातो 'अच इ' उ० ४१३६ सूत्रेण इ. प्रत्यये रूपम् । मध्यस्याकारस्योकारश्छान्दस । आदुरि=आदरणात् नि० ६ ३१]

आदृत्य आदर कृत्वा १ १० ३ ६ [आङ्+दृङ् आदरे (तुदा०) धातो क्त्वा समासे क्त्वो ल्यप् ।

आदेदिशानान् भृशमाज्ञाकर्तॄन् (शत्रून् जनान्) ६ ४४ १७ [आङ्+दिश अतिसर्जने (तुदा०) धातोर्यङ्न्ताच्छानच्]

आदेवम् समन्ताद् विद्याप्रकाशयुक्तम् (विद्वज्जनम्) ४ १ १ (आङ्+दिवु द्युत्यादिषु (दिवा०) धातो पचाद्यच्]

आदेवीः समन्ताद् देदीप्यमाना विदुषी (विश = प्रजा) ६ ४९ १५ [आङ्+दिवु द्युत्यादिषु (दिवा०) धातो पचाद्यच्-पचादिगणे टित् पाठान् ङीप्]

आदेवे सर्वतो विद्याप्रकाशयुक्ते (जने=विदुषि पुंसि) २ ४ १ [आङ्+दिवु द्युत्यादिषु (दिवा०) धातो पचाद्यच्]

आद्विहायाः सर्वव्यापक और आकाशवद् निर्विकार अक्षोभ्य सर्वाधिकरण (ईश्वर) आर्याभि० २ ४०, १७ २६ अनन्तर विविधेषु पदार्थेषु व्याप्त (परमेश्वर) प्र०—अत्रोहाङ् गतावित्यस्माद् असुन् णित् कार्यश्च १४ २६ [आत्+वि+ओहाङ् गतौ (जु०) धातोरसुन् । णित्वत्त्वाद् युगागमश्च]

आद्व्यानम् सम्पूर्ण विद्याओ मे व्यापकता स० वि० ८०, अथर्व० ११ ५ २४]

आधक् समन्ताद् दहे ७ १ २१ [आङ्+दह भस्मीकरणे (भ्वा०) धातोर्लुङ् । 'मन्त्रे घसह्वरणशवृद०' अ० २ ४ ८० सूत्रेण लेर्लुक्]

आधत्त समन्ताद् धारयत २ ३३ **आधत्तम्**= सर्वतो दध्यातम् १ ११७ १७ समन्तात्पोषयतम् १ ११६ १६ [आङ्+डुधाञ् धारणपोषणयो (जु०) धातोर्लोटि मध्यमबहुवचनम्)

आधत्तन समन्ताद् दधतु, प्र०—अत्र व्यत्यय 'तप्तनप्०' इति तनबादेशश्च १ २० ७ [आङ्+डुधाञ् धारणपोषणयो (जु०) धातोर्लोट् । तप्रत्ययस्य स्थाने तनबादेशश्च]

आधवनीयः आधवनसाधनपात्रविशेष १८ २१ [आङ्+धुञ् (स्वा०) धातोरनीयर् प्रत्यय]

आधवे समन्तात्प्रक्षेपणे १ १४१ ३ [आङ्+धुञ् कम्पने (स्वा०) धातो 'ऋदोरप्' त्यप् प्रत्ययो भावे । आधव =आधवनात् नि० ६ २९]

आधात् आदध्यात् ५ ४० ८ अभिमुख दधाति १ ६३ २. समन्ताद् दधाति १ १६४ ३३ **आधारयः**= समन्ताद् धारय १ ५२ ८ **आऽधाः**=सर्वतो दधाति ५ ७ ९ समन्ताद्धर १ ६१ १६ समन्ताद्धेहि ३ ५६ ६ आधेहि ६ ४७ ९ **आऽधिथाः**=आदध्या ६ ३१ १ [आङ्+डुधाञ् धारणपोषणयो (जु०) धातोर्लुङ् । 'गातिस्थाघु०' सूत्रेण सिचो लुक् । आधिथा =आङ्+डुधाञ्+ लुङि मध्यमैकवचनम् । 'स्थाघ्वोरिच्च' सूत्रेणेत्व कित्वञ्च]

आधावतम् समन्ताद् धावयत १ १०९ ४ **आधावते**=सद्यो गच्छति, भा०—सद्यो गच्छत्यागच्छति, धावति ३३ ९० **आधावन्तु**=समन्तात् प्राप्नुवन्तु ६ ३९ [आङ्+धावु गतिशुद्ध्यो (भ्वा०) धातोर्लङ् । उभयपदी चाय धातु]

आधिपत्यम् अधिपतेर्भावम् (क्षत्र =राजन्यकुलम्) १४ २४ **आधिपत्याय**=अधिष्ठातृत्वाय १८ २८ **आधिपत्ये**=अधिष्ठातृत्वे ३७ १२ अधिपतेर्भावे ३७ १२. (अधिपतिप्राति० भावे 'पत्यन्तपुरोहितादिभ्यो यक्' अ० ५ १ १२८ सूत्रेण यक्]

आधिम् य समन्ताद् दधाति तम् (भौतिकमग्निम्) २२ २० [आङ् डुधाञ् धारणपोषणयो (जु०) धातो 'उपसर्गे घो कि' अ० ३,२ ९२ सूत्रेण कि । छान्दसत्वात् कर्त्तरि]

आधिवक्ता यथावदनुशासिता (इन्द्र =सभाध्यक्ष) १ १०२.११ [अधि+ब्रूञ् व्यक्तायां वाचि (अदा०) धातोस्तृच् 'ब्रुवो वचि' रिति वच्यादेश]

आधीतम् सर्वतो धारितम् (अध्ययनम्) १५ ७ समन्ताद् धृतिनिश्चयवृत्ति १८ २. समन्ताद्धृतम् १ १७० १ आधीताय=समन्ताद्विद्यावृद्धये २२ २० **आधीतेन**= समन्ताद्धारितेन (अध्ययनेन) १५ ७ (आङ्+डुधाञ धारणपोषणयो (जु०) धातो क्त । 'घुमास्था०' अ० ६.४ ६६ सूत्रेणेकारादेश । छान्दसत्वाद् दधातेर्हिर्भावो न भवति । आधीतम्=आध्यातम् आध्यातमभिप्रेतम् नि० १ ६]

आधुनयन्ताम् गर्भ धारण करे स० प्र० ११०, ३ ५५ १६ [आङ्+धूञ् कम्पने (क्र्या०) धातोर्णिच् । 'धूञ्प्रीञोर्नुग्' इति नुक् छान्दस च ह्रस्वत्वम्]

आधुः समन्ताद् दध्यु, प्र०—अत्राऽडभाव २ ४ ३.

२४ ३४ **आन्तरिक्षाः**=अन्तरिक्षदेवताका (धूम्रा = पश्चादय) २४ १० [अन्तरिक्षप्राति० 'सास्य देवता' इत्यण् प्रत्यय । अन्तरिक्ष कस्मादन्तरा क्षान्त भवत्यन्तरेमे इति वा शरीरेष्वन्तरक्षयमिति वा नि० २ १०]

आन्त्याय अन्ते भवाय (जनाय) १८ २८ [अन्त-प्राति० भवार्थे यत् । आद्यक्षरस्य दीर्घत्व छान्दसम्]

आन्त्यायनाय अन्ते भवनमयन यस्य स अन्त्यायन, स एव तस्मै (पुरुषाय) १८ २८ अन्त्य नीचमयन प्रापण यस्य तस्मै (विनशिने=विनष्टु शीलाय जनाय) ६ २० [आन्त्य-अयनपदयो समास आन्त्य=अन्त+यत् । अयनम्=अय गतौ+ल्युट्]

आन्त्राणि उदरस्थ-अन्नपाकाऽऽधारा नाडी १९ ८६ उदरस्था स्थूला नाडी ४ १८ १३ **आन्त्रैः**=उदरस्थैर्नाडी-विशेषै २५ ७]

आन्दन् बन्धितारम् (जनम्) ३० १६ [अदि बन्धने (भ्वा०) धातोराङ्पूर्वादिच् कर्त्तरि]

आऽन्वसृक्षत समन्तादनुसृजन्तु ५ ५२ ६ (आङ्+अनु+सृज् विसर्गे (तुदा०) धातोर्लुङ् । च्ले क्सादेश]

आप आप्नोति ५ ४५ ६ प्राप्नुयात् ४ ४१ १ व्याप्नोति ५ ४२ ६ प्राप्नोति ४ ५१ ७ आप्नुयात् ८ २३ २ [आप्लृ व्याप्तौ (स्वा०) धातोर्लिट् सामान्ये]

आपत समन्तात् पतति गच्छति, प्र०—अत्र लडर्थे लोट् । अन्व०—आपतति समन्तात् पृथिवी शोभन जलरस गमयति ३ ४६ **आपतन्ति**+अभित उपरिष्टादध पतन्ति १ ७९ २ [आङ्+पत्लृ गतौ (भ्वा०) धातोर्लोट्]

आपतये समन्तात् पति पालकोऽर्य पतिस्तस्मै (प्रयोजनाय) ५ ५ [आङ्-पतिपदयो समास । 'पति समास एव' इति समासे पतिशब्दस्य घिसंज्ञकत्वाद् 'घेर्ङिति' इति गुणे ऽयादेशे च रूपम्]

आपत्यते समन्तात् प्राप्यते १ ८४ ६ [आङ्+पत्लृ गतौ (भ्वा०) धातो कर्मणि लट्]

आपथयः समन्तादभिमुख पन्था येषान्ते (विद्वज्जना) ५ ५२ १० [आङ्-पथिन् पदयोर्बहुव्रीहि । 'ऋक्पूरब्धू०' अ० ५ ४ ७४ इति प्राप्त समासान्तोऽपि न छान्दसत्वात्]

आपथ्य पथि भव पथ्य, समन्त पथ्य आपथ्य १ ६४ ११ [पथिन्प्राति० भवार्थ यत् । आङ्-पथ्यपदयो समास]

आपन् आप्नुवन्ति ६ १४ [आप्लृ व्याप्तौ (स्वा०) धातोर्लङ् । विकरणव्यत्ययेन शप्]

आपनीफणत् सर्वतोऽत्यन्त गच्छति ४ ४० ४ [आङ्+फण गतौ (भ्वा०) फणी । गतिकर्मा निघ० २ १४ धातोर्यङ् यङ्लुकि शतृप्रत्यये रूपम् । 'दाधर्ति' आपनीफणत्' अ० ७ ४ ६५ इत्यस्यागमस्य नीगागमो निपात्यते]

आपप्रथे समन्तात्प्रख्यापयति ७ ८७ २ **आपप्राथ**—समन्तात्प्रति व्याप्नोति ७ २० ४ [आङ्+प्रथ प्रख्याने (भ्वा०) धातोर्लिट्]

आपप्रिवान् सर्वत स्वतेजसा व्याप्तवान्, भा०—स्वप्रकाशेन सर्वमभिव्याप्तवान् (सूर्य) १७ ५९ सर्वत व्याप्तवान् १७३८ **आपप्रिवासम्** समन्तात् पूर्णम् (विद्वज्जनम्) १ १८६ १ [आङ्+पॄ पालनपूरणयो (जु०) धातोर्लिट, क्वसु]

आपप्रुषी समन्ताद् व्याप्ता (सरस्वती · विद्या-शिक्षिता वाक्) ६ ६१ ११ समन्तात् सर्वा विद्या व्याप्नुवती (स्त्री) ४ ५२.६ [आङ्+पॄ पालनपूरणयो (जु०) धातोर्लिट क्वसु । स्त्रिया ङीपि 'वसो सम्प्रसारणम्' इति सम्प्रसारणे परत्वे च रूपम्]

आपप्रौ आ=समन्तात् प्राति० ३ ३०.११ समन्तात् प्रपूर्त्ति १ ८१ ५ समन्ताद् व्याप्नोति ६ १० ४ [आङ्+प्रा पूरणे (अदा०) धातोर्लिट् । 'आत औ णल' इत्यौत्वम्]

आपयः मिलता व्याप्ता (मरुत=विद्वज्जना) २ ३४ १० विद्याव्याप्तुकामा (मनुष्या) १ ११०.२ सकलशुभगुणव्यापिन (देवा=विद्वज्जना) २ २९ ४ य आप्नुवन्ति ते (निगमविद्यार्थिनो जना) ५ ५३ २ **आपये**—सकलविद्याव्याप्तये ६ २० विद्याव्यापकाय (विद्वज्जनाय) २ ३८ ११ प्रापकायाऽऽप्ताय (सत्पुरुषाय) ७ ८ ६ **आपिषु**=विद्यादिगुणैर्व्याप्तेषु (विद्वज्जनेषु) २ २९ ४ **आपिः**=गुणप्रापक (विद्वज्जन) प्र०—अत्र आप्लृ व्याप्तौ इत्यस्माद् 'उणादिभ्य' अ० ३ ३ १०८ इतीण् प्रत्यय १ २६ ३ य प्रीत्या प्राप्नोति स (विद्वज्जन) १ ३१ १६ य समन्तात्पिबति शुभगुणव्याप्तो वा (राजा) ३ ५१ ६ य सर्वानाप्नोति (इन्द्र=राजपुरुष) ४ २५ ६ आपी=सकलविद्या प्राप्तौ (इन्द्रावरुणा=राजाऽमात्यौ) ४ ४१ २ **आपीन्**=य आप्नुवन्ति तान् (प्रजाजनान् राजपुरुषान्वा) ७ ३१ १२ **आप.**=प्राप्तवनान् २ २८ ११ [आप्लृ व्याप्तौ (स्वा०) धातो 'उणादिभ्य' अ० ३ ३ १०८ वार्त्तिकेन इञ् प्रत्यय]

आपयायाम् प्राणव्यापिकाभ्याम् (सरस्वत्या=वाचि) ३ २३ ४ [आप्लृ व्याप्तौ (स्वा०) धातोर्बहुलकाद् रञ्

आनवस्य समन्तान्नवीनस्य (राज) ७ १८ १३ **आनवाय**=समन्तान्नवीनाय (वचसे=वचनाय) ६ ६२ ६ [आङ्-नवपदयो समास, । नवम्=नवनाम निघ० ३ १८]

आनश आनशिरे व्याप्नुवन्ति, प्र०—अत्र व्यत्ययेन परस्मैपद पुरुषव्यत्ययश्च ३ ६० १ प्राप्नुयु ४ ३६ ४ सम्यग् व्याप्नुत ३ ६० २ **आनशते**=व्याप्नोति प्र०—नशदिति व्याप्तिकर्मा निघ० २ १६, ३३ ७६ **आनशु:**= व्याप्नुवन्ति प्राप्नुवन्ति १ ५२ १४ अश्नुवते १ १६४ २३ व्याप्नुवन्ति १ ११५ १ ६ अश्नुवन्ति १ ११०.४ पा सकते आर्याभि० १ १५ अश्नवन्ति ६ २२ ४ सम्यक् प्राप्नुयु, प्र०—अत्र व्यत्ययेन परस्मैपदम् ३ ६० ३ **आनशे**= प्राप्नोति ५ ७ ८ व्याप्नोति ५ ८१ ५ **आनश्याम्**= प्राप्नुयाम् ६ २६ ७ **आनाश**=व्याप्नुयात् ६ १६ २६ [आनशे व्याप्तिकर्मा निघ० ११ १८]

आनशाना: प्राप्नुवन्त (देवा=विद्वज्जना) ३२ १० प्राप्त होते हुए (देवा=विद्वान् जन) स० वि० ७, ३२ १० [आङ्+नशत् व्याप्तिकर्मा निघ० २ १८ धातो शानच् । अशूङ् व्याप्तौ धातोर्वा शानच् । नुडागमश्छान्दस]

आनिर्हतेभ्य: ये समन्तान्निर्हताम्तेभ्य (भा०—अनार्यमनुष्यादिप्राणिभ्य) १६ ४६ (आङ्+निर्+हन हिंसागत्यो (अदा०) धातो क्त]

आनिशितम् सर्वतो नितरा तीक्ष्णम् (शरव्यम्) ४ २४ ८ [आङ्-निशितपदयो समास । निशितम्= नि+शो तनूकरणे+क्त । 'शाच्छोरन्यतरस्याम्' इति वेत्त्वम्]

आनिषत्त समन्तान्निषण्ण (अग्नि=सूर्यलोक) ३ ६ ८ समन्तान्नितरा स्थित (विद्वान् सभेश) १८ ५३ **आनिषत्ता:**=कृतनिवासा (पितर) १६ ६८ समन्तान्निषण्णा (पितर) ऋ० भू० २६४ [आङ्+नि+षद्लृ विशरणगत्यवसादनेषु (भ्वा०) धातो क्त । 'नसत्तनिषत्तानुत्त०' अ० ८ २ ६१ सूत्रेण छन्दसि नत्वाऽभाव]

आनिषत्सि समन्तान्निश्चिततया निषीदसि ३ १४ २ **आनिषसाद**=समन्तान्नित्य सीदतु १० २७ समन्तान्नित्य सीद २० २ **आनिषीद**=आस्स्व १ १०४ १ **आनिषीदत**=समन्तान्नितरामाध्वम् ७ ३४ अभितो निश्चयेन वर्त्तध्वम् १ २२ ८ आभिमुख्येन नितरा तिष्ठत १ ५१

आनिषेदु:=निषीदेयु ४ ५० ३ [आङ्+नि+षद्लृ विशरणगत्यवसादनेषु (भ्वा०) धातोर्लट् । 'बहुल छन्दसी' ति शपो लुकि सीदादेशो न भवति]

आनीयमाने समन्तात्प्राप्ते (पयसि=उदके) ३९ ५ [आङ्+णीञ् प्रापणे (भ्वा०) धातो कर्मणि शानच्]

आऽनुगमन् समन्तादनुकूल गच्छन् (सखा) ३ ३९ ५ [अनु+गम्लृ गतौ (भ्वा०) धातो शतृ । 'बहुल छन्दसी 'ति शपो लुक्]

आनुषक् अनुकूलतया १ ५८ ३ आनुकूल्ये ६ ४८ ४ [आनुषक्=नामानुपूर्व्यस्यानुषक्त भवति नि० ६ १४ पदनामसु निघ० ४ ३]

आनुषक् अनुकूलम् (सज्जनम्) २ ६ ८ योऽनुसजति (राजा) ६ ५ ३ व्याप्त्यानुषक्तमुत्कृष्टगुणैरनुरक्तमाकर्षणेनाऽनुयुक्त वा (विश्वम्=जगत्) १ ५२ १४ अभितो योऽनुषज्ति तत् (बर्हि=अन्तरिक्षम्) १ १३ ५ आनुषक्त अर्थात् व्याप्त (बर्हि=अन्तरिक्षम्) आर्याभि० १ १५ य आनुकूल्येन सचति समवैति स (क्रियाविज्जन) ३ ४१ २ आनुकूल्येन वर्त्तमान (विद्वज्जन) ३ ११ १ अनुकूल (अग्नि=राजा) ४ १२ ३ [अनु+षञ्ज सङ्गे (भ्वा०) धातो क्विप् । 'अनिदिताम्०' अ० ६ ४ २४ सूत्रेण नकारलोपेऽनोऽकारस्य दीर्घश्छान्दस । आनुषगिति नामानुपूर्व्यस्यानुषक्त भवति नि० ६ १४]

आनुष्टुभम् अभितोऽनुकूलतया स्तोभते सुख बध्नाति येन तत् (छन्द) १२ ५ **आनुष्टुभेन**=अनुष्टुप्कथितेन (छन्दसा=स्वच्छेनाऽर्थेन) १३ ५३ विद्या गृहीत्वा पश्चाद् दु ख विस्तम्भुवन्ति येन तेन (छन्दसा) १५ ६५ अनुष्टुब्विहितार्थयुक्तेन (छन्दसा) ११ ११ [अनु+स्तोभति अर्चतिकर्मा निघ० ३ १ धातो क्विप् । अनुष्टुबनुष्टोभनात् नि० ७ १२]

आनूकम् आनुकूल्यम् ५ ३३ ६

आनृचु: स्तावयन्ति तद्गुणान् प्रकाशयन्ति, प्र०—अत्र 'अपस्पृधेथामानृचु०' अ० ६ १ ३६ अनेनाऽर्चधातोर्लिट्युसि सम्प्रसारणमकारलोपश्च निपातित १ १६ ४ अर्चाम ५ ६ ८ **आनृचे**=स्तौमि १ १६० ४ [अर्च पूजायाम् (भ्वा०) धातोर्लिट् । 'अपस्पृधेथामि' ति सूत्रे निपातनाद् रूपसिद्धि]

आन्तरिक्ष: अन्तरिक्षदेवताक (अजल=पक्षिविशेष)

प्रत्यय । 'कृदिकारादक्तिन' इति वार्त्तिकेन ङीप् । तत' सप्तमी । यकारागमश्छान्दस]

आपरीवृतम् सर्वत आवृतम् (रज =लोकलोकान्तरम्) ४ ४५ २ [आङ्+परि+वृञ् आवरणे (चुरा०) धातो क्त । पूर्वपदस्य दीर्घत्वम्]

आपर्यश्याम् समन्तात् सर्वत प्राप्नुयाम् [आङ्+परि+अशूङ् व्याप्तौ (स्वा०) धातोर्लिङ् । व्यत्ययेन परस्मैपद विकरणलुक् च छान्दसम्]

आपवस्व समन्तात् पवित्रीकुरु ८ ६३ सर्वथा पवित्र कर स० वि० १९५, ९ ११३ २ [आङ् पूञ् पवने (क्र्या०) धातोर्लोट् । विकरणव्यत्ययेन शप्]

आप: जलानि, वाऽऽनुवन्ति शब्दोच्चारणादिव्यवहारान् याभिस्ता आप प्राणा, प्र०—आप इत्युदकनामसु पठितम् निघ० १ १२ 'आप इति पदनामसु पठितम् निघ० ५ ३ आभ्या प्रमाणाभ्यामप्-शब्देनाऽत्रोदकानि, सर्वचेष्टाप्राप्तिनिमित्तत्वात् प्राणाश्च गृह्यन्ते १ ८ ७ व्याप्तिशीलानि जलानि १ ८३ २ अन्तरिक्षे व्याप्तिशीला (देवी =स्त्रिय) ९ ६ जलवद्वर्त्तमाना शातर ४ १८ ८ प्राणा जलानीव विद्वास २० २० जलानीव शान्ता (स्त्रियो विदुष्य) १० ७ आप्नुवन्तीत्याप (अन्व०—सर्वविद्याव्यापिनो विपश्चित) ६ १७ सकलविद्याधर्मव्यापिन (राजपुरुषा) १० ४ व्यापिकास्तन्मात्रा २७ २५ ब्रह्मणो नाम ऋ० भू० ३०८ सर्वव्यापक ईश्वर प० वि० २१२ पवित्रजलानीव सकलशुभगुणव्यापिका कन्या १२ ३५ व्याप्तिशीला सूक्ष्मास्तन्मात्रा २७ २६. जलानीव प्रजा ५ ३४ ९ आप्नुवन्ति व्याप्नुवन्ति शरीरमित्याप (इन्द्रियाणि मनो बुद्धिश्च ३४ ५५ प्राणान्, प्र०—अत्र शसो जस् २ २४ १२ वाष्परूपाणि जलानि १ ११६ ९ अन्तरिक्ष प्राणा वा १ १०० १५ सर्वा शुभगुणकर्मविद्याव्यापिन्य (देवी =विदुष्यो देव्य) ८ २६ सर्वव्यापकत्वादीश्वर ३२ १ कारणाख्या प्राणा जीवा वा १७ ३० जलानीव शान्तिशीला विदुष्य सत्स्त्रिय प्र०—आप्लृ व्याप्तौ अस्माद्धातोरप्शब्द सिध्यति, स नियतस्त्रीलिङ्गो बहुवचनान्तश्च ३६ १४ आकाश ३२ ७ आप्ता प्रजा ६ २७ आप्नुवन्ति सद्गुणान् यास्ता (देवी =विदुष्य सत्स्त्रिय) ६ १३ प्राणा जलादयो वा ४ १२ आप्नुवन्ति व्याप्नुवन्ति सर्वान् पदार्थान्ते प्राणा १ २० २१ प्राणवलानि १ १७८ १ जलो को स० वि० २०९, अथर्व० ६ ६ १ ५ जल और जलस्थ पदार्थ आर्याभि० २ २५, ३६ १७ प्राणप्रद वायु स० वि० १९६, ९ ११३ ८ प्राण, वायु, समुद्र इत्यादि आर्याभि० १ ३२, ऋ० १ ७ १० १५ [आप्लृ व्याप्तौ (स्वा०) धातो 'आप्नोतेर्ह्रस्वश्च' उ० २ ५८ सूत्रेण क्विप् प्रत्यये ह्रस्वत्वे चाप् शब्द सिध्यति । अथवा 'आप कर्माख्यायां ह्रस्वो नुट् च वा' उ० ४ २०८ सूत्रेणासुन् प्रत्ययो ह्रस्वश्च । आप आप्नोते नि० ९ २६ आप =आपना आपनानि वा नि० १२ ३८ आप अन्तरिक्षनाम निघ० १ ३ आप =उदकनाम निघ० १ १२ तद्या एताश्चान्द्रमस्य आगामिन्य आपो भवन्ति रश्मयस्ता नि० ५ ४२ आप तद् यदब्रवीत् (ब्रह्म) आभिर्वा अहमिद सर्वमाप्स्यामि यदिद कि चेति तस्मादापो ऽभवस्तदपामप्त्वमाप्नोति वै स सर्वान् कामान् यान् कामयते गो० पू० १ २ सेदꣳ सर्वमाप्नोद् यदिद कि च यदाप्नोत्तस्मादाप श० ६ १ १ ९ अद्भिर्वाऽइद सर्वमाप्तम् श० १ १ १ १४ आपो ह वा ऽइदमग्रे सलिलमेवास । ता अकामयन्त कथ नु प्रजायेमहीति श० ११ १ ६ १ अश्मनो ह्याप प्रभवन्ति श० ९ १ १ ४ तस्मात्पुरुषात्तप्तादापो जायन्ते श० ६ १ ३ १ ता वा ऽ एता सप्तदशाप सम्भरति श० ५ ३ ४ २२ प्राणा वा आप तै० ३ २ ५ २ ता० ९ ९ ४ आपो वै प्राणा श० ३ ८ २ ४ प्राणो ह्याप जै० उ० ३ १० ९ अमृत वा ऽ आप श० १ ९ ३ ७ अमृतत्व वाऽआप कौ० १२ १ अमृता ह्याप श० ३ ९ ४ १६ अमृत वा एतदस्मिन् लोके यदाप ऐ० ८ २० आपो वा ऽ उत्स श० ६ ७ ४ ४ आपोऽक्षितिर्या इमा एपु लोकेपु याश्चेमा अध्यात्मन् कौ० ७ ४ शान्तिराप श० १ २ २ ११ शान्तिर्वा आप ऐ० ७ ५ आपो हि शान्ति ता० ८ ७ ८ शान्तिर्वै भेपजमाप कौ० ३ ६, ७, ८, ९ गो० उ० १ २५ आपो ह वा ऽओपधीना रस श० ३ ६ १ ७ रसो वा ऽ आप श० ३ ३ ३ १८ आपो वे सर्वस्य शान्ति प्रतिष्ठा प० ३ १ आपो वा ऽअस्य सर्वस्य प्रतिष्ठा श० ४ ५ २ १४ आप सत्ये (प्रतिष्ठिता) ऐ० ३ ६ गो० उ० ३ २ श्रद्धा वा आप तै० ३ २ ४ १ मेध्या वा आप श० १ १ १ १ मेध्या वा एता आपो भवन्ति या आतपति वर्षन्ति श० ५ ३ ४ १३ पवित्र वा ऽआप श० १ १ १ १ आपो वै क्षीररसा आसन् ता० १३ ४ ८ ऊर्ग्वा आपो रस कौ० १२ १ अन्न वा ऽआप श० २ १ १ ३ अन्नमाप कौ० १२ ३ ८ आपोऽन्नम् ऐ० ६ ३० तद्यास्ता आपोऽन्न तत् जै० उ० १ २५ आपो वै रक्षोघ्नी तै० ३ २ ३ १२ (इन्द्र) एताभि (अद्भि) ह्येन (वृत्रम्) अहन् श० १ १ ३ ८ वज्रो वा ऽआप श० १ १ १ १७ वीर्य वा ऽ आप श० ५ ३ ४ १ आपो वा ऽअर्क श० १० ६ ५ २. अप्सु

१८८, १९ ३० [आप्लृ व्याप्तौ (स्वा०) धातोर्लट्]

आप्यते प्राप्यते १९ २५ प्राप्ति की गई है स० वि० १८८, १९ ३० [आप्लृ व्याप्तौ (स्वा०) धातो कर्मणि लट्]

आप्यम् आप्तु प्राप्तु योग्य सखित्वम्, प्र०—अत्र 'आप्तृ व्याप्तौ' इत्यस्मादौणादिको यत्, अत्र सायणाचार्येण प्रमादादढुपधत्वाऽभावेऽपि 'पोरदुपधात्' इति कर्मणि यत्, 'यतोऽनाव' इत्याद्युदात्तत्व, यच्च छान्दसमाद्युदात्तत्वमित्य-शुद्धमुक्तम्, औणादिकस्य यत्प्रत्ययस्य विद्यमानत्वात् १ ३६ १२ आप्तु योग्यम् (उक्थ्य=विद्यावच) प्र०—अत्राऽऽ-प्तृ-धातोर्बाहुलकादौणादिको यत् प्रत्यय १ १० ५ १३ **आप्येन**=व्याप्येन वस्तुना २ २९ ३ [आप्लृ व्याप्तौ (स्वा०) धातोर्बाहुलकादौणादिको यत् प्रत्यय । आप्य = आप्यमाप्नोते निघ० ६ १४]

आप्यायताम् समन्ताद् वर्धयताम्, प्र०—अत्रा-ऽन्तर्गतो ण्यर्थ ५ ७ सत्कर्माऽनुष्ठानेन वर्द्धताम् ६ १५ सर्वतो वर्द्धताम् ३८ १८ अभितो वर्धयताम् ५ ७ **आप्यायध्वम्**=आप्यायामहे वा प्र०—अत्र पक्षे व्यत्यय ११ **आप्यायन्ताम्**=पुष्टा भवन्तु १ ९३ १२ **आप्यायय**=अभितो वर्धय वर्धयति वा ५ ७ **आप्या-यस्व**=सर्वतो वर्धस्व वर्द्धयेद्वा ५ ७ अभितो वर्धस्व १ ९१ १६ समन्तात्पुपाण ३८ २१ अ०—नित्य व्यापय २ १४ **आप्यासिषीमहि**=समन्ताद्वर्धेम, प्र०—अत्र प्यैङ् धातो 'सिवुत्सर्गश्छन्दसि' अ० ३ १ ३४ अनेन वार्त्तिकेन सिप् प्रत्यय २ १४ सर्वतो वर्द्धेम ३८ २१ [आङ्+ओप्यायी वृद्धौ (भ्वा०) धातोर्लोट् । अन्यत्र लिङपि]

आप्यायमानः समन्ताद्वर्धमान (मनुष्य) १२ ११३ पुष्ट पुष्टिकारक (विद्वज्जन) १ ९१ १८ वृद्ध इव (यम =सूर्य) ८ ५७ [आङ्+ओप्यायी वृद्धौ (भ्वा०) धातो शानच्]

आप्रणेषि समन्तात्प्रकर्षेण नयसि २ १ १६ [आङ्+प्र+णीञ् प्रापणे (भ्वा०) धातोर्लट् । 'बहुल छन्दसी' ति शपो लुक्]

आप्रथस्व अभित प्रख्यातो भव १३ २ [आङ्+ प्रथ प्रख्याने (भ्वा०) धातोर्लोट्]

आप्रयच्छ समन्तात् प्रकर्षेण देहि ५ १९ [आङ्+ प्र+यमु उपरमे (भ्वा०) धातोर्लोट् । 'इषुगमियमा छ' इति छकारादेश]

आप्रयातु अभित प्रकृष्ट प्राप्नोतु १८ ७२ **आप्रयाहि**=समन्तात्प्रकर्षेण गच्छ ३४ १९ [आङ्+ प्र+या प्रापणे (अदा०) धातोर्लोट्]

आप्ररिक्थाः समन्तादतिरिणक्षि, प्र०—अत्र 'वाच्छन्दसि' इति विकरणाऽभाव ३ ६ २ [आङ्+ प्र+रिचिर् विरेचने (रुधा०) धातोर्लट् । 'बहुल छन्दसी' ति शपो लुक् । अथवा 'वाच्छन्दसि' वार्तिकेन विकरणा-ऽभाव]

आप्रशस्यते अभित प्रशस्तो जायते २८ ३ [आङ्+प्र+शसु स्तुतौ (भ्वा०) धातो कर्मणि लट्]

आप्रस्य पूर्णबलस्य (सेनापते) ११३२२ [आङ् पूर्वात् प्रा पूरणे (अदा०) धातो क प्रत्यय]

आप्राः समन्ताद् व्याप्नोति १३ ४६ समन्तात्प्राति-पिपर्त्ति प्र०—अत्र लडर्थे लुङ् ७ ४२ अभित प्राति-व्याप्नोति ४ ५२ ५ समन्ताद् व्याप्नुयो ६ ४६ ५ समन्तात्पूरितवान् १ ११५ १ समन्तात् पिपृहि ६ २ [आङ्=पॄ पालनपूरणयो (जु०) धातोर्लुङ् । 'मन्त्रे घस-ह्वरणशवृदहात्०' अ० २ ४ ८० सूत्रेण लेर्लुक् । आङ्-पूर्वात् प्रा पूरणे (अदा०) धातोर्वा लुङ्]

आप्राः समन्ताद्धारयन् (परमेश्वर) प० वि० । [आङ्+प्रा पूरणे (अदा०) धातोरच् प्रत्यय]

आप्रायि समन्तात् पूर्यन्ते ३४ ३२ [आङ्+प्रा पूरणे (अदा०) धातो कर्मणि लुङ्]

आप्रीणीते अभित कामयते ७ ७ ३ [आङ्+प्रीञ् तर्पणे कान्तौ च (क्र्या०) धातोर्लट्]

आप्रीतपाः समन्तात् प्रीतान् कमनीयान् पदार्थान् पाति रक्षति (विष्णु =विद्युत्) ८ ५७ [आङ्-प्रीतोपपदे पा रक्षणे (अदा०) धातो क प्रत्यय । आकारस्य न लोपश्छान्दसत्वात्]

आप्रीभिः या समन्तात् प्रीणन्ति ताभि (क्रियाभि) १९ १९ **आप्री.**=सर्वथा प्रीत्युत्पादिका परिचारिका, (भा०—सुशिक्षितसेविका) १९ १९ [आङ्+प्रीञ् तर्पणे कान्तौ च (क्र्या०) धातो क्विप् । आप्रिय (ऋच) तद्यद् आप्रीणाति तस्मादाप्रियो नाम कौ० १० ३ आप्रीभिराप्नुवन् तदाप्रीणामाप्रीत्वम् तै० २ २ ८ ६ तद्यदेन (पशुम्) एताभिराप्रीभिराप्रीणात् तस्मादाप्रियो नाम श० १० ८ ३ ५ यदेतान्याप्रिय आज्यानि भवन्ति, आत्मानमेवैतेराप्रीणाति ता० १५ ८ २ प्राणा वा आप्रिय कौ० १८ १२ तेजो वै ब्रह्मवर्चसामाप्रिय ऐ० २ ४]

आपिप्यानम् सर्वतो वर्धमानम् (कलश=कुम्भम्) ४ २७ ५ [आङ्+ओप्यायी वृद्धौ (भ्वा०) धातोर्यङन्ताच्छानच् । 'लिड्यङोश्च' अ० ६ १ २९ सूत्रेण पीभाव]

आपिप्रिये समन्तात्प्रीणाति ३ ५१ ३ [आङ्+प्रीञ् तर्पणे कान्तौ च (क्र्या०) धातोर्लिट्]

आपिब समन्तात् श्रवणशक्त्या गृहाण १ १० ११ [आङ्+पा पाने (भ्वा०) धातोर्लोट् । शिति पिबादेश]

आपीपयन् आवर्द्धयेयु १.१५२ ६ [आङ्+ओप्यायी वृद्धौ (भ्वा०) धातोर्लङ]

आपीपाय आवर्द्धस्व ४ ३ ६ (आङ्+ओप्यायी वृद्धौ (भ्वा०) धातोर्लिट् । 'लिड्यङोश्चे' ति पीभाव]

आपुनन्ति समन्तात् पवित्रीकुर्वन्ति ३ ८.५ [आङ्+पूञ् पवने (क्र्या०) धातोर्लट् । 'प्वादीना ह्रस्व' इति शिति ह्रस्व]

आपु: प्राप्नुवन्ति, प्र०—अत्र वर्त्तमाने लडर्थे लिट् १ २४ ६ पा सकते है आर्याभि० १ ३२ [आप्लृ व्याप्तौ (स्वा०) धातोर्लिट् लडर्थे]

आपूर्ण: समन्तात् पूरित (कलश =कुम्भ) ३ ३२ १५ [आङ्+पृ पालनपूरणयो (जु०) धातो 'धापॄवस्य०' उ० ३ ६ सूत्रेण न प्रत्यय । बाहुलकाद् गुणाऽभाव]

आपूर्यमाणम् समन्तात् न्यूनतारहितम् (श्रव = अन्नम्) १ ५१ १० [आङ्+पृ पालनपूरणयो (जु०) धातो कर्मणि शानच्]

आपृचे समन्तात् सम्पर्काय ५ ५० २ [पृची सम्पर्चने (अदा०) पृची सम्पर्के (रुधा०) धातोर्वा 'धवर्थे क विधानम्' इति क प्रत्यय]

आपृचीमहि समन्तात् सम्बन्धनीयाम १ १२९ ७ [आङ्+पृची सम्पर्चने (अदा०) धातोर्लिङ्]

आपृच्छ्यम् समन्तात् प्रष्टव्यम् १ ६४ १३ [आङ्+प्रच्छ ज्ञीप्सायाम् (तुदा०) धातोर्क्यप् प्रत्यय । किति सम्प्रसारणम्]

आपृच्छ्य: समन्तान्निश्चयार्थं प्रष्टु योग्य (विद्वज्जन) १ ६० २ [आङ्+प्रच्छ ज्ञीप्साया (तुदा०) धातो क्यप् । किति 'ग्रहिज्या०' सूत्रेण सम्प्रसारणम्]

आपृण समन्ताद् योजय ६ २१ अभित पूरय १ १६ ६ समन्तात् पूरयति व। ३ १७ समन्तात् सुखय १७ ७२ आपूर्ण कुरु ३ ३० १६ सब प्रकार से पूर्ण करो आर्याभि० २ ३३, ३ १७ परिपूर्ण करो आर्याभि० १ ३५ अभित पिपूर्धि ११ ६३ **आऽपृणत्**=समन्तात्पूरयति ३ २७ अभित प्रपूरयेत् ३ ३४ १ आपृणाति व्याप्नोति २ १५ २ **आपृणध्वम्**=समन्तात् सुखयत २५ २८ अभित पूरयध्वम् १ १६२ ५ **आऽपृणन्ति**=समन्ता‍त् सुखयेयु १ ५२ ४ अभित पालयन्ति विद्या पूरयन्ति वा ५ ११ ५ **आपृणस्व** सुखी भव १७,७९ समन्तात् सुखय ६ ४१ ४ **आऽपृणात्**=अभित प्रपूर्यात् १२ २३ **आपृणथे**=समन्तात् पूरयतम् ७ ६१ २ [आङ्+पृण प्रीणने (तुदा०) [धातोर्लोट् । पॄ पालनपूरणयो (क्र्या०) धातोराङ्पूर्वाल्लोटि लङि वा रूपाणि]

आपृणक्तु समन्तात् सम्पर्क करोतु १ ८४ १ [पृची सम्पर्के (रुधा०) धातोराङ् पूर्वाल्लोट् । (आपृणस्व) आपृणस्वेत्याप्रजायस्वेत्येतत् श० ६ २ ३ ४४]

आपृणन् समन्तात् पूरयन् (परमेश्वर) ४ ५३ २ [आङ्+पॄ पालनपूरणयो (क्र्या०) धातो शतृप्रत्यय]

आपृणन्ती अभित सुखयन्ती (उषा) १ १२४ ५ [आङ्+पृण प्रीणने (तु०) धातो शतरि स्त्रिया ङीपि च रूपम्]

आपे. य आप्नोति तस्य (सर्वव्यापकस्येश्वरस्य) २ २७ १७ प्राप्तस्य (अनृजो =कुटिलस्य जनस्य) ४ ३ १३ प्राप्तधनात् २ २८ ११ [आप्लृ व्याप्तौ (स्वा०) धातोर् इ प्रत्यय औणादिक]

आप्तम् व्याप्त प्राप्तम् (होमादिकम्) १९ २९ **आप्त:**=सर्वविद्यादिसद्गुणव्याप्त सत्योपदेष्टा (राजा, विद्वज्जनो वा) १ ३० १४ [आप्लृ व्याप्तौ (स्वा०) धातो क्त प्रत्यय]

आप्ता: प्राप्त होती है म० वि० १९७, ९ ११३ ११ [आप्लृ व्याप्तौ (स्वा०) धातो क्तप्रत्यये स्त्रिया टापि च रूपम्]

आप्त्य: य आप्तेषु भव स (विद्वज्जन) १ १०५ ९ [आप्लृ व्याप्तौ+क्तप्रत्यये=आप्त । ततो भवार्थे यत् । आप्त्या आप्नोते नि० ११ २० आप्त्यम्=आप्तव्यम् नि० ११ २१ आप्त्या (देवा) साध्याश्च त्वाऽऽप्त्याश्च देवा पाङ्क्तेन च्छन्दसा त्रिणवेन स्तोमेन शाक्वरेण साम्ना ऽऽरोहन्तु तानन्वारोहामि राज्याय ऐ० ८ १२ अथैन (इन्द्र) अस्या ध्रुवाया मध्यमाया प्रतिष्ठाया दिशि साध्याश्चाऽऽप्त्याश्च देवा ' अभ्यषिञ्चन्'' ' '' राज्याय ऐ० ८ १४]

आप्नोति प्राप्नोति १९ १९ प्राप्त होता है म० वि०

क्रियासु तासि सह १ ५१ ९ यें विद्याविनये समन्ताद् भवन्ति तैं सह (सन्निभि सह) ५ ३५ ३ [आङ्+भूमि-पदयो समास । भूमि = भू सत्ताया धातो 'भुव कित्' उ० ४ ४५ सूत्रेण मि प्रत्ययो किच्चाधिकारणे । भवन्ति पदार्था यस्या सा भूमि]

आभूप समन्तादलङ्कुरु ७ ७ **आभूषति**=समन्तादाप्नोति १ १३६ ५ [आङ्+भूप अलङ्कारे (भ्वा०) धातोर्लोट्]

आभूषति समन्तादाप्नोति १ १३६ ५ [आङ्+ भू प्राप्तौ धातोर् लेट् 'सिब्बहुल लेटी' ति सिप् विकरणो, णिचोऽभावश्च]

आभूषन्ती समन्ताद् भूपणयुक्ता (स्त्रिय) १ ४३ ९ [आङ्+ भूप अलङ्कारे (भ्वा०) धातो शतरि स्त्रिया डीपि च रूपम्]

आभूषु समन्ताद् भूपिता जना येन तत् (सुकर्म) १ ५६ ३ [आङ्+भूप अलकारे (भ्वा०) धातोर्बाहुलकाद् उ प्रत्यय]

आभूषेण्यम् अलङ्कर्त्तव्यम् (महित्वन=महिमानम्) ५ ५५ ४ [आङ्+भूप अलङ्कारे (भ्वा०) धातो 'कृत्यार्थे तवैकेन्केन्यत्वन' अ० ३ ४ १४ इति केन्य प्रत्यय]

आभृतम् समन्ताद् धृतम् (मासम्) १ १६१ १० समन्तात् पुष्ट धृत वा (रेत =वीर्यम्) ३८ २८ समन्तात् पोपितम् (सह =वलम्) २९ ५३ आभिमुख्येन धृतम् (वज्र वल वा) ६ ४७ २७ **आभृत**=समन्तात् पोपित (सुत =पुत्र) २ ३६ ५ समन्ताद्धृत (आनन्द) ५ ५८ ११ **आभृता**=समन्ताद् धृतानि (वसूनि=धनानि) ६ १६ ४८ [आङ्+भृञ् भरणे (भ्वा०) धातो क्त प्रत्यय]

आभोगयम् समन्ताद् भोगेपु साधु व्यवहारम्, प्र०—अत्रोभयसज्ञान्यपि छन्दासि दृश्यन्ते, इति भसज्ञानिपेधाद-ल्लोपाऽभाव १ ११० २ [भोगप्राति० भवार्थे यत् । छन्दसि भसज्ञाया अभावाद् 'यस्येति चे' त्यल्लोपो न भवति । आङ्भोगयो समास । भोग =भुजपालनाभ्यवहारयो (रुधा०) धातोर्घञ्]

आभोगये समन्ताद् भुञ्जन्ते सुखानि यस्या तस्यै पुरुपार्थयुक्तायै (राये=राज्यश्रिये) प्र०—अत्र बहुलवचना-दौणादिको यि प्रत्यय १ ११३ ५ [आङ्+भुजपालना-भ्यवहारयो (रुधा०) धातोर्यिप्रत्यये छान्दस रूपम्]

आभ्रियन्ते समन्ताद् ध्रियन्ते ७ ९१ २ [आङ्+भृञ् भरणे (भ्वा०) धातो कर्मणि लट्]

आमत्स्व अस्माभि स्तुत सन् सदा समन्ताद्धर्षय, प्र०—'बहुल छन्दसि' इति श्यनो लुक् १ ९ ३ [आङ्+मदी हर्षे (दिवा०) धातोर्लोट् । 'बहुल छन्दसी' ति श्यपो लुकि तत्स्थाने शपिति श्यनोऽपि लुक्]

आमन्येथाम् समन्ताद् विजानीतम् ३ ५८ ४ [आङ्+मन ज्ञाने (दिवा०) धातोर्लङ्]

आममत् रोगा कुर्यात्, प्र०—अम रोगे, अमागम लङि रूपम् १९ ४७ [अम रोगे (चुरा०) धातोर्लङ्, अमागमश्छान्दस]

आमस्य अपरिपक्वस्य (क्रविप =अशितस्य पदार्थस्य) २५ ३३ **आम:**=अपरिपक्व आत्मा यस्त करणयुक्त (मनुष्य) स० प्र० ४२३, ९ ८३ १ [अम रोगे (चुरा०) धातोर् घञ्]

आममिरे समन्तात् सृजन्ति ३ ३८ ७ [आङ्+माङ् माने शब्दे च (जु०) धातोर्लिट् सामान्ये]

आमयति रोगयति, भा०—रोगाऽऽविष्कार भवति १२ ८३ [अम रोगे (चुरा०) धातोर्लट्]

आमरीता समन्ताद् विनाशक (शत्रु) ४ २० ८ [आङ्+मृ हिंसायाम् (क्र्या०) धातोस्तृच् । 'वृतो वा' अ० ७ २ ३८ इनीटो दीर्घ]

आमा आमानि (वस्तूनि) ३ ३० १४ अपरिपक्वम् (आहारम्) प्र०—अत्र विभक्तेराकारादेश ४ ३ ९ [अम रोगे (चुरा०) धातोर्घञ्]

आमादम् आमानपरिपक्वानत्ति तम्, भा०—दाहकस्वभाव येनामान् पदार्थान् पक्त्वाऽदन्ति तम् (अग्नि=विद्युदाख्यम्) १ १९ [आमोपपदे अद भक्षणे (अदा०) धातोरण्प्रत्यय । अयम् (अग्नि) वा ऽआमाद्येनेद मनुष्या पक्त्वाऽदन्ति श० १ २ १ ४]

आमायाम् अप्रौढायाम् (उस्रियाया)=गवि) १ १८० ३ **आमासु**=अपक्वास्वोपधीपु १ ६२ ९ [आमम्=अपरिपक्वम् ततष्टापि रूपम्]

आमायाम् गृहे भवासु (पूर्पु=पुरीपु) २ ३५ ६ अपने घरो मे उत्पन्न हुए (पुत्र और कन्या रूप प्रजाओ मे) स० वि० १०४, २ ३५ ६ [अमा गृहनाम निघ० ३ ४ अम पदनाम निघ० ४ ३ अम प्राति० भवार्थे इण् प्रत्यये स्त्रिया टापि च रूपम्]

आमिक्षा दधिदुग्धमिष्टैर्निर्मिता (हवि =पदार्था)

-**आबध्नन्** समन्तात् बध्नीयुः ३४५२ **आबबन्ध**= अभितो बध्नामि १२६५ [बन्ध बन्धने (क्र्या०) धातो राङ्पूर्वात् शतृप्रत्यय । अन्यत्र—आङ्+बन्ध+लिट्]

आबभाज समन्तात् सर्व सेवन्ते ११६४८ (आङ्+भज सेवायाम् (भ्वा०) धातोर्लिट्]

आबभूव समन्तात् भवति ३२५ समन्तात् भवेत् ६२५ प्रकाशित हुई म० प्र० २८१, १०११६७ [आङ्+भू सत्तायाम् (भ्वा०) धातोर्लिट्]

आबिभ्रति समन्तात् भरन्ति ६१६४० [आङ्+डुभृञ् धारणपोषणयो (जु०) धातोर्लटि प्रथमबहुवचने रूपम्]

आभगः समस्तसौभाग्य (आप्तपुरुष) ११३६४ [आङ्-भगपदयो समास]

आभज समन्तात् सेवस्व ३४७३ अभिलष ११२१ १५ **आऽभजत्**=समन्तात् सेवेत ११५६५ समन्तात् सेवते ४३०१६ **आभजन्त**=अभितो भजन्ते सेवन्ते १६५६ **आभजस्व**=आसेवस्व ४३२२१ **आभजे-महि**=समन्तात् सेवेमहि ७३२७ [आङ्+भज सेवायाम् (भ्वा०) धातोर्लोट् । अन्यत्र लिङ्]

आभजन्तीः समन्तात् सेवमाना (देवी =दिव्या स्त्रिय) १७.५४ [आङ्+भज सेवायाम् (भ्वा०) धातो शतरि स्त्रिया डीपि च रूपम्]

आभनन्त समन्तात् भनन्तु उपदिशन्तु ७१८७ [आङ्+भण शब्दार्थे (भ्वा०) धातोर्लङ् । व्यत्ययेनात्मने-पदम्]

आभयते समन्तात् भय जनयति १५८५ [भय करोतीति विग्रहे 'तत्करोति तदाचष्टे' वार्त्तिकेन णिच् । 'सनाद्यन्ता धातव' इति धातुसञ्ज्ञायाम् आङ्पूर्वाल्लट् । णिलोपश्छान्दस । 'छन्दस्युभयथा' इत्यार्धधातुकसञ्ज्ञाया वा णेर्लोप]

आभर समन्तात् भर १७६८ आभिमुख्येन धर १५३३ अभितो भरति वा ४१६ अभित सम्यग् धारय प्रदेहि १४७ समन्ताद्धारय १८१ समन्तात्पुष्णीहि ५१६५ अभित पोषय ३४३३ सर्वत पालयसि ३६७ अभित सुखैर्भरति पुष्णातीति ४१६ समन्तात् देहि १८१७ समन्तात् प्रापय १८१९ समन्ताद्धर पुष्णीहि वा ५३५२ **आभरत्**=समन्तात् भरत, अभितो बिभ्रत २०५६ **आभरतम्**=अभितो धारयतम् ११०६७ **आभरति**=समन्ताद्धरति ४२२४. अभित सम्यग् धारय प्रदेहि १४७ [आङ्+भृञ् भरणे (भ्वा०) धातो र्लोट्]

आभरति समन्तात् हरति ४२२४ [आङ्+हृञ् हरणे (भ्वा०) धातोर्लट् । 'हृग्रहोर्भश्छन्दसी' ति [हकारस्य भकार]

आभरद्वसुः या समन्ताद्वसूनि बिभर्त्ति सा (विदुषी स्त्री) ५७९३ [आभरत्+वसुपदयोर्बहुव्रीहि, 'वोतो-गुणवचनात्' इति विकल्पाद् ङीप् न]

आभरन्तः समन्तात् धरन्त (ऋषय) १५४६ [आङ्+भृञ् भरणे (भ्वा०) धातो शतृप्रत्यय]

आभरत् समन्ताद्धरेत् ४२७ [आङ्+हृञ् हरणे (भ्वा०) धातोर्लेट्]

आभाति समन्तात् प्रकाशयति ३२५३ अभितो राजति १२२१ समन्तात्प्रकाशते १२६ **आभासि**= समन्तात् प्रकाशयसि १५०४ अभितो दीपयसि १५६३ **आभाहि**=समन्तात् भाहि १४८९ समन्तात प्रकाशय २७१ [आङ्+भा दीप्तौ (अदा०) धातोर्लट् । आभाहि पदे लोट् च]

आभार्ष्टाम् समन्तात् दहताम् २८१७ [आङ+भ्रस्ज पाके (तुदा०) धातोर्लुङि प्रथमद्विवचने रूपम् । 'वदव्रज०' इति वृद्धि 'भ्रस्जोरोपधयोरमन्यतरस्याम्' इति रेफोपधयोर्निवृत्ति रमागमश्च]

आभुवत् समन्तात् भूयात्, अ० भवति वा, प्र०—भूधातोराशिषि लिङि प्रथमैकवचने 'लिङ्याशिष्यङ्' अ० ३१८६ इत्यङि सति 'किदाशिषि' इत्यागमाऽनित्यत्वे प्रयोग १५३ समन्तात् भवेत् ३६४ अभितो भवे ४३११ [आङ्+भू सत्तायाम्+आशिषि लिङ् । आगम-शासनस्यानित्यत्वाद् यासुट् न भवति]

आभुवम् यत्र समन्ताद्भवति सुख तम् (रयि= द्रव्यम्) प्र०—अत्र 'घञर्थे कविधानम्' इति क प्रत्यय ११३३७ समन्तात् भवनशीलम् (गा=बलीवर्दम्) ११५१४ **आभुवः**=समन्तात् भवन्ति ये या वा तान् ता वा (अप) १६४१ समन्तात् भवन्ति ये ते (वायव) १६४६ [आङ्+भू सत्तायाम् (भ्वा०) धातो 'घनर्थे क-विधानमि' ति क प्रत्यय]

आभुः रिक्त खड्गादिरहित सेनापति १६१० [आङ्+भू सत्तायाम् धातो 'डुप्रकरणे मितद्र्वादिभ्य उपसंख्यानम्' अ० ३३१८० इति डु प्रत्यय]

आभूभिः समन्तात् भवन्ति वीरा यासु प्रशासन-

आयताम् =आगच्छताम्, आगच्छन्तीना वा (मनुनाम् = जनानाम्) १ १६६ ७ [आङ्+इण् गतौ (अदा०) धातो शतृप्रत्यय]

आयन् समन्तात् प्राप्नुयात् २ ३० ७ **आयथुः** = सर्व राज्य रक्षेथाम् १० ३४ **आयन्** =प्राप्नुवन्ति ६.७ ४ मर्यादायामायान्तु ७ ५ ३ आगच्छन्ति प्राप्नुवन्ति ७ ५६ १२ आप्नुवन्ति १ १६३ ६ प्राप्नुयु ३ ३३ ७ प्राप्नुवन्तु १७ ५६ आगच्छन्ति २७ २५ **आयन्ति**— समन्तात्प्राप्नुवन्ति ३ ३१ १४ **आयन्तु** =समन्तात्प्राप्नुवन्तु १ ८९ १ आगच्छन्तु १६ ५८ **आयम्** =आगच्छेय प्राप्नुयाम् १ १२५ ३ [आङ्+इण् गतौ (अदा०) धातोर्लङि लटि लोटि च रूपाणि]

आयय आयाय ५ ६१ १ आगच्छत १ १६८ ० **आययुः** =समन्ताज्जानीयु प्राप्नुयुर्वा ५ ५३ ३ समन्तात् प्राप्नुयु २ ५ ५ **आयात** =अभितो गच्छत १ ८८ १ समन्तात्प्राप्नुत १ १७१ २ **आयातम्** =समन्तात्प्राप्नुतम् ३४ ४७ अभित प्राप्नुतम् ३३ ८८ समन्ताद् गच्छतो गमयतो वा प्र०—अत्र व्यत्यय, अन्तर्गतो ण्यर्थश्च १ ३ ३ समन्तात्प्राप्नुतम् ३३ ५८ समन्तात्प्राप्नुत २ ३६ ५ अभितो गच्छतम् १ ४७ २ आगच्छतम् १ १८४ ६ **आयाताम्** =आगच्छताम् ७ ४८ १ **आयाति** =समन्तात् प्राप्नोति ३४ ३१ समन्ताद् गच्छति ३३ ४३ **आयातु** =आगच्छतु २० ४७ समन्ताद् गच्छतु ५ ४५ ६ समन्तात् प्राप्नोतु ४ ४८ ५ **आयासत्** = समन्ताद् यायात् २० ४८ समन्तात्प्राप्नुयात् ४ २० १ **आयासि** =समन्ताद् याति, प्र०—अत्र पुरुषव्यत्यय १ १२ ४ **आयासिष्टम्** =आयातम् १ ११६ ४ **आयासीष्ट** =समन्तात् प्राप्नुयात्, प्र०—अत्र व्यत्ययेनात्मनेपदम् १ १६५ १५ **आयाहि** =समन्तात्प्राप्नुया १ १० १८ समन्तात्प्राप्नो भव भवति वा, अ०—कृपया प्राप्नुहि प्राप्नोति वा १ ३ ४ तू प्राप्त हो आर्याभि० १७ आगच्छ ५ ४० १ समन्तात्प्राप्नुहि ४ १६ १० आभिमुख्यतयाऽऽगच्छ १ १७७ २ समन्ताद् गच्छ १ १३४ १ समन्ताद् याति समन्तात्प्रापयति, अ०—समन्तात्प्राप्नोति १ ३ ६ आगच्छ आगच्छति वा, प्र०—अत्र पक्षे व्यत्यय १ २ १ समन्ताद् यजामि सङ्गमयामि वा, प्र०—अत्र लडर्थे लुङडभावश्च १ १४ १ [या प्रापणे (अदा०) धातोर्लङि लटि लेटि लुङि च रूपाणि]

आयत समन्ताद्धन्ति, प्र०—अत्र 'यमो गन्धने' अ० १ २ १५ इत्यनेन सिच किन्त्वम् १ ८०.१२ [आङ्+यम् उपरमे (भ्वा०) धातोर्लिङि। 'आङो यमहन' प० १.३ इत्यात्मनेपदम्। 'यमो गन्धने' इति सिच कित्त्वादनुनासिकलोप]

आयतने आयान्ति आगच्छन्ति प्राणिनो यस्मिँस्तज्जगत्तस्मिन् जगति स्थाने गृहे वा ५ ७८. [यतो वा आयातनम् उ० १८६ २५]

आयता विस्तृतानि (धनानि) ५ ८४ ६ [आङ्+यमु उपरमे (भ्वा०) धातो क्त प्रत्यय]

आयतिः समन्तात् विस्तृति १ १३८ ६ [आङ्+यमु उपरमे (भ्वा०) धातो क्तिन्। यमो वा आयति। उ० ३० २३]

आयती समन्तात् प्राप्यमाणा (गौरिवी) १ १६१ २ **आयतीनाम्** आगामिनीनामुषसाम् १ ११३ ८ आगच्छन्तीनाम् (उषसाम्) १ १२४ २ **आयतीन्** =प्राप्नुवतीम् (उषसम् - प्रभातम्) १५ २४ आगच्छन्तीम (उषसम्—पार्थिवीनाम्) ३ ६१ ६ [आङ्+इण् गतौ (अदा०) धातो शतृप्रत्यये स्त्रियां ङीपि रूपम्। (आयती) वाङ्नाम निघ० १.८]

आयते गतौ प्राप्नुवते (जिज्ञासवे जनाय) २ १३ ८ [आङ्+इण् गतौ (अदा०) धातो शतृ प्रत्यय]

आयत्याः पश्चाद्भुवा (उषस --प्रभाता) ५ ४५ १ [आङ्+इण् गतौ (अदा०) धातो शतरि ङीपि रूपम्]

आयनाय समन्ताद् विज्ञानाय २२ ७ [आङ्+अय गतौ (भ्वा०) धातोर्ल्युट्]

आयन्तम् प्राप्नुवन्तम् (अग्नि =विद्युतम्) ११ ४७ आगच्छन्तम् (शिष्यम्) १ १२५ २ [आङ्+इण् गतौ (अदा०) धातो शतृप्रत्यय। 'इणो यण्' इति यणादेश]

आयमत् समन्तादुपरमेत १२ ११५ **आयमति** = अभितो यच्छेत्, प्र०—अत्र लेटि 'बहुल छन्दसि' इति शपभाव १ १४१ ११ [आङ् +यमु उपरमे (भ्वा०) धातोर्लङ् लट् च]

आयवः ये स्वकर्मफलानि यान्ति ते मनुष्या, प्र०—आयव इति मनुष्यनाम निघ० २ ३, ३३ ६७ विद्वांस १ १३० ६ प्राप्नुवन्त (जना) १ १३६ ३ ये सूर्यमभितो यन्ति ते लोका १ १३१ २ ये पुरुषार्थ यन्ति ते मनुष्या १ १३१ २ विद्वज्जना १ १३० ३ ज्ञानवन्तो मनुष्या ४ ७४ ये सत्य यन्ति ते मनुष्या प्रजा ३३ २८ प्राप्तसत्यासत्यविवेचना. (मानुषास = मनुष्या) १ ६० ३

१६ २१ मधुराऽम्लादिमयोगयुक्ता (हवि =वस्तु) १६ २३ [समन्तान्मेपति हिनस्तीत्यामिक्षा=क्षीरविकार इति विग्रहे, (आङ्पूर्वाद् मिश गेपकृते (भ्वा०) धातो-र्बाहुलकात् स' प्रत्यय किच्च। आण्डस्य वा ऽएतद्रूप यदामिक्षा तै० १ ६ २.४]

आऽमित्रः समन्तादशत्रु (जन) ६ २८ ३ [आङ्-अमित्रपदयो समास । मित्रम्=मिनोति मान्य करोतीति विग्रहे, डुमिञ् प्रक्षेपणे (स्वा०) धातो 'अमिचिशसिभ्य क्त्र' उ० ४ १६४ सूत्रेण क्त्र प्रत्यय]

आमिनत् आहिंस्यात् ४ ३० २३ **आमिनन्ति**= समन्ताद्धिंसन्ति ५ ६४.४ [आङ्+मीञ् हिंसायाम् (क्र्या०) धातोर्लेटि रूपम् । ह्रस्वत्व छान्दसम्]

आमिनन्त समन्तात् प्रक्षिपन्ति १ ७६ २ [आङ्+डुमिञ् प्रक्षेपणे (स्वा०) धातोर्लङ् । विकरणव्यत्ययेन श्ना]

आमिनाना समन्ताद् हिंसन्ती (उषा), प्र०—मीञ् हिंसायाम्, इत्यस्य रूपम् १ ६२ १० [आङ्+मीञ् हिंसायाम् (क्र्या०) धातो. शानचि स्त्रिया टापि च रूपम् । ह्रस्वत्व छान्दसम्]

आमिनाने परस्पर प्रक्षिपन्ती पदार्थाविव (रात्र्युषसौ) प्र०—आमिनाने आमिन्वाने अन्योऽन्य याऽव्यारम कुर्वाणे इति नि० २ २०, १ ११३ २ [आङ्+डुमिञ् प्रक्षेपणे (स्वा०) धातो शानचि स्त्रिया टापि रूपम् । विकरणव्यत्ययेन च श्ना]

आमिमिक्षुः समन्तात् सिञ्चन्ति सम्बध्नन्ति ६ २६ २ अभित सिञ्चत ६ २६ ३ [आङ्+मिह सेचने (भ्वा०) धातोर्लुङ् । 'शल इगुपधात्०' इति च्ले क्स । छान्दस द्वित्वम् । 'भिजभ्यरतविदिभ्यश्चे' ति झेर्जुस्]

आमिश्लतमः समन्तादतिशयेन मिश्रित (सोम = ऐश्वर्ययोग ओषधिरसो) वा ६ २६ ४ [आङ्+मिश्रपदयो समासेऽतिशायने तमप् प्रत्यय । कपिलादित्वाद् रेफ य लकार । मिश्र =मेशति शब्दयतीति विग्रहे, मिश शब्दे (भ्वा०) धातोर्बाहुलकाद् रक् प्रत्यय]

आमिषि मासे ६ ४६ १४ [अमन्ति=रोगिणो भवन्ति येनेति विग्रहे, अम' रोगे (चुरा०) धातो 'अमेर्दीर्घश्च' उ० १ ४६ सूत्रेण टिषच् प्रत्ययो धातोरकारस्य च दीर्घ]

आमुरः समन्ताद् रोगकारिण (जना) ४ ३१ ६ [आङ्+अम रोगे (चुरा०) धातोर्बाहुलकाद् उरच् प्रत्यय]

आमुष्य चोरयित्वा ३ ४८ ४ [आङ्+मुष स्तेये (क्र्या०) धातो क्त्वा । समासे क्त्वो ल्यप्]

आमेन्यस्य समन्तान्मेयस्य (रजस =लोकस्य) ५ ४८ १ [आङ्+मा माने (अदा०) धातो कृत्यार्थे केन्य प्रत्यय]

आमेस्याने पुन पुनरहिंसन्त्यौ (द्यावाक्षामा=प्रकाशभूमी) १ ६६ ५ [आङ्+मीञ् हिंसाया (क्र्या०) धातोर्यङि शानचि टापि च रूपम्]

आयच्छ अभिता ददाति, प्र०—अत्र व्यत्ययो लडर्थे लोट् च ४ ६ **आयच्छत**=समन्ताद् गृह्णीत ८ ५१ १० **आयच्छतस्** समन्ताद् विस्तारयत, प्र०—अत्र पुरुषव्यत्ययो लडर्थे लोट् च १ १७ ८ **आयच्छतु**=निगृह्णातु ४ ३२ १५ **आयच्छन्तु** अभितो निगृह्णन्तु १ १३० २ [आङ्+यमु उपरमे (भ्वा०) धातोर्लोट् । 'इषुगमियमा छ' इति छकारादेश]

आयच्छद्भ्यः समन्ताद् निगृहीतृभ्य (राजपुरुषेभ्य) १६ २२ [आङ्+यमु उपरमे (भ्वा०) धातो शतृ । 'इषुगमियमा छ' इति छकारादेश]

भवति······इन्द्रो वैकुण्ठो मध्यन्दिने जै० उ० ४ १०.१० इन्द्रो वै मघवान् श० ४ १ २ १५ स उ एव मख स विष्णु । तत इन्द्रो मखवानभवन्मखवान्ह वै त मघवानमित्याचक्षते परोऽक्षम् श० १४ १ १ १ ३ इन्द्रो वसुधेय श० १ ८ २ १ ६ इन्द्र उ वै वेन कौ० ८ ५ इन्द्रो वै वेधा ऐ० ६ १० गो० उ० २ २० इन्द्रो हि षोडशी श० ४ २ ५ १४ इन्द्रो ह वै षोडशी श० ४ ५ ३ १ कौ० १७ १ ४ एतद्ध वा इन्द्राग्न्यो प्रिय धाम यद् वागिति ऐ० ६ ७. गो० उ० ६ १३ वाग् वै ऐन्द्री ऐ० २ २९ वाक् च प्राणश्चेन्द्रवायव ऐ० २ १६ अथैतद्वामेऽक्षिणि पुरुषरूपम् । एषास्य (दक्षिणेऽक्षणि वर्त्तमानस्य पुरुषस्येन्द्राख्यस्य) पत्नी विराट् श० १४ ६ ११ ३ इन्द्रो वृषा श० १४ १ ३३ इन्द्रो वै वृषा ता० ९ ४ ३ इन्द्रो वै वाजी ऐ० ३ १८ इन्द्रो वै गोपा ऐ० ६ १० गो० उ० २ २० इन्द्रो उ वै परुच्छेप कौ० २३ ४ एतेन (पारुच्छेपेन रोहिताख्येन छन्दसा) वा इन्द्र सप्त स्वर्गाल्लोकानारोहत् ऐ० ५ १० इन्द्रो वै चतुर्होता तै० २ ३ १ ३ इन्द्र सप्तहोता तै० २ ३ १ १ २ २ ८ ५. यन्मन स इन्द्र गो० उ० ४ ११ इन्द्रो वै प्रदाता स एत्रास्मै यज्ञ प्रयच्छति कौ० ४ २ यो ह खलु वाव प्रजापति स उ वावेन्द्र तै० १ २ २ ५ इन्द्रो वै त्वष्टा ऐ० ६ १० इन्द्र उ वै वातापि स हि वातमाप्त्वा शरीराण्यर्हन् प्रतिप्रैति कौ० २७ ४ कतमत्तदक्षरमिति। यत्क्षरन्नाऽक्षीयतेति इन्द्र इति जै० उ० १ ४३ इन्द्र उ वै वरुण स उ वै पयोभाजन कौ० ५ ४ गो० उ० १ २२ इन्द्रस्य शतभिषक् (नक्षत्रम्) तै० १ ५ १ ५ इन्द्रो लोकम्पृणा श० ८ ७ २ ६ यत् पुरस्ताद् वासीन्द्रो राजा भूतो वासि जै० उ० ३ २१ २ दक्षिणा दिक् । इन्द्रो देवता तै० ३ ११ ५ १ अथ यद् विश्वजितमुपयन्ति । इन्द्रमेव देवता यजन्ते श० १२ १ ३ १५ इन्द्रो विश्वजिद् इन्द्रो हीद सर्व विश्वमजयत् कौ० २४ १ ततो वा इदमिन्द्रो विश्वमजयद् यद् विश्वमजयत्तस्माद् विश्वजित् ता० १६ ४ ५ इन्द्रो वै युधाजित् ता० ७ ५ १४ इन्द्रो वै प्रासहस्पतिस्तुविष्मान् ऐ० ३ २२ सेना वा इन्द्रस्य प्रिया जाया वावाता प्रासहा नाम ऐ० ३ २२. सेना ह नाम पृथिवी धनञ्जया विश्वव्यचा अदिति । सूर्यत्वक् । इन्द्राणी देवी प्रासहा ददाना तै० २ ४ २ ७ वैखानसा वा ऋषय इन्द्रस्य प्रिया आसन् ता० १४ ४ ७ यत्रेन्द्र देवता (यज्ञेषु) पर्यवृञ्जन् (यत स इन्द्र) विश्वरूप त्वाष्ट्रमभ्यमस्त वृत्रमस्तृत यतीन्त्सालावृकेभ्य प्रादादरुर्मघानवधीद् बृहस्पते प्रत्यवधीदिति तत्रेन्द्र सोमपीथेन व्यार्द्धत ऐ० ७ २८

कालकञ्जा वै नामासुरा आसन् । ते सुवर्गाय लोकायाग्निमचिन्वत पुरुष इष्टकामुपादधत् पुरुष इष्टकाम् । स इन्द्रो ब्राह्मणो ब्रुवाण इष्टकामुपाधत्त । एषा मे चित्रा नामेति । ते सुवर्गलोकमाप्रारोहन् । स इन्द्र इष्टकामवृहत् । तेऽवाकीर्यन्त येऽवाकीर्यन्त त ऊर्णनाभयोऽभवन् । द्वावुदपतताम् । तौ दिव्यौ श्वानावभवताम् तै० १ १ २ ४-६ इन्द्रो यतीन् सालावृके येभ्य प्रायच्छत्तमश्लीला वागभ्यवदत् स प्रजापतिमुपाधावत् तस्मा एतमुपहव्य प्रायच्छत् ता० १८ १ ९ नमुचिर्ह वै नामासुर आस तमिन्द्रो निविव्याध तस्य पदा शिरोऽभितष्ठौ स यदभिष्ठित उदवाधत स उच्छ्वङ्कुरतस्य पदा शिर प्रचिच्छेद ततो रक्ष समभवत् श० ५ ४ १ ९ त (त्रिशीर्षाण त्वाष्ट्र विश्वरूप) इन्द्रो दिद्वेषतस्य तानि शीर्षाणि प्रचिच्छेद श० १ ६ ३ २ स (इन्द्र) यत्र त्रिशीर्षाण त्वाष्ट्र विश्वरूप जघान श० १ २ ३ २ इन्द्रो वै वृत्रहा कौ० ४ ३ महानाम्नीभिर्वा इन्द्रो वृत्रमहन् कौ० २३ २ इन्द्रो वा एष पुरा वृत्रस्य वधादथ वृत्रꣳ हत्वा यथा महाराजो विजिग्यान एव महेन्द्रोऽभवत् श० १ ६.४२१, ४ ३ ६ १७ इन्द्रो वै वृत्र हत्वा विश्वकर्माऽभवत् ऐ० ४ २२ तस्य (इन्द्रस्य) असौ (द्यु०) लोकोनाभिजित आसीत्तम् (इन्द्र) विश्वकर्मा भूत्वाभ्यजयत् तै० १ २ ३ ३ मरुतो ह वै क्रीडिनो वृत्रꣳ हनिष्यन्तमिन्द्रमागत तमभित परिचिक्रीडुर्महयन्त श० २ ५ ३ २० ते (मरुत) एनम् (इन्द्रम्) अभ्यक्रीडन् तै० १ ६ ७ ५ इन्द्रो वै मरुत क्रीडिन गो० उ० १ २३ इन्द्रो वै मरुतसान्तपन गो० उ० १ २३ इन्द्रस्य वै मरुत कौ० ५ ४, ५ धर्म इन्द्रो राजेत्याह तस्य देवा विश श० १३ ४ ३ १४ एतद्वाऽइन्द्रस्य निष्केवल्यꣳ सवन यन्माध्यन्दिनꣳ सवन तेन वृत्रमजिघासत्तेन व्यजिगीषत श० ४ ३ ३ ६ ऐन्द्र वै माध्यन्दिन सवनम् । जै० उ० १ ३७ ३ इन्द्रस्य माध्यन्दिन सवनम् कौ० १४ ५ ऐन्द्र हि त्रैष्टुभ माध्यन्दिन सवनम् कौ० २९ २ गो० उ० ४ ४ त्रैष्टुभ इन्द्र कौ० ३ २ २२ ७ इन्द्र (श्रिय) बलम् (आदत्त) श० ११ ४ ३ ३ तान् (पशून्) इन्द्र पञ्चदशेन स्तोमेन नाप्नोत् तै० २ ७ १४ २ ऐन्द्रो राजन्य ता० १५ ४ ८ (राजन्यस्य) इन्द्रो देवता ता० ६ १ ८ हरिव आगच्छेति पूर्वपक्षापरपक्षौ वा इन्द्रस्य हरी ताभ्याꣳ हीदꣳ सर्व हरति ष० १ १ ऐन्द्री द्यौ ता० १५ ४ ८ द्यौरिन्द्रेण गर्भिणी श० १४ ९ ४ २१ ऐन्द्र हि पुरीषम् श० ८ ७ ३ ७ अथ यत्पुरीषꣳ स इन्द्र श० १० ४ १ ७ ऐन्द्र्यो वालखिल्या (ऋच) ऐ० ६ २९. ऐन्द्रो वा एष यज्ञक्रतुर्यत्साकमेधा कौ० ५ ५ गो० उ०

सयुक्तौ वायुविद्युदग्नी ३३ ४६ सभासेनाधीशौ ३३ ६१ अध्यापकोपदेशकौ ३३ ६३ अध्येत्रध्यापकौ १ १० ६ ७ उपदेश्योपदेष्टारौ १ १० ६ ८ न्यायसेनाध्यक्षौ वायुविद्युतौ वा १ १०८ ६ परमधनाढ्यौ युद्धविद्याप्रवीणश्च १ १०८ १३ स्वामिभृत्यौ १ १०८ ५ ऐश्वर्यविद्यायुक्तौ (अध्यापकोपदेशकौ) ३ १२ २ विद्युद्भौतिकावग्नी १ १० ६ १ इन्द्र प्रसिद्धो विद्युदग्नि पावकश्च १८ ४७ इन्द्रो विद्युच्चाग्नि सूर्यश्च १४ ११ सूर्य तथा अग्नि आर्याभि० २ २३, ३६ ११ बिजली और प्रसिद्ध अग्नि स० वि० १२२, अथर्व० १४ १ ५४ वायुवह्नी इव वर्त्तमानौ राजप्रजाजनौ ६ ५६ २ **इन्द्राऽग्निभ्याम्**=जीवाऽग्निभ्याम् २२ ५ वायुविद्युदस्त्राभ्याम् ३४ ४६ सूर्याग्निभ्याम् ५ ८६ ६ विद्युत्प्रसिद्धाभ्या वह्निभ्याम् ७ २३ **इन्द्राग्न्योः**=वायुपावकयो २५ ५ इन्द्रो वायुरग्निविद्युत्तयो २ १५ सूर्यविद्युतो ६ २४ [इन्द्र-अग्नि-पदयोर्द्वन्द्वे 'देवताद्वन्द्वे च' अ० ६ ३ २६ सूत्रेण पूर्वस्याऽऽनङ् । इन्द्राग्नी प्राणोदानौ वा ऽ इन्द्राग्नी श० २ ५ २ ८ इन्द्राग्नी हि प्राणोदानौ श० ४ ३ १ २२ प्राणापानौ वा इन्द्राग्नी गो० २ १ प्राणापानौ वा एतौ देवाना यदिन्द्राग्नी तै० १ ६ ४ ३ वल वै तेज इन्द्राग्नी गो० उ० १ २२ ब्रह्मक्षत्रे वा इन्द्राग्नी कौ० १२ ८ अमृतꣳ इन्द्राग्नी श० १० ४ १ ६ इन्द्राग्नी वै देवानामयातयामानौ तै० १ १ ६ ५, १ २ ५ १ इन्द्राग्नी वै देवाना मुखम् कौ० ४ १४ तस्मादाहुरिन्द्राग्नी ऽ एव देवानाꣳ श्रेष्ठाविति श० ८ ३ १ ३ इन्द्राग्नी वै देवानामोजस्वितमौ श० १३ १ २ ६ इन्द्राग्नी वै देवानामोजिष्ठौ ता० २४ १७ ३ प० ३ ७. इन्द्राग्नी इव वनेन (भूयास) म० २ ४ १४ ओजो वल वा एतौ देवाना यदिन्द्राग्नी तै० १ ६ ४ ४ इन्द्राग्नी वै देवानामोजिष्ठौ वलिष्ठौ सहिष्ठौ सत्तमौ पारयिष्णुतमौ ऐ० २ ३६ इन्द्राग्नी वै देवानामोजिष्ठौ वलिष्ठौ तै० ३ ८ ७ १ एताभिर्वा इन्द्राग्नी अत्यन्या देवता अभवताम् ता० २४ १७ २ इन्द्राग्नी वै विश्वेदेवा श० १० ४ १ ६ इन्द्राग्नी वै सर्वे देवा कौ० १२ ६ श० ६ १ २ २८ इन्द्राग्नी वा इद सर्वम् श० ४ २ २ १४ अस्ति वै छन्दसा देवतेन्द्राग्नी श० १ ८ २ १६ प्रतिष्ठे वा इन्द्राग्नी कौ० ३ ६, ५ ४ क्षत्र वा इन्द्राग्नी श० २ ४ २ ६ ज्योतिरिन्द्राग्नी श० १० ४ १ ६ ऐन्द्राग्न वै सामतस्तृतीय सवनम् को० ४ ४ तस्मादैन्द्राग्नौ द्वादशकपाल पुरोडाशो भवति श० १ ६ ४ ३ ऐन्द्राग्नो द्वादशकपाल पुरोडाशो भवति श० २ ५ २ ८ ऐन्द्राग्नानि ह्यवथानि श० ४ २ ५ १४ दर्शपूर्णमासयोर्वै देवते स्त इन्द्राग्नी ऽ एव श० २ ४ ४ १७ इन्द्राग्नी वै विश्वेदेवा श० २ ४ ४ १३ इन्द्राग्नी हि विश्वेदेवा श० २ ६ २ १४ नक्षत्राणामधिपत्नी विशाखे । श्रेष्ठाविन्द्राग्नी भुवनस्य गोपौ तै० ३ १ १ ११ इन्द्राग्न्योविशाखे (नक्षत्रविशेष) तै० १ ५ १ ३ एतद्ध वा इन्द्राग्न्यो प्रिय धाम यद् वागिति गो० ६ ७ गो० उ० ५ १३]

इन्द्राणी इन्द्रस्य परमैश्वर्ययुक्तस्य स्त्री ५ ४६ ८ सूर्य की कान्ति स० वि० १३८ **इन्द्राणीम्**=परमैश्वर्ययुक्ताम् (विदुषी स्त्रीम्) २ ३२ ८ इन्द्रस्य सूर्यस्य वायोर्वा शक्ति सामर्थ्यमिव वर्त्तमानाम् (स्त्रियम्) १ २२ १२ **इन्द्राण्यै**=इन्द्रस्य विद्युद्रूपस्य स्त्रीव वर्त्तमानायै दीप्त्यै २५ ४ परमैश्वर्यकारिण्यै राजनीत्यै ३८ ३ [इन्द्रशब्दात् स्त्रियाम् 'इन्द्रवरुण०' अ० ४ १ ४६ सूत्रेण ङीप् आनुक् च । इन्द्राणी इन्द्रस्य पत्नी नि० ११ ३७ इन्द्राणी ह वा ऽइन्द्रस्य प्रिया पत्नी, तस्या उष्णीषो विश्वरूपतम श० १४ २ १ ८ स एष एवेन्द्र योऽय दक्षिणेऽक्षन्पुरुषोऽथेयमिन्द्राणी श० १० ५ २ ६.]

इन्द्रापर्वता सूर्यमेघाविव वर्त्तमानौ सभासेनेशौ १ १३२ ६ सूर्यमेघसदृशौ सेनापतिसेनाजनौ, प्र०—अत्र 'सुपा सुलुग्०' अ० ७ १ ३६ इत्याकारादेश ८ ५३ विद्युन्मेघाविव राज्यसेनाधीशौ ३ ५३ १ [इन्द्र-पर्वतपदयोर्द्वन्द्वे । 'देवताद्वन्द्वे च' अ० ६ ३ २६ सूत्रेण पूर्वपदस्यानङ् । इन्द्रो व्याख्यात । पर्वत =मेघनाम निघ० १ १०]

इन्द्रापूषणा विद्युत्पृथिव्यौ ३६ ११ विद्युद्वायू ७ ३५ १ **इन्द्रापूष्णोः**=ऐश्वर्यवत्पुष्टिमतो (विद्युत्सूर्ययो) १ १६२ २ विद्युद्वाय्वो २५ २५ [इन्द्र-पूषन् पदयोर्द्वन्द्वे पूर्वपदस्यानङ् । पूषन्=पृथिवीनाम निघ० १ १. पदनाम निघ० ५ ६ पूषेत्यपर सोऽदन्तक । 'अदन्तक पूषा' (श० १ ७ ४ ७ गो० उ० १ २) इति च ब्राह्मणम् नि० ६ ३१]

इन्द्राबृहस्पती वायुसूर्यौ २५ ६ अध्यापकोपदेशकौ ४ ४६ ५ राजोपदेशकविद्वासौ ४ ४६ २ विद्युत्सूर्याविव प्रधानराजानौ ४ ४६ १ राजाऽमात्यौ ४ ४६ ६ **इन्द्राबृहस्पतिभ्याम्**=राजाऽनूचानाभ्या विद्वद्भ्याम् ७ २३ [इन्द्र-बृहस्पतिपदयोर्द्वन्द्वे पूर्वपदस्य आनङ्ादेश । बृहस्पति पदनाम निघ० ५ ४ 'तद्बृहतो करपत्योश्चोरदेवतयो सुट् तलोपश्च' अ० ६ १ १५७ इति सुट् तलोपौ । बृहत पाता वा पालयिता वा नि० १० ११]

इन्द्राब्रह्मणस्पती राजधनपालकौ (प्रजा-राजपुरुषौ)

विद्वज्जना) ५.५७.१ परमैश्वर्ययुक्ता (पितर) ४.३३.३
इन्द्रवन्ता=वह्वैश्वर्ययुक्तौ (अश्विनौ=सभामेनेशौ) १.११६.२१ [इन्द्र+मतुप् । मकारस्य वकार । प्रथमा-वहुवचनम्]

इन्द्रवायुभ्याम् विद्युत्प्राणाभ्यामिव योगाकर्षण-निष्कर्षणाभ्याम् ७.८ **इन्द्रवायू**=प्राणसूर्यसदृशौ योगम्यो-पदेष्ट्रभ्यासिनौ (योगिसिद्धजनौ) ७.८ सूर्यवायू इवा-ऽध्यापकोपदेशकौ ४.४६.६ इमौ प्रत्यक्षौ सूर्य्यपवनौ। 'इन्द्रेण सेचना दिवो दृळहानि दृहितानि च । स्थिराणि न पराणुदे, ऋ० ८.१४.९ यथेन्द्रेण=सूर्य्यलोकेन प्रकाशमाना किरणा धृता, एव च स्वाऽऽकर्षणशक्त्या पृथिव्यादीनि भूतानि दृढानि पुष्टानि स्थिराणि कृत्वा दृहितानि धारितानि सन्ति, न पराणुदे=अतो नैव स्वस्व-कक्षा विहायेतस्ततो भ्रमणाय समर्थानि भवन्ति । 'इमे चिदिन्द्र रोधसी अपारे ......परिस्रवणात मेघम् निरु० ६.१ यतोऽय सूर्य्यलोको भूमिप्रकाशौ धारितवानस्ति, अत एव पृथिव्यादीना निरोध कुर्वन् पृथिव्या मेघस्य च कूल स्रोतश्चाकर्षणेन निरुणद्धि । यथा वाहुवेगेनाकाशे प्रतिक्षिप्तो लोष्ठो मृत्तिकाखण्ड पुनर्विपर्य्ययेणाकर्षणाद् भूमिमे-वागच्छति, एव दूरे स्थितानपि पृथिव्यादिलोकान् सूर्य्य एव धारयति । सोऽय सूर्य्यस्य महानाकर्ष. प्रकाशश्चाऽस्ति । तथा वृष्टिनिमित्तोऽप्ययमेवाऽस्ति । "इन्द्रो वै त्वष्टा" ऐ० ब्रा० ६.१० सूर्य्यो भूम्यादिस्थस्य रसस्य मेघस्य च छेत्ताऽस्ति । एतानि भौतिकवायुविषयाणि 'वायवा याहि०' इति मन्त्रप्रोक्तानि प्रमाणान्यत्रापि ग्राह्याणि १.२.४ वनिविद्वासौ राजाऽमात्यौ ४.४७.४ विद्युत्प्राणौ १.१३९.१ इन्द्रश्च वायुश्च तौ विद्युत्पवनौ १.१४.३ विद्युत्पवन-विद्याविदौ (विद्वज्जनौ) ३.३५.६ सूर्यपवनाविव (अध्या-पकोपदेशकौ) १.१३५.५ राजप्रजाजनौ ३.३.८६ वायुविद्युद्वच्छीघ्रकारिणौ शिल्पविद्याऽध्यापकोपदेशकौ ४.४६.४ वायुविद्युदग्नी इव प्रतापिनौ राजसेनेशौ ४.४६.५ अग्निपवनौ १.२३.२ [इन्द्र-वायुपदयो समास । इन्द्रो व्याख्यात । वायु=अजगतिक्षेपणयो (भ्वा०) धातोरौणादिको युच् । 'वा यौ' अ० २.४.५७ सूत्रेण वातोर्वादेश । 'वा गतौ' (अदा०) धातोर्वौणादिक उण्]

इन्द्रवाहा याविन्द्र विद्युत परमैश्वर्य वहतस्तौ (हरी=जलाग्न्याख्यौ), प्र०—अत्राऽऽकारादेश १.१११.१ **इन्द्र-वाहौ**=ऐश्वर्यप्रापकौ (हरी=वायुविद्युतौ) ४.३५.५ [इन्द्रोपपदे वह प्रापणे (भ्वा०) धातो 'वहश्च' अ० ३.२.६४ सूत्रेण ण्वि प्रत्यय । अथवा—'कर्मण्यण्' इत्यण् प्रत्यय]

इन्द्रशत्रुः इन्द्र शत्रुर्यस्य वृत्रस्य स (मेघ) १.३२.६ इन्द्र शत्रुर्यस्य स मेघ. १.३२.१० [इन्द्र-शत्रुपदयो समास । इन्द्रशत्रु=इन्द्रोऽस्य शमयिता वा शातयिता वा नि० २.१६]

इन्द्रसखा इन्द्रः परमैश्वर्यो राजा सखा यस्य स (विद्वज्जन) ७.३४.२४ [इन्द्र-सखिपदयो समास । 'राजाहस्सखिभ्यष्टच्' अ० ५.४.९१ सूत्रेण तत्पुरुषे विहितष्टच् समासान्तो वहुव्रीहावपि भवति छान्दसत्वात्]

इन्द्रसारथिः इन्द्रो विद्युत् सारथिर्यस्य स (वायु) ४.४६.२. इन्द्रस्य विद्युत सूर्यस्याऽग्नेर्वा नियमेन गमयिता (नियुत्वान्=नियतगतिर्वायु) ४.४८.२ [इन्द्र-सारथि-पदयो समास । सारथि=सारयति नियमेन चालयतीति विग्रहे 'सृ' गतौ (भ्वा०) धातोर्णिजन्तात् 'सर्त्तेर्णिच्च' उ० ४.८९ सूत्रेण घथिन् प्रत्यय । णेर्लोपो णित्वाच्च वृद्धि]

इन्द्रस्येव यथा परमैश्वर्ययुक्तस्य राज्ञ ९.८ सूर्यस्येव ७.९.१ [इन्द्र-इवपदयो 'इवेन सह समासो विभक्त्य-लोप ०' अ० २.२.१८ वा० इति समासो विभक्तेश्च न लोप]

इन्द्रस्वन्तम् परमैश्वर्ययुक्तस्वामिसहितम् (रयिं=धनम्) ४.३७.५ [इन्द्रस्वप्राति० मतुप्]

इन्द्रहूतिम् परमैश्वर्यप्रकाशिकाम् (वीतिं=वियम्) ६.३८.१ [इन्द्रोपपदे ह्वेञ् स्पर्धाया शब्दे च (भ्वा०) धातो क्तिन् वाहुलकात् यजादित्वात् किति सम्प्रसारणम्]

इन्द्रा परमैश्वर्ययुक्तम् (सज्जनम्) ६.५७.१

इन्द्राकुत्सा इन्द्रश्च कुत्सश्चेन्द्राकुत्सौ विद्युदाघातौ ५.३१.९ [इन्द्र-कुत्सयो समासे 'देवताद्वन्द्वे च' अ० ६.३.२६ सूत्रेण पूर्वपदस्यानङ् । कुत्स इत्येतत् कृन्ततेर्ऋषि कुत्सो भवति । कर्त्तास्तोमानाम् इत्यौपमन्यवोऽत्राप्यस्य वधकर्मैव भवति । 'तत्सख इन्द्र शुष्ण जघान' इति नि० ३.११ कुत्स=वज्रनाम निघ० २.२०]

इन्द्राऽग्नी इन्द्रो वायुर्विद्युदादिरूपोऽग्निश्च तौ ३.१३ वायुवह्नी प्र०—"या वै वायु स इन्द्रो य इन्द्र स वायु" शत० ४.१.३.१९, १.२.१.१ प्राणविद्युताविव (आप्ताव-ध्यापकोपदेशकौ) १.१३९.९ वायुसवितारौ १.१०८.२ वायुपावकौ १.१०८.१ सूर्यविद्युतौ ५.४६.३ सूर्याऽग्नी इव प्रकाशमानौ सभापतिसभासदौ ७.३१ मातापितरौ १.२.५४ इन्द्र परमैश्वर्यश्चाऽग्निर्विज्ञाता च तौ १५.५९.

च क्रोध च श्लाघा च रूप च पुण्यमेव गन्ध सप्तमम् गो० पू० २ २]

इन्द्रियावत् प्रशस्तानि इन्द्रियाणि भवन्ति यस्मिन् तत् (दुग्धम्) १६ ६५ **इन्द्रियावतः**=बहुधनयुक्तस्य (बृहस्पतिसुतस्य) ८ ६ **इन्द्रियावान्**=प्रशस्तानीन्द्रियाणि यस्मिन् स (भाग =कर) ६.२७ [इन्द्रियमिति धननाम निघ० २ १० ततो भूम्नि प्रशसार्थे वा मतुप्। 'मन्त्रे सोमाश्वेन्द्रियविश्वदेव्यस्य मतौ' अ० ६ ३ १३१ सूत्रेण मतौ परतो दीर्घत्वम्]

इन्द्रेषिताम् इन्द्रेण परमेश्वरेण प्रेषिताम् (धमनिं=वेदवाणीम्) २ ११ ८ **इन्द्रेषिताः**=इन्द्रेण स्वामिना प्रेरिता (पवय =चक्राणि) ५ ३१ ५ **इन्द्रेषिते**=इन्द्रेण सूर्येण वर्षाद्वारा प्रेरिते (अध्यापिकोपदेशिके) ३ ३३ २ [इन्द्र-इषितपदयो समास । इषित =इषु गतौ (दिवा०) धातो क्त]

इन्धताम् दीप्यन्तु १ १७० ४ प्रदीपयन्तु ११ ६१ प्रकाशयन्तु १२ ४४ **इन्धते**=प्रदीपयन्ति ७ ३२ प्रकाशयन्ति ३४ ४४ प्रदीप्यन्ते १ ४४ ७ **इन्धे**=प्रकाशयामि २० २४ प्रकाशयते ७ १ १६ प्रदीपयामि ७ ८ १ [ञिइन्धी दीप्तौ (रुधा०) धातोर्लोटि लटि च रूपाणि]

इन्धन्वभिः प्रदीपिकाभि (धेनुभि =वाग्भि) प्र०—अत्र वनिपि 'छान्दसो वर्णलोपो वा' इत्यलोप २ ३४ ५ [ञिइन्धी दीप्तौ (रुधा०) धातोर्वनिप्]

इन्धान प्रदीपयन्, अ०—विद्वान् (सभेशो राजा) १२ १८ प्रदीप्त सन् (विद्वज्जन) १ १४३ ७ **इन्धानाः**=प्रकाशमाना (ऋषय =वेदार्थवेत्तारो जना) १५ ५६ प्रकाशयन्त, अ०—प्रदीपयन्त (जना) ३ १८ प्रकाशयितार प० वि०, अथर्व० १६ ५ ३ [ञिइन्धी दीप्तौ (रुधा०) धातो शानच्। ताच्छील्ये चानश् वा कर्त्तरि]

इन्व व्याप्नुहि ५ ४ ७ **इन्वतम्**=वर्धयतम् १ १६० ५ **इन्वतः**=व्याप्नुत, प्र०—इन्वतीति व्याप्तिकर्मसु पठितम् निघ० २ १८, १ १० ८ **इन्वताम्**=व्याप्नुताम् ६ ७० ६ **इन्वति**=व्याप्नोति जानाति वा, प्र०—इन्वतीति गतिकर्मसु पठितम् २ १४, १ १८ ७ प्राप्नोति १ १२८ ५ **इन्वतु**=व्याप्नोतु प्राप्नोतु १ १६२ १२ ददातु ४ ५३ ७ **इन्वथः**=प्राप्नुतम् १ ११६ ७ **इन्वसि**=व्याप्नोति, प्र०—अत्र 'व्यत्ययो बहुलम्' इति लकार व्यत्यय ५ २८ २ व्याप्नोषि १ १७६ १ व्याप्नोषि व्याप्नोति वा १ ६४ १० **इन्विरे**=व्याप्नुवन्ति ५ ६ ६ [इवि व्याप्तौ (भ्वा०) धातोर्लोटि लटि लिटि च रूपाणि । नोटि व्यत्ययेनात्मनेपदम्। इन्वति गतिकर्मा निघ० २ १४ व्याप्तिकर्मा निघ० २ १८]

इन्वतः प्रियस्य (यजमानस्य) १ १४१ ४ [इवि गतौ (भ्वा०) धातो शतरि रूपम्]

इन्वन् प्राप्नुवन् (राजा) ५ ३० ७ **इन्वन्तः**=व्याप्नुवन्त (मनुष्या) ३ ४ ५ [इवि गतौ (भ्वा०) धातो शतृ० । इन्वतीति व्याप्तिकर्मणो वा (निघ० २ १८) शतृ]

इभम् हस्तिनमिव ६ २० ८ **इभाय**=हस्तिने १ ८४ १७ **इभेन**=हस्तिना ४ ४ १ [इण् गतौ (अदा०) धातो 'इण कित्' उ० ३ १५३ सूत्रेण भन् प्रत्यय किच्च। इभाय=महते नि० १३ ३६ इभेन=इगभृतागणेन गतभयेन हस्तिना वा नि० ६ १२]

इभ्यान् य इभान् हस्तिनो नियन्तुमर्हन्ति तान् (हस्तिचालकान्) १ ६५ ४ [इभप्रातिपदिकादर्हत्यर्थे यत्। इभश्च व्याख्यातम्]

इमथा इदानीन्तनानामिव (योगिनाम्) ७ १२ इममिव ५ ४४ १ [इमप्राति० 'प्रत्नपूर्वविश्वेमात्थाल छन्दसि' अ० ५ ३ १११ सूत्रेणेवार्थे थाल् प्रत्यय। इमथा=अमुथा नि० ३ १६]

इमसि प्राप्नुम १ १ ७ [इण् गतौ (अदा०) धातोर्लटि, उत्तमबहुवचने मसि 'इदन्तो मसि' रिति मस इदन्तत्वम्]

इमः प्राप्नुम ११ १६ [इण् गतौ (अदा०) धातोर्लट्]

इयक्षते यष्टु सत्कर्त्तुमिच्छते (इन्दवे=विद्यार्थिने) प्र०—अत्र छान्दसो वर्णलोप इत्यभ्याम-यकारलोप ३३ ६२ [यज देवपूजासगतिकरणदानेषु (भ्वा०) धातोरिच्छायामर्थे सनि शतरि रूपम्। अभ्यासयकारस्य च 'छान्दसो वर्णलोप' इति लोप]

इयक्षन् प्राप्तुमिच्छन् (सूरि =विद्वान्) १ १५३ २ **इयक्षन्तः**=सत्कुर्वन्त (सत्पुरुषा) २ २० १ यष्टु सङ्गमयितुमिच्छन्त (अहिसका जना) ६ २१ ३ [इयक्षति गतिकर्म, निघ० २ १४, तत शतृ। अथवा=यज देवपूजासगतिकरणदानेषु (भ्वा०) धातो सन्नन्ताच्छतृ। अभ्यासयकारस्य लोपश्छान्दस]

इयक्षमाणाः यज्ञ चिकीर्षमाणा (यजमाना)

२ २४ १२ [इन्द्र-ब्रह्मणस्पतिपदयोर्द्वन्द्वे पूर्वपदस्यानङ् । ब्रह्मण·पति=ब्रह्मण पाता वा पालयिता वा नि० १० १२ ब्रह्मणस्पति=पदनाम निघ० ५ ४]

इन्द्रामरुतः इन्द्रश्च विद्युन्मरुतश्च वायवस्तान् २ २६ ३ [इन्द्र-मरुत्पदयोर्द्वन्द्वे पूर्वपदस्यानङ् । मरुत= ऋत्विङ्नाम निघ० ३ १८ पदनाम निघ० ५ ५. मरुत्= हिरण्यनाम निघ० १ २ रूपनाम निघ० ३ ७]

इन्द्रावतः ऐश्वर्ययुक्तान् (पुरुषार्थिनो जनान्) ४ २७ ४ [इन्द्रप्राति० भूम्नि मतुप् । 'अन्येपामपि दृश्यते' अ० ६ ३ १३७ सूत्रेण दीर्घ]

इन्द्रावरुणयोः इन्द्रश्च वरुणश्च तयो सूर्याचन्द्रमसो, प्र०—इन्द्र इति पदनामसु पठितम् निघ० ५ ४ 'वरुण इति च निघ० ५ ४ अनेन व्यवहारप्रापकौ गृह्यते १ १७ १ **इन्द्रावरुणा**=अग्निजले, प्र०—अत्र 'सुपा सुलुग्० इत्याकारादेशो वर्णव्यत्ययेन ह्रस्वत्वञ्च १ १७ ३ विद्युज्जले ७ ३५ १ वायुजले सम्यक् प्रत्युक्ते १ १७ ८ वायुविद्युताविव (अध्यापकोपदेशकौ) ४ ४२ ६ शुभगुण-युक्तप्रधानौ (राजाऽमात्यौ) ४ ४१ ३ परमैश्वर्य-श्रेष्ठाचार-युक्तौ (अध्यापकोपदेशकौ) ४ ४१ १ विद्यैश्वर्यप्रशसित-गुणयुक्तौ (अध्यापकोपदेशकौ) ४ ४१ ५ प्राणोदानवत् प्रियवलिनौ (अध्यापकोपदेशकौ) ४ ४१ १ शत्रुविदारक-श्रेष्ठौ (राजाऽमात्यौ) ४ ४१ ४ वायु और चन्द्र आर्याभि० २ २३, ३६ ११ सूर्यचन्द्रवद्वर्त्तमानौ राजप्रजाजनौ ६ ६८ ८ **इन्द्रावरुणाभ्याम्**=विद्युज्जलाभ्याम् ७ २३ [इन्द्र-वरुणपदयोर्द्वन्द्वे पूर्वपदस्यानङ् । इन्द्र इति पदनाम निघ० ५ ४ वरुण इति पदनाम निघ० ५ ४]

इन्द्राविष्णू सूर्यविद्युतौ ६ ६९ १ विद्युत्सूर्याविव (अध्यापकोपदेशकौ) १ १५५ २ विद्युद्वायू ४ ५५ ४ विद्युत्सूत्रात्मानौ ४ २ ४ वायुसूर्यौ ६ ६९ ४ वायुविद्युता-विव सभासेनेशौ ६ ६९ ३ **इन्द्राविष्णुभ्याम्**= ईश्वरवेदज्ञानाभ्याम् ७ २३ [इन्द्र-विष्णुपदयोर्द्वन्द्वे 'देवताद्वन्द्वे च' इति पूर्वपदस्यानङ् । विष्णु=यज्ञ-नाम निघ० ३ १७ पदनाम निघ० ५ ६ विष्णु=अथ यद् विपितो भवति तद् विष्णुर्भवति । विष्णुर्विशतेर्वा व्यश्नोतेर्वा नि० १२ १८ विष्लृ व्याप्तौ (जु०) धातो 'विपे किच्च' उ० ३ ३६ सूत्रेण णु प्रत्यय किच्च]

इन्द्रासोमा विद्युदोपधिगणौ ३६ ११. सेनापत्यैश्वर्य-वन्तौ २ ३० ६ विद्युच्चन्द्रमसौ ६ ७२ १ वायुविद्युतौ ६ ७२ ४ राजा और प्रजा आर्याभि० २ २३, ३६ ११ वायुविद्युद्वद् वर्तमानौ (अध्यापकोपदेशकौ) ६ ७२ ५ [इन्द्र-सोमपदयोर्द्वन्द्वे पूर्वपदस्यानङ् । 'सुपा सुलुग्०' त्याकारादेश]

इन्द्रियम् इन्द्रस्यैश्वर्यप्राप्तेर्लिङ्ग चिह्नमिन्द्रेण पर-मेश्वरेण दृष्टमिन्द्रेण सृष्ट प्रकाशितमिन्द्रेण विद्यावता जीवेन जुष्ट सप्रीत्या सेवितमिन्द्रेण परमेश्वरेण यद्दत्त सर्वसुख-ज्ञानसाधकम् प्र०—'इन्द्रियमिन्द्रलिङ्गमिन्द्रदृष्टमिन्द्रसृष्ट-मिन्द्रजुष्टमिन्द्रदत्तमिति वा' अ० ५ २ ९३ अनेनोक्तेष्वर्थेषु इन्द्रियशब्दो निपातित २ १० सुशिक्षित मन २० ७१ प्रशस्त बुद्ध्यादिक चक्षुरादिक वा १ ५७ ३ विज्ञानयुक्त मन १ ५५ ४ मन आदीनि वाग्भिन्नानि षड् ज्ञानेन्द्रि-याणि कर्मेन्द्रियाणि च ऋ० भू० १०२ दिव्या वाचम् १९ ७३ दिव्य श्रोत्रम् १९ ७३ चित्तम् १९ ७७ जिह्वा-दिकम् १९ ७६ मन आदिकम् १९ ५ अन्त करणम् २१ ५४ श्रोत्रादिकम् २१ २० मन प्रभृतीन्द्रियमात्रम् २१ ४० मन-आदिकार्यसाधकम् ८ ३ धनम् २० ५५ इन्द्रै राजभिर्जुष्ट न्यायाचरणम् १९ ७५ इन्द्रेण जीवेन जुष्टम् (भा०—आरोग्यम्) २८.३६ इन्द्रैर्जीवैर्जुष्ट सुखम् २८ ३१ विज्ञानसाधक (मन) १९ ७७ उपस्थ पुरुष-लिङ्गम् १९ ७६. ऐश्वर्यम् २१ २२ विज्ञान धन वा १ १११ २ इन्द्रस्य परमैश्वर्यवतस्तव ईश्वरस्य जीवस्य च लिङ्गम् (प्रत्यक्षाऽप्रत्यक्षसामर्थ्यम्) १ १०३ १ प्रज्ञानम् १९ ७४ ज्ञानादिव्यवहारसाधकम् (मन) २१ १४ शान्त धर्मयुक्त अन्त करण स० वि० १४४, अथर्व० १२ ५ ७ **इन्द्रियाणि**=चक्षुरादीनि धनानि वा १९ १२ ऐश्वर्य-जनकानि सुवर्णादीनि २० ५८ **इन्द्रियाय**=धनायेन्द्रिय-बलाय वा १९ ३४ धनाय, प्र०—इन्द्रियमिति धननामसु पठितम् निघ० २ १०, १ १०४ ६ धनवर्धनाय १० १८ नेत्राद्यायाऽन्त करणाय वा १० २३ न्यायव्यवहारप्रकाश-नायाऽन्यायाऽन्धकारनाशाय ऋ० भू० २२२ **इन्द्रिये**= मनसि श्रोत्रादौ वा ३ ४५ **इन्द्रियेण**=परमैश्वर्येण विज्ञानेन वा ऋ० भू० २१८ इन्द्रेण जीवेन जुष्टेन प्रीतेन वा १० २१ मनसा धनेन वा ७ २० **इन्द्रियेभ्यः**=कार्य-साधकतमेभ्य (श्रोत्रादिभ्य) ७ ६ **इन्द्रियैः**=इन्द्रस्य जीवस्य लिङ्गै २० ६१ [इन्द्रियमिति धन नाम निघ० २ १० इन्द्रप्राति० षष्ठीसमर्थात् 'इन्द्रियमिन्द्रलिङ्ग-मिन्द्रदृष्टमिन्द्रसृष्टमिन्द्रजुष्टमिन्द्रदत्तमिति वा' अ ५ २ ९३ सूत्रेण लिङ्गादिष्वर्थेषु घच् प्रत्ययान्तो निपात्यते । प्राणा इन्द्रियाणि । ता० २ १४ २ जायमानो ह वै ब्राह्मण सप्तेन्द्रियाण्यभिजायते ब्रह्मवर्चसञ्च यशश्च स्वप्न

ईकारस्थाने इ १ १३४ २ [ईर गतौ कम्पने च (अदा०) धातोस्तुमर्थे कध्यै प्रत्यय । धातोरीकारस्य ह्रस्वश्छान्दस]

इरम्मदम् य इरयाऽन्नेन माद्यति हृष्यति तम् (सेनापतिम्) प्र०—'उग्रपश्येरम्मदपाणिन्धमाश्च' अ० ३ २ ३७ इति खश्प्रत्ययान्तो निपातित । [इरा अन्ननाम निघ० २ ७ तदुपपदे 'मदी हर्षे' (दिवा०) धातो 'उग्र पश्येरम्मद०' अ० ३ २ ३७ सूत्रेण खश्प्रत्ययान्तो निपात्यते]

इरस्य. प्राप्तु योग्य (विद्वज्जन) ७ ४० ६

इरस्या अन्नेच्छया ५ ४० ७ ['इरा' अन्ननाम निघ० २ ७ तत आत्मन इच्छाया क्यचि 'सर्वप्रातिपदिकेभ्यो लालसायामसुक्०' अ० ७ १ ५१ वा० सूत्रेणामुक् । 'अ प्रत्ययाद्' इत्यकारे प्रत्यये स्त्रिया टाप्]

इरा अन्नादिकम्, प्र०—इरेत्यन्ननामसु पठितम् निघ० २ ७, ५ ८३ ४ **इरायै**=अन्नादिवृद्धये ३० ११ [इण् गतौ (अदा०) धातो 'ऋज्रेन्द्राग्रवज्र०' उ० २ २८ सूत्रेण रन् प्रत्ययान्तो निपात्येत । एति गच्छति ययेति विग्रह । 'इरा' इत्यन्ननाम निघ० २ ७]

इरावत् अन्नाद्यैश्वर्ययुक्तम् (वर्त्ति=मार्गम्) ७ ४० ५ ['इरा' इत्यन्ननाम (निघ० २ ७), ततो भूम्नि मतुप्]

इरावती इरा प्रशस्तान्यन्नानि विद्यन्ते यस्या सा (पृथिवी=भूमिरन्तरिक्ष वा), प्र०—अत्र प्रशसार्थे मतुप् 'इरेत्यन्ननामसु पठितम् निघ० २ ७, ५ १६ **इरावतीम्**= इरा जलानि विद्यन्ते यस्यास्ताम् (वाचम्) ५ ६३ ६ **इरावतीः**=बह्वन्नादिसामग्रीस्ता (धेनव=वाण्य) ५ ६६ २ [इरावती नदीनाम निघ० १ १३ इरावती परुष्णीत्याहु नि० ६ २५ 'इरा' इत्यन्ननाम निघ० २ ७, ततो भूम्नि मतुप् । स्त्रिया ङीप्]

इरिणम् कम्पित जगत् १ १८६ ६ [इरित निर्ऋ-णम् । ऋणातेरपार्ण भवति, अपरता अस्मादोषधय इति वा नि० ६ ६ ऋ गतौ (भ्वा०) धातो 'अर्त्ते किदिच्च' उ० २ ५१ सूत्रेण 'इनन्' प्रत्यय किच्च । धातोश्चेकारा-देश । ऋच्छन्ति गच्छन्ति यत्र यस्माद्वेति विग्रह]

इरिण्याय इरिण ऊपरभूमौ साधवे (पुरुषाय) १६ ४३ [इरिण व्याख्यातम् । तत साध्वर्थे यत् प्रत्यय]

इरी प्रेरक (एवयामरुत्=विज्ञानवान् मनुष्य) ५ ८७ ३

इर्यम् प्रेरकम् (राजानम्), प्र०—अत्र वर्णव्यत्ययेन दीर्घेकारस्य ह्रस्व ५ ४८ ४ प्रेरणीयम् (परीक्षक जनम्) ६ ५४ ८ **इर्य.**=सन्मार्गे प्रेरक (अग्नि=यतमानो सन्यासी) ७ १३ ३ [ईर गतौ कम्पने च (अदा०) धातो कर्त्तरि बाहुलकादौणादिको यक् । धातोश्च छान्दस ह्रस्व-त्वम् । इल प्रेरणे (चु०) धातोर्वा साधनीयम् । अन्यत्र कर्मणि ण्यत्]

इलयत गच्छत १ १९१ ६ [इल प्रेरणे (चुरा०) धातोर्लोट् । गुणाऽभावश्छान्दस]

इलीविशस्य इलाया पृथिव्या बिले गर्त्ते शेते तस्य वृत्रस्य प्र०—इलेति पृथिवीनामसु पठितम् निघ० १ १, इदमभीष्ट पद पृषोदरादिना सिध्यति 'इलीविशस्य इला-बिलशयस्य नि० ६ १९, १ ३३ १२ [इला अन्ननाम (निघ० २ ७), तस्य बिलमुदकम् । उदकेऽन्न गुप्त विद्यते । तस्योदकस्य शय =शयनस्थान मेघ अथवा—इला पृथिवी-नाम (निघ० १ १) तस्या बिलानि गुहास्थानानि, तेषु य शेते स इलाबिलशयो दस्यु । पृषोदरादित्वाद्रूपसिद्धि । इली-विश =इलाबिलशयस्य नि० ६ १९ इलीविश पदनाम निघ० ४ ३]

इलावान् बह्वन्नयुक्त (सभाध्यक्ष) ८ २ ५ [इला अन्ननाम निघ० २.७ ततो भूम्नि मतुप्]

इव यथा १२ ६ वद्वत् ७ ४० जैसे न० प्र० १५१, १० ४० २ समान स० प्र० २४७, ३४ ६ [इवेत्युपमार्थे नि० १ ४ इव इति पदपूरण नि० १ १० इव परि-भयार्थे वा नि० ६.२८]

इषणत् इष्णाति प्राप्नोति ४ १७ १४ **इषणन्त**= इच्छन्तु १ १३४ ५ प्राप्नुवन्ति ४ २३ ६ **इषणः**=प्रेरय ४ २२ १०. प्रेरये ४ १६ ६ [इष आभीक्ष्ण्ये (क्र्या०) इष गतौ (दिवा०) धातोर्वा लेटि रूपम् । व्यत्ययेन शप् श्ना च]

इषणि एषणायाम् २ २ ६ [इषु इच्छायाम् (तुदा०) धातोर्बाहुलकाद् औणादिक क्युन् । अत्लोपश्छान्दस]

इषण्य प्रेरय ३ ५० ३ **इषण्यत**=प्राप्नुवन्ति ५ ५२ १४ **इषण्यन्ति**=अन्नादिकमिच्छन्ति ५ ६ ६ [इषणप्राति० इच्छायामर्थे क्यच् । छान्दसत्वादल्लोप]

इषण्यन् आत्मन इषण प्रेरणमिच्छन्निव (विद्युद्रूपो-ऽग्नि) ३ ६१ ७ [इषणप्राति० आत्मन इच्छायामर्थे क्यच् । तत शतृ । अल्लोपश्छान्दस]

इषध्यै एष्टु ज्ञातुम् ७ ४३ १ [इष गतौ (दिवा०) धातोस्तुमर्थे कध्यै प्रत्यय:]

इषन्त प्राप्नुवन्तु १ १३४ ५ [इष गतौ (दिवा०)

१७६९ **इयक्षमाणम्**=अतिशयेन सङ्गच्छमानम् (पतिम्) १ १२३ १० [यज देवपूजासगतिकरणदानेषु (भ्वा०) धातो सन्नन्ताच्छानच् । अभ्यासयकारस्य च लोपश्छान्दस]

इयक्षसि यष्टु सङ्गन्तुमिच्छसि ३ ३ ५५ सगच्छसे प्राप्नोषि वा ६ ४६ ४ [यज देवपूजासगतिकरणदानेषु (भ्वा०) धातो सन्नन्ताल् लट् । अभ्यासयकारस्य लोपश्छान्दस]

इयत् प्राप्नुवन् (अग्ने=ई०, अग्निर्वा) ४ १६ एतावत् परिमाणम् (आयु) १० २५ [इण् गतौ (अदा०) धातो शतृप्रत्यय । 'इणो यण्' इति यणादेशो न भवति छान्दसत्वात् । यणभाव इयङ्]

इयत् एतावत् परिमाणम् (आयु) १० २५ **इयति**=एतावति (देवयजने=विदुषा पूजने) ३७ ५ [इदम् सर्वनाम्नो वतुप् । 'किमिदभ्या वो घ' अ० ५ २ ४० सूत्रेण घादेशे घस्येयादेशे 'इदकिमोरीश्की' इतीशादेशे 'यस्येति चे' ति लोप]

इयत्तिकः कुत्सित (कुपुम्भक =नकुल) प्र०—अत्र कन् प्रत्यय १ १९१ १५ [इयदिति व्याख्यातम् । तत स्त्रिया डीपि कुत्सितार्थे कन् । 'केऽण ' इति ह्रस्व]

इयत्तिका इयति प्रदेशे भवा वाला (शकुन्तिका=कपिञ्जली) १ १९१ ११ [इयदिति व्याख्यातम्, तत स्त्रिया डीपि भवार्थे कन् । 'केऽण' इति ह्रस्वत्वम्]

इयत्यै सुखप्राप्तीच्छायै (विशे=प्रजायै) ७ ४२ ४ [इण् गतौ (अदा०) धातो शतृ+डीप्]

इयध्यै एतु प्राप्तुम् ६ २० ८ [इण् गतौ (अदा०) धातोस्तुमर्थे कध्यै प्रत्यय । छान्दसत्वादियङ्]

इयन्ति एतावन्ति (सवना=कर्माणि) ६ २३ ४ [इयद् व्याख्यातम् । ततो नपुसके प्रथमाबहुवचने रूपम्]

इयर्त्ति प्राप्नोति ४ २१ ५ गच्छति ४ १७ १२ अर्पयति प्र०—अत्रान्तर्गतो णिच् ३३ ७८ उन्नयति ६ ४७ ३ जानाति १ ११३ १७ **इयर्मि**=गच्छामि १ ११६ १ प्राप्नोमि ४ ४२ ५ **इयर्षि**=प्राप्नोषि १२ १०७ [इयर्त्ति गतिकर्म निघ० २ १४ ऋ गतौ (जु०) धातोर्लट् । 'अर्त्तिपिपर्त्योश्च' इति श्लावभ्यासस्येत्वे 'अभ्यासस्यासवर्णे' इतीयङि पिनि गुणे च रूपम् । इयर्त्ति=इरयति नि० ९ ३]

इयात् प्राप्नुयात् १२ ६८ [इण् गतौ (अदा०) धातोर्लिङ्]

इयाते गच्छत ३ ३ ४४ [इण् गतौ (अदा०) धातोर्लट् । व्यत्ययेनात्मनेपदम् । इङ् गतौ (दिवा०) धातोर्वा-लट्]

इयानः प्राप्नुवन् (कर्मोपासनाज्ञानविज्जन) २ ३४ १४. सर्वाऽभीष्टाऽभिज्ञाता (राजा) प्र०—अत्रेङ् गतौ, इत्यस्माच्छन्दसि लिट् अ० ३ २ १०५ इति लिट् 'लिट कानज्वा' अ० ३ २ १०६ इति कानच्, १.३० १४ **इयानाः**=प्राप्नुवन्त (विद्वज्जना) ७ २५ ५. गन्त्र्य (नाव) १० १६ अधीयमाना (जना) ७ ५२ ३ **इयानम्**=गच्छन्तम् (रथम्) १ १८० १० [इङ् गतौ (दिवा०) धातोश्छन्दसि लिट कानच् । इङ् गतौ (दिवा०) धातोश्शानच् वा]

इयाम उल्लङ्घयेम त्यजेम ५ ५३ १४ **इयाय**=प्राप्नोतु ४ ४ ११ एति ७ ३३ १३

इयानासः प्राप्नुवन्त (मर्त्तास =मनुष्या) ५ २२ ३ [इङ् गतौ (दिवा०) धातो शानचि प्रथमाबहुवचने जसोऽसुगागम]

इये प्राप्नुयाम्, प्र०—अत्र व्यत्ययेनाऽऽत्मनेपद, लडर्थे लिट् च २ १७ ७ **इयेथ**=एषि ४ ६ १ [इण् गतौ (अदा०) धातोर्लिट् । व्यत्ययेनात्मनेपदम्]

इरज्यति ऐश्वर्यं दातु सेवितु च योग्योऽस्ति, प्र०—इरज्यतीत्यैश्वर्यकर्मसु पठितम् निघ० २ २१, परिचरणकर्मसु च, निघ० ३ ५, १ ७ ९ **इरज्यथः**=ऐश्वर्ययुक्ता कुरुथ १ १५१ ६ [इरज्यति ऐश्वर्यकर्म निघ० २ २१ परिचरणकर्म निघ० ३ ५.]

इरज्यन् ऐश्वर्य कुर्वन् (अग्नि =अग्निवत्प्राप्तपुरुषार्थ जन) १२ १०९ [इरज्यति ऐश्वर्यकर्म (निघ० २ २१) धातो शतृ । इरज्यन्नग्ने प्रथयस्व जन्तुभिरिति । मनुष्या वै जन्तवो दीप्यमानो अग्ने प्रथयस्व मनुष्यैरित्येतत् श० ७ ३. १ ३२]

इरज्यन्त प्राप्नुवन्तु ७ २३ २ **इरज्यसि**=ऐश्वर्य प्राप्नोषि १ ५५ ३ [इरज्यति ऐश्वर्यकर्म (निघ० २ २१) धातोर्लङ् आडभावश्च । अन्यत्र लट्]

इरज्यन्ता ऐश्वर्य सम्पादयन्तौ (इन्द्राग्नी=वायुविद्युतौ) ६ ६० १ [इरज्यति ऐश्वर्यकर्म (निघ० २ २१) धातो शतृ]

इरधन्त य इरान् इलान् प्रेरकान् दधति त इरधास्त इवाऽऽचरन्तु १ १२९ २ [इल प्रेरणे (चुरा०) धातोरिगुपधलक्षणे कप्रत्यये=इल । तदुपपदे दधाते क प्रत्यय । इरधप्राति० आचारे क्विपि धातोर्लङ्]

इरध्यै ईर्त्तु प्राप्तुम्, प्र०—अत्र वर्णव्यत्ययेन

शल्यस्तेजन पर्णानि ऐ० १ २५ इषवो वै दिद्यव श० ५ ४ २ २ इषु =पदनाम निघ० ५ ३]

इषवान् ज्ञानवान् (विद्वज्जन) १ १२९ ६. [इषति गतिकर्मा निघ० २ १४, ततो 'घञर्थे कविधानमि' ति कप्रत्यय । इष्यते यत् तद् इष ज्ञानम् । तन्तो मतुप् । इषवान्=अन्नवान् कामवान् वा नि० १०.४२]

इषव्यः इषुषु साधु (राजन्य=राजपुत्र) २२ २२ [इषुप्राति० 'तत्र साधुरि' त्यर्थे यत्प्रत्यय]

इषः इच्छ ३ ३ ७ [इषु इच्छायाम् (तुदा०) धातोर्लोट् । 'इषुगमियमा छ' इति छत्व न भवति छान्दसत्वात्]

इष.स्तुतः अन्नादे स्तावक (रथपति =शिल्पी जन) ५ ५० ५ [इष-स्तुतपदयो समासे विभक्तेरलुक् । इष् इत्यन्ननाम । स्तुत ष्टुञ् स्तुतौ (अदा०) धातो कर्त्तरि वाहुलकाद् औणादिक क्त]

इषाण प्रापय कामय वा ३१ २२ स्वेच्छया निष्पादय तथा सर्वलोक, सर्वलोकसुख सर्वलोकराज्य वा मदर्थ कृपया सिद्ध कुरु ऋ० भू० १३४ [इष आभीक्ष्ण्ये (क्र्या०) धार्तोलोटि मध्यमेकवचने 'हल श्न शानज्झौ' अ० ३ १ ८३ सूत्रेण हौ परत शानच्]

इषाय अन्नोत्पादकायाऽश्विनाय २२ ३१. [इषमित्यन्ननाम निघ० २ ७ इषु इच्छायाम् (तुदा०) धातो 'घञर्थे कविधानम्' इति कर्मणि क]

इषिलम् इष्टम् (केत =विज्ञानम्) २ ३८ ५. **इषितः**=प्रेरित (इन्द्र =विद्वज्जन) २० ८८ अन्वेषित (अग्नि =पावक) ३ ३ २ इच्छाप्रयुक्त (यजमान) ३ ४ ३ प्रापयितव्य (इन्द्र =परमेश्वर) १ ३ ५ इष्ट (होता=दातृजन) ७ ३९ १ **इषिता**=इषितावध्यापकोपदेशकौ ७ ३३ १३ प्रज्ञापकौ सन्तौ (इन्द्राग्नी=अध्यापकोपदेशकौ) ३ १२ १ प्रेषितौ प्रार्थितौ (इन्द्राग्नी=राजप्रजाजनौ) ७ ३१ **इषिताः** प्रेरिता (नाव) १ १८२ ६ [इष गतौ (दिवा०) धातो क्त प्रत्यय । इषु इच्छायाम् (तुदा०) धातोर्वा क्त । इडागमश्छान्दस । उभयत्र गुणाभावोऽपि छान्दसम् । इषित प्रेषित इति वा अधीष्ट इति वा नि० ८ ८]

इषितासः प्रेरिता सन्त (जना) ६ ४६ १०. [इषितशब्दस्य प्र० वहुवचने जसोऽसुकि रूपम्]

इषिधः इच्छाप्रकाशिका (इष =अन्नाद्या) ६ ६३ ७ [इषु इच्छायाम् (तुदा०) धातो 'इक् कृष्यादिभ्य' इति इक् । 'इषि' उपपदे दधाते. क्विप्]

इषिर ! इच्छो (इन्द्र =सभेश) १ १२९.१. **इषिरम्**=एश्वर्यम् (अग्निं=वह्निम्) ३ २.१४. गमनम् ५.३७.२ प्राप्तव्यम् (दक्ष=बलम्) ५ ८८ ४. **इषिरः**=येनेच्छन्ति स (वात =वायु) १८.४१ ज्ञानवान् (राजा) ६ २९ ३ सद्यो गन्ता (वात =वायु) ७ ३५ ४ गन्तव्य (विद्वान्) ५ ४१ १२ इच्छु (मित्र =सुहृज्जन) ३ ५ ८ **इषिरा**=गन्तारौ (अश्विना =विद्याव्यापकोपदेशकौ) ५ ७५ ५ **इषिराम्**=बहुपदार्थप्रापिकाम् (भूमिम्) ३ ३० ९ प्राप्नुवन्तीम् (पत्नीम्) ५ ३७ ३ वर की इच्छा करने वाली हृदय को प्रिय स्त्री को स० वि० १०५, ५ ३७ ३ प्राप्तव्याम् (स्वधाम्=अन्नम्) १ १६८.९. **इषिराः**=ज्ञानवन्त (देवा =विद्वांस) २ २९ १ गन्तार (देवा =विद्वांस सैनिका) ३ ५६ ८ **इषिरैः**=प्राप्तै (वेगादिगुणै) ६ ६२ ३ [इषिर, इषिरेणेत्येतौ पदनाम्नौ, निघ० ४ १ इषु इच्छायाम् (तुदा०) 'इषिमदिमुदि०' उ० १ ५१. सूत्रेण किरच् प्रत्यय । इषिरेण=ईषणेन एषणेन अर्पणेन वा नि० ४ ७ इषिर इति क्षिप्र उत्वेजन् श० ६ ४ १ १०]

इषिरेभिः इष्टै (केतेभि =प्रज्ञाभि) ३ ६० ७ [इषिर इति व्याख्यानम् । ततो भिस् । 'वहुल छन्दसी' ति भिस ऐसादेशो न भवति]

इषुकारम् य इषून् बाणान् करोति तम् (शिल्पिजनम्) ३० ७. [इषूपपदे डुकृञ्करणे धातोरण् प्रत्यय]

इषुकृतेव बाणीकृताविव (अध्यापकोपदेशकौ) १ १८४ ३]

इषुकृद्भ्यः बाणनिर्मापकेभ्य. (जनेभ्य) १६ ४६ [इषूपपदे डुकृञ् करणे (तना०) धातो क्विप् कर्त्तरि]

इषुधिमते प्रशस्तेषुधिवर्त्ते (राजजनाय) १६ २१ प्रशस्तशस्त्राऽस्त्रकोशाय १६ ३६ [इषूपपदे दधाते 'कर्मण्यधिकरणे च' अ० ३ ३ ९३ सूत्रेण कि । ततो मतुप् प्रत्यय]

इषुधिः इषवो धीयन्ते यस्मिन् स (तूणीर) १६ १२ [इषूपपदे दधाते 'कर्मण्यधिकरणे च' इति किरधिकरणे । इषुधि =इषूणा निधानम् नि० ९ १३ इषुधि =पदनाम निघ० ५ ३]

इषुध्यति इषून् धरति ५ ५० १ याचते शरान् धरति वा २२ २१ शरादीनि शस्त्राणि धरेत्, प्र०—लेट् प्रयोगोऽयम् ११ ६७ शरान् धारयेत् ४८ [इषुध

धातोर्लङ्। विकरणव्यत्ययेन श आत्मनेपदञ्च। आड-भावोऽपि छान्दस]

इषम् इष्यते या सत्क्रिया ताम्, प्र०—अत्र 'कृतो बहुलम्' इति कर्मणि क्विप् १ १२ ११ अन्न विज्ञान वा ७ ४८ ४ अन्नाद्यैश्वर्यम् ४ १६ २१ अन्नादिपदार्थसमूहम्, प्र०—इषमित्यन्ननामसु पठितम् निघ० १ ७, १ १६ अभीष्टमन्नम् ३ ४६ इच्छामन्न वा ७ ३६ २ उत्तमगुण-सम्पादकमन्नाद्यौषधसमूहम् १ ४६ ६ विज्ञानम् ३५ १६ विज्ञान धन वा ७ ८ ७ इष्टामिच्छा वा २ ३४ ८ विद्या-योगज बोधम् १ १७१ ६ प्राप्तिम् १.१७७ ५ इच्छासिद्धिम् १६ ३८ इष्ट सुखम् १ १८४ ६ प्राप्तव्य सुख १ १८० १० प्रेरणम् १ १७८ ५ शास्त्रविज्ञानम् १ १७४ १० **इषः**=इष्यन्ते यास्ता सेना, प्र०—अत्र 'कृतो बहुलम्' इति वार्त्तिकेन कर्मणि क्विप् १ ९ ८ विद्यासिद्धयो या इष्यन्ते ता क्रिया १ ३ १ अन्नादीनीच्छा वा ६ ६६ १ विज्ञानानि ३ ५४ २२ अन्नादिसामग्री ६ १ १२ इच्छा ३ ३० ११ अन्नाद्यान्योषधिगणान् ३ ६२ १४ ज्ञातव्या प्रजा १ १८१ ६ एष्टव्या रथ्या १ १३० ३ प्राप्तव्यान् रसान् ६ ३५ ४ इष्टसाधका किरणा १ ८६ ५ इष्यतेऽसावा-श्विनो मास १४ १६ **इषा**=इष्यते ज्ञायते येन तदिट् ज्ञान तेन, प्र०—'इष गतौ' इत्यस्य क्विबन्तस्य रूपम् 'कृतो बहुलम्' इति करणे क्विप् २ १८ इष्टविद्यया-ऽन्नादिना वा ४ १ इच्छयाऽन्नेन वा निमित्तेन ३४ ४८ स्वेच्छया १ ११७ १ उत्तमाऽन्नादिसमूहेन १ ८८ १ **इषाम्**=सर्वैर्जनैर्यानीष्यन्ते तेषाम् (रयीणाम्) ३ १३ **इषे**=अन्नविज्ञानयो प्राप्तये, प्र०—इषतीति गतिकर्मसु पठितम्, निघ० २ १४ अस्माद्धातो क्विपि कृते पदमिद सिध्यति, अन्व०—अन्नायोत्तमेच्छायै १ १ वृष्ट्यै ३३ ११ इच्छापूर्त्तये १ ७१ ८ अन्नरूपायै राज्यलक्ष्म्यै १ ५० ११ आश्विनाय ७ ३० इच्छासिद्धयेऽन्नप्राप्तये वा ७ २१ १० उत्तम अन्न के लिए आर्याभि० २ ३१, ३८ १४ [इषु इच्छायाम् (तुदा०) इष गतौ (दिवा०) धातोर्वा कर्मणि 'कृतो बहुलमि' ति क्विप्। इषम् अन्ननाम निघ० २ ७ इषा अद्भि सह नि० १० २६ प्रजा वाऽ इष। श० १.७ ३ १४ अन्न वाऽ इषम् कौ० २८ ५ अय वै लोक इषमिति। ऐ० ६ ७]

इषयते इषमन्न विज्ञान वा कामयमानाय (मर्त्याय=मनुष्याय) ६ १६ २५ [इषमित्यन्ननाम (निघ० २ ७), तत 'तत्करोति तदाचष्टे' इति णिजन्ताच्छतृ]

इषयध्यै इषयितु गमयितुम् १ १८३ ३ गन्तुम् ६ ६४ ४ [इष गतौ (दिवा०) धातोर्णिजन्तात् तुमर्थे कध्यै प्रत्यय। गुणाभावश्छादस]

इषयन् प्रापयन् (विद्वज्जन) ६ १ २ **इषयन्तम्**=प्राप्नुवन्त गच्छन्त वा (सज्जनम्) ६ १८ ५ प्रापयन्तम् (पावकमग्निम्) ६ १ ८ **इषयन्तः**=प्राप्नुवन्तो प्रापयन्तो वा (सिन्धव=नद्य) ४ ४६ ४ इषमन्न कामयमाना (सज्जना) ६ १६ २७ [इष गतौ (दिवा०) धातोर्णि-जन्ताच्छतृ। गुणभावश्छान्दस। अन्यत्र—इषमित्यन्ननाम, ततो 'तत्करोति तदाचष्टे' इति णिचि शतरि च रूपम्]

इषयन्त प्राप्नुयु २ २ ११ एपयन्ति प्राप्नुवन्ति, प्र०—अत्र लडि 'वा छन्दसि सर्वे विधयो भवन्ति' इति गुणाऽभावोऽडभावश्च १ ७७ ४ [इष गतौ (दिवा०) धातोर्णिजन्ताल् लङ्। गुणाभाव आडभावश्च छान्दसौ]

इषयन्ती सुख प्रापयन्त्यौ (रोदसी=द्यावापृथिव्यौ) ४ ५६ ४ **इषयन्तीः**=इषमन्न कुर्वन्त्य (विट्टुप्य) ३ ३३ १२ [इषमित्यन्ननाम (निघ० २ ७) तत 'तत्करोति-तदाचष्टे' इति णिचि शतरि स्त्रिया ङीपि च रूपम्]

इषयुः इष्यते सर्वैर्जनैर्विज्ञायते यत्तद्याति प्राप्नोतीति (विद्वज्जन) प्र०—अत्र इषधातो 'घञर्थे कविधानमि'ति क तस्मिन्नुपपदे या धातोरौणादिक कु १ १२० ५ [इष गतौ (दिवा०) धातोर् 'घञर्थे क विधानमि' ति क। इषोपपदे या प्रापणे (अदा०) धातोर् औणादिक कुप्रत्यय]

इषये विज्ञानायाऽन्नाय वा ६ ५२ १५ [इष गतौ (दिवा०) धातो 'इक् कृष्यादिभ्य' अ० ३ ३ १०८ वा सूत्रेण इक् प्रत्यय]

इषयेम प्राप्नुयाम १ १८५ ९ [इष गतौ (दिवा०) धातोर्णिचि लिङि च रूपम्। गुणाऽभावश्छान्दस]

इषवः बाणा १६ ६४ बाणाद्या शस्त्रविशेषा २६ ४८ शस्त्राऽस्त्राणि १६ ६६ प्राप्ता सेना १७ ४३ गतय १३ ७ **इषवे**=इष्णात्यभीक्ष्ण हिनस्ति शत्रून् येन तस्मै (भा०—शस्त्राऽस्त्राय) १६ १ **इषुम्**=प्राप्ति-साधनमिच्छाविशेष वा १ ६४ १० [ईष गतिहिंसादर्शनेषु (भ्वा०) धातो 'ईषे किच्च' उ० १ १३ सूत्रेण उ प्रत्यय। स च कित्, धातोरिकारादेशश्च। ईषति गच्छति हिनस्ति वा शत्रूनिति विग्रह। इषु इच्छायाम् (तुदा०) इष गतौ (दिवा०) इष आभीक्ष्ण्ये (क्र्या०) धातुभ्यो वा साधनीयम्। इषु=ईषतेर्गतिकर्मणो वधकर्मणो वा निरु० ९ १८ वीर्य वा ऽइषु श० ६ ५ २ १० चतु सन्धिर्ह्यीषुरनीक

इष्टयजुषः इष्टानि यजूंषि यस्य तस्य (वीरगृहपते) ८.१२ [इष्ट-यजुष्पदयोर्बहुव्रीहि । विभक्तिव्यत्ययश्च]

इष्टयः इष्टप्राप्तय ६ ७४ १ सत्सङ्गतय १ १४५ १ **इष्टये**=विद्यासङ्गतये २७ ३३ अभीष्टसिद्धये १ ५७ २ यजन्ति सङ्गच्छन्ते यस्मिन् यज्ञे तस्मै, प्र०—अत्र वाहुलकादौणादिकस्ति प्रत्यय किच्च १ ११३ ५ इष्टरूपायै (महीयै=नीतये) १ ११३ ६ इष्टसुखप्राप्तये ५ ७८ ३ इष्टसुखाय १ ११२ १ अभीष्टसुखाय २७ २७ **इष्टिभिः**=होमैरिव सत्कारै २ १ ६ **इष्टिः**=यजनक्रिया ४ ४ ७ **इष्टे !**=पूजितु योग्य (विद्वज्जन), प्र०—अत्र सज्ञाया क्तिच् १ १४३ ८ **इष्टे.**=इष्टस्य गृहाश्रमस्य स्थानात् १ १२५ ३ **इष्टैः**=सगन्तु प्राप्तुमर्हैं (मेघजलैं) ४ ५५ ६ **इष्टौ**=यजने सङ्गतिकरणे २ २८ ७ विज्ञान-वर्द्धके यज्ञे ६ ११ ३ इष्टसाधिकाया नीतौ १ ६२ ३ गन्तव्यायाम् (सदने=आकाशे) १ १४८ ३ [इष्टि =यज्ञ-नाम, निघ० ३ १७ यज देवपूजासगतिकरणदानेषु (भ्वा०) धातो क्तिन् स्त्रियां, सज्ञाया क्तिच् वा । इषु इच्छाया वा धातो 'मन्त्रेवृषेष०' अ० ३ ३ ९६ सूत्रेण क्तिन्]

इष्टरश्मिः इष्टा सयोजिता रश्मयो येन (प्राप्त-विज्ञानो जन) १ १२२ १३ [इष्ट-रश्मिपदयोर्बहुव्रीहि । इष्ट =यज सगतिकरणे (भ्वा०)+क्त । रश्मि =अशूङ् व्याप्तौ (स्वा०) धातो 'अश्नोते रश्च उ० ४ ४६ सूत्रेण मि , धातोश्च रशादेश]

इष्टव्रताः इष्टकर्माण (विद्वज्जना) ३ ५९ ९ [इष्ट-व्रतपदयो समास । इष्ट व्याख्यातम् । व्रतमिति कर्मनाम निघ० २ १]

इष्टापूर्त्ते इष्ट च पूर्त्त च ते १८ ६१ इष्ट श्रौत कर्म च पूर्त्त स्मार्त्त कर्म च ते १८.६० इष्ट सुख विद्वत्सत्करणमीश्वराराधन सत्सङ्गतिकरण सद्विद्यादिदानञ्च, पूर्त्तं पूर्णं वल ब्रह्मचर्य विद्याऽलङ्करण पूर्ण यौवन पूर्ण साधनोपसाधनञ्च ते १५ ५४ [इष्ट-पूर्त्तपदयोर्द्वन्द्वसमासे पूर्वपदस्य दीर्घ । इष्टम्=यजदेवपूजासगतिकरणदानेषु (भ्वा०) धातो क्त. । पूर्त्तम्=पॄ पालनपूरणयो (जु०)+ धातो क्त]

इष्टाऽश्वः इष्टा सङ्गता अश्वा यस्य स (प्राप्तविद्यो जन) १ १२२.१३ [इष्ट-अश्वपदयोर्बहुव्रीहि । इष्टाश्वपदे व्याख्याते]

इष्णन् अभीक्ष्णमिच्छन् (इन्द्र =पुरुषार्थी सभेश) २ २० ५ प्राप्नुवन् (इन्द्र =राजा) ४ १७ ३ [इष आभीक्ष्ण्ये (क्र्या०) धातो. शतृ]

इष्णानः अभीक्ष्ण निष्पादयन् शोधयन् (सभाध्यक्ष.) १ ६१.१३. [इष आभीक्ष्ण्ये (क्र्या०) धातो शानच् । व्यत्ययेनात्मनेपदम्]

इष्णासि अभीक्ष्ण प्राप्नोषि गच्छसि वा १ ६३ २ [इष आभीक्ष्ण्ये (क्र्या०) धातोर्लट्]

इष्मिणम् इष्मो वहुविधो विद्यते यस्य तम् (पितर=जनकम्) ५ ५२ ६ **इष्मिणः**=प्रशस्तविज्ञानगतिमन्तः (मनुष्या) १ ८७ ६ वहुविधमिष्म इच्छा येषान्ते (विद्वद्राजजना) ५ ८७ ५ इच्छाऽन्नादियुक्ता (युद्धविद्या-कुशला जना) ७ ५६ ११. [इषु इच्छायाम् (तु०) धातो. 'इषि युधीन्धि०' उ० १.१४५ सूत्रेण मक् प्रत्यये—'इष्म'। ततो मत्वर्थे इनि. । इष्मिण =ईषणिन इति वा, एषणिन इति वा, अर्षणिन इति वा नि० ४ १६ इष्मिण. पदनाम निघ० ४ १]

इष्यत प्राप्नुत २६ २२. विजानीत १ १५ ६ **इष्यति**=गच्छति १ ३४ १० **इष्ये**=प्राप्नोमि ४ ३३ १ [इष गतौ (दिवा०) धातोर्लोट् । अन्यत्र लट् । 'इष्ये' प्रयोगे व्यत्ययेनात्मनेपदम्]

इष्यन् जानन् (सभाध्यक्ष) १ ६१ १२ [इष गतौ (दिवा०) धातो शतृ]

इष्वै गन्त्र्यै (शूरवीरायै राज्ञ्यै) ६ ७५ १५ [इष गतौ (दिवा०) धातो 'इषे किच्च उ' उ० १ १३ सूत्रेण उ । स्त्रियां चतुर्थ्या एकवचने रूपम् । 'ङिति ह्रस्वश्च' अ० १ ४.६ सूत्रेण पक्षे नदीसज्ञकत्वेन न गुण]

इह अस्मिन् वर्त्तमाने काले १९ ५९ अस्मिन् ससारेऽस्मत्कुले वा २ ३३ अस्मिन् ससारे वर्त्तमानसमये वा २५ २० अस्मिन् स्थाने १ १२ ३ अस्या प्रजायाम् ७ ३६ अस्मिन् राज्यकर्मणि १७ ६६ एतेषु (जनेषु) ३ २१ अस्या शिल्पविद्यायामस्मिन् गृहे वा १ १३ १० एतस्मिन् व्यवहारे १ २२ १२ इस स्थान मे स० वि० १३८, अथर्व० १४ २ २९ इसी जन्म मे आर्याभि० २ ४५, ३४ ३८ [इदम्सर्वनाम्न सप्तम्यन्ताद् 'इदमो ह' अ० ५ ३ ११ सूत्रेण ह. प्रत्यय । 'इदम इश्' अ० ५ ३ ३ सूत्रेण इदम इशादेश । 'तद्धितश्चासर्वविभक्तिरि' त्यव्ययसज्ञा]

इहि एति २२ १९ प्राप्नुहि ६ ५४ ६ जानीहि प्राप्नुहि वा ४ २० गच्छ १.१० ४. गच्छति, प्र०—अत्र व्यत्यय ५ ८३ ६ प्राप्नुहि प्रापयति वा १ ९ अ. प्राप्नुयात्

शरधारणे (कण्ड्वादि०) धातोर्लट् । इषुध्यति=याच्ञा-कर्मा नि० ३ १९ इषुधिप्राति० 'सर्वप्रातिपदिकेभ्य इत्येके' इति क्विपि लटि रूपम्]

इषुध्यते इषुध इवाऽऽचरति तस्मै (जनसमूहाय) १ १२८ ६ [इषूपपदे दधाते कप्रत्यये=इषुध । तदिवा-चरतीति क्यङ् आचारेऽर्थे]

इषुध्यवः य इषुभिर्युध्यन्ते (शिल्पिनो विद्वज्जना) ५ ४१ ६ [इषूपपदे युध सम्प्रहारे (दिवा०) धातोर्बाहुलका-दौणादिको युक् प्रत्यय । पृषोदरादिना रूपसिद्धि]

इषुध्येव इषवो धीयन्ते यस्या तयेव १ १२२ १ [इषुधिपद व्याख्यातम्]

इषुबलाः इषुभि शस्त्राऽस्त्रै बल सैन्य वा येषान्ते (राजजना) ६ ७५ ९ [इषु-बलपदयो समास]

इषुम् बाणम्, प्राप्तिसाधनम्, इच्छाविशेष वा १ ६४ १० बाणाऽऽवलिम्, भा०—शस्त्रम् १६ ३ [इषुरीषतेर्गतिकर्मणो वधकर्मणो वा नि० ९ १८ इष गतौ (दिवा०) धातो 'इषे किच्च उ' उ० १ १३. सूत्रेण उ प्रत्यय किच्च । इष्यति गच्छति सग्रामे शत्रु प्रतीति विग्रह]

इषुमते प्रशस्ता इषवो बाणा विद्यन्ते यस्य तस्मै वीराय (जनाय) १६ २९ **इषुमन्तः**=बाणवन्त (शिल्पिनो वीरजना वा) ५ ५७ २ **इषुमद्भ्यः**=बहव इषवो विद्यन्ते येषान्तेभ्य (सैनिकेभ्य) १६ २२ **इषुमान्**=बाणवान् (वीर =शुभगुणेषु व्यापनशीलो जन) २ ४२ २ [इषु व्याख्यातम् । ततोऽतिशायने भूम्नि वा मतुप्]

इषुयते इषुरिवाऽऽचरति १ १२८ ४ [इषु व्या-ख्यातम् । तदिवाचरतीत्याचारे क्यङ्]

इषुहस्तेन इषव शस्त्राणि हस्तयोर्यस्य तेन (इन्द्रेण=पराक्रमाऽऽढ्येन सेनापतिना) १७ ३४. **इषु-हस्तैः**=शस्त्रपाणिभि सुशिक्षितैर्बलिष्ठैर्भृत्यै १७ ३५ [इषु-हस्तपदयो समास]

इषे इच्छापूर्त्तये १ ७१ ८ अन्नाय १ १८० २ [इष् इत्यन्ननाम । इषु इच्छायाम् (तुदा०) धातो क्विप् सम्पदादित्वाद् भावे]

इषे प्राप्तुम् ६ १३ २ [इष गतौ (दिवा०) धातो-स्तुमर्थे के प्रत्यय]

इष्कर्त्तारम् निष्कर्त्तार ससाधकम् (प्रचेतस= प्रकृष्टप्रज्ञ पुरुषम्) प्र०—अत्र छान्दसो वर्णलोप इति नलोप १२ ११० [निस् उपपदे डुकृञ् करणे (तना०) धातोस्तृच् कर्त्तरि । 'छान्दसो वर्णलोप' इति नकारलोप । इष्कर्त्तारम-ध्वरस्य प्रचेतसमिति । अध्वरो वै यज्ञ । प्रकल्पयितार यज्ञस्य प्रचेतसमित्येतत् । श० ७ ३ १ ३३]

इष्कृतिः निष्कर्त्री (ओषधि) १२ ८३ [निसुपपदे करोतेर्धातो स्त्रिया क्तिन् । 'छान्दसो वर्णलोप' इति न-लोप]

इष्टकानाम् इज्यन्ते सगम्यन्ते कामा यै पदार्थैस्ते-षाम् १३ ३१ **इष्टकाम्**=इष्ट कर्म यस्यास्ताम् १४ ११ **इष्टकाः**=इष्टसुख साधिका (धेनव) १७ २ वेद्या चिता ३५ ८ **इष्टके**=इष्टकेव शुभैर्गुणै सुशोभिते, अ०— इष्टकावद् दृढाङ्गे (देवि=देदीप्यमाने स्त्रि) १३ २१ [यज देवपूजादिषु (भ्वा०) धातोर्बाहुलकादौणादिक क्त । तत 'सज्ञाया कन्' अ० ५ ३ ८७ इति सूत्रेण कन् । इषु इच्छाया धातोर्वा क्तप्रत्यये कन् । तद् यदिष्टात्समभव-स्तस्मादिष्टका श० ६ १ २ २२ तद् यदस्माऽइष्टे कमभवत्त-स्माद्वेवेष्टका श० ६ १ २ २३ अस्थीनि वा ऽ इष्टका श० ८ ७ २ १० अहोरात्राणि वा ऽ इष्टका श० ९ १ २ १८]

इष्टनिः इच्छाविशिष्ट (विद्वज्जन) प्र०— अत्रेषधातोर्बाहुलकादौणादिकोऽनि प्रत्ययस्तुगागमश्च १ १२७ ६ यष्टु योग्य (विद्वज्जन) १ १२७ ६ [इषु इच्छायाम् (तुदा०) धातोर्बाहु० औणा० अनि प्रत्यय-स्तुगागमश्च]

इष्टम् येन इज्यते तम् (अग्निम्) १ १६२ १५ ब्रह्मोपासन सर्वोपकारक यज्ञाऽनुष्ठान च ऋ० भू० १०५, अथर्व० १२ ५ १० सुख तत्साधन वा १८ ५७ अभीप्सितम् (अश्वम्) २५ ३७ **इष्टः**=सत्कृत आहुतिभिर्वर्धितो वा (अग्नि =सभाध्यक्षो विद्वान् पावको वा) १८ ५७ कृत (यज्ञ) १८ ५६ सङ्गन्तुमर्ह (वनस्पति =पिप्पलादि) २१ ५८ **इष्टानि**=सुखसाधनानि कर्माणि १७ २६ सङ्गतानि (तत्त्वानि) १ १६४ १५ **इष्टे**=सङ्गन्तव्ये (व्यवहारे) ६ ८ ७ **इष्टौ**=पूजनीयौ (मातापितरा= जनकजनन्यौ) ४ ६ ७ इष्टम्=यज्ञ करना और कराना । स० वि० १४५, अथर्व० १२ ५ १० [यज देवपूजा-सगतिकरणदानेषु (भ्वा०) धातो क्त । इषु इच्छाया (तुदा०) धातोर्वा 'मतिबुद्धिपूजार्थेभ्यश्च' अ० ३ २ १८८ सूत्रे चकारस्यानुक्तसमुच्चयार्थत्वाद् वर्तमानेऽपि क्त । इष्टानि कान्तानि वा, क्रान्तानि वा, गतानि वा, मतानि वा नतानि वा नि० १० २६]

१ ४ ३ ५ मनुष्यो वा ऽईडेन्या श० १ ५ २.३. ईडेन्यो ह्येष श० १ ४ १ २ ६]

ईड्यम् उत्तमैर्गुणैः प्रशसनीयम् (अग्निम्) ६.१५ २ अध्यन्वेषणीयम् (विद्युदाख्य वह्निम्) ३.६ ८ प्रशसितुमर्हम् (सोम=सोमाद्योषधिगणम्) २८ २६ **ईड्यः**= अध्येष्टव्य (अग्नि=ईश्वरो भौतिकोऽग्निर्वा) १ १२ ३ नित्य स्तोतव्योऽन्वेष्टव्यश्च (अग्नि=परमेश्वरो भौतिको वा) १ १ २ उपासितुमध्येपितु वाऽर्हं (अग्नि) ३ १५. स्तोतुमन्वेष्टु वा योग्य (अग्नि=राजा सेनेशो वा) ७ १५ १० भा०—पूजाऽर्हं (अग्नि=ईश्वरो भौतिको वा) ४ १६ स्तोतव्य उपास्य (ईश्वर) ऋ० भू० ७८ स्तुति के योग्य (ईश्वर) आर्याभि० १ ४ प्रशसनीय गुण-कर्म-स्वभावयुक्त (सभापति राजा) स० प्र० १८३, अथर्व० ६ १० ८६ १ प्रशसनीय (विद्वान्) ५ २२ १ ईडितु स्तोतुमध्येपितु योग्य (घर्म=अग्निहोत्रादिको यज्ञ) १७ ५५ **ईड्या**.=अध्येपितु योग्या (विद्युदादय) १ १४ ८ [ईड स्तुतौ (अदा०) धातोर्ण्यत् । ईडच=ईडितव्य नि० ८ ८ वन्दितव्य नि० ७ १६ ईडच इति यज्ञिय इत्येतत् श० ६ २ ३ ६]

ईदृक्षासः एतल्लक्षणसहिता (मनुष्या.) १७ ८४ [इदमुपपदे दृशिर् प्रेक्षणे (भ्वा०) धातो 'दृशे क्सश्च वक्तव्य' अ० ३ २ ६० वा० क्स प्रत्यय । 'दृक्षे चेति वक्तव्यम्' अ० ६ ३ ६० वा० सूत्रेणेदम ईशादेश]

ईदृङ् अन्येन तुल्य (अ०—पुरुष) १७ ८१ [इदमुपपदे दृशिर् प्रेक्षणे (भ्वा०) धातो 'त्यदादिषु०' इति क्विन् । 'इदकिमोरीश्की' अ० ६ ३ ६० सूत्रेण इदम ईशादेश । 'क्विन् प्रत्ययस्य कु' इति कुत्वम्]

ईदृशे ईदृग्लक्षणे (सङ्ग्रामादिव्यवहारे) ३३ ६१ ईदृग्व्यवहारे ६ ४५ ५ [इदमुपपदे दृशिर् प्रेक्षणे (भ्वा०) धातो त्यदादिषु दृशो०' अ० ३ २ ६० इति कञ् । 'इदकिमोरीश्की' अ० ६ ३ ६० सूत्रेण ईशादेश]

ईधिरे प्रदीपयन्ति ५ २५ २ प्रदीपयेयु ३ २६ १५ [ञिइन्धी दीप्तौ (रुधा०) धातो सामान्ये लिट् । 'इन्धिभवतीभ्याञ्च' अ० १ २ ६ सूत्रेण कित्वे 'अनिदिताम्' नलोपो गुणाऽभावश्च । 'लिटस्तझयोरेश्इरेच्' इति झस्येरेच्]

ईधे प्रदीपये १२ २० प्रदीपयति ६ १६ १४ प्रापयति ६ १६ १५ प्रदीप्यताम् ११.३४ प्रदीपयेत्, प्र०—अत्र 'लोपस्त आत्मनेपदेषु' इति तकारलोप ११.३३ दीपयति प्र०—अत्र लडर्थे लिट् 'इजादेश्च गुरुमतो०' अ० ३ १.३६ इति प्रतिषेधादाङ्निषेध 'इन्धिभवतीभ्याञ्च, अ० १ २.६ इति लिट कित्वाद् 'अनिदिताम्०' इति नलोपो गुणाऽभावश्च १ ३६.११ [ञिइन्धी दीप्तौ (रुधा०) धातो सामान्ये लिट्]

ईन्धे प्रकाशित करता हूँ स० वि० १८६, २० २४ [ञिइन्धी दीप्तौ (रुधा०) धातोर्लट् । छान्दस धातोर्दीर्घत्वम्]

ईम् जलम् ५ ५४ ४ जलमग्नि वा, प्र०—ईमित्युदकनामसु पठितम् निघ० १ १२, पदनामसु च निघ० ४ २ अनेन शिल्पविद्यासाधकतमावेतौ गृह्येते १.६ २ जल पृथिवी च १.४ ७ ज्ञातव्य प्राप्तव्य परमेश्वर विद्युद्रूपमग्नि वा १ ६५ ३ विज्ञानमुदक वा १ ६७ ४. एव १ ३८ ११ जलमन्न पृथिवी वा १ ५.१ २ दुग्धम् २ ३५ १३ प्रदातारम् (अग्निम्=सभाध्यक्षम्) १.३६ ७ प्राप्तम् (पेयपदार्थम्) ५ १ ३ प्राप्तव्यम् (इन्द्र=अग्निम्) १ ८७ ५ प्राप्तव्यया (इपा=इच्छया) १ १२६ ७ प्रत्यक्ष, सर्वत १ १६७ ८ शास्त्रबोधम् १.११६ १२ महान्तम् (पुरुषम्) ४ १७.४ विद्याम् ५ २ ५ प्राप्त वस्तु ६ १७ २ प्राप्तव्यो विजय १.८१ १ समुच्चये २३ ५५ जलेन २ २२ १ उदक सर्वान् पदार्थान्वा ५ ३७ ३ सर्वा क्रियाम् १ १६४ ३२ विजयप्रापिका सेवा १.७१ ४ प्राप्तव्यान् बोधान् १ ६७ २ सततम् ३ ३० १६ अभिगताम् (विद्याम्) १ १२७ ७. सर्वम् ४ १७ १७ शब्द को प० वि०, सब प्रकार की स० वि० १०५, ५ ३७ ३ सर्वत ६ ३ ६ [ईम् उदकनाम निघ० १ १२ पदपूरण नि० १ ६ ईम् पदनाम निघ० ४ २.]

ईमहे याचामहे, प्र०—इमह इति याच्ञाकर्मसु पठितम् निघ० ३ १६, १ १० ६ व्याप्नुयाम् ६ १७ प्राप्नुयाम ७ ५४ १ विजानीम., प्र०—अत्र 'ईङ् गतौ' इत्यस्मात् 'बहुल छन्दसि' इति शपो लुकि श्यनभाव १ ६ १० प्राप्नुयाम जानीम वा ५ ८२ ३ प्राप्नुम १.१७ ३ जानीम १ ४० १ दूरीकुर्महे ७ ५८ ५ [ईमहे याच्ञाकर्मा निघ० ३ १६ ईङ् गतौ (दिवा०) धातोर्लट् । 'बहुल छन्दसी' ति शपो लुकि श्यन् न भवति]

ईयचक्षसा ईय प्राप्तव्य ज्ञातव्य वा चक्षोर्दर्शन कथन च ययोस्तौ (मित्रा=सखायौ) ५ ६६ ६ [ईङ् गतौ (दिवा०) धातोर् बाहुलकादौणादिको यक् प्रत्यये ईयम् । चक्षस्-चक्षिङ् व्यक्ताया वाचि, दर्शनेऽपि (अदा०) धातोर-

३ ५७ प्राप्नोति १ १५ [इण् गतौ (अदा०) धातोर्लोटि मध्यमैकवचने रूपम्]

इहेव यथाऽस्मिन् स्थाने तथा १ ३७ ३. [इह-इव-पदयो समास । इह पद व्याख्यातम्]

इहेह अस्मिन् जगति, प्र० अत्र वीप्साया द्वित्वम्, प्रकर्षद्योतनार्थम् १ १८ १४ अस्मिन्नस्मिन् व्यवहारे २३ ३८ अस्मिन् ससारे व्यवहारे च १९ ६ ['इह' पद व्याख्यातम् । तस्य वीप्साया द्वित्वम्]

इहेहमातरा इहेह माता जननी ययोस्तौ (भ्रातरा=बन्धू) ६ ५९.२ [इहेह-मातृपदयो समास]

ई उदकम्, प्र०—अत्र 'छान्दसो वर्णलोपो वा' इति मलोप १ १० ३ १ ईम् उदकनाम निघ० १ १२ पदनाम निघ० ४.२]

ईक्षते देखता है स० वि० २५४, अथर्व० ९.६ ३ **ईक्षध्वम्**=सम्प्रेक्षध्वम् ५ ३४ **ईक्षन्ताम्**=प्रेक्षन्ताम् ३६.१८ **ईक्षन्ते**=आलोकन्ते १७ ६८ **ईक्षामहे**=पश्येम ३६.१८ **ईक्षे**=पश्यामि ४ २० ८. [ईक्ष दर्शने (भ्वा०) धातोर्लेटि लोटि च रूपाणि । ईक्षे पदनाम निघ० ४ ३ ईक्षे ईशिषे नि० ६ ६]

ईक्षमाणाय दर्शकाय (मनुष्याय) २२ ८ [ईक्ष दर्शने (भ्वा०) धातो शानच्]

ईक्षयत् दर्शयेत् १.१३२ ५ ईक्ष दर्शने (भ्वा०) धातोर्णिजन्ताल् 'लिडर्थे लेट्' इति लेट्]

ईक्षिताय अन्येन दृष्टाय (जीवाय) २२ ८. [ईक्ष दर्शने (भ्वा०) धातो क्तप्रत्यये चतुर्थ्येकवचनम्]

ईङ्खयन्ति खेदयन्ति निपातयन्ति १ १९ ६ [ईखि गतौ धातोर्णिचि लटि च रूपम् । ईङ्खते गतिकर्मा निघ० २ १४.]

ईजते दूरीकरोति ६.६४.३. कम्पते ५ ४८.२. [ईज गतिकुत्सनयो (भ्वा०) धातोर्लट्]

ईजे सङ्गच्छते ६.३ २. यजामि ६.१६ ४. सङ्गच्छे ६ १ ६ [यज देवपूजासगतिकरणदानेषु (भ्वा०) धातो सामान्ये लिट् । 'असयोगाल् लिट् कित्' इति कित्वे यजादित्वात् सम्प्रसारणम्]

ईजानम् यज्ञ कुर्वन्तम् (पुत्रम्) १ १२५ ४ **ईजानस्य**=यज्ञकर्त्तु. (मर्त्यस्य=साधारणमनुष्यस्य) ६ ४८ २०. **ईजान:**=यजमान (सत्पुरुष) ७ ५६ २ **ईजानाय**=सङ्गन्तु शीलाय (पुरुषाय) १.११३ २० [यज देवपूजासङ्गतिकरणदानेषु (भ्वा०) धातो 'छन्दसि लिट्' अ० ३.२.१०५ सूत्रेण लिटि 'लिट कानज्वा' अ० ३ २.१०६ सूत्रेण कानचि सम्प्रसारणे द्वित्वे च रूपम्]

ईट्टे ऐश्वर्यं प्रयच्छति ७ २४ ५. ऐश्वर्यं लभते ४ २५ १ अधीच्छति ४ २५ ३ स्तौति १ १८० २ ऐश्वर्यवान् भवेत् ३ ५२ ५ ऐश्वर्ययुक्त करोति ५ १२ ६ ऐश्वर्यहेतु विदधाति १ ८५ १८ [ईड स्तुतौ (अदा०) धातोर्लट् । ईश ऐश्वर्ये (अदा०) धातोर्वा साधनीयम्]

ईडत स्तुत १ ९६ ३ स्तुति करो आर्याभि० १ ४०, ऋ० १ ७ ३ ३ **ईडते**=स्तुवन्ति गुणै ,प्रकाशित कुर्वन्ति ५ ८ ३. स्तुवन्ति अध्येषन्ति वा १ १५ ७ प्रशसन्ति ७ ४४ ४ स्तुवन्त्यन्विच्छन्ति वा ७ १० ५ **ईडिष्व**=प्रशसाऽध्यन्विच्छ वा ६ ६० १० **ईडीत**=प्रशस्येत् ५ २१ ४ प्रशसत ६ १६ ४६ **ईडे**=स्तौमि प्राप्नोमि ४ ३३ १. स्तुवे, याचेऽधीच्छामि प्रेरयामि वा १ १ १ अध्येषयामि स्तौमि वा ३ १ १५ अध्यन्विच्छामि १३ ४३ गुणै प्रशसामि ७ ५३ १ अधीच्छामि ५ ६० १ सत्कुर्याम् १ ४४ ४ मैं स्तुति करता हूँ आर्याभि० १ २, ऋ० १.१ १ १ [ईड स्तुतौ (अदा०) धातोर्लोट् लट् वा । ईळते याचन्ति स्तुवन्ति वर्धयन्ति पूजयन्तीति वा नि० ८ १ ईळे=याचामि । ईळिरध्येषणाकर्मा पूजाकर्मा वा नि० ७ १५]

ईडान: स्तुवन् (वह्नि=विद्वज्जन) २७ १४ **ईडानाय**=स्तुवते (सज्जनाय) २ ६ ६ [ईड स्तुतौ (अदा०) धातो शानच्]

ईडाना प्रशसन्ती (घृताची=रात्रि) ५ २८ १ [ईड स्तुतौ (अदा०) धातो शानच् प्रत्यये स्त्रिया टापि च रूपम्]

ईडितम् प्रशस्तम् (इन्द्र=राज-राजपुरुषम्) २८ ३ **ईडित:**=प्रशसितगुण (सज्जन) ७ ७ ३ मनुष्यैरध्येषितोऽधिष्ठित (अग्नि=भौतिक) १ १३ ४ विद्यामभीप्सुभि: सम्यगध्येषितव्य (अग्नि=प्रत्यक्षोऽग्नि) २ ३. [ईड स्तुतौ (अदा०) धातो. क्त.]

ईडिता प्रशसितौ (होतारौ=स्त्रीपुरुषौ) ५.५ ७. [ईड स्तुतौ (अदा०) धातो कर्त्तरि तृच्]

ईडेन्यम् प्रशसनीयम् (विद्वज्जनम्) ७ २ ३ स्तोतुमर्हम् (वलम्) २८.२६ **ईडेन्य:**=अन्वेषणीय (अग्नि=पावक) १५ ३६ ईडितु प्रशसितुमर्ह (अग्नि=महाविद्वान्) ३ २७ १३ स्तोतु योग्य (विद्वान्) १ ७९ ५ [ईड स्तुतौ (अदा०) धातो 'कृत्यार्थे तवैकेनकेन्यत्वन' अ० ३ ४ १४ सूत्रेण केन्य. प्रत्यय । वाग्वाऽ ईडेन्या श०

(इन्द्रम्=ईश्वरम्) १ ११ ८ रचने समर्थ परमेश्वर तन्मध्यस्थविद्यासाधक वायु वा १ ५ २ निर्मातारम् (इन्द्र=परमात्मानम्) ७ ३२.२२ सर्वस्य जगत. स्वामिनम् (ईश्वरम्) ३९ ८ ऐश्वर्ययुक्तम् (कपर्दिनम्=ब्रह्मचारिरण विद्वज्जनम्) ६ ५५ २ ईशनशीलम् (परीक्षक जनम्) ६.५४ ८ ईषणशीलम् (सूनु=सत्पुत्रम्) ७.७ ७ ईष्टेऽसावीशान सर्वजगत्कर्त्ता तम् (जगदीश्वरम्) ऋ० भू० ८८ सर्वस्या सृष्टेर्विधातारम् (परमात्मानम्) १ ८८ ५ ईशान उत्पादन करने की इच्छा करने वाले सब जगत् के स्वामी (ईश्वर) को आर्याभि० २ ५०, २५ १८ **ईशानः**=ऐश्वर्यवान्, ऐश्वर्यहेतु, सृष्टे कर्त्ता प्रकाशको वा (इन्द्र.=ईश्वर सूर्यो वा) १ ७ ८ अधिष्ठाता (पुरुष=ईश्वर) ३१ २ पूर्णसामर्थ्य (सेनापति) १ ८७.४. समर्थ (सज्जन.) २ २४ १५ साधक समर्थ (अग्नि=विद्वज्जन) १५ ३५. शक्तिमान् (विद्वान्) १ १३० ९ अधिपति (इन्द्र.=सभाध्यक्ष) १ ६१ १५. ईषणशील सर्वस्येश्वर' (परमेश्वर.) ऋ० भू० १२० ईशनकर्त्ता अर्थात् ईश्वरता करने वाला, सब से बडा और प्रलयोत्तरकाल मे रहने वाला (ईश्वर) आर्याभि० १ २८, ५ ८ १७ ४१ **ईशानाय**=समर्थाय जनाय २४.२८ [ईश ऐश्वर्ये (अदा०) धातोस्ताच्छीलिकश्चानश् । आदित्यो वा ऽ ईशान आदित्यो ह्यस्य सर्व स्येष्टे श० ६ १ ३ १७ एतान्यष्टौ (रुद्र, सर्वशर्व, पशुपति. उग्र, अशनि, भव, महान्देव, ईशान) अग्निरूपाणि । कुमारो नवम श० ६ १ ३ १८. स ह स (असु) ईशानो नाम । स दशधा भवति । स एष एतस्य (आदित्यस्य) रश्मिरसुर्भूत्वा सर्वास्वासु प्रजासु प्रत्यवस्थित जै० उ० १.२९ ३ यदीशानोऽन्न तेन कौ० ६ ८.]

ईशानकृत् य ईशानानीशच्छीलान् पुरुषार्थिन करोति (जगदीश्वर) २ १७ ४ ईशानानैश्वर्यवत करोतीति (इन्द्र=सभाध्यक्ष) १ ६१.११ **ईशानकृतः**=य ईशानान् ऐश्वर्ययुक्तान् कुर्वन्ति ते (वायव) १ ६४ ५ [ईश ऐश्वर्ये (अदा०) धातोस् ताच्छीलिकश्चानश् । ईशानोपपदे डुकृञ् करणे धातो क्विप्]

ईशाना प्रभवित्री (उषा) १ ११३ ७ [ईश ऐश्वर्ये (अदा०) धातोर्लट । शानचि स्त्रिया टापि रूपम्]

ईशाना समर्थौ (मित्रावरुणौ=अध्यापकोपदेशकौ) ५ ७१ २ [ईश ऐश्वर्ये (अदा०) धातो शानच् । 'सुपा सुलुग्' इत्याकार]

ईशानासः ऐश्वर्ययुक्ता (विद्वज्जना) १ १४१ ३ समर्था. स्वामिन' १.७३ ९. [ईश ऐश्वर्ये (अदा०) धातोस्ताच्छीलिकश् चानश् । ततो जसोऽसुगागम']

ईशायै ययैश्वर्यं प्राप्नोति तस्यै (क्रियायै) २१.५७ [ईश ऐश्वर्ये (अदा०) धातोर् औणादिकोऽन् प्रत्यय, ततष्टाप्]

ईशिरे ऐश्वर्यं प्राप्नुवन्ति ५.५८ १ [ईश ऐश्वर्ये (अदा०) धातोर्लिटि प्रथमबहुवचनम्]

ईशिषे इच्छसि ४ ५२ ३ ईश्वरो भवसि ६ ४१.३. ऐश्वर्यवान् भवे. २ ३९.१ ऐश्वर्यं करोषि १ ७०.५ ऐश्वर्यं विदधासि ५ ८१ ५ ईशन करोषि २ २४.१ ईशोऽसि, भा०—स्वामी भवसि १७ ७१ समर्थोऽसि २.१६ ६ **ईशीत**=समर्थो भवेत् ४ १५.५. **ईशीय**=ईश्वर' समथ भवेयम् ७ ३२.१८ **ईशे**=ईष्टे, प्र०—अत्र सर्वत्रैकपक्षे 'लोपस्त आत्मनेपदेषु' इति तलोपोऽन्यत्रोत्तमपुरुषस्यैकवचनम् ३ १६ १ ईष्टे ऐश्वर्यं करोति ४ १२ ३. ईश्वरो भवति ४ २१ ४ इच्छामि ६.५१.८. ईष्टे ज्ञातुमिच्छति ७ ४ ६ रचना करता है स० वि० ५, २३.४३ ऐश्वर्ययुक्तो भवति १ ७१.९ समर्थो भवामि ३ ३२. ईष्टे, प्र०—अत्र 'लोपस्त आत्मने०' इति तलोप २०.३२ [ईश ऐश्वर्ये (अदा०) धातोर्लट् । 'ईश. से' अ० ७ २ ७७ सूत्रेणेडागम । 'ईशीय' प्रयोगे लिङ् । 'ईशे' इत्यत्र 'लोपस्त आत्मनेपदेषु' सूत्रेण तलोप.]

ईषते गच्छति १ १२४ ६ प्राप्नोति प्र०—ईषतीति गतिकर्मा निघ० २ १४, ६ ४२ ३ हिनस्ति ५.८३ २. युद्धमिच्छेत् १ ८४ १७ अभिगच्छति ५ ६७ ५. पश्यन्ति १ १४१.८ ईषधु=प्रापयितुमिच्छतम् १.११२ १६ **ईषन्ते**=हिंसन्ति ६ ६६ ४. [ईष गतिहिंसादर्शनेषु (भ्वा०) धातोर्लट् । ईषते भीत. पलायते नि० १०.११ ईषति गतिकर्मा निघ० २.१४]

ईषमाणः ऐश्वर्यं कुर्वन् (प्रजाजन) प्र०—अत्र 'बहुल छन्दसि' इति शपो लुक् १ १७१ ४ **ईषमाणाः**=गच्छन्त (ऊर्मय=उदकतरङ्गा) ४ ५८.६ भयात् पलायमाना (मृगा) १७.९४ [ईष गतिहिंसादर्शनेषु (भ्वा०) धातो शानच्]

ईषा हिंसक. (इन्द्र=ऐश्वर्यवान्राजा) ३.५३.१७. [ईष गतिहिंसादर्शनेषु (भ्वा०) धातोरिगुपधलक्षण क प्रत्यय । 'सुपा सुलुग्०' इत्याकार]

ईषुः इच्छन्तु ३ १ २ **ईषे**=इच्छामि ५ ४९.१ **ईष्टे**=ईषण करोति ५ ८७ ३. [ईष गतिहिंसादर्शनेषु

सुन् प्रत्ययः। तयो समास]

ईयतुः प्राप्नुत ३२९ गच्छत. ३३ ६७ **ईयते**=गमयति १३० १९ गच्छति ११४१ ८ गम्यते २१ ५५ प्राप्नोति १४८ ५. **ईयथुः**=प्राप्नुयातम्, प्र०—अत्र पुरुषव्यत्यय ५ ७३ ४ **ईयन्ते**=प्राप्यन्ते ५ ५५ १ **ईयसे**=प्राप्नोषि गच्छसि वा ५ ३ ८ विज्ञायसे विज्ञायते वा ४ ३२ व्याप्नोषि ६ १५ ९ **ईयुः**=प्राप्नुयुर्गच्छेयुर्वा ७ १८ १० यन्ति ३४ ४५ प्राप्नुवन्ति ११६४ ८ [इण् गतौ (अदा०) धातोर्लिटि प्रथमद्विवचनम् ईयसे, ईयते=ईङ् गतौ (दिवा०) धातोर्लट्]

ईयमानम् गच्छन्तम् (रथम्) ५.३०.१. **ईयमानाः**=प्राप्नुवन्त (परमाणव) ५ ४७ २ [ईङ् गतौ (दिवा०) धातो शानच्]

ईयिवांसम् प्राप्नुवन्तम् (सिह=व्याघ्रम्) ३ ९ ४ [इण् गतौ (अदा०) धातो क्वसु प्रत्यय। 'उपेयिवानाश्वाननूचानश्च' अ० ३ २ १०९ सूत्रेण द्वित्वेऽभ्यासदीर्घत्वम् इडागमश्च निपात्यते। 'इणो यण्' इति यणादेश]

ईयुषीणाम् अतीतानाम् (उषसाम्) ११२४ २ गच्छन्तीनाम् (सूर्यकान्तीनाम्) १११३ १५ [इण् गतौ (अदा०) धातोर्लिट क्वसु। 'उपेयिवान्०' इति निपातनाद् अभ्यासदीर्घत्वम् इडागमश्च। 'वसो सम्प्रसारणम्' इति सम्प्रसारणम्]

ईरताम् प्राप्नुवन्तु ४ ८ ७ प्राप्नुवन्ति २९ १२ उत्कृष्टतया जायन्ते ५ २५ ७ गच्छन्ति कम्पन्ते वा ५ ६३ ४ प्रेरयन्तु ११२३ ६ **ईरते**=प्राप्नुयु ११८७ ५ प्राप्नुवन्ति ७ ५६ १४ गच्छन्ति प्राप्नुवन्ति १ ५२ १ कम्पयन्ति गच्छन्ति वा ५ ८३ ३ **ईरय**=गमय १ ४८ २ प्रेरयत ५ ४२ ३ नियोजय ८ १९. प्रेरय १४ ८ **ईरयथ**=प्रेरयथ ५ ५५ ५ **ईरयध्वम्**=प्रापयत ४ ३४ २ **ईरयन्ति**=प्रेरणा करते है ५ २० २ **ईरयस्व**=प्रापय ७ ५ ८ प्रेरणा कर स० वि० १७०, अथर्व० १४ २ २८ **ईरयामि**=प्रेरयामि २ ३३ ८ [ईर गतौ कम्पने च (अदा०) धातोर्लोट् लट् च। 'बहुल छन्दसी' ति शपो लुङ् न। अन्यत्र ईर क्षेपे (चुरा० पर०) धातो रूपाणि]

ईरयध्यै प्रेरितुम् ४ २ १ [ईर क्षेपे (चुरा०) धातोस्तुमर्थे अध्यै प्रत्यय]

ईरयन्ती सद्य प्रेरयन्ती (उषा) १११३ १२ [ईर क्षेपे (चुरा०) धातो शत्रन्तान् ङीप्]

ईरिरे प्रेरयन्ति ३ ११ ६ प्राप्नुवन्ति ३ २९ १५. [ईर गतौ कम्पने च (अदा०) धातोर्लिट्। झस्येरेच्]

ईर्ध्वम् कम्पध्वम् १११३ १६ [ईर गतौ कम्पने च (अदा०) धातोर्लोट्]

ईर्म प्राप्तव्य ज्ञातव्य वा (वपु=सुरूपम्) ५ ७३ ३ प्रेरक (सज्जन) ४ २७ २ [ईर गतौ कम्पने च (अदा०) धातोर्बाहुलकादौणादिको मक्। ईर्म इह, ऋणे, अस्मिन् लोक इति वा। ईर्म इति बाहुनाम समीरिततरो भवति नि० ५ २५]

ईर्मान्तासः कम्पनान्ता (अश्वा=अग्न्यादय) ११६३ १० ईर्म प्रेरित स्थितिर्येषान्ते, भा०—प्रेरणामनुगन्तार (अश्वा) २९ २१ [ईर क्षेपे (चुरा०) धातोर्बाहुलकादौणादिको मन् प्रत्यय। ईर्म=क्षेपोऽन्तो येषामिति समास। ईर्मान्तास=समीरितान्ता नि० ४ १३ ईर्मान्तास पदनाम निघ० ४ १]

ईर्यतायै कम्पनाय ३० ८ [ईर गतौ कम्पने च (अदा०) धातोर्बाहुलकादौणादिको यक्। ईर्य शब्दात् भावे तल्, ततष्टापि चतुर्थ्यां रूपम्]

ईवत् गतिरक्षणवत् (नम=अन्नम्) ५ ४९ ५

ईवतः गच्छत (उद्यमिनो जनस्य) ७ ५६ १८ बहुगतिमत (द्यून्=प्रकाशान्) ४ ४३ ३ प्रशस्तगमनकर्त्तु (सेनापते) ४ १५ ५ सामीप्ये गच्छत (राजपुरुषस्य) ७ २३ १ **ईवते**=उपगताय (जनाय) ६ ७३ २ विद्याव्याप्ताय (ब्रह्मणे=वेदविज्जनाय) ४ ४ ६ [ई गतिप्रजनादिपु (अदा०) धातो शतरि छान्दस रूपम्]

ईशत ईष्टा समर्थो भवतु, अ०—उत्पद्यताम्, भा०—प्रबलो भवेत्, प्र०—अत्र लोडर्थे लङ् 'बहुल छन्दसि' इति शपो लुगभाव ११ समर्थयन, प्र०—अत्र लडर्थे लोडन्तर्गतो ण्यर्थश्च १ २३ ९ विघ्नानामीश्वरो भवेत् ६ ७१ ३ अ०—हन्तु समर्थो भवेत् ११ समर्थो भवतु १ ३६ १६ समर्थो भवेत्, प्र०—अत्र विकरणव्यत्ययेन श २ ४२ ३ [ईश ऐश्वर्ये (अदा०) धातोर्लोट्। 'बहुल छन्दसी' ति शपो लुङ् न]

ईशः करुणामय (ईश्वर) आर्याभि० १ ४१, १ ७ ९ ७ [ईश ऐश्वर्ये (अदा०) धातोरिगुपधलक्षण क प्रत्यय]

ईशा ईश्वरेण सकलैश्वर्यसम्पन्नेन सर्वशक्तिमता परमात्मना ४० १ [ईश ऐश्वर्ये (अदा०) धातो कर्त्तरि क्विप्]

ईशानम् ईष्टे कारणात् सकलस्य जगतस्तम्

उक्थवाहसा प्रशसितविद्याप्रापकौ (इन्द्राग्नी=विद्युद्विद्याविद्विद्वांसौ) ६ ५९ १० [उक्थोपपदे वह प्रापणे (भ्वा०) धातोर्णिजन्ताद् असुन् । उक्थ व्याख्यातम्]

उक्थशसिनः वेदप्रकाशकरणशीलान् (सज्जनान्) ६.४५ ६ [उक्थोपपदे शसु स्तुतौ (भ्वा०) धातोस्ताच्छील्ये णिनि]

उक्थशासः य उक्थाना प्रशसनीयाना मन्त्राणामर्थाञ्छासन्ति ते (नर=विद्वासोऽध्यापका) ७ १९ ६ ये योगाऽभ्यास विहाय उक्थानि वचनानि शसन्ति तेऽर्थात् शब्दार्थयो खण्डने रता (अब्रह्मविदो जना) १७ ३१ य उक्थानि वक्तु योग्यानि वचनानि शसन्ति (पितर=जनकादय) १९ ६६ प्रशसितशासना (पितर=जनका) ४ २ १६ केवल विषय भोगो के लिए ही अवैदिक कर्म करने मे लगे हुए (मनुष्य लोग) आर्याभि० २४४, १७ ३१. **उक्थशासा**=उक्था उक्ता शासा शासनानि ययोस्तौ (वाय्वग्नी) २ ३९ १ [उक्थोपपदे शासु अनुशिष्टौ (अदा०) धातोरण् प्रत्यय । उक्थ-शासपदयो समासो वा (शासु धातोर्घञ्) अथवा उक्थोपपदे शसु स्तुतौ (भ्वा०) धातो साधनीयम्]

उक्थशुष्मा: उक्थानि उक्तानि शुष्माणि वलानि याभिस्ता (गिर=वाच) ६ ३६.३ [उक्थ-शुष्मपदयो समास । शुष्मम्=वलनाम निघ० २ ९.]

उक्थाऽर्का उक्थानि प्रशसितानि वचनान्यर्काणि पूजनीयानि च ६ ३४ १ (उक्थ-अर्कपदयो समास । अर्क पदनाम निघ० ४ २ अर्चपूजायाम् (चु०) धातो क औणादिक]

उक्थाव्यम् प्रशसाऽर्हाणि स्तोत्राणि शस्त्रविशेषाणि वा तस्य तमिव सेनापतिम्, भा०—सुशिक्षित शस्त्राऽस्त्रपरमप्रवीणम् ७ २२

उक्थाशस्त्राणि उक्थानि च तानि शस्त्राणि च, प्र०—अत्र 'अन्येषामपि०' इति पूर्वपदस्य दीर्घ १९ २८ [उक्था-शस्त्रपदयो समास]

उक्थिनम् प्रशस्तोक्थवाक्यजन्यबोधनिष्पादितम्, भा०—विद्यासुशिक्षायुक्ता वाचम् (भक्ष्याद्यन्वित भोज्यमन्नरसादिकम्) २० २९ उक्थानि वक्तु योग्यानि प्रशस्तानि वचनानि यस्य तम्, भा०—धर्मसुशिक्षाप्रकाशकम् (इन्द्र—वीरम्) २८ ३३ बहून्युक्थानि वक्तु योग्यानि वेदस्तोत्राणि विद्यन्ते यस्य तम् (आप्त विद्वासम्) ३ ५२.१ **उक्थिनः**=गुणप्रशसका (राजप्रजास्थसज्जना.) ३ १२ ५ [वच परिभाषणे (अदा०) धातोस्थक् प्रत्यय । ततो मत्वर्थे इनि प्रत्यय]

उक्थेऽउक्थे वक्तु योग्ये योग्ये व्यवहारे १२.२७ धर्म्यं उपदेष्टव्ये व्यवहारे व्यवहारे ७ २६ २ [उक्थशब्दस्य वीप्साया द्विर्वचनम्]

उक्थेभिः स्तोत्रै, प्र०—अत्र 'बहुल छन्दसि' इति भिस स्थान ऐसभाव १ २ २. प्रशसकै (वचनै.) ५ ४५ ४ सुष्ठूपदेशै २ ११.१६ वेदस्तोत्रैरधीतवेदाप्तोपदिष्टवचनैर्व १ ४७ १० प्रशसनीयै. स्तुतिसाधकैर्वेदविभागैर्मन्त्रै. ३३.७६ [उक्थम्=वच परिभाषणे (अदा०) धातोस्थक् प्रत्यय]

उक्थ्यम् उक्थेषु प्रशसनीयेषु भवम् (सुप्रवाचन=अध्यापनमुपदेशनम्) १ १०५.१२ उक्थेषु वक्तु योग्येषु भवम् (अशम्) २.१३ १ उच्यते प्रशस्यते यत्तस्मै हितम् (वाजम्) १ ४८.१२ प्रकृष्ट विद्यावच १ १०५.१३ उक्थेषु प्रशसनीयेषु साधुम् (मन्त्रम्) ३४ ५७. प्रशसितम् (वच) ५ ३८ २ प्रशसितु योग्यम् (अग्नि=विद्युदादिरूप वह्निम्) ३.२९ २ प्रशसनीय कर्म ४ ३६ ४. वक्तु श्रोतु योग्यम् (तोकम्) १ ६४ १४ वक्तु श्रोतु योग्येषु ऋग्वेदादिषु भवम् (मन्त्रम्) १ ४० ५ **उक्थ्यः**=प्रशसितो योग्यो विद्वान् ३ १० ६ यानि विद्यासिद्ध्यर्थं वक्तु वाचयितु वाऽर्हाणि तत्र साधु (इन्द्र=अग्निर्विद्युत्सूर्यो वा, वरुण=जल वायुश्चन्द्रो वा) १ १७ ५ **उक्थ्यैः**=उचन्ति सर्वा विद्या येषु तै (व्यवहारै) ३ ५.२. [उक्थम्=वच परिभाषणे (अदा०) धातोरौणादिकस्थक् । तत 'तत्र साधु' 'तत्र भवे' वार्थे यत् । उक्थ्यम् प्रशस्यनाम निघ० ३.८ वक्तव्यप्रशसनम् नि० ११ ३१ अन्न वा उक्थ्यम् गो० पू० ४ २० पशव उक्थ्यानि कौ० २१ ५. यज्ञिय वै कर्मोक्थ्य वच ऐ० १ २९ उक्थ्या वाजिन गो० उ० १ २२.]

उक्षण वलप्रदान् (वीरान्) १.१३५ ९ सेचकान् (विदुषो जनान्) ५ ५२ ३ **उक्षणः**=सेचका (सज्जना.) ६ १६ ४७ सुखसेचका (देवा=विद्वज्जना) ३ ७ ७ सेचनकर्त्तार (सत्वान=प्राणिन) १ ६४ २ सेचनसमर्थान् (वीरजनान्) १.१३५ ९ मधुरैरुपदेशै सेचमाना. (वाच) ५ २७ ५ जलस्य सुखस्य वा सेक्तारो महान्त (अग्निपवनमेघादय) प्र०—उक्षा इति महन्नाम निघ० ३ ३, १ १०५.१० सेक्तार (वृषभा) २० ७८ वृषभान् १ १६८ २ [उक्ष सेचने (भ्वा०) धातो 'श्वन्नुक्षन्पूषन्०' उ० १ १५९ सूत्रेण कनिन् प्रत्यय । उक्षण=उक्षतेर्वृद्धिकर्मण, उक्षन्त्युदकेनेति वा । उक्षण एतान् माध्य-

(भ्वा०) धातोर्लिट् सामान्ये। व्यत्ययेन परस्मैपदम्। धातूनामनेकार्थत्वाद् इच्छार्थेऽपि। 'ईष्टे' प्रयोग ईश ऐश्वर्ये (अदा०) धातोरपि सिध्यति]

ईहे ऐश्वर्ययुक्त करोति ५ १२ ६ स्तौति १ १८० २ ऐश्वर्यहेतु विदधाति १ ८४.१८. [ईह चेष्टायाम् (भ्वा०) धातोर्लेटि रूपम्]

उ वितर्के १७ ६७ समुच्चये १२ ५८ उत्तमे २१ ५ निश्चयार्थे ३३ ८१ पादपूरणार्थे १ ६१ १४ प्रसिद्धार्थे १७ २० आकाङ्क्षायाम् १ ६१ १३ अद्भुते ७ २० २ आश्चर्ये ३ ५७ ४ अच्छे प्रकार स० प्र० ११०, १ १७६ १ निश्चय ही आर्याभि० २४३, ३४१ एव ३२४ [उ विनिग्रहार्थे, पदपूरण नि० १ ५]

उक्तः कथित (होता=होतृजन) ४ ४१ १. **उक्ताः**=निरूपिता (भा०—पश्वादिपालनमार्गा) २४ १७ कथिता (सचरा.=पशव) २४ १५ ब्रूञ् व्यक्तायां वाचि (अदा०) धातो क्त। 'ब्रुवो वचिरि' ति वच्यादेशे 'वचिस्वपि०' इति सम्प्रसारणम् वच परिभाषणे (अदा०) धातोर्वा क्त]

उक्तिम् स्तुति को स० प्र० २४८, ४० १६ [ब्रूञ् व्यक्तायां वाचि (अदा०) धातो क्तिन् स्त्रियाम्। धातोश्च वच्यादेश]

उक्थपत्रः उक्थानि वक्तु योग्यानि वेदस्तोत्राणि पत्राणि विद्यागमकानि यस्य स (घर्म=यज्ञ) १७ ५५ [उक्थ-पत्रपदयो समास। उक्थम्=वच परिभाषणे (अदा०) धातो 'पातृतुदिवचि०' उ० २ ७ सूत्रेण थक्। पत्रम्=पत्लृ गतौ+ष्ट्रन् करणे]

उक्थभृतम् य ऋग्वेद विभर्त्ति (आप्त विद्वासम्) ७ ३३ १४ [उक्थ व्याख्यानम्। तदुपपदे डुभृञ् धारणपोषणयो (जु०) धातो क्विप्। तुगागम.]

उक्थम् शास्त्रप्रवचनम् १ ८६ ४ वक्तु योग्य स्तोत्रम् प्र०—अत्र 'पातृतुदि०' उ० २.७ अनेन वचधातोस्थक् प्रत्यय. १ १० ५ वक्तु योग्य शास्त्रम् ४ १६ २ वक्तुमर्हम् (आज्य=घृतम्) १५ १० प्रशसनीय वचन कर्म वा १ १०० १७. वाच्यम् (विदवचनम्) १५ १२ उच्यन्त ईश्वरगुणा येन तादृक्समूहम् १ ८ १०. वेदविद्या १.१०६ १४ उपदेष्टु योग्यम् (कर्म वचन वा) १५ ११ प्रशसितम् (वच) ५ ३६ ५ **उक्थस्य**=प्रशसितस्य कर्मण ६ ४४ ६ **उक्थानाम्**=स्तोत्र-विशेषाणाम् १६ २५ **उक्थानि**=वक्तु योग्यानि वचनानि २ ८ ५ प्रशसनीयानि कर्माणि ७ ५६ २३ **उक्थाय**=प्रशमिताय (जनुषे=जन्मने) ५ ४५ ३ **उक्थे**=श्रोतु वक्तुमर्हे वा (वचने) ६ २३ १ वक्तव्ये ४.२० १० **उक्थेन**=प्रशसनीयेन (वाहसा=प्रापणेन) २६ ८ **उक्थेभ्यः**=प्रशसनीयेभ्यो वेदोक्तेभ्य कर्मभ्य ७.२२ **उक्थेषु**=प्रशसितेषु धर्म्येषु कर्मसु ५ ६ ६ वक्तु श्रोतुमर्हेषु वेदविभागेषु १५ ४३ प्रशसनीयेषु व्यवहारेषु ३ ३३ ८ **उक्थैः**=वेदविद्याजन्यैरुपदेशै ५.४५ १ तद्गुणप्रशसकैर्वचोभि ७ ३४ १६ परिभाषितोपदेशै १ ७१ २ वक्तुमर्हैर्वेदितव्यैर्वेदवचनै ६ १३ ४ कीर्त्तनीयैर्वचनै ६ ११० वेदस्थै स्तोत्रै ६ ६६ ३ प्रशसितैर्गुणै ६ १६ १५ **उक्था**=उक्थानि परिभाषितुमर्हाणि वेदस्थानि सर्वाणि स्तोत्राणि अ०—स्तुतिसाधकानि, प्र०—'पातृतुदिवचि०' उ० २ ७ अनेन वचधातो स्थक् प्रत्ययस्तेनोक्थस्य सिद्धि 'शेश्छन्दसि बहुलम्' इति शेर्लुक् १ ५८ प्रशस्तानि विज्ञानानि १ १७३ ६ प्रशसनीयानि वस्तूनि ४ २२ १ प्रशसनीये (रजसी=द्यावापृथिव्यौ) ४ ४२ ६ वक्तु योग्यानि वेदस्तोत्राणि वचनानि वा १ ५४ ७ वक्तु श्रोतुमर्हाणि (प्रवचनानि) ६ ६७ १० प्रशसनै ४ ३३ १० प्रशसनीयानि वचनानि ७.१६ ६ उचितानि (सख्या=कर्माणि भावा वा) ४ ३ ४ उक्तानि वक्तव्यानि ६ २६ ४ [वच परिभाषणे (अदा०) धातो 'पातृतुदिवचि०' उ० २ ७ सूत्रेण थक् प्रत्यय। उक्थम् प्राण उ ऽएवोक्तस्यान्नमेव थ तदुक्थम् श० १० ४ १ २३. एष (अग्नि) उ ऽएवोक्तस्यैतदन्न थ तदुक्थम् श० १० ४ १ ४ अग्निर्वा ऽउक्तस्याहुतय एव थम् श० १० ६.२ ८ आदित्यो वा उक्। तस्य चन्द्रमा एव थम् श० १० ६ २ ६ प्राणो वा ऽउक्तस्यान्नमेव थम् श० १० ६ २ १० (देवा. सोम) उक्थैरुदस्थापयन्। तदुक्थानाम् उक्थत्वम् तै० २ २ ८ ७ (वागिति) एतदेषा (नाम्ना) उक्थमतो हि सर्वाणि नामान्युत्तिष्ठन्ति श० १४ ४ ४ १ वागुक्थम् ष० १ ५ अन्नमुक्थानि कौ० ११ ८, १७ ७ प्रजा वा उक्थानि तै० १ ८ ७ २ पशव उक्थानि ऐ० ४ १, १२ गो० उ० ६ ७ तै० १ ८ ७ २ पशवो वा उक्थानि कौ० २८ १०, २६ ८ ष० ३ ११ तै० १ २ २ २ ता० ४ ५ १८ विडुक्थानि ता० १८ ८ ६ ऐन्द्राग्नानि ह्युक्थानि श० ४.२ ५ १४ (देवा) अन्तरिक्षमुक्थेन (अभ्यजयन्) ता० ६ ३ ६ अपच्छिदिव वा एतद् यज्ञकाण्ड यदुक्थानि ता० ११ ११ २ यदुक्थानि भवन्त्यनुगन्तत्या एव ता० १८ ८ ६ (तमेतम् पुरुषम्) उक्थमिति बह्वृचा (उपासते) एष हीदꣳ सर्वमुत्थापयति श० १० ५ २ २०.]

शत्रूणा हनने कठिनस्वभाव (इन्द्र=सेनापते) ७ २५ १ बाणादियुक्त (सैनिक) ३ ४६ २ **उग्रम्**=उत्कृष्टम् (शर्म=गृहम्) २६ १६ उत्कृष्टस्वभावम् (इन्द्र=विद्वासम्) ३ ४३ ८. अत्युत्कृष्टम् (गाम्) ३४ ३५ उग्र-गुणकर्मस्वभावम् (पद=विज्ञानम्) ५ ३० २ क्रूर भयङ्करम् (वच=वचनम्) ५ ८ शत्रुभि सोढुम-शक्यम् (शर्द्ध=बल सैन्यम्) १७ ४१ तीक्ष्णस्वभावम् (महादेव=परमात्मानम्) ३९ ८ तीव्र गुणम् ३९ ९. कठिन दृढम् (शव=बलम्) ३ ३६ ४ सर्वै सह समवेतम् (इन्द्र=विद्युतम्) ३ ४६ ४ दुष्टेषु कठिनस्वभाव श्रेष्ठेषु सरलम् (इन्द्र=राजानम्) ३ ४८ ५ दुष्टै शत्रुभि-रसहम् (अश्व=विद्युतम्) १ ११८ ६ दुष्टाना दु खप्रदम् (इन्द्र=राजानम्) ३ ४६ ५ दुष्टाना दमयितारम् (राजानम्) ३ ४७ ५ द्वेषविनाशकम् (शुन=परस्परमेल-जन्य सुखम्) ३ ५० ५ शत्रुबलविदारणक्षमम् (सेनापतिम्) १ १०२ १० दु सहम् (वच=परिभाषणम्) ५ ८. दुर्जयम् (धनम्) ५ ३१ ८ प्रचण्डपराक्रमम् '(इन्द्र=सम्राजम्) ७ ३६ तेजोमयम् (भग=ऐश्वर्यम्) ७ ४१ २ तेजस्वभावम् (इन्द्र=राजाद्यध्यक्षम्) ३ ३२.१७ तेजस्वी (ईश्वर) को स० वि० १५६, ७ ४१ २ **उग्रस्य**=उत्कृष्टस्य (बलस्य) ५ २० २ **उग्रः**=सर्वोत्कृष्ट (इन्द्र=परमैश्वर्यप्रद ईश्वर), 'ऋजेन्द्राग्र०' उ० २ २९ इति निपातनम् १ ७ ४ तीक्ष्णस्वभाव (भा०—शूर (जन) ३३ ८० तीव्र प्रभाव ४ २३ ७ तीव्रकारी (इन्द्र=सभाध्यक्ष) १ ५५ ३ तीव्रभाग्योदय (इन्द्र=ऐश्वर्यवान् विद्वान्) ३ ३६ ५ अतिकठिनदण्डप्रद (इन्द्र=सेनाद्यधि-पति) १ १०० १२ क्रूरस्वभाव (राजपुरुष) २.३३ ९ दुष्टाना वधे तीव्रतेजा (इन्द्र=सेनापति) १७ ३७ दुष्टाना हन्ता (सभाध्यक्ष) १ ५१ ११ दुष्टानामुपरि क्रोधकृत् (इन्द्र=राजा)२० ४८ दुष्टदलने तेजस्वी (राजा) ८ ४६ हिंसने तीव्र (इन्द्र=मन्त्री) १७ २४ भयङ्कर (ईश्वर) आर्याभि० १ ३४ [उच्यति समवैतीति विग्रहे उच समवाये (दिवा०) धातो 'ऋज्रेन्द्राग्रवज्र०' इत्यादिना रन् प्रत्य-यान्तो निपातित । वायुर्वाऽउग्र श० ६ १ ३ १३ एता-न्यष्टौ (रुद्र, शर्व, पशुपति, उग्र, अशनि, भव, महादेव, ईशान) अग्निरूपाणि । कुमारो नवम श० ६ १ ३ १८]

उग्र इव तेजस्वीव (राजादिजन इव) ६ १६ ३९ [उग्र-इवपदयो समास]

उग्रधन्वा उग्र धनुर्यस्य (इन्द्र=सर्वसेनाधिपति) १७ ३५ [उग्र-धन्वन्पदयोर्बहुव्रीहि । उग्र व्याख्यातम् । धन्वन्—धवि गतौ (भ्वा०) धातो 'कनिन् युवृषितक्षि०' उ० १ १५६ सूत्रेण कनिन्]

उग्रमुग्रम् तेजस्विन तेजस्विनम् (दुर्जन दुर्जनम्) ६ ४७ १६ [उग्र व्याख्यातम् । तस्य वीप्साया द्विर्वचनम्]

उग्रा तीव्रतेजस्का (द्यौ) ३२.६. **उग्राभिः**=अत्यन्तोत्कृष्टाभि [ऊतिभि=रक्षाप्राप्तिविज्ञानसुख-प्रवेशनै) १ ७ ४ **उग्राः**=कठिनगुणकर्मस्वभावा (पति-व्रता' स्त्रिय) ७ ५६ ६. (उग्र व्याख्यातम् । तस्य स्त्रिया टापि रूपम्]

उग्रा उग्रबली तेजस्विस्वभावौ (सभासेनाधीशौ) प्र०—अत्र विभक्तेर्लुक्, संहितायामिति दीर्घ. ३३ ६१. तीक्ष्णस्वभाव वाले (सूर्यादि और पृथिवी) स० वि० ६, ३२ ६ तीव्रौ (वाय्वग्नी) प्र०—अत्र 'सुपा सुलुग्०' इत्याकार १ २१ ४ (उग्र व्याख्यातम्]

उग्राः दृढा, भा०—बलिष्ठा (बाहव=भुजाः) १७.४६. तीव्रसवेगादिगुणसहिता (मरुत=वायव') १ २३.१० [उग्र व्याख्यातम् । तत प्रथमाबहुवचनम्]

उग्रादेवम् उग्रान् तीव्रस्वभावान्, विजिगीषुम् (सभाध्यक्षम्) प्र०—अन्येषामपि०, इति पूर्वपदस्य दीर्घ १.३६ १८ [उग्र-देवपदयो समास । देव=दिवु क्रीडा-विजिगीषादिषु (दिवा०) धातो पचाद्यच् प्रत्यय]

उग्रेभिः तेजस्विभि. (विद्वज्जनै) १ १७१ ५ तीक्ष्ण-स्वभावै (शूरवीरै) १ १३३ ६ [उग्र व्याख्यातम् । 'बहुल छन्दसी' ति भिस ऐसादेशो न भवति]

उचथम् वक्तव्यम् (वचनम्) २.१९ ७ वक्तु योग्यम् (वचनम्) १ १८२ ८ **उचथस्य**=वक्तु योग्यस्य (दुर्जनस्य) ७ १८ ५ उचितस्य (जनस्य) ७ १८ ५ **उचथानि**=रुचिकराणि (सुखानि) ४ २४ ७ वेदवचनानि १ ७३ १० उचितानि वचनानि ४ २२० **उचथाय**=प्रवचनायाऽध्यापनाय १ ११० १ [वच परिभाषणे (अदा०) धातोर्बाहुलकादौणादिकोऽथ प्रत्यय । स च कित् । कित्वात्सम्प्रसारणम्]

उचथा वक्तुमर्हाणि (ब्रह्मा=धनानि) २ २० ५ [उचथ व्याख्यातम् । 'शेश्छन्दसि बहुलमिति' शेर्लुक्]

उच्चरण्यत् चरणमिवाऽऽचरेत्, प्र०—'वाच्छन्दसि' अ० १ ४ ९ इत्यत्राऽल्लोप ईत्त्वाऽभावश्च ८ २४ [उत्+चरणप्राति० आचारेऽर्थे क्यच् । छान्दसत्वादल्लोप]

उच्चरत् उत्कृष्टतया चरति सर्वं जानाति ३६ २४ उत्कृष्टतया सर्वत्र व्याप्तमस्ति प० वि० । प्रलय के ऊर्ध्व

मिकान् सस्त्यायान् नि० १२६ उक्षन् महन्नाम निघ० ३.३]

उक्षत सिञ्चत १८७२ **उक्षतम्**=सिञ्चतम् २१८ सिञ्चेताम् २१६ [उक्ष सेचने (भ्वा०) धातोर्लोट्]

उक्षन् सेवन्ते ४११० [उक्ष सेचने (भ्वा०) धातोर्लेट्। अत्र सेवनार्थे धातूनामनेकार्थत्वात्]

उक्षन्ति सिञ्चन्ति ११६६३ **उक्षन्ते**=सेवन्ते ५५६१ सिञ्चन्ति २३४३ [उक्ष सेचने (भ्वा०) धातोर्लट्]

उक्षन्तम् वीर्यसेचनसमर्थ (जवान) को आर्याभि० १५०, १.११४७ वीर्यसेक्तारम् (युवानम्) १६१५ विद्यावीर्यसेचनसमर्थम् (जनम्) प० वि०। [उक्ष सेचने (भ्वा०) धातोर्लट शतृप्रत्यय]

उक्षभिः महद्भि (जनै) ११३६१० [उक्षन् व्याख्यातम्। तस्य तृतीयाबहुवचने रूपम्। उक्षन् महन्नाम निघ० ३३]

उक्षमाणः सिञ्चमान (मेघ) ५४२१४ **उक्षमाणाः**=सेवमाना (नर) ५५८८ **उक्षमाणे**=सुखैं सिञ्चमाने (द्यावापृथिव्यौ) ४५६२ [उक्ष सेचने (भ्वा०) धातोर्लट शानच्। अथवा ताच्छील्ये चानश्। व्यत्ययेन आत्मनेपदम्]

उक्षयन्त सिञ्चन्ति ६१७४ [उक्ष सेचने (भ्वा०) धातो स्वार्थे णिजन्ताल् लङ्। आडभावश्छान्दस]

उक्षा वीर्यसेचक (वृषभ) १८२७ सूर्य ४५६१ वृष्ट्या सेचक (समुद्र) १७६० सेचनसमर्थ (गौ = जनो वृषभो वा) २१२० वर्षा के द्वारा भूगोल का सेचन और आकर्षण करने वाला (सूर्य) स० प्र० ३११ **उक्षाणम्**=वीर्यसेचनसमर्थम् (गा==युवाऽवस्थ वृषभम्) २८३२ **उक्षाणः**=वीर्यसेचनसमर्था (पशव) २४२३ [उक्ष सेचने (भ्वा०) धातो 'श्वन्नुक्षन्०' उ० ११५६ सूत्रेण कनिन्। उक्षतेर्वृद्धिकर्मण, उक्षन्त्युदकेनेति वा नि० १२६]

उक्षामि शोधयामि, आर्द्रीकरोमि, सिञ्चामि वा २१ [उक्ष सेचने (भ्वा०) धातोर्लट्]

उक्षितम् सिक्तम् (भा०—गर्भम्) १६१५. वीर्यसेचनस्थित गर्भम् १११४७ विद्यावीर्यसिक्त जनम् प० वि०। सेवकम् (इन्द्र=विद्युतम्) २१६१ गर्भ मे वीर्य के सेचन को, आर्याभि० १५०, ऋ० १८६७ **उक्षित**= ससिक्त (अग्नि.) ५८७ सेवित (शमादिशुभकर्माऽऽचारिजन) २२१३ सिक्त (विद्वज्जन) १३६१६ **उक्षिते**=सिञ्चिते (उपासानक्ता=रात्रिदिने) २३६ [उक्ष सेचने (भ्वा०) धातो क्त प्रत्यय। उक्षित = महन्नाम निघ० ३३]

उक्षितासः वृष्टिद्वारा सेक्तार (रुद्रास =वायव) १८५२ [उक्ष सेचने (भ्वा०) धातो क्त। तस्य प्रथमाबहुवचने जसोऽसुगागमे रूपम्]

उखच्छित् य उख गमन छिनत्ति स (राजपुरुष) ४१६६ (उखम्=उख गत्यर्थे (भ्वा०) धातो 'घञर्थे कविधानम्' इति क। तदुपपदे छिदिर् द्वैधीकरणे (रुधा०) धातो क्विप्]

उखा पाकस्थाली ३५३२२ ज्ञातुमर्हा (पृथिवी= स्त्री) १२६१ उखाम्=सूपादिसाधनी स्थालीम् ११५६ प्राप्तव्या कन्याम् ११.६४ **उखायाः**=पाकसाधिकाया (स्थाल्या.) ११६२१३ प्राप्ताया प्रजाया १२१६ **उखे!**=अन्नाऽऽधारा स्थालीव विद्याऽऽधारे, ज्ञानयुक्ते, विज्ञानमिच्छुके, जिज्ञासो वा (कन्ये) ११६१ [उख गत्यर्थे (भ्वा०) धातोरौणादिको ऽन् प्रत्यय। तत स्त्रिया टाप्। उखा एतद्वै देवा एतेन कर्मणैतयावृतमेमाल्लोकानुदखनन् यदुदखनस्तस्मादुत्खोत्खा ह वै तामुखेत्याचक्षते परोक्षम् श० ६.७१२३ आत्मैवोखा श० ६५३.४, ६६.२१५ शिर एतद् यज्ञस्य यदुखा श० ६५३८ उदरमुखा श० ७५१३८ योनिर्वाऽउखा श० ७५२२ इमे वै लोका उखा श० ६५२१७, ६७१२२, ७५१२७ प्राजापत्यमेतत् कर्म यदुखा श० ६२२.२३ पर्वतदग्नेर्यदुखा श० ६२२२४]

उख्यम् उखाया सस्कृत भक्ष्यमोदनादिकम्, प्र०—अत्र 'शूलोखाद्यत्' अ० ४२१६ अनेन 'सस्कृत भक्षा' इत्यर्थे यत् १७६५ **उख्यस्य**=उखाया स्थाल्या भवस्य पाकसमूहस्य १४१ [उखाप्राति० 'शूलोखाद् यत्' अ० ४२१६ सूत्रेण 'सस्कृत भक्षा' अर्थे यत्। अथवा उखा प्राति० भवार्थे यत्। अय वाऽग्निरुख्य श० ८२१४]

उगणाभ्यः विविधतर्कयुक्ता गणा यासु ताभ्य (स्त्रीभ्य) १६२४ [उ-गणपदयोर्बहुव्रीहि। उ=वितर्के इति व्याख्यातम्]

उगणाः उद्यताऽऽयुधसमूहा (सेना), प्र०—पृषोदरादित्वादभीष्टसिद्धि ११७७

उग्र! तेजस्विन् (राजन्) ४२१८ प्रतापिन् (इन्द्र= राजन्) ४२०७. तीक्ष्णस्वभाव (राजन्) ४२४४.

उत्कृष्टतया प्राप्नुवन्त, भा०—उन्नयन्त (भानव = किरणा) १५ २४ [उत्+ओहाङ् गतौ (जु०) धातो शानच्। धातूनामनेकार्थकत्वात् त्यागेऽपि। अथवा ओहाक् त्यागे (जु०) धातोश्छान्दस रूपम्]

उज्जिहीते उत्कृष्टतया विज्ञापयति १ १०५ १८ [उत्+ओहाङ् गतौ (जु०) धातोर्लट्। भृञादित्वादभ्यासस्येत्व श्लौ। हलादौ क्ङिति 'ई हल्यघो' अ० ६ ४ ११३ इतीत्वम्]

उज्जेषम् उत्कृष्टया नीत्या जयेयमुत्कर्षेयम् ९ ३१. [उत्+जि जये (भ्वा०) धातोर्लिङर्थे लेट्। 'सिब्बहुल लेटी' ति सिप्]

उज्जेषी उत्कृष्टतया जेतु शील (भा०—गृहस्थ') १७ ८५ [उत्+जि जये (भ्वा०) धातोस्ताच्छील्ये णिनि। 'सिबुत्सर्गश्छन्दसि' अ० ३ १ ३४ वा सूत्रेण सिप्]

उत् उत्कृष्टार्थे प्र०—उदित्येतयो प्रातिलोम्य प्राह निरु० १ ३, १ १० १ ऊर्ध्वे १ ५० १ आश्चर्ये ३० ३१ उत्कृष्टतया ९ ३१ उत्कृष्टरीत्या १५ ५४ अधिकार्थे ७ ३२ १२ उत्कर्षे १७ १० उद्गमने ७ ४२. अपि ४ २८. अत्यन्तार्थे ४ ४५ १ ऊर्ध्वे उत्कृष्टबोधे व्यवहारे च अथर्व० ११ ५ ५, ऋ० भू० २४९ एवार्थे ७ १६.११ क्रियायोगे ७ ४१ चार्थे ६ ७२ २ धात्वर्थे १ १२ [उत् (न्यवेति विनिग्रहार्थीयौ) इत्येतयो प्रातिलोम्यम् नि० १ ३. उदिति सोऽसावादित्य जै० उ० २ ९ ८]

उत अप्यर्थे १ २३ १९ यदि १६ १० उत्प्रेक्षायाम् १ १७ ६ चार्थे ५ १९ तथा आर्याभि० १ ५० विकल्पे, अव्ययार्थे। और आर्याभि० १ १५ [उत अपि नि० १.६. च नि० १० २७]

उतानि सततानि वस्त्राणि १९ ८९ [वेञ् तन्तुसन्ताने (भ्वा०) धातो क्त। यजादित्वात् किति सम्प्रसारणम्]

उतो अपि २५ २९ पक्षान्तरे १ २३ १५

उत्किरामि उत्कृष्टतया विक्षिपामि ५ २३ उत्कृष्टतया प्रक्षिपामि ५ २३ [उत्+कॄ विक्षेपे (तुदा०) धातोर्लट्। 'ॠत इद्धातोरि' तीत्वे रपरत्वे च रूपम्]

उत्कूलनिकूलेभ्यः ऊर्ध्वनीचतटेभ्य ३० १४

उत्क्रमणम् ऊर्ध्वं क्रमण तेज इव ७ २९ [उत्-क्रमणपदयो समास। क्रमणम्=क्रमुपादविक्षेपे (भ्वा०) धातोर्ल्युट्]

उत्क्रमः उद्ध्वं क्रम क्रमण यस्मात्तस्य (विद्वज्जन) १५ ९. [उत्+क्रमपदयो समास। क्रम=क्रमु पादविक्षेपे (भ्वा०) धातोर्घञ्। 'नोदात्तोपदेशस्य०' अ० ७ ३.३४ इति वृद्धिर्न भवति]

उत्क्रान्तिः उत्क्राम्यन्त्युत्तरन्त्युल्लङ्घयन्ति समान् विषमान् देशान् यया गत्या तद्विद्यागात्री (विदुषी स्त्री) १५ १ [उत्+क्रमु पादविक्षेपे (भ्वा०) धातो क्तिन्। 'अनुनासिकस्य क्विझलो क्ङिति' अ० ६.४ १५. सूत्रेण उपधाया दीर्घ]

उत्तभान ऊर्ध्वं स्तभान १७ ७२ [उत्+स्तम्भु (सौत्रो धातु) धातोर्लोट्। 'स्तम्भुस्तुम्भु०' अ० ३.१ ८२ इति श्ना। 'हल श्न शानज्झौ' इति श्न शानजादेश। 'उद स्थास्तम्भो पूर्वस्य' इति पूर्वसवर्ण]

उत्तभिता धारिताऽस्ति ऋ० भू० १४३ धारण किया है स० प्र० ३११ [उत्+स्तम्भु स्तम्भार्थे सौत्रो धातु। ततस्तृच् कर्त्तरि। पूर्वसवर्णादेशश्च]

उत्तमम् सर्वोत्कृष्टम् (सूर्यम्=ईश्वरम्) ३५ १४ श्रेयासम् (रस=वीर्य) ९ ३ प्रशस्तम् (दक्ष=बलम्) १ १५६ ४ अतिशयेन श्रेष्ठम् (पुनम्) ५ २५ ५ उत्कृष्टगुणकर्मस्वभावम् (सूर्यम्) १ ५० १०. विजयाऽऽख्यम् (नाक=सर्वसुखप्रद विजयम्), सर्वथोत्कृष्टम् (मोक्षपदम्), प्रशस्तम् (अविद्यमानदुख भोगम्), सर्वश्रेष्ठम् (सर्वदु ख प्रणाशकमानन्दम्) ९ १० सर्वोत्कृष्टम् (ईश्वरम्) २० २१ अतिश्रेष्ठम् (श्रव=अन्नादिक श्रवण वा) ४ ३१.१५. भा०—अत्युत्तमम् (नाकम्=सुखम्) १८ ५१ **उत्तमः**= श्रेष्ठ (भौतिकाग्नि) ३ ५ १० **उत्तमानि**=श्रेष्ठानि (द्युम्नानि=धनानि यशासि वा) ३३ १२ श्रेष्ठनमानि (श्रवासि=श्रवणान्यन्नानि वा) १ ९१ १८ **उत्तमाम्**= अतिश्रेष्ठाम् (श्रियम्=शोभा लक्ष्मी च) ३२ १६ **उत्तमेन**=प्रशस्तेन (पविना=वाचा) ६ ३० [उत् शब्दाद् अतिशायने तमप्]

उत्तमेभिः श्रेष्ठै (कर्मभि) ६ ६० ३ [उत्तम व्याख्यातम्। ततो भिस्। 'बहुल छन्दसीति' ऐसादेशो न भवति]

उत्तम्भनम् उत्कृष्ट प्रतिबन्धनम् प्र०—अत्र 'उद स्थास्तम्भो पूर्वस्य' अ० ८ ४ ६१ अनेन सस्य पूर्वसवर्णादेश ४ ३६ [उत्+स्तम्भु स्तम्भार्थे सौत्रो धातु। ततो ल्युट्। 'उद स्थास्तम्भो०' इति पूर्वसवर्णादेश]

उत्तरणाय अर्वाचीनतटात्परतट प्राप्नुवते प्रापयते वा (जनाय) १९ ४२ [उत्+तॄ प्लवनसन्तरणयो (भ्वा०)

रहता है आर्याभि० २ ३७, ३६ २४ [उत्+चर गतौ (भ्वा०) धातोर्लेट्]

उच्चरन्तम् ऊर्ध्वं प्राप्नुवन्तम् (सूर्यम्) ६ ५२ ५ ऊर्ध्वं विहरन्तम् (सूर्यमण्डलम्) ४.२५.४ [उत्+चर गतौ (भ्वा०) धातो शतृ]

उच्चा ऊर्ध्वं स्थितानि (धनानि) २ ३० ५ उच्चानि उत्कृष्टानि (ब्रह्मचर्य-विद्या-बल-शील-पुरुषार्थां) २.२ १० उच्चादुत्कृष्टकर्मसेवमानाद्, प्र०—अत्र 'सुपा, सुलुग्०' इति पञ्चम्येकवचनस्याकारादेश १ ११६ २२ उच्चे ऊर्ध्वस्थिते (दिवि=आकाशे) २ ४०.४ उच्चम् (शर्म=गृहम्) २६ १६ उच्चानि वस्तूनि १ १२३ २ उच्चानि सुखानि कर्माणि वा १ ३३ ७ [उच्चा=उच्चैः. नि० ६.३६ उच्चै =उच्चितं भवति नि० ४ २४]

उच्चाबुध्नम् उच्चा ऊर्ध्वं बुध्नमन्तरिक्ष यस्मिँस्तत् (विमानादियानस्थमुदकाधार कुण्डम्) १ ११६ ६ [उच्च-बुध्नपदयोर्बहुव्रीहि । बुध्नम्=अन्तरिक्षं बद्धा अस्मिन् धृता आप इति वा । इदमपीतरद् (हृदयम्) बुध्नमेतस्मा-देव बद्धा अस्मिन् धृता प्राणा इति नि० १० ४४]

उच्चैर्घोषाय उच्चैर्घोषो यस्य तस्मै (न्यायावीशाय) १६ १६ [उच्चैस्-घोषपदयो समास । उच्चै =उच्चित भवति नि० ४ २४]

उच्छ विशिष्टतया वासय १.११३.१७ विवासय ६ ६५ ६ विवस १ ४८ १ उच्छति विवासयति १ ६२ १४ [उच्छी विवासे (भ्वा०) धातोर्लोट्]

उच्छत् विवासयति १ ४८ ८ [उच्छी विवासे (भ्वा०) धातोर्लेट्]

उच्छति विवसति १ ४६ १. **उच्छन्तु**=सेवन्ताम् ७ ४१ ७ तमो विवासयन्तु १ १२४.६ विवसन्तु ३ ४ ४० **उच्छात्**=विवसेत् १ ११३ १३ प्राप्नुयात् १ १२४ ११. **उच्छान्**=विवासयेयु. ४ ५५ २ विवासयेत् ५ ३७ १ [उच्छी विवासे (भ्वा०) धातोर्लट्, लोट्, लेट् च]

उच्छन्ती विवासयन्ती दूरीकुर्वन्ती (उषा) १ ६२ ६ निवसन्ती (उषा =स्त्री) ५ ७६ १० अन्धकार निस्सार-यन्ती (उषा =प्रातर्वेला) १ १२४ १ **उच्छन्तीम्**=निवासयन्तीम् (उषसम्) १ ७१ १ **उच्छन्तीः**=सेवयन्ती (उषस =प्रातर्वेला) ४ ३६ १ सुवासयन्त्य (स्त्रिय) ४ ५१ ३ **उच्छन्त्याम्**=विविधवासदात्र्याम् (उषसि=प्रभातवेलायाम्) १ १८४ १ [उच्छी विवासे (भ्वा०) धातोः शत्रन्तान् ङीप्]

उच्छशाधि उत्कृष्टतया शिक्षय ७ १ २५ [उत्+शासु अनुशिष्टौ (अदा०) धातोर्लोट् । 'बहुल छन्दसी' ति शप श्लु]

उच्छंस उत्कृष्टतया स्तुहि ५ ५२ ८ [उत+शसु स्तुतौ (भ्वा०) धातोर्लोट्]

उच्छात् विवसनात् १ ४८ ३ [उच्छी विवासे (भ्वा०) धातोर्भावे घञ् । तत पञ्चमी]

उच्छिष उच्छिष्टं त्यज ६ ७५ १६ ऊर्ध्वं शिष्ट त्यजेत् १७ ४५

उच्छिष्टात् उत् सर्वस्मादूर्ध्वं शिष्टात् परमेश्वरात् तत्सामर्थ्यात् च ऋ० भू० १३६ [उत्+शासु अनुशिष्टौ (अदा०) धातो क्त । 'शास इदङ्हलोरि' तीत्युपधाया इत्वम् । 'शासि वसिघसीना चे' ति षत्वम्]

उच्छोचस्व उत्कृष्टतया विचारय ४ २ २० [उत्+शुच शोके (भ्वा०) धातोर्लोट् । व्यत्ययेनात्मनेपदम्]

उच्छ्रयतात् उच्छ्रित कुर्यात्, भा०—प्रजाराजपुरुषा-नुन्नयेत् २३ २७ [उत्+श्रिञ् सेवायाम् (भ्वा०) धातो-र्लोट् । मध्यमपुरुषैकवचने 'तुह्योस्तातङ्०' इति हे स्थाने तातङ्]

उच्छ्रयस्व उत्कृष्टतया सेवस्व ३ ८ २ उत्कृष्ट सेवस्व सेवते वा ४ १० [उत्+श्रिञ् सेवायाम् (भ्वा०) धातोर्लोट्]

उच्यते उपदिश्यते १ ११४ ६ उपदिश्येत, अ०—उच्येत, तद्गुणान् प्रकाशयेत्, प्र०—लेट्-प्रयोगोऽयम् १२ ८० कथ्यते १ ७७ १ कहा जाता है स० वि० २०८, अथर्व० ६ ६ १ २ **उच्यसे**=परिभाष्यसे १ ३१ १४. **उच्येते**=कथ्येते ३ १ १० [वच परिभाषणे (अदा०) धातो कर्मणि लट्]

उच्यसि वदसि ५ ८ १ ४ [वच परिभाषणे (अदा०) धातोर्लट् । विकरणव्यत्ययेन यक्]

उज्जजान उत्कृष्टतया जायते ३ १ १२ [उत्+जनी प्रादुर्भावे (दिवा०) धातोर्लिट्]

उज्जिघ्नते उत्कृष्टतया हिंसन्ति १.६४ ११ [उत्+हन हिंसागत्यो (अदा०) धातोर्लट् । 'बहुल छन्दसीति' शप श्लु । व्यत्ययेनात्मनेपदम्]

उज्जितम् जयत्यनया सा जितिरुत्कृष्टा चासौ जितिश्च तामुत्कृष्ट विजयम्, विद्यया सम्यगुत्कर्षम् २ १५ [उत्+जि जये (भ्वा०) धातो क्त]

उज्जिहानाः सम्यक् त्यजन्त (मानवा) ५.१.१

धातोर्वा रूपम्]

उत्तिरामसि उत्कृष्टतया तराम ३ ३७ १० [उत्+तॄ प्लवनसन्तरणयो (भ्वा०) धातोर्लट्। विकरणव्यत्ययेन शप्रत्यये रूपम्। 'इदन्तो मसि' रितीदन्तता मस]

उत्तिष्ठ ऊर्ध्वं गच्छ ५ ५६.५ उद्युक्तो भव ४ ४४ उत्तिष्ठतु उद्युक्तो भवतु ३४ ५६ प्रकाशितो भव ७ ३८ २ **उत्तिष्ठत**=उद्यता भवत, भा०—प्रयत्नेनोद्यमिनो भवत ३५.१० [उत्+ष्ठा गतिनिवृत्तौ (भ्वा०) धातोर्लोट्। शिति 'पाघ्राध्मास्था०' इत्यादिना तिष्ठादेश। 'उद स्थास्तम्भो०' इति पूर्वसवर्णादेश]

उत्तिष्ठन् उद्यमाय प्रवर्त्तमान (सत्पुरुष.) ७ ३३ १ सद्गुणकर्मस्वभावेषूर्ध्वं तिष्ठन् (इन्द्र =सभापती राजा) ८ ३६ [उत्+ष्ठा गतिनिवृत्तौ (भ्वा०) धातो शतृ। शिति तिष्ठादेश पूर्वसवर्णादेशश्च पूर्वपदवत्]

उत्थाय आलस्य विहाय ११ ६४ [उत्+ष्ठा गतिनिवृत्तौ (भ्वा०) धातो क्त्वा। समासे क्त्वो ल्यप्। पूर्वसवर्णादेशश्च पूर्वपदवत्]

उत्थिताय कृतोत्थानाय (जीवाय) २२ ८ [उत्+ष्ठा गतिनिवृत्तौ धातो क्त। 'द्यतिस्यतिमास्थाम्०' इति धातोरिकारादेश। पूर्वसवर्णादेशश्च]

उत्पतन् ऊर्ध्वमुड्डीयमान इव (पक्षी) २ ४३ ३ उत्तम व्यवहार मे पहुँचाता हुआ (परमेश्वर) आर्याभि० १ ५३ [उत्+पत्लृ गतौ (भ्वा०) धातो शतृ]

उत्पतन्ति ऊर्ध्वं गमयन्ति ऋ० भू० १९८. प्राप्नुवन्ति १ १६४ ४७ [उत्+पत्लृ गतौ (भ्वा०) धातोर्लट्। अन्तर्भावितण्यर्थश्च]

उत्पातयति ऊर्ध्वं जागरयति १ ४८ ५ [उत्+पत्लृ गतौ (भ्वा०) धातोर्णिजन्ताल्लट्]

उत्पारयन्ति उत्कृष्टतया पार गमयन्ति १ १८२.६ [उत्+पार कर्मसमाप्तौ (चुरा०) धातोर्लट्]

उत्पुनामि उत्कृष्टतया पवित्रीकरोमि, प्र०—उदित्येतयो प्रातिलोम्य प्राह, निरु० १ ३, १ ३१. [उत्+पूञ् पवने (क्रया०) धातोर्लट्। 'प्वादीना ह्रस्व' इति धातोर्ह्रस्वत्वम्]

उत्प्रपूर्याः पूर्ण कुर्य्या १५ ४३ [उत्+प्र+पॄ पालनपूरणयो (जु०) धातोर्लिङ्। 'बहुल छन्दसी' ति शपो लुक्]

उत्सक्थ्याः ऊर्ध्वं सक्थिनी यस्यास्तस्या प्रजाया २३ २१ [उत्+सक्थिपदयो समास। सक्थि—पञ्ज सङ्गे (भ्वा०) धातो 'असिसञ्जिभ्या क्थिन्' उ० ३ १५४. सूत्रेण क्थिन् प्रत्यय.। सक्थि-सचतेरासक्तोऽस्मिन् काय नि० ६ १८]

उत्सधिम् उत्सा कूपा धीयन्ते यस्मिन् भूमिभागे तम् १.८८ ४ [उत्सोपपदे डुधाञ् धारणपोषणयो (जु०) धातोरधिकरणे कारके 'कर्मण्यधिकरणे च' इति कि प्रत्यय। उत्स कूपनाम निघ० ३ २३]

उत्सम् उन्दन्ति येन त कूपम्, प्र०—उत्समिति कूपनाम, निघ० ३ २३, १७ ८७ कूपमिव जलेन क्लिन्नम् (दशयन्त्रम्=जगत्) ६.४४ २४ कूप इवाऽऽर्द्रीकरम् (अग्नि=विद्वद्राजानम्) १२ १६ कूपमिव पालक गवादिकम्, अ०—वीर्यसेचक वृषभम् १३ ४६ **उत्सः**=उन्दन्ति यस्मात् स कूप इव (पुरुष) १६ ८७ कूप इव तृप्तिकर (ईश्वर) १ १५४ ५. **उत्सौ**=कूपोदकमिवाऽऽर्द्रीभूतौ (स्त्रीपुरुषौ) १३ ३५ [उनत्ति क्लिद्यतीत्युत्स। उन्दी क्लेदने (रुधा०) धातो 'उन्दिगुधिकुपिभ्यश्च' उ० ३ ६८ सूत्रेण स प्रत्यय. किच्च। उत्स कूपनाम नि० ३ २३. उत्सरणाद्वोत्सदनाद्वोत्स्यन्दनाद्वोनत्तेर्वा नि० १०.६ आपो वा ऽउत्स श० ६.७ ४.४.]

उत्सवे हर्षनिमित्ते व्यवहारे १ १०२ १ कर्त्तव्याऽऽनन्दसमये ३३ २६ **उत्सवेषु**=आनन्दयुक्तेषु कर्मसु १ १०० ८ [उत्+षु प्रसवैश्वर्ययो (भ्वा०) धातो. 'ऋदोरप्' त्यप् प्रत्यय]

उत्सादतः त्यागमात्रात् २१ ४५ उत्सादन कुर्वत (प्रत्यङ्गात्) २१ ४३ गात्रोत्सादनात् २१ ४४ [उत्+षद्लृ विशरणगत्यवसादनेषु (भ्वा०) धातोर्णिजन्ताच्छतृ। अथवा=उत्सादप्राति० सार्वविभक्तिकस्तसि प्रत्यय]

उत्सादम् ऊर्ध्वं सीदन्ति यस्मिँस्तम् (तालु=आस्याऽवयवम्) २५ १ **उत्सादेभ्यः**=नाशेभ्य प्रवृत्तम् ३० १० [उत्+षद्लृ विशरणगत्यवसादनेषु (भ्वा०) धातोर्घञ् 'हलश्च' सूत्रेण]

उत्सिनाति उत्कृष्टतया बध्नाति १ १२५ २. [उत्+षिञ् बन्धने (क्रया०) धातोर्लट्]

उत्स्नाय स्नान कृत्वा २ १५ ५ [उत्+ष्णा शौचे (अदा०) धातो क्त्वा। समासे क्त्वो ल्यप्]

उदक् उत्तरत ३ ५३ ११ उत्तरस्या (दिश) ६ ३६ [दिशावाचिन उदक् शब्दादुत्तरस्यास्ताति प्रत्ययस्य 'अञ्चेर्लुक्' अ० ५ ३ ३० सूत्रेण लुक्]

उदकम् (जलम्) १ १६४.७ जल को स० वि०

धातोर्ल्युडन्ताच्चतुर्थी]

उत्तरतः उत्तरस्माद् देशात् ५ ११ उत्तरकाले २ ३ [उत्तरप्राति० पञ्चम्यन्तात् तसिल्]

उत्तरम् प्रलयाऽनन्तर कारणाऽऽख्यम् १ १५४ १ सर्वेभ्य सूक्ष्मत्वादुत्तरम् (ईश्वरम्) २० २१ सर्वेभ्य पदार्थेभ्य उत्तरस्मिन् वर्त्तमानम् (सूर्यम्=ईश्वरम्) ३८ २४ उत्पद्यमानम् (रूपम्) १ ६५ ८ अन्ताऽवयवम् (सधस्थ=कारणरूपम्) ५ १८. सर्वेषा लोकानामुत्तारकम् (सूर्य=जगदीश्वरम्) २७ १० सर्वोत्कृष्ट' प्रलयादूर्ध्व वर्त्तमान सप्लवकर्त्तारम् (ईश्वरम्) १ ५० १० उत्तरन्ति येन तत् (दक्ष=बलम्) ६ १६ १७ दु खेभ्य उत्तारक परत्र वर्त्तमानम्, जन्ममृत्युक्लेशादिभ्य पृथग्वर्त्तमानम् (सूर्यम्=ईश्वरम्) ३५ १४ अर्वाक्कालीनम् (सुम्न=सुखम्) २ २३ ८ उत्तर समुद्र अर्थात् गृहाश्रम को स० वि० ८०, अथर्व० ११ ५ ६ उत्तरा दिशाम् २५ ५ **उत्तरः**=उत्तरकालीन (राजविरोधिजन) ४ १८ ६ पश्चात् (पुरुष) ४ ३० १ उत्कृष्ट तारयति समादधाति स (परमेश्वर) २३ ५२ **उत्तरात्**=सर्वेभ्य उत्तरम् (स्व=सुखसम्पादकदिग्रूपम्) १३ ५७ पश्चात् ५ ६० ७ **उत्तरान्**=आगामिन (उपस) १ ११३ १३ **उत्तरे**=विजयाऽनन्तरसमये कुशला विद्यमानजीवना (वीरजना) १७ ४३ सिद्धान्तसिद्धा (स्तोमा=स्तुतिसमूहा) १ ७ ७ **उत्तरेण**=उपरिस्थेन (प्रकाशेन) २५ २ [उत् शब्दादतिशायने तरप्। उत्तर=उद्धततरो भवति नि० २ ११ उत्+तॄ प्लवनसन्तरणयो (भ्वा०) धातो 'ऋदोरप्' त्यप्। अय वै (भू) लोकोऽद्भ्य उत्तर श० १४ ३ १ २८ तेषु ह वा एष एतदध्याहितस्तपति स वा एप (सूर्य) उत्तरोऽस्मात्सर्वस्माद् भूताद् भविष्यत सर्वमेवेदमतिरोचते यदिद किं च ऐ० ४.१८]

उत्तरवेद्याः उत्तरा चाऽसौ वेदी च तस्या १६ १६ [उत्तरावेदीपदयो समास। उत्तर व्याख्यातम्। वेदी=विद सत्ताया (अदा०) धातो 'हृपिषिरुहिवृतिविदि०' उ० ४११९ सूत्रेण इन्। 'कृदिकारादक्तिन' इति डीप् स्त्रियाम्। नासिका ह वा ऽएषा यज्ञस्य यदुत्तरवेदि। अथ यदेनामुत्तर वेदेरुपकिरति तस्मादुत्तरवेदिर्नाम श० ३ ५ १ २ द्यौरुत्तरवेदि श० ७ ३ १ २७ योनिर्वा ऽउत्तरवेदि श० ७ ३ १ २८ योषा वा ऽउत्तरवेदि श० ३ ५ १ ३३ पशवो वा ऽउत्तरवेदि तै० १ ६ ४ ३ खल उत्तरवेदि ता० १६ १३ ७]

उत्तरस्मिन् उत्तमाऽऽसने १८ ६१ [उत्तरसर्वनाम्न सप्तमी। 'पूर्वादिभ्यो नवभ्यो वा' इति स्मिन्नादेश]

उत्तराम् उत्कृष्टतया तरन्ति यया सेनया ता प्राप्तविजयाम् (सेनाम्) १७ ५० कारणरूपाम् (दिवम्) १ ५० ११ [उत्+तॄ प्लवनसतरणयो: (भ्वा०) धातो 'ऋदोरप्' त्यप्। तत स्त्रिया टाप्]

उत्तरामुत्तराम् आगामिनीमागामिनीम् (समा=वेलाम्) ३८ २८. पुन पुनर्निर्मिताम् (सीता=भूमिकर्षिकाम्) ४ ५७ ७ [उत्तराम् पदस्य वीप्साया द्वित्वम्]

उत्तरासदः ये प्रश्नोत्तराणि समादधाना उत्तरस्या दिशि सीदन्ति (देवा=विद्वज्जना) ९ ३६ **उत्तरासद्भ्यः**=य उत्तरस्या दिशि सीदन्ति तेभ्य (देवेभ्य=विद्वज्जनेभ्य) ९ ३५ [उत्तरोपपदे षद्लृ विशरणगत्यवसादनेषु (भ्वा०) धातो क्विप् कर्त्तरि। सहिताया पूर्वपदस्य दीर्घ]

उत्तानयोः उपरिस्थयो ऊर्ध्व स्थापितयो पृथिवीसूर्ययो १ १६४ ३३ **उत्तानः**=ऊर्ध्व स्थित (सूर्य) ४ १३.५ ऊर्ध्व तनित इव स्थित (जीवात्मा) ४ १४ ५ [उत्+तनु विस्तारे (तना०) धातो 'तनोतेर्ण उपसख्यानम्' अ० ३ १ १४० वा इति ण प्रत्यय। उत्तान उत्ततान ऊर्ध्वतानो वा नि० ४ २१]

उत्तानहस्तः ऊर्ध्ववाहु (विद्वज्जन) ६ ६३.३ उत्तानौ उपरिस्थौ हस्तौ यस्य स (मर्त्त=मनुष्य) ६ १६ ४६ **उत्तानहस्ताः**=उत्तानावूर्ध्वगतावभयदातारौ हस्तौ येषान्ते (जना) १८ ७५ उत्थापितकरा (गिष्पा) ३ १४ ५ [उत्तान-हस्तपदयो समास। उत्तान व्याख्यातम्। हस्त=हसधातो 'हसिमृ०' उ० ३ ८६ सूत्रेण तन्प्रत्यय। हस्तो हन्ते प्राशुर्हनने नि० १ ७]

उत्तानाम् ऊर्ध्वगामिनीम् (रशना=रज्जुम्) ५ १ ३ **उत्तानायाम्**=उत्कृष्टतया विस्तृताया जगत्याम् १ १६४ १४ उत्कृष्टतया विस्तीर्णाया भूमावन्तरिक्षे वा ३४ १४ उत्तान इव शयानाया पृथिव्याम् २ १० ३ सरलतया शयानो मनुष्य इव वर्त्तमानाया भूमौ ३ २९ ३ **उत्तानायाः**=उत्कृष्टस्तान शुभलक्षणविस्तारो यया राज्ञ्यास्तस्या ११ ३९ [उत्+तनु विस्तारे (तना०) धातो 'तनोतेर्ण उपसख्यानम्' इति वा० सूत्रेण ण। स्त्रिया टाप्]

उत्तिर उत्कृष्टतया विस्तारय, अ०—उत्कृष्टेतया निवारय १ ११ ७ [उत्+तॄ प्लवनसन्तरणयो (भ्वा०) धातोर्लोट। व्यत्ययेन श। तिरते प्रवर्धयते (नि० ११ ६.)

अ० ८ २ १३ सूत्रेण उदधावर्थे सज्ञाया विषये मतावुदकस्योदन्भावो निपात्यते]

उदन्वतीः उदकयुक्ता (नद्य) ७ ५० ४ [उदकप्राति० मतुप् भूम्न्यर्थे । मतुवन्तान् ङीप् । पूर्वपदवत् उदन्भावश्च]

उदपप्तन् ऊर्ध्वं पतन्ति १ ६२ २. [उत्+पत्लृ गतौ (भ्वा०) धातोर्लुङ् । लृदित्त्वादङ् । 'पत पुम्' इत्यङि पुमागम]

उदप्रुतम् उदकयुक्तम् (पौर=मनुष्यम्) ५ ७४ ४
उदप्रुतः=उदकस्य गमयितार ४ ४५ ४. उदक प्राप्ता नद्य इव (धेनव =वाच) ७ ४२ १ [उदक-प्रुत्पदयो समास । उदकस्य उदादेशश्छान्दस । प्रुत्=प्रुङ् गती (भ्वा०) धातो क्विप् । 'ह्रस्वस्य पिति कृति तुग्' इति तुगागम]

उदभिः उदकै २ १३ ५ [उदकप्राति० भिस् । उदकस्योदादेश । 'बहुल छन्दसी' ति भिस ऐसादेशो न भवति]

उदमन्दिषुः उत्कृष्टतया हर्षयन्तु १ ८२ ६ [उत्+मदि स्तुतिमोदमदस्वप्नकान्तिगतिषु (भ्वा०) धातोर्लुङ् । व्यत्ययेन परस्मैपदम्]

उदमुच्ये छोड देता हूँ स० वि० १२२, अथर्व० १४ १ ५७ [उत्+मुच्लृ मोक्षणे (तुदा०) धातो कर्मणि लङ्]

उदमृक्षन्त उत्कृष्टतया मृषन्ति सहन्ते १ १२६ ४ [उत्+मृक्ष सघाते (भ्वा०) धातोर्लङ् । व्यत्ययेनात्मनेपदम् । धातूनामनेकार्थकत्वादत्र सहनेऽपि]

उदमेघे यस्योदकैर्मिह्यते सिच्यते जगत् तस्मिन् समुद्रे १ ११६ ३ [उदक-मेघपदयो समास । उदकस्योदादेशश्छान्दस । मेघ =मिह सेचने (भ्वा०) धातो पचाद्यच् । न्यङ्क्वादिषु पाठात् कुत्वम्]

उदयनात् उदयात् १ ४८ ७ [उत्+अय गतौ (भ्वा०) धातोर्ल्युट् । तत पञ्चमी]

उदयँस्त उद्यच्छति १ ५६ १ [उत्+यमु उपरमे (भ्वा०) धातोर्लुङ् । 'समुदाङ्भ्यो यमोऽग्रन्थे' अ० १ ३ ७५ सूत्रेणात्मनेपदम्]

उदरम् घर के भीतर का प्रसार विस्तार स० वि० १६७, अथर्व० ९ २ १५. **उदरस्य**=उदरस्य सकाशात् २५ ३३ **उदरे**=शरीराऽभ्यन्तरे ४ १२ **उदरेषु**=अन्तर्देशेषु १ २५ १५ [उत्+दॄ विदारणे (क्र्या०) धातो 'उदि दृणातेरलचौ पूर्वपदान्त्यलोपश्च' उ० ५ १६. सूत्रेणाल् अच् वा प्रत्यय । उद्दृणाति येनान्नमिति विग्रह । प्रजापतेर्वा एतदुदर यत्सद. । ता० ६.४.११ उदर वै सद कौ० ११ ८ उदरमेवास्य (यज्ञस्य) सद श० ३.५ ३ ५ उदर मध्यमा चिति श० ८.७ २ १८ उदरम् उखा श० ७ ५ १ १८]

उदर्के उत्कृष्टतयाऽऽप्तौ १ ११३ १८ [उत्+अर्च-पूजायाम् (भ्वा०) 'कृदाधाराचिकलिभ्य क' उ० ३ ४० सूत्रेण क प्रत्यय । रसो वा उदर्क कौ० ११ ५]

उदर्येण उदरे भवेन (व्यवहारेण) २५ ८. [उदर व्याख्यातम् । ततो भवार्थे यत्]

उदव उत्तम रीति मे कृपा करके रक्षण करो, आर्याभि० १ ४३ उत्कृष्टतया रक्ष ५ ५ ६ सर्वथा रक्षा कीजिए स० वि० १५६, ७ ४१ ३ उद्गमय प्रापय, प्राप्त करा आर्याभि० २ ११.३४.३६ **उदवत**=कामयध्वम् २ ३१ २ **उदवन्तु**=उत्कर्षेण रक्षन्तु, भा०—पालयन्तु १६ ४६ [उत्+अव रक्षणगतिकान्तिप्रीतितृप्त्यवगम-प्रवेशश्रवणादिषु (भ्वा०) धातोर्लोट्]

उदवता ऊर्ध्वगमनेन ६ १८ ६ [उत्+अव रक्षण-गत्यादिषु (भ्वा०) धातो शतृप्रत्यय]

उदवर्त्तय ऊर्ध्वं वर्त्तय १६ ७१ [उत्+वृतु वर्त्तने (भ्वा०) धातोर्णिचि लोट्]

उदवविश्रथाय उत्कृष्टतया विमोचय १२.१२ [उत्+अव+वि+श्रन्थ विमोचनप्रतिहर्षयो (क्र्या०) धातोर्घञ् । 'अवोदैधोद्मप्रश्रथ०' अ० ६ ४ २९ इति निपातनात् नलोपो वृद्ध्यभावश्च]

उदवाहासः य उदक वहन्ति तानिव (मरुत = वायव इव) ५ ८३ ३ [उदकोपपदे वह प्रापणे (भ्वा०) धातोरण् प्रत्ययः । प्रथमाबहुवचने जसोऽसुगागम.]

उदव्रजे उदकानि व्रजन्ति यस्मिँस्तस्मिन् (आकाशे) ६ ४७ २१ [उदक-व्रजपदयो समास । व्रज =व्रज गतौ (भ्वा०) धातोरधिकरणे 'गोचरसचरवहव्रज०' अ० ३ ३ ११९ सूत्रेण घप्रत्ययान्तो निपात्यते]

उदसृजत् अपिसृजति ६ ३२ २ **उदसृजः**=उत्सृजति त्यजति २.१३.१८ [उत्+सृज विसर्गे (तुदा०) धातोर्लङ्]

उदस्तभ्नात् उत्कृष्टतया स्तभ्नाति ६ ४७ ५. [उत्+स्तम्भु स्तम्भार्थे (सौत्रो धातु) धातोर्लङ् । 'स्तम्भु-स्तुम्भुस्कम्भु०' अ० ३ १ ८२ सूत्रेण श्नाविकरण]

उदस्तम्भीत् उत्तभ्नाति ३ ५ १० [उत्+स्तम्भु

२०६, अथर्व० ६ ६ ४ **उदकाय**=आर्द्रीकारकाय(जलाय) २२.२५. [उदकम् उदकनाम निघ० १ १२ उन्दी क्लेदने (रुधा०) धातो 'उदकञ्च' उ० २.३६ सूत्रेण निपातनात् क्वुन् प्रत्यय । उदक कस्मादुनत्तीति सत नि० २ २४]

उदक्ताः पुनरूर्ध्वं गच्छन्त्य (नाव =विमानानि) १० १६ [उत्+अञ्चु गतिपूजनयो (भ्वा०) धातो क्त]

उदगन्म प्राप्नुयाम प० वि०, २० २१ **उदगात्**= उत्कृष्टतया प्राप्तोऽस्ति प० वि०, १ ११५ १ उद्गमनतया प्राप्नोति ७.४३. उदितोऽस्ति १३ ४६ [उत्+गम्लृ गतौ (भ्वा०) धातोर्लङ् । 'बहुल' छन्दसीति शपो लुक् । 'म्वोश्च' अ० ८ २.६५ सूत्रेण नकारादेश । उदगात्-प्रयोगे-उत्+इण् गतौ (अदा०) धातोर्लुङ् । 'इणो गा लुङि' इति गादेश । सिचो लुक् च]

उदच ऊर्ध्वं गच्छति, प्र०—अत्र व्यत्यय ५ ८३ ८ [उत्+अञ्चु गतिपूजनयो (भ्वा०) धातोर्लोट् । विकरण-व्यत्ययेन श प्रत्यय]

उदजते ऊर्ध्वं क्षिपति, प्र०—अत्र व्यत्ययेनाऽऽत्मने-पदम् १ ६५ ७. [उत्+अजगतिक्षेपणयो (भ्वा०) धातो-र्लट् । व्यत्ययेनात्मनेपदम्]

उदजनि उत्कृष्टतया जनयति १ ७४ ३ [उत्+जनी प्रादुर्भावे (दिवा०) धातोर्लुङ् । 'दीपजन०' इत्यादिना विकल्पेन चिण्]

उदजयत् उत्कृष्टरीत्योत्कर्षेत् ६ ३४ उत्कृष्टतया नीत्या जयेदुत्कर्षेत् ६ ३१ [उत्+जि जये (भ्वा०) धातोर्लङ्]

उदजायन्त उत्कृष्टा भवन्ति ४ १८ १ [उत्+जनी प्रादुर्भावे (दिवा०) धातोर्लङ् । 'ज्ञाजनोर्जा' इति जादेश]

उदञ्चनः उत्कृष्टता प्रापक (विद्वज्जन) ५ ४४ ३ [उत्+अञ्चु गतिपूजनयो (भ्वा०) धातो कर्त्तरि युच् बाहुलकादौणादिक]

उदञ्चम् ऊर्ध्वं प्राप्नुवन्तम् (सिन्धु=समुद्रम्) २ १५ ६ (उत्+अञ्चु गतिपूजनयो (भ्वा०) धातोर्बाहुल-कादन् प्रत्यय औणादिक कर्त्तरि]

उदतिरम् उत्कृष्टतया सन्तरेयमुल्लङ्घेयम् ११.८२ [उत्+तॄ प्लवनसन्तरणयो (भ्वा०) धातो सामान्ये लङ् । विकरणव्यत्ययेन शप्रत्यये ऋत इत्वे रपरत्वे च रूपम्]

उदतिष्ठत् उत्तिष्ठति ४ १८ ८ ऊर्ध्वे उत्कृष्टबोधे व्यवहारे च तिष्ठति ऋ० भू० २३५ उत्कृष्टतया तिष्ठति २ १५ ७ **उदतिष्ठः**=उत्तिष्ठते ५ ११ ३ [उत्+ष्ठा गतिनिवृत्तौ (भ्वा०) धातोर्लङ् । शिति प्रत्यये तिष्ठादेश]

उदद्यौत् उत्कृष्टतया द्योतते ३ ५ ६ [उत्+द्यु अभिगमने (अदा०) धातोर्लङ् । 'उतो वृद्धिर्लुकि हलि' सूत्रेण वृद्धि । धातूनामनेकार्थकत्वादत्र द्यु द्योतने]

उदधिम् उदकधारक सागरम् १८ ५५ **उदधिः**= उदकानि धीयन्ते यस्मिँस्तत् समुद्रोऽन्तरिक्ष वा ३८ २२ [उदकोपपदे दधाते 'कर्मण्यधिकरणे च' इत्यधिकरणे कि । उदकस्य 'पेपवासवाहनधि च' अ० ६ ३ ५८. सूत्रेण उदादेश]

उदधीनिव उदकानि धीयन्ते येषु तानिव (सागरा-निव) ३ ४५ ३ [उदकोपपदे डुधाञ् धारणपोषणयो (जु०) धातोरधिकरणे कि. प्रत्यय. । उदकस्य उदादेश]

उदन् उदकमये जलाशये, प्र०—अत्र 'पद्दन्नोमास०' इत्युदकस्योदन्नादेश १ १०४ ३ [उदकशब्दात् सप्तमी । 'सुपा सुलुक्०' इति सप्तम्या लुक् । 'पद्दन्नोमास०' अ० ६ १ ६३ सूत्रेणोदकस्य 'उदन्' इत्यादेशश. । उदन् उदके नि० १० १२]

उदनयः उन्नेय (शिल्पविद्याविज्जन) २ १३ १२.

उदनष्टाम् उत्कृष्टतया प्रसिद्धाम् (प्रशसाम्) ७ ४५ २

उदनि उदके, प्र०—अत्र 'पद्दन्नोमास०' इत्युद-कस्योदन्नादेश. १ ११६ २४ [उदकप्राति० सप्तमी । उदकस्य 'उदन्' आदेश.]

उदनिमान् बहूदक (मेघ) ५ ४२ १४ [उदक प्राति० भूम्न्यर्थे मतुप् । उदकस्योदनिभावश्छान्दस]

उदनेव जलानीव ४ २० ६ [उदक-इव पदयो समास । उदकस्य 'उदन्' आदेश]

उदन्यवः आत्मन उदकमिच्छव (विद्वज्जना) ५ ५४.२ **उदन्यवे** आत्मन उदकानीच्छवे (जिज्ञासवे) ५ ५७ १ [उदकपदात् 'सुप आत्मन क्यच्' सूत्रेणात्मन इच्छाया क्यच् । 'क्याच्छन्दसी' ति उ प्रत्यय । 'पद्दन्नो-मास्०' सूत्रे शस्प्रभृतिष्विति प्रकारे प्रभृतिशब्द । तेन क्यच्यपि उदकस्य उदन्नादेश । उदन्युरुदन्यते नि० ११ १५]

उदन्या इव उदकमन्वन्विन्य इव (धारा इव) २ ७ ३. [उदकशब्दाद् भवार्थे यत् । उदकस्य उदन्नादेशश्च]

उदन्वता बहूदकसहितेन (रथेन=मेघरूपेण) ५ ८३ ७ [उदकप्राति० भूम्न्यर्थे मतुप् । 'उदन्वानुदधौ च'

(अदा०) धातोर्लिट्]

उदीची या उदङ्ङुत्तर देशमञ्चति सा (दिक्) १५ १३ उत्तरा (दिक्) १४ १३ बाईं ओर (दिशा) प० वि०, अथर्व० ३ २७ ४ **उदीचीम्**=उत्तराम् (दिशम्) १० १३ **उदीचीः**=उत्तरा (दिश) १६ ६४ **उदीच्यै**=योदक् पूर्वाऽभिमुखस्य जनस्य वामभागमञ्चति तस्यै (दिशे) २२ २४ [उत्+अञ्चु गतिपूजनयो (भ्वा०) धातो 'ऋत्विग्दधृग्०' अ० ३ २ ५९ सूत्रेण क्विन्। 'अनिदिताम्०' इति नलोपे 'अञ्चतेश्चोपसस्यानम्' अ० ४ १ ६. वा० इति स्त्रियां ङीपि भसंज्ञायाम् 'अच' सूत्रेणाल्लोपे प्राप्ते 'उद ईत्' अ० ६ ४ १३९ इनीकारादेश । उदीची हि मनुष्याणां दिक् श० १ ७ १ १२ एषा (उदीची) वै देवमनुष्याणां शान्ता दिक् तै० २ १ ३ ५ एषा (उदीची) वै रुद्रस्य दिक् तै० १ ७ ८ ६ एषा वै वरुणस्य दिक् तै० ३ ८ २० ४ नक्षत्राणां वा एषा दिग्यदुदीची प० ३ १ साम्नामुदीची महती दिगुच्यते तै० ३ १२ ९ १ उदीच्येव यश गो० पू० ५ १५.]

उदीयुः उत्कृष्टतया प्राप्नुयु १६ ४६ [उत्+इण् गतौ (अदा०) धातोर्लिटि प्रथमबहुवचनम्]

उदीरत् सन्नुदन् ४ २ ७ **उदीरताम्**=उत्कृष्टतया प्रेरताम् १९.४६ **उदीरते**=कम्पयन्ति गच्छन्ति वा ५.८३ ३ उत्कृष्टतया कम्पयन्ति २ १७ १ प्राप्नुवन्ति १२ ८२ उत्कृष्टा जायन्ते १ ८१ ३ उत्कृष्ट कम्पन्ते गच्छन्ति ४ ४५ २ [उत्+ईर गतौ कम्पने च (अदा०) धातो शतृ । व्यत्ययेन परस्मैपदम् । अन्यत्र लोट् लट् च । 'बहुल छन्दसी' ति शपो लुङ् न भवति]

उदीरय उत्कृष्टतया गमय १ ४८ २ प्रेरयत ५ ४२ ३ **उदीरयताम्**=उत्कृष्टतया प्रेरयन्तु १ १२३ ६ **उदीरयन्ति**=उत्कृष्टतया प्रेरते १.१६८ ८ [उद्+ईर गतौ कम्पने च (अदा०) धातोर्णिचि लोट्, लटौ । ईर क्षेपे (चुरा०) धातोर्वा रूपाणि]

उदीरयन्ती कर्मसु प्रवर्त्तयन्ती (उषा) १ ११३ ८ [ईर क्षेपे प्रेरणे (चुरा०) धातो. शत्रन्तान् ङीप्]

उदीराणाः उत्कृष्टता प्राप्ता (राजप्रजाजना) ४.३९ ५. उत्कृष्ट ज्ञान प्राप्ता (मनुष्या) ७.४४ २ [उत्+ईर गतौ (अदा०) धातो शानच् । ताच्छील्ये चानश् वा]

उदीर्ध्वम् ऊर्ध्वं कम्पध्वम् १ ११३ १६ [ईर गतौ कम्पने च (अदा०) धातोर् उत्पूर्वाल् लोट्]

उदीर्ष्व उत्कृष्टमिच्छ ऋ० भू० २११ विचार और निश्चय रख स० प्र० १५२, १०.१८ ८ [ईर गतौ कम्पने च (अदा०) धातोर् उत्पूर्वाल्लोट्]

उदुद्धर्षसे उत्कृष्टतयाऽऽनन्दसि ४ २१ ९ [उत्+हृष तुष्टौ (दिवा०) धातोर्लट् । व्यत्ययेन शप् आत्मनेपद च]

उदूपथुः उत्कृष्टतया वपत १ ११७ १२ ऊर्ध्वं वपेथाम् १ ११६ ११ ऊर्ध्वं वपेतम् १ ११७ ५ [उत्+डुवप् बीजसन्ताने (भ्वा०) धातोर्लिटि मध्यमद्विवचनम् । 'असंयोगात्०' इति लिट कित्वे यजादित्वात् सम्प्रसारणम्]

उदूहथुः ऊर्ध्वं वहत १ १८२ ७ [उत्+वह प्रापणे (भ्वा०) धातोर् लिटि मध्यमद्विवचनम् । यजादित्वात् किति सम्प्रसारणम्]

उदृचः उत्कृष्टा अधीता प्रत्यक्षीकृता ऋचो यस्मिँस्तस्य (यजस्य=शिल्पविद्यासिद्धस्य) ४.९ **उदृचि**= उत्कृष्टा ऋचो यस्मिन्नध्ययने तस्मिन् १ ५३ ११ [उत्-ऋच्पदयोर्बहुव्रीहि । 'विभाषा समासान्तो भवति' इति परिभाषाश्रयेण 'ऋक्पूरब्धू पथाम्०' इति समासान्तो न भवति]

उदेति उदय प्राप्नोति । १ १५७ १ सब जगत् मे उदित प्रकाशमान हो रहे हो आर्याभि० १ ४७ **उदेषि**= उत्कृष्टतया प्राप्तोऽसि १ ५०.५ [उत्+इण् गतौ (अदा०) धातोर्लट्]

उदैत् उदेति ३१४ उदित प्रकाशितोऽस्ति ऋ० भू० १२१ **उदैति**=अधिष्ठातृत्वेन व्याप्नोति ऋ० भू० १५२ जाता है स० प्र० २४६, ३४१ जाता आता है आर्याभि० २.४३, ३४१ उद्गच्छति ३४१ [उत्+इण् गतौ (अदा०) धातोर्लङ् । 'आटश्चे' ति वृद्धि]

उदैरत् प्रेरयति ७ २३ १ **उदैरतम्**=उत्कृष्टतया गच्छतम् १.११८ ६. [उत्+ईर गतौ कम्पने च (अदा०) धातोर्लङ् । 'बहुल छन्दसी' ति शपो न लुक् । व्यत्ययेन परस्मैपदम्]

उदैरयतम् प्रेरयतम् १ ११७ २४ उत्कृष्टतया गमयतम् १ ११२ ५ [उत्+ईर क्षेपे=प्रेरणे (चुरा०) धातोर्लङ्]

उदोजसम् उत्कृष्ट पराक्रमम् १२ ८१ [उत्+ओजस्पदयो. समास । ओज=उब्ज आर्जवे (तुदा०) धातो 'उब्जेर्बले बलोपश्च' उ० ४ १९२ इति बलोपो गुणोऽसुन् च प्रत्यय]

न्मभार्ये (मौत्रो धातु) धातोर्लुङ्। 'जृस्तम्भुम्रुचु०' अ० ३.१.५८ सूत्रेण च्लेर्वाऽङादेशे पक्षे सिच्]

उदस्थात् उत्तिष्ठते ७ १६ ३ उत्तिष्ठति १ १६४ १७ उत्तिष्ठतु १७.४१ ऊर्ध्वमुदेति १ १२३ १ **उदस्थाम्**=उत्कृष्टतया तिष्ठेयम् ४ २८ उत्कृष्टतया प्राप्नुयाम् ४ २८ **उदस्थुः**=उत्तिष्ठन्तु ७.६० ४ [उत्+ष्ठा गतिनिवृत्तौ (भ्वा०) धातोर्लुङ् । 'गातिस्थाघुपाभूभ्यः' इति सिचो लुक्]

उदहार्य्यः या उदक हरन्ति ता. (स्त्रिय) १६ ७ [उदकोपपदे हृञ् हरणे (भ्वा०) धातोरण्प्रत्यये स्त्रिया ङीप्। उदकस्योदादेशश्छान्दस.]

उदा उदकेन ५.४१ १४ [उदकप्राति० तृतीयैकवचनम्। 'पद्दन्नोमास्' सूत्रेणोदन्नादेश । 'अयस्मयादीनि छन्दसि' इत्यजादावपि पदसञ्ज्ञाया नकारान्लोपो, न स्वरलोप.। इनादेशोऽपि न छान्दसत्वाद्]

उदाचरत् ऊर्ध्वं गच्छति ७ ५५ ७. [उत्+आङ्+चर गतौ (भ्वा०) धातोर्लङ्]

उदाजत् ऊर्ध्वं क्षिपति २ १२ ३ ऊर्ध्वमधो गमयति २ २४ १४ विक्षिपेत् हन्यात् २ १४ ३ प्रक्षिपति ३.४४ ५ ऊर्ध्वं समन्तात् क्षिपतु, प्र०—अत्र लोडर्थे लङ् १.११२.१२. **उदाजन्**=प्राप्नुवन्ति ४ १ १३ [उत्+अज गतिक्षेपणयो (भ्वा०) धातोर्लङ्]

उदादाय ऊर्ध्वं समन्ताद् गृहीत्वा १ २८ [उत्+आङ्+डुदाञ् दाने (जु०) धातो क्त्वा। समासे क्त्वो ल्यप्]

उदानः य ऊर्ध्वमनिति (वायुविशेष) ६ २० उदानिति बलयति येन स (वायु.) २२ २३ **उदानाय**=उत्कृष्टाय बलाय १३ १९. उत्कृष्टाय जीवनबलसाधनाय (वायवे) ७ ६ स्फूर्तिहेतव ऊर्ध्वमन्यते चेष्ट्यते येन तस्मै उत्क्रमणपराक्रमहेतवे (वायवे) १ २०. [उत्+अन प्राणने (अदा०) धातोर्घञ् प्रत्यय। तद् यदस्यैषो (उदान) न्तरात्मन्यतो यद्वैनेनेमा. प्रजा यतास्तस्मादन्तर्यामो नाम श० ४ १.२ २ उदान उदयनीय ऐ० १ ७ उदन्त इव ह्ययमुदान ष० २ २ चन्द्रमा उदान जै० ३० ४ २३ ६ उदानो वै त्रिककुप् छन्द श० ८ ५ २ ४ उदानो वै नियुत श० ६ २ २.६ एति ('आ' इति) उदान श० १४ १ ५ उदानो वै बृहच्छोचा श० १ ४ ३ ३ उदाना मासा ता ५ १० ३]

उदारत् उदूर्ध्वं प्राप्नोति १७ ८६ उत्कृष्टतया प्राप्नोति ४ ५८.१ **उदारताम्**=प्राप्नुताम् ३ ३३.१३. [उत्+ऋ गतौ (जु०) धातोर्लुङि 'सर्त्तिशास्त्यर्तिभ्यश्च' च्लेरङ्। ऋदृशोऽङि' सूत्रेण गुण]

उदारिथ उत्कृष्टतया प्राप्नोषि २ ६ ३ उत्कृष्टै. साधनै. प्राप्नुहि १७ ७५. [उत्+आङ्+ऋ गतौ (जु०) धातोर्लिटि मध्यमैकवचनम्]

उदारथिः उद्दीपक (ईश्वर) १ १८७ १० [उत्+आङ्+ऋ गतौ (भ्वा०) धातो 'उदृत्तेश्चित्' उ० ४.८८. सूत्रेण थिन् प्रत्यय]

उदारः य उत्कृष्ट परीक्ष्य ऋच्छति ददाति, भा०—सुपात्रेभ्यो दाता (राजा=प्रकाशमानो जन) १२.२२. [उत्+ऋ गतौ (भ्वा०) धातोरण् प्रत्यय]

उदारुहम् उत्कृष्टतया रोहेयम् १७ ६७ [उत्+आङ्+रुह बीजजन्मनि प्रादुर्भावे च (भ्वा०) धातोर्लङ्। विकरणव्यत्ययेन श]

उदाहसत् उत्कृष्टतया ज्ञापयन्ति, प्र०—अत्र 'ओहाङ् गतौ' इत्यस्माल्लडर्थे लुङ् १ ६ ४ [उत्+आङ्+ओहाङ् गतौ (जु०) धातोर्लुङ्। छान्दस रूपम्]

उदिङ्गय उत्कृष्टतया गमय ४ ५७ ४ [उत्+इगि गतौ (भ्वा०) धातोर्णिचि लोट्]

उदितः उदय प्राप्त (सूर=सूर्य) ३२ ७ [उत्+इण् गतौ (अदा०) धातो क्त]

उदिता उदिते (काले), प्र०—अत्राऽऽकारादेश ३३ ४२. उदये ७ ४१.४ उत्कृष्टप्राप्तौ १ ११५.६ उदितावुदये ७ ६ ७ सूर्योदये ६ ५१ १ उदितौ प्राप्तोदयौ (इन्द्राग्नी=पवनविद्युतौ) १ १०८ १२. उदयसमये ३४.३७ [उत्+इण् गतौ (अदा०) धातो क्त.। उदितस्य रूपाणि]

उदितिम् उदयम् ६ १५ ११. [उत्+इण् गतौ (अदा०) धातो क्तिन् स्त्रियाम्]

उदिते उदय प्राप्ते (सूर्ये) ५ ५४.१०. ['उदित' इति व्याख्यातम्]

उदिथः प्राप्नुथ १० १६ [उत्+इण् गतौ (अदा०) धातोर्लेटि मध्यमद्विवचने रूपम्]

उदियर्त्ति ऊर्ध्वं प्राप्नोति ४ ४५ १. उत्कृष्टतया जानाति १ ११३ १७ उन्नयति ६ ४७ ३ **उदियर्षि**=उत्कृष्टतया प्राप्नोषि १२ १०७ [उत्+ऋ गतौ (जु०) धातोर्लट्। 'अर्तिपिपर्त्योश्च' इत्यभ्यासस्येत्त्वम्। 'अभ्यासस्यासवर्णे' इत्यभ्यासस्येयङ्]

उदियाय उदेति ७ ३३ १३ [उत्+इण् गतौ

उद्यतम् उद्वृतम् (ब्रह्म) १ ८०.६. **उद्यतः**= प्रयत्नेन प्रेरित (असु =प्राण) ८ ५८ उत्कृष्टतया यत (सिन्धु =नदी) ८ ५६ ऊर्ध्वं गच्छन् (प्रजापति =जीव) ३६ ५ उद्योगी (यज्ञ =शिष्य) ६ ६८ १ [उत्+यमु उपरमे (भ्वा०) धातो क्त]

उद्यतस्रुचे उद्यता उत्कृष्टतया गृहीता स्रुग् येन तस्मै यज्ञानुष्ठात्रे १ ३१ ५ [उद्यत-स्रुच्पदयो समास । यत-स्रुच =ऋत्विड्नाम । निघ० ३ १८]

उद्यता उत्कृष्टतया यतानि गृहीतानि (वस्तूनि) २ ३१ ७ [यमु उपरमे (भ्वा०) धातो क्तप्रत्यये=यत इति रूपम् । उत्-यतपदयो समास]

उद्यतिम् उद्यमम् १ १६० ३ [उत्+यमु उपरमे (भ्वा०) धातो क्तिन्]

उद्यते कथ्यते ५ ५५ ८ क्लिद्यते १ १६४ ४७ [वद व्यक्ताया वाचि (भ्वा०) धातो कर्मणि लट् । यजादित्वात् किति सम्प्रसारणम् । अन्यत्र उन्दी क्लेदने (रुधा०) धातो कर्मणि लट्]

उद्यन् उदयन् (सूर्य) ७ ६० १ उदय प्राप्नुवन् (सूर्य) १ १२४ १ [उत्+इण् गतौ (अदा०) धातो शतृ । 'इणो यण्' अ० ६ ४ ८१ सूत्रेण यणादेश.]

उद्यन्ता उत्कृष्टतया नियन्ता (इन्द्र =सेनेश) १ १७८ ३ [उत्+यमु उपरमे (भ्वा०) धातो कर्त्तरि तृच्]

उद्यन्तु उद्गच्छन्तु १७ ४२ [उत्+इण् गतौ (अदा०) धातोर्लोट् । 'इणो यण्' सूत्रेण यणादेश]

उद्यमिष्ट उत्कृष्टतया नियच्छेत् ५ ३२ ७ [उत्+यमु उपरमे धातोर्लुङ् । 'समुदाङ्भ्यो यमोऽग्रन्थे' अ० १ ३ ७५ सूत्रेणात्मनेपदम् । इडागमश्छान्दस]

उद्ययमीति उत्कृष्टतया पुन पुनरतिशयेन नियम करोति १ ६५.७ [उत्+यमु उपरमे (भ्वा०) धातोर्यङ्-लुकि रूपम्]

उद्यंसते उत्कृष्टतया रक्षति १ १४३ ७

उद्यासाय ऊर्ध्वं गमनाय ३६ ११ [उत्+यसु प्रयत्ने (दिवा०) धातोर्भावे घञ्]

उद्युवामहे उत्कृष्टतया विभजामहे ६ ५७ ६ [उत्+यु मिश्रणे अमिश्रणे च (अदा०) धातोर्लट् । व्यत्ययेनात्मनेपद शप्रत्ययश्च]

उद्येमिरे उत्कृष्टतया युञ्जन्ति १ १०.१. [उत्+यमु उपरमे (भ्वा०) धातोर्लिट् । 'समुदाङ्भ्यो यमोऽग्रन्थे' त्यात्मनेपदम्]

उद्रः जलचर कर्कटाऽऽख्य २४ ३७. [उनत्ति क्लिद्यतीति विग्रहे उन्दी क्लेदने (रुधा०) धातो 'स्फायि-तञ्चि०' उ० २ १३ सूत्रेण रक् प्रत्यय]

उद्रिच्यते अधिको भवति ७ ३२ १२ [उत्+रिचिर् विरेचने (रुधा०) धातो कर्मणि लट्]

उद्रिणम् उदकवन्तम् (उत्स =कूपम्) २ २४ ४ [उद्र इति व्याख्यानम् । ततो मत्वर्थे इनि.]

उद्रिरिचे उत्कृष्टतयाऽतिरिच्यते १.१०२ ७ [उत्+रिचिर् विरेचने (रुधा०) धातोर्लिट्]

उद्वत्सु ऊर्ध्वेपूत्कृष्टेपु प्रदेशेपु १ १६१ ११ [उत्-शब्दाद् मतुप् । 'भय' अ० ७ २ १० सूत्रेण मतुपो मस्य वादेश]

उद्वतः उपरिस्थितान मार्गान् ३ २ १० ऊर्ध्वान् प्रदेशान ७ ५० ४ ऊर्ध्वदेशस्था (नभा =वृष्टिजलानि) ५ ८३ ७

उद्वधीत् उत्कृष्टतया हन्यात् १३ १६ [उत्+हन हिंसागत्यो. (अदा०) धातोर्लुङ् । 'लुङि चे' ति हनो वधादेश । अडभावश्छान्दस]

उद्वपतु उत्कृष्टतया बीजवत् सन्तनोतु ११ ६३ [उत्+डुवप् बीजसन्ताने (भ्वा०) धातोर्लोट्]

उद्वयसम् उत्कृष्ट वयो जीवन यस्मात्तम् (रस =सारम्) ६ ३. [उत्+वयम् पदयोर्बहुव्रीहि । वय =अन्ननाम निघ० २.७ वेति गच्छतीति विग्रहे वी गत्यादिपु (अदा०) धातोरसुन् प्रत्यय]

उद्वरीवृजत् उत्कृष्टतया भृश वर्जयति ६ ५८ २ [उत्+वृजी वर्जने (अदा०) धातोर्णिजन्ताल्लुङ]

उद्वहन्ति उत्कृष्टतया प्रापयन्ति ज्ञापयन्ति प्रकाशयन्ति प० वि० । ऊर्ध्वं प्राप्नुवन्ति १ ५० १ [उत्+वह प्रापणे (भ्वा०) धातोर्लट्]

उद्वावृषाणः उत्कृष्टतया बलिष्ठ सन् (राजा) ४ २६ ३ उत्कृष्टतया भृश बलकरस्य (मघस्य=धनस्य) ४ २० ७ [उत्+वृष शक्तिबन्धने (चुरा०) धातोर्यङन्ताच्छानच्]

उद्वृह उत्कृष्टतया वर्धस्व ३ ३० १७. **उद्वृहः**= उच्छेदये ६ ४८ १७ [उत्=वृह वृद्धौ (भ्वा०) धातोर्लोट् । व्यत्ययेन श प्रत्यय । वृहू उद्यमने (तुदा०) धातोर्वा लोट्]

उनत्त विद्यासुशिक्षाभ्या सिञ्चत ५.४२ ३ [उन्दी क्लेदने (रुधा०) । धातोर्लोट् 'श्नसोरल्लोपो' ऽपि न, छान्दसत्वात्]

उदोजसः उत्कृष्टमोजो पराक्रमो येषान्ते (मरुत = मानवा) ५ ५४ ३ [उत्+ओजस्-पदयोर्बहुव्रीहि]

उद्गः जलस्य १ ११२.१२.

उदगात् ऊर्ध्वं व्याप्नोति १ ५० १३

उद्गाता यज्ञ मे सामगान करने वाला महापण्डित आर्याभि० १ ५२ [उत्+गा स्तुतौ (जु०) धातो कर्त्तरि तृच्। सूर्य उद्गाता गो० पू० १ १३ आदित्यो वा उद्गाताऽधिदैव चक्षुरध्यात्मम् गो० पू० ४ ३ पर्जन्यो वा ऽउद्गाता श० १२ १.१ ३ वर्षा उद्गाता तस्माद्यदा वलवद्वर्षति साम्न इवोपब्दि क्रियते श० १२ २ ७ ३२ प्रजापतिर्वा ऽउद्गाता श० ४.३ २ ३ उद्गातैव यश गो० पू० ५ १५ प्राण उद्गाता कौ० १७ ७ गो० उ० ५ ४ ते य एवेमे मुख्या प्राणा एत एवोद्गातारश्चोपगातारश्च जै० उ० १ २२ ५ देवाना वै षड् उद्गातार आसन् वाक् च मनश्च चक्षुश्च श्रोत्र चाऽपानश्च प्राणश्च जै० उ० २ १ १]

उद्गातेव यथोद्गाता तथा (वेदविज्जन) २ ४३ २ [उद्गातेति व्याख्यातम्]

उद्गुरमाणाय य उत्कृष्टतया गुरत उद्यच्छत्युद्यम करोति तस्मै (पुरुषाय) १६ ४६ [उत्+गुरी उद्यमने (तुदा०) धातो शानच्]

उद्गृहीताय ऊर्ध्वं गृहीत जल येन तस्मै (मेघाय) २२ २६ [उत्+ग्रह उपादाने (क्र्या०) धातो क्त। 'ग्रहोऽलिटि दीर्घ' इतीटो दीर्घ]

उद्गृह्णते य ऊर्ध्व गृह्णाति तस्मै (मेघाय) २२.२६ [उत्+ग्रह उपादाने (क्र्या०) धातो शतृ। धातो सम्प्रसारण किति]

उद्ग्राभम् उत्कृष्टतया ग्रहणम् १७ ६४ **उद्ग्राभेण**=उत्कृष्टतया गृह्णाति येन तेन (साधनेन) १७ ६३ [उत्+ग्रह उपादाने (क्र्या०) धातोर्घञ्। 'हृग्रहोर्भश्छन्दसि हस्येति वक्तव्यम्' अ० ८ २ ३५ वा० सूत्रेण हकारस्य भकार]

उद्दिशः या उद्दिश्यन्ते ता (शत्रुलक्षिता दिश) ६ १९ [उत्+दिश अतिसर्जने (तुदा०) धातो 'ऋत्विक्०' इति सूत्रेण क्विन्। 'कृतो वहुलम्' अ० ३ ३ ११३ वा० सूत्रेण कर्मणि क्विन्]

उद्दृंह उद्वर्धय १७ ७२ [उत्+दृहि वृद्धौ (भ्वा०) धातोर्लोट्]

उद्द्रावाय ऊर्ध्व गताय द्रवीभूताय (वाष्पाय) २२ ८ [उत्+द्रु गतौ (भ्वा०) धातोर्घञ् 'उदि श्रयतियौतिपूद्रुव' अ० ३ ३ ४९ सूत्रेण]

उद्द्रुताय उत्कर्षं गताय (धूम्राय) २२ ८ [उत्+द्रु गतौ (भ्वा०) धातो क्त]

उद्धर्षय उत्कर्षय, भा०—नित्य हर्षय, उन्नय १७ ४२ **उद्धर्षयन्ति**=उत्साहयन्ति ५ २७ ५ [उत्+हृष तुष्टौ (दिवा०) धातोर्णिजन्ताल्लोट्]

उद्ना उदकेन ५ ८५ ६ [उदक+टा। 'पद्दन्नोमास्०' इति उदन्नादेशे 'अल्लोपोऽन' इत्यल्लोप]

उद्बाधस्व पृथक् कुरु ४ २८ [उत्+वाधृ विलोडने (भ्वा०) धातोर्लोट्]

उद्बुध्यस्व प्रकाशितो भव ऋ० भू० ३०५ ऊर्ध्वत्वेन जानीहि १८ ६१ उत्कृष्टरीत्या जानीहि १५ ५४ [उत्+बुध अवगमने (दिवा०) धातोर्लोट्]

उद्बोधत् उद्बोधय ४ १५ ७ [उत्+बुध अवगमने (भ्वा०) धातोर्लेट्]

उद्भरन्तु उत्कृष्टतया धरन्तु १७ ५३ [उत्+भृञ् भरणे (भ्वा०) धातोर्लोट्]

उद्भिदम् पृथिवी भित्त्वा जातेन काष्ठेन निर्मितम् (रथम्) ११०२९ उद्भिद्य जायते तम् (भा०—जात वलम्) २८ २५ **उद्भिदः**=ये पृथिवी भित्त्वा प्ररोहन्ति (वृक्षादिवत् परोपकारिणो जना) ५ ५९ ६ य उद्भिन्दन्ति (क्रतव =यज्ञा प्रज्ञा वा) २५ १४ उत्कृष्टतया दु ख-विदारका (देवा) १ ८९ १. उद्भेद विदारण प्राप्ता (ओषधिरसा) ११३९ ६ ये पृथिवीमुद्भिद्य जायन्ते (ओषध्यादय) ११३९ ६ [उत्+भिदिर् विदारणे (रुधा०) धातो क्विप्]

उद्भिनदत् उद्भिन्द्यात् १२ २७ [उत्+भिदिर् विदारणे (रुधा०) धातोर्लेट्]

उद्भिः उदकै १ ८५ ५

उद्भृतम् उत्कृष्टरीत्या धृतम् (ओज =वलम्) ६ ४७ २७ उद्धृतम् (मेद =स्निग्ध वस्तु) २१ ४४ उत्कृष्टतया पोषितम् (मेद =स्निग्ध वस्तु) २१.४५ [उत्+भृञ् भरणे (भ्वा०) धातो क्त]

उद्भौ उद्वुत्कृष्टानि वस्तूनि भवन्ति यस्मिँस्तस्मिन् (शर्मन्=गृहे) १५ १ [उत्+भू सत्तायाम् भ्वा०) धातो 'डुप्रकरणे मितद्रवादिभ्य उपसख्यानम्' अ० ३ २ १८० वा० सूत्रेण डु]

उद्मेघे समुद्रे ऋ० भू० १८९

प्रयोग' १ २८ ३. [उप+च्युङ् गतौ (भ्वा०) धातो 'ऋदोरप्' इत्यप्। च्यवते गतिकर्मा निघ० २ १४]

उपजग्मुषः य उप=सामीप्य गतवन्तस्तान् (मनुष्यादीन्) १ ५३ ९ [उप+गम्लृ (भ्वा०) धातोर्लिट क्वसु.]

उपजायते यत्किञ्चिदुत्पद्यते तत्सर्वं त्रयोदशो मासो वा १ २५ ८ [उप+जनी प्रादुर्भावे (दिवा०) धातोर्लट्]

उपजिह्विका उपगताऽनुकूला जिह्वा यस्या पत्न्या सा ११ ७४ [उप+जिह्विकापदयो समास । जिह्वा=वाङ्नाम निघ० १ ११ उपजिह्विका वम्रीभिरुपजिह्विका इति सीमिकानाम् । उपजिह्विका उपजिघ्रच नि० ३ २]

उपतस्थुः समीप तिष्ठन्ते १ ६५ ६ [उप+ष्ठा गतिनिवृत्तौ (भ्वा०) धातोर्लिट्]

उपतिष्ठथः समीपस्थौ भवत ५ ६३ ३ [उप+ष्ठा गतिनिवृत्तौ (भ्वा०) धातोर्लट्]

उपतिष्ठन्त उपतिष्ठन्तु १ १३५ ८ [उप+ष्ठा गतिनिवृत्तौ (भ्वा०) धातोर्लङ्। अडभाव । व्यत्ययेनात्मनेपदम्]

उपतिष्ठाते समीप तिष्ठेत १ १२४ ११ [उप+ष्ठा गतिनिवृत्तौ (भ्वा०) धातोर्लट्]

उपदद्यमाने उपादीयमाने (शर्मन्=गृहे) ६ ४६ १३. [उप+दद दाने (भ्वा०) धातो कर्मणि शानच्]

उपदधामि समीप धरामि ५ २५ समीप धारयामि, तेन पुष्णामि उपदधाति वा १ १८ सामीप्येन धारयामि १ १८ [उप+डुधाञ् धारणपोषणयो (जु०) धातोर्लट्]

उपदसत् समीप नश्येत् १ १३६ ५ **उपदस्यन्ति**= समीपतया क्षयन्ति ५ ५५ ५ समीप नश्यन्ति १ ६२ १२ [उप+दसु उपक्षये (दिवा०) धातोर्लेट् लट् च]

उपदाम् उप समीपे दीयते ताम् (उत्कोचम्) ३० ९ [उप+डुदाञ् दाने (जु०) धातो 'आतश्चोपसर्गे' अ० ३ ३ १०६ सूत्रेणाङ् स्त्रियाम्]

उपद्यवि समीपस्थे प्रकाशितेऽप्रकाशिते वा (धार्मिकेऽधार्मिके जने) ७ ३१ ९ [उप+द्युपदयो समास]

उपद्रव समीपमागच्छ ६ ४८ १६ [उप+द्रु गतौ (भ्वा०) धातोर्लोट्]

उपधापयेते सामीप्येन पाययत, भा०—समीप पालयेताम् ३३ ५ समीप पाययेते १ ६५ १ [उप+धेट् पाने (भ्वा०) धातोर्णिजन्ताल्लट्। आत्वे पुगागम । 'धेट उपसंख्यानम्' अ० १.३ ८९ वा० सूत्रेण परस्मैपदप्रतिषेधादात्मनेपदम्]

उपधीव यथोपधिर्मध्यस्थस्य रथाऽवयवस्य धारिका २ ३९ ४. [उपधि-इवपदयो समास । उपधि=उप+डुधाञ् धारणपोषणयो (जु०) धातो कि प्रत्यय]

उपध्वस्ताः उपाऽध पतिता (पशव) २४ १४ [उप+ध्वसु अवस्रसने (भ्वा०) धातो क्त]

उपनतिः उपनमन्ति यया सा (अस्थि) २० १३ [उप+णम प्रह्वत्वे शब्दे (भ्वा०) धातो स्त्रियां क्तिन्]

उपनयमानः विद्यापठनार्थमुपवीतं दृढव्रतमुपदिशन् (आचार्य्य) ऋ० भू० २३५, अथर्व० ११ ५ ३ प्रतिज्ञापूर्वक समीप रख के (आचार्य) स० वि० ८०, अथर्व० ११ ५ ३ [उप+णीञ् प्रापणे (भ्वा०) धातो शानच्। 'सम्माननोत्सञ्जनाचार्यकरण०' अ० १ ३ ३६ सूत्रेणात्मनेपदमाचार्यकरणे]

उपनिपद्यते समीपतया प्राप्नोति ऋ० भू० २२१ अथर्व० १८ ३ ११ [उप+नि+पद गतौ (दिवा०) धातोर्लट्]

उपनिपद्यमानम् समीपे प्राप्नुवन्तम् (सूर्यम्) १.१५२ ४ [उप+नि+पद गतौ (दिवा०) धातो शानच्]

उपनिषेदुः ब्रह्मचर्य ही से समीप प्राप्त होवे स० वि० १९८, १९ ४१ १ समीपता से प्राप्त होकर अनुष्ठान करते हैं स० वि० १८६, अथर्व० १९ ४१ १ [उप+नि+षद्लृ विशरणगत्यवसादनेषु (भ्वा०) धातोर्लिट्]

उपनीतम् प्राप्तसमीपम् (अश्मान=मेघम्) १ १२१ ९ [उप+णीञ् प्रापणे (भ्वा०) धातो क्त.]

उपन्यसादि अ०—समीप निपाद्येत ४ ६ २ [उप+नि+षद्लृ विशरणगत्यवसादनेषु (भ्वा०) धातो. कर्मणि लुङ्]

उपपतिम् य पत्यु समीपे वर्त्तते तम् (अन्यपतिम्) ३० ९ [उप-पतिपदयो समास]

उपपर्चनम् उपसम्बन्ध ६ २८ ८. [उप+पृची सम्पर्के (रुधा०) धातोर्भावे ल्युट्]

उपपृक् उप सामीप्य पृङ्क्ते स्पृशति य स (अहि=मेघ) १.३२ ५ [उप+पृची सम्पर्के (रुधा०) धातो क्विप्। उपपृक् उपपर्चन नि० ६ १८]

उपपृङ्धि सम्बधान २ २४ १५ [उप+पृची सम्पर्के (रुधा०) धातोर्लोट्]

उपपृच्यताम् उपसम्बध्यताम् ६ २८.८ [उप+पृची सम्पर्के (रुधा०) धातो कर्मणि लोट्]

उनत्त उच्छिन्न (पशु) २४.७ [उन्दी क्लेदने (रुधा०) धातो क्त]

उनत्ति आर्द्रीकरोति ५ ८५ ४ [उन्दी क्लेदने (रुधा०) धातोर्लट्]

उनप् उम्भति पूरयति २ १३ ६ [उभ पूरणे (तुदा०) धातोर्लङ् । विकरणव्यत्ययेन श्नम् । आडभावश्छान्दस]

उनोति प्रेरयति ५ ३१ १

उन्दन् आर्द्रीकुर्वन् (अग्नि = विद्युत्) २ ३ २ [उन्दी क्लेदने (रुधा०) धातो शतृ]

उन्दन्ति क्लेदन्ति १ ८५ ५ [उन्दी क्लेदने (रुधा०) धातोर्लट्]

उन्धि उन्दयति क्लेदयति ५ ८३ ८ [उन्दी क्लेदने (रुधा०) धातोर्लोट्]

उन्नयध्वम् उत्कर्षत २ १४ ६. **उन्नयन्ति** = उन्नति-शील करके प्रतिष्ठित करते हैं म० प्र० १०६, ३ ८ ४ ऊर्ध्वत्वेनोत्तम सम्पादयन्ति ३ ८ ४ **उन्नयामि** = ऊर्ध्वं वध्नामि भा०—प्रापयामि ११ ८२ [उत् + णीञ् प्रापणे (भ्वा०) धातोर्लोट् । अन्यत्र लट्]

उन्नशत् उत्कर्षेण नश्यति १ १६४ २२ **उन्नशन्** = नाशयेयु २ २३ ८ [उत् + णश अदर्शने (दिवा०) धातोर्लुङ् । पुषादित्वादङ् । अटभावश्छान्दस]

उन्निनीथः उत्कर्षं प्राप्नुथ १ १८११ **उन्निनेथ** = उन्नय ६ १८ १३ **उन्निन्यथुः** = ऊर्ध्वं नयतम् १ ११६ ८ [उत् + णीञ् प्रापणे (भ्वा०) धातोर्लिट्]

उन्नीतः ऊर्ध्वं नीत सुगन्ध्यादिपदार्थ ८ ५८ [उत् + णीञ् प्रापणे (भ्वा०) धातो क्त]

उन्नीयमानाः उत्कृष्टान् गुणान् प्रापयन्त (देवा = विपश्चित) ३ ८ ६ [उत् + णीञ् प्रापणे (भ्वा०) धातो कर्मणि शानच्]

उन्नेतृणाम् उत्कर्षं प्रापयितॄणाम् (पुरुषाणाम्) ६ २ [उत् + णीञ् प्रापणे (भ्वा०) धातो कर्त्तरि तृच्]

उन्मत्तम् उन्मादरोगिणाम् (जनम्) ३० ८ [उत् + मदी हर्षे (दिवा०) धातो क्त । ईदित्त्वादनिट्त्वम्]

उन्ममन्द उन्मन्दते कामयते २ ३३ ६ [उत् + मदि स्तुतिमोदमस्वप्नकान्तिगतिषु (भ्वा०) धातोर्लिट् । व्यत्ययेन परस्मैपदम्]

उन्मा ऊर्ध्वं मिनोति यया तुलया तद्वत्, भा०—तुलादिकम् १५ ६५ [उत् + मा माने (अदा०) धातोर्घञ्]

उप सामीप्ये १ ८२ १ सामीप्ये क्रियायोगे, प्र०—उपेत्युपजन प्राह नि० १ ३, २ १६ उपगमार्थे १ २१ ४ क्रियार्थे १ ५ गतार्थे २ १० उपयोगार्थे १ २२ १६ [उप इत्युपजनम् नि० १ ३ इय (पृथिवी) वा उप श० २ ३ ४ ६ उप वै रथन्तरम् ता० १६ ५ १४]

उप समीपस्थ सन् (पुत्र) १२ ७८

उपकृणवन्त उपकुर्वन्ति ७ ३७ ७ [उप + डुकृञ् करणे (तना०) धातोश्छान्दस रूपम्]

उपक्षरन्ति समीपतया वर्षन्ति १ १२५ ४ उपवर्षन्ति ५ ६२ ४ [उप + क्षर सचलने (भ्वा०) धातोर्लट्]

उपक्षियन्तः उपनिवसन्त (सज्जना) ३ ५६ ३ [उप + क्षि निवासगत्यो (तुदा०) धातो शतृप्रत्यय]

उपक्षेतारः उपगतान् द्वैधीकुर्वाणा (मनुष्या) ३ १ १६ [उप + क्षि निवासगत्यो (तुदा०) धातो कर्त्तरि तृच्]

उपक्षेति उपनिवसति २ २७ १३ विजानाति निवासयति वा १ ७३ ३ निवासित और धारण करता है आर्याभि० १ ४६ [उप + क्षि निवासगत्यो (तुदा०) धातोर्लट् । 'बहुल छन्दसी' ति शपो लुकि शप्रत्ययस्यापि लुक्]

उपगतम् समीपमागच्छतम् ५ ७१ ३ [उप + गम्लृ गतौ (भ्वा०) धातो क्त]

उपगन्तम् सामीप्येन गमयतम् १ १३७ ३ [उप + गम्लृ गतौ (भ्वा०) धातोर्लोट् । बहुल छन्दसीति' शपो लुकि छकारादेशो न भवति]

उपगमेयम् समीपतया प्राप्नुयाम् १ १५८ ३ [उप + गम्लृ गतौ (भ्वा०) धातोर्लिङ् । 'लिङ्याशिष्यङ्' अ० ३ १.८६ सूत्रेणाङ्]

उपगात् उपगच्छेत्, प्र०—अत्राऽडभाव १ १६४ ४ [उप + इण् गतौ (अदा०) धातोर्लुङ् । 'इणो गा लुङि' सूत्रेण गादेश । अडभावश्च]

उपगायत सामीप्येन शास्त्राणि पाठयत ३३ ८२ [उप + गै शब्दे (भ्वा०) धातोर्लोट्]

उपगृणन्ति उपगन्तु स्तुवन्ति १ ४८ ११ [उप + गृ शब्दे (क्र्या०) धातोर्लट्]

उपगेषम् समीप प्राप्नुयाम्, अ०—विजानीयाम् ५ ५ [उप + गेषृ अन्विच्छायाम् (भ्वा०) धातोर्लङ् । अडभावश्च । धातोश्च गतिरर्थो धातूनामनेकार्थत्वात्]

उपचिताम् अन्येषा वर्धमानाना रोगाणाम् १२ ६७ [उप + चिञ् चयने (भ्वा०) धातो क्विप्]

उपच्यवम् प्रापणम्, प्र०—अत्र 'च्युङ गतौ' इत्यस्य

(परमेश्वरम्) २ २३ १ [उपम-श्रवम्पदयो समास । तनोऽतिशायने तमप्]

उपमस्य उपमा विद्यते यस्य तस्य (गञ्ज) ४ ४२ १ उपमायुक्तस्य (कृष्टे =मनुष्यस्य) ४ ४२ २ [उपमप्राति० मत्वर्थीयप्रत्ययस्य लुक्]

उपमस्याम् उपमायाम्, प्र०—अत्र 'वाच्छन्दसि' इति स्याडागम १ १४५ ५ [उपमप्राति० सप्तमी । उपमम् इति व्याख्यातम्]

उपमा उपमीयतेऽनयेति दृष्टान्त १ ३१ १५ दृष्टान्त १ १२४ २ सब व्यवहारो मे उपयुक्त अन्तरिक्षादि आर्याभि० २ २८, १३ ३ **उपमाः**=उपमिमते याभिस्ता. (भा०—दृष्टान्ता) १३ ३ [उप+मा माने (अदा०) धातो 'आतश्चोपसर्गे' अ० ३ ३ १०६ सूत्रेण स्त्रियाम् अङ्]

उपमातयः उपमा. ४ २३ ३ **उपमातिः**=उपमानम् ४ ४३ ४ [उप+मा माने (अदा०) धातोर्बाहुलकादौणादिकम् ति प्रत्यय]

उपमातिवनि. उपमातेर्विभाजक (अहि =मेघ) ५ ४१ १६ [उपमाति-वनिपदयो समास । उपमाति = उप+मा माने+ति । वनि =वन सम्भक्तौ (भ्वा०) धातोर्बाहुलकादौणादिक 'इ' प्रत्ययः]

उपमादम् य उपमा ददाति तम् (अग्नि=पावकम्) ३ ५ ५ [उपमोपपदे डुदाञ् दाने (जु०) धातो क प्रत्यय]

उपमासि प्रापयसि १ ६२ ७ परिमिमीषे १ १४२ २ **उपमाहि**=उपमन्यस्व ४ २२ १० [उप+मा माने (अदा०) धातोर्लट् लोट् च]

उपमित् य उपमिनोति स (रोव =रोवनम्) ४ ५ १ य उप=समीपे मिनोति प्रक्षिपति स १ ५९ १ [उप+डुमिञ् प्रक्षेपणे (स्वा०) धातो क्विप् । ह्रस्वस्य तुगागम]

उपमिताम् सब प्रकार की उत्तम उपमायुक्त (शाला) को सं० वि० १९६, अथर्व० ९ ३ १ [उप+मा माने (अदा०) धातो क्त । 'द्यतिस्यतिमा०' इतीकारादेश]

उपमिमीहि उत्कृष्टतया मान्य कुरु ७ १९ ११. उपमितान् कुरु १ ८४ २० [उप+माङ् माने शब्दे च (जु०) धातोर्लोट् । व्यत्ययेन परस्मैपदम्]

उपयच्छामि उत्कर्षेण गृह्णामि ३८ ६ [उप+यमु उपरमे (भ्वा०) धातोर्लट् । 'इपुगमियमा छ' इति छकारादेश]

उपयन्तम् समीप प्राप्नुवन्तम् (अध्यापकम्) २ ३३.१२ [उप+इण् गतौ (अदा०) धातो शतृ]

उपयन्ति समीपतया प्राप्नुवन्ति १ ८३ २ **उपयन्तु**= समीप प्राप्नुवन्तु ३ ४ समीप गमयन्तु ५ ६२ ४ [उप+ इण् गतौ (अदा०) धातोर्लट्]

उपया अधर्मी के समीप रहने वाले उसके सहायक को, आर्याभि० १ २६

उपयात समीपतया प्राप्नुत ४ ३५ १ **उपयातम्**= समीप प्राप्नुतम् ३.२५ ४. उपाऽऽप्नुत २ ३६ ८ **उपयाति**=समीप गच्छति ७ १ १२. **उपयाथः**=समीप प्राप्नुत १ १८३ १ समीपतया प्राप्नुथ १ १८२ २ [उप+या प्रापणे (अदा०) धातोर्लोट् । अन्यत्र लट्]

उपयामगृहीतः अध्यापननियमै स्वीकृत. (सुताऽध्येता) ७ ३३. सुनियमैर्गृहीताऽन्त करण (विद्वज्जन) २६ ६ सुनियमैर्निगृहीताऽऽत्मा २६ ५ सुनियमैरधीतविद्य भा०—सुशिक्षित. (इन्द्र =सेनापति) ७.२२ सर्वनियमोपनियमसामग्रीसहित (मुख्यसभासद्) ७ ३६ यमानां समूहो यामम्, उपगत च तद् याम चोपयामम्, उपयामेन गृहीत उपयामगृहीत परमेश्वर ७.२५. सेनासु नियमस्वीकृत (इन्द्र =सेनापति) ७ ३७. यमनियमादिभिर्योगाङ्गै साक्षात् स्वीकृत (इन्द्र.=ईश्वर) ७ ४० सेनादिसामग्रीसंगृहीत (इन्द्र =सेनापति) ८ ४४ भा०—यमादिसाधनाऽन्वित (योगजिज्ञासुर्जन) ७ ८ योगाऽभ्यासेन स्वीकर्त्तु योग्य (इन्द्र =भगवान्) ७ ३६ राज्याङ्गैर्युक्त (शिल्पविधिविज्जन) ७ १६ राज्यगृहाश्रमसामग्रीसहित (विद्वान् राजा वा) ६ ४ राज्यव्यवहाराय स्वीकृत (अग्नि =सभापती राजा) ८ ३८ राजनियमै स्वीकृत (इन्द्र =सभासेनापति) ७ ३८ उपगतैर्यामैर्यमै स्वीकृत (जगदीश्वर) ८ ४१ उपगतयमैर्विदित (ईश्वर) २६ ३ उपयामैर्गृहीतानि जितानि इन्द्रियाणि येन स (इन्द्र = विद्वज्जन) २६ ४ उपयामा सामग्रीगृहीता येन स (गृहस्थो जन) ८ ३३ उपयामेन सत्कर्मणा योगाभ्यासेन गृहीत स्वीकृत (जगदीश्वर) २३ ४ यो यामैर्यमसम्बन्धिभि कर्मभिरुप समीपे गृहीत साक्षात्कृत (भगवान्) २३ २ कर्षकादिभि स्वीकृत (राजपुरुष) १९ ६ उपयामैरुत्तमनियमै सङ्गृहीत, भा०—शिक्षित (विद्वान्) २० ३३ उपगतैर्वर्म्यैर्यामैर्यमसम्बन्धिभिर्नियमैर्गृहीत सयुत (राजप्रजाजन) १९ ८ उपयामै. प्रजाराजजनै स्वीकृत (इन्द्र =सम्राट्) ६ २ उपगतैर्यामानामिमै सेवकै पुरुषै स्वीकृत (इन्द्र =सम्राट्) ६ २

उपप्रक्षे समीपतया सम्पर्के ५ ४७ ६ [उप+पृची सम्पर्के (रुधा०) धातोश्छान्दस रूपम्]

उपप्रयन् सामीप्यङ्गच्छन् (सेनापति) १ १० ३ ४ **उपप्रयन्तः**=उत्कृष्ट निष्पादयन्तो जानन्त (जना) ३ ११ समीपतया प्राप्नुवन्त (राजप्रजाजना) ४ ३६ ५ प्रयत्नेनोपाय कुर्वन्त (मनुष्या) ७ ४४ २ समीप प्राप्तवन्त (मनुष्या.) १ ७४ १ [उप+प्र+इण् गतौ (अदा०) धातो शतृ]

उपप्रयन्ति समीप गच्छन्ति ३ १२ ७ **उपप्रयन्तु**= प्राप्नुवन्तु, भा०—उपतिष्ठेयु ३४ ५६ [उप+प्र+इण् (अदा०) धातोर्लट्]

उपप्रयाहि समीपतया गच्छाऽऽगच्छ १ ८२.६ समीप प्राप्नुहि १५ ५२ [उप+प्र+या प्रापणे (अदा०) धातोर्लोट्]

उपप्रवहतः अच्छे प्रकार से प्राप्त हो सकते है स० वि० १०५, ५ ४१ ७ [उप+प्र+वह प्रापणे (भ्वा०) धातोर्लट्]

उपप्रसस्त्रे सम्वन्ध को समीपता से प्राप्त होती है स० वि० १०४, २ ३५ ५ [उप+प्र+सृ गतौ (भ्वा०) धातोर्लिट् । व्यत्ययेनात्मनेपदम्]

उपप्राऽगात् समीपतया गच्छतु प्राप्नोतु १.१६२ ७ समीप गच्छति १ १६३ १२ समीपतया प्राप्नुयात् २५.३० [उप+प्र+इण् गतौ (अदा०) धातोर्लुङ् । 'इणो गा लुङी' ति गादेश । 'गातिस्थाघु०' इति सिचो लुक्]

उपप्रेत समीपतया प्राप्नुत ३ ५३ ११ [उप+प्र+ इण् गतौ (अदा०) धातोर्लोट्]

उपप्रैत् समीप प्राप्नोति ५ ३०.६ [उप+प्र+इण् गतौ (अदा०) धातोर्लङ्]

उपबर्बृहत् सामीप्येन भृशमुपवर्हयति ५ ६१.५ [उप+वृह वृद्धौ (भ्वा०) धातोर्यङ्लुगन्ताल् लङ् । अड-भावश्च]

उपबर्हणीम् सुवर्द्धिकाम् (क्षा=भूमिम्) १.१७४ ७. [उप+वृह वृद्धौ (भ्वा०) धातोर्ल्युडन्तान् ङीप् स्त्रियाम्]

उपब्दिः महाशब्दकर्त्ता (विद्वज्जन) १.७४ ७ वाक् प्र०—उपब्दिरिति वाङ्नाम, निघ० १ ११, १ १६६.७

उपब्रवामहै समीपतयोपदिशेम ५.५१ १२. [उप+ ब्रूञ् व्यक्ताया वाचि (अदा०) धातोर्लोट् । 'वहुल छन्दसी' ति शपो न लुक्]

उपब्रुवते समीपमुपदिशन्ति १.१३४ २. **उपब्रुवे**= समीप्येनोपदिशामि १ १७६ ५ समीपमुपदिशेयम् १ १८५ ७ उपयोगि वच उपदिशेयम् १ १८८ ८. समीप-तया कथयामि ३ ३७ ५ **उपब्रूते**=समीपमुपदिशेत् १ ४० २ [उप+ब्रूञ् व्यक्ताया वाचि (अदा०) धातोर्लट्]

उपभरन्ती उपधरन्ती (स्वसा=भगिनी) २ ५ ६ [उप+भृञ् भरणे (भ्वा०) धातो शत्रन्तान् ङीप्]

उपभूषतम् सामीप्येनाऽलङ्कुरुतम् ३३ ८८ [उप+ भूप अलङ्कारे (भ्वा) धातोर्लोट्]

उपभृत् योपगत विभर्त्त्यनया हस्तक्रियया सा घृताची=होमक्रिया) २ ६ [उप+डुभृञ् धारणपोषणयो (जु०) धातो स्त्रिया सम्पदादित्वात् क्विप् । ह्रस्वस्य तुगागम । अथेदमन्तरिक्षमुपभृत् श० १ ३ २ ४ अन्तरिक्ष-मुपभृत् तै० ३.३ १ २. सावित्र्युपभृत् तै० ३ ३ ७ ६. उपभृत् सव्य. (हरत) तै० ३ ३ १ ५ अत्तैव जुहूराद्य उपभृत् श० १.३ १.११]

उपभ्राजन्ते समीप प्रकाशन्ते ७ ५५ २ [उप+ भ्राजृ दीप्तौ (भ्वा०) धातोर्लट्]

उपमदन्ति समीपतया कामयन्ते, भा०—सिद्धकामा भवन्ति २५ ३० [उप+मदी हर्षे (दिवा०) धातोर्लट् । व्यत्ययेन शप्]

उपमन्थितारम् समीपे विलोडितारम् (दुर्जनम्) ३० १२. [उप-मन्थ विलोडने (भ्वा०) धातो कर्त्तरि तृच्]

उपमन्युम् उप समीपे मन्तु योग्यम् (कारु=शिल्प-कार्यकर्तृजनम्) १ १० २ ६ [उप-मन्युपदयो समास । मन्यु=मन ज्ञाने (दिवा०) धातोरौणादिको युच् । मन्युरिति क्रोधनाम निघ० २ १३ पदनाम निघ० ५ ४]

उपमम् उपमाम् ५ ६४ ४ उपमानम् १ ११० ५ दृष्टान्तस्वरूपम् १ ६१ ३ उपमेयसाधकतमम् (अर्क= धनधान्यम्) ७ ४० ७ येनोपमीयते तम् (अर्क=सत्कर्त्तव्य-मन्न विचार वा) ७ ३६ ७ उपमायुक्तम् (नाम) ५ ३ ३ येनोपमिमीते तम् (केतु=प्रज्ञाम्) ७ ३० ३ [वस्तुत उपगतेन स्तुतम् १ ११० ५ उपमे अन्तिकनाम निघ० २ १६. उप+मा माने (अदा०) धातो 'आतश्चोपसर्गे' सूत्रेण क]

उपमर्मृजन्त अत्यन्त मार्जयन्तु शोधयन्तु १ १३५.५ [उप+मृजूष् शुद्धौ (अदा०) धातोर्यङ्लुगन्ताच्छान्दस रूपम्]

उपमश्रवस्तमम् उपमीयते येन तच्छ्रवस्तदतिशयितम्

वचि' रिति वचिरादेश]

उपवक्तेव यथोपवक्ता तथा (सविता=सूर्य इव राजा) ६.७१ ५ [उपवक्तृ-इवपदयो समास]

उपवक्षतः समीप वहत, अ०—उपगत वहत प्रापयत, प्र०—अत्र लडर्थे लेट् १ १६ २ [उप+वह प्रापणे (भ्वा०) धातोर्लेट्। 'सिब् बहुल लेटी' ति सिप्]

उपवसुम् उप समीपे वसूनि यस्या ताम् (स्वस्ति=सुखम्) ६ ५६ ६ [उप-वसुपदयो समास। वसुरिति धननाम निघ० २ १०]

उपवहतः समीपतया प्राप्नुत १ ८४ २ **उपवहन्तु**=समीप प्राप्नुवन्तु १ ४६ १ [उप+वह प्रापणे (भ्वा०) धातोर्लट् लोट् च]

उपवाकम् उपगता वाग् यस्मिँस्तम् (सूर्यम्) १ १६४.८

उपवाकाः=उपगता प्राप्ता यवा १९.२२ **उपवाकैः**=उपनयन्ति यैस्तै. (कर्मभि) १९ ९०

उपवाकाभिः उपदेशक्रियाभि २१ ३० उपगताभिर्वाग्भि २१ ३१ [यच्छ्लेष्माणस्ता उपवाका (अभवन्) श० १२ ७ १ ३]

उपवाच्यः उपवक्तु योग्य (इन्द्र=सूर्य) १ १३२.२. उपदेशनीय (सविता=सर्वैश्वर्यप्रद ईश्वर) ४.५४ १ [उप+वच परिभाषणे (अदा०) धातोर्ण्यत् प्रत्यय]

उपविष्टाय य उपविशति तस्मै (जनाय) २२ ७. [उप+विश प्रवेशे (तुदा०) धातो क्तो बाहुलकादौणादिक]

उपवीतिने प्रशस्तमुपवीत यज्ञोपवीत विद्यते यस्य तस्मै, भा०—यज्ञोपवीतधारकाय (सेनाधीशाय) १६ १७. [उपवीतप्राति० मत्वर्थे इनि। उपवीतम्=उप+वी गतिप्रजनकान्त्यसनखादनेपु (अदा०) धातो क्त सज्ञाया 'क्तिच् क्तौ च सज्ञायाम्' अ० ३ ३ १७४ सूत्रेण]

उपवेतु उत्कृष्टतया व्याप्नोतु ५ ११ ४ [उप+वी गतिप्रजनकान्त्यसनखादेनपु (अदा०) धातोर्लोट्]

उपवोचन्त उपगतमुपदिशन्तु १ १२७ ७ **उपवोचे**=समीपमुपदिशेयम् ४ ४६ ४ [उप+वच परिभाषणे (अदा०) धातोर्लुङ्। अडभावो व्यत्ययेनात्मनेपदञ्च]

उपशाकेभिः उपशक्यन्तै यै कर्मभिस्तै' प्र०—अत्र 'बहुल छन्दसि' इति भिस ऐस् न १ ३३ ४. [उप+शक्लृ शक्ती (स्वा०) धातोर्घञ्]

उपशिक्षति उत्कृष्टतया विद्या ददाति, प्र०—अत्र व्यत्ययेन परस्मैपदम् ६ २८ २ **उपशिक्षन्ति**=समीपतया शिक्षा प्रददति १ १७३ १०. [उप+शिक्ष विद्योपादाने (भ्वा०) धातोर्लट्। व्यत्ययेन परस्मैपदञ्च]

उपशिक्षन् उपगता विद्या ग्राहयन् (ब्रह्मा=चतुर्वेदविज्जन) ५ ४०.८ [उप+शिक्ष विद्योपादाने (भ्वा०) धातो. शतृ। व्यत्ययेन परस्मैपदम्]

उपशिक्षायै उपवेदादिविद्योपादानाय, भा०—परीक्षादानाय ३० १० [उप+शिक्ष विद्योपादाने (भ्वा०) धातो 'गुरोश्च हल' इति स्त्रियाम् अङ्]

उपशिश्रियाणाः ये उपश्रयन्ति ते (मरुत=वनिष्ठा योद्धृजना) ७ ५६ १३ [उप+श्रिञ् सेवायाम् (भ्वा०) धातोश्छन्दसि लिट्। 'लिट कानज्वा' इति कानच्]

उपशृणवत् समीपतया शृणुयात् १७.९० [उप+श्रु श्रवणे (भ्वा०) धातो' शतृ। 'श्रुव शृ चे' ति श्नु शृ आदेशश्च]

उपशृण्वन्ति सामीप्येन शृण्वन्ति १२ ९४ [उप+श्रु श्रवणे (भ्वा०) धातोर्लट्। 'श्रुव. शृ चे' ति श्नु, शृ आदेशश्च]

उपशेषे सन्तानोत्पादनाय ऋ० भू० २११ [शेप इत्यपत्यनाम निघ० २ २]

उपश्रवत् समीप शृणुयात् ६.५० ६ [उप+श्रु श्रवणे (भ्वा०) धातोर्लेट्। छान्दसत्वात् 'श्रुव शृ च' इति श्नुर्न भवति]

उपश्रिताः उपश्लेपतया श्रिता कण्ठा येपान्ते (रुद्रा=जीवा वायवो वा) १६ ५६ [उप्+श्रिञ् सेवायाम् (भ्वा०) धातो क्त]

उपश्रुतिम् उपगता श्रूयमाणाम् (गिरा=वाचम्) ८ ३४ उपयुक्ता श्रुतिं श्रवणम् १.१०.३ [उप+श्रु श्रवणे (भ्वा०) धातो क्तिन्]

उपश्रोता य उपद्रष्टा सञ्छृणोति (उपदेशको जन) ७ २३ १ [उप+श्रु श्रवणे (भ्वा०) धातोस्तृच्। वायुर्वा उपश्रोता गो० उ० ४ ९ वायुरुपश्रोता तै० ३ ७ ५ ४]

उपश्वासय उपप्राणय ६ ४७ २९ [उप+श्वस प्राणने (अदा०) धातोर्णिचि लोटि च रूपम्]

उपसचन्ते समीप समवयन्ति १ १९० २ [उप+षच् समवाये (भ्वा०) धातोर्लट्। व्यत्ययेनात्मनेपदम्]

उपसत्ता उपसीदन् (अग्नि=विनयप्रकाशितो राजा) २७ ४ य उपसीदति स (अग्नि=विद्वज्जन) २७ २ [उप+षद्लृ विशरणगत्यवसादनेपु (भ्वा०) धातो कर्त्तरि तृच्]

उपसदम् य समीपे सीदति तम् (पुरुषम्) ३० ९

साङ्गोपाङ्गसाधनै (स्वीकृत) (अध्यापक) ८ ४७ शास्त्र-नियमोपनियमा गृहीता येन स (कुमारब्रह्मचारी) ८ १ उपयामेन विवाहनियमेन गृहीत (गृहपति) ८ ७. उपयामाय गृहाश्रमाय गृहीत (गृहपति) ८ ११ साधनोपसाधनै स्वीकृत (इन्द्र =राजा) ६ ३ ब्रह्मचर्यनियमै स्वीकृत (अङ्ग =राजा) १० ३२ उपनियमै स्वीकृत (योगमभीप्सु) ७ ११ उपात्तैर्गृहीत, भा०—यमादिभिर्योगाङ्गैर्निरुद्धचित्त (योगजिज्ञासु) ७ ४ उपयामा. शौचादयो नियमा गृहीता येन स (योगी) ८ १२ विनयादिराजगुणैर्युक्त (सभापती राजा उपदेशको वा) ७ २० विद्याविचारसयुक्त (विद्वज्जन) २६ ८ [याम.=यमु उपरमे (भ्वा०) धातोर् अच्। तत समूहार्थेऽण्, तस्येदमर्थेऽण् वा। उप-यामपदयो समासे तत उपयाम-गृहीतपदयो समास। गृहीत =ग्रहउपादाने (क्र्या०)+क्त]

उपयामम् उपगत नियमम् २५ २ [उप-यामपदयो समास। याम.=यमु उपरमे (भ्वा०) धातोर्घञ् 'यम समुपनिविपु च' इति सूत्रेण। इय (पृथिवी) वाऽउपयाम इय वा इदमन्नाद्यमुपयच्छति पशुभ्यो मनुष्येभ्यो वनस्पतिभ्य श० ४ १ २ ८]

उपयासत् उपागच्छेत् ५ ४० ४ [उप+या प्रापणे (अदा०) धातोर्लेट् सिव्विकरण]

उपयाहि उपगत प्राप्नुहि ८.२० उपाऽऽगच्छ ३ ६० ७ समीप प्राप्नुहि १ १३५ १ समीप गच्छ प्राप्नुहि वा १ ८२ ५ [उप+या प्रापणे (अदा०) धातोर्लोट्]

उपयुज्महे समादधीमहि, प्र०—अत्र वहुल छन्दसि इति श्यनो लुक् १ १६५ ५. [उप+युज समाधौ (दिवा०) धातोर्लट्। श्यनो लुक्]

उपयुञ्जाथे नियुक्तौ भवत १ १५१ ४ [उप+युजिर् योगे (रुधा०) धातोर्लट्]

उपरताति उपरतातौ पलै मेघाऽस्त्रादिभि योद्धव्ये सङ्ग्रामे ७ ४८ ३ उपराणा मेघानामवकाशवत्यन्तरिक्षे १ १५१ ५ [उपर इति मेघनाम निघ० १ १० उपरो मेघो भवति। उपरमन्तेऽस्मिन्नभ्राणि। उपरता आप इति वा नि० २ २१]

उपरम् मेघम् १.६२ ५ मेघमिव प्र०—उपरमिति मेघनाम निघ० १ १०, ५ ३१ ११ **उपरा:**=समीपे रममाणा (किरणा) ५ २६ ५ **उपरेण**=उत्कृष्टनियमेन ६.२ [उपर इति मेघनाम निघ० १.१० आ उपर उपल इत्येताभ्या साधारणानि पर्वतनामभि (उपर शब्दो मेघपर्वतयोर्वाचक इत्यर्थ) उपर उपलो मेघो भवति, उपरमन्तेऽस्मिन्नभ्राणि, उपरता आप इति वा नि० २ २२]

उपरा मेघ इव १ ५४ ७ समीपस्था दिक् १ १६७ ३ **उपरासु**=श्रेष्ठासु (मनुष्यादिप्रजासु) ४ ३७ ३ दिक्षु, प्र०—उपरा इति दिङ्नाम निघ० १ ६, १ १२७ ५ [उपरा इति दिङ्नाम निघ० १ ६]

उपरासत् उपदद्यात् ६ ५० ६ [उप+रासति दानकर्मा (निघ० ३ २०) धातोर्लेट्]

उपरास: वानप्रस्थ सन्यास। श्रममाप्ता गृहाश्रमभोगेभ्य उपरता (पितर =प्रजाशोधका वृद्धा जना) १९ ६८ [उप+रमु क्रीडायाम् (भ्वा०) धातो 'अन्येष्वपि दृश्यते' अ० ३ २ १०१ सूत्रेण ड प्रत्यय। प्रथमावहुवचने च जस्यसुगागमे रूपम्]

उपरि ऊर्ध्वं वर्त्तमानम् (द्या=प्रकाशम्) ४ ३१ १५ ऊर्ध्वमुत्कृष्टे व्यवहारे १८ ४४ उत्कर्षे ३३ ८५ सर्वोपरि विराजमाना (मति =प्रज्ञा) १३ ५८ ['उपर्युपरिष्टात्' अ० ५ ३ ३१ सूत्रेण ऊर्ध्वस्योपभावो रिल् च प्रत्ययो निपात्यते। दिग्देशकालेषु]

उपरिप्रुता उपरि प्रवते यस्तेन (भङ्गेन=मर्दनेन) ७ ३ [उपर्युपपदे प्रुङ् गतौ (भ्वा०) धातो क्विप्। ह्रस्वस्य तुगागमे तृतीयाया रूपम्]

उपरिष्टात् ऊर्ध्वात् ३७ १२ ['उपर्युपरिष्टात्' अ० ५ ३ ३१. सूत्रेण दिग्देशकालेषु वर्त्तमानस्योर्ध्वस्योपभावो रिष्टातिल् च निपात्यते]

उपरिसद: ये उपरि उत्कृष्ट आसने व्यवहारे वा सीदन्ति ते (देवा =आयुर्वेदविदो विद्वाम) ६ ३६ **उपरिसद्भ्य:**=सर्वोपरि विराजमानेभ्य (देवेभ्य =विद्वद्वरेभ्य) ६ ३५ [उपर्युपपदे षद्लृ विशरणगत्यवसादनेषु (भ्वा०) धातो क्विप्प्रत्यय]

उपरिस्पृशम् य उपरि स्पृशति तम् (अधिराजान=राजानम्) ३४ ४६ [उपर्युपपदे स्पृश सम्पर्शने (तुदा०) धातो क्विप्]

उपरेण उत्कृष्टनियमेन ६ २

उपलान् मेघान्, प्र०—उपल इति मेघनाम, निघ० १ १०, २५ ८ [उपल इति (मेघपर्वतयोर्नाम)। आ उपर उपल इत्येताभ्या साधारणानि पर्वतनामभि' नि २ २२]

उपवक्ता उपदेशकानामुपदेशक (विद्वज्जन) ४ ६ ५ [उप+ब्रूञ् व्यक्तायां वाचि (अदा०) धातोस्तृच्। 'ब्रुवो

भूमी) २ ३२ १ [उप+ष्टुञ् स्तुतौ (अदा०) धातो क्त]

उपस्तुतौ निकटे प्रशसितौ (अश्विनौ=अध्यापकोपदेशकौ) १ ८१ ७ [उप+ष्टुञ् स्तुतौ (अदा०) धातो क्त]

उपस्तुत्यम् उपस्तोतुमर्हम्(कर्माङ्गमग्निम्)१ १६३.१ उपगतस्तुतिविषयम्, भा० सर्व प्रशसितम् (कर्म) २९ १२ समीपे प्रशसनीयम् (उक्थ्य कर्म) १ १३६ २ [उप+ष्टुञ् स्तुतौ (अदा०) धातो 'एतिस्तुशास्वृदृजुष क्यप्' अ० ३ १ १०९. सूत्रेण क्यप्]

उपस्तुहि सामीप्येन प्रकाशय १ १२ ७ समीपतया प्रशस २ ८ १ समीपतया प्रशसय १ २२ ६ [उप+ष्टुञ् स्तुतौ (अदा०) धातोर्लोट्]

उपस्तृणन्ति आच्छादयन्ति २५ ३९ बिछौने आदि करते है स० वि० २०९, अथर्व० ९ ६ ८ [उप+स्तृञ् आच्छादने (क्रचा०) धातोर्लट्]

उपस्तृणीषणि उपाऽऽच्छादनीयम् (ऐश्वर्यम्) ६ ४४ ६]

उपस्तोषाम समीपतया प्रशसेम ६ ५५ ४ [उप+ष्टुञ् स्तुतौ (अदा०) धातोर्लोट्। उपस्तोपाम उपस्तुम नि० ८ ७]

उपस्थम् समीपस्थम् (वायुम्) २ ३५ ९ उपतिष्ठन्ति यस्मिँस्तम् (सज्जनम्) २ ४१ २१ **उपस्थे**=कर्तॄणा समीपस्थे देशे १ ९५ ५ उत्सर्गे १ ११७ ५ स्वाङ्के ११ ५७ समीपे स्थातव्ये व्यवहारे १ १०९ ३ अङ्क १ १८५ ५ उत्सङ्गे १२ ३९ गोद मे आर्याभि० १ २७, ऋ० ५ ३ २७ २५ उपतिष्ठन्ति यस्मिँस्तस्मिन् प्र०—अत्र 'घञर्थे कविधानम् स्था०' अ० ३ ३ ५८ इति वार्त्तिकेनाऽधिकरणकारके क प्रत्यय १ ३१ ९ समीपे स्थापयितव्ये व्यवहारे १ १०९ ३ सामीप्ये ११ २१ **उपस्थात्**=य समीपे तिष्ठति तस्मात् (यानात्) ६ ६२ ६ समीपात् ३ ३३ १ समीपस्थव्यवहारात् १ ९५ ४ **उपस्था**=उपतिष्ठन्ति यस्मिँस्तत्र १ ३५ ६ क्रोडे तिष्ठति सा (उपा) १ १२४ ५ [उपस्थे उपस्थाने नि० ७ २६ उप+ष्ठा गतिनिवृत्तौ (भ्वा०) धातो 'घञर्थे कविधानम्। स्थास्नापाव्यधिहनियुध्यर्थम्' अ० ३ ३ ५८ वा० सूत्रेणाधिकरणे क प्रत्यय]

उपस्थात् उपतिष्ठते २ ३ १० [उप+ष्ठा गतिनिवृत्तौ (भ्वा०) धातोर्लुङ्। अडभावश्छान्दस]

उपस्थाय सामीप्य प्राप्य ३ ४८.३ यथावत् जान कर उपस्थित निकट प्राप्त होकर आर्याभि० २ १०, ३२ ११ पठित्वा सरोव्य वा, भा०—सम्पाद्य लब्ध्वा ३२.११ उपगतो भूत्वा विदित्वा च ऋ० भू० ८९ समीप स्थित होकर स० वि० २१५, ३२ ११ [उप+ष्ठा गतिनिवृत्तौ (भ्वा०) धातो क्त्वा। समासे क्त्वो ल्यप्]

उपस्थायम् अभिक्ष्णमुपस्थातुम् १ १४५ ४ [उप+ष्ठा गतिनिवृत्तौ (भ्वा०) धातो 'आभीक्ष्ण्ये णमुल् च' अ० ३ ४ २२ इति णमुल्]

उपस्थावराभ्यः उपस्थिताभ्योऽवराभ्यो निकृष्टक्रियाभ्य ३० १६ [उपस्था-अवरापदयो समास। उपस्थ इति व्याख्यातम्]

उपस्थिताय प्राप्तसमीपत्वाय (पदार्थाय) २२ ७ [उप+ष्ठा गतिनिवृत्तौ (भ्वा०) धातो क्त। 'द्यतिस्यतिमा०' इतीकारादेश]

उपस्थुः उपतिष्ठन्तु ७ १८ ३ [उप+ष्ठा गतिनिवृत्तौ (भ्वा०) धातोर्लुङ्]

उपस्थेयाम उपतिष्ठेम ६ ४७ ८ [उप+ष्ठा गतिनिवृत्तौ (भ्वा०) धातोराशिषि लिङि 'लिङ्याशिष्यङ्' अ० ३ १ ८६ सूत्रेणाङिकृते 'छन्दस्युभयथा' अ० ३.४ ११७ सूत्रेण सार्वधातुकत्वादियादेश]

उपस्थेषम् उपपत्सीय, प्र०—अत्र 'लिङ्याशिष्यङ्' इत्यङि कृते 'छन्दस्युभयथा' इति सार्वधातुकत्वादियादेश आर्धधातुकत्वात् सकारलोपो न भवति २ ८

उपस्रवन्तु प्राप्नुवन्तु ३५ २० [उप+स्रु गतौ (भ्वा०) धातोर्लोट्]

उपहत्नुम् य उपहन्ति तम् (वीरपुरुषम्) २ ३३.११ [उप+हन हिंसागत्यो (अदा०) धातो 'कृहनिभ्या क्त्नु' उ० ३ ३० इति क्त्नु प्रत्यय]

उपहरति स्वीकार करता है स० वि० २१०, अथर्व० ९ ६ १२ [उप+हृञ् हरणे (भ्वा०) धातोर्लोट्]

उपहिन्वन्तु सामीप्येन प्रीणयन्ति सेधयन्ति, प्र०—अत्र लडर्थे लोडन्तर्गतो ण्यर्थश्च १ २३ १७ [उप+हि गतौ वृद्धौ च (स्वा०) धातोर्लोट्। हिनोत इति पदनाम निघ० ४ ३]

उपहूतस्य समीपमाहूतस्य (पयस=उदकस्य दुग्धस्य वा) ३८ २८ सत्कारेणाऽऽहूतोपस्थितस्य (वीरगृहपते) ८ १२ **उपहूतः**=सम्मानित उपस्थित (वीरगृहपति) ८ १२ सत्कृत्याऽऽहूत (जन) २० ३५ उप समीपे कृताऽऽह्वान (विद्वज्जन) ३८ २८ समीप सम्यक्

उपसीदन्ति यस्या ता वेदीम् २ ६ १. **उपसदाम्**=य उपसीदन्ति तेषामतिथीनाम् १६ १४ [उप+षद्लृ विशरणगत्यवसादनेषु (भ्वा०) धातो कर्त्तरि क्विप्। ते (देवा) एताभिरुपसद्भिरुपासीदस्तद् यदुपासीदस्तस्मादुपसदो नाम श० ३ ४ ४ ४ ऋतव उपसद श० १० २.५.७ मासा उपसद १० २ ५ ६ अर्धमासा उपसद श० १० २ ५ ५. अहोरात्राणि वा ऽउपसद श० १० २ ५ ४ इमे लोका उपसद श० १० २ ५ ८ एतदु यज्ञे तप । यदुपसद, तपो वा ऽउपसद श० १० २ ५ ३ तपो ह्युपसद श० ३ ६ २ ११ ग्रीवा वै यज्ञस्योपसद श० ३ ४ ४ १ वज्रा वा ऽउपसद श० १० २.५ २ जितयो वै नामैता यदुपसद ऐ० १ २४ ता (उपसद) वा ऽज्यहविषो भवन्ति श० ३ ४ ४ ६ इषु वा एता देवा समस्कुर्वत यदुपसदस्तस्याग्निरनीकमासीत्, सोम शल्यो विष्णुस्तेजन वरुण पर्णानि ऐ० १ २५]

उपसदेम समीप प्राप्नुयाम ६ ७५ ८ [उप+षद्लृ-विशरणगत्यवसादनेषु (भ्वा०) धातोर्लिङ्। छान्दसत्वात् सीदादेशो न भवति]

उपसद्य सामीप्य प्राप्य १८ ७५ [उप+षद्लृ विशरणगत्यवसादनेषु (भ्वा०) धातो क्त्वा। समासे क्त्वो ल्यप्]

उपसद्यः समाश्रयितु योग्य (परमेश्वर) ऋ० भू० २२२ प्राप्तु योग्य (न्यायाधीशो राजा) २ २३ १३ समीप जाने और शरण लेने योग्य (सभापति राजा) स० प्र० १८३, अथर्व० ६ १० ९८ १ **उपसद्याय**=समीपे स्थापयितु योग्याय (यतिरूपायाऽतिथये) ७ १५ १ [उप+षद्लृ विशरणगत्यवसादनेषु (भ्वा०) धातोर् ण्यत्। छान्दसत्वाद् वृद्धिर्न भवति]

उपसन्नमन्तु समीप प्राप्त होकर नम्र होवे स० वि० १६०, अथर्व० १६ ४१ १ यथावत् सत्कार किया करे स० वि० १६८, अथर्व० १६ ४१ १ [उप+सम्+णम प्रह्वत्वे शब्दे (भ्वा०) धातोर्लोट्]

उपसंप्रयात समीप सम्यक् प्राप्नुत १५ ५३ [उप+सम्+प्र+या प्रापणे (अदा०) धातोर्लोट्]

उपसि समीपे ५ ४३ ७ [उपसि उपस्थे नि० ६ ६]

उपसीदन् समीपतया तिष्ठन्ति १ ७२ ५ समीपतयाऽवतिष्ठन्ते १.६५ १ [उप+षद्लृ विशरणगत्यवसादनेषु (भ्वा०) धातोर्लङ्। अडभावश्छान्दस । शिति सीदादेश]

उपसृज उत्कृष्टतयोत्पादय ३ ४ १०. उत्कर्षेण निर्मिमीहि ६.३६ ४. **उपसृजन्ति**=समीपतया ददते २ ११६ समीप प्रयच्छन्ति २ २ १३ [उप+सृज विसर्गे (तुदा०) धातोर्लोट्]

उपसृजन् समीप प्रापयन्निव (गृहस्थो जन इव) ८ ५१ [उप+सृज विसर्गे (तुदा०) धातो शतृ]

उपसेक्तारम् उपसेचनकर्त्तारम् (पुरुषम्) ३० १२ [उप+षिच् क्षरणे (तुदा०) धातो कर्त्तरि तृच्]

उपसेदिम समीपतया प्राप्नुयाम १ ८६ २ उपतिष्ठेम ५ ८ ४. **उपसेदुः**=उपसीदन्ति ७ ३३ ६ [उप+षद्लृ विशरणगत्यवसादनेषु (भ्वा०) धातोर्लिट्। उपसेदिम= उपसीदेम नि० १२ ३६]

उपस्तभायत् उपस्तभ्नीयात् ४ ५ १ [उप+स्तम्भु स्तम्भनार्थे सौत्रो धातु, तस्य णिचि लेटि च रूपम्। मकारलोपश्छान्दस]

उपस्तयः ये उप समीपे स्त्यायन्ति सघ्नन्ति ते (वैद्या) प्र०—अत्रोपपूर्वात् 'स्त्यै सघाते' इत्यस्मादौणादिक क्विप् सम्प्रसारण च १२ १०१ **उपस्तिः**=सहति (मित्रजन) १२ १०१. [उप+ष्टचै शब्दसघातयो (भ्वा०) धातोरौणादिक क्विप्, सम्प्रसारण पूर्वरूपे च रूपम्]

उपस्तिरे उपस्तृणामि, प्र०=अत्र 'वाच्छन्दसि' इति रेफादेश २ ३१ ५ [उप+स्तॄञ् आच्छादने (क्र्या०) धातोश्छान्दस रूपम्]

उपस्तिरे आस्तरणे ५ ८५.१ सस्तराय ४ ३३ १

उपस्तुतम् उपगतैर्गुणै प्रशसितम् (सद्वैद्यम्) १ ११२ १५ य उपगतैर्गुणै स्तूयते तम् (सुवीर्य=सुबलम्) १ ३६ १७ **उपस्तुतः**=समीपे प्रशसित (इन्द्र=राजा) ७ २७ ३ उपगत स्तौति स उपस्तुतो विद्वान् प्र०—अत्र स्तुधातोर्बाहुलकादौणादिक क्त प्रत्यय १ ३६ १० **उपस्तुताः**=उपगतेन स्तुता (ऋभव=मेधाविनो जना) १ ११० ५ [उप+ष्टुञ् स्तुतौ (अदा०) धातो क्त]

उपस्तुता उपगतप्रशसया कीर्त्तितौ (अश्विना=स्त्रीपुरुषौ) ५ ७६ २ उपगतैर्गुणै प्रशसितौ (अध्यापकोपदेशकौ) १ १३६ १ [उप+ष्टुञ् स्तुतौ (अदा०) धातो क्त। 'सुपा सुलुक्०' इत्याकार]

उपस्तुतिम् उपगता प्रशसाम् १ १४८ २ उपमिता प्रशसाम् ४ ५६ ५ **उपस्तुतिः**=उपगता चाऽसौ स्तुति १ १५८ ४ **उपस्तुत्या**=ययोपस्तौति तया (वाचा) ६ ६१ १३ समीपेन स्तुत्या २१ ४६ [उप+ष्टुञ् स्तुतौ (अदा०) धातो स्त्रिया क्तिन्]

उपस्तुते उप समीपे प्रशसिते (द्यावापृथिवी=सूर्य-

सामीप्येन गच्छ ५ ३९ [उप+इण् गतौ (अदा०) धातोर्लुङ्। 'इणो गा लुङि' सूत्रेण गादेशे 'गातिस्था०' इति सिचो लुक्]

उपाघ्नत नित्य घ्नन्ति ऋ० भू० २३८ [उप+आङ्+हन हिंसागत्यो (अदा०) धातोर्लङ्। 'आङो यमहन' इत्यात्मनेपदम्]

उपाचर समीप समन्तात् प्राप्नुहि १ १८७.३ [उप+आङ्+चर गतौ (भ्वा०) धातोर्लोट्]

उपाचरत् उपचारिणीव वर्त्तते १ ४६ १४ [उप+चर गतौ (भ्वा०) धातोर्लङ्]

उपाजत समीपतया विजानीत १ १६१ ६ [उप+आङ्+अज गतिक्षेपणयो (भ्वा०) धातोर्लोट्]

उपातसत् उपभूषयेत्, भा०—प्रशसयेत् २३ २८ [उप+तसि अलकारे (चुरा०) धातोर्लङ्। नुमागम आगमशासनस्यानित्यत्वात्]

उपातिष्ठन्त समीप स्थिरा भवेयु, प्र०—अत्र लिडर्थे लङ् १ ११ ६ [उप+ष्ठा गतिनिवृत्तौ (भ्वा०) धातोर्लङ्। व्यत्ययेनात्मनेपदम्]

उपानट् समीपतया समन्ताद व्याप्नोति १७ ८६. [उप+आङ्+नशत् व्याप्तिकर्मा (निघ० २.१८) धातोर्लङ्]

उपाऽऽयन् उपायन्ति, प्राप्नुवन्ति १३ ५१ [उप+आङ्+इण् गतौ (अदा०) धातोर्लङ्]

उपायने समीपे प्राप्ते (काले) २ २८.२. [उप+अय गतौ (भ्वा०) धातोर्ल्युट्]

उपाऽऽयात उत्कर्षेण समन्तात् प्राप्नुत ४ ३४.५ [उप+आङ्+या प्रापणे (अदा०) धातोर्लोट्]

उपाऽऽयातन समीप समन्तात्प्राप्नुत ४ ३४ ६ [उप+आङ्+या प्रापणे (अदा०) धातोर्लोट्। तस्य तनपादेशश्छान्दस.]

उपायातम् समीपतया सम्यक् प्राप्नुतम् १ ११६ १६ समीपमागच्छत, उपागच्छत, प्र०—अत्र व्यत्यय १.२ ५. उपायात समीप समन्तात् प्राप्नुत, प्र०—अत्र व्यत्यय १ २ ६. **उपायातु**=समीपमागच्छतु ४ २११ **उपायाहि**=समीप समन्तात्प्राप्नुहि १.१३० १ समीपतया प्राप्तो भव १ ३ ५ [उप+आङ्+या प्रापणे (अदा०) धातोर्लोट् लङ् वा]

उपावत समीपतया रक्षत ३३ १९ [उप+अव रक्षणगतिकान्तिप्रीतितृप्त्यादिषु (भ्वा०) धातोर्लोट्]

उपावतु: समीप कामयेताम् १ १६१ १०.

उपावरोह उपवर्त्तस्व ६ २६ **उपावरोहन्तु**=समुपाश्रयन्तु ६ २६ [उप+अव+रुह बीजजन्मनि प्रादुर्भावे च (भ्वा०) धातोर्लोट्]

उपावसि उत्कृष्टतया रक्षसि १२.१०७. [उप+अव रक्षणादिषु (भ्वा०) धातोर्लट्]

उपावसुम् उप समीपे वसूनि यस्या ताम् (रश्मिर=सुखम्) ६ ५६ ६ [उप-वसुपदयो समास। सहिताया पूर्वपदस्य दीर्घ]

उपावसृज उत्कर्षेण यथावद् देहि २९ ३५ [उप+अव+सृज विसर्गे (तुदा०) धातोर्लोट्]

उपावसृजन् समीपतया विविधया क्रियया॒ऽऽनङ्कुर्वन् (विद्वज्जन.) १ १४२.११ [उप+अव+सृज विसर्गे (तुदा०) धातो शतृप्रत्यय]

उपावस्रक्षत् उपावसृजेत् २१.४६ [उप+अव+सृज विसर्गे (तुदा०) धातोर्लुङ्। च्ले. क्सादेशश्छान्दस। 'सृजिदृशोर्झल्यमकिति' अ० ६ १ ५८. सूत्रेणामागम]

उपावह समीप समन्ताद् वहति प्रापयति, प्र०—अत्र व्यत्ययो लडर्थे लोट् च १ २२ ९ **उपावहन्तु**=सामीप्येनाऽभित प्राप्नुवन्तु १ ४७ ८ [उप+आङ्+वह प्रापणे (भ्वा०) धातोर्लोट्]

उपावह्रियमाण: क्रियाकौशलेनोपयोज्यमान (इन्द्र=विद्युत्) ८ ५६ [उप+अव+हृञ् हरणे (भ्वा०) धातो. कर्मणि शानच्]

उपाविधन् समीप समन्ताद् विदधतु १.१४६ १ [उप+आङ्+वि+डुधाञ् धारणपोषणयो (जु०) धातोर्लङ्। शपो लुक्]

उपावी: उपागत पालक इव, शरणागतस्य रक्षक (त्वष्टा=सर्वदु खच्छित् सभापति) ६ ७. [उप+अव रक्षणादिषु (भ्वा०) धातोर्बाहुलकाद् औणादिक ई प्रत्यय]

उपावृत: ये भोगा उपावर्त्तन्ते (सुखोपभोगा.) १२ ८ [उप+आङ्+वृतु वर्त्तने (भ्वा०) धातो क्विप्]

उपश्रिता: उपश्लेषतया श्रिता कण्ठा येषान्ते (रुद्रा=जीवा वायवो वा) १६ ५६ [उप-श्रितपदयो समास। सहिताया पूर्वपदस्य दीर्घ]

उपासते प्राप्य सेवन्ते ३२ १४ अनुशासनं मन्यन्ते ऋ० भू० १०६, स्वीकुर्वन्ति प० वि०। उपासना करते हैं स० वि० १८६, १० १६१ २ यथावत् मानते हैं आर्याभि० २.४८, २५ १३ उपाश्रित होते हैं आर्याभि० २ ५३,

प्रापित (कीलाल=उत्तमान्नादिपदार्थसमूह) ३ ४३ कृतोपह्वान, अ०—स्पर्द्धित सन् (पिता=पालनहेतु सूर्यलोक) २ ११ [उप+ह्वेञ् स्पर्द्धाया शब्दे च (भ्वा०) धातो क्त । यजादित्वात् किति सम्प्रसारणे पूर्वरूपे 'हल' इति दीर्घ]

उपहूता यथावत् स्पर्द्धिता (भारती=वाणी) २६ ८ उपहूयते जनै राज्यसुखार्थं या (माता, पृथिवी=विद्या) २ १० [उपहूत इति व्याख्यातम् । तत स्त्रिया टाप्]

उपहूताः सामीप्य प्रापिता (अजाऽव्य) ३ ४३ सम्यक् प्राप्ता (गाव) ऋ० भू० २४०. नियन्त्रिता (पितर) ऋ० भू० २६२ सामिप्यमाहूता (पत्नी=विदुष्य स्त्रिय) ६ ३४ समीपस्था (अजाऽव्य) स० वि० १४७, ३ ४३ [उपहूत इति व्याख्यातम् । तस्य प्रथमा-वहुवचने रूपम्]

उपह्वयताम् उपह्वयति, अ०—स्वीकरोतु, प्र०—अत्र व्यत्ययेन लडर्थे लोट् २ ११ उपगत स्पर्धतामुपदिश-ताम् २ १० **उपह्वयामहे**=समीप शब्दयामहे ३ ४२ हम प्रगसा करते और प्रीति से समीपस्थ बुलाते है म० वि० १४६, ३ ४२ **उपह्वये**=सामीप्येन स्वीकुर्वे १ २१ १ समीप गन्तु स्पर्द्धे १ १३ ८ सामीप्येन सम्यक् स्पर्द्धे १ १३ १० उपगम्य स्वीकुर्वे १ २३ १८ निकट-माह्वये १ १३ १२ उपगतभोगद्योतनाय उपतापये, अ०—उपगम्योपतापये १ १३ ३ उपयोक्तु स्वीकुर्वे १ २२ १२ उपस्तुयाम् २२ १३ सामीप्येन स्वीकरोमि १ १६४ २६ समीपतया स्पर्द्धे १ १३ ७ [उप+ह्वेञ् स्पर्द्धाया शब्दे च (भ्वा०) धातोर्लोट्]

उपह्वरे उपह्वरन्ति कुटिलयन्ति येन तस्मिन् व्यव-हारे, प्र०—अत्र 'कृतो वहुलम्०' इति करणे अच् १ ६२ ६ निकट २६ १५ **उपह्वरेषु**=उपस्थितेषु कुटिलेषु मार्गेषु १ ८७ २ [उप+ह्वृ कौटिल्ये (भ्वा०) धातो 'कृतो वहुलम्' अ० ३ ३ ११३ वा० सूत्रेण करणेऽच्]

उपाकयोः समीपस्थयो सेनयो १ ८१ ४ **उपाके**=समीपे ७ ४२ ३ समीप वर्त्तमाने (उपसौ=रात्र्यहनी) प्र०—उपाके इति अन्तिकनाम, निघ० २ १६, ३ ४६ परस्परमसन्निहितवर्त्तमाने (रात्रिदिने) १ १४२ ७ सन्नि-हिते, भा०—परस्परेण कालेन सह वर्त्तमाने सम्बद्धे (उपासानक्ता=रात्रिदिने २६ ३१ [उपाके उपक्रान्ते नि० ८ ११ अन्तिकनाम निघ० २ १६]

उपाकरम् उपाकरोमि १ ११४ ६ [उप+डुकृञ् करणे (तना०) धातोर्लुङ् । 'कृमृदृरुहिभ्यश्छन्दसि' अ० ३ १ ५६ सूत्रेण च्लेरङ्]

उपाकृधि उपाकुरु १७ ६ [उप+आङ्+डुकृञ् करणे (तना०) धातोर्लोट् । 'श्रुशृणुपृकृवृभ्यश्छन्दसि' अ० ६ ४ १०२ सूत्रेण हेर्धिरादेश । विकरणव्यत्ययेन शप् । 'वहुल छन्दसी' ति शपो लुक्]

उपागच्छतम् समीप प्राप्नुतम् १ ४७ ३ [उप+आङ्+गम्लृ गतौ (भ्वा०) धातोर्लोट्]

उपाऽऽगच्छतम् उपगत समन्ताद् गमयत, प्र०—अत्र लडर्थे लोडन्तर्गतो ण्यर्थश्च १ ७१ ४ [उप+आङ्+गम्लृ गतौ (भ्वा०) धातोर्लोट्]

उपागतम् समीपतयाऽऽगच्छतम्, प्र०—अत्र 'गम्लृ गतौ' इत्यस्माद् 'वहुल छन्दसि' अ० २ ४ ७३ इति शपो लुकि सति शित्वाऽभावाच्छस्याऽभाव 'अनुदात्तोपदेश०' अ० ६.४ ३७ इत्यादिना मलोपश्च ७ ८ समीपमागच्छत, प्र०—अत्र लोट्-मध्यम-द्विवचनम् १ २४ समीप समन्तात् प्राप्नुतम् ३३ ५६ [उप+आङ्+गम्लृ गतौ (भ्वा०) धातोर्लोट् । छान्दसत्वाच्छपो लुकि छकारादेशो न भवति । मकारलोपश्च]

उपागन्तम् समीपतया सम्यक् प्राप्नुतम् १ १३७ १ [उप+आङ्+गम्लृ गतौ (भ्वा०) धातोर्लोट् । शपो लुकि छत्वमपि न]

उपागन्म प्राप्नुयाम ६ १६ ३८ [उप+गम्लृ गतौ (भ्वा०) धातोर्लङ् । शपो लुकि छत्वाऽभावे 'म्वोश्चे' ति नकारादेश]

उपागमन्तु समीप सर्वतो गच्छन्तु १ १०७ २ [उप+आङ्+गम्लृ गतौ (भ्वा०) धातोर्लोट् । 'वहुल छन्दसी' ति शपो लुकि छत्वमपि न भवति]

उपागहि समीपतयाऽऽगच्छति, अ०—उपागच्छति, प्र०—अत्र शपो लुकि सति 'वाच्छन्दसि' इति हेरपित्वाद् 'अनुदात्तोपदेश०' अ० ६ ४ ३७ इत्यनुनासिकलोपो लडर्थे लोट् च १ ४ २ समीपमागच्छ १७ ६ समीप समन्ताद् गच्छति, प्र०—अत्र व्यत्ययो लडर्थे लोट् 'वहुल छन्दसि' इति शपो लुक् च १ १६ ५ उपागच्छ, उपागच्छति वा १ ६१ १० [उप+आङ्+गम्लृ गतौ (भ्वा०) धातोर्लोट् । 'वहुल छन्दसी' ति शपो लुकि छत्व न भवति । हेरपित्वात् कित्वादनुनासिकलोप]

उपाऽगाम् समीप प्राप्नुयाम् ५ ४२ **उपाऽगाः**=

उभयतः शीर्ष्णी उभयत शिरोवदुत्तमा गुणा यस्या सा, भा०—वाह्याभ्यन्तररक्षणाभ्या सर्वोत्तमा (वाग् विद्युच्च) प्र०—अत्र पञ्चभ्या अलुक् ४ १६ [उभयतस्-शिरस्पदयो समास । 'शीर्षश्छन्दसि' अ० ६ १ ६० सूत्रेण शिरस स्थाने 'शीर्षन्' आदेश । स्त्रिया ङीप्]

उभयत्र गमनाऽऽगमनयो ३ ५३ ५ [उभयसर्वनाम्न सप्तम्यन्तात् त्रल्]

उभयस्य द्विविधस्य (जगत स्थातुश्च) ४ ५३ ६ [उभप्राति० 'उभादुदात्तो नित्यम्' अ० ५ २ ४४ सूत्रेणा-वयवे विहितस्य तयपोऽयजादेश]

उभया वर्त्तमानेन सह पूर्वाऽपराणि (जन्मकृत्यानि) २ ६ ७ [उभयप्राति० परस्य जस स्थाने भूतस्य शेर्लुक् 'शेश्छन्दसि बहुलम्' अ० ६ १ ७० सूत्रेण]

उभयादतः उभयोरध ऊर्ध्वभागयोर्दन्ता येषान्ते (पशव) ३१ ८ उभयतो दन्ता येषान्ते उष्ट्रगर्दभादय ऋ० भू० १२४ [उभय-दन्तपदयोर्बहुव्रीहौ 'छन्दसि च' अ० ५ ४ १४२ सूत्रेण दन्तस्य दतृ-आदेश । संहिताया पूर्वपदस्य दीर्घ]

उभयासः उभयत्र वर्त्तमाना (सेनाजना) ४ २४ ३ [उभयप्राति० प्रथमाबहुवचने जसोऽसुगागम]

उभयाहस्ति उभये हस्ता प्रवर्त्तन्ते यस्मिँस्तत् (राध =द्रव्यम्) ५ ३९ १ [उभय-हस्तपदयोर्बहुव्रीहौ 'द्विदण्डयादिभ्यश्च' अ० ५ ४ १२८ सूत्रेण समासान्त इच् प्रत्यय । संहिताया पूर्वस्य दीर्घ । उभयाहस्ति उभाभ्या हस्ताभ्याम् नि० ४ ५]

उभयाहस्त्या समन्तादुभयत्र हस्तो येषु कर्मसु तानि तेषु साधूनि (वसु=वासस्थानानि) १ ८१ ७ [उभय-हस्तपदयोर्बहुव्रीहौ समासान्त इच्प्रत्यये कृते 'तत्र साधुर्' इत्यर्थे यत्प्रत्यये जस स्थानेभूतस्य शेर्लुक्]

उभ्नाः प्रपूर्द्धि, प्र०—अत्र व्यत्ययेन श्ना १ ६३ ४ [उभ पूरणे (तुदा०) धातोर्लोट् । विकरणव्यत्ययेन श्ना-प्रत्यय]

उमेभिः रक्षणादिकर्त्तृभिस्सह (देवेभि =विद्वज्जनै) ५ ५१ १

उरणम् आच्छादकम् (दुर्जनम्) २ १४ ४ [ऋ गतौ (भ्वा०) धातो 'अर्त्ते क्युरुच्च' उ० ५ १७ सूत्रेण क्यु प्रत्ययो धातोरुकारादेशश्च । उरण =ऊर्णावान् भवति, ऊर्णा पुनर्वृणोतेरूर्णोतेर्वा नि० ५ २१]

उरवः विशालजघनोरस्का (पितर =पालनक्षमा राजपुरुषा) २९ ४६ बहव (परमाणव) ५.४७.२ बहु-प्रज्ञा (पूर्णविद्या परीक्षका जना) २ २७ ३. बहव (मरुत =मनुष्या) ५ ५७ ४ **उरवे**=विस्तृताय (मार्गाय) १.१३६ २ [ऊर्णुञ् आच्छादने (अदा०) धातो 'महति ह्रस्वश्च' उ० १ ३१ सूत्रेण कु प्रत्ययो नुलोपो ह्रस्वश्च ऊर्णोत्याच्छादयत्यल्पानिति विग्रह । उरुबहुनाम निघ० ३ १]

उरः हृदयम्, भा०—अन्त करणम् २० ७ वक्ष-स्थलम् १ १५८ ५ **उरसा**=अन्त करणेन ११ ३१ [ऋ गतौ (भ्वा०) धातो 'अर्त्तेरुच्च' उ० ४ १९५. सूत्रेणासुन् प्रत्ययो धातोरुकारादेशश्च । उरुस्त्रिष्टुप् प० २ ३ उरस्त्रिष्टुभ श० ८ ६ २.७]

उराणम् बहुबल कुर्वन्तम् (इन्द्र=सेनेशम्) १ १७३ ७ **उराणः**=य उरून् बहूननिति प्राणयति स (सूर्य) ४ ६ ३. य उरुर्बह्वनिति स (जन), प्र०—अत्र वर्णव्यत्ययेनोकारस्य स्थानेऽकार ३ १९.२ बहुकुर्वाण (अग्नि =विद्युत्) ४ ७ ८ बहुकुर्वन् (अग्नि =सूर्य) ४ ६ ४ [उराण =उरु कुर्वाण. नि० ६ १७. 'उरु' इत्यु-पपदे अन प्राणने (अदा०) धातोरण् । वर्णव्यत्ययेनो-कारस्याकार । उरूपपदाद्वा णीञ् धातोर्ड प्रत्यय । उराण पदनाम निघ० ४ ३]

उरु व्यापकम् (अन्तरिक्षम्=आकाशम्) ३ ५४ १९ विस्तीर्णम् (सुखम्) ५ ४१ बहुविधम् (सुखम्), प्र०—उर्विति बहुनामसु पठितम् निघ० ३ १, १.७ बहु (अन्त-रिक्षम्) ७ ५ **उरुः**=बहुशक्ति (जगदीश्वर) २.१३ ७ सर्वशक्तिमान् (ईश्वर) ऋ० भू० १९२ **उरुणा**=बहुना (पथा=मार्गेण) ४ २९ ५ **उरुम्**=बहुगुणाऽन्वित न्यायम् ८ २३ बहुबलादिगुणविशिष्टम् (वीरसेनाम्) १ ५७ ६ बहुविधम् (लोक=भुवनसमूहम्) १ ९३ ६ बह्वाच्छादन स्वीकरण वा ४ २७ बह्वैश्वर्यम् (इन्द्र=राजाद्यध्यक्षम्) ३ ४१ ५ बहुसुखकर विस्तीर्णम् (लोकम्) ७ ६० ९ **उरुषु**=विस्तीर्णेषु (विक्रमणेषु=सृष्टिक्रमेषु) १ १५४ २ **उरो !**=बहुसुखप्रतिपादक (अन्तरिक्ष =यज्ञ) ४ ७ **उरोः**=बहुन (मनस =विज्ञानात्) प्र०—अत्र लिङ्ग-व्यत्ययेन पुंस्त्वम् ४ ६ बहुगुणैश्वर्यात् १७ ४९ बहुविध-गुणयुक्तात् (अन्तरिक्षात्=आकाशात्) ३.४६ ३. बहोरनन्तात् (अन्तरिक्षात्) ५ १९ **उरौ**=बहुसुखकरे (कार्ये) ५ ४२ १७ पुष्कले (अन्तरिक्षे=आकाशे) ३ ६ ८ बहुरूपे (अन्तरिक्षे=आकाशे) ५ ५२ ७ विस्तृते (अन्त-रिक्षे=अन्तराल आकाशे) ६ ३३ बाहौ ३ १ ११ ['उरु'

३२ १४ उपारयतया जानन्ति ४० ६ **उपास्महे**=उपासन कुर्महे ऋ० भू० १६६, अथर्व० १३ ४ ४७ [उप+आस उपवेशने (अदा०) धातोर्लट्]

उपासदत् उपसीदति ६ ५७ २ [उप+षद्लृ विशरणगत्यवसादनेषु (भ्वा०) धातोर्लुङ् । लृदित्त्वाद् अङ्]

उपासीदतम् सामीप्येनाऽभितो गच्छतम् १ ४७ ८ [उप+आङ्+षद्लृ विशरणगत्यवसादनेषु (भ्वा०) धातोर्लोट् । णिति सीदादेश]

उपासृजध्वम् उत्कृष्टतया विविधविद्यायुक्त कुरुत ६ ४८.११ [उप+आङ्+सृज विसर्गे (तुदा०) धातोर्लोट् । व्यत्ययेनात्मनेपदम्]

उपासेदिम समीप समन्तात्प्राप्नुयाम २५ १५ [उप+आङ्+षद्लृ विशरणगत्यवसादनेषु (भ्वा०) धातोर्लिट्]

उपास्थात् उपतिष्ठेत् २५.४४ [उप+ष्ठा गतिनिवृत्तौ (भ्वा०) धातोर्लुङ् । 'गातिस्थाघुपाभूभ्य०' इति सिचो लुक्]

उपास्थित उपतिष्ठति २ ५ ६ **उपाऽस्थु:**=उपतिष्ठन्ति ४४१ ६ समीप प्राप्नुवन्तु ४४१ ८ [उप+ष्ठा गतिनिवृत्तौ (भ्वा०) धातोर्लुङ् । 'अकर्मकाच्चे' त्यात्मनेपदे 'स्थाघ्वोरिच्च' अ० १ २ १७ सूत्रेणेकारान्तादेश किच्च]

उपांशु: उपगता अशवो यत्र स उपाशुर्जप १८ १६. उपगृहीता (जपरूप) १३.५४. **उपांशो:**=उप सामीप्येऽनिति तस्य (सेनेशस्य) प्र०—अत्राऽनधातोरु शुगागमश्च ६ ३८ [उप-अशुपदयो समास । अशु =शमष्टमात्रो भवति । अननाय शम्भवतीति वा नि० २.५ अनिरुक्त वा ऽउपाशु श० १ ३ ५ १० प्रमाणो वा ऽअस्य (यज्ञस्य) उपाशु श० ४.१ १ १ अथवा उपाशु प्राण एव कौ० १२ ४ यज्ञमुख वा ऽउपाशु श० ५ २ ४ १७ इय (पृथिवी) ह वा ऽउपांशु श० ४ १ २ २७]

उपेति: उपेयते सुखानि यया सा (नीति) १ ७६.१ [उप+इण् गतौ (अदा०) धातो स्त्रिया क्तिन्]

उपेतौ प्राप्तौ (पितरा=जनकौ) ३ १८.१. [उप+इण् गतौ (अदा०) धातो क्त]

उपेमसि समीप समन्ताद् प्राप्नुम १ १ ७ [उप+इण गतौ (अदा०) धातोर्लट् । 'इदन्तो मसि' इति मस इदन्तत्वम्]

उपेयतु: समीपं प्राप्नुत ३ २.६

उपैति सामीपतया प्राप्नोति ७ १ ६ सामीपता मे प्राप्त होता है मं० वि० २०६, अथर्व० ६ ६.४ [उप+इण् गतौ (अदा०) धातोर्लट्]

उपैमसि सामीप्यं सर्वत प्राप्नुम वे० आ० नि० उपगम्य समन्तात् प्राप्नुम, प्र०—अत्र 'इदन्तो मसि' इतीकारादेश ३ २२ अ०—नित्यमुपाप्नुम ३ २३ [उप+आङ्+इण् गतौ (अदा०) धातोर्लट् । मस इदन्तता]

उपैमि समीपतया ज्ञातु प्राप्तुमनुष्ठातु प्राप्नोमि १ ५ समीप प्राप्त होऊ स० प्र० १६४, २० २४ समीप प्राप्त होता हूँ स० वि० १८६, २० २४ **उपैषि**=समीपतया प्राप्नोषि १ ५३ ७ **उपैहि**=समीप प्राप्त हो स० प्र० १५२, १० १८ ८ [उप+इण् गतौ (अदा०) धातोर्लट् लोट् च । 'एत्येधत्यूठ्सु' अ० ६ १ ८६ सूत्रेण वृद्धिरेकादेश]

उपो समीपे १ ६१ १४ सामीप्ये १ १२४ ४.

उपोक्षत (उप+आ+उक्षत) समीप समन्तात् सिञ्चत १ ८७ २ [उप+आङ्+उक्ष सेचने (भ्वा०) धातोर्लोट्]

उपोत्थित: समीपे प्रकाशित (विष्णु =हिरण्यगर्भ परमेश्वर) ८ ५५ [उप+उत्+ष्ठा गतिनिवृत्तौ (भ्वा०) धातो क्त । 'द्यतिस्यतिमास्थाम्०' अ० ७ ४ ४० सूत्रेणेकारादेश । 'उद स्थास्तम्भो ०' इति पूर्वसवर्णादेश]

उपोदके उपगतान्युदकानि यस्मिँस्तस्मिन् (लोके) ३५ ६ [उप+उदकपदयो. समास]

उपोप अति सामीप्ये १ १२३.७ सामीप्ये, प्र०—अत्र 'उपर्यध्यधस सामीप्ये' अ० ८ १ ७ इति द्वित्वम् ८ २

उपोपपृच्यते सामीप्येन सम्बध्यते ३ ३४ [उप+पृची सम्पर्के (रुधा०) कर्मणि लट् । उपशब्दस्य द्वित्व सामीप्ये]

उपोपसश्चसि सामीप्येन प्राप्नोषि, प्र०—सश्चतीति गतिकर्मसु पठितम् निघ० २ १४, ८ २ [उप+सश्चति गतिकर्मा (निघ० २ १४) धातोर्लट् । सामीप्ये उपशब्दस्य द्वित्वम्]

उब्जतम् कुटिलमपहत, कुटिल दूरीकुरुत, प्र०—अत्र व्यत्ययो लडर्थे लोट् च १.२१ ५ **उब्जन्तु**=कुटिल कुर्वन्तु ६ ५२ १ **उब्ज:**=हन्या ४.१६ ५. [उब्ज आर्जवे (तुदा०) धातोर्लोट्]

उब्जन् आर्जव कुर्वन् (इन्द्र =सूर्य) १ ५२ २ [उब्ज आर्जवे (तुदा०) धातो शतृप्रत्यय]

उब्धम् उन्दकम् (दृढज्ञानम्) ४.१.१५

व्यापकाय (राज्ञे) ७ ३१ १ ११ [उरु-व्यचस्पदयो समास । व्यचस्=वि+अञ्चु गतिपूजनयो (भ्वा०) धातोरसुन् प्रत्यय । बाहुलकादनुनासिकलोप । अथवा व्यच व्याजीकरणे (तुदा०) धातोरसुन् । धातूनामनेकार्थत्वाद् व्याप्त्यर्थे]

उरुव्यचसा बहुव्यापिनी (रोदसी=द्यावापृथिवी) १ १६० २ [पूर्वपदे व्याख्यातम्]

उरुव्यचा बहुव्याप्त्या १ १०८ २ [उरूपपदे विपूर्वादञ्चते क्विप्]

उरुव्यचाः बहुपु व्याप्त (विद्वज्जन) ५ ४६ ६ उरु बहुविध व्यचो विज्ञान पूजन सत्करण वा यस्य स (सभाध्यक्ष) १ १०४ ६ बहुशुभगुणव्याप्त (समृद्धो राजा) ३ ५० १ ['उरुव्यचसम्' पदे व्याख्यातम्]

उरुव्यञ्चम् उरुपु बहुषु विशेषेणाऽञ्चति तम् (रुक्मम्=आदित्यम्) १५ २५ बहुव्याप्तिमन्तम् (स्तोमम्) ५ १ १२ [उरूपपदे विपूर्वात् अञ्चु गतिपूजनयो (भ्वा०) धातोरण् प्रत्यय]

उरुशर्म्मा उरूणि बहूनि सुखानि यस्या सा (अदिति=विदुषी माता) १० १६ [उरु-शर्मन्पदयो समास । 'उरु' व्याख्यातम् । शर्मन्=सुखनाम निघ० ३ ६ गृहनाम निघ० ३ ४]

उरुशंस बहुभि प्रशसित (वरुण=विद्वज्जन) २१ २ य उरून् बहून् शसति तत्सम्बुद्धौ (आप्त विद्वन्) १८ ४६ उरु बहुशस प्रशसा यस्य तत्सम्बुद्धौ (विद्वज्जन) १ १३८ ३ बहुभि शस्यते यत्तत्सम्बुद्धौ पक्षे सूर्यो वा (वरुण=जगदीश्वर) १ २४ ११ **उरुशंसस्य**=बहुप्रशसितस्य (विद्वत्पितु) २ २८ ३ **उरुशंसः**=बहुप्रशस (राजा) ४ १६ १८ [उरु+शसु स्तुतौ (भ्वा०) धातोरण् प्रत्यय]

उरुशंसा बहुस्तुती (मित्रावरुणा=अध्यापकोपदेशकौ) ३ ६२ १७ [पूर्वपदे व्याख्यातम्]

उरुशंसाः बहुप्रशसा (जगत्कल्याणकरा जना) २ २७ ६ [उरूपपदे शसु स्तुतौ (भ्वा०) धातोरण् । 'कृतो बहुलमि' ति वा कर्मण्यण्]

उरुष्य पाहि १ ५८ ६ रक्ष, प्र०—अत्र कण्ड्वाद्याकृतिगणत्वादुरुपशब्दाद् यक्, अ०—सतत पृथग् रक्ष ३ २६ बहुना योगाऽभ्यासेनाऽविद्यादिक्लेशानन्त नय, प्र०—अत्रोरूपपदात् 'षोऽन्त कर्मणि' इत्यस्मात् क्विप्, ततो नामधातुत्वात् क्विप्, ततो मध्यमैकवचनप्रयोग ७ ४ रक्ष, प्र०—उरुष्यतीति रक्षति कर्मा नि० ५ २३, १.६१ १५. सेवस्व ४ २ ११. **उरुष्यत**=सेवध्वम् ५ ८७ ६ **उरुष्यतम्**=प्रेरयेतम् ५ ६५ ६ सेवेतम् ४.४३ ४ सेवेथाम् ४.४३ ७. **उरुष्यति**=रक्षति २ २६ ४ वर्धयति १ १५५ २ सेवते ६ १४ ५ **उरुष्यथ.**=रक्षथ १.११६ ६ सेवेथाम् १ १५५ २ **उरुष्या**=सेवेत, रक्षेत ६ ४. **उरुष्यात्**=रक्षेत् ७ १ १५ **उरुष्याः**=रक्षे ७ ३ ८ **उरुष्येत्**=सेवेत ४ ५५ ५ **उरुष्व**=सेवस्व ४ २ ११ [उरुष्-शब्दात् कण्ड्वाद्याकृतिगणत्वाद् यक् । ततो लोट् । अथवा उरुपपदे षोऽन्त कर्मणि (दिवा०) धातो क्विपि ततो नामधातोर्लोट् । अथवा उरुष्यती रक्षतिकर्मा नि० ५ २३]

उरुष्यत् आत्मन उरुर्बहुरिवाचरति ३ ५८ [उरु बहुनाम (निघ० ३ १) तत आचारे क्यचि लेट् । 'सुग् वक्तव्य' अ० ७ १ ५१ वा० सूत्रेण क्यचि सुगागम]

उरूची या उर्वीर्बह्वीर्विद्या अञ्चति प्राप्नोति सा (जिह्वा=वाणी) ३ ५७ ५ या बहूनञ्चति प्राप्नोति सा पृथिवी ७ ३५ ३ बह्वीना पदार्थविद्याना ज्ञापिका बह्वर्थज्ञापिका वा (वेना=वेदचतुष्टयो वाक् वाणी वा) प्र०—उर्विति बहुनामसु पठितम् निघ० ३ १, १ २ ३ योरूणि बहून्यञ्चति सा (गौ=पृथिवी) ३ ३१ ११ **उरूचीम्**=या उरूणि बहून्यञ्चति प्राप्नोति ताम् (मही=भूमिम्) २१ ५ उरूणि बहूनि वस्तून्यञ्चन्तीम् (अमति=सुन्दर रूपम्) ७.४५ ३ [उरूपपदे अञ्चु गतिपूजनयो (भ्वा०) धातो 'ऋत्विग्०' अ० ३ २ ५६ सूत्रेण क्विन् । 'अच' इत्यकारलोपो ङीपि । 'चौ' इति पूर्वस्य दीर्घ]

उरूची य उरून् बहूनञ्चतस्ते (रोदसी=द्यावापृथिव्यौ) ४ ५६.४ ये बहूनञ्चतस्ते (रोदसी=भूमिप्रकाशौ) ६.११ ४ [पूर्वपदे व्याख्यातम् । 'वा छन्दसि' अ० ६ १ १०६ सूत्रेण पूर्वसवर्णदीर्घ]

उर्वराजिते य उर्वरा सर्वफलपुष्पशस्यादिप्रापिका जयति तस्मै (इन्द्राय=विद्वत्सभासेनेशाय) २ २१ १ [उर्वरा उपपदे जि जये (भ्वा०) धातो क्विप् । ह्रस्वस्य तुक्]

उर्वी बहुविस्तीर्णे (द्यावापृथिवी) १ १८५ ६ हिंसके (अपारे=द्यावापृथिव्यौ) ३ १ १४ [उर्वी=द्यावापृथिवीनाम निघ० ३ ३० ऊर्णुञ् आच्छादने (अदा०) धातो 'महति ह्रस्वश्च' उ० १ ३१ सूत्रेण कु । स्त्रियां ङीष्]

उर्वी बहुफलाद्युपेता (भूमि=पृथिवी) ६ ४७ २० [उर्वी पृथिवी नाम निघ० १ १ उर्वी.=ऊर्णोतेर्वृणोतेरित्यौर्णवाभ नि० २ २७]

इति 'उरव' पदे व्याख्यातम् । उरु बहुनाम निघ० ३ १]

उरुक्रमस्य बहुपराक्रमस्य (विष्णो =परमेश्वरस्य) १ १५४.५ **उरुक्रमः**=बहव क्रमा पराक्रमा यस्य स (ईश्वरो विद्वज्जनो वा) १ ६० ६ अनन्त पराक्रम (ईश्वर) आर्याभि० १ १, ऋ० १ ६ १८ ६ बहुपुरुषार्थ (विद्वज्जन) ३ ५४ १४ उरुर्महान् क्रम पराक्रमो यस्य स, अनन्त, महापराक्रमयुक्त परमात्मा स० प्र० २१, ३६ ६ उरुर्वहु क्रम ससाररचने यस्य स (विष्णु =ईश्वर) ३६ ६ उरवो वहवो क्रमा यस्य (एवयामरुन्=विज्ञानवान् मनुष्य) ५ ८७.४ [उरु-क्रमपदयो समास । उरुपदम् 'उरव' इत्यत्र व्याख्यातम् । उरु बहुनाम निघ० ३ १ क्रम =क्रमु पादविक्षेपे (भ्वा०) धातोर्घञ् । 'नोदात्तोपदेश०' इति सूत्रेण वृद्धिप्रतिषेध]

उरुक्षया उरुक्षयौ बहुषु जगत्पदार्थेषु क्षयो निवासो ययोस्तौ (मित्रावरुणौ=सूर्यवायू) अत्र 'सुपा सुलुग्०' इत्याकार 'उर्विति बहुनामसु' पठितम् निघ० ३ १ 'क्षि निवासगत्यो' अस्य धातोरधिकरणाऽर्थे क्षयशब्द १ २ ६ [उरु-क्षयपदयो समास । उरु बहुनाम निघ० ३ १ क्षय =क्षि निवासगत्यो (तुदा०) धातो 'पुसि सज्ञाया घ प्रायेण' त्यधिकरणे घ]

उरुगायः ! उरूणि बहूनि शास्त्राणि गायति पठति, तत्सम्बुद्धौ (कुमार ब्रह्मचारिन्) ८ १ **उरुगायम्**=उरूणि गया अपत्यानि धनानि गृहाणि वा यस्मात्तम् (श्रव =अन्न श्रवण वा) ६ ६५.६ बहुभिर्गीयमान विद्यावोधम् ७ ३५ १५ बहुभि प्रशसनीयम् (विद्यार्थिजनम्) ६ २८ ४ **उरुगायस्य**=बहुर्गय स्तुतिर्यस्य तस्य (विष्णो = व्यापकस्येश्वरस्य) प्र०—अत्र 'गै शब्दे' इत्यस्माद् 'घञर्थे कविधानम्' इति कर्मणि क ६ ३ बहुभि स्तुतस्य (सज्जनस्य) ३ ६ ४ बहुधा प्रशसितस्य (परमेश्वरस्य) १ १५४ ६ **उरुगायः**=यो बहूनर्थान् वेदद्वारा गायत्युपदिशति स (विष्णु =परमेश्वर) ५ १८ य उरुभिर्बहुभिर्मन्त्रैर्गीयते स्तूयते वा स (परमेश्वर) १ १५४ १ बहुभि स्तुत (अलविद्यो जन) २ १ ३ **उरुगायाय**=बहुप्रशसिताय (जीवनाय) १ १५५ ४ बहुप्रशसाय (विष्णवे= परमेश्वराय) ४ ३ ७ [उरूपपदे गै शब्दे (भ्वा०) धातोरण् प्रत्यय । 'आतो युक् चिण्कृतो' रिति युगागम । अथवा= उरु-गयपदयो समास । गय =अपत्यनाम निघ० २ २ धननाम निघ० २ १०. गृहनाम निघ० ३ ४ अथवा= उरुपपदे गायते 'घञर्थे कविधानमि' ति कर्मणि क । उरुगायस्य विष्णोर्महागते नि० २ ८]

उरुगाया बहुप्रशसौ (अध्यापकोपदेशकौ) ४ १४.१. [उरूपपदे गै शब्दे (भ्वा०) धातो 'घञर्थे कविधानमि' ति कर्मणि क]

उरुचक्रयः बहुकर्त्तारो महापुरुषार्थिन (विद्वज्जना) ५ ६७ ४ **उरुचक्रिः**=बहुकर्त्ता (विद्वज्जन) २ २६ ४ [उरु-चक्रिपदयो समास । उरु बहुनाम निघ० ३ १ चक्रि =डुकृञ् करणे (तना०) धातो 'किकिनावुत्सर्गश्छन्दसि सदादिभ्यो दर्शनात्' अ० ३ २ १७१ वा० सूत्रेण कि प्रत्ययो लिट्वच्च कार्यम्]

उरुचक्षसम् उरु बहुविध वेदद्वारा चक्ष आख्यान यस्य तम् (परमेश्वरम्) १ २५ ५ उरुषु बहुषु चक्षो विज्ञान प्रकाशन वा यस्य त कर्मकर्त्तार जीवम् १ २५ १६ **उरुचक्षसः**=बहुदर्शनान् (नॄन्=उत्तमविदुष) ६ ५१ ६ **उरुचक्षसा**=उरु बहु चक्षो व्यक्त वचन दर्शन वा यस्यास्तया (वाचा विद्युता वा) ४ २३ [उरु-चक्षस्पदयो समास । उरु बहुनाम निघ० ३ १ चक्षस्=चक्षिङ् व्यक्तायां वाचि दर्शनेऽपि (अदा०) धातो असुन् प्रत्यय । 'चक्षिङ ख्याञ्' इति ख्याञादेशे प्राप्ते 'असनयोश्च प्रतिषेधो वक्तव्य' अ० २ ४ ५४ वा० सूत्रेण प्रतिषेध]

उरुचक्षाः उरूणि बहूनि चक्षासि दर्शनानि यस्मात् स (सूर्य =सविता) ७ ३५ ८ [उरु-चक्षस्पदयो समासः, । चक्षस्पूर्वपदे व्याख्यातम्]

उरुज्रयसम् बहुवेगवन्तम् (अग्निम्) ५ ८ ६

उरुज्रयः बहुगन्तार (देवा =विद्वज्जना) ७ ३६ ३ [उरुज्रय बहुजवा नि० १२ ४३ उरूपपदे जवतिगतिकर्मा (निघ० २ १४) धातोर्बाहुलकाद् ड्रि प्रत्यय]

उरुधारा उर्वी धारा विद्यासुशिक्षाधारणा यस्या सा (पत्नी) ८ ४२ [उर्वी-धारापदयो समास । पूर्वपदस्य पुवद्भाव । धारा वाड्नाम निघ० १ ११]

उरुप्रथाः बहु प्रथ सुखस्य विस्तारो यस्मात् स, (घर्म =यज्ञ), प्र०—उर्विति बहुनामसु पठितम् निघ० ३ १, १ २२ बहुविस्तार (इन्द्र =सूर्य) २० ३६ [उरु-प्रथपदयो समास । उरु बहुनाम निघ० ३ १ प्रथ =प्रथ प्रख्याने (भ्वा०) धातो. 'घञर्थे कविधानमि' ति क]

उरुव्यचसम् बहुषु सद्गुणेषु व्यापकम् (इन्द्र = धार्मिक राजानम्) ६ ३६ ३ उरुव्यचस =बहुव्यापकस्य (अग्ने =पावकस्य) २७ १६ **उरुव्यचसे**=बहुषु विद्यासु

उलूखलक उलूखल कायति शब्दयति यस्तत्सम्बुद्धौ विद्वन् (जन) १ २८ ५ [उलूखलोपपदे कै शब्दे (भ्वा०) धातो क प्रत्यय । उलूखल पूर्वपदे व्याख्यातम् । उलूखल पदनाम निघ० ५ ३]

उलूखल सुतानाम् उलूखलेन सम्पादितानाम् (पदार्थानाम्) प्र०—उलूखलशब्दार्थ यास्कमुनिरेव समाचष्टे—उलूखलमुरुकर वोर्क्कर वोर्ध्वख वोरु मे कुर्वित्यब्रवीत् तदुलूखलमभवत्, उरुकर चैतदुलूखलमित्याचक्षते, नि० ६ २०, १ २८ ४ [उलूखल-सुतपदयोः समास । उलूखल व्याख्यातम् । सुत =षु प्रसवैश्वर्य (अदा०) धातो क्त]

उल्काः विद्युत ४ ४ २ विद्युताता' १३ १० [उष दाहे (भ्वा०) धातो 'शुकवल्कोल्का' उ० ३ ४२ सूत्रेण कक् प्रत्ययान्तो निपात्यते। षकारस्य लत्वम् । ओषति दहतीति विग्रह]

उल्वम् बलम् १० ८ आवरणम् १६ ७६ [उल्व पदनाम । निघ० ४ ३ उच समवाये (दिवा०) धातो 'उल्वादयश्च' उ० ४.६५ सूत्रेण वन् प्रत्यय । निपातनाच्चकारस्य लत्व गुणाभावश्च। उल्व ऊर्णोतेर्वृणोतेर्वा नि० ६ २५ उल्व घृत श० ६ ६ २ १५ उल्व वाऊषा ७ ३ १ ११]

उवाच उच्यात् ५ २ ८ वक्ति २ ३० २ [वच परिभाषणे (अदा०) धातोर्लिट्]

उवास वसति १ ४८ ३ वस १ ११३ १३ [वस निवासे (भ्वा०) धातोर्लिट् । 'लिट्यभ्यासस्य०' इति सम्प्रसारणम्]

उवाह वहति १ ११६ १८ [वह प्रापणे (भ्वा०) धातोर्लिट । लिटि अभ्यासस्य सम्प्रसारणम्]

उवोच वदति ७ ४ ३ उच्यात् ७ २१ १ **उवोचिथ**= उपदिश ७ ३८ ३ [उच समवाये (दिवा०) धातोर्लिट् । अत्र व्यक्ताया वाचि धातूनामनेकार्थत्वात् । अथवा वच परिभाषणे (अदा०) धातोर्लिट् । धातोरकारस्यौकारश्छान्दस]

उशतः कामितान् (दिव्यान् गुणान्) प्र०—अत्र 'कृतो बहुलम्०' इति कर्मणि लट स्थाने शतृ-प्रत्यय १ १२ ४ कामयमानान् (पितॄन्=जनकादीन्) १६ ७० विद्यादिसद्गुणान् कामयमानान् (देवान्=विदुषो गृहस्थान्) ८ १६ [वश कान्तौ (अदा०) धातोर्लट स्थाने शतृप्रत्यय) 'कृतो बहुलमि' ति कर्मणि शतृ । धातोर्ग्रह्यादि-सूत्रेण सम्प्रसारणम्]

उशती कामयमाना (जाया=हृद्या स्त्री) ४.३ २ कामयमाने (अध्यापिकोपदेशिके) ३ ३ ३ १ कामना करती हुई (जाया=स्त्री) स० प्र० ६०.१० ७१ ४ **उशतीम्**= कामयमानाम् (मनीषा=प्रज्ञाम्) ६ ४७ ३ **उशतीः**= कामयमाना (मातर) ३६ १५ स्वस्वधारणगुण प्रकाशयन्ती (पत्नी=पृथिव्यादिद्रव्यस्थशक्तय इव) १.२२ ६ कमनीया' (ऊर्म्या=रात्री) २ ४ ३ [वश कान्तौ (अदा०) धातो शत्रन्तान् ङीप् । उशती उशत्यौ कामयमाने नि० ६ ३६ कामयमाना नि० ११६]

उशतीव कामयमाना स्त्रीव १ ३२ १० [उशती-इवपदयो समास]

उशते कामयमानाय (ईश्वराय) ४ १७ १७ उशद्भि =कामयमानै (ज्ञानिभिर्जनकै) १६ ५१ **उशद्भ्यः**=त्वत्पदार्थान् कामयमानेभ्य (देवेभ्य = शत्रुभ्य) १ १६ २ ११ सत्पुरुषेभ्य २५ ३४ **उशन्**= कामयमान (इन्द्र=राजन्) ४ २० ४ कामयन् (मित्र) ४ २७ [वश कान्तौ (अदा०) धातोर्लट शतृ । उशत कामयमानान् नि० ६ १३ उशन्नुशन्तमिति प्रिय प्रियमित्येवैतदाह श० ३ ३ ३ १० वायुर्वा उशन् ता० ७ ५.१६]

उशधक् य उशान् युद्ध कामयमानान् दहति स (इन्द्र =राजा) ३ ३४.३ उश. कमनीयान् दहति येन स (अग्नि) ३ ६ ७ कामयमान (अग्नि =उत्तमो राजा) ७.७ २ य उशन्ति परस्व कामयन्ति तान् दहति स (सभेश) ३३ २६ [उशोपपदे दह भस्मीकरणे (भ्वा०) धातो क्विप् । उश =वश कान्तौ (अदा०) धातोरिगुपधलक्षण क प्रत्यय । धातो सम्प्रसारणम्]

उशना सर्वहितङ्कामयमान (परमेश्वर) ४ २६ १ कान्तियुक्त (विद्वान्) १ १३० ६ कामयिता (विद्वज्जन) १ ८३ ५ धर्मकामुक (प्रजापालको राजा), प्र०—अत्र डादेश १ १२१ १२ **उशनाः**=कामयमाना (विद्वज्जना) ५ ३१ ८ **उशने**=कामयमाने (काव्ये) १ ५१ ११ [वश कान्तौ (अदा०) धातो 'वशे कनसि' उ० ४ २३६ सूत्रेण कनसि । वष्टि कामयते स इति विग्रह । 'ऋदुशनस्०' अ० ७ १ ६४ सूत्रेणानङ् आदेश सौ]

उशनेव यथाकाम (उपदेशको जन) ४ १६ २ [उशना-इवपदयो समास]

उशन्तम् कामयन्तम् (स्योनम्=सुखम्) ४ २७ कामयमान (पति) १ ७१ १ **उशन्तः**=शृण्वन्त श्रावयन्त (जना) ऋ० भू० २६५ सन्तानो की कामना करते हुए

उर्वरासाम् बहुश्रेष्ठाना भूमीनाम् ६ २० १ बहुश्रेष्ठा पदार्था सन्ति यस्या ता भूमिं सनति तम् (प्रजाजनम्) ४ ३८ १ **उर्वरासु**=सुन्दरवर्णयुक्तासु (वाणीषु) १ १२७ ६ पृथिव्यादिनिमित्तेषु ६ २५ ४. भूमिषु ४ ४१ ६

उर्वर्याय उरुणा महतामर्य्याय स्वामिने (पुरुषाय) १६ ३३ [उरु-अर्यपदयो समास । उरु बहुनाम निघ० ३ १ ऊर्णुञ् आच्छादने (अदा०) धातो 'महति ह्रस्वश्च' उ० १ ३१ सूत्रेण कु प्रत्यय । अर्य ='अर्य स्वामी वैश्ययो' सूत्रेण स्वामिन्यभिधेये ऋ गतौ (भ्वा०) धातोर्यत् प्रत्ययो निपात्यते]

ऋतधाम सर्वगत सत्य और यथार्थस्वरूप वाला धाम स्थान आर्याभि० २ १७, ५ ३२ ऋत यथार्थं धाम स्थित्यर्थ स्थान यस्य स (राजा) १८.३८ यथा सत्य जल वा दधाति तथा (भगवान् विद्वान्वा) ५ ३२ [ऋत-धामन्पदयो समास। धामन्=डुधाञ् धारणपोषणयो (जु०) धातोर्बाहुलकादौणादिको मनिन् प्रत्यय। दधाति यत्रेति विग्रह]

ऋतधीतयः सत्यधारका (महाविद्वांस) ६ ५१ १० ऋतस्य सत्यस्य धीतिर्धारण येषान्ते (विद्वज्जना) ५ ५१ २ **ऋतधीतिभिः**=जलधारकैर्गुणै ६ ३९ २ [ऋत-धीति-पदयो समास। धीति=डुधाञ् धारणपोषणयो (जु०) धातो स्त्रिया क्तिन्]

ऋतनिभ्यः सत्यन्यायकर्त्रीभ्यो राज्ञीभ्य २ २७ १२ [ऋत-तनिपदयो समास। तकारलोप पूर्वपदस्य छान्दस। तनि=तनु विस्तारे (तना०) धातोर्बाहुलकाद् इ प्रत्यय]

ऋतपाः य ऋत सत्य पाति (सूर्य) ६ ३ १ सत्य-पालिका (उषा) १ ११३ १२ [ऋतोपपदे पा रक्षणे (अदा०) धातोरण् प्रत्यय]

ऋतपेशसे सत्यस्वरूपाय (वरुणाय=उत्तमव्यव-हाराय) ५ ६६ १ [ऋत-पेशस्पदयो समास। पेशस् इति रूपनाम निघ० ३ ७ हिरण्यनाम निघ० १ २]

ऋतप्रजात ऋत सत्य प्रजात यस्मात्तत्सम्बुद्धौ (अर्य=स्वामीश्वर) २६ ३ ऋते सत्याचरणे प्रकट (बृह-स्पते=विद्वज्जन) २ २३ १५ **ऋतप्रजातः**=कारणा-दुत्पद्य ऋते वायावुदके प्रसिद्ध (अग्नि) १ ६५ ५ [ऋत-प्रजातपदयो समास। प्रजात=प्र+जनी प्रादुर्भावे (दिवा०) धातो क्त]

ऋतप्रवीतम् ऋतात् सत्यात् कारणात् प्रकृष्टतया

कामयमानस्य (राज्ञ) ७ ३४ १७ [ऋतपदाद् आत्मन इच्छाया क्यचि 'क्याच्छन्दसी' ति उ प्रत्यय । ऋतायु यज्ञकाम नि० १० ४५]

ऋतायोः आत्मन ऋत सत्यमिच्छु (विद्वज्जन) १ १६६ ५ [ऋतपदाद् आत्मन इच्छाया क्यचि ताच्छील्ये उ प्रत्यय]

ऋतावरि ! सत्याचरणयुक्ते (विदुषि स्त्रि !) २ १.१८ **ऋतावरी**=उषा ६ ६१ ६ बहुसत्यप्रकाशिका (उषा) ४ ५२ २ सत्यप्रकाशिकोषा ३ ५४ ४ ऋत सत्य विद्यते यस्या सा (उषा =प्रातर्वेला) ३ ६१ ६ **ऋतावरीम्**=बहुसत्याचरणयुक्ताम् (उषस =प्रातर्वेलाम्) ५ ८० १ **ऋतावरीः**=ऋत पुष्कलमुदक विद्यते यासु ता (नद्य) ३ ३३ ५ ऋत सत्य विद्यते यासु ता (दिव =ज्योतीषि ३ ५६ ५ उषस ४ १८ ६ [ऋतमुदकनाम निघ० १ १२ सत्यनाम निघ० ३ १० तत 'छन्दसीवनिपौ' अ० ५ २ १०९ वा० सूत्रेण वनिप् । 'वनो र च' अ० ४ १ ७ सूत्रेण रेफडीपौ । 'अन्येषामपि०' सूत्रेण पूर्वस्य दीर्घ]

ऋतावरी सत्यकारणयुक्ते (विद्युदन्तरिक्षे) १ १६० १ बहूनृतादीन्युदकानि विद्यन्ते ययोस्ते (सूर्यभूमी) ३ ६ १० बह्वृत सत्य विद्यते ययोस्ते (द्यावापृथिव्यौ) ४ ५६ २ [ऋतावर्य =नदीनाम निघ० १ १३ ऋतावरीर्ऋतवत्य । ऋतमित्युदक नाम प्रत्यृत भवति । नि० २ २५ सिद्धि पूर्वपदे द्रष्टव्या]

ऋतावः ऋत सत्य विद्यते यस्मिँस्तत्सम्बुद्धौ (अग्ने =राजन्) ४ १० ७ ऋत सत्य बहुविध विद्यते यस्य तत्सम्बुद्धौ (वरुण=अध्यापकोपदेशक वा) २ २८ ६ सत्यप्रकाशक (विद्वन्नध्यापक) ३ १४ २ **ऋतावा**=ऋत सत्य विद्यते यस्मिन् स (पुत्र =तनय) ४ ४२ ४ सत्यगुणकर्मस्वभाववान् (विद्वान्) १ ७७ २ ऋता प्रशस्ता सत्यगुणा विद्यन्ते यस्मिन् स (विद्वज्जन) १ ७७ १ सत्यस्वरूप (अग्नि =आप्तो जन) ४ २ १ सत्यप्रकाशक (देव =विद्वान्) ३ ५४ १२ सत्यसेवी (विप्र =मेधाविजन) ७ ६१ २ सत्यवान् (तत्त्ववेत्ता विद्वान्) ३ ५३ ८ ऋतस्य सत्यस्य सम्बन्धो विद्यते यस्य स (विद्वान् सभेश) प्र०—अत्र अन्येषामपि०' इति दीर्घ 'सुपा सुलुग्०' इति डादेश १८ ५३ सत्याचरण (राजा) ४ ३८ ७ ऋतानि सत्यानि कर्माणि गुणा स्वभावो वा यस्य स (सभाध्यक्ष) १ ७७ ५ **ऋतावानम्**=ऋत बहु सत्य विद्यते यस्मिँस्तम् (अग्नि=विद्वज्जनम्) प्र०—अत्र 'छन्दसीवनिपौ इति वार्त्तिकेन वनिप् १२ १११ सत्यादागमयम् (अग्नि=पावकम्) ३ २ १३ ऋत सत्य विद्यते यस्मिँस्तम् (अग्नि=परमेश्वरम्) ४ ७ ३ **ऋतावानः**=प्रशंसितमृत सत्य विद्यते येषु ते (देवा =दिव्यगुणा) ३ ५६ ८ सत्यस्य प्रकाशिका (कन्या) ७ ४० ७ [ऋत सत्यनाम निघ० ३ १० ततो मत्वर्थे 'छन्दसीवनिपौ' अ० ५ २ १०९ वा सूत्रेण वनिप् । 'अन्येषामपि०' इति दीर्घ]

ऋतावा=य ऋत जल सवनति भजति स (सूर्य इव राजा) ६ ७३ १ सत्यस्य विभाजक (अग्नि =परमात्मा) ४ ६ ५ य ऋत वनति सभजति स (विद्वज्जन) २ ३५ ८ सत्यस्य जलस्य वा विभाजक (अग्नि =विद्युत्) ७ ३ १ सत्याऽसत्योर्विभाजक (अग्नि =सर्वप्रकाशको जगदीश्वर) ६ १५ १३ य ऋतेन सत्येन वनति सम्भजति स (धार्मिको जन) १ १२२ ६ **ऋतावानम्**=य ऋत जल वनति सम्भजति तम् (वैश्वानर=अग्निम्), भा०—योऽग्निर्जलादीनि मूर्त्तानि द्रव्याणि स्वतेजसा भिनत्ति, निरन्तर जलमाकर्षति च तम् २६ ६. सत्यस्य सम्भक्तारम् (राजानम्) ४ १ २. **ऋतावानः**=य ऋतानि सत्याचरणानि वनन्ति सभजन्ति ते (कवय =प्राज्ञा विद्वास) २ २४ ७ [ऋतोपपदे वन सभक्तौ (भ्वा०) धातो 'अन्येभ्योऽपि दृश्यन्ते' इति विच् । 'विड्वनोर्०' इत्याकारादेश]

ऋतावा य ऋत सत्य वनुते याचते स (विद्वज्जन) ३ १३ २ **ऋतावानः**=सत्य याचमाना (विद्वज्जना) ७ ३९ ७ [ऋतोपपदे वनु याचने (तना०) धातो 'अन्येभ्योऽपि दृश्यन्ते' इति विच् । 'विड्वनोर्०' इत्याकारादेश]

ऋतावाना ऋत सत्य विद्यते ययोस्तौ (अध्यापकोपदेशकौ) ५.६५ २ ऋतस्य सत्यस्य सम्बन्धिनौ (सभासेनेशौ), प्र०—अत्र 'अन्येषामपि०' इति दीर्घ १ १३६ ४ सत्याचारसम्बन्धिनौ (अध्यापकोपदेशकौ) १ १५.८ [ऋतप्राति० मत्वर्थे 'छन्दसीवनिपौ' अ० ५ २ १०९ वा० सूत्रेण वनिप् । सहिताया पूर्वस्य दीर्घ]

ऋतावानाः ऋत सत्य मत कर्म वा विद्यते येषु ते (विद्वज्जना) ५ ६७ ४ **ऋतावानौ**=सत्याऽऽचारिणौ (अध्यापकोपदेशकौ) १.१५१ ४ [पूर्वपदे व्याख्यातम्]

ऋतावृधः य ऋतेन वेदविज्ञानेन वर्द्धन्ते तान् (पितॄन्=जनकादीन्) १९ ६५ सत्यविद्यावर्द्धका (विश्वेदेवा =सर्वविद्वास) ६ ५२ १० या ऋतेन जलेन नद्य इव सत्येन वर्द्धन्ते ता (सत्यस्त्रिय) प्र०—अत्र 'अन्येषामपि०'

सत्येपु ऋकृत्यादिपु सीदति स (परमेश्वर) १० २४ [ऋतोपपदे पद्लृ विशरणगत्यवसादनेपु (भ्वा०) धातो 'सत्सूद्विपद्रुहृ०' अ० ३ २ ६१ सूत्रेण क्विप्। ऋतसदित्येष (सूर्य) वै सत्यसत् ऐ० ४ २०]

ऋतसदनम् यदृताना सत्याना बोधाना स्थान तत् ४ ३६ ऋताना यथार्थाना पदार्थाना सादन स्थानम् ४ २६ [ऋत-सदनपदयो समास। सद्नम्=पद्लृ विशरणगत्यवसादनेपु (भ्वा०) धातोरधिकरणे ल्युट्। सदनम्=उदकनाम निघ० १ १२]

ऋतसदनी या क्रिया ऋताना जलाना सदनी गमनागमनकारिणी ४ ३६ [ऋत-सदनीपदयो समास। सदनी=पद्लृ विशणगत्यवसादनेपु (भ्वा०) धातोरधिकरणे ल्युट्। तत स्त्रिया ङीप्]

ऋतसाप य ऋतेन सत्येन सपन्ति सम्बध्नन्ति ते (विद्वासो जना) ६ ५० २ ये ऋतेन सपन्ति प्रतिज्ञा कुर्वन्ति ते (मरुत=सत्पुरुषा) ७ ५६ १२ सत्यसम्बन्धा (विद्वज्जना) ५ ४१ ६ य आप्नुवते त आप, समानाश्च ते इति साप, ऋतस्य सत्यस्य मध्ये व्यापका व्यापयितारो वा विद्वास १ १७६ २ [ऋतोपपदे पप समवाये (भ्वा०) धातो कर्त्तर्यण्। समवाय=सम्बन्ध सम्यगवबोधो वा। अन्यत्र=ऋत-सापपदयो समास। साप=आप्लृ व्याप्तौ (स्वा०) धातो क्विप् प्रत्यये=आप्। तत समानेन सह समास। समानस्य सादेश]

ऋतस्तुभम् यया ऋत स्तोभते स्तभ्नाति धरति ताम् (नीतिम्) १ ११२ १० [ऋतोपपदे स्तम्भु (सौत्रो धातु) धातो क्विप्]

ऋतस्पते! हे सत्यपालक! भा०—सत्यसेवक (वायो=विद्वज्जन) २७ ३४ [ऋत-पतिपदयो समास। पारस्करप्रभृतीनामाकृतिगणत्वात् सुडागम]

ऋतस्पृशः य ऋत सत्य यथार्थ स्पृशन्ति स्वीकुर्वन्ति ते (विद्वासो जना) ५ ६७ ४ सत्यस्पर्शस्य (राज्ञ) ४ ५० ३ [ऋतोपपदे स्पृश सस्पर्शने (तुदा०) धातो क्विप्]

ऋतस्पृशा ऋतस्य ब्रह्मणो वेदस्य स्पर्शयितारौ प्रापकौ जलस्य च (मित्रावरुणौ=सूर्यवायू) १ २ ८ [ऋतोपपदे स्पृश सस्पर्शने (तुदा०) धातो क्विप्। 'सुपा सुलुक्०' इत्याकारादेश]

ऋतः सत्यज्ञान, भा०—विधानधर्त्ता (अ०—परमात्मा) १७ ८२ [ऋत सत्यनाम निघ० ३ १० ततो मत्वर्थे 'लुगकारेकाराश्च वक्तव्या' अ० ४.४ १२८. वा० सूत्रेण लुक्]

ऋता सत्याऽऽचारौ (अध्यापकोपदेशकौ) ६ ६७ ४. ऋतौ यथार्थमुगुणस्वरूपौ, (सभासेनाऽधिपती) १ ४६ १४ [ऋतप्राप्ति० 'सुपा सुलुक्०' सूत्रेणौकारस्याकार]

ऋता ऋतानि सत्यानि (विज्ञानानि) १ १६१ ६ ऋत सत्यनाम निघ० ३ १० तत शेर्लोप 'शेश्छन्दसि बहुलम्' अ० ६ १ ७० सूत्रेण]

ऋता ऋते सत्यसुखप्रापके यज्ञे ६ १५ १४ ['ऋता' इति व्याख्यातम्]

ऋतात् सत्याद् धर्म्याद् व्यवहारात् १ १३६ २ **ऋतानाम्**=सत्यानाम् (व्यवहाराणाम्) ४ २३ ४ **ऋतानि**=सत्यानि (वचनानि) १ १७६ २ **ऋताय**=सत्य प्राप्ताय (विदुपे जनाय) १ १५३ ३ सत्याचाराय १ १३७ २ धर्म्यव्यवहारेण प्राप्ताय (धनाय) ५ २० ४ सत्याय जलाय वा ४ २३ १० सत्यलक्षणाऽन्वितायोदकाय वा १ १२१ ४ सत्यविद्याय (सज्जनाय) १ १५१ ३ [ऋतमिति पदे व्याख्यातम्]

ऋतायतः उदकमिवाऽऽचरत (सज्जनस्य) २ ३२ १ आत्मन ऋत सत्यमिच्छत (महाविदुप) २ १ २ **ऋतायते**=ऋत कामयमानाय (विद्यार्थिने जनाय) ५ २७ ४ ऋतमात्मन इच्छवे (विदुपे जनाय), प्र०—'वाच्छन्दसि सर्वे विधयो भवन्ति, इति क्यच उत्व न १ ९० ६ आत्मन ऋत विज्ञानमिच्छते (मनुष्याय) १ ६१ ७ [ऋतपदाद् आत्मन् इच्छायामाचारे वा क्यच्। तत शतृ]

ऋतायते ऋतमिव करोति ४ ८ ३ ऋतमुदकमिवाऽऽचरन्ति, प्र० अत्र वचनव्यत्ययेन बहुवचनस्थान एकवचनम् 'ऋतमित्युदकनामसु पठितम्' निघ० १ १२ 'न छन्दस्यपुत्रस्य' इतीत्वाऽभाव 'अन्येपामपि०' इति दीर्घ १३ २७ [ऋतपदादाचारे क्यङ्]

ऋतायन् ऋत सत्यमात्मन इच्छन् (विद्वज्जन) १ ११७ २२ ऋतमाचरन् (सज्जन) ५ ४० १ (ऋतपदाद् आत्मन इच्छाया क्यच्, आचारे वा उपमानाद्। 'नच्छन्दस्यपुत्रस्य' इतीत्वाऽभाव। तत शतृ]

ऋतायवः ऋत सत्यमिच्छव (विद्वज्जना) ५ ८ १ आत्मन ऋतमिच्छव (नर=नायका जना) ५ ५४.१२ **ऋतायुभ्याम्**=आत्मन ऋतमिच्छद्भ्यामिव (अध्यापकशिष्याभ्याम्) ७ १० **ऋतायोः**=ऋतं सत्यं न्यायधर्म्म

यम् (सूक्तम्) कौ० २६ ६. ऋतवो वै देवा श० ७ २.४ २६. ऋतवो ह वै प्रयाजा । तस्मात्पञ्च भवन्ति पञ्च ऋतव श० १.५.३ १ ऋतवो वै प्रयाजा ऽनुयाजा कौ० १४ ऋतवो वै पृष्ठानि तै० ३ ६ ६ १ श० १३ ३ २ १ ऋतव पितर कौ० ५ ७ श० २४.२ २४ गो० उ० १ २४ ऋतव एव प्रवोवाज गो० पू० ५ १२ ऋतवो वाव होत्रा गो० उ० ६ ६ ऋतवो होत्राशसिन. कौ० २६ ८ सदस्या ऋतवोऽभवन् तै० ३ ११ ६ ४. ऋतवो वै विश्वेदेवा श० ७ १ १ ४३ ऋतवो वै वाजिन कौ० ५ २ श० २ ४ ४ २२. गो० उ० १ २० ऋतव शिक्यमृतुभिर्हि सवत्सर शक्नोति स्थातु यच्छक्नोति तस्माच्छिक्यम् श० ६.७ १ १८ ऋपभो वा एष ऋतूना यत्सवत्सर । तस्य त्रयोदशो मासो विष्टपम् तै० ३ ८ ३ ३ अग्निष्टोम उक्थ्योऽग्निर् ऋतु. प्रजापति सवत्सर इति । एते ऽनुवाका यज्ञक्रतूनाञ्चर्तूनाञ्च संवत्सरस्य च नामधेयानि तै० ३.१० १० ४ मुख वा एतद् ऋतूना यद्वसन्त तै० १ १ २ ६ अन्त ऋतूना हेमन्त श० १ ५ ३ १३]

ऋतुपाः य ऋतून् पाति रक्षति स सूर्य ३ ४७ ३ **ऋतुपाभिः**=ये ऋतुषु पान्ति तै (मरुद्भि =मनुष्यै) ४ ३४ ७ [ऋतूपपदे पा रक्षणे धातोरच्प्रत्यय]

ऋतुमतः प्रशस्ता वसन्तादय ऋतवो विद्यन्ते येषा तान्, भा०—देशकालज्ञान् (पितॄन्=विद्यावयोवृद्धान् पित्रादीन्) १६ ६१ ऋतुविद्यावतोऽर्थात् यथासमयमुद्योग-कारिण (पितॄन्) ऋ० भू० २६३ [ऋतुप्राति० मतुप्]

ऋतुशः ऋतुमृतु प्रति २३ ५७ वहुषु ऋतुषु १ १६२ ४ वहूनृतून् १३ ४३ ऋत्वर्हम्, भा०—प्रत्यृतु २५ २७ ऋतावृतौ २६ १० [ऋतुप्राति० 'सर्ल्यैकवचनाच्च वीप्सायाम्' अ० ५ ४ ४३ सूत्रेण वीप्साया शस्]

ऋतुष्ठाः या ऋतुषु वसन्तादिषु तिष्ठन्ति ता (सत्य-स्त्रिय) १७ ३ [ऋतूपपदे ष्ठा गतिनिवृत्तौ (भ्वा०) धातो क प्रत्यय । स्त्रिया टाप्]

ऋते विना २ १२ ६ भिन्न ७ ११.१ ['ऋते' इत्यव्ययम्]

ऋतेजाः यो ऋते सत्ये जायते (सूर्य) ६ ३ १ सत्ये प्रादुर्भूता (उषा) १ ११३ १२ [ऋतोपपदे जनी प्रादुर्भावे (दिवा०) धातोर्ड प्रत्यय । सप्तम्या समासेऽलुक्]

ऋतेन सत्यस्वरूपेण ब्रह्मणा २ २७ ८ सत्येन परमात्मना वा ५ १५ २ सत्येन वेदविज्ञानेन, विद्याविनय-युक्तेन न्यायेन १६ ७५ सत्येन व्यवहारेण ७ ३४ ८ जलेनेव सत्येन ५ ८०.१ वहिरथेन वायुना नह १६ ७६ कालेन सूर्येण वायुना वा ऋ० भू० १४३ यथार्थेन योगा-भ्यासेन, भा०—सत्याचरणेन १६ ७३ सत्यविज्ञानयुक्तेन (वेदेन) १६.७८ [ऋतमिति व्याख्यातम् । ऋतम् उदकनाम निघ० १ १२ धननाम निघ० २ १०. सत्यनाम निघ० ३.१०.]

ऋतेश्रिताः ऋते ब्रह्मणि पुरुषार्थे चाऽऽश्रिता., ऋत मेवमानाश्च (ज्ञानिनो जना) ऋ० भू० १०१ [ऋत-श्रितपदयो समास । सप्तम्या अलुक् । श्रित =श्रिञ् सेवायाम् (भ्वा०) धातो क्त]

ऋतोः ऋतुसमयात् २ २८ ५ ['ऋतुना' पदे द्रष्टव्य]

ऋत्विक् ऋत्वनुकूल सङ्गच्छन् (विद्वज्जन) २ ५ ७ **ऋत्विजम्**=य ऋतौ ऋतौ प्रत्युत्पत्तिकाल ससार सङ्गत यजति करोति तथा च शिल्पसाधनानि सङ्गमयति, सर्वेषु ऋतुषु यजनीयस्तम् (अग्निम्=परमेश्वरं भौतिक-मग्नि वा) प्र०—'ऋत्विग्दधृग्०' अ० ३ २ ५६ अनेन कर्त्तरि निपातन तथा 'कृतो बहुलम्०' इति कर्मणि वा १ १ १ सर्वेषु ऋतुषु यजनीय, पूजार्ह, यथाकाल जगद्रचक ज्ञानादियज्ञसाधकम् (ईश्वरम्) वे० भा० न० य ऋतूनर्हति तम् (सज्जनम्) ७ १६ ६ ऋतून् यजति सङ्गच्छते यस्तम् (बहुश्रुत सज्जनम्) १ ४५.७ यज्ञ-सम्पादकम् (विद्वज्जनम्) १ ४४ ११ यज्ञसाधकम् (विद्वासम्) ५.२६ ७ य ऋतुषु यजति तद्वद्वर्त्तमानम् (अग्नि=पावकम्) ५ २२ २. ऋत्विग्वत् सुखसाधकम् (अग्नि=परमेश्वरम्) ३ १० २. सब ऋतु वसन्त आदि के रचक अर्थात् जिस समय जैसा सुख चाहिये, उस समय वैसे सुख के सम्पादक (ईश्वर) को आर्याभि० १ २, १ १ १ **ऋत्विजः**=य ऋतुषु यजन्ते ते विद्वास १ ६० ३. समय-समय मे प्राप्त होने वाले (सन्यासि जन) स० वि० २०६, अथर्व० ६ ६ ६ ऋतूपपदे यज देवपूजासगतिकरणदानेषु (भ्वा०) धातो कर्त्तरि क्विन् । 'ऋत्विग्०' अ० ३ २ ५६ सूत्रेण निपात्यते । ऋत्विक् ईरण, ऋग्यष्टा भवतीति शाकपूणि । ऋतुयाजी भवतीति वा नि० ३ १६ ऋतव ऋत्विज श० ११ २ ७ २ ऋत्विजो हैव देवयजनम् श० ३ १ १ ५ एते एव सरघो मधुकृतो यद् ऋत्विज श० ३ ४ ३ १४ आत्मा वै यज्ञस्य यजमानोऽङ्गान्यृत्विज श० ६ ५ २ १६]

ऋत्वियम् ऋत्विगर्हम् (सत्कर्म) २.१ २ ऋतु सम्प्राप्तोऽस्य तम् (गर्भम्=बीजम्) २३ ६३ **ऋत्वियः**=

इनि दीर्घ १७ ३ ये ऋतेन सत्येन वर्द्धन्ते (भा०—ईश्वरोपासका विद्वास) १७ ७८ या ऋत सत्य वर्द्धयन्ति ता (प्रजा) ५ ४४ ४ ऋतेन सत्येनाऽऽचरणेन विज्ञानेन च वृद्धा (वाच) १ १४२ ६ सत्यस्य वर्द्धका, (देवा = विद्वज्जना) ३४ ५३ या ऋत यथायोग्य सत्य वर्द्धयन्ति ता (द्वार = द्वाराणि) २८ २८ सत्यव्यवहारवर्द्धकान् (देवान् = दिव्यान् गुणान् भोगान्वा) ६ १५.१८ ऋतमुदक सत्य यज्ञ च वर्धयन्ति तान् (देवान् = विद्वज्जनान्) १ १४ ७ या ऋत सत्य सुख जल वा वर्धयन्ति ता (द्वार = द्वाराणि) १ १३ ६ ऋतेन सत्येन वर्धन्ते ते (विद्वास) १ ४४ १४ [ऋतोपपदे वृधु वृद्धौ (भ्वा०) धातो क्विप् । 'अन्येषामपि दृश्यते' अ० ६ ३ १३७ सूत्रेण सहिताया दीर्घ । ऋतावृध् = सत्यवृधो वा यज्ञवृधो वा नि० १२ ३३]

ऋतावृधा यावृतेन सत्याऽनुष्ठानेन वर्धेते तौ (अश्विनौ = सूर्यपवनौ) १ ४७ १ यावृतेन यथार्थगुणेन प्राप्तिसाधकेन वर्धयेते तौ (अश्विनौ = सभासेनेशौ) १ ४७ ३ यावृतेन जलेन यथार्थतया शिल्पक्रियया वा वर्धेते तौ (अश्विनौ = सूर्यपवनौ) १ ४७ १ कारणेन वर्द्धिते (द्यावापृथिवी = क्षितिसूर्यौ) १ १५९ १ यावृत सत्य वर्धयतस्तौ (अध्यापकोपदेशकौ) ५ ६५ २ सत्येन वृद्धौ (अध्यापकाऽध्येतारौ) २ ४१ ४ ये ऋतेन कारणेन वर्धेता ते (देवी = द्यावापृथिव्यौ भूमिसूर्यप्रकाशौ) १ १०६ ३ सत्यवर्द्धकौ (मित्रावरुणा = अध्यापकोपदेशकौ) ३ ६२ १८ यावृत विज्ञान वर्द्धयतस्तौ, (अ०—अध्यापकाऽध्येतारौ) ७ ६ [पूर्वपदे सिद्धि द्रष्टव्या]

ऋतावृधे सत्यस्य वर्द्धकाय (अग्नये = पावकाय) ३ २ १ **ऋतावृधौ** = ऋत सत्य कारण जल वा वर्द्धयतस्तौ (मित्रावरुणा = सूर्यवायू) प्र० —अत्राऽन्तर्गतो ण्यर्थ 'अन्येषामपि दृश्यते' इति दीर्घश्च १ २३ ५ ऋत ब्रह्म तेन वर्धयितारौ ज्ञापकौ जलाकर्पणवृष्टिनिमित्ते वा (मित्रावरुणौ = सूर्यवायू) १ २ ८ ['ऋतावृध' इति पदे व्याख्यातम्]

ऋताषाट् य ऋत व्यवहार सहते स (राजा) १८ ३८ [ऋतोपपदे षह मर्षणे (भ्वा०) धातो 'छन्दसि सह' अ० ३ २.६३ सूत्रेण ण्वि । 'सहे साड स' अ० ८ ३ ५६ सूत्रेण षत्वम् । 'अन्येषामपि दृश्यते' अ० ६ ३ १३७ सूत्रेण दीर्घत्वम्]

ऋतीषहम् य ऋतीन् परपदार्थप्रापकाञ्छत्रून् सहते तम् (वीर = शूरपुरुषम्) ६ १४ ४ गतिसहम् (इन्द्र = राजानम्) प्र०—अत्र 'सहितायाम्' इति दीर्घ २६ ११. [ऋत्युपपदे षह मर्षणे (भ्वा०) धातो क्विप् प्रत्यय । पूर्वपदस्य दीर्घ सहितायाम्]

ऋतीषाहम् य ऋति सत्य सहते तम् (रयिम्), प्र०—अत्र 'अन्येषामपि०' इति दीर्घ १ ६४ १५ [ऋत्युपपदे षह मर्षणे (भ्वा०) धातो 'छन्दसि सह' अ० ३ २ ६३ सूत्रेण ण्वि । पूर्वपदस्य दीर्घत्वम्]

ऋतुथा ऋतुभ्य २३ ४० ऋत्वनुकूलानि (अन्नानि) १ १७० ५ ऋतौ ऋतौ, प्र०—अत्र 'वाच्छन्दसि' इति थाल् १ १६२ १६. ऋतुप्रकारेण १ १६४ ४४ ऋतुरिव ६ १८ ३ ऋतुभि २६ १६ ऋतुप्रकारै २० ६५ ऋतौ २५ ४२ ऋतुष्विव ६.६ ३ [ऋतुप्राति० प्रकारवचने 'वा छन्दसि' इति थाल् प्रत्ययोऽसर्वनाम्न अपि । अथवा इवार्थे थाल् प्रत्यय । ऋतुथा = ऋतावृतौ नि० ८ १६ ऋतुथा = काले काले नि० १२ २७]

ऋतुना औष्ण्य प्रापकेन २१ २४ प्राप्तव्येन (वसन्तेन) २१ २३ वसन्ताद्येन २ ३७ ६ वसन्तादिभि सह, प्र०—अत्र 'जात्याख्यायामेकस्मिन् बहुवचनमन्यतरस्याम्' अ० १ २ ५८ अनेन जात्यभिप्रायेणैकवचनम् १ १५ १ **ऋतुभिः** = वसन्तादै १२ ६१ ऋच्छन्ति प्राप्नुवन्ति यैस्तै (वसन्तादिभि) प्र०—अत्र 'अर्त्तेश्च तु' उ० १ ७३ इति ऋ-धातोस्तु प्रत्यय किच्च १ १५ १० मेधाविभि सह ४ ३४ २ सहचरितै सुखै, सर्वै कालाऽवयवै १४ ७ **ऋतुः** = वसन्तादि २५ ४२ **ऋतू** = यावृच्छतस्तौ (ज्येष्ठाऽऽपाढौ) १४ ६ वृष्टिप्रापकौ (श्रावणभाद्रपदौ), वर्षर्त्तुसम्बन्धिनौ (श्रावणभाद्रपदौ) १४ १५ बलप्रदौ (आश्विनकार्त्तिकौ) १४ १६ स्वलिङ्गप्रापकौ (मार्गशीर्ष पौषश्च मासौ) १४ २७ **ऋतून्** = रसाऽऽहरणसाधकान् (वसन्तादीन्) १ १५ ५ [ऋ गतिप्रापणयो (भ्वा०) धातो अर्त्तेश्च तु' उ० १ ७३ सूत्रेण तु प्रत्यय किच्च । ऋतु अर्त्तेर्गतिकर्मण नि० २ २५ ऋतुभि कालै नि० ८ ३ द्वौ द्वौ हि मासावृतु ता० १० १२ ८ द्वौ हि मासावृतु श० ७ ४ २ २६ त्रयो वा ऋतव सवत्सरस्य श० ३ ४ ४ १७ पञ्च वाऽ ऋतव श० २ २ ३ १४ पञ्चर्तवो हेमन्तशिशिरयो समासेन ऐ० १ १ षड् वा ऋतव सवत्सरस्य श० १ २ ५ १२ वसन्तो ग्रीष्मो वर्षा, ते देवा ऋतव । शरद् हेमन्तशिशिरस्ते पितर (ऋतव) श० २ १ ३ १ या षड् विभूतय ऋतवस्ते जै० उ० १ २१ १ तद् यानि तानि भूतानि ऋतवस्ते श० ६ १ ३ ८ सप्त ह्यतव श० ६ ३ १ १६ अग्नयो वाऽ ऋतव श० ६ २ १ ३६ ऋतवो हैते यदेताश्चितय श० ६ २ १ ३६ ऋतव उपसद श० १० २ ५ ७ ऋतव उद्गीथ ष० ३ १ ऋतवो वा उदु ब्रह्मी-

प्रिय धाम ता० १४ २ ५]

ऋभुक्षणम् ये ऋभून् मेधाविन क्षाययति निवासयति ज्ञापयति वा तम् (इन्द्र=क्रियाकुशल विद्वान सेनापति वा) १ १११ ४. **ऋभुक्षणः**=महान्त (नर=नायका जना), प्र०—ऋभुक्षा इति महन्नाम, निघ० ३ ३, ७ ४८ १ मेधाविनो विद्वास (जना) ७ ३७.१ **ऋभुक्षाः**=मेधावी (जन) ६ ५० १२ महान् (मेधाविजन) ४ ३३ ६ सद्गुणैर्महान्त (आप्ता विद्वास) ४ ३४ ५ य ऋभून् मेधाविन क्षियति निवासयति स महान् (इन्द्र=राजा) ७ ४८ ३ [ऋभुक्षा महन्नाम निघ० ३ ३ उरुक्षयण ऋभूणा राजेति वा नि० ६ ३ ऋभु मेधाविनाम (निघ० ३ १५), तदुपपदे क्षि निवासे (तुदा०) धातोर्डिनि प्रत्यय । 'पथिमथ्यृभुक्षामात्०' इत्याकारादेश]

ऋभुतः ऋभूणा सकाशात् ४ ३६ ५ [ऋभु मेधाविनाम, निघ० ३ १५. तत सार्वविभक्तिकस्तसि]

ऋभुमत् प्रशस्ता ऋभवो मेधाविनो विद्यन्ते यस्मिँस्तत् (वय=आयु) १ १११ २ **ऋभुमन्तम्**=प्रशस्ता ऋभवो मेधाविनो विद्यन्ते यस्य तम् (विद्वासमध्यापकम्) ३ ५२.६ **ऋभुमान्**=प्रशस्ता ऋभवो मेधाविनो विद्यन्ते यस्य स (सेनाऽध्यक्ष) १ ११०.६ [ऋभुप्राति० मतुप् अतिशायनेऽर्थे । ऋभुरिति मेधाविनाम निघ० ३ १५]

ऋभ्वसम् ऋभु मेधाविनमसते गृह्णाति तम् (विद्वज्जनम्) प्र०—ऋभुरिति मेधाविनाम, निघ० ३.५, अस गत्यादि ५ ५२ ८ ऋभून् मनुष्यादीन् पदार्थान्वाऽस्यन्ति येन तम् (रथम्) १ ५६ १ [ऋभूपपदे अस गतिदीप्त्यादानेषु (भ्वा०) धातो कर्त्तरि मूलविभुजादित्वात् क । अन्यत्र ऋभूपपदे असु क्षेपणे (दिवा०) धातो करणे 'पुसि सज्ञाया घ प्रायेण' अ० ३ ३ ११८ सूत्रेण घ]

ऋभ्वा महता मेधाविना मन्त्रिणा, प्र०—अत्र सुपा सुलुग्०, इत्याकारादेश १ १०० ५. अत्यन्त विज्ञानादि प्रकाश वाला, सबका प्रकाशक, महान्, महाबल वाला (ईश्वर) आर्याभि० १ ३४ [ऋभुरिति मेधाविनाम निघ० ३.१५. ततस्तृतीयाया स्थान आकार.]

ऋश्यः मृगविशेष २४.३७ **ऋश्यान्**=मृगजातिविशेषान् पशून् २४ २७. [ऋषति गच्छतीति विग्रहे ऋषी गतौ (तुदा०) धातो. 'अघ्न्यादयश्च' उ० ४ ११२ सूत्रेण यक्]

ऋषभम् वृषभम् २१.५६. श्रेष्ठ पुरुषार्थम् २१ ४०. बलीवर्दम् २१ ३८ अतिश्रेष्ठम् (गाम्) २८ ३४ **ऋषभस्य**=उत्कृष्टगुणकर्मस्वभावस्य राज्ञ २१.४७ प्राप्तु योग्यस्य (हविष=वस्तुन) २१.४६ उत्तमस्य (हविष=वस्तुन) २१.४५ श्रेष्ठस्य (विदुषा राज्ञ) ६ २८ ८ **ऋषभ**=बलिष्ठ (वृषभ) १८ २७ विज्ञानवान् (परमयोगी) १९ ९१ गतिमान् पशु १४ ६ श्रेष्ठ (गौ=वृषभ) २१.२२ **ऋषभाय**=श्रेष्ठाय मनुष्याय (जनाय) २४ ३० **ऋषभाः**=बलिष्ठा (पशव) २४.१३. **ऋषभेण**=गन्तु योग्येन, भा०—पुरुषार्थेन (गवा) २१ ३२ [ऋषी गतौ (तुदा०) धातो 'ऋषिवृषिभ्या कित्' उ० ३ १२३ सूत्रेण अभच् किच्च । ऋषभो वै पशूनामधिपति ता० १९ १२ ३ ऋषभो वै पशूना प्रजापति श० ५ २ ५ १७. वृषा वा वृषभो योषा ब्रह्मण्या गो० ६ ३ वीर्यं वा ऋषभ ता० १८ ९ १४]

ऋषभास. वृषभा २०.८८ उत्तमा (अस्मत्सम्बन्धिजना) ६ १६ ४७ [पूर्वपदे व्याख्यानम् । तत प्रथमाबहुवचने जसोऽसुगागम]

ऋषयः वेदविद्यापुरस्सरा परमयोगिन १८ ५८. वेदादिशास्त्रार्थविद (महाविद्वास) ३४.४९ वेदार्थवेत्तार, भा०—वेदपारगा (सज्जना.) १५ ४९ मन्त्रद्रष्टार (योगिजना) ऋ० भू० १२५ मन्त्रार्थविद (विप्रा=मेधाविपुरुषा) २५ ३० वेदार्थविद्या को प्राप्त (मन्त्यासि जन) स० वि० १९८, अथर्व० १९ ४१ १ प्राणादय पञ्च देवदत्तधनञ्जयौ च १७ ७९ विद्वान् लोग सं० वि० १८९, अथर्व० १९ ४१ १ विषयप्रापका (पञ्च ज्ञानेन्द्रियाणि) ३४ ५५ गन्तार (स्तव) १ १६४ १५ ज्ञापका प्राणा १५ ११ प्रापका (वायव) १५ १० प्रापका (पितर=पालका जना.) ४ ४२ ८ बलवन्त प्राणा १५.१३. गतिमन्त (प्रथमजा=वायव) १५ १२ धनञ्जयादय सूक्ष्मस्थूला वायव. प्राणा १५ १४ **ऋषिभिः**=मन्त्रार्थद्रष्टृभिरध्यापकैस्तर्कै. कारणस्थै प्राणैर्वा, प्र०—'ऋषिप्रशसा चैवमुच्चावचैरभिप्रायैर्ऋषीणा मन्त्रदृष्टयो भवन्ति' निरु० ७ ३ इयमेव ऋषीणा प्रशसा यतस्त एवमुच्चावचैर्महदल्पाभिप्रायैर्मन्त्रार्थैविदितै प्रशसनीया भवन्ति, तेषाम् ऋषीणा मन्त्रेषु दृष्टयोऽर्थादित्यन्नपुरुषार्थेन मन्त्रार्थाना यथावद् दर्शनानि ज्ञानानि भवन्ति, तस्मात्ते पूज्या सत्कर्त्तव्या आसन्निति । 'साक्षात्कृतधर्माण ऋषयो बभूवुस्ते०' निरु० १ २० कीदृशा ऋषयो भवन्तीत्यत्र प्राह—यत साक्षात्कृतधर्माणो धार्मिका आप्ता यै सर्वा विद्या यथावद्विदिता येऽवरेभ्यो ह्यसाक्षात्कृतवेदेभ्यो मनुष्येभ्य उपदेशेन वेदमन्त्रान् मन्त्रार्थाश्च सप्रादु प्रकाशितवन्तस्तस्मात्ते ऋषयो जाता । तै कस्मै प्रयोजनाय मन्त्राध्यापन तदर्थ-

ऋतुयाजक (विद्वज्जन) ५ ७५ ९ य ऋतुमर्हति स (क्रियाविज्जन) ३ ४१ २ ऋतु प्राप्तोऽस्य स (अग्ने=विद्युदग्नि.) प्र०—अत्र 'छन्दसि घस्' अ० ५.१ १०६ अनेन ऋतुशब्दाद् घस् प्रत्यय ३ १४ **ऋत्विये**=ऋतु समय मे स० वि० १३६, अथर्व० १४ २ ३७ [ऋतु-प्राति० तदस्य प्राप्तमित्यस्मिन् विषये 'छन्दसि घस्' अ० ५ १ १०६ सूत्रेण घस्। 'सिति चे' पदसञ्ज्ञायाम् 'ओर्गुण' इति न भवति। छन्दसि सर्वविधीना विकल्पाद् अर्हत्यर्थेऽपि घस्। ऋतव ऋत्विज श० ११ २ ७ २ इति ऋत्विगर्थे ऋतु]

ऋत्वियाः या ऋतुमर्हन्ति ता (वाच) १ १६० २ [पूर्वपदे व्याख्यातम्। स्त्रिया टाप्]

ऋदूदरः मृदूदर (वैद्य) प्र०—ऋदूदर सोमो मृदूदरो मृदुरुदरेष्विति वा०, नि० ६ ४, २ ३३ ५ **ऋदूदराः**=ऋत् सत्यमुदरे येषान्ते (कवय=मेधाविजना) ३ ५४ १० [मृदु-उदरपदयो समासे मकार-लोपश्छान्दस। अन्यत्र ऋत्-उदरपदयो समास। ऋदूदर सोमो मृदूदरो मृदुरुदरेष्व् इति वा नि० ६ ४]

ऋद्धम् समृद्धम् (प्राप्तपदार्थम्) १८ ११ [ऋधु वृद्धौ (दिवा०) धातो क्त]

ऋद्धिः सम्यग् वृद्धि ८ ५२ योगेन प्राप्ता समृद्धि १८ ११ [ऋधु वृद्धौ (दिवा०) धातो क्तिन्। अग्निमुखा ह्यृद्धि श० ३ ३ ८ ९]

ऋधक् य समृध्नोति स (मर्त्य=मनुष्य) ३३ ८७ समृद्धिवर्द्धके (भा०—कर्मणि), समृद्धिर्यथा स्यात्तथा ८ २० स्वीकारे ३ २५ १ सत्ये ७ ५७ ४ सत्यम् (रुद्र=परमात्मानम्) ६ ४९ १० यथार्थम् ६ ४० ५ [ऋधक् पदनाम निघ० ४ १ ऋधक् पृथगर्थेऽव्ययम्। ऋधु वृद्धौ (दिवा०) धातोर्बाहुलकादौणादिकोऽजि प्रत्यय। ऋध्यति वर्धयतीति विग्रह। ऋधक् पृथग्भावस्य प्रवचन भवति। अथाप्यृध्नोत्यर्थे दृश्यते। ऋध्नुवन् नि० ४ २५]

ऋधत् ऋध्नुयात् समर्द्धयेत् ६ २ ४ ऋधु वृद्धौ (दिवा०) धातोर्लेट्। व्यत्ययेन श]

ऋधद्वाराय ऋधत् सवर्द्धक सत्यो वार स्वीकरणीयो व्यवहारो यस्य तस्मै (अग्नये=सुपात्राय जनाय) ६ ३ २ [ऋधत्-वारपदयो समास। ऋधत्=ऋधु वृद्धौ (दिवा०) धातोर्बाहु० अति प्रत्यय। वार=वृञ् वरणे (स्वा०) धातोर्घञ्]

ऋधाथे वर्धयत, प्र०—अत्र व्यत्ययो 'बहुल छन्दसि' इति विकरणाभावश्च १ १७ ९. **ऋधीमहि**=समृद्धा भवेम ६ ३७ १ **ऋधेम**=वर्द्धेमहि ऋ० भू० २४७, अथर्व० १९ ५५ ४. [ऋधु वृद्धौ (दिवा०, स्वा०) धातोर्लिङ्। 'बहुल छन्दसी' ति विकरणलुक्। अन्यत्र लिङ्व्यत्ययेन शप् च]

ऋधावा शत्रूणा हन्ता (अयं=राजा) ४ २४ ८

ऋध्नोति वर्धयति १ १८ ८ [ऋधु वृद्धौ (स्वा०) धातोर्लट्। ऋध्नोति परिचरणकर्मा निघ० ३ ५]

ऋध्यताम् वर्धताम् २६.२ **ऋध्याम्**=वर्धयेयम् ५ ६० १ **ऋध्याम**=वर्धेम १७ ७७ समृध्याम ४ १० १ वर्द्धेमहि १५ ४४. **ऋध्यासम्**=वर्द्धिषीय ८ ९ [ऋधु वृद्धौ (दिवा०) धातोर्लोट्। व्यत्ययेनात्मनेपदम्। अन्यत्र लिङ्। ऋणाद्धिपरिचरणकर्मा निघ० ३ ५]

ऋन्धन् ससाधयन् (तनूनपात्=धार्मिको मनुष्य) २९ २६ वर्द्धमान. सन् (यज्ञ=राजधर्म) १ १७३ ११ साध्नुवन् (पुत्र) ३.३१ २ [ऋन्धन् अर्द्धयित्वा नि० ३ ७ समर्द्धय नि० ८ ६ ऋधु वृद्धौ (दिवा०) धातो शतृ। व्यत्ययेन श्नम्]

ऋबीसम् सरलम् (भावम्) ५ ७८ ४ **ऋबीसात्**=नष्ट विद्याप्रकाशादविद्यारूपात्, प्र०—ऋबीसमपगतभासमपहृत-भासमन्तर्हितभास गतभासं वा नि० ६ ३६, १ ११७ ३ **ऋबीसे**=दुर्गतभासे व्यवहारे १ ११६ ८ [ऋबीसम्=अपगतभासम्, अपहृतभासम्, अन्तर्हितभासम्, गतभास वा नि० ६ ३६]

ऋभवः मेधाविन (विद्वज्जना) प्र०—ऋभुरिति मेधाविनाम, निघ० ३ १५, अत्राऽऽह निरुक्तकार—ऋभव उरु भान्तीति वा, ऋतेन भान्तीति वा, ऋतेन भवन्तीति वा, नि० ११ १५, १ ११० १ प्राज्ञा (विद्वासो मेधाविजना) ४ ३३ २ विपश्चित (विद्वज्जना) ४ ३४ १० धीमन्त (विद्वास) ४ ३५ ५ सूरय (विद्वज्जना) ४ ३६ ७ किरणा १ ११० ६ क्रियाकुशला मेधाविन. (जना) १ १११ १. **ऋभुः**=प्रशस्तो विद्वान् १ १११ ५ बहुविद्या-प्रकाशको विद्वान्, मेधाव्यायु सभ्यताप्रकाशक (विद्वज्जन) १ ११० ७ सकलविद्याजातप्रज्ञो मेधावी (जन) १ १२१.२ धनञ्जय सूत्रात्मा वायुरिव मेधावी १ १६१ ६ महान् (विद्वान् जन) ३ ५ ६ [ऋभुरिति मेधाविनाम निघ० ३.१५ ऋभव उरु भान्तीति वा, ऋतेन भान्तीति वा, ऋतेन भवन्तीति वा, आदित्यरश्मयोऽप्यृभव उच्यन्ते नि० ११ १६ प्रजापतिर्वै पिता ऋभून् मर्त्यान् सतो मर्त्यान् कृत्वा तृतीयसवन आभजन् ऐ० ६ १२ ऋभवा वा इन्द्रस्य

म्यन्त परम्' अ० २ २ ३५ वा० सूत्रेण]

ऋष्वः ! महापुरुष (राजन्) ५ ३३ ३ प्राप्तविद्य (इन्द्र=शिल्पिजन) ३ ३५ ८ प्राप्तविज्ञान (अग्ने=विद्वत्पुत्र) ४ २ २ **ऋष्वम्**=महान्तम् (इन्द्र=विद्युतमिव राजानम्) ६ २० ६ गन्तारम् (युवानम्) ६ १६ २ श्रेष्ठम् (राजानम्) ४ १६ १ **ऋष्वः**=प्रापक (विद्वज्जन) ३ ५ ५ प्राप्तु योग्य (विद्वान्) ३ ५ ७ ज्ञाता (इन्द्र = विद्याप्रकाशको जन) २ २१ ४ गतिमान् (सूर्य) १ १४६ २ प्राप्तविद्य (सेनापति) १ ८१ ४ महान् (अग्नि) ३ ५ १० **ऋष्वात्**=महत कारणात् ४ २२ ४ **ऋष्वान्**=महत (अश्वान् रथादीन्वा) प्र०—ऋष्व इति महन्नाम निघ० ३ ३, ६ ६३ ६ **ऋष्वाः**=महान्तो महाशया (वेधस =मेधाविजना) ५ ५२ १३ [ऋष्व इति महन्नाम निघ० ३ ३ ऋषी गतौ (तुदा०) धातोर्वाहुलकादौणादिको वन् प्रत्यय किच्च]

ऋष्वया महत्या (सेनया) ६ १८ १० **ऋष्वाः**= महत्य (द्वार =गृहद्वाराणि) २६ ५ [ऋष्व इति महन्नाम निघ० ३ ३]

ऋष्ववीरस्य ऋष्वा महान्तो गुणा वीरा वा यस्य तस्य (जगतो महावीरस्य मनुष्यस्य वा) १ ५२ १३ [ऋष्ववीरपदयो समास । ऋष्व इति महन्नाम निघ० ३ ३. वीर =वीरो वीरयत्यमित्रान् वेतेर्वा स्याद् गतिकर्मणो वीरयतेर्वा नि० १ ७]

ऋष्वा ऋष्वौ महान्तौ (वाहू=भुजौ) ६ ४७ ८ [ऋष्व इति महन्नाम निघ० ३ ३ 'सुपा सुलुगि' त्याकार]

ऋष्वासः ज्ञानहेतव (सत्वान =बलपराक्रमप्राणिभूतगणा) १ ६४ २ [ऋषी गतौ (तुदा०) धातोर्वाहुलकाद् औणादिको वन् प्रत्यय किच्च । जसोऽसुगागम]

ऋष्वे ! महागुणयुक्त (विद्वन् पते) ६ ६४ ४ [ऋष्व इति महन्नाम निघ० ३ ३]

एकचक्रम् एक सर्वकलाभ्रमणार्थ चक्र यस्मिँस्तम् (रथम्=विमानादियानम्) १ १६४ २ [एक-चक्र-पदयो समास । एकम्=इण् गतौ (अदा०) धातो 'इण्भीकापा०' उ० ३ ४३ सूत्रेण कन् । चक्रम्=डुकृञ् करणे (तना०) धातो कप्रत्यये 'कृञादीना के द्वे भवत इति वक्तव्यम्' अ० ६ १ १२ वा० सूत्रेण द्वित्वम् । एकचक्रम् एकचारिणम् नि० ४ २७]

एकजम् एकस्मात् कारणाज्जातम् (महत्तत्त्वम्) १ १६४ १५ [एकोपपदे जनी प्रादुर्भावे (दिवा०) धातो 'अन्येष्वपि दृश्यते' अ० ३ २ १०१ सूत्रेण ड प्रत्यय]

एकताय एकस्य सुखस्य भावाय १.२३ [एकप्राति० भावे तल् । तलन्तस्य लिङ्गव्यत्ययेन पुंस्त्वम्]

एकत्रिंशत् एकाऽधिका त्रिंशत् (सङ्ख्या) १८ २४ [एक-त्रिंशत्पदयो समास । त्रिंशत्='पङ्क्तिविंशतित्रिंशत्०' अ० ५ १ ५६ सूत्रेण निपात्यते तदस्य परिमाणमिति विषये]

एकत्वम् परमात्मनोऽद्वितीयत्वम् ४० ७ आत्मा के एक भाव को स० वि० २१५, ४० ७ [एकप्राति० भावे त्व. प्रत्यय]

एकधनविदे य एकेन धर्मेण विज्ञानेन वा धन विन्दति तस्मै (इन्द्राय=परमैश्वर्ययुक्ताय (पुरुषाय) ५ ७. [एक-धनोपपदे विद्लृ लाभे (तुदा०) धातो क्विप्]

एकधेनुभिः एकैव धेनुर्वाक् सहायभूता येषा तैं सह (विद्वज्जनै) ७ ३८.५ [एक-धेनुपदयो समास । धेनुरिति वाङ्नाम निघ० १ ११ धेनु =धेट् पाने (भ्वा०) धातो 'धेट इच्च' उ० ३.३४ सूत्रेण नु प्रत्यय । धेनुर्धयतेर्वा-धिनोतेर्वा नि० ११.४२]

एकनीडम् एकस्थानम् भा०—एकाधिकरणम् (जगत्) ३२ ८ [एक-नीडपदयो समास । नीडम्=नितरा मिलन्ति यत्रेति विग्रहे पृषोदरादित्वात्साधु]

एकपदी एकवेदाऽभ्यासिनी (विदुषी स्त्री) १ १६४ ४१ **एकपदीम्**=एकमोमिति पद प्राप्तव्य यस्या ताम् (स्वाहा=वाचम्) ८ ३० [एक-पादपदयो समासे 'सङ्ख्यासुपूर्वस्य' अ० ५ ४ १४० सूत्रेण समासान्तलोपे 'पादोऽन्यतरस्याम्' अ० ४ १ ८ सूत्रेण ङीपि 'पाद पत्' अ० ६ ४ १३० सूत्रेण पदादेश]

एकपात् एक पादो गमन प्रापण यस्य स (अहि = मेघ) २ ३१ ६ एक पादो बोधो यस्य स (अज = ईश्वर) ३४ ५३ एक पादो जगति यस्य स (अज = परमात्मा) ६ ५० १४ एकस्मिन् पादे विश्व यस्याऽस्ति स (ईश्वर) ५ ३३ सर्व जगदेकस्मिन् पादे यस्य स (अज = परमेश्वर) ७ ३५ १३ सब जगत् जिसके किञ्चिन्मात्र एक देश मे है वह (अनन्त ईश्वर) आर्याभि० २ १८, ५ ३३ [एक-पादपदयोर्बहुव्रीहौ समासे 'सङ्ख्यासुपूर्वस्य' अ० ५ ४ १४० सूत्रेण समासान्तलोप । वायुरेकपात्तस्याकाश पाद । गो० पू० २ ८ एकपात्=एकेन पादेन पातीति वा, एकेन पादेन पिबतीति वा, एकोऽस्य पाद इति वा नि० १२.३०]

प्रकाशश्च कृत इत्यत्रोच्यते—उत्तरोत्तर वेदार्थप्रचाराय। येऽवरेऽल्पबुद्धयो मनुष्या अध्ययनायोपदेशाय च ग्लायन्ते तेषा वेदार्थविज्ञानायेम नैघण्टुक निरुक्ताख्य च ग्रन्थ समाम्नासिषु सम्यगभ्यासार्थ रचितवन्त। येन सर्वे मनुष्या. वेद वेदाङ्गानि च यथार्थतया विजानीयुरेव कृपालव ऋषयो गण्यन्त इति। 'पुरस्तान्मनुष्या वा ऋषिपूत्क्रामत्सु०' निरु० १३ १२ अत्र तर्क एव ऋषिरुक्त। 'अविज्ञाततत्त्वेऽर्थे०' न्याय० १ १ ४० या तत्त्वज्ञानार्थोहा सैव तर्कशब्देन गृह्यते। 'प्राणा ऋषय' श०न० ७ २ १ ५ अत्रर्षिशब्देन प्राणा गृह्यन्ते १ १ २ विचारशीलैर्मन्त्रार्थद्रष्टृभि (परमयोगिजनै) १ २३ २४. वेदविद्भिर्विद्वद्भि, भा०—सच्चिदानन्दस्वरूपेश्वरमेवकैर्धार्मिकैर्विद्वद्भि परोपकारकत्वादाप्तै १२ २६ **ऋषिम्**=कार्यसिद्धिप्राप्तिहेतुम् (द्युत=कारणस्थां दीप्तिम्) प्र०—अत्र 'इगुपधात् कित्' उ० ४ १२० अनेन 'ऋषी गतौ' इत्यस्माद्धातोरिन् प्रत्यय ३ १६ वेदमन्त्रार्थद्रष्टार, जितेन्द्रियतया शुभगुणाना सर्वैवोपदेष्टार, सकलविद्याप्रत्यक्षकारिणम् (परमविद्वज्जनम्) १ १० ११ सकलवेदमन्त्रार्थवेत्तारम् (महाविद्वासम्) ३ ४३ ५ वेदपारगाऽध्यापकम् १ ११७ ३ **ऋषि:**=मन्त्रार्थवेत्तेव (ईश्वर) ४ २६ १ सर्वज्ञ (ईश्वर) आर्याभि० २ ३०, १७ १७ ज्ञाना (परमेश्वर) १७ १७ प्रापको विद्वान् १३ ५४ रूपप्रापक (जमदग्नि=प्रज्वलिताऽग्निर्नयनम्) १३ ५६ शब्दप्रापक. (श्रोत्रम्) १३ ५७ विज्ञापक पति १४.५ अध्यापकोऽध्येता वा १ १०६ ६ सर्वविद्याविद् वेदोपदेष्टा (महाविद्वान्) १ ३१ १ मन्त्रार्थद्रष्टा विद्वान् विद्याप्रकाशक (सज्जन) १ ६६ २. **ऋषीणाम्**=वेदार्थशब्दसम्बन्धविदाम् (महाविदुषाम्) ७ २६ ४ **ऋषे**=हे विद्याप्रद (परमविद्वज्जन) ५ ५६ ८ **ऋषे**.=मन्त्रार्थविद (परमविदुष) ५.३३ १० [ऋषी गतौ (तुदा०) धातो 'इगुपधात् कित्' उ० ४ १२० सूत्रेण इन् प्रत्यय किच्च। ऋषय पदनाम निघ० ५ ६ ऋषीन्=सप्त ऋषीणानि ज्योतीषि नि० ३.२६. ऋषि दर्शनात् स्तोमान्ददर्शेत्यौपमन्यव। तद् 'यदेनास्तपस्यमानान् ब्रह्म स्वयम्भ्वभ्यानर्षत्त ऋषयोऽभवस्तदृषीणामृषित्वम् इति विज्ञायते नि० २ ११ ऋषय=आदित्यरश्मय। इन्द्रियाणि नि० १२ ३६ प्राणा वा ऋषय ऐ० २ २७. प्राणा ऋषय श० ७ २ ३ ५ एते वै विप्रा यदृषय श० १.४ २ ७ अथ यदेवानुब्रवीत। तेनर्षिभ्य ऋणं जायते यद्ध्येभ्य एतत्करोत्यृषीणा निधिगोप इति ह्यनूचानमाहु। श० १ ७ २ ३. यो वै ज्ञातोऽनूचान स ऋषिरार्षेय श० ४ ३ ४ १६ ये यत्पुरास्मात् सर्वस्मादिदम् इच्छन्त श्रमेण तपसारिषंस्तस्माद् ऋषय श० ६.१.१ १]

ऋषिकृत् ऋषीन् ज्ञानवतो मन्त्रार्थद्रष्टॄन् कृपया ध्यानोपदेशाभ्या करोति (अग्नि=सर्वोत्तमो विद्वान्) प्र०—अत्र 'कृतो बहुलम्' इति करणे क्विप् १ ३१ १६ [ऋष्युपपदे डुकृञ् करणे (तना०) धातो क्विप्। ह्रस्वस्य तुगागम। ऋषिरिति व्याख्यातम्]

ऋषिद्विषे वेदविदीश्वरविरोधिने दुष्टाय मनुष्याय १ ३६.१० [ऋष्युपपदे द्विष अप्रीतौ (अदा०) धातो कर्त्तरि क्विप्। ऋषिरिति व्याख्यातम्]

ऋषिस्वरम् ऋषीणामुपदेशम् ५.४४.८ [ऋषिस्वरपदयो. समास]

ऋषूणाम् मन्त्रार्थविदाम् (विद्वज्जनानाम्) प्र०—अत्र वर्णव्यत्ययेन इकारस्य स्थाने उत्वम् ५ २५ १. प्राप्तविद्याना जिज्ञासूना वा (अध्यापकानामध्येतॄणा वा) प्राप्तवैद्यकविद्यानाम् (परमवैद्यानाम्) १ १२७ १०. [ऋषिरिति व्याख्यातम्। तत षष्ठी। वर्णव्यत्ययेनेकारस्योकार]

ऋष्टय: ज्ञानवन्त (मरुत=मनुष्या) ५ ५७ ६ गमनाऽऽगमनशीला (वायव) १ ६४.४. शस्त्राऽस्त्राणि ५.५४ ११ प्रापका (दन्ताद्यवयवा) ७ ५५.२ **ऋष्टिभि:**=प्रापिकाभि (पृषतीभि=मरुद्गतिभि) २.३६ २ यन्त्रचालनार्थैर्गमनाऽऽगमननिमित्तैर्दण्डै १ ८५ ४. व्यवहारप्रापकै (पृषतीभि=वेगादिगुणै) १ ६४ ८ याभि: कलायन्त्रयष्टिभिर्ऋषन्ति जानन्ति प्राप्नुवन्ति व्यवहारांस्ताभि (वाशीभि=वाणीभि) १ ३७ २ **ऋष्टिषु**=प्राप्तिषु १ १६६ ४ **ऋष्टि:**=प्रापिका (वाक्=वाणी) १ १६७ ३ प्राप्ति १.१६६ ३ **ऋष्टी:**=प्राप्ता सेनाजना. ५ ५२ ६ [ऋषी गतौ (तुदा०) धातो स्त्रिया क्तिन्]

ऋष्टिमद्भि: कलाभ्रामणार्थयष्टिशस्त्राऽस्त्रादियुक्तै (रथेभि=विमानादियानै.) १ ८८ १ **ऋष्टिमन्त:**=बह्व्य ऋष्टयो गतयो येषा ते (मर्या=मनुष्या) ३ ५४ १३. प्रशस्तविज्ञानवन्त (मरुत.=मनुष्या) ५.६० ३ [ऋषी गतौ (तुदा०) धातो क्तिन् प्रत्यये—ऋष्टि। ततो भूम्नि मतुप्]

ऋष्टिविद्युत: विद्युति ऋष्टिर्विज्ञान येषा ते (वेधस=मेधाविनो जना) ५ ५२.१३ ऋष्टिर्विद्युदिव येषान्ते (मरुत=विद्वासो जना) १.१६८ ५ [ऋष्टिविद्युत्पदयो समास। 'सप्तमी विशेषणे बहुव्रीहाविति' पूर्वनिपाते प्राप्ते सप्तम्यन्तस्य परनिपात. गड्वादिभ्य सप्त-

९ ३३ [एकादश-अक्षरपदयो समास]

एकादशी एकादशाना पूरणा (क्रिया) २५ ४ [एकादशप्राति० पूरणप्रत्ययान्तात् (टिड्ढाण०) इति स्त्रिया ङीप्]

एकायुः एक सत्यगुणस्वभावमायुर्यस्य स (अग्नि = परमेश्वर) १ ३१ ५ [एक-आयुपदयो समास]

एजत् चलत्सन् (विश्व=सर्व जगत्) १९ ४७ कम्पयन् (ब्रह्म) १ १६४ ३० कम्पमानम् (जगत्) ऋ० भू० २०५ [एजति गतिकर्मा निघ० २ १४ एजृ कम्पने (भ्वा०) धातो शतृप्रत्यय]

एजत् कम्पते ४ १७ १० कम्पयत् १ १६४ ३० **एजतः**=कम्पयत २३ २८ **एजति**=कम्पते वर्द्धते च ८ २८ कम्पते चलति वा ५ ७८ ८ चाल पर चला रहा है आर्याभि० २ १२, ४० ५ कम्पते कम्प्यते वा ४० ५ चलित हो के उत्पन्न होता है आर्याभि० १ ४७, ऋ० ७ ८ १२.२ चलता है आर्याभि० २ १२, ४० ५ **एजतु**= सत्कर्मसु चेष्टताम्, भा०—अधर्माचरणाद् बिभीयात् २३ २७ कम्पताम् ५ ७८ ७. चलतु ८ २८ [एजृ कम्पने (भ्वा०) धातोर्लेट् लट् लोट् च]

एजान् भीरून् कम्पकान् (जनान्) ६ २५ ७ [एजृ कम्पने (भ्वा०) धातो पचाद्यच् कर्त्तरि]

एज्याः समन्ताद् यष्टु सङ्गन्तु योग्या क्रिया २१ ४७ [आङ्+यज देवपूजासङ्गतिकरणदानेषु (भ्वा०) धातोर् बाहुलकादौणादिक यक्। किति सम्प्रसारणम्]

एणी मृगी २४ ३६ [एणस्य स्त्री एणी। एणप्राति० स्त्रिया ङीप्]

एत समन्तात् प्राप्नुत ५ ४५ ६ समन्ताद् यन्तु प्राप्नुवन्तु ३ २७ प्राप्त होवो स० वि० १४२, अथर्व० ३ ३०.५ **एतम्**=समन्तात्प्राप्नुतम् ४ ३३ **एति**=प्राप्नोति ५ ५६ ३ गच्छति ६ ४३ १७ गच्छति प्राप्नोति वा ५ ४७ १ जाता आता है आर्याभि० २ ४३, ३४ १ प्राप्त होता है स० प्र० १८४, ३४ १ विजानाति प्राप्नोति वा ५ ४४ १२ प्रापयति ८ ४ प्राप्नुयात् १ १२४ ६ **एतु**=गच्छतु १७ ४० गच्छतु ७ ४४ [इण् गतौ (अदा०) धातोराङ्पूर्वाद् लोट्। अन्यत्र लटि लोटि च रूपाणि। एति गतिकर्मा निघ० २ १४]

एतग्वा एतान् प्रत्यक्षान् पदार्थान् गच्छन्तीति (धना=किरणा) १.११५ ३. [एतग्वा अश्वनाम निघ० १ १४]

एतन प्राप्नुत ५ ८७ ८ [आङ्पूर्वाद् इण् गतौ (अदा०) धातोर् लोट्। तस्य तनबादेश]

एतरी प्राप्नुवन्ती (अग्निज्वाला) ५ ४१ १० प्राप्तव्ये (दमे=गृहे) ६ १२ ४

एतवे एतु गन्तुम् १ ११२ ८ प्राप्तुम् ५ ४४ ११ एतुम्, प्र०—अत्र 'तुमर्थे से०' इति तवे-प्रत्यय १ ४६ ११ [इण् गतौ (अदा०) धातोस्तुमर्थे तवेन् प्रत्यय]

एतवै प्राप्तुम् ४ ५८ ९ गन्तुम् ८ १३ [इण् गतौ (अदा०) धातोस्तुमर्थे तवैप्रत्यय]

एतशम् वेगादि गुणयुक्ताऽश्ववन्तम् (रथम्) १ ५४ ६ प्राप्तविद्यमश्ववद् बलिष्ठम् (सज्जनम्) ४ ३० ६ अश्वम् ४ १७ १४ **एतशस्य**=अश्वस्य सम्बन्धीनि बलानि, प्र०—एतश इत्यश्वनाम, निघ० १ १४, १७ १० **एतशः**=प्राप्नुवन् (उपकारि जन) २ १९ ५ सर्वत्र प्राप्त (सविता=ईश्वर) ५ ८१ ३ अश्वोऽश्विकमिव ५ ३१ ११ साधुरश्व १ १२१ १३ सर्व जगदित स्वव्याप्त्या प्राप्त (सविता=ईश्वर), प्र०—इणस्तशन्तसुनौ, उ० ३ १४७, ११ ६ **एतशे**=अश्वेऽश्विक इव ५ २९ ५ **एतशेन**=अश्वेनेव व्याप्तिशीलेन वेगवता किरणनिमित्तेन वायुना १२ ७४ [एतश =अश्वनाम निघ० १ १४ इण् गतौ (अदा०) धातो 'इणस्तशन्तशसुनौ' उ० ३ १४९ सूत्रेण तशन् प्रत्यय]

एतशेभिः विज्ञान-वेदादिभिरागमकैर्गुणैरश्वै ४ ३२ [पूर्वपदे व्याख्यातम्। ततो भिस ऐसादेशो न भवति छान्दसत्वात्]

एता प्राप्तौ (हरी=हरणशीलावश्वौ) ३ ४३ ४ [आङ्+इण् गतौ (अदा०) धातो क्त। 'सुपा सुलुक्०' इत्याकार]

एतादृक्षासः एतै पूर्वोक्तै सदृशा (मनुष्या) १७ ८४ [एतदोपपदे दृशिर् प्रेक्षणे (भ्वा०) धातो 'दृशे क्सश्च वक्तव्य' अ० ३ २ ६० वा० सूत्रेण क्स प्रत्यय। 'दृक्षे चेति वक्तव्यम्' अ० ६ ३ ९१ वा० सूत्रेण सर्वनाम्न एतद आकारादेश। जसोऽसुक् च]

एतावत् एतत्परिमाणमस्य तत् (रूप=स्वरूपम्) १९.३१. **एतावन्तः**=यावन्तो व्याख्याता (रुद्रा =प्राणजीवा) १६ ६३ **एतावान्**=एतत् परिमाण दृश्याऽदृश्य ब्रह्माण्डरूपम्, भा०—इद सर्व सूर्यचन्द्रादिलोकलोकान्तर चराचर यावज्जगदस्ति तत् (महिमा=माहात्म्यम्) ३१ ३ [एतत् सर्वनाम्न 'यत्तदेतेभ्य परिमाणे वतुप्' अ० ५ २ ३९

एक एकः प्रत्येक (जन) ३ २६ १५ [एकपदस्य वीप्साया द्वित्वम्]

एकम् स्वय सिद्धम् (परमात्मानम्) १७ ३० अद्वितीय ब्रह्म ४० ४ **एकः**=अद्वैत (परमात्मा) १.१५४.४ अद्वितीय (परमेश्वर) १ ७ ६ अनुत्तमोऽसहाय. [प्रजापतिर्वा एक तै० ३ ८ १६ १. एकम्=इण् गतौ (अदा०) धातो 'इण्भीकापा०' उ० ३ ४३ सूत्रेण कन्। एका इता सख्या नि० ३ १०]

एकविंशतिः एकाऽधिका विंशति (सङ्ख्या) १८ २४ [एक-विंशतिपदयो समास]

एकविंशः एकविंशतिधा (प्रतूर्त्ति=शीघ्रगति) १४ २३ एकविंशतेर्विद्याना पूरक (सिद्धान्त) १३ ५७. षोडश कलाश्चत्वार पुरुषार्थाऽवयवा कर्त्ता चेति तेषामेकविंशते पूरण (स्तोम=स्तुतिविषय) १० १३ एतत्सङ्ख्यापूरक (सोम=चन्द्र) १५ १३ **एकविंशाभ्याम्**= एतत्सङ्ख्यायुक्ताभ्याम् (मित्रावरुणाभ्या=प्राणोदानाभ्याम्) २६ ६० **एकविंशे**=एतत्सङ्ख्याके (स्तोमे= स्तुतिव्यवहारे) २१.२६ [एक-विंशतिप्राति० पूरणार्थे डट्। 'तिविंशतेर्डिति' अ० ६.४ १४२ सूत्रेण तेर्लोप । प्रतिष्ठा वा एकविंश स्तोमानाम् ता० ३ ७ २ एकविंश एव (स्तोम) सर्वम् गो० पू० ५ १५ एकविंशो वै स्वर्गो लोक श० १०.५ ४.६ एष एवैकविंशो य एष (सूर्य) तपति श० ५ ५ ३ ४ एकविंशो वा अस्य भुवनस्यादित्य ता० ४ ६ ३ असौ वा आदित्य एकविंश तै० १ ५ १० ६ एकविंशो वा एष य एष (आदित्य) तपति कौ० २५ १ द्वादश वै मासा सवत्सरस्य पञ्चर्तवस्त्रयो लोकास्तद्विंशतिरेषऽएवैकविंशो य एष (सूर्य) तपति। सैषा गतिरेषा प्रतिष्ठा श० १ ३ ५.११ आदित्य एवैकविंशस्यायतन द्वादशमासा पञ्चर्त्तवस्त्रय इमे लोका असावादित्य एकविंश ता० १०.१ १० एकविंशो वै प्रजापतिर्द्वादशमासा पञ्चर्त्तवस्त्रय इमे लोका असावादित्य एकविंश ऐ० १.३० एकविंशो वै पुरुष तै० ३ ३.७ १ एकविंशोऽय पुरुषो दशहस्त्या अगुलयो दशपाद्या आत्मैकविंश ऐ० १ १६ क्षत्र वा एकविंश ता० १८ १० ६ विड् वा एकविंश तै० १ ८ ८ ५ शौद्रो वर्ण एकविंश ऐ० ८ ४ एकविंशोऽग्निष्टोम ता० १६ १३ ४ तम् (एकविंशस्तोम) उ देवतल्प इत्याहु ता० १० १ १८]

एकवीर. एकश्चाऽसौ वीरश्च (इन्द्र=सेनेश) १७ ३३ [एक-वीरपदयो समास । एको ह तु सन्वीरो वीर्यवान् भवति। जै० ३ २ ६ ६ एको ह्येवैष वीरो यत्प्राण जै० ३ २ ५.१.]

एकशताय एकाऽधिकाय शताय (व्यवहाराय पदार्थाय वा) २२ ३४ [एक-शतपदयो समास]

एकशफम् एकखुरमश्वादिकम् १३ ४८ **एकशफाः**= अश्वादय १४ ३०. [एक-शफपदयो समास । पशवो वा एकशफम् तै० ३ ६ ११ ४ श्रीर्वा एकशफम् तै० ३ ६ ८ २]

एकशितिपात् एक शिति पादोऽस्य (कृष्ण पशु) २६.५८ [एक-शिति-पादपदाना समास । 'सख्यासुपूर्वस्य' अ० ५ ४ १४० सूत्रेण समासान्तलोप । शिति= कृष्ण शुक्लो वा। शति सौत्रो धातु । तत 'क्रमितिमिशति०' उ० ४ १२२ सूत्रेण इन् प्रत्यय किच्च धातोरकारस्येकारादेशश्च]

एकश्रुष्टीन् एक ही धर्मकृत्य मे शीघ्र प्रवृत्त होने वाले (गृहस्थादि मनुष्यों) को स० वि० १४३, अथर्व० ३ ३० ७. [एक-श्रुष्टीपदयो समास । श्रुष्टी पदनाम निघ० ४ ३ श्रुष्टीति क्षिप्रनाम । आशु अष्टीति नि० ६ १३]

एकाकी असहायोऽद्वितीय (सूर्य=सूर्यलोक) २३ ४५ [एकप्राति० 'एकादाकिनिच्चासहाये' अ० ५ ३ ५२ सूत्रेण आकिनिच् प्रत्यय]

एकाऽक्षरेण ओमित्यनेन विज्ञापकेन दैव्या गायत्र्या छन्दसा ६ ३१ [एक-अक्षरपदयो समास । अक्षर वाङ् नाम निघ० १ ११]

एकादश प्राणाऽपानोदानसमान-नाग-कूर्म-कृकल-देवदत्त-धनञ्जयजीवा (देवास.=देवा) पृथिव्यप्तेजो-वाय्वाकाशाऽऽदित्य-चन्द्र - नक्षत्राऽहङ्कार-महत्तत्त्व-प्रकृतय, श्रोत्र-त्वक् चक्षू रसना-घ्राण-वाक्-पाणि-पाद-पायूपस्थ-मनासि ७ १६ एकाधिका दश (सख्या) १८.२४ एतत्सङ्ख्याता (देवा=दिव्यगुणा प्राणादय) २० ११ दशेन्द्रियाणि मनश्च १ १३६ ११ **एकादशभिः**=दश प्राणा एकादश आत्मा तै० १४ २६ **एकादशम्**=ग्यारहवे (पति) को स० वि० १३४, १० ८५ ४५ [एक दशत् पदयो समास]

एकादशकपालः एकादशसु कपालेषु सस्कृत पाक ६ ३३. [एकादश-कपालपदयोस्तद्धितार्थे समास । संस्कृतार्थे विहितस्य अण् प्रत्ययस्य 'द्विगोर्लुगनपत्ये' इति लुक्]

एकादशाऽक्षरेण आसुर्या पङ्क्त्या (छन्दसा)

लुक् १३ ५३ [इण् गतौ (अदा०) धातोरधिकरणे बाहुलकादौणादिको मनिन्। आङ्+एमन् इति स्थिते 'एमन्नादिषु छन्दसि पररूपम्' अ० ६ १ ९४ वा० सूत्रेण पररूपम्]

एमभिः प्रापकैर्गुणै ५ ५९ २ [इण् गतौ (अदा०) धातोर्मनिन् प्रत्यय]

एमसि समन्तात् प्राप्नुम, प्र०—अत्र 'इदन्तो मसि' इतीदादेश ३ ४१ प्राप्त होते है स० वि० १४६, ३ ४१ [आङ्+इण् गतौ (अदा०) धातोर्लट्। 'इदन्तो मसी' ति मस इदन्तता]

एमहे समन्ताद् याचामहे, प्र०—ईमहे इति याच्ञाकर्मसु पठितम्, निघ० ३ १९, ४ ५ समन्तात्प्राप्नुम, प्र०—अत्र 'ईड गतौ' इत्यस्मात् 'बहुल छन्दसि' इति शपो लुकि श्यनभाव १ १७ ३

एमः एति येन स प्रयत्न १८ १५ [इण् गतौ (अदा०) धातोर्बाहुलकादौणादिको मन् प्रत्यय]

एमि प्राप्नोमि १ १७१ १ प्राप्नुयाम्, प्र०—अत्र लिडर्थे लट् ३ ४१ प्राप्तोऽस्मि २३ ५० [इण् गतौ (अदा०) धातोर्लट्]

एयसे (आ+ईयसे) समन्ताद् गच्छसि ४ २ ३

एयात्=समन्तात्प्राप्नुयात् १२ ६८ [आङ्+ईङ् गतौ (दिवा०) धातोर्लेटि मध्यमैकवचनम्। अन्यत्र आङ्+इण् गतौ (अदा०) धातोर्लिङ्। एयात्=आगच्छतु नि० ५ २८]

एयुषीणाम् समन्तादतीतानामुषसाम् १ १२४ ४ [आङ्+इण् गतौ (अदा०) धातोर्लिट क्वसु। स्त्रियां ङीपि 'वसो सम्प्रसारणम्' इति सम्प्रसारणम्]

एयेथ (आ+इयेथ) अभित एषि ४ ९ १ [आङ्+इण् गतौ (अदा०) धातोर्लिटि मध्यमैकवचनम्। आङ्+च (अदा०) धातोर्वा णिचि लोटि रूपम्]

एरयस्व समन्तात् प्रापय ७ ५ ८ प्रेम से प्रेरणा कर स० वि० १३९, अथर्व० १४ २ ३८ [आङ् पूर्वाद् ईर क्षेपे (चुरा०) धातोर्लोट्। आङ्+ईर गतौ कम्पने च (अदा०) धातोर्वा णिचि लोट्]

एरिरे (आ+ईरिरे) समन्तात् प्राप्नुवन्ति ३ २९ १५ सर्वत प्रेरयन्ति ६ ५ २ समन्ताज्जानीयु १ १४३ ४ प्रेरयन्ति प्राप्नुवन्ति वा १ १२८ ८ कम्पयन्ति गमयन्ति वा २ २ ३ [एरिरे इतीर्त्तिरुपसृष्टोऽभ्यस्त नि० ४ २३ आङ्+ईर गतौ कम्पने च (अदा०) धातोर्लिट्। छान्दसत्वाद् आम् न]

एव अवधारणार्थे १ ८ ८ निश्चयार्थे २ २८ [एव एवम् नि० २ १९]

एवम् अमुना प्रकारेण २१.४४ इसी प्रकार स० वि० १४५, ४.२

एवया गमनक्रियया ५ ४१ १६ [इण् गतौ (अदा०) धातोर् वन्प्रत्यये स्त्रिया टापि तृतीयैकवचनम्]

एवयामरुत् य एवान् प्रापकान् यान्ति तेषा यो मरुत् मनुष्य (धीमान् जन.) ५ ८७ १ विज्ञानवान् मनुष्य. ५ ८७.२ [एवया-मरुत्पदयो समास। एवया=इण् गतौ (अदा०) बाहु० औणादिको वन्, तत एवोपपदे या प्रापणे (अदा०) धातोरण् प्रत्यय। प्रतिष्ठा वा एवयामरुत् ऐ० ६ ३०, गो० पू० ६ ८.]

एवयावरी दु खनिवारिका (अध्यापिकोपदेशिका वा) ६ ४८ १२. [एवोपपदे या प्रापणे (अदा०) धातोर्वनिप् प्रत्यय। तत. स्त्रिया 'वनो र च' सूत्रेण ङीप् रेफादेशश्च]

एवयावः एति जानाति सर्वव्यवहार येन स एवो बोधस्त याति प्राप्नोति प्रापयति वा तत्सम्बुद्धौ (विद्वज्जन), प्र०—'मतुवसोरादेशे वन उपसङ्ख्यानम्, अ० ८ ३ १ अनेन वार्तिकेनाऽत्र सम्बोधने रु १ ९० ५ [एव=इण् गतौ (अदा०) धातोर्बाहु० औणादिको वन्। एवोपपदे या प्रापणे (अदा०) धातोर्वनिप्। तत सम्बुद्धौ 'मतुवसोरादेशे वन उपसङ्ख्यानमि' इति वार्तिकेन रु]

एवयाव्नः य एव विज्ञानं यान्ति तान् (यतस्रु च = ऋत्विज) २ ३४ ११ [एवेति व्याख्यातम्। तदुपपदे या प्रापणे (अदा०) धातोर्वनिप्। 'अल्लोपोऽन' इत्यल्लोप]

एवयाः एवान् रक्षकान् याति (विद्वज्जन) १ १५६ १ [एवोपपदे या प्रापणे (अदा०) धातोरण् प्रत्यय छान्दस एव=अव रक्षणादिषु (भ्वा०) धातोरच् कर्त्तरि]

एवः प्रापणम् १५ ५ ज्ञानम् १५ ४ **एवान्**= प्राप्तव्यान् (पदार्थान्) ६ ५१ २ **एवा.**=कामयमाना (मरुत =मनुष्या) ५ ४१ ५ **एवेन**=गमनेन १ १२८ ३ **एवैः**=विज्ञानादिप्राप्तै सद्गुणै सह ७ ६ ६ ज्ञापकै प्रापकैर्गुणै १ ६८ २ प्रशस्तैर्ज्ञानै कर्मभिर्वा १ १०० १८ प्राप्तै प्रशस्तज्ञानै १ १०० २ प्रापणै ५ ४१ ५ सुखप्रापकै. (गुणै) ४ ५६ १ [एवै कामैरयनैरवनैर्वा नि० १२ २१ एव=इण् गतौ (अदा०) धातोर्बाहु० औणादिको वन्]

एवासः गमनशीला (रथा) १ १६६ ४ ['एव' इति व्याख्यातम्। ततो जसोऽसुक्]

सूत्रेण वतुप् । 'आ सर्वनाम्न' अ० ६ ३ ९१ सूत्रेणाकारादेश सर्वनाम्न]

एतासः समन्तात् प्राप्ता (वायव इव विद्वास) १ १६५ १ [आङ्+इण् गतौ (अदा०) धातो क्त । जसो ऽसुक् च]

एतो एते (जना) ५ ४५ ५

एतोः अयनम् २ १५ ५ एताम् (अविष्या=रक्षाम्) २ ३८ ३

एत्य सेवा कृत्वा ऋ० भू० २८६, अथर्व० १५ ११ २ [आङ्+इण् गतौ (अदा०) धातो क्त्वा । समासे क्त्वो ल्यप्]

एत्यै समन्ताद् गत्यै २७.४५ [आङ्+इण् गतौ (अदा०) धातो स्त्रिया क्तिन्]

एदिधिषुः पतिम् अकृतविवाहाया ज्येष्ठाया पुत्र्यामूढा कनिष्ठा तस्या पतिम् ३० ९

एधताम् वर्द्धताम् २३ २६ **एधते**=वर्द्धते ८ ५ [एध वृद्धौ (भ्वा०) धातोर्लोट् लट् च]

एधते समन्तात् प्रदीपयति ७ १ ८ [आङ्+ञिइन्धी दीप्तौ (रुधा०) धातोर्लट् । नकारलोपश्छान्दस]

एधमानद्विट् यो वर्धमानान् द्वेष्टि स (राजप्रजाजन) ६ ४७ १६ [एधमानोपपदे द्विष् अप्रीतौ (अदा०) धातो कर्त्तरि क्विप् । एधमान =एध वृद्धौ (भ्वा०) धातो शानच् । एधमानद्विट्=एधमानान् द्वेष्टि नि० ६ २२]

एधः इन्धते प्रदीपयन्ति येन तद्वत्, भा०—इन्धन, घृतम् ३८ २५ वर्द्धक (जगदीश्वर) २० २३ इन्धनम् १ १५८ ४ [ञिइन्धी दीप्तौ (रुधा०) धातोर्घञ् प्रत्यये 'अवोदैध०' अ० ६ ४ २९ सूत्रेण नलोपो गुणश्च निपात्यते । वर्धकार्थे तु एध वृद्धौ (भ्वा०) धातो कर्त्तर्यच्]

एधि प्राप्तो भव ४ १ ५ भवसि १ ९१ १५ भवतु ४ १६ वर्धय, वर्धयिता भव ७ ४७ प्राप्त हो स० प्र० १५२, अथर्व० १४ २ १८ [अस् भुवि (अदा०) धातोर्लोट् । 'घ्वसोरेद्धावभ्यासलोपश्च०' इति सकारस्यैत्वे ह्यावल्लोपे च, एत्वस्यासिद्धत्वाद् 'हुझल्भ्यो हेर्धि' इति धिभाव । एधि= भव नि० १० १७]

एधिषीमहि सर्वतो वर्द्धयेम ३८ २५ वर्द्धिषीमहि २० २३ [एध वृद्धौ (भ्वा०) धातोराशिषि लिङि, उत्तमपुरुषबहुवचनम्]

एन गति पुरुषार्थेन सुखानि यस्तत्सम्बुद्धौ (विद्वज्जन) १ १७३ ९ [इण् गतौ (अदा०) धातोर्बाहुलकादौणादिको न प्रत्यय]

एनस एनसः अधर्मस्याऽधर्मस्य ८ १३ [एनस पदस्य वीप्साया द्विर्वचनम्]

एनसः अपराधात् २० १४. अपराधस्य ४ १२ ५ विरोधाऽऽचरणस्य ८ १३ दुष्टाचारात् २० २० पाप मे आर्याभि० २ १६, ८ १३ पापो को आर्याभि० २ १६, ८ १३ धर्मविरुद्धाचरणात् भा०—दुष्टाचारात् ६ १७ दु ख के आर्याभि० २ १६, ८ १३ **एनः**=अधर्माचरणम् ८ १३ अपराधम् ६ ५१ ७ कुपथ्यादिकमपराध वा ६ ७४ ३ पापाचरणम् १ १२५ ७ प्रापक (दुर्जन) ७ १८ १८ दु खफल पापम् ५ ३६ पापरूप कर्म को स० वि० ७, ४० १६ [ईयते प्राप्यते दु खमनेनेति विग्रहे इण् गतौ (अदा०) धातो 'इण आगसि' उ० ४ १९८ सूत्रेणासुन् प्रत्यय । एनस्= एन एते नि० ११ २१]

एना एनेन पूर्वोक्तेन (नमसा=अन्नेन) प्र०—अत्रा ऽऽकारादेश. १५ ३२ [इदम सर्वनाम्न । 'द्वितीयाटौस्स्वेन' अ० २ ४ ३४ सूत्रेणान्वादेश एनादेश । 'सुपा सुलुग्' इत्याकारादेश । एनम् एनाम्=अस्यास्या इत्येतेन व्याख्यातम् नि० ५ २८]

एनांसि भा०—दुश्चेष्टा २० १६ अपराधान् २० १५ ['एनस' पदे द्रष्टव्यम्]

एनी ये इतस्ते (द्यावापृथिव्यौ) १ १४४ ६ [एतद सर्वनाम्नोऽन्वादेशे 'वा छन्दसि०' इत्येनादेश औ प्रत्ययेऽपि]

एनीम् प्राप्तु योग्याम् (श्रियम्) ५ ३३ ६ **एनीः**= एन्यो मृगस्त्रिय इव (अवनय =नद्य) ५ ८५ ६ [एनी नदीनाम निघ० १ १३]

एनोः एनयो (अध्यापकोपदेशकयो) प्र०—अत्र 'छान्दसो वर्णलोप०' इत्यकारलोप १ १३९ १ अनयोर्मध्ये ६ ६९ ८ [इदम सर्वनाम्न ओसि 'द्वितीयाटौस्स्वेन' अ० २ ४ ३४ सूत्रेणान्वादेश एनादेश । 'छान्दसो वर्णलोप' इति वा० सूत्रेणाकारलोप]

एन्यः या यन्ति ता नद्य, प्र०—एन्य इति नदीनाम निघ० १ १३, ५ ५३ ७ [एनी+जस् । एनी नदीनाम निघ० १ १३]

एम प्राप्नुयाम ४ ७ ९ [इण् गतौ (अदा०) धातोर्लिङि उत्तमपुरुषबहुवचनम्]

एमन् प्राप्तव्ये स्थाने, प्र०—अत्र सप्तम्या लुक् 'एमन्नादिषु छन्दसि पररूपम्' इति वार्त्तिकेन पररूप च १३ १७ एति गच्छति तस्मिन् वायौ, प्र०—अत्र सप्तमी

ऐन्द्रम् परमैश्वर्यस्वरूप, सब विद्वानों मे अत्यन्त शोभायमान (ईश्वर) को आर्याभि० २.१८ इन्द्रस्यैश्वर्यस्येदम् (सद =सभाम्) १९ १८ इन्द्रस्य परमैश्वर्यस्येदधिकरणम् (ईश्वर सभाध्यक्षो वा) ५ ३० इन्द्रो विद्युद्देवता यस्य तद् विज्ञानम् १९ १५ ऐश्वर्यकारकम् (भवनम्=आरोग्यकर होमादिकम्) १९ २६ इन्द्रस्य विद्युत इदम् (वलम्) १९ ८ **ऐन्द्रः**=विद्युद्देवताक (उदान = य ऊर्ध्वमनिति) ६ २० इन्द्रदेवताक (अरुण पशु) २९ ५८ इन्द्रो जीवो देवताऽस्य स ऐन्द्र (प्राण =शरीरस्थो वायुविशेष) ६ २० [इन्द्रप्राति० 'सास्य देवता' (अ० ४ २ २४) अर्थे 'तस्येदम्' अ० (अ० ४ ३ १२०) अर्थे वाऽण् प्रत्यय]

ऐन्द्रवायवः इन्द्रो विद्युद्वायुश्च तयोरय सम्बन्धी (कर्त्तव्य) १८ १९ [इन्द्र-वायुपदयो समासे 'तस्येदम्' इत्यर्थेऽण् प्रत्यय । वाक् प्राणश्चैन्द्रवायव ऐ० २ २६]

ऐन्द्राग्नः इन्द्राग्निदैवत्य (सहित =दृढाङ्ग पशु) २९ २८ इन्द्रो वायुरग्निर्विद्युच्च ताभ्या निर्वृत्त (व्यवहार) १८ २० **ऐन्द्राग्नाः**=इन्द्राग्निदेवताका (सञ्चरा प्राणिन) २४ १५ वायुविद्युत्सञ्ज्ञिन भा०—वाय्वग्न्यादिगुणा पशव २४ ८ वायुविद्युद्देवताका (सञ्चरा =मार्गा) २४ १७ [इन्द्र-अग्निपदयो समासे 'सास्य देवता' इत्यर्थे तेन निर्वृत्तमित्यर्थे वाऽण् प्रत्यय]

ऐन्द्राबार्हस्पत्याः वायुसूर्यदेवताका (पशव) २४ ७ [इन्द्र-बृहस्पतिपदयो समासे 'सास्य देवता' इत्यर्थे 'दित्यदित्या०' इति ण्य प्रत्यय । 'देवताद्वन्द्वे च' अ० ६ ३ २६ सूत्रेण पूर्वपदस्यानङ् । 'देवताद्वन्द्वे च' अ० ७ ३ २१ सूत्रेणोभयपदवृद्धि]

ऐन्द्रावैष्णवाः विद्युद्वायुदेवताका (पशव) २४ ७ [इन्द्र-विष्णुपदयो समासे 'सास्य देवता' इत्यर्थेऽण् । पूर्वपदवदानङ् उभयपदवृद्धिश्च]

ऐमि समन्तात्प्राप्नोमि ४ २ समन्तात् प्राप्नुयाम् प्र०—अत्र लिङर्थे लट् ३ ४१ सब प्रकार से प्राप्त होता हूँ स० वि० १४६, ३ ४१ [आङ्पूर्वाद् इण् गतौ (अदा०) धातोर्लट्]

ऐये गच्छेः ५ २ ८ [ईङ् गतौ (दिवा०) धातोर्लिङ् । आडागमश्छान्दस]

ऐरत् प्राप्नोति २ १५ ८ प्रापयेत् ४ ४६ ऐरयति २ १९ ६ कम्पयति यथाक्रम चालयति ४ ५६ ३ प्रेरयेत् ३ ३१ १५ प्रेरयति ३ ५५ २० **ऐरत**=प्रेरयन्ति ७ २३ १

ऐरतम्=गच्छतम् १ ११८ ६. [ईर गतौ कम्पने च (अदा०) धातोर्लङ् । 'बहुल छन्दसी' ति शपो लुक् न । व्यत्ययेन परस्मैपदम्]

ऐरम् प्रेरयेयम् ४ २६.३ [ईर गतौ कम्पने च (अदा०) धातोर्लङ् । व्यत्ययेन परस्मैपदम् । छान्दसत्वाच् छपो लुङ् न]

ऐरयत् कम्पयति २ १७ १ गमयति १ ५१.११ प्रेरयति २ २० ७ प्रेरयेत् ६ ५६.३ वीरयन् वीरयत्यूर्ध्वमधो गमयति, प्र०—अत्र लडर्थे लुङ् १ ७ ३. **ऐरयतम्**=प्रापयतम् ६ ७२.३. गमयतम् १ ११२ ५. प्रेरयतम् १ ११७ २४ **ऐरयन्**=प्राप्नुवन्ति, प्र०—अत्र लडर्थे लट् १ २८ **ऐरयम्**=प्रेरयेयम् ४ ४२ ३. [ईर गतौ कम्पने च (अदा०) धातोर्णिचि लट्]

ऐरयः ईर्ष्व २.१७ ३ [ईर गतौ कम्पने च (अदा०) धातोर्णिचि लङि मध्यमैकवचनम्]

ऐरयेथाम् प्रेरयेतम् ६ ६९ ८ चालयेथाम् १ १५७ ५ [ईर गतौ कम्पने च (अदा०) धातोर्णिचि लङि च रूपम्]

ऐरिरे समन्तात् प्राप्नुवन्त, प्र०+ईर गतौ कम्पने च, इत्यस्याऽमन्त्र इति प्रतिषेधादामोऽभावे प्रयोग १ ६ ४, [ईर गतौ कम्पने च (अदा०) धातोराङ् पूर्वाल् लिट् । आमोऽभावश्च छान्दस]

ऐलवृदाः इलाया पृथिव्या इमानि वस्तुजातानि ऐलानि, तानि ये वर्धयन्ति ते, भा०—पृथिवीरक्षका वायव, प्र०—अत्र वर्णव्यत्ययेन धस्य द, इगुपधलक्षण कश्च १६ ६० [इला पृथिवीनाम निघ० १ १ तत 'तस्येदम्' इत्यर्थेऽण् प्रत्यय । ऐलोपपदे वृधु वृद्धौ (भ्वा०) धातोरिगुपधलक्षण क । अन्तर्भावितण्यर्थ. । वर्णव्यत्ययेन धकारस्य दकार]

ऐषन्त इच्छेयुः १ १२९ ५ [ईष गतिहिंसादर्शनेषु (भ्वा०) धातोर्लङ् । धातूनामनेकार्थत्वाद् इच्छार्थेऽपि]

ओ सम्बोधने १ १७७ ५ आभिमुख्ये १ १६५ १४ अवधारणे १ ११३ ११ प्रेरणेषु २ ३४ १५]

ओकसः सर्वनिवासाऽर्थस्याऽऽकाशस्य १ ३० ९ **ओकः**=गृहम् ४ १९ १५ स्थानम् २ १९ १ निवासस्थानम् ६ ४१ १ **ओकसि**=गृहे ५ ३३ ४ **ओकांसि**=निवासान् ३४ ५७ समवेतानि गृहाणि २ ३८ ५ [अवतिरक्षणहेतुर्भवतीति विग्रहे अव रक्षणादिषु (भ्वा०) धातोर्बाहुलकात् कक् प्रत्यय । उच्यते यत्रेति विग्रहे उच समवाये (दिवा०) धातोर्वा बाहुलकाद् औणादिकोऽसुन्

एवावदस्य एवान् प्राप्तान् गुणान् वदन्ति येन तस्य (क्षत्रस्य=राष्ट्रस्य) ५ ४४ १० ['एव' इति व्याख्यातम्। तदुपपदे वद व्यक्तायां वाचि (भ्वा०) धातो 'पुंसि सज्ञाया घ प्रायेण' अ० ३ ३ ११८ सूत्रेण करणे घ प्रत्यय]

एवो एव ४ १२ ६

एषते (आ+ईषते) अभिगच्छति ५ ६७ ५ प्राप्नोति १ १४६ १ हिनस्ति ५ ८६ ३ [आङ् पूर्वाद् ईष गतिहिंसादर्शनेषु (भ्वा०) धातोर्लट्]

एषस्य सर्वत्र प्राप्तव्यस्य (विष्णो=परमेश्वरस्य) ७ ४० ५ ऐश्वर्यवत (विष्णो=ईश्वरस्य) २ ३४ ११ [इण् गतौ (अदा०) धातोर्बाहु० औणादिक स प्रत्यय]

एषः कार्यकारणसङ्गत्या यदनुमीयते (योनि=असम प्रमाणम्) ८.४१ [इण् गतौ (अदा०) धातोर्बाहुलकादौणादिक स प्रत्यय]

एषि प्राप्नोषि १ १२३ १० [इण् गतौ (अदा०) धातोर्लट्। मध्यमैकवचनम्]

एषे एतु प्राप्तुम् ५ ४१ ५ गन्तुम् ५ ६६ ३ [इण् गतौ (अदा०) धातोस्तुमर्थे 'तुमर्थे सेसेन०' इति सेन् प्रत्यय]

एषे (आ-इषे) समन्तादिच्छामि ५ ४६ १ सब सुख प्राप्त कराने को समर्थ होवे स० वि० १०५, ५ ४१ ७ [आङ्+ईष गतिहिंसादर्शनेषु (भ्वा०) धातोर्लट्]

एषे समन्तादिच्छवे (अत्रये=विदुषे जनाय) १ १८० ४ [आङ्पूर्वाद् इषु इच्छायाम् (तुदा०) धातो कर्त्तरि क्विप्। ततश्चतुर्थ्या एकवचनम्]

एषो इयम् (उषा=प्रातर्वेला) १ ४६ १

एष्टयः समन्तादिष्टयो विद्वत्पूजा सत्सङ्गो विद्यादानञ्च याभ्यस्ता (क्रिया) १८ ४३ **एष्टः**=भा०—समन्तात् पूजितु योग्य (विष्णु=परमेश्वर) २३ ४६ [आङ्+यज देवपूजासङ्गतिकरणदानेषु (भ्वा०) धातो. स्त्रिया क्तिन्। किति सम्प्रसारणम्। ऋक्सामानि वाऽएष्टय ऋक्सामैर्ह्याशासनऽइनि नोऽस्त्वित्यत्य नोऽस्त्विति श० ६ ४ १ १२]

एष्टा पर्यालोचक (विद्वज्जन) १ १८४ २ **एष्टाः**=सर्वत इष्टकारिण (राय=धनसमूहान्) ५ ७. [इष गतौ (दिवा०) धातो कर्त्तरि तृच्। अन्यत्र आङ्पूर्वाद् इषु इच्छायाम् (तुदा०) धातो क्त]

एष्टौ समन्ताद् यज्ञ+क्रियायाम् ६ २१ ८ [आङ् यज देवपूजासङ्गतिकरणदानेषु (भ्वा०) धातो स्त्रिया क्तिन्। सप्तम्या एकवचनम्]

एहि (आ-इहि) आगच्छ ६ १६ १६ आगच्छन्ति प्र०—अत्र व्यत्यय ५ ८३ ६ प्राप्नुहि प्रापयति वा, प्र०—अत्र पुरुषव्यत्ययो लडर्थे लोट् च १ ६ १ समन्तात् प्राप्नुहि प्राप्नोतु वा ४ २० समन्तात प्राप्नुयात्, प्र०—अत्र व्यत्यय ३ २७ अध्ययनेनैवैति प्राप्नोति १ १५ अभित प्राप्नुहि, समन्तादेति, अ०—सञ्जानीहि ५ ६ [आङ् पूर्वादिइण् गतौ (अदा०) धातोर्लोट्]

एहिमायासः आ समन्ताच्चेष्टाया प्रज्ञा येषान्ते (विश्वेदेवास=समस्तवेदपारगा विद्वास) प्र०—चेष्टार्थस्याऽऽङ्पूर्वस्य ईहधातो 'सर्वधातुभ्य इन्' उ० ४ ११६ इतीन्प्रत्ययान्त रूपम् 'मायेति प्रज्ञानामसु पठितम्' निघ० ३ ६, १ ३ ६ [एहि-मायापदयो समास। एहि=आङ्+ईह चेष्टायाम् (भ्वा०) धातो 'सर्वधातुभ्य इन्' उ० ४ ११६ सूत्रेण इन्। माया प्रज्ञानाम निघ० ३ ६]

ऐक्षेताम् पश्यत ३२.७ [ईक्ष दर्शने (भ्वा०) धातोर्लङि प्रथमपुरुषद्विवचनम्]

ऐजन् एजन्ति १ ६३ १ [एजृ कम्पने (भ्वा०) धातोर्लङ्]

ऐट्ट प्रशसेत ३ ४८ ३ [ईड स्तुतौ (अदा०)धातोर्लङ्]

ऐडम् इडाया वाचो व्याख्यात्री साम १३ ५७

ऐडेन=इडाया अन्नस्येद सस्करण तेन १५ ७ [इळा वाङ् नाम निघ० १ ११ अन्ननाम निघ० २ ७ इळाप्राति० व्याख्यानार्थे तस्येदमर्थे वाऽण् प्रत्यय]

ऐत् प्राप्नोति ५ ३० ६ **ऐत**=प्राप्नुत ४ ३५ ३ [इण् गतौ (अदा०) धातोर्लङ्]

ऐतन विज्ञापयत १ ११० ३ विजानीत १ १६१ ६ प्राप्नुत १ ११० २ [इण् गतौ (अदा०) धातोर्लङि मध्यमबहुवचनम् तस्य तनवादेशश्छान्दस]

ऐताम् प्राप्नुत १४ ३० **ऐतु**=समन्तात्प्राप्नोतु ३३ ३४ [इण् गतौ (अदा०) धातोर्लङि प्रथमद्विवचनम्। ऐतु=आङ्+इण् गतौ+लोट्]

ऐधेव एधै काष्ठैरिव १ १६६ १ [ऐध-इव पदयो समास। एध=ञिइ-धी दीप्तौ (रुधा०) धातोर्घञि 'अवोदैध०' इति नलोप। एधप्राति० 'तस्येदम्' इत्यर्थेऽण्, स्वार्थे वाऽणि 'ऐध' इति रूपम्]

ऐनोः प्रेरये ४ १६ ७ **ऐनोत्**=प्राप्नोति, प्र०—अत्रेणधातोर्व्यत्ययेन श्नु १ ६६ ५ [इण् गतौ (अदा०) धातोर्लङ्। व्यत्ययेन शप श्नु]

ओरिणम् दु खान्धकारस्याऽपनयनम् १ ६१ १४ **ओण्योः**=द्यावापृथिव्यो, प्र०—ओण्योरिति द्यावापृथिवी-नामसु पठितम्, निघ० ३ ३०, ४.२५ [ओणृ अपनयने (भ्वा०) धातो 'इक् कृष्यादिभ्य' अ० ३ ३ १०८ वा० सूत्रेण इक् प्रत्यय । ओण्यौ द्यावापृथिव्योर्नाम । निघ० ३ ३०]

ओतम् सूत्रे मणिगणा इव प्रोतम्, भा०—सञ्चितम् (ज्ञानम्) ३४ ५ सर्वव्यापक (चित्त=चित्त को) स० प्र० २४७, ३४४ **ओतः**=ऊर्ध्वतन्तु पट इव ३२ ८ [आङ्+वेञ् तन्तुसन्ताने (भ्वा०) धातो क्त । 'ग्रहिज्या०' इति सूत्रेण किति सम्प्रसारणम्]

ओतवै विस्ताराय १ १६४ ५ [आङ्+वेञ् तन्तु-सन्ताने (भ्वा०) धातोस्तुमर्थे तवै प्रत्यय । 'छन्दस्युभयथा' इति सार्वधातुकत्वे सार्वधातुकमपिदिति किन्त्वे च ग्रह्यादि-सूत्रेण सम्प्रसारणम्]

ओतुम् रचयितुम् ६ ९ २ [आङ्+वेञ् तन्तुसन्ताने (भ्वा०) धातोस्तुमुन् । 'छन्दस्युभयथा' इति सार्वधातुकत्वे किन्त्वे सम्प्रसारणम्]

ओतुम् रक्षकम् (तन्तु=जगत्कारणम्) ६ ९ ३ [अव रक्षणादिषु (भ्वा०) धातो 'सितनिगमिमसि०' उ० १ ६९. सूत्रेण तुन् । ज्वरत्वर०' इति सूत्रेणोपधावकारयोरुठ् । ततो गुणे रूपम्]

ओदती उन्दन कुर्वन्ती (उषा) १ ४८ ६ [उन्दी क्लेदने (रुधा०) धातोराङ्पूर्वाच्छत्रन्तात् ङीप् । छान्दसत्वात् श्नमोऽभाव । ओदती उषो नाम । निघ० १ ८]

ओद्मन् ओषधीषु, प्र०—अत्र सप्तमी-लुक् १३ ५३ [उन्दी क्लेदने (रुधा०) धातोर्मनिन्नौणादिक । 'अवोदैधौद्म०' इति न लोपो गुणश्च निपात्यते]

ओपमिमीहि अभित श्रेष्ठैरुपमितान् कुरु १ ८४ २० [आङ्+उप+माङ् माने (जुहो०) धातोर्लोट् । व्यत्ययेन परस्मैपदम्]

ओपशमिव अत्यन्त सम्बद्धम् (द्या=प्रकाशम्) १ १७३ ६ ['ओ' इत्यवधारणे, तदुपपदे पश बन्धने (चुरा०) धातोर्घञर्थे क । तत =ओपशम्-इव-पदयो समास]

ओ३म् योऽवति सकल जगत्तदाख्या ४० १७ एतन्नाम-वाच्यमीश्वरम् ४० १५ अवतीत्योम्, रक्षा करने से यह ईश्वर का नाम है, म० प्र० १४, ४० १७ ईश्वर-वाचको यज्ञो वेदविद्या वा, प्र०—ओ३म् ख ब्रह्म, अत्र 'अवतेष्टि-लोपश्च' उ० १ १४२ अनेनाऽवधातोर्मन् प्रत्ययोऽस्य टिलोपश्च, अ०—हे ओङ्कारवाच्यबृहस्पते, भा०—एतत्परमेश्वरस्यैव नाम २ १३ ओंकार शब्द परमेश्वर का सर्वोत्तम नाम है, इसमें अ, उ और म् तीन अक्षर मिलकर 'ओ३म्' समुदाय हुआ, इस एक नाम से परमात्मा के बहुत नाम आते हैं, जैसे—अकार से विराट्, अग्नि और विश्वादि, उकार से हिरण्यगर्भ, वायु और तैजसादि, मकार से ईश्वर, आदित्य और प्राज्ञादि स० प्र० ११ रक्षा करने वाला (ईश्वर), स० वि० ११४, १० ८५ ४४ यह मुख्य परमेश्वर का नाम है जिस के साथ अन्य सब नाम लग जाते हैं स० वि० ७५, ३६ ३ [अव रक्षणगतिकान्ति-प्रीत्यादिषु (भ्वा०) धातो 'अवतेष्टिलोपश्च' उ० १ १४२ सूत्रेण मन्प्रत्ययो टिलोपश्च प्रत्ययस्यैव । धातोरुपधाव-कारयोरुठ् च चादिषु पाठादव्ययम् । तदेतदक्षर (ओङ्कार) ब्राह्मणो य काममिच्छेत् त्रिरात्रोपोषित प्राङ्मुखो वाग्यतो बर्हिष्युपविश्य सहस्रकृत्व आवर्त्तयेत् सिद्ध्यन्त्यस्यार्था सर्व-कर्माणि च गो० पू० १ २२ (ओङ्कारस्य) को धातुरित्या-प्लृधातुरवनिमप्येके रूपसामान्यादर्थसामान्यान्नेदीय, तस्मादापेरोङ्कार सर्वमाप्नोतीत्यर्थ गो० पू० १ २६ को विकारो च्यवते । प्रसारणमाप्नोतेराकारपकारौ विकार्यावादित ओङ्कारो विक्रियते । द्वितीयो मकार एव द्विवर्ण एकाक्षर ओमित्योङ्कारो निर्वृत्त गो० पू० १.२६ ते (देवा) ओङ्कार ब्रह्मण पुत्र ज्येष्ठ ददृशु गो० पू० १ २३ लातव्यो गोत्रो, ब्रह्मण पुत्रो, गायत्र छन्द, शुक्लो वर्ण, पुंसो वत्सा रुद्रो देवता ओङ्कारो वेदानाम् गो० पू० १ २५ तासामभि-पीडितानां (व्याहृतीनां) रस प्राणेदत् । तदेतदक्षरम-भवदोमिति यदेतत् जै० उ० १ २३ ७ तानि (भूर्भुव स्व) शुक्राण्यभ्यतपत्तेभ्योऽभितप्तेभ्यस्त्रयो वर्णा अजायन्त अकार उकारो मकार इति । तानेकधा समभरत्तदेतद् ओ३मिति ऐ० ५ ३२, ओमिति वै साम जै० उ० १ ६ २ ओमिति मन जै० उ० १ ६ २ ओमित्यथर्वणा शुक्रम् गो० पू० २ २४ ओमितीन्द्र जै० उ० १ ६ २ ओमित्यसौ योऽसौ (सूर्य) तपति ऐ० ५ ३२ हन्तेति चन्द्रमा ओमित्यादित्य जै० उ० ३ ६ २ ओमिति वै स्वर्गो लोक ऐ० ५ ३२ ओमित्येतदेवाक्षरमृतम् जै० उ० ३ ३६ ५ तदेत् सत्यमक्षर यदोमिति । तस्मिन्नाप प्रतिष्ठिता जै० उ० १ १० २ तस्मादोमित्येव प्रतिगृह्णीयात् तद्धि सत्य तद्देवा विदु श० ४ ३ २ १३ ओमित्यृच प्रतिगर एव तथेति गाथाया ओमिति वै दैव तथेति मानुषम् ऐ० ७ १८ यद्वै नेत्यृच्यो-मिति तत् श० १४ १ ३० एतद्ध वा (ओमिति) अक्षर

प्रत्यय (उणा० ४.२१६) । कुत्वन्तु न्यङ्क्वादित्वात् । ओक इति निवासनामोच्यते नि० ३ ३ गृहा वा ओका निरु० ८ २६]

ओकिवांसा सङ्गतौ सम्बद्धौ (इन्द्राग्नी=वायु-विद्युतौ) ६ ५६ ३ [आङ्पूर्वाद् उच समवाये (दिवा०) धातोर्लिट क्वसु । 'सुपा सुलुग्०' इत्याकार । छान्दस रूपम्]

ओक्ता समन्तादुक्तानि प्रशंसितानि (अन्नानि धनानि वा) १ ६३ ६ [आङ्पूर्वाद् वच परिभाषणे (अदा०) धातो क्त । 'शेश्छन्दसि बहुलम्' इति शेर्लोप]

ओक्यम् ओकेषु गृहेषु साधु (विद्योपदेशम्) १.१३३ ५ ['ओक' इति व्याख्यातम् । तत 'तत्र साधु' इत्यर्थे यत्]

ओक्ये गृहे ३ ४२ ८ घर मे, आर्याभि० १ ३७, ऋ० १ ६२ १ १३ ['ओक' इति व्याख्यातम् । ततो भवार्थे यत्]

ओक्षतम् समन्तात् सिञ्चेताम् २ १ ६ [उक्ष सेचने (भ्वा०) धातोर्लेडि मध्यमद्विवचनम्]

ओजस. पराक्रमस्य १ ५२ १२ बलस्य ५ ३२ ६ अपने सामर्थ्य से, आर्याभि० १ १३, ऋ० १ ५२ १२ **ओजसा**=जलेन, प्र०—ओज इत्युदकनाम, निघ० १ १२, २ २२.३ उदकेन सह ३४ ७ स्वबलेन १ १३० ६ प्रशस्त शरीरात्मसभा-सेनाबलेन ८ ३६ बलेन वेगेन वा १ १६ ८ स्वस्य शरीरबुद्धिबलेन सैन्येन वा १७ ३८ अनन्तबलेन, प्र०—ओज इति बलनामसु पठितम्, निघ० २ ६, १ ११.८ पराक्रमेण, कोमलेन कर्मणा वा १ १२७ ४ विद्याबलेन १ ५५ ६ सामर्थ्येन ३० ४१ बलादिगुणसमूहेन १ १६ ४ **ओजसे**=बलयुक्ताय (सभाध्यक्षाय) १ ५७ ५ पराक्रमाय ८ ३६ आत्मबलाय ७ २८ **ओज:**=वेगवद् बलम् ४ ७ १० जलवेग, प्र०—ओज इत्युदकनाम, निघ० १ १२, २८ ५ पराक्रमकारि (अ०—वैद्युत तेज ५ ५ पराक्रमस्वरूप (ईश्वर), आर्याभि० २ ६, १६ ६ पराक्रम को आर्याभि० २ ६, १६ ६. महाप्राणवत्त्वम् १६ ६ पराक्रमयुक्त (अ०—परमात्म परमात्मा) १० १५ जलमिव बलम् ५ ३१ ७ न्यायपालनोऽन्वित पराक्रम, ऋ० भू० १०२ सत्य विद्याबलम्, ऋ० भू० १४६ बलकरमन्नादिकम् ६ ४६ ७ बलपराक्रम ३४ ५१ मानस बलम् ३६ १ शरीरस्य तेज १८ ३ अनन्त सामर्थ्य-युक्त (ईश्वर) से० प्र० २४६, १६ ६ प्राणधारणम् ६ १६ ६ वीर्य्यम् ५ ३२ १० बलकरमन्नादिकम् ६ ४६ ७

ओजांसि=शरीरात्मन पराक्रमान् १ ८० १५ [उब्जति कोमलो भवतीति विग्रहे उब्ज आर्जवे (तुदा०) धातो 'उब्जेर्बले बलोपश्च' उ० ४ १६२ सूत्रेणासुन् प्रत्यय । ओजो बलम् । नि० ६ २३ ओज =उदकनाम निघ० १ १२ बलनाम निघ० २ ६ ओजसा बलेन । ओज ओजतेर्वा उब्जतेर्वा नि० ६ ८ ओज सह सह ओज कौ० ३ ५ वज्रो वा ओज श० ८ ४ १ २०]

ओजस्वती: विद्याबलपराक्रमयुक्ता राजस्त्रिय, जितेन्द्रिया (राजस्त्रिय) १० ३ ['ओज' इति पूर्वपदे व्याख्यातम् । ततोऽतिशायने मतुपि स्त्रिया ङीप्]

ओजायमानम् ओज पराक्रममिवाऽऽचरन्तम् (अहिं=मेघम्) २ १२ ११ बलयन्तम् (अहिं=मेघम्) ३ ३२ ११ **ओजायमान:**=ओज इवाऽऽचरन् (जन) १ १४० ६ [ओजस्पदादाचारेऽर्थे 'कर्त्तु क्यङ् सलोपश्च' अ० ३ १ ११ सूत्रेण क्यङ् सलोपश्च । तत शानच्]

ओजिष्ठ अतिशयेनौजस्विन् (राजन्) १ १२६ १० **ओजिष्ठम्**=अतिशयेन बलप्रदम् (श्रव =अन्न श्रवण वा) ६ ४६ ५ अतिशयेन बलिष्ठम् (मेद =स्नेह) ३ २१ ५ अतिशयेन पराक्रमयुक्तम् (द्युम्न=यशोधन वा) ५ १० १ **ओजिष्ठ:**=अतिपराक्रमी (इन्द्र =विद्वान् राजा) ८ ३६ अतिशयेनौजस्वी, भा०—ब्रह्मचर्येण शरीरात्मबलयुक्तो विद्वान् (राजा) ३३.६४ **ओजिष्ठाय**=अतिशयेनौजो विद्यते यस्मिन् विद्या-व्यवहारे तस्मै ५ ५ ['ओजस्' इति व्याख्यातम् । ततोऽतिशायन इष्ठन् । 'टे' अ० ६ ४ १५५ सूत्रेणेष्ठनि परे टेर्लोप]

ओजिष्ठया अतिशयेन पराक्रमयुक्तया (दक्षिणया) १ १६६ ४ [ओजस्प्राति० अतिशायन इष्ठन् । तत स्त्रिया टाप्]

ओजिष्ठेभि: अतिशयेन बलादिगुणयुक्तैर्नरोत्तम-सैन्यै ४ २० १ बलिष्ठैर्योद्धृभि २० ४८ ['ओजिष्ठ' इति व्याख्यातम् । ततो भिस ऐसादेशो न]

ओजीय: बलिष्ठम् (विश्व=जगत्) २ ३३ १० [ओजस्प्राति० अतिशायन ईयसुन् । टेर्लोप]

ओजीयान् अतिशयेन पराक्रमी (राजा) ६ २० ३ [ओजस्प्राति० अतिशायन ईयसुन् । टेर्लोप]

ओजोभि: पराक्रमादिभि ७ ५६ ६ [ओजस्प्राति० तृतीयाबहुवचनम् । 'ओजस्' इति व्याख्यातम्]

ओज्मानम् पराक्रमयुक्त रसम् २६ ५३ बलकारिणम् (मेघमिव सुखम्) ६ ४७ २७.

सर्वासामोषधीना रसो यत्पय को० २ १ अग्नेर्वा एषा तनू यदोषधय तै० ३ २ ५ ७ यदुग्रो देवा ओषधया वनस्पतय-स्तेन को० ६ ५ ओषधयो वै पशुपतिस्तस्माद् यदा पशव ओषधीर्लभन्तेऽथ पतीयन्ति श० ६ १ ३ १२ ओषधयो वै मुद, ओषधिभिर्हीद सर्व मोदते श० ९ ४ १ ७ ओषधयो बर्हि ऐ० ५ २८ श० १ ३ ३ ९ तै० २ १ ५ १ ओषधय खलु वै वाज तै० १ ३ ७ १ ओषधयो मधुमती तै० ३ २ ८ २ रसो वा एव ओषधिवनस्पतिषु यन्मधु ऐ० ८ २० सौम्या ओषधय श० १२ १ १ २ सोम ओषधीनामधिराज गो० उ० १ १७ सोमो वै राजा ओषधीनाम् कौ० ४ १२ सोमो वा ओषधीना राजा तै० ३ ९ १७ १ औषधो वै सोमो राजा ऐ० ३ ४० ओषधि-लोको वै पितर श० १३ ८ १ २० जगत्य ओषधय श० १ २ २ २ ओषधयो वै देवाना पत्न्य श० ६.५ ४ ४. मैनान्य वा एतदोषधीना यद्यवा ऐ० ८ १६ साम्राज्य वा एतदोषधीना यन्महाव्रीहय ऐ० ८ १६ (प्रजापति) विष्णोरध्योषधीरसृजत तै० २ ३ २ ४]

ओषधिः सोमादि १ १६६ ५ [पूर्वपदे व्याख्यातम्]

ओहते प्राप्नोति ५ ५२ १० व्यवहारान् वहति, प्र०—अत्र 'वाच्छन्दसि' इति सम्प्रसारण लघूपधगुण १ १७६ ४ वहति प्रापयति ५ ४२ १० वितर्कयति ७ १६ ११ प्राप्नोति प्रापयति वा ५ ५२ ११ [वह प्रापणे (भ्वा०) धातोर्लट्। छान्दसत्वात् सम्प्रसारण लघूपधगुण। ऊहृ वितर्के (भ्वा०) धातोर्वा छान्दस रूपम्]

ओहते वितर्कयुक्ताय (जनाय) २ २३ १६ [ऊह वितर्के (भ्वा०) धातो शत्रन्ताच्चतुर्थी। अलघूपधत्वेऽपि छान्दसत्वाद् गुण]

ओहम् ओहति प्राप्नोति येन तम् (स्तोम=स्तुतिम्) १ ६१ १ **ओहेन**=बीजादिस्थापनेन '१ १८० ५ **ओहैः**= अर्दकै कर्म्मभि ४ १० १ विद्यासुखप्रापकै (स्तोमै= वेदभागै) १५ ४४ रक्षणादिभि १७ ७७ [वह प्रापणे (भ्वा०) धातोर्घञर्थे क प्रत्यय। छान्दसत्वात्सम्प्रसारणे कृते गुण]

ओहसा प्राप्तेन बलेन वेगेन वा ६ ६७ ९ [वह प्रापणे (भ्वा०) धातोरसुन्। छान्दसत्वात् सम्प्रसारणे कृते गुण]

ओहसानम् तर्कगम्यम् (अहि=मेघम्) ६ १७ ९ [ऊह वितर्के (भ्वा०) धातोर्घञर्थे क। छान्दसत्वाद् गुण। ओहोपपदे षण सम्भक्तौ (भ्वा०) धातोरण् प्रत्यय]

ओहानम् त्यजन्तम् (मेघम्) ५ ३० ६ [ओहाक् त्यागे (जु०) धातो 'कृत्यल्युटो बहुलमि' ति कर्त्तरि ल्युट्। छान्दसत्वादोकारानुबन्धस्य लोपो न]

ओहानः रक्षक (विद्वज्जन) ६ ५२ ५ [ओहाङ् गतौ (जु०) धातो पूर्वपदवल्ल्युट् कर्त्तरि]

औषधीः ओषध्य २० १९ [ओषधिप्राति० 'कृदि-कारादक्तिन' इति वार्तिकसूत्रेण ङीप्]

औक्षन् सिञ्चन्ति ३ ९.९ सिञ्चेरन् ३३ ७ [उक्ष सेचने (भ्वा०) धातोर्लङ्]

औचथ्यम् उचितेपूचितेषु कर्मसु साधुम् (विद्वज्जनम्) १ १५८ ४ **औचथ्यः**=प्रशसितेषु भव (रेक्ण=धनम्) १ १५८ १ [उच समवाये (दिवा०) धातोर्बाहुलकादौणा-दिकोऽथ प्रत्यय, स च णित्। औचथप्राति० साध्वर्थे भवार्थे वा यत्]

औच्छत् निवासयति ५ ३० १४ **औच्छः**= विवासयति ५ ७९ २ निवासवती वर्त्तते ५ ७९ ३ [उच्छी विवासे (भ्वा०) धातोर्लङ्]

औद्भिदम् उद्भिनत्ति दु खानि येन तदेव, भा०— विद्वद्भि सह परामृश्य सत्यासत्यनिर्णय (हिरण्य=तेजो सुवर्णादिकम्) ३४ ५० [उत्+भिदिर् विदारणे (रुधा०) धातोर्मूलविभुजादित्वात् क। तत स्वार्थे प्रज्ञादित्वादण्]

औद्भिद्यम् उद्भिदा पृथिवी भित्त्वा जाताना भावम् (वृक्षादि) १८ ९ [उद्भिदप्राति० भावे ष्यञ्]

औपद्रष्ट्र्याय उपद्रष्टृत्वाय ३० १३ [उपद्रष्टृ-प्राति० भावे कर्मणि वा ष्यञ्]

औब्जः य उब्जत्यार्जवी करोति तेन निर्वृत्त स (सूर्यलोक) १.५६ ५ [उब्ज आर्जवे (तुदा०) धातोरच् कर्त्तरि। ततो निर्वृत्तार्थेऽण् प्रत्यय]

औब्जः आर्जवे भव २ २३.१८ [उब्ज आर्जवे (तुदा०) धातोर्घञर्थे क। ततो भवार्थेऽण्]

औब्जत् उब्जति सरली करोति १ ८५ ९ [उब्ज आर्जवे (तुदा०) धातोर्लङ्]

औभ्नात् मृद्नाति ४ १९ ४ [उभ उम्भ पूरणे (तुदा०) धातोर्लङ् विकरणव्यत्ययेन शप श्ना। मृद्ना-त्यर्थे धातूनामनेकार्थकत्वात्]

और्णनाभम् ऊर्णा नाभ्या यस्य तदपत्यमिव (वृत्र= मेघम्) २ ११ १८ [ऊर्णा-नाभिपदयो समास। समासा-न्तोऽच प्रत्यय। ततोऽपत्यार्थेऽण्]

और्णोत् ऊर्णुत आच्छादयति १७ १८ स्वीकरोति

वेदाना त्रिविष्टपम् जै० उ० ३ १६ ७ एतद् (ओमिति) एवाक्षर त्रयी विद्या जै० उ० १ १८ १० न (ब्रह्म) ओमित्येतदक्षरमपश्यद् द्विवर्णञ्चतुर्मात्र सर्वव्यापि सर्वविभ्वयातयाम ब्रह्म गो० पू० १ १६ एष (ओमित्यक्षरम्) उ ह वाव सरस जै० उ० १ ८ ५ यथा सूच्या पलाशानि सन्तृण्णानि स्युरेवमेतेना (ओमिति) अक्षरेणेमे लोका सन्तृण्णा जै० उ० १ १० ३ एवमेवैव विद्वान् ओमित्येतदेवाक्षर समारुह्य यददोऽमृत तपति तत्प्रपद्य ततो मृत्युना पाप्मना व्यावर्त्तते जै० उ० १ १८ ११]

ओमभिः रक्षणादिकारकैः (ओपधैः) ४ ४३ १३ [अव रक्षणादिपु (भ्वा०) धातोर्मनिन् । उपधावकारयोरूठ् धातो]

ओमानम् रक्षादिकर्त्तारम् (जनम्) ६ ५०.७ रक्षणादिसत्कर्मपालकम् (ऊर्जं=पराक्रमम्) १ ११८ ७ ['ओमन्' इति पूर्वपदे व्याख्यातम् । ततो द्वितीयैकवचनम्]

ओमासः अवन्ति सद्गुणै रक्षन्ति ते (देवास = विद्वज्जना) ७ ३ ३ रक्षका, ज्ञानिनो विद्याकामा उपदेशप्रीतयो, विज्ञानतृप्तयो यथार्थस्यावगमा , शुभगुणप्रवेशा , सर्वविद्याश्राविण , परमेश्वरप्राप्तौ व्यवहारे च पुरुषार्थिन , शुभविद्यागुणयाचिन , क्रियावन्त , सर्वोपकारमिच्छुका, विज्ञाने प्रशस्ता आप्ता सर्वशुभगुणलिङ्गिनो दुष्टहिंसका शुभगुणदाता सौभाग्यवन्तो ज्ञानवृद्धा, (विश्वेदेवास = सर्वे विद्वास), प्र०—अव रक्षण-गति-कान्ति-प्रीति-तृप्त्यवगम-प्रवेश-श्रवण-स्वाम्यर्थयाचन-क्रियेच्छा-दीप्त्यवाप्त्यालिङ्गन-हिंसा-दान-भाग-वृद्धिपु, इत्यस्माद् 'अविसिविसिशुपिभ्य कित्, इत्यनेनौणादिकेन सूत्रेणाऽवधातोरोमशब्द सिध्यति । ओमास इति पदनामसु पठितम्, निघ० ४ ३, १ ३ ७ [अव रक्षणादिपु (भ्वा०) धातोरौणादिको मन् प्रत्यय । ततो जसोऽसुगागम । ओमास पदनाम निघ० ४ ३ ओमास अवितारो वा ऽवनीया वा नि० १२ ४०]

ओम्यावतीम् अवन्ति त ओमास्तेपु भवा प्रशस्ता विद्या तद्वतीम् (नीतिम्) १ ११२ २० ['ओम' इति पूर्वपदे व्याख्यातम् । ततो भवार्थे यत् प्रत्यये मतुपि च स्त्रिया ङीप्]

ओम्यावन्तम् ये अवन्ति ते ओमानस्तान् ये यान्ति प्राप्नुवन्ति त ओम्या , एते प्रशस्ता विद्यन्ते यस्य तम् (विद्वज्जनम्) १ ११२ ७ [अव रक्षणादिपु (भ्वा०) धातोर्मनिन् प्रत्यय ओमन् । तदुपपदे या प्रापणे (अदा०) धातोरण् प्रत्यय । ततोऽतिशायने मतुप्]

ओर्णुत आच्छादयत २.१४.३. आङ्+ऊर्णुञ् आच्छादने (अदा०) धातोर्लोट्]

ओषतात् दह १३ १२ **ओषति**=दहेत् १ १३० ८ **ओषः**=दहसि १ १७५ ३ [उप दाहे (भ्वा०) धातोर्लोट् । 'तुह्योस्तातङ्' इति तातङादेश. । अन्यत्र लट्]

ओषधयः यवादय , प्र०—फलपाकान्ता बहुपुष्पफलोपगा, मनु० १ ८६, १ २१ सोमाद्या ३६ १७ सोमयवाद्या २० १६ **ओषधीनाम्**=सोमाद्योषधीनाम् १ १२७.८ **ओषधीभिः**=यवादिभि , प्र०—ओपधय ओषद् धयन्तीति वा दोष धयन्तीति वा, नि० ६ २७, १ २१ यवसोमलतादिभि १५ ७ **ओषधीभ्यः**=प्रसिद्धाभ्य (वनस्पतिभ्य) ६ २ रोगनिवारिकाभ्य (सोमलतादिभ्य) ६ ६ **ओषधीषु**=सोमलतादिपु १६ ३३ **ओषधीः**= गोधूमाद्या (अन्नानि) १ १०३ ५ वृक्षादि वनस्थ सत्र पदार्थ, आर्याभि० १ २७, ऋ० ७ ३४ २५ सर्वरोगनाशिका (सोमाद्या) १ ६१ २२ ओषधय १३ २७ यवादीन् १ १६३ ७ सोमलतादय ओषध्य , प्र०—'अत्र वाच्छन्दसि' इति पूर्वसवर्णदीर्घ १ ६० ६ **ओषधे**=ओपधिवद्वर्त्तमाने (स्त्रि) १२ ६६ ओपधिवद्वर्त्तमान विद्वन् (जन) १२ १०० ओषो विज्ञान धीयते यस्मिंस्तत्सम्बुद्धौ (अ० विज्ञानवरा ऽव्यापक, प्र०—अत्र 'ओष गतौ' इत्यस्माद् गतिरत्र विज्ञान गृह्यते ६ १५ ओपधिव्यापिन् (ईश्वर) १ १८७ १० ओपधि १२ १०१ ओपधिम् १२ ६८ सोमलताद्योपधिगण ४ १ सर्वरोगनिवारक (विद्वज्जन) ५ ४२ **ओषध्याः**= यवादे १ २५ [ओषद् उपपदे धेट् पाने (भ्वा०) धातो 'कर्मण्यधिकरणे च' अ० ३ ३ ९३ इति विहित कि प्रत्ययोऽत्र 'कृतो बहुलम्' इति कर्त्तर्यपि, तलोपश्च, स्त्रिया ङीप् । ओषद्=उप दाहे (भ्वा०) धातो शतृ । ओषधय ओषद्धयन्तीति वा, ओपत्येना धयन्तीति वा, दोष धयन्तीति वा नि० ६ २७ ओषधय पदनाम निघ० ५ ३ (प्रजापति) ता (आहुति) व्यौक्षत् ओष धयेति, तत ओषधय समभवँस्तस्मादोषधयो नाम श० २ २ ४ ५ द्वय्यो वा ओषधय पुष्पेभ्योऽन्या फल गृह्णन्ति । मूलेभ्यो अन्या तै० ३ ८ १७ ४ उभय्यो (ओषधय) ऽस्मै स्वदिता पच्यन्ते ऽकृष्टपच्याश्च कृष्टपच्याश्च ता० ६ ६ ६ वाग्दैवत्य साम, वाचो मनो देवता, मनस पशव , पशूनामोषधय , ओषधीनामाप । तदेतदद्भ्यो जात सामाप्सु प्रतिष्ठितमिति जै० उ० १ ५६ १४ आपो ह वाऽओषधीना रस श० ३ ६ १ ७ अपामोषधय (रस) ओषधीना पुष्पाणि (रस) पुष्पाणा फलानि (रस) । श० १४ ९ ४ १ एष ह वै

प्रत्ययः । कक्ष=कक्षो गाहते वस इति नामकरण ख्यातेर्वाऽनर्थकोऽभ्यास । किमस्मिन् ख्यानमिति । तत्सामान्याद् मनुष्यकक्षो बाहुमूलसामान्यादश्वस्य नि० २.२.]

कक्षीवता शिक्षकेन विदुषा १ ११७ ६. **कक्षीवते**=कक्षा प्रशस्ताऽङ्गुलय इव विद्याप्रान्ता विद्यन्ते यस्य तस्मै (जनाय) १ ५१ १३ प्रशस्तशासनयुक्ताय (विद्यार्थिने जनाय) १ ११६ ७ **कक्षीवन्तम्**=कक्षेषु विद्याऽध्ययन-कर्मसु साध्वी-नीति कक्षा, सा वह्वी विद्यते यस्य विद्या जिघृक्षोस्तम् (विद्वज्जनम्), प्र०—अत्र भूम्न्यर्थे मतुप् 'कक्ष्याया सज्ञाया मतो सम्प्रसारण कर्त्तव्यम्' अ० ६ १ ३७. इति वार्त्तिकेन सम्प्रसारणादेश 'आसन्दीवदष्ठीवच्च०' अ० ८ २ १२ इति निपातनात् मकारस्थाने वकारादेशश्च ३ २८ या कक्षासु कराऽङ्गुलिक्रियासु भवा शिल्पविद्यास्ता प्रशस्ता विद्यन्ते यस्य तम् (यजमानम्), प्र०—कक्षा इति अङ्गुलिनामसु पठितम्, निघ० २ ५, अत्र कक्षाशब्दात् 'भवे च्छन्दसि' इति यत्, तत प्रशसाया मतुप् १ १८ १ प्रशस्ता कक्षा सहाया विद्यन्ते यस्य तम् (स्तोतार जनम्) १ ११२ ११ **कक्षीवन्तः**=प्रशस्ता कक्षयो विद्यन्ते येषान्ते (भृत्या जना) १ १२६ ४ **कक्षीवान्**=सर्वसृष्टि-कक्षा विद्यन्ते यस्मिन् स (ईश्वर) ८ २६ १ युद्धे प्रशस्त-कक्ष (वीरयोद्धा) १ १२६ ३ बह्व्य कक्षयो विद्याप्रदेशा विदिता सन्ति यस्य स (विद्वज्जन) १ १२६ २ ['कक्ष्या' इत्यङ्गुलीनाम निघ० २ ५ ततो भवार्थे यत्। ततो प्रशसाया मतुपि 'कक्ष्याया सज्ञाया मतौ सम्प्रसारणम्' अ० ६ १ ३७ वा सूत्रेण सप्रसारणे 'आसन्दीवदष्ठीवत्०' अ० ८ २ १२ सूत्रेण मकारस्य वकार । कक्षीवत् कक्ष्यावान् नि० ६ १०]

कक्ष्यप्रा कक्ष्य प्रात पिपूर्त्त (हरी=अश्वौ) ८ ३४ कक्षासु भवा कक्ष्या सर्वपदार्थाऽवयवास्ता प्रात प्रपूरयन्तौ (हरी=अश्वौ) १ १० ३ [कक्ष्योपपदे प्रा पूरणे (अदा०) धातो क प्रत्यय । 'सुपा सुलुगि' ति सूत्रेणा-कारादेश । कक्ष्या अङ्गुलिनाम निघ० २ ५ प्रकाशयन्ति कर्माणि नि० ३ ९ रज्जुरश्वस्य कक्ष सेवते निरु० २ २.]

कक्ष्य कक्षासु भव (मद=आनन्द) ५ ४४ ११ **कक्ष्याय**=कक्षासु भवाय, भा०—कक्षास्थाय (जनाय) १६ ३४ **कक्ष्ये**=कक्षासु भवे (रोदसी=द्यावापृथिव्यौ) १ १७३ ६ [कक्षाप्राति० भवार्थे यत्]

कङ्कः लोहपृष्ठ २४ ३१ [ककि गतौ (भ्वा०) धातोरच् प्रत्यय]

कङ्कतः चञ्चल (मनुष्य) १ १९१ १ विषवान् इव (प्राणी इव) १ १९१ १ [ककि गतौ (भ्वा०) धातोर्बाहुल-कादौणादिकोऽतच् प्रत्यय]

कच्च कदा च ३३ ३५

कच्चित् किञ्चित् (आग=अपराधम्) २ २७ १४

कञ्चन् कञ्चिदपि (शत्रुम्) १७ ४५

कण्टकीकारीम् या कण्टकी करोति ताम् (दुष्टा स्त्रियम्) ३० ८ ['कण्टकी' इत्युपपदे डुकृञ् करणे (तना०) धातोरण् प्रत्यय । स्त्रिया ङीप्]

कण्ठ्यम् कण्ठे भव स्वरम् ३९ ९ [कण्ठप्राति० भवार्थे 'शरीरावयवाच्च' अ० ४ ३ ५५ सूत्रेण यत् । कण्ठ=करणति येन शब्द करोतीति विग्रहे कण शब्दार्थे (भ्वा०) धातो 'कणेष्ठ' उ० १ १०३ सूत्रेण ठ०]

कण्वतमः अतिशयेन मेधावी (जन) १ ४८ ४ [कण्वप्राति० अतिशायने तमप् । 'कण्व' इति मेधाविनाम निघ० ३ १५]

कण्वम् मेधाविनम् (जनम्) १ ११२.५ **कण्वाः**=मेधाविनो विद्वास, प्र०—कण्व इति मेधाविनाम, निघ० ३ १५, १ १४ २ [कण्व इति मेधाविनाम । निघ० ३ १५ कणति निमीलति चेष्टते य इति विग्रहे कण निमीलने (चुरा०) धातो 'अशूप्रुषिलटिकणि०' उ० १ १५१ सूत्रेण क्वन् प्रत्यय]

कण्वहोता कण्वो मेधावी चाऽसौ होता दाता च (विद्वान्) ५ ४१ ४ [कण्व-होतृपदयो समास । कण्व इति व्याख्यातम् । होता=हु दानादानयो (जु०) धातो-स्तृच्]

कण्वासः शिल्पविद्याविदो मेधाविन (जना) १ ४६ ९ [कण्व इति व्याख्यातम् । ततो जसोऽसुगागम]

कत् कदा, प्र०—छान्दसो वर्णलोपो वा, इत्याकार-लोप १ १२१ १ कुत्र, प्र०—पृषोदरादित्वात् 'क्व', इत्यस्य स्थाने कत् १ १०५ ५ केन (पथा=मार्गेण) १ १०५ ६ [किम सर्वनाम्न सप्तम्यन्तात् 'सर्वैकान्य०' अ० ५ ३ १५. सूत्रेण दा प्रत्यय । छान्दसत्वादाकारलोप]

कतमत् बहूनामुपादानाना मध्ये किमिति प्रश्ने (आरम्भणम्) १७ १८ **कतमस्य**=किस (देवस्य=सदा मुक्त परमात्मा) का स० प्र० ३३०, १ २४ १ **कतमः**=कौन सा (देव=परमात्मा) स० प्र० २७३, अथर्व० १० २३.४ २० बहूना मध्ये क (सभापती राजा) ७ २९ [किम् सर्वनाम्नो 'वा बहूना जातिपरिप्रश्ने डतमच्' अ० ५ ३ ९३ सूत्रेण डतमच् । ततो नपुसके 'अद्ड्डतरादिभ्य ०'

१ ६८ ५ आच्छादित कर रखा है, आर्याभि० २.३२, १७ १८ **और्णोः**=आच्छादयतु ६ १७ ६ [ऊर्णुञ् आच्छादने (अदा०) धातोर्लङ्]

औशिजस्य कामयमानेषु कुशलस्य (राजभृत्यस्य) ४ २१ ७ कामयमानाऽपत्यस्य ४ २१ ६ य उशजि प्रकाशे जात स उशिक्, तस्य विद्यावत पुत्र इव (यजमान) १ १८ १ य सर्वा विद्या वष्टि स उशिक्, तस्य विद्यापुत्र इव, भा०—विद्याज पुत्र ३ २८. विद्याकामस्य पुत्र १ १२२ ५ कमनीयस्य पुत्र (परिव्राट्=सन्यासी) १ ११६ ६ कामयमानस्य पुत्र ६ ४ ६ **औशिजाय**= मेधाविपुत्राय, प्र०—उशिज इति मेधाविनाम, निघ० ३ ५, १ ११२ ११ [वश कान्तौ (अदा०) धातो 'वश किन्' उ० २ १७ सूत्रेण इजि प्रत्यय किच्च । ग्रह्यादिसूत्रेण सम्प्रसारणम् । वष्टि य कामयते यत्काम्यते वा स उशिक् । उशिज्प्राति० 'कृतलब्धक्रीतकुशला' अ० ४ ३ ३८ सूत्रेण कुशलार्थे वा 'तस्यापत्यम्' अ० ४ १ ९२ सूत्रेणापत्यार्थे वा 'तत्र जात' अ० ४.३ २५ सूत्रेण जातार्थे वा अण् प्रत्यय. । आदिवृद्धि । उशिज इति मेधाविनाम निघ० ३ १५ 'उशिक् इति कान्तिकर्मा निघ० २ ६ औशिज = उशिज पुत्र । उशिग् वष्टे कान्तिकर्मण नि० ६ १०]

औष्णिहाय उष्णिग्व्रतोविताय (सवित्रे=ऐश्वर्योत्पादकाय पुरुषाय) २६ ६० [उत्+ष्णिह प्रीतौ (दिवा०) धातो 'ऋत्विग्दधृग्०' अ० ३ २ ५९ सूत्रेण क्विन् प्रत्यय । निपातनादुपसर्गान्तलोप षत्व च उष्णिगुत्स्नाता भवति, स्निह्यतेर्वा स्यात् कान्तिकर्मण नि० ७ १२ उष्णिहप्राति० 'प्रज्ञादिभ्यश्च' अ० ५ ४.३८ सूत्रेणाण् ।]

औहत ऊहते १.१६४ २६ [ऊह वितर्के (भ्वा०) धातोर्लङ्]

औहिष्ट वितर्कयति ६ १७ ८ [ऊह वितर्के (भ्वा०) धातोर्लुङ्]

ककरान् पक्षिविशेषान् २४ २० [कक लौल्ये (भ्वा०) धातोर्बाहुलकादौणादिकोऽरन् प्रत्यय]

ककुत् महान् (अग्नि=सर्वस्वामीश्वर, प्रकाशादिगुणवान् भौतिको वा) ककुह इति महन्नामसु पठितम् निघ० ३.३, ककुह-शब्दस्य स्थाने ककुत्, पृषोदराद्याकृतिगणान्तर्गतत्वात् सिद्ध ३ १२ प्र०—ककुहशब्दस्यान्त्यलोपो वर्णव्यत्यययेन हस्य द १३ १४. [ककुह=महन्नाम निघ० ३ ३ पृषोदरादित्वादन्त्यलोपो हस्य च द । अथवा= कस्य देहस्य मुखस्य वा कु भूमि ददातीति विग्रहे कम्+कु+दा+क प्रत्यय । कक लौल्ये (भ्वा०) धातोर्गौणा० इति प्रत्यय.]

ककुत्पतिः दिशा पालक (अग्नि=प्रसिद्ध पावक) १५ २०. [ककुभ=दिङ्नाम निघ० १ ६ ककुभ्-पति-पदयो समास । भस्य दकारो वर्णव्यत्ययेन]

ककुन्मान् प्रशस्ता ककुतो लौल्या गुणा विद्यन्ते यस्मिन् (पराक्रम), प्र०—अत्र ककधातोर्गौणादिक उति उ० १ ६४, ६ ६ [कक लौल्ये (भ्वा०) धातोर्बाहुलकादौणादिक (१ ६४) उति प्रत्यय । ततोऽतिशायने मतुप्]

ककुप् दिश १४ ६ लालित्ययुक्ता (छन्दोऽर्थविज्ञापनम्) २३ ३३ दिगिव यश. १५ ४ भा०—उत्तमानि वस्त्राणि २१ २१ **ककुभम्**=दिग्वच्छुद्धम (रूपम्) ८ ४६. स्तम्भकम् (इन्द्रिय=धनम्) २८.३३ **ककुभः**=दिश ४ १६ ४ सर्वा दिश, प्र०—ककुभ इति दिङ्नाम, निघ० १ ६, ३४ २४ **ककुभा**=ककुप्छन्दसा २८ ४४ **ककुभाम्**=दिशाम् ५ ४४ २ **ककुभे**=ककुबुष्णिक्-छन्दोऽर्थाय २४.१३. ['ककुभ' इति दिङ्नाम निघ० १ ६ ककुप् ककुभिनी भवति । ककुप् च कुब्जश्च कुजतेर्वोब्जतेर्वा नि० ७ १२ प्राणो वै ककुप् छन्द. श० ८.५ २ ४ कीकसा. ककुभ श० ८.६ २ १० पुरुषो वै ककुप् । ता० ८ १०.६]

ककुभाय प्रसन्नमूर्त्तये (पुरुषाय) १६.२०.]

ककुहः महती (जनित्री+मातृ), प्र०—ककुह इति महन्नाम, निघ० ३ ३, ३ ५४ १४ सर्वा दिश १ १८१.५ **ककुहाः**=दिश १ १८४ ३ ['ककुह' इति महन्नाम निघ० ३ ३]

ककुहः महान् (जन) ५ ७३ ७ **ककुहान्**=महत (यतस्रुच=ऋत्विज) प्र०—ककुह इति महन्नाम निघ० ३ ३, २ ३४.११ ['ककुह' इति महन्नाम निघ० ३ ३]

ककुहासः महान्तो विद्वास (जना) १ १६ ३ सर्वा दिश ४.४४ २ ['ककुह' इति महन्नाम निघ० ३ ३ ततो जसोऽसुगागम]

कक्कटः मृगविशेष २४ ३२ [कखति हसतीति विग्रहे कखे हसने (भ्वा०) धातोर्बाहुलकादौणादिक (उ० ४ ८१) अटन् प्रत्यय । कुगागमे चर्त्वे च रूपम्]

कक्षः क्रान्तस्तटादि ६ ४५ ३१ **कक्षाणाम्**=गृहप्रान्तावयवेषु स्थितानाम् (जनानाम्) १६ १६ **कक्षेषु**= सामन्तेषु ११ ७६ [कषति हिनस्तीति विग्रहे कष हिंसार्थे (भ्वा०) धातो 'वृतृवदिवचि०' उ० ३ ६२. सूत्रेण स

१ ११६ १० कामयमानानाम् (जनानाम्) १ १६३ ८ कमनीयानाम् (जनानाम्) २९ १९ [कनी दीप्तिकान्तिगतिषु (भ्वा०) धातोर्बाहुलकाद् औणादिक ईन प्रत्यय । 'कनीनाम्' प्रयोगे नुटोऽभाव आगमशासनस्यानित्यत्वात्]

कनीयसः अतिशयेन कनिष्ठात् (विद्यार्थिन) ७ २० ७ [युवन्प्राति० अल्पाद्वातिशायने ईयसुन् । 'युवाल्पयो कन्०' इति कन्नादेश]

कनीय. अतिशयेन कनिष्ठम् ['कनीयस' इति पदे ४ २४ ६ [पूर्वपदे व्याख्यातम्]

कनीयान् अतिशयेन कनिष्ठ (बन्धुर्विद्वान्) ४ ३३ ५ व्याख्यातम्]

कन्या कुमारिका (शिष्या) १ १६१ ५ कमनीया (विदुषी कन्या) ६ ४९ ७ [कन्यते दीप्यते काम्यते गच्छति वेति विग्रहे कनी दीप्तिकान्तिगतिषु (भ्वा०) धातो 'अघ्न्यादयश्च' उ० ४ ११२ सूत्रेण यक् । स्त्रिया टाप् । कन्या कमनीया भवति, क्वेय नेतव्येति वा, कमनेनानीयत इति वा, कनतेर्वा स्यात्कान्तिकर्मण नि० ४ १५]

कन्या इव यथा कुमार्य्य ४ ५८ ६ कुमार्य्य इव १७ ९७ [कन्या-इव पदयो समास । कन्येति व्याख्यातम्]

कपनेव वायुगतय इव ५ ५४ ६ [कपना-इव-पदयो समास । कपना कम्पना क्रिमयो भवन्ति नि० ६ ४]

कपर्दिनम् कृतब्रह्मचर्य्य जटिल विद्वासम् (वैद्यम्) १ ११४ ५ जटाजूट ब्रह्मचारिणम् (विद्वासम्) ६ ५५ २ **कपर्दिनः**=प्रशसितो जटाजूटो विद्यते यस्य तस्य (अ०—सेनापते) १६ १० **कपर्दिने**=जटिलाय ब्रह्मचारिणे १६ २९ कृतब्रह्मचर्याय (सेनापतये) १६ ४८ जटायुक्ताय जनाय १६ ४३ [कपर्दप्राति० प्रशसाया मत्वर्थीय इनि]

कपिञ्जल. पक्षिविशेष २४ ३८ [कपिशब्दोपपदे जॄ वयोहानौ (क्र्या०) धातो खच्प्रत्ययो बाहुलकाद् रेफस्य लत्व च । कपिञ्जल कपिरिव जीर्ण, कपिरिव जवत ईषत् पिङ्गलो वा, गमनीय शब्द पिञ्जयतीति वा नि० ३ १८]

कबन्धिनः बहूदका (मरुत =मनुष्या) ५ ५४ ८ [कबन्धमित्युदकनाम निघ० १ १२ ततो भूम्नि इनि । कबन्ध मेघम् । कवनमुदक भवति तदस्मिन् धीयते । उदकमपि कबन्धमुच्यते बन्धिरनिभृतत्वे कमनिभृत च नि० १० ४]

कम् सुखम्, प्र०—कमिति वारिमूर्द्धसुखेषु १.२८ ८ सुखस्वरूपम् (देवम्=ईश्वरम्) ५ १८ सुखकारकम् (वपु =शरीरम्) १.१०२ २ सुखकर सुन्दरम् (अत्क=वस्त्रम्) ६ २९ ३ सुखसम्पादकम् (सोमवल्ल्यादिरसम्) १ ४७ १० कल्याणम् १ ८८ ३ सुख ते सुख दाता (ईश्वर) को आर्याभि० १ ३१, द्वि० १ ७ ८ १ सुखकारिणम् (नव=नौकादिकम्) १ १८२ ५ सुखप्रदम् (देवम्) १ २९ १ [कम् उदकनाम निघ० १ १२ सुखनाम निघ० ३ ६. पदपूरण नि० १ १९ उदकम् निघ० ४ १७ ब्रह्म नि० ६ ३५]

कमयाध्वे कामयध्वम् २ १४ ८ [कमु कान्तौ (भ्वा०) धातो 'कमेर्णिङ्' इति स्वार्थे णिङि लट् । वृद्ध्यभावश्छान्दस]

कयस्य विज्ञातु (विदुषो जनस्य) १.१२९ ५

कर कुर्या ४ ३३.५ कुरु १ ८२ १ [डुकृञ् करणे (तना०) धातोर् लोट् । विकरणव्यत्ययेन शप्]

करञ्जम् य किरति विक्षिपति धार्मिकान्स्तम् (पर्णयम्=दस्युम्) प्र०—अत्र 'कॄ विक्षेपे' इत्यस्माद्धातोर्बाहुलकादौणादिकोऽञ्-प्रत्यय १ ५३ ८ [कॄ विक्षेपे (तुदा०) धातोर्बाहुलकादौणादिकोऽञ्प्रत्यय]

करणम् साधनम् ६ १८ १३ करोति येन तत् ५ ३१ ७ **करणानि**=साधनानि कर्माणि वा २ १५ १ क्रियन्ते यैस्तानि (अपासि=कर्माणि) ४.१९ १०. कुर्वन्ति यैस्तानि साधनानि ५.३१.६ [डुकृञ् करणे (तना०) धातो करणे ल्युट् । करण कर्मनाम निघ० २ १]

करणा कुर्वन्तौ (अश्विना=स्त्रीपुरुषौ) १ ११९ ७. [डुकृञ् करणे (तना०) धातो 'कृत्यल्युटो बहुलमि' ति कर्त्तरि ल्युट् । 'सुपा सुलुग्' इत्याकार]

करत् कुर्य्यात् ४ ३९ ६ करोतु, प्र०—लेट्-प्रयोगोऽयम् ७ २५ कुर्य्यु, प्र०—लेट्-प्रयोगोऽय 'बहुल छन्दसि' इति विकरणाभाव १ ८९ ३ **करतः**=कुर्याताम् २१ ४३ **करताम्**=कुरुत, प्र०—अत्राऽपि लडर्थे लोट्, विकरणव्यत्ययश्च १ २३ ६ कुर्याताम् ३३ ४६ करुत=कुर्य्यात् ४ २२ १ **करते**=करोति ४ ४४ ३ कुर्य्यात् ४ १९ १ **करथः**=कुर्याताम् ६ ५० ३ **करन्**=कुर्य्यात् ५.३० ६ कुर्वन्तु १ १८६ २ कुर्य्यु, प्र०—लेट्प्रयोगोऽयम् 'बहुल छन्दसि' इति विकरणाऽभाव १ ८९ ३ **करसि**=कुर्या ६ ३५ १. **करसे**=कुर्य्या ३ ४३ ५ **कर** =कुर्य्यात् ३.४१ ६ कुर्य्या ६ ४५ २७ करोति ६ २२ १० कुरु १ ८२ १ [डुकृञ् करणे (तना०) धातोर्लेट् । विकरणव्यत्ययेन शप् । करत कुरुथ नि० ३ १५]

करम्भम् भोग कर्त्तु योग्यम् (पदार्थम्) ६ ५७ २

अ० ७ १ २५ सूत्रेण स्वमो स्थानेऽद्ड्]

कतमः अत्यन्ताऽऽनन्दयुक्त (परमात्मा) ऋ० भू० २१८ अतिशयेन सुखकारी (सत्यराजा=सत्यन्याय-प्रकाशक सभेश) २० ४ [क० सुखनाम (निघ० ३ ६) ततोऽतिशायने वा तमप्]

कतमाम् बहूना मध्ये काम् (द्या=प्रकाशम्) १ ३५ ७ ['कतम इति व्याख्यातम्। तत स्त्रिया टाप्]

कतरा द्वयोर्द्वयोर्मध्ये कतरौ (द्यावापृथिव्यौ कार्य-कारणे वा) १ १८५ १ अनयोर्मध्ये एक (सभेश सेनेशो वा) ६ ६६ ८ [किम सर्वनाम्न 'किंयत्तदोर्निर्द्धारणे द्वयो-रेकस्य डतरच्' अ० ५ ३ ९२ सूत्रेण निर्धारणे डतरच्]

कतिधा कतिप्रकारै ३१ १० [कतिप्राति० प्रकारेऽर्थे 'सख्याया विधार्थे धा' अ० ५ ३ ४२. सूत्रेण धा। सख्या-सज्ञा तु 'बहुगुणवतु डति सख्या' अ० १ १ २२ सूत्रेण। कति=किम सर्वनाम्न 'किम सख्यापरिमाणे डति च' अ० ५ २ ४१ सूत्रेण डति प्रत्यय]

कत्पयम् कतिपयम् (मेघम्) प्र०—अत्र 'छान्दसो वर्णलोपो वा' इती लोप ५ ३२ ६ [कत्पयम्=सुखपयसम्। सुखमस्य पय नि० ६ ३]

कथा कथम् १ ५४ १ केन प्रकारेण ४ ३ ५ किस प्रकार से, आर्याभि० २ ३२, १७ १८ केन हेतुना १ ४१ ६ [किम सर्वनाम्न 'था हेतौ च च्छन्दसि' अ० ५ ३ २६ सूत्रेण हेतौ प्रकारवचने च था प्रत्यय। तस्य विभक्ति-सज्ञकत्वात् 'किम क' अ० ७ २ १०३ सूत्रेण किम कादेश। कथा कथम् नि० ९ ३०]

कथो कथम् ५ २९ १३

कदा कस्मिन् काले ३ ३४. [किम सर्वनाम्न सप्त-म्यन्तात् काले वाच्ये 'सर्वैकान्य०' अ० ५ ३ १५ सूत्रेण दा प्रत्यय]

कदाचन कदाचिदपि ३४ ४१ कभी भी स० प्र० २३८, १० ४८ ५ ['कदा' इति व्याख्यातम्। कदा-चन-पदयो समास]

कद्रीची अचाक्षुष्यगमना (पृथिवी) १ १६४ १७ [किम्शब्दोपपदे अञ्चु गतिपूजनयो (भ्वा०) धातो 'ऋत्विग्०' इत्यादिना क्विन्। 'विष्वग्देवयोश्च०' अ० ६ ३ ९२ सूत्रेण पूर्वपदस्य टेरद्रिरादेश स्त्रिया ङीप्। 'अच' इत्यकारलोपे 'चौ०' अ० ६ ३ १३८ सूत्रेण दीर्घ]

कधप्रियाः ये कथाभि कथाभि प्रीणयन्ति ते (विद्वज्जना) प्र०—अत्र वर्णव्यत्ययेन थकारस्य धकार 'ङ्यापो सज्ञाछन्दसोर्बहुलम्' अ० ६ ३ ६३ अनेन ह्रस्व १ ३८ १ **कधप्रिये**=कथन कथा प्रिया यस्या सा (उष) १ ३० २० [कथोपपदे प्रीञ् तर्पणे कान्तौ च (क्र्या०) धातोर्मूलविभुजादित्वात् क। इयङ् आदेश पूर्वपदस्य ह्रस्वत्व थकारस्य च धकार।]

कनिक्रदत् भृश शब्दयन्, भा०—उच्चै शब्दयन् (हरि=अश्व) ३३ ९० भृश शब्दायमान (उपदेशक) २ ४२ १ भृश गच्छन् (अग्नि=विद्वत्सन्तान) ११ ४६ [क्रदि आह्वाने रोदने च (भ्वा०) धातो 'दाधर्तिदर्धर्ति०' अ० ७ ४ ६५ सूत्रेण लुङि च्लेरङादेशो द्विर्वचनमभ्यासस्य चुत्वाभावो निगागमश्च निपात्यते। कनिक्रदत्=व्यक्रन्दीत् नि० ९ ३]

कनिक्रदम् भृश विकल प्राप्तव्ययम् (पशुम्) १३ ४८ [क्रदि वैक्लव्ये (भ्वा०) धातोर्यङ्लुङन्तादच्]

कनिष्ठाय अतिशयेन बालकाय १६ ३२ [अल्पप्राति० अतिशायन इष्ठन्। 'युवाल्पयो कन्०' अ० ५ ३ ६४ सूत्रेण वा कन्नादेश]

कनीन इव यथा प्रकाशमानो जन १ १७७ १८ [कनीन-इवपदयो समास। कनीन=कनी दीप्तिकान्ति गतिपु (भ्वा०) धातोर्बाहु० ईनप्रत्यय]

कनीनकम् कनति प्रकाशते येन तत् (चक्षु=दर्शकम्) प्र०—अत्र कनीधातोर्बाहुलकादौणादिक ईनक-प्रत्यय ४ ३२ [कनी दीप्तिकान्तिगतिपु (भ्वा०) धातोर्बाहुलकादौणादिक ईनक प्रत्यय]

कनीनक· य कनति दीपयति स एव कनीनक, भा०—वृष्ट्युत्पादक (सूर्य), प्र०—अत्र कनीधातोर्बाहुलकादौ-णादिक ईनप्रत्ययस्तत स्वार्थे कन् ४ ३ **कनीनकाभ्याम्**=प्रदीप्ताभ्या कमनीयाभ्याम् (कर्णाभ्या=श्रवणसाधका-भ्याम्) २५ २ तेजोमयाभ्या कृष्णगोलकतारकाभ्याम् २५ १ [कनी दीप्तिकान्तिगतिपु (भ्वा०) धातोर्बाहु० औणादिक ईन प्रत्यय। तत स्वार्थे कन्। कनीनक कन्यके नि० ४ १५ शुष्णो दानव प्रत्यङ् पतित्वा मनुष्या-णामक्षीणि प्रविवेश स एष कनीनक कुमारक इव परि-भासते श० ३ १ ३ ११]

कनीनकेव कमनीयेव (विज्ञानकर्मणी) ४ ३२ २३. [कनीनक इति व्याख्यातम्। तस्य इवपदेन सह समास]

कनीन. दीप्तिमान् (सूर्य) ३ ४८ १ **कनीनाम्**=कान्तीनाम् २ १५ ७ कन्येव वर्त्तमानाना रात्रीणा सूर्यादीना वा १ १६ ४ यौवनत्वेन दीप्तिमता ब्रह्मचारिणा कन्यानाम्

श्रवणसाधकाभ्याम् २५.२ कुर्वन्ति श्रवणं याभ्याम् १६.६१ **कर्णाः**=यैः कार्याणि कुर्वन्ति ते (प्रमाव) २४ ३ **कर्णे**=कुर्वन्ति येन तस्मिन् ५.३१ ६ **कर्णेभिः**= श्रोत्रैः, प्र०—अत्र ऐसभाव १.८९.८ कानों से आर्याभि० २.२७, २५.२१ **कर्णौः**=नौचालकैः (कैवर्त्तैः) २.३४.३ **कर्णौ**=करोति श्रवणं याभ्यां तौ २५.२ कर्णौ (पृथिवीसूर्यौ) ३३.७१ **कर्णा**=श्रोत्रौ ४.२९.३ कर्णौ श्रोत्रे ३३.१९ कर्णानि ४.२३.८. [डुकृञ् करणे (तना०) धातोः कॄ विक्षेपे (तुदा०) धातोर्वा 'कृवृजृसि०' उ० ३.१० सूत्रेण नक् प्रत्ययः। कर्णः कृन्ततेर्निकृत्तद्वारो भवति। ऋच्छतेरित्याग्रायणः। ऋच्छन्तीव खे उदगन्तामिति ह विज्ञायते नि० १.९]

कर्णयोनयः कर्णः श्रोत्रं योनिर्येषां ते (धामिका वीराः) २.२४.८ [कर्ण-योनिपदयोः समासः]

कर्त्त कुरुत, अत्र 'बहुलं छन्दसि' इति विकरणस्य लुक्, लोडादेशस्य तस्य स्थाने तबादेशः १.६०.५ **कर्त्तन**= कुर्यात् ७.४८.४ कुरुत २.१४.६ कुर्वन्तु १२.६६ [डुकृञ् करणे (तना०) धातोर्लोट्। 'बहुलं छन्दसीति' विकरणस्य लुक्]

कर्त्तम् कूपम्, प्र०—कर्तमिति कूपनाम, निघ० २.२३, १.१२१.१३

कर्त्तरि कारके (कर्म सम्पादके जने) १.१३९.७ [डुकृञ् करणे (तना०) धातोस्तृच्प्रत्यये सप्तम्येकवचनम्]

कर्त्तवै कर्त्तुम् २.२२.१ [डुकृञ् करणे (तना०) धातोस् तुमर्थे तवै प्रत्ययः]

कर्त्ता निष्पादकः (इन्द्रः=सेनापतिः) १.१००.६ **कर्त्तारम्**=भा०—स्रष्टारम् (ईश्वरम्) २९.६ **कर्त्तृभिः**=सुकर्मकारिभिर्जीवैः सह ७.३२ पुरुषार्थिभिः (जनैः) १.५५.८ कर्मकारकैः (सज्जनैः) ६.१६.१ [डुकृञ् करणे (तना०) धातोः कर्त्तरि तृच्। ताच्छील्ये तृन् वा]

कर्त्तोः कर्त्तुं समर्थस्य (परमेश्वरस्य) ३३.३७ [डुकृञ् करणे (तना०) धातोस्तुमर्थे तोसुन् प्रत्ययः। 'क्त्वातोसुन्०' इत्यव्ययसंज्ञा]

कर्त्तोः कर्त्तव्यं गमनाद्यगन्तव्यं कर्म २.३८.४ [डुकृञ् करणे (तना०) धातोस् तोसुन् प्रत्ययः]

कर्त्तात् छेदकात् (अवपद=आपत्कालात्) २.१६.६

कर्त्त्वम् कर्त्तुं योग्यं कार्य्यम्, प्र०—अत्र करोतेस्त्वन् प्रत्ययः. १.१०.२ **कर्त्त्वं**=कर्त्तुं योग्यं (विद्युदादि.) प्र०—अत्र कृत्यार्थे त्वन् प्रत्ययः १.१६१.३ **कर्त्वानि**= कर्त्तुं योग्यानि (धनानि) २.३०.१० [कर्त्वं कर्मनाम निघ० २.१ डुकृञ् करणे (तना०) धातोः 'कृत्यार्थे तवै-केन्०' अ० ३.४.१४ सूत्रेण त्वन् प्रत्ययः]

कर्म धर्म्यं कृत्यम् १.१७३.९ कर्तुं यद्यदीप्सिततमभीष्टं योग्यं चेष्टामयमुत्क्षेपणादि क्रियते तत्, भा०—पुरुषार्थम् प्र०—कर्तुरीप्सिततमं कर्म, अ० १.४.४९ क्रियमाणम् १.६२.६ अभीप्सिततमा क्रिया १६.१५ **कर्मणः**= चेष्टितस्य (कार्यस्य) १.११.४ **कर्मणा**=ईप्सिततमेन व्यापारेण ६.६६.१. सत्क्रियया ७.३३.१३ [डुकृञ् करणे (तना०) धातोः 'सर्वधातुभ्यो मनिन्' उ० ४.१४५ सूत्रेण मनिन् प्रत्ययः। क्रियते तत् कर्म क्रिया वा। अपसेत्यादि-त्वादुभयलिङ्गम्। कर्मन् कर्मनाम निघ० २.१. कर्म कस्मात्. क्रियत इति सत् नि० ३.१ यज्ञो वै कर्म श० १.१.२.१ पुण्यो वै पुण्येन कर्मणा पापः पापेनेति श० १४.६.२.१४. वीर्यं वै कर्म श० ११.४.४.५ कर्माणि त्रिवृत् गो० पू० १.३२]

कर्म कुरुत, प्र०—अत्र लुङि च्लेर्लुक् 'छन्दस्युभयथा' इत्यार्धधातुकत्वेन ङित्वाभावाद् गुणः १.१७३.४ कुर्याम ६.५१.८ [डुकृञ् करणे (तना०) धातोर्लुङ्। छान्दसत्वा-च्च्लेर्लुक्, अडभावो गुणश्च]

कर्मकृतः ये कर्माणि कुर्वन्ति ते, भा०—पुरुषार्थिनः (जनाः) ३.४७ [कर्मोपपदे डुकृञ् करणे (तना०) धातोः क्विप्। ह्रस्वस्य तुक्]

कर्मणि कर्मणि क्रियायां क्रियायाम् १.१०१.४ [कर्मणि पदस्य वीप्सायां द्वित्वम्]

कर्मणे कर्त्तव्याय १.५५.३ क्रियासिद्धये ३०.७ कर्त्तुं योग्यत्वेन सर्वोपकारार्थाय, भा०—क्रियायै १.१ पञ्चविधलक्षणचेष्टामात्राय, प्र०—उत्क्षेपणमवक्षेपणमा-कुञ्चनं प्रसारणं गमनमिति कर्माणि वैशे० १.७ इत्यत्र पञ्चविधं कर्म गृह्यते १.१३ ['कर्म' इति पदे व्याख्यानम्]

कर्मण्यम् कर्मणा सम्पन्नम् (वीरम्), प्र०—अत्र 'कर्मवेषाद्यत्' अ० ५.१.१००. इति कर्मशब्दाद् यत्, 'ये चाभावकर्मणोः' इति प्रकृतिभावश्च १.९१.२० **कर्मण्यः**= यः कर्मणां सम्पद्यते सः (वीरः=सन्तानः) ३.४७ कर्मसु कुशलः (वीरजनः) ७.२.६ ['कर्म' इति व्याख्यातम्। ततः सम्पादिन्यभिधेये 'कर्मवेषाद्यत्' अ० ५.१.१०० सूत्रेण यत्। 'ये चाभावकर्मणोः' अ० ६.४.१६८ सूत्रेण प्रकृतिभावाट्टेर्लोपो न भवति]

कर्मण्याम् यः कर्मभिः सम्पद्यते ताम् (मृदं=मृति-

दध्यादियुक्त भक्ष्यविशेषम् ३ ५२ ७ **करम्भस्य**=दधि-समृष्टस्य सक्तुन १६ २२ **करम्भः**=कर्त्ता (ईश्वर) १ १८७ १० करोति मथन येन स. १६ २१ **करम्भात्**=य करम्भमन्नविशेषमत्ति स (देव =विद्वज्जन) ६ ५६ १ **करम्भेण**=अविद्याहिंसनेन, प्र०—अत्र 'कृ हिंसायाम्' इत्यस्माद्धातोर्बाहुलकादौणादिकोऽम्भच्-प्रत्यय ३ ४४. [डुकृञ् करणे (तना०) धातो, अथवा कृ हिंसायाम् (क्र्या०) धातोर्बाहुलकादौणादिकोऽम्भच् प्रत्यय]

करम्भिणम् बहव करम्भा पुरुषार्थेन सशोधिता दध्यादय पदार्था विद्यन्ते यस्य तम् (आप्त विद्वासम्) ३ ५२ १ मुष्ठुक्रियया निष्पन्नम् (भोज्यमन्नरसादिकम्) २० २६ [करम्भप्राति० भूम्नि इन् प्रत्यय । 'करम्भम्' इति व्याख्यातम्]

करस्नम् बाहुम्, प्र०—करस्नाविति बाहुनाम, निघ० २४, १ १६१ १२ **करस्ना**=बाहू, प्र०—करस्नौ बाहू कर्मणां प्रस्नातारौ, नि० ६ १४, ३ १८ ५. यौ करान् कर्त्तॄन् स्नापयत शोधयतस्तौ (गभस्ती=हस्तौ) ६ १६ ३ [करस्नौ बाहुनाम निघ० २ ४ करस्नौ बाहु कर्मणा प्रस्नातारौ नि० ६ १७ करोपपदे ष्णा शौचे (अदा०) धातो क प्रत्यय । 'सुपा सुलुगि' त्याकार]

करः य करोति स (विद्वज्जन) ६ १८ १४ [डुकृञ् करणे (तना०) धातोरच् प्रत्यय]

करा कुर्वाणौ (अध्यापकौ) १ ११६ १३

कराम कुर्य्याम, प्र०—अत्र विकरणव्यत्ययेन शप् १६ ६२ **करामहे**=कुर्याम, प्र०—अत्र लेटि व्यत्ययेन शप्, अथवा भ्वादिर्मन्तव्य ६ ५ [डुकृञ् करणे (तना०) धातोर्लेट् । विकरणव्यत्ययेन शप्]

करांसि करणीयानि कर्म्माणि ४ १६ १० [करम् कर्मनाम निघ० २ १ डुकृञ् करणे (तना०) धातोरसुन् प्रत्यय]

करिक्रत् भृश करोति ३.५८ ६ [डुकृञ् करणे (तना०) धातोर्यङ्लुगन्तस्य शतरि 'दाधर्त्तिदर्द्धर्ति०' अ० ७ ४ ६५ सूत्रेण निपातनादभ्यासककारस्य चुत्वाऽभावो रिगागमश्च निपात्यते]

करिक्रत् भृश कुर्वन् (इन्द्र.=जगदीश्वर) १ १३१ ३ **करिक्रतः**=येऽतिशयेन कुर्वन्ति (जना) १.१४० ५. [पूर्वपदे व्याख्यातम् । करिक्रत् कर्मनाम निघ० २ १]

करिष्यतः ये करिष्यन्ति तान् (देवान्=दिव्यान् गुणान्) ११.३ [डुकृञ् करणे (तना०) धातोर्लृट स्थाने 'लृट सद्वा' इति सूत्रेण शतरि रूपम्]

करिष्यथ करिष्यमाणं साधयिष्यथ १ १ ६८ **करिष्यसि**=करोषि, प्र०—अत्र 'वाच्छन्दसि सर्वे विधयो भवन्ति, इति लडर्थे लृट् १ १ ६ [डुकृञ् करणे (तना०) धातोर्लृट्]

करिष्यन् करूँगा ऐसी इच्छा करता हुआ (सन्यासीजन) स० वि० १६५, ६ ११३ १ [डुकृञ् करणे (तना०) धातोर्लृट स्थाने शतृ]

करिष्या कर्त्तु योग्यानि (कार्याणि), प्र०—अत्र 'सुपा सुलुग्०' इति डादेश १ १६५ ६

करिष्या करिष्यसि, प्र०—सिज्लोपो दीर्घश्चात्र छान्दस ३३ ७६

करुणस्य कृपामयस्य कर्मण १.१०० ७ करुणा करने वाले (ईश्वर) का, आर्याभि०, अथर्व० १२ ३ ४७ [कृ विक्षेपे (तुदा०) धातो 'कृवृदारिभ्य उनन्' उणा० ३ ५३. सूत्रेण उनन् प्रत्यय । करुणम् कर्मनाम निघ० २ १.]

करूळती य करूनूढा कामयते स करूळत सोऽस्याऽस्तीति (विद्वज्जन) ४ ३० २४

कर्कन्धु येन कर्म दधाति (मधु=विज्ञानम्) १६.६१ **कर्कन्धुभिः**=ये कर्क बदरीक्रिया दधति तैं (यवादिभिरन्नै) २१ ३२ **कर्कन्धुम्**=य कर्कान् कारुकानन्तति व्यवहारे बध्नाति तम् (वय्यम्=ज्ञातार विद्वासम्) १ ११२ ६ **कर्कन्धूनि**=कर्कन्धुफलानि स्थूलानि पक्वानि बदरीफलानीव १६ २३ [कर्क कण्टक दधातीति विग्रहे कर्कोपपदाद् डुधाञ् धारणपोषणयो (जु०) धातोर् 'अन्दूदृम्फू०' उ० १ ६३ सूत्रेण कू प्रत्यय । छान्दस ह्रस्वत्वम् । यस्येह-स्तत् कर्कन्धु श० १२ ७ १ ४]

कर्कन्धुरोहितः कर्कन्धुर्बदरीफलमिव रोहित- (पशु) २४ २ [कर्कन्धुरोहितपदयो समास । कर्कन्धु पूर्वपदे व्याख्यातम् । रोहित =रोहति प्रादुर्भवतीति विग्रहे रुह प्रादुर्भावे (भ्वा०) धातो 'रुहेरश्चलो वा' उ० ३.९४ सूत्रेण क्त प्रत्यय]

कर्करिः भृश कुर्वन् (उपदेशको जन) २४३ ३ कर्त्तव्य कर्म, धर्म को ही पुरुषार्थ से करता हुआ (ईश्वर) आर्याभि० १ ५३ ऋ० २ ८ १२ ३ [डुकृञ् करणे (तना०) धातोर्यङ्लुगन्ताद् बाहुलकाद् औणा० इ प्रत्यय]

कर्णम् श्रुतस्तुतिम् (सखायम्=सुहृद्वद्वर्त्तमानं पतिम्) २६ ४० **कर्णयोः**=श्रोत्रयो २१ ५० **कर्णः**=दीर्घकर्ण (गर्दभ =पशुविशेष) २४ ४० **कर्णाभ्याम्**=

काम्), प्र०—अत्र 'कर्मवेषाद्यत्' अ० ५ १.१०० इति कर्मशब्दात् सम्पादिन्यर्थे यत् ११ ५५ [कर्मण्यमिति व्याख्यातम्। तत स्त्रिया टाप्]

कर्मन् राज्यकर्मणि ११२१ ११ ['कर्म' इति व्याख्यातम्]

कर्मन्कर्मन् कर्मणि कर्मणि ११०२६. [कर्मन् पदस्य वीप्सायां द्वित्वम्]

कर्मभिः धर्म्याभि क्रियाभि २३ ३७ **कर्मसु**=कृष्यादिक्रियासु १० ३३ **कर्माणि**=जगत्सृष्टि-पालन-प्रलयकरणन्यायादीनि १३ ३३ सत्कर्मो को स० वि० १४५, ४.२. कर्त्तुरीप्सिततमानि क्रियमाणानि ३४ २ कर्त्तु योग्यानि, कर्त्तुरीप्सिततमानि १६११३ जगत् की उत्पत्ति-स्थिति-प्रलय आदि कर्मों को, आर्याभि० १ २३, ऋ० १.२७.१६ ['कर्म' इति पद व्याख्यातम्]

कर्मारम् य कर्माण्यलङ्करोति' तम् (सज्जनम्) ३०७ **कर्मारेभ्यः**=असि-भुशुण्डी-शतघ्न्यादिनिर्मातृभ्य (शिल्पिभ्य) १६ २७ [कर्मोपपदे ऋ गतौ (भ्वा०) धातोरण् प्रत्यय]

कर्वरम् कर्त्तव्य कर्म ६ २४ ५ [कर्वर कर्मनाम निघ० २ १ किरति विक्षिपतीति विग्रहे कॄ विक्षेपे (तुदा०) धातो 'कॄगॄ०' उ० २ १२१ सूत्रेण ष्वरच्प्रत्यय]

कर्ष विलिखति ५ ८३ ७ [कृष विलेखने (भ्वा०) धातोर्लडर्थे लोट्]

कर्हि कस्मिन् समये ६ ३५ २ कदा ५ ७४ १० [किम सर्वनाम्न सप्तम्यन्ताद् 'अनद्यतने र्हिलन्यतरस्याम्' अ० ५ ३ २१ सूत्रेण र्हिल्। किम कादेश]

कलविङ्कः चटक २४ ३१ **कलविङ्कान्**=चटकान् २४ २०

कलशम् घटम् १ ११७ १२. **कलशः**=कुम्भ ३ ३२ १५ **कलशे**=पात्रे ६ ४७ ६ [कलाशब्दोपपदात् शीङ् शये (अदा०) धातो 'अन्येष्वपि दृश्यते' अ० ३ २ १०१ सूत्रेणाधिकरणे ड. प्रत्यय। पूर्वपदस्य ह्रस्वत्वम्। कलश कस्मात्? कला, अस्मिञ्छेरते मात्रा। कलिश्च कलाश्च किरतेर्विकीर्णमात्रा नि० ११ १२]

कलशा कुम्भाविव ६ ६८ २. [पूर्वपदे व्याख्यानम्। 'सुपा 'सुलुगि'त्याकार']

कलिम् य किरति विक्षिपति, दु[illegible] न (मद्वैद्यम्), गणक वा १ ११२ १५ [क[illegible] किरतेर्विकीर्णमात्रा नि० ११.१२. कॄ वि[illegible]

धातो 'सर्वधातुभ्य इन्' उ० ४ ११८ सूत्रेण इन्। अथ ये पञ्च (स्तोमा) कलि स तै० १५ ११.१ रेफस्य ल वम्]

कल्पताम् समर्पितोऽस्तु १६ ४५. समर्थो भवतु १८ २६ समर्प्पयतु २२ ३३ समर्था भवतु २२ २२ समर्थताम् ६ २१ स्थिरा भवतु ऋ० भू० २७५ समर्पित भवतु ऋ० भू० १५४ प्रसिद्धो भवतु ऋ० भू० २७४

कल्पन्ताम्=समर्था भवन्तु ३५ ६ समर्थयन्ताम् १४.६ समर्थयन्तु १३ २५ सुखयुक्ता भवन्तु १० २८ भा०—स्वाभीष्टानि साधयन्तु १८ ७ **कल्पेताम्**=समर्थयत: १४ १५ समर्थयेताम् १४ ६. भा०—स्वस्वनियमेन समर्थौ भवेताम् १५ ५७ **कल्पस्व**=अध्यापनोपदेशाभ्या समर्थय ५ १० समर्थो भव ११७० २. **कल्पत्**=निवास कर स० वि० ६३, अथर्व० ११ ५ २६ **कल्पयन्ति**=कल्पना करते है स० वि० २०६, अथर्व० ६ ६ ७ समर्थित करते है, स० वि० २०६, अथर्व० ६ ६ ७ **कल्पयाति** कल्पयेत समर्थ कुर्यात्, भा०—सम्पादयेत् १६.६०. समर्थयेत १८ ३३ निष्पादयतु ऋ० भू० २६२ **कल्पयस्व**=समर्थयस्व २३ १५ [कृपू सामर्थ्ये (भ्वा०) धातोर्णिच्। कल्पते अर्चतिकर्मा निघ० ३ १४.]

कल्पमानः समर्थ सन् (ईश्वर) १३.४३. [कृपू सामर्थ्ये (भ्वा०) धातो शानच्]

कल्पयन्ती समर्थयन्त्यौ (प्राची=रोदसी) ५ १७. [कृपू सामर्थ्ये (भ्वा०) धातोर्णिजन्ताच्छत्रन्तात् ङीप्]

कल्पिनम् कल्प. प्रशस्त सामर्थ्यं विद्यते यस्य तम् (जनम्) ३० १८ [कल्पप्राति० प्रशसायाम् इनुप्रत्यय.। कल्प=कृपू सामर्थ्ये (भ्वा०) धातोर्घञ् प्रत्यय.]

कल्मलीकिनम् देदीप्यमानम् (नाग) प्र०—कल्मलीकिनमिति ज्वलतो नाम, निघ० १ १७, २ ३३.८

कल्माषग्रीवः जिसके हरित रंग वाले वृक्ष आदि ग्रीवा के समान है, वह (विष्णु=परमेश्वर), स० वि०, अथर्व० ३.२७ ५ [कल्माष-ग्रीवापदयो समास.। कल्माष=कालयति, कल्+विच्। त माषयति अभिभवतीति विग्रहे माष्+णिच्+अच्। कल्-माषपदयो समास। ग्रीवा गिरतेर्वा गृणातेर्वा गृह्णातेर्वा नि० २ २८]

कल्माषः श्वेतकृष्णवर्ण (पशु) २९.५८ [पूर्वपदे व्याख्यानम्]

कल्याण कल्याणकारक (सभास्वामिन्) १.३१.८. [कल्याण कमनीय भवति नि० ५.३.]

कल्याणीम् कल्याणानिमित्ताम् (वाचम

पदनाम, निघ० ५ ४ 'वाच्छन्दसि सर्वे विधयो भवन्ति, इति सर्वनाम-कार्यम् १२ १०२ आनन्दरूपाय (देवाय=परमात्मने) २३ ३ सुखदायक (देवाय=परमेश्वर) के लिए स० वि० ६, ३२ ६ **कः**=सुखस्वरूपो देव १ २४ १ प्रश्नार्थे ७ २६ कश्चिदेव १ ५४ ५ [क पदनाम निघ० ५ ४ छान्दसत्वात् सर्वनामकार्यम् । क कमनो वा, क्रमणो वा, सुखो वा, नि० १० २२ प्राणो वाव क जै० उ० ४ २३ ४ प्रजापतिरब्रवीदथ कोऽहमिति यदेवैतदवोच इत्यब्रवीत् ततो वै को नाम प्रजापतिरभवत् को वै प्रजापति ऐ० ३ २१ क=आदित्य नि० १३ २५ किम सर्वनाम्नो वा चतुर्थ्या एकवचनम्]

कः करोति ५ २९ ४ कुर्य्यात्, प्र०—अत्राऽडभावो 'मन्त्रे घस०' इत्यादिना च्लेर्लुक् १ १६२ २० कुर्य्या ७ ४३ ३ कुरु १ १६४ ४६ करोषि ७ २१ ३ [डुकृञ् करणे (तना०) धातोर्लुङ् । मन्त्रे घस०' इति च्लेर्लुक्, अटो ऽभावश्च]

काकवीरम् काकाना गोपकम् (वनस्पति=वटादिकम्) ६ ४८ १७

काकुत् सुशिक्षिता वाक्, प्र०—काकुदिति वाङ्नाम, निघ० १ ११, ६ ४१ २ **काकुदः**=वाच शब्दसमूह, प्र०—काकुदिति वाङ्नामसु पठितम्, निघ० १ ११, १ ८ ७ [काकुद् वाङ्नाम निघ० १ ११ काकुद तालु । काकुर्जिह्वा साऽस्मिन्नुद्यते । महाभाष्ये १ १ १]

काटे कटन्ति वर्षन्ति सकला विद्या यस्मिन्नध्यापने व्यवहारे तस्मिन् १ १०६ ६ [कटे वर्षावरणयो (भ्वा०) धातोरधिकरणे 'हलश्च' अ० ३ ३ १२१ सूत्रेण घञ्]

काट्याय काटेपु कूपेपु भवाय (भा०—कूपाना जलाय) प्र०—काट इति कूपनाम, निघ० ३ २३, १६ ३७ कटेष्वावरणेपु भवाय (जनाय) १६ ४४ [काट इति कूपनाम (निघ० ३ २३) ततो भवार्थे यत् । अथवा कटे वर्षावरणयो (भ्वा०) धातोर्घञर्थे क । ततो भवार्थेऽण् तद्धित]

काण्डात्काण्डात् ग्रन्थेग्रन्थे १३ २० [काम्यते जनैरिति विग्रहे कमु कान्तौ (भ्वा०) धातो 'क्वादिभ्य कित्' उ० १ ११५ सूत्रेण ड]

कानिष. कमनीयस्य (सहस=बलवतो जनस्य) ३ २८ ५ [कनी दीप्तिकान्तिगतिपु (भ्वा०) धातोर्बाहुलकादौणा० इसिन् प्रत्यय । बहुलवचनाद् वृद्धि]

कामदुघा. या कामान् दुहन्ति प्रपिपुरति ता (सत्यस्त्रिय) १७ ३ **कामदुघे !**=इच्छापूरिके (अ०—पाचिके स्त्रि) १२ ७२ [कामोपपदे दुहप्रपूरणे (अदा०) धातो 'दुह कब् घश्च' अ० ३ २ ७० सूत्रेण कप् प्रत्ययो घकारश्चान्तादेश । स्त्रियां टाप्]

कामधरणम् कामाना धरण स्थानम् ३ २७ सङ्कल्पानामाधरण स्थानम् १२ ४६ [काम-धरणपदयो समास । पशव कामधरणम् श० ७ १ १ ८]

कामप्रेणेव यत्काम प्राति पिपर्त्ति तेनेव (मनसा=अन्त करणेन) १ १५८ २ [कामोपपदे प्रा पूरणे (अदा०) धातो क । तत तृतीयैकवचनम् । कामप्रेण-इवपदयो समास । अमृत वै कामप्रम् श० १० २ ६ ४]

कामम् अभिलाषम् ३ ३० २० इच्छासिद्धिम् १ ८५ ११ य काम्यते तम् (अभिलाषम्) १ ५४ ६ इच्छापूर्त्तिम् ३९ ४ काम्यत इष्यते सर्वैर्जनैस्तम् (पशार्थाऽभिलाषम्) १ १६ ६ इच्छाम् १२ ७२ **कामस्य**=अभिलाषी पुरुष की स० वि० १९७, ९ ११३ ११ **कामः**=कमिता (विद्वज्जन) २ ३८ ६ कामनामभिलाषा कुर्वाण (प्रजाजन) ७ २० ६ काम्यते येन यस्मिन् वा (पश्वभिलाष) १८ ८ य काम्यते स (अग्नि=सभेशो जन) १२ ११७ कामना २६ २ कामयते य परमेश्वर, य काम्यते सर्वैर्योगिभि. स परमेश्वरो जीवो वा ७ ४८ **कामान्**=सङ्कल्पितान् (आकाश-काल-दिश) २० २३ भा०—इच्छा २० ६० **कामाय**=कामयमानाय जीवाय ७ ४८ विषयसेवनाय ३० ५ इच्छासिद्धये १२ ११६ **कामाः**=सब कामनाए स० वि० १९७, ९ ११३ ११ ये कामयन्ते (सेनाऽमात्यादिजना) ४ १६ १५ अभिलाषा १२ ४४ **कामेन**=इच्छया ७ १६ १० [कमु कान्तौ (भ्वा०) धातोर्घञ् । कामो हि दाता काम प्रतिग्रहीता तै० २ २ ५ ६ समुद्र इव हि काम । नैव कामस्यान्तोऽस्ति न समुद्रस्य तै० २ २ ५ ६ श्रद्धा कामस्य मातर हविषा वर्धयामसि तै० २ ८ ८ ८]

कामयाध्वे कामयध्वम् २ १४ ८ [कमु कान्तौ (भ्वा०) धातो 'कमेर्णिङ्' अ० ३ १ सूत्रेण स्वार्थे णिङन्ताल् लट् लोडर्थे]

कामिनम् कामाऽऽतुरम् (पतिम्) ५ ६१ ७ **कामिनः**=प्रशस्त कामो येषामस्ति तान् (जनान्) ५ ५३ १६ कामयितार (मरुत=मनुष्या) ७ ५९ ३. **कामी**=कामयितु शील (वीरपुरुष) ३ १४ १ [कमु कान्तौ (भ्वा०) धातोस्ताच्छील्ये णिनि । अथवा कामप्राति० प्रशसायाम् इन्]

काम्पीलवासिनीम् क सुख पीलति बध्नाति गृह्णातीति

वा, करोति यो येन वा स क्रतु, कविश्चासौ क्रतुश्च स (अग्नि =परमेश्वरो भौतिको वा), प्र०—कवि क्रान्तदर्शनो भवति कवतेर्वा, नि० १२ १३ य सर्वविद्यायुक्त वेदशास्त्र कवते उपदिशति स कविरीश्वर, क्रान्त दर्शन यस्मात् स सर्वज्ञो भौतिको वा क्रान्तदर्शन 'कृञ क्रतु' उ० १ ७६ अनेन कृञो हेतुकर्त्तरि कर्त्तरि वा कतु प्रत्यय १ १ ५ कवि (सर्वदृक्) सबको देखने वाला, क्रतु सब जगत् का जनक (ईश्वर) आर्याभि० १ ५, ऋ० १ १ १ ५ कवि सर्वज्ञ क्रान्तप्रज्ञ सर्वेषा जीवाना बुद्धे क्रमिता तदग्रे न कस्यापि बुद्धि क्रमते सर्वेषा बुद्धे प्रभुत्वात्, क्रतु सर्वजगत्कर्त्ता (ईश्वर) वे० भा० न० महान् विद्वान् ६ १६ २३ **कविक्रतो !**=कवीना क्रतुरिव क्रतु प्रज्ञा यस्य तत्सम्बुद्धौ (अग्ने=विद्वज्जन) ३ १४ ७ [कवि-क्रतुपदयो समास । कविरिति व्याख्यातम् । क्रतु = कर्मनाम निघ० २ १ प्रज्ञानाम निघ० ३ ९]

कविच्छदा यौ कवीन् विदुषश्छदयत ऊर्जयतस्तौ (इन्द्राग्नी=अध्यापकोपदेशकौ) ३ १२ ३ [कव्युपपदे छद अपवारणे (चु०) धातो छदिरूर्जने (भ्वा०) धातोर्वा मूलविभुजादित्वात् क प्रत्यय]

कवितमम् अतिशयेन मेधाविनम् (विद्वज्जनम्) ५ ४२ ३ **कवितमस्य**=अतिशयेन कवे (देवस्य=महाविदुष) ५ ८५ ६ **कवितम.**=विद्वत्तम (मेधाविजन) ७ ९ १ [कविरिति व्याख्यातम् । ततोऽतिशायने तमप्]

कविप्रशस्त. कविभि प्रशसनीय कविभि प्रशस्तो वा (अतिथिर्जन) ५ १ ८ [कवि-प्रशस्तपदयो समास]

कविशस्त: कविभि विद्वद्भि प्रशसित (अग्नि = सत्पुरुष) ३ २१ ४ **कविशस्ता:**=कविभि मेधाविभि शस्ता प्रशसिता अध्यापिता वा (मन्त्रा =वेदस्य श्रुतयो विचारा वा) ६ ५० १४ [कवि-शस्तपदयो समास । शस्त =शसु स्तुतौ (भ्वा०) धातो क्त प्रत्यय । कविशस्ता मेधाविशस्ता नि० १२ ३३]

कवीयमान: अतीव विद्वान् (मनुष्य) १ १६४ १८ [कविपदाद् आचारेऽर्थे क्यङि शानच्]

कव्यता कव्य कवित्व तन्यते यया तया (निविदा= वेदवाचा) १ ९६ २ [कविप्राति० 'तत्र साधु' रित्यर्थे यत् प्रत्यये कव्यम् । तदुपपदे तनु विस्तारे (तना०) धातोर् 'अन्येष्वपि दृश्यते' इति ड प्रत्यय । स्त्रियां टाप्]

कव्यवाहन ! य कविषु साधूनि वस्तूनि वहति प्रापयति तत्सम्बुद्धौ (अग्ने=अग्निरिव) प्रकाशमान विद्वज्जन) १९ ६४ कवीना प्रागल्भ्यानि कर्माणि प्राप्त (अग्ने=विद्वन् पुत्र) १९.६६ **कव्यवाहन:**=य. कव्यानि कवीना प्रशस्तानि कर्माणि प्रापयति स (अग्नि =विद्वज्जन) १९ ६५ **कव्यवाहनाय**=कुवन्ति शब्दयन्ति सर्वा विद्या ये ते कवय क्रान्तदर्शना क्रान्तप्रज्ञाश्च तेभ्यो हितानि कर्माणि कव्यानि तानि यो वहति प्रापयति तस्मै, भा०—शिल्पिना कार्यवाहनाय (अग्नये=भौतिकाय) २ २९ [कविप्राति० साध्वर्थे हितार्थे वा यत् प्रत्यये कव्यम् । तदुपपदे वह प्रापणे (भ्वा०) धातोर्णिजन्ताद् 'अन्येभ्योऽपि दृश्यते' अ० ३ ३ १३० सूत्रेण युच् प्रत्यय]

कव्या कवय, प्र०—अत्र 'सुपा सुलुग्०' इति विभक्तेड्यदिश २२ २

कशया ताडनसाधनेन २५ ४० गत्या शिक्षया वा १ १५७ ४ ताडनार्थरज्ज्वा ५.८३ ३ प्रेरकया (वेत्रेण) १ १६२ १७ शासनेन गत्या वा १ १६८ ४ **कशा**=वाणी, प्र०—कशेति वाङ्नामसु पठितम्, निघ० १ ११, ७ ११ **कशा:**=चेष्टासाधनरज्जुवन्नियमप्रापिका क्रिया १ ३७ ३ वाक् १ २२ ३ [अश्वाजनी कशेत्याहु । कशा प्रकाशयति भयमश्वाय । कृष्यतेर्वाणूभावात् । वाक् (कशा) पुन प्रकाशयत्यर्थान् । खशया, क्रोशतेर्वा नि० ९ १९ वाङ्नाम निघ० १ ११]

कश: शासनीय (जन्तुविशेष) २४ ३८. **कशान्**= पक्षिविशेषान् २४ २६ [कश जलम् निघ० १ १२]

कशीकेव यथा ताडनार्था कशीका १ १२६ ६

कशोजुवम् कशास्युदकानि जवयति गमयति तम् (सेनापतिम्) प्र०—कश इत्युदकनाम, निघ० १ १२, १ ११२ १४. [कश इत्युदकनाम (निघ० १ १२), तदुपपदे जु गतौ (सौत्रो धातु) धातो 'अन्येभ्योऽपि दृश्यते' अ० ३ २ १७८ सूत्रेण क्विप्]

कश्चन कश्चिदपि ६ ४७ १

कश्यपस्य आदित्यस्येश्वरस्य, प्र०—प्रजापति प्रजा असृजत यदसृजताकरोत् तद्यदकरोत् तस्मात् कूर्म, कश्यपो वै कूर्मस्तस्मादाहु, सर्वा प्रजा काश्यप्य इति, श० ७ ४ १ ५ अनेन प्रमाणेनेश्वरस्य कश्यपसज्ञा, एतन्निर्मित त्रिगुणमायुर्लभेमहीत्यभिप्राय ३ ६२ प्राणस्य ऋ० भू० ८१ **कश्यप:**=कच्छप २४ ३७ जीव स० वि० २७

कस्मै सुखकारकाय (देवाय=परमेश्वराय) २५ १० सुखस्वरूपाय (देवाय=कमनीयाय सवितृलोकाय) २५ १२ सुखस्वरूपाय सुखकारकाय (देवाय=ईश्वराय) प्र०—क इति

कारोतरेण=कूपेनेव प्र०—कारोतर इति कूपनाम, निघ० ३ २३, १६ ८२ **कारोतरात्**=कारान् व्यवहारान् कुर्वत शिल्पिन 'उ इति वितर्के' तरति येन तस्मात् (शफात्=खुरादिव जलमेवस्यानात्) १.११६ ७ [कार+उ+तृ प्लवनसंतरणयो (भ्वा०) धातोरप् प्रत्यय । कारोतर कूपनाम निघ० ३ २३ कारोतरात् इति कूपनाम निघ० ३ २३]

कार्षिः कर्षति हलेन भूमिमिति (वैश्यो जन), प्र०—अत्र 'इञ् कृष्यादिभ्य' अ०—३ ३ १०८ इतीञ् प्रत्यय ६ २८ [कृष विलेखने (भ्वा०) धातोरिञ्प्रत्यय । 'कृषेर्वृद्धिश्छान्दसे' उ० ४ १२७ सूत्रेण वा इञ्प्रत्यय]

कार्ष्णम् मृगचर्मादिकम् ऋ० भू० २३७ मृग-चर्मादि स० वि० ८०, अथर्व० ११ ५ ६ [कृष्णप्राति० अवयवे विकारे चार्थेऽण् प्रत्यय । कृष्ण =कृष विलेखने (तुदा०) धातो 'कृषेर्वर्णे' उ० ३ ४. सूत्रेण नक् । कृष्ण कृष्यतेनिकृष्टो वर्ण नि० २ २१]

कार्ष्मेव यथा काष्ठादिक द्रव्यम् १ ११६ १७ [कार्ष्म-इवपदयो समास]

कालका पक्षिविशेष २४ ३५

काव्यम् कविभिर्निर्मितम् १५ ४ कविभि कमनीयम् (वच) ५ ३९ ५ **काव्ययोः**=कविभिर्विद्वद्भिर्निर्मितयोर्व्यवहार-परमार्थप्रतिपादकयोर्ग्रन्थयो ३३ ७२ **काव्यस्य**=कवे कर्मण १ ११७ १२ **काव्यः**=कवेर्मेधाविन पुत्र १.१२१.१२. यथा कवे पुत्र शिष्यो वा १.८३ ५ **काव्या**=कविभिर्विद्वद्भिर्निर्मितानि (काव्यानि) ४ ११.३ कवीना मेधाविना कर्म्माणि ५.५६.४. कवे =क्रान्तप्रज्ञस्य कर्माणि २.५.३ वेदस्तोत्राणि १ ७२ १ **काव्यानि**=कविभि क्रान्तप्रज्ञैर्विद्वद्भिर्निर्मितानि (सर्व-शास्त्राणि) ३.१ १८ **काव्याय**=कविभि. सुशिक्षिताय (स्नानकाय) ६.२० ११ **काव्येन**=कविना मेधाविना निर्मितेन शास्त्रेण ३.३६.५. **काव्यैः**=कविभि परम-विद्वद्भिर्धार्मिकैर्निर्मितै (दसनाभि =कर्मभि) १०.३४. [कविप्राति० भावे कर्मणि च ष्यञ् ब्राह्मणादित्वात् । त्रयी वै विद्या काव्य छन्द श० ८ ५ २ ४ ऊमा वै पितर प्रात सवने ऊर्वा माध्यन्दिने, काव्यास्तृतीयसवने ऐ० ७ ३४]

काशि. न्यायविनयादिशुभगुणप्रदीप्ति २ ३० ५. [काशृ दीप्तौ (भ्वा०) धातो 'इञ् कृष्यादिभ्य' इति वार्तिकेन इञ् । काशिर्मुष्टि प्रकाशनात् नि० ६.१. काशृ दीप्तौ (भ्वा०) धातो. 'सर्वधातुभ्य इन्' उ० ४ ११८ सूत्रेण इन् प्रत्यय]

काष्ठाम् दिशम् ६ १३ **काष्ठासु**=दिक्षु ३८ ३७ **काष्ठाः**=दिश प्रति १ ६३ ५ सङ्ग्रामप्रदेशान्, प्र०—काष्ठा इति सङ्ग्रामनाम निघ० २ १७, १८ ६५ दिश इव नदी ४ ५८ ७ दिश-स्तम्भ्या प्रजा ९ ५६ ६ [काशृ दीप्तौ (भ्वा०) धातो 'हनिकुषिनी०' उ० २ २ सूत्रेण क्थन् प्रत्यय स्त्रिया टाप् । काष्ठा दिङ्नाम निघ १ ६ तत्र काष्ठा इत्येतदनेक यापि तत्वस्य नाम भवति । काष्ठा दिशो भवन्ति क्रान्त्वा स्थिता भवन्ति, काष्ठा उपदिशो भवन्तीतरेतर क्रान्त्वा स्थिता भवन्ति, आदित्योऽपि काष्ठोच्यते क्रान्त्वा स्थितो भवति, आज्यन्तोऽपि काष्ठोच्यते क्रान्त्वा स्थिता भवन्तीति स्थावरणाम् नि० २ १५ सुवर्गो वै लोक काष्ठा तै० १ ३ ६ ५]

किकिदीविना कि कि ज्ञान दीव्यति ददाति दर्शनेन (चापेण=भक्षणेन), प्र०—कि ज्ञाने. इत्यस्मादौणादिके सन्वति डौ कृते किविस्तदुपपदाद् दिवु धातोरौणादिक किर्बाहुलकाद् दीर्घश्च १० ८७ [किकिना शब्देन दीव्यतीति विग्रहे 'किकि' इत्युपपदे दिवु क्रीडादिषु (दिवा०) धातो कृविघृष्विछविं०' उ० ४ ५६ सूत्रेण क्विन् प्रत्ययान्तो निपात्यते]

किकिरा विकीर्णानि (हृदयानि) ६ ५३ ८ व्यवस्था-पत्राणि ६.५३ ७

किञ्च किञ्चिदपि (पाप पुण्यं वा) १ २३.२२

किञ्चन किञ्चिदपि (कर्म्म) ३४ ३ कुछ भी (कर्म) स० प्र० २४७, ३४ ३

कितवम् द्यूतकारिणम् (पापि-जनम्) २ २९.५ **कितव**=द्यूतशील (दुर्जन.) ३०.२२ [कितव किं तवास्तीति शब्दानुकृति , कृतवान् वाशीर्नामिक नि० ५ २२]

कितवासः द्यूतकारा (छलिनो जना) ५.८५ ८ [कितव इति पूर्वपदे व्याख्यातम् । ततो जसोऽसुगागम]

किन्त्वः किमसौ किमन्यो वा २० २८

किम् प्रश्ने १७ १८ कुछ (जगत्), स० प्र० २३८ ४० १.

किम्पूरुषम् जाङ्गल कुत्सित मनुष्यम् ३०.१६ [किम्पुरुषपदयो समास । सहिताया दीर्घ । अथैनमुत्क्रान्तमेध (पुरुष देवा.) अत्यार्जन्त स किम्पुरुषोऽभवत् ऐ० २ ८. किम्पुरुषो वै मयु श० ७.५ २ ३२]

किम्मयः य किं मिनोति स (चमस =यज्ञपात्रम्)

कम्पील, स्वार्थेऽण्प्रत्यये काम्पील, त वासयितु शीलम-स्यास्ता लक्ष्मीम् २३ १८ [काम्पीलोपपदे वस निवासे (भ्वा०) धातोस्ताच्छील्ये णिन्यन्तान् ङीप्। काम्पील = कम्=सुखम्, तदुपपदे पील प्रतिष्टम्भे (भ्वा०) धातोरण्। कम्पीलप्राति० प्रज्ञादित्वात्स्वार्थेऽण् प्रत्यय]

काम्यम् कमनीयम् (परमेश्वरम्) ३२ १३ प्रियम् (राध =धनम्) २ २२ ३ कामना के योग्य ईश्वर को, आर्याभि० २ ५२, ३२.१३ **काम्या:**=काम्यन्ते इष्यन्ते ये पदार्थास्ते ३ २७ कमनीया (सखाय =सुहृद) ३ ३१ १७ [कमु कान्तौ (भ्वा०) धातोर्ण्यत् काम्यानि उदकानि नि० ११ ३३]

काम्या कमनीयौ (हरी=हयौ) २३ ६ कमनीयानि (वसूनि=धनानि) ५ ६१ १६ कामयितव्यौ (रथे=याने) १ ६ २ कमनीये (कर्मणी), प्र०—अत्र 'सुपा सुलुग्' इति द्विवचनस्याऽऽकारादेश १ ८ १० [कमु कान्तौ (भ्वा०) धातोर्ण्यत्। तत प्रथमा द्विवचनस्याकारादेश। बहुवचने तु 'शेश्छन्दसि बहुलम्' इति शेर्लोप]

काम्ये ! हे कमनीये (पत्नि) ८ ४३ [कमु कान्तौ (भ्वा०) धातोर्ण्यत्। स्त्रिया टाप्। सम्बुद्धौ रूपम्]

काम्यै कामयितव्यैरुत्तमै (गणै =किरणैर्मरुद्भिर्वा) १ ६ ८ [कमु कान्तौ (भ्वा०) धातोर्ण्यत्]

काय सुखसाधकाय विदुषे (सज्जनाय) २२ २० को ब्रह्म देवता यस्य वेदमन्त्रस्य तस्मै २० ४ सुखस्वराज्य-प्रदाय (ईश्वराय) ऋ० २१८ [क कमनो वा क्रमणो वा सुखो वा नि० १० २२ ततश्चतुर्थी। 'सास्य देवता' 'कस्येत्' इति प्राप्तोऽण् न भवति छान्दसत्वात्]

कायमान: अध्यापयन्नुपदिशन् वा (अग्नि =आप्ता-ऽध्यापक उपदेशको वा) ३ ६ २ [कायमान चायमान, कामयमान इति वा नि० ४ १४]

काया: प्रजापतिदेवताका (पश्वादिप्राणिन) २४ १५ [को वै प्रजापति ऐ० ३ २१ तत 'सास्य देवतेत्यर्थे' 'कस्येत' अ० ४ २ १५ सूत्रेणाण् प्रत्यय। इकारश्चान्तादेश]

कारम् कुर्वन्ति यस्मिंस्तम् (विद्युदग्निम्) १ ११२ १. क्रियते यस्तम् (नद्य=नदीम्) १ १३१ ५ कर्त्तारम् (राजानम्) ५ २६ ८ शिल्पकृत्यम् ४ १ १४ **कारे**= कर्त्तव्य-व्यवहारे १ १४१ १० [डुकृञ् करणे तना० धातोर्घञ् प्रत्यय। कर्तरि तु छान्दसत्वादण् निरुपपदेऽपि]

कारव. कारुका शिल्पिन ३ ६ १ ये कार्याणि कुर्वन्ति ते (शिल्पिनो जना) १ ११ ६ कारुकरा (नर =नायका जना) ६ ४६ १ कर्त्तार (शिल्पिन) २७ ३७ **कारुम्**= शिल्पकार्यकर्त्तारम् (जनम्) १ १०२ ६ य उत्साहेनोत्तमानि कर्माणि करोति तम् (शिल्पिन जनम्) १ ३१ ८ **कारु:**=शिल्पकार्यसाधिका (मेधा=प्रज्ञा) १ १६५ १४. स्तुत्याना शिल्पकर्मणा कर्त्ता (इन्द्र =विद्वज्जन), प्र०— कारुरहमस्मि स्तोमाना कर्त्ता, नि० ६ ६, १ ८३ ६ **कारू**=शिल्पिनौ, प्र० भा०—कारु-शब्दे द्विवचन-मध्यापकहस्तक्रिया-शिक्षकाऽभिप्रायम् २६ ३२ शिल्पविद्या-कुशलौ पुरुषार्थिनौ (स्त्रीपुरुषौ) ७ २ ७ **कारो** !=य करोति तत्सम्बुद्धौ (मज्जन) ३ ३३ ८ **कारो:**=कर्त्तु शीलस्य (शिल्पजनस्य) १ १७८ ३ पुरुषार्थिन (शिल्पिन) १ १६५ १५ शिल्पविद्याविद (जनस्य) ३४ ४८ शिल्प-विद्यासाध्यकर्त्तु (विदुषो जनस्य) १ १४८ २ कारकरस्य शिल्पिन (जनस्य) ३ ३६ ७ क्रियाकुशलस्य (जनस्य) १ १६८ १० सर्वस्य सुखकर्त्तु (शिल्पिजनस्य) १ १६७ ११ कारकस्य (शिल्पिन) १ १७७ ५ [कारु =स्तोतृनाम निघ० ३ १६ कारुकर्त्तारी नि० ८ १२ कारुरहमस्मि कर्त्ता स्तोमानाम् नि० ६ ५ डुकृञ् करणे (भ्वा०) धातो 'कृवापाजि०' उ० १ १ सूत्रेण उण् प्रत्यय]

काराधुनीव कारान् शब्दान् धूनयतीव (वात इव) १ १८० ८ [कारोपपदे धूञ् कम्पने (स्वा०) धातोर्बाहुलका-दौणादिको नि प्रत्यय। धुनि=धुनोते नि० ५ १२ काराधुनि-इवपदयो समास]

कारिण: कर्त्तु शीला (विद्वासो जना) ३ ५४ १४ [डुकृञ् करणे (तना०) धातोस्ताच्छील्ये णिनिश्छान्दसत्वान् निरुपपदादपि]

कारिम् उपहासकर्त्तारम् (दुर्जनम्) ३० ६ विक्षेपकम् (जनम्) ३० २० [डुकृञ् करणे (तना०) धातो, कॄ विक्षेपे (तुदा०) धातोर्वा 'इञ् कृष्यादिभ्य' इति वार्त्तिकेन इञ्]

कारिषत् कुर्य्यात् ६ ४८ १५ [डुकृञ् करणे (तना०) धातोर्लेट्। 'सिब् बहुल लेटी' ति सिपि, तस्य णित्वाद् वृद्धि]

कारुधाय: कारुणा विदुषा धर्त्त (इन्द्र=न्यायेश विद्वन्) ६ २१ ८ **कारुधाया:**=य कारून् शिल्पिनो दधाति स (इन्द्र =अधिष्ठाता जीव) ३ ३२ १० कारुणा शिल्पिना धारक (इन्द्र =राजा) ६ ४४ १५ विदुषा शिल्पिना धारयिता (इन्द्र =विद्युत्) ६ ४४ १२ कारवो ध्रियन्ते येन स (राजा) ६ २४ २ [कारूपपदे डुधाञ् धारणपोषणयो (जु०) धातोरसुण् प्रत्यय]

कारोतर: कर्मकारी (भिषक्=वैद्य) १६ १६.

दीर्घो बाहुलकात् १ ३१ १३ [कीर्गिरिति व्याख्यानम्। स्तोतृनाम निघ० ३ १६]

कीर्तिः सद्गुणग्रहणार्थमीश्वरगुणानामुपदेशार्थं कीर्तनं स्वमत्कीर्तिमत्त्व च, ऋ० भू० १०३, अथर्व० १२ ५ ६ सत्याचरण से प्रशंसा, य० वि० १०५, अथर्व० १२ ५ ६ [कृत संशब्दने (चुरा०) धातो 'इपिषिकिभ्य०' उ० ४ ११६ सूत्रेण इन्-प्रत्यय]

कीर्तेन्यम् कीर्तितुम् १ ११६ ६ कीर्तनीयम् (नाम=प्रसिद्ध कर्म) १ १०३ ४ कीर्तनीयमत्यन्तप्रशंसनीयम् (सामर्थ्यम्) ऋ० भू० १६३ [कृत संशब्दने (चुरा०) धातो 'कृत्यार्थे तवैकेन्केन्यत्वन' उ० ३ ४ १४ सूत्रेण केन्य]

कीलालपे य कीलालमन्नरस पिबति तस्मै (अग्नये=जनाय) २० ७८ [कीलालमित्यन्ननाम निघ० २ ७ तदुपपदे पा पाने (अदा०) धातो 'गापोष्टक्' अ० ३ २ ८ इति टक्]

कीलालम् सुसंस्कृतमन्नम्, प्र०—कीलालमित्यन्ननामसु पठितम्, निघ० २ ७, २ ३४ **कीलालः**=विशेषेणोत्तमरस, ऋ० भू० २४० उत्तमाज्यादिपदार्थसमूह, भा०—भक्ष्य-भोज्य-लेह्य-चूष्य पदार्थ ३ ४३ उत्कृष्ट रस आर्याभि० २ ४६, ३ ४३]

कीवत कियत (दुर्जनान्), प्र०—अत्र वर्णव्यत्ययेन य-य स्थाने व ३ ३० १७ [किम्सर्वनाम्न परिमाणे वतुप् प्रत्यये 'किमिदभ्या वो घ' इति वकारस्य घकार । 'इदकिमोरीश्की' इति की-आदेशे 'यस्येति च' लोपे, वर्णव्यत्ययेन यस्य वकारे इकारस्य च छान्दसदीर्घत्वे रूपम्]

कीस्तासः मेधाविन (विद्वज्जना), प्र०=कीस्तास इति मेधाविनाम, निघ० ३ १५, ६ ६७.१०

कुकूननानाम् भृश शब्दविद्यया नम्राणाम् (पत्नीनाम्), प्र०—अत्र 'कुङ् शब्दे' इत्यस्माद् यङि गुणाऽभावेऽभ्यस्त कुकूयपदान्नमधातोर्गौणादिको नक्प्रत्ययश्च, तत षष्ठीबहुवचनम् ८ ४८]

कुक्कुटः कुक परद्रव्याऽऽदानार चोर शत्रु वा कुटति येन स यज्ञ १ १६ [कुक आदाने (भ्वा०) धातो क्विप् प्रत्यये कुक्। कुक् इत्युपपदे कुट कौटिल्ये (तुदा०) धातोर्बाहुलकात् औणा० क्विप्]

कुक्षयः उभयत उदराऽवयवा ३ ३६ ८ **कुक्षिः**=कुष्णाति निष्कर्षति सर्वपदार्थेभ्यो रस य (इन्द्र=सूर्यलोक), प्र०—अत्र 'प्लुषिकुषिशुषिभ्य क्सि' उ० ३ १५३ अनेन कुषधातो क्सि प्रत्यय १ ८ ७ **कुक्षी**=उदरपार्श्वौ २ ११ ११ [कुष निष्कर्षे (क्या०) धातो 'प्लुषिकुषिशुषिभ्य क्सि' उ० ३ १५५ सूत्रेण क्सि]

कुचर. य कुत्सित चरति स (मृग=सिंह) १ १५४ २ य कुत्सिता गति चरति स (मृग=मृगेन्द्र सिंह) १८ ७१ य कुत्सित प्राणिवध चरति (मृग=सिंह) ५ २० [कूपपदे चर गतौ (भ्वा०) धातो 'चरेष्ट' अ० ३ २ १६ सूत्रेण ट प्रत्यय । कुचर चरति कर्म कुत्सितम्। अथ चेद्देवताभिधान क्वाय न चरतीति नि० १ २०]

कुटरु. कुक्कुट २४ ३६ **कुटरून्** कुक्कुटान् २४.१३ [कुट कौटिल्ये (तुदा०) धातो 'कुट किच्च' उ० ४ ८० सूत्रेणारु]

कुटस्य कुटिलस्य मार्गस्य मरणात् १.१६४ [कुट कौटिल्ये (तुदा०) धातोर्वज्रार्थे क । कुटस्य कृतस्य कर्मण नि० ५ २४.]

कुणारम् शब्दयन्तम् (वृत्र=मेघम्), प्र०—अत्र 'क्वणशब्दे' इत्यस्माद्धातोर्बाहुलकादौणादिक आर प्रत्यय १८ ६६ शब्दायमानम् (वृत्र=मेघम्) ३ ३० ८ [कुणारं परिक्वणन मेघम् नि० ६ १]

कुण्डृणाची वनचरी (पशु जाति.) २४ ३३ **कुण्डृणाच्या**=यया कुटिला गतिमञ्चति प्राप्नोति तया (गत्या) १ २९ ६]

कुतः कस्माद् १ १३६ १ [किम सर्वनाम्न पञ्चम्यन्तात् तसिल्]

कुत्र कस्मिन् ५ ७ २ [किम सर्वनाम्न सप्तम्यन्तात् त्रल् । 'कु तिहो' रिति किम कुरादेश]

कुत्सम् वज्रायुधयुक्तम् (नर्य=नृषु साधु जनम्), १ ११२ ६ वज्रम् ४ २६ १ वज्रमिव दृढम् ६ १८ १३ विद्युतमिव वज्रम् ७ १६ २ वज्रादिशस्त्रसमूहम् १ ५१.६ कुत्सितम् ५ ३१ ८ सायणाचार्येणाऽत्र भ्रान्त्या कुत्सगोत्रोत्पन्न ऋषिर्गृहीतोऽसम्भवादिद व्याख्यानमशुद्धम् १.३३ १४ **कुत्सस्य**=अवक्षेप्तु (प्रजापते) २ १४ ७ **कुत्सः**=विद्यावज्रयुक्तश्छेत्ता पदार्थाना भेत्ता वा (ऋषि=अध्यापकोऽध्येता वा), प्र०—कुत्स एतत्कृन्ततेः ऋषि कुत्सो भवति, कर्ता स्तोमानामित्यौपमन्यवोऽत्राप्यस्य वधकर्मैव भवति, निरु० ३ ११, १ १०६ ६ निन्दित (श्वित्रजन) ४ १६ १० **कुत्साय**=शस्त्राऽस्त्रयुक्ताय (जनाय) ४.३० ४ कुत्स प्रशस्तो वज्र शस्त्र-

४ ३५ ४ [किमुपपदे मिञ् प्रक्षेपणे (स्वा०) धातोरच् प्रत्यय । आत्वाऽभावश्च छान्दस]

कियते अल्पसामर्थ्याय (विद्यार्थिजनाय) ४ ५ ६ [किम् प्राति० परिमाणे 'किमिदम्भ्या वो घ' अ० ५ २ ४० सूत्रेण वतुप् वस्य घादेशश्च । घस्येयादेश]

कियेधाः य कियतो धरति स प्र०—अत्र पृषोदरा० इति तत्स्थाने इकार (सूर्य) १ ६१ ६ कियतो गुणान् धरतीति (सभाद्यध्यक्ष) १ ६१ १२ [कियेधा कियद्धा इति वा क्रममाणधा इति वा नि० ६.२० । कियदुपपदे डुधाञ् धारणपोषणयो (जु०) धातोरच् प्रत्यय । पृषोदरादित्वात् तस्य स्थाने इकार]

किर विक्षिप ६ ४६ २ प्रापय २७ ३८ **किरते**=विकिरति ५ ३८ ७ **किरामि**=विक्षिपामि ५ २३ प्रक्षिपामि ५ २३ [कॄ विक्षेपे (तुदा०) धातोर्लोट् । अन्यत्र लट्]

किरणम् ज्योति ४ ३८ ६ दीप्तिम् ५ ५६ ४ **किरणाः**=कान्तय १ ६३ १ [किरति विक्षिपत्यन्धकारमिति विग्रहे कॄ विक्षेपे (तुदा०) धातो 'कॄपॄवृजि०' उ० २ ८१ सूत्रेण क्यु प्रत्यय । किरणा रश्मिनाम निघ० १ ५ अश्वरश्मि तेषा (रश्मिवाचिशब्दानाम्) आदित साधारणानि पञ्च (खेदय, किरणा, गाव, रश्मय, अभिशव) अश्वरश्मिभि नि० २ १५]

किरातम् जनविशेषम् ३० १६ [किर पर्यन्तभूमिम् अतति गच्छतीति विग्रहे किरोपपदात् अत सातत्यगमने (भ्वा०) धातोरच्]

किरिकेभ्यः विक्षेपकेभ्य (जनेभ्य) १६ ४६ [कॄ विक्षेपे (तुदा०) धातो 'कॄगॄशॄ०' उ० ४ १४३ सूत्रेण इ प्रत्यय, तत स्वार्थे क । एते (किरिका) हीद सर्व कुर्वन्ति श० ६ १ १ २३]

किर्मिरम् कर्बुरवर्णम् (पुरुषम्) ३० २१

किल निश्चयाऽर्थे ६ ४७ १ खलु १२ ७६ [किल विद्याप्रकर्षे नि० १ ५]

किलासम् ईषच्छ्वेतवर्णम् (पुरुषम्) ३० २१

किलास्यः निश्चितमास्य यस्य स (विद्वज्जन) ५ ५३ १ [किल-आस्यपदयो समास]

किल्विषम् स्वाऽन्त स्थ मलम् ३५ ११ किल्विषात्=पापात् ५ ३४ ४ [किलति क्रीडति विचारशून्यतया कार्येषु प्रवर्त्तते येनेति विग्रहे किल श्वैत्ये (श्वैत्यक्रीडनयोरिति मैत्रेय) (तुदा०) धातो 'किलेर्बुक् च' उ० १ ५० सूत्रेण टिषच् प्रत्यय । किल्विष किलमिद सुकृतकर्मणो भय कीर्तिमस्य भिनत्तीति वा नि० ११ २४]

कियुः आत्मन किमिच्छु (विप्र=मेधाविजन), प्र०—अत्र 'वाच्छन्दसि' इति क्यच्-प्रतिषेधो न ३ ३३ ४ [किम्-सर्वनाम्न इच्छाया क्यचि 'क्याच्छन्दसी' त्युप्रत्यय]

किंशिलाय किं कुत्सित शिलो वृत्तिर्यस्य तस्मै (जनाय) १६ ४३ [किम्-शिलपदयो समास]

किस्वित् क्वा ? आर्याभि० २ ३२, १७ १८

कीकटेषु अनार्यदेशनिवासिषु म्लेच्छेषु ३ ५३ १४. कीकटा नाम देशोऽनार्यनिवास । कीकटा किंकृता, किं क्रियाभिरिति प्रेप्सा वा नि० ६.३२]

कीकसा भृश गामनानि २५ ६ [कङ्कते चञ्चल भवतीति विग्रहे ककि गतौ (भ्वा०) धातोर्बाहुलकाद् (उ० ३ ११७) असच् प्रत्यय । धातोश्च कीकादेश]

कीनाशम् कृषीवलम् ३० ११ **कीनाशाः**=ये श्रमेण क्लिश्यन्ति ते कृषीवला, भा०—चतुरा कृषिकारा (जना), प्र०—अत्र 'क्लिशेरीच्चोपधाया कन्-लोपश्च लो नाम् च' उ० ५ ५६ क्लिशधातो कनि प्रत्यये ललोप उपधाया ईत्व धातोर्नामागमश्च १२ ६९ [क्लिशू विबाधने (क्र्या०) धातो 'क्लिशेरीच्चोपधाया०' उ० ५ ५६ सूत्रेण कन् प्रत्ययादिकार्याणि]

कीरये स्तावकाय (जनाय) ६ २३ ३ [कीरि स्तोतृनाम निघ० ३ १६ कॄ विक्षेपे (तुदा०) धातो 'कॄगॄपॄकुटि०' उ० ४ १४३ सूत्रेण इ प्रत्ययो बाहुलकाद् धातोर्दीर्घश्च]

कीरिचोदनम् कीरीणा विद्यार्थिना प्रेरकम् (विद्वत्तम जनम्) ६ ४५ १९ [कीरि स्तोतृनाम निघ० ३ १६ चोदनम्=चुद सञ्चोदने (प्रेरणे) (चुरा०) धातोर्बाहुलकाद् औणा० ल्युन् । ततस्तयो समास]

कीरिणः विक्षेपका (तायव=स्तेना) ५ ५२ १२ [कॄ विक्षेपे (तुदा०) धातोर्बाहुलकाद् इनि प्रत्यय]

कीरिणा सकलविद्यास्तावकेन (जनेन), प्र०—कीरिरिति स्तोतृनाम, निघ० ३ १६, ५ ४० ८ शत्रूणा विक्षेपकेन प्रबन्धेन ११०० ६ **कीरि.**=स्तोता विद्वान् (जन) ६ ३७ १ मद्य स्तोता (सज्जन) ७ २१ ८ **कीरेः**=सकलविद्यास्तोतु (विद्वज्जनस्य) २ १२ ६ किरति विविधतया वाचा प्रेरयतीति कीरि स्तोता तस्मात् (सज्जनात्), प्र०—अत्र 'कॄ विक्षेपे' इत्यस्मात् 'कॄगॄपॄकुटि०' उ ४ १४३ अनेन इ-प्रत्यय, स च किदुर्वस्य च

१६ २७ [कालति सङ्घातयतीति विग्रहे कुल सस्त्याने (सघाते) बन्धुपु च (भ्वा०) धातो 'तमिविशि०' उ० १ ११८ सूत्रेण कालन् प्रत्यय]

कुलिश वज्रम्, प्र०—कुलिश इति वज्रनाम, निघ० २ २०, ३ २ १ [कुलिश =कूलशातनो भवति नि० ६ १७]

कुलिशी कुलिशेन वज्रेणाऽभिरक्ष्या (वीरपत्नी) १ १०४ ४ [कुलिश इति वज्रनाम निघ० २.२० ततो मत्वर्थे इनि प्रत्यय]

कुलीका: पक्षिणीविशेषा २४ २४

कुलीपय: जलजन्तुविशेष २४ ३५

कुलुङ्ग: पशुविशेष २४ ३२

कुलुञ्चानाम् ये कुशीतेन लुञ्चन्ति अपनयन्ति पर-पदार्थास्तेपाम् (दुर्जनानाम्) १६ २२ [कूपपदे लुञ्च अपनयने (भ्वा०) धातोरण् प्रत्यय]

कुल्फौ गुल्फौ ७ ५० २

कुल्या: वाटिकादिपु जलचालनमार्गा ३ ४५ ३ निर्मिता जलगमनमार्गा ५ ८३ ८ जलप्रवाहधारा ३५ २० घृतधारा ६ १२ [कुल्या नदीनाम निघ० १ १३]

कुल्याय कुल्यासु नदीपु भवाय (जलप्रायदेशाय) प्र०-कुल्या इति नदीनाम, निघ० १ १३, १६ ३७ [कुल्या-प्राति० भवार्थे यत्]

कुवलम् कोमल वदरीफलमिव १६ २२ **कुवलै:**= कुत्सित वल यैस्तैर्वदरै, प्र०—अत्र 'कु शब्दे' इत्यस्मा-द्धातोरौणादिक कलन् प्रत्यय २१ २६ सुशब्दै १६ ८६ कु शब्दे (अदा०) धातोरौणादिक कलन् प्रत्यय । यदश्रुभ्य (तेजो ऽस्रवत्) तत्कुवलमभवत् श० १२ ७ १ २]

कुवित् महान् (अग्नि =विद्वज्जन) १ १४३ ६ महान्तम् (राजानम्) ३ ४३ ५ वह्वैश्वर्य्य (अङ्ग =राजा) प्र०—कुविदिति वहुनाम, निघ० ३ १, १० ३२ वहुविज्ञान-युक्त (अङ्ग =मित्र) २३ ३८ वहुवारम् ३.४२ ४ वहु-विधानि (राय =धनानि) १ ३३ १ वलम्, प्र०—कुवि-दिति वहुनाम, निघ० ३ १, १६ ६ [कुवित् वहुनाम निघ० ३ १]

कुवित्सस्य य कुवित् महत् सनति विभजति तस्य (सत्यासत्यविवेचकस्य राज्ञ) ६ ४५ २४ [कुवित् वहुनाम (निघ० ३ १) तदुपपदे पण सभक्तौ (भ्वा०) धातो 'अन्येष्वपि दृश्यते' इति ड प्रत्यय]

कुशरास: कुत्सिताश्च ते शरा १ १६१ ३ [कु-शर-पदयो समास]

कुशिकस्य विद्यानिष्कर्षप्रापकस्य (विद्वज्जनस्य) प्र०—अत्र वर्णव्यत्ययेन मूर्द्धन्यस्य तालव्य ३ ३३ ५

कुशिका:=ये कुर्वन्त्यपदिशन्ति ते कुशा, प्रशस्ता कुशा विद्यन्ते येपु ते कुशिका (विद्वज्जना) ३.५३ ११ विद्या-सिद्धान्तनिष्कर्पका (विप्रा) ३ ५३ १० [कुप निष्कर्षे (क्र्या०) धातोर्वाहुलकादौणादिक किन् प्रत्यय । वर्ण-व्यत्ययेन मूर्धन्यस्य पस्य शकार । अथवा कुशप्राति० प्रशसायामर्थे मत्वर्थे ठन् । कुशिको राजा वभूव । कोशते शब्दकर्मण क्रशतेर्वा स्यात प्रकाशयतिकर्मण साधु विक्रो-शयितार्थानामिति वा नि० २ २५]

कुशिकेभि: कार्यसिद्धान्तविद्भि (जनै) ३ ५३ ८ शब्दायमानै (सज्जनै) ३ २६ ३ [कुशिक इति पूर्वपदे व्याख्यातम् । ततो भिस ऐसादेशो न भवति छान्दसत्वात्]

कुशिकास: विद्याविनयादिभिराप्ता निष्पन्ना (नूतना विद्वास) ३ ४२ ६ उपदेशका (विद्वज्जना) ३ २६ १ उत्कर्प प्राप्ता (जना) ३ २६ १५ सर्वशास्त्रसिद्धान्त-वेत्तार (विप्रा =पूर्णविद्या मेधाविजना) ३ ५० ४ शब्दायमाना (विप्रा =मेधाविजना) ३ ३० २० [कुशिक-प्राति० जसोऽसुगागम । कुशिक इति व्याख्यातम्]

कुषवा कुत्सित सव प्रेरणा यस्या सा (युवति) ४ १८ ८ [कु-सवपदयो समास । स्त्रिया टाप् । सव = पु प्रसवैश्वर्ययो (भ्वा०) धातो 'ऋदोरप्' इत्यप् प्रत्यय]

कुषुम्भक: अल्प कुषुम्भो नकुल, प्र०—अत्र कन् प्रत्यय १ १६१ १५ [कुषुम्भप्राति० 'अल्पे' अ० ५ ३ ८५ सूत्रेण कन् प्रत्यय । कुषुम्भ =कुस श्लेषणे (दिवा०) धातो 'कुसेरुम्भोमेदेता' उ० ४ १०६ सूत्रेण उम्भ प्रत्यय । वहुलवचनाद् गुणाऽभाव]

कुष्ठाभ्याम् निष्कर्षाभ्याम् २५ ६ [कुष निष्कर्षे (क्र्या०) धातो 'हनिकुषिनीरमिकाशिभ्य क्थन्' उ० २ २ सूत्रेण क्थन्प्रत्यय]

कुह कहाँ स० प्र० १५१, १० ४० २ कस्मिन् (काले) १ १८ ४ कुत्र १ ११७ १२ क्व प्र०—अत्र 'वा ह च छन्दसि' अ० ५ ३ १३ अनेन किमो ह प्रत्यय 'कु तिहो' अ० ७ २ १०४ इति कुरादेशश्च १ २४ १० [कुह क्व नि० ३ १५]

कुहचिद्विदे य कुह क्वचिदपि विन्दति तस्मै (राये= धनाय) ७ ३२ १६ [कुहचिदुपपदे विद्लृ लाभे (तुदा०) धातो क्विप्प्रत्यय]

कुहस्वित् कहा स० प्र० १५१, १० ४० २

समूहो वा यस्य तस्मै धृतव्रताय (यूने=युवावस्थाय जनाय) १ ६३ ३ वज्रप्रहाराय ६ २०.५ **कुत्साः**= वज्राऽस्त्राद्या शस्त्राऽस्त्रसमूहा ७ २५ ५ **कुत्सेन**= वज्रेणेव दृढेन कर्मणा ५ २९ ९ कुत्सितकर्मणा ४ १६ ११ [कुत्स वज्रनाम निघ० २ २० कुत्स एतत् कृन्ततेर्ऋषिः कुत्सो भवति, कर्त्ता स्तोमानामित्यौपमन्यवोऽत्राप्यस्य वधकर्मैव भवति नि० ३ ११]

कुत्स्येन कुत्से वज्रे भवेन वेगेन ४ १६ १२ [कुत्स वज्रनाम निघ० २ २० ततो भवार्थे यत्]

कुपयम् गोपनीयम् (शिशुम्) १ १४० ३

कुब्जम् वक्राङ्गम् (जनम्) ३० १० [कुब्जश्च कुजतेर्वोब्जतेर्वा नि० ७ १२]

कुभन्यवः आत्मन कुभनमुन्दनमिच्छव (आप्ता पुरुषा) ५ ५२ १२ [कुभनपदाद् आत्मन इच्छायामर्थे क्यच् । 'क्याच्छन्दसी' ति उ प्रत्यय]

कुभा कुत्सितप्रकाशा (रसा=पृथिवी) ५ ५३ ९ [कु+भा दीप्तौ (अदा०) धातो क । स्त्रिया टाप्]

कुमारम् ब्रह्मचारिणम्, अ०— विद्यार्थिनम् (जनम्) २ ३३ बालकम् ५ २ २ **कुमाराः**=अतिचपला वेगवन्तो बालका १७ ४८ कृतचूडाकर्माण (बालका) ६ ७५ १७ **कुमारेण**=अकृतविवाहेन (जनेन) २८ १३ [कामयते भोगान् इति विग्रहे कमु कान्तौ (भ्वा०) धातो 'कमे किदुच्चोपधाया ' उ० ३ १३८ सूत्रेणारन् प्रत्यय । कुमार क्रीडायाम् (चुरा०) धातोर्वा अच्-प्रत्यय]

कुमारीपुत्रम् विवाहात पूर्व व्यभिचारेणोत्पन्नम् (अपत्यम्) ३० ६ [कुमारम् इति व्याख्यातम् । ततो 'वयसि प्रथमे' इति स्त्रिया ङीप्प्रत्यये कुमारी । कुमारी-पुत्रपदयो समास]

कुम्भः कलश इव वीर्यादिधातुभि पूर्ण (भा०— वीर्यवान् पुरुष) १९ ८७ **कुम्भान्**=कलशान् १ ११७ ६ [कु=भूमि कुत्सित वा उम्भति पूरयतीति विग्रहे कूपपदे उम्भपूरणे (भ्वा०) धातोरच् । शकन्ध्वादिन्यायेन पररूपम्]

कुम्भिनीरिव यथा जलाऽधिकारिण्य (नद्य) १ १९१ १४ [कुम्भप्राति० मत्वर्थ इनि । कुम्भिनी-इव-पदयो समास]

कुम्भी धान्यादिपदार्थाऽऽधारा १९ १६ धान्याऽऽधारा (अ०—स्त्री) १९ ८७ **कुम्भीभ्याम्**=धान्यजलाऽऽधाराभ्याम् (पात्रीभ्याम्) १९ २७ [कुम्भप्राति० स्त्रिया ङीप्]

कुयवम् कुत्सितसङ्गमम् २ १९ ६ कुत्सिता यवा अन्नादि यस्य तम् (दुर्जनम्) ७ १९ २ कौ पृथिव्या यवा यस्मात् तम् (वृत्र=मेघ शत्रु वा) १ १०३ ८ कुत्सिता यवा यस्मिँस्तत् (शत्रुस्थानम्) ६ ३१ ३ कुत्सितैर्यवैर्वियुक्तम् (अन्नम्) १८ २० **कुयवस्य**=कुत्सिता धर्माऽधर्ममिश्रिता व्यवहारा यस्य तस्य (राजपुरुषस्य) १ १०४ ३ [कु-यवपदयो समास । यव=यु मिश्रणेऽमिश्रणे च (अदा०) धातो 'ऋदोरप्' इत्यप्]

कुयवाचम् य कुयवान् वक्ति प्रशसति तम् (सामान्य जनम्) १ १७४ ७ [कुयवोपपदे वच परिभाषणे (अदा०) धातो क्विप् । पूर्वपदस्थवकाराकारयोर्लोप]

कुरु सम्पादय ११ ८० कीजिए स० प्र० २४६, ३२१४ तू कर, आर्याभि० २५३, ३२१४ [डुकृञ् करणे (तना०) धातोर्लोट्]

कुरुपिशङ्गिला कुरो कृतस्य कृष्यादे पिशान्यङ्गानि गिलति सा, भा०—या सेधा कृष्यादिकविनाशयति, (अजा=प्रकृति) २३ ५६ भा०—कृष्यादि विनाशिनी (श्वावित्=पशुविशेष इव सेधा) २३ ५५ [कुरु-पिशङ्गिलापदयो समास । कुरु =डुकृञ् करणे (तना०) धातो 'कृग्रोरुच्च' उ० १ २४ सूत्रेण कु प्रत्यय उकारश्चान्तादेश]

कुर्मः सम्पादयाम १७ ५२ [डुकृञ् करणे (तना०) धातोर्लट्]

कुर्वन् सम्पादयन् (अग्नि =पावक) २८ २२ करता हुआ (मनुष्य) स० प्र० २४९, ४० २ [डुकृञ् करणे (तना०) धातो शतृप्रत्यय]

कुलायम् कुल की वृद्धि को स० वि० १२२, अथर्व० १४ १ ५७ कुल-अयपदयो समास । अय =इण् गतौ (अदा०) धातो 'एरच्' सूत्रेणाच्प्रत्यय]

कुलाययत् कुलाय कुलोन्नतिं कामयमान (मनुष्य) ७ ५० १ [कुलायप्राति० 'तत्करोति तदाचष्टे' इति णिचि शतृप्रत्यय]

कुलायिनम् गृहादिसामग्रीयुक्तम् (यज्ञ=सङ्गतिमय व्यवहारम्) ६ १५ १६ [कुलायप्राति० ससर्गे मत्वर्थे इनि प्रत्यय]

कुलायिनी कुल यदेति तत्कुलाय, तत्प्रशस्त विद्यते यस्या सा (स्त्री) १४ २ [कुलायप्राति० प्रशसायाम् इनि । तदन्तात् स्त्रिया ङीप्]

कुलालेभ्यः मृत्स्ना पात्रादिरचकेभ्य (जनेभ्य)

कृणमः=निश्चित करता हूँ स० वि० १४२, अथर्व० ३ ३० ४ **कृणवत**=कुर्वन्ति १ ७२ ५ कुर्वन्तु, प्र०—अत्र लड्यडभाव १ १०० ७ कुरुत ४ २४.३ करो, आर्याभि० १४१, ऋ० १ ७ ६ ७ [डुकृञ् करणे (तना०) धातो रूपाणि । विकरणव्यत्ययेन श्नु । कृवि हिंसाकरणयोश्च (भ्वा०) धातोर्वा रूपाणि]

कृणुहि अनुतिष्ठ ४ २ २० [डुकृञ् करणे (तना०) धातोर्लोट् । विकरणव्यत्ययेन श्नु]

कृण्वती प्रकाशं कुर्वती (उषा) ५ ८० २ **कृण्वते**=कुर्वन्ति ६ ७५ ७ कुर्वते (सवित्रे=सूर्याय) २ ३० ४ **कृण्वन्**=सम्पादयन् (राजा) ११ १५ वि०--कुर्वन् (विद्वज्जन) २६ ३७ **कृण्वन्तम्**=कुर्वन्तम् (नरम्) २ २८ ७ **कृण्वन्तः**=कुर्वन्त (वसिष्ठा =सन्मार्गस्था जना) ७ ३७ ४ प्र०—इद 'कृवि हिंसाकरणयोश्च' इत्यस्य रूपम् १ ६ ३ [डुकृञ् करणे (तना०) धातो शत्रन्तात् ङीप् । विकरणव्यत्ययेन श्नु । कृवि हिंसाकरण-योश्च (भ्वा०) धातोर्वा रूपम्]

कृण्वन्ति कुर्वन्ति ३४ २ **कृण्वन्तु**=कुर्वन्तु १ १७० ४ भा०—आचरेयु २३ ४२ हिंसन्तु १ १६१ १० निष्पादयन्तु १ १७० ४ [डुकृञ् करणे (तना०) धातो, कृवि हिंसाकरणयोश्च (भ्वा०) धातोर्वा लट् । कृण्वन्ति कुर्वन्ति नि० ६ ३२ कृण्वति वधकर्मा निघ० २.१६]

कृण्वानः कुर्वन् (महाराज) ३ ५३ ८ [डुकृञ् करणे (तना०) धातो शतृ । विकरणव्यत्ययेन श्नु]

कृण्वाना कुर्वती (अदिति =विद्युत्) २६ ४ कुर्वन्तौ (मातापितरौ) १५ ५३ [पूर्वपदे व्याख्यातम् । स्त्रिया टाप् । अथवा 'सुपा सुलुग्०' इत्याकार]

कृण्वानासः कुर्वन्त (मुमुक्षुजना) १ ७२ ६ (कृण्वान इति व्याख्यातम् । ततो जसोऽसुगादेश]

कृण्वाथाम् उत्पन्न करो स० वि० १३६, अथर्व० १४ २.३७ **कृण्वीत**=कुर्यात् ४ २१ ५ **कृण्वे**=करोमि ७ ३६ २ **कृण्वैते**=कुर्याताम् ६ २५ ४ **कृत**=कुरुत, प्र०—अत्र विकरणलुक् १२ ७६ [डुकृञ् करणे (तना०) धातोर्लोट् । विकरणव्यत्ययेन श्नु]

कृत यो विद्वान् कृतस्तत्सम्बद्धौ (विद्वज्जन) ६ ५८ ३ **कृतम्**=कर्त्तव्य कर्म १ ११७ ८ निष्पन्नम् (व्यवहारम्) १ १३२ १ निष्पादितम् (सुखम्) ४ १० ७ निष्पादित प्रकाशित वा (रूप=स्वरूपम्) १६ ३१ आचरितम् (एन =पापम्) १ २४ ६ शाधितम् (हवि =द्रव्यम्) १ ३४.८ [डुकृञ् करणे (तना०) धातो. क्त । ये वै सत्याय स्तोमा कृत ना नै० १५ ११.१.]

कृतब्रह्मा कृतं ब्रह्म धनमन्नं वा येन स (नरः) ६ २० ३ कृतानि ब्रह्माणि धनानि येन स (ब्रह्मगुण्यो?) ७ २५ १ [कृत-ब्रह्मन् पदयो समास । ब्रह्म=धननाम निघ० २ १० अन्ननाम निघ० २.७. उदकनाम निघ० १ १२]

कृतम् कुरुतम्, प्र०—अत्र विकरणस्य लुक् १ ११२ २४ कुरुत, प्र०—अत्र तवर्थे तोट्, सायणस्य विवरणे 'बहुलं छन्दसि' इति शपो लुक् च १.१३८. कुर्यातम् ६ ५६ ८. [डुकृञ् करणे (तना०) धातोर्लोट् । 'बहुलं छन्दसि' इति शपो लुकि तत्स्थाने भाविनो विकरणस्यापि लुक्]

कृतस्य कुर्वतः (व्यवहारस्य) ९ ११४ **कृतः**=सम्पादित (रथ) १ १४१ ८ निरन्तर स्थापित (वेदप्रति-पादितो मार्ग) १ १०५ १६. निष्पन्न (राजन्य.=राजपुत्र) ३१ ११ आज्ञप्त (आप्त पुरुष) ३४ ४२ **कृता**=निर्मिता निष्पादिता (सत्यवती= वाक्) ६ ६१ १३ कृतानि (कर्माणि) ३४ १६ **कृतानि**=कार्याणि क्रियाप्रकार-रूपाणि १ ११-४ कर्माणि १ १०० ६ उत्पादितानि (भुवनानि) २ १२ ४ अनुष्ठितानि (कर्माणि) २ ११ ६. [डुकृञ् करणे (तना०) धातो क्तान्तात् षष्ठी]

कृतिः क्रिया १ १६८ ३ [डुकृञ् करणे (तना०) धातो स्त्रियां क्तिन्]

कृत्तिम् मृगचर्मादिमयीम् (अलङ्करणीम्) १६ ५१ [कृत्ति =गृहनाम निघ० ३ ४ कृती छेदने (रुधा०) धातो क्तिन् । 'कृतो बहुल वा' इति वार्त्तिकबलेन कर्त्तर्यपि क्तिन् । कृत्ति कृन्ततेर्यशो वा अन्न वा । इयमपीतरा कृत्तिरेतस्मादेव सूत्रमयी । उपमार्थे वा नि० ५ २२]

कृत्तिवासः कृत्तिश्चर्म तद्वद् दृढानि वासांसि धृतानि येन स (रुद्र =शूरवीर सेनाध्यक्ष) ३ ६१ [कृत्ति-वासस्-पदयोः समास । कृत्तिरिति व्याख्यातम् । वासस् =वस्त्र आच्छादयतीति विग्रहे वस आच्छादने (अदा०) धातो 'वसेर्णित्' उ० ४ २१८ सूत्रेणासुन्]

कृते हलादिभि कर्षिते, योगाङ्गैर्निष्पादिते (योनौ=क्षेत्रेऽन्त करणे वा) १२ ६८ [डुकृञ् करणे (तना०) धातो क्त]

कृत्नवे कर्त्तुम् २ १३ १० [डुकृञ् करणे (तना०) धातो 'कृहनिभ्या क्त्नु' उ० ३ ३० सूत्रेण क्त्नु]

कूचिदर्थिनम् क्वचिद् बहवोऽर्था विद्यन्ते यस्मिँस्तम् (अग्नि) ४ ७ ६ ['कूचित्-अर्थिन् पदयो समास । कूचित्=क्वचित्, छान्दसत्वात् 'कु' इत्यादेशो दीर्घश्च । अर्थिन्=अर्थप्राति० मत्वर्थ इनि प्रत्यय]

कूजते अप्रकटशब्दोच्चारकाय (जनाय) २२ ७ [कूज अव्यक्ते शब्दे (भ्वा०) धातोश्शत्रन्ताच्चतुर्थी]

कूपे कूपाकारे हृदये १ १०५ १७ [कौति शब्दयतीति विग्रहे कु शब्दे (अदा०) धातो कुयुभ्या च' उ० ३ २७ सूत्रेण प प्रत्यय कित् दीर्घश्च । कूप कूपनाम निघ० ३ १६ कुपान भवति कुप्यतेर्वा नि० ३ १६]

कूप्याभ्यः कूपेषु भवाभ्य (अद्भ्य =जलेभ्य) २२ २५ **कूप्याय**=कूपे भवाय (भृत्याय) १६ ३८ [कूप-प्राति० भवार्थे यत् प्रत्यये स्त्रिया टाप्]

कूर्मः कच्छप २४ ३४ **कूर्मान्**=कच्छपान् २५ ३ [स य कूर्मो नाम । एतद्वै रूप कृत्वा प्रजापति प्रजा असृजत, यदसृजताकरोत्तद्यकरोत्तस्मात्कूर्म, कश्यपो वै कूर्मस्तस्मादाहु सर्वा प्रजा काश्यप्य इति श० ७ ५ १ ५. ता (पृथिवी) स क्लिश्याप्सु प्राविध्यत्तस्मै य पराङ्रसो ऽक्षरत् स कूर्मोऽभवत् श० ६ १ १ १ २ यो वै स एषा लोकानामप्सु प्रविद्धाना पराङ्रसो ऽत्यक्षरत् स एष कूर्म श० ७ ५ १ १ स य स कूर्मोऽसौ स आदित्य श० ६ ५ १ ६ प्राणो वै कूर्म प्राणो हीमा सर्वा प्रजा करोति श० ७ ५ १ ७ द्यावापृथिव्यौ हि कूर्म श० ७ ५ १ १० शिर कूर्म श० ७.५ १ ३५]

कूल्याय कूलेषु समुद्रनद्यादितटेषु साधवे (पुरुषाय) १६ ४२ [कूलप्राति० 'तत्र साधु' इत्यर्थे यत्]

कूश्मान् शासनानि प्र०—अत्र कशधातोर्मक्प्रत्ययो-ऽन्येषामपि० इति दीर्घश्च २५ ७ [कसि गतिशासनयो (अदा०) धातोर्बाहुकादौणादिको मक् प्रत्यय । अकारस्यो-कारादेशो बाहुलकात्]

कूष्ठः य कौ पृथिव्या तिष्ठति (विद्वज्जन) ५ ७४ १ [कूपपदे ष्ठा गतिनिवृत्तौ (भ्वा०) धातो क प्रत्यय]

कृकदाश्वम् कृक हिंसन दाशति त शत्रुम्, प्र०—अत्र दाशृधातोर्बाहुलकादौणादिक उण्-प्रत्ययस्ततोऽमिपूर्व इत्यत्र 'वाच्छन्दसि' इत्यनुवृत्तौ पूर्वसवर्णविकल्पेन यणादेश १ २६ ७ [कृक-दाशुपदयो समास । दाशु=दाशृ दाने (भ्वा०) धातोर्बाहु० औणा० उण् प्रत्यय]

कृकलासः सरट २४ ४०

कृकवाकुः कुक्कुट २४ ३५ [कृके कण्ठेन वक्तीति विग्रहे कृकोपपदात् वच् परिभाषणे (अदा०) धातो 'कृके वच कश्च' उ० १ ६ सूत्रेण ञुण् प्रत्यय । कृकवाकु = कृकवाको पूर्व शब्दानुकरणम् नि० १२ १३]

कृच्छ्रेश्रितः ये कृच्छ्रे दु खेऽपि धर्म श्रियन्ति सेवन्ते (राजपुरुषा) ६ ७५ ६ ये कृच्छ्रे कष्टे श्रिता कष्ट सेव-माना (पितर =पालनक्षमा राजपुरुषा) २६ ४६ [कृच्छ्र-श्रितपदयो समासे सप्तम्या अलुक् । श्रित =श्रिञ् सेवा-याम् (भ्वा०) धातो क्त]

कृणवत् कुर्यात् १२ २६ **कृणवते**=कुर्वते ४ २ ६ **कृणवन्**=कुर्वन्ति ७ ४८ ३ कुर्य्यु ५ २ ३ **कृणवन्त**=कुरुत १ १७८ २ कुर्वन्ति ७ ३७ ७ **कृणवन्ते**=कुर्वन्ति प्र०—व्यत्ययेनाऽत्राऽऽत्मनेपदम् १ ८८ ३ **कृणवम्**=प्रकाश करने हारा हूँ, म० प्र० २३८, १०४६ १ **कृण-वसे**=करोषि ६ १६ १७ **कृणवः**=करोषि ५ ४ ११ कुर्या ६ ३५ ३ हिंसितु शक्नोति १ ५४ ५ **कृणवाथ**=कुरुथ १८ ६० **कृणवाम**=कुर्याम २ २६ ३ **कृणवे**=करता हूँ स० वि० १६७, अथर्व० ६ २ ३ १५ **कृणवै**=कर्त्तु शक्नुयाम् १ १६५ १० **कृण**=कुरु करोति वा, प्र०—अत्र पक्षे लडर्थे लोट् २ २० कर म० वि० १३४, १० ८५ ५५ **कृणुत**=स्वीकुरुत ४ ११ कुरुत ५ ४६ ५ **कृणुतम्**=कुरुतम् १ ६३ १२ **कृणुतात्**=कुरु २ ३० ५ **कृणुताम्**=करोतु १५ ५१ कुरुताम् २ ५ ७ **कृणुते**=करोति ४ ७ ११ कर स० वि० ८०, अथर्व० ११ ५ ३ करोति निर्मिमीते ३३ ३८ **कृणुथ**=कुरुथ ६ २८ ६ **कृणुध्वम्**=कुरुत १५ ५३ कुरुध्वम् १ ७७ २ **कृणुषे**=धारयति ५ १ २ ऋ० भू० २०३ करोति १ १२३ १० करोषि १ १२३ ११ **कृणुष्व**=करोति कुर्याद् वा प्र०—अत्र लडर्थे लोट्, व्यत्ययेनाऽऽत्मनेपद च १ १० ७ कुरु १५ ३६ कुरुष्व १३ ६ **कृणुहि**=सम्पादय, प्र०—'उतश्च प्रत्ययाच्छन्दो वा वचनम्' अ० ६ ४ १०६ अनेन वार्त्तिकेन विकल्पाद्धेर्लोपो न भवति १ १८ १ करोति, प्र०—अत्र व्यत्यय 'कृवि हिंसाकरणयोश्च' इत्यस्माल्लडर्थे लोट् १ १३ २ करोषि ३३ ७६ कुरु १ १६५ ६ **कृणोत**=कुरुत ३ २६ ६ **कृणोतन**=कुर्य्यात् १ १६१ २ कुर्यातम् ४ १५ १० कुरुत, प्र०—अत्र तकारस्थाने तनब्रादेश १ १३ १२ **कृणोति**=करोति १ १०५ १५ कारयति १ ६२ ६ **कृणोतु**=करोतु १ ८४ ३ सदा सिद्ध करे म० वि० १४१, अथर्व० १४ २ ७५ **कृणोमि**=करोमि ४ ४२ ५ स्थिर करता हूँ म० वि० १४१, अथर्व० ३ ३० १ **कृणोषि**=करोषि १ ७४ ४ **कृण्महे**=कुर्म ७ १६ ४

कृत्नुः छेदिका श्येनी इव (उषा) १ ९२ १० [कृती छेदने (रुधा०) धातो 'कृहनिभ्या क्त्नु' उ० ३ ३० सूत्रेण क्त्नु]

कृत्नो कर्त्त (इन्द्र=राजन्) ६ १८ १५ [कृत्नुरिति व्याख्यातम्। तत सम्बुद्धि]

कृत्याम् करोति यया ताम् (क्रियाम्) ५ २३ दुष्क्रियाम् ३५ ११ [डुकृञ् करणे (तना०) धातो स्त्रिया 'कृञ श च' अ० ३ ३ १०० सूत्रेण क्यप्]

कृत्रिमा कृत्रिमाणि (सदनानि=स्थानानि) १ ५५ ६ **कृत्रिमाणि**=क्रियमाणानि (रोधासि=आवरणानि) २ १५ ८ [डुकृञ् करणे (तना०) धातो 'ड्वित क्त्रि' अ० ३ ३ ८८ सूत्रेण क्त्रि प्रत्यय। 'क्त्रेर्मम नित्यम्' अ० ४ ४ २० सूत्रेण मप् प्रत्यय। ततश् शेर्लोप]

कृत्वः बहव कर्त्तारो विद्यन्ते यस्य तत्सम्बुद्धौ (अग्ने=वैद्यराज विद्वन्) ३ १८ ४]

कृत्वा अनुष्ठाय ३ ४७ [डुकृञ् करणे (तना०) धातो क्त्वा]

कृत्वाय कृत्वा ११ ५९ [डुकृञ् करणे (तना०) धातो क्त्वा। 'क्त्वो यक्' अ० ७ १ ४७ सूत्रेण यगागम]

कृत्वी कृत्वा, प्र०—अत्र 'स्नात्व्यादयश्च' इति निपातितम् १ १६१ ३ [डुकृञ् करणे (तना०) धातो क्त्वा। स्नात्व्यादयश्च' अ० ७ १ ४९ सूत्रेण निपातनाद् रूपसिद्धि]

कृत्वे प्रज्ञायै न्यायकर्मणे वा १ १११ २ [क्रतुरिति कर्मनाम निघ० २ १ प्रज्ञानाम निघ० ३ ९ गुणाऽभावश्छान्दस]

कृत्व्यः करणीय कर्म, प्र०—कृत्वीति कर्मनाम, निघ० २ १, ६ २ ८ **कृत्व्यान्**=कर्मसु साधून् (यून्=दिवमान्) १ १२१ ७ **कृत्व्ये**=कर्त्तव्ये (कार्य्ये) १ ५४ ६ [कृत्वीति कर्म नाम निघ० २ १ तत साध्वर्थे भवार्थे वा यत्]

कृत्स्नहृदयेन सम्पूर्णहृदयाऽवयवेन ३९ ८ [कृत्स्नहृदयपदयो समास। कृत्स्नम्=कृती छेदने (रुधा०) धातो 'कृत्यशूभ्या क्स्न' उ० ३ १७ सूत्रेण क्स्न। कृन्तति स्वल्पमिति विग्रह। हृदयम्=हरति विषयानिति विग्रहे हञ् हरणे (भ्वा०) धातो 'वृह्नो षुग्दुकौ च' अ० ४ १०० सूत्रेण कयन् प्रत्ययो दुगागमश्च]

कृत्स्नायतया आयस्य लाभस्य भाव आयता, कृत्स्ना चाऽसावायता कृत्स्नायता, तया सम्पूर्णलाभतया १९ २० [कृत्स्न-आयतापदयो समास। कृत्स्न व्याख्यातम्]

कृथ कुरुत, प्र०—अत्र विकरणस्य लुक् १२ ८३ **कृथः**=कुरुथ ५ ७४ ५ कुरुतम्, प्र०—अत्र लोडर्थे लट् विकरणस्य लुक् च १ ११२ ८ [डुकृञ् करणे (तना०) धातोर्लोडर्थे लट्, विकरणस्य लुक् च]

कृदरम् उदरम् २९ १ [कृत्स्न दणानीति विग्रहे 'कृदरादयश्च' उ० ५ ४१ सूत्रेण निपात्यते। कृदर गृहनाम निघ० ३ ४ ऊर्दर कृदरमित्यावपनस्य। कृतदर भवति नि० ३ २०]

कृधि करोषि करोति वा, प्र०—अत्र लडर्थे लोट्, पक्षे व्यत्यय, विकरणाऽभाव 'श्रुशृणुपृकृ०' अ० ६ ४ १०२ अनेन हेर्धादेशश्च १ १४ ७ कुरु, प्र०—अत्र विकरणलुक् १३ २२ कुरु निष्पादय १ १०९ ५ कुर्या ५ ४१ कुरु कारय वा ४ १० कीजिए म० वि० १९७, ६ ११३ १० [डुकृञ् करणे (भ्वा०) धातोर्लोट्। 'बहुल छन्दसी' ति विकरणस्य लुक्। 'श्रुशृणु०' इत्यादिना हेर्धिरादेश]

कृधु ह्रस्वम्, भा०—स्वल्पम् (कर्म), प्र०—कृध्विति ह्रस्वनाम, निघ० ३ २, २३ २८ **कृधुना**=ह्रस्वेनाऽल्पेन (वचसा=ज्ञानेन) ४ ५ १४ [कृधु ह्रस्वनाम निघ० ३ २ निकृत्त भवति नि० ६ ३]

कृध्वम् कुरुध्वम् ७ ३४ १५ [डुकृञ् करणे धातोर्लोट्। विकरणस्य लुक्]

कृन्तामि छिनद्मि ६ १ कृती छेदने (रुधा०) धातोर्लट्।

कृपते समर्थयतु, प्र०—व्यत्ययेनाऽत्र श १ ११३.१० [कृपू सामर्थ्ये (भ्वा०) धातोर्लट्। व्यत्ययेन शप स्थाने श]

कृपमाणम् कृपा कर्त्तु शीलम् (परिव्राज=मन्यामिनम्) १ ११९ ८ कृपा कर्त्तारम् (कवि=मेधाविजनम्) प्र०—अत्र विकरणव्यत्ययेन श १ ११६ १४ [कृपू सामर्थ्ये (भ्वा०) धातो शानच्। व्यत्ययेन श। ताच्छील्ये चानश् वा]

कृपा कल्पते समर्थयति यया तया (विद्यया) १ १२७ १ कृपया ६ २ ६ कम्पा ४ ७५ सामर्थ्येन १७ १० समर्थया क्रियया १५ ४३ कल्पनया १ १२८ ७ [कृप कृपायां गतौ (भ्वा०) धातो 'षिद्भिदादिभ्योऽङ्' अ० ३.३ १०४ सूत्रेण स्त्रियामङ्। भिदादिगणे (कृपे सम्प्रसारण च' इति वार्त्तिकेनापि सम्प्रसारणम्। कृपा=कृप् कृपतेर्वा कल्पतेर्वा नि० ६ ८ कल्पते अर्चतिकर्मा निघ०

प्रकाशकाश्चेश्वरस्य गुणा प० वि० । **केतवे**=विज्ञान-स्वरूपाय ज्ञापकाय वा (सूर्याय=परमेश्वराय सूर्यलोकाय वा) ४ ३५ विज्ञानाय १ १६६ १ **केतुना**=सङ्केतरूप-चिह्नेन ३८ १६ जागरूकेण ज्ञानेन जागृताऽवस्थया ३७ २१ प्रज्ञया सुकर्मणा वा ३७ २१ विज्ञान अर्थात् विद्यादान से, आर्याभि० १ १६, ऋ० १ ३ १० १४ शोभन-कर्मणा प्रज्ञया वा, प्र०—केतुरिति प्रज्ञानामसु पठितम्, निघ० ३ ६, १ ३ १२ **केतुम्**=ध्वजवद् वर्त्तमानम् (वह्निम्) १ ६० १ महाप्राज्ञम् (राजानम्) ७ ६.२ प्रज्ञापकम् (अग्निम्) ६ ७ २ सूर्यमिव ७ ५ ५ प्रज्ञानम् १ ६ ३ प्रज्ञाम् २९ ३७ किरणम् १ १२४ ५ रूपादि-प्रापकम् (अग्नि=वह्निम्) ३ २ १४ ध्वजवद्विज्ञापकम् (अग्नि=पावकम्) ३ २९ ५ **केतु**=प्रज्ञापिका (उप= उषा) ३ ६१ ३ प्रज्ञापक इव प्रज्ञा ५ ११ ३ ज्ञानस्वरूपम् (ब्रह्म) ३ ५५ २ उद्गतशिखा प्रज्ञावती वा (उषा) १ १२४ ११ ज्ञापयित्री पताकेव प्रसिद्धा (स्त्री) १ ११३ १९ ज्ञानवान् (मनुष्य) ३ १ १७ विज्ञापक (ईश्वर आप्तो वा) १ १३ १ [चायते पूजयतीति विग्रहे चायृ पूजानिशामनयो (भ्वा०) धातो 'चाय की' उ० १ ७४ सूत्रेण तु प्रत्यय । धातोश्च 'की' इत्यादेश । केतु प्रज्ञानाम निघ० ३ ९ केतुना कर्मणा प्रज्ञया वा नि० ११ २७ केतव रश्मय नि० १२ १५ केतु प्रज्ञानम् नि० १२ ७ कित निवासे रोगापनयने च (भ्वा०) धातोर्वा वाहुलकादौणादिक उ प्रत्यय]

केतवेदाः केत प्रज्ञात वेदो धन येन स (राजपुरुष) प्र०—केत इति प्रज्ञानाम, निघ० ३ ६, १ १०४ ३ [केत-वेदस्पदयो समास । केत प्रज्ञानाम निघ० ३ ९ वेदस् धननाम निघ० २ १०]

केतसापः ये केतेन प्रज्ञया सपन्ति ते (विद्वज्जना) ५ ३८ ३ [केतोपपदे षप् समवाये (भ्वा०) धातोरण् प्रत्यय । केत प्रज्ञानाम निघ० ३ ९]

केताः प्रज्ञा प्रज्ञापनव्यवहारान् १ ५५ ७ [केत प्रज्ञानाम निघ० ३ ९]

केतान् बोधान् १ १४६ ३ [केत प्रज्ञानाम निघ० ३ ९]

केतुमत् प्रशस्तप्रज्ञायुक्तम् (वच) ६ ४७ ३१ केतु प्रशस्ता ध्वजा यासु ता (स्वसेना) प्र०—अत्र स्त्री-प्रत्ययस्य लुक् २९.५७ [केतुप्राति० प्रशसार्थे मतुप् । केतुरिति व्याख्यातम्]

केतू किरणौ २ ११ ६ [केतुरिति व्याख्यातम् । तस्य द्विवचनम् ।]

केतेभिः प्रज्ञाभि ३ ६० ७ [केत इति व्याख्यातम् । तत्रश्छन्दसि भिस ऐसादेशो न भवति]

केवटे कूपे, प्र०—केवट इति कूपनाम, निघ० ३ २३, ६ ५४ ७

केवर्त्तम् जले नौकाया पारावारयोर्गमकम् (नाविक-जनम्) ३० १६ [के जले वर्तत इति विग्रहे कोपपदाद् वृतु वर्त्तने (भ्वा०) धातोरण् । समासे सप्तम्या लुङ् न]

केवलम् असहायम् (सह=बलम्) १ ५७ ६ **केवलः**=एक एवेष्टोऽसाधारणसाधनो वा (त्वष्टा= परमेश्वरो भौतिकोऽग्निर्वा) १ १३ १० असहाय (इन्द्र= राजा) ४ २५ ७ एकश्चेतनमात्रस्वरूप एवेष्टदेव (इन्द्र= राज्यप्रदेश्वर) १ ७ १०

केवला केवलाम् (पक्तिम्=पाकम्) ४ २५ ६ [केवलप्राति० स्त्रिया टाप्]

केशिनः प्रकाशवन्तो ज्ञापका (वायुविद्युत्सूर्या) १ १६४ ४४ [केशप्राति० भूम्नि इनि प्रत्यय । केश= क्लिश उपतापे (दिवा०) धातो 'क्लिशेरन् लो लोपश्च' उ० ५ ३३ सूत्रेणान्प्रत्यय, लकारस्य च लोप । केशी केशा रश्मयस्तैस्तद्वान् भवति, काशनाद्वा प्रकाशनाद्वा केशीद ज्योतिरुच्यत इत्यादित्यमाह नि० १२ २६ अथाप्येते इतरे ज्योतिषी केशिनी उच्येते । धूमेनाग्नी रजसा च मध्यम नि० १२ २६]

केशिना प्रशस्ता केशा विद्यन्ते ययोस्तौ (हरी= अश्वौ) प्र०—अत्र 'सुपा सुलुग्०' अ० ७ १ ३९ इति विभक्तेराकारा ८ ३४ सूर्यरश्मिवत्प्रशस्तकेशयुक्तौ (हरी=अश्वौ) १ ८२ ६ वहव केशा किरणा विद्यन्ते ययोस्तौ (सूर्यविद्युतौ) ३ ६ ६ प्रकाशयुक्ते आकर्षणवले (हरी=अश्वौ), प्र०—अत्र 'सुपा सुलुग्०' इति द्विवचनस्याकारादेश १.१० ३ [केशिन् इति व्याख्यातम् । तस्य द्विवचने प्रयोग]

केशिनीः रश्मिवती (सुन्दरस्त्रिय) १ १५१.६ प्रशसनीयकेशा (स्त्रिय) १ १४० ८ [केशप्राति० मत्वर्थे इनि । तत. स्त्रिया ङीप्]

केशिभिः केशा वहवो रश्मयो विद्यन्ते येषामग्निविद्यु-त्सूर्याणा तै सह, प्र०—'क्लिशेरन् लो लोपश्च' उ० ५ ३३ अनेन क्लिशधातोरन् लकारलोपश्च, ततो भूम्न्यर्थे इनि, "केशी केशा रश्मयस्तैस्तद्वान् भवति, काशनाद् वा, प्रकाश-

समूहेन तम् १ ५८ ४ पृथिवीविकारमयम् ऋ० भू० १६८ **कृष्णः**=अग्निना छिन्नो वायुना कर्षितो यज्ञ २ १ कृष्णगुणविशिष्ट (प्राणी) २४ ३० आकर्षणकर्त्ता (सूर्य) १ ७६ २. कर्षक (जुहुराण=कुटिलगतिर्जन) ४ १७ १३ **कृष्णा**=कर्षणानि ६ ६० १० कृष्णान्याकर्षण-कृष्णवर्णयुक्तानि पृथिव्यादीनि १ ३५ ४ कृष्णानि मैन्यानि ४ १६ १३ श्यामा (विदुषी स्त्री) ४ ३ ६ **कृष्णात्**=अन्धकारात् १ १२३ १ **कृष्णान्**=कृष्णवर्णान् कृषिसाधकान् वा (पदार्थान्) २४ ११. **कृष्णाय**=विद्याकर्षणाय, भा०—विद्याप्राप्तये २५ १ **कृष्णाः**=निकृष्टवर्णा कर्षिता वा (रात्री) ६ ४७ २१ कृष्णवर्णा विलेखननिमित्ता वा, भा०—कर्षणादिकार्यसाधका पश्वादिपदार्था २४ १० **कृष्णासु**=परिपक्वासु विलिखितासु (ओषधीषु) १ ६२ ६ **कृष्णेभिः**=परस्पराकर्षणैर्विलेखनै १ ६२ ८ **कृष्णे**=कर्षिते (द्यावाभूमी) ४ ४८ ३ **कृष्णेन**=आकर्षण गुण मे स० प्र० ३१३, ३३४३ कर्षति येन स कृष्ण तेन, यद्वा कृष्णवर्णेन लोकेन, प्र०—कृष्ण कृष्यतेर्निकृष्टो वर्ण, नि० २ २० 'यत् कृष्णं तदन्नस्य, छा० उ० ६ ५ एताभ्या प्रमाणाभ्या पृथिवीलोका अत्र गृह्यन्ते 'कृषेर्वर्णे' उ० ३ ४ इति नक् प्रत्यय, अत्राऽऽङ्पूर्वकत्वादाकर्षणार्थो गृह्यते १ ३५ २ पृथिव्यादिना १ ३५ ६ कृष्णवर्णेन (रजसा=लोकेन) ३४ २५ [कृष विलेखने (भ्वा०) धातो 'कृषेर्वर्णे' उ० ३ ४ सूत्रेण नक् प्रत्यय । कृष्णम्=कृष्यतेर्निकृष्टो वर्ण नि० २ २० कृष्णा=कृष्णवर्णा रात्रि नि० २ २०]

कृष्णयामम् कृष्णा कर्षिता यामा येन तम् (सूनुम्=अपत्यम्) ६ ६ १ [कृष्ण-यामपदयो समास । याम=या प्रापणे (अदा०) धातो 'अर्त्तिस्तुसुहु०' उ० १ १४० सूत्रेण मन् प्रत्यय]

कृष्णयोनीः कृष्णा कर्षिका योनिर्यासा ता (सेना) २ २० ७ [कृष्णा-योनिपदयो समास । योनि=यौति सयोजयति पृथक् करोति वेति विग्रहे यु मिश्रणेऽमिश्रणे च (अदा०) धातो 'वहिश्रिश्रुयुद्रुग्ला०' उ० ४ ५१ सूत्रेण नि प्रत्यय । योनि=उदकनाम निघ० १ १२ गृहनाम निघ० ३ ४]

कृष्णव्यथिः य कर्षकश्चाऽसौ व्यथयिता च (अग्नि=वह्नि) २ ४ ७ [कृष्ण-व्यथिपदयो समास । व्यथि=क्रोधनाम निघ० २ १३ व्यथ भयसञ्चलनयो (भ्वा०) धातोरौणा० इन्]

कृष्णसीतासः कृष्णा कृषिसाधनी सीता येषा ते (कृषीवला) १ १४० ४. [कृष्णा-सीतापदयो समास । सीता=स्यति कर्मसमाप्ति करोतीति विग्रहे षोऽन्त. कर्मणि (दिवा०) धातोरौणादिको बाहुलकात् क्त । आकारस्येकारादेश]

कृष्णाञ्जिः कृष्णा विलिखिता अञ्जिर्गतिर्यस्य स (पशु पक्षी वा) २४ ४ [कृष्णा-अञ्जिपदयो समास । अञ्जि=अञ्जू व्यक्तिम्रक्षणकान्तिगतिषु (रुधा०) धातोरौणादिक इन् प्रत्यय]

कृष्णाध्वा कृष्णोऽध्वा मार्गो यस्य (अग्नि) २ ४ ६ कृष्ण कर्षितोऽध्वा मार्गो येन (विद्युत्प्रकाश) ६ १० ४ [कृष्ण-अध्वन् पदयो समास । अध्वन्=अद भक्षणे (अदा०) धातो 'अदेर्ध च' उ० ४ ११६ सूत्रेण क्वनिप् धान्तादेशश्च अध्वा=अन्तरिक्षनाम निघ० १ ३]

कृष्णासः ये कर्षन्ति ते (सूरय=विद्वास) १ १४१ ८ [कृष्णप्राति० जसोऽसुगागम । कृष्ण=कृष विलेखने+नक्]

कृष्णियाय कृष्णमाकर्षणमर्हाय (विद्वज्जनाय), प्र०—'वाच्छन्दसि सर्वे विधयो भवन्ति, इति घ १ ११६ २३ कृष्ण विलेखन कृषिकर्माऽर्हति यस्तस्मै (कृषीवलाय) १ ११७ ७ [कृष्ण इति व्याख्यातम् । तत अर्हत्यर्थे घ प्रत्यय । ततश्चतुर्थी]

कृण्व कुरु, प्र०—अत्र 'कृञ्' इत्यस्माद्धातोर्लोटि विकरणाऽभाव १ १० ६ कुरुष्व ७ २२ ४ विलिख १ ५४ ६ [डुकृञ् करणे (तना०) धातोर्लोट् । कृष विलेखने (भ्वा०) धातोर्वा]

केतपूः य केनेन विज्ञानेन पुनाति (ईश्वर) ११ ७ य केत प्रज्ञा पुनाति पवित्रीकरोति स (वाचस्पति=वाण्या पालक प्रजाराजजन) ९ १ य केन विज्ञान पुनाति स (सविता=सर्वजगदुत्पादको जगदीश्वर) ३० १ [केनोपपदे पूञ् पवने (क्र्या०) धातो क्विप् प्रत्यय । केत प्रज्ञानाम निघ० ३ ६ अन्न केत, श० ६ ३ १ १६]

केतम् प्रज्ञा प्रज्ञापन वा ४ २६ २ प्रज्ञानम्, प्र०—केत इति प्रज्ञानाम, निघ० ३.६, ३० १ विज्ञानम् ११.७ **केतः**=प्रज्ञाविशेषो बोध १ २४ १२ [केतमिति पूर्वपदे व्याख्यातम्]

केतवः ज्ञापका (अग्नय=सूर्यविद्युत्प्रसिद्धाग्नय) ८ ४० किरणा ३० ३१ किरणा इव प्रकाशमाना विद्वास ८ ४१ ज्ञानानि १ १९१ ४ प्रज्ञानानि ७ ४१ किरणा, विविधजगत पृथक् पृथग् रचनादिनियामका ज्ञापका

क्रतुमन्ता बहुप्रज्ञायुक्तौ (यानसाधकचालकौ) १ १८३ २ [क्रतु+मतुप्। 'सुपा सुलुग्' इत्याकारादेश। क्रतुपद व्याख्यातम्]

क्रतुमान् बहुशुभप्रज्ञ (होता=होतृजन) ४ ४ १ १ प्रज्ञावान् (इन्द्र=सभाध्यक्ष) १ ६२ १२ [क्रतुपद व्याख्यातम्। ततो भूम्नि प्रशसाया वा मतुप्]

क्रतुविदम् क्रतु प्रज्ञा ता विन्दति येन तम् (सोमम्=ओषधिगणम्) ३ ४० २ [क्रतूपपदे विद्लृ लाभे (तुदा०) धातो क्विप्। क्रतुपद व्याख्यातम्]

क्रतुविदा क्रतु प्रज्ञा विन्दति याभ्या तौ (अध्यापकोपदेशकौ) २ ३६ २ [क्रतूपपदे विद्लृ लाभे (तुदा०) धातो क्विप्। 'सुपा सुलुग्' इत्याकारादेश]

क्रतुस्थला प्रज्ञाकर्मज्ञापनोपदिक् १५ १५ [(अग्ने) पुञ्जिकस्थला च क्रतुस्थला चाप्सरसाविति दिक् चोपदिशा चेति स्माह माहित्रिय, सेना च तु ते समितिश्च श० ८ ६ १ १६]

क्रतूदक्षाभ्याम् प्रज्ञाबलाभ्याम् ७ २७ [क्रतु प्रज्ञानाम निघ० ३ ६ दक्ष बलनाम निघ० २ ६ तयो समास]

क्रतूयन्ति प्रज्ञा कर्माणि चेच्छन्ति ४ २४ ४ [क्रतुपदाद् आत्मन इच्छाया क्यच्। ततो लट्]

क्रत्वा श्रेष्ठया प्रज्ञयोत्तमेन कर्मणा वा ४ २१ १० क्रतुना प्रज्ञया वा ३ २ ३ **क्रत्वे**=प्रज्ञायै ३४ ८ प्रज्ञानाय ६ ४० २ सद्विद्या-शुभकर्माऽनुभूतसंस्कारस्मृतये, प्र०—क्रतुरिति कर्मनामसु पठितम्, निघ० २ १, ३ ५४ [क्रतुरिति प्रज्ञानाम निघ० ३ ६ कर्मनाम निघ० २ १]

क्रत्वामघास. क्रतु प्रज्ञा कर्मैव मघ धन येषान्ते (स्वामिनो जना) ५ ३३ ६ [क्रतु-मघपदयो समास। क्रतुरिति व्याख्यातम्। मघम्=धननाम निघ० २ १०]

क्रन् कुर्य्यु २७ ४ [डुकृञ् करणे (तना०) धातोर्लुङ्। अडभावो विकरणलुक् च छान्दसत्वात्]

क्रन् कुर्वन् (जातवेदा=ईश्वर.) ७ ५ ७ [डुकृञ् करणे (तना०) धातो शतृ। विकरणलुक्]

क्रन्त क्रमन्तु १ १४१ ३ [क्रमु पादविक्षेपे (भ्वा०) धातोर्लङ्। अडभावो विकरणलुक् च]

क्रन्त: क्रमक (अग्नि=राजा) ४ २ १४ [क्रमु पादविक्षेपे (भ्वा०) धातोर्बाहु० औणा० क्त]

क्रन्द शब्द कुरु २ ४२ ३ क्रन्दति, प्र०—अत्र व्यत्यय ५ ८३ ७ **क्रन्दत्**=ह्वयति १ १७३ ३ [क्रदि आह्वाने रोदने च (भ्वा०) धातोर्लट्। विकरणस्य लुक्]

क्रन्दत् शब्द कुर्वन् (अश्व) १ ३६ ८ [क्रदि आह्वाने रोदने च (भ्वा०) धातो शतृप्रत्यय.]

क्रन्दति श्रेष्ठानाह्वयति दुष्टान् रोदयति, प्र०—अनाऽन्तर्भावितो ण्यर्थ १ १०० १३ **क्रन्दतु**=आह्वयतु ५ ५८ ३. **क्रन्दते**=आह्वान रोदन वा कुर्वते २२ ७ [क्रदि आह्वाने रोदने च (भ्वा०) धातोर्लट्]

क्रन्दते आह्वान रोदन वा कुर्वते (जनाय) २२ ७ [क्रदि आह्वाने रोदने च (भ्वा०) धातोश् शतन्ताच्चतुर्थी]

क्रन्दन् शब्दायमान (अश्व=तुरङ्ग) ३ २६ ३ [क्रदि आह्वाने रोदने च (भ्वा०) धातो शतृप्रत्यय]

क्रन्दनु: आह्वाता (विद्वज्जन) ७ ४२ १ [क्रदि आह्वाने रोदने च (भ्वा०) धातोर्बाहुलकादौणादिकोऽनु प्रत्यय]

क्रन्दय रोदयाऽऽह्वय वा २६ ५६. [क्रदि आह्वाने रोदने च (भ्वा०) धातोर्लोट्]

क्रन्दसी क्रन्दमानौ विरोधयन्तौ (राजाऽमात्यौ) ६ २५ ४ गुणै प्रशसनीये (द्यावापृथिव्यौ) ३२ ७ रोदनशब्दनिमित्ते (द्यावापृथिव्यौ) २ १२ ८ [क्रदि आह्वाने रोदने च (भ्वा०) धातोरौणादिकोऽसुन् प्रत्यय]

क्रपाय व्यवहारसिद्धये ८ ५५

क्रमणाय गमनाऽऽगमनाय ६ ७० ३. **क्रमणे**=अनुक्रमेण गमने (यशीरात्मवले) १ १५५ ५ [क्रमु पादविक्षेपे (भ्वा०) धातोर्ल्युट्]

क्रमताम् चालयति, प्र०—क्रमयति, प्र०—अत्र लडर्थे लोट् १ ६ आक्रमण अर्थात् गतिपूर्वक आरूढ हो म० वि० २३०, ६ ५ १ **क्रमते**=प्राप्नोति १ १४४ १ **क्रमध्वम्**=पराक्रम कुरुत, भा०—पराक्रमध्वम् १७ ६५ **क्रमस्व**=पुरुषार्थी भव ४ १८ ११. गच्छ ५ ३८ [क्रमु पादविक्षेपे (भ्वा०) धातोर्लोट्। 'अनुपसर्गाद्वा' इत्यात्मनेपदम्]

क्रम: अवरयाऽन्तरम् १२ ५ व्यवहार १२ ५ [क्रमु पादविक्षेपे (भ्वा०) धातोर्भावे घञ्। 'नोदात्तोपदेश०' इति वृद्धिर्न भवति]

क्रमाम अनुक्रमेण प्राप्नुयाम ६ ४६ १५ **क्रमिषम्**=उल्लङ्घेयम्, प्र०—अत्र लिडर्थे लुङ् २८ **क्रमिष्ट**=क्रमते १ १५५ ४ **क्रमिष्टम्**=अतिक्रमण कुरुतम् १ १८२ ३ **क्रमी:**=क्रमस्व १ ५१ ६ **क्रमु:**=अवक्राम्यन्तु ७ ३२ २७ [क्रमु पादविक्षेपे (भ्वा०) धातोर्लङ्। अडभावश्च। अन्यत्र लुङ्]

नाद् वा, केशीद ज्योतिरुच्यते, नि० १२ २५-२६, १ १६ ४ ['केशिन्' इति व्याख्यातम्]

केशैः शिरस्थैर्बालैः २५ ३ [केशिन पदे व्याख्यातम्]

केसराणि विज्ञानानि १६ ६१

कोपयथ धूनय ५ ५७ ३. **कोपयः**=कोपयसि १ ५४ ४ [कुप क्रोधे (दिवा०) धातोर्णिचि लोडर्थे लट्]

कोम्या प्रशमनीयानि (दिनानि) १ १७१ ३

कोशकारीम् या कोशं करोति ताम् (स्त्रियम्) ३० १४ [कोशोपपदे डुकृञ् करणे (तना०) धातोरणि स्त्रियां ङीप्। कोश कुष निष्कर्षे (क्र्या०) धातोरच् प्रत्ययः। षकारस्य शकारश्छान्दसः। कोशः कुष्णातेः विकुषितो भवति। अयमपीतर कोशं एतस्मादेव सचय आचितमात्रो महान् भवति नि० ५ २६ कोश मेघनाम निघ० १ १०]

कोशम् धनाऽऽलयम् ५ ५९ ८ मेघम्, प्र०—कोश इति मेघनाम, निघ० १ १०, ५ ५३ ६ धनादीनां कोश इव जलेन पूर्णं मेघम् ५ ८३ ८ **कोशः**=धनसमुदाय ६ ५४ ३ मेघ १ ११२ ११ [पूर्वपदे व्याख्यातम्]

कोशयोः या कोशान् यान्ति ता भूमी ६ ४७ २२ [कोशोपपदे या प्रापणे धातोरणि स्त्रियां ङीप्। कोश इति व्याख्यातम्]

कोशान् दशगुणधनपूर्णान् ६ ४७ २३ **कोशाः**= यथा मेघा १ ८७ २ **कोशेन**=मेघेन १ १३० २. [कोश-कारीम् पदे द्रष्टव्यम्]

कोश्याभ्याम् कोश उदरे भवाभ्यां मांसपिण्डाभ्याम् ३९ ८ [कोश इति व्याख्यातम्। ततो भवार्थे यत्]

कौलालम् कुलाल-पुत्रम् ३० ७ [कुलालप्राति० अपत्यार्थेऽण्। कुलाल=कोलति संघातयतीति विग्रहे कुल सम्त्याने बन्धुषु च (भ्वा०) धातोः 'तमिविशिविडि०' उ० १ ११८ सूत्रेण कालन् प्रत्ययः]

कौलितरम् अतिशयेन कुलीनम् (दास=सेवक जनम्) ४ ३० १४.

कौलीकान् पक्षिविशेषान् २४ २४

कौशिकः। सर्वासां विद्यानामुपदेशे प्रकाशे च भवस्तत्सम्बुद्धौ। अर्थानां साधूपदेष्टर्वा (इन्द्र=सर्वानन्द-स्वरूपेश्वर) प्र०—क्रोशते शब्दकर्मणः क्रंशतेर्वा स्यात्, प्रकाशयति कर्मणः, साधु विक्रोशयिताऽर्थानामिति वा नद्यः प्रत्यूनु निरु० २ २५ अनेन कौशिकशब्द उक्तार्थो गृह्यते १ १० ११ [कुशिकप्राति० भवार्थेऽण्। अथ यत्सुवर्ण-रजताभ्यां कुशीभ्यां परिगृहीत आसीत्। तास्य (आदित्यस्य चात्वालस्य) कौशिकता तै० १ ५ १० २]

क्रतवः प्रज्ञा ७ ४८ १ प्रज्ञा १ ५५ ८ यज्ञा. प्रज्ञा वा, प्रशस्तक्रियावन्त शिल्पयज्ञधियो वा (देवा.=विद्वांस) १ ८६ १ **क्रतवे**=प्रज्ञायै कर्मणे वा २२ ३० विज्ञानाय १८ २८ **क्रतुभिः**=प्रज्ञाकर्मभि ६ ७ ४ श्रेष्ठै कर्मभि १ १०० १४ **क्रतुना**=प्रकाशकर्मणा २ १२ १ **क्रतुम्**= प्रज्ञा कर्माणि वा ५ ३१ ११ जीवस्य प्रज्ञानम् ६ ९ ५ धर्म्या प्रज्ञाम् ७ ३२ २६ क्रियाम् ७ ५ ६ सर्वं सङ्गत ससारास्य यज्ञम् १ २ ८ प्रज्ञानम् (सुशिक्षितास्वम्) १५ ४४ प्रज्ञा पुरुषार्थ वा १ ८० १५ प्रज्ञापन कर्म वा १ ६८ २ **क्रतुः**=करोति कार्याणि येन स (इन्द्र= अग्निर्विद्युत्सूर्यो वा, वरुण=जल वायुश्चन्द्रो वा), प्र०— कृञ. कतु, उ० १ ७७ अनेन कृञ्धातो कतु-प्रत्यय १ १७ ५ प्रज्ञा राज्यपालनाख्यो यज्ञो वा ४ २१.२ प्रज्ञा-कर्मयुक्त प्रज्ञाकर्मज्ञापको वा (सभाध्यक्ष) १ ७७ ३ प्राज्ञ (महाविद्वान्) ३ ११ ६ सव समार का कर्त्ता (ईश्वर) आर्याभि० १ १६, ऋ० १ ६ १६ ५ कर्मपराक्रम १ १७५ ५ प्रशस्तकर्मप्रज्ञ (विद्वान्) १ ६ ३ १ प्रज्ञामय प्रज्ञाप्रद प्रज्ञाहेतोर्वा (परमेश्वर ओषधिराजा वा) १ ९१ ५ **क्रतो**।=य करोति जीवस्तत्सम्बुद्धौ ४० १५ **क्रतोः**= प्रज्ञाया, भा०—शास्त्रयोगजाया धिय १२ ४५ [क्रतु कर्म वा प्रज्ञा वा नि० २ २८ य क्रियते यया करोति वेति विग्रहे डुकृञ् करणे (तना०) धातो 'कृञ कतु' उ० १ ७६ सूत्रेण कतु प्रत्यय। क्रतु=कर्मनाम निघ० २ १ प्रज्ञानाम निघ० ३ ९ क्रतुना कर्मणा नि० १० १० क्रत्वे अपत्याय नि० ११ २७ स यदेव मनसा कामयतऽइद मे स्यादिद कुर्वीयेति स एव क्रतु श० ४ १ ४ १ क्रतुर्मनोजव श० ३ ३ ४ ७ हृत्सु ह्यय क्रतुर्मनोजव प्रविष्ट श० ३ ३ ४ ७ क्रतु दक्ष वरुण स शिराधि (ऋ० ८ ४२ ३) इति वीर्य प्रज्ञान वरुण स शिराधीनि ऐ० १ १३ मित्र एव क्रतु श० ४ १ ४ १]

क्रतुप्रा. ये प्रज्ञा पूरयन्ति ते (मेधाविजना) ४ ३९ २ [क्रतूपपदे प्रा पूरणे (अदा०) धातो क । क्रतुपद व्याख्या-तम्]

क्रतुमत् भूयास क्रतवो भवन्ति यस्मिँस्तत् (ब्रह्म) ऋ० भू० ३०६ प्रशस्तप्रज्ञाकर्मयुक्तम् (मन) ३६ ३ प्रशसितप्रज्ञायुक्तम् (विद्वासम्) २ २३ १५ [क्रतुपद व्याख्यातम्। तत प्रशसाया मतुप्]

क्रीणामि गृह्णामि ४ २६ **क्रीणावहै**=व्यवहारयोग्यानि वस्तूनि दद्याव गृह्णीयाव वा ३ ४६ [डुक्रीञ् द्रव्यविनिमये (क्र्या०) धातोर्लट्]

क्रीतस्य गृहीतस्य (सोमस्य=सोमलताद्योषधिसमूहस्य) १६ १५ **क्रीतः**=व्यवहृत (विष्णु=व्याप्तो धनञ्जय) ८ ५५ [डुक्रीञ् द्रव्यविनिमये (क्र्या०) धातो क्त]

क्रीयसे क्रीयते ४ २६ [डुक्रीञ् द्रव्यविनिमये (क्र्या०) धातो कर्मणि लट्]

क्रुङ् यथा पक्षी अल्पमल्प पिबति तथा १६ ७३ [क्रुञ्च कौटिल्याल्पीभावयो (भ्वा०) धातो 'ऋत्विग्०' अ० ३ २ ५६ सूत्रेण क्विन्]

क्रुञ्चान् सारसान् २४ २२ **क्रुञ्चो**=पक्षिविशेषौ २५ ६ [क्रुञ्च कौटिल्याल्पीभावयो (भ्वा०) धातोरच्]

क्रुद्धम् क्रोधयुक्तम् (जनम्) ४ १५ ३ [क्रुध कोपे (दिवा०) धातो क्त प्रत्यय]

क्रुध्मी क्रोधशीलानि (मनासि=अन्त करणानि) ७ ५६ ८

क्रुमुः क्रमिता (रसा=पृथिवी) ५ ५३ ६ [क्रमु पादविक्षेपे (भ्वा०) धातोरौणादिक उ प्रत्यय । उपधाया उकारादेशो वर्णव्यत्ययेन]

क्रूरम् दुश्चरित्रम् (जनम्) ६ १५ **क्रूरस्य**=कृन्तन्त्यङ्गानि यस्मिन् तस्य युद्धस्य, 'प्र०—कृतेश्छ क्रू च' उ० २ २१ अनेन कृन्ततेरक् प्रत्यय क्रू इत्यादेशश्च १ २८ [कृती छेदने (रुधा०) धातो 'कृतेश्छ क्रू च' उ० २ २१ सूत्रेण रक् प्रत्ययो धातोश्च क्रूरादेशश्च । गर्गामो वै क्रूरम् श० १ २ ५ १६ क्रूरमित्यप्यस्य (कृन्तते) भवति नि० ६ २२]

क्रोडः निमज्जनम् २५ ८

क्रोधाय बाह्यकोपाय ३० १४ [क्रुध कोपे (दिवा०) धातोर्भावे घञ्]

क्रोशन्ति रुदन्ति ४ ३८ ५ [क्रुश आह्वाने रोदने च (भ्वा०) धातोर्लट्]

क्रोशाय रोदनाय ३० १६ [क्रुश आह्वाने रोदने च (भ्वा०) धातोर्घञ्]

क्रोष्टा शृगाल २४ ३२ [क्रुश आह्वाने रोदने च (भ्वा०) धातो 'सितनिगमि०' उ० १ ६६ सूत्रेण तुन् प्रत्यय । 'तृज्वत् क्रोष्टु' अ० ७ १ ९५ सूत्रेण तृज्वद्भाव]

क्लथन् हिंसा कुर्वन् (प्रजापति=जीव) ३६ ५ [क्लथ हिंसायाम् (भ्वा०) धातो शतृप्रत्यय]

क्लीबम् नपुंसकम् (जनम्) ३० ५ **क्लीबे**=स्वसामर्थ्याय ४० १५ [क्लीबृ अधार्ष्ट्ये (भ्वा०) धातोरिगुपधलक्षण क । अन्यत सिद्ध]

क्लृप्तम् समर्थितम् (कर्म) १८ ११ [कृपू सामर्थ्ये (भ्वा०) धातो क्त । 'कृपो रोल' इति रेफभागस्य लकार]

क्लृप्तिः समर्थोहा १८ ११ [कृपू सामर्थ्ये (भ्वा०) धातो स्त्रिया क्तिन् । रेफभागस्य लकार]

क्लोमभिः क्लेदनै २५ ८ **क्लोमानम्**=कण्ठनाडिकाम् १९ ८५

क्लोशम् क्रोशम् ६ ४६ १४ [क्रुश आह्वाने रोदने च (भ्वा०) धातोर्घञ् । रेफस्य लकार]

क्व कस्मिन् कुत्र वा १ ३४ ६ [किम सर्वनाम्न सप्तम्यन्तात् 'किमोऽत्' अ० ५ ३ १२ सूत्रेणात्प्रत्यय । 'क्वाती' ति 'कु' इत्यादेश]

क्वयिः पक्षिविशेष २४ ३६

क्वो कुत्र, प्र०—अत्र वर्णव्यत्ययेनाऽकारस्थान ओकार १ ३८ ३

क्षत्ता छेदक (अग्नि=विद्वान्) ६ १३ २ **क्षत्तारम्**=क्षतात्तारक धर्मात्मानम् (जनम्) ३० १३ [क्षद सवृत्ताविति सौत्रो धातु, तत 'तृन्तृचौ शसिक्षदादिभ्य०' उ० २ ९४ सूत्रेण तृच्]

क्षत्तृभ्यः शूद्रात् क्षत्रियाया जातेभ्य (राजपुरुषेभ्य) १६ २६ [पूर्वपदे व्याख्यातम्]

क्षत्रपतिः राज्यस्य पालक (राजा) १० १७ [क्षत्रपति-पदयो समास । क्षत्रपद द्रष्टव्य 'क्षत्रम् इति पदे]

क्षत्रभृत् य क्षत्र राज्य बिभर्त्ति स, (भा०—प्रजा पालको राजा) २७ ७ [क्षत्रोपपदे डुभृञ् धारणपोषणयो (भ्वा०) धातो क्विप् । क्षत्रपद द्रष्टव्य 'क्षत्रमि' ति पदे]

क्षत्रम् राज्य, क्षण्यते हिंस्यते नश्यते पदार्थो येन स क्षतो घातादिस्तनस्त्रायते रक्षतीति क्षत्र क्षत्रियादिवीरस्तम् ५ २७ धनम् ५ ६४ ६ दुष्टनाशक कुलम् १८ ४० विद्यावर्द्धक राजकुलम् १८ ४१ चक्रवर्त्तिन राजानम् १८ ४२ धनुर्वेदम् १८ ४३ राज्य, धनुर्वेदविद्या, क्षत्रियकुलम् ३२ १६ राजन्यकुलम्, भा०—सर्व राज्यम् १८.३८ शूरवीरकुलम्, भा०—शौर्य्यम् १८ ३६ क्षत्रियाणा राज्यम् १० ४ क्षात्रधर्मप्राप्त राजन्यकुलम् १४ २४ क्षत्रियकुलमर्था-

क्रमुः क्रमिता (रसा=पृथिवी) ५ ५३ ९ [क्रमु पादविक्षेपे (भ्वा०) धातोर्बाहुलकादौणादिक उ प्रत्यय]

क्रयस्य द्रव्यविक्रयस्य १९ १३ [डुक्रीञ् द्रव्यविनिमये (क्र्या०) धातो 'एरच्' इत्यच् भावे]

क्रवणस्य शब्दकर्त्तु (विद्वज्जनस्य) ५ ४४ ९

क्रविषः भक्षितस्य (पदार्थस्य) २५ ३३ गन्तु (अश्वस्य) २५ ३२ क्रमितु योग्यस्याऽन्नस्य १ १६२ १० क्रमणशीलस्य (अश्वस्य), प्र०—अत्र क्रमधातोरौणादिक इसि प्रत्ययो वर्णव्यत्ययेन मस्य व १ १६२ ९ [क्रमु पादविक्षेपे (भ्वा०) धातोरौणादिक इसि प्रत्यय । मस्य वकारादेशो वर्णव्यत्ययेन]

क्रव्यादम् य क्रव्य मासमत्ति तम् (भा०—दुष्टाचारिण जनम्) ३५ १९ क्रव्य पक्व मासमत्ति स तम् (विद्युदाख्यमग्निम्) १ १७ [क्रव्योपपदे अद भक्षणे (अदा०) धातो 'क्रव्ये च' अ० ३ २ ६९ सूत्रेण विट् । क्रव्यादे क्रव्यमदते । क्रव्य विकृताज्जायत इति नैरुक्ता नि० ६ ११ अथ येन (अग्निना) पुरुष दहन्ति स क्रव्याद् श० १ २.१ ४]

क्राणस्य कुर्वाणस्य (सेनापते) प्र०—अत्र 'वाच्छन्दसि' इति शपो लुक् १ १३२ २

क्राणा कुर्वन् (मित्र =उत्तमविद्वान्) ५ १० २ कुर्वाणौ (इन्द्रवायू=विद्युत्प्राणौ) १ १३९ १ कुर्वती (माता) ५ ७ ८ कर्त्ता (देव =जीवात्मा) प्र०—अत्र कृञ्धातोर्बाहुलकादौणादिक आनच्प्रत्यय 'सुपा सुलुग्०' इति आकारादेशश्च १ ५८ ३ **क्राणाः**=कर्त्तु शीला (जना) १ १३४ २ पुरुषार्थ कुर्वाणा (मनुष्या) १ १३४ २ [डुकृञ् करणे (तना०) धातोर्बाहु० औणा० आनच् । क्राणा कुर्वाणा नि० ४ १९]

क्राणासः उत्तमानि कर्माणि कुर्वन्त (सज्जना) १ १३४ २ [क्राणप्राति० जसोऽसुगागम । क्राणेति पूर्वपदे द्रष्टव्यम्]

क्रान्तम् वृद्धम् (महद्यक्ष=ब्रह्म) ऋ० भू० ९०, १० ७ ३८ क्रमाऽधिकरणम् (राजशिरिपनम्) १० १९ [क्रमु पादविक्षेपे (भ्वा०) धातो क्त । 'अनुनासिकस्य०' अ० ६ ४ १५ सूत्रेणोपधाया दीर्घ । 'यरय विभाषे' तीण्निषेध]

क्रामाम अनुक्रमेण गच्छेम ३८ १९ **क्रामेम**= लङ्घयेम १ १२५ ६ [क्रमु पादविक्षेपे (भ्वा०) धातोर्लोट् । 'क्रम परस्मैपदेषु' इति दीर्घ शिति परत]

क्रियमाणम् वर्त्तमाने सम्पाद्यमानम् (ब्रह्म=बृहदन्न धन वा) ७ ३५ १४ [डुकृञ् करणे (तना०) धातो कर्मणि शानच्]

क्रियमाणा वर्त्तमानेन पुरुषार्थेन सिद्धानि (अन्नानि धनानि वा) ५ २९ १५ [डुकृञ् धातो कर्मणि शानचि द्विवचनस्य सुपा सुलुगि' त्याकार]

क्रियास्म कुर्याम ६ २३ ६ [डुकृञ् करणे (तना०) धातोराशिषि लिङ्]

क्रिवि कृणोति हिनस्ति येन तत् (नाम) प्र०—अत्र नकारस्थाने वर्णव्यत्ययेनेकार १० २० **क्रिविम्**=कूपम्, प्र०—क्रिविरिति कूपनाम, निघ० ३ २३, २ १७.६ **क्रिविः**=प्रजापालनकर्त्ता (सूर्यवद् राजा) १ ४४ ४ [कृवि हिंसाकरणयोश्च (भ्वा०) धातोरौणादिक इ प्रत्यय । इदितत्वान्नुमो नकारस्येकारे यणादेशे च रूपम् । क्रिवि कूपनाम निघ० ३ २३]

क्रिविर्दती क्रिविर्हिंसनमेव दन्ता यस्या सा (विद्युत्) १ १६६ ६ [क्रिवि-दन्तपदयो समास । क्रिवि-व्याख्यानम् । क्रिविर्दती विकर्त्तनदन्ती नि० ६ ३०]

क्रीडन्तः धनुर्वेदविद्याशिक्षणाय युद्धाय शस्त्राऽभ्यास कुर्वन्त (जना) ४ ४ ९ **क्रीडन्तौ**=सद्धर्मक्रिया कुर्वन्तौ (स्त्रीपुरुषौ) ऋ० भू० २०९ क्रीडा करते हुए (स्त्रीपुरुषौ) स० वि० १३७, अथर्व० १४ १ २२ [क्रीडृ विहारे (भ्वा०) धातो शत्रन्ताज्जस्]

क्रीडम् क्रीडन्ति यस्मिँस्तत् (मारुत=मरुता समूह) प्र०—अत्र 'क्रीडृ विहारे, इत्यस्मात् 'घञर्थे कविधानम्' इति क प्रत्यय १ ३७ १ क्रीडन्ति येन तत् (मारुत=मरुता समूह) १ ३७ ५ [क्रीडृ विहारे (भ्वा०) धातो 'घञर्थे कविधानमि' ति क]

क्रीडयः क्रीडन्त (धूनय =वीरजना) १ ८७ ३ [क्रीडृ विहारे (भ्वा०) धातोरौणादिक इ प्रत्यय । ततो जस्]

क्रीडा विहार १८ ५ [क्रीडृ विहारे (भ्वा०) धातो स्त्रियाम् 'गुरोश्च हल ' इत्यकार प्रत्यय]

क्रीडा क्रीडका (विद्वासो जना) १ १६६ २ [क्रीडृ विहारे (भ्वा०) धातोरच् कर्त्तरि]

क्रीडिभ्यः प्रशसितक्रीडेभ्य (मरुद्भ्य =मनुष्येभ्य) २४ १६ **क्रीडी**=अवश्य क्रीडितु शील (भा०—गृहस्थो जन) १७ ८५ [क्रीडृ विहारे (भ्वा०) धातोस् , ताच्छील्ये णिनि । औणादिको वा इ प्रत्यय कर्त्तरि]

क्षत्रवनिः क्षत्र सम्भाजिन वनति तम्, भा० य क्षत्रियैर्वन्यते ससेव्यते तम् (परमेश्वरम्), प्र०—अत्राऽमो लुक् १ १७ राज्य वनयति तम्, भा०—राज्यवर्धनम् (ईश्वर भौतिकमग्नि वा) १ १८ राजधर्मप्रकाशकस्य विभाजितार, राजगुणाना दृष्टान्तेन प्रकाशयितार वा (परमेश्वर भौतिकमग्नि वा) १ १८ क्षत्रस्य राज्यस्य क्षत्रियाणा वा सविभाजकम् (सभाध्यक्षम्) ६ ३ सर्वमनुष्यार्थ ब्रह्मणो वेदस्य विभाजितार, ब्रह्माण्डस्य मूर्त्तद्रव्यस्य प्रकाशक वा (परमेश्वर भौतिकमग्नि वा) १ १८ बलविद्यासम्भाजितारम् (सभाध्यक्षम्) प्र०—अत्र 'सुपा सुलुग्०' इति विभक्तेर्लुक् ५ २७ क्षत्रियाणा क्षत्रस्य राज्यस्य वा सविभाजकम् (सभाध्यक्षम्) ६ ३ [क्षत्रोपपदे वन सम्भक्तौ (भ्वा०) धातोरौणादिक इन् प्रत्यय.]

क्षत्रवनिः यया क्षत्र राज्य धनुर्विद्या शूरवीरान् पुरुषान्वा वनन्ति सम्भजन्ति सा (स्वाहा=वाक्) ५ १२ [क्षत्रोपपदे वन सम्भक्तौ (भ्वा०) धातोरौणादिक इन् प्रत्यय]

क्षत्रश्रीः राज्यलक्ष्मी ६ २६ ८ [क्षत्र-श्रीपदयो समास । श्री=श्रिञ् सेवायाम् (भ्वा०) धातो 'क्विब्-वचिप्रच्छि०' उ० २ ५७ सूत्रेण क्विप् दीर्घश्च]

क्षत्रियस्य क्षत्राऽपत्यस्य राज ५ ६६ १ क्षात्रधर्म-युक्तस्य (वाजस्य=वेगस्य विज्ञानस्य वा ४ १२ ३ [क्षत्र व्याख्यातम् । ततोऽपत्यार्थे 'क्षत्राद् घ' अ० ४ १ १३८ सूत्रेण घ प्रत्यय]

क्षत्रिया या क्षत्रस्याऽपत्यवद्वर्त्तते (विद्याविदुषी) ४ १६ [क्षत्रियप्राति० स्त्रिया टाप् । क्षत्रियपद व्याख्यातम्]

क्षत्रियाय क्षत्रस्य पुत्राय १० ४ [व्याख्यातम्]

क्षद से अविद्या-रोगाऽन्धकारविनाशकाय बलाय १ २५ १७

क्षद्मेव उदकमिव १ १३० ४ [क्षद्मेत्युदकनाम निघ० १ १२ अन्ननाम निघ० २ ७]

क्षपः रात्री ६ ५२ १५ क्षान्ता रात्री १ ७० ४ **क्षपाम्**=रात्रिम् ३ ४६ ४ [क्षप उदकनाम निघ० १ १२ क्षपा रात्रिनाम निघ० १ ७ रात्रय क्षपा ऐ० १ १३]

क्षपावान् क्षपा प्रशस्ता रात्रयो विद्यन्ते यस्मिन् यस्य वा स (जगदीश्वरो जीवो वा) १ ७० ३ बह्वय क्षपा रात्रयो विद्यन्ते यस्मिन् स (अग्नि=पावक) ७ १० ५ क्षपा रात्रि सम्बन्धिनी यस्य स चन्द्र ३ ५५ १७ [क्षपा प्राति० प्रशसाया मतुप् । क्षपा रात्रिनाम निघ० १.७]

क्षमा सर्वसहनयुक्ता पृथिवी १ १०३ १ [क्षमा पृथिवी नाम निघ० १ १ क्षमूष् सहने (भ्वा०) धातो 'षिद्भिदा-दिभ्योऽङ्' इत्यङ्]

क्षमाचरा. ये क्षमाया पृथिव्या चरन्ति, भा०—ये वायवो भूमेरन्तरिक्षमन्तरिक्षाद् भूमिं च गच्छन्त्यागच्छन्ति, तत्र ये तेजोभूम्यादितत्त्वानामवयवाश्चरन्ति ते १६.५७ [क्षमेति व्याख्यातम् । तदुपपदे चर गतौ (भ्वा०) धातो 'चरेष्ट' इति ट प्रत्यय]

क्षमाय रक्षणाय ६ २२.

क्षमि क्षाम्यन्ति सहन्ते जना यस्मिन् व्यवहारे तस्मिन् स्थित्वा, प्र०—अत्र 'कृतो बहुलम्' इत्यधिकरणे क्विन् 'बाच्छन्दसि सर्वे विधयो भवन्ति' इति 'अनुनासिकस्य क्विब्-झलो०' इति दीर्घो न भवति १ २५ १८ पृथिव्याम् ३ ८ ७ [क्षमा पृथिवीनाम निघ० १ १ क्षमूष् सहने (भ्वा०) धातोरधिकरणे क्विप्]

क्षमेत सहेत २ ३३ १. [क्षमूष् सहने (भ्वा०) धातो-र्लिङ्]

क्षम्यस्य क्षन्तुमर्हस्य (जन्मन=प्रादुर्भावस्य) ७ ४६ २ क्षमाया साधो (राज) २ १४ ११ [क्षमाप्राति० अर्हत्यर्थे तत्र साध्वर्थे वा यत् प्रत्यय । क्षमा=क्षमूष् सहने (भ्वा०)+अङ्]

क्षयणाय निवासे वर्त्तमानाय (जनाय) १६ ४३. [क्षि निवासगत्यो. (तुदा०) धातोर्ल्युट्]

क्षयत् निवसेत् ६ २३ १० [क्षि निवासगत्यो (तुदा०) धातोर्लिडर्थे लेट्]

क्षयतः निवसत (राज=नृपान्) ६ ५१ ४ [क्षि निवासगत्यो (तुदा०) धातो शतृ । व्यत्ययेन शप्]

क्षयति निवसति निवासयति वा ५ ४२ ११. प्राप्नुयात् प्र०—लेट प्रयोगोऽयम् १ ५१ १४ **क्षयथ**=निवसथ ६ ५१ ७. **क्षयथ**=निवसथ १ ११२ ३ [क्षि निवासगत्यो (तुदा०) धातोर्लेट् । व्यत्ययेन शप्]

क्षयद्वीर शूरवीर-निवासक (रुद्र=न्यायाधीश) १ ११४ १०. **क्षयद्वीरम्**=क्षयता शत्रुहन्तॄणा मध्ये प्रशसा-युक्तम् (पुत्रम्) १ १२५ ३ क्षयन्त शत्रूणा नाशकर्त्तारो वीरा यस्य सेनाध्यक्षस्य तम् १ १०६ ४ **क्षयद्वीरस्य**=क्षयन्तो निवासिता वीरा येन तस्य (रुद्रस्य=सभाध्यक्षस्य) १ ११४ ३. **क्षयद्वीराय**=क्षयन्तो विनाशिता

जनम् मनुष्यम् १ ४४ ६ जिज्ञासु मनुष्यम् २ २३ ४ पुरुषार्थेषु प्रादुर्भूतम् (वीरपुरुषम्) १ ४५ १० पुरुषार्थयुक्त धार्मिक विपश्चितम् १ ४५ ६ प्रसिद्ध मनुष्यादिक प्राणिमयम् ३ ५३ १२ शुभाचरणे प्रसिद्धम् (राजानम्) ६ ५२ १० **जनस्य**=श्रेष्ठस्य देवस्य मनुष्यस्य १ ७० १ जातस्य (ससारस्य) १५ २७ **जनः**=यशसा प्रादुर्भूत (मनुष्य) १ १३६ ५ उत्तमगुणकर्मभिर्वर्त्तमान (राजा) १ ५४ ७ यो विद्याधर्माभ्या परोपकारान् जनयति प्रकटयति स अ०—विद्वान्) ३ ५५ उत्तमो विद्वान् ७ ५५ ५ प्रजा-सेनास्थो मनुष्य १ ४१ १ **जनान्**=मनुष्यादीन् १ ६४ १३ धार्मिकान् मनुष्यान् १ १३२ ५. मनुष्यादीन् प्राणिन १ ५० ३ प्रसिद्धान् वीरान् (मनुष्यान्) ३ ४६ २ **जनानाम्**=शुभगुणेषु प्रादुर्भूतानाम् (मनुष्याणाम्) १ १७७ १ सज्जनाना मनुष्याणाम् १ ८१ ६ राजप्रजा-पुरुषाणाम् ४ ४ ६ **जनाय**=धर्म्ये प्रसिद्धाय (मनवे=मनुष्याय) १ १३० ५ राज्ञे ७ ३४ ६ शुभगुणविद्यासु प्रादुर्भूताय विदुषे १ ११७ ६ जनसमूहाय १ ६२ १७ परोपकारे प्रसिद्धाय (अध्यापकाय) ७ १६ १२ सत्पुरुषाय २ ३४ ८ सेवकाय जीवाय १ १३ ८ जीवस्य रक्षणाय १ ३६ १६ **जनाः**=विद्याविज्ञानेन प्रादुर्भूता मनुष्या १२ १११ मनुष्या प्राणा वा २५ २३ जगत् के जीवनहेतु प्राणो, आर्याभि० १ १७, ऋ० १ ६ १६ १० शौर्य-धनुर्वेदकुशला अतिरथा मनुष्या १ १०२ ५ प्राणा इव वर्त्तमाना (मनुष्या) ६ ११ ४ जीवा १ ८६ १० **जने**=सम्बन्धिनि पुरुषे १ ११३ १६ विद्याधर्मादिगुणै प्रसिद्धे मनुष्ये १ ४८ ११ गुणैरुत्कृष्टे सेवनीये (पुरुषे) १ ६६ २ जनेषु=सत्याचरणेषु मनुष्येषु ५ ३१ १३ यत्र-कारकेषु विद्वत्सु, लोक-लोकान्तरेषु वा, ऋ० भू० ३०६ [जनी प्रादुर्भावे (दिवा०) धातो पचाद्यच्प्रत्यय। अथवा घञ्-प्रत्यय, 'जनिवध्योश्च' सूत्रे वृद्धि-प्रतिषेध। अन्तो वा एषा ऋद्धीना यज्जन मै० २ २ ६ इय (पृथिवी) वाव जनो यो वा इमामेति न स पुनरागच्छति काठ० २५ ७ एष ह वै पद्भ्या पाप करोति यो जनमेति जै० २ १३५]

जनमाने उत्पद्यमाने (जगति) प्र०—अत्र विकरण-व्यत्यय ३३ ४१ [जनी प्रादुर्भावे (दिवा०) धातो शानच्। विकरणव्यत्ययेन शप् जनमाने=जनिष्यमाणे नि० ६ ८]

जनय उत्पादय १ ११३ १६ प्रकटय ३४ ३६ उत्पन्न कर, स० वि० १३८, अथर्व० १४ २ ३१ **जनयत्**=जनयेत् १ ७१ ८ जनयति ३३ ११ **जनयत**=जनयति, प्र०—अत्र लड्यडभावो 'बुधयुध०' इति परस्मैपदे प्राप्ते व्यत्ययेनात्मनेपदम् १ ६५ ४ **जनयतम्**=उत्पादयतम् १ १८५ ३ **जनयथ**=उत्पादयत ११ ५२ [जनी प्रादुर्भावे (दिवा०) धातोर्णिजन्ताल् लोट्। 'बुध-युधनशजन०' अ० १ ३ ८६ सूत्रेण परस्मैपदम्। अन्यत्र लड् तत्राऽडभावश्छान्दस]

जनयत्यै सर्वसुखोत्पादिकाय राज्यलक्ष्म्यै, भा०—पूर्णश्रियै १ २२ [जनी प्रादुर्भावे (दिवा०) धातोर्णिजन्ताच् शतृप्रत्ययान्तात् ङीप्। नुमोऽभाव]

जनयन् प्रकाशयन् (विद्वज्जन) १ १४८ ८ उत्पादयन् (विश्वकर्मा=परमेश्वर) १७ १८ प्रकटयन् (अग्नि=परमेश्वर) ७ ५ ६ [जनी प्रादुर्भावे (दिवा०) धातोर्-णिजन्ताच् शतृप्रत्यय]

जनयन् जनयति ३ २ १२ जगत् का कर्त्ता है, आर्याभि० २ ३४, १७ १६ प्रकाश करता है, स० वि० ८०, अथर्व० ११ ५ २४ [जनी प्रादुर्भावे (दिवा०) धातोर्णिजन्ताल् लड् अटोऽभावश्च। अन्यत्र=जनी प्रादुर्भावे धातोर्णिजन्ताच्छतृ-प्रत्यय]

जनयन्त जनयन्ति, प्र०—अत्राऽडभाव १ ५२ २ प्रकटयन्ति १ १४१ २ उत्पादयन्त, प्र०—अत्र लोडर्थे लड्ऽडभावश्च ७ २४ उत्पादयेयु, प्र० अत्र लड्यडभाव १६ ८४ जनयेयु ३ २ ३ प्रादुर्भवेयु ३३ ८ [जनी प्रादुर्भावे (दिवा०) धातोर्णिजन्ताल्लड्। अडभावश्च। 'बुधयुधनशजन०' इति परस्मैपदे प्राप्ते व्यत्ययेनात्मनेपदम्]

जनयन्तः निष्पादयन्त (देवा=विद्वासो जना) ३१ २१ प्रकटयन्त (भा०—सभाध्यक्षादयो जना) १ ८५ २ [जनी प्रादुर्भावे (दिवा०) धातोर्णिजन्ताच् छतृ-प्रत्यय]

जनयन्ति पुत्रोत्पत्ति करते है, स० वि० १४०, अथर्व० १४ २ ७२ [जनी प्रादुर्भावे (दिवा०) धातो-र्णिजन्ताल् लट्। 'बुधयुध०' इति परस्मैपदम्]

जनुषम् जन्म १ १४१ ४ विद्याजन्म १.१३६ ६. प्रसिद्धाम् (वाचम्) २.४२.१. **जनुष** =जना १ ६१ १४ जन्मानि ६ ६६ ४ प्रसिद्धात् (वेदम = धनाद्विज्ञानाद्वा) २ १७ ६ **जनुषा**=जन्मना ७ २० ३ प्रादुर्भूतेन कर्मणा १ १०२ ८ जातेन जगता सह १ ६४ ६ द्वितीयेन जन्मना ५ २६ १४ **जनुषाम्**=जन्मवताम् (मनुष्याणाम्) ४.१७ २० जनानाम् १ १५ १ १ **जनुषे**=जन्मने ५ ४५ ३ [जनी प्रादुर्भावे (दिवा०) धातो 'जनेरुसि' उ० २ ११५ सूत्रेण उसि प्रत्यय । जनुषम् जन्म नि० ६ ३]

जनूषि जन्मानि ७ ४ १ [जनुष् इति व्याख्यातम् । ततो नपुंसकलिङ्गे प्रथमाबहुवचने रूपम्]

जनू जनन्य प्रकृतय ७ ५८ २ [जनी प्रादुर्भावे (दिवा०) धातोर्बाहुलकादौणादिक उ प्रत्यय । तत स्त्रियाम् ऊङ्प्रत्यय]

जने जने मनुष्ये मनुष्ये ५ ६७ ४ [जनपद व्याख्यातम् । ततो वीप्साया द्विर्वचनम्]

जन्तवः जीवा १ ८१ ६ मनुष्या १ ४५ ६ जना १५ ३१ सब जीव, सन्ताने, म० प्र० २३८, १ ०४८ १ **जन्तवे**=प्राणिने ३ २ १२ **जन्तुभि.**=मनुष्यादिभि १२ १०६ मनुष्यै , प्र०—जन्तव इति मनुष्यनाम, निघ० २ ३, ३ ३ ६ **जन्तुम्**=प्राणिनम् ७ ५८ ३ **जन्तोः**= जीवमात्रस्य ५ ३२ ७ [जनी प्रादुर्भावे (दिवा०) धातो 'कमिमनिजनि०' उ० १ ७३ सूत्रेण तु प्रत्यय । जन्तव मनुष्यनाम निघ० २ ३ मनुष्या वै जन्तव श० ७ ३ १ ३२]

जन्म प्रादुर्भावम् १ ७० ३ प्रादुर्भाव ११ १२ शरीरधारणेन प्रादुर्भावम् १ ७० १ त्रिविद्याजननम् १ ७१ ३ जन्मानि ५ ४१ १४ [जनी प्रादुर्भावे (दिवा०) धातो 'सर्वधातुभ्यो मनिन्' उ० ४ १४५ सूत्रेण मनिन् । अथवा बाहुलकाद् औणादिक (उ० १ १४५) मक्]

जन्मञ्जन्मन् जन्मनि जन्मनि ३ १ २० [जन्मन्-पदस्य वीप्साया द्वित्वम् । जन्मन् व्याख्यानम् । डेर्लुक्]

जन्मन् जन्मनि, प्र०—अत्र 'सुपा सुलुग्०' इति डेर्लुक् १७ ७५ जन्मनि प्रादुर्भावे, अ०—द्वितीये विद्याजन्मनि १२ ५५ **जन्मना**=शरीरेण, अ०—मनुष्यदेहधारणाख्येन १ ८७ ५ **जन्मने**=वर्त्तमानदेहोपयोगाय पुन शरीरधारणेन प्रादुर्भावाय वा १ २० १ जाताय (सञ्चितकर्मनिमित्ताय) १ १६६ १ **जन्मनि**=पूर्वाऽपरे (शरीरधारणाख्ये) १ १४१ ११ वर्त्तमानं प्राप्स्यमान च (शरीरधारणम्) ८.३ [जनी प्रादुर्भावे (दिवा०) धातो 'सर्वधातुभ्यो मनिन्' उ० ४ १४५ सूत्रेण मनिन् । जन्म उदकनाम निघ० १ १२ जन्म जन्मानि जातानि नि० १२.२३ जन्मसु=कर्मसूदयेषु नि० ११ २३]

जन्मेव यथा प्रादुर्भावि कर्म प्रकटयति तथा ३ १५ २ [जन्म व्याख्यानम् । जन्मन्-इवपदयो समास]

जन्यम् जनितु योग्यम् (सुष्टुतिं = प्रशंसाम्) २.३७ ६ **जन्य.**=यो जायते (महाराज) ४ ३८ ६ **जन्या**=जनितारो (वाय्वग्नी) २ ३६ १ **जन्यात्**= उत्पत्स्यमानात् (अहस =अपराधात्) ४ ५५ ५ [जनी प्रादुर्भावे (दिवा०) धातो 'तकिशसिचतियतिजनीनामुपसंख्यानम्' अ० ३ १ ९७ वा०सूत्रेण यत् । 'भव्यगेयप्रवचनीय०' अ० ३ ४ ६८ सूत्रेण कर्तरि वा निपात्यते सपत्ना वै द्विषन्तो भ्रातृव्या जन्यानि ऐ० ८ २६]

जन्येव जनेभ्यो हित इव (अग्नि =जगदीश्वर) २ ६ ७ [जन्य-इवपदयो समास । जन्य =जनप्राति० हितार्थे यत्]

जवारु जवमानरोहम् (नक्षत्रम्) ४ ५ ७ [जवारु= जवमानरोहि जरमाणरोहि गरमाणरोहीति वा नि० ६ १७.]

जभरत् यथावद्धरेत्, पोषयेत्, पुष्येत् ४ १२ २ बिभर्त्ति ४ २ ६ **जभर्थ**=हरसि ४ १६ ६ **जभार**= हरति ३ ४३ ७ धरेत् ४ २७ २ बिभर्त्ति ७ ५६ ४ [डुभृञ् धारणपोषणयो (जु०) धातोर्लेट् । छान्दस द्विर्वचनम् । अन्यत्र लिट्]

जभार हरति, प्र०—अत्र वर्त्तमाने लिट् 'हृग्रहोर्भश्छन्दसि वक्तव्यम्' इति भादेश १ ३२.६ जहार ३३ ३७ [हृञ् हरणे (भ्वा०) धातोर्लिट् । हकारस्य भकारश्छान्दस]

जभ्रिरे भरेयु , प्र०—अत्राऽभ्यासस्य वर्णव्यत्ययेन बस्य ज ६ १७ भरन्ति पुष्णन्ति १ ७२ ४ हरन्तु १ ११९ १४ **जभ्रुः**=बिभ्रति ७ १८ १६ धरन्तु ३ ५४ १ धरन्ति ४ ७ ४ **जभ्रे**=धरति १ ६१ ८ [डुभृञ् धारणपोषणयो (जु०) धातोर्लिटि प्रथमबहुवचने झस्येरेच् । वर्णव्यत्ययेनाभ्यासस्थबकारस्य जकार]

जमदग्निदत्ता चक्षुषा प्रत्यक्षेण दत्ता (वाक्), प्र०—चक्षुर्वै जमदग्निर्ऋषि , शत० ८ १ २ ३, ३ ५३ १५ [जमदग्निदत्तापदयो समास । जमदग्निरग्रिमे पदे द्रष्टव्य]

जमदग्निना चक्षुषा प्रत्यक्षेण ३.६२ १८

कारण जनक वा (वीर्यम्) २३ ५६ जन्मसाधन कर्म ७ ४६ २ उत्पत्तिनिमित्तम् (ऊर्णायुम्=अविम्) १३ ५० जननम् १४ २४ जनकम् २१ ५५ जनक कारणम् ७.३४ २. जन्म १ १६३ ४ भा०—द्वितीय विद्याजन्म २६ १५ भा०—निमित्तकारण (ब्रह्म) २३ ६० [जनी प्रादुर्भावे (दिवा०) धातो 'अगित्रादिभ्य इत्रोत्रौ' उ० ४ १७३ सूत्रेण इत्र प्रत्यय । विड् वै जनित्रम् श० ८ ४ २ ५ वसिष्ठो वा एते (जनित्रे) पुत्रहत सामनी अपश्यत् स प्रजया पशुभि प्राजायत ता० १६ ३ ८]

जनित्री अनेककार्योत्पादिके (द्यावापृथिवी=विद्युद्-भूमी) २६ ३४ मातृवत्सर्वेषा महत्तत्त्वादीनामुत्पादिका (प्रकृति) ३ ३१ १२ उत्पादिका (उषा) १ १२४ ५ उत्पादयित्री (द्यावापृथिवी) १ १८५ ६ माता २ ३० २ **जनित्रीः**=जनन्य (मातर) ६ ५० ७ मातृ ३ ५४ १४ [जनित्र व्याख्यातम् । तत स्त्रिया ङीप् । जनित्री जनयित्र्यौ नि० ८ १४]

जनित्वम् जन्मादिकारणम् (सूर्य) १ ६६ ४ जना हुआ बालक म० प्र० १५२, १० १८८ सन्तानम्, ऋ० भू० २११, उत्पत्स्यमानम्, भा०—यच्च जनिष्यते (कार्यरूप जगत्) २५ २३ जन्म का हेतु (ईश्वर), आर्याभि० १ १७, ऋ० १ ६ १६ १० **जनित्वाः**=ये जनिष्यन्ते ते (पदार्था) ४ १८ ४. **जनित्वैः**=जनिष्यमाणै (जनै) १२ २७ जनित्वम् जनिष्यमाण नि० १० २१ जनी प्रादुर्भावे (दिवा०) धातो 'जनिदाच्युसृवृ०' उ० ४ १०४ सूत्रेण इत्वन्-प्रत्यय]

जनिदाम् या जनि जन्म ददाति (इन्दु=राजानम्) ४ १७ १६ [जनिपद व्याख्यातम् । तदुपपदे डुदाञ् दाने (जु०) धातो क्विप्]

जनिभिः जन्मभिर्जनकैर्वा ६ ५० १३ भा०—यान्य-पत्यानि जनयेयुस्तै (जन्मभि) २६ २४. जनयित्रीभिर्वडवाभि ३ २६ ३ प्रादुर्भूताभि प्रजाभि ७ १८ २ [जनिपद व्याख्यातम् । ततस्तृतीयाबहुवचनम् । देवाना वै पत्नीर्जनय तै० स० ५ १ ७ २ काठ० १९ ७ नक्षत्राणि वै जनय मै० ३ १ ८ श० ६ ५ ४ ८]

जनिम जन्म २ ३५ ६ जन्मानि ३ १ २० [जनी प्रादुर्भावे (दिवा०) धातो 'जनिमृड्भ्यामिमनिन्' उ० ४ १४६ सूत्रेण इमनिन्-प्रत्यय]

जनिमन् जन्मनि प्रादुर्भावे ४ २२ ४ [जनिम-पदे व्याख्यातम्]

जनिमन् प्रशस्ता जनिर्जन्म विद्यते यस्य तत्सम्बुद्धौ (विद्वज्जन) ३ १ ४ जन्मवन् (राजन्) ४ १७ २ [जनि-पद व्याख्यातम् । ततोऽतिशायने मतुप्]

जनिमानि जन्मानि ३ ४ १० [जनी प्रादुर्भावे (दिवा०) धातो 'जनिमृड्भ्याम् इमनिन्' उ० ४ १४६ सूत्रेण इमनिन्-प्रत्यय]

जनियन्त जायामिच्छन्त (विप्रा=मेधाविनो जना) ४ १७ १६ [जनिशब्दादिच्छाया क्यचि शतरि च रूपम्]

जनिवतः जन्मवत (ब्रह्मचारिणो जना) ५ ३१ २ **जनिवान्**=विद्याया जन्मवान् (विद्वान् जन) ५ १४ ७ [जनिप्राति० प्रशसाया मतुप् । 'छन्दसीर' अ० ८ २ १४ सूत्रेण मतुपो मकारस्य वकारादेश]

जनिषीष्ट जनयतु ७ ८ ६ जायेत ४ १८ १ [जनी प्रादुर्भावे (दिवा०) धातोराशिषि लिङ्]

जनिष्ट जायते ५ १ ५ जनयत ५ ६ ३ **जनिष्ठाः**= जनये, प्र०—अत्र लुड्यडभाव ३३ ६४ जनय ७ २८ २ [जनी प्रादुर्भावे (दिवा०) धातोर्लुङ्, अडभाव । 'दीप-जनबुध०' इति चिणो विकल्पे पक्षे सिच्]

जनिष्ठाः अतिशयेन प्रकटा (विद्वासो जना) १ ६८ २ [जनी प्रादुर्भावे (दिवा०) धातो कर्त्तरि तृजन्तादतिशायने इष्ठन् । 'तुरिष्ठेमेयस्सु' सूत्रेण तृचो लोप]

जनिष्यते उत्पत्स्यते २७ ३६ [जनी प्रादुर्भावे (दिवा०) धातो कर्मणि लृटि प्रथमैकवचनम्]

जनिष्यमाणम् उत्पत्स्यमानम् (पदार्थमात्रम्) १८ ५ **जनिष्यमाणः**=प्रसिद्धि प्राप्स्यमान (देव=ईश्वर) ३२ ४ [जनी प्रादुर्भावे (दिवा०) धातो कर्मणि 'लृट सद्वा' सूत्रेण सत्सज्ञक शानच् प्रत्यय]

जनिष्व जनय ६ १५ १८ [जनी प्रादुर्भावे (दिवा०) धातोर्लोट् । 'छन्दस्युभयथा' इत्यार्धधातुकत्व इडागम । 'बहुल छन्दसी' ति शपो लुकि श्यनोऽप्यभाव]

जनी जनयित्री (दुहिता=कन्या) ४ ५२ १ **जनी-नाम्**=जनाना प्रजानाम् १ ६६ ४ जनित्रीणा भार्य्याणाम् ५ ४६ ८ **जनीः**=अपत्यानि प्रादुर्भवित्री (स्त्री) १ १६७ ७ [जनिपद व्याख्यातम् । तत 'कृदिकारा-दक्तिन' इति स्त्रिया ङीप् । जनि जाया नि० १२ ४६ जनीनाम् जायानाम् नि० १२ ४६]

जनीरिव जायमाना प्रजा इव ७ २६.३ [जनी व्याख्यातम् । जनी-इवपदयो समास]

जरां आर्षी (पितरौ) ४.३३ ३. **जरणाम्**=जराऽवस्थाम् ५ ३०.४. **जरणः**=स्तुत्य. १ १४१.३ [जॄष् वयोहानौ (दिवा०) धातोर्बाहु० औणा० युच् । तत गेर्लोपश्छन्दसि । अन्यत्र स्त्रियां टाप् । जरति अर्चतिकर्मा निघ० ३.१४.]

जरण्यया जरणान् विद्यावृद्धानर्हति यया विद्यया तया १ ११६ ३ [जरणापद व्याख्यातम् । जरणप्राति० अर्हत्यर्थे यत् । ततष्टाप् स्त्रियाम् । तृतीयैकवचनम्]

जरताम् स्तुयात् ४ ४ ८ [जरते अर्चतिकर्मा (निघ० ३ १४) धातोर्लोट्]

जरतीः वृद्ध दुष्ट स्त्रियः, म० वि० १३८, अथर्व० १४ २ २६

जरते स्तावकाय (विप्राय=मेधाविजनाय) ६ ६५ ४. [जरति अर्चतिकर्मा (निघ० ३.१४), तत शत्रन्ताच्चतुर्थ्या एकवचनम्]

जरते स्तौति १ १२३ १० स्तकरोति १ ५६.३. [जरते अर्चतिकर्मा (निघ० ३ १४.), ततो लट् । जरते गृणाति नि० ४.२४ जरते स्तुतिकर्मण नि० १०.८]

जरदष्टि. जरं पूर्णमायुर्व्याप्तो य स (जन) ३४ ५२ जराऽवस्था को प्राप्त सुखपूर्वक (स्त्री) सं० वि० १०१ जराऽवस्था ऋ० भू० २०८ **जरदष्टिम्**=वृद्धावस्थाम् ८ ३१ १ [जरत्=जॄष् वयोहानौ (दिवा०) धातोर्बाहु० औणा० अति प्रत्यय । अष्टि=अशूङ् व्याप्तौ संघाते च (स्वा०) धातोर्बाहु० औणा० ति प्रत्यय । तयो समास]

जरद्विषम् जरद् विनष्ट शत्रुरूप विष यस्य तम् (गृहपतिम्) ५ ८ २ [जरद्-विषपदयो समास । जरदिति व्याख्यानम्]

जरन्तम् स्तवानम् (पतिम्) १.११७ १३ [जरति अर्चतिकर्मा निघ० ३.१४ तत शतृप्रत्यय]

जरन्ता स्तुवन्तौ (शिल्पिजनौ) १.१६१.७ [जरति अर्चतिकर्मा निघ० ३ १४. तत शत्रन्तात 'सुपां सुलुग्' इत्याकारादेश]

जरन्ति जीर्णं कुर्वन्ति ६ २८ ७ **जरन्ते**=स्तुवन्ति, प्र०—जरा स्तुतिर्जरते स्तुतिकर्मण, नि० १० ८, १ २ २. [जॄष् वयोहानौ (दिवा०) धातोर्लट् । विकरणव्यत्ययेन शप् । अन्यत्र=जरते अर्चतिकर्मा निघ० ३ १४. जरते स्तुतिकर्मण. नि० १० ८]

जरमाणम् स्तुवन्तम् (इन्द्र=राजानम्) ३ ५१ १

जरमाणः=स्तुवन् (सज्जन) ६ ६२.१. **जरमाणाः**=स्तुवन्त (विद्यार्थिजना) २ २८ २. [जरते अर्चतिकर्मा (निघ० ३ १४) धातोः शानच् । जरते. स्तुतिकर्मण नि० १०.८]

जरयन् नाशयन् (विद्वान् श्रीमज्जन) २ ८.२ **जरयन्तम्**=अन्यान् जरां प्रापयन्तम् (इन्द्र=विद्युतम्) २ १६ १ [जराप्राति० 'तत्करोति तदाचष्टे' इति वा० सूत्रेण णिजन्ताच्छतृप्रत्यय]

जरयन्ती हीनं कुर्वती (उषा.) १.९२ १० या जीर्णामवस्थां भावयन्ती (उषा) १ ४८ ५. वयो गमयन्ती (उषा) १ १२४ १० **जरयन्तीः**=जरां प्रापयन्ती (उषस=प्रभाता) १ १७६ १ [जराप्राति० 'तत्करोति तदाचष्टे' इति वा० सूत्रेण णिजन्ताच्छतरि स्त्रियां ङीप् प्रत्यय । जरा=जॄष् वयोहानौ (दिवा०) धातो 'षिद्भिदादिभ्योऽङ्' इत्यङ् प्रत्यय]

जरसम् जरां वृद्धाऽवस्थाम्, प्र०—अत्र 'जराया जरसन्यतरस्याम्' अ० ७ २ १०१ अनेन जरा-शब्दस्य जरसादेश १.११६ ६ जरा, भा०—यदा शतवार्षिकमायुर्व्यतीयात तदैव शरीरस्य जराऽवस्था भवेत् २५ २२ [जराप्राति० द्वितीयैकवचने 'जराया जरसन्यतरस्याम्' अ० ७.२ १०१ सूत्रेण जरास्थाने जरसादेश. । जरा=जॄष् वयोहानौ (दिवा०) धातो 'षिद्भिदादिभ्योऽङ्' इत्यङ् । तत. स्त्रियां टाप् । जरसा=जरया नि० ११ ३८]

जरसे अर्च्यसे पूज्यसे, प्र०—अत्र विकरणव्यत्ययेन कर्मणि यक स्थाने शप् । जरत इति अर्चतिकर्मसु पठितम् ३.१४, १ ६४ १४ **जरस्व**=स्तुहि, प्र०—अत्र व्यत्ययेनाऽऽत्मनेपदम् । जरतीति स्तुतिकर्मा निघं० ३.१४, ३.३.७ प्रशंस ७ ८ ६ [जरते अर्चतिकर्मा (निघ० ३ १४) धातोर्लट् । अन्यत्र लोट् । प्रथमप्रयोगे कर्मणि प्रयोग, व्यत्ययेन शप् आत्मनेपदञ्च]

जरा वृद्धाऽवस्था १८ ३ **जरायै**=स्तुत्यै १ ३८ १ [जरा व्याख्यातम् । जरा स्तुति नि० १०.८.]

जराते स्तौति ५ ३७ २ **जरामहे**=स्तुमहे २.२३.६. प्रशंसेम ३ ४१ ७. [जरते अर्चतिकर्मा निघ० ३.१४, ततो लेटि रूपम् । 'लेटोऽडाटौ' इत्याडागम. । व्यत्ययेनात्मनेपदम्]

जराबोध ! जरया गुणस्तुत्या बोधो यस्य सैन्यनायकस्य तत्सम्बुद्धौ (सेनाऽधिपते !) १.२७ १० [जरा-बोधपदयो समास । जरा व्याख्यातम् । जराबोध=जरा-

जमदग्नि =प्रज्वलिताऽग्निर्नयनम् १३ ५६ **जमदग्नेः**= चक्षुष, प्र०—चक्षुर्वै जमदग्निर्ऋषिर्यदेनेन जगत् पश्यति, अथो मनुते, तस्माच्चक्षुर्जमदग्निर्ऋषि, श० ८ १ २ ३ अनेनाऽपि प्रमाणेन रूपगुणग्राहक चक्षुर्गृह्यते ३ ६२ चक्षुरित्युपलक्षणमिन्द्रियाणाम्, ऋ० भू० ८१ [जमत्= ज्वलतो नाम (निघ० १ १७) जमत्-अग्निपदयो ममास। जमदग्नय =प्रजमिताग्नयो वा प्र०—ज्वलिताग्नयो वा नि० ७ २४ चक्षुर्वै जमदग्निर्ऋषिर्यदेनेन जगत् पश्यत्यथो मनुते तस्माच्चक्षुर्जमदग्निर्ऋषि श० ८ १ २ ३ प्रजापतिर्वै जमदग्नि श० १३ २ २ १४ जमदग्निर्ह वै माहेनाना पुरोहित आस जै० २ ३१० जमदग्ने सप्ताह विद्रथ चक्षूपीति जै० २ १७० सर्वरूपा वै जामदग्न्य सर्वसमृद्धा ऐ० २ २६]

जम्भकम्=यो जम्भयति नाशयति तम् (जनम्) ३० १६ [जभि नाशने (चुरा०) धातोर्ण्वुल् कर्त्तरि]

जम्भय विनाशय २ २३ ६. **जम्भयतम्**=विनाशयतम् १ १८२ ४ [जभि नाशने (चुरा०) धातोर्लोट्]

जम्भयन् साऽवयवान् दर्शयन् (सूर्य) १ १६१ ८ औषधैर्निवारयन् (भिषक्=वैद्यो जन) १६ ५ **जम्भयन्तः**=विनामयन्त (अश्वा योद्धारो वा) ७ ३८ ७ गात्राणि विनमयन्त (भा०—वीरा राजजना) ८ १६ विनाशयन्त. (विद्वासो जना) २१ १० [जभि नाशने (चुरा०) धातो शतृप्रत्यय। जभी गात्रविनामे (भ्वा०) धातोर्वा णिजन्ताच् छतृ। 'रधिजभोरचि' सूत्रेण नुम्]

जम्भयोः वन्धनयोर्मुखमध्ये ग्रासमिव ११ ७६ **जम्भे**=जम्भन्ति गात्राणि विनामयन्ति येन मुखेन तस्मिन् १५ १५ बन्धने ११ ७६ व्याघ्रस्य मुख इव कष्टे १५ १६. मार्जारमुखे मूषक इव पीडायाम् गुणरूपमुखे १५ १८ वशे, प० वि०, अथर्व० ३ २७ १ **जम्भेभिः**=गात्रविनामै ७ ७ २ **जम्भैः**=गत्याक्षेपै ४ ७ १० विस्फुरणै १ १४३ ५ चालनादिभि स्वगुणै १ १४८ ४ गात्रविक्षेपै ७ ३४ [जभी गात्रविनामे (भ्वा०) धातोर्घञ्प्रत्यय। 'रधिजभोरचि' सूत्रेण नुमागम]

जम्भ्यैः जम्भेषु मुखेषु भवैर्जिह्वादिभि ११ ७८ [जम्भ इति व्याख्यातम्। ततो भवार्थे यत्]

जय उत्कर्ष १० २१ **जयत**=विजयध्वम् १७ ४६ [जि जये (भ्वा०) धातोर्लोट्]

जयताम् विजेतु समर्थानाम् (देवाना=विद्वज्जनानाम्) १७ ४१ [जि जये (भ्वा०) धातो शत्रन्तात् षष्ठ्या बहुवचनम्]

जयतामिव विजयकारिणा योद्धृणा शत्रूणामिव १ २३ ११ [जयतामिति व्याख्यातम्। जयताम्-इवपदयो ममास]

जयति उत्कर्षति १ ३६ ४ **जयतु**=विजयतु ५ ३७ स्वोत्कर्षाय तिरस्करोतु, उत्कर्षतु ७ ४४ [जि जये (भ्वा०) धातोर्लेट्। अन्यत्र लोट्]

जयन् उत्कर्ष प्राप्तुमिच्छन् (सेनापति) ६ ७३ २ उत्कर्ष प्राप्नुवन् (बृहस्पति=सेनापति) १७ ३६ शत्रून् पराजयन् (इन्द्र=राजा) ४ १७ १० विजयन् (विद्वान् राजा) ५ ३१ ६ **जयन्तम्**=शत्रून् विजयमानम् (योद्धजनम्) ६ ७५ १८ शत्रून् पराजयमानम् (इन्द्र=सेनापतिम्) १७ ३८ शत्रूणा विजेतारम् (राजान सेनापति वा) ३४ २० विजयहेतुम् (सेनाद्यध्यक्षम्) १ ६१ २१ विजयमानम् (वल=सेनाम्) ५ ४४ १ दुष्टान् पराजयन्तम् (शूरवीरम्) १७ ४६ [जि जये (भ्वा०) धातो शतृप्रत्यय]

जयन्ती उत्कर्षता प्राप्नुवती सेना १ ११६ १७ जयशीला (युवति स्त्री) १ १२३ २ **जयन्तीनाम्**= शत्रुविजयेनोत्कर्षन्तीनाम् (देवसेनानाम्) १७ ४० [जि जये (भ्वा०) धातो शत्रन्तान् ङीप्]

जयन्तु विजयिन्यो भवन्तु १७ ४३ [जि जये (भ्वा०) धातोर्लोट्]

जयाति जयेत् ५ ३७ ५ शत्रुओ को जीत सके, म० प्र० १८३, अथर्व० ६ १० ६८ १ **जयासि**=जय ६ ३५ २ [जि जये (भ्वा०) धातोर्लेट्। 'लेटोऽडाटो' इत्याडागम]

जयामसि जयाम ४ ४७ १ [जि जये (भ्वा०) धातोर्लट्। उत्तमबहुवचने 'इदन्तो मसि' रिति मस इदन्तता। जयामसि=जयाम नि० १० १५]

जयुषा जयशीलौ (अध्यापकोपदेशकौ) ६ ६२ ७ [जि जये (भ्वा०) धातोर्बाहुलकादौणादिक उसि प्रत्यय। 'सुपा सुलुग्०' इत्याकारादेश]

जयुषा जयप्रदेन (रथेन) १ ११७ १६ [जयुष् इति व्याख्यातम्। ततस्तृतीया]

जयेम उत्कर्षयेम २ ४० ५ शत्रून् विजयेमहि १ १०२ ४ दुष्ट जनो को जीते, आर्याभि० १ ४३, ऋ० १ ७ १४ ४ **जयेयम्**=उत्कर्षयेयम् १८ ३३ [जि जये (भ्वा०) धातोर्लिङि उत्तमबहुवचनम्]

जरणा जरणानि स्तुत्यानि कर्माणि १ १२१ ६.

जलापभेषजम् जलापाय सुखाय भेषज यस्मात्तम् (रुद्रम्=परमेश्वरम्) १ ४३ ४. [जलाप-भेषजपदयो समास । जलापम् उदकनाम निघ० १ १२ सुखनाम निघ० ३ ६ भेषजम्=भिषज् चिकित्सायाम् (कण्ड्वा०) धातो रूपम्]

जलाष सुखकर्त्ता (भेषज =भिषग्जन) २ ३३ ७ दुखनिवारक (रुद्र =परमात्मा जीवो वा) ७ ३५ ६ [जलापम् उदकनाम निघ० १ १२ सुखनाम निघ० ३.६ जल घातने (भ्वा०) जल अपवारणे (चुरा०) धातोर्वा वाहुलकादौणादिक आपच्प्रत्यय]

जल्गुल: अतिशयेन गृणीहि, प्र०—अत्र 'गॄ शब्दे' इत्यस्माद् यङ्लुगन्ताल्लेट् 'बहुल छन्दसि' इत्युपधाया उत्वञ्च १ २८ १ अतिशयेन शब्दय १ २८ २ शृणूपदिश च १ २८ ३ [गॄ शब्दे (क्र्या०) धातोर्यङ्लुगन्ताल् लेट् । धातोर् उपधाया उत्व रपरत्व छान्दसम् । कपिलकादित्वाल् लत्वम्]

जल्प्या जल्पेषु सत्याऽसत्यवादाऽनुवादेषु भवा (अब्रह्मविदो जना), प्र०—अत्र 'सुपा सुलुग्०' इति विभक्तेराकारादेश १७ ३१ [जल्पप्राति० भवार्थे यत् । जल्प = जल्प व्यक्ताया वाचि (भ्वा०) धातोर्घञ्प्रत्यय]

जवनी वेगशीला (सूनृता=अन्नादिसमूहकरी राजनीति) १ ५१ २ **जवनीभि:**=वेगवतीक्रियाभि २ १५ ६ [जु वेगिताया गतौ सौत्रो धातु । ततो ल्युडन्तान् ङीप्]

जवम् वेगम् २५ ३ **जवाय**=वेगाय २२ ८ [जवति गतिकर्मा (निघ० २ १४) धातो 'ऋदोरप्' इत्यप् । 'जवसवौ छन्दसि वक्तव्यौ' अ० ३ ३ ५६ वा० सूत्रेण अच् प्रत्ययो वा । वीर्यं वै जव श० १३ ४ २ २]

जवसा वेगेनेव १ ११८.११ **जवसे**=वेगाय ३ ५० २ **जवासि**=वेगा इव ४ ११ ८ [जु वेगिताया गतौ सौत्रो धातु । जवति गतिकर्मा निघ० २ १४ धातोरौणादिकोऽसुन् प्रत्यय]

जविष्ठम् वेगवत्तमम् (मन =अन्त करणवृत्ति) ६ ९ ५ अतिशयेन वेगवत्तरम् (मन) ३४ ६ अत्यन्त वेगवाला (मन =मन) स० प्र० २४७, ३४४ [जव प्राति० अतिशायन इष्ठन् । जव व्याख्यातम्]

जविष्ठा अतिशयेन वेगवन्तौ (वाय्वग्नी) ४ २ ३ [जवप्राति० अतिशायन इष्ठन् । 'सुपा सुलुग्' इत्याकारादेश । जव व्याख्यातम्]

जवीय: अतिशयेन वेगवत् (ब्रह्म=परमेश्वर.) ४० ४ [जवप्राति० अतिशायन ईयसुन् प्रत्यय.]

जवीयान् अतिशयेन वेगयुक्त (रथ) १ ११७.२. अतिशयेन वेगवान् (वायुयानाग्यो रथ) १ १८३ १. [जव प्राति० अतिशायन ईयसुन्]

जवेते गच्छत ३ ३३ १. [जयति गतिकर्मा निघ० २.१४]

जसमानम् शत्रून् हिंसन्तम् (भुज्यु=पालक जनम् १ ११२.६. [जसु हिंसायाम् (चु०) धातो शानच् । व्यत्ययेनात्मनेपदम् । जसति गतिकर्मा निघ० २ १४]

जसुरये हिंसकाय (अरये=शत्रवे) ६ १३ ५ [जसु मोक्षणे (दिवा०) धातो 'जसिसहोरुरिन्' उ० २ ७३ सूत्रेण उरिन्प्रत्यय । जसुरि जस्तमिव नि० ४ २४.]

जसुरिम् प्रयतमानम् (पतिम्) ५ ६१ ७ [व्याख्यातम्]

जस्यत मुञ्चतु मोचयन्तु १ १९१ ७ [जसु मोक्षणे (दिवा०) धातोर्लोट्]

जस्वने अन्यायेन परस्वप्रापकाय दुष्टाय राज्ञे, प्र०—जसतीति गतिकर्मा, निघ० २ १४, ६ ४४ ११ [जसति गतिकर्मा (निघ० २ १४) धातोर्वनिप्]

जहका गात्रसङ्कोचिनी (जोक इति भाषायाम्) २४ ३६ [ओहाक् त्यागे (जु०) धातो 'जहातेर्द्वे च' उ० २ ३४ सूत्रेण क्वुन् प्रत्ययो द्वित्वञ्च स्त्रिया टाप् ऋतूना जहका काठ० ४७ ८ जहका वैष्णवी मै० ३ १४ १७]

जहती: पूर्वामवस्था त्यजन्ती (विश =प्रजा) ७ ५ ३ [ओहाक् त्यागे (जु०) धातो शत्रन्तान् ङीप्]

जहाति त्यजति १ ९५ ७ **जहातु**=त्यजतु ३ ५३ २१. **जहामि**=त्यजामि १२ १०५ [ओहाक् त्यागे (जु०) धातोर्लट्]

जहि दूरे प्रक्षिप ४ २२ ९ हिन्धि गमय वा १ ४२ २ त्यज ७ ४८ ८ मारय दण्डय वा १ १७६ ४ [हन हिंसागत्यो (अदा०) धातोर्लोट् 'हन्तेर्ज' सूत्रेण धातो स्थाने जादेश]

जहितस्य हातु (जनस्य) प्र०—अत्र हा धातोरौणादिक इतच्प्रत्ययो वाहुलकात् सन्वच्च १ ११६ १० [ओहाक् त्यागे (जु०) धातोरौणादिक इतच् । बाहुलकात् सन्वद्भावाद् द्वित्वम्]

जहिता जहितौ त्यक्तारौ (अन्ध=चक्षुर्विज्ञानविकल,

म्तुतिर्जरते म्तुतिकर्मण , ता वोधय, तया वोधयितरिति वा नि० १० ७]

जराय हानये १ १६४ ११ म्नावकाय २ ३४ १० [जॄष् वयोहानो (दिवा०) जरति अर्चतिकर्मा निघ० ३ १४, धातोर्वा वाहु० औणा० अकारप्रत्यय । ततश्चतुर्थी]

जरायु वृद्धाऽवस्थाप्रापकम् (सभेश राजानम्) १० ८ [जरोपपदे इण् गतौ (अदा०) धातो 'किंजरयो श्रिण' उ० १ ४ सूत्रेण ञुण्]

जरायुणा देहाऽऽवरणेन ५ ७८ ८ वहिराच्छादनेन १९७६ जरामेति येन जरायु तेन वस्त्रेणाऽग्निना वा १७ ५ आवरणेन सह ८ २८ [जरायुपद व्याख्यातम् । ततो नपुसके तृतीयैकवचनम् । जरायु =जरया गर्भस्य जरया यूयत इति वा नि० १० ३६ शणा जरायु श० ६ ६ २ १५]

जरित: । प्रशसक । (सज्जन) ३ ३३ ८ सत्यगुणस्तावक (अग्ने=विद्वज्जन) ३ १५ ५ **जरिता**=स्तावक (प्रजाजन) ५ ३६ ३ स्तोता (इन्द्र =सूर्यवद्राजा) ४ १७ १६ सकलविद्यास्तावक (विप्र =मेधाविजन) ५ ४३ १ सेवक (राजपुरुप) ३ ५२.५ सकलविद्याप्रशसक (विद्वज्जन) ५ ३६ ४ **जरितारम्**=विद्यागुणस्तावक पितरम् ५ ३ ११ गुणाना प्रशमकम् (सज्जनम्) ७ २० २ **जरितार.**=सत्यस्तावका (धार्मिका विद्वास) ७ ३२ २ विद्यालाभस्तोतार (विद्वज्जना) ६ २१ १० स्तोतारोऽर्थाद्वायुगुणस्तावका अर्चकाश्च (विद्वासो जना) १ २ २. **जरितु:**=स्तोतुरध्यापकादुपदेशकात् १ ११८२ ४ **जरितृभ्य:**=सकलविद्यागुणस्तावकेभ्य (विद्वद्भ्य) १ १७५ ६ योगगुणसिद्धीना वेदितृभ्य (योगिभ्य) १ १७६ ६ **जरितॄणाम्**=सद्विद्याविदाम, (मनुष्याणाम्) ४ ३१ ३ **जरितॄन्**=सकलविद्यास्तावकान् (सूरीन्=विद्वज्जनान्) ७ ३ ८ **जरित्रे**=सकलविद्याऽध्यापकाय) ४ २१ ११ विद्यागुणप्रकाशकाय (विद्वज्जनाय) याचमानायाऽयाचिताय वा (जनाय) ४ २४ ११ स्तुतिकर्त्रे (सत्पात्राय जनाय) १ १८५ ३. विद्यामिच्छुकाय (सज्जनाय) ४ २३ ११ विदुषे (जनाय) ४ २२ ११ स्तुत्याय (मनुष्याय) ४ १६ १८ अर्चिताय (विद्वज्जनाय) २ ३८ ११ [जरते अर्चतिकर्मा (निघ० ३ १४) धातो कर्त्तरि तृच्प्रत्यय । जरिता=गरिता नि० १ ७ जरिता=स्तोतृनाम निघ० ३ १६ यजमानो जरिता ऐ० ३ ३८]

जरिमा=अतिशयेन जरिता वयोहानिकर्त्ता (मनुष्य) १ ७१ १. अतिशयेन जरा (वृद्धाऽवस्था) ४ १६ १३ एतस्या स्तुतेर्भावयुक्त (सर्वविद्याभिव्याप्तो विद्वान्) १ ७१.१०. स्ताविका (माता=जननी) ४ ४१ १५ अतिशय वृद्धपन स० प्र० ११०, १ १७६ १ **जरिमाणम्**=प्राप्तजरस देहम् १ ११६ २५ [जॄष् वयोहानौ (दिवा०) धातोर्वाहु० औणा० इमनिच्प्रत्यय । जराप्राति० वा, भावे कर्मणि वा इमनिच्प्रत्ययश्छान्दस]

जरूथम् जराऽवस्थया युक्तम् (जीर्ण मेघम्) ७ ९ ६ जराऽवस्था प्राप्त जीर्ण काष्ठम् ७ १ ७ [जॄष् वयोहानौ (दिवा०) धातो 'जॄवॄञ्भ्यामूथन्' उ० २ ६ सूत्रेण ऊथन् प्रत्यय । जरूथ गरूथ गृणाते नि० ६ १७]

जरेत प्रशसिता भवेत् ४ ३ १५ **जरेथाम्**=स्तुयातम् ३ ५८ २ **जरेथे**=जरयत २ ३९ १. [जरति अर्चतिकर्मा निघ० ३ १४ ततो लिङ् । व्यत्ययेनात्मनेपदम् । जरेथे प्रयोगे लट्]

जर्भुरत् भृश धरेत् २ २ ५ [डुभृञ् धारणपोपणयो (जु०) धातोर्यङ् लुगन्ताल् लेट् । विकरणव्यत्ययेन श । शप्रत्ययस्य ङित्वाद् गुणाऽभावे 'उदोष्ठ्यपूर्वस्य' इत्युकारादेशो रपरत्वश्च]

जर्भुराण: भृश धरन् (वरुण =वरो जीव) २ ३८ ८ भृश गात्राणि विनामयत् (वायु) प्र०—अत्र जृभी धातोरौणादिक उरानन् प्रत्यय ११ २४ **जर्भुराणा**=भृश पोपकानि धारकाणि (शृङ्गाणि=सेनाङ्गानि) २९ २२ अत्यन्त पुष्टानि (शृङ्गाणि=कर्माणि) १ १६३ ११ भृश वर्त्तारौ (अग्निवायू) २ ३९ ३ [डुभृञ् धारणपोपणयो (जु०) धातोर्यङ्लुगन्ताच्छानच् । व्यत्ययेनात्मनेपदम् । अन्यत्र=जृभि गात्रविनामे (भ्वा०) धातोरौणादिक उरानन् प्रत्यय । नुमोऽभावश्छान्दस । नाभिभृशे तन्वा जर्भुराण इति न ह्योपो (अग्नि) ऽभिमृशे तन्वा दीप्यमानो भवति श० ६ ३ ३ २०]

जर्भुरीति भृश धरति ५ ८३ ५ [डुभृञ् धारणपोपणयो (जु०) धातोर्यङ्लुगन्ताल् लट्]

जर्हृषन्त भृश हृष्यन्तु ६ १७ ४ [हृष तुष्टौ (दिवा०), हृषु अलीके (भ्वा०) धातोर्यङ्लुगन्ताल् लङ् । अडभाव । व्यत्ययेनात्मनेपदम्]

जर्हृषाण: भृश हृषित (इन्द्र =विद्वान् सेनापति.) ७ २१ ४ पुन पुनर्हर्ष प्रापयन् (राजप्रजाजन) १ ५२ २ अतिशयेन हृष्ट (अग्नि =शूरवीर सेनापति) ५ ३७ [हृष तुष्टौ (दिवा०) धातोर्यङ्लुगन्ताच् छानच् । व्यत्ययेनात्मनेपदम्]

७ ३ ८५ सूत्रेण गुणप्रतिषेध । जागृवि जागरणात् । नि० ६ ८ यज्ञो वै जागृवि काठ० ३७ १०]

जागृहि विद्यामुन्नय २७ ३ अ०—अस्माँश्च जागृतान् कुरु २७ ३ अविद्याऽन्धकार-निद्रात सर्वान् पृथक्कृत्य विद्याऽर्कप्रकाशे जागृतान् कुरु, अविद्यानिद्रा त्यक्त्वा विद्यया चेत १५ ५४ जागर्ति प्र०—अत्र व्यत्ययो लडर्थे लोट् च ४ १४ निद्रादिक गृहकार्ये परित्यज २७ ३ [जागृ निद्राक्षये (अदा०) धातोर्लोट्]

जाग्रतः भा० जागृताऽवस्थस्य (मम=जनस्य) ३४ १ जागते हुए (मे=मुझ जन) का, स० प्र० २४६, ३४ १ [जागृ निद्राक्षये (अदा०) धातो शतृप्रत्यय]

जाग्रत् जागरणे २० १६ [जागृ निद्राक्षये (अदा०) धातो शतृ । 'सुपा सुलुग्' इति डेर्लुक्]

जाग्रद्भ्यः प्रवुद्धेभ्य (राजपुरुषेभ्य) १६ २३ [जागृ निद्राक्षये (अदा०) धातो शतृप्रत्यय]

जातम् प्रसिद्धम् (पतिम्) ५ ३२ ११ उत्पन्नम् ३२ ५ प्रकटम् (सोमम्=ऐश्वर्यम्) ३ ५१ ८ प्रसिद्धि गतम् (अमृत) २ ८३ ५ प्रादुर्भूत जगत्कर्त्तारम् (भा०—सृष्टिकर्त्तारमीश्वरम्) ३१ ६ प्रसिद्धमुत्पन्न वलम् १ ११७ १६ यत्किञ्चिदुत्पन्न कार्यम् २५ २३ उत्पन्न विज्ञानम् १ १५६ २ **जातस्य**=उत्पन्नस्य कार्यस्य १ ६६ ७ प्रसिद्धस्य जगतो मध्ये २ ३३ ३ **जातः**=प्रकटत्व गत (सेनेश) १ ६६ ४ प्राकट्य प्राप्त, भा०—प्रकटीभूत (देव =ईश्वर) ३२ ४ विद्याजन्मनि प्रादुर्भूत (अग्नि = विद्वान् पुत्र) ४ २ २ प्रकट सन् (सूर =सूर्य) १ १३० ६ प्रादुर्भूतस्य (ससारस्य), प्र०—अत्र षष्ठ्यर्थे प्रथमा २५ १० निष्पन्न , भा०—प्रसिद्ध (अग्नि =सूर्यवद् राजा) १२ १३ जनक (प्रजापति) १३ ४ **जातान्**=उत्पन्नान् प्रसिद्धान् (सपत्नान्=शत्रून्) १५ १ प्रादुर्भूतान् विरोधिन (शत्रून्) १५ २ **जातानि**=प्रसिद्धानि (वलादीनि) ६ २५ ५ उत्पन्न हुए (जड चेतनादिको) को स० वि० ६, १० १२१ १० [जनी प्रादुर्भावे (दिवा०) धातो क्त प्रत्यय । 'जनसनखना सञ्झलो' अ० ६ ४ ४२ सूत्रेण आकारादेश । जात जायमान नि० ८ २१]

जातवेदसम् प्रसिद्धविद्यम् (पतिम्) १ १२७ १. जातेषु विद्यमानम् (पावकम्) ५ २६ ७ जातेषु पदार्थेषु विद्यमानमिव व्याप्तविद्यम् (परमेश्वरम्) १ ४४ ४ जात-विद्यम् (मित्र=सखायम्) ६ ४८ १ जातविज्ञानम् (मित्र=सखायमीश्वरम्) २७ ४२ उत्पन्न वेदविज्ञानम् ११ ५३. प्राप्तविद्यम् (सन्तानम्) ३ ११.४ प्रसिद्ध-प्रज्ञम् (विप्रम्=आप्त मेधाविजनम्) १५ ४७ यो जातान् पदार्थान् विन्दति तम् (सूर्यम्) १ ५० १ यो जातान् वेत्ति, विन्दते, जाता वेदसो वेदा पदार्था वा यस्मात्तम् (सूर्यम्=ईश्वरम्) ८ ४१ यो जातेषु सर्वेषु स्वव्याप्त्या विद्यतेऽथवा जातान् सर्वान् पदार्थान् वेत्ति तम् (चेतन=परमात्मानम्) ३ ३ ८ जात-वित्तम् (अग्नि=विद्युदादिस्वरूपम्) २ २ १ जाता ऋग्वेदादयश्चत्वारो वेदा सर्वज्ञानप्रदा यस्मात् तथा जातानि प्रकृत्यादीनि भूतान्यसङ्ख्यातानि विन्दति, यद्वा जात सकल जगद् वेत्ति जानाति स जातवेदास्तम् (ईश्वरम्) प० वि० । **जातवेदसः**=जातविद्या विद्वास सन्त (विप्रास =मेधाविनो जना) ३ ११ ८ **जातवेदसा**=प्राप्तप्रकटविद्यौ (स्त्रीपुरुषौ) ७ २ ७ **जातवेदसि**=जात-विद्ये (सद्गृहस्थे) ६ १६ ४२ **जातवेदसे**=यो जात सर्व वेत्ति, विन्दति, जातेषु विद्यमानोऽस्ति, तस्मै (जगदीश्वराय) १ ६६ १ उत्पन्न मात्र सब जगत् को जानने वाले, सर्वत्र प्राप्त, विद्वानो से ज्ञात, सब मे विद्यमान, जात अर्थात् प्रादुर्भूत, अनन्त धनवान् वा अनन्त ज्ञानवान् परब्रह्म के लिए, आर्याभि० १ ३३, ऋ० १ ७७ १ जाते जाते उत्पन्ने पदार्थे विद्यमानस्तस्मिन्, अ०—जातवेदसि (अग्नये=रूपादिगुणस्वभावे), प्र०—जाते जाते विद्यते इति वा, जातवित्तो वा, जातधनो, जातविद्यो वा, जात-प्रज्ञानो यत् तज्जात पशूनविन्दतेति तज्जातवेदसो जात-वेदस्त्वमिति, नि० ७ १६, ३ २ जातेषु पदार्थेषु विद्यमानाय जातप्रज्ञानाय वा (भौतिकाऽग्नये परमात्मने वा) ३ १० ३ यो विद्वान् जात सर्व वेत्ति, तस्मै, जातेषु कार्येषु विद्यमानाय वा (ईश्वराय) १ ६४ १ **जातवेदसौ**=जात वेदो विद्या ययोस्तौ (अ०—अध्येत्रध्यापकौ) ५ ३ उत्पन्नाऽखिलविज्ञानौ (स्त्रीपुरुषौ) १२ ६० **जातवेदः**=यो जातान् सर्वान् वेत्ति जातान् विन्दति वा तत्सम्बुद्धौ (अग्ने=परमेश्वर !) १ ४४ १ जात विज्ञान यस्य स (अग्ने=विद्वज्जन) १५ ३५ जातप्रज्ञानवल (तेजस्विन् राजन्) ६ १६ २६ प्रकटविद्य (अग्ने=विद्वज्जन) २७ २२ जाता वेदा प्रज्ञा यस्य तत्सम्बुद्धौ (विद्वन्) १६ ६७ जाता वेदा यस्माद्, जातान् वेदान् वेत्ति, जातान् सर्वान् पदार्थान् विन्दति, जातेषु पदार्थेषु विद्यते वा तत्सम्बुद्धौ (वैश्वानर=जगदीश्वर) १ ५६ ५ जातेषु जनेषु ज्ञानिन् विद्वन् (जन) १६ ३६ जाता विदिता वेदा य य तत्सम्बुद्धौ (अग्ने=विद्वन् राजन्) १२ १६ जातवित्तम् (अग्ने=अग्निम्) प्र०—अत्र विभक्ति-व्यत्यय ३ २६ ४ **जातवेदाः**=जात वेदो विज्ञान यस्य

भोग=विकल च जनम्) ४ ३० १६ [ओहाक् त्यागे (जु०) धातोरौणादिक इतच्प्रत्यय । वाहुलकाच्च सन्-वत्त्वे द्वित्वम् । 'सुपा सुलुग' इत्याकार]

जहीमः त्यजाम ३५ १० [ओहाक् त्यागे (जु०) धातोर्लट्]

जहुः त्यजन्ति २ २४ ७ जहति ७ १८ १५ [ओहाक् त्यागे (जु०) धातो सामान्ये लिट्]

जहृषाणः अतिशयेन हृष्ट (सेनापति) ५ ३७ **जहृषाणेन**=सज्जनाना सन्तोषकेन (मन्युना=क्रोधेन) प्र०—अत्र हृष तुष्टौ इत्यस्माल्लिट कानच्, तुजादित्वाद् दीर्घश्च १ १०१ २]

जह्नावीम् जहत्यास्त्याज्याया शत्रुसेनाया इमा विरोधिनी सेनाम्, प्र०—'जहातेर्द्वेऽन्त्यलोपश्च' उ० ३ ३६ इति हा धातोर्नुस्तत 'तस्येदम्' इत्यण्, पृषोदरादित्वाद् वर्णविपर्यय १ ११६ १६ **जह्नाव्याम्**=जह्नोरत्यक्तुरिय नीतिस्तस्याम्, प्र०—अत्राऽऽकाराऽकारयोर्व्यत्यय ३ ५८ ६ [ओहाक् त्यागे (जु०) धातो 'जहातेर्द्वेऽन्त्यलोपश्च' उ० ३ ३६ सूत्रेण नु-प्रत्यये जह्नु । तत 'तस्येदम्' इत्यण् प्रत्ययान्तान् ङीप् । वर्णव्यत्ययेनाकार याकार, अकारस्य चाका‍ादेश]

जंह. सद्यो ग ता (यजत्र =राजा) ६ १२ २

जागतम् जगज्जानाति येन तत् (छन्द =सृष्टि-विद्या-वलकारक वेदम्) १२ ५ **जागतः**=जगतीप्रगाथोऽस्य स (यज्ञ) ४ २४ **जागतेन**=जगत्या विहितेन साधनेन ११ १० जगत्येव जागत सर्वलोकसुखकारक तेन (छन्दसा=आह्लादकारकेणाऽनुष्ठानेन) २ २५ जगतीप्रगाथो-ऽस्य तेन (छदसा) ५ २ जगतीछन्द प्रकाशितेनाऽर्थेन २३ ८ जगत्युक्तेन (छन्दसा) १३ ५३ जगत्येव जागत तेन (छन्दसा) १ २७ जगद्विद्याप्रकाशकेन (छन्दसा) ११ ६५ **जागतेभ्यः**=जगतीवोधितेभ्य (देवेभ्य =दिव्यगुणेभ्यो जनेभ्य) २९ ६० [जगतीप्राति० 'सोऽस्यादिरिति च्छन्दस प्रगाथेषु' अ० ४ २ ५५ सूत्रेणाण्प्रत्यय । अथवा जगति प्राति० 'छन्दस प्रत्ययविधाने नपुसके स्वार्थ उपसख्यानम्' वा० सूत्रेण स्वार्थेऽण् प्रत्यय]

जागरणम् जागृतम् (प्रवोधम्) ३० १७ [जागृ निद्रा-क्षये (अदा०) धातोर्ल्युट् भावे]

जागरासि जागती रहे, स० वि० १६६, अथर्व० १४ २ २६ [जागृ निद्राक्षये (अदा०) धातोर्लेट् । आडागम]

जागार जागृतो भवति ५ ४४ १५ **जागारः**= अविद्यानिद्राया उत्थाय जागर्ति ५ ४४ १४ [जागृ निद्राक्षये (अदा०) धातोर्लिट् । 'छन्दसि वेति वक्तव्यम्' अ० ६ १ ८. वा० सूत्रेण वा द्वित्वम्]

जागरूके प्रसिद्धे (द्यावापृथिव्यौ) ३ ५४ ७ [जागृ निद्राक्षये (अदा०) धातो 'जागुरूक' अ० ३ २ १६५ सूत्रेण तच्छीलादिषु ऊक प्रत्यय]

जागृतम् प्रसिद्धगुणौ स्त, प्र०—अत्र व्यत्ययो लडर्थे लोट् च १ २१ ६ [जागृ निद्राक्षये (अदा०) धातोर्लोट्]

जागृधुः अभिकाङ्क्षेयु २ १३ १६. [गृधु अभिकाङ्क्षायाम् (दिवा०) धातोर्लिटि प्रथमवहुवचनम् तुजादित्वादभ्यासस्य दीर्घ]

जागृयाम सचेतना अनलसा सन्तो वर्त्तेमहि ९ २३ [जागृ निद्राक्षये (अदा०) धातोर्लिङि उत्तमपुरुषे वहुवचनम्]

जागृवद्भिः अविद्यानिद्रात उत्थातृभि (योगिभिर्जनै) ७ ५ १ अविद्याऽऽलस्य-निद्रा विहाय विद्यापुरुषार्थादिक प्राप्तै (मनुष्येभि =मनुष्यै) ३ २९ २ **जागृवांसः**= अविद्यानिद्रात उत्थाय जागरूका, भा०—पुरुषार्थिन (विप्रास =मेधाविजना) ३४ ४४ अविद्यानिद्रान उत्थिता विद्याया जागरूका (विप्रा =-मेधाविनो जना) ३.१० ९. जागरूका (मेधाविजना), प्र०—अत्र जागर्तेर्लिट स्थाने क्वसु 'द्विर्वचनप्रकरणे छन्दसि वेति वक्तव्यम्' अ० ६ १ ६ अनेन द्विर्वचनाऽभावश्च १ २२ २१ [जागृ निद्राक्षये (अदा०) धातोर्लिट स्थाने क्वसु । 'छन्दसि वेति वक्तव्यम्' इति वा० सूत्रेण द्वित्वाऽभावश्च]

जागृवांसा जागृतौ (सभासेनेशौ) १ १३६ ३ [जागृ निद्राक्षये (अदा०) धातोर्लिट क्वसु । द्वित्वाऽभावश्च छान्दस । 'सुपा सुलुग्०' इत्याकार]

जागृवि जागरूकम् (ज्योति =तेज) २० ३० प्रसिद्धम् (नाम=सज्ञा) ७ २ जागरूका कार्यसाधनेऽप्रमत्ता (सरस्वती=सद्विद्या स्त्री) प्र०—अत्र 'सुपा सुलुक्०' इति सोर्लोप २१ ३६ **जागृविः**=सदा जाग्रदिव (वैश्वानर = पावक) ३ २ १२ जागरूक (अग्नि =विद्युत्) १२ १० यो नित्य धर्म्ये पुरुषार्थे जागर्ति स (अग्नि =सभास्वामी राजा) १.३१ ९ **जागृवे !**=जागृत (अग्ने—विद्वज्जन) ३ ३ ७ जागरूक (अग्ने=प्रकाशयुक्त राजन्) ३.२४.३ [जागृ निद्राक्षये (अदा०) धातो 'जॄशॄस्तॄजागृभ्य क्विन्' उ० ४.५४ सूत्रेण क्विन् । 'जाग्रोऽविचिण्णल्ङित्सु' अ०

राकृतिगणत्वाद् भवाऽर्थेऽञ् 'शेश्छन्दसि बहुलम्' इति शेर्लोप । अत्र सायणाऽऽचार्येण पृषोदराद्याकृतिगणत्वादाद्युदात्तत्व प्रतिपादित, तदशुद्धम्, अनुत्सर्गाऽपवादत्वात् १ ६५ ३ [जनप्राति० भवार्ये 'उत्सादिभ्योऽञ्' अ० ४ १ ८६ सूत्रेणाञ् । उत्सादेराकृतिगणत्वात्]

जानाथ विजानीत, प्र०—लेट्-प्रयोगोऽयम् १८ ६०. **जानाथाम्**=जानीत, प्रादुर्भूतविद्यामाधिके भवत, प्र०—अत्र व्यत्ययो लडर्थे लोट् च २ १६ **जानीहि**=विद्धि १ ५१ ८ [ज्ञा अवबोधने (क्र्या०) धातोर्लोट् । व्यत्ययेनात्मनेपदम]

जानुना उरुजङ्घयोर्मध्यभागौ २० ८ [जानुप्राति० प्रथमाद्विवचनम् । जानु=जनी प्रादुर्भावे (दिवा०) धातो' 'दृसनिजनि०' उ० १ ३ सूत्रेण ञुण्प्रत्यय]

जापयत उत्कर्षेण बोधयत, उत्कृष्टता प्रापयत ९ ११. [जि जये (भ्वा०) धातोर्णिजन्ताल्लोट् । 'क्रीङ्जीना णौ' इत्येच स्थाने आत्वे पुगागम]

जामयः बन्धव इव १ २३ १६ प्राप्तचतुर्विंशतिवर्षा युवतय ३ ५७ ३ पतिव्रता भार्या उव ६ २५ ३ ज्ञानवन्त्यपत्यानि, प्र०—जमतीति गतिकर्मसु पठितम्, निघ० २ १४ अत्र जमु धातो 'इणजादिभ्य' अ० ३ ३ १० अनेनेण्प्रत्यय 'जमतेर्वा स्याद् गतिकर्मण' नि० ३ ६, १ ३१ १० **जामये**=जामात्रे ३.३१ २ जामिभि=बन्धुवर्गै १ १०० ११ स्त्रीभि १ ७१.७ **जामिम्**=भोजनयुक्तम् (स्थानम्) १३ १३ जामाग्रादिकम् ६ ४४ १७ भोगम् ४ ४ ५ प्रसिद्ध (शत्रुम्) १ १११.३ भार्य्याम् १ १२४ ६ जायमानम् (अग्नि=पावकम्) ३ २ ६ **जामि**=उदकमिव शान्तिप्रद (विद्वान् जन) १ ७५ ४ बन्धु (इन्द्र=राजपुरुष) ४ २५ ६ सुखप्रापको बन्धु १ ६५ ४ कन्येव (उषा) १ १२३ ५ ज्ञाता (अग्नि=महाविद्वज्जन) प्र०—अत्र ज्ञा-धातोर्बाहुलकादौणादिको मि प्रत्ययो जाऽऽदेशश्च १ ७५ ३ **जामि**=जातम् (सना=सनातन ब्रह्म) ३ ५४ ९ **जाम्योः**=अत्तव्याऽन्नप्रदयोर्द्यावापृथिव्यो ५ १९ ४ [या प्रापणे (अदा०) धातोर्बाहुलकाद् (उ० ४ ४३) सूत्रेणौणादिको मि प्रत्यय । धातोरादेश्च जकारादेश । जमतीति गतिकर्मसु पठितम् (निघ० २ १४), तत 'इणजादिभ्य । अ० ३ ३ १० वा० सूत्रेण इण्प्रत्यय । जामये=भगिन्यै जामिरन्येऽस्या जनयन्ति जामपत्यम् । जमतेर्वा स्याद्गतिकर्मणो निर्गमनप्राया भवति नि० ३ ६ जामि=अतिरेकनाम, बालिशस्य वा, असमानजातीयस्य वोपजन. नि० ४ २० जामि उदकनाम निघ० १ १२ जामय.=अङ्गुलिनाम निघ० २ ५]

जामर्य्येण जामर्येण जाम, तस्मादृते येन तेन (पयसा=दुग्धेन, धाणिना=अन्नेन) ४.३ ९

जामात.[1] कन्यापतिवद् वर्त्तमान[1] (वायो=विद्वज्जन) २७ ३४ [जाया कन्या मानि मिनोति मिमीते मार्जयतिवेति विग्रहे जायोपपदे माङ् माने (जु०) मा माने (अदा०) धातोर्वा 'नप्तृनेष्टृत्वष्टृ०' उ० २.९५ सूत्रेण तृच् । निपातनाद् या-लोपश्च]

जामि जातम् (सर्व जगत) ३ ५४ ९

जामित्वम् सुख-दु खभोगम् १.१६६.१३ **जामित्वाय**=कन्यावत् पालनाय प्रजाभावाय १ १०५.६ [जामिपद व्याख्यानम् । ततो भावे कर्मणि वा त्व प्रत्यय]

जामी सुखभोक्तारौ (अध्यापकोपदेशकौ) १ १५८ ४ कन्ये इव १ १८५ ५. **जामीन्**=सम्बन्धिनो बन्धून् (मित्राणि) ६ १९ ८ **जामीनाम्**=भोक्तृणाम् (स्वसृणा=भगिनीनाम्) ३ १ ११ [जामिरिति व्याख्यातम् । (जमु अदने (भ्वा०) धातो 'इण् अजादिभ्य' वार्त्तिकेन इण् प्रत्यय । प्रथमाद्विवचने पूर्वसवर्णदीर्घ]

जाम्बिलेन फलविशेषेण २५ ३.

जायत जायते, प्र०—अत्राऽडभाव ४ १ ११ **जायताम्**=उत्पद्यताम् ३५ २२ **जायते**=प्रसिद्धो भवति २.३ ९ उत्पद्यते ५ १ ४ प्रकाशितो भवति २३.४६ **जायन्ते**=उत्पद्यन्ते ३ ३६ ५ **जायसे**=उत्पद्यसे ५ ११ ३ [जनी प्रादुर्भावे (दिवा०) धातोर्लङ्, अडभावश्छान्दस । 'ज्ञाजनोर्जा' इति शिति जादेशश्च । अन्यत्र लोट्लटौ]

जायमानम् उत्पद्यमानम् (भोगम्) १ ६० ३ **जायमानस्य**=कल्पाऽन्ते पुनरुत्पद्यमानस्य कार्यस्य जगत १ ९६ ७ **जायमानः**=उत्पद्यमान (इन्द्र=राजा) ४ १७ ७ प्रसिद्ध (अग्नि=विद्वान् जन) ३ ६ ५ प्रादुर्भवन् (मनुष्य) १ ९६ १ प्रकट सन् (विद्युदग्नि) ६ १० ४ दूसरे विद्याजन्म मे प्रसिद्ध (पुरुष), स० प्र० १०६, ३ ८ ४ विद्याया मातुरन्त स्थित्वा निष्पन्न (विद्यार्थिजन) ३ ८ ४ **जायमानाः**=उत्पद्यमाना (उपस=प्रभातवेला) ६ ५२ ४ [जनी प्रादुर्भावे (दिवा०) धातो शानच्]

जायमाना उत्पद्यमानौ (पूजनीयौ अध्यापकोपदेशकौ) ६ ६७ ४ उत्पद्यमाना (उषा) १ ९२ १० **जायमानाम्**=

स (विद्वज्जन) १ ७ ६ ६ जातप्रज्ञो वेदार्थवित् (मनुष्य) १८ ५ ६ जातानि वेद्यानि धनानि यस्मात् स (अग्नि = पावक) ३.२३ १ यो जातेषु सर्वेषु पदार्थेषु विद्यमानोऽग्नि ३ २६ २ यो जातेषु पदार्थेष्वभिव्याप्य विद्यते स (अग्नि = पावक इवेश्वर) ७ १२ २ यो जातान् विन्दति वेत्ति वा स (सभाध्यक्ष) १ ७७ ५ आविर्भूत विद्यायोगप्रज्ञ, भा०—वेदादिशास्त्रवेत्ता (राजा) ३ ३ १६ जातानां सर्वेषां पदार्थानां वेत्ता जगदीश्वर ३ ५ ४ यो जातेषु पदार्थेषु अजात सन् विद्यते स (जीव) ३ १ २१ [जातशब्दोपपदाद् विद ज्ञाने (अदा०) विद सत्तायाम् (दिवा०) विद्लृ लाभे (तुदा०) विद विचारणे (रुधा०) विद चेतनाख्याननिवासेषु (चुरा०) धातोर्वौणादिकोऽसुन्। जातवेदा कस्मात्? जातानि वेद, जातानि वैनं विदु, जाते जाते विद्यत इति वा, जातवित्तो वा जातधन, जातविद्यो वा जातप्रज्ञान। 'यत्तज् जात पशूनविन्दतेति तज्जातवेदसो जातवेदस्त्वम्' इति ब्राह्मणम्। 'तस्मात् सर्वानृतून् पशवो ऽग्निमभिसर्पन्ति' इति च। स न मन्येऽयमेवाग्निरिति। अप्येते उत्तरे ज्योतिषी जातवेदसी उच्येते ततो नु मध्यम। ···अथासावादित्य, ·····अयमेवाग्निर्जातवेदा निपानमेवैते उत्तरे ज्योतिषी एतेन नामधेयेन भजेते नि० ७ १६ २०

सो ऽब्रवीज्जाता वै प्रजा अनेनाविदमिति, यदब्रवीज्जाता वै प्रजा अनेनाविदमिति तज्जातवेदस्यमभवत्तज्जातवेदसो जातवेदस्त्वम् ऐ० ३ ३६ प्राणो वै जातवेदा स हि जातानां वेद ऐ० २ ३६ तद् यज्जात जात विन्दते तस्माज्जातवेदा श० ६ ५ १ ६८ वायुर्वै जातवेदा वायुर्हीदं सर्वं करोति यदिदं किञ्च ऐ० २ ३४ जातवेद शिवो भव तै० स० ४ १ ६ ४ यज्जात पशूनविन्दत तज्जातवेदसो जातवेदस्त्वम् मै० १ ८ २]

जाता जातौ (अश्विनौ = अध्यापकोपदेशकौ) १ १८१ ४ [जातपद व्याख्यातम्। 'सुपा सुलुगि०' त्याकारादेश]

जाता प्रसिद्धा (वाक्) ६ ६१ १२ **जातासु** = उत्पन्नासु प्रजासु ३ ५५ ५ **जातेभिः** = उत्पन्नै (सृष्टिपदार्थै) ३ ३१ ११ [जात इति व्याख्यातम्। तत स्त्रिया टाप्। जातेभि = भिस ऐसादेशो न भवति छन्दसत्वात्]

जातूभर्मा यो जातान् जन्तून् बिभर्त्ति स (इन्द्र = सेनाद्यध्यक्ष) प्र०—अत्र जनिधातोरुत्तु प्रत्ययो नकारस्याकारादेशोऽन्येषामपीति दीर्घ १ १०३ ३ [जातु = जनी प्रादुर्भावे (दिवा०) धातोरौणादिकस्तु प्रत्ययो नकारस्य चाकारादेशो बाहुलकात्। तदुपपदे डुभृञ् धारणपोषणयो (जु०) धातोर्मनिन्प्रत्यय]

जातूष्ठिरस्य कदाचिल्लब्धस्थिते. (मेनेरस्य) २ १३ ११ [जातु-स्थिरपदयो समास। संहितायां दीर्घ]

जानतः धार्मिकान् विदुष (जनान्) ३ ४२ जानने वाले (विद्वानो) को, स० वि० १४७, ३ ४२ **जानता** = विदुषा (जनेन) ५ ५१ १५. [ज्ञा अवबोधने (क्र्या०) धातो शतृप्रत्यय। 'ज्ञाजनोर्जा' इति शित्प्रत्यये जादेश]

जानताम् विज्ञानवन्तो भवत, ऋ० भू० ६२, १० १६१ २ [ज्ञा + शतृ इति व्याख्यातम्। तत षष्ठ्या बहुवचनम्]

जानती ज्ञापयन्ती (उषा) १ १२३ ६ या जानाति सा स्त्री १ १३४ १ विज्ञानवती (वैद्या स्त्री) ३ ३ ५६. प्रबुध्यमाना (प्रज्ञा) १ १०४ ५ **जानतीः** = ज्ञानयुक्ता (विदुषी स्त्री) १ १४० ७ ज्ञानवत्य (उषास = प्रभातान्) ३ ३१ ४ विज्ञानवती (ग्रा = वाण्य) ४ १ १६ [ज्ञा अवबोधने (क्र्या०) धातो शत्रन्तान् ङीप्]

जानते जानन्ति ३ ५७ ३ जानते और जनाते है प० वि० [ज्ञा अवबोधने (क्र्या०) धातोर्लट्। व्यत्ययेनात्मनेपदम्]

जानतः धार्मिकान् विदुष (जनान्) ३ ४२ **जानन्** = जानन्ती च (पुरुष स्त्री च) १५ ५६ [ज्ञा अवबोधने (क्र्या०) धातो शतृ। शिति प्रत्यये धातोर्जादेश]

जानन् जानीयु १७ ४७ **जानन्तु** = विदन्तु ३ ४२ सुहृत् जाने स० वि० १४७, ३ ४२ [ज्ञा अवबोधने (क्र्या०) धातो सामान्ये लङ्। अडभावश्छान्दस। अन्यत्र लोट्। शितिप्रत्यये जादेश]

जानम् जायते यस्मात्तदाकाशम्, प्र०—अत्र जनधातो घञ्, स्वर-व्यत्ययेनाऽऽद्युदात्तत्वम्। सायणाऽऽचार्येणेद जनिवध्वो' इत्यादीनामबोधादुपेक्षितम् १ ३७ ६ प्रादुर्भावम् ५ ५३ १ [जनी प्रादुर्भावे (दिवा०) धातोर्घञ् प्रत्यय]

जानराज्याय जनानां विदुषां मध्ये परमराज्यकरणाय, ऋ० भू० २२२, ६ ४० जनानां राज्ञां माण्डलिकानामुपरि प्रभवाय (महाराजाय) १०.१८ बडे-बडे विद्वानो मे युक्त राज्य पालने के लिए, स० प्र० १८३, ६ ४० जनाना राजसु भवाय (इन्द्रियाय = धनाय) ६ ४०. [जन-राज्यपदयो समासे भवार्थेऽण् प्रत्यय]

जाना जनेषु भवानि (कर्माणि), प्र०—अत्रोत्सादे-

जिगातु=प्रशसति २ ३४ १५ [जिगाति गतिकर्मा निघ० २.१४ ततो लोट्। गा स्तुतौ (जु०) धातोर्वा लोट्]

जिगाय जयति ६ ३२ ३ जयेत् ३ ३४ ४ जयति, उत्कर्षता प्रापयति, प्र०—अत्र लुङर्थे लिट् १ ३० १६ [जि जये (भ्वा०) धातोर्लिट्। 'सन्लिटोर्जे' अ० ७ ३ ५७ सूत्रेणाभ्यासादुत्तरस्य कवर्गादेश]

जिगीवान् जयशील (अर्य =ईश्वर) २ १२ ४ **जिगीवांस.**=शत्रुधनानि जेतुमिच्छन्त (वीरजना) ५ ६२ ६ जेतु शीला (प्रजाजना) ६ १६ ७ [जि जये (भ्वा०) धातोर्लिट क्वसु। 'सन्लिटोर्जे' इत्यभ्यासादुत्तरस्य कुत्वम्]

जिगीषति शत्रून् जेतुमिच्छति, ऋ० भू० २३८, [जि जये (भ्वा०) धातोरिच्छाया सन्। ततो लट्]

जिगीषमाणम् जेतुमिच्छन्तम् (रूपम्) १ १६३ ७ शत्रून् विजयमानम् (वीरस्योत्तमरूपम्) २६ १८ [जि जये (भ्वा०) धातोरिच्छाया सन्नन्ताच् छानच्। व्यत्ययेनात्मनेपदम्]

जिगीषा जेतुमिच्छा १ १८६ ४ जेतुमिष्टानि (अहानि=दिनानि) १ १७१ ३. [जि जये (भ्वा०) धातोरिच्छाया सन्। तत स्त्रियाम् 'अ प्रत्ययात्' इत्यकारप्रत्यये टाप्]

जिगीषु. जयशील (विद्वज्जन) २ ३८.६ [जि जये (भ्वा०) धातोरिच्छाया सन्नन्तात् ताच्छील्ये 'सनाशसभिक्ष उ' अ० ३ २ १६८ इत्युकारप्रत्यय]

जिगृत उद्गिरत ७.५७.६ **जिगृतम्**=जागृतो भवतम् १ १५८ २ उपदेशयतम् ४ ५० ११.

जिगेथ जितवानसि १ १०२ १०. **जिग्यथुः**=विजयेथे ६ ६६ ८ [जि जये (भ्वा०) धातोर्लिटि मध्यमैकवचनम्। 'सन्लिटोर्जे' इत्यभ्यासादुत्तरस्य कुत्वम्]

जिग्युभि. विजेतृभि (शूरवीरैर्जनै) १.१०१ ६

जिग्युषः विजययुक्तान् (धार्मिकाञ्जनान्) १ १७ ७ जयशीलस्य (राज्ञ) ७ ३२ १२. **जिग्युषे**=जयशीलाय (वीरपुरुषाय) २७ ३८ [जि जये (भ्वा०) धातोर्लिट। क्वसु। अभ्यासादुत्तरस्य पूर्ववत् कुत्वम्]

जिग्ये जयति, जितवान् भवति १ ३२ १३ पराजितो भवति ६ ६६ ८ [जि जये (भ्वा०) धातोर्लिट्। व्यत्ययेनात्मनेपदम्]

जिघत्नु. हन्तुमिच्छु (प्रजाहिंसको जन) २ ३०.६ [हन हिंसागत्यो (अदा०) धातोर्बाहुलकाद् (उ० ३ ३१) औणा० क्नु मनवच्च कार्यम्]

जिघर्त्ति क्षरति ४.१७ १४ **जिघर्मि**=प्रदीप्ये सञ्चालयामि वा ४ २२ [घृ क्षरणदीप्त्यो (जु०) धातोर्लट्। 'बहुल छन्दसि' अ० ७ ४ ७८ सूत्रेणाभ्यासस्येत्वम्। जिघर्त्ति जिघर्त्ते निश्चनिकर्मण नि० ७ २४]

जिघांसतः हन्तुमिच्छत (मनुष्यात्) १ ८० १३. जो मारने की इच्छा करता है, उस मनुष्य से, सायाभि० ११२, १३.१०.१५ **जिघांसद्भ्यः**=हन्तुमिच्छद्भ्य (प्रजाजनेभ्य) १६ २१ **जिघांसन्**=हन्तुमिच्छन् (इन्द्र=राजा) ४ २३ ७ [हन हिंसागत्यो (अदा०) धातोरिच्छाया सन्नन्तात् शतृप्रत्यय.। 'अभ्यासाच्च अ० ७ ३ ५५ सूत्रेणाभ्यासादुत्तरस्य कुत्वम्]

जिघांसति हन्तुमिच्छति, भा०—हिंसितुमिच्छति (मनुष्य) २२ ५ **जिघांसति**=हन्तुमिच्छति १.१८० २ [हन हिंसागत्यो (अदा०) धातोरिच्छाया सन्नन्ताल्लट्]

जिघ्नते हन्त्रे (शत्रवे) १ ८० ५. [हन हिंसागत्यो (अदा०) धातो शतृ। 'बहुल छन्दसि' इति शप श्लु]

जिघ्नते हन्ति ६ ५६.२ प्राप्नोति ६ ५३ ३ गच्छन्ति, प्र०—अत्र 'बहुल छन्दसि' इति शप श्लुर्व्यत्ययेनाऽऽत्मनेपद च १ ५४ १०. घ्नन्ति गमयन्ति २६ ५०. **जिघ्नन्ते**=हिंसन्ति प्र०—अत्र 'बाच्छन्दसि सर्वे विधयो भवन्ति' इति अदादेशविकल्प १ ६४ ११. **जिघ्नसे**=हन्या प्र०—अत्र हनधातोर्लेटि शप स्थाने श्लुर्व्यत्ययेनाऽऽत्मनेपद च १.१०२.७ [हन हिंसागत्यो (अदा०) धातोर्लेट्। शप स्थाने श्लुश्छान्दस। व्यत्ययेनात्मनेपदश्च]

जिघ्नमानः घ्नन् सन् (राजा) ३.३०.४. [हन् हिंसागत्यो (अदा०) धातो शानच्। 'बहुल छन्दसि' इति सूत्रेण शप स्थाने श्लु। व्यत्ययेनात्मनेपदम्]

जिघ्रत सुगन्धान् बोधान् वा गृह्णीत ६६. [घ्रा गन्धोपादाने (भ्वा०) धातोर्लोट्। 'पाघ्रा०' इत्यादिना शिति जिघ्रादेश]

जिजिन्वथुः प्रीणीथ, समीक्षा—अत्र सायणाचार्येण भ्रमाल्लिटि मध्यमपुरुषद्विवचनान्तप्रयोगे सिद्धेऽप्यन्तमशुद्ध प्रथमपुरुषबहुवचनान्त साधितमिति वेद्यम् १ ११२.६ [जिवि प्रीणनार्थे (भ्वा०) लिटि मध्यमपुरुषस्य द्विवचने रूपम्]

जिजीविषेत् जीवितुमिच्छेत् ४० २. जीने की इच्छा

प्रसिद्धाम् (मेधाम्) ५ ४२ १३. [जनी प्रादुर्भावे (दिवा०) धातो शानच्। तत 'सुपा सुलुगि' त्याकार। अन्यत्र स्त्रिया टाप्]

जायवः जयशीला (शूरा जना), जेतार शूरा (जना) १ १३५ ८ शत्रून् विजेतार (वीरजना) १ ११६ ३ **जायुः**=प्रजेता (जन) १ ६७ १ [जयत्यभिभवति तिरस्करोति शत्रून् इति विग्रहे जि जये (भ्वा०) धातो 'कृवापाजिमि०' उ० १ १ सूत्रेण उण्-प्रत्यय]

जाया स्त्री, स० वि० १४१, अथर्व० ३ ३० २ पत्नी ३ ५३ ४ जायन्ते यस्या अपत्यानि सा (स्त्री) ३ ५३ ६ **जायाम्**=स्वस्त्रियम् १ ८२ ५ [या जायते यस्या वा सेति विग्रहे जनी प्रादुर्भावे (दिवा०) धातो 'जनेर्यक्' उ० ४ १११ सूत्रेण यक्प्रत्यय। 'ये विभाषा' इति सूत्रेण व्यवस्थितविभाषाविज्ञानात् पत्न्या नित्यमात्वम्। स्त्रिया टाप्। पतिर्जायां प्रविशति गर्भो भूत्वा स मातर तस्या पुनर्नवो भूत्वा दशमे मासि जायते तज्जाया जाया भवति यदस्या जायते पुन ऐ० ७ १३ तद् यदब्रवीद् (ब्रह्म) आभिर्वा अहमिद सर्व जनयिष्यामि यदिद किञ्चेति तस्माज्जाया अभवस्तज्जायाना जायात्व यच्चासु पुरुषो जायते गो० पू० १ २ अर्धो ह वा एष आत्मनो यज्जाया तस्माद् यावज्जाया न विन्दते नैव तावत् प्रजायतेऽसर्वो हि तावद् भवति, अथ यदैव जाया विन्दतेऽथ प्रजायते, तर्हि हि सर्वो भवति श० ५ २ १ १० जाया गार्हपत्य (अग्नि) ऐ० ८ २४]

जायेव यथा भार्या तथा १ ६६ ३ हृद्या स्त्रीव ४ ३ २ [जाया पद व्याख्यातम्। जाया-इवपदयो समास]

जारम् व्यभिचारिणम् (दुर्जनम्) ३० ६ वयोहानिकारकम् (सूर्यम्) १ १५२ ४ **जारस्य**=लम्पटस्य, रात्रेर्जरयितु सूर्यस्य वा १ ९२ ११ **जारः**=वयोहन्ता सूर्य १ ६९ १ दुःखहन्ता सविता १ ६६ ५ विभागकर्त्ता आदित्य १ ६६ ४ हन्ता सूर्य १ ६६ ४ निवारयिता (सूर्य) ६ ५५ ५ व्यभिचारी वृद्धो वा (जन) १ ११७ १८ व्यभिचारेण वयोहन्ता, अ०—य सर्वत क्षीणो जायते (दुर्जन) २३ ३१ जाल्म इव (पुरुष इव) १ १३४ ३ [आदित्योऽत्र जार उच्यते रात्रेर्जरयिता, स एव भासाम् (नक्षत्राणा ज्योतिषा च) नि० ३ १६ जार जरयिता नि० १० २१]

जारयन्ती वयो गमयन्ती (उषा) १.१२४ १० [जॄ वयोहानौ (चुरा०) धातो शत्रन्तात् ङीप्]

जारयायि जार जराऽवस्था यातु शील यस्य तच्छरीरम् ६ १२ ४ [जारोपपदे या प्रापणे (अदा०) धातोस्ताच्छील्ये णिनि प्रत्यय। जारयायि=अजायि नि० ६ १५]

जारिषुः जारकर्माणि कुर्वन्तु १ १२५ ७ जीर्णानि भवन्तु १ १३७ ८ जरन्तु, प्र०—अत्राऽडभाव १ १३६ ८ [जॄष् वयोहानौ (दिवा०) धातोर्लुङ्। अडभावश्छान्दस]

जार्यम् जराऽवस्था जन्यम् (शेव=सुखम्) ५ ६४ २ [जॄष् वयोहानौ (दिवा०) धातो 'ऋहलोर्ण्यत्' इति ण्यत्]

जासु यासु, प्र०—अत्र वर्णव्यत्ययेन यस्य स्थाने ज ७ ४६ २ [यद् सर्वनाम्न स्त्रिया सप्तम्या बहुवचनम्। वर्णव्यत्ययेन यकारस्य जकार]

जास्पतिम् जायाया पतिम् १ १८५ ८ **जास्पतिः**=प्रजाया पालक (राजा) ७ ३८ ६ [जाया-पतिपदयो समास। छान्दसो वर्णलोप इति या-लोप सुडागमञ्च]

जास्पत्यम् जायापतेर्भावम् जास्पत्यम्, प्र०—अत्र छान्दसो वर्णलोपो वा इति या-लोप सुडागमश्च ३ ३ १२ जायाया पतित्वम् ५ २८ ३ [जाया-पतिपदयो समासे भावे कर्मणि वा 'पत्यन्तपुरोहितादिभ्यो यक्' इति यक्]

जाहुषम् जहुषा गन्तव्यानामिद गमनम्, प्र०—अत्र 'ओहाङ् गतौ' इत्यस्माद् औणादिक उसिप्रत्यय 'तस्येदम्' इत्यण्, १ ११६ २०]

जाहृषाणेन सज्जनाना सन्तोषकेन (मन्युना=क्रोधेन) प्र०—अत्र हृष तुष्टौ, इत्यस्माल्लिट कानच्, तुजादित्वाद् दीर्घश्च १.१०१.२)

जाः यो जनयति सुखानि स (विद्वज्जन) १ १४३ ८ जायमान सूर्य ६ ४७ २१ [जनी प्रादुर्भावे (दिवा०) धातो 'अन्येष्वपि दृश्यते' इति ड प्रत्यय। जा अपत्यनाम निघ० २ २ जा अपत्यम् नि० ६ ६]

जिगर्तिम् प्रशसा निगलन वा ५ २६ ४ [गॄ निगरणे (तुदा०) धातोर्लट्। 'बहुल छन्दसी' ति शप श्लु। गृणाति अर्चतिकर्मा निघ० ३ १४]

जिगात स्तुत्यानि कर्माणि कुरुत १ ८५ ६ प्रशसत ७ ५७ ७ **जिगातन**=प्रशसन्ति ५ ५६ ६ **जिगातम्**=प्राप्नुतम्, प्र०—जिगातीति गतिकर्मा, निघ० २ १४, २ २४ १२ **जिगाति**=स्तौति ३ ३९ १ प्राप्नोति, प्र०—जिगातीति गतिकर्मसु पठितम्, निघ० २ १४ तस्मात् प्राप्त्यर्थो गृह्यते १ २ ३ प्रशसति ७ ४१ गच्छति ५ ८७ ४ **जिगासि**=स्तौषि ३ २२ ३ प्रशससि ५ १५ ४

जिहीष्व त्यज ५ ७८ ५ [ओहाक् त्यागे (जु०) धातोर्लोट् । व्यत्ययेनात्मनेपदम् । 'जहातेश्च' इतीत्वम् । अभ्यासस्येकारादेशश्छान्दस]

जिह्मम् कुटिलम् (उत्स=कूपम्) १ ८५ ११. **जिह्मानाम्**=कुटिलानाम् (दुर्जनानाम्) २ ३५ ६ [ओहाक् त्यागे (जु०) धातो 'जहाते सन्वदाकारलोपश्च' उ० १ १४१. सूत्रेण मन्प्रत्यय । जिह्माना जिह्म जिहीते नि० ८ १५]

जिह्मवारम् जिह्म कुटिल वारो वरण यस्य तम् (यानस्थमुदकाधार कुण्डम्) १ ११६ ९ [जिह्म-वारपदयो समास]

जिह्मश्ये जिह्म शेते स जिह्मशीस्तस्मै शयने वक्रत्व प्राप्ताय जनाय, प्र०—'जहाते सन्वदाकारलोपश्च' उ० १ १४० अनेनाऽय सिद्ध 'जिह्म जिहीतेरूर्ध्वमुच्छ्रितो भवति, ८ १५, १ ११३ ५ [जिह्म व्याख्यातम् । तदुपपदे शीङ् शये (अदा०) धातो क्विप् । ततश्चतुर्थ्या एकवचनम्]

जिह्वरतम् कुटिलौ भवतम्, अ०—कुटिले भवेता तथा कुरुतम् ५ १७ [ह्वृ कौटिल्ये (भ्वा०) धातोर्लोट् । 'छन्दसि वा' इति द्विर्वचनम्]

जिह्वया वाण्या ५ ४८ ५ वाचा ३३ ९३ रसनेन्द्रियेणेव किरणज्वालासमूहेन १ ४६ १० ज्वालाशक्त्या १ १४८. सत्यप्रियया वाचा १७ ८ ज्वालेव वर्त्तमानया (विशेषतया) ३ ३५ ९ **जिह्वा**=रसनेन्द्रिय वाग् वा १ ८७ ५ जुहोति शब्दमन्न वा ,यया सा जिह्वा २० ६ जिहीते विजानाति रसमनया सा, प्र०—'शेवायह्वाजिह्वा०' उ० १ १५२ अनेनाऽय निपातित १.३० जुहोति गृह्णाति यया सा (सरस्वती=वाणीव ज्ञानवती स्त्री) १९ ८८ रसेन्द्रियम् ८ २४ **जिह्वाभि**.=विद्याविनययुक्ताभिर्वाग्भि , प्र०—जिह्वति वाङ्नाम, निघ० १ ११, ६ १६ २ **जिह्वाम्**= ज्वालाम् २७ १८ जोहवीति यया ता वाचम् १३ १५ **जिह्वाः**=काल्यादय सप्त सङ्ख्याका ज्वाला १७ ७९ [जयति यया सेति विग्रहे जि जये (भ्वा०) धातो , 'शेवायह्वा-जिह्वा०' उ० १ १५४ सूत्रेण वन्प्रत्ययान्तो निपात्यते । निपातनाद् धातोर्हुगागम । जिह्वा वाङ्नाम निघ० १ ११ जिह्वा जोहुवा नि० ५ २७ जिह्वा कोकुवा नि० ५ २६.]

जीजनत् जनयति ४.१६ ३. जनयेत्, प्र०—अत्र लुड्यडभाव १ १२६ ११ **जीजनन्**=जनयेयु , प्र०—अत्राऽडभाव १ १५१ १ जनयन्ति ४ ६ ८ **जीजनन्त**= जनयन्ति, प्र०—अत्र लडर्थे लुडडभावश्च १.६० ३. **जीजनम्**=जनयेयम् ७ १५ ४ [जनी प्रादुर्भावे (दिवा०) धातोर्णिजन्ताल् लुङ् । अडभावश्छान्दस]

जीमूतस्येव यथा मेघस्य २९ ३८ मेघस्येव ६ ७५ १. [जीमूतस्य-इवपदयो समास । जीमूतपदमग्रिमे द्रष्टव्यम्]

जीमूतान् मेघान्, प्र०—अत्र 'जेर्मूट् चोदात्त ' इत्यनेनाऽय सिद्ध २५ ८. [जि जये (भ्वा०) धातो 'जेर्मूट् चोदात्त ' उ० ३ ९१ सूत्रेण क्त प्रत्यय । धातोर्दीर्घश्च]

जीयते जेतु शक्यते ३ ५९ २ जितो भवति ५ ५४ ७. [जि जये (भ्वा०) धातो कर्मणि लट्]

जीरदानवः जीवन्ति ते (मरुत =मनुष्या.) ५ ५३ ५ जीवनप्रदा (पर्वता =मेघा) ५ ५४ ९ जीवा (प्राज्ञा सज्जना)२ ३४ ४ **जीरदानुम्**=जीवाऽऽत्मानम् १ १७१ ६ जीवदयाम् १ १७६ ६ दीर्घ जीवनम् १ १८१ ६. जीवस्वरूपम् १.१७४ १० जीवनम् १ १६५ १५ स्वात्मस्वरूपम् १ १७५ ६ जीवननिमित्तम् (वृजन =बलम्) १.१६७ ११. जीवस्वभावम् १ १७८ ५ जीवनोपायम् १.१८२ ८ **जीरदानुः**=यो जीवयति (पर्जन्य =मेघ) ५ ८३.१. **जीरदानू**=यौ जीवन दद्याता तौ (मित्रराजाना=प्राणविद्युतौ) ५ ६२ ३ [जीवति प्राणान् धारयतीति विग्रहे जीव प्राणधारणे (भ्वा०) धातोर् महाभाष्यकारसम्मत्या रदानुक् प्रत्यय । धातोर्वलोपो वलि ऊङ्निषेधश्च बाहुलकाद्]

जीरम् विद्यावन्तम् (विद्वज्जनम्), प्र०—अत्र 'जोरी च' उ० २ २३ इति दीर्घोऽनेन सूत्रेणाऽय सिद्ध १ ४४ ११. वेगम् ५.३१ १२ **जीरः**=वेगवान् (अग्नि =पावक) ३ ३.६. [जीरा क्षिप्रनाम निघ० २ १५ जु वेगिताया गतौ सौत्रो धातु , तत 'जोरी च' उ० २ २३ सूत्रेण रक् प्रत्यय , ईकारश्चान्तादेश । महाभाष्यकारसमत्या तु 'रकि ज्य सम्प्रसारणम्' महाभाष्यम् १ १ ४ वार्तिकेन ज्या वयोहानौ (क्र्या०) धातो रक्प्रत्यये सम्प्रसारणम् । जिनात्यवस्था जहातीति जीर

जीरयः वयोहर्त्तार (शूरा जना) २ १७ ३ ये जीर्यन्ते ते मनुष्या ३ ५१ ५]

जीरा वेगयुक्ता (देवी) १ ४८.३ [जीरप्राति० स्त्रिया टाप् । जीरमिति व्याख्यातम्]

जीराश्वम् जीरान् जीवान् प्राणधारकानश्नुते येन तम् (रथ=यानम्) १ ११९ १ **जीराश्वः**=जीरा वेगा अश्वा यस्मिन् (रथ) १ १५७ ३ जीरा वेगवन्तो बहवोऽश्वा यस्य स (होता=विद्यादातृजन) १ १४१ १२ जीरा

कर, म० वि० १४५, ४० २ [जीव प्राणधारणे (भ्वा०) धातोरिच्छायामर्थे सन् । ततो लिङि रूपम्]

जितम् स्वपुरुषार्थेन लब्धम् (भगम्=ऐश्वर्यम्) ३४ ३५ जयशील (ईश्वर) को, स० वि० १५६, ७४१ २ [जि जये (भ्वा०) धातो क्त प्रत्यय । अन्यत्रौणादिको वाहुलकात् क्त प्रत्यय]

जिनन्ति जयन्ति, प्र०—अत्र विकरणव्यत्यय ४ २५ ५ [जि जये (भ्वा०) धातोर्लट् । विकरणव्यत्ययेन श्ना]

जिनाति अभिभवति ५ ३४ ५ [जि जये (भ्वा०) धातोर्लट् विकरणव्यत्ययेन श्ना]

जिन्व जानीहि १५ ६ विजानीहि १५ ६ प्रीणीहि १४ १७ प्राप्नुहि रक्ष वा १५ ७ प्राप्नुहि जानीहि वा, प्र०—जिन्वतीति गतिकर्मसु पठितम्, निघ० २ १४, ८ ७ सुखय २ २४ १६ प्रसादय ३ ५३ २१ **जिन्वतम्**=प्रीणीतम् १ १५७ २ गमयत प्राप्नुत वा ६ ४९ ६ सुखयतम् १ १११८ २ **जिन्वति**=प्रीणाति १५ २० तर्पयति १३ १४ रचयितु जानाति प्रापयति वा, अ०—स्रष्टु जानाति, भा०—दधाति, जनयति ३ १२ प्राप्नोति १ १६२ ३ पुष्णाति, ऋ० भू० ३०५, ३ १२ **जिन्वतु**=प्राप्नोतु सुखयतु वा २ ४० ६ प्रीणात्वानन्दतु ४ ५३ ७. प्रापयतु ६ ३९ १४ **जिन्वते**=पृणाति ३ २ ११ **जिन्वथ**=प्रीणयथ ३६ १६ प्राप्नुवन्ति ६ ४९ ११ प्रीणयत ११ ५२ **जिन्वथः**=गमयथ २ ४० ३ प्राप्नुथ ५ ७४ ४ गच्छथ ४ ४५ ३ प्रीणीत १ ११२ २२ तर्पयथ १ ११२ ६ प्रीणीतम् १ ११२ २२ **जिन्वन्ति**=प्रीणन्ति १ १६४ ५ तर्पयन्ति १ १६४ ५ **जिन्वतु**=प्राप्नोतु सुखयतु वा २ ४० ६ प्रीणात्वानन्दतु ४ ५३ ७ **जिन्वते**=पृणाति ३ २ ११ **जिन्वे**=तर्पयामि ४ २१ ८ **जिन्वन्**=तर्पयन्तु १ ७१ १ [जिवि प्रीणने (भ्वा०) धातोर्लोट् । लट् लङ् च । 'जिन्वते' 'जिन्वे' प्रयोगयोर्व्यत्ययेनात्मनेपदम् । जिन्वति गतिकर्मा निघ० २ १४ प्रीतिकर्मा नि० ६ २२ जिन्व यजमान मदेनेति तेन प्रीणीहि श० १२ ८ १ ४]

जिन्वन्तः तर्पयन्त (वायव) १ ६४ ८ [जिवि प्रीणने (भ्वा०) धातो. शतृप्रत्यय]

जिन्वम् सर्वै सुखैस्तर्पकम् (ईश्वरम्) १ ८९ ५ तृप्तिकारक (ईश्वर) को, आर्याभि० २ ५०, २५ १८ प्रकाशित करने वाले, प्रीणनीय स्वरूप (ईश्वर) को, आर्याभि० १ १०, ऋ० १ ६ १५.५ [जिवि प्रीणने (भ्वा०) धातोर्वाहुलकाद् औणादिकोऽन्प्रत्यय]

जिन्वासः प्राप्नुवन्त (अध्यापकाऽध्येतारो जना) ७ ३३ १ [जिन्वमिति व्याख्यातम् । तत प्रथमावहुवचने जसोऽसुगागम]

जिव्रयः दृढजीवना (देवा=विद्वासो जना) ४ १९ २ **जिव्रिः**=जीर्णो वृद्ध (विद्वज्जन) १ १८० ५ **जिव्री**=सुजीवनयुक्तौ (पितरा=मातापितरौ) १ ११० ८ जीवन्तौ (पितरा=पितरौ) ४ ३६ ३ **जिव्रेः**=जीर्णाद्, वृद्धाऽवस्था प्राप्तात् जनकात् १ ७० ५ [जृष् वयोहानौ (दिवा०) धातो 'जीर्यते क्रिन् रुच्च व' उ० ५ ४९ सूत्रेण क्रिन् प्रत्ययो रेफस्य च वकारादेश । 'हलि चे' ति प्राप्तो दीर्घोऽपि वाहुलकान्न भवति । जिव्रय जीर्णा नि० ३ २१]

जिषे शत्रून् जेतुम्, प्र०—अत्र 'तुमर्थे सेऽसेन०' इति क्से प्रत्यय १ १११ ४ [जि जये (भ्वा०) धातोस्तुमर्थे क्से प्रत्यय]

जिष्णु जयशीलम् (क्षत्र=क्षत्रियकुलम्) ११ ८१. **जिष्णुना**=जयशीलेन (इन्द्रेण=सेनापतिना) १७ ३४ **जिष्णुः**=जयशील (युवा=प्राप्तयौवनो जन) २२ २२ **जिष्णोः**=जयशीलस्य (अश्वस्य) २३ ३२ [जि जये (भ्वा०) धातोस्तच्छीलादिष्वर्थेषु 'ग्लाजिस्थश्च क्स्नु' अ० ३ २ १३९ सूत्रेण क्स्नु प्रत्यय]

जिहताम् प्राप्नुवन्तु ११ ३८ **जिहते**=प्राप्नुवन्ति ५ ८३ ४ गच्छन्ति ५ ८७ ३ **जिहाताम्**=प्राप्नुत ७ ३४ २४ **जिहाते**=गच्छत ५ ३२ ९ [ओहाङ् गतौ (जु०) धातोर्लोट् । अन्यत्र लट् च]

जिहानः प्राप्नुवन् (विद्वज्जन) ३ ३८ १ [ओहाङ् गतौ (जु०) धातो शानच्]

जिहीत स्वस्थानाच्चलति, प्र०—अत्र लडर्थे लिङ् १ ३७ ७ गच्छति ५ ४५ ३ **जिहीते**=प्राप्नोति ३ ५१ ४ गमयेते ५ ३२ १० विज्ञापयति १ १०५ १८ ओहाङ् गतौ (जु०) धातोर्लिङ् । अन्यत्र लट्]

जिहीळानस्य अज्ञानादस्माकमनादर कृतवतो जनस्य, प्र०—अत्र 'पृषोदरानि यथोपदिष्टम्, इत्येकारस्यैकार १ २५ २ [हेडृ अनादरे (भ्वा०) धातो शानच् । 'बहुल छन्दसी' ति शप श्लु]

जिहीळिरे क्रोधयेयु ७ ५८ ५ [हेळते क्रुध्यतिकर्मा निघ० २ १२ ततो लिटि प्रथमवहुवचनम् । एकारस्येकारश्छान्दस]

अनि प्रत्यय । छान्दस द्वित्वम्]

जुजुरुषः जीर्णाऽवस्था प्राप्त (गृहस्थि जन) ५ ७४ ५ जीर्णाद् वृद्धात् (आप्तादध्यापकात्) १ ११६ १०. [जूष् वयोहानौ (दिवा०) धातोर्लिट स्थाने क्वसु प्रत्यय । 'वहुल छन्दसि' अ० ७ १ १०३ सूत्रेणोकारादेशे रपरत्वे च रूपम्]

जुजुर्वान् रोगाऽऽपन्न (मनुष्य) १ ११८ ६ जीर्ण (अग्नि) २ ४ ५ [जूष् वयोहानौ (दिवा०) धातोर्लिट क्वसु । 'वहुल छन्दसी' त्युकारादेश । 'हलि चे' ति दीर्घो न छान्दसत्वात्]

जुजुर्वा इव यथा वृद्धाऽवस्था प्राप्तो मनुष्य, प्र०—जूष् वयोहानौ, इत्यस्मात् क्वसु 'वहुल छन्दसि' इत्युत्वम् वाच्छन्दसि सर्वे विधयो भवन्ति' इति 'हलि च' इति दीर्वो न १ ३७ ८ [जुजुर्वान्-इवपदयो समास । जुजुर्वान् इति व्याख्यातम्]

जुजुषाणः सेवमान (परमेश्वरो विद्वान् वा) १ ६१ १० भृश सेवमान (विद्वज्जन) २ ३६ ३ प्रसन्न सेवमान (त्वष्टा=विद्वज्जन) २६ २४ **जुजुषाणा**= सेवितौ प्रीतौ वा (अश्विनौ=दम्पती) १ ११८ ७ **जुजुषाणाय**=प्रीत्या सेवमानाय (क्रत्वे=प्रज्ञानाय जनाय) ५ ४३ ५ **जुजुषाणा**=सम्यक् सेवमाना (देवी=विदुषी स्त्री) ५ ४३ ११ [जुषी प्रीतिसेवनयो (तुदा०) धातोर्लिट कानच् । अथवा शानच्प्रत्यये 'वहुल-छन्दसी' ति शप श्लु]

जुजुषाणासः=भृश सेवमाना (धीमन्तो विद्यार्थिजना) ४ ३४ ३ [जुषी प्रीतिसेवनयो (तुदा०) धातोर्लिट कानच् । जसोऽसुगागम । जुजुषाणास जोषयमाणास नि० ६ १६]

जुजुषुः सेवन्ते, प्र०—अत्र 'वहुल छन्दसि' इति शप श्लु १ १६५ २ सेवेरन् १ १५२ ५ **जुजुषे**=सेवसे प्रीणासि वा ५ ३६ ४ सेवते ४ २२ १ [जुषी प्रीतिसेवनयो (तुदा०) धातोर्लिट् सामान्ये]

जुजुष्टन सेवध्वम् ४ ३६ ७ [जुषी प्रीतिसेवनयो (तुदा०) धातोर्लोट् । छान्दसत्वात् शप श्लु । तस्य स्थाने तनवादेशश्छान्दस]

जुजुष्वान् सेवितवान् (इन्द्र=पुरुषार्थिजन) २ २० ५ [जुषी प्रीतिसेवनयो (तुदा०) धातोर्लिट क्वसु]

जुजोष सेवते ४ २३ ५ जुषते ४ २४ ५ **जुजोषत्**= जुषेत १ १७३ ४ सेवते ७ २६ १ भृश सेवते ३ ४ ६ भृश सेवेत ४ ४ १० **जुजोषतम्**=अत्यन्त सेवेते, प्र०—अत्र जुषी प्रीतिसेवनयो, इति धातो शब्विकरणस्य स्थाने श्लु 'वहुल छन्दसि' इति शप् च १ ८३ ११ **जुजोषन्**=सेवन्ते ७ ५८ ३ **जुजोषः**=जुषसे ५ ३० ३ सेवस्व ४ ६.६ भृश सेवसे ४ २ १० [जुषी प्रीतिसेवनयो (तुदा०) धातोर्लिट्]

जुनन्ति गच्छन्ति ७ २० १०. प्राप्नुवन्ति १ १६६.३ प्रेरयन्ति ७ ४० ३ **जुनाम**=वर्त्तीयाम १ १८६ ५ **जुना**=प्रेर्ये, प्र०—अत्र जुन गतौ इत्यस्य लेट्-प्रयोग १ २७ ७ गमये ६ २६ [जुन इत्येके (गतौ) (तुदा०) धातोर्लट्]

जुम्वकाय अतिवेगवते २५.६ [वरुणो वै जुम्वक श० १३ ३ ६ ५ तै० ३ ६ १५ ३.]

जुरतम् रुजत नाशयतम् १ १८२ ३ [रुजो भङ्गे (तुदा०) धातोर्लोट् । वर्णविपर्ययेन रेफस्य जकार, जकारस्य च रेफ]

जुरताम् जीर्णानाम् (जनानाम्) २ ३४ १० [रुजो भङ्गे (तुदा०) धातो शतृप्रत्ययान्तात् षष्ठ्या वहुवचनम् वर्णयोरेफजकारयोराद्यन्तविपर्यय]

जुवः जववन्त (कृषीवला) १ १४० ४ वेगवन्त (वायव) १ १३४ १ [जूप्राति० प्रथमावहुवचनम् । जू=जु वेगिताया गतावित्ति सौत्रो धातु । तत 'क्विब् वचिप्रच्छि०' अ० ३ २ १७८ वा०सूत्रेण क्विप्प्रत्ययो दीर्घश्च]

जुषत जुषते ५ १३ ३ सेवध्वम् ७ १५ ६ **जुषताम्**=प्रीत्या सेवताम्, भा०—सत्कर्माण्येव प्राप्नोतु २ १३ **जुषध्वम्**=सेवध्वम् ७ ५६ १४ **जुषन्त**= सेवन्ताम् प्र०—अत्राऽडभाव ३३ ४८ प्रीणन्ति सेवन्ते वा १ ६८ २ **जुषन्ताम्**=प्रीत्या सेवन्ताम् ८ १७ ५ **जुषस्व**=सेवस्व ७ ५४ १ प्रीणीहि १३ ४७ जुषते, प्र०—अत्र व्यत्ययो लडर्थे लोट् च, अ०—सेवते ३ ४ सेवस्व सेवते वा, प्र०—अत्र पक्षे व्यत्ययो लडर्थे लोट् च ३ ५७ प्रीत्या सेवस्व जुषते वा १ १२ १२ भा०—सत्कुरु १६ ६७ [जुषी प्रीतिसेवनयो (तुदा०) धातोर्लोट् । व्यत्ययेन परस्मैपदम् । अन्यत्रात्मनेपदे एव । जुषते कान्तिकर्मा निघ० २ ६]

जुषमाणः सेवमान (विद्यार्थिजन) ४ २३ १ [जुषी प्रीतिसेवनयो (तुदा०) धातो शानच्]

जुषाणः यो जुषते सेवते स (अग्नि=भौतिक)

वेगवन्तोऽश्वा आशुगामिनो गुणा यस्य स (अग्नि = वह्नि) २.४ २ [जीर-अश्वपदयो समास । जीराश्वौ व्याख्यातौ]

जीव जीवन धारण कर, स० वि० १२१, अथर्व० १४ १ ५२ जी, स० प्र० १५६, [जीव प्राणधारणे (भ्वा०) धातोर्लोट्]

जीवगृभः यो जीव गृह्णाति तस्य व्याधे १२ ८५ [जीवोपपदे ग्रह उपादाने (क्र्या०) धातो क्विप् । हृस्य भश्छान्दस]

जीवदानुम् या जीवेभ्यो जीवनार्थं वस्तु ददाति ताम् (पृथिवीम्) १ २८ [जीवोपपदे डुदाञ् दाने (जु०) धातो 'दाभाभ्या नु' उ० सूत्रेण नुः प्रत्यय]

जीवधन्याः या जीवेषु धन्या धनाय हिता (अप = जलानि) १ ८० ४ [जीव-धन्यापदयो समास । धन्या= धनप्राति० हितार्थे यत्, तत स्त्रिया टाप्]

जीवनम् जीविकाप्रापणम् १ ४८ १० [जीवप्राण-धारणे (भ्वा०) धातोर्ल्युट्]

जीवन्तः प्राणान् धरन्त (जना) १ १३६ ६ [जीव प्राणधारणे (भ्वा०) धातो शतरि प्रथमा बहु-वचनम्]

जीवपीतसर्गः जीवै सह पीत सर्गो येन स (विद्वज्जन) १ १४९ २ [जीव-पीत-सर्गपदाना समास]

जीवभोजनः जीवा भोजन भक्षण यस्य स, (अ०-व्यभिचारी जन) भा०—विषयसेवाया क्रीडन् जन, क्रीडन्ती स्त्री वा २३ २१ [जीव-भोजनपदयो समास]

जीवम् प्राणधारिणम् (आत्मानम्) ७ ३९ ज्ञान-साधनयुक्तम् (भा०—मनुष्यजन्म, जीवनम्) ३ ५५ जीव-समूहम् १ ९२ ६ प्राणधारकम् (जीवनम्) १२ ६१ जीवात्मानम् १ १४० ८ **जीवः**=इच्छादिगुणविशिष्ट (आत्मा) १ ११३ १६ य प्राणान् धरति (कुमार) ५ ७८ ६ **जीवाय**=जीवति प्राण धारयति, प्राणधारणेन समर्थो भवति यस्मिन्नायुषि तस्मै २ ३२ जीवनार्थ विद्या-जीविकाप्राप्तये, ऋ० भू० २५६, **जीवाः**=विद्यमान-जीवना (आचार्यादय) ऋ० भू० २५७, १९ ४६ ये जीवन्ति ते (भा०—पितर) १९ ४६ **जीवेभ्यः**=प्राण-धारकेभ्य स्थावरशरीरेभ्य ३५ १५ [जीव प्राणधारणे (भ्वा०) धातोरच्प्रत्यय]

जीवयाजम् जीवान् याजयति धर्म च सङ्गमयति तम् (नर=विनयाभियुक्त मनुष्यम्) १ ३१ १५ [जीवोप-पदे यज देवपूजासगतिकरणदानेषु (भ्वा०) धातोर्णिजन्ताद् अण्प्रत्यय]

जीवलोकम् जीते हुए दूसरे पति को, स० प्र० १५२, १० १८ ८

जीवशंसे जीवाना शसा स्तुतिर्यस्मिँस्तस्मिन् व्यवहारे चोपमाम् १ १०४ ६ जीवै प्रशसनीये (बर्हिषि=अन्त-रिक्षे) ७ ४६ ४ [जीव-शसापदयो समास । शसा=शसु स्तुतौ धातोर्घञ् । स्त्रिया टाप् । अथवा जीवोपपदे शसु स्तुतौ (भ्वा०) धातोरण् प्रत्यय]

जीवसे जीवनाय प्राणधारणाय १ १५५ ४ जीवि-तुम् प्र०—अत्र 'तुमर्थे सेसे०' इत्यसे प्रत्यय ३ ५४ आरोग्य, देह, शुद्धमानस, बल और विज्ञान इत्यादि के लिए, आर्याभि० ११६, ऋ० १ ३ १० १४ [जीव प्राणधारणे (भ्वा०) धातोस्तुमर्थेऽसे प्रत्यय । जीवसे चिरञ्जीवनाय नि० १२ ३९]

जीवात् चिर जीवेत् १ ८४ १६ [जीव प्राणधारणे (भ्वा०) धातोर्लेट् । आडागम]

जीवातवे जीवनाय १ ९४ ४ भा०—दीर्घाऽऽयुषे १८ ६७ [जीव प्राणधारणे (भ्वा०) धातो । 'जीवेरातु' उ० १ ७८ सूत्रेण आतु प्रत्यय । चतुर्थ्या एकवचनम् । जीवातवे चिरजीवनाय नि० १० ३८]

जीवातुम् जीवनम् ६ ४७ १० **जीवातुः**=येन जीवन्ति यज्जीवयति वा (जीवन-व्यवहार) १८ ६ [व्याख्यात पूर्वपदे । जीवातु जीविकाम् नि० ११ ११]

जीविता जीवनहेतूनि कर्माणि ३३ ५४ जीवनानि १ ११३ ६ जीवितानि (जीवनानि) ४ ५४ २ [जीव प्राण-धारणे (भ्वा०) धातोर्बाहुलकादौणादिक क्त । 'सुपा सुलग्०' इत्याकारादेश]

जीवेम प्राणान् धारयेम ३६ २४ प्राणान् धारयेमहि प० वि०, ३६ २४ जीवे, आर्याभि० २ ३७, ३६ २४ [जीव प्राणधारणे (भ्वा०) धातोर्लिङि उत्तम-बहुवचनम्]

जीहिपः त्याजये ३ ५३ १९ [ओहाक् त्यागे (जु०) धातोर्णिजन्ताल्लुङ् । अडभावे छान्दस रूपम्]

जुगुर्यात् उद्यच्छेत् १ १७३ २ **जुगुर्याः**=उद्यच्छे, उद्यमिन कुर्या १ १४० १३ [गुर्वी उद्यमने (भ्वा०) धातोर्लिङ् । 'बहुल छन्दसि' नि शप श्लु]

जुगुर्वणी अत्यन्तमुद्यमिनौ (अध्यापकोपदेशकौ) १ १४२ ८. [गुर्वी उद्यमने (भ्वा०) धातोर्बाहु० औणा०

इति प्राप्तेऽड्भावो न भवति १४३८ प्रसहन्ताम् ३ ५५ २ [हृ प्रसह्यकरणे (जु०) धातोर्लङ्, अडभावो व्यत्ययेनात्मनेपदम् । 'बहुल छन्दसि' अ० ७ १ १०३ सूत्रेणोत्वम् । झस्य छान्दसत्वाद् अड्भावो न भवति ।]

जुहुरः हिम्यात् ७ ४ ४

जुहुराणम् कुटिलगतिजन्यम् (एन =पापम्) १ ८६ १ कुटिलतायुक्त (कर्म), स० वि० ७, ४० १६ कुटिल पक्षपात सहित (एन =पापकर्म) को, स० वि० २१४, ४० १६ कौटिल्यमन्त करणस्य ७ ४३ **जुहुराणः**=कुटिलगति (दुर्जन) ४ १७ १४ दुष्टेषु कुटिल (जन) १ ७३ ११ [हुर्छा कौटिल्ये (भ्वा०) धातो 'हुच्र्छे सनो लुक् छलोपश्च' उ० २ ६१ सूत्रेण आनच्प्रत्यय]

जुहुरे जुह्वति २ ६ ३ शब्दयन्ति १ ४८ १४ कुटिलयन्ति ५ १६ २ [ह्वृ कौटिल्ये (भ्वा०) धातोर्लिटि रूपम् । 'बहुल छन्दसी' त्युत्वम् । व्यत्ययेनात्मनेपदम् । हु दानादानयो (जु०) धातोर्वा लिटि प्रथमबहुवचनम् । इरेच् स्थाने 'इरयो रे' अ० ६ ४ ७६ सूत्रेण रे आदेश । जुहुरे जुह्विरे नि० ४ १६]

जुहूभिः पान-साधनै (पात्रै) ५ १ ३ जुह्वति याभि क्रियाभि १ ५८ ४ **जुहूः**=जुहोति ददाति हविरादत्ते सुख चाऽनया सा (घृताची=आदानक्रियया) प्र०—हु दानाऽऽदानयो, इत्यस्मात् 'हुव श्लुवच्च' उ० २ ५६ अनेन क्विप् प्रत्ययो दीर्घादेशश्च २ ६ [असौ (द्यौ) वा जुहू । तै० ३ ३ १ १ तस्यासावेव द्यौर्जुहू श० १ ३ २ ४ यजमानदेवत्या वै जुहू. तै० ३ ३ ५ ४ अत्तैव जुहूराद्य उपभृत् श० १ ३ २ ११ क्षत्र वै जुहूर्विश इतर स्रुच श० १ ३ ४ १५ जुहूर्दक्षिणो हस्त तै० ३ ३ १.५ आग्नेयी वै जुहू तै० ३ ३ ७ ६ जुहूर्वै यज्ञमुखम् मै० ३ १ १ जुह्वा हि घृताची द्यौर्जन्मना काठ० १ ११ द्यौरसि जन्मना जुहूर्नाम मै० १ १ १२ पर्णमयी जुहू तै० स० ३ ५ ७ २ यजमानो वै जुहू मै० १ ४ १३ वाग् जुहू तै० आ० २ १७ २ आश्रावयेति जुहू तेन युनक्ति काठ० ३१ १३]

जुहूमसि स्तुम, प्र०—'बहुल छन्दसि' अ० २ ४ ७६ अनेन शप स्थाने श्लु । 'अभ्यस्तस्य च' अ० ६ १ ३३ अनेन सम्प्रसारणम् । 'सम्प्रसारणाच्च' अ० ६ १ १०८ अनेन पूर्वरूपम् । 'हल' अ० ६ ४ २ इति दीर्घ । 'इदन्तो मसि' अ० ७ १ ४६ अनेन मसेरिकारागम' १ ४ १ [ह्वेञ् स्पर्धाया शब्दे च (भ्वा०) धातोर्लट् । स्पष्टमन्यत्]

जुहूराणम् कुटिलम् (एन.=दु खफल पापम्) ५.३६. [जुहुराणमिति व्याख्यातम् । उकारस्य दीर्घश्छान्दस]

जुहूरे शब्दयन्ति १ ४८ १४ [ह्वेञ् स्पर्धाया शब्दे च (भ्वा०) धातोर्लिटि छान्दस रूपम्]

जुहूर्थाः प्रदद्या ७ १ १६ [हु दानादानयो (जु०) धातोश्छान्दस रूपम्]

जुहोत गृह्णीत २ १४ १ आदद्यात ७ ४७ ३ दत्त २ १४ ५ दत्ताऽऽदत्त वा १ १५ ६ दद्यु ३ ५६ ५ [हु दानादानयो (जु०) धातोर्लोट् । 'बहुल छन्दसीति वक्तव्यम्' अ० ७ ३ ८७ वा० सूत्रेण गुण]

जुहोतन प्रक्षिपत, प्र०—अत्र हुधातोर्लोटि मध्यमबहुवचने 'तप्तनप्त०' इति तनबादेश ३ १ दत्त १२ ३० [हु दानादानयो (जु०) धातोर्लोट् । तस्य तनबादेशश्छान्दस]

जुहोति आहुतिया देता है, स० वि० २०६, अथर्व० ६ ७ ४ **जुहोमि**=ददामि १७ ७८ आददामि ३४.५४ नियोजयामि ऋ० भू० ६४, ऋ० ८ ८ ४६ ३ गृह्णामि १७ ७८ क्षिपामि १ १६२ १६ निवेदयामि वा २ २७ १ व्याददामि ३४ ५४. [हु दानादानयो (जु०) धातोर्लट्]

जुह्वत आददत् (परमेश्वर) १७ १७ होम=प्रलय करता हुआ (परमात्मा), आर्याभि० २ ३०, १७ १७ [हु दानादानयो (जु०) धातोर्लङ् । अडभाव]

जुह्वति क्षरन्ति ५ ७ ५ स्थापयन्ति २ ४१ १८ [हु दानादानयो (जु०) धातोर्लटि प्रथमबहुवचनम्]

जुह्वः विद्याविज्ञाने आददत्य (कन्या) १ १४५ ३ जुहोति याभिस्ता (यज्ञसाधनानि) ६ ६६ १० याभिर्जुह्वत्युपदिशन्ति परस्पर ता (सुखसाधनानि) १ ५८ ७ **जुह्वा**=होमसाधनेन ७ ३ ४ जुहोति गृह्णाति ददाति वा यया (पावकया=पवित्रकारिकया ज्वालया) ६ ११ २ ग्रहणसाधनेन ३४ ५४. ग्रहणसाधनया क्रियया २ १० ६ दानाऽऽदानक्रियाकौशलया बुद्ध्या १ ७३ ५ आज्यहवनसाधनया १३ १० जिह्वया साधनेन २ २७ १ साधनोपसाधनयुक्तया क्रियया ३ ३१ ३ जुह्वति याभि क्रियाभि १ ५८ ४ होमसाधनेन ४ ४ २ [हु दानाऽऽदानयो (जु०) धातो 'हुव श्लुवच्च' उ० २ ५६ सूत्रेण क्विप्प्रत्ययो दीर्घादेशश्च । श्लुवद्भावेन द्वित्वम् । 'जुहूभि' पदेऽपि द्रष्टव्यम्]

जुह्वान भुञ्जान (विद्वज्जन) १ ७५ १ [हु दानादानयो (जु०) धातोश्शानच् । व्यत्ययेनात्मनेपदम्]

जुह्वास्यः जुहोत्यस्या सा जुहूर्ज्वाला, साऽऽस्य मुख यस्य स (अग्नि =प्रसिद्धो रूपवान् दहनशील. पावक)

३ १० सेवमान (विद्वान् राजा) ६ ४७ २८ प्रीत (विद्वान् जन) १ १३५ २ प्रीत सेवमानो वा (इन्द्र = सभापति) २ १४ ६ **जुषाणाः**=प्रीता (विद्वासो जना) २८ ११ [जुषी प्रीतिसेवनयो (तुदा०) धातो शानच्। आगमशासनस्यानित्यत्वान् मुगागमो न। ब्रह्म वै जुषाण कौ० ३ ५]

जुषाणा सेवमानौ (नरौ=स्त्रीपुरुषौ) १ ११८ १० [जुषाण इति व्याख्यातम्। तत 'सुपा सुलुग्०' इत्याकारादेश]

जुषाणा सेवमाना (अदिति =नाशरहिता विद्युत्) २६ ४ प्रसन्ना सेवमाना सती (वाक्=वाणी) ८ ३७ [जुषाण इति व्याख्यातम्। तत स्त्रिया टाप्]

जुषाते सेवते ४ ४३ १ **जुषामहे**=प्रीणीयाम ५ ४२ **जुषेत**=प्रीत्या सेवेत ७ ३४ २१ **जुषेताम्**= सेवेताम् २१.४१ **जुषेथाम्**=सेवेथाम् ४ ५७ ५ जुषेते सेवेते १ ६३ ७ **जुषेरत**=सेवेरन् प्रीणन्तु वा, प्र०—अत्र 'बहुल छन्दसि' इति रुडागम १ १३६ ४ [जुषी प्रीतिसेवनयो (तुदा०) धातोर्लेटि लोटि लिङि च रूपाणि]

जुष्टतमम् धार्मिकैर्भक्तैर्जनै शिल्पिभिश्च यो जुष्यते स जुष्ट, अतिशयेन जुष्टस्तम्, भा०—प्रीत्येष्टबुद्ध्या च सेवनीयम् (ईश्वर भौतिकमग्निं वा)·१ ८ अतिशयेन प्रसन्नम् (विद्वास जनम्) ६ ४ अतिशयेन जुषमाणम् (इन्द्र=सम्राजम्) ६ २ **जुष्टतमः**=अतिशयेन सेवित (अर्वा=ज्ञानी जन) २६ २४ अतिशयेन सेवमान (सज्जन) १ १६३ १३ [जुषी प्रीतिसेवनयो (तुदा०) धातो क्त। जुष्टप्राति० अतिशायने तमप् प्रत्यय]

जुष्टतमासः राजधर्मिभिरतिशयेन सेविता (नृतमास =नायका जना) १ ८७ १ [जुष्टतम व्याख्यातम्। तत प्रथमाबहु० जसोऽसुगागम]

जुष्टम् सेवमानम् (विद्वास जनम्) ६ ४ जुषमाणम् (इन्द्र=सम्राजम्), प्रीतम् (इन्द्र=सम्राजम्) ६ २ सेवितम् (जगदीश्वरम्) २३ ४ प्रीत्या सशोधितम् (हवि) २ १ प्रीत्या वर्त्तमानम् (इन्द्र=राजानम्) ६ ३ प्रीत, प्रीत्या सेवनीयम् १ १३ पुष्ट्यादिगुणयुक्त प्रीतिकर जल पवन वा २ १· विद्याप्रीतिक्रियाभि सेवितम् (यज्ञम्) १ १३ प्रीत्या सम्पादितम् (हवि) २ १ प्रीतिकरम् (हव्य= विज्ञानम्) ११ ६६ अ०—प्रीत चारु फलम् १ १० **जुष्ट.**=सेवित प्रीतो वा (विद्वान् अतिथि) ५ ४ ५ [जुषी प्रीतिसेवनयो (तुदा०) धातो क्त प्रत्यय। ईदित्त्वादनिट्त्वम्]

जुष्टयः जुष्यन्ते प्रीयन्ते यास्ता (गिर =स्तुतिवाच) ५ २६ [जुषी प्रीतिसेवनयो (तुदा०) धातो स्त्रिया क्तिन्]

जुष्टा प्रीता सेविता वा ४ १७ **जुष्टाम्**=सद्भी राजभि सेविता नीतिम् ४ २६ ३ प्रीत्या सम्पादिताम् (वेदिम्) २ १ पूर्वकालसेविताम् (वसतिं=निवासस्थानम्) १ ३३ २ **जुष्टाः**=या प्रीणन्ति सेवन्ते ता (प्रशसा) १ १० १२ प्रीता सेविता वा (गिर =स्तुतिवाच) ५ २६ [जुषी प्रीतिसेवनयो (तुदा०) धातो क्तप्रत्यये स्त्रिया टाप्]

जुष्टानि प्रीतानि सेवितानि· (उचथानि=वेदवचनानि) १ ७३ १० [जुष्ट व्याख्यातम्। तत प्रथमाबहुवचनम्]

जुष्टासः विद्वद्भि सेविता (यज्ञा =सत्या व्यवहारा) ४ ३७ २ [जुष्ट व्याख्यातम्। तत प्रथमाबहुवचने जसोऽसुक्]

जुष्टी जुष्ट्या प्रीत्या सेवया वा ७ ३३ ४ [जुष्टिव्याख्यातम्। ततस्तृतीयाया पूर्वसवर्ण 'सुपा सुलुग्०' सूत्रेण]

जुष्ट्वी प्रीता सेवमाना वा (दुहिता) १ ११८ ५ [जुषी प्रीतिसेवनयो (तुदा०) धातो क्त्वा। 'स्नात्व्यादयश्च' अ०—७ १ ४६ सूत्रेणेदन्तत्वम्]

जुहवाम आदद्याम १ ११० ६ [हु दानादानयो (जु०) धातोर्लोटि उत्तमबहुवचनम्]

जुहवाम दद्याम १ ११४ ३ [हु दानादानयो (जु०) धातोर्लोट्]

जुहाव आह्वयेत् ७ २१ ८ [ह्वेञ् स्पर्धाया शब्दे च (भ्वा०) धातोर्लिट्]

जुहुत दत्त ७ १५ १ **जुहुते**=जुहोति ६ १० ६ [हु दानादानयो (जु०) धातोर्लोटि मध्यमबहुवचनम्। अन्यत्र लट्। व्यत्ययेनात्मनेपदम्]

जुहुमः प्रशसाम २३ ६५ गृह्णीम १० २० आश्रय लेवे, वाञ्छा करे, स० वि० ६, १० १२१ १० **जुहुयाम**= दद्याम ७ १ १७ [हु दानादानयो (जु०) धातोर्लट्। अन्यत्र लिङ्]

जुहुरन्त प्रसह्यकारिणो भवन्तु, प्र०—अत्र 'हृ प्रसह्यकरणे, व्यत्ययेनाऽऽत्मनेपदम्, लङ्यडभावो 'बहुल छन्दसि' इत्युत्वम् 'वाच्छन्दसि सर्वे विधयो भवन्ति' इति 'अदभ्यस्तात्'

१ १३० ६ जेतु योग्यम् (धनम्) २ ५ १ **जेन्यस्य**=जेतु योग्यस्य (शर्धत=बलस्य) ६ ४२ ४ **जेन्यः**=जापयितु शील (रथ) ७ १८ जेतु शील (यजमान) ५ १ ५ जेतु योग्य (वीरजन) २ ५ १ विजयहेतु (मातरिश्वा=वायु), प्र०—अत्र बाहुलकादौणादिक एन्यप्रत्ययो डिच्च १ ७१ ४ [जि जये (भ्वा०) धातोर्बाहुलकाद् औणादिक एन्य प्रत्ययो डिच्च]

जेन्या जनेषु नयनकर्त्तृषु साधू (पती=दम्पती) १ ११६ ५ [जनप्राति० 'तत्र साधु' सूत्रेण यत्। अकारस्यैकारश्छान्दस 'सुपा सुलुग्' इत्याकार]

जेन्या जेतु योग्या (गौ=पृथिवी) ३ ३१ ११ [जेन्य व्याख्यातम्। जेन्यप्राति० स्त्रिया टाप्]

जेन्यावसू यौ जेन्यान् जयशीलान् वासयतो यद्वा ज्येन्य जेतव्य जित वा वसु धन याभ्या तौ (राजप्रजाजनौ) ३३ ८८ [जेन्य-वसुपदयो समास। जेन्य व्याख्यातम्। पूर्वपदस्य सहिताया दीर्घ]

जेमा जेतुर्भाव १८ ४ [जेतृप्राति० भावे इमनिच्। 'तुरिष्ठेमेयस्सु' अ० ६ ४ १५४ सूत्रेण तृचो लोप]

जेषम् जयेयम्, प्र०—लोडुत्तमैकवचने प्रयोग ९ १३ उत्कर्षयेयम् ६ ३४ अनुगतमुत्कर्ष प्राप्नुयाम् २ १५ **जेषः**=विनय प्राप्नोषि, प्र०—जि जये इत्यस्माल्लोटि मध्यमैकवचने प्रयोग १ १० ८ **जेषि**=जयसि, प्र०—अत्र शपो लुक् ६ ४५ १५ अत्र शबभाव २ ३० ८ [जि जये (भ्वा०) धातोर्लोट्। अन्यत्र लट्। 'बहुल छन्दसि' सूत्रेण शपो लुक्। पुगागमश्छान्दस। लुङि वा रूपम्। अड्-वृद्धचोरभावश्छान्दस]

जेषे उत्कृष्टु विजेतुम्, प्र०—अत्र जिधातोस्तुमर्थे से-प्रत्यय। सायणाचार्येणेदमपि पदमशुद्ध व्याख्यातमर्थसंगत्यासम्भवात् १ १०० ११ जेतुम् ६ ४४ १८ [जि जये (भ्वा०) धातो 'तुमर्थे सेऽसेन्०' अ० ३ ४ ९ सूत्रेण से-प्रत्यय]

जेष्म जयेम, प्र०—अत्र लिडर्थे लुङ्, अड्वृद्ध्यभावश्च १ १६ **जेष्यसि**=उत्कर्षयसि २३ १७ [जि जये (भ्वा०) धातोर्लुङ्। अड्-वृद्धचोरभावश्छान्दस]

जेहमानम् प्रयतमानम् (अग्निम्=अश्वम्) १ १६३ ९ प्रयत्नसाधकम् (पात्र=ज्ञानसमूहम्) १ ११० ५ प्रयत्नेन गच्छन्तम् (गिर=विमानम्) २९ १७ [जिहते गतिकर्मा निघ० २ १४ तत शानच्]

जे जये ६ ४४ [जि जये (भ्वा०) धातोर्लोट् मध्यमैकवचनम्। शपो लुक्]

जैत्रम् जेतृभि परिवृत रथम् (यानम्) १७.३७ जयन्ति येन तम् (रथम्), प्र०—अत्र जिधातो 'सर्वधातुभ्य ष्ट्रन्' इति ष्ट्रन्-प्रत्ययो बाहुलकाद् वृद्धिश्च १ १०२ ३. दृढ वैयाघ्र विजयनिमित्तम् (रथम्) १ १०२ ५ जेतु शीलम् (सुशिक्षितसेनादिजनम्) १८ ९ **जैत्राय**=जयाय ३४ ५० [जि जये (भ्वा०) धातोरौणादिक ष्ट्रन्प्रत्ययो वृद्धिश्च बाहुलकाद्]

जैत्रीम् जैयशीलाम् (सातिम्=सम्भक्तिम्) १ १११ ३ **जैत्रीः**=जयशीला (सूर्यकिरणा) ३ ३१ ४ [जि जये (भ्वा०) धातो 'सर्वधातुभ्य ष्ट्रन्' इति ष्ट्रन् प्रत्ययो वृद्धिश्च बाहुलकात्। तत स्त्रिया ङीप्]

जोगुवानः पुन पुनरव्यक्त शब्द कुर्वन् (सभाध्यक्ष) १ ६१ १४ [गुङ् अव्यक्ते शब्दे (भ्वा०) धातोर्यङन्ताच्छानच्प्रत्यय। यङो लुक्]

जोगुवे भृशमुपदेशकाय (विद्वज्जनाय) १ १२७ १० [गुङ् अव्यक्ते शब्दे (भ्वा०) धातोर्यङन्तात् क्विप्। ततश्चतुर्थी]

जोगुवे उपदिशामि ५ ६४.२ [गुङ् अव्यक्ते शब्दे (भ्वा०) धातोर्लट्। 'बहुल छन्दसि' इति शप. श्लु। अभ्यासस्य गुणश्छान्दस। यङ्लुगन्ताद्वा लट्]

जोषत् जुषेत, प्र०—अत्र व्यत्ययेन परस्मैपदम् ८ ४५ जुषताम्, प्र०—अत्र व्यत्ययेन परस्मैपदम् १७ २३ सेवेत १ १६७ ५ [जुषी प्रीतिसेवनयो (तुदा०) धातोर्लेट्]

जोषम् प्रीतिं प्रसन्नताम् १ ७७ ५ विपरीतसेवनम् ४ २७.२ पूर्णम् (शपथम्) ७ ४३ ४ प्रीतिम् ९ २३ ८ जुष्यते प्रीत्या सेव्यते तम् (परिधिम्) २ १७ **जोषे**=प्रीतिजनके व्यवहारे १ १२० १ [जुषी प्रीतिसेवनयो (तुदा०) धातोर्घञ्]

जोषयन्ते प्रीतयन्ति १ ८३ २ **जोषयासे**=सेवये ५ ३ १० सेवय ४ ३२ १६ सेवयस्व ३ ५२ ३ **जोषयेते**=सर्वान् सेवयत १ ९५ ५ सेवेते, प्र०—अत्र स्वार्थे णिच् १ ९५ ६ [जुषी प्रीतिसेवनयो (भ्वा०) धातोर्णिजन्ताल् लट्। 'जोषयासे' प्रयोगे आडागमश्छान्दस]

जोषवाकम् प्रीतिकर वचनम् ६ ५९ ४ [जोषवाकपदयो समास। जोष व्याख्यातम्। वाक=वच् परिभाषणे (अदा) धातोर्घञ्। जोषवाकमित्यविज्ञातनामधेय जोषयितव्य भवति नि० ५ २२.]

१ १२.६ [जुहू-ग्रास्यपदयो समास । जुहूरिति व्याख्यातम्]

जुहवे स्पर्द्धे ६ २ ३ [ह्वेञ् स्पर्धाया शब्दे च (भ्वा०) धातोर्लटि उत्तमैकवचने रूपम्]

जूजुवत् गमयेत् २ ३१ ४ [जु वेगिताया गताविति सौत्रो धातु । ततो णिजन्ताल् लुङ् । ग्रडभावश्छान्दस. । जवति गतिकर्मा निघ० २ १४]

जूजुवान् भृग गमयिना (विद्युदादिस्वरूपोऽग्नि) ४ ११ ४ **जूजुवांसम्**=ग्रतिशयेन वेगवन्तम् (चक्र=कलाचक्रम्) ५ ३१ ११ [जु वेगिताया गताविति सौत्रो धातु, ततो लिट स्थाने क्वसु प्रत्यय । तुजादीनामित्यभ्यासस्य दीर्घ]

जूजुवानेभि: वेगवद्भि (ग्रश्वै) प्र०—ग्रत्र 'तुजादीनाम्०' इति ग्रभ्यासदैर्घ्यम् ५ २६ ६. [जु इति सौत्रो धातु । ततो लिट स्थाने कानच् । 'तुजादीनामित्यभ्यासस्य दीर्घ । 'बहुल छन्दसी' ति भिस ऐसादेशो न]

जूजुवु: सद्यो गच्छन्ति ७ २१ ५ [जु वेगिताया गताविति सौत्रो धातु । ततो लिटि प्रथमबहुवचने रूपम्]

जूत· प्राप्तवेग (वात =वायु) ४ १७ १२ [जवति गतिकर्मा (निघ० २ १४), ततो भावे क्त । 'जू' इति सौत्रो धातु]

जूतये रक्षणाद्याय १ १२७ २ **जूतिभि:**=जूयते प्राप्यतेऽर्थो याभिस्ताभिर्युद्धक्रियाभि १ ११६ २ वेगादिभिर्गुणै ३ ३ ८ **जूतिम्**=न्यायवेगम् ४ ३८ ६ **जूति:**= वेग २१ ५६ वेगेन व्याप्तिकर्म (मन =मननशील ज्ञानसाधनम्) प्र०—'ऊतियूतिजूति०' ग्र० ३ ३ ६७ ग्रनेन निपातित २ १३ **जूतया**=वेगेन ३ १२ ३ ['जू' इति सौत्रो धातु, तत स्त्रियां क्तिन् प्रत्यये 'ऊतियूतिजूति०' ग्र० ३ ३ ६७ सूत्रेण निपात्यते। जूनि गति प्रीतिर्वा नि० १० २८]

जूर्ण: रोगी (जन) १ १८० ५ [जूरी हिंसावयोहान्यो (दिवा०) धातो क्त]

जूर्णायाम् गन्तुमशक्याया वृद्धाऽवस्थायाम् १ ४६ ३ [जूर्ण इति व्याख्यातम् । तत स्त्रियां टाप्]

जूर्णिनी वेगवती (राति =दानम्) ६ ६३ ४ [जूर्णप्राति० मत्वर्थ इनि । तत स्त्रियां ङीप्]

जूर्णि: शीघ्रकारिणी (सेना) १ १२७ ८ रोगवान् (होता=ग्रत्ता जन) १ १२७ १० जीर्णा (विदुषी पत्नी) ७ ३६ १ [जूर्णिर्जवतेर्वा द्रवतेर्वा दुनोतेर्वा नि० ६ ४ जूर्णि क्षिप्रनाम निघ० २ १५ क्रोधनाम निघ० २ १३ ज्वर रोगे (भ्वा०) धातो 'वीज्याज्वरिभ्यो नि' उ० ४ ४८ सूत्रेण नि प्रत्यय 'ज्वरत्वर०' सूत्रेण ऊठ्]

जूर्णेव पुरातनानीव (वर्षाणीव) १ १८४ ३ [जूर्णइव पदयो समास । जूर्ण इति व्याख्यातम्]

जूर्यति रुजति १ १२८ २ **जूर्यन्ति**=जीर्यन्ति जीर्णानि भवेयु १ ११७४ [जूरी हिंसावयोहान्यो (दिवा०) धातोर्लट् । व्यत्ययेन परस्मैपदम्]

जूर्यत्सु वेगवत्सु (वनेषु=रश्मिषु) ३ २३ १

जूर्यन्त्यै: जीर्णाऽवस्थाप्राप्तिनिमित्तायै (घोषायै= वाण्यै कृष्यै वा) १ ११७ ७ [जूरी हिंसावयोहान्यो (दिवा०) धातो शतृप्रत्ययान्तान् ङीप् । ततश्चतुर्थी]

जूर्य: जीर्ण (ग्रतिथि =विद्वज्जन) ६ २ ७ [जूरी हिंसावयोहान्यो (दिवा०) धातोर्ण्यत्]

जूर्व हिन्धि ६ ६ ६ [जूर्वति वधकर्मा (निघ० २ १६) धातोर्लोट्]

जूर्वन् विनाशयन् (सूर्य) १ १६१ ६ [जूर्वति वधकर्मा (निघ० २ १६) धातो शतृप्रत्यय]

जू: जीर्णाऽवस्था प्राप्त (जन) २ १४ ३ ज्ञानी वेगवान् वा (जन) ४ १७ [जवति गतिकर्मा (निघ० २ १४) धातो, जू इति सौत्रधातोर्वा 'क्विव् वचिपृच्छि०' उ० २ ५७ सूत्रेण क्विप् दीर्घादेशश्च । जूरसीत्येतद्ध वा ग्रस्या (वाच) एक नाम श० ३ २ ४ ११ ज्वर रोगे (भ्वा०) धातोर्वा क्विप्प्रत्यये 'ज्वरत्वर०' ग्र० ६ ४ २० सूत्रेण वकारस्योपधायाश्च स्थाने ऊठ्]

जेता जेतु शील (इन्द्र =सेनेश) १ १७८ ३ जयशील (इन्द्र =शत्रुविदारको राजा) ६ ४५ २ उत्कर्षत्वप्रापक (वय जीवनम्) १ ६६ २ **जेतारम्**=शत्रून् जापयति जयति वा तम् (इन्द्रम्=ईश्वर सभाध्यक्ष वा) १ ११ २ जयशीलम्, भा०—विजेतारम् (इन्द्र=राजानम्) २८ २ [जि जये (भ्वा०) धातोस्तच्छीलादिष्वर्थेषु तृन् । कर्त्तरि तृच्प्रत्ययो वा]

जेत्वानि जेतु योग्यानि शत्रुसैन्यानि ६ ४७ २६ [जि जये (भ्वा०) धातो 'कृत्यार्थे तवैकेनकेन्यत्वन' ग्र० ३ ४ १४ सूत्रेण त्वन्प्रत्यय । जेत्वानि जेतव्यानि नि० ६ १२]

जेन्यम् जयति येन तम् (वाजिनम्=ग्रश्वम्)

ज्या प्रत्यञ्चा २९ ४० **ज्याम्**=धनुष प्रत्यञ्चाम् ४ २७ ३ बाणसन्धानार्थम् १६ ६ [जयति यया शत्रून् मा ज्येति विग्रहे जि जये (भ्वा०) धातो 'अघ्न्यादयश्च' उ० ४ ११२ सूत्रेण यक्प्रत्ययान्त पद निपातितम्। ज्या जयतेर्वा जिनातेर्वा, प्रजावयतीपूनीति वा नि० ९ १८]

ज्याकारम् यो ज्या प्रत्यञ्चा करोति तम् (शिल्पि-जनम्) ३० ७ ['ज्या' व्याख्यातम्। ज्योपपदे डुकृञ् करणे (तना०) धातोरण्प्रत्यय]

ज्याज्मन् प्रत्यञ्चा २९ ४०

ज्यायस्यै ज्येष्ठायै (स्वस्रे) १ १२४ ८ [वृद्धप्राति० अतिशायने ईयसुन् प्रत्यये 'वृद्धस्य च' अ० ५ ३ ६२ सूत्रेण ज्यादेश:। 'ज्यादादीयस' अ० ६ ४ १६० सूत्रेण ईयस आकारादेश]

ज्यायस्वन्त: उत्तम विद्यादिगुणयुक्त (विद्वान् लोग), स० वि० १४२, अथर्व० ३ ३० ५ [प्रशस्यप्राति०' अति-शायने ईयसुन्प्रत्यये 'ज्य च' अ० ५ ३ ६१ सूत्रेण ज्यादेश। ज्यायस्प्राति० मतुप्]

ज्याय: अतिशयेन ज्येष्ठम् (ब्रह्म) ७ ३२ २४ प्रशस्यम् (मुखम्) ६ २९ ७

ज्यायान् महिमाऽनन्त (पुरुष =परमेश्वर), ऋ० भू० १२१, ३१ ३ अतिशयेन ज्येष्ठ (इन्द्र =विद्वज्जन) ७ २० ७ महान् वृद्ध (सूर्य) ३ ३८ ५ महान् (इन्द्र = सूर्य इव प्रकाशमानो जगदीश्वर) ६ ३० ४ अतिशयेन प्रशस्तो महान् (पुरुष =परमेश्वर) ३१ ३ **ज्यायांसम्**= श्रेष्ठम् (ऋषिस्वरम्=ऋषीणामुपदेशम्) ५ ४४ ८ [वृद्ध-प्राति० प्रशस्यप्रातिपदिकाद्वातिशायने ईयसुन्। वृद्ध-प्रशस्ययो स्थाने ज्यादेश। ईयस आकारादेशश्च]

ज्यावाजम् ज्याया शब्दम् ३ ५३ २४ [ज्या-वाज-पदयो समास। ज्या व्याख्यातम्। वाज =वज गतौ (भ्वा०) धातोर्घञ्]

ज्येष्ठतमा अतिशयेन ज्येष्ठौ (मित्रावरुणा=अध्या-पकोपदेशकौ) ६ ६७ १ **ज्येष्ठतमाय**=अतिशयेन वृद्धाय (अवसे=रक्षणाद्याय) २ १६ १ [वृद्धप्राति० अतिशायने इष्ठन्प्रत्यये 'वृद्धस्य च' अ० ५ ३ ६२ सूत्रेण ज्यादेश। ततोऽतिशायने तमप्। प्रथमाद्विवचने 'सुपा सुलुग्०' इत्याकार]

ज्येष्ठतातिम् प्रशस्त ज्येष्ठम् (वृजन=योगवलम्) ७ १२ ज्येष्ठमेव (राजानम्) ५ ४४ १ [ज्येष्ठ व्याख्यातम् ज्येष्ठप्राति० भावे स्वार्थे वा छान्दस तातिल्प्रत्यय]

ज्येष्ठम् अतिशयेन प्रशस्यम् (रत्न=धनम्) ५ ४९ २ अतिशयेन प्रशस्तम् (विप्र=विद्वासम्) १ १२७ २ वृद्ध श्रेष्ठम्, भा०—सर्वोत्कृष्ट सर्वोपास्य परमेश्वरम् (ब्रह्म) ३३ ८० विद्यावृद्धम् (अध्यापकम्) ४ १ २ प्रवृद्धम् (शव =वलम्) ६ ४८ २१ **ज्येष्ठ:**=अतिशयेन प्रशसनीय (परमेश्वर सभाध्यक्षो वा), प्र०—अत्र 'ज्य च' अ० ५ ३ ६१ इति सूत्रेण प्रशस्यस्य स्थाने ज्यादेश १ १०० ४ पूर्वज (बन्धु विद्वान्) ४ ३३ ५ **ज्येष्ठाय**=सबसे बडे होने के लिए, स० प्र० १८३, ९ ४० **ज्येष्ठे**=अतिशयेन प्रशस्ये (द्यावापृथिवी=सूर्यभूमी) ४ ५६ १ [वृद्धात् प्रशस्या-द्वातिशायने इष्ठन्प्रत्यय। प्रातिपदिकस्येष्ठन्प्रत्यये ज्या-देश। प्रजापतिर्वाव ज्येष्ठ तै० स० ७ १ १ ४ यद्वै ज्येष्ठ तन्महत् ऐ० आ० १ ३ ७]

ज्येष्ठराज्यम् यो ज्येष्ठेषु राजते तम् (परमेश्वरम्) २ २३ १ [ज्येष्ठराजन्पदयो समासे भवार्थे यत्]

ज्येष्ठा प्रशस्यानि (नृम्णानि=धनानि) ४ २२ ९ [प्रशस्यप्राति० अतिशायने इष्ठन्। ज्यादेश। शेर्लोप-श्छान्दस]

ज्येष्ठास: विद्यावयोवृद्धा प्रशस्तवाच (विद्वज्जना) ५ ८७ ९ [ज्येष्ठ व्याख्यातम्। ततो जसोऽसुगागम]

ज्यैष्ठ्यम् प्रशस्यस्य भाव १८ ४ **ज्यैष्ठ्याय**= अत्युत्तमकर्मणामनुष्ठानाय १ ५ ६ प्रशस्त-सुख-भावाय १४ १६ प्रशस्यभावाय १४ १५ अतिशयेन प्रशस्यस्य भावाय १४ ६ ज्येष्ठाना वृद्धाना भावाय १४ २७. ज्ञान-वृद्ध-व्यवहार-स्थापनाय ऋ० भू० २२२, ९ ४० वृद्धस्य भावाय ३ ५० ३ विद्याधर्मवृद्धाना भावाय १० १८ ज्येष्ठ-त्वाय ९ ४० ज्येष्ठे मासि भवाय व्यवहाराय, वृद्धत्वाय वा १३ २५ [ज्येष्ठ व्याख्यातम्। ततो भावे कर्मणि वा ष्यञ्-प्रत्यय। ज्यैष्ठ्य वा अग्निष्टोम जै० २ ३७८]

ज्योक् चिराऽर्थे १ २३ २१ निरन्तरम् १ १३६ ६ [स्वरादिपाठादव्ययम्]

ज्योतिरग्रा: ज्योतिर्विद्याप्रकाशादिकमग्रा अग्रगण्या ७ ३३ ७ पहली ज्योति के तुल्य, स० वि० १६९, अथर्व० १४ २ ३१ [ज्योति-अग्रपदयो समास। ज्योति-पद व्याख्यास्यते]

ज्योतिरनीक: ज्योतिरेवाऽनीक सैन्यमिव यस्य स (अग्नि) ७ ३५ ४ [ज्योति =अनीकपदयो समास। ज्योति पद व्याख्यास्यते]

जोषि जुपसे सेवसे, प्र०—अत्र 'बहुलं छन्दसि' इति शब्विकरणस्य लुक्, व्यत्ययेन परस्मैपदं च २ ३७ ६ सेवते २ ३७ ६ [जुषी प्रीतिसेवनयोः (भ्वा०) धातोश्छान्दसं रूपम्]

जोषिषत् जुषेत सेवेत, प्र० —अत्र व्यत्ययेन परस्मैपदम् २ ३५ १ [जुषी प्रीतिसेवनयोः (भ्वा०) धातोर्लेट्। 'सिब्बहुलं लेटि' इति सिप्]

जोष्टार इव सेवमाना इव (प्रजाजना) इव ४ ४१ ६ [जोष्टार-इवपदयोः समासः। जोष्टारोऽग्रिमे पदे द्रष्टव्यम्]

जोष्टारम् प्रीतं सेवमानम् (शमितारं=यजमानम्) २८ १० **जोष्ट्रे**=जुषमाणाय (अ०—होत्रे) १७ ५६ [जुषी प्रीतिसेवनयोः (भ्वा०) धातोः कर्त्तरि तृच्। इडभावश्छान्दसः]

जोष्ट्री सेवनीया (सरस्वती=स्त्री) २१ ५१ सेवमाने (उषासानक्ता=रात्रिदिने) २८ १५ प्रीतिमत्यौ (वसुधिती=विद्याधारिके स्त्रियौ) २८ ३८ **जोष्ट्रीभ्याम्**=सेविकाभ्यां वेलाभ्याम् २१ ५० [जुषी प्रीतिसेवनयोः (भ्वा०) धातोः 'सर्वधातुभ्यः ष्ट्रन्' इत्युणादिसूत्रेण ष्ट्रन् प्रत्ययः। स्त्रियां ङीप्]

जोष्या सेवितुं योग्या (गौः=विद्यासुशिक्षिता वाणी) १ १७३ ८ [जुषी प्रीतिसेवनयोः (भ्वा०) धातोर्ण्यदन्तात् स्त्रियां टाप्]

जोहवीति भृशमाह्वयति ३४ ३८ भृशमाह्वयन्ति ७ ५६ १८ भृशं ददाति ३ ६२ २ भृशमाददाति ७ ३८ ६ भृशं शब्दयति ३ ३३ ४ भृशमुपदिशति ५ ४३ १ भृशं प्रशंसति ७ ४१ ५ निश्चय कर के प्रशंसा करता है, स० वि० १५६, ७ ४१ ५ ग्रहण करने की अत्यन्त इच्छा करता है, आर्याभि० २ ४५, ३४ ३८ **जोहवीमि**=भृशं स्पर्द्धे ५ ४ १० भृशं स्वीकरोमि २ १० ६ भृशं प्रशंसामि आह्वयामि वा ३ ४३ ३ भृशं स्तौमि १ १७५ ६ भृशं ह्वयामि १ १७६ ६ भृशं गृह्णामि ५ ६६ ३ पुनः पुनराददामि १ ३४ १२ भृशमाददामि १ १६४ ५२ [हु दानादानयोः (जु०) धातोर्यङ्लुगन्ताल् लट्। ह्वेञ् स्पर्द्धायां शब्दे च (भ्वा०) धातोर्वा यङ्लुगन्ताल् लट्। धातोः सम्प्रसारणं 'अभ्यस्तस्य च' अ० ६ १ ३३ सूत्रेण। जोहवीमि आह्वये नि० ११ ३३]

जोहुवती या भृशमाह्वयती (स्त्री) ७ २४ २ [ह्वेञ् स्पर्द्धायां शब्दे च (भ्वा०) धातोर्यङ्लुगन्तात् शत्रन्तात् ङीप्]

जोहुवन्त भृशमाददति ७ २१ ७ [हु दानादानयोः (जु०) धातोर्यङ्लुगन्ताल् लङ्। व्यत्ययेनात्मनेपदमडभावश्च]

जोहुवानम् आहूयमानमाह्वयितारं वा (जनम्) ५ ४२ ७. **जोहूवानान्**=भृशमाह्वयमानान् (नॄन्=नायकान् राजपुरुषान्) ७ २८ ३ [ह्वेञ् स्पर्द्धायां शब्दे च (भ्वा०) धातोर्यङन्ताच्छानच्]

जोहुवाना भृशं प्राप्तप्रशंसा (माता) ५ ४७ १ [ह्वेञ् स्पर्द्धायां शब्दे च (भ्वा०) धातोर्यङन्ताच्छानच्। स्त्रियां टाप्]

जोहूत्रम् अतिशयेन स्पर्द्धितम् (अश्वं=विद्युतम्) १ ११८ ६ **जोहूत्रः**=भृशं दाता (इन्द्र=परमेश्वर आप्तो जनो वा) २ २० ३ अतिशयेन सङ्गमनीय (अग्नि) २ १० १ [ह्वेञ् स्पर्द्धायां शब्दे च (भ्वा०) धातोः, हु दानादानयोः (जु०) धातोर्वा छान्दसं रूपम्]

ज्ञातयः सम्बन्धिनः (जनाः) ७ ५५ ५ [ज्ञा अवबोधने (क्र्या०) धातोः स्त्रियां क्तिन्। ज्ञातिः संज्ञानात् नि० ४ २१]

ज्ञात्रम् जानामि येन तत् (ज्ञानम्) १८ ७ [ज्ञा अवबोधने (क्र्या०) धातोः 'सर्वधातुभ्यः ष्ट्रन्' उ० ४ १५ सूत्रेण ष्ट्रन्]

ज्ञासः जानन्ति ये तान् विदुषः, सृष्टिस्थान् ज्ञातव्यान् पदार्थान् वा १ १०६ १ [ज्ञा अवबोधने (क्र्या०) धातोः 'इगुपधज्ञाप्रीकिरः कः' अ० ३ १ १३५ सूत्रेण कः प्रत्ययः। प्रथमाबहुवचने जसोऽसुक्। विभक्तिव्यत्ययः]

ज्ञुबाधः जानुनी बाधमाना (जनाः) ६ १ ६ [जानुशब्दोपपदे बाधृ विलोडने (भ्वा०) धातोः क्विप्। जानुस्थाने ज्ञुरादेशश्छान्दसः]

ज्ञेयाः ज्ञातुं योग्याः (विद्वांसो जनाः) २ १० ६ [ज्ञा अवबोधने (क्र्या०) धातोः 'अचो यत्' सूत्रेण यत्। 'ईद् यति' अ० ६ ४ ६५ सूत्रेण ईकारान्तादेशः]

ज्ञेषम् जानीयाम् प्र०—जानातेर्लेटि सिपि रूपम् २० २५ [ज्ञा अवबोधने (क्र्या०) धातोर्लेट्]

ज्मन् ज्मनि भूमौ, प्र०—अत्र 'सुपां सुलुक्०' इति सप्तम्येकवचनस्य लुक् 'ज्मेति पृथिवीनाम' निघ० १ १, १७ ६ पृथिव्याम् ७ २१ ६ **ज्मयाः**=भूमेर्मध्ये ७ ३९ ३ **ज्मः**=पृथिव्याः ६ ६२ १ [ज्मा पृथिवीनाम निघ० १ १ ज्मया=ज्मा पृथिवी तस्यां भवा नि० १२ ४३ ज्मया=ज्माशब्दात् सप्तम्यां याच्प्रत्ययश्छान्दसः। भवार्थे वा या प्रत्ययश्छान्दसः.]

आ० ६ १० ३ ज्योतिर्वामिम् तै० स० ५ ५ ३ ४ ज्योतिर्वै यज्ञ काठ० ३१ ११ ज्योनिर्वै हिरण्यम् तै० स० ५ ५ ३ ४ ऐ० ७ १२ गो० २ ५ ८ ता० ६ ६ १० श० ६ ७ १ २. ज्योतिर्हि स्वर्गो लोक मै० १ ४ ७ ज्योतिश्च मे सुवश्च मे तै० स० ४ ७ ११ ज्योतिषैव तमस् तरति मै० १ ८ ६ ज्योतिस्तद्यत् साम, ज्योतिस्तद्यद् देवता जै०१ ७६ त्रीणि ज्योतीषि सचते स षोडशी । काठसक० १०५ १६ दिवि ते बृहद्भा इत्याह सुवर्ग एवास्मै लोके ज्योतिर्दधाति तै० स० ३ ४ ३ ६ प्रजा ज्योति श० ८ ३ २ १४ काठ० ३३ ७ वाक् प्राणाना ज्योतिरुत्तमम् काठ० २० ११ विराजा ज्योतिषा सह (घर्मो विभाति) तै० आ० ४ २१ १ मै० ४ ९ १३ सुवर्गो वै लोको ज्योति तै० १ २ २ २ सुवर्वै पूर्वमहर्ज्योतिरुत्तरम् जै० २ २३७ हिङ्कारेण वै ज्योतिषा देवाग्स्त्रिवृते ब्रह्मवर्चसाय ज्योतिरदधु जै० १ ६६ हिरण्य सम्प्रदाय षोडशिना स्तुवन्ति । षोडशिनमेव तज्ज्योतिष्मन्त कुर्वन्ति जै० १ २०५ स त्वमग्ने दिव्येन ज्योतिषा भाहि समन्तरिक्षेण स पार्थिवेन क० ६ ३ स ज्योतिषा भूमेति स देवैरभूमेत्येवैतदाह श० १ ९ ३ १४ अस्य एवैतानि (घर्म, अर्क, शुक्र, ज्योति, सूर्य) अग्नेर्नामानि श० ९ ४ २ २५ ज्योतिरमृतम् श० १४ ४ १ ३२ प्राणो वै ज्योति श० ८ ३ २ १४ अग्निर्ज्योतिर्ज्योतिरग्निरिन्द्रो ज्योतिर्ज्योतिरिन्द्रस्सूर्यो ज्योतिर्ज्योतिस्सूर्य काठ० ४० ६ पञ्च ज्योतीषीद्धान्येषु लोकेषु दीप्यन्ते । अग्नि पृथिव्या वायुरन्तरिक्ष आदित्यो दिवि चन्द्रमा नक्षत्रेषु विद्युदप्सु जै० १ २९२ २.४३३ यत्ते सोम दिवि ज्योतिर्यत् पृथिव्या यदुरा अन्तरिक्षे तेनास्मै यज्ञपतय उरु राये कृधि मै० १ ३ ३ यथामूनि त्रीणि ज्योतीष्येवमिमानि पुरुषे त्रीणि ज्योतीषि यथासौ दिव्यादित्य एवमिद शिरसि चक्षुर्यथाऽसावन्तरिक्षे विद्युदेवमिदमात्मनि हृदय यथायमग्नि पृथिव्यामेवमिदमुपस्थे रेत शा० आ० ७ ४ यद् हिरण्यशल्कै प्रोक्षति, ज्योतिषैवास्मै सवत्सर विवासयति काठ० २१ ६]

ज्योतिष्कृत् यो ज्योतीषि करोति स, अ०—सविता, भा०—विद्याप्रकाशको राजपुरुष ३३ ३६ यो ज्योति प्रकाशात्मक सूर्यादिलोक करोति स (ईश्वर) १ ५० ४ [ज्योतिष्उपपदे डुकृञ् करणे (तना०) धातो क्विप् । ज्योतिष्पद व्याख्यातम्]

ज्योतिष्मत् बहुन्याययुक्तम् (क्षत्र=राज्यम्) १ १३६ ३ [ज्योतिष्पद व्याख्यातम् । ततो मतुप्]

ज्योतिष्मती प्रशस्तानि ज्योतीषि विद्यन्ते यस्या ताम् (तम=रात्रिम्) प्र०—अत्र 'सुपा सुलुक्०' इत्यमो लुक् १ ४६ ६ ज्योतिष्मतीम्=बहु ज्योतिर्विद्यते यस्यास्ताम् (स्त्रियम्) १४ १४ प्रशस्त ज्योतिर्विद्याविज्ञान विद्यते यस्यास्ताम्, (अ०—विद्युतम्) १३ २४ बहुतेजोयुक्ताम् (अदिति=दिवम्) १ १३६ ३ प्रशस्तानि ज्योतीषि ज्ञानानि विद्यन्तेऽस्या ताम् (स्त्रियम्) १५ ५८ [ज्योतिष्प्राति० भूम्नि प्रशस्तार्थे वा मतुप्, तत स्त्रिया ङीप् । ज्योतिष्पद व्याख्यातम्]

ज्योतिष्मन्तम् बहुप्रकाशम् (विद्वज्जनम्) २ २३.३. बहूनि ज्योतीषि विद्यन्ते यस्मिँस्तम् (अग्नि=विद्युतम्) ११ २८ प्रशस्त-ज्योतिर्युक्तम् (अग्नि=विद्युतम्) ११ ३१. **ज्योतिष्मन्त:**=शुद्ध विज्ञानयुक्त मुक्ति को प्राप्त शुद्ध पुरुषगण स० वि० १९७, ९ ११३ ९ **ज्योतिष्मान्**= प्रशस्तप्रकाशयुक्त (अग्नि=जीव) १२ ३८ बहूनि ज्योतीषि प्रकाशा विद्यन्ते यस्य स: (अ०—ईश्वर) १७ ८० बहूनि ज्योतीषि विज्ञानानि विद्यन्ते यस्य स (विद्वान् जन), अ०—सूर्य १२ ३२ [ज्योतिष्पद व्याख्यातम् । ततो भूम्नि प्रशस्तार्थे वा मतुप् । देवयाना वै ज्योतिष्मन्त पन्थान ऐ० ३ ३८ प्रजापतये त्वा ज्योतिष्मते ज्योतिष्मन्त गृह्णामि मै० १ ३ ३५ विराजा ज्योतिष्मान् तै० स० ४ ४ ८ १]

ज्योतीरथम् प्रकाशयुक्त रमणीय यानम् १ १४० १ [ज्योतिष्-रथपदयो' समास]

ज्योते ! हे सुशीलेन द्योतमाने (पत्नि !) ८ ४३.

ज्रयस: वेगवत (यानस्य) ५ ३२ ९ [ज्रयति गतिकर्मा निघ० २ १४]

ज्रयसानौ गच्छन्तौ विजानन्तौ वा (मित्रावरुणौ= अध्यापकोपदेशकौ) ५ ६६ ५ [ज्रयति गतिकर्मा निघ० २ १४ तत शानच् । सुडागमश्छान्दस । व्यत्ययेनात्मनेपदम्]

ज्रय: ज्रयन्त्यभिभवन्त्यायुर्येन तत् (काल) १ ९५ ९ तेज १ १०१ ७ वेगयुक्त (अग्नि) १ १४० ९ वेगवन्त (आप्तपुरुषा) ५ ४४ ६ अतितेजोमया (रश्मय=किरणा) ४ ५२ ५ **ज्रयांसि**=वेगयुक्तानि कर्माणि ५ ८ ७ ज्ञातव्यानि (कार्याणि) प्र०—ज्रयतीति गतिकर्मा, निघ० २ १४, ६ ६ ६ [ज्रयति गतिकर्मा (निघ० २ १४) । ज्रि अभिभवे (भ्वा०) धातोर्वा 'एरच्' अ० ३ ३ ५६ सूत्रेणाच्प्रत्यय]

तकत् वह १ १३३ ४ [तकति गतिकर्मा निघ० २ १४ तक हसने (भ्वा०) धातोर्वा लेट्]

ज्योतिर्जरायुः ज्योतिषा जरायुरिवाऽऽच्छादक (वेन =कमनीयश्चन्द्र) ७ १६. [ज्योति-जरायुपदयो समास । ज्योति पद व्याख्यास्यते । जरायु =जरोपपदे इण् गतौ (अदा०) धातो 'किजरयो श्रिण' उ० १ ३ सूत्रेण ञुण्प्रत्यय । ज्योतिर्जरायु =ज्योतिरस्य जरायुस्थानीय भवति नि० १० ३९]

ज्योतिषस्पती प्रकाशस्य पालयितारौ (मित्रावरुणा= सूर्यवायू) प्र०—अत्र 'षष्ठ्या पतिपुत्र०' अ० ८ ३ ५३ अनेन विसर्जनीयस्य सकारादेश १ २३ ५ [ज्योतिष्-पति-पदयो समास । षष्ठ्या अलुक्]

ज्योतिष: प्रकाशस्य २६ ६ **ज्योतिषा**=प्रकाशेन, भा०—विज्ञानेन ३८ १६ स्वप्रकाशेन ३३ ९२ विद्या-प्रकाशेन ११ ४० विद्यासुशिक्षाप्रकाशेन शीतलेन तेजसा वा १ ९१ २२ विद्यान्यायसुशिक्षाप्रकाशेन ११ ५३ सत्यविद्यो-पदेशप्रकाशेन ३८ १६ सूर्यादिप्रकाशेन वा धर्मादिप्रकाशेन ३७ २१ मननादिरूपप्रकाशेन ३८ १६ तेजस्विना लोक-समूहेन सह २ ९ विद्या-धर्म-प्रकाश-कारकेण (व्यवहारेण) २ २५ दीप्त्या १३ ४० द्योतमानेन (अग्निना) २९ २७ **ज्योतिषाम्**=इन्द्रियाणा सूर्यादीना च, ऋ० भू० १५२, ३४ १ शब्दादिविषयप्रकाशकानामिन्द्रियाणाम्, भा०—ज्ञानस्य साधकत्वादिन्द्रियाणाम् ३४ १ अग्नि, सूर्यादि और श्रोत्रादि इन्द्रिय, इन ज्योति-प्रकाशको का, आर्याभि० २ ४३, ३४ १ **ज्योतिषि**=विद्युति १३ ५३ **ज्योतिषे**= प्रदीपनाय २२ ३० न्याय-प्रकाशाय १३ ३९ **ज्योति:**= प्रकाशम् १५ ५८ विज्ञानम् १४ १४ विद्याप्रकाशम् भा०—विद्युदादिपदार्थविद्याम् १३ २४ प्रकाशक (अग्नि = पावकवद्राजा) ४ १० ३ द्योतमानम्, भा०—अन्त करणमनोऽहङ्कारवृत्तित्वाच्चतुर्विधमन्त प्रकाशकम् (मन) ३४ ३ ज्ञानप्रकाशम् ६ ४७ ८ तेज ३ ३३ प्रकाशकम् (ईश्वरम्) ३३ ४० सूर्यादिप्रकाश ११०० ८ प्रदीप्ति २९ ७ विद्युतो दीप्ति १८ ५० विज्ञानविषयम्, विज्ञान-प्रकाशम् ८ ५२ स्वप्रकाश सर्वप्रकाशक वा (ब्रह्म), सूर्य इव स्वप्रकाश चेतन परमात्मानम् ६ ९ ५ प्रकाशस्वरूपम्, भा०—तेजस्वि (ब्रह्म=अनन्तमीश्वरम्) २३ ४७ प्रकाश-युक्त दिनम् २ २७ १४ शिल्पविद्याप्रकाशम् २९ ३२ प्रकाशवान् (इन्द्र =भौतिक सूर्यो वायुर्वा), प्र०—'द्युते रिसन्नादेश्च ज' उ० २ १०५ इति द्युत-धातोरिसन्प्रत्यय आदेर्जकारादेश्च २ ९ प्रकाशमय, शिल्पविद्यासाधनप्रका-शक (अग्नि =ईश्वरो भौतिको वा) ३ ९ अ०—स्वाहुत हवि ३ ९. सर्वात्मप्रकाशको वेदद्वारा सकलविद्योपदेशक, अ०—सर्वात्मम् ज्ञानम् (सूर्य =चराचरात्मा जगदीश्वर) ३ ९ सर्वव्यवहारप्रकाशक (अ०—सूर्यलोक) ३ ९. सर्वप्रकाशक (अग्नि =जगदीश्वर) ३ ९ सकलपदार्थ-प्रकाशनम् अ०—सकलविद्याप्रकाशक ज्ञानम् ३ ९ सकल-पदार्थप्रकाशनम्, अ०—मूर्त्तद्रव्यप्रकाशनम् ३ ९ पृथिव्यादि-मूर्त्तद्रव्यप्रकाशक (सूर्यलोक) ३ ९ अ०—विद्युदाख्यो-ऽयमग्नि शरीर-ब्रह्माण्डस्थ ३ ९ सत्यप्रकाशक (सूर्य = जगदीश्वर) ३ ९ प्रकाशमिव विद्याम् ३ ३९ ७ सूर्यप्रकाश इव विज्ञानदीप्ति ३ ३९ ८ प्रकाशस्वरूप परमात्मानम् ७ ३२ २९ प्रकाशक, प्रवर्त्तकम् (मन), प्र०—"आत्मा मनसा सयुज्यते, मन इन्द्रियेणेन्द्रियमर्थेन" इति महर्षि-वात्स्यायनोक्ते ३४ १ सर्वपदार्थप्रकाशकम् (मन) ऋ० भू० १५२, ३४ १ ज्ञानप्रकाश २२ ३३ विद्युदादिप्रकाशम् १३ २४ प्रकाशमानम्, अ०—सवितृमण्डलम् २७ १० प्रकाशस्वरूप सूर्यलोकम् १ ५० १० द्युतिम् १७ ५८ दीप्तिम् १ ९३ ४ विद्याप्रकाशादिकम् ७ ३३ ७ विद्या-विनयप्रकाशम् १ ११७ २१ न्याय-विनय-प्रचारकम् (प्रशस्त बुद्ध्यादिकम्) १ ५७ ३ प्रकाशमयम् (स्व = सुखम्) ४ १६ ४ प्रकाशयुक्त (मन =मन), स० प्र० २४७, ३४ ३ स्वप्रकाशस्वरूप और सुख के प्रकाशक (ईश्वर) को, आर्याभि० २ १७, ५ ३२ सूर्यादि लोक, अग्न्यादिपदार्थ, आर्याभि० २ १३, १८ २९ स्वय प्रकाशकत्वेन ज्ञानप्रकाशकम् (ब्रह्म) १ ३६ १९ युद्धविद्या-प्रकाशम् ३ ३४ ३ **ज्योतींषि**=विद्यातेजासि ३ १० ५ विद्यादिसद्गुणप्रकाशकानि तेजासि १ ५५ ६ अग्नि-सूर्य-विद्युदाख्यानि सर्वजगत्प्रकाशकानि, ऋ० भू० ४४, तेजो-मयानि प्रकाशकानि (विद्युत्सूर्यचन्द्ररूपाणि) ३२ ५ सूर्य-विद्युदग्न्याख्यानि ८ ३६ अग्नि, वायु और सूर्य इनको, आर्याभि० २ १४, १४ १४ [द्युत् दीप्तौ (भ्वा०) धातो 'द्युतेरिसिन्नादेश्च ज' उ० २ ११० सूत्रेण इसिन्प्रत्यय. । आदेश्च जकारादेश । अयमग्निर्ज्योति श० ९ ४ २ २२ अय वै (भू) लोको ज्योति काठ० ३३ ३ ऐ० ४ १५ जै० २ ३१७ असौ (सूर्य) वाव ज्योतिस्तेन सूर्य नाति-शसति ऐ० ४ १० अहर्ज्योति श० १० २ ६ १९ इद-मेवान्तरिक्ष ज्योति जै० २ १९६ इय (पृथिवी) वाव ज्योति तै० स० ७ २ ४ २ ता० १६ १ ७ एतद्ध ज्योति-रुत्तम य एष (सूर्य) तपति जै० २ ६८ एतद्ध वाव सर्वेषु लोकेषु ज्योतिर्यद् हिरण्यम् जै० १ ८० एतद्वै प्रजात देवतीर्थ यज्ज्योतिरतिरात्र जै० २ ३०५ ज्योति प्रवर्ग्य श० १४ ४ १ ३२ तै० आ० ५ १० ४. ज्योतिरिति नक्षत्रेषु तै०

ववर्थेति निगमे' अ० ७.२ ६४. सूत्रेण निपातनात् न]

ततन्वत् विस्तृणन् (जगदीश्वर) प्र०—अत्र तनु धातो शतृप्रत्यये 'बहुल छन्दसि' अ० २ ४ ७६. अनेन बहुल शप श्लु ६ २१ ३ [तनु विस्तारे (तना०) धातो शतृप्रत्यये छान्दस शप श्लु । व्यत्ययेन उकारप्रत्ययश्च]

ततन्वान् विस्तीर्ण (सूर्य =सवितृमण्डलम् ७ ६१ १. [तनु विस्तारे (तना०) धातोर्लिट कानच् । 'छन्दस्युभयथे' ति लिट सार्वधातुकत्वाद् शप उकारप्रत्ययोऽपि भवति]

ततपते तताना विस्तृताना पालक (अग्ने=पावक राजन्) ४ २ ६ [तत-पतिपदयो समास । तत =तनु विस्तारे (तना०) धातो क्त । 'यस्य विभाषा' इत्यनिट्त्वेऽनुनासिकलोप]

ततम् व्याप्तम् (परिधि=सर्वलोकाऽऽवरणम्) ७ ३३ ६. विस्तृतम् (अप =कर्म १ ११० १ **ततः**= विस्तृत (सूर्य), प्र०—अत्र 'तनिमृङ्०' उ० ३ ८६. अनेन तन्-प्रत्यय किच्च १ ८३ ५ [तनु विस्तारे (तना०) धातो क्त प्रत्यय । अथवा तनु विस्तारे धातो. 'तनिमृङ्भ्या किच्च' उ० ३ ८८ सूत्रेण तन्प्रत्यय किच्च]

ततरुषः तारक (यजत्र =राजा) ६.१२ २ [तॄ प्लवनसन्तरणयो (भ्वा०) धातोर्लिट क्वसु । विभक्तिव्यत्ययश्च]

ततर्द हिनस्ति, प्र०—अत्र लडर्थे लिट् १ ३२ १ विस्तारितवान्, ऋ० भू० २८३, १ ३२ १ जलप्रवाहेण हिंसितवान्, ऋ० भू० २८३, १ ३२ १ [तर्द हिंसायाम् (भ्वा०) धातोर्लिट्]

ततर्ह तिरस्करोति, सर्वान्निवारयति, ऋ० भू० २३७, अथर्व० ११ ३ ७ [तृह हिंसार्थे (तुदा०) धातोर्लिट्]

ततस्रे तस्यन्ति दु खान्युपक्षयन्ति १ १३१ ३ तन्वन्ति ४ २३ ५ उपक्षयन्ति ४ ५० २ [तसु उपक्षये (दिवा०) धातोर्लिट् । व्यत्ययेनात्मनेपदम् । 'इरयो रे' अ० ६ ४ ७६ सूत्रेण 'रे' इत्यादेश]

ततः तदनन्तरम् १० १६ तस्मात् ८ ६० इस कारण से स० वि० २१५, ४० ६ भा०—पश्चात् ३१४ [तद्-सर्वनाम्न 'पञ्चम्यास्तसिल्' इति विभक्तिसञ्ज्ञके तसिल्-प्रत्यये 'त्यदादीनाम ' इत्याकारान्तादेश]

ततान तनोति विस्तृणोति १ ३५ ७ तनयति ५ ५४ ५ विस्तारयति, प्र०—तुजादित्वाद् दीर्घ १ १०५ १२ तनुते विस्तृणाति ३ ५३ १५ [तनु विस्तारे (तना०) धातोर्लिटि प्रथमैकवचनम्]

ततार तरेत् ७.३३.३ [तॄ प्लवनसन्तरणयो (भ्वा०) धातोर्लिटि प्रथमैकवचनम्]

ततुरिम् त्वरमाणम् (अग्नि=पावकम्) ४ ३६.२. दु खात् तारयितारम् (परमात्मानम्) ६ २२ २ **ततुरिः**= शत्रूणा हिंसक (राजा) ६ २४ २ तरिता (सेनेश) ६ ६८ ७ दु खान सर्वान् सन्तारक (परमात्मा) १ ४५ ३ [तॄ प्लवनसतरणयो. (भ्वा०) धातो 'आदृगमहनजन.०' अ० ३ २.१७१. सूत्रेण तच्छीलादिष्वर्थेषु कि प्रत्ययो लिट्वच्च कार्यम् । उपह्वते ततुरिरिति । तदेना प्रत्यक्षमुप-ह्वयते ततुरिरिति सर्व ह्येषा पाप्मान तरति तस्मादाह ततुरिरिति श० १ ८ १ २२

ततृदाना दु खस्य हिंसयाँ (राजप्रजाजनौ) ४.२८ ५ **ततृदानाः**=भूमि हिंसन्त (सिन्धव =नद्य) ५ ५३ ७ [उतृदिर् हिंसानादरयो (रुधा०) धातोर्लिट कानच् । सुपा सुलुग्०' इत्याकारादेश । अन्यत्र प्रथमाबहुवचनम्]

ततृपि अतिशयेन तृप्तिकारकम् (सोमम्=ओषधिगणम्) ३.४० २ [तृप प्रीणने (दिवा०) धातो 'किकिनावुत्सर्गश्छन्दसि' अ० ३ २ १७१ वा० सूत्रेण कि]

ततृपाणम् प्राप्ततृपम् (प्राणिनम्) १.१३० ८ भृश तृपिनम् (ओक =गृहम्) १ १७३ ११ **ततृपाणः**= तृपातुर (वीरपुरुष) ६ १५ ५ तातृपाण भृश तृड्युक्त (वनवृजन) प्र०—अत्र तुजादित्वादभ्यासदीर्घ २ ४ ६ अतिशयेन पिपासित (सेनापति) १ १३० २ पुन पुनर्जन्मनि तृप्यति (सूरिर्मेधाविजन) प्र०—अत्र 'छन्दसि लिट्' इति लडर्थे लिट् 'लिट कानज्वा' इति कानच्, वर्णव्यत्ययेन दीर्घत्वञ्च १ ३१ ७ [ञितृष पिपासायाम् (दिवा०) धातोर्लिट स्थाने कानच्]

तते तनुते, प्र०—अत्र 'बहुल छन्दसि' इति विकरणस्य लुक् १ ८३ ५.

तत्वाय ब्रह्मादितत्त्व-ज्ञानाय, ऋ० भू० १५६, १११ तेषा परमेश्वरादीना पदार्थाना भावाय १११ [तद्-सर्वनाम्नो भावे त्व प्रत्यय । ततश्चतुर्थी]

तत्निरे विस्तृणन्ति १ १६४ ५ [तनु विस्तारे (तना०) धातोर्लिटि प्रथमबहुवचने 'तनिपत्योश्छन्दसि' अ० ६ ४ ९९ सूत्रेण धातोरुपधाया लोप]

तत्र तेषु कर्मसु १ १३ १२ उस सन्यास आश्रम मे, स० वि० २१५, ४० ७ तस्मिन् १ १०५ ९ उसी अपने स्वरूप मे, स० वि० १९७, ९ ११३ ११ [तद्-सर्वनाम्न 'सप्तम्यास्त्रल' अ० ५ ३ १० सूत्रेण त्रल]

तकम् तम्, प्र०—अत्राऽकच्प्रत्यय १ १९१ १५ [तद्सर्वनाम्नो द्वितीयैकवचने 'तम्' इति रूपम्। तत 'अव्ययसर्वनाम्नामकच् प्राक् टे' अ० ५ ३ ७१ सूत्रेणाकच्]

तकवानस्य प्राप्तविद्यस्य (विदुषो जनस्य), प्र०—गत्यर्थात् तकधातोरौणादिक उ, पश्चाद् भृगवाणवत् आचारे क्विपि, व्यत्ययेनात्मनेपदे शानचि 'छन्दस्युभयथा' इत्यार्धधातुकत्वाद् गुण १.१२० ६

तक्तः प्रसन्न (इन्द्र =परमैश्वर्यप्रदो राजा) ६ ३२ ५ [तक हसने (भ्वा०) धातो क्त प्रत्यय]

तक्ववीये तक्वना स्तेनानामसम्बन्धे मार्गे १ १३४ ५ [तक्वा स्तेननाम निघ० ३ २४]

तक्ववीरिव यस्तकान् सेनाजनान् व्याप्नोति तद्वत् (अध्यापक-उपदेशक इव) १ १५१.५ [तक्ववी -इव पदयो समास]

तक्वा स्तेन १ ६६ १ [तक्वा स्तेननाम निघ० ३ २४]

तक्षत् तनूकरोति १ ६१ ६ तीक्ष्णीकृत्य शत्रून् हिंस्यात् १ १२१ ३ **तक्षत**=निष्पादयत १ १११ २. सूक्ष्मान् कुरुत ३ ३८.२ प्रापयत ४ १६ ८ रक्षत ३ ५४ १७ विस्तृणुत ४ ३६ ८ [तक्षू तनूकरणे (भ्वा०) धातोर्लेट्। अन्यत्र लोट्। 'तनूकरणे तक्ष' अ० ३ १ ७६. सूत्रेण विकल्पेन श्नु पक्षे शप्। तक्षति करोति कर्मा नि० ४.१९]

तक्षत् जलादीनि तनूकुर्वन् (सूर्य-मण्डलम्) १ १२७ ४. [तक्षू तनूकरणे (भ्वा०) धातो शतृप्रत्यय]

तक्षति छिन्दन्ति, प्र०—अत्र वचनव्यत्ययेनैकवचनम् १ १६२ ६ तक्षन्ति तनूकुर्वन्ति, भा०—निर्मिमते प्र०—अत्राऽपि वचनव्यत्ययेनैकवचनम् २५ २९ **तक्षथ**=कुरुत ४ ३६ ३ **तक्षन्**=रचयन्तु ५ ३१ ४ सूक्ष्मीकुर्वन्तु १ १११ १ विस्तीर्णां कुर्वन्तु १ १११ १ सूक्ष्मरचनायुक्त कुर्वन्तु १ १११ १ सूक्ष्म कुर्वन्ति, छेदनादिना रचयन्ति वा, प्र०—अत्र लडर्थे लङडभावश्च १ २० ३ **तक्षन्तु**=रचयन्तु ४ ३३ ८ [तक्षू तनूकरणे (भ्वा०) धातोर्लेट्। अन्यत्र लङ् लोट् च। लङ्यडभावश्छान्दस]

तक्षभ्यः ये तक्ष्णुवन्ति तनूकुर्वन्ति तेभ्य (शिल्पिभ्य) १६ २७ [तक्षू तनूकरणे (भ्वा०) धातो 'कनिन् युवृपितक्षि०' उ० १ १५६ सूत्रेण कनिन्प्रत्यय]

तक्षम् उपदिशेयम् ६ ३२ १ [तक्षू तनूकरणे (भ्वा०) धातोस्सामान्ये लङ्। उत्तमैकवचनम्। अडभावश्च]

तक्षाणम् तनूकर्त्तारम् (शिल्पिजनम्) ३० ६ [तक्षन् प्राति० द्वितीयैकवचनम्। तक्षन् इति व्याख्यातम्]

तक्षाम सवृणुयामाऽऽच्छादयाम, स्वीकुर्याम ५ ७३ १०. **तक्षुः**=विस्तृणीयु २ १९ ८ [तक्ष त्वचने (सवरणे) (भ्वा०) धातोर्लोट्। उत्तमैकवचनम्। अन्यत्र तक्षू तनूकरणे (भ्वा०) धातोर्लिट् सामान्ये। द्वित्वाभावश्च छान्दस]

तकितः विद्युत २ २३ ९ [तड आघाते (चु०) धातो 'ताडेर्णिलुक् च' उ० १ ९८ सूत्रेण इति प्रत्ययो णेश्च लुक्। तडिदित्यन्तिकवधयो ससृष्टकर्म ताडयतीति सत नि० ३ १० विद्युत् तडिद् भवतीति शाकपूणि। सा ह्यवताडयति दूराच्च दृश्यते। अपि त्विदमन्तिकनामैवाभिप्रेत स्यात् नि० ३ ११ तडित्=अन्तिकनाम निघ० २ १६ वधकर्मा निघ० २ १९]

तळिदिव यथा विद्युत्तथा १.९४ ७ [तडित्-इव-पदयो समास। तडिदिति व्याख्यातम्]

ततक्ष तक्षति १ ५२ ७ तीक्ष्णीकरोति ६ ३ ८ छिनत्ति १ ३२ २ कणीकृत्य भूमौ पातयति १ ३२ २ प्रक्षिपेत् १ १२१ १२ **ततक्षुः**=तनू कुर्वन्ति। प्र० अत्र लडर्थे लिट् १ २० २ सूक्ष्मा विस्तृताश्च कुर्वन्ति ४ ३४ ९ **ततक्षे**=तनूकरोषि ५ ३३ ४ [तक्षू तनूकरणे (भ्वा०) धातोर्लिट्। तक्षति करोतिकर्मा नि० ४ १९ ततक्षु =चक्रु नि० ६ २७]

ततनन् तनिष्यन्ति ४ ५ १३ तन्वन्तु १ १६६ १४ **ततनन्त**=विस्तीर्णानि भवन्ति १ ५२ ११ **ततनः**=व्याप्नुहि ७ १ २ विस्तारय, प्र०—लेटि मध्यमैकवचने 'तनु विस्तारे' इत्यस्य रूपम्, विकरणव्यत्ययेन श्नो श्लु १ ३८ १४ **ततनाम**=विस्तीर्णीयाम ५ ५४ १५ विस्तारयेम १ १६० ५ **ततने**=विस्तृणीयाम् ७ २९ ३ [तनु विस्तारे (तना०) धातोर्लेट्। विकरणव्यत्ययेन उ-प्रत्ययस्य स्थाने श्लु]

ततनुष्टिम् विस्तारम् ५ ३४ ३ [तनु विस्तारे (तना०) धातो सन्नन्तात् क्तिच् कर्त्तरि। 'तितनिष्टि' इत्यस्य स्थाने ततनुष्टि। अभ्यासस्य इकाराभाव, सन्-प्रत्यये इट स्थाने उट्आगमश्छान्दस। ततनुष्टि ततनिषु धर्मसन्तानादनपेतमलङ्करिष्णुमयज्वानम् नि० ६ १९]

ततन्थ तनोति ६ १६ २१ विस्तृणोति ६ १ ११ तनोषि ६ ४ ६ विस्तारयति ३ ६ ५ विस्तृणोषि ६ ६ ६ विस्तृणुहि १९ ५४ **ततन्युः**=विस्तृणीयु १ १४१ १३. [तनु विस्तारे (तना०) धातोर्लिटि मध्यमैकवचने छान्दसत्वाद् एत्वाभ्यासलोपौ इडागमश्च 'बभूथाततन्थजगृम्भ-

ऽन्-प्रत्यय । स्त्रिया टाप्]

तनाय य सर्वम्मै सद्विद्याधर्मोपदेशेन सुखानि तनोति तस्मै (कण्वाय=मेधाविजनाय) प्र०—अत्र वाहुलकादौणादिकोऽन्प्रत्यय । इद सायणाचार्येण पचाद्यजित्यशुद्ध व्याख्यातम् । कुतोऽच्-स्वराऽभावेन 'ञ्नित्यादिर्नित्यम्' इत्याद्युदात्तस्याऽभिहितत्वात् १ ३६ ७ [तनु विस्तारे (तना०) धातोरौणादिकोऽन्-प्रत्यय । ततश्चतुर्थी]

तनु विस्तृणुहि १ १२० ११ **तनुते**=विस्तृणोति ३३ ३७ **तनुथाः**=विस्तारये ५ ७९ ६ **तनुध्वम्**= विस्तृणीत १२ ६८ **तनुष्व**=विस्तृणीहि २ ३३ १४ **तनुहि**=विस्तृणीहि ४ ४५ [तनु विस्तारे (तना०) धातोर्लोटि रूपाणि । 'उतश्च प्रत्ययाच्छन्दो वा वचनम्' अ० ६ ४ १०६ वा० सूत्रेण छन्दसि हेर्लोपे विकल्प]

तनुकृद्भ्यः यथा विस्तारकारिभ्यस्तथा (पापिजनेभ्य) ५ ३५ **तनूकृत्**=यस्तनूषु पृथिव्यादिविस्तृतेषु लोकेषु विद्या करोति स (सर्वमङ्गलकारक सभाध्यक्ष) १ ३१ ६ [तनूपपदे डुकृञ् करणे (तना०) धातो क्विप्-प्रत्यय । तनू =तनु विस्तारे (तना०) धातो 'कृषिचमितनि०' उ० १ ८० सूत्रेण स्त्रियाम् ऊ प्रत्यय]

तनूनपात् यस्तनूनि शरीराणि न पातयति स (यज्ञ) १ १८८ २ शरीररक्षक (विद्वज्जन) ३ ४ २ यस्तनू न पातयति, भा०—न स्वशरीरनाशक (विद्वज्जन) २०.३७ यस्य तनूर्व्याप्तिर्न पतति (अग्नि) ३ २९ ११ यस्तनूषु शरीरेषु न पतति स (असुर =वायु) २७ १२ यस्तनूर्विस्तृतान् पदार्थान् न पातयति तत्सम्बुद्धौ (भा०—धार्मिकमनुष्य !) २९ २६ तनूना शरीरौषध्यादीनामूनानि न्यूनान्युपाङ्गानि पाति रक्षति स (अग्नि =भौतिक), प्र०—इम शब्द यास्कमुनिरेव समाचष्टे—तनूनपादाज्य भवति०' नि० ८ ५, १ १३ २ यस्तनू शरीर न पातयति तत्सम्बुद्धौ (विद्वज्जन !) १ १४२ २ यस्तन्वा ऊन पाति स (होता=आदातृजन) २१ ३० **तनूनपातम्**=शरीरादिरक्षकम् (गर्भम्) २८ २५ य शरीराणि न पाति तम् (इन्द्र=परमैश्वर्यकारक राजानम्) २८ २ [तनूनपाद् आज्यमिति कात्थक्य । नपादित्यनन्तराया प्रजाया नामधेय निर्णततमा भवति । गौरत्र तनूरुच्यते, तता अस्या भोगा, तस्या पयो जायते, पयस आज्य जायते । अग्निरिति शाकपूणि । अग्निरत्र तन्व उच्यन्ते तता अन्तरिक्षे ताभ्य ओषधिवनस्पतयो जायन्ते । ओषधिवनस्पतयो जायन्ते । ओषधिवनस्पतिभ्य एष जायते नि० ८ ५ प्राणो वै तनूनपात् स हि तन्व पाति ऐ० २ ४ ग्रीष्मो वै तनूनपाद् ग्रीष्मो ह्यासा प्रजाना तनूस्तपति श० १ ५ ३ १० तनूनपात यजति ग्रीष्ममेव, ग्रीष्मो हि तन्व तपति कौ० ३ ४ रेतो वै तनूनपात् श० १ ५ ४ २ तनूनपाद् वै यज्ञ प्रसृत काठ० ३६ ३ तनूनपात यजति, यज्ञमेवावरुन्वे तै० स० २ ६ १ १ यो वाऽयं (वायु) पवते एष तनूनपात् श० ३ ४ २ ५]

तनूनप्त्रे तनूर्देहान् नयन्ति प्राप्नुवन्ति येन तस्मै ५ ५ [तनूपपदे णीञ् प्रापणे (भ्वा०) धातो तृचि रूपम्]

तनूनाम् शरीराणाम् २७ ४४ विस्तृतसुखसाधकाना शरीरादीना पदार्थाना वा २ २३ ८ शरीराणा विस्तृताना पदार्थाना वा १ ५ १० शरीरो की म० प्र० ११०, १ १७९ १ **तनूभिः**=विस्तृतशरीरै ४ ५१ ६ बलविशिष्टशरीरैर्विद्वद्भि ८ १६ विस्तृतवलै शरीरै १ ८६ ८ सुसस्कृतै शरीरै १५ ७ तन्वते सुखानि कर्माणि च यासु ताभि २ २४ शरीरो से, स० वि० १३९, अथर्व० १४ २ ३२ **तनूषु**=विस्तृतबलयुक्तेषु शरीरेषु १ ८५.३ **तनूः**=व्याप्ति-निमित्त शरीरम् ५ ४० शरीर विस्तृता नीतिर्वा १६ ४९ व्याप्ति ५ ८ शरीरवद्विस्तारक वा (हवि) ५ १ विद्याविस्तृति ५ ४० व्याप्त विस्तृत शरीरम् ५ ८ विस्तृता व्याप्ति ५ ६ शरीराणि १५ ७ सुखविस्तारनिमित्त शरीरम् ४ २ शरीरवत् तस्य सयोगेन विस्तृतो यज्ञ १ १५ विद्याविस्तृति ५ ४० **तन्वि**= शरीरे ६ ४६ १२ **तन्वै**=शरीराय २३ ४४ [तनु विस्तारे (तना०) धातो 'कृषिचमि०' उ० १ ८० सूत्रेण स्त्रियाम् ऊ प्रत्यय । तनु =तनु विस्तारे धातो 'भृमृशीङ्०' उ० १ ७ सूत्रेण उ प्रत्यय । आत्मा वै तनु श० ६ ७ २ ६ सा मे ते (सुपर्णस्य गरुत्मत) तनूर्वामदेव्यम् मै० २ ७ ८]

तनूपा यौ तनु पातस्तौ (अश्विना=स्त्रीपुरुषौ) २० ५६ [तनू व्याख्यातम् । तदुपपदे पा रक्षणे (अदा०) धातो क प्रत्यय । 'सुपा सुलुग्' इत्याकार]

तनूपाः यस्तनू सर्वपदार्थदेहान् पाति रक्षति स जगदीश्वर, पालनहेतुर्भौतिको वा (अग्नि) ३ १७ स्वस्याऽन्येषा च शरीराणा रक्षक (इन्द्र =राजा) ६ ४६ १० य शरीरमात्मान च रक्षति (अग्नि =अन्तस्थो विज्ञानस्वरूपो वा०) ४ १५ शरीरपालक (राजा) ४ १६ २० शरीर का रक्षक (ईश्वर) आर्याभि० २ ३३, ३ १७ [तनू इति व्याख्यातम् । तदुपपदे पा रक्षणे (अदा०) धातो क्विप्-प्रत्यय । आत्मा वै तनू श० ६ ७ २ ६]

तत्रो तेषु खलु १ ३७ १४

तत्सार तत्सरेत् १ १४५ ४ [त्सर छद्मगतौ (भ्वा०) धातोर्लिटि प्रथमैकवचनम्]

तत्सिनाय तस्य यानसमूहस्य बन्धनाय १ ६१ ४ [तत्-सिनपदयो समास । सिन =षिञ् बन्धने (स्वा०) धातो क्त । निष्ठातकारस्य नकारश्छान्दस]

तथा तेन प्रकारेण ३१ १३ [तद्-सर्वनाम्न 'प्रकारवचने थाल्' अ० ५ ३ २३ सूत्रेण थाल्प्रत्यय । तथा=उपमानाम निघ० ३ १३]

तदप: तेषा प्राणान् ५ ४७ २ **तदपा:**=तदप कर्म यस्य स (सविता=जगदीश्वर) २ ३८ १ [तद्-अप-पदयो समास । अप कर्मनाम निघ० २ १]

तदोकस: तान्यन्तरिक्षवाय्वादीन्योकासि येषा ते (इन्दव =जलरसा १ १५ १ **तदोकसा**=तदोक स्थान ययोस्तौ (इन्द्रावृहस्पती=राजामात्यौ) ४ ४९ ६ **तदोकसे**=तद्यानमोक स्थान यस्य तस्मै (शिल्पिजनाय) ३ ३५ ७ **तदोका:**=तच्छ्रेष्ठमोको गृह यस्य स (वैद्यकशास्त्रविज्जन) ७ २९ १ [तद्-ओकम्पदयो समास । तदिति सर्वनाम । ओकम्=अव रक्षणादिषु (भ्वा०) धातोर् बाहुलकादौणादिक कक्प्रत्यय]

तदोजा: तदेवौज पराक्रमो यस्य स (अतिथिर्जन) ५ १ ८ [तद्-ओजम्पदयो समास । ओजस्=उब्ज आर्जवे (तुदा०) धातो 'उब्जेर्बले बलोपश्च' अ० ४ १९२ सूत्रेण असुन् बलोपश्च]

तद्वश: तदिच्छ द्रविणोदा =विद्वान्) २ ३७ १ **तद्वशाय**=तत्तत्कामयमानाय (ऐश्वर्यवते जनाय) २ १४ २ [तद्-वशपदयो समास । वश =वश कान्तौ (अदा०) धातो 'वशिरण्योरुपसङ्ख्यानम्' इति वार्त्तिकेन अप्प्रत्यय]

तनच्मि सङ्कोचयामि, दृढीकरोमि १ ४ [तञ्चू सङ्कोचने (रुधा०) धातोर्लटि उत्तमैकवचनम्]

तनत् विस्तारयेत् १ ६१ २३ [तनु विस्तारे (तना०) धातोर्लेटि रूपम् । विकरणव्यत्ययेन शप्]

तनयम् सुखविस्तारकमपत्यम् ६ १३ ६ विशालम् (तोकम्=अपत्यम्) ७ ६० ८ विस्तीर्णशुभगुणकर्मस्वभावम् (तोकम्=अपत्यम्) ७ ५६ २० विद्यापुत्रम् (भा०—अपत्यम्) ३४ ५८ विद्वास पौत्रम् १ ६४ १४ औरस विद्यार्थिन वा २ २४ १६ पौत्रम् २ २५ २ प्राप्तकुमारावस्थम् (अपत्यम्) ३४ ३३ सुकुमारम् ६ ४८ १० **तनयस्य**=अपत्यस्य १ १६६ ८ पौत्रादे १.१०० ११ यून पुत्रस्य २ ३० ५ कुमारावस्था प्राप्तस्य (तोकस्य=अपत्यस्य) ४ २४ ३ **तनय:**=सुखविस्तारक (शिष्य) ३ २३ ५ विस्तीर्णवृद्धि (सूनु =पुत्र) ३ १ २३. भा०—सुसन्तान १२ ५१ कामद (सुसन्तान) ३ ५.११ धार्मिक पुत्र ३.१५ ७. विद्याविस्तारक (सूनु =अपत्यम्) ३ २२ ५ विद्यासुखप्रचारक (सूनु) ३ ७ ११ **तनयाय**=कुमाराय (पुत्राय) ५ ६९ ३ सन्तानाय ६ ४९ ५ यूने पुत्राय १ ११४ ६ सुकुमाराय सन्तानाय ६ ५० ७ सुसन्तानाय १ १८४ ५ प्राप्तकौमार्यौवनाऽवस्थाय (विद्यार्थिजनाय) ३ ५३ १८ प्राप्तकुमाराऽवस्थाय (तोकाय=सद्यो जातायाऽपत्याय) २ ३३ १४ दशवार्षिकाय षोडशवार्षिकाय वा (अपत्याय) ४ १२ ५ **तनये**=अतीतशैशवाऽवस्थे पुत्रे १ ११४ ८ पञ्चमाद्वर्षादूर्ध्व वय प्राप्ते, भा०—कुमारे १६ १६ ब्रह्मचारिणि कुमारे ६ ३१ १ पौत्रस्य, प्र०—अत्र विभक्तिव्यत्यय ३४ १३ [तनु विस्तारे (तना०) धातो 'वलिमलितनिभ्य कयन्' उ० ४ ९९ सूत्रेण कयन्प्रत्यय । तनय.=अपत्यनाम निघ० २ २ तनयेषु=पौत्रेषु । तनय तनोते. नि० १० ७]

तनयावहै विस्तृणावहै १ १७० ४ [तनु विस्तारे (तना०) धातोर्णिजन्ताल्लेटि रूपम्]

तनयित्नो: विद्युत ४ ३ १ [स्तनयित्नुशब्दात् षष्ठी । सकारलोपश्छान्दस । स्तनयित्नु =स्तनी देवशब्दे (चुरा०) धातो 'स्तनिहृषि०' उ० ३ २९ सूत्रेण णिजन्ताद् इत्नुच् प्रत्यय]

तनसा पौत्रादिसहिता (जना) ५ ७० ४ [तनु विस्तारे (तना०) धातोरौणादिकोऽसुन् वचनव्यत्यय तना धननाम निघ० २ १०]

तना विस्तारक (अग्नि =विद्वज्जन) ३ २५ १ विस्तृतधनप्रदा (सुता =मूर्त्तिमन्त पदार्था) प्र०—तनेति धननामसु पठितम्, निघ० २ १० अत्र 'सुपा सुलुक्' इत्यनेनाकारादेश, अ०—विस्तृतप्राप्तिहेतव सूर्यकिरणा १ ३ ४ विस्तृतेन (राया=धनेन) ६ ४९ १३ विस्तृतगुणेन २० ८७ [तना धननाम निघ० २ १० तनु विस्तारे (तना०) धातोरन्प्रत्यय औणादिक]

तना विस्तृतानि धनानि १ ७७ ४ [तना धननाम निघ० २ १०]

तना विस्तृतया (वाण्या) २ २ १ विस्तृता (तविषी=सेना) १ ३९ ४ [तनु विस्तारे (तना०) धातोरौणादिको

णार्थम् ३४४८ [तनूरिति पद व्याख्यातम् । तत षष्ठी चतुर्थी च]

तन्वि विस्तीर्णा नीति ४ ६ ६ [तनुप्राति० स्त्रिया ङीप्]

तन्वे विस्तृणुयाम् ४ १८ १० [तनु विस्तारे (तना०) धातोर्लटि उत्तमैकवचनम्]

तप तापय तपस्वी भव वा ६ ५ ४ सन्तापय २ २३ १४ **तपत्**=तपेत् २५ ४३ **तपति**=विशेषेण सन्तापयति ३ ५३ २ **तपतु**=तपे, आर्याभि० २ २२, ३६ १० [तप सन्तापे (भ्वा०) धातोर्लोट् लेट् लट च क्रमश]

तपनः तापकृत् (जगदीश्वरो विद्वज्जनो वा) २ २३ ४ [तप सन्तापे (भ्वा०) धातोर्नन्द्यादित्वाल् ल्यु प्रत्यय]

तपनी सन्तापिनी (शस्त्र्या) २ २३ १४ [तप सन्तापे (भ्वा०) धातोर्ल्युडन्तात् ङीप्]

तपन् शत्रून् सन्तापयन् (अग्नि =विद्वान्राजा) १२ १६ **तपन्तः**=सन्तापदु ख सहमाना (विप्रा = मेधाविनो जना) ५ ४३ ७ [तप सन्तापे (भ्वा०) धातो शतृप्रत्यय]

तपन्ति क्लेशयन्ति १ १०५ ८ **तपन्तु**=दु खयन्तु, भा०—ताडन कुर्वन्तु १७ ७ सन्तापयन्तु १७ ११ पीडयन्ति ३६ २८ [तप सन्तापे (भ्वा०) धातोर्लट् । तपन्ति पाचयन्ति नि० २ २२]

तपसः धर्मानुष्ठानस्याऽग्नेस्तापसस्य वा ४ २६ प्रतापकस्य (दिव =सूर्यादे) ३७ १६ अनन्तसामर्थ्यात्, प० वि०, **तपसा**=धर्मानुष्ठानेन १५ ४६ धर्म-विद्याऽष्ठानेन तापेन तेजसा वा १ १८ प्रतापेन २६ ११ ब्रह्मचर्य प्राणायामादिकर्मणा ६ ५ ४ सन्तापेन १२ १५ ब्रह्मचर्याऽनुष्ठान रूप तप से, स० वि० ८०, अथर्व० ११ ५ ४ तपश्चरण से स० वि० ८०, अथर्व० ११ ५.१७ **तपसि**= विज्ञाने, ऋ० भू० ६०, अथर्व० ११ ५ १७ **तपसे**= माघाय ७ ३० तप उत्पादकाय माघाय २२ ३१ सन्तापजन्याय सेवनाय ३० ५ तपनाय ३० ७ **तपः**=प्राणायामो धर्माऽनुष्ठान वा १८ २३ जितेन्द्रियत्वादिपुरस्सर धर्माऽनुष्ठानम् ५ ६ प्राक्क्लेशमुत्तरानन्द ब्रह्मचर्य्यम् ५ ४० यस्तापहेतु स माघो मास १५ ५७ भा०—सतत धर्माचरणम् १८ २३ सन्तापो गुण १४ २३ धर्मे श्रमकर्त्ता, भा०—दुष्टान् परिताप्य श्रेष्ठाना सुखयिता (विद्वान्) ३७ ११ बडे उत्तम व्रत ब्रह्मचर्य को, स० वि० ६३, अथर्व० ११ ५ २६ ब्रह्मचर्य रूप आश्रम को, स० वि० १६८, अथर्व० १६ ४१ १ [तप सन्तापे (भ्वा०) धातो• 'सर्वधातुभ्योऽसुन्' उ० ४ १८६ सूत्रेणासुन् प्रत्यय । तपति दु खीभवति तप्यते समर्थो वा भवति येन तत् तप । तप ऐश्वर्ये (दिवा०) धातोर्वाऽसुन् । तप दाहे (चुरा०) धातोर्वाऽसुन् । तपस्प्राति० 'मत्वर्थे मासतन्वोरि' ति सूत्रेण प्राप्तस्य यत्प्रत्ययस्य 'लुगकारेकाराश्च वक्तव्या' अ० ४ ४ १२८ वा० सूत्रेण लुक् । तप ज्वलतो नामधेयम् निघ० १.१७ अग्नी वा ऽआदित्यस्तप श० ८ ७ १.५ तप स्विष्टकृत् श० ११ २ ७ १८ तपो वा अग्नि श० ३.४ ३ २ तपोऽसि लोके श्रितम् । तेजस प्रतिष्ठा तै० ३ ११.१ २ तप आसीद् गृहपति तै० ३ १२ ९ ३ एतद् वै तपो यो दीक्षित्वा पयोव्रतेऽसत् श० ६ ५ १ ८ तपो दीक्षा श० ३ ४ ३ २ तै० स० ४ ३ ८ १. मै० २ ८.४. अमासाग्यनुब्रूते तपस्व्यनुब्रवाऽइति श० १४ १ १ २६ एतौ (तपश्च तपस्यश्च) एव शैशिरौ (मासौ) स यदेतयोर्बलिष्ठ श्यायति तेनो हैतौ तपश्च तपस्यश्च श० ४ ३ १ १६ सवत्सरो वाव तपो नवदशस्तस्य द्वादशमासा पड्ऋतव सवत्सर एव तपो नवदशस्तद्यत्तमाह तप इति सवत्सरो हि सर्वाणि तपति श० ८ ४ १ १४ अजा भवति, स तपसमेवैतत् (सोमम्) क्रीणाति श० ३ ३ ३ १८ ऋतेन तप (अन्वाभवत्) काठ० ३५ १५ एतत् खलु वाव तप इत्याहुर्य स्व ददातीति तै० स० ६ १ ६ ३ एतद् वाव तपो यत्स्व ददाति क० ३७ १ एप ह त्वै जायते यस्तपसोऽधि जायते तै० स० ७ २ १० ३ तद्धि जात यत् तपसोऽधिजायते, न यत् स्त्रिया काठ० ३४ १२ तपसा देवा देवतामग्रआयन् तपसर्षय सुवरन्वविन्दन्, तपसा सपत्नान्प्रणुदामारातीस्तपसि सर्व प्रतिष्ठित तस्मात्तप परम वदन्ति तै० आ० १० ६३ १ तपसा ब्रह्मणा सह तस्य दोहमशीमहि मै० ४ ९ १३ तपसा ब्रह्म विजिज्ञासस्व तै० आ० ६ २ १ तपसा वै प्रजापति प्रजा असृजत काठ० ६ ७ तपसा वै लोक जयन्ति श० ३ ४ ४ २७ तपो नवदशइत्युत्तरात्, तस्मात् सव्यो हस्तयोस्तपस्वितर काठ० २० १३ तपो वा एप उपैति यो वाचꣳ यच्छति मै० १ ८ ४ तपोऽवान्तरदीक्षायाम् (सोम) काठ० ३४ १४ तपो वै पुष्करपर्णम् तै० आ० १ २५ १ तपो वै यज्ञस्य श्लेश्म काठ० ३४ ६ तपो हि स्वाध्याय तै० आ० २ १४ २ तस्मादु तमेव तपस्तप्यमान मन्यन्ते यो ददत् जै० १ २८७ तेजोऽसि तपसि श्रितम् । समुद्रस्य प्रतिष्ठा तै० ३ ११ १ ३ दीक्षा च मे तपश्च मे (यज्ञेन कल्पताम्) तै० स० ४ ७ ६ १ दीक्षायै च त्वा (अग्ने) तपसश्च तेजसे जुहोमि तै० स० ३ ३ ११ ब्रह्म तपसि (प्रतिष्ठितम्) ऐ०

तनूरुचम् तन्वो रोचन्ते यस्मै तम् (राजानम्) २ १ ६ **तनूरुचा**=या तनूषु रुक् प्रीतिस्तया ६ २५ ४ [तनू व्याख्यातम्। तदुपपदे रुच दीप्तौ (भ्वा०) धातो 'कृतो वहुल वा' वार्त्तिकेन क्विप्। सम्पदादित्वादन्यत्र क्विप् स्त्रियाम्]

तनूशुभ्रम् शुभ्रा शुद्धा तनूर्यस्य तम् (विद्वज्जनम्) ५ ३४ ३ [तनू-शुभ्रपदयो समास। तनूशुभ्रम्=तनू शोभयितारम् नि० ६ १६]

तने विस्तीर्णे (तुजे=दाने) ५ ४१ ६ विस्तारे २ ६ २ विस्तृते (यशसि) ६ ४६ १२ [तनु विस्तारे (तना०) धातोरौणादिकोऽन् प्रत्यय]

तनोतु विस्तारयतु अ०—सदधातु २ १३ **तनोषि**= विस्तृणासि ४ ५२ ७ [तनु विस्तारे (तना०) धातोर्लोट्]

तन्तम् शत्रुम् ८ ५३

तन्तयः विस्तीर्णा (प्रजा) ६ २४ ४ [तनु विस्तारे (तना०) धातो क्तिच्। न क्तिचि दीर्घश्च' सूत्रेण दीर्घानुनासिकलोपयोर्निषेध। 'तितुत्र०' अ० ७ २ ६ सूत्रेण इण्निषेध]

तन्तवः सूत्रवत् समवेतु शीला (वस्वादय) ८.६१ **तन्तुना**=विस्तृतेन (पोषेण=पुष्ट्या) १५ ७ **तन्तुम्**= विस्तारम् १ १४१ १ विस्तारकम् (शूर पुरुषम्) २० ४१ विस्तीर्णम् (इन्द्र=विद्युतम्) २० ४३ सन्तानम् १५ ५३ विस्तृत वस्तुविज्ञान वा १ १५६ ४ करणम् ४ १३ ४ सूत्रम् २ ३ ६ **तन्तुः**=मूलम् २ २८ ५ **तन्तून्**=विस्तृतान् धातून् १ १६४ ५ [तनु विस्तारे (तना०) धातो 'सितनिगमि०' उ० १ ६६ सूत्रेण तुन् प्रत्यय। प्रजा वै तन्तु ऐ० ३ ११ तन्तुरिति प्रजा (असृजत) तै० स० ५ ३ ६ १]

तन्त्रम् कुटुम्वधारणमिव तन्त्रकलानिर्माणम् १६ ८० [तत्रि कुटुम्बधारणे (चुरा०) ग्गनोरौणादिकोऽन्प्रत्यय। अच् वा प्रत्यय]

तन्त्रायिणे तन्त्राणि कलाशास्त्राणि अयितु ज्ञातु प्राप्तु वा शील यस्य तस्मै (विदुषे जनाय) ३८ १२ [तन्त्रोपपदे अय गतो (भ्वा०) धातोस्ताच्छील्ये णिनि प्रत्यय। एष वै तन्त्रायी य एष (सूर्य) तपत्येष हीमाँल्लोकास्तन्त्रमिवानुसचरति श० १४ २ २ २२]

तन्दते हिनस्ति १ १३८ १

तन्द्रत् मुह्येत् २ ३० ७

तन्द्रम् कुटुम्वधारणम्, प्र०—अत्र 'तत्रि कुटुम्वधारणे' इत्यस्मादच्, वर्णव्यत्ययेन तस्य द १४ ६ स्वतन्त्रताऽकरणम् १५ ५ [पङ्क्तिर्वै तन्द्रं छन्द श० ८ २ ४ ३]

तन्मसि विस्तारयेम १६ ५४ [तनु विस्तारे (तना०) धातोर्लट्। 'वहुल छन्दसी' ति सूत्रेण शपो लुकि उ प्रत्ययोऽपि न भवति। 'इदन्तो मसि' इतीदन्तता]

तन्यता तन्यतुना गर्जनेन शब्देन, प्र०—अत्र 'सुपा सुलुक्०' इति डादेश १ ८० १२ [स्तन देवशब्दे (चु०) धातो शत्रन्तात् तृतीया। व्यत्ययेन शप्। सकारलोपश्छान्दस]

तन्यति शब्दायते ६ ३८ २ [स्तन देवशब्दे (चुरा०) धातोर्लट्। विकरणव्यत्ययेन श्यन्। सस्य च लोपश्छान्दस]

तन्यतुम् विद्युतम् १ ५२ ६ **तन्यतुः**=विस्तृत-वेगस्वभावा विद्युत्, प्र०—अत्र 'ऋतन्यञ्जिवन्यर्पि०' उ० ४ २ अनेन तन-धातोर्यतुच् प्रत्यय १ २३ ११ गर्जनसहित (विद्युत्) १ ३२ १३ तन्यतोरिव=विद्युत इव ४ ३८ ८ [तनु विस्तारे (तना०) धातो 'ऋतन्यञ्जि०' उ० ४ २ सूत्रेण यतुच् प्रत्यय। तन्यतु तनित्री वाचोऽन्यस्या नि० १२ ३०]

तन्यवः विद्युत ५ ६३ ५

तन्वते विस्तृणन्ति ६ ५६ ७ **तन्वन्ति**=विस्तारयन्ति १ १६ ८ **तन्वन्तु**=विस्तृणन्तु २६ १४ [तनु विस्तारे (तना०) धातोर्लट्। अन्यत्र लोट्]

तन्वन्तः विस्तृणन्त (सूर्यकिरणा) ४ ४५ २ [तनु विस्तारे (तना०) धातो शतृप्रत्यय]

तन्वम् शरीरम्, प्र०—अत्र 'वाच्छन्दसि' इत्यत्र 'अमि पूर्व' इत्यनुवर्त्तनात् पूर्वरूपादेशो न भवति ३ १७ स्वरूपम् ऋ० भू० ३१७, १० ७१४ विस्तृत शरीरम् २३ ७ तेजस्वि-शरीरम् ४ १६ १४ शरीर को, आर्याभि० २ ३३, ३ १७ **तन्वः**=शरीरस्य मध्ये २५ ४३ शरीरस्य, प्र०—अत्र 'जसादिषु छन्दसि वा वचनम्' इति वार्त्तिकेनाऽऽडभाव ४ १८ तनू शरीराणि १ १४० ६ विस्तृतविद्या (भा०—वालिका) १६ ४४ विस्तीर्णा (प्राणा) ७ ५६ ७ वलारोग्ययुक्तास्ते (देहा) १ ७२ ५ **तन्वा**= विस्तृतया नीत्या [तनूरिति व्याख्यातम्]

तन्वानः विस्तृणान (अग्नि=पावक) ३ ३ ६ **तन्वानाः**=विस्तृणन्त (उशिज=ऋत्विज) ७ १० २ [तनु विस्तारे (तना०) धातो शानच्]

तन्वाः अन्त करणाऽऽख्यस्य वाह्यस्य शरीरस्य वा ३.१७. **तन्वे**=विस्ताराय १ १६५ १५ शरीरादिरक्ष-

[तप सन्तापे (भ्वा०) धातो शतृ । विकरणव्यत्ययेन श्यन्]

तप्यद्ध्वम् तपन्तु तापयत वा, अ०—यथा तपन्तु तथा तापयत १ १८ [तप सन्तापे (भ्वा०) धातोर्लोट् । व्यत्ययेन श्यन् आत्मनेपदञ्च]

तप्यमानः वेद-पठन, वीर्यनिग्रह, आचार्य के प्रिया-चरणादि कर्मों को पूरा करता हुआ (ब्रह्मचारी जन), स० वि० ६३, अथर्व० ११ ५ २६ **तप्यमानाय**=प्राप्त-तापाय (जनाय) ३६ १२ [तप सन्तापे (भ्वा०) धातो कर्मणि शानच्]

तमत् अभिकाङ्क्षेत २ ३० ७ [तमु काङ्क्षयाम् (दिवा०) धातोर्लेट्]

तमसस्परि अन्धकारात् पृथग्वर्त्तमानम् (सूर्य=जगदीश्वरम्) ३८ २४ (तमम् पदमग्रे व्याख्यास्यते। तमस्-परिपदयो समास । पञ्चम्या अलुक्]

तमसः अन्धकारस्य १ १७३ ५ अन्धकारस्येव दु खस्य १ ६२ ८ अन्धकारादविद्याया इव ३ ३६ ७ अज्ञानादन्ध-काराद्वा भा०—अज्ञानलेशाद् ३१ १८ आवरकादज्ञानादन्ध-कारात् १ ५० १० भा०—अविद्याऽन्धकारात् पृथग्भूतम् (सूर्यं=जगदीश्वरम्) २७ १० रात्रे प्रकाशरहितस्य समुद्रस्य वा १ १८३ ६ अन्धकारवदविद्याछलाधर्मव्यवहारस्य १.३३ १० **तमसा**=रात्र्यन्धकारेण १७ ४४ अन्धकार से, स० प्र० २८२, अन्धकारेण शतघ्न्याद्युत्थधूमेन मेघपर्वता-कारेणाऽस्त्रादिधूमेन वा, भा०—शस्त्रास्त्रप्रहारोत्थधूम-धूल्यादिना १७ ४७ **तमसि**=रात्रौ, प्र०—तम इति रात्रिनाम, निघ० १ ७, १ ११७ ५ **तमसे**=अन्धकाराय ३० ५ **तमः**=तिमिरम् १ ११३ १६ अन्धकारम् ४ १३ ४ भा०—अधर्माऽविद्याऽन्धकारम् ३४ २२ रात्रिवदविद्याऽन्ध-कारम् १ ८६ १० अन्धकार अर्थात् महामूर्खत्व, चिरकाल घोर दु ख रूप नरक, स० प्र० ४३२, ४० ६ अविद्याकुत्सिता-स्य चक्षुर्दृष्ट्यावरक वाऽन्धकारम् १ ६१ २२ अन्धकार कारागृहम् १८ ७० अन्धकाररूप दु खम् १ ११७ १७ अन्धकाररूपा रात्रिम् ५ १४ ४ रात्र्यन्धकारम् ३३ ६२ **तमांसि**=रात्री ११४३ रात्रिरिव वर्त्तमानान् दुष्टान् जनान् ७ ५६ २० रात्रिरिवाऽविद्यादीनि ६ ७२ १. अज्ञान, दु ख आदि ससार के मोहो को, स० वि० १८६, अथर्व० ६ ५ १ [तम रात्रिनाम निघ० १ ७ तम तनोते नि० २ १६ ताम्यति काङ्क्षति येनेति विग्रहे तमु काङ्क्षायाम् (दिवा०) धातो 'सर्वधातुभ्योऽसुन्' इत्यसुन् प्रत्यय । कृष्णमिव हि तम. ता० ६ ६ १० कृष्ण वै तम श० ५ ३ २ २ मृत्युर्वै तम श० १४ ४ १.३२ गो० उ० ५ १. मृत्युर्वै तमश्छाया ऐ० ७ १२ पाप्मा वै तम श० १२ ६. २ ८ तमो रज नि० ६ २८ तमो मृत्यु. काठ० १० ६. विससरश्मिरवमत् तमासि काठ० ११ १३]

तमिस्राः रात्रय २ २७ १४. [तमस्प्राति० मत्वर्थे 'ज्योत्स्नातमिस्राशृङ्गिण०' अ० ५ २ ११४ सूत्रेण तमस उपधाया इकारो रश्च प्रत्ययो निपात्यते]

तमोगाम् प्राप्ताऽन्धकारम् (मेघम्) ५ ३२ ४ [तमस् उपपदे गम्लृ गतौ (भ्वा०) धातोर्ड प्रत्यय]

तमोहनम् यस्तमो हन्ति तम् (ज्योतीरथ=प्रकाश-युक्त रमणीय यानम्) १ १४० १ [तमसुपपदे हन हिंसा-गत्यो (अदा०) धातो क्विप्प्रत्यय]

तमोहना यौ तमो हतस्तौ (सूर्यचन्द्रमसौ) ३ ३६ ३ [तमस्-उपपदे हन हिंसागत्यो (अदा०) धातो क्विप् । 'सुपा सुलुग्' इत्याकारादेश]

तम्पताम् सुखयतम् ३ १२ ३

तर उल्लङ्घस्व ११ ७२ [तॄ प्लवनसन्तरणयो (भ्वा०) धातोर्लोट्]

तरक्षुः व्याघ्र २४ ४०

तरणयः तरणाऽवस्था प्राप्ता (राजभृत्या) ४ ४ १२. **तरणिः**=सन्तारक (अग्निरिव विद्वान्), प्र०—अत्र 'सुपा सुलुक्०' इति सुलुक् ३ ११ ३ **तरणिभिः**=सन्तरणैः ४ ३३ १ **तरणिम्**=अध्वना तारकम् (अग्निम्) ३ २६ १३ **तरणिः**=क्षिप्रतया सम्प्लविता (सर्वप्रकाशक सर्वात्मेश्वर) १.५०.४ प्लविनाऽतिवेगवान् (परिज्मा= वायु) १ ११२ ४ दु खेभ्यस्तारक (विचक्षण=अतीव धीमान् जन) ४ ४५ ५. पुरुषार्थी (सत्पुरुष) ७ ३२ ६. सद्यो गन्ता (अर्वा=अश्व) ३ ४६ ३ दु खात् पारग सुखविस्तारक (अ०—सत्कर्मानुष्ठाता जन) १ १२१ ६. तारयिता (इन्द्र =राजा) ७ २६ ४ [तरणि क्षिप्रनाम निघ० २ १५ तॄ प्लवनसतरणयो (भ्वा०) धातो 'अर्त्तिसृधृ०' उ० २ १०२ सूत्रेण अनि प्रत्यय]

तरणित्वा शीघ्रत्वेन १ ११० ६ [तरणि क्षिप्र-नाम निघ० २ १५ ततो भावे त्व प्रत्यय । 'सुपा सुलुग्०' इति तृतीयाया आकार]

तरणित्वेन शीघ्रत्वेन १ ११० ४ [तरणिप्राति० भावे त्व प्रत्यय । तरणित्वेन क्षिप्रत्वेन नि० ११ १६]

३ ६. गो० २ ३ २ मनो वाव तप जै० ३.३३४ सत्येन तपसा सह तस्य (घर्मस्य) दोहमशीमहि तै० आ० ४ २१ १ स्वाध्यायप्रवचने एवेति नाको मौद्गल्य । तद्धि तपस्तद्धि तप तै० आ० ७ ९ १]

तपस्पतिः यथा ब्रह्मचर्यादिपालक (आचार्य) ५ ४० तपस पालयिता (अग्नि=ईश्वरोऽध्यापको वा) ५ ६ [तपस्-पतिपदयो समास । तपस् इति व्याख्यातम्]

तपस्यः तपो धर्मो विद्यतेऽस्मिन् स फाल्गुनो मास १५ ५७ **तपस्याय**=फाल्गुनाय ७ ३० तपसि साधवे फाल्गुनाय २२ ३१ [तपम् इति व्याख्यातम् । तत 'तत्र साधु' इत्यर्थे यत् । अथवा तपस्प्राति० मत्वर्थे 'मत्वर्थे-मासतन्वो.' अ० ४ ४ १२८ सूत्रेण यत्प्रत्यय]

तपस्वान् बहुतपोयुक्त (विद्वज्जन) ६ ५ ४ [तपम् व्याख्यातम् । ततो भूम्नि मतुप्]

तपाति तापयति ५ ७९.९ [तप सन्तापे (भ्वा०) धातोर्लेट् । आडागम]

तपिष्ठः अतिशयेन तप्त (विद्वज्जन) ६ ५ ४ **तपिष्ठाम्**=अतिशयेन तप्ताम् (अशनि=वज्रम्) ३ ३० १६ **तपिष्ठेन**=अतिशयेन तप्तेन (हन्मना=हननेन) ७ ५९ ८ अतिशयेन तापयुक्तेन (शोचिपा=तेजसा) ४ ५ ४ **तपिष्ठैः**=अतिशयेन प्रतापकैः (ज्योतिर्भि किरणैर्वा) ७ १५ १३ अतिशयेन सन्तापकरै शस्त्रै १३ ९ अतिशयेन सन्तापकैः शस्त्रादिभि ४ ४ १ [तपस्प्राति० अतिशायने इष्ठन् । टेर्लोप । अथवा तपस्विन्प्राति० अतिशायने इष्ठन्प्रत्यये 'विन्मतोर्लुक्' अ० ५ ३ ६५ सूत्रेण विन्प्रत्ययस्य लुक् । तपिष्ठैः तप्ततमैस्तृप्ततमैः प्रपिष्टतमैरिति वा नि० ६ १२]

तपुर्जम्भः तपूंषि तापा जम्भो वक्त्रमिव यस्य स (अग्नि) १ ५८ ५ **तपुर्जम्भः**=तपूंषि एव जम्भानि यस्य तत्सम्बुद्धौ (सेनापते) प्र०—'तप सन्तापे' इत्यस्मादौणादिक उसिन्प्रत्यय, सताप्यन्ते शत्रवो यैस्तानि तपूंषि 'जभि नाशने' इत्यस्मात् करणे घञ्, जम्भ्यन्त एभिरिति जम्भनान्यायुधानि, तपूंषि एव जम्भानि यस्य तत्सम्बुद्धौ (सेनापते) १ ३६ १६ [तपुष्-जम्भपदयो समास । तपुष्= तप सन्तापे (भ्वा०) धातोरौणादिक उसिन्प्रत्यय । जम्भ = जम्भनाशने (चुरा०) धातो करणे घञ्प्रत्यय]

तपुर्मूर्द्धा तपुस्तापो मूर्द्धेवोत्कृष्टो यस्य (अग्नि = विद्युत्) ७ ३ १ [तपुस्-मूर्धन्पदयो. समास । तपुस् पूर्वपदे व्याख्यातम्]

तपुषः तपत्यस्मिन् सूर्यस्तस्य दिनस्य मध्ये ३ ३९ ३ **तपुषा**=परितापेन क्रोधादिना २ ३४ ९ तापेन २ ३० ४ **तपुः**=परितापक (अग्नि) २ ४ ६ सन्तापम्, भा०—कठोर दण्डम् ६ ६२ ८ **तपूंषि**=प्रतप्तानि (ब्रह्मास्त्रादीनि) ४ ४ २ तेजोमयानि (वृजिनानि=बाधकानि बलानि) ६ ५२ २ तापा, भा०—अग्न्याद्यस्त्राणि शतघ्न्यादय. १३ १० [तप सन्तापे (भ्वा०) धातो 'अर्त्तिपृवपियजितनिधनितपिभ्यो नित्' उ० २ ११७ सूत्रेण उसि प्रत्यय । स च नित् । तपु तपने नि० ६ ११ तपुषी क्रोधनाम निघ० २ १३]

तपुषिम् प्रतप्तम् (हेतिं=वज्रम्) ६ ५२ ३. [तपुष् इति व्याख्यातम् ततो मत्वर्थे 'लुगकारेकाराश्च वक्तव्या' अ० ४ ४ १२८ वा०सूत्रेण इकार]

तपुष्पा यौ तपूंषि पातो रक्षतस्तौ (अश्वौ) ३ ५३ ३ [तपुस् इति व्याख्यातम् । तदुपपदे पा रक्षणे (अदा०) धातो क । 'सुपा सुलुग्०' इत्याकार]

तपो तपस्विन्, दुष्टाना पुरुषाणा दाहक (विद्वन् जन !) ३ १८ २ [तपस्प्राति० मत्वर्थीयप्रत्ययस्य 'लुगकारेकाराश्च वक्तव्या' इति वार्त्तिकेन लुक्]

तपोजा यस्तपसो जायते प्रकट्यते स, भा०—तपसा विज्ञातव्य (धर्त्ता=ईश्वर) ३७ १६ ब्रह्मचर्यादितपसा जात (सभेशो राजा) १० ६ [तपस् उपपदे जनी प्रादुर्भावे (दिवा०) धातो 'अन्येष्वपि दृश्यते' अ० ३ २ ९८ सूत्रेण ड प्रत्यय । वचनव्यत्यय]

तपोभिः प्राप्तकरैरग्निगुणै ७ १ ७ [तपस्पद व्याख्यानम् । ततस्तृतीयाबहुवचनम्]

तप्तम् ऐश्वर्ययुक्तम् (विद्वास जनम्), प्र०—ऐश्वर्याऽर्थात् तपधातोस्त प्रत्यय १ ११२ ७ तपोजनितम् (ऊर्ज=पराक्रमम्) १ ११८ ७ धर्मेणाऽध्ययनाऽध्यापन-श्रमेण वा सन्तप्तम् (वा =बाह्यमुष्कम्) ५ ११ तापाऽन्वितम् (घर्मम्=अग्निहोत्रादिक यज्ञम्) १७ ५५ **तप्तः**= भा०—पुरुषार्थी (सज्जन) २० ५५ [तप सन्तापे (भ्वा०), तप ऐश्वर्ये (दिवा०) धातोर्वा क्त प्रत्यय]

तप्तायनी तप्तानि स्थापनीयानि वस्तून्ययन यस्या विद्युत सा ५ ९ [तप्त-अयनपदयो समास]

तप्यतुः दुष्टाना परितापक (राजपुरुष) २ २४ ९ [तप सन्तापे (भ्वा०) धातोर् औणादिको (४.२) बाहु० यतुच् प्रत्यय]

तप्यते यस्ताप प्राप्नोति तस्मै (जनाय) ३९ १२

तरुषन्ते=सद्य प्लवन्ते ५ ५९ १ [तरुष्यतिप्येवङ्कर्मा (हन्तिकर्मा) नि० ५ २ तॄ प्लवनसन्तरणयो (भ्वा०) धातोर्लेट्। विकरणव्यत्ययेन उ सिन् च। आत्मनेपदञ्चापि व्यत्ययेनैव]

तरुष. तारकस्य (राय =धनस्य) ६ १५ ३ दु खेभ्य सन्तारकस्य (दक्षस्य=वलस्य) ३ २ ३ अविद्यासप्लवकान् (नॄन्=नायकान् जनान्) १ १२२ १३ **तरुषि**=दु खात् तारके सङ्ग्रामे ६ २५ ४ [तॄ प्लवनसन्तरणयो (भ्वा०) धातोरौणादिक उसि प्रत्ययो वाहुलकाद्]

तरुषसा तरन्ति शत्रुवलानि येन तत्तरुपस्तेन (राया=परमलक्ष्म्या) १ १२९ १०]

तरुषेम प्राप्नुयाम, प्र०—तरुष्यतीति पदनाम, निघ० ४ २, ७ ४८ २ [तॄ प्लवनसन्तरणयो (भ्वा०) धातोर्लिङ्। विकरणव्यत्ययेन उ सिप् च]

तरुष्यतः हनिष्यत शत्रून् ३३ ६६ [तरुष्यतिप्येवङ्कर्मा (हन्तिकर्मा) निघ० ५ २ तत शतृप्रत्यय]

तरेम सर्वान् दोपास्त्यजेम ६ १५ १८ [तॄ प्लवनसन्तरणयो (भ्वा०) धातोर्लिङि उत्तमवहुवचनम्]

तर्तरीति भृश तरति ६ ४७ १७ [तॄ प्लवनसन्तरणयो (भ्वा०) धातोर्यङ्लुगन्ताल्लट्]

तर्पय प्रीणय १ ५४ ९ **तर्पयत**=प्रीणीत ६ ३० सुखयत, भा०—प्रीत्या नित्य सेवध्वम् २ ३४ **तर्पयन्त**=तर्प्पयन्ति १ ८५ ११ **तर्पयेथाम्**=तर्पयेते, प्र०—अत्र व्यत्ययो लडर्थे लोट् च १ १७ ३ [तृप तृप्तौ (चुरा०) धातोर्लोट्। अन्यत्र लङ्। अडभावश्च]

तर्य्यः यस्तीर्य्यते, तरितु योग्य (जन) ५ ४४ १२ [तॄ प्लवन-सन्तरणयो (भ्वा०) धातोर्ण्यत्]

तलवम् यो हस्तादितलानि वाति हिनस्ति तम् (पुरुषम्) ३० २० [तलोपपदे वा गतिगन्धनयो (अदा०) धातो क प्रत्यय]

तल्पम् पर्यङ्कपर, स० वि० १३८, अथर्व० १४ २ ३१ [तलयति प्रतिष्ठा करोतीति विग्रहे तलप्रतिष्ठायाम् (चुरा०) धातो 'खष्पशिल्पशष्प०' उ० ३ २८ सूत्रेण पप्रत्ययान्तो निपात्यते। मानवो वै तल्प तै० २ २ ५ ३]

तल्पशीवरी. यास्तल्पेषु शेरते ता (नारी =स्त्रिय) ७ ५५ ८ [तल्पोपपदे शीङ् शये (अदा०) धातो 'अन्येभ्योऽपि दृश्यन्ते' इति वनिप्। 'वनो रच' सूत्रेण ङीप्, रेफश्चान्तादेश]

तल्प्याय तल्पे शयने साधवे (शिपिजनाय) १६ ४४ [तल्प व्याख्यातम्। तत 'तत्र साधु' रित्यर्थे यत्। ततश्चतुर्थी]

तवसम् महावलयुक्तम् (मरुता गणम्) १ ६४ १२ वलवन्तम् (विद्वासम्) ५ ५८ २ वलिष्ठम् (सज्जनम्) ६ १७ ४ वलादिवर्धकम् (इन्द्र=परमैश्वर्यप्रदमीश्वरम्) ६ १७ ८ वलकारकम् (विद्युद्रूपमग्निम्) ३ १ १३ वलम् ७ २४ ३ **तवसः**=वलिष्ठा गतिमन्त (मनुष्या) ५ ६० ४ प्रवृद्धवला (वायव इव वर्त्तमाना जना) १ १६६ ८ **तवसा**=वलेन, प्र०—तव इति वलनाम, निघ० २ ९, १८ ६९ **तवसे**=वलिने (इन्द्राय=विद्वज्जनाय) ५ ३३ १ वलवते (इन्द्राय=सभाद्यध्यक्षाय) १ ६१ १ विद्यावृद्धाय (गृत्साय=मेधाविने जनाय) ३ १ २ वलयुक्ताय (कपर्दिने=ब्रह्मचारिणे जनाय) १ ११४ १ वर्धकाय (मनुष्याय) ६ ४९ १२ [तव वलनाम निघ० २ ९ तवस महन्नाम निघ० ३ ३ तवस इति महतो नामधेयम् उदितो भवति नि० ५ ९ तवतेर्वा वृद्धिकर्मण नि० ९ २५ ततोऽसुन्प्रत्यय । तव इति सौत्रो धातु]

तवस्तमः अतिशयेन वली (सद्वैद्य) २ ३३ ३ **तवस्तमा**=अतिशयेन वलयुक्तौ वलप्रदौ वा (इन्द्राग्नी=विद्युद्भौतिकाग्नी) १ १०९ ५ [तवस् इति व्याख्यातम्। ततोऽतिशायने तमप्। अन्यत्र 'सुपा सुलुग्०' इत्याकारादेश । तवस्-इति वलनाम निघ० २ ९]

तवस्तरम् अत्यन्त वलयुक्तम्, भा०—वलिष्ठम् (इन्द्र=राजानम्) प्र०—तव इति वलनाम, निघ० २ ९ ततस्तरप् ११ १४ तूयते विज्ञायत इति तवा, सोऽतिशयितस्तम् (इन्द्र=परमात्मान सभाध्यक्ष वा) समीक्षा सायणाचार्येणाऽत्र विन्-प्रत्ययस्य छान्दसो लोप इति यदुक्त तदशुद्ध प्रमाणाऽभावात् १ ३० ७ [तवस् इति वलनाम निघ० २ ९ ततोऽतिशायने तरप्]

तवस्यम् तवसि वले भवम् (विजयम्) २ २० ८ [तवस् इति वलनाम निघ० २ ९ ततो भवार्थे यत्प्रत्यय]

तवागाम् प्राप्तवलम् (वृषभम्) ४ १८ १०

तविषः वलवत (वायो) १ १६५ ६ वलात् ५ ८७ ५. [तविप महन्नाम निघ० ३ ३]

तविषात् वलिष्ठान् (सभासेनेशात्) १ १७१ ४ **तविषाः**=वलवन्त (विद्वासो जना) ५ ५४ २ [तविष महन्नाम। निघ० ३ ३ तविषेभि =महद्भि नि० २ २३. तव इति सौत्रो धातु । तत 'तवेर्णिद्वा' उ० १ ४८ सूत्रेण टिषच्-प्रत्यय]

तरणे दुःखादुद्धरणे ६ १ ५ [तॄ प्लवनसन्तरणयो (भ्वा०) धातोर्भावे ल्युट्]

तरत दुःखानि उल्लङ्घयत ३५ १० तरति=उल्लङ्घयति ३ ४६ २. उल्लङ्घते ७ ५६ २ **तरन्ति**=उल्लङ्घन्ते ३४ ५१ प्राप्नुवन्ति ७ ३२.१३ [तॄ प्लवन-सन्तरणयो (भ्वा०) धातोर्लोट्]

तरद्द्वेषाः तरन्ति द्वेषान् येषु ते (पन्थान =मार्गा) १ १०० ३ [तरन्-द्वेषपदयो समास]

तरन् उल्लङ्घयन् (अग्नि =राजा) ३ २४ १ शत्रु-बल सप्लवन् (अग्नि =विद्वान् राजा) ६ ३७ **तरन्तम्**=सप्लावकम् (वृक=विद्युतम्) १ १०५ ११ **तरन्तः**=उल्लङ्घमाना (राजद्रोहिणो जना.) २ ११ १६ [तॄ प्लवनसन्तरणयो (भ्वा०) धातो शतृप्रत्यय]

तरन्ती दुःख प्लावयन्त्यौ (द्यावापृथिव्यौ) ४ ५६ ७ [तॄ प्लवनसन्तरणयो (भ्वा०) धातो शत्रन्तान् ङीप्। विभक्ते पूर्वसवर्णदीर्घ]

तरसा बलेन, प्र०—तर इति बलनाम, निघ० २ ६, ५ ५४ १५. **तरसे**=तारकाय (बलाय) ३ १८ ३ **तरः**=तरति येन बलेन तत् १ ३३ १२ **तरोभिः**=तरन्ति यैस्तानि तरासि नौकादीनि तै २ ३६ ३. [तॄ प्लवनसन्तरणयो (भ्वा०) धातोरौणादिकोऽसुन्। तर इति बलनाम निघ० २ ६ स्तोमो वै तर ता० ११ ४ ५ स्तोमो वै देवेषु तरो नामासीत् ता० ८ ३ ३ तरो वै यज्ञ जै० १ १५३]

तरस्वी प्रशस्त तरो विद्यते यस्य स (पुरुष) १६ ८८. [तरस्प्राति० मत्वर्थे 'अस्मायामेधास्रजो विनि.' अ० ५ २ १२१ सूत्रेण विनि]

तरः यस्तरति स (अध्यापको जन) १ १६० ७ **तराय**=उल्लङ्घकाय (जनाय) २ १३ १२ [तॄ प्लवन-सतरणयो (भ्वा०) धातो 'ऋदोरप्' इत्यप्प्रत्यय]

तराथः गृहाश्रम के पार होवो, स० वि० १४०, अथर्व० १४ २ ४३ **तरामसि**=उल्लङ्घेमहि ७ ३२ २७ [तॄ प्लवनसन्तरणयो (भ्वा०) धातोर्लेट्। आडागम। अन्यत्र मस इदन्तता]

तरित्रतः अतिशयेन सप्लवत (दधिक्राव्ण =अश्वस्य) ६ १५ अध्वनस्तरिता (वायु) ४ ४० ३ [तॄ प्लवनसन्तर-णयो (भ्वा०) धातो शतरि 'दाधर्त्तिदर्धर्त्ति०' अ० ७ ४ ६५ सूत्रेण छन्दसि शप श्लौ षष्ठ्येकवचनेऽभ्यासस्य रिगागमो निपात्यते]

तरीयान् तरणीय (विद्वान् जन) ५ ४१ १२ [तॄ प्लवनसन्तरणयो (भ्वा०) धातोस्तृचि अतिशायने 'तुश्छन्दसि' अ० ५ ३ ५६ सूत्रेण ईयसुन्। 'तुरिष्ठेमेयस्सु' अ० ६ ४ १५४ सूत्रेण तृचो लोप]

तरीषणि तरणे ५ १० ६ दुःखं तरितु सामर्थ्यम् ४ ३७ १.

तरुणम् युवाऽवस्थास्थम् (शिशु =वत्सम्) १ १८६ ७ **तरुणः**=युवा (कुमार) ७ ४ २ **तरुणेन**=युवाऽवस्थेन (कुमारेण=अकृतविवाहजनेन) २८ १३ [तॄ प्लवन-सन्तरणयो (भ्वा०) धातो 'त्रो रश्च लो वा' उ० ३ ५४ सूत्रेण उनन्प्रत्यय]

तरुणीषु युवतय इव वर्त्तमानासु (प्रजासु) ३ ५५ ५ [तरुणप्राति० स्त्रियां 'वयस्यचरम इति वक्तव्यम्' अ० ४.१.२० वा सूत्रेण ङीप्-प्रत्यय। तरुणपद व्याख्यातम्]

तरुता उल्लङ्घयिता (शत्रु) ६ ६६ ८ प्लविता (विद्वान्) १ १२६ २ तर्त्ता, वरयिता, पार गमयिता (सेनाऽध्यक्षो जन) प्र०—'असित-स्कभित-स्तभित', अ० ७ २ ३४ अनेनाऽय निपातित १ २७ ६ सप्लवनकर्त्ता (शत्रुर्जन) १ ४० ८ **तरुतारम्**=ताराख्य यन्त्रम्, ऋ० भू० १६६, १ ८ २१ १० शब्दान् सन्तारक प्लावक वा ताराख्य व्यवहारम् १ ११६ १० [तॄ प्लवनसन्तरणयो (भ्वा०) धातोस्तृचि 'असितस्कभितस्तभित०' अ० ७ २ ३४ सूत्रेण उट् आगमो निपात्यते। एष (तार्क्ष्य =वायु) वै सहावास्तरुता, एष हीमाँल्लोकान् मद्यस्तरति ऐ० ४ २० तरुतारम्=तारयितारम् नि० १० २८]

तरुत्र दुःखात्तारक (इन्द्र=विद्वज्जन) २ ११ १६ अविद्यातारक (इन्द्र=बलप्रद विद्वज्जन) २ ११ १५. **तरुत्रम्** = समुद्रादितारकम् (अश्व = विद्युदग्निम्) १ ११७ ६ तारकम् (राजानम्) ६ २६ २ **तरुत्रः**=दुःखेभ्यस्तारक (ऋतु =राज्यपालनाख्यो यज्ञ) ४ २१ २ दुःखादुल्लङ्घयिता (राजा) १ १७४ १ सर्वदुःखादुत्तीर्ण (इन्द्र =प्रजारक्षको जन) ६ १७ २ **तरुत्राः**=दुःखात् सर्वेषा सन्तारका (विद्वज्जना) ७ २५ ५ [तॄ प्लवनसन्तर-णयो (भ्वा०) धातोरौणादिक उत्र प्रत्ययो बाहुलकात्]

तरुभिः वृक्षै ५ ४४ ५. [तॄ प्लवनसन्तरणयो (भ्वा०) धातो 'भृमृशीङ्तृचरि०' उ० १ ७ सूत्रेण उ प्रत्यय]

तरुषन्त ये दुःखानि तरन्ति तद्वदाचरत १ १३२.५

सन्ततकर्मा भवति । अहोरात्रकर्मा वा नि० ३ १४ ये जनेषु मलिम्लव स्तेनासस्तस्करा वने । ये कक्षेष्वघायवस्ताँस्ते (अग्ने) दधामि जम्भयो तै० स० ४ १ १० २]

तस्तभाने धारिके (क्रन्दसी=द्यावापृथिव्यौ) ३२ ७ [स्तम्भुरिति सौत्रो धातु । ततो लिटि कानच् ।-प्रथम-द्विवचनम्]

तस्तभ्वांसम् स्तम्भिवन्तम् (अहिं=मेघम्) २ ११ ५ [स्तम्भुरिति सौत्रो धातु । ततो लिट क्वसु]

तस्तम्भ स्तभ्नाति १ ६७ ३ **तस्तम्भत्**=स्तभ्नीयात् १ १२१ ३ [स्तम्भुरिति सौत्रो धातु । ततो लिट् । अन्यत्र लेट् । छान्दस द्वित्वम्]

तस्थतुः तिष्ठत ४ ५६ २ तिष्ठेताम् ३ १४ ३ [ष्ठा गतिनिवृत्तौ (भ्वा०) धातोर्लिट्, प्रथमद्विवचनम्]

तस्थिवान् यस्तिष्ठति (वरुण=परमेश्वर) ५ ८५ ५ **तस्थिवांसम्**=प्रतिष्ठन्तम् (परमात्मानम्) ६ ९ ७ तिष्ठन्तम् (अ०—सूर्यमिव) १२ २० स्थितम् (परमेश्वरम्) १ ७२ ४ स्थितिमन्तम् (भोगम्) ऋ० भू० १९३ १ ११६ ५ **तस्थिवांसः**=तिष्ठन्त (पर्वता=शैला) ३ ५६ १ स्थिरप्रज्ञा (देवास=विद्वासो जना) ३ ८ ६ स्थिरास्सन्त (राजजना) ४ ४ ६ [ष्ठा गति-निवृत्तौ (भ्वा०) धातोर्लिट क्वसु]

तस्थिवांसा स्थितिमन्तौ (इन्द्राग्नी=वायुपावकौ) १ १०८ १ [तस्थिवान् इति व्याख्यातम् । तत प्रथमा-द्विवचनस्याकारश्छान्दस]

तस्थुषः स्थावरान् काष्ठादि-पदार्थान् ५ ५३ २ तिष्ठन्तीति तान् सर्वान् पदार्थान् मनुष्यान् वा, प्र०—तस्थुष इति मनुष्यनामसु पठितम्, निघ० २ ३, १ ६ १ स्थावरस्य (जगत) २५ १८ स्थिरस्य (जगत) ३ ३८ ९ अचर जगत् का, आर्याभि० २ ५०, २५ १८ [ष्ठा गतिनिवृत्तौ (भ्वा०) धातोर्लिट क्वसुप्रत्ययान्ताद् द्वितीया वहुवचनम् । षष्ठ्या एकवचन वा । तस्थुष मनुष्यनाम निघ० २ ३ स्थावरस्य च नि० १२ १६]

तस्थुषीः स्थिरा (किरणा) ५ ६२ १ [तस्थुष इति=व्याख्यातम् । तत स्त्रिया ङीप्]

तस्थुः तिष्ठन्ति ३१ १९ स्थितिं चक्रिरे, ऋ० भू० १३२, ३१ १९ तिष्ठेयु १ १६४ ३ स्थिरा भवन्ति ११ ५, ऋ० भू० १६२ तिष्ठन्तु ७ ६ ६ वर्त्तन्ते १ ५२ ४ **तस्थे**=तिष्ठते ५ ४४ ६ तिष्ठामि १ ७२ ६ **तस्थौ**=तिष्ठति ३३ २२ तिष्ठेत् १२ ३४ [ष्ठा गतिनिवृत्तौ (भ्वा०) धातोर्लिट् । 'तस्थे' प्रयोगे व्यत्ययेनात्मनेपदम् । तस्थु=सन्तिष्ठन्ते नि० ४ २७]

ताढि आजहि १८ ७१

तात् तावन्ति (विज्ञानानि), प्र०—अत्र 'छान्दसो वर्णलोपो वा' इति वलोप 'शेश्छन्दसि बहुलम्' इति शेर्लोप ६ २१ ६ [तत्सर्वनाम्न परिमाणे 'यत्तदेतेभ्य परिमाणे वतुप्' अ० ५ २ ३९ सूत्रेण वतुप् । 'आ सर्वनाम्न' अ० ६ ३ ९१ सूत्रेणाकारादेश । तावत्प्राति० प्रथमाबहुवचने शेर्लोप । वकारस्य लोपश्छान्दस]

तातृपिम् अतिशयेन तृप्तिकरम् (सोमम्=ओषधि-गणम्) ३ ४० २ [तृप प्रीणने (दिवा०) धातोर्यङ्लुगन्ताद् औणादिक इ प्रत्यय]

तातृषाणः अतिशयेन पिपासित (इन्द्र=सभेश) १ १३० २ [ञितृष् पिपासायाम् (दिवा०) धातोर्यङ्-लुगन्ताद् औणादिक आनच्-प्रत्यय]

तात्या तस्मिन्नवसरे भवा (पितरा=जननी जनकश्च) प्र०—अत्र 'वाच्छन्दसि' इति तदव्ययात्त्यप् १ १६१ १२

तात्या या तते परमेश्वरे साध्वी तया (धिया=प्रज्ञया) ७ ३७ ६ तत=तनु विस्तारे (तना०) धातो क्त प्रत्यय । ततप्राति० 'तत्र साधु' रित्यर्थेऽण्णन्तान् ङीपि तृतीयैकवचनम्]

तादीत्ना तदानीम्, प्र०—अत्र 'पृषोदरादीनि यथो-पदिष्टम्' अ० ६ ३ १०९ अनेन वर्णविपर्यासेनाकारस्थान ईकार, ईकारस्थान आकारस्तुडागम पूर्वस्य दीर्घश्च १ ३२ ४]

तान्वः तन्व, प्र०—अत्र 'अन्येषामपि दृश्यते' इत्या-द्यचो दीर्घ ३ ३१ २ [तनूप्राति० प्रथमाबहुवचनम् । तनूरिति व्याख्यातम् । 'अन्येषामपि दृश्यते' इति दीर्घादेश । तान्व आत्मज पुत्र नि० ३ ६]

ताप्तम् तपे, प्र०—अत्र लिङर्थे लुङ् ५ ३३ **ताप्सीत्**=तपेत् १३ ३० [तप सन्तापे (भ्वा०) धातोर्लुङ् । अडभावश्छान्दस]

ताम्रः ताम्रमिव कठिनाऽङ्ग (राजा), प्र०—अत्र 'अमितम्योर्दीर्घश्च' उ० २ १६ अनेनाऽस्य सिद्ध १६ ६ **ताम्राय**=यस्ताम्यति ग्लायति तस्मै (पुरुषाय) १६ ३९ [तमु काङ्क्षायाम् (दिवा०) धातो 'अमितम्योर्दीर्घश्च' उ० २ १६ सूत्रेण रक् प्रत्ययो धातोरकारस्य च दीर्घ । ताम्रम् रूपनाम निघ० ३ ७]

तविषाणि बलानि ३ १२ ८ [तविष इति व्याख्यातम् । तत प्रथमावहुवचनम्]

तविषी प्रशस्त-बलादि-युक्ता सेना, प्र०—'तवेर्णिद् वा' उ० १ ४८ अनेन टिषच्-प्रत्ययो णिद् वा १ ३१ २ बलादिगुणयुक्ता (देवी=दिव्यगुणैर्वर्त्तमाना स्त्री) १ ५६ ४ **तविषीभिः**=पूर्णबलयुक्ताभि सेनाभि १ ८७ ४ बलै १ १६६ ४ बलादिभिर्गुणै ३ ३ ५ बलाऽऽकर्षणादिगुणाढ्याभि सेनाभि १ ५१ २ सेनादिबलै ५ ३२ ३ **तविषीम्**=बलम् ५ ३४ ७ बलयुक्ता सेनाम्, भा०—बलवती सेनाम्, प्र०—तविषीति बलनाम, निघ० २ ९, ३४ ७ **तविषीषु**=बलयुक्तेषु सैन्येषु १ ५२ २. **तविषीः**=बलानि १ ६४.७. बलयुक्ता (गिर=विविधविद्यायुक्ता वाण्य) ३ ३१ १३ भा०—हृष्टपुष्टसेना २० ४७ **तविष्याः**=बलयुक्ताया सेनाया ५ २९ १४ [तव इति सौत्रो धातु, तत 'तवेर्णिद्वा' उ० १ ४८ सूत्रेण टिषच् प्रत्यय । स्त्रिया टित्त्वात् ङीप् । तविषी बलनाम निघ० २ ९ तवतेर्वा वृद्धिकर्मण नि० ९ २५]

तविषीमन्तम् प्रशस्ता तविषी सेना यस्य तम् (वीराणा गणम्) ५ ५८ १ [तविषीपद व्याख्यातम्, ततो मतुप् प्रशस्तार्थे]

तविषीयन्तः सेना कामयमाना (वीर-राजजना) ५.८५ ४ [तविषी व्याख्यातम् । तत इच्छार्थे क्यजन्ताच्छतृ-प्रत्यय]

तविषीयमाणम् सेनयेवाऽऽचरन्तम् (शत्रुजनम्) २ ३० ८ [तविषीपद व्याख्यातम् । तत आचारे क्यङ् । तत शानच्]

तविषीवः प्रशसिता तविषी सेना विद्यते यस्य तत्सम्बुद्धौ (इन्द्र=सेनेश) ७ २५ ४ बलवत्-सेनावन् (इन्द्र=राजन्) ४ २० ७ [तविषीपद व्याख्यातम् । ततो मत्वर्थे 'छन्दसीवनिपौ' अ० ५ २ १०९. वा०सूत्रेण वनिप् । 'वन उपसख्यान कर्त्तव्यम्' अ० ८ ३ १ वा०सूत्रेण सम्बुद्धौ रुत्वम्]

तवीयः अतिशयेन बलम् ६ १८ ४ [तव बलनाम निघ० २ ९ ततोऽतिशायने ईयसुन् प्रत्यय]

तवीयान् अतिशयेन प्रशसित (राजा) ६ २० ३ [पूर्वपदे व्याख्यातम्]

तव्यम् तवे बले भवम् (क्षत्र=राज्यम्) १ ५४ ११ **तव्ये**=तवे बले हितम् (क्षत्र=राज्यम्) १ ५४ ११ [तव बलनाम निघ० २ ९ ततो भवार्थे हितार्थे वा यत् प्रत्यय]

तव्यस बलस्य ५ ४३ ९ **तव्यसे**=अतिशयेन वृद्धाय (रुद्राय=परमेश्वराय जीवाय वा) १ ४३ १ [तव बलनाम निघ० २ ९ ततोऽतिशायन ईयसुन् । ईकारलोपश्छान्दस]

तव्यसीम् अतिशयेन बलवतीम् (मतिम्) १ १४३.१ [तव्यस् इति व्याख्यातम् । तत स्त्रिया ङीप्]

तव्यान् अतिशयेन बलवान् (राजपुरुष), प्र०—अत्रेयसुन्, ईकारलोप ३ ३२ ११ ये तविषि बले भवास्तान् (वीरजनान्), प्र०—अत्र 'छान्दसो वर्णलोपो वा' सलोप ५ ३२ ३ **तव्यांसम्**=अतिशयेन वृद्धम् (अग्निं=पावकम्) ५ १७ १ [तव बलनाम निघ० २ ९ ततोऽतिशायन ईयसुन् प्रत्यय । ईकारलोपश्छान्दस । अथवा तवस्बलवाचिन प्राति० भवार्थे यत् । सकारलोपश्छान्दस]

तष्टम् तीक्ष्ण शोधितम् (परमात्मस्वरूपम्) ६ १६ ४७ **तष्टः**=विहित (स्तोम=स्तुतिविषय) १.१७१ २ **तष्टान्**=तक्षन्ति तीक्ष्णीकुर्वन्ति यैर्विद्यास्तान् (मन्त्रान्) १ ६७ २ [तक्षू तनूकरणे (भ्वा०) धातो क्त प्रत्यय । तक्षति करोतिकर्मा नि० ४ १९ तत क्त प्रत्यय]

तष्टेव तक्षेव ७ ३२ २० यथा तक्षक शिल्पी शिल्पविद्याव्यवहारान् विज्ञापयति तथा १ १०५ १८ तथा तनूकर्त्ता शिल्पी १ ६१ ४ यथा छेत्ता (दुष्टदोषनिवारको जन) १ १३० ४ यथा काष्ठाना सूक्ष्मत्वस्य कर्त्ता (विद्वज्जन) ३.३८ १ [तष्टा-इवपदयो समास । तष्टा=तक्षू तनूकरणे (भ्वा०) धातोस्तृच् । तष्टा तक्षणवन् नि० ५ २१]

तसरम् तस्यत्युपक्षयति दु खानि येन तम् (रसम्=आनन्दम्) १९ ८३ [तसु उपक्षये (दिवा०) धातोरौणादिक क्सरन् प्रत्ययो बाहुलकात् । तनु विस्तारे (तना०) धातोर्वा तन्यृषिभ्या क्सरन्' उ० ३ ७५ सूत्रेण क्सरन्]

तस्करम् दस्य्वादिकम् (दुर्जनम्) ७ ५५ ३ चोरम् ३० ५ **तस्करस्य**=प्रसिद्धचोरस्य, भा०—अपुरुषार्थिन (दुर्जनस्य) १२ ६२ **तस्करः**=चोर ६ २८ ३ **तस्करान्**=चोर इव वर्त्तमानान् (दुर्जनान्) ११ ७८ **तस्कराणाम्**=स्तेयकर्मकर्तॄणाम् (प्रजाजनानाम्) १६ २१ **तस्कराः**=प्रसिद्धा (चोरलुण्ठकादयो दुर्जन) ११.७९. **तस्करा इव**=यथा चोरा (तथा सर्पादय) १ १९१ ५ [तस्कर स्तेननाम निघ० ३ २४ तद्-करपदयो समासे 'तद्बृहतो करपत्योश्चोरदेवतयो सुट् तलोपश्च' अ० ६ १ १५७ वा० सूत्रेण सुट् तलोपश्च । तस्कर=तन्करो भवति । करोति यत पापकमिति नैरुक्ता । तनोतेर्वा स्यात्

पाके (तुदा०) धातो क्तिन्। 'ग्रहिज्या०' इति सूत्रेण सम्प्रसारणम्]

तिग्मम् वज्रवत् तीव्रम् (मन=विज्ञानम्), प्र०—तिग्ममिति वज्रनामसु पठितम्, निघ० २ २०, ७ १७ तीव्रगुणकर्मस्वभावम् (वज्र=शस्त्राऽस्त्रम्) ७ १८ १८ तीक्ष्णीकृतम् (सृकम्=वज्रतुल्य शस्त्रम्) १८ ७१ तीव्रम् (सोमम्=ऐश्वर्यम्) ३ ४८ ३ **तिग्मेन**=तीव्रेण (शोचिषा=प्रकाशेन) १७ १६ [तिज निशाने (भ्वा०) धातो 'युजिरुचितिजा कुश्च' उ० १ १४६ सूत्रेण मक्-प्रत्यय कुत्वञ्च। तिग्मम्=वज्रनाम निघ० २ २० तिग्म तेजतेरुत्साहकर्मण नि० १० ६]

तिग्ममूर्द्धानः तिग्म उपरि वर्त्तमाना (योद्धारो जना) ६ ४६ ११ [तिग्म-मूर्धन्पदयो समास। तिग्म व्याख्यातम्]

तिग्मशृङ्गः तिग्मानि तीव्राणि शृङ्गाणीव किरणा यस्य सूर्यस्य स ६ १६ ३६ [तिग्म-शृङ्गपदयो समास। तिग्ममिति व्याख्यातम्। शृङ्गाणि ज्वलतो नाम निघ० १ १७]

तिग्मशोचिषे तीव्रबुद्धिप्रकाशाय १ ७६ १० [तिग्म-शोचिष्पदयो समास। तिग्म व्याख्यातम्। शोचि=ज्वलतो नाम निघ० १ १७]

तिग्महेती तिग्मस्तीव्रो हेतिर्वज्रो ययोस्तौ (वैद्य-राजानौ) ६ ७४ ४ [तिग्म-हेतिपदयो समास। तिग्ममिति व्याख्यातम्। हेति=वज्रनाम निघ० २ २० तिग्म व्याख्यातम्]

तिग्महेते तिग्मस्तीव्रो हेतिर्वज्रो दण्डो यस्य तत्सम्बुद्धौ (अग्ने=सभाध्यक्ष राजन्), प्र०—हेतिरिति वज्रनाम, निघ० २ २०, १३ १२ तिग्मा तीव्रा हेतिर्वृद्धिर्यस्य तत्सम्बुद्धौ (अग्ने=राजन्) ४ ४ ४ [तिग्म-हेतिपदयो समास। तिग्ममिति व्याख्यातम्। हेति वज्रनाम निघ० २ २० हेति=हि गतौ वृद्धौ च (स्वा०) धातो क्तिन् प्रत्यय]

तिग्मा तिग्मानि तीव्राणि (अनीका=सैन्यानि) ४ २३ ७ [तिग्ममिति व्याख्यातम्। तत प्रथमाबहुवचने शेर्लोपे रूपम्]

तिग्मा तीव्रा (अशनि=विद्युत्) ४ १६ १७ **तिग्माम्**=तीव्रा गतिम् ४ ७ १० [तिग्ममिति व्याख्यानम्। तत स्त्रिया टाप्]

तिग्मानीकम् तिग्मानि निशितानि तीक्ष्णान्यनीकानि सैन्यानि यस्मिँस्तम् (सीम्=अहोरात्रव्यवहारम्) १ ६५ २ [तिग्म-अनीकपदयो समास। तिग्ममिति व्याख्यातम्। अनीकम्=अन प्राणने (अदा०) धातो 'अनिहृषिभ्या किच्च' उ० ४ १७ सूत्रेण ईकन्-प्रत्यय किच्च]

तिग्मायुधः तिग्मानि तीव्राण्यायुधानीव किरणा यस्य स (इन्द्र=सूर्य) २ ३० ३ **तिग्मायुधाय**=तिग्मानि तीव्राण्यायुधानि यस्य तस्मै (रुद्राय=शूरवीराय) ७ ४६ १ **तिग्मायुधाः**=तीक्ष्णायुधा (विद्वासो जना) ५ २ १० **तिग्मायुधौ**=तिग्मानि तेजस्विन्यायुधानि ययोस्तौ (वैद्यराजानौ) ६ ७४ ४ [तिग्म-आयुधपदयो समास। तिग्ममिति व्याख्यातम्। आयुधानि उदकनाम निघ० १ १२ आयुधमायोधनात् नि० १० ६ आङ्पूर्वाद् युध सम्प्रहारे (दिवा०) धातो 'घजर्थे कविधानम्' इति क प्रत्यय]

िततउना चालनी से, प० वि०, [तनु विस्तारे (तना०) धातो 'तनोतेर्डउ सन्वच्च' उ० ५ ५२ सूत्रेण डउ प्रत्यय सन्वच्च कार्यम्। िततउ परिपवन भवति, ततवद्वा तुन्नवद्वा तिलमात्रतुन्न वा नि० ४ ६]

तितिक्षते सहते, प्र०—अत्र व्यत्ययेनाऽऽत्मनेपदम् २ १३ ३ **तितिक्षन्ते**=सहन्ते ३ ३० १ तिज निशाने (भ्वा०) धातो 'गुप्तिज्किद्भ्य सन्' अ० ३ १ ५ सूत्रेण स्वार्थे सन्नन्तात् लट्। 'निन्दाक्षमाव्याधिप्रतीकारेषु सन्निष्यते' इतीष्ट्या क्षमाया सन्। व्यत्ययेनात्मनेपदम्]

तितिरुः तरेयु २ २३ ५ प्लवन्त उल्लङ्घयन्ति, प्र०—अत्र लङर्थे लिट् १ ३३ ८ [तॄ प्लवनसन्तरणयो (भ्वा०) धातोर्लिट्। 'ऋच्छत्यॄताम्' इति लिटि प्राप्तो गुणो न भवति छान्दसत्वात्। ततश्च 'ऋत इद्धातो' रितीत्व रपरत्व च]

तितिर्वः शत्रूणा बल तरित उल्लङ्घयित (इन्द्र=राजन्) ६ ४१ ४ [तॄ प्लवनसन्तरणयो (भ्वा०) धातो क्वनिप् प्रत्यय। छान्दस द्विर्वचनम्]

तितिर्वांसः सम्यक् तरन्त (मनुष=मनुष्या) प्र०—अत्र तॄ धातोर्लिट स्थाने वर्त्तमाने क्वसु १ ३६ ७ [तॄ प्लवनसन्तरणयो (भ्वा०) धातोर्लिट स्थाने क्वसु। प्रथमाबहुवचने रूपम्]

तित्तिरिः तीतरी इति भाषायाम् २४ ३६ **तित्ति-रीन्**=भा०—वर्षासु प्रमुदितान् (पक्षिविशेषा) २४.२०न्

तायते पालयति, प्र०—अत्राऽन्तर्गतो ण्यर्थः १ ११० १ तन्यते विस्तीर्यते ३ ४ ४ बढाया जाता है स० प्र० २४७, ३४४ [तायृ सन्तानपालनयो (भ्वा०) धातोर्लट्]

तायवः सूर्यपालका वायव १ ५० २ स्तेना ५ ५२ १२ **तायुम्**=तस्करम् ४ ३८ ५ **तायुः**=स्तेन (जन), प्र०—तायुरिति स्तेननामसु पठितम्, निघ० ३ २४, ६ १२ ५ [तायृ सन्तानपालनयो (भ्वा०) धातोरौणादिक उ प्रत्ययो बाहुलकात् । तायु स्तेननाम निघ० ३ २४]

तारकाः दु खस्य पारे कारिण (सिध्मा =मङ्गल-कारिण पश्वादय) २४ १०. [तृ प्लवनसन्तरणयो (भ्वा०) धातो कर्त्तरि ण्वुल्प्रत्यय । सिध्मास्तारका मै० ३ १३ ११ सलिल वा इदमन्त (अन्तरिक्षे) आसीत् । यदतरन् तत्तार-काणा तारकत्वम् तै० १ ५ २ ५]

ताराय दु खात् सन्तारकाय (सज्जनाय) १६ ४० [तृ प्लवनसन्तरणयो (भ्वा०) धातोर्णिजन्तादच्-प्रत्यय कर्त्तरि]

तारि तीर्यन्ते १ ११६ ६ **तारिषत्**=सन्तार्येत्, प्र०—अत्राऽन्तर्गतो ण्यर्थ १ २५ १२ वर्धयेत् ४ ३९ ६ **तारिषः**=सन्तर ११ ८३ सन्तारयसि ३४ ८ **तारिषी-महि**=तरेम, प्र०—अत्र व्यत्ययेनात्मनेपदम् २ २३ १० **तारिष्टम्**=अन्तरिक्ष प्लावयतम् १ ३४ ११ पारयतम् १ १५७ ४ वर्धयतम् ३४ ४७ **तारीत्**=तारये ६ ४७ ६ सन्तार्येत् १ ६९ ३ सुखानि ददाति १ ७३ १ उल्लङ्घयेत् २ २० ८ उल्लङ्घते १ १५२ ३ **तारीः**=दु खात्तारय ६ २५ २ [तृ प्लवनसन्तरणयो (भ्वा०) धातो कर्मणि लुङ् । अडभावश्छान्दस । अन्यत्र लेडपि]

तार्क्ष्यः तीक्ष्ण तेज प्रापक आश्विन १५ १८ तृक्षितु वेदितु योग्यस्तृक्ष्य, तृक्ष्य एव तार्क्ष्य (ईश्वर), प्र०—अत्र गत्यर्थात् तृक्षधातोर्ण्यत्, तत स्वार्थेऽण् १ ८९ ६ अश्व इव (इन्द्र =परमैश्वर्यवानीश्वर) प्र०—तार्क्ष्य इत्यश्वनाम, निघ० १ १४, २५ १९ [तृक्ष गतौ (भ्वा०) धातोर्ण्यति तर्क्ष्य । तत प्रज्ञादित्वात् स्वार्थेऽण्प्रत्यय । तार्क्ष्य अश्वनाम निघ० १ १४ तार्क्ष्य =त्वष्ट्रा व्याख्यात । तीर्णेऽन्तरिक्षे क्षियति, तूर्णमर्थ रक्षति, अश्नोतेर्वा नि० १० २७ वायुर्वै तार्क्ष्य कौ० ३० ५ अय वै तार्क्ष्यो योऽय (वायु) पवते, एष स्वर्गस्य लोकस्याभिवोळ्हा ऐ० ४ २० तस्य (यज्ञस्य) तार्क्ष्यश्चारिष्टनेमिश्च सेनानी ग्रामण्याविति शारदौ तावृतू श० ८ ६ १ १६ तार्क्ष्यो वै पश्यतो राजेत्याह तस्य वयासि विश ......पुराण वेद श० १४ ३ ३ १३ स्वस्त्ययन वै तार्क्ष्य. (तार्क्ष्यदेवताकमन्त्र) ऐ० ४ २९. भद्ररतार्क्ष्य सुप्रजागत्वाय । काठसक० ६० ५]

तालु आस्याऽवयवम् २५ १ [तृ प्लवनसन्तरणयो (भ्वा०) धातो 'त्रो रश्च ल' उ० १ ५ सूत्रेण ञुण् प्रत्ययो रेफस्य च लकारादेश । तालु नरतेस्तीर्णतममङ्ग लततेर्वा स्याद् लम्बकर्मणो विपरीताद् यथा तल लतेत्य-विपर्यय नि० ५ २७ अवक्रन्देन तालुम् तै० स० ५ ७ ११ ७. मै० ३ १५ १ का० ५३ १]

तावकेभ्यः त्वदीयेभ्यस्तत्सिद्धेभ्यो वा १ ९४.११ [युष्मत् प्रातिपदिकाच् छैषिकोऽण् । तत 'तवकममकावेक-वचने' अ० ४ ३ ३ सूत्रेण तवकादेशोऽणि]

तावान् तावत्परिमाण (सोम =उत्पन्नपदार्थसमूह) १ १० ८ २ [तत् सर्वनाम्न परिमाणेऽभिधेये 'यत्तदेतेभ्य परिमाणे वतुप्' इति वतुप् 'आ सर्वनाम्न ' इत्याकारादेश]

तिगितेन प्राप्तेन (शस्त्रेण) २ ३० ९ **तिगितैः**=तीक्ष्णै (जम्भै =वक्त्रै) १ ४३ ५ [तिग गतौ (भ्वा०) धातो क्त प्रत्यय । तिज निशाने (भ्वा०) धातोर्वा रूपम्]

तिग्मजम्भ ! तिग्म तीव्र जम्भो गात्रविनामन यस्मात् तत्सम्बुद्धौ (अग्ने=विद्वज्जन !) १५ ३७ तिग्म तीव्र जम्भ वक्त्र यस्य तत्सम्बुद्धौ (विद्वज्जन) १ ७९ ६ **तिग्मजम्भस्य**=तिग्म तीव्र तेजस्वि जम्भो मुख यस्य तस्य (सेनापते) ४ १५ ५ **तिग्मजम्भः**=तिग्मानि गात्रविनमनानि यस्य स (वैश्वानर =राजा) ४ ५ ४ [तिग्म-जम्भपदयो समास । तिग्ममिति व्याख्यास्यते । जम्भ =जभी गात्रविनामे (भ्वा०) धातोर्घञ् । 'रधि-जभोरचि' सूत्रेण नुम्]

तिग्मतेजः तीव्राणि तेजासि यस्मात् तत् (नम =अन्नादिकम्) १२ ६३ **तिग्मतेजाः**=तिग्मानि तीक्ष्णानि तेजासि भवन्ति यस्मात् स (वायु =गमनागमनशील पवन), प्र०—'युजिरुजितिजा कुश्च' उ० १ १४५ अनेन 'तिज निशाने' इत्यस्मान्मक्-प्रत्यय कुत्वादेशश्च, तथैव 'सर्वधातुभ्योऽसुन्' उ० ४ १९६ अनेन तिज इत्यस्मादसुन् प्रत्यय १ २४ [तिग्म-तेजस्पदयो समास । तिग्ममिति व्याख्यास्यते । तेजस्=तिज निशाने (भ्वा०) धातोरसुन्]

तिग्मभृष्टिः तिग्मा तीव्रा भृष्टि परिपाको यस्य स. (विविद्वान्=श्रेष्ठो विद्वान् जन.) ४ ५ ३ [तिग्मा-भृष्टि-पदयो समास । तिग्ममिति व्याख्यास्यते । भृष्टि =भ्रस्ज

प्रत्यय । 'दधातेर्हि' रिति धातोर्हिरादेश]

तिर्यञ्चम् तिरश्चीनम् (पार्श्वस्थ वीरजनम्) १० ८. तिर्यक्स्थितमधस्थ वा (ईश्वरम्) ३२ २ [तिरसुपपदे अञ्चु गतौ (भ्वा०) धातो 'ऋत्विक्०' इत्यादिना क्विन् । 'अनिदिताम्' इति नलोपे 'उगिदचाम्०' इति नुम् । तिरसस्तिर्यलोपे' अ० ६ ३ ९४ सूत्रेण तिरि इत्यादेश]

तिल्विले स्नेह-स्थाने (क्षेत्रे=पुण्ये कर्मणि) ५ ६२.७

तिष्ठ तिष्ठति, प्र०—अत्राऽन्त्यपक्षे व्यत्ययो लडर्थे लोट् च २ १३ प्रकाशितो भव ७ ३८ २ स्थिरो भव १२ ११ धर्मे वर्त्तस्व १ १२१ १२ उद्युक्तो भव ४ ४४ **तिष्ठत्**=अतितिष्ठति १ १७४ ४ तिष्ठति ४ १ १७ [ष्ठा गतिनिवृत्तौ (भ्वा०) धातोर्लोट् । अन्यत्र लेट् । शिति प्रत्यये तिष्ठादेश]

तिष्ठत स्थिरा भवत १ १९१ ६ प्रतिष्ठा लभध्वम्, भा०—प्रशसा लभन्ते २६ २२ प्र० – अत्र 'वाच्छन्दसि सर्वे विधयो भवन्ति' इति नियमात् 'समवप्रविभ्य स्थ' अ० १ ३ २२. इत्यात्मनेपद न भवति १ १५ ६ **तिष्ठति**=प्रवर्त्तते १ ५१ ११ वर्त्तते १ ५८ २ **तिष्ठेत्**=२० ४९ **तिष्ठते**=वर्त्तते १ ५८ ४ **तिष्ठसि**=तिष्ठति प्र०—अत्र पुरुषव्यत्यय ३ ६१ ३ **तिष्ठस्व**=तिष्ठते, प्र०—अत्र लडर्थे लोट् २ १९ [ष्ठा गतिनिवृत्तौ (भ्वा०) धातोर्लोट् । शिति तिष्ठादेश । अन्यत्र व्यत्ययेनात्मनेपदम्]

तिष्ठत् स्वस्वरूपेण स्थिर सत् (ब्रह्म) ४० ४ **तिष्ठते**=वर्त्तमानाय (अश्वायेव=यथाऽश्वाय) ११ ७५ **तिष्ठद्भ्य.**=स्थितेभ्य (राजपुरुषेभ्य) १६ २३ [ष्ठा गतिनिवृत्तौ (भ्वा०) धातो शतृप्रत्यय । शिति तिष्ठादेश]

तिष्ठन्तीभ्यः स्थिराभ्य (अद्भ्य) २२ २५ [ष्ठा गतिनिवृत्तौ (भ्वा०) धातो शतृप्रत्ययान्तात् स्त्रिया ङीप्]

तिष्ठाति तिष्ठतु १ ८२४ तिष्ठेत् ४ २० २ **तिष्ठाते**=तिष्ठेत १ १२४ ११ **तिष्ठाः**=तिष्ठे ३ ८ १ [ष्ठा गतिनिवृत्तौ (भ्वा०) धातोर्लेट् । अन्यत्र व्यत्ययेनात्मनेपदम् । तिष्ठा तिष्ठासति नि० ८ १८]

तिष्ठिपत् समन्तात् प्रस्थापयेत् २५ ४३ [ष्ठा गतिनिवृत्तौ (भ्वा०) धातोर्णिजन्ताल्लुङ् । अडभावश्छान्दस । 'तिष्ठतेरित्' अ० ७ ४ ५ सूत्रेण णौ चङ्युपधाया इकारादेश]

तिष्यः आदित्य पुष्यनक्षत्र वा ५ ५४ १३ [तिष्यनक्षत्रवाचिन प्राति० 'नक्षत्रेण युक्त काल' इति प्राप्तस्याण 'लुबविशेषे' अ० ४ २ ४ सूत्रेण लुप् । तिष्यो नक्षत्र बृहस्पतिर्देवता तै०स० ४ ४ १० १ मै० २ १३ २० तिष्यो वै रुद्र काठ० ११ ५. बृहस्पतेस्तिष्य तै० १ ५ १ २, ३ १ १ ५. रुद्रस् तिष्य तै० म० २ २.१० १. मै० २ १ ५]

तिसृणाम् त्रिविधानाम् (धिषणाना=कर्मोपासना ज्ञानविदा बुद्धीनाम्) ५.६९ २ **तिसृभिः**=त्रिविधाभि कर्मोपासना ज्ञान-ज्ञापिकाभि (गीर्भि =वाग्भि) २७ ४३ प्राणोदानव्यानगतिभि १४ २८ **तिसृषु**=त्रिविधासु भूम्यादिषु ६ ४७ ४ **तिस्रः**=त्रिविधा (दिव =प्रकाशान्) ४ ५३ ५ स्थूलत्रसरेणुपरमाण्वाख्या १ ३४ ८ ऊर्ध्वाध समगती १ ३४ ७ स्थूला मध्या सूक्ष्मा च ३.५६ २ स्थूलसूक्ष्म-कारणाख्या ३ ५६ ५. सुशिक्षिता सभा सेना प्रजा ५ ३५ २ विद्याराजधर्मसभास्था ७.३३ ७. अध्यापकोपदेशकपरीक्षित्र्य २८ ४१ त्रित्वसङ्ख्याका (देवी =देदीप्यमाना विदुष्य) २८ ४१ त्रित्वसङ्ख्याता (जिह्वा = विविधा वाणी) ३ २० २ त्रित्वसङ्ख्या (भा०—कर्मोपासनाज्ञानविज्ञापिका वाणी) २८.३१ त्रित्वविशिष्टा सङ्ख्या १८ २४ त्रित्वसङ्ख्यावत्य (इडा-सरस्वती-भारती) २१ १९ त्रित्वसङ्ख्याविशिष्टान् (शरद) १ ७२ ३ त्रिप्रकारकाणि विद्युद्भौमसूर्यरूपेण स्थितानि ज्योतीषि ३ २ ९ त्रिप्रकारका (इडा-सरस्वती-मही देव्य) १ १३ ९ उत्तम-मध्यम-निकृष्टरूपेण त्रिविधा (दानुचित्रा क्रिया) १ १७४ ७ गार्हपत्या-हवनीय-दाक्षिणात्यरूपास्त्रिविधा (दिव =दीप्ती) २ ३ २ [त्रिप्राति०सख्यावाचिन स्त्रिया रूपाणि । 'त्रिचतुरो स्त्रिया तिसृचतसृ' अ० ७ २ ९९ सूत्रे 'तिसृ' इत्यादेशो विभक्तौ परत । अजादौ विभक्तौ तु 'अचि र ऋत' इति रेफादेश]

तिस्तिराणा यन्त्रकलाभिराच्छादितौ (इन्द्राग्नी= वायुविद्युतौ) १ १०८ ४ [स्तृञ् आच्छादने (क्र्या०) धातोर्लिट स्थाने कानच् । 'सुपा सुलुग्०' इत्याकारादेश]

तिस्तिरे स्तृणाति आच्छादयति ३ ४१ २ [स्तृञ् आच्छादने (क्र्या०) धातोर्लिट्]

तिस्थिपत् स्थापयेत् १ १६२ २० [ष्ठा गतिनिवृत्तौ (भ्वा०) धातोर्णिजन्ताल्लुङ् । अडभाव । 'तिष्ठतेरित्' इतीकारादेश । षत्वाऽभावश्छान्दस]

तीक्ष्णेषवे तीक्ष्णा तीव्रा इषवोऽस्त्रशस्त्राणि यस्य तस्मै (वीरपुरुषाय) १६ ३६ [तीक्ष्ण-इषुपदयो समास]

तीर्त्वा उल्लङ्घ्य ४० ११ तर कर अर्थात् पृथक् होकर स० वि० १८९, अथर्व० ९ ५ १ [तॄ प्लवनसन्तर-

[तॄ प्लवनसन्तरणयो (भ्वा०) धातोरौणादिको बाहुलकाद् इ प्रत्यय । स च कित् सन्वत्कार्यमभ्यासस्य तुगागम । तित्तिरि तरणात्, तिलमात्रचित्र इति वा नि० ३ १८ अथ यदन्यस्माऽग्रगनाय (विश्वरूपस्य मुखम्) आस । ततस्तित्तिरि समभवत् श० ५ ५ ४ ६ येन (शिरसा विश्वरूपस्त्वाष्ट्र) अन्नमावयत् स तित्तिरि मै० २ ४ १ रुद्राणा तित्तिरि काठ० ४७ ६ अथ यदन्नादनम् (त्रिशीर्ष्णो मुखम्) आसीत् स तित्तिरिरभवत् जै० २ १५४]

तितृत्सान् तर्दितु हिंसितुमिच्छेयु ३ ३ २८ [उतृदिर् हिसानादरयो (रुधा०) धातोरिच्छाया सन्नन्तात्लेट् । आडागम]

तित्याज छोड देता है, प० वि०, [त्यज हानौ (भ्वा०) धातोर्लिट् । अभ्यासस्येकारादेशश्छान्दस]

तित्रतः तरन्त (देवास =विद्वासो जना), प्र०—अत्र विकरणव्यत्ययेन शसोऽभ्यासस्येत्वञ्च २ ३१ ७

तित्विषाणस्य अग्निज्वालयेव विद्यया प्रकाशमानस्य (राज्ञ) ५ ८ ५ [त्विष दीप्तौ (भ्वा०) धातोर्लिट स्थाने कानच्]

तित्विषे प्रकाशय १ ५२ ६ [त्विष दीप्तौ (भ्वा०) धातोर्लिट् ।

तित्विषे त्वेषति प्रदीप्यते १ १०२ २ [त्विष दीप्तौ (भ्वा०) धातोर्लडर्थे लिट् ।

तिर सन्तारय, प्र०—तरतेर्विकरणव्यत्ययेन श 'ऋत इद्धातो' इतीकार १ १० ११ विस्तारय १ ११ ७ दुख प्लवस्व ५ ४१ **तिरत**=निष्पादयत ७ ५७ ५ **तिरते**=प्राप्नोति ६ ६८ ७ प्लवते सन्तरति वा, प्र०—अत्र व्यत्ययेनात्मनेपद, विकरणव्यत्ययेन शश्च १ १०४ ४ वर्धयति ७ ५९ २ **तिरध्वम्**=शत्रुबलमुल्लङ्घध्वम् ७ ५६ १४ **तिरन्त**=प्रतरन्ति ७ ७ ६ **तिरन्तु**=वर्धयन्तु १ ८९ २ पूर्णं भोजयन्तु २५ १५ **तिरन्ते**=सन्तरन्ति १ १२५ ६ [तॄ प्लवनसन्तरणयो (भ्वा०) धातोर्लोट् । अन्यत्र लड् अपि । व्यत्ययेन शप स्थाने श । आत्मनेपदमपि क्वचिद् व्यत्ययेन । 'ऋत इद्धातो' रितीत्व रपरत्वञ्च । तिरते प्रवर्धयते नि० ११ ६]

तिरश्चता तिरश्चीनेन (त्वेन=केन जनेन सह) ४ १८ २

तिरश्चा तिर्यग् गत्या १ ९१ १५ तिरश्चीनेन (वयसा=जीवनेन) २ १० ४ येन तिरोऽञ्चनि तेन (वयसा=जीवनेन) ११ २३ [तिरस् इति व्याख्यास्यते । तदुपपदे अञ्चु गतौ (भ्वा०) धातो 'ऋत्विक्०' इत्यादिना क्विन् । ततस्तृतीया]

तिरश्चीनपृश्नि: तिरश्चीन पृश्नि स्पर्शो यस्य स (पशु पक्षी वा) २४ ४ [तिरश्चीन-पृश्निपदयो समास । तिरश्चीनपद व्याख्यास्यते । पृश्नि =स्पृश सस्पर्शने (तु०) धातो 'घृणिपृश्नि०' उ० ४ ५२ सूत्रेण नि प्रत्यय]

तिरश्चीन: तिर्यग्-गमन (रश्मि =किरणो दीप्ति.) ३३ ७४ [तिरसुपपदे अञ्चु गतौ (भ्वा०) धातो 'ऋत्विक्०' इति क्विन् । तत 'विभाषाञ्चेरदिक्स्त्रियाम्' इति स्वार्थे ख प्रत्यय । तिरस् इति व्याख्यास्यते]

तिरसि तरसि ४ ६ १ **तिर**=प्लव, दुखात् पार गच्छ ३ ४० ३ [तॄ प्लवनसन्तरणयो (भ्वा०) धातोर्लट् । अन्यत्र लोट् । विकरणव्यत्ययेन श]

तिर: तिरस्करणे निवारणे ७ ६० ६ तिर्यक् ४ २९ १ अन्तर्धाने १ ४६ ६ तिरोभावे ६ १० ४ अधोगमने १ ६१ ७ तिरश्चीन कर्म ५ ५३ १४ तिरश्चीने ६ ६५ १. [तिर सत इति प्राप्तस्य । तिरस्तीर्ण भवति । सत ससृत भवति नि० ३ २०

तिराति विहन्ति ७ ५८ ३ [तॄ प्लवनसन्तरणयो (भ्वा०) धातोर्लेट् । आडागम । व्यत्ययेन श]

तिरामसि तराम ३ ३७ १० **तिरेत**=वर्धयेत ७ ५८.३ [तॄ प्लवनसन्तरणयो (भ्वा०) धातोर्लट् । व्यत्ययेन श । मस इदन्तता छन्दसि । अन्यत्र लिङ्]

तिरोअह्न्यम् तिरश्च तदहश्च तिरोहस्तस्मिन् भवम् (रसम्) १ ४७ १ चोरादीना तिरस्कर्तॄणि अहनि प्रसिद्धम् (जन=पुरुषार्थेषु प्रादुर्भूतम्) १ ४५ १० तिरस्वहस्सु साधुम् (पुरोडाश=सुसंस्कृतमन्नादिकम्) ३ २८ ६ तिरश्चीनेऽह्नि भवम् (पुरोडाशम्=अन्नविशेषम्) ३ २८ ३ तिरश्चीनेष्वहस्सु साधुम् (पूर्ण ब्रह्मचर्यम्) ३ ५८ ७ अहनि भवमहन्यम्, तिरस्कृतमाच्छादितमहन्य येन तम् (जनम्) प्र०—अत्र 'प्रकृत्यन्त पादमव्यपरे' इति प्रकृतिभाव १ ४५ १० [तिरस्-अह्न्यपदयो समास । तिरस् इति व्याख्यातम् । अहन्यम्=अह्न्यप्राति० भवार्थे साध्वर्थे वा यत्]

तिरोदधे निवारयामि ७ ५० १ [तिरसुपपदे डुधाञ् धारणपोषणयो (जु०) धातो सामान्ये लिट् । तिरोदधे=अन्तर्दधाति नि० १२ ३२]

तिरोहितम् परिच्छिन्नम् (अग्नि=पावकम्) ३ ९ ५ [तिरसुपपदे डुधाञ् धारणपोषणयो (जु०) धातो क्त

मत्वर्थे 'छन्दसीवनिपावि' तीकारप्रत्यय । अथवा तुज हिसायाम् (भ्वा०) धातोरौणादिक इ तुजये अपत्यजननाय नि० १२ ४५]

तुजसे बलाय शत्रूणा हिसनाय वा ४ २३ ७ [तुज वज्रनाम निघ० २ २० तुज हिसायाम् (भ्वा०) धातोस्तुमर्थे कसेन्-प्रत्यय]

तुजे दाने ५ ४१ ६

तुज्यमानास: कम्पमाना स्वा स्वा वसतिमाददाना (देवा =पृथिव्यादय) १ ११ ५ [तुजि हिंसाबलादाननिकेतनेषु (चुरा०) धातो कर्मणि शानच् । जसोऽसुगागम । तुज्यमानास क्षिप्रनाम निघ० २ १५]

तुज्या: हिसनीया (भृमय =भ्रमणानि) ३ ६२ १ [तुज हिसायाम् (भ्वा०) धातोरौणादिको यक् प्रत्ययो बाहुलकात्]

तुञ्जते तुञ्जन्ति पालयन्ति, प्र०—अत्र व्यत्ययेनाऽऽत्मनेपदमेकवचनञ्च १ १३१ २ (तुञ्जति दानकर्मा निघ० ३ २० तुजि पालने (भ्वा०) धातोर्लट् आत्मनेपद व्यत्ययेन]

तुञ्जमाना: बलायमाना (मनुष्या) ३ १ १६ [तुजि हिसाबलादाननिकेतनेषु (चुरा०) धातो शानच् । व्यत्ययेनात्मनेपदम्]

तुञ्जाते दु खानि हिंस्त , प्र०—व्यत्ययेनाऽत्राऽऽत्मनेपदम् १ १०५ ६ [तुजि हिसाबलादाननिकेतनेषु (चुरा०) धातोर्लट् । व्यत्ययेनात्मनेपदम् । अनित्यण्यन्ताश्चुरादय इति णिच् न भवति]

तुञ्जे तुञ्जे दातव्ये दातव्ये (पदार्थे पदार्थे) १ ७ ७ [तुञ्जस्तुञ्जतेर्दानकर्मण । तुञ्जे तुञ्जे दाने दाने नि० ६ १८]

तुतुज्यात् बलयेत् १ १४३ ६ [तुज हिसायाम् (भ्वा०) धातोर्लिङ् । 'बहुल छन्दसि' सूत्रेण शप श्लु]

तुतुर्यात् हिस्यात् ६ ६३ २ **तुतुर्याम**=विनाशयेम ५ ४५ ११ [तुर त्वरणे (जु०) धातोर्लिडि रूपम् । धातूनामनेकार्थकत्वाद् हिसायामर्थेऽत्र]

तुतुर्वणि: शीघ्रगति १ १६८ १

तुतोद तुद्यात् प्रेरयेत् २ १६२ १७ [तुद व्यथने (तुदा०) धातोर्लिट्]

तुथ: ज्ञानवर्धक (जगदीश्वरो विद्वज्जनो वा) ५ ३१ ज्ञानवृद्ध (सभापति) प्र०—तु गतिवृद्धिहिसासु इत्यस्मादौणादिक थक्-प्रत्यय ७ ४५ सर्वविद् (ईश्वर), प्र०—'तुथो वै ब्रह्म' यह शतपथ की श्रुति है, आर्याभि० २ १६, ५ ३१ [ब्रह्म वै तुथ श० ४ ३ ४ १५ सत्य तुथो विश्ववेदा । काठ० २८ ४ तुथो ह स्म वै विश्ववेदा देवाना दक्षिणा विभजति तै० स० ६ ६ १ २ तुथोऽसि विश्ववेदा तै० स० १ ३ ३ १ मै० १ २.१२ काठ० २ १३ तुथोऽसि जनधाया देवास्त्वा ' 'प्रणयन्तु मै० १ ३ १२

तुद व्यथय ६ ५३ ६ **तुन्दते**=व्यथते, प्र०—अत्र 'वाच्छन्दसि सर्वे विधयो भवन्ति' इति नुमागम १ ५८ १ [तुद व्यथने (तुदा०) धातोर्लोट् । अन्यत्र नुमागमश्छान्दस]

तुम्रम् ग्लातारम् (इन्द्र=हृद्य पतिम्) ६ २२ ५ सत्कर्मसु प्रेरकम् (इन्द्र = राजानम्) ४ १८ १० **तुम्र:**= आहन्ता (इन्द्र =समृद्धो राजा) ३ ५० १

तुरगातु सद्यो गमनम् १ १६४ ३० [तुर-गातुपदयो समास]

तुरणे दुग्धादिपानार्थ त्वरमाणाय (मज्जनाय), प्र०—अत्र तुरणधातो क्विप् १ १२१ ५ [तुरण त्वरायाम् (कण्ड्वादि०) धातो क्विप् । ततश्चतुर्थी]

तुरण्यत: सद्यो गच्छत (श्येनस्य) ४ ४० ३ शीघ्र गच्छत (वे =पक्षिण) ६ १५ **तुरण्यन्**=त्वरन् (गृहस्थो जन) १ १२१ १. [तुरण त्वरायाम् (कण्ड्वादि०) धातो शतृप्रत्यय]

तुरण्यति त्वरयति ६ १४ सद्यो गमयति ४ ४० ४ [तुरण त्वरायाम् (कण्ड्वादि०) धातोर्लट् । तुरण्यति तूर्णमश्नुतेऽध्वानम् नि० २ २८]

तुरण्यव: क्षिप्र कर्त्तार (जना) ७ ५२ ३ पालका (जना) १ १३४.५ [तुरण त्वरायाम् (कण्ड्वा०) धातोरौणादिक (३ २०) युच् बाहुलकात्]

तुरण्यसत् आत्मनस्तुरण त्वरणमिच्छन् (राजा) ४ ४० २ [तुरणपदाद् इच्छायामर्थे क्यच् । तत शतृप्रत्यय । व्यत्ययेन सिप्]

तुरत: सद्य कर्त्तु (राज्ञ) ६ १८ ४ [तुर त्वरणे (जु०) धातो शतृप्रत्यय । 'बहुल छन्दसी' ति शपो लुक्]

तुरम् शीघ्रम् ७ ५६ १६ अविद्यादिदोषनाशक सामर्थ्यम् ५ ८२ १ शीघ्रकारिणम् (राजपुरुषम्) ४ ३८ ७ **तुरस्य**=क्षिप्र कुर्वत (गिर =वाच) ७ २२ ५ शीघ्रकारिण (तव्यस =बलस्य) ५ ४३ ६ शीघ्र सुखकरस्य (द्रविणस =द्रव्यसमूहस्य) १ ६६ ८ त्वरमाण-य सभा-

णयो (भ्वा०) धातो क्त्वा]

तीर्थानि यानि वेदाऽऽचार्य-सत्यभाषण-ब्रह्मचर्यादि-सुनियमादीन्यविद्यादु खेभ्यस्तारयन्ति यद्वा यै समुद्रादिभ्य-स्तारयन्ति तानि १६ ६१ **तीर्थे**=जलाशये १ १७३ ११ तरन्ति येन तस्मिन्नर्थे (याने) १.४६ ८ समुद्राणा तरणे कर्त्तव्ये, ऋ० भू० १६६, ऋ० १ ३ ३४ ८ **तीर्थेभ्यः**= तरन्ति यैस्तीर्यन्ते वा येभ्य (साधनै साधनेभ्यो वा) ३० १६ [तॄ प्लवनसन्तरणयो (भ्वा०) धातो 'पातॄतुदिवचि०' उ० २ ७ सूत्रेण थक्। तीर्थेन हि प्रतरन्ति तद्यथा समुद्र तीर्थेन प्रतरेयु गो० पू० ५.२ दक्षिणतस्तीर्थाना गाधम् काठ० २६ ८ अप्सु स्नाति साक्षादेव दीक्षातपसी अवरुन्वे, तीर्थे स्नाति, तीर्थे हि (अङ्गिरस) ता (दीक्षाम्) प्रावेशयन्, तीर्थे स्नाति तीर्थमेव समानाना भवति तै०म० ६ १ १ २]

तीर्थ्याय तीर्थेपु वेदविद्याऽध्यापकेपु सत्यभापणादिपु च साधवे (सत्पुरुषाय) १६ ४२ जो वेदादि शास्त्र और सत्यभापणादि धर्मलक्षणो मे साधु है, उस (सज्जन) को. स० प्र० ४५५, १६ ४२ [तीर्थप्राति० 'तत्र साधु' रित्यर्थे यत्-प्रत्यय]

तीव्रम् तीव्रगुणस्वभावम् (सोम=ओषधिरस प्रेरणा-ख्य व्यवहार वा) २० ६३ तेजोमयम् (सवनम्=ऐश्वर्यम्) ४ ३५ ६ सुशोधितम् (घृतम्) ५ ५ १ सर्वदोपाणा निवा-रणे तीक्ष्णस्वभावम्, भा०—शीघ्र दोपनिवारकम् (घृतम्= आज्यादिकम्) ३ २ **तीव्रः**=तीक्ष्ण (महाविद्वान्) २ ४१ १४ तेजस्वी वेगवान् (ओपविसार) ६ ४७ १ **तीव्रान्**=तीक्ष्णान् (घोपान्=शब्दान्) २६ ४ **तीव्राः**= तीक्ष्णवेगा (सोमास =उत्पन्नपदार्था) १ २३ १ तीक्ष्ण-स्वभावा (जना) ५ ३० १३ कठिना (समद = संग्रामान्) ६ ७५ २ तीव्रवेगवती शत्रूणा सेना २६ ३६ **तीव्रेण**=आशुकारिगुणेन १६ १ **तीव्रैः**=तीक्ष्णवेगादि-गुणै (सोमै =रसभूतैर्जलै) १ १०८ ४ [तिज निशाने (भ्वा०) धातोर्बाहुलकाद् (२ २८) औणादिको रन् प्रत्ययो जस्य वो दीर्घत्व च धातोर्बाहुलकादेव]

तीव्रसुतम् तीव्रै तेजस्विभि कर्मभिर्निष्पादितम् (उत्तमौपधिरसम्) ६ ४३ २ [तीव्र-सुतपदयो समास । तीव्र व्याख्यातम् । सुतम्=पुञ् अभिपवे (स्वा०) धातो क्त]

तु पुन , स० वि० २१४, ४० ६ पश्चादर्थे १ ६६ ४ हेतौ ३४ १६ पुनरर्थे १ १० ११ क्षिप्रम् ३३ ६५ चाऽर्थे ३३ ६४ एव १ १६६ ४ अवधारणे ३४ ११

तुग्रम् तेजस्विनम् (वीरपुरुपम्) ६ २६ ४ आदातारम् (इभ=हस्तिनम्) ६ २० ८ **तुग्रस्य**=बलिष्ठस्य (जनस्य) ६ ६२ ६ **तुग्रः**=शत्रुहिंसक सेनापति १ ११६ ३ य कश्चिद्धनाऽभिलापी भवेत् स (जन) प्र०—तुजि हिंसा-बलादाननिकेतनेपु, अस्माद्धातोरौणादिके रक्प्रत्यये कृते तुग्र इति पद जायते १ ८ ३, ऋ० भू० १६८. **तुग्राय**= बलाय १ ११७ १४ [तुजि हिंसाबलादाननिकेतनेपु (चुरा०) धातोरौणादिको रक्-प्रत्यय । 'इदितो नुम् धातोरि' ति नुम् न भवति, आगमशासनस्यानित्यत्वात् । तुज हिंसायाम् (भ्वा०) धातोर्वा रूपम् । अन्वेति तुग्र (आदित्य) तै० आ० १ १० ४]

तुग्र्यासु अप्सु हिसनक्रियासु १ ३३ १५ [तुग्र व्या-ख्यातम् । ततो भवार्थे यत् प्रत्यये स्त्रिया टाप्]

तुचे पुत्र-पौत्राद्यायाऽपत्याय, प्र०—तुगित्यपत्यनाम०, निघ० २ २, ३३ ६४ [तुक् इत्यपत्यनाम निघ० २ २ ततश्चतुर्थी]

तुच्छ्यान् तुच्छेपु क्षुद्रेपु भवान् (कामान्) ५ ४२ १० **तुच्छ्येन**=तुच्छ अर्थात् अनन्त परमेश्वर के सन्मुख, स० प्र० २०७, [तुच्छप्राति० भवार्थे यत्]

तुज्यते हिंस्यते १ ८४ १७ [तुज हिंसायाम् (भ्वा०) धातो । कर्मणि लट्]

तुज प्रेरय ५ १७ ३ **तुजेते**=हिंस्त १ ६१ १४ [तुज हिंसायाम् (भ्वा०) धातोर्लोट् । अन्यत्र व्यत्ययेनात्मने-पदम्]

तुजतः बलवत. (मनुष्यस्य) ३ ३६ ८ **तुजता**= छेदकेन वज्रेण १ ६१ ६ **तुजन्**=हिसन् (सूर्य) १ ६१ ६ [तुज हिंसायाम् (भ्वा०) धातो शतरि पष्ठ्या एकवचनम्]

तुजम् आदातव्यम् (रयिं=धनम्) ३ ४५ ४ **तुजः**= शत्रुहिंसक-बलादियुक्ता सेना ३ ३४ ५ आदत्ता (धेनव = (किरणा) १ १५१ ५ **तुजा**=तोजति हिनस्ति दु खेन येन तेन १ ५६ ३ दुष्टाना हिंसको (सभासेनेशौ) ६ ६८ २ **तुजे**=विद्याबलमिच्छुकाय (तोकाय=अपत्याय) ४ १ ३ [तुजि हिंसाबलदाननिकेतनेपु (चुरा०) धातोर्घञर्थे क । अथवा हिंसार्थकात् तुजधातो क्विप् । 'कृतो बहुलम्' इति क्विप् कर्तृभिन्नकारकेपु भवति । तुज वज्रनाम निघ० २ २०]

तुजये बलाय ५ ४६ ७ **तुजिम्**=बलिष्ठम् (वीर-पुरुपम्) ६ २६ ४ [तुज वज्रनाम निघ० २ २० ततो

याचते स (इन्द्र =राजा) ५ ३५ ३ हिंसक हिंसन् वा० १ १३० ६ शीघ्राऽऽनन्ददाता (प्रशसितप्रज्ञादियुक्तो जन) १ ५६ ३ यस्तुरान् शीघ्रकरान् वनति सम्भजति स. (इन्द्र =सेनाध्यक्ष) १ ६१ ११ शीघ्र-शत्रुहन्ता (इन्द्र = राजा) २ ० ४८ सद्योगामी (विद्वज्जन) १ १८६ ३. शीघ्रकारी (इन्द्र =राजा) ४ २० १ तम शीत हिंसन् (अग्नि =विद्युत्सूर्यरूप) १ १२८ ३ [तुरोपपदे वन सम्भक्तौ (भ्वा०) धातोर्गौणादिक इन् प्रत्यय । तुर इति व्याख्यातम् । तुर्वणि तूर्णवनि नि० ६ १४]

तुर्वणे हिंसनाय ६ ४६ ८ [तुरोपपदे वन सम्भक्तौ (भ्वा०) धातो क्विप्]

तुर्वयाणम् तूर्वा शत्रुबलहिंसका योद्धारो यानेषु यस्य तम् (कुत्स =वज्रमिव वीरपुरुषम्) १ ५३ १० [तूर्व-यानपदयो समास । तुर्व =तुर्वी हिंसायाम (भ्वा०) धातोरच्प्रत्यय । यानम् =या प्रापणे (अदा०) धातो करणे ल्युट्]

तुर्वशम् यस्तूर्णकारी वशगतस्त मनुष्यम् १ १७४ ६ उत्तम मनुष्यम् १ ५४ ६ हिंसकाना वशकरम् (अग्नि वीरजनम्) ६ ४५ १ सद्यो वशगमनम् (यदु =यत्नशील मनुष्यम्) ६ २० १२ निकटस्थ जनम्, प्र०—तुर्वश इति अन्तिकनाम, निघ० २ १६, ७ १९ ८ तुरा शीघ्रतया पर-पदार्थान् वष्टि काङ्क्षति तम् (यदु =मनुष्यम्) १.३६ १८ **तुर्वश:**=सद्यो वशङ्कर (सज्जन) ७ १८ ६ **तुर्वशाय**=सद्यो वशकरणसमर्थाय (मनुष्याय) ५.३१ ८ **तुर्वशे**=वेद-शिल्पादिविद्यावति मनुष्ये १ ४७ ७ **तुर्वशेषु**=तूर्वन्तीति तुरस्तेषा वशा वशङ्कर्त्तारो मनुष्यास्तेषु, प्र०—तुर्वश इति मनुष्यनाम, निघ० २ ३, ११०८.८. [तुर्वश मनुष्यनाम निघ० २ ३ तुर्वश अन्तिकनाम निघ० २ १६ तुरोपपदे वश कान्तौ (अदा०) धातोर्वा मूलविभुजादित्वात् क प्रत्यय]

तुर्वशायदू शीघ्र वशकरो यत्नवाश्च तौ मनुष्यौ, प्र०—तुर्वश इति मनुष्यनाम, निघ० २ ३. यदव इति च ४ ३० १७ [तुर्वश-यदुपदयो. समास । तुर्वश मनुष्यनाम निघ० २ ३ यदव मनुष्यनाम निघ० २.३]

तुर्वसि हिनस्ति ३३ ६७ [तुर्वी हिंसायाम् (भ्वा०) धातोर्लट् पुरुषव्यत्यय]

तुर्वीतये साधनैर्व्याप्ताय (जनाय) २ १३.१२ तुरणा शीघ्रकारिणा व्याप्तिरतस्यै (दाशुषे =दानकरण-शीलाय) १ ६१ ११ शत्रूणा हिंसकाय (राजजनाय) ४ १९ ६ **तुर्वीतिम्**=हिंसकम् (पापिजनम्), प्र०—अत्र बाहुलकात् कीति प्रत्यय. १ ११२ २३ तूर्वति हिनस्ति यस्तम् (दुष्ट जनम्) प्र०—अत्र हिंसाऽर्थात् तुर्वीधातो-र्बाहुलकादौणादिक कर्तृकारक ईति-प्रत्यय १.३६ १८ दुष्टान् प्राणिनो दोषांश्च हिंसन्तम् (वय्य - मानवन्त मनुष्यम्), प्र०—अत्र सशाया किन् 'बहुल छन्दसि' इति ईडागम १ ५४ ६ [तुर्वी हिंसायाम् (भ्वा०) धातोर्बाहुलका-दौणादिक ईति प्रत्यय । ततस्तुर्वी । अथवा तुरोपपदे वी गति प्रजनकान्त्यसनखादनेषु (अदा०) धातो क्तिन्]

तुलायै तोलनाय ३० १७ [तुल उन्माने (चुरा०) धातो. 'तुल्यार्थैरतुलोपमाभ्याम्०' इति निपातनाद् अट् णिलुक् च । ततस्तुर्ला]

तुविकूर्मि: तुविर्बहुविध कूर्मि. कर्मयोगो यस्य स (इन्द्र =परमैश्वर्ययुक्तो जन) ३.३० ३. **तुविकूर्मिम्**= बहुकर्माणम् (इन्द्र =हर्य पतिम्) ६ २२ ५ [तुवि-कूर्मि-पदयो समास । तुवि बहुनाम निघ० ३ १ कूर्मि =डुकृञ् करणे (तना०) धातोरौणादिको मि । ऋकारस्योत्वार-च्छान्दस.]

तुविकूर्मितम: अतिशयेन बहुकर्त्ता (इन्द्र =राजा) ६ ३७ ४ [तुविकूर्मिप्राति० अतिशायने तमप्-प्रत्यय.]

तुविक्षत्राम् तुविर्बहु क्षत्र धन यस्या ताम् (मही = भूमिम्) २१ ५ [तुवि-क्षत्रपदयो समास । तुवि बहुनाम निघ० ३ १ क्षत्रम् =धननाम निघ० २ १०]

तुविग्रये बृहन्निमित्तोपदेशकाय (इन्द्राय =सभा-सेनेशाय) २ २१ २ [तुवि इत्युपपदे गृ शब्दे (क्र्या०) धातोरौणादिक उ प्रत्यय । गुणाभावो बाहुलकात् । तुवि व्याख्यातम्]

तुविग्राभम् बहूना ग्रहीतारम् (इन्द्र =हर्य पतिम्) ६ २२ ५ [तुवि इत्युपपदे ग्रह उपादाने (क्र्या०) धातो-रण् कर्तरि । हस्य भश्छान्दस]

तुविग्रीव: बहुबलयुक्ता सुन्दरी वा ग्रीवा यस्य स (विद्वज्जन) ५ २ १२ **तुविग्रीवा:**=तुविर्बलिष्ठा ग्रीवा येषान्ते (स्वादिष्ठा पदार्था) १ १८७ ५ [तुवि-ग्रीवा-पदयो समास । तुविग्रीवाशब्दो व्याख्यातो]

तुविग्रेभि: बहुशब्दवद्भि (सत्वभि =प्राणिभि) १ १४० ६. ['तुवि' इत्युपपदे गृ शब्दे (क्र्या०) धातो-रौणादिको इट्-प्रत्ययो बाहुलकात्]

तुविजात बहुषु विद्वत्सु प्रसिद्ध (विद्वन् जन) ५ २ १० **तुविजात:**=बलादिगुणै प्रसिद्ध (विद्वान्

द्यव्यक्षस्य १ ६१ १३ सद्योऽनुष्ठातु (राज) ६ १८४. दुःखहिंसकस्य (राधस =धनस्य) ६ ४४ ५ **तुरः**=शीघ्रकारी (परमात्मा) ७ ४१ २ त्वरितोऽनलस सन् (विद्वान् मनुष्य) १.१२१ ३ त्वरमाण (ईश्वर) ३४ ३५. तुरतीति (ब्रह्मणस्पति =जगदीश्वर), प्र०—'तुर त्वरणे' इत्यस्मादिगुपधत्वात् क १ १८ २ हिंसक (इन्द्र =राजा) ६ ४४ ३ **तुराणाम्**=सद्य कारिणाम् (शूरवीराणाम्) ७ ४० १ शीघ्रकारिणाम् (विद्वज्जनानाम्) १ १७१ १ हिंसकानाम् (प्राणिनाम्) ५ ४१ ५. **तुराय**=दुःखहिंसकाय (मनुष्याय) ६ ४६ १२ क्षिप्र कारिणे (वीरपुरुषाय) ६ ३२ १ शीघ्रवाय ३३ ६४ क्षिप्रकारिणे (विदुषे जनाय) ६ ६६ ६ कार्यसिद्धये तूर्ण प्रवर्त्तमानाय, शत्रूणा हिंसकाय (इन्द्राय=सभाध्यक्षाय) १ ६१ १ सद्योगमनाय १ १२१ ७ त्वरमाणाय (अदितये=अन्तरिक्षाय) ४.३ ८ दुःखहिंसकाय ६ ४६ १२ [तुर त्वरणे (जु०) धातोरिगुपधलक्षण क । तुर इति यमनाम तरतेर्वा त्वरतेर्वा, त्वरया तूर्णगतिर्यम नि० १२ १४]

तुरयन् सद्यो गमयन् (राजा) ४ ३८ ७ **तुरयन्तम्**=हिंसन्तम् (शुष्मम्=बलम्) ३३ ६७ [तुर त्वरणे (जु०) धातोर्णिजन्ताच्छतृ]

तुरयन्ते सद्यो गमयन्ति २ ३४ ३ [तुर त्वरणे (जु०) धातोर्णिजन्ताल्लट्]

तुरयाः शीघ्रता प्राप्तम् (शुष्म =बलम्) ४ २३ १०
तुरश्चित् दुष्टो का भी (दण्डदाता ईश्वर), स० वि० १५६, ७ ४१ २

तुराषाट् तुरान् त्वरितान् शत्रून् सहते (इन्द्र = सभेशराजा) १० २२ यस्तुरा त्वरितान् शीघ्रकारिण सहते स (इन्द्र =राजा) ३ ४८ ४ यस्तुरान् हिंसकान् सहते (इन्द्र =राजा) ६ ३२ ५ [तुर =तुर त्वरणे (जु०) धातोरिगुपधलक्षण क । तुरोपपदे षह मर्षणे (भ्वा०) धातो 'छन्दसि सह' सूत्रेण ण्वि । 'सहे साड स' इति षत्वम् । 'अन्येषामपि दृश्यते' इति दीर्घत्वम्]

तुरास. त्वरिता आशुकारिण (उत्तमविद्वज्जना) ७ ६० ८ शीघ्रकारिण (मनुष्या) ७ ५१ १. शीघ्रकारिणस्त्वरिता (देवा =विद्वज्जना) ५ ४२ ५ सद्य कर्त्तार (विद्वासो जना.) ३ ५४ १३ [तुर त्वरणे (जु०) धातोरिगुपधलक्षण क । प्रथमाबहुवचने जसोऽसुगागम]

तुरीपम् तूर्ण रक्षकम् (धनम्) १ १४२ १० यस्तुर सद्य आप्नोति तम् (रायस्पोष=धनस्य पुष्टिम्) २७ २० तारक, शीघ्रकारी (विद्वदुपदेशम्), प्र०—अत्र तुर-धातोर्बाहुलकादौणादिक ईप् प्रत्यय ३ ४ ९. क्षिप्रम् ७ २ ६
तुरीपाय=नौकाना पालकाय (त्वष्ट्रे=विद्याप्रकाशकाय जनाय) २२ २० [तूर्णोपपदे पा रक्षणे (अदा०) धातो क प्रत्यय । तूर्णस्य तुर्भावश्छान्दस । तुर त्वरणे (जु०) धातोर्वा बाहुलकादौणादिक ईप्-प्रत्यय । अथवा तूर्णोपपदे आप्लृ व्याप्तौ (स्वा०) धातो क्वन् ताच्छीलिकश्छान्दस । तूर्णस्य तुर्भावो धातोराकारस्य ईकारादेशश्छान्दस । तुरीपम् तूर्णापि नि० ६ २१]

तुरीय ! चतुर्थवत् (गृहपते !), प्र०—अत्राऽर्शआदित्वादच् ८ ३ **तुरीयम्**=चतुर्थ निपातम् १ १६४ ४५ चतुर्णा स्थूल-सूक्ष्म-कारण-परमकारणाना सङ्ख्यापूरकम् (द्रविणोदा=विद्यादिधनप्रदमीश्वरम्) प्र०—'चतुरश्छयता-वाद्यक्षरलोपश्च' अ० ५ २ ५१ इति वार्तिकेनाऽस्य सिद्धि १ १५ १० **तुरीयः**=चतुर्थ (यज्ञ=सङ्गन्तव्य सत्कार्य) १७ ५७ तूर्णमाप्नोति स (त्वष्टा=विद्वान् जन) २१ २० चौथा (पति) स० प्र० १५३, १० ८५ ४० **तुरीयेण**=चतुर्थेन (ब्रह्मणा=धनेन) ५ ४० ६ [चतुर्-प्राति० पूरणार्थे 'चतुरश्छयतावाद्यक्षरलोपश्च' अ० ५ २ ५१ वा०सूत्रेण छ प्रत्यय, आद्यक्षरचकारस्य स्वरसहितस्य लोप । यद्वा चतुर्थ तत्तुरीयम् श० ४ १ ३ १४]

तुरेभिः शीघ्रगामिभिरश्वै ३ ४ ११ आशुकारिभि (देवै =विद्वद्भिर्दिव्यगुणैर्वा) ७ २ ११ [तुर त्वरणे (जु०) धातोरिगुपधलक्षण क । ततस्तृतीयाबहुवचने रूपम् । बहुल छन्दसी' ति भिस ऐसादेशो न भवति]

तुर्यवाट् यस्तुर्य चतुर्थ वर्ष वहति प्राप्नोति स वृषभादि, यस्य त्रीणि वर्षाणि पूर्णानि जातानि चतुर्थ प्रविष्ट स इत्यर्थ १८ २६ तुर्यान् चतुरो वेदान् वहति येन स (पुरुष) १४ १० **तुर्यवाहम्**=यस्तुर्य चतुर्गुण भार वहति तम् (गाम्=वृषभम्) २८ २८ **तुर्यवाहः**=ये तुर्य चतुर्थ वहन्ति ते (पशुपालका जना) २४ १२ [तुर्योपपदे वह प्रापणे (भ्वा०) धातो 'वहश्च' अ० ३ २ ६४ सूत्रेण ण्वि प्रत्यय । तुर्य =चतुर्प्राति०पूरणार्थे 'चतुरश्छयतौ०' अ० ५ २ ५१ वा० सूत्रेण यत्, आद्यक्षरलोपश्च]

तुर्यः हिंन्धि ३३ ६६ **तुर्याम**=हिंस्याम ५ ६ ६ हिंसेम ६ ४ ५ [तूरी गतित्वरणहिंसनयो (दिवा०) धातोर्लोट् । अन्यत्र लिङ् । धातोरुपधाया ह्रस्वत्व छान्दसम्]

तुर्यौहि पूर्वोक्तसदृशी गौ १८ २६
तुर्वणिः यस्तुर शीघ्रकारिण शुभगुणानमात्यान्

न्स्नागार), प्र०—तुविग्रिनि बहुनाम, निघ० ३ १, १ १३० ७ [तुविरिति बहुनाम, ततोऽतिशायने तमप्प्रत्यय]

तुविष्टमा अतिशयेन बलिष्ठौ (अश्विनौ=वायु-विद्युतौ) ५ ८३ २ [तुविरिति बहुनाम निघ० ३ १. ततोऽतिशायने तमप् । 'सुपा सुलुगिति' सुपेराकारादेश]

तुविष्म. बहुबलयुक्त (इन्द्र =सूर्यवद्राजा) ७ २० ४

तुविष्मान् बहुबलाकर्षणयुक्त (इन्द्र =सूर्यलोक) २ १२ १२. शरीरात्मबलयुक्त (अध्यापको जन) १ १६० ८ बलवान (विद्वज्जन) प्र०—तुविरिति बलनाम, निघ० ३ १, १ १६५ ६ तुविषो बहवो बलवन्तो वीरा विद्यन्ते यस्य स (सत्यवाग्जन) १ १६० ३ प्रशसित-बल (राजा) ४ २६ ३ वृद्धिमान् (सभाध्यक्ष) प्र०—अत्र तुधातोर्बाहुल-कादौणादिक इसि-प्रत्यय. स च कित् १ ५५ १ बहुबल (विविद्वान्=श्रेष्ठो विद्वान्) ४ ५ ३ [तुविष्प्राति० मतुप् । तुविष्=तु गतिवृद्धिहिंसासु (अदा०) धातोरौणादिक इसि प्रत्यय]

तुविष्वणसम् बहूना सेवकम् (राजानम्) ५ ८ ३

तुविष्वणस=ये तुर्वीपि बलानि वनते याचन्ते ते (प्रजाजना) ४ ६ १० [तुविष्-वनस्पदयो समास । तुविष् इति पूर्वपदे व्याख्यानम् । वनम्=वन सम्भक्तौ (भ्वा०)+असुन्]

तुविष्वण तुविर्बहुविध स्वनो येषान्ते (मरुत = मनुष्या), प्र०—अत्र व्यत्ययेनैकवचनम् १.१६६ १ [तुविष्-स्वनपदयो समास । तुविष् व्याख्यानम् । स्वन = स्वनशब्दे (भ्वा०) धातो 'स्वनहसोर्वा' इत्यप्प्रत्यय]

तुविष्वणि बलसेवने ५ १६ ३ बहुस्वनम् (गर्व = यजम्) ६ ४८ १५ [तुविष्-उपपदे वन सम्भक्तौ (भ्वा०) धातोरौणादिक इन्]

तुविष्वणि परमाणुसमिकीभूताना विभक्ता सूर्य २ १३ ६ बलसेवी (अग्नि =पावक) ५ ५६ ८ यस्तुविषो बहून् पदार्थान् वनति सम्भजति स (जीव) १ ५६ ४ [तुविष्-वनिपदयो समास । तुविरिति बहुनाम निघ० ३.१ वनि = वन सम्भक्तौ (भ्वा०) धातोरौणादिक इन्-प्रत्यय]

तुविस्वनि. तुविर्बहुधा स्वनिरुपदेशो यस्य स विद्वान् १ १२७ ६ [तुविस्-स्वनिपदयो समास । तुविस्=तु गतिवृद्धिहिंसासु (अदा०) धातोरौणादिक इसि स्वनि = स्वनशब्दे (भ्वा०) धातोरौणा० इन्प्रत्यय]

तुव्योजसम् बहुपराक्रमम् ८.२२ ८ [तुवि-ओजस्-पदयो समास । तुवीति व्याख्यातम् । ओजस् बलनाम निघ० २ ९]

तुष्टुवाना: प्रशसन्त (विद्वासो जना) ७ ५१ ३ तुष्टुवास =पदार्थगुणान् स्तुवन्त (मनुष्या) १ ८६ ८ स्तुति और आज्ञा का अनुष्ठान सदा करते हुए (हम लोग), आर्याभि० २ २७, २५ २१ स्तोतार (विद्यार्थिजना) २ २८ २ स्तुवन्त (देवा =विद्वासो जना) २५ २१ [ष्टुञ् स्तुतौ (अदा०) धातोर्लिट स्थाने कानच्]

तूणवधमम् यस्तूणव धमति तम् (जनम्) ३० १९

तूताव वर्धयति, प्र०—अत्राऽन्तर्गतो ण्यर्थ 'तुजादीना दीर्घोऽभ्यासस्य' इति दीर्घ १ ९४ २ [तु गतिवृद्धिहिंसासु (अदा०) धातो सामान्ये लिट् । 'तुजादीनामि' त्यभ्यासस्य दीर्घ । तूताव पदनाम निघ० ४ १]

तूतुजान: क्षिप्रकारी (सूरि =विद्वज्जन) ६ २९ ५ त्वरमाण (इन्द्र.=वायु), प्र०—तूतुजान इति क्षिप्रनामसु पठितम्, निघ० २ १५, १ ३ ६ सद्य कर्त्ता (सूरि = विद्वान् जन) ६ ३७ ५ [तूतुजान क्षिप्रनाम निघ० २ १५ तुज हिंसायाम् (भ्वा०) धातोर्लिटि कानचि 'तुजादीनाम्' इत्याभ्यासस्य दीर्घ । तूतुजान त्वरमाण नि० ६ २०.]

तूतुजिम् बलवन्तम् (इभ=हस्तिनम्) ६ २० ८

तूतुजि:=बलवान् (इन्द्र =राजा) ७ २८ ३ शीघ्रकारी (इन्द्र =राजा) ४ ३२ २ [तुज हिंसायाम् (भ्वा०) धातो 'किकिनावुत्सर्गश्छन्दसि०' अ० ३ २ १७१ वा०सूत्रेण कि प्रत्ययो लिड्वच्च । 'तुजादीनाम्०' इत्यभ्यासस्य दीर्घ । तूतुजि क्षिप्रनाम निघ० २.१५]

तूतोत् वर्द्धयेत् २ २० ५ **तूतो:**=वर्धय ६ २६ ४ [तु गतिवृद्धिहिंसासु (अदा०) धातोर्लङ् । 'बहुल छन्दसि' इति शप श्लु]

तूपर: हिंसक (पशु) २४ १ **तूपरा:**=हिंसका (प्राणिन) २४.१५ **तूपरौ**=अविद्यमानशृङ्गौ (पशू) २९ ५९ [तूपरो भवति, प्राजापत्यो ह्येष देवतया तै० स० २ १ ६ ५ यत्तूपरस्तद्रश्वानाम् (रूपम्) जै० २ ३७१]

तूयम् तूर्णम् प्र०—तूयमिति क्षिप्रनाम, निघ० २ १५, ७ ५८ ४ क्षिप्रम् ६ ५ ६ शीघ्रम् ३ ५३ १६ तूर्णं सुखकरम् (पुरोडाशम्) ३ ५२ ८ वर्द्धकम् (यज्ञ=शिल्प-विद्याप्रकाशमयम्) २६ ३३ [तूयम् क्षिप्रनाम निघ० २ १५ उदकनाम निघ० १ १२]

तूर्णय: सर्वत्र विद्या प्रकाशयितु त्वरमाणा (विश्वे-देवा =समस्ता विद्वासो जना), प्र०—'ञित्वरा सम्भ्रमे,

राजजन) २ २७ १. तुवेर्विद्यावृद्धात् प्रसिद्धविद्य (अव्यापक) १.१६० ८. **तुविजाता:**=तुविना वलेन सह प्रसिद्धा (मरुत =वायव) १ १६८ ४ **तुविजातौ**=बहुभ्य कारणेभ्यो बहुपु वोत्पन्नौ प्रसिद्धौ (मित्रावरुणौ=सूर्यवायू), प्र०—तुवीति वहुनामसु पठितम्, निघ० ३ १, १ २ ६ [तुवि-जातपदयो समास । तुविजात बहुजात नि० १२ ३६]

तुविद्युम्न बहुविध द्युम्न विद्याद्यनन्त धन यस्य तत्सम्बुद्धौ (इन्द्र=अन्तर्यामिन्नीश्वर), प्र०—द्युम्नमिति धननामसु पठितम्, निघ० २ १० तुवीति वहुनामसु च, निघ० ३ १, १ ६ ६ तुविर्बहुविध द्युम्न धन यशो वा यस्य (सज्जन) ३ १६ ३ वहुप्रशस (इन्द्र=राजन्) ६ १८ ११ वहुधनकीर्त्तियुक्त (अग्ने=विद्वज्जन) ३ १६ ६ **तुविद्युम्नस्य**=बहुयशस (राज्ञ) ४ २१ २ वहुप्रशसाधनस्य (सज्जनस्य) ६ १८ १२ **तुविद्युम्ना:**=बहुधनयशोऽन्विता. रुद्रास =मध्यमा विद्वास) ५ ८७ ७ [तुवि-द्युम्नपदयो समास । तुवीति वहुनाम निघ० ३ १ द्युम्नम् धननाम निघ० २ १०]

तुविद्युम्नास: तुवीनि बहूनि द्युम्नानि विद्याप्रकाशनानि येषान्ते (मरुत =विद्वासो जना) १ ८८ ३ [तुविद्युम्नपदयो समासे जसोऽसुक्]

तुविनृम्ण वहुधनयुक्त (राजन्) ६ ३१ ५ बहुधन (इन्द्र=राजन्) ४ २२ ६ **तुविनृम्णम्**=बहुविध धनम् १ ४३ ७ **तुविनृम्ण.**=तुवीनि बहूनि धनानि यस्य स (प्रजापति =राजा) प्र०—तुवीति बहुनामसु पठितम्, निघ० ३ १, ७ १७ [तुवि-नृम्णपदयो समास । नृम्णम्=धननाम निघ० २ १० वलनाम निघ० २ ६]

तुविप्रतिम् तुवीना बहूना पदार्थाना प्रतिमातरम् (नर=परमेश्वर सभासेनाध्यक्ष वा) प्र०—अत्रैकदेशेन प्रतिशब्देन प्रतिमातृशब्दार्थो गृह्यते १ ३० ६ [तुवीति बहुनाम निघ० ३ १ तुवि-प्रतिपदयो समास]

तुविबाधम् यो बहून् शत्रून् वाधते तम् (इन्द्र=सूर्यलोकम्) १ ३२ ६ [तुवीत्युपपदे बाधृ विलोडने (भ्वा०) धातो क्विप्]

तुविब्रह्माणम् बहवो ब्रह्माणश्चतुर्वेदविदो विद्वासो यस्य तम् (पुत्र=सन्तानम्) ५ ४५ ५ [तुवि-ब्रह्मन्पदयो समास]

तुविमघस्य बहुधनस्य (जनस्य) ५ ३३ ६ **तुविमघा**=बहुविध मघ पूज्य विद्याधन यस्य तत्सम्बुद्धौ (इन्द्र=सभाध्यक्ष) प्र०—मघमिति धननामसु पठितम्, निघ० २ १० 'मघमिति धननामधेय महतेर्दानकर्मण, नि० १ ७ 'अन्येपामपि०' इति दीर्घ. १ २६ २ **तुविमघास:**=बहुधना (नर=नायका जना) ५ ५८.८ बहुधनयुक्ता (कवय =विद्वासो जना) ५ ५७ ८ [तुविमघपदयो समास । तुवीति बहुनाम निघ० ३ १ मघम् धननाम निघ० २ १० 'तुविमघास' प्रयोगे जसोऽसुक्]

तुविमन्यव: बहुक्रोधा (भयङ्करा जना) ७ ५८ २ [तुवि-मन्युपदयो समास । मन्यु क्रोधनाम निघ० २ १३]

तुविम्रक्ष: बहुस्नेह (राजकर्मचारि जन) ६ १८ २ [तुवि-मृक्षपदयो समास]

तुविम्रक्षास: बहुभि सह सङ्गता (नवग्वा =नवीनगतय) ६ ६ ३ [तुवि-म्रक्षपदयो समासे जसोऽसुक्]

तुविराधसम् बहुधनधान्यम् (सर्वसेनाधिकारिपतिम्) ७ २३ ५ **तुविराधस:**=बह्वैश्वर्यस्य (राज्ञ) ४ २१ २ बहुधनवत (नृन्) ५ ५८ २ [तुवि-राधस्पदयो समास । तुवि बहुनाम निघ० ३ १ राध धननाम निघ० २ १०

तुविवाज: तुवि बहुविधो वाजो विद्या-बोधो यासा ता (प्रजा) १ ३० १३ **तुविवाजेभि:**=बहुवेगैर्बहुसङ्ग्रामैर्वा ६ १८ ११ [तुवि-वाजपदयो समास । तुवीति बहुनाम निघ० ३ १ वाज अन्ननाम निघ० २ ७. बलनाम निघं० २ ६. वाजे सग्रामनाम निघ० २ १७]

तुविशग्म तुवि बहुविधानि शग्मानि सुखानि यस्य तत्सम्बुद्धौ (इन्द्र=महैश्वर्ययुक्त प्रजाजन) ६ ४४ २ [तुविशग्मपदयो समास । तुवीति व्याख्यातम् । शग्मम् सुखनाम निघ० ३ ६]

तुविशुष्म. तुवि बहु शुष्म बलं यस्य स (सूर्य) २ २२ १ [तुवि-शुष्मपदयो समास । शुष्मम् बलनाम निघ० २ ६]

तुविशुष्मा बहुबलसेनायुक्तो (सभासेनेशौ) ६ ६८ २ [तुविशुष्म इति व्याख्यातम् । तत 'सुपा सुलुगि०' त्याकारादेश]

तुविश्रवस्तमम् अतिशयेन बह्वन्न-श्रवणयुक्तम् (पुत्रम्) ५ २५ ५ **तुविश्रवस्तम:**=अतिशयेन बहुश्रुत (महाविद्वान्) ३ ११ ६ [तुवि-श्रवस्पदयो समासे अतिशायने तमप् । तुवीति व्याख्यातम् । श्रवस् अन्ननाम निघ० २ ७ धननाम निघं० २ १०]

तुविष्टम: अतिशयेन बली (इन्द्र =सूर्य) १ १८६ ६ **तुविष्टमाय**=अतिशयेन तुविर्बहुस्तस्मै (इन्द्राय=

जनानाम्) ७ ३३ ६ [उतृदिर् हिंसानादरयो (रुधा०) धातोरिच्छायामर्थे सनि 'सनाशसभिक्ष उ' अ० ३ २ १६८ सूत्रेण उ प्रत्यय । 'छन्दसि वे' ति द्विर्वचन न भवति]

तृन्धि हिन्धि ५ १२ २ [उतृदिर् हिंसानादरयो (रुधा०) धातोर्लोट्]

तृपत् तृप्यति ७ ५६ १०. तृप्यतु ३ ३२ २ [तृप तृप्तौ (तुदा०) धातोर्लेट्]

तृपत् तृप्त सन् (इन्द्र =विद्वज्जन) २ ११ १५. तृप्यत् (सुत =पुत्र) २ ३६ ५ तृप्यन् (सूर्य), प्र०—अत्र विकरणव्यत्ययेन श २ २२ १ [तृप प्रीणने (दिवा०) धातो शतृप्रत्यय । विकरणव्यत्ययेन श प्रत्यय । तृप् तृप्तौ (तु०) धातोर्वा शतृ । तृप प्रीणने (दिवा०) धातोर्वा 'सञ्चत्तृपद्वेहत्' उ० २ ८५ सूत्रेणाति प्रत्यय]

तृप्णवः ये तृप्यन्ति ते (सोमलतादय) ३ ४२ २ [तृप प्रीणने (दिवा०) धातोर्वाहुलकादौणादिको णु प्रत्यय]

तृप्णुत सुखयत १ ११० १ **तृप्णुहि**=तृप्तो भव २ १६ ६ [तृप तृप्तौ (तु०) धातोर्लोट् । विकरणव्यत्ययेन श्नु]

तृप्ताः प्रीता (विप्रा =विद्वासो जना) २१ ११. प्रीणिता (विप्रा =मेधाविनो जना) ७ ३८ ८ [तृप प्रीणने (दिवा०) धातो क्त प्रत्यय]

तृप्तांशवः तृप्ता अशवो येभ्यस्ते (सोमास = सोमाद्योपधिरसा) १ १६८ ३ [तृप्त-अशुपदयो समास]

तृप्तिः पूर्ण तृप्ति, स० वि० १६७, ६ ११३ १० [तृप प्रीणने (दिवा०) धातो स्त्रिया क्तिन् । तृप्ति उदकनाम निघ० १ १२]

तृप्यतु प्रीणातु ८ ३७ **तृप्यन्तु**=प्रीणन्तु ७ १५ [तृप प्रीणने (दिवा०) धातोर्लोट्]

तृम्पताम् सुखयतम् ३ १२ ३ **तृम्पतु**=प्रीणयति प्र०—अत्र लडर्थे लोडन्तर्गतो ण्यर्थश्च १ २३ ७ **तृम्पन्तु**= प्रीणन्तु ७ १५ [तृम्प तृप्तौ (तुदा०) धातोर्लोट् । अन्तर्गतो ण्यर्थश्च]

तृळ्हा हिंसितानि (रक्षासि=दुष्टान्जनान्) ६ १६ ४८ **तृळ्हाः**=हिंसिता (अमित्रा =शत्रुजना) १ १३३ १ [तृहू हिंसार्थे (तुदा०) धातो क्त । अन्यत्र शेर्लोप । ऊदित्त्वादिड्विकल्प]

तृषन् तृषिता भवन्तु, प्र०—अत्र लोडर्थे लुड् ६ ३१ [जितृष पिपासायाम् (दिवा०) धातोर्लुड् । पुष्पादित्वादड्-प्रत्यय । अडभावश्छान्दस]

तृषाणः तृषातुर इव (राजा) ५ ३६ १ **तृषाणान्**= पिपासितान् (राजसेवकान्) ४ १८ ७ [त्रितृष पिपासायाम् (दिवा०) धातोर्लिट कानच् । द्वित्व छान्दसत्वान्न भवति]

तृषितः यस्तृष्यति पिपासति स (गौर =गौरगुण-विशिष्टो मृग) १ १६ ५ [त्रितृष पिपासायाम् (दिवा०) धातो क्त प्रत्यय]

तृपु क्षिप्रम्, प्र०—तृप्विति क्षिप्रनाम, निघ० २.१५, ४ ७ ११ शीघ्रम् १ ५८ २ **तृपुणा**=क्षिप्रेण ४ ७ ११ **तृपुम्**=क्षिप्रकारिणम् (अग्नि=शिल्पिविद्वासम्) ४ ७ ११ [तृपु क्षिप्रनाम निघ० २ १५ तत्स्नोर्वा तत्स्नेर्वा नि० ६ १२]

तृपुच्यवसः तृपु क्षिप्र ये च्यवन्ते गच्छन्ति (मरुत = शूरवीरा जना) ६ ६६.१० [तृपु-च्यवस्पदयो समास तृपु क्षिप्रनाम निघ० २ १५ च्यवस्=च्युड् गतौ (भ्वा०) धातोरसुन्प्रत्यय]

तृपुच्युतम् क्षिप्र पतितम् (शिशुम्), प्र०—तृप्विति क्षिप्रनाम, निघ० २ १५, १ १४० ३ [तृपु-च्युतपदयो समास]

तृष्टम् पिपासितम् (विद्यारा रूक्ष्णजनम्) ३ ६ ३ [त्रितृष पिपासायाम् (दिवा०) धातो क्त । इड्-अभावश्छान्दस]

तृष्णजम् तृष्णा जायते यस्मात् तम् (मृगम्=पशु-विशेष परमेश्वरम्) प्र०—अत्र जनधातोर्ड 'ड्यापो सज्ञा-छन्दसोर्बहुलम्' इति ह्रस्वत्वम् १ १०५ ७ [तृष्णा उपपदे जनी प्रादुर्भावे (दिवा०) धातो 'पञ्चम्यामजातौ' अ० ३ २ ६८ सूत्रेण उ प्रत्यय । पूर्वपदस्य च 'ड्यापो सज्ञा-छन्दसोर्बहुलम्' अ० ६ ३ ६३. सूत्रेण ह्रस्वत्वम् । तृष्णा=ञितृष पिपासायाम् (दिवा०) धातो 'तृषि-शुषिरसिभ्य कित्' उ० ३ १२ सूत्रेण न प्रत्यय, स च कित । स्त्रिया टाप् । रषाभ्यामिति णत्वम्]

तृष्णजः प्राप्ततृष्णा (सूर्यवज्जना) ७ ३३.५ **तृष्णजे**=तृषितु शीलाय (गोतमाय=भृश मार्ग गन्त्रे जनाय) १ ८५ ११ यस्तृष्णाति तस्मै (जिज्ञासवे जनाय) ५ ५७ १ [ञितृष पिपासायाम् (दिवा०) धातोस्तच्छीलादि-ष्वर्थेषु 'स्वपितृषोर्नजिड्' अ० ३ २ १७२ सूत्रेण नजिड्-प्रत्यय । तृष्णाजे, तृष्णक् तृष्यते नि० ११ १५]

तृष्णया तृष्यते यया पिपासया लोभगत्या वा तया १ ३८ ६ [ञितृष पिपासायाम् (दिवा०) धातो 'तृषिशुषि-

इत्यस्माद् 'वहिश्रिश्रुयुद्रुग्लाहात्वरिभ्यो नित्' उ० ४ ५३ अत्र नेरनुवर्त्तनात् तूर्णिरिति सिद्धम् १ ३ ८ **तूर्णिम्**=सद्योगमकम् (अग्नि=वह्निम) ३ ३ ५ शीघ्रकारिणम् (इन्द्र=राजानम्) ३ ५१ २ **तूर्णि.**=सद्योगामी (रथ=यानम्) ३ ११ ५ [जित्वरा सम्भ्रमे (भ्वा०) धातो 'वहिश्रिश्रुयु०' उ० ४.५१ सूत्रेण नि. प्रत्यया निच्च। 'ज्वरत्वर०' अ० ६ ४ २० सूत्रेण वकारस्योपधायाश्च स्थाने ऊठ्। तूर्णि क्षिप्रनाम निघ० २ १५ तूर्णि कर्म नि० ७ २७ सर्व ह्येष पाप्मान तरति तस्मादाह तूर्णिर्हव्यवाडिति श० १ ४ २ १२ वायुर्वै तूर्णिर्वायुर्हीदं सर्व सद्यस्तरति यदिद किञ्च ऐ० २ ३४ तूर्णिर्हव्यवाडित्याह, सर्व ह्येष (अग्नि) तरति तै० स० २ ५ ६ ३]

तूर्णितमः अतिशयेन त्वरिता (अग्नि=सेनापति) १३ ११ अतिशीघ्रकारी (अग्नि=विद्वान्राजा) ४ ४ ३ [तूर्णिरिति पूर्वपदे व्याख्यातम्। ततोऽतिशायने तमप्]

तूर्ण्यर्थः तूर्णि सद्योऽर्थो यस्य स (राजपुरुष) ३ ५२ ५ **तूर्ण्यर्थाः**=तूर्णय सद्यो गामिनोऽर्था यासु ता (धेनव=वाच) ५ ४३ १ [तूर्णि-अर्थपदयो समास। तूर्णिरिति व्याख्यातम्]

तूर्य हिन्धि ३३ ६६ [तूरी गतित्वरणहिंसनयो (दिवा०) धातोर्लोट्]

तूर्वतम् हिंस्यातम् ६ ५० १० [तुर्वी हिंसार्थे (भ्वा०) धातोर्लोट्। 'उपधायाञ्च' इति दीर्घ]

तूर्वन् हिंसन् (जन) ६ १५ ५ **तूर्वन्त.**=हिंसन्त (आयव=मनुष्या) ६ १४ ३ [तुर्वी हिंसार्थे (भ्वा०) धातो शतृप्रत्यय। 'उपधायाञ्च' इति दीर्घ]

तूर्वयाणम् तूर्व शीघ्रगामि यान यस्यास्ताम् (क्षा=पृथिवीम्) ६ १८ १३ तूर्वाणि शीघ्रगमनानि यानानि यस्मात्तम् (अग्निम्) १ १७४ ३. तूर्वा शत्रुबलहिंसका योद्धारो यानेषु यस्य तम् (कुत्स=वज्रमिव वीरपुरुषम्) १ ५३ १० [तूर्व-यानपदयो समास]

तूर्वसि हिनस्ति ३३ ६७ [तुर्वी हिंसायाम् (भ्वा०) धातोर्लट्। 'उपधायाञ्च' इति दीर्घ]

तूर्षु शीघ्रकारिषु १ ११२ ४ [जित्वरा सम्भ्रमे (भ्वा०) धातो क्विप्। 'ज्वरत्वर०' अ० ६ ४ २० सूत्रेण वकारस्योपधायाश्च ऊठ्]

तूष्णीम् मौनमालम्ब्य २ ४३ ३ मौन मे ही, आर्याभि० १ ५३, २ ४३ ३ [स्वरादिपाठाद् अव्ययत्वम्। यदा वै तूष्णीमास्ते प्राणमेव वागप्येति जै० २ ५०]

तृक्षौ विद्याशुभगुणप्राप्ते (जने=मनुष्ये) ६ ४६ ८. [तृक्ष गतौ (भ्वा०) धातोर्गेणादिकोऽन्प्रत्यय]

तृणम् घासविशेषम्, भा०—भक्ष्य, भोज्य पेय च श्रेष्ठमौषधम् २५ ३१ हिंसितव्य घासम् १ १६१ ११. [तृह हिंसायाम् (भ्वा०) धातो 'तृहे क्नो हलोपश्च' उ० ५ ८ सूत्रेण क्न-प्रत्ययो हकारस्य च लोप]

तृणस्कन्दस्य यस्तृणानि स्कन्दति गच्छति गमयति वा तस्य (राज्ञ) १ १७२ ३ [तृण व्याख्यातम्। तदुपपदे स्कन्दिर् गतिशोषणयो (भ्वा०) धातोरण्-प्रत्यय]

तृणा तृणानि घासविशेषान् ३ २६ ६ [तृणमिति व्याख्यातम्। तस्य द्वितीयाबहुवचने 'शेर्लोपश्छन्दसि' इति शेर्लोप]

तृतीयम् त्रित्वसङ्ख्याक विद्याजन्म १ १५५ ५ त्रयाणा पूरकम् (सवन=सुखैश्वर्यम्) ४ ३४ ४ अष्टाचत्वारिंशद्वर्षपरिमितसेवित ब्रह्मचर्यम् ४ ३५ ६ तीसरे (नाक=दुखरहित वानप्रस्थाश्रम को) स० वि० १८६, अथर्व० ६ ५ १ तीसरे (नियुक्त पति को) स० प्र० १५३, १० ८५ ४० **तृतीयः**=त्रयाणा सङ्ख्यापूरक प्राणादिस्वरूप (जनिता=पर्जन्य) १७ ३२ **तृतीये**=त्रयाणा पूरके (रजसि=लोके) १२ २० जीवप्रकृतिभ्या विलक्षणे, भा०—शुद्धस्वरूपे (धामन्=ईश्वरे) ३२ १० नासारिक सुख-दुःख से रहित नित्यानन्द-युक्त (धामन्=ईश्वर) मे स० वि० ७, ३२ १० एक स्थूल जगत् पृथिव्यादि, दूसरे—सूक्ष्म आदिकारण प्रकृति से भिन्न तीसरे सर्वदोष रहित अनन्ताऽऽनन्दस्वरूप परब्रह्म धाम मे आर्याभि० २.६, ३२ १० **तृतीयैः**=वसुरुद्राभ्या विलक्षणैर्द्वादशमासैः २० १२ **तृतीयस्याम्**=तृतीयकक्षाया वर्त्तमानायाम् (पृथिव्याम्) ५ ६ **तृतीया**=त्रयाणा पूरणा क्रिया २५ ४ [त्रि-सङ्ख्यावाचिन प्राति०पूरणार्थे 'त्रे सम्प्रसारणञ्च' अ० ५ २ ५५ सूत्रेण तीय प्रत्यय त्रेश्च सम्प्रसारणम्। तृतीयप्राति० सप्तम्या 'विभाषा द्वितीयातृतीयाभ्याम्' अ० ७ ३ ११५ सूत्रेण स्याडागम। बहुदेवत्य तृतीयमह कौ० २० ४ जागतमेतदहर्यत्तृतीयम् ता० १२ ७ ३ उद्वन्मिव वै तृतीयमह। ता० १२ ४ ४ अन्तरिक्षदेवत्यमेतदहर्यत्तृतीयम्। ता० १२ १ ८ २]

तृत्सव. शत्रूणा हिंसका (वीरा राजपुरुषा) ७.१८ १५ हिंस्रा (राजादयो जना) ७ १८ १६ **तृत्सवे**=हिंसकाय (शत्रवे) ७ १८ १३ **तृत्सुभ्य.**=हिंसकेभ्य. (शत्रुभ्य) ७ १८ ७ **तृत्सूनाम्**=अनाद्यानानाम् (अच्येतृ-

अपत्यम्) ६ १३ ६ पुत्रादिकम् (भा०—अपत्यम्) १८ ७७ **तोकस्य**=सन्तानस्य १ ८ ६ ह्रस्वस्याऽपत्यस्य २ ३० ५ **तोकाय**=सद्यो जातायाऽपत्याय बालकाय प्रजायै वा १ ४३ २ ह्रस्वाय बालकाय १ ११४ ६ सद्योजाताय पञ्च-वार्षिकाय (अपत्याय) ४ १२ ५ अल्पवयसे (सन्तानाय) ६ ५० ७ अल्पाय (तनयाय=कुमाराय) ५ ६६ ३ अति-बालकाय १ १८९ २ **तोके**=ह्रस्वे तनये, प० वि० अल्पे (व्यवहारे) २ २ ११ [तुज हिंसाबलादाननिकेतनेषु (चुरा०) धातो सञ्ज्ञाया घ प्रत्यय । तोक तुद्यते. नि० १० ७ तोक पुत्राश्च नि० १२ ७ तोकम् अपत्यनाम निघ० २ २. प्रजा वै तोकम् श० ७ ५ २ ३९]

तोकवत् प्रशसितानि तोकान्यपत्यानि यस्मिंस्तत् (सुवीर्य=शोभन बल यस्मात्तत्) ३ १३ ७ [तोक व्याख्या-तम् । तत प्रशसाया मतुप्]

तोकसाता तोकानामपत्यानां विभाजने ६ १८ ६ [तोक-सातिपदयो समास । 'सुपा सुलुग्' इति सप्तम्या स्थाने आकारादेश । तोक व्याख्यातम्। साति=षण सम्भक्तौ (भ्वा०) धातो क्तिन्प्रत्यय । 'जनसनखनाम्०' अ० ६ ४ ४२ सूत्रेणाकारादेश]

तोक्मभि: अपत्यै २१ ३१ [तोक्म अपत्यनाम निघ० २ २]

तोक्मानि अपत्यानि, भा०—यज्ञाऽर्हाण्यपत्यानि, प्र०—तोक्मेत्यपत्यनाम, निघ० २ २, १९ १३ **तोक्मभि**=बालकै १९ ८१ [तोक्म अपत्यनाम निघ० २ २]

तोत: तुवन्ति जानन्ति प्राप्नुवन्ति हिंसन्ति वा येन स (वाग्विद्युद्वा), प्र०—अत्र 'तु गतिवृद्धि-हिंसासु, इति धातो-र्बाहुलकादौणादिकस्तन्-प्रत्यय ४ २२

तोदस्य प्रेरणस्य ६ ६ ६ व्यथाया ६ १२ १ **तोद:**=शत्रूणा हन्ता (इन्द्र=राजा) ४ १६ ११ व्यथनम् ६ १२ ३ [तुद व्यथने (तुदा०) धातोर्घञ्प्रत्यय । कर्त्तरि वाच्प्रत्यय । तोद तुद्यते नि० ५ ७]

तोदस्येव व्यथकस्येव (शत्रुजनस्येव) १ १५० १ [तोदस्य इव पदयो समास]

तोशतमा: अतिशयेन प्रीता सन्त (देवा=विद्वासो जना) १ १६९ ५ [तोशप्राति० अतिशायने तमप्प्रत्यय । तोश=तुष प्रीतौ (दिवा०) धातोर् अच्-प्रत्यय । वर्ण-व्यत्ययेन षस्य शकार]

तोशमाना. सन्तुष्टिकरौ (शुनासीरा=वायुसूर्यौ), प्र०—अत्र वर्णव्यत्ययेन श., विकरणाऽऽत्मनेपदव्यत्ययौ च १२ ६९ [तुष प्रीतौ (दिवा०) धातो शानच् । 'सुपा सुलुग्०' इत्याकारादेश । वर्णव्यत्ययेन षस्य शकार । व्यत्ययेन शप् आत्मनेपदञ्च]

तोशा वर्धको विनाशको (इन्द्राग्नी=सभासेनेशौ) ३ १२ ४ [तुष प्रीतौ (दिवा०) धातो कर्त्तरि अच्-प्रत्यय. । 'सुपा सुलुग्०' इत्याकारादेश । वर्णव्यत्ययेन षस्य शकार]

तौग्र्यम् बलवत्तृषु भवम् (प्रसिद्ध जनम्) १ १८२ ६ बलवतो हिंसकस्य राज्ञ पुत्र राजन्यम् १ ११८ ६ **तौग्र्य:**=तुग्रा बलिनस्तेषु भव (जिघ्रि=जीर्णावृद्धो विद्वज्जन) १ ११८ ५ तुग्रेण बलेन निर्वृत्त सेनावृन्द १ ११७ १५ **तौग्र्याय**=तुग्रेषु बलिष्ठेषु भवाय (दृढ-प्लवाय) १ १८२ ५ बलेषु साधवे (कर्मणे) १.१५८ ३ [तुग्र=तुज हिंसायाम् (भ्वा०) धातोरौणादिको बाहुलकाद् रक्प्रत्यय । बाहुलकात् कुत्वम् । तुग्रप्राति० भवार्थे साध्वर्थे निर्वृत्तार्थे वा ण्य. प्रत्ययश्छान्दस । अथवा यत् प्रत्ययान्तात् स्वार्थे प्रज्ञादित्वाद् अण्]

त्मनम् आत्मानम्, प्र०—अत्र 'वा छन्दसि सर्वे विधयो भवन्ति' इत्याकारलोप उपधादीर्घत्वनिषेधश्च । सम्भवत—सायणाचार्यैरेतद् पदमुपधादीर्घत्वनिषेधकर वचनमविज्ञाया-ऽशुद्ध व्याख्यातम् १ ६३.८ आत्मनि ४४.६ **त्मना**=आत्मना, अ०—तीव्राऽऽत्मना, प्र०— अत्र छान्दसो वर्णलोप इत्याकारलोप १५ ३७ आत्मना जीवेन १ ६९ ५ आत्मना-ऽन्त करणेन २ २५ २ आत्मना मनसा प्राणेन वा १ ४१ ६ भा०—सुप्रकाशिताऽऽत्मना २७ २१ **त्मने**=आत्मने (तन-याय=पुत्राय) १ ११४ ६ स्वात्मने १ १८४ ५ आत्मनि १ १८३ ३ [अत सातत्यगमने (भ्वा०) धातो 'सातिभ्या मनिन्मनिणौ' उ० ४ १५३ सूत्रेण मनिण्प्रत्यय । आत्मन्प्राति० टाप्-प्रत्यये 'मन्त्रेष्वाड्यादेरात्मन' अ० ६ ४ १४१ सूत्रेणाकारलोप ।अन्यत्र 'आडोऽन्यत्रापि छन्दसि लोपो दृश्यते' वा० सूत्रेणाकारलोप । त्मना आत्मना नि० ३ २२]

त्मन्या आत्मनि साध्व्या क्रियया १ १८८ १०. आत्मना, प्र०—अत्राऽऽकारलोपो विभक्तेर्यादेशश्च २९ १० प्र०—अत्र 'सुपा सुलुक्०' इति टा–स्थाने याऽऽदेश २० ४५ [आत्मन्प्राति० टाप्-प्रत्यये 'मन्त्रेष्वाड्यादेरात्मन' अ० ६ ४ १४१ सूत्रेणाकारलोप । टाप्स्थाने च यादेश-श्छान्दस । पूर्वत्र साध्वर्थे यत् प्रत्यय । त्मन्या आत्मना आत्मानम् नि० ८.१७]

रसिभ्य कित्' उ० ३ १२ सूत्रेण न प्रत्यय किच्च । स्त्रिया टाप्]

तृष्यते पिपासवे (जनाय) १ १७६ ६ तृषाऽऽक्रान्ताय (जनाय) १ १७५ ६ तृष्णिताय (पायनाय=पानाय) १.११६ ६ **तृष्यन्तम्**=तृषाऽऽनुरमिव (पतिम्) ५ ६१ ७ [जितृष पिपासायाम् (दिवा०) धातो शतृप्रत्यय]

तृष्वीम् पिपासिताम् (मृगीम्) ४ ४ १ क्षिप्रगतिम्, प्र०—तृष्विति क्षिप्रनाम, निघ० २ १५ ततो 'वोतो गुणवचनाद्' इति ङीप् १३ ६ [तृष्वीति क्षिप्रनाम तरतेर्वा त्वरतेर्वा निघ० ६ १२]

तृंहतीभ्यः हन्त्रीभ्य (सेनाभ्य) १६ २४ [तृह हिंसायाम् (रुधा०) धातोश्शत्रन्तात् ङीप् स्त्रियाम्]

तेजनेन तीव्रेण कर्मणा १ ११० ५ [तिज निशाने (भ्वा०) धातोर्ल्युडन्तात् तृतीया । तेजतेरुत्साहकर्मण नि० १० ६ वज्रो वै तेजनम् मै० ४ २ ६]

तेजमानः तीक्ष्णीकृत (स्वधिति=विद्युद्वज्र) ३ ८ ११ [तिज निशाने (भ्वा०) धातो शानच् । तेजतेरुत्साहकर्मणो वा नि० १० ६ 'गुप्तिजकिद्भ्य सन्' इति प्राप्तोऽपि सन् न भवति छान्दसत्वात्]

तेजसा तीक्ष्णेन ज्योतिपेव शत्रुदाहकत्वेन १० ३० निर्दीनतया प्रागल्भ्येन च, ऋ० भू० १६१, प्रतापेन १ ५६ २ तीक्ष्णेन (सूर्येण) ३८ २७ जलेन, प्र०—तेज इत्युदकनाम, निघ० १ १२, २३ ४० तीक्ष्णस्वरूपेण (सूर्यप्रकाशेन) २१ २३ प्रकाशेन २० ८० निशातेन तीव्रेण कर्मणा १५ ७ प्रागल्भ्येन २८ २ तीक्ष्णप्रतापेन २८ ६ तीक्ष्णीकरणेन १७ ७२ **तेजसे**=तेजोवर्धनाय ३० ११ न्यायादिसद्गुणप्रकाशाय, ऋ० भू० २१८, २० ३ प्रागल्भ्याय १६ ७६ **तेजः**=प्रागल्भ्यम् १६ ६ प्रकाश १६ ८ प्रकाशमय, अ०—तेजोवत्सर्वविद्यादर्शक (ईश्वर), भा०—अग्नेर्ज्वाला ३८ २५ ज्ञानप्रकाशम् २० २३ तीव्रप्रज्ञ (जगदीश्वर) २० २३ स्वप्रकाश १ ३१ प्रकाशयुक्तम् (चक्षु=नेत्रम्) १६ ८६ स्वप्रकाश अनन्ततेज अविद्याऽन्धकार से रहित (ईश्वर), आर्याभि० २ ६, १६ ६ तेजस्वीपन, स० वि० १४४, अथर्व० १२ ५ ७ यज्ञोत्थ तेज ३३ ११ प्रकाशहेतु (सूर्य, ईश्वरो वा) १ ३१ प्रगल्भता, धृष्टता, निर्भयता, निर्दीनता, ऋ० भू० १०२, अथर्व० १२ ५ ७ [तेज इत्युदकनाम निघ० १ १२ ज्वलतो नाम निघ० १ १७ तिज निशाने (भ्वा०) धातोरौणादिकोऽसुन्प्रत्यय । तेजतेरुत्साहकर्मणो वा (नि० १० ६) असुन् । तेजो वा अग्नि श० २ ५ ४ ८ तेजोऽसि तपसि श्रितम् । समुद्रस्य प्रतिष्ठा तै० ३ ११ १ ३ तेजो वै वायु तै० ३ २ ६ १ तेज एव श्रद्धा श० ११ ३ ११ तेजोऽसि शुक्रमस्यमृतमसि (आज्य !) श० १ ३ १ २८ तेज आज्यम् तै० ३ ३ ६ ३ तेजो हिरण्यम् तै० ३ १२ ५ १२ तेज उद्यत (प्रवर्ग्य) तै० आ० ५ ११ ४ तेज प्रवर्ग्य (सूर्य) मै० २ २ ८ तेज प्रात सवन आत्मन् दधीत तै० स० ३ २.६ २ तेजो वसोर्धारा तै० स० ५ ४ ८ १ तेजो वाऽग्निष्टोमस्तेजो विषुवत् जै० २ ३८७ तेजो वै त्रिणव स्तोमानाम् जै० २ २१६ तेजो वै त्रिवृत् तै० स० ५ ५ ८ १ मै० ४ ४ १० तेजो वै प्रात सवनम् (यज्ञायज्ञीयम्) मै० ४ ७ ६ जै० ३ २६० तेजो वै ब्रह्मवर्चस ज्योतिरग्निष्टोम जै० २ ३१२ तेजो वै मदन्ती मै० ३ ७१०. तेजो वै यूप मै० ३ ६ ३ तेजो वै शुक्रो ब्रह्मवर्चसम् मै० ४ ६ ३ तेजो वै हिरण्यम् तै० स० ५ १ १० ५ मै० १ ११ ८ काठ० ११ ४ पशवो वै तेजो ब्रह्मवर्चसम् मै० १ ८ ३ समुद्रोऽसि तेजसि श्रित, अपा प्रतिष्ठा तै० ३ ११ १ ४]

तेजस्वि परमविद्यायुक्त तथा ससार मे सबसे अधिक प्रकाशित (ईश्वर), आर्याभि० २ १ [तेजस् इति व्याख्यातम् । ततो मत्वर्थे 'अस्मायामेधास्रजो विनि' अ० ५ २ १२१. सूत्रेण विनि प्रत्यय]

तेजिष्ठया याऽतिशयेन तीव्रा तेजिष्ठा सेना नीतिर्वा तया १ ५३ ८ अतिशयेन तेजस्विन्या (शस्त्र्या) २ २३.१४ **तेजिष्ठा**=अतिशयेन तेजस्विनी (अरति=प्राप्ति) ६ १२ ३ [तेजस् इति व्याख्यातम् । ततो विनि प्रत्ययान्तादतिशायन इष्ठन्प्रत्ययान्तात् स्त्रिया टाप् । 'विन्मतोर्लुक्' अ० ५ ३ ६५ सूत्रेण विनो लुक्]

तेजीयसा तेजस्विना शुद्धस्वरूपेण (मनस=अन्त-करणेन) ३ १६ ३ [तेजस्विन्प्राति० अतिशायन ईयसुन् । 'विन्मतोर्लुक्' इति विनो लुक्]

तेतिक्ते भृश तीक्ष्णा करोति ४ २३ ७ [तिज निशाने (भ्वा०) धातोर्यङ्लुकि 'दाधर्तिदर्धर्ति०' अ० ७ ४ ६५ सूत्रेणात्मनेपद निपात्यते]

तेतिजानः भृश तीक्ष्ण (स्वधिति=वज्र) ५ ४३. [तिज निशाने (भ्वा०) धातोर्यङ्लुकि लिटि कानच्प्रत्यय]

तेदनीम् श्रवणक्रियाम् २५ २

तोकम् सद्योजातमपत्यम्, भा०—पुत्रपौत्रादिकम् ३४ ३३ अल्पमपत्यम् २ २५ २. वर्धकम् (तनयम्=

त्रयोदशाक्षरेण आसुर्यानुष्टुभा (छन्दसा) ९ ३४. [त्रयोदश-अक्षरपदयो समास]

त्रयोदशी त्रयोदशाना पूरणा (क्रिया) २५ ४. ['त्रयोदशम् इति व्याख्यातम् । तत स्त्रियाम् टिड्ढाणञ्०' इति ङीप्प्रत्यय । यमस्य त्रयोदशी मं० ३ १५ ४]

त्रयोविंशतिः त्र्यधिका विंशति (सङ्ख्या) १८ २४ **त्रयोविंशत्या**=पञ्चङ्गैः १४ ३० [त्रि-विंशतिपदयो समासे 'त्रेस्त्रय' सूत्रेण त्रयस्-आदेश]

त्रयोविंश त्रयोविंशतिधा (योनि =सयोजको वियोजको गुण) १४ २३ [त्रि-विंशतिपदयो समासे 'त्रेस्त्रय' इति त्रयसादेशे पूरणार्थे डटि प्रत्यये 'ति विंशतेर्डिति' इति तेर्लोप]

त्रसदस्युम् त्रसा भयभीता दस्यवो भवन्ति यस्मात्तम् [सत्पुरुषम्] ७ १९ ३ त्रस्यन्ति दस्यवो यस्मात् तम् (राजानम्) ४ ४२ ९ यो दस्युभ्यस्त्रस्यति तम् (सेनापतिम्) १ ११२ १४ **त्रसदस्युः**=त्रस्यन्ति दस्यवो यस्मात् स (सेनापति) ४ ३८ १ [त्रस-दस्युपदयो समास । त्रस =त्रसी उद्वेगे (दिवा०) धातोरौणादिकोऽन्प्रत्यय]

त्रसन्ति उद्विजन्ति ६ १४४ (त्रसी उद्वेगे (दिवा०) धातोर्लट् । 'वा भ्राश०' इति सूत्रेण शप्]

त्रातः[1] रक्षित (राजन्) १ १२९ १० रक्षक (सभेश) १ १२९ ११ **त्राता**=पालक (अग्नि =वेदविदध्यापक उपदेशको वा विद्वान्) २५ ४७ रक्षिता (राजा) ३४ १३ सर्वाभिरक्षक (देव =विद्वज्जन) १ १०६ ७ **त्रातारम्**=रक्षितारम् (भा०—ईश्वर सभाध्यक्ष वा) ८ ४६ अभिरक्षितारम् (ईश्वरम्) १ ४४ ५ **त्रातारः**=रक्षका (मरुत =शूरा मनुष्या) ७ ५६ २२ **त्रातुः**=रक्षकस्य (ईश्वरस्य) १ १५५ ४ [त्रैङ् पालने (भ्वा०) धातो कर्त्तरि तृच्-प्रत्यय । 'आदेच उपदेशेऽशिति' सूत्रेण धातोराकारान्तादेश]

त्राध्वम् रक्षत, पालयत २ २९ ६ (त्रैङ् पालने (भ्वा०) धातोर्लोट् । 'बहुल छन्दसी' ति शपो लुक्]

त्राम् रक्षकम् (सेनाजनम्) ४ २४ ३ [त्रैङ् पालने (भ्वा०) धातो कर्त्तरि अच्प्रत्यय. क्विप् वा]

त्रामणे पालनव्यवहाराय ५ ४६ ६ **त्रामभिः**=त्रायन्ते ये धार्मिका विद्वास शूरास्तै १ ५३ १० [त्रैङ् पालने (भ्वा०) धातोरौणादिको मनिन्प्रत्यय]

त्रायताम् पालयतु ४ ५५ ७ **त्रायध्वे**=रक्षथ ७ ५९ १ रक्षत ५ ५३ १५ **त्रायस्व**=त्रायताम् ४ १ रक्ष ५ ४२ **त्रायेथाम्**=रक्षेताम् ६.११ [त्रैङ् पालने (भ्वा०) धातोर्लोट्]

त्रायमाणः रक्षक. (दातृजन) ६ ५० ८. रक्षन् (सविता =ईश्वर) ७ ३५ १० [त्रैङ् पालने (भ्वा०) धातो. शानच्प्रत्यय]

त्रासते उद्वेजयन्ति १ १२८ ५ **त्रासाथे**=भय दत्तातम् ५ ६२ ६ [त्रसी उद्वेगे (दिवा०) धातोर्लोट् । 'वा भ्राश०' इति सूत्रेण शप् । उपधाया दीर्घश्छान्दस । व्यत्ययेनात्मनेपदम्]

त्रासीयाम् त्रासेयम् ५ ४१ १ त्रासेयाम् ४ ५५ १ [त्रसी उद्वेगे (दिवा०) धातोर्लिङ् । छान्दस रूपम्]

त्रिककुप् त्रिभि सेनाऽध्यापकोपदेशकैर्युक्ता ककुभो दिशो यस्य स (सम्राट्) १.१२१ ४ त्रीणि सानि सुखानि ककुभानि येन कर्मणा तत्, प्र०— अत्र छान्दसो वर्णलोप इति सलोप १५ ४. [त्रि-ककुभ्पदयो समास । ककुभ =दिङ्नाम निघ० १ ६ अथवा त्रि-कु उपपदयो स्कुम्भु स्तम्भनार्थे (सौत्रो धातु) धातो क्विप्-प्रत्यय । उदानो वै त्रिककुप् छन्द श० ८ ५ २.४]

त्रिकद्रुकेषु त्रीणि कद्रुकानि आह्वानानि येषु तेषु (लोकेषु) २.२२ १ त्रिभि कद्रुकैर्विकलनैर्युक्तेषु कर्मसु २ १५.१. त्रीणि कद्रुकाणि शरीरात्ममन पीडनानि येषु तेषु व्यवहारेषु २ ११ १७ त्रय उत्पत्ति-स्थिति-प्रलयाख्या कद्रवो विविधकला येषा तेषु कार्य-पदार्थेषु, प्र०—अत्र कदि-धातोरौणादिक. कुन् प्रत्यय पुन समासान्त कप् स १ ३२ ३ [त्रि कद्रुकपदयो, त्रिकद्रुपदयोर्वा समास. । कद्रु कदि आह्वाने रोदने च (भ्वा०), कदि वैक्लव्ये (भ्वा०) धातोर्वा औणादिक नुन् प्रत्यय., तत समासान्त कप्]

त्रिकशः त्रिधा कशा गमनानि गमनसाधनानि वा यस्मिन् स. (रथ) २.१८ १. [त्रि-कशापदयो समास । अश्वाजनी कशेत्याहु । कशा प्रकाशयन्ति भयमश्वाय, कृष्यतेर्वा अणूभावात् । वाक् कशा पुन प्रकाशयत्यर्थान्, खशया, क्रोशतेर्वा नि० ९ १८.]

त्रिचक्रः त्रीणि चक्राणि यस्मिन् स (रथ =यानविशेष) ४.३६.१ त्रीणि कलाना चक्राणि यस्मिन् तेन (रथेन =यानविशेषेण) १ ११८ २ [त्रि-चक्रपदयो समास । चक्र चकतेर्वा चरतेर्वा क्रामतेर्वा नि० ४ २७]

त्रिणवत्रयस्त्रिंशौ ये त्रयश्च काला नवाङ्कविद्याश्च, त्रयश्च त्रिंशच्च वस्वादय पदार्था व्याख्याता याभ्या तयो पूरणौ तौ (स्तोमौ=स्तुतिविशेषौ) १० १४ त्रिणवश्च

त्यक्तेन वर्जितेन तच्चित्तरहितेन (भावेन) ४० १ अन्याय के त्याग और न्यायाचरणरूप धर्म मे, स० प्र० २३८, ४० १ [त्यज हानौ (भ्वा०) धातो क्त प्रत्यय । ततस्तृतीयैकवचनम्]

त्यजसः त्यक्तु योग्यो व्यवहार ४४३ ४ **त्यजसा**= ससारसुखत्यागेन १ ११६ ८ त्यागेन ६ ३ १ [त्यज हानौ (भ्वा०) धातोरौणादिकोऽसुन्प्रत्यय । त्यज क्रोधनाम निघ० २ १३]

त्यायताम् महन्यताम् ६ १५ [रत्यै पृचै शब्दसघातयो (भ्वा०) धातो कर्मणि लोट् । सकारलोपश्छान्दस]

त्रययाय्यः यस्त्रय रक्षक याति प्राप्नोति स (अतिथि =विद्वज्जन) ६ २ ७ [त्रयोपपदे या प्रापणे (अदा०) धातोरौणादिक आय्य प्रत्यय । त्रय =त्रैङ् पालने (भ्वा०) धातो कर्त्तरि अच्-प्रत्यय । वर्णव्यत्ययेनाकारस्य अकार]

त्रयस्त्रिशत् त्र्यधिका त्रिशत् (सङ्ख्या) १८ २४ **त्रयस्त्रिशतम्**=एतत्सङ्ख्याकान् पृथिव्यादीन् १ ४५ २ [त्रि-त्रिशत्पदयो समास । 'त्रेस्त्रय' अ० ६ ३ ४८ सूत्रेण त्रे स्थाने 'त्रयस्' इत्यादेश]

त्रयस्त्रिशद्देवा अष्टौ वसव, एकादश रुद्रा, द्वादशाऽऽदित्या, इन्द्र प्रजापतिश्च, ऋ० भू० ६६, अथर्व० १४ २३, ४ २३ (त्रयस्त्रिशत् देवपदयो समास । त्रयस्त्रिशत्-पद व्याख्यातम्]

त्रयस्त्रिशः त्रयस्त्रिशत्-प्रकार (विष्टप =व्याप्तिम्) १४ २३ एतत्सङ्ख्याया पूरक (स्तोम =स्तुतिविषय) १४ २६ **त्रयस्त्रिशाय**=एतत्सङ्ख्याताय (सवित्रे= ऐश्वर्योत्पादकाय पुरुपाय) २६ ६० **त्रयस्त्रिशा**=त्र्यधिकास्त्रिशत् (देवा =पृथिव्यादयः) २० ११ **त्रयस्त्रिशे**= वस्वादिसमूहे, भा०—अष्टौ वसव , एकादश रुद्रा, द्वादशाऽऽदित्या, विद्युद्यज्ञश्चेति त्रयस्त्रिशद्दिव्ये पदार्थसमूहे २१ २८ (त्रयस्त्रिशत्पद व्याख्यातम् । तत पूरणार्थे 'तस्य पूरणे डट्' अ० ५ २ ४८ सूत्रेण डट्प्रत्यये टेर्लोप । स्तोमार्थे वा 'स्तोमे डविधि पञ्चदशाद्यर्थ ' अ० ५ १ ५८ वा० सूत्रेण ड-प्रत्यये टेर्लोप । त्रयस्त्रिश (स्तोम) त्रयस्त्रिशो वै स्तोमानामधिपति ता० ६ २ ७ एष वै समृद्ध स्तोमो यत् त्रयस्त्रिश ता० १५ १२ ६ ज्योतिस्त्रयस्त्रिश स्तोमानाम् ता० १३ ७ २ त्रयस्त्रिश स्तोमाना (सत्) ता० ४ ८ १० सत् त्रयस्त्रिश स्तोमानाम् ता० १५ १२ २ अन्तो वै त्रयस्त्रिश परमो वै त्रयस्त्रिश स्तोमानाम् ता० ३ ३ २ वर्ष्म वै त्रयस्त्रिश ता० १६ १० १० तम् (त्रयस्त्रिश स्तोमम्) उ नाक इत्याहु ता० १० १ १८ देवता एव त्रयस्त्रिशस्यायतनम् ता० १० १ १६ अनूक त्रयस्त्रिश । द्वात्रिंशद्वाऽएतस्य कशेरुकाण्यनूक त्रयस्त्रिशम् श० १२ २ ४ १४ सवत्सरो वाव प्रतिष्ठा त्रयस्त्रिश तस्य चतुर्विंशतिरर्धमासा षडृतवो द्वेऽअहोरात्रे सवत्सर एव प्रतिष्ठा त्रयस्त्रिशस्तद्यत्तमाह प्रतिष्ठेति सवत्सरो हि सर्वेषा भूताना प्रतिष्ठा श० ८ ४.१ १२ त्रयस्त्रिश एव स्तोमो भवति प्रतिष्ठायै ता० १५ १२ ८ त्रयस्त्रिशेन श्रीकाम (यजेत) जै० २ १३६ त्रयस्त्रिशो वै स्तोमो महान् जै० ३ १३७ अग्र त्रयस्त्रिश स्तोमानाम् जै० ३ १३५ त्रयस्त्रिश स्तोममन्वारण्या पशव जै० २ ३२]

त्रयः त्रित्वसङ्ख्याका, त्रित्वसङ्ख्याविशिष्टा. (पवय =कलाचक्राणि) १ ३४ २ जलाग्निमनुष्यपदार्थस्थित्यर्थविकाशा १ ३४ ६ कर्मोपासनानि ४ ५८ ३. तदस्मद्युष्मत्पदवाच्या (त्रिधातव =जीवा) २१ ३७ वायु-जल-विद्युत ४४५ १ अध्यापकोपदेशकवैद्या २८ ८ विद्युद्भौमसूर्यरियाऽग्नयो भूम्यप्तेजासि वा ७ ३३ ७ प्रातर्मध्यसायसवनानि, भूतभविष्यद्वर्त्तमाना काला वा (पादा =अविगमसाधनानि) १७ ६१ अध्यक्ष-प्रजा-भृत्या १ १२२ १५ **त्रयाणि**=त्रीणि (कर्माणि) १२ १६ **त्रिभिः**=सत्वादिगुणै १ १५५ ४ शरीरवाङ्मनोभि ३ २६ ८ भूम्यन्तरिक्षजलेषु गमयितृभि (रथै =रमणीयैर्विमानादिभिर्यानै) १ ११६ ४ स्थूल-सूक्ष्माऽतिसूक्ष्मैरवयवै १ १५४ ३ **त्रिषु**=नाम-स्थान-जन्मसु १ १५४ २ निकृष्टमध्यमोत्तमेषु (सानुषु =शिखरेषु) २ ३ ७ त्रिविधेषु जगत्सु ५.२० भूतभविष्यद्वर्त्तमानेषु कालाऽवयवेषु १२ ५५ [त्रय तीर्णतमा सख्या नि० ३ ६ तॄ प्लवनसन्तरणयो (भ्वा०) धातोरौणादिको ड्रि प्रत्यय]

त्रया त्रयाणामवयवा (देवा =दिव्यगुणा पृथिव्यादय) २० ११ [सख्यावाचिन त्रिप्राति० अवयवार्थे 'सख्याया अवयवे तयप्' अ० ५ २ ४२ सूत्रेण तयपि, तस्य स्थाने 'द्वित्रिभ्या तयस्यायज्वा' अ० ५ २ ४३ सूत्रेणायजादेश]

त्रयोदशम् दश-प्राण-जीव-महत्तत्त्वाना सङ्ख्यापूरकमव्यक्त कारणम् (स्तोमम्) ६ ३४ **त्रयोदश**= त्र्यधिकादश (सख्या) १८ २४ **त्रयोदशभि**=दश प्राणा द्वे प्रतिष्ठे त्रयोदश आत्मा तै० १४ २६ [त्रि-दशन्पदयो समास त्रेस्त्रय' अ० ६ ३ ४८ सूत्रेण त्रे स्थाने त्रयसादेश । 'तस्य पूरणे डट्' सूत्रेण पूरणार्थे डट्-प्रत्यय]

त्रिनाके त्रिविध अर्थात् आध्यात्मिक, आधिभौतिक, आधिदैविक दुःख से रहित (त्रिदिवे उस अपने सुख स्वरूप में) म० त्रि० १९७, ९ ११३ ९ [त्रि-नाकपदयो समास । नाक =कमिति सुखनाम, तत्प्रतिषिद्ध प्रतिषिध्येत नि० २ १४ नञ्-अकपदयो समासे 'नभ्राण्नपान्नवेदा०' अ० ६ ३ ७५ सूत्रेण नञ प्रकृतिभाव]

त्रिनाभि त्रयो नाभयो बन्धनानि यस्मिन् तत् (चक्रम्) १ १६४.२ [त्रि-नाभिपदयो समास । नाभि =णह बन्धने (दिवा०) धातो 'नहो भश्च' उ० ४ १२६ सूत्रेण इञ् प्रत्ययो भकारादेशश्च । त्रिनाभि ऋतु (सवत्सर) नि० ४ २७]

त्रिपदा: त्रीणि पदानि यासु ता (प्रजा) २३ ३४. [त्रि-पदपदयो समास]

त्रिपदीम् त्रीणि वाङ्मन शरीरस्थानि सुखानि यस्या-स्ताम् (स्वाहा=वाचम्) ८ ३० [त्रि-पादपदयो समासे 'सख्यासुपूर्वस्य' सूत्रेणान्तलोपे 'पादोऽन्यतरस्याम्' सूत्रेण ङीपि 'पाद पत्' इति पदादेश]

त्रिपाजस्य: त्रिषु शरीरात्मसम्बन्धिबलेषु साधु (ईश्वर) ३ ५६ ३ [त्रि-पाजस्पदयो समासे 'तत्र साधु' रिति यत्प्रत्यय । पाजस् =अन्ननाम निघ० २ ७ बलनाम निघ० २ ९]

त्रिपात् त्रय पादा अशा यस्य स , भा०—कार्यजगत. पृथगशत्रयेण प्रकाशित सन् परमेश्वर ३१ ४ त्रय पादा यस्मिन्, भा०—ऐश्वर्यस्य सामर्थ्यस्याशत्रयम् ३१ ३ द्योतनात्मक जगत् प्रकाशक च तस्मात् (प्रकाश्यमानात्) त्रिगुणमीश्वरम्, ऋ० भू० १२१, ३१ ४ [त्रि-पादपदयो. समासे 'सख्यासुपूर्वस्य' सूत्रेणान्तलोप । आदित्यस्त्रिपात्-तस्येमे लोका पादा गो० पू० २ ८]

त्रिपृष्ठै: त्रीणि पृष्ठानि जीप्सितव्यानि येषा तै (महभि =सत्कारै) ७ ३७ १ [त्रि-पृष्ठपदयो समास । पृष्ठम्=प्रच्छ जीप्सायाम् (तुदा०) धातोर्बाहुलकादौणादि-स्थक् प्रत्यय । पृषु सेचने धातोर्वा 'तिथपृष्ठ०' उ० २ १२ सूत्रेण थक्]

त्रिबन्धुर: त्रयो बन्धुरा अधोमध्योर्ध्व बन्धा यस्मिन् (रथ) १ ११८ १ त्रयो बन्धुरा बन्धा यस्मिन् स (रथ) १ १५७ ३ त्रयो बन्धुरा बन्धनानि यस्य स, भा०—त्रैकाल्यप्रबन्ध (देव =जीव) २८ १६ **त्रिबन्धुरेण**= त्रीणि बन्धुराणि बन्धनानि यस्मिँस्तेन (रथेन) १ ४७.२. त्रिविधबन्धनयुक्तेन (रथेन) १.११८ २ [त्रि-बन्धुरपदयो. समास । बन्धुर =बन्ध बन्धने (क्र्या०) धातो 'मद्गुरा-दयश्च' उ० १ ४१ उरच्प्रत्यय]

त्रिबन्धु: त्रयाणा बन्धु (विद्वज्जन) ७ ३७ ७ [त्रि-बन्धुपदयो समास । बन्धु =बन्ध बन्धने (क्र्या०) धातो शृस्वृस्निहि०' उ० १ १० सूत्रेण उ प्रत्यय]

त्रिबर्हिषि त्रयो वेदवेत्तारो वृद्धा यस्या तस्याम् (सदसि=सभायाम्) १ १८१ ८ [त्रि-बर्हिष्पदयो समास । बर्हिष्=बृहि वृद्धौ (भ्वा०) धातो 'बृहेर्नलोपश्च' उ० २ १०९ सूत्रेण इसि]

त्रिमन्तु: त्रिसृणा कर्मोपासनाज्ञानविद्याना मन्तुर्मन्ता (विद्वज्जन) १ ११२ ४ [त्रि-मन्तुपदयो समास । मन्तु =मन ज्ञाने (दिवा०) धातो 'कमिमनिजनि०' उ० १ ७३ सूत्रेण तुन् प्रत्यय]

त्रिमाता त्रयाणा जन्म-स्थान-नाम्ना माता जनक (जगदीश्वर) ३ ५६ ५ [त्रि-मातृपदयो समास । मातृ= माङ् माने (जु०) धातोरौणादिकस्तृच्प्रत्यय । 'न षट् स्वस्रादिभ्य ' अ० ४ १ १० सूत्रेण स्त्रीप्रत्ययस्य ङीप प्रतिषेध]

त्रिमूर्द्धानम् त्रिषु निकृष्ट-मध्यमोत्तमेषु पदार्थेषु मूर्द्धा यस्य तम् (अग्निम्) १ १४६ १ [त्रि-मूर्धन्पदयो समास । मूर्धन्=मूर्वी बन्धने (भ्वा०) धातो 'श्वनुक्षन्०' उ० १ १५९ सूत्रेण कनिन्प्रत्यये वकारस्य धकारो निपात्यते]

त्रियुगम् वर्षत्रयम् १२ ७५ [त्रि-युगपदयो समास । त्रियुगम् त्रीणि युगानि नि० ९ २८.]

त्रिरश्मिम् त्रिभिर्वाङ्मन शरीरैर्योऽश्यते प्राप्यते तम् (मन्त्रम्) १ १५२ २ [त्रि -अश्मिपदयो समास । त्रि = त्रिप्राति० सुच् । अश्मिम्=अशूङ् व्याप्तौ (स्वा०) धातो-रौणादिक क्रि प्रत्यय]

त्रिरह्ना त्रिभिर्दिनै , ऋ० भू० १९०, ऋ० १ ८ ८ ४ [त्रिस्-अहन्पदयो समास]

त्रिवत्सम् त्रय कर्मोपासनाज्ञानानि वत्सा इव यस्य तम् (गा=प्राप्तव्य बोधम्) २८ २७ **त्रिवत्स.**=त्रय कर्मोपासनाज्ञानानि वत्सा इव यस्य स (विद्वज्जन) १४ १० त्रयो वत्सा यस्य स (जन) १८ २६ त्रीणि देहेन्द्रियमनासि वत्सा इवाऽनुचराणि यस्य स (विद्वान् मनुष्य) २१.१५ **त्रिवत्सा:**=त्रयो वत्सास्त्रिषु वा निवासो येषान्ते (पशुपालका जना) २४ १२ [त्रि-वत्स-पदयो समास । वत्स =वद व्यक्ताया वाचि (भ्वा०) धातोरौणादिक स प्रत्यय]

त्रयस्त्रिंशच्च ते साग्नी १३ ५८ [त्रि-नवन्-त्रि-त्रिंशत्-पदाना समासे पूरणार्थे डट्प्रत्यय । अथवा-त्रिणवत्रयस्त्रिंशत्-पदयो समास]

त्रिणव: सप्तत्रिंशद्विधा (क्रतु =कर्म प्रज्ञा वा) १४ २३ **त्रिणवाय**=त्रिभि कर्मोपासनाज्ञानै स्तुताय (णवगाय=शक्तिजाय व्यवहाराय) २९ ६० **त्रिणवे**=त्रिगुणा नव यस्मिंस्तस्मिन् सप्तविंशे व्यवहारे २१ २७ [त्रि-नवन्पदयो समास । त्रिणव (स्तोम) । वज्रस्त्रिणव श० ८ ४ १ २० प० ३ ४ वज्रा वै त्रिणव ता० ३ १ २ इमे वै लोकास्त्रिणव ता० ६ २ ३ त्रिवृद्धेव त्रिणवस्यायतनम् ता० १० १ १ ३ तमु (त्रिणवस्तोम) पुष्टिरित्याहुस्त्रिवृद्धचैवेप पुष्ट ता० १० १ १ ५ त्रिवृच्च त्रिणवश्च राथन्तरौ तावजश्चाश्वश्चान्वसृज्येता तस्मात्तौ राथन्तर प्राचीन प्रधूनुत ता० १० २ ५ त्रिणव ब्राह्मणश्छमिन जै० २ २२४ प्रतिष्ठा त्रिणव तै० स० ५ ३ ४ ४]

त्रितम् हिंसकम् (दुष्टजनम्) २ ३४ १० **त्रितस्य**=त्रिभिरुत्तम-मध्यम-निकृष्टोपायैर्युक्त य (राजजनस्य) २ ११ २० **त्रित:**=सम्प्लावक (इन्द्र =विद्युत्) प्र०—अत्रौणादिकस्तृधातो क्तिच्-प्रत्यय १ १६३ २ सम्प्लावक (अग्नि) ५ ९ ५ उपरिरेखातो मध्यरेखातस्तिर्यग्रेखातश्च १ ५२ ५ त्रिपु वर्द्धक (विद्वज्जन) ५ ४१ १० त्रिपु कालेपु, प्र०—अत्र सप्तम्यर्थे तसि-प्रत्यय ३४ ७ त्रिपु क्षित्युदकान्तरिक्षेपु वर्धमान (विद्वान् शिल्पिजन) ५ ४१ ४ ब्रह्मचर्याऽध्ययन-विचारेभ्य २ ३१ ६ त्रिभ्योऽध्यापनोपदेशरक्षणेभ्य ५ ८६ १ यस्त्रीन् विपयान् विद्या-शिक्षा-ब्रह्मचर्याणि तनोति स (बृहस्पति =विद्वान् जन), प्र०—अत्र त्र्युपपदात्तनोतेरौणादिको ड प्रत्यय १ १०५ १७ त्रिभ्यो भूत-भविष्यद्वर्त्तमानकालेभ्य १ १०५ ९ सन्तारक (अग्नि) १ १६३ ३ मनोवाक्कर्मभ्य १ १८७ १ यस्त्रीणि शरीरात्म-मन सम्बन्धिसुखानि तनोति स (कश्चिद् जन) २ ३४ १४ **त्रिताय**=त्रयाणामग्निकर्मंहविपा भावाय, भा०—शारीरिक-वाचिक-मानसिकस्थिरसुखाय १ २३ त्रिविधाना शारीरिकवाचिकमानसाना सुखाना प्राप्तिर्यस्य तस्मै (सत्पुरुपाय) २ ११ १९ **त्रितेपु**=प्रसिद्धविद्युत्सूर्येपु ६ ४४ २३ [त्रिप्राति० सप्तम्यर्थे तसि । तृ प्लवनसन्तरणयो (भ्वा०) धातोरौणादिको वा क्तिच् प्रत्यय । त्रि-इत्युपपदे तनु विस्तारे (तना०) धातोर्ड प्रत्ययो वा । त्रिप्राति० वा भावे तल्प्रत्यय । त्रित तीर्णतमो मेधया बभूव । अपि वा सख्यानमेवाभिप्रेत स्यात्, एकतो द्वितस् त्रित इति त्रयो बभूवु नि० ४ ६ त्रित त्रिस्थान इन्द्र नि० ९ ४५ त्रैत भवति प्रतिष्ठायै ता० १४ ११ २२]

त्रिदिवे तीन सूर्य विद्युत् और भौम्य अग्नि मे प्रकाशित सुख-स्वरूप मे, म० वि० १९७, ९ ११३ ९

त्रिधा त्रिभि प्रकारै, भा०—त्रिप्रकारक स्थूलसूक्ष्मकारणविज्ञापक ज्ञानम् १७ ९२ त्रिभि प्रकारैर्मनोवाक्छरीरशिक्षादिभि १ ११७ २४ श्रद्धापुरुपार्थ-योगाभ्यासै ४ ५८ ३ त्रिभि प्रकारैर्मन्त्रब्राह्मणकल्पै, उरसि कण्ठे शिरसि वा १७ ९१ [त्रिप्राति० 'सख्याया विधार्थे धा' अ० ५ ३ ४२ सूत्रेण धा प्रत्यय]

त्रिधातव. त्रय सत्त्वरजस्तमासि धातवो धारका येपान्ते (पृथिव्यादय) ५ ४७ ४ दधति सर्वान् विषयानिति धातव, त्रयो धातवो येपान्ते जीवा, भा०—अस्थिमज्जावीर्याणि २१ ३७ त्रयोऽस्थिमज्जावीर्याणि धातवो येभ्यस्ते (अध्यापकोपदेशकवैद्या) २८ ८ **त्रिधातु:**=त्रयो धातवो यस्मिन् स (अर्क =वज्रो विद्युद्वा) ३ २६ ७ **त्रिधातुना**=त्रयो धातवो यस्मिंस्तेन (वायुयानाख्येन रथेन) १ १८३ १ [त्रि-धातुपदयो समास । त्रिरिति व्याख्यानम् । धातु =डुधाञ् धारणपोपणयो (जु०) धातो 'सितनिगमि०' उ० १ ६९ सूत्रेण तुन्-प्रत्यय]

त्रिधातु त्रीणि सुवर्ण-रजतायसादयो धातवो येपु तानि (वसूनि =धनानि) ३ ५६ ६ त्रय सुवर्ण-रजतताम्रा धातवो यस्मिँस्तत् (छर्दि =गृह) ६ ४६ ९ त्रय सत्व-रजस्तमासि गुणा धारका यस्मिँस्तत् सर्व जगत् ४ ४२ ४ त्रय सत्त्वरजस्तमसादि-धातवो येपु तानि (भुवनानि) १ १५४ ४ त्रय सत्वादयो गुणा धातवो धारका यस्मिँस्तदव्यक्त प्रकृत्यात्मक जगत्कारणम् ७ ५४ सत्वरजस्तमोमय जगत् ६ ४४ २३ त्रयोऽयस्ताम्रपित्तलानि धातवो यस्मिन् भू-समुद्राऽन्तरिक्षगमनार्थे याने तत् १ ३४ ६ **त्रिधातूनि**=त्रयो वातपित्तकफा येपु शरीरेपु वाऽय -सुवर्णरजतानि येपु धनेपु तानि १ ८५ १२ [त्रि-धातुपदयो समासे नपुसके रूपम् । 'स्वमोर्नपुसकादि' नि सुप्रत्ययस्य लुक् । धातु =डुधाञ् धारणपोपणयो (जु०) धातोरौणादिकस्तुन् । यज्ञस्त्रिधातु जै० २ ३९६ यदस्मिन् (इन्द्रे) त्रीणि वीर्याण्यधत्ता तस्मात् त्रिधातु मै० २ ४ ६ यत् त्रि प्रायच्छत् त्रि प्रत्यगृह्णात् तत् त्रिधातोस्त्रिधातुत्वम् । तै० म० २ ४ १२ ७]

त्रिधातुशृङ्ग: त्रयो धातवो शुक्ल-रक्त कृष्णगुणा शृङ्गवद् यस्य स (वयोधा =वैद्य) ५ ४३ १३ [त्रि-धातु-शृङ्गपदाना समास]

गतपदयो समास]

त्रिशुक् तिस्रो मृदु-मध्य-तीव्रा दीप्तयो यस्य स, भा०—अग्निविद्युत्सूर्यरूपेण त्रिविध प्रकाश ३८ २७ [त्रि-शुच्पदयो समास । शोचति ज्वलतिकर्मा निघ० १ १६]

त्रिशोकः त्रिषु दुष्टगुणकर्मस्वभावेषु शोको यस्य विदुष स १ ११२ १२ [त्रि-शोकपदयो समास । शोक =शुच शोके (भ्वा०) धातोर्घञ्]

त्रिषधस्थ ! त्रिषु समानस्थानेषु वर्त्तमान (राजादि-जन) ६ ८ ७ त्रिभि प्रजा-भृत्याऽमात्यैर्जनै सह पक्षपात-रहितस्तिष्ठति तत्सम्बुद्धौ (राजन्) ६ १२ २ **त्रिषधस्थः**= त्रिषु भूम्यन्तरिक्षसूर्यलोकेषु त्रिविधेषु समानस्थानेषु वर्त्तमान (यजत्र =राजा) ६ १२ २ त्रिषु समानस्थानेषु कर्मोपासनाज्ञानेषु वा तिष्ठति (बृहस्पति =सूर्यो विद्वान् वा) ४ ५० १ **त्रिषधस्थे**=त्रीणि भू-जलपवनाख्यानि स्थित्यर्थानि स्थानानि यस्मिँस्तस्मिन् (बर्हिषि=अन्तरिक्षे) १ ४७ ४ त्रिभि सहस्थाने (विद्याधर्म-पुरुषार्थाख्ये) ५ ११ २ [त्रिसधोपपदे ष्ठा गतिनिवृत्तौ (भ्वा०) धातो क प्रत्यय । त्रिसध=त्रि-सहपदयो समासे सहस्थाने सधादेश 'सध मादस्थयोश्छन्दसि' अ० ६ ३ ९६ सूत्रेण]

त्रिषधस्था त्रिषु समानस्थानेषु या तिष्ठति सा (वाक्) ६ ६१ १२ [त्रिसधस्थ व्याख्यातम् । तत स्त्रिया टाप्]

त्रिषु त्रिविधेषु (पदेषु=नामस्थानजन्माख्येषु) २३ ४९ वेदरीत्या कर्मोपासनाज्ञानेषु १५ ६० भूत-भविष्यद्वर्त्तमानेषु कालाऽवयवेषु १२ ५५ [त्रिसख्यावाचिन सप्तम्या बहुवचनम्]

त्रिष्टुप् एतच्छन्दोऽभिहित विज्ञानम् १० ११ या-ऽऽध्यात्मिकाऽऽधिभौतिकाऽऽधिदैविकानि त्रीणि सुखानि स्तोभते स्तभ्नाति सा (छन्दोऽर्थविज्ञापनम्) २३ ३३ त्रीणि कर्मोपासनाज्ञानानि स्तुवन्ति यया सा (छन्द) १४ १० यया त्रीणि सुखानि स्तोभति सा (छन्द) १४ १८ **त्रिष्टुभे**=त्रयाणा शारीरिकवाचिक-मानसाना सुखाना स्तम्भनाय स्थिरीकरणाय २४ १२ [त्र्युपपदे स्तोभति अर्चतिकर्मा (निघ० ३ १) धातो क्विप्प्रत्यय त्रिष्टुप् स्तोभत्युत्तरपदा । का तु त्रिता स्यात् । तीर्णतम छन्द । त्रिवृद् वज्रस्तस्य स्तोभतीति वा । यत् त्रिरस्तोभत् तत् त्रिष्टुभस्त्रिष्टुप्त्वमिति विज्ञायते नि० ७ १२ त्रिवृद् वज्रस्तस्य स्तोभमित्येत्यौपमिकम् दे० ३ १६ वज्रस्तेन यत्त्रिष्टुप् ऐ० २ १६ वज्रस्त्रिष्टुप् कौ० ७ २ श० ३ ६ ४ २२ त्रैष्टुभो वज्र. गो० उ० ९ १८ त्रिष्टुब् इन्द्रस्य वज्र ऐ० २ २ त्रैष्टुभ इन्द्र कौ० ३ २ २२ ७ इन्द्रस्त्रिष्टुप् श० ६ ६ २ ७ ऐन्द्र त्रैष्टुभ माध्यन्दिन सवनम् गो० उ० ४ ४ ऐन्द्र हि त्रैष्टुभ माध्यन्दिन सवनम् कौ० २६ २ त्रैष्टुभ वै माध्यन्दिन सवनम् ऐ० ६ ११ त्रैष्टुभ माध्यन्दिन सवनम् ष० १ ४ एते वाव छन्दसा वीर्यवत्तमे यद् गायत्री च त्रिष्टुप् च ता० २० १६ ८ वीर्य वै त्रिष्टुप् ऐ० ६ १५ ष० १ ७ वीर्य त्रिष्टुप् ऐ० १ २१, ४ ३, ११ बल वै वीर्य त्रिष्टुप् कौ० ७ २, ८ २ ११ २, १६ १ गो० उ० ५ ५ बल वीर्य पुरस्तात् त्रिष्टुप् कौ० ११ २ ओजो वा इन्द्रिय वीर्य त्रिष्टुप् ऐ० १ ५, ८ २ इन्द्रिय वै वीर्य त्रिष्टुप् तै० १ ७ ६ ८ इन्द्रिय वै त्रिष्टुप् तै० १ ७ ६ २ उरस्त्रिष्टुप् ष० २ ३ उरस्त्रिष्टुभ श० ८ ६ २ ७ वृषा त्रिष्टुप् कौ० २० ३ त्रिष्टुप् छन्दा वै राजन्य तै० १ १.६ ६ त्रैष्टुभो वै राजन्य ऐ० १ २८,८ २ (राजन्यस्य) त्रिष्टुप् छन्द । ता० ६ १ ८ क्षत्रस्यैवैतच्छन्दो यत् त्रिष्टुप् कौ० १० ५ क्षत्र वै त्रिष्टुप् कौ० ७ १० ब्रह्म गायत्री क्षत्र त्रिष्टुप् श० १ ३ ५ ५ क्षत्र त्रिष्टुप् कौ० ३ ५ श० ३ ४ १ १० अथैतदधीतरस शुक्रिय छन्दो यत्त्रिष्टुप् ऐ० ६ १२ त्रिष्टुवेव मह गो० पू० ५ १५ या राका सा त्रिष्टुप् ऐ० ३ ४७ त्रिष्टुब्भीयम् (पृथिवी) श० २ २ १ २० त्रैष्टुभो हि वायु श० ८ ७ ३ १२ त्रैष्टुभेऽन्त-रिक्षलोके त्रैष्टुभो वायुरध्यूढ कौ० १४ ३ यजुषा वायुर्देवत तदेव ज्योतिस्त्रैष्टुभ छन्दोऽन्तरिक्ष स्थानम् गो० पू० १ २९ त्रैष्टुभोऽन्तरिक्षलोक कौ० ८ ९ त्रैष्टुभमन्तरिक्षम् श० ८ ३ ४ ११ अन्तरिक्ष त्रिष्टुप् जै० उ० १ ५ ३. अन्त-रिक्षमु वै त्रिष्टुप् श० १ ८ २ १२ अन्तरिक्षे विष्णुर्व्यक्रस्त त्रैष्टुभेन छन्दसा ततो निर्भक्तो योऽस्मान् द्वेष्टि य च वय द्विष्म श० १ ९ ३ १० त्रिष्टुबसौ (द्यौ) श० १ ७ २ १५ असावुत्तम (लोक =द्युलोक) त्रिष्टुप् ता० ७ ३ ९ त्रैष्टुभो वा एष य एष (सूर्य) तपति कौ० २५ ४ त्रैष्टुब्जागतो वा आदित्य ता० ४ ६ २३ त्रैष्टुभा पशव कौ० ८ १ १० २ अपान त्रिष्टुप् ता० ७ ३ ८ यऽएवाय प्रजनन प्राण एष त्रिष्टुप् श० १० ३ १ १ त्रैष्टुभ चक्षु ता० २० १६ ५ आत्मा वै त्रिष्टुप् श० ६ ४ २ ६ आत्मा त्रिष्टुप् श० ६ २ १ २४, ६ ६ २ ७ आत्मा त्रिष्टुभ श० ८ ६ २ ३ त्रैष्टुभ पञ्चदशस्तोम ता० ५ १ १४ एतद्वै बृहत स्वमायतन यत् त्रिष्टुप् ता० ४ ४ १० त्रैष्टुभ वै बृहत् ता० ५ १ १४ त्रैष्टुभो ब्राह्मणाच्छꣳसी ता०

त्रिवत्सा त्रयो वत्सा यस्या सा (गौ) १८ २६ [त्रि-वत्सपदयो समासे स्त्रिया टाप्]

त्रिवयाः त्रीणि वयासि यस्य स (ब्रह्मचाग्जिन) २ ३१ ५ [त्रि-वयस्पदयो समास]

त्रिवरूथम् त्रीणि वरूथानि गृहाणि यस्मिन् (शर्म=सुसुख गृहम्) ४ ५३ ६ शीतोष्णवर्षासूत्तमम् (छर्दि = गृहम्) ६ ४६ ६. **त्रिवरूथः**=त्रिषु भूम्यधोऽन्तरिक्षेषु वरूथानि गृहाणि यस्य स (देव =विद्वज्जन) २१ ५५ त्रीणि त्रिविधसुखप्रदानि वरूथानि गृहाणि यस्य स (इन्द्रो देव =ऐश्वर्यमिच्छुको जीव) २८ १६ त्रीण्युत्तम-मध्यम-निकृष्टानि वरूथा गृहाणीव निवासस्थानानि यस्य स (अग्नि =परमेश्वर) ६ १५ ६ त्रीणि वरूथान्याध्या-त्मिकाऽऽधिदैविकाऽऽधिभौतिकानि सुखानि यस्मिन् स (भा० राष्ट्र) १५ १ **त्रिवरूथेन**=त्रीणि त्रिविधानि शीतोष्ण-वर्षासुखकराणि वरूथानि गृहाणि यस्य तेन (राजा) ६ २६ ७ त्रिषु वर्षाहिमन्तग्रीष्मसमयेषु वरूथेन वरेण (गृहेण) ५ ४ ८ [त्रि-वरूथपदयो समास । वरूथ =वृञ् वरणे (स्वा०) धातो 'जॄवृञ्भ्यामूथन्' उ० २ ६ सूत्रेण ऊथन् प्रत्यय । वरूथम्=गृहनाम निघ० ३ ४]

त्रिविष्टि आकाशे ४ ६ ४ त्रिविधे सुखप्रवेशे ४ १५ २ [त्रि-विष्टिपदयो समास । विष्टि =विश प्रवेशने (तुदा०) धातो क्तिन्]

त्रिविष्टिधातु त्रिधोत्तम-मध्यम-निकृष्टा विष्टयो व्याप्तयो धातूना पृथिव्यादीना यस्मिंस्तत् (प्रतिमान= जगत्) १ १०२ ८ [त्रिविष्टि-धातुपदयो समास]

त्रिवृत् यस्त्रिभि कर्मोपासनाज्ञानैर्वर्त्तते स (विद्वान् पुरुष) १३ ५४ यस्त्रिधा वर्त्तते (विद्युत्) १५ १० त्रिभिर्मनोवाक्छरीरबलाना बोधकारक (स्तोम) १० १० यस्त्रिभि सत्वरजस्तमोगुणै सह वर्त्तते तस्याव्यक्तस्य वेत्ता, भा०—पृथिव्यादिपदार्थाना गुणकर्मस्वभावविज्ञाता विद्वान् १५ ६ य कर्मोपासनाज्ञानेषु साधकत्वेषु वर्त्तते (विद्वज्जन) १ १४० २ त्रीणि कर्मोपासनाज्ञानानि वर्त्तन्ते यस्मिंस्तत् (शिर) १२ ४ यस्त्रिभि कायिक-वाचिक-मानसै साधनै शुद्ध वर्त्तते (स्तोम) १४ २४ शीते चोष्णे द्वयो-र्मध्ये च वर्त्तते स (चतुष्टोम =संवत्सर) १४ २३ **त्रिवृता**=त्रिभि शिल्पक्रियाप्रकारै संपूरितस्तेन (श्येन) १ ४७ २ यस्त्रिषु कालेषु वर्त्तते तेन (ऋतुना) २१ २३ स्थावरणेन (श्येन) १ ११८ २ यस्त्रिषु स्थलजलान्तरिक्षेषु पूर्णगत्या गमनाय वर्त्तते तेन (श्येन=विमानादियानस्व-रूपेण) १ ३४ १२ **त्रिवृते**=यस्त्रिभि सत्वरजस्तमो-गुणैर्युक्तस्तस्मै (अग्नये=पावकाय) २६ ६०. ['त्रि' इत्युप-पदे वृतु वर्त्तने (भ्वा०) धातो क्विप्प्रत्यय । त्रिवृत् वज्र नि० ७ १२ त्रिवृत् (स्तोम) । वायुर्वाऽआशुस्त्रिवृत्स एषु त्रिषु लोकेषु वर्तते श० ८ ४ १ ६ तान् (पशून्) अग्निस्त्रिवृता स्तोमेन नाप्नोत् तै० २ ७ १ ८ १ त्रिवृदग्नि श० ६ ३ १ २५ अग्निर्वै त्रिवृत् तै० १ ५ १० ४ त्रिवृद्वा अग्निर्ज्वाला अर्चिर्धूम इति कौ० २८ ५ तेजो वै त्रिवृत् ता० २ १७ २ तेजो वै स्तोमाना त्रिवृत् ऐ० ८ ४ तेजो वै त्रिवृद् ब्रह्मवर्च-सम् ता० १७ ६ ३ त्रिवृदेव स्तोमो भवति तेजसे ब्रह्मवर्चसाय ता० ११ १ ७ ब्रह्मवर्चस वै त्रिवृत् तै० २ ७ १ १ त्रिवृदेव भर्ग गो० पू० ५ १५ ब्रह्म वै स्तोमाना त्रिवृत् ऐ० ८ ४ ब्रह्म वै त्रिवृत् ता० २ १६ ४, १६ १७ ३, २३ ७ ५ शिर एव त्रिवृत् गो० पू० ५ ३ तस्मात् त्रिवृत् स्तोमाना मुखम् ता० ६ १ ६ मुख वै त्रिवृत्स्तोमानाम् ता० १७ ३ २ यत् त्रिवृद्-भवति यदेवास्य (यजमानस्य) मुखतोऽपूत तत्तेनापहन्ति ता० १७ ५ ६ प्राणो वै त्रिवृत् ता० ६ २ २, ६ ३ ४, ६ ८ १५ प्राणा वै त्रिवृत् ता० २ १५ ३, २ ६ ३ प्राणा वै त्रिवृत् स्तोमाना प्रतिष्ठा ता० ६ ३ ४ एष (त्रिवृत्) हि स्तोमानामाशिष्ठ श० ८ ४ १ ६ त्रिवृद् वै स्तोमाना क्षेपिष्ठ प० ३ ८ ता० १७ १२ ३ वज्रो वै त्रिवृत् त्रिवृद् बर्हिर्भवति तै० १ ६ ३ १ वसन्तेनर्त्तुना देवा वसव-स्त्रिवृता स्तुतम् । रथन्तरेण तेजसा हविरिन्द्रे वयो दधु तै० २ ६ १६ १ त्रिवृच्च त्रिणवश्च राथन्तरौ तावजश्चाश्व-श्चान्वसृज्येता तस्मात्तौ राथन्तर प्राचीन प्रधूनुत ता० १० २ ५ अग्र वै मुख त्रिवृत् स्तोमानाम् जै० २ २१७ इमे वै (त्रय) लोकास्त्रिवृत जै० १ २१२ तद्ध वा आहु-र्ब्रह्म वै त्रिवृद्, ब्रह्म गायत्री जै० ३ ३३८ तस्य (अग्नि-ष्टोमस्य) त्रिवृत् प्रात सवनम् मै० ४ ४ १० त्रिवृता तेज-स्कामो ब्रह्मवर्चसकामोऽग्निष्टुता यजेत जै० २ १३६ त्रिवृता ब्रह्मवर्चसेन (देवा) ···ज्योतिरदधु जै० १ ६६ त्रिवृता वै स्तोमेन प्रजापति प्रजा असृजत मै० ३ ६ ७ त्रिवृति प्रातस्सवने पञ्चदशमच्छावाकस्याज्यम् जै० २ १३१ त्रिवृतैव ब्राह्मण श्रेष्ठता गच्छति, पञ्चदशेन राजन्य जै० २ १३२ त्रिवृत् त्रिपामा जै० ३ १३ गुप्त वै त्रिवृत् स्तोमानाम् जै० २ १३५ न्यून वै त्रिवृत् जै० २ ८६]

त्रिवृत्तम् कर्मोपासनाज्ञानयुक्तम् (स्तोमम्) ६ ३३ [त्रि-वृत्तपदयोः समास]

त्रिशता त्रीणि शतानि येषु (शङ्कव = कीला) १ १६४ ४८ त्रीणि शतानि १ १६४ ४८, ऋ० सू० [त्रि-

स एव (दास =सेवक) १ १५८ ५. [त्र्युपपदे तनु विस्तारे (तना०) धातो क्विप् । तत स्वार्थेऽण्प्रत्यय]

त्रैयम्बकाः त्रिष्वधिकारेष्वम्बक लक्षण येषान्ते (गवादय) २४ १८ [त्रि-अम्बकपदयो समासे प्रज्ञादेराकृतिगणत्वात् स्वार्थेऽण् । त्र्यम्बकपदे द्रष्टव्यम्]

त्रैवृष्णः यस्त्रिपु वर्षति स एव (विद्वज्जन) ५ २७ १ [त्र्युपपदे वृषु सेचने (भ्वा०) धातोरौणादिक कनिन्प्रत्यय । तत स्वार्थेऽण् । प्रत्ययस्थाकारलोपश्छान्दस]

त्रैष्टुभम् त्रिभि सुखै सम्बद्धम् (छन्द) १२ ५. त्रिष्टुभा व्याख्यातमर्थजातम् (छन्द) ३८.६ त्रिष्टुभम् २ ४३ १ त्रिष्टुभि भवम् (अर्थम्) १ १६४ २३ **त्रैष्टुभः**= त्रिष्टुप्प्रगाथोऽस्य स (भाग =अग) ४ २४ **त्रैष्टुभात्**= त्रिष्टुप्-छन्दो वाच्यात् (मन्त्रात्) १ १६४ २३ **त्रैष्टुभाय**= त्रिष्टुप्छन्दसा प्रख्याताय (इन्द्राय=ऐश्वर्याय) २६ ६० **त्रैष्टुभेन**=त्रिष्टुप्-प्रोक्तेन (छन्दसा=स्वच्छेनाऽर्थेन) १३ ५३ त्रीणि कर्मोपासनाज्ञानानि स्तोभन्ते स्थिरीकुर्वन्ति येन (छन्दसा) ११ ६५ त्रिधा स्तुतेन (वचसा) ५ २६ ६ त्रिवेदविद्यास्तवनेन १ १६४ २४ त्रिष्टुभा निर्मितेनाऽर्थेन (छन्दसा=स्वच्छन्देन) ११ ६ त्रिष्टुवेव त्रैष्टुभ त्रिविधसुखहेतुस्तेन (छन्दसा) २ २५ त्रिष्टुप्-प्रकाशिनेनाऽर्थेन (छन्दसा) २३ ८ त्रिष्टुप्-प्रगाथोऽस्य तेन (छन्दसा= सुखकारकेण व्यवहारेण) ५ २ [त्रिष्टुविति व्याख्यातम् । ततो भवार्थेऽण् स्वार्थे वा । 'सोऽस्यादिरिति०' अ० ४ २ ५५ सूत्रेण वा छन्दस प्रगाथेपु अण्प्रत्यय]

त्र्यक्षरेण दैव्याऽनुष्टुभा (छन्दसा) ९ ३१ [त्रि अक्षरपदयो समास । छन्दोनाम]

त्र्यनीकः त्रीणि त्रिगुणान्यनीकानि सैन्यानि यस्य स (राजा) ३ ५६ ३ [त्रि-अनीकपदयो समास । त्र्यनीक (अग्नि) इति सवनान्येवानीकानि ऐ० ३ ३९]

त्र्यम्बकम् त्रिष्वम्बक रक्षण यस्य रुद्रस्य परमेश्वरस्य यद्वा त्रयाणा जीवकारण कार्याणामम्बको रक्षकस्तम् (रुद्रम्=ईश्वरम्) ७ ५९ १२ सर्वाध्यक्षम् (ईश्वरम्) ३ ६० अमति येन ज्ञानेन तदम्ब, त्रिपु कालेष्वेकरस ज्ञान यस्य तम् (रुद्र=परमेश्वरम्), प्र०—अत्र 'अम गत्यादिपु' अस्माद् बाहुलकेन करणकारके व प्रत्ययस्तत 'शेपाद्विभाषा' अ० ५ ४ १५४ इति समासान्त कप्-प्रत्यय ३ ५८ [अम्बिका ह वै नामास्य (रुद्रस्य) स्वसा, तयास्यैप सहभागस्तद्यदस्यैप स्त्रिया सह भागस्तस्मात् तस्मात् त्र्यम्बका (पुरोडाशा) नाम श० २ ६ २ ९ त्र्यम्बको रुद्र नि० १३ ३५ रुद्रास्त्र्यम्बका काठ० ३६ १४ त्र्यम्बकास्तृतीयसवनमकुर्वत तै० स० ३ २ २ ३ तृतीयसवने त्र्यम्बकान् (प्रवाकल्पयन्) काठ० २३ ७ अप्रतिष्ठिनास्त्र्यम्बका काठ० ३६ १४]

त्र्यरुणः त्रीणि मन शरीरात्म-सुखान्यृच्छति (विद्यार्थी) ५ २७ ३ त्रयोऽरुणा गुणा यस्य स (विद्वान् जन) ५ २७ १ [त्रि-अरुणपदयो. समास. । अरुण =ऋ गतिप्रापणयो (भ्वा०) धातो 'अर्त्तेश्च' उ० ३ ६० सूत्रेण उनन्प्रत्यय]

त्र्यवयः त्रिविधाश्च ता अवयश्च ता २४ ५ तिस्रो ऽवयो येषा ते (पशुपालका जना) २४ १२ **त्र्यविम्**= या त्रिधाऽवति ताम् (गाम्=पृथिवीम्) २८ २४ कार्यकारणजीवाख्यानि त्रीणि वस्तूनि यो रक्षति तम् (नियन्तारमीश्वरम्) ३ ५५ १४ **त्र्यविः**=त्रयाणा शरीरेन्द्रियाऽऽत्मनामवी रक्षण यस्मात् स (गौ =विद्वज्जन) २१ १२ त्रयोऽव्यादयो यस्मात् तम् (वृद्धियुक्त पुरुषम्) १४ १० तिस्रोऽवयो यस्य स (जन) १८ २६ [त्रि-अविपदयो समास. । अव रक्षणगत्यादिपु (भ्वा०) धातोरौणादिक इन्प्रत्यय]

त्र्यवी तिस्रोऽवयो यस्या सा (स्त्री) १८ २६ [त्रि-अविपदयो समासे स्त्रिया 'कृदिकारादक्तिन' वा० सूत्रेण ङीप्]

त्र्यायुषम् त्रीणि च तान्यायूपि च त्र्यायुष बाल्ययौवनवृद्धावस्थासुखकरम् (आयु) प्र०—इद पदम् 'अचतुरविचतुर०' अ० ५ ४ ७७ इति सूत्रे समासान्तत्वेन निपातितम् ३ ६२ पूर्वोक्त त्रिगुणमायु, प्र०—'एतेर्णिच्च' उ० २ ११८ अनेनेण् धातोरुसि प्रत्ययो णित्वाद् वृद्धि 'ईयते प्राप्यते यत्तदायु ३ ६२ विद्याशिक्षापरोपकारसहित त्रिगुणमायु ३ ६२ ब्रह्मचर्य-गृहस्थ-वानप्रस्थाऽऽश्रम-सुखसम्पादक त्रिगुणमायु ३ ६२ त्रिगुणमर्थात् त्रीणि शतानि वर्षाणि यावत्तावदायु:, ऋ० भू० ८१, ३ ६२ तिगुणी अर्थात् तीन सौ वर्ष पर्यन्त (नेत्र-ज्योति) स० प्र० ४१६, ३ ६२ [त्रि-आयुस्पदयो समासे 'अचतुरविचतुर०' अ० ५ ४ ७७ सूत्रेण समासान्तोऽच् निपात्यते । आयुस्= इण् गतौ (अदा०) धातो 'एतेर्णिच्च' उ० २ ११८ सूत्रेण उसि प्रत्ययो णिच्च]

त्र्याशिरः यास्त्रिभिर्जीवाग्नि-वायुभिरश्यन्ते भुज्यन्ते ता (वाच) ५ २७ ५ [त्रि-आशिरपदयो समास । आशिर =आङ्पूर्वाद् अश भोजने (क्र्या०) धातोरौणादिक किरच् प्रत्यय]

५ १ १४ नागगग्या त्रिष्टुप् (अपुनीत) जै० उ० १ ५७ १ त्रिष्टुब् दक्षिणा (दिक्) श० ८ ३ १ १२ त्रिष्टुब् रुद्राणा पत्नी गो० उ० २ ९ रुद्रास्त्रिष्टुभ समभरन् जै० उ० १ १८ ५ यत्यैकादश ताम्त्रिष्टुभम् कौ० ६ २ एकादशाक्षरा वै त्रिष्टुप् कौ० ३ २, १० २ ता० ६ ३ १३ ऐ० ३ १२,८ २ श० १ ३ ५ ५ गो० उ० १ १८,३ १० एकादशाक्षरा त्रिष्टुप् तै० ३ ८ १२ १ चतुश्चत्वारिंशदक्षरा वै त्रिष्टुप् श० ८ ५ १ ११ चतुश्चत्वारिंशदक्षरा त्रिष्टुप् कौ० १६ ७ जै० उ० ४ २ ५]

त्रिष्टुप्छन्दसम् त्रिष्टुप्छन्दोऽर्थ-बोधयितारम्, (अध्यापकम्) ८ ४७ [त्रिष्टुभ्-छन्दस्पदयो समास । ततोऽधीते वेद वार्ये जातस्य प्रत्ययस्य लुक् छान्दसम् । राजन्यस् त्रिष्टुप्छन्दा जै० १ ६८ सुपर्णोऽसि त्रिष्टुप्छन्दा तै० स० ३ २ १.१]

त्रिष्ठम् त्रिषु शरीराऽऽत्म-मन सुखेषु तिष्ठतीति (सौभगत्वम्) १ ३४ ५ [त्र्युपपदे ष्ठा गतिनिवृत्तौ (भ्वा०) धातो क प्रत्यय]

त्रिष्ठिनम् ये त्रिषु जल-स्थलाऽन्तरिक्षेषु तिष्ठन्ति ते त्रिष्ठा, बहवस्त्रिष्ठा विद्यन्ते यस्य तम् (भा०—यान-गमक पुरुषम्) ३० १४ [त्रिष्ठ व्याख्यातम् । ततो भूम्नि इन्-प्रत्यय । 'स्थास्थिन्स्थृणामिति वक्तव्यम्' अ० ८ ३ ९७ वा० सूत्रेण षत्वम्]

त्रिसधस्थः त्रिषु य कर्मोपासनाज्ञानेषु स्थित (विद्वान् जन) १ १५६ ५ ['त्रिषधस्थपदे' द्रष्टव्यम्]

त्रिसप्तसमिधः अस्य ब्रह्माण्डस्यैकविंशतिसमिध कारणानि बुद्ध्यन्त करण जीवश्चैका सामग्री परमसूक्ष्मत्वात्, दशेन्द्रियाणि, पञ्चतन्मात्रा पञ्चभूतानि च, ऋ० भू० १२८, ३१ १५. [त्रिसप्त-समिध्-पदयो समास]

त्रिसप्तैः एकविंशत्या (सत्वभि =पदार्थै) १ १३३ ६ [त्रि-सप्तन्पदयो समास]

त्रिंशत् आकाश द्या च वर्जयित्वा सर्वान् भूम्यादीन् पदार्थान् ६ ५९ ६ त्रिंशत्संख्याकानि पृथिव्यादीनि, त्रयस्त्रिंशतो वस्वादीना देवाना मध्ये पठितानि, अन्तरिक्षमादित्यमग्निं च विहाय (धाम =धामानि) ३ ८ एतत्सङ्ख्याकान् (मुहूर्त्तान्) ३३ ९३ **त्रिंशतम्**=एतत्संख्यातम् (शत्रुसमुदायम्) ४ ३० २१ **त्रिंशता** एतत्संख्याकै (नियुद्भि =गतिभि) भा०—अनेकाभिर्गतिभि २७ ३३ ['पङ्क्तिविंशतित्रिंशत्०' अ० ५ १ ५९ सूत्रेण त्रयाणा दशाता त्रिन् भाव शच्च प्रत्ययो निपात्यते]

त्रिंशच्छतम् त्रिंशच्छतानि यस्मिन् (सङ्गमे) ६ २७ ६ [त्रिंशत्-शतपदयो समास]

त्रिः त्रिवारम् ४ १ ७ [त्रिप्राति० क्रियाभ्यावृत्तिगणने सुच्प्रत्यय]

त्री त्रीणि (योजनानि) ३४ २४ त्रीणि त्रिप्रकारकाणि (रजासि=लोकान्) ४ ५३ ५ [त्रिप्राति० नपुंसकलिंगे प्रथमाबहुवचने शेर्लोप]

त्रीणि तीन (ज्योतींषि=अग्नि वायु और सूर्य को) आर्याभि० २ १४, ८ ३६ विद्यादि व्यवहारो की वृद्धि के लिए तीन प्रकार की राजसभा, धर्म सभा और विद्यासभा, स० वि० १८२, ३ ३८ ६. त्रिविधानि (पदा=पदानि) १ २२ १८ उत्पत्ति-स्थिति-प्रलया काला वा ३२ ९ त्रिविधानि शरीरात्म-मन सुखकराणि (आयूपि=जीवनानि) ३ १७ ३ त्रिप्रकारकाणि (रोचना=ज्योतींषि) ४ ५३ ५ भूम्यन्तरिक्ष-सूर्यरूपेण त्रिविध जगत् ३४ ४३ **त्रीणाम्**=त्रयाणा सकाशात् (मित्रार्यमावरुणानाम्), प्र०—अत्र 'वाच्छन्दसि सर्वे' विधयो भवन्ति, इति 'त्रेस्त्रय' इति त्रयादेशो न ३ ३१ **त्रीन्**=अधोमध्योर्ध्वस्थान् (समुद्रान्=लोकान्) अ०—शारीरिक-वाचिक-मानसानि त्रिविधानि १३ ३१ जन्म-स्थान-नामवाच्यान् (लोकान्) ६ ३१ [सख्यावाचिनस् त्रिप्राति० रूपाणि । 'त्रीणाम्' प्रयोगे 'त्रेस्त्रय' अ० ७ १ ५३ सूत्रेण त्रयादेशो न भवति छान्दसत्वात्]

त्रैताय त्रयाणा भवाय ३० १८ [त्रिप्राति० तल्-प्रत्यय । इकारस्यैकारश्छान्दस । उत्तिष्ठस्त्रेता भवति ऐ० २ १५.]

त्रेधा त्रिभि प्रकारै १ १५४ १ त्रिप्रकारै १ १८१ ६ त्रिप्रकारकम् (पद=जगत्) १ २२ १७ त्रिप्रकारकाणि (रजासि=लोकान्) भा०—पृथिवीसूर्यत्रसरेणुभेदेन त्रिविध जगत् ५ १८ [त्रिप्राति० विधार्थे धाप्रत्यय । इकारस्यैकारश्छान्दस । त्रेधा त्रिधा नि० १२ १९]

त्रेधा इव यथा त्रिभि पठनपाठन-हस्तक्रियादिभि प्रकारैस्तथा, प्र०—इवेन सह नित्यसमासो विभक्त्यलोप पूर्वपदप्रकृतिस्वरत्वञ्च, अ० २ १४ अत्र सायणाचार्येण त्रेधैव त्रिभिरेव प्रकारैरित्येव सर्वोऽशुद्धो व्याख्यान । पदपाठ इव-शब्दस्य प्रत्यक्षत्वात् १ ३४ ४ [त्रेधा-इवपदयो समास]

त्रैतन यस्त्रीणि शरीरात्ममनोजानि सुखानि तनोति

सद्यो जातशिशुस्याऽश्वस्य २६ ६ सुखप्रकाशकस्य (ईश्वरस्य) १३ ५० **त्वष्ट्रा**=सर्वदुःखच्छेदकेन गुणेन ८ १० प्रतापिना सूर्येणेव न्यायेन १० ३० **त्वष्ट्रे**=प्रकाशकाय (जनाय) २२ २० विद्याप्रकाशकाय (विद्वज्जनाय) २२ २० प्रकाशाय, प्र०—त्विष उतोऽत्वम्, उ० २ ९५ अनेनाऽयं सिद्ध २२ २० [त्विष दीप्तौ (भ्वा०) धातो 'नप्तृनेष्टृत्वष्टृ०' उ० २ ९५ सूत्रेण तृन् तृच् वा प्रत्ययो निपात्यते । अथवा तच्छीलाद्यर्थेषु) त्विरेर्देवतायामकारश्चोपधाया अनिट्त्वञ्च' अ० ३ २ १३५ वा० सूत्रेण तृन् प्रत्यय । त्वष्टा तूर्णमश्नुते इति नैरुक्ता । त्विषेर्वा स्याद् दीप्तिकर्मण, त्वक्षतेर्वा स्यात् करोतिकर्मण । माध्यमिक (मध्यमे स्थाने भव । वायुर्वेन्द्रोऽन्तरिक्षस्थान) त्वष्टेत्याहुर्मध्यमे च स्थाने समाम्नात । अग्निरिति शाकपूणि नि० ८ १४ त्वष्टा वाग्वै त्वष्टा वाग्घीद ताष्टीव ऐ० २ ४ इन्द्रो वै त्वष्टा ऐ० ६ १० त्वष्टा वै पशूनामीष्टे श० ३ ८ ३ ११ त्वष्टुर्हि पशव श० ३ ८ ३ ११ त्वष्टा पशूना मिथुनाना रूपकृद् रूपपति तै० २ ५ ७ ४ त्वष्टा वै पशूना मिथुनाना रूपकृत् तै० ३ ८ ११ २ त्वष्टा वै पशूना रूपाणा विकर्त्ता ता० ६ १० ३ त्वष्टा हि रूपाणि विकरोति तै० २ ७ २ १ त्वाष्ट्राणि वै रूपाणि । श० २ २ ३ ४ त्वष्टा वै रूपाणामीशे तै० १ ४ ७ १ त्वष्टा वै रूपाणामीशे तै० १ ८ ७ १ त्वष्टा वै रूपाणामीष्टे श० ५ ४ ५ ८ त्वष्ट्रा रूपेण तै० १ ८ १ ७ त्वष्टा (श्रिय) रूपाणि (आदत्त) श० ११ ४ ३ ३ त्वष्टा वै रेत सिक्त विकरोति कौ० ३ ९ श० १ ९ २ १० रेत सिक्तिर्वै त्वाष्ट्र कौ० १९ ६ त्वष्ट समिधा पते तै० ३ ११ ४ १ त्वष्टुर्ह वै पुत्र । त्रिशीर्षा षडक्ष आस तस्य त्रीण्येव मुखान्यासुस्तद्यदेव रूप आस तस्माद् विश्वरूपो नाम श० १ ६ ३ १, ५ ५ ४ २ त्वाष्ट्र दशकपाल पुरोडाश निर्वपति श० ५ ४ ५ ८ (श्री) त्वाष्ट्र दशकपाल पुरोडाश (अपश्यत्) श० ११ ४ ३ ५ (प्रजापति) त्वाष्ट्रमेव (आलिप्सत) श० ६ २ १ ५ वारुणी च हि त्वाष्ट्री चावि श० ७ ५ २ २० त्वाष्ट्र वडवमालभेत प्रजाकाम गो० उ० २ १ सवत्सरो वै त्वष्टा मै० ४ ४ ७ वाग्वै त्वष्टा, वाग्घीद सर्व ताष्टीव ऐ० २ ४ त्वष्टा यजमान काठ० ७ १०]

त्वष्टृमान् त्वष्टार उत्तमा शिल्पिनो विद्यन्ते यस्य स (इन्द्र =राजा) ६ ५२ ११ **त्वष्टृमन्त.**=बहवस्त्वष्टार प्रकाशात्मान पदार्था विद्यन्ते येषु ते (जना स्त्रियो वा) ३७ २० [त्वष्टृप्राति० भूम्नि प्रशसाया वा मतुप्]

त्वष्टेव उत्तम शिल्पीव (विद्वान् -पूर्णविद्या जन) ४ ४२ ३ [त्वष्टृ-इव-पदयो समास]

त्व: अन्यो द्वितीयो वा १ १४७ २ कश्चित् मित्र १२ ४२ जो विद्वान् से भिन्न (अविद्वान्) स० प्र० ६०, १० ७१ ४ [त्व इति विनिग्रहार्थीय सर्वनामानुदात्तम् । अर्धनामेत्येके नि० १ ७ तं त्वा दे नि० १ ८. त्वा देव त्वष्टारस्य तोऽजतन नि० ३ २०]

त्वाङ्कामया यया त्वा कामयते तया (गिरा =वाण्या), अत्र द्वितीयैकवचनस्याऽलुक् १८ ११७ [युष्मद्-कामयापदयो समास । 'प्रत्ययोत्तरपदयोश्च' इति त्वादेश]

त्वादत्तेभिः त्वया दत्तैः (भेषजैः —औषधैः) २ ३३ २ [युष्मद् दत्तपदयो समास । 'बहुल छन्दसि' सूत्रेण भिस ऐस् न भवति]

त्वादातम् त्वया शोधित तेन सुवर्ण वा (नव = द्रव्यम्) १ १० ७ त्वया शोधितम् धन =आरोग्यकरसुवर्णमन्न धन वा) ३ ८० ९ त्वया दानवम् (पशुम्) ५ ७.१० [युष्मद्-आदातपदयो समास । आदातम्—आङ्—दुदाञ् दाने (जु०) दैप् शोधने (भ्वा०) धातोर्वा क्त । छान्दसत्वाद् 'अच उपसर्गात्' इति त्वादेशो न भवति । त्वादातम्= त्वया दातव्यम् नि० ४ ८]

त्वाद्रूतास त्व दूतो येषा ते (विद्वासो जना) २ १० ९ [युष्मद्-दूतपदयो समासे जसोऽसुक्]

त्वायत. त्वामात्मान त्वाऽऽत्मान इच्छत (जन्तु = स्तोतृजनस्य) १ ५३ ३ त्वा कामयमानान् (दाशुष = दातृजनान्) २ २ २ **त्वायता**=त्वा प्राप्तेन (मनसा — विज्ञानेन) ६ ८० ३ **त्वायन्त.**=त्वा कामयमाना (प्रजापुरुषा) ७ १८ १२ [युष्मद्-पदाद् इच्छायामर्थे क्यच् । 'प्रत्ययोत्तरपदयोश्चे' ति त्वादेश । 'न छन्दस्यपुत्रस्य' अ० ७ ४ ३५ सूत्रेणेत्त्वप्रतिषेध । क्यजन्ताच्छतृप्रत्यय]

त्वायव. त्वा न योग्या (गुणा =मूर्तिमन्त पदार्था) प्र०—'छन्दसीण, उ० १ १२ इत्युणादिके उणप्रत्यये कृते आयुरिति सिध्यति, त्वदित्यत्र 'छान्दसो वर्णलोपो वा, इत्यनेन तकारलोप । मूर्त्तपक्षे तन्निमित्तप्राप्ताऽऽयुप (मूर्त्तिमन्त पदार्था) १ ३४ त्वत्कामयमाना (जना) ३ ४१ ७ ये त्वा युवन्ति मिलन्ति ते (पदार्था) २० ८७ **त्वायुभि.**= त्वा कामयमानै (नृभि =नेतृभिर्जनै) ८ १६ १६ **त्वायु:**=त्वा कामयमान (प्रजाजन:) ६ ४७ १० [युष्मद्-पदाद् इच्छायामर्थे क्यचि 'क्याच्छन्दसि' सूत्रेण उ प्रत्यय । युष्मद्-आयुस्पदयोर्वा समास । युष्मद्-यवपदयोर्वा समास यव =यु मिश्रणेऽमिश्रणे च (अदा०) धातोरच् प्रत्यय]

त्र्युदायम् य मनोदेह-वचनैरुदायन्ति तम् (सोमम्=ऐश्वर्यम्) ४ ३७ ३ [त्रि-उदायपदयो समास । उदाय उत्-आङ् पूर्वाद् या प्रापणे (अदा०) धातो क प्रत्ययः]

त्र्युधा त्रीणि कारण-सूक्ष्म-स्थूलान्यूधासि यस्मिन् स (परमेश्वर), प्र०—अत्र वर्णव्यत्ययेन ह्रस्व ३ ५६ ३ [त्रि-ऊधस् पदयो समासे छान्दस ह्रस्वत्वम् । ऊवस्=वह प्रापणे (भ्वा०) धातोर्वाहु० औणा० असुनुप्रत्यय । धातो सम्प्रसारणे कृते दीर्घत्व धकारश्चान्तादेश]

त्वक् यस्त्वचति सवृणोति स (ईश्वर सूर्यो वायुर्वा) ४ ३० त्वचति सवृणोत्यनया सा १ १६. त्वग्वत्सेविनम् (व्यवहारम्) १ १४ स्पर्शेन्द्रियसुखम् ७ ४७ **त्वचम्**=त्वगिन्द्रियम् १ ७६ ३ शरीराऽवयवम् १ २२ सम्पर्कमिन्द्रियम् १ १३० ८ त्वगाच्छादक रक्षकवर्म ५ ३३ ७ आच्छादकम् (जनम्) १ १२६ ३ **त्वचः**=वाच ४ १७ १४ **त्वचा**=मास-रुधिरादीना सवरकेणेन्द्रियेण २५ ६ **त्वचि**=त्वगिन्द्रिये १ १४५ ५ उपरिभागे १६ ८२ सवरणे २३ ३७ **त्वचे**=शरीराऽऽवरणदाहाय, तदन्तराऽऽवरणदाहाय ३६ १० [तनु विस्तारे (तना०) धातो 'तनोतेरनश्च व' उ० २ ६३ सूत्रेण चिक्प्रत्यय । धातोरनुभागस्य स्थाने वकारादेश । त्वच् सवरणे धातोर्वा क्विप्प्रत्यय । त्वक् प्रस्ताव जै० उ० १ ३६ ६ त्वक् सूददोहा श० ८ १४ ५]

त्वक्षसा सूक्ष्मीकरणेन ६ १८ ६ शत्रुओ के बल के छेदक बल से, आर्याभि० १ ३२, ऋ० १ ७ १० १५ रवेन बलेन सामर्थ्येन, प्र०—त्वक्ष इति बलनाम, निघ० २ ६, १ १०० १५ तीव्रेण (वीर्येण=बलेन) ४ २७ २ [त्वक्ष बलनाम निघ० २ ६ त्वक्षू तनूकरणे (भ्वा०) धातोरौणादिकोऽसुनुप्रत्यय]

त्वक्षीयसा प्रदीप्तेन (वयसा=आयुषा) २ ३३ ६

त्वद्रिक् त्वा प्रति यतमान (अध्यापको जन) ५ ३ १२

त्वयतायै त्वया प्रयत्नेन साधितायै (इषे=इच्छासिद्धयेऽन्नप्राप्तये वा) ७ २१ १० यया त्वस्मिन् यतते तस्यै (इषे=अन्नाद्यै) ७ २० १० [युष्मद्-यतापदयो समास । 'प्रत्ययोत्तरपदयोश्च' सूत्रेण त्वादेश । यती प्रयत्ने (भ्वा०) धातोरौणादिकोऽन् प्रत्यये स्त्रिया टापि यताशब्द सिध्यति]

त्वष्ट: १ शत्रु-बलच्छेत (देव=दिव्यविद्यासम्पन्न सेनाध्यक्ष) ६ २० सर्वदु खच्छिन् (अ०—सभापते) ६ ७ देदीप्यमान (विद्वज्जन) २६ २४ विच्छेदक (विद्वज्जन) २ ३६ ३ छेदक (जन) ३ ४६ विद्याप्रापक (देव=विद्वज्जन) ७ २ ६ **त्वष्टा**=त्वक्षति तनूकरोति दु खानि, प्रलये सर्वान् पदार्थान् छिनत्ति वा स जगदीश्वर २ २४ निर्माता (बृहस्पति=परमेश्वर) २ २३ १७ विच्छेदकोऽग्नि १८ १७ सूर्य, ऋ० भू० २८३, १ ३२ २ सर्वतो विद्यया प्रदीप्त (विद्वान् जन) ४ ३१ ५ दु खविच्छेदक (ईश्वर) २१ ५५ छेत्ता (सेनापति) १ ८० १४ विविधरूपस्य निर्माता (पुरुष) २ ३ ६ रचनकर्त्ता (परमेश्वर), ऋ० भू० १३०, ३१ १७ प्रकाशक (देव=विद्वान् जन) ३ ५४ १२ तनूकर्त्ता (विद्वान् जन) १ १६१ ४ छेत्ता सूर्य इव विद्वान् १ १६१ ५ मेधाऽवयवाना मूर्त्तद्रव्याणा च छेत्ता (सूर्य) १ ५२ ७ विद्या-धर्मेण राजमानः (विद्वान् जन) १ १४२ १० विद्यया प्रकाशित ईश्वर २७ २० ज्ञाता (चतुरो जन) ४ ३३ ६ शिक्षक (विद्वान् जन) ४ ३३ ५ विद्याऽऽदि-सद्गुणै प्रकाशमान अ०—विद्वान् जन) २६ ६ विद्युदिव वर्तमानो विद्वान् (जन) २० ४४ प्रकाशयिता (सूर्य) १ ६१ ६ सर्ववस्तु-विच्छेदकोऽग्निरिव परीक्षको विद्वान् (जन) ७ ३५.६ स्वाऽऽत्मप्रकाशित (ईश्वर) २६ ६ दीप्तिमत्त्वेन छेदक (इन्द्र=सूर्य) १ ८५ ६ अविद्याच्छेदक (विद्वान् जन) ८ १६ वेगाऽऽदिगुणविद्यावित् (विद्वान् जन) ६ ८ सर्वव्यवहाराणा तनूकर्त्ता (अध्यापको गृहपति) ८ १४ सुखविस्तारक (गृहपति=गृहस्थो जन), भा०—दुखिना दु खच्छेदनम् ८ १७ प्रकाशमान (इन्द्र=सूर्य) १ १८६ ६ सुरूपसाधक (विद्वान् जन) १ १६२ ३ जेमे बिजली सब को व्याप्त हो रही है, वैसे तू (शुभानने=पत्नि), स० वि० १२१, अथर्व० १४ १ ५३ दीप्तिमत्त्वेन छेदक (इन्द्र=सूर्य), प्र०—'त्विषेर्देवतायामकारश्चोपधाया अनिट्त्वञ्च' अ० ३ २ १३५ अनेन वार्त्तिकेन त्विषधातोस्तृन् १ ८५ ६ **त्वष्टारम्**=तेजस्विनम् (शत्रु जनम्) ३ ४८.४ दोषविच्छेदकम्, भा०—रोगनिवारकम् (भिषज=वैद्यम्) २८ ६ देदीप्यमानम् (पुरुषम्) २६ ३० छेदनकर्त्तारं सूर्य शिल्पिन वा १ २२ ६ दु खाना छेदक सर्वपदार्थाना विभाजितार वा (परमात्मान भौतिकमग्नि वा) १ १३ १० वियोग-सयोगादिकर्त्तारम् (देव=विद्वाम जनम्) २६ ३४ दु खच्छेत्तारम् (भिषज=वैद्यवरम्) २१ ३८ **त्वष्टुः**=छेदकात् कालात् १ ६५ ५ विद्युतो वायोर्वा १ ६५ २. प्रदीप्तस्य (सूर्यादि) २५ ५ मूर्त्तद्रव्यच्छेदकस्य (अग्ने) १ ८४ ५ प्रकाशस्य ४ १८ ३ प्रदीप्ताच्छिक्षणात्, भा०—

(रूपम्) १ ११४ ५ विद्यान्यायदीप्तिमन्तम् (रुद्र = शत्रुयोद्धारम्) १ ११४ ४ प्रकाशितम् (वच = वचनम्), ५ ८ प्रकाशकम् (वच = शब्दनम्) ५ ८ प्रदीप्तम् (वच = परिभाषणम्) ५ ८ स्वकान्त्या प्रकृष्टम् (तम = अन्धकार) ३४ ३२ दीप्तिमत् (शर्ध = बलम्) ६ ४८ १५ कमनीयम् (रूपम्) १ ६५ ८ प्रकाशयुक्तम् (क्षत्र = धन राज्य वा) ५ ३४ ६ सूर्य्यदीप्तिम् १ १६८ ६ देदीप्यमानम् (शर्व = बलम्) ५ ५६ ९ अग्न्यादिप्रकाशवद्द्रव्ययुक्तम् (मारुत गण + मरुतामिम समूहम्) १ ३८ १५ **त्वेषस्य** = क्रोधाऽग्निना प्रदीप्तस्य (अघायो = दुष्टाचारिणो जनस्य) १६ ५० **त्वेषः** = प्रदीप्तस्वभाव (अग्नि) १ ६६ ३ यस्त्वेषति प्रदीप्तो भवति स (सभाध्यक्ष) १ ७० ६ दीप्तियुक्त (अग्नि = विद्यादिकार्यकारणस्य स्वरूप) २ ९ १. दीप्तिमान् (विद्वद्राजजन) ५ ८७ ५ देदीप्यमान (राजा) ६ ३ ८ **त्वेषाः** = विद्यासुशीलप्रकाशा १ १४३ ३ बाह्याभ्यन्तरघर्षणेनोत्पन्नविद्युदग्निना प्रदीप्ता (रुद्रियास = वायव) १ ३८ ७ [त्विष दीप्तौ (भ्वा०) धातोर्भावे घञ् प्रत्यय । अथवा कर्त्तरि अच्-प्रत्यय । औणादिको वा अन्प्रत्यय । त्वेष स भानुरर्णवो नृचक्षा इति महान्त्स भानुरर्णवो नृचक्षा इत्येतत् (त्वेष = महान्) श० ७ १ १ २३ एनश्च वैरहत्यञ्च त्वेष वच तै० १ ५ ९ ६]

त्वेषसा विद्यान्याय-बलप्रकाशेन कान्त्या वा १ ६१ ११ [त्विष दीप्तौ (भ्वा०) धातोरौणादिकोऽसुन् प्रत्यय]

त्वेषथात् प्रदीप्तात् (व्यवहारात्) १ १४१ ८ [त्विष दीप्तौ (भ्वा०) धातोर्बाहु० औणादिकोऽथ प्रत्यय]

त्वेषद्युम्नाय प्रकाशमानाय यशसे १ ३७ ४ [त्वेष-द्युम्नपदयो समास । द्युम्नम् धननाम निघ० २ १०.]

त्वेषनृम्णः त्वेष सुप्रकाशित नृम्ण धन यस्य स (अ०—वीर), भा०—वीरत्वम् ३ ३ ८० [त्वेष-नृम्णपदयो समास । नृम्णम् बलनाम निघ० २ ९ धननाम निघ० २ १० त्वेषनृम्ण दीप्तिनृम्ण नि० १४ २४]

त्वेषप्रतीका त्वेषस्य प्रकाशस्य प्रतीतिकारिका (प्राप्तविद्यासुशिक्षा स्त्री) १ १६७ ४ [त्वेष-प्रतीकपदयो समासे स्त्रिया टाप् । त्वेषप्रतीका भयप्रतीका, महाप्रतीका-दीप्तप्रतीका वा नि० १० २१]

त्वेषयामा. त्वेषे दीप्तौ सत्या यामा गमन येषान्ते (रथा) १ १६६ ५ [त्वेष-यामपदयो समास । याम या प्रापणे (अदा०) धातोरौणादिको मनुप्रत्यय]

त्वेषरथः त्वेष प्रकाशवान् रथो यस्य स (मनुष्याणा गण) ५ ६१.१३ [त्वेष-रथपदयो समास]

त्वेषसन्दृक् यस्त्वेष न्यायप्रकाश मपश्यति दर्शयति वा (इन्द्र = राजा) ६ २२ ९ **त्वेषसन्दृशः** = त्वेष दीप्ति पश्यन्ति ते सम्यग् दर्शयितार (नर = नेतारो जना) १ ८५ ८ ये त्वेष सपश्यन्ति (विद्वज्जना) ५ ५७ ५ [त्वेषोपपदे सम्पूर्वाद् दृशिर् प्रेक्षणे (भ्वा०) धातो क्विन् प्रत्यय]

त्वेषा प्रदीप्ति १ १६८ ७ [त्विष दीप्तौ (भ्वा०) धातोर्भावे घञ्-प्रत्ययान्तात् स्त्रिया टाप्]

त्वेषासः प्रकाशमाना (श्येनास = अश्वा) ४ ६ १० त्विषन्ति दीप्यन्ते यास्ता (अर्चय = दीप्तय) १ ३६ २० [त्विष दीप्तौ (भ्वा०) धातोर्घञ्-प्रत्ययान्तात् प्रथमा बहु-बहुवचने जसोऽसुक् । त्विष धातो कर्त्तरि अच् वा]

त्वेषी प्रकाशमाना (समृति = सम्यक् सत्यक्रियावान् जन) ७ ६० १० [त्विष दीप्तौ (भ्वा०) धातोर्घञ्प्रत्यये त्वेष । ततो मत्वर्थे इनि प्रत्यय]

त्वेष्येण त्विषि प्रदीपने भवेन (बलेन) ७ ५८ २ [त्वेषप्राति० भवार्थे यत्]

त्वोतयः त्वया रक्षिता (मनुष्या) ५ ६५ ५ [युष्मद्-ऊतिपदयो समास । ऊति = अवरक्षणादिषु धातो क्तिन्]

त्वोतः त्वा कामयमान (जन) ३ १९ ३ युष्माभि-रुत सङ्गमित (अग्नि) १ ७४ ८ त्वया रक्षित (मनुष्य) ३ ५९ २ **त्वोताः** = त्वया पालिता (प्रजाजना) ६ १९ १३ त्वया रक्षिता (प्रजा) ५ ३ ६ त्वया कृत-रक्षा (मनुष्या) १ ७३ ९ [युष्मद्-ऊतपदयो समास । ऊत = अवरक्षणादिषु (भ्वा०) धातो क्तप्रत्यय । आगम-शासनस्यानित्यत्वाद् इट् न भवति]

त्वोतास. त्वया रक्षिता वर्धिता (प्रजाजना) ४ २९ ५ त्वया बल प्रापिता (धार्मिका शूरा जना) १ ८ ३ त्वया जगदीश्वरेण रक्षिता सन्त (जना) १ ८ २ [त्वोत इति व्याख्यातम् । तत प्रथमाबहुवचने जसोऽसुग्-आगम]

त्सरत् विरुद्ध गच्छति १ ७१ ५ [त्सर छद्मगतौ (भ्वा०) धातोर्लेटि रूपम्]

त्सरुः कठिनो रोग ७ ५० २ कुटिलगति (रोग) ७ ५० १ कुटिलो रोग ७ ५० ३ [त्सर छद्मगतौ (भ्वा०) धातो 'भृमृशीङ्०' उ० १ ७ सूत्रेण उ प्रत्यय]

त्सारी कुटिलगामी (विद्वान् जन) १ १३४.५ [त्सर छद्मगतौ (भ्वा०) धातो 'छन्दसि वा' इति नियमान्

त्वाया त्वा प्राप्ते (पृथिवीद्यावा=भूमिविद्युतौ) ४६ ५ त्वत्कामनया २ १८ ६ त्वया, प्र०—अत्र 'सुपा लुक्०' इति तृतीयास्थानेऽयाजादेश १ १०१ ८ त्वयि, ०—अत्र विभक्ते 'सुपा सुलुग्०' इत्ययाजादेश ३२ १२ यस्त्वा कामयते (अग्नि=राजा) ४ २ ६ दीयया (मत्या) ७ २६ ३ तव नीत्या ७ १८ २१ **ायाः**=त्वा प्राप्ता (प्रजाजना), प्र०—अत्र विभक्ते-कारादेश ४ २ १४ त्वया सहिता (मनुष्या.) १०१ ६ **त्वाभि.**=त्वदीयाभि (ऊतिभि=रक्षाभि) २० २ [युष्मत्प्राति० इच्छाया क्यच्। 'तस्येदम्' इत्यण् । युष्मदस्त्वादेश]

त्वावत. त्वत्सदृशान् (नॄन्=सत्कर्त्तव्यान् जनान्) २० १ त्वय। सदृशस्य (शूरवीरजनस्य) ७ २१ ८ त्सदृशस्य (ईश्वरस्य विदुषो वा) १ ६१.८ त्वया रक्षिता. खाय=सुहृज्जना) ४ ३२ ६ **त्वावान्**=त्वादृश भाध्यक्ष), प्र०—अत्र 'वतुप्प्रकरणे युष्मदस्मद्भ्या न्दसि सादृश्योपसङ्ख्यानम्, अ० ५ २ ३६ इति सादृश्यार्थे तुप् १ ३० १४ त्वया सदृश (इन्द्र=जगदीश्वर) ३२ २३ त्वत्सदृश (कश्चिदपि पदार्थ) १ ५२ १३ युष्मत्प्राति० सादृश्येऽर्थे 'वतुप्प्रकरणे युष्मदस्मद्भ्या न्दसि सादृश्योपसङ्ख्यानम्' अ० ५ २ ३६ वा० सूत्रेण तुप्। 'प्रत्ययोत्तरपदयोश्च' सूत्रेण त्वादेश । 'आ सर्वनाम्न' ० ६ ३ ६१ सूत्रेणाकारादेश]

त्वावसुम् त्वया प्राप्तधनम् (प्रजाजनम्) ७ ३२ १४ युष्मद्-वसुपदयो समास । वसु धननाम निघ० २ १०]

त्वावृधा या त्वा वर्धयते सा (देवी=दिव्यगुणैर्वर्त्त-माना स्त्री) १ ५६ ५ [युष्मदुपपदे वृधु वृद्धौ (भ्वा०) धातो क्विप् 'सुपा सुलुग्०' इत्याकारादेश]

त्वाष्ट्रम् तूर्ण य सकला विद्या अश्नुते तस्येद विज्ञानम् ०—त्वष्टा तूर्णमश्नुत इति नैरुक्ता, नि० ८ १३, १११७ २२ त्वष्ट्रा निर्मितम् (प्रजासुखम्) २ ११ १६ वष्टु सूर्यस्येद तेज ३ ७ ४ **त्वाष्ट्राः**=त्वष्टृदेवताका, ०—सूर्यगुणा पशव पक्षिणश्च २४ ४ [त्वष्टृपद याख्यातम् । तत 'तस्येदम्' 'सास्य देवता' इत्येतयो-र्थयोरण्प्रत्यय । त्वाष्ट्रोऽसुर इत्यैतिहासिका नि० २ १६ वाष्ट्र वडवमालभेत पशुकाम तै० स० २ १ ८ ३ त्वाष्ट्र शकपाल पुरोडाश (श्रीरपश्यत्) श० ११ ४ ३ ५ त्वाष्ट्र-विम् (प्रजापतिरालिप्सत) श० ६ २ १ ५ त्वाष्ट्रा वै गवस्त्वष्टा पशूना प्रजनयिता मै० २ ५ ५ त्वाष्ट्राणि वै रूपाणि श० २ २ ३ ४ त्वाष्ट्रौ लोमशसक्थौ काठ० ४८ २ त्वाष्ट्र लोमसक्थ्यौ सक्थ्यो मै० ३ १३ २ रेत सिक्तिर्वै त्वाष्ट्र कौ० १६ ६. प्लीहाकर्ण शुण्ठाकर्णोऽधिरुढाकर्णास्ते त्वाष्ट्रा मै० ३ १३ ५]

त्वाहतस्य त्वया हतस्य (दुर्जनस्य) ७ ३२ ७ [युष्मद्-हतपदयो समास । हत=हन्ते क्त प्रत्यय]

त्विषः प्रतापात् ४ १७ २ प्रदीप्तस्य (दक्षस्य=बलस्य) ३८ २८ **त्विषे**=शरीरात्मदीप्तिबलाय ५ ५२ १२ [त्विष दीप्तौ (भ्वा०) धातो सम्पदादित्वात् क्विप्]

त्विषिम् प्रकाशम् २१ ५३ प्रकाशयुक्तम् (इन्द्रिय=श्रोत्रादि) २८ ४० प्रदीप्तिम् २१ ३५ विद्याप्रकाश तेजो वा १ ७१ ५ **त्विषिः**=ज्योति (आप्तो राजा) १० ५ विज्ञान-प्रकाश १० ५ दीप्ति (परमाप्त परमात्मा) १० १५ न्यायप्रदीप्तिरिव २० ५ दीप्ति, शुभगुणाना प्रकाश, सत्यगुणकामना च, ऋ० भू० १०४, अथर्व० १२ ५ ८ सत्यन्यायदीप्ति, ऋ० भू० २१८, २० ५ सद्वि-द्यादि से तेज जो आरोग्य, शरीर और आत्मा के बल से प्रकाशमान है स० वि० १४४, अथर्व० १२ ५ ८ [त्विष दीप्तौ (भ्वा०) धातोरौणादिक इन्प्रत्यय । त्विषिरित्य-प्य य दीप्तिर्नाम भवति नि० १ १७]

त्विषीमत् बह्व्यस्त्विषयो दीप्तयो विद्यन्ते यस्मिंस्तत् (सदन=स्थानम्), प्र०—अत्र 'अन्येषामपि०' इति दीर्घ. ३ ३१ १२ [त्विषीति व्याख्यातम् । ततो भूम्नि मतुप् । 'अन्येषामपि दृश्यते' इति मतुपि परे दीर्घ]

त्विषीमतीम् प्रशस्तविद्याप्रकाशयुक्ताम् (वाचम्) ५ ६३ ६ [त्विषीमदिति व्याख्यातम् । तत स्त्रिया ङीप्-प्रत्यय]

त्विषीमते बह्व्यस्त्विषयो न्यायदीप्तयो विद्यन्ते यस्य तस्मै (सेनाधीशाय), प्र०—अत्र 'शरादीना च' इति दीर्घ १६ १० प्रशस्तप्रकाशान्त करणवते (इन्द्राय=अध्यापकायोपदेशकाय वा) १ ५५ ५ **त्विषीमन्त**=विद्याविनयादिप्रकाशयुक्ता (मरुत=शूरवीरा मनुष्या) ६ ६६ १० **त्विषीमान्**=बहुदीप्तियुक्त (इन्द्र=विद्युत्) २ २२ २ [त्विषिपद व्याख्यातम् । ततो भूम्नि मतुबन्तस्य रूपाणि]

त्वेनम् केन अन्येन वा ४ १८ २ [त्व इति व्याख्या-तम् । तस्य छान्दस रूपम्]

त्वेषम् प्रकाशम् ३ २६ ५ दीप्तिमन्तम् (विद्वासम्) ५ ५८ २ सद्गुण-प्रकाशम् ५ ५३ १० प्रकाशमानम्

दक्षिणत्रा दक्षिणे ६ १८ ६ [दक्षिणप्राति० सप्तम्यन्तात् 'देवमनुष्यपुरुष०' अ० ५ ४ ५६ सूत्रेण बहुलवचनात् त्रा-प्रत्यय]

दक्षिणया ज्ञानसाधिकयाऽज्ञाननाशिकया (धिया=प्रज्ञया कर्मणा वा) ४ २३ सुशिक्षितया सेनया १ १२३ ५ **दक्षिणा**=दक्षन्ते वर्धन्ते यया सा (प्रतिष्ठा श्रीर्वा) प्र०—अत्र 'द्रुदक्षिभ्यामिनन्, उ० २ ४६ इतीनन्प्रत्यय १ १८ ५ दक्षिणया, प्र०—अत्र विभक्तिलोप १६ ३० दक्षिणस्या दिशि ५ १ ३ दक्षिणत १५ १६ दक्षन्ते प्राप्नुवन्ति विज्ञान विजयश्च यया सा (अदिति=वाग्विद्युद् वा) ४ १६ वलकारिणी (राजनीति) २ ११ २१ विद्यासुशिक्षादानम् २ १८ ८ प्राणप्रदा (विदुषी स्त्री) २ १७ ६ सत्कार से, स० वि० १८८, १६ ३० दातु योग्या (भा०—सुखदु ख-फला गति) १ १६८ ७ **दक्षिणाभिः**=दानै ३ ६२ ३ **दक्षिणाम्**=वर्द्धिकाम् (धनादिरूपाम्) ६ ३७ ४ प्रतिष्ठा श्रिय वा १६ ३० यदा सर्वत सत्कृत फलवान् भवति, तदा साऽस्य दक्षिणा ताम्, ऋ० भू० १००, १६ ३० सत्कारपूर्वक धनादि को, स० वि० १८८, १६ ३० दक्षिणा दिगम् १० ११ **दक्षिणाया**=दक्षिणस्याम् (धुरि) १ १६४ ६ दिश १ १२३ १ ज्ञानप्रापिकाया (उपस) ३ ५८ १ **दक्षिणायै**=दानाय २६ २ सर्वस्वदानाय, ऋ० भू० ३१०, २६ २ या पूर्वमुखस्य पुरुषस्य दक्षिणबाहुसन्निधौ वर्त्तते, तस्यै (दिशे) २२ २४ **दक्षिणाः**=दक्षन्ते दीयन्ते सुपात्रेभ्यस्ता (प्रतिष्ठा श्रियो वा) १८ ४२ दानानि ३ ३६ ५ कर्मानुसारेण दानानि, भा०—मानादि-व्यवहारा १८ ६४ [दक्षिणमिति व्याख्यातम् । तत स्त्रिया टाप् । दक्षिणा दक्षते समर्द्धयतिकर्मणो व्यृद्ध समर्द्धयतीति । अपि वा प्रदक्षिणागमनात् । दिशमभिप्रेत्य दिग्घस्तप्रकृति, दक्षिणो हस्तो दक्षतेरुत्साहकर्मणा, दाशतेर्वा स्याद् दानकर्मण नि० १ ७ त (यज्ञ) देवा दक्षिणाभिरदक्षयस्तद्यदेन (यज्ञ) दक्षिणाभिरदक्षयस्तस्माद्दक्षिणा नाम श० २ २ २ २, ४ ३ ४ २ तद् यद् दक्षिणाभिर्यज्ञ दक्षयति तस्माद् दक्षिणा नाम कौ० १५ १ दक्षिणा वै यज्ञाना पुरोगवी ऐ० ६ ३५ एषा ह वै यज्ञस्य पुरोगवी यद् दक्षिणा गो० उ० ६ १४ शुभा वा एता यज्ञस्य यद् दक्षिणा ता० १६ १ १४ श्लेष्म वा एतद् यज्ञस्य यद् दक्षिणा ता० १६ १ १३ यज्ञ आयुस्तस्य दक्षिणा आयुष्कृत मै० २ ३ ४ यज्ञोऽदक्षिणो रिष्यति तस्मादाहुर्दातव्यैव यज्ञे दक्षिणा भवत्यल्पिकापि ऐ० ६ ३५ तस्मान्नादक्षिणेन हविषा यजेत श० १ २ ३ ४ नादक्षिण हवि स्यादिति ह्याहु श० ११ १ ३ ७, ११ १ ४ ४ तस्माद् ऋत्विग्भ्य एव दक्षिणा दद्यान्नानृत्विग्भ्य श० ४ ३ ४ ५ अर्वा ह स्म वै पुरा ब्राह्मणे दक्षिणा नयन्तीति अर्वा इतरेभ्य ऋत्विग्भ्य जै० उ० ३ १७ ५ तस्मादाग्नेयाय प्रथम दक्षिणा यज्ञे दीयन्ते गो० पू० २ १७ चतस्रो वै दक्षिणा हिरण्य गौर्वासोऽश्व श० ४ ३ ४ ७ अन्न दक्षिणा ऐ० ६ ३ दक्षिणा वै स्तावा (अप्सरस यजु १८ ४२) दक्षिणाभिर्हि यज्ञ स्तूयतेऽथो यो वै कश्च दक्षिणा ददाति स्तूयतऽएव स श० ६ ४ १ ११ दक्षिणा सावित्री गो० पू० १ ३३ दक्षिणासु त्वेव न सवदितव्यꣳ सवादेनैवर्त्विजोऽलोका इति श० ६ ५ २ १६ यन्माध्यन्दिने सवने दक्षिणा नीयन्ते स्वर्ग एतेन लोके हिरण्य हस्ते भवति गो० उ० ३ १७ एषा वै (दक्षिणा) दिक् पितॄणाम् श० १ २ ४ १७ घोरा वा एषा दिग् दक्षिणा शान्ता इतरा गो० १ २ १६ तस्मादेतस्या (दक्षिणस्याम्) दिश्येतौ पशू (गोश्चाजश्च) भूयिष्ठौ श० ७ ५ २ १६ तस्मादेष (वायु) दक्षिणैव भूयिष्ठ वाति श० ८ १ १ ७, ६ १ १ ७ दक्षिणया दिशा मासा पितरो मार्जयन्ताम् मै० १ ४ २ काठ० ५ ५ दक्षिणा (दिक्) ब्रह्मण श० १३ ५ ४ २४ दक्षिणामाहुर्यजुषामपाराम् तै० ३ १२ ६ १ दक्षिणामेव दिश सोमेन प्राजानन् श० ३ २ ३ १७ दक्षिणा समुद्र मै० ४ ७ ८ दक्षिणैव दिक् सर्वम् गो० १ ५ १५ पितॄणा वा एषा दिग्दक्षिणा ष० ३ १]

दक्षिणसत् यो दक्षिणे देशे सीदति स (अ०—जन) ३८ १० [दक्षिणोपपदे पद्लृ विशरणगत्यवसादनेषु (भ्वा०) धातो क्विप् । दक्षिणासदो (देवा) यमनेत्रा तै० स० १ ८ ७ १ यमनेत्रेभ्यो देवेभ्यो दक्षिणासद्भ्य स्वाहा श० ५ २ ४ ५]

दक्षिणः दक्ष प्रशस्त वल, गतिर्विद्यते यस्य तस्य (वाजिन =राज्ञ) ६ ८ [दक्ष इति व्याख्यातम् । ततो मत्वर्थे इनि प्रत्यय । दक्षिन्प्राति० षष्ठी विभक्ति]

दक्षिणाग्निः वानप्रस्थ सम्बन्धी अग्नि, स० वि० २१०, अथर्व० ६ ६ १३ [दक्षिण-अग्निपदयो समास । तस्य योऽग्नेस्तृतीयो भागस्त देवपितर पर्यगृह्णन् दक्षिणतोऽनयन् स दक्षिणाग्निरभवत् तद् दक्षिणाग्नेर् दक्षिणाग्नित्वम् काठसङ्क० १५ १३ यजुर्वेदाद् दक्षिणाग्नि (अजायत) ष० ४ १]

दक्षिणावत् दक्षिणाभिस्तुल्यम् (कार्यम्) ३ ५३ ६ [दक्षिणा व्याख्यातम् । ततस्तुल्यार्थे वति प्रत्यय]

दक्षिणावताम् प्रशसितयोर्धर्म्यधनविद्ययोर्दक्षिणा

निरुपपदादपि णिनि प्रत्यय]

दक्ष अतिचतुर (अग्ने=विद्वज्जन) ३ १४ ७ **दक्षम्**=वलम् १ १५१ ४ वल चातुर्य्यम् ३ १३ २ चतुरम् (अध्यापकमुपदेशक वा) २५ १६ विद्याचातुर्य-वलयुक्तम् (विद्वास जनम्) १ ८६ ३ **दक्षस्य**=चतुरस्य विद्यावल-युक्तस्य विदुषो जनस्य) ५ १० २ कुशलस्य जनस्य ३३ ७२ शरीराऽऽत्म-वलयुक्तस्य (पुरुषस्य) १५ ४५ चतुरस्य विद्यार्थिन (जनस्य) ३ २७ ६ **दक्षः**=चतुर (मनुष्य) १ ५६ ४ वलम्, भा०—उत्तम वलम् ३८ २७ विद्यमानशरीरात्म-वल (मर्त्य=मनुष्य) १ ६१ १४ चातुर्य्यम् १८ २ वलचातुर्य्ययुक्त (विद्वान् सभेश) १८ ५३ **दक्षाणाम्**=विद्याक्रियाकौशलेषु चतुराणाम् (विदुषा जनानाम्) १ ६५ ६ **दक्षाय**=चातुर्य्याय वलाय ५ ४३ ५ वलप्राप्तये प्र०—दक्ष इति वलनामसु पठितम्, निघ० २ ६, ३ ५४ वलाय चतुरत्वाय वा, भा०—वृद्वये ३४ ८ **दक्षेण**=वलयुक्तेन (तन्वा=शरीरेण) ४ ५६ ६ **दक्षैः**=विद्यासुशिक्षाचातुर्य्यगुणैः १ ६८ ४ विज्ञानादि-गुणैः १ ६१ २ वलैश्चतुरैर्गुणैर्वा ७ ६० ६ [दक्ष वृद्धौ शीघ्रार्थे च (भ्वा०) धातो, दक्ष गतिशासनयो (भ्वा०) धातोर्वा, दक्षते समर्द्धयतिकर्मण (नि० १ ७) धातोर्वा अच्प्रत्यय कर्त्तरि। भावे वा घञ्प्रत्यये मत्वर्थीयस्य प्रत्ययस्य लुक्। दक्ष वलनाम निघ० २ ६ आदित्यो दक्ष इत्याहु नि० ११ २० दक्षाय अपत्याय नि० ११ ३० दक्षो ह वै पार्वतिरेनेन यज्ञेनेष्ट्वा सर्वान् कामानाप कौ० ४४ स (प्रजापति) वै दक्षो नाम श० २ ४ ४ २ क्रतु दक्ष वरुण सशिशाधि (ऋ० ८ ४२ ३) इति वीर्य प्रज्ञान वरुण सशिशाधीति ऐ० १ १३ स्वैर्दक्षैर्दक्षपितेह सीदेति। स्वेन वीर्येणेह सीदेत्येतत् श० ८ २ १ ६ अथ यदस्मै तत्समृध्यते स दक्ष श० ४ १ ४ १ वरुणो दक्ष श० ४ १ ४ १ प्राणा वै दक्षा। जै० १ १५१ दक्षश्च मे वल च मे (यज्ञेन कल्पताम्) तै० स० ८ ७ १ २.]

दक्षक्रतव दक्षा शरीरात्मवलानि क्रतव प्रज्ञा कर्माणि वा येषा ते (देवा=विद्वासो जना), प्र०—दक्ष इति वलनामसु पठितम्, निघ० २ ६, ४ ११ [दक्ष-क्रतु-पदयो समास। दक्ष इति वलनाम निघ० २ ६ क्रतु= कर्मनाम निघ० २ १ प्रज्ञानाम निघ० ३ ६ दक्षक्रतू ते मैत्रावरुण (ग्रह) पातु मै० ४ ८ ७]

दक्षत वल प्राप्नुत ७ ३२ ६ **दक्षते**=वर्धते ७ १६ ६ [दक्ष गतिशासनयो (भ्वा०) धातो, दक्ष वृद्धौ शीघ्रार्थे वा (भ्वा०) धातोर्वा लोट्। व्यत्ययेन परस्मैपदम। अन्यत्र लट्]

दक्षन् दहेत् प्र०—अत्र 'वाच्छन्दसि' इति भस्त्व न १ १३० ८ [दह भस्मीकरणे (भ्वा०) धातोर्लेट्। 'सिब्-बहुल लेटि' सूत्रेण सिप्]

दक्षपतिः विद्याचातुर्य्य-पालक (काल) १ ६५ ६. [दक्ष-पतिपदयो समास। दक्ष इति व्याख्यातम्]

दक्षपिता दक्षस्य वलस्य चतुराणा भृत्याना वा पिता पालक (विद्वान् जन) १४ ३ **दक्षपितॄन्**=चतुरान् जनकानध्यापकान् वा ६ ५० २ [दक्ष-पितृपदयो समास]

दक्षसे वलाय, विद्यावलदानाय २ १ ११. आत्मवलाय १ १५१ ३ भा०—वल वर्धयितुम् २७ ४२ [दक्ष वृद्धौ शीघ्रार्थे वा (भ्वा०) धातोस्तुमर्थे असेन्प्रत्यय]

दक्षाय्य यो राजकर्मसु प्रवीण (इन्द्र=सेनेश) १ १२६ २ दक्षश्चतुरो विद्वानिव (विद्युदग्नि) ७ १ २. विज्ञानकारक (परमेश्वरो विद्वान् वा) १ ६१ ३ हिंसक (अग्नि=पावक) २ ४ ३ [दक्ष गतिहिंसनयो (भ्वा०) दक्ष वृद्धौ शीघ्रार्थे वा (भ्वा०) धातोर्वा 'श्रुदक्षि०' उ० ३ ६६ सूत्रेण आय्य प्रत्यय]

दक्षासः विज्ञान-वलवृद्धा शीघ्रकारिण (मेधाविनो जना) १ ५१ २ [दक्ष इति व्याख्यातम्। ततो जसोऽसुगागम]

दक्षिणम् उत्तमाऽङ्ग, दक्षिणभागम् ८ २७ **दक्षिणः**=वृष्टे प्रापक (वायु), प्र०—दक्षधातोर्गत्यर्थत्वादत्र प्राप्त्यर्थो गृह्यते २ ३ प्राप्त (वाहु=यज्ञ) प्र०—'दक्ष गतिहिंसनयो, इत्यस्माद् 'द्रुदक्षिभ्यामिनन्' उ० २ ५० इतीनन्प्रत्यय अनेन गतेरन्तर्गत प्राप्त्यर्थो गृह्यते १ २४ एको दक्षिणपार्श्वस्थ (अश्व) १ ८२ ५ **दक्षिणात्**=दक्षिणपार्श्वात् ५ १६ **दक्षिणे**=दक्षिणभागस्थेन सैन्येन प्र०—अत्र 'सुपा सुलुक्०' इति तृतीयास्थाने शे आदेश १ १०० ६ [दक्ष गतिहिंसनयो (भ्वा०) धातो 'द्रुदक्षिभ्यामिनन्' उ० २ ५० सूत्रेण इनन्प्रत्यय। दक्षिणो वा अर्द्ध आत्मनो (शरीरस्य) वीर्यवत्तर ता० ५ १ १३]

दक्षिणतः दक्षिणप्रदेशात् ५ ११ दक्षिणपार्श्वत १६ ६२ दक्षिणायन-कालविभागात् १ ६५ ६ दक्षिणाद् देशात् ३७ १२ दक्षिणपार्श्वे २ ४२ ३ [दक्षिण व्याख्यातम्' तत 'आद्यादिभ्य उपसंख्यानम्' अ० ५ ४ ४४ वा० सूत्रेण तसि]

दक्षिणतः कपर्दाः दक्षिणत कपर्दा जटाजूटा येषा ब्रह्मचारिणा ते, (अध्यापकाऽध्येतार) ८ ३३ १ [दक्षिणत-कपर्दपदयो समास। दक्षिणत पद व्याख्यातम्]

दाता (पिता) ५ २ ३ [डुदाञ् दाने (जु०) धातोर्लिट कानच्]

ददाभ हिनम्ति ५ ३२ ७ [दभ्नोति वधकर्मा निघ० २ १९ धातोर्लिट् सामान्ये]

ददार विदृणाति ६ २७ ४ [दृ हिंसायाम् (भ्वा०) धातोर्लिट्]

ददाश दाशति ददाति २ २७ १२ दाशति, प्र०—अत्र लडर्थे लिट् १ ३६ ४ **ददाशत्**=दद्यात् ५ ३७ ५ दाशति, प्र०—अत्र लडर्थे लेट् 'बहुल छन्दसि' इति शप स्थाने श्लु १ ९१ २० ददाति ३४ २१ दाशेत् ७ २० ८ **ददाशति**=ददाति, प्र०—अत्र 'बहुल छन्दसि' इति शप श्लु १ १५६ २ **ददाशः**=ददासि, प्र०—अत्र दाशृ धातोर्लेटो मध्यमैकवचने शप श्लु १ ९४ १५ **ददाशिम**=दद्याम १ ८६ ६ **ददाशुः**=ददति ४ ८ ५ [दाशृ दाने (भ्वा०) धातोर्लिट्। अन्यत्र लेटि शप श्लुश्च छान्दसम्। अन्यत्र लिट् च]

ददाशुषे दात्रे (सज्जनाय) दातु शीलाय (विदुषे जनाय) १ ११२ २० दातु (विदुषो जनस्य) १ १४७ १ [दाशृ दाने (भ्वा०) धातोर्लिट क्वसु प्रत्यय। तत चतुर्थी विभक्ति]

ददिः सुखाना दाता (विद्वान् जन) १ ११० ७ दाता (द्रविणोदा=विद्यादेर्धनप्रदो जगदीश्वर), प्र०—अत्र 'आदृगम०' अ० ३ २ १७१ इति डुदाञ् धातो कि प्रत्यय १ १५ १० [डुदाञ् दाने (जु०) धातो 'आदृगमहनजन०' अ० ३ २ १७१ सूत्रेण कि. प्रत्ययो लिट्वच्च]

ददीमहि गृह्णीम, प्र०—अत्र लडर्थे लिङ् १ ८ ३ दद्याम २ २३ ९ **ददीरन्**=प्रयच्छेयु ७ ४८ ४ **ददुः**=दत्तवन्त स्यु ५ १८ ५ प्रयच्छेयु ५ ५२ १७ दद्यु ३ ५३ १६ ददति ७ १३ १० [डुदाञ् दाने (जु०) धातोर्लिङ्। ददुरित्यत्र तु लिट्]

ददुषः दत्तवत (ऐश्वर्ययुक्तस्य राज्ञ) १ ५४ ८. **ददुषाम्**=दातृणाम् (सज्जनानाम्) ६ ८ ७ [डुदाञ् दाने (जु०) धातोर्लिट क्वसु]

ददृक्षे दृश्यते ६ ६४ २ [दृशिर् प्रेक्षणे (भ्वा०) धातोर्लिट् कर्मणि। विकरणव्यत्ययेन क्स प्रत्यय]

ददृवांसः विदारका (मनुष्या=मननशीला जना) ४ १ १४ [दृ हिंसायाम् (भ्वा०) धातोर्लिट क्वसु]

ददृशानम् द्रष्टव्यम् (ओज=वेगवद्बलम्) ४ ७ १०

ददृशानः=दृष्टवान् सन् (विद्वान् जन) १ १२७ ११. सप्रेक्षक (इन्द्र=ईश्वर) ४ १७ १७ [दृशिर् प्रेक्षणे (भ्वा०) धातोर्लिट स्थाने कानच्-प्रत्यय]

ददृशे दृश्यते १ ९५ १ पश्यामि ६ ४४ १० [दृशिर् प्रेक्षणे (भ्वा०) धातोर्लिट् कर्मणि]

ददृश्रे दृश्यन्ते, प्र०—अत्र दृशेर्लिटि 'इरयो रे' अ० ६ ४ ७६ इति सूत्रेणाऽस्य सिद्धि १ २४ १० इति पश्येयु ३ ५४ ५ [दृशिर् प्रेक्षणे (भ्वा०) धातोर्लिट् कर्मणि। 'इरयो रे' अ० ६ ४ ७६ सूत्रेण 'रे' आदेश। ददृश्रे दृश्यते नि० १८ २७]

ददृश्वान् दृष्टवान् (त्वष्टा=ज्ञाता मनुष्य) ४ ३३ ६ [दृशिर् प्रेक्षणे (भ्वा०) धातोर्लिट स्थाने क्वसु प्रत्यय]

ददृहाणम् दृहितु शीलम् (पर्वत=मेघम्) १ ८५ १० **ददृहाणः**=हिसन् (राजा) प्र०—अत्र व्यत्ययेनाऽऽत्मनेपदम्, तुजादित्वाद् दैर्घ्यम् 'बहुल छन्दसि' इति शप श्लु १ १३० ४ वर्धमान (राजा) ४ २६ ६ [दृहि वृद्धौ (भ्वा०) धातो शानच्। व्यत्ययेनात्मनेपदम्। 'बहुल छन्दसी' ति शप श्लु। धातूनामनेकार्थत्वाद् हिंसायामर्थेऽपि]

ददृहि विदारय, प्र०—अत्र श्न श्लु 'तुजादीनाम्०' इत्यभ्यासदीर्घ १ १३३ ६ [दृ विदारणे (क्र्या०) धातोर्लोट्। 'बहुलं छन्दसी' ति शप स्थानीयस्य श्न श्लु]

ददे गृह्णामि २२ १ ददामि ४.३७.३. ददाति ७ ६ ७ गृह्णीयात् ४ १५ ८ दद्याम् ४ ३४ ४ स्वीकरोमि १ २४ **ददौ**=ददाति ४ ५ २ [डुदाञ् दाने (जु०) धातोर्लट् अन्यत्र लिट्]

दद्धि देहि ४ २० ७ धर, प्र०—अत्र 'दध धारणे' इत्यस्माद् 'बहुल छन्दसि' इति शपो लुग्, व्यत्ययेन परस्मैपदञ्च १ १७६ ४ याचस्व प्र०—दद्धीति याच्ञाकर्मा, निघ० ३ १९, २ १७ ७ [दध धारणे (भ्वा०) धातोर्लोट्। व्यत्ययेन परस्मैपदम्। 'बहुल छन्दसी' ति शपो लुक्। डुदाञ् दाने (जु०) धातोर्वा लोटि छान्दस रूपम्। दद्धि याच्ञाकर्मा निघ० ३ १९]

दद्भिः दन्तै २५ १ [दन्तप्राति० भिसि 'पद्दन्नोमास्०' अ० ६ १ ६३ सूत्रेण दत् आदेश]

दद्रिरे विदीर्णान् कुर्वन्ति, प्र०—व्यत्ययेनाऽत्राऽऽत्मनेपदम् ३३ ७० [दृ विदारणे (क्र्या०) धातोर्लिट्। व्यत्ययेनात्मनेपदम्]

दद्रुः द्रान्ति १ ६२ ११ गच्छन्ति प्राप्नुवन्ति ४ १९ ५ [द्रा कुत्सायां गतौ (अदा०) धातोर्लिटि प्रथमाबहुवचनम्]

दधत् दधाति, प्र०—दधातेर्लेटो रूपम् १८ ६५

नं येपा तेपाम्, धर्मोपार्जिता धनविद्यादयो वहव पदार्था द्यन्ते येपा तेपाम् (विदुपा जनानाम्) प्र०—ग्रत्र प्र-साया मतुप् १ १२५ ६ **दक्षिणावन्त.**=वहुविद्यादान-क्ता, वह्वभयदानदातार (ब्राह्मणा जना) १.१२५ ६ दक्षिणा व्याख्यानम्। तत प्रगसाया मतुप्। 'मादुप-ायाश्च मतोर्व ०' ग्र० ८ २ ६ सूत्रेण मतुपो मकारस्य कारादेग]

दक्षिणावाट् या दक्षिणा दिश वहति सा (प्राची=र्वा दिक्) ३ ६ १ ['दक्षिणा' इत्युपपदे वह प्रापणे भ्वा०) धातो 'वहश्च' ग्र० ३ २ ६४ सूत्रेण ण्वि प्रत्यय]

दक्षिणावान् प्रगस्ता दक्षिणा विद्यते यस्य स राजा) ६ २६ ३ [*दक्षिणा व्याख्यातम्। तत प्रशसाया* नतुप्]

दक्षिणावृतः या दक्षिणा वृण्वन्ति ता (थिय) १ १४४ १ [दक्षिणोपपदे वृज् वरणे (भ्वा०) धातो कर्त्तरि क्विप्]

दक्षिणासदः ये दक्षिणस्या दिशि ग्रवतिष्ठन्ते (देवा = योगिनो न्यायाधीशा) ६ ३६ **दक्षिणासद्भ्यः**=ये दक्षिण-स्या दिशि सीदन्ति तेभ्य (देवेभ्य =विपश्चिद्भ्यो जनेभ्य) ९ ३५ ['दक्षिणा' इत्युपपदे षद्लृ विशरणगत्यवसादनेपु (भ्वा०) धातो क्विप्-प्रत्यय कर्त्तरि]

दक्षिणित् दक्षिणेन पार्श्वेनैति गच्छतीति (इन्द्र = शत्रुविदारको राजा) ५ ३६ ४ [दक्षिणोपपदे इण् गतौ (ग्रदा०) धातो क्विप्। पूर्वपदस्याकारस्य लोपश्छान्दस]

दग्धा दाहक (ग्रग्नि) ५ ९ ४ [दह भस्मीकरणे (भ्वा०) धातो कर्त्तरि तृच्प्रत्यय]

दघ्या. तिरस्कुरु १ १२३ ५ [दघ घातने पालने च (जु०) धातोर्लिङ्। 'वहुल छन्दसी' ति ग्रपो लुक्]

दङ्क्ष्णवः मास-घासादीना दङ्क्षणशीला व्याघ्रादय, भा०—सिंहादिहिंसका पगव, प्र०—ग्रत्र दगधातो-र्वाहुलकान्नु सुडागमश्च १५ १५ [दग दगने (भ्वा०) धातोर् वाहु० ग्रौणादिको नु प्रत्यय सुडागमश्च]

दण्डा इव यष्टिका इव गुष्क-हृदयाऽभिमानिन (ग्रध्येतारो जना) ७ ३३ ६ [दण्डा-इवपदयो समास। वज्रो वै दण्डो विरश्मस्तायै ग० ३ २ १ ३२]

दतः दन्तान् ७ ५५ २ [दन्तशब्दस्य 'दत्' इत्यादेग 'पद्दन्नोमास्०' ग्र० ६ १ ६३ सूत्रेण]

दत्त तत्तद् दान कुरुत २ ३२ दद्यात २० ७१ **दत्तम्**=सुपात्रेभ्य समर्पितम् १८ ६४ [डुदाञ् दाने (जु०) धातोर्लोटि मध्यमवहुवचनम्]

दत्रम् दानम् ३ ३६ ९ **दत्रे**=दानव्ये हिरण्यादि-धने सति, प्र०—दत्रमिति हिरण्यनाम, निघ० १ २, ४ १७ ६ [दत्रम् हिरण्यनाम निघ० १ २]

दत्रवान् दानवान् (सज्जन) ६ ५० ८ [दत्रमिति हिरण्यनाम निघ० १ २ ततो मतुप् प्रशसायाम्]

दत्वते दन्तवते (दगते=दगकाय हिंसकप्राणिने) १ १२९ ५ [दन्तप्राति० भूम्नि मतुप्। 'पद्दन्नोमास०' ग्र० ६ १ ६३ सूत्रेण 'दत्' इत्यादेग]

दद दत्त, प्र०—ग्रत्र लोडर्थे लिट् १ ३९ ९ ददतु ४ ३६ ९ [डुदाञ् दाने (जु०) धातोर्लिटि मध्यमवहु-वचनम्]

ददत् ददाति ४ २४ १० दद्यात् ७ २८ ५ दीजिये, ग्रार्याभि० २ ११, ३४ ३८ [डुदाञ् दाने (जु०) धातोर्लेट्]

ददत् प्रयच्छन् (ईश्वर) ७ ४१ ३ ददान (ईश्वर) ३४ ३६ **ददत्**=दान कुर्वत (विदुपो राज्ञ) ७ ३० ४ दानशीलान् (सज्जनान्) ५ ७९ ५ दानशीला (विद्वासो जना) १ ७३ ५ **ददता**=दानकर्त्रा (विदुपा जनेन) ५ ५१ १५ [डुदाञ् दाने (जु०) धातो शतृप्रत्यय]

ददते ददाति १ २४ ७ [दद दाने (भ्वा०) धातोर्लट्। ददते धारयतिकर्मा नि० २ २]

ददथुः दद्यातम् ४ ३९ ५ दत्त ४ ३८ १ [डुदाञ् दाने (जु०) धातोर्लिटि मध्यमद्विवचनम्]

ददभन्त दभ्नुयु १ १४८ २ [दम्भु दम्भने (स्वा०) धातोर्लिट्। व्यत्ययेनात्मनेपदम्]

ददर्श पश्यति ४ १३ ५ देखता है, स० प्र० ९०, १० ७१ ४ दृष्टवान् दृष्टवती च ८ ९ [दृशिर् प्रेक्षणे (भ्वा०) धातोर्लिट्]

ददश्वान् दत्तवान् (वायु) ४ ३८ ६ [दाशृ दाने (भ्वा०) धातोर्लिट क्वसु। छान्दस धातोरुपधाया ह्रस्व-त्वम्]

ददात् देता है, स० वि० १३७, ग्रथर्व० १४ १ ९ **ददाति**=प्रयच्छति १ ४० ४ **ददातु**=प्रयच्छतु ३ ५५ ददानि वा, प्र०—ग्रत्र पक्षे लडर्थे लोट् १ १५ ८ दीजिए, ग्रार्याभि० २ ५४, ३२ १५ **ददाथ**=देहि ६ २० ११ [डुदाञ् दाने (जु०) धातोर्लेटि लटि लोटि लिटि च रूपाणि]

ददानम् दातारम् (ग्रध्यापकम्) १ १४८ २ **ददानः**=

१ १४, ६ १४ अश्व इव धारकान् क्रामयिता गमयिता (अग्नि) ७ ४४ ५ यो दधिभिर्धर्तृभि क्रम्यते गम्यते स (राजा) ४ ३८ १० यो धारकं सह क्राम्यति (राजा) ४ ३८ ६ धर्त्तयाना धारक (वाजी=तुरङ्ग) ४ ४० ४. [दधिक्रा अश्वनाम निघ० १ १४ पद नाम निघ० ५ ४ तत्र दधिक्रा इत्येतद् दधत्क्रामतीति वा दधत्क्रन्दतीति वा दधदाकारी भवतीति वा। तस्याश्ववद् देवतावच्च निगमा भवन्ति नि० २ २७ देवपवित्र वै दधिक्रा ऐ० ६ ३६ अग्न वे दधिक्रा गो० उ० ६ ३६]

दधिक्रावा धारकाणा गमयिता (अग्नि) ७ ४४ ४ धर्त्तव्ययानक्रमिता (राजा) ४ ४० २ **दधिक्रावाणम्**= धारकाणा यानाना क्रामयितार गमयितारम् (अग्नि= भौतिकम्) ७ ४४ ३ **दधिक्राव्णेव**=धारकान् क्रमत इव (भा०—वेगयुक्ताऽश्ववत्) ७ ४१ ६ यथा धारक क्रमितोऽश्वस्तया ३४ ३६ **दधिक्राव्ण**'=यो दधीन् पोषकान् धारकान् वा क्रामयति तस्य (अश्वस्य) २३ ३२ यो विद्याधरान् कामयते तस्य (राज्ञ) ४ ३६ २ वाय्वादिकारण क्रामयितु (परमेश्वरस्य) ४ ४० १ धर्तृधरस्य वायो. ४ ४० ३ धर्म्मधरस्य क्रमयितुर्वा (राज्ञ) ४ ३६ ६ धर्त्तृणा प्रचालकस्य (उष =अन्नादे) ४ ३६ ४ धारकाणा क्रमयितु (उषस =प्रभातस्य) ४ ३६ ३ ['दधि' इत्युपपदे क्रमु पादविक्षेपे (भ्वा०) धातो क्वनिप्प्रत्यय कर्त्तरि। दधि =डुधाञ् धारणपोषणयो (जु०) धातो 'आदृगम०' अ० ३ २ १७१ सूत्रेण कि प्रत्ययो लिड्वच्च दधिक्रावा अश्वनाम निघ० १ १४]

दधिध्वे धरत ४ ३४ ३ धरध्वम् ४ ३७ १ धरिष्यथ, प्र०—अत्र लोडर्थे लिट् १ ३८ १ **दधिरे**=धरन्तु ३ ५० ३ धरन्ति ३ १ ६ दधति ६ ४८ २१ दध्यासु ५ ५५ १ धरेयु १२ २८ हितवन्त १२ १११ दध्यु १ १३ ११ दधीरन्, प्र०—अत्र लिङर्थे लिट् १ ४५ ७ **दधिषे**=धरसि १५ २३ दधसि ७ २८ २ धारयेयम् ५ ४५ ११ **दधिष्व**=धर २० ८६ दधते १ ३ ६ धारय, प्र०—अत्र दध धारणे इत्यस्माल्लोट् 'छन्दस्युभयथा' इत्यार्धधातुकाश्रयेणेडागम १ १० ६ [दध धारणे (भ्वा०) धातो सामान्ये लिटि। 'छन्दसि वा' इति नियमाद् द्वित्वम् 'अत एकहल्मध्ये०' इति एत्व च न भवति। दधिष्व प्रयोगे लोटश्छन्दस्यार्धधातुकत्वाद् इडागम । दधिषे धत्स्व निघ० ५ २५]

दधीचः ये दधीन् वाय्वादीनञ्चन्ति तान् (वृत्राणि= वृत्रसम्बन्धिभूतानि जलानि) १ ८४ १३. विद्या-धर्मधारकान-ञ्चति विज्ञापयति तस्य (मन्त्राग्निजनस्य) १ ११६ ९ **दधीचे**=दधीन् विद्या-धर्मधरानञ्चति पूजयति तस्मै १ ११७ २२ ['दधि' इत्युपपदे अञ्चु गतिपूजनयो (भ्वा०) धातो 'ऋत्विक्०' सूत्रेण क्विनि 'अनिदिताम्०' इति नलोपे भसज्ञके प्रत्यये परत 'अच' सूत्रेणाकारलोपे 'चौ' सूत्रेण पूर्वपदस्य दीर्घत्वे रूपम्। दधि =डुधाञ् धारणपोषणयो (जु०) धातो 'किकिनावुत्सर्गश्छन्दसि' इत्यादिना वा० सूत्रेण कि प्रत्ययो लिड्वच्च कार्यम्]

दधीत धरत ५.४१ ५ धरेत ६.१५ **दधीमहि**= धरेम ५ ३५ ८. **दधुः**=दधति १ ८० १५ धातुमर्हन्ति २१ १३ धरन्तु ३ ३ ५ दध्यु, भा०—आप्नुवन्तु २१ २६ दधीरन् २१.१२ धरेयु, भा०—धरन्ति २१ २२ दध्यासु २० ७५ [दध धारणे (भ्वा०) धातोर्लिट्। 'बहुल छन्दसी' ति शपो लुक्। अथवा डुधाञ् धारणपोषणयो (जु०) धातोर्लिड्। दधु प्रयोगे दधातेर्धातोर्लटि सामान्ये प्रथमबहुवचनम्]

दधृक् प्रागल्भ्य प्राप्तौ (अध्यापकोपदेशकौ) ५ ६६ ३ [ञिधृषा प्रागल्भ्ये (स्वा०) धातो 'ऋत्विग्०' इत्यादिना क्विनि निपातनाद् द्वित्वम्। पदान्ते च कुत्वम्]

दधृषम् प्रगल्भम् (विद्वास जनम्) ३ ४२ ६. [पूर्वपदे व्याख्यातम्]

दधृषिः अतिशयेन प्रगल्भ (योद्धृ-जन) २ १६.७ [ञिधृषा प्रागल्भ्ये (स्वा०) धातो 'किकिनावुत्सर्गश्छन्दसि' अ० ३ २ १७१ वा० सूत्रेण कि प्रत्ययो लिड्वच्च। वाग् वै दधृषी मै० ४ २ ६]

दधृष्वान् प्रसोढा (विद्वान् जन) १ १६५ १० धारयन् (इन्द्र =राजा) ४ २२ ५ धर्षितवान् ५ २९ १४ [धृष प्रसहने (चुरा०) ञिधृषा प्रागल्भ्ये (भ्वा०) धातोर्लिट स्थाने क्वसु]

दधे धरामि २० ८५. दधामि ५ ५३ ५. दधाति, प्र०—अत्र 'छन्दसि लुङ्लङ्लिट' अ० ३.४ ६ अनेन वर्त्तमाने लिट् १ ३ ११ धारयति, ऋ० भू० ११७, १० १२९ ७ धत्ते १ १४९ ५ धरति ३ २२ १ धरे, वृणोमि, कथयामि वा ५ १४ धारण करता है, स० प्र० २८१, १० १२९ ७ हितवान् दधाति, धास्यति वा ५ १५. दधामि २ ३१ ६ धृतवान् १ २२ १७ दधेत ३ २७ ९ दधेय ३ २७ १० स्वात्मनि धरेत् १ ३६ १९ दध्यात् ३ ३९ ६ **दधौ**=विदधाति १ ६५ २३ [डुधाञ् धारण-

दधातु १८.६४ धरेत् ४ ७४ ७ दध्यान् २१ ५५ धेहि ७ २४ ४ **दधतः**=धरत अ० दध्याताम् १६ ८२ **दधताम्**=धारयन्तु ३५ १५ **दधति**=धरन्ति १ ५५ ५ **दधतु**=धरन्तु ३२ १६ **दधथुः**=धत्त, प्र०—अत्र पुरुपव्यत्यय ६ ७२ ४ **दधन्**=दधीरन् १ ७१ ३ **दधनत्**=अपोपयत्, प्र०—अनकारागमश्छान्दस ३३ ६४ **दधन्युः**=धरन्त प्र०—'वाच्छन्दसि' इति नुडागमो यासुडभाव ४ ३ १२ **दधः**=धेहि ७ ३० ३ दध्या १ ८१ ३ [डुधाञ् धारणपोपणयो (जु०) धातोर्लेटि, लटि, लिटि, लङि, लिङि च रूपाणि]

दधत् दधान सन् (सविता=सूर्य) ३४ २४ धारण कुर्वन्, भा०—प्राप्य (जन) २० ७१ यो दधाति स (यज्ञ) ११८८ २ धरन्तसन् (अग्नि=पावक) ४ १५ २ धरत् (चक्षु=नेत्रम्) २८ ३५ दधन् (त्वष्टा=विद्युत्) २० ४४ [डुधाञ् धारणपोपणयो (जु०) धातो शतृप्रत्यय]

दधतीम् धरन्तीम् (मेनाम्) १ ११६ १६ **दधतीः**=धरमाणा (मधुमती=ओपध्य) १० ४ [डुधाञ् धारणपोपणयो (जु०) धातो शत्रन्तान् ङीप्]

दधन्वतः विद्यादिशुभगुण-धर्त्तॄणा धारकस्य (विदुपो जनस्य) ६ ४८ १८ दृढत्वेन धर्त्तु (दृते=मेघस्य) ६ ४८ १८ **दधन्वान्**=धरन् सन् (वैद्य) १६ २. [डुधाञ् धारणपोपणयो (जु०) धातो शानचि चानशि (ताच्छील्ये) वा दधान । ततो मतुपि दधानस्य दधन्भावश्छान्दस]

दधन्विरे दधति ३ ६० ३ **दधन्वे**=धरति २ ५ ३ पृणाति ३ ३ १ १ [डुधाञ् धारणपोपणयो (जु०) धातोर्लिट् । 'व्यत्ययो बहुलम्' अ० ३ १ ८५ सूत्रेण बहुलवचनाद् द्विविकरणता । तेन श्नु श्लुश्चापि भवत]

दधर्ष धृष्णाति ५ ८५ ६ तिरस्कुर्यात् ६ ७ ५ **दधर्षति**=तिरस्करोति ७ ३२ १४ धर्पितुमिच्छति १ १५५ ५ धर्पयितु शक्नोति, प्र०—अत्र लेटि व्यत्ययेन श्लु ३५ १८ **दधर्षीत्**=धर्पेत्, प्र०—अत्र 'वाच्छन्दसि' इति द्विर्वचनम् १३ ११ [धृप प्रसहने (चुरा०) त्रिधृषा प्रागल्भ्ये (स्वा०) धातोर्वा लिट् । अन्यत्र लेटि व्यत्ययेन श्लु । अपरत्र लुङि द्वित्वमडभावश्च छान्दसौ]

दधात दधीरन् १६ ६३ दधति ७ ५८ ३ धरत ८ १७ दध्यात ५ ३ ७ धरन्ति ६ ६२ ८ [डुधाञ् धारणपोपणयो (जु०) धातोर्लोट्]

दधातन धरत ८ ५ [डुधाञ् धारणपोपणयो (जु०) धातोर्लोटि मध्यमबहुवचने त-प्रत्ययस्य स्थाने 'तप्तनप्तनथनाश्च' अ० ७ १ ४५ सूत्रेण तनप् । दधातन धत्त नि० ६ २७]

दधाति धरति १ ६६ ४ धरेत् १ ६६ २ निष्पादयति ७ ३८ १ धारयति ४० ४ **दधातु**=धारण करोतु ८ १४ दधाति वा, प्र०—अत्र लडर्थे लोट् २ ३ धारयतु ६.८ पुष्णातु ३६ २ विदधातु ८.१६ पोपयतु ऋ० भू० १४६, **दधाते**=धरत १ २६ **दधाथ**=धेहि, प्र०—अत्र वचनव्यत्ययेन बहुवचनम् ४ ५ ६ **दधाथे**=धरथ १ १५१ ६ **दधामि**=स्थापयामि ७ ५ व्यवस्थापयामि ३५ १५ धरामि ६ ३० धारयामि, दधाति, पुष्णामि वा १ १८ **दधासि**=धरसि १ ३१ ७ [डुधाञ् धारणपोपणयो (जु०) धातोर्लटि लेटि वा रूपम् । अन्यत्र लोटि, लटि च रूपाणि]

दधानः धरन् (राजा) ४ २२ ३ धरन्नुदारो धातेव १ ६७ २ धरन् पुष्यन् सन् (विष्णु=सर्वव्यापक परमात्मा) ३ ५५ १० धारण करता हुआ (मन्यास लेने वाला पुरुप) स० वि० १६५, ६ ११३ १ **दधानान्**=धारकान् (पुरुपान्) ६ ४७ २५ धरत (अमन्यमानान्=शठान् जनान्) २ १२ १० **दधानाः**=धरन्त (उत्तमविद्वज्जना) ७ ६० ८ धारयितार (आप्ता विद्वांसो जना), अ०—सर्वासु—विद्यासु धर्म्ये पुरुपार्थे च वर्त्तमाना १ ४ ५ सर्वधारका (मरुत=वायव) १ ६ ४ **दधाना**=धरन्तौ (अध्यापकोपदेशकौ) २० ४२ [डुधाञ् धारणपोपणयो (जु०) धातो शानच् । 'दधाना' प्रयोगे 'सुपा सुलुग्०' इत्याकार]

दधाना धरन्ती (उपा) १ १२३ ४ **दधाना**=धरन्त्य (आप=सूक्ष्मास्तन्मात्रा) २७ २६ धरन्त्य सत्य (आप=व्यापिकास्तन्मात्रा) २७ २५ **दधाने**=धारयन्त्यौ (उपासानक्ता=रात्रिदिने) २६ ३२ [डुधाञ् धारणपोपणयो (जु०) धातो शानजन्तात् स्त्रिया टाप्]

दधिक्राम् यो धारकान् क्रामति तमश्वम् ३ २० १ पृथिव्यादिधारकाणा क्रमितारम् (अग्निम्) ७ ४४ २ न्यायधर्त्तॄणा कामयितारम् (अश्व=बोधम्) ४ ३९ ५ धर्त्तव्यधरम् (राजानम्) ४ ३९ १ यो दधिना धारकेणाऽधिकेन सह तम् (राजजनम्) ४ ३८ २ यो भूम्यादीन् दधीन् धर्त्रीन् पदार्थान् क्रामति तम् (अग्नि=विद्युतम्) ३ २० ५ **दधिक्राः**=यो दधीन् धारकान् क्राम्यति स दधिक्रा अश्व, प्र०—दधिक्रा इत्यश्वनामसु पठितम्, निघ०

दभीतये दु खहिंसनाय ६ २६ ६. हिंसनाय मारणाय २.१३ ६ **दभीतिम्**=हिंसकम् (प्राणिनम्) २.१५.६ दम्भिनम् (पापिजनम्) १ ११२ २३ **दभीतिः**=हिंस्र (शत्रुजन) ४ ४१ ४ **दभीतेः**=हिंसनात् २.१५ ४ [दभ्नोति वधकर्मा निघ० २ १६ दम्भु दम्भने (स्वा०) धातो क्तिन्प्रत्यये 'तितुत्रेष्वग्रहादीनाम्०' अ० ७ २ ६. वा० सूत्रेणेडागम । तस्य दीर्घत्व छान्दसम्]

दभ्नुवन्ति हिंसन्ति १ ५५ ७. [दभ्नोति वधकर्मा निघ० २ १६ दम्भु दम्भने (स्वा०) धातोर्लट्]

दभ्यते हिंस्यते १ ४१ १ [दभ्नोति वधकर्मा निघ० २ १६ तत कर्मणि लट्]

दभ्रम् अल्पम् (द्रव्यम्) ४ ३२ २० ह्रस्व वस्तु, प्र०—दभ्रमिति ह्रस्वनामसु पठितम्, निघ ३ २, १ ११३ ५. **दभ्रस्य**=ह्रस्वस्य (युद्धस्य) १ ८१ २ **दभ्राणि**=अल्पानि कर्माणि १ १२६ ७ **दभ्राः**=हिंसका (शत्रवो जना) ४ २५ ५. **दभ्रेभिः**=अल्पै ह्रस्वैर्वा (सखिभि = सुहृज्जनै) ४ ३२ ३. अल्पयुद्धसाधनै सह, प्र०—अत्र 'बहुल छन्दसि' इति भिस ऐस् न १ ३१ ६ [दभ्नोति वधकर्मा निघ० २ १६ दम्भु दम्भने (स्वा०) धातो 'स्फायितञ्चि०' उ० २ १३ सूत्रेण रक्प्रत्यय । दभ्र ह्रस्वनाम निघ० २ ८ दभ्रम् अर्भकमित्यल्पस्य दभ्र दभ्नोते, सुदम्भ भवति नि० ३ २०]

दम् यो दमयति तम् (अग्निम्) ६ ३ ७ [दमु उपशमने (दिवा०) धातो क्विप् कर्त्तरि]

दमम् दान्तस्वभाव, गृहम् १ ७५ ५ **दमाम्**=गृहाणाम्, प्र०—अत्र नुडभावे पूर्वसवर्णदीर्घ ३३ १ **दमाय**=जितेन्द्रियत्वाय ३ ६ ३ **दमे**=गृहे दमने वा ७ १ २ परमोत्कृष्टे पदे, वे० भा० न०, ११ ८ उपशमने गृहीते गृहे वा १ ६७ ५ गृहरूपे हृदयावकाशे १ १४३ ४ दाम्यन्ति जना यस्मिँस्तस्मिन् गृहे २ १ २ निजगृहे २ १ ७ दान्ते गृहे ४ ६ ४ दाम्यन्त्युपशाम्यन्ति जना यस्मिन् गृहे ससारे वा तस्मिन् १ ६१ ६ दाम्यन्त्युपशाम्यन्ति यस्मिँस्तस्मिन् स्वस्थाने परमोत्कृष्टे प्राप्तुमर्हे पदे, अ०—शान्तस्वरूपे ३ २३ दान्ते ससारे १ ६१ १४ दमनशीले व्यवहारे ३ १० २ दाम्यन्त्युपशाम्यन्ति दु खानि यस्मिँस्तस्मिन् परमानन्दे पदे, प्र०—अत्र 'दमु' धातो 'हलश्च' अ० ३ ३ १२१ अनेनाऽधिकरणे घञ्प्रत्यय १ १ ८ [दमु उपशमने (दिवा०) धातो 'हलश्च' सूत्रेणाधिकरणे घञ्प्रत्यय. । दम गृहनाम निघ० ३ ४. दम इति नियत ब्रह्मचाग्नि तै० आ० १०.६२.१. दमेन दान्ता: किल्विषमवधून्वन्ति तै० आ० १० ६३ १. दम शमयिता (मन्याग्निनो यज्ञस्य) तै० आ० १० ६४ १.]

दमेदमे दाम्यन्ति जना यस्मिँस्तस्मिन् गृहे गृहे प्र०—दम इति गृहनामसु पठितम्, निघ० ३.४. अत्र वीप्सया द्वित्वम् ८ २४ ['दमे' पदस्य वीप्साया द्वित्वम्]

दमयन् दमन कुर्वन् (इन्द्र =राजा) ६ ४७ १६. **दमयन्तम्**=निवारयन्तम् (राजानम्) ७ ६.४ [दमु उपशमने (दिवा०) धातोर्णिजन्ताच्छतृप्रत्यय. । 'न पादमि०' इति परस्मैपदे प्रतिषिद्धेऽपि व्यत्ययेन परस्मैपदम्]

दमिता नियन्ता (इन्द्र =राजा) ३ ३४ १०. दमनकर्त्ता (विद्वान् राजा) २ २३ ११ [दमु उपशमने (दिवा०) धातो कर्त्तरि तृच्प्रत्यय]

दमूनसम् दमनशीलम् (अग्नि=परमविद्वास जनम्) ४ ११ ५ दमनसाधकम् (भग =ऐश्वर्यम्) १ १४१.११ इन्द्रियान्त.करणस्य दमकरम् (गृहपतिम्) ५.८ १. **दमूनसः**=दान्ता (उत्तमजना) ५.४२ १२ **दमूनाः**=शम-दमादियुक्त (अतिथिर्जन.) ५ ४ ५ दमनशीलो जितेन्द्रिय. (अग्नि =राजा) ४.४ ११. दाम्यति येन स (अग्नि =भौतिकोऽग्निरिव राजा) प्र०—अत्र 'दमेरुनसि' उ० ४ २४० इत्युनम् प्रत्ययोऽन्येषामपि० इति दीर्घ १ ६० ४. सुहृद्वर (पति.) १ १२३ ३ जितेन्द्रिय-मनस्क: (व्याप्तविद्यो विद्वज्जन) ३ ३१ १६ उपशमयुक्त (मनुष्य) १ ६८ ५. दान्त. (विद्वान् जन) १ १४०.१०. [दमु उपशमने (दिवा०) धातो 'दमेरुनसि' उ० ४.२३५ सूत्रेण उनसि. प्रत्यय । 'अन्येषामपि दृश्यते' इति सूत्रेण दीर्घ । दमूना दममना वा, दानमना वा, दान्तमना वा, अपि वा दम इति गृहनाम तन्मना स्यात् नि० ४ ४]

दम्पतिम् स्त्री-पुरुषाख्य द्वन्द्वम् १.१२७ ८ **दम्पती**=विवाहितौ स्त्रीपुरुषौ ५ ३ २ जायापती ८ ५ जाया और पति, स० वि० १४०, अथर्व० १४ २ ६४ **दम्पते**=स्त्री-पुरुष ५ २२ ४ [जाया-पतिपदयो समासे जायाशब्दस्य दमादेश]

दम्पतीव यथा भार्यापती २ ३९ २ [दम्पती-इवपदयो समास]

दम्भयत् दम्भयति हिंसयति ६ १८ १०. **दम्भयः**=हिन्धि १ ५४ ६ [दम्भु दम्भने (स्वा०) धातोर्णिजन्ताल्लङ् । अडभावश्छान्दस]

दम्यम् दमनीयम् (प्रजाजनम्) ७ ५६ १४. दात

पोषणयो (जु०) धातो सामान्ये लिट्]

दध्म गच्छेम, प्र०—दध्यतीति गतिकर्मा, निघ० २.१४, ७ ५६ २१ **दध्मः**=निक्षिपाम. १६ ६४. सस्थापयाम १५ १५ धराम १५ १६ हम दग्ध कर देते हैं, प० वि०, अथर्व० ३ २७ १ [दध्यति गतिकर्मा निघ० २ १४ दध धारणे (भ्वा०) धातोर्वा छान्दस रूपम्]

दध्मसि धरेम १ ५० १२ धराम ११ ७३ स्थापयेम १ ५० १२ [दध धारणे (भ्वा०) धातोर्लटि 'बहुल छन्दसी' ति शपो लुकि व्यत्ययेन परस्मैपदम् । 'इदन्तो मसि' इति मस इदन्तता]

दध्यङ् दधति यैस्ते दधय सद्गुणास्तानञ्चति प्रापयति वा स (अध्यापको जन) प्र०—अत्र 'कृतो बहुलम्' इति करणे क्विस्ततोऽञ्चते क्विप् १ ८० १६ दधीन् विद्याधर्मधारकानञ्चति प्राप्नोति स (विद्वान् जन) १ ११६ १२ यो धारकान् विदुषोऽञ्चति प्राप्नोति (पुत्र =तनय) ६ १६ १४ दधीन् धारकानञ्चति (कण्व =मेधाविजन) १ १३९ ९ यो दधीन् सुखधारकानग्न्यादिपदार्थानञ्चति स (ऋषि =वेदार्थवेत्ता जन) ११ ३३ ['दधि' इत्युपपदे अञ्चु गतिपूजनयो (भ्वा०) धातो 'ऋत्विग्०' इत्यादिना क्विन् । दधि =दधातेर्धातो 'किकिनावुत्सर्गश्छन्दसि' इति वार्तिकेन कि प्रत्ययो लिड्वच्च कार्यम् । दध्यङ् प्रत्यक्तो ध्यानमिति वा, प्रत्यक्तमस्मिन् ध्यानमिति वा नि० १२ ३३ दध्यङ् वा आङ्गिरसो देवाना पुरोहानीय आसीत् तां० १२ ८ ६ वाग्वै दध्यङ्डाथर्वण श० ६ ४ २ ३ इन्द्रो दधीचो अस्थभिर्वृत्राण्यप्रतिष्कुत । जघान नवतीर्नव तै० १ ५ ८ १]

दध्याशिरः ये दध्नाऽश्यन्ते ते (सोमास =ओषधिरसा) १ १३७ २ ये धातुमशितु योग्या (सोमास =ऐश्वर्ययुक्ता पदार्था) ५ ५१ ७ ये दधत्यश्नन्ति ते (प्रजाजना) ७ ३२ ४ दधति पुष्णन्तीति दधयस्ते समन्तात् शीर्यन्ते येषु ते (सोमास =सर्वपदार्था), प्र०—अत्र दधाते प्रयोग 'आद्गम०' अ० ३ २ १७१ अनेन किन्प्रत्यय, शृ हिंसार्थ, क्विप् १ ५ ५ [दधि-आशिरपदयो समास । दधि =डुधाञ् धारणपोषणयो (जु०) धातो 'किकिनावुत्सर्गश्छन्दसि' वा० सूत्रेण किन् । आशिर =आङ्+अश भोजने (क्र्या०) धातो 'अशेर्नित्' उ० १.५२. सूत्रेण किरच्प्रत्यय । आङ्पूर्वाद्वा शृ हिंसायाम् (क्र्या०) धातो क्विप्-प्रत्यय]

दधिरे धरन्ति १ ४८ ३ **दध्रे**=दधिरे १७ २९ धरति, प्र०—अत्र लडर्थे लिट् १ ३७ ७ [डुधाञ् धारणपोषणयो (जु०) धातोर्लिट् । 'इरयो रे' अ० ६ ४ ७६ सूत्रेण बहुल रे आदेश । 'बहुल छन्दसि' अ० ७ १ ८ सूत्रेण रुडागम]

दन् ददन् (विद्वान् जन), प्र०—अत्र डुदाञ् धातो 'शतरि छन्दसि वेति वक्तव्यम्' इति द्विर्वचनाऽभावे सार्वधातुकत्वान् ङित्त्वमार्धधातुकत्वादाकारलोपश्च १ १२० ६ ददन् (पति =गो पालयिता जन) प्र०—अत्र 'बहुल छन्दसि' इति शपो लुक् १ १५३ ४ दाता (ईश्वरः) १ १४८ १. [डुदाञ् दाने (जु०) धातो शतृप्रत्यय । छान्दस रूपम्]

दनः अनद, प्र०—अत्राऽऽद्यन्तवर्णविपर्ययोऽडभावश्च १ १७४.२ [णद शब्दे (भ्वा०) धातोर्लङ् । अडभावश्छान्दस । आद्यन्तविपर्ययश्च नकार-दकारयो । दन दानमनस नि० ६ ३१]

दन्तमूलैः दन्ताना मूलै २५ १ [दन्त-मूलपदयो समास]

दन्तः येन दशति स (वीरजनसमूह) ६ ७५ ११ दाम्यते जनै स (मृग =कस्तूरी-मृग २९ ४८ [दाम्यत्युपशाम्यति यो येन वेति विग्रहे दमु उपशमने (दिवा०) धातो 'हसिमृग्०' उ० ३ ८६ सूत्रेण तन्प्रत्यय]

दन्दशूकाः परदु खप्रदाय दशनशीला (शत्रव) १० १० [दश दशने (भ्वा०) धातोर्यङन्ताद् 'यजजपदशा यङ' अ० ३ २ १६६ सूत्रेण तच्छीलादिष्वर्थेषु ऊक प्रत्यय । 'लुपसदचरजप०' सूत्रेण भावगर्हाया यङ्प्रत्यये ऽभ्यासस्य 'जपजभदहदश०' इत्यादिना नुगागम.]

दभत् हिंस्यात् १ १७८ २ **दभन्**=हिंस्यु प्र०—अत्र लिङर्थे लङडभावश्च ५ ३९ दभ्नुवन्तु हिंसन्तु, प्र०—अत्र लोडर्थे लङडभावश्च ८ १ दभ्नुयु २ ३२ २ हिंसेयु, प्र०—अत्र व्यत्ययो लिङर्थे लङ् च ४ २७ **दभन्ति**=हिंसन्ति ७ ३२ १२ [दभ्नोति वधकर्मा निघ० २ १९. दम्भु दम्भने (स्वा०) धातोर्लङ् लट् च । विकरणव्यत्ययेन श । लङ्यडभावश्छान्दस]

दभः दभ्नाति हिनस्ति येन स (धर्म) ५ १९ ४ **दभाय**=हिंसकाय (जनाय) ५ ४४ २ [दभ्नोति वधकर्मा निघ० २ १९ ततो घञर्थे क प्रत्यय । कर्त्तरि वौणादिक क प्रत्यय.]

दभाति हिनस्ति ६ २८ ३ [दभ्नोति वधकर्मा (निघ० २ १९) धातोर्लेट् । आडागम]

मेध्या श० ७ ३ २ ३, ६ २ १ १२ दर्भो वा ओषधीनाम-पहतपाप्मा तै० ब्रा० १ २ ३]

दर्भः दृणुयाम्म ३ ४५ २ [दृ विदारणे (क्र्या०) धातोश्छान्दस रूपम्]

दर्मा विदारक मन् (शूरो जन) १ १३२ ६ शत्रु-विदारयिता (सभापति) ८ ५३ **दर्माणम्**=विदारयितारम् (वीरजनम्) १ ६१ ५ [दृ विदारणे (क्र्या०) धातो 'अन्येभ्योऽपि दृश्यन्ते' अ० ३ २ ७५ सूत्रेण मनिन्-प्रत्यय]

दर्वि पाक साधिका होतव्य द्रव्यग्रहणार्था (चमसी) प्र०—अत्र 'सुपा सुलुक्०' इति सुलोप ३ ४६ **दर्वी**=ग्रहणाग्रह णसाधने १५ ४३ दर्वाणि याभ्या ते पाकसाधने ५.६ ६ [दृ विदारणे (क्र्या०) धातो 'उत्सुकदर्विहोमिन.' उ० ३.८४ सूत्रेण विन्-प्रत्ययान्तो निपात्यते। 'वृद्भ्या विन्' उ० ४ ५३ सूत्रेण वा विन्प्रत्यय । एप खलु वै स्त्रिया हस्तो यद् दर्वि सै० १ १० १६]

दर्विदा काष्ठच्छित् पक्षिविशेष २४ ३४

दर्शत[1] दर्शनीय (ईश्वर), आर्याभि० १ ७, ऋ० १.१ ३ १ ज्ञानदृष्ट्या द्रष्टु योग्य योग्यो वा (वायो=ईश्वर भौतिको वा) १ २ १ **दर्शतम्**=दर्शनीयम् (धूमम्) ३८ १७ द्रष्टव्य रूपम् (निवात=क्षेमम्) १ ११७ ५ यो दर्शयति तम् (सूर्यम्) १ १६४ ५२ दर्शकम् (अग्नि=विद्युदादिरूपम्) ६ १ ३ **दर्शतस्य**=द्रष्टु योग्यस्य (वपुष=रूपस्य) १२ १०६ **दर्शतः**=द्रष्टु योग्य (विद्वान् जन) ३ १० ६ द्रष्टव्य प्रष्टव्यो वा (सूर्य=सविता) ६ ३० २ **दर्शतात्**=सुन्दरात् रूपात् १ ११६ ११ [पश्यन्ति येन स दर्शत इति विग्रहे दृशिर् प्रेक्षणे (भ्वा०) धातो 'भृमृदृशियजिपर्वि०' उ० ३ ११० सूत्रेण अतच्-प्रत्यय । दर्शत दर्शनीय नि० १०.२]

देवृकामा देवर की कामना करने वाली (स्त्री), स० प्र० १५२, अथर्व० १४ २ १८ देवर से नियोग करने वाली (स्त्री), पत्र० वि०, अथर्व० १४ २ १७ नियोगेन द्वितीय-वरस्य कामनावती (स्त्री), ऋ० भू० ५३२, अथर्व० १४ २ १८ देवर की कामना करती हुई अर्थात् नियोग की भी इच्छा करने हारी (स्त्री), स० वि० १३८, १० ८५ ३ ['देवृ' इत्युपपदे कमु कान्तौ (भ्वा०) धातो 'कमेर्णिङ्' इति णिङ् प्रत्ययान्ताद् 'शीलिकामिभक्ष्याचरिभ्यो ण०' अ० ३ २ १ वा० सूत्रेण ण। तत स्त्रिया टाप्। देवृ=दिवु क्रीडादर्थेषु (दिवा०) धातो 'दिवेर्ऋ' उ० २ ९९ सूत्रेण ऋ प्रत्यय]

देवेद्धेषु देवैरिद्धेषु प्रज्वलितेषु (अग्निषु) ७ १ २२ [देव-इद्धपदयो समास। इद्ध = ञिइन्धी दीप्तौ धातो क्त]

देवेभिः दिव्यै पृथिव्यादिभि ३ ४ ४७ दिव्यगुणै (जनिभि = जन्मभि) २६ २४ दिव्यगुण-कर्म-स्वभावै-विद्वद्भि ३ २४ ४ दिव्याभि प्रकाशयुक्ताभि प्रजाभि १७ २९ दिव्यगुणै पदार्थैरिव विद्वद्भि ३ १० ४ सूर्यादि-भिर्दिव्यैर्वा (जनिभि = जन्मभिर्जनकैर्वा) ६ ५० १३ विद्वद्भि (जनै) ७ ५ जिगीषुभिर्वीरै (जनै) १ १८८ १ दिव्यैरवादिभि पदार्थै सह १ ५९ १ धार्मिकै सभ्यैर्विद्वद्भि सह ३ ४० ३ दिव्य गुणों के साथ, आर्याभि० १ ५, ऋ० १ १ १ ५ [देव प्राति० भिस ऐसादेशोच्छान्दसत्वान्न भवति]

देवोदेवः विद्वान् विद्वान् (जन) ५ ८२.१६ [देव-पदस्य वीप्साया द्विवचनम्]

देव्यम् देवेषु विद्वत्सु भवम् (वर्ण = रूपम्) १ १४० ७. **देव्यौ** = देवेषु विद्वत्सु कुशलौ (अध्वर्यू = विद्वांसौ) ३३ ७३. देवेषु दिव्येषु विद्वत्सु गुणेषु वा कुशलौ (मनुष्यौ) ३३ ३३. [देवप्राति० भवार्थे 'भवे छन्दसि' अ० ४ ४ ११० सूत्रेण यत्। 'तत्र साधु' रिति वा यत्]

देव्यः देदीप्यमाना. (अ०—विदुष्य स्त्रिय) ३७ ४. **देव्या** = देदीप्यमानया (धिया = प्रज्ञया कर्मणा वा) ३३ ९१ दिव्यगुणसहितया विद्यायुक्तया मेनया १ ५३ ५ शुद्धविद्याशिक्षाऽऽपन्नया (धिया = प्रज्ञया क्रियया वा) ११ ४१ **देव्याम्** = विदुष्याम् (स्त्रियाम्) २ ४१ १७ **देव्याः** = दिव्यसुखप्रापिकाया (उषस = प्रभातवेलाया) ४ १ १७ **देव्यै** = दिव्यायै (शूरवीरायै राज्यै) ६ ७५ १५ [देवी-शब्दस्य रूपाणि। 'देवी' इति व्याख्यातम्]

देशे स्वनिवासे स्थाने ३४ ११ [दिश अतिसर्जने (तुदा०) धातो 'अकर्त्तरि च कारके०' इति सूत्रेण कर्मणि घञ्-प्रत्यय]

देष्णम् दातु योग्यम् (धनादिकम्) ७.३२ २१ दातव्यम् (धेनु = वाचम्) ६ ६३ ८ **देष्णस्य** = दातु (इन्द्रस्य = सुखप्रदातुर्जनस्य) ३ ३० १६ **देष्णे** = दातु योग्ये (उक्थे = वक्तव्ये) ४ २० १० [डुदाञ् दाने (जु०) धातोर्बाहु० औणादिक इष्णुच्-प्रत्यय। वर्णव्यत्ययेन उकारस्याकारादेश]

देयम देयास्म, प्र०—डुदाञ् दाने इत्यस्मादाशीर्लिङ्-युत्तमबहुवचने 'लिङ्याशिष्यङ्' इत्यङ् 'छन्दस्युभयथा' इति मस आर्धधातुकसंज्ञामाश्रित्य सकारलोपाऽभाव, सार्वधातुक-संज्ञामाश्रित्य 'अतो येय' इतीयादेशश्च २ ३२]

देहत् वर्धये ७ ५० २ [दिह उपचये (अदा०) धातो-र्लेट्। 'वहुल छन्दसी' ति शपो लुङ् न भवति]

देहि दीजिये, आर्याभि० २.३३, ३ १७ देहि ददाति वा २ २६ [डुदाञ् दाने (जु०) धातोर्लोटि मध्यमैकवचनम्। 'घ्वसोरेद्धाव् अभ्यासलोपश्च' इति सूत्रेण हौ परे एकारा-देशोऽभ्यासलोपश्च]

देह्यः उपचेतु योग्य (इन्द्र = राजा) ६ ४७ २ उप-चेतु वर्धयितु योग्य (सर्वपूज्यो राजा) ७ ६ ५. [दिह उप-चये (अदा०) धातोर्ण्यत् प्रत्यय]

दैवताय धनसम्बन्धिने (सवित्रे = ऐश्वर्योत्पादकाय पुरुषाय) २९ ६० [देवताशब्दात् 'तस्येदम्' इति सूत्रेण

प्रीत्यादिषु (भ्वा०) धातो 'अवितृस्तृतन्त्रिभ्य ई' उ० ३ १५८ सूत्रेण ई प्रत्यय । देव-अवीपदयो. समास]

देवासः ये दीव्यन्ति विद्यादिगुणै प्रकाशन्ते तत्सम्बुद्धौ= (भा०—परमविद्वासो जना) ४ ५ प्र०—अत्र 'आज्जसेर-सुक्' इत्यसुगागम १ १९ ३ विद्वास शूरा (जना) ३ २९ ६ प्रशस्ता विद्वास (जना) १.८३ २ विद्या कामयमाना (सज्जना.) ३ २ ३ प्राणा इव विद्वास (जना) ७ ५९ १ दिव्यस्वभावा विद्यार्थिन ७ १७.६ विद्याभि प्रकाशमाना (सर्वविद्वास) २ ४१ १५ दिव्यगुणा १ १२३ १ दिव्यगुणविशिष्टा (मरुद्गणा =मरुता समूहा) १ २३ ८ दिव्यगुणयुक्ता (प्राणादय) ७ १९ हे राजसभा-सदो विद्वास, अ०—राजसभाया सभ्या जना ७ १९ दिव्यगुणा पृथिवी-चन्द्रादय प्रकाशिता १.१९ ६. [देव प्राति० जसोऽसुगागम । देव इति व्याख्यातम्]

देवि दिव्यगुणैर्विराजमानाया (अ०—वाचो विद्युतो वा) प्र०—अत्र 'अर्थाद्विभक्तेर्विपरिणाम ' इति विभक्तेर्वि-परिणाम ४ २३ देदीप्यमाने (स्त्रि) १३ २१ दिव्यगुणे स्त्रि १ ४८ १५ हे दिव्य कमनीय (शाला) स० वि० १६६, अथर्व० ९ २ ३ ७ दात्रि (स्त्रि) १ १२४ १२ विद्या-सुशिक्षाभ्या द्योतमाने (कन्ये) १ ४८ १ विदुषि कुमारि ३४ ११ देदीप्यमाना (अ०—वाग्विद्युद् वा) ४ २० कामय-माने (विदुषि मात) ६ ६१ ६ सुलक्षणै सुशोभिते (कन्ये) १ १२३ ३ विद्यायुक्ते (पत्नि !) ११ ६९ सुशोभिते (विदुषि स्त्रि) ३ ६१ २ **देवी**=देदीप्यमाने (उपासा-नक्ता=रात्रिदिने इवाऽध्यापिकाऽध्येत्र्यौ स्त्रियौ) २८ ३७ दात्र्यौ (ऊर्जाहुती=सुसस्कृताऽन्नाहुती) २८ ३९ दिव्यगुणे (रोदसी=प्रकाशभूमी) ६ ५० ५ दिव्यगुण-सम्पन्ने (दुर्ये=गृहरूपे) ५ १७ दिव्यगुण-कर्म-स्वभावयुक्ते (द्यावापृथिवी=प्रकाशभूमी) ३ २५ ३ दिव्यगुणयुक्ते द्यावापृथिव्यौ भूमि-सूर्यप्रकाशौ १ १०६ ३ दिव्यगुण-प्रापिके (उपासानक्ता=रात्रिदिने) २८ १६ कमनीये (दुघे=प्रात सायवेले) २१ ५२ **देवी**=दिव्या स्त्री १२ ६५ सकलविद्या-धर्मा-चरणेन प्रकाशमाना, भा०—पूर्ण-विद्यावती स्त्री (वैश्वदेवी) १९ ४४ दिव्यशिक्षा-शास्त्र-विद्याभिर्देदीप्यमाना (धिषणा=प्रज्ञा) १ १०९ ४ देदीप्यमाना विदुषी माता ४ ५५ ७ दिव्यगुणयुक्ता (अदिति =विद्या) १ १०६ ७ प्रकाशदात्री (सरस्वती=स्त्री) २१ ५१ दिव्यगुण-शास्त्र-बोधयुक्ता (विदुषी स्त्री) ५ ४३ ११ सुखदात्री (स्वसदृशी विदुषी स्त्री) १ ४८ ३ दिव्यगुणा (धिषणा=प्रज्ञेव वर्त्तमाना स्त्री) २७ २४ दिव्यगुणैर्वर्त्तमाना स्त्री १ ५६ ४ सूर्यज्योति ऋ० भू० २०२, ऋ० ८ १.२३ ७ विदुषी (अदिति =अध्या-पिका) ११ ६१. प्रकाशमाना (उषा) १ ९२.१० दिव्या (वाक्=वाणी) ८ ३७ पतिव्रता विदुषी स्त्री २८ ३९ धर्मात्मा स्त्री २८ ३८ **देवीम्**=देदीप्यमाना विदुषी (स्त्रियम्) ४ ४३.१. दिव्या प्रज्ञाम् ५.६९ ३ दिव्यगुणकर्म-स्वभावाम् (इळम्=वाचम्) ७ ४४ २ देदीप्यमाना विद्वद्भि कमनीयाम् (धिय=धारणावती प्रज्ञाम्) ३ १८ ३ द्योतिकाम् (उषसम्) १ ११५ २ **देवीः**=देव्य (आप = जलानि), सर्वप्रकाशक, सर्वानन्दप्रद सर्वव्यापक ईश्वर, ऋ० भू० ३०८, ३६ १२ दिव्या (आप =जलानि) ३६ १२ दिव्यगुणप्रदा (स्त्रिय) ११ ६१. देदीप्यमाना (वाड्नाडीधारणशक्तय) २० ४३ दिव्यविद्यासम्पन्ना (ग्ना =वेदवाग्ज्ञा स्त्रिय) ११ ६१ विद्यायुक्ता (स्त्रिय) ११ ६१ कमनीया (स्त्रिय) ११ ६१ विद्यादिगुणै प्रकाश-माना (सुपत्नी =शोभना पत्नी) २० ४० विदुष्यो ब्रह्मचारिण्य (कन्या) ७ ४७ ३ आनन्दप्रदा (नद्य) ७ ५० ४. प्रमोदिका (आप =जलानि) ७ ४९ १ देव्यो देदीप्यमाना (वाक्, पृथिवी, प्रशस्त ज्ञानयुक्ता वाण्य) ३ ४ ८ दिव्यगुणकर्मस्वभावा (स्त्रिय) ४ ५१ ५ दिव्य-रूपसुशीला (आप.=कन्या) १२ ३५ दिव्या विदुषी (मातर =जनन्य) १२.७८ देदीप्यमानानि (द्वार = द्वाराणि) २७ १६ देव्य (आप =जलानि), सर्वप्रकाशक-स्सर्वानन्दप्रद ईश्वर, प० वि० २१२, ३६ १२ दिव्या शुद्धा (पत्नी) ५ ५ ५ कमनीया (वाच) १.१४२ ६ दिव्यविद्यायुक्ता (विदुष्य स्त्रिय) १ १२४ १३ दिव्यगुण-सम्पन्ना (अ०—देव्य आप), प्र०—'वाच्छन्दसि' इति जस पूर्वसवर्णत्वम् ४.१२ दिव्यसुखप्रदा शुद्धा (आप = जलानि) ६ १० सद्विद्याप्रकाशवत्य (अ०—विदुष्य स्त्रिय) ६ १३ दिव्या विदुष्यो ब्रह्मचारिण्य स्त्रिय १७ ५४ विद्वान् नरो की विदुषी स्त्रिया, स० वि० १०४, २ ३५ ५ द्योतमाना. (द्वार =द्वाराणि) १ १३ ६ देदीप्य-माना दिव्यगुणहेतव (इडा-सरस्वती-महीनीतय) १ १३ ९ दिव्यगुणत्वेन दिव्यगुणप्रापिका (आप =जलानि) १ २३ १८ दिव्यगुणयुक्ता (आप =जलानि), प्र०—अत्र 'सुपा सुलुक्' इति पूर्वसवर्णादेश १ १२ विद्यया प्रकाशिता (जननी, अध्यापिकोपदेष्ट्री च) २१ ५४ दिव्या श्रिय २८ १८ देवाना विदुषामिमा स्त्रियो देव्य १ २२ ११ त्रिविधा वाणी (इडा, सरस्वती-भारती) २९ ८ दात्र्य (भा०—त्रिविधा वाच) २८ ३१ शुद्धा रोगनाशिका (आप =जलानि) सकलविद्या-प्रकाशिका (इडा-सरस्वती-

(हेळांसि=अनादररूपाणि कर्माणि) ६ ४८ १०. [देव-प्राति० प्राग्दीव्यतीयेषु भव-जात-कृत-कुशल-साधु-लब्धा-द्यर्थेषु 'देवाद् यञञौ' अ० ४ १ ८५ वा० सूत्रेण यञ्-प्रत्यय । दैव्या वाऽएते होतारौ यत् परिधयोऽग्नयो हि श० १ ८ ३ १० प्राणापानौ वै दैव्या होतारौ ऐ० २.४ वत्सा वै दैव्या अध्वर्य्यव श० १ ८ १ २७]

दोग्ध्री प्रपूरिका (धेनु=गौ) २२.२२ [दुह प्रपूरणे (अदा०) धातो कर्त्तरि तृजन्तात् स्त्रिया ङीप्]

दोघम् प्रपूरकम् (विद्वास जनम्) ५ १५ ५ [दुह प्रपूरणे (अदा०) धातोश्छान्दसत्वाद् इगुपधलक्षण कप्रत्यय वाधित्वा अच्प्रत्यय । ह्स्य घकारश्छान्दस]

दोधतः क्रुद्ध्यत (शत्रोर्जनस्य), प्रमाण—दोधतीति क्रुद्ध्यतिकर्मा, निघ० २ १२, १ ८० ५ हिसकस्य (दुष्ट-जनस्य) २ २१ ४ [दोधतीति क्रुध्यतिकर्मा निघ० २ १२. तत शतृप्रत्ययान्तस्य रूपम्]

दोधवीति भृश कम्पयति २ ४ ४ [धूञ् कम्पने (क्र्या०) धातोर्यङ्लुगन्ताल् लट्]

दोर्भ्याम् भुजदण्डाभ्याम् २५ ३ **दोः**=भुजस्य वलम् ५ ६१ ५ [दमु उपशमने (दिवा०) धातो 'दमेर्डोसि' उ० २.६९. सूत्रेण डोसि प्रत्यय । दो शिताम भवति। दोर्द्रवते नि० ४ ३]

दोषा रात्रौ ४ २ ८ रात्रि ७ १ ६ प्रभातवेला ६ ३९ ३ रात्री ५ ३२.११ **दोषाः**=रात्रिषु, प्र०—अत्र 'सुपाम्०' इति सुव्व्यत्यय, दोषेति रात्रिनामसु पठितम् निघ० २ ७, १ ३४ ३ [दुष वैकृत्ये (दिवा०) धातोर्बाहु० औणादिक (४ १७५) आ प्रत्यय । स्वरादिपाठादव्यय-त्वम् । दोषा रात्रिनाम निघ० १ ७ दोषा=रात्रौ नि० ३.१५]

दोषावस्तः अहर्निशम्, प्र०—दोषेति रात्रिनामसु पठितम् निघ०' १ ७ रात्रे प्रसङ्गाद् वस्त इति दिननामाऽत्र ग्राह्यम् १ १ ७ दोषा रात्रि वस्ते स्वतेजसाऽऽच्छाद्य निवारयति सोऽग्निस्तम्, अ०—दोषावस्तारमग्निम् ३ २२ ['दोषा' इति व्याख्यातम् । वस्तोः=अहर्नाम निघ० १ ९ तयो समास । अथवा दोषा इत्युपपदे वस आच्छादने (अदा०) धातोर्बाहु० औणादिक क्त प्रत्यय]

दोहत् दोग्धि १ १६४ २६ **दोहते**=प्रपिपर्त्ति १ १३४ ४ **दोहसे**=प्रपिपर्सि ७ १२ [दुह प्रपूरणे (अदा०) धातो सामान्ये लङ् । अडभावश्छान्दस । अन्यत्र लट् । उभयत्र 'बहुल छन्दसि' इति शपो लुङ् न । दोहत्=दोग्धि नि० ११ ४३]

दोहनाः पूरका (जना) १ १४४ २. [दुह प्रपूरणे (अदा०) धातो कर्त्तरि नन्द्यादित्वाल् ल्यु प्रत्यय । नन्द्यादिराकृतिगण]

दोहम् प्रपूर्त्तिम् ३८ २८ **दोहः**=प्रपूर्ण सामग्री-समूह ८ ६२ [दुह प्रपूरणे (अदा०) धातो भावे घञ्-प्रत्यय]

दोहसे दोग्धुम् ६ ४५ ७. कामान् दोग्धु प्रपूरयितुम् ६ ६६ ५ कामाना प्रपूरणाय १ १४१ २ [दुह प्रपूरणे (अदा०) धातो 'तुमर्थे सेसेनसे०' अ० ३ ४ ९ सूत्रेण असे-प्रत्यय]

दौर्गहे दुर्गहने (दु खे) ४ ४२.८ [दुर्गहप्राति० भवार्थे इदमर्थे वा अण्प्रत्यय । दौर्गह=अश्वनाम निघ० १ १४]

दौर्व्रत्येन दुष्टाचारेण ३९.९ [दुर्व्रतप्राति० भावे कर्मणि वा ष्यञ्-प्रत्ययः]

द्यवि प्रकाशे ३ ३ ५३ समीपस्थे प्रकाशितेऽप्रकाशिते वा (विषये) ७ ३१ ९ **द्यविद्यवि**=दिने दिने, अ०—प्रतिदिनम्, प्र०—'नित्यवीप्सयो' अ० ८ १ ४ अनेन द्वित्वम् 'द्यवि-द्यवि इत्यहर्नामसु पठितम्' निघ० १ ९, १ ४ १. **द्यवी**=द्योतमाने (द्यावापृथिवी) ४ ५६ ५ [द्यवि-द्यवि अहर्नाम निघ० १ ९. द्युरित्यह्नो नामधेयम्, द्योतत इति सत नि० १.६ द्युभि=अहोभि नि० ६ १]

द्याम् कामनाम् ५ ६३.६ विद्युतम् ५ ५७ ३ आका-शम् १ १८० १०. प्रकाशम् १.१७३ ६ विद्या-न्याय-प्रकाशम् १ १२१ ३ सूर्यं विद्युत वा ६ ४७ २९ सर्वप्रका-शम् २३ ५० सूर्यादिका सृष्टि, भा०—प्रकाशसहिता सूर्यादिलोकप्रभृति सृष्टिम् २३ १ राजपालन-विनय-प्रका-शम् १ ५२ ११ सूर्यादिक प्रकाश वा ४ ३० सुप्रकाशाम्, भा०—वहुविध प्रकाशो यस्या ताम् (नावम्) २१ ६ आनन्दम् प्र०—अत्र दिवुधातोर्बाहुलकाड् डो-प्रत्ययष्टि-लोपे प्राप्ते वकारलोपश्च १ २६ कमनीया विद्याम् ६ ६७ ६. किरणप्रकाशवद् विद्याप्रकाशम् १ ५१ ९ सूर्यपर्यन्त जगत् को स० प्र० २८२, १० १२१ १ प्रकाशमयी योगविद्याम् १७ ६८ प्रकाशमय विद्यमान सूर्यादिलोकसमूह वा १ ६७ ३ द्योतमान सूर्यम् १ १६४ ११ दिवम्, प्र०—१० २३ नि० १३ ४ प्रकाशात्मकलोकादिकम् ३ ३२ ८ द्युलोक को आर्याभि० २ २०, १३ ४ जिसमे सूर्य का प्रतिभास आवे वैसी प्रकाशस्वरूप भूमि के समान शाला को स० वि० १६७, अथर्व० ९ ३.३ १५ [द्यौरिति अहर्नाम निघ० १ ९

अण्प्रत्यय । देवता=देवप्राति० 'देवात् तल्' इति तल्-प्रत्यय । स्त्रियां टाप्]

दैवम् देव आत्मनि भवम्, देवस्य जीवात्मन साधन-मिति वा (मन=सङ्कल्पविकल्पात्मकमन्त करणम्), भा०—परमेश्वराज्ञासेवन, विद्वत्सङ्गमनेकविधसामर्थ्ययुक्त मन ३४ १ देव अर्थात् आत्मा का मुख्य साधन, भूत भविष्यत् वर्त्तमान काल का ज्ञाता (मन) आर्याभि० २ ४३, ३४ १ दिव्यगुणयुक्त (मन=मन) स० प्र० २४६, ३४ १ ज्ञानादिदिव्यगुणयुक्तम् (मन) ऋ० भू० १५२, ३४ १ **दैवेन**=देवेन निर्मितेन (सूर्येण) ३७ १४. [देव इति व्याख्यातम् । ततो भवार्थेऽण्प्रत्यय । 'तस्येदम्' इति वा अण्-प्रत्यय । अथवा देवप्राति० प्राग्दीव्यतीयेष्वर्थेषु 'देवाद् यञ् अञौ' अ० ४ १ ८५ वा० सूत्रेण अञ्प्रत्यय । वृहन्त (पशव) दैवा मै० ३ १३ ११]

दैववातम् देवैर्विज्ञाताना सम्बन्धिनम् (अग्नि=पावकम्) ३ २३ ३ **दैववाताय**=दिव्यवायुविज्ञानाय ६ २७ ७ **दैववाते**=देवाना प्राप्ते भवे (सृञ्जये=सङ्ग्रामे) ४ १५ ४ [देव-वातपदयो समासे 'तस्येदम्' इति सूत्रेण अण्-प्रत्यय । अथवा=दैव-वातपदयो समास]

दैवी देवानामियम् (स्वस्ति=स्वास्थ्यम्) ३ ३८ ६ **दैवीम्**=देवानामाप्तानाम् विदुषामिय ताम् (नावम्) २१ ५ दिव्यगुणसम्पन्नाम् (धियम्) ४ ११ **दैवीनाम्**=देवेषु दिव्यगुणेषु भवाना (क्षितीनां=भूमीनाम्) ३ २० ४ **दैवीः**=देवाना विदुषामिमा (विश=प्रजा) ६ ६ देदीप्यमाना (द्वार=अवकाशरूपा दिश) २६ ३० देवाना न्यायकारिणा विदुषामिमा (विश=प्रजा) २८ १४ देवसम्बन्धिनीर्दिव्या (विश=प्रजा) ६ ७. अ०—दिव्या (विश=प्रजा) १७ ८६ शास्त्रज्ञातार वेत्तारो वा (विश=प्रजाजना) १७ ८६ [देवप्राति० 'तस्येदम्' इति सूत्रेण अण्-प्रत्यये 'टिड्ढाण०' इति स्त्रियां ङीप्प्रत्यय । देव्येषा नौर्यद्यज्ञ जै० १ १६६ पञ्च दिशो दैवीर्यज्ञमवन्तु देवी तै० स० ५ ४ ६ २ मै० ३ ३ ८ ब्राह्मण उभे वाचौ वदति दैवी च मानुषी च काठ० १३६ ५ श्रीर्हि मनुष्यस्य दैवी ससत् तै० स० ७ ४ २.१२ दैवीर्वा एता विशो यत् पशव काठ० २६ ७]

दैव्यम् देवेषु दिव्येषु रश्मिषु भवम् (चेतन ब्रह्म) २ ५ २ देवै सम्पादित विद्वांसम् (जनम्) ६ १६ ६ देवेषु विद्वत्सु भवम् (जनम्) १ ४४ ६ विद्वद्भि सत्कृतम् (जनम्) ६ ५२ १२ देवैर्विद्वद्भिर्निष्पादितम् (शर्ध=वलम्) ७ ४४ ५ देवेषु विद्वत्सु कुशलम् (रुद्र=सभाध्यक्षम्) १ ११४ ४. देवेषु विद्वत्सु प्रियम् (सह=वलम्) ४ ४२ ६ दिव्येषु गुणेषु भवम् (जन=विद्वासम्) ५ १३ ३ **दैव्यस्य**=यो देवै सह वर्त्तते तस्य (शिष्यगणस्य) २ ३३ ७ देवैर्विद्वद्भिर्लब्धस्य जगदीश्वरस्य २ ३८ ६ दिव्यसुख-प्रापकस्य (अवस=रक्षणस्य) ४ २१ १० देवै कृतस्य (अवस=रक्षाऽऽदे) ५ ५७.७. दिव्येषु पदार्थेषु साक्षात्-कृतस्य (सवितु=जगदीश्वरस्य) ४ ५४ ४ **दैव्यः**=देवेषु लब्ध (विद्वान् जन) २ ३ १० यो देवेषु विद्वत्सु जात (जन) प्र०—अत्र 'देवाद्यञञौ' अ० ४ १ ८५ इति वार्त्तिकेन प्राग्दीव्यतीयाऽन्तर्गते जातेऽर्थे यञ्प्रत्यय ३ ५५ देवै कृत (व्यवहार) ६ ५० १२ देवै कृतो विद्वान् (सुप्रसिद्धो राजा) ७ ८ ४ देवेषु विद्वत्सु प्रीत (अतिथि=विद्वज्जन) १२ ३४ देवेषु कुशल (अग्नि=जगदीश्वर) प्र०—अत्र कुशलेऽर्थे देवशब्दाद् यञ्-प्रत्यय १ २७ १२ **दैव्याय**=दिवि भव दिव्य, तस्य भावस्तस्मै (कर्मणे=पञ्चविध-लक्षणचेष्टामात्राय), भा०—उत्तमसुखलाभाय, दिव्यसुखाना-मुत्पादकाय १ १३ **दैव्यानि**=देवैर्विद्वद्भिर्निर्वृत्तानि वस्तूनि १३ १३ दिव्यगुणानि (व्रतानि=कर्माणि) १ २४ २ देवैर्विद्वद्भि कृतानि कर्माणि ४ ४ ५ देवेषु विद्वत्सु जातानि (व्रतानि) १ ६२.१२ दिव्यैर्गुणै कर्मभिर्वा निर्वृत्तानि (व्रतानि) १ ७० १ दिव्यगुणानि (व्रतानि=सत्यानि कर्माणि-वस्तूनि वा) १ १२४ २ **दैव्याः**=देवेषु गुणकर्मस्व-भावेषु कुशला (ऋषय) ३४ ४६ **दैव्ये**=देवेषु विद्वत्सु कुशले (जने) ४.५४ ३ **दैव्येन**=दिव्येन (वचसा=वच-नेन) ४ १.१५ देवेषु पृथिव्यादिषु भवेन (सूर्येण=ईश्वरेण) ३७ १५ दिव्यस्वरूपेण (सवित्रा=विद्युद्रूपेण) ४ ३४ ८ देवैर्विद्वद्भि कृतेन विदुषा (जनेन) ७ ५३ २ **दैव्या**=दिव्येषु पदार्थेषु भवौ (प्रसिद्धाऽप्रसिद्धाऽग्नी), प्र०—अत्र प्राग्दीव्यतीयार्थेषु यञ्-प्रत्यय १ १३ ८ देवेषु दिव्येषु गणेषु भवौ (देवा=वायुवह्नी) २८ १७ देवेषु कुशलौ (कारू=शिल्पिनौ) २६ ३२ देवेषु विद्वत्सु साधू (भिषजा=चिकित्सकौ) २८ ७ कमनीयेषु कुशलौ (देवा=विद्वासौ जनौ) २८ ४० देवेषु दिव्येषु कर्मसु साधू (कवी=मेधा-विनौ जनौ) २८ ३० देवेषु लब्धौ (अश्विना=अग्निवायू) २१ ३६ देवेषु भवौ (अध्यापकोपदेशकौ) २० ४२ दिव्य-गुणसम्पन्नौ (अश्विना=अध्यापकोपदेशकौ) २० ६२ देवेषु दिव्येषु वोधेषु कुशलौ (कवी=अध्यापकोपदेशकौ) १ १८८ ७ विद्वत्सु कुशलौ (महाविद्वासौ) ३ ७ ८ दिव्य-गुणावेव विद्वासौ स्त्रीपुरुषौ) ३ ४ ७. देवेषु प्रयुक्तानि

सीर०' अ० ४ २.३२ सूत्रेण छ प्रत्यय.। द्यावापृथिवीयम् चक्षुपी द्यावापृथिवीयम् कौ० १६ ४ द्यावापृथिवीय द्विकपालम् मै० २ १ ३ वशा द्यावापृथिवीया मै० ३ १३ १२. द्यावापृथिवीया एककपाल. (सौम्यश्चरु) मै० १.१० १, २ ६ २ द्यावापृथिवीय (पय.) प्रह्रियमाणम् मै० १ ८.१०.]

द्यावाभूमी सूर्यपृथिवी-लोकौ १७ १९ प्रकाशपृथिव्यौ ४ ५५ १. भूमि से लेकर स्वर्ग पर्यन्त, आर्याभि० २ ३४, १७ १९. [दिव्-भूमिपदयो समास । 'दिवो द्यावा' सूत्रेण पूर्वपदस्य द्यावादेश]

द्युक्षम् प्रकाशमानम् (अग्निं=विद्युदादिस्वरूपम्) २ २ १ द्युलोकस्थम् (सादन=गृहम्) १ १३६ २ द्योतमानम् (अर्यमण=न्यायाधीशम्) १.१३६ ६. द्यौर्नीति प्रकाश क्षियति निवसति यस्मिँस्तत् (भा०=राज्यम्) ३ ३१ धर्म-विद्याप्रकाशयुक्तम् (विपयम्) ५ ३९ २ कमनीयम् (धर्मज धनम्) ७ ३१ २ **द्युक्षः**=द्यौरिव क्षा भूमिर्यस्य (इन्द्र=राजादिसभ्यो जन) ६ ३७.२ यो दिव प्रकाशान् क्षियति वासयति स (विद्वज्जन) ७.३४ २४ द्युतिमान् (राजा) ६ २४ १ [द्यु=अहर्नाम निघ० १.९ तदुपपदे क्षि निवासगत्यो (तुदा०) धातोरौणादिक ड प्रत्यय.। द्यु-क्षापदयोर्वा समास । क्षा पृथिवीनाम निघ० १ १]

द्युक्षवचसम् द्योतकवचनस्य प्रकाशकम् (विप्र=मेधाविजनम्) ६ १५ ४ [द्युक्ष-वचस्पदयो समास । द्युक्षमिति व्याख्यातम्]

द्युक्षा दिवि प्रकाशे निवासो यस्या सा (अग्नेर्ज्वाला), प्र०—अत्र 'क्षि निवासगत्यो' इत्यस्मादौणादिक डप्रत्यय १.१०० १६ [द्युक्षमिति व्याख्यातम् । तत स्त्रिया टाप्]

द्युक्षासः दिवि प्रकाशे क्षियन्ति निवासयन्ति ते (इन्दव=सस्नेहा. पदार्था) ३ ४० ५ [द्युक्षमिति व्याख्यातम् । ततो जसोऽसुगागम]

द्युतद्यामा द्युतन्तो विद्योतमाना पदार्था यया सा (मनीषा=प्रज्ञा) ६ ४९ ४ द्युतद् दीप्यमानमग्निं याति तम् (वायु=प्राणादिलक्षणम्) प्र०—अत्र विभक्तेर्लुक् 'सहितायाम्' इति दीर्घ ३१ ५५ **द्युतद्यामानम्**=प्रहरान् द्योतयन्तीम् (उषस=प्रातर्वेलाम्) ५ ८० १. [द्युतदुपपदे या प्रापणे (अदा०) धातोर्मनिन् प्रत्यय । द्युतद्=द्युत दीप्तौ (भ्वा०) धातो शतृप्रत्यय । 'बहुल छन्दसी' ति शपो लुक्]

द्युतम् कारणस्था दीप्तिम्, प्र०—अत्र 'द्युत दीप्तौ' इत्यस्मात् क्विप्प्रत्यय ३ १६ **द्युता**=प्रकाशेन ६.२ ६ [द्युत् दीप्तौ (भ्वा०) धातो. क्विप्]

द्युतयन्त द्योतयन्तु २.३४.२. [द्युतमिति व्याख्यातम्। तत. 'तत्करोति तदाचष्टे' इति णिजन्ताद् धातुत्वे लङ्। अडभाव:]

द्युतानम् सत्यार्थद्योतकम् (अग्निं=पावकम्) ६ १५.४ **द्युतानः**=देदीप्यमान (सुप्रसिद्धो राजा) ७ ८४ यथा दिव सद्विद्यागुण विस्तारयन्ति तथा (परमविद्वज्जन) ५.२७ प्रकाशमान (सूर्य:) ४.५ १० [द्युत दीप्तौ (भ्वा०) धातो शानच् । 'बहुल छन्दसी' ति शपो लुक् । अथवा कर्त्तरि चानश् शप्-लुक् च । द्युतानो मारुतस्तेपा (देवानाम्) गृहपतिरासीत् ता० १७ १ ७. पशवो वै द्युतानो मारुत. काठ० ३५ १६ यो वाऽयं (वायु) पवत ऽएष द्युतानो मारुत. श० ३ ६ १ १६]

द्युभक्तम् यो दिव भजति तम् (विद्वज्जनम्) ७ ४०.२ विद्युदादिभिस्सेवितम् (रत्नं=धनम्) ४ १ १८ **द्युभक्ताः**=सूर्यादिप्रकाशेन सम्भाग प्राप्ता. (किरणा) १ ७३.६ [द्युभक्तपदयो समास । 'द्यु' इत्युपपदे वा भज सेवायाम् (भ्वा०) धातोरौणादिक क्त]

द्युभिः प्रकाशयुक्तैर्गुणैर्द्रव्यैर्वा १ ५३ ४ प्रकाशादिगुणविशेषै, प्र०—दिवो द्योतनकर्माणामादित्यरश्मीनाम्, निघ० १३ २५, ३ ८ धर्म्यै कामै ५ १६ २. दिवसै १ ११२ २५. दिनै. ३.३१.१६ प्रकाशमानै (दिनै रात्रिभिर्वा) ३५ १ देदीप्यमानै (देवेभि=किरणै) ३ ३ २ कामयमानै (विभि=पक्षिभिरिव) ५.५३ ३ विज्ञानादिप्रकाशै ७ ३१ ८. द्योतमानैर्दिनै ६ ५ ६ [द्युरिति अहर्नाम निघ० १ ९. द्युरित्यह्नो नामधेय द्योतत इति सत । द्युभि:=अहोभि नि० ६ १.]

द्यौरिव सूर्य इव ५ ५७.४ यथा सूर्यप्रकाशयुक्त आकाशे, भा०—सूर्यप्रकाशसदृश ३.५ सूर्यप्रकाशवत् २ ४ ६ [द्यौ-इवपदयो समास । द्यौ=द्यौप्राति० प्रथमैकवचनम्]

द्यौः प्रकाशयुक्त पदार्थ ३६ १७ प्रकाशमयो विद्युत् सूर्यादिलोकसमूह १ २२ १३ प्रकाशमान सूर्यादि १ ९६ ६. विद्युत्प्रकाश १ ८३ ३ आकाशस्थ (भानु=सूर्य) ४ १ १७. प्रकाशात्मक सूर्यादिलोक, ऋ० भू० १२७, ३१ १३. सूर्यादिप्रकाश १ १०० १९ प्रकाशमान परमेश्वर सूर्यादिर्वा १ ८९.१० विद्याप्रकाश प्र०—दिवो द्योतनकर्मणामादित्यरश्मीनाम्, नि० १३ २५, १ २६ सूर्यादिप्रकाशवान् पदार्थ ३२ ६ तत्प्रकाश २६ १ आकाशस्य,

द्योप्राति० द्वितीयैकवचने 'औतोऽम्शसो' अ० ६ १.९३ सूत्रेणामि परत आकारान्तादेश.। द्योशब्द:=द्युत् दीप्तौ (भ्वा०) धातोर्बाहुलकाद् औणादिको (उ० २ ६७) डो प्रत्यय । द्योतन्ते लोका अस्या यया वा द्योतते सा द्यौ । 'गोतो णित्' सूत्रे 'ओतो णित्' इति विग्रहे सर्वनामस्थानस्य णित्वाद् वृद्धि]

द्यामिव प्रकाशमिव ४ ३१ १५ सूर्यमिव (अग्निम्= ईश्वरम्) ४.७ ३ [द्याम्-इवपदयो समास । द्यामिति व्याख्यातम्]

द्याव: प्रकाशा १ १५१ ६ किरणा ४ १६ १६. प्रकाशयुक्ता दिवसा प्रकाशा वा ६ ३८ ४ प्रकाशमया लोका ३ ३२ ६ सूर्यादिप्रकाशा. ४.५७ ३ कामयमाना विद्वास (जना) ६ ४ ३ सूर्याद्या ६ २४ ७ प्रकाशान् ५ ५३ ५ प्रकाश १ ५१ १ सत्यकामा (गिर =वाच) ५ ४१ १४

द्यावा=सूर्यम् ७ ४३ १ द्यौ १ १८५ २ प्रकाश १ ६१ १४ दिव्य सुख से, आर्याभि० १ ४७, ऋ० ७ ८ १२ २ सूर्य २ ४१ २० प्रकाशम् १ ६३ १ स्वस्वप्रकाशेन प्रकाशमानौ (रात्र्युपसौ) १ ११३ २ [द्योप्रातिपदिकस्य जसि रूपम् । द्यौरिति 'द्याम्' इति पदे व्याख्यातम्]

द्यावाक्षामा प्रकाशभूमी, प्र०—अत्र 'दिवो द्यावा' अ० ६ ३ २९ अनेन दिवशब्दस्य द्यावाऽऽदेश १ १० २ २ अत्र 'अन्येषामपि दृश्यते' इति दीर्घ १२ २ भा०—द्यावाभूमी १७ ७० सूर्यभूमी ३ ८ ८ द्यावापृथिव्यौ ६ ३१ २ अन्तरिक्ष भूमिश्च १ १४० १३ क्षमा एव क्षामा, द्यौश्च क्षामा च द्यावाक्षामा सूर्यपृथिव्यौ १ १२१ ११ ब्रह्माण्डम् १७ ७० [दिवा अहर्नाम निघ० १ ९ क्षाम पृथिवीनाम निघ० १ १ तयो समास । 'दिवो द्यावा' अ० ६ ३ २९ सूत्रेण द्यावादेश । 'सुपा सुलुक्' त्याकारादेश । द्यावाक्षामा—इमे वै द्यावापृथिवी द्यावाक्षामा श० ६ ७ २ ३]

द्यावापृथिवी द्यौश्च पृथिवी च ते, प्र०—'दिवो द्यावा' इत्यनेन द्वन्द्वे समासे दिव शब्दस्य स्थाने द्यावाऽऽदेश । अस्मत्प्राप्ते न्यायप्रकाश-पृथिवीराज्ये प्र०—द्यावापृथिवीति पदनामसु पठितम्, निघ० ५ ३ इत्यत्र प्राप्त्यर्थो गृह्यते २ ९ सूर्यप्रकाशो भूमिश्च २ १६ विद्युदन्तरिक्षे ६ ७० ४ भूम्यन्तरिक्षे ५ ८३ ८ विस्तृतौ सूर्यभूमिलोकौ १७ २० राजनीति-भूराज्ये १२ २९ प्रकाशाऽन्तरिक्षे १४ ६ प्रकाशाऽप्रकाशे जगती १३ ४६ प्रकाशभूमिवद् वर्त्तमाने (अ०—अध्यापिकोपदेशिके स्त्रियौ ३७.२ प्रकाशभूमी इव सभा-न्यायप्रकाशौ १ १० १ ३ विद्युदन्तरिक्षे १ १८५ ११ द्यौश्च पृथिवी च तौ भूमिसूर्यौ, तद्गतावभीष्टदेशदेशान्तराविति यावत् ६ २१ प्रकाशाऽप्रकाशयुक्तौ लोकसमूहौ १ ५२.१४ प्रकाशाऽन्तरिक्षे ३.२६ ८. प्रकाशभूमी राज्यार्थे ६ १९ भूमिसवितारौ १ १६० ५ दिव अर्थात् सूर्यादिलोक, सर्वोपरि आकाश तथा पृथिवी अर्थात् मध्य निकृष्ट लोक आर्याभि० १ १५, ऋ० १ ४ १४ १४ द्यावा स्वर्ग, सुखविशेष और पृथिवी भूमि मध्य सुखवाला लोक आर्याभि० २ ३६, १७ २० सूर्य और भूमि स० वि० १२२, अथर्व० १४ १ ५४

द्यावापृथिवीभ्याम्=सूर्यान्तरिक्षाभ्याम् ३८ १५ सूर्य्य-भूमि-शोधनाय ३९ १३ भा०—भूमिसूर्याभ्याम् ३८.१२ प्रकाशभूम्यो शुद्धये भा०—प्रकाशभूमिभ्याम् ४ ६ द्यावा अर्थात् स्वर्ग परमोत्कृष्ट मोक्षसुख और पृथिवी अर्थात् ससार-सुख इन दोनो के लिये आर्याभि० २ ३१, ३८ १४

द्यावापृथिव्यो:=सूर्याचन्द्रवन्न्यायप्रकाश-भूम्यो २० १० दिव दिव प्रति पृथिवी पृथिवी प्रति च, ऋ० भू० २३२, प्रकाशभूम्यो २५ ५ [दिव्-पृथिवीपदयो समासे 'दिवो द्यावा' अ० ६ ३ २९ सूत्रेण पूर्वपदस्य दिवो द्यावादेश । द्यावापृथिवी पदनाम निघ० ५ ३ द्यावापृथिव्यौ—(वायो) मेनका च सहजन्या चाप्सरसाविति दिक् चोपदिशा चेति ह स्माह माहित्थिरितमे तु ते द्यावापृथिवी श० ८ ६ १ १७ द्यावापृथिवी वै गोआयुषी कौ० २६ २ इमे वै द्यावापृथिवी द्यावाक्षामा श० ६ ७ २ ३ इमे हि द्यावापृथिवी प्राणोदानौ श० ४ ३ १ २२. द्यावापृथिवी वै मित्रावरुणयो प्रिय धाम ता० १४ २ ४ द्यावापृथिवी वै देवाना हविर्धाने आस्ताम् ऐ० १ २९ द्यावापृथिवी वै सत्यस्य साधयित्र्यौ कौ० ४ १४ द्यावापृथिव्योर्वा एष गर्भो यत्सोमो राजा ऐ० १ २६ द्यावापृथिवी वै प्रतिष्ठे ऐ० ४ १० द्यावापृथिवी वै मित्रावरुणयो प्रियधाम ता० १४ २ ४. आविन्ने द्यावापृथिवी धृतव्रते तै० स० १ ८, १२ २ इमे वै द्यावापृथिवी रोदसी श० ६ ४ ४ २ इमे (द्यावापृथिव्यौ) वै हरी विपक्षसा तै० ३ ६ ४ २ इमे (द्यावापृथिव्यौ) ह वावोधनी जै० ३.६७ इमौ वै लोकौ (द्यावापृथिव्यौ) रोहिणौ (पुरोडाशौ) श० १४ २ १ ४ द्यावापृथिवी सर्व इमे लोका जै० ३ २७१ द्यावापृथिवी हि प्रजापति श० ५ १ ५ २६ यदरोदीत् (प्रजापति) तदनयो (द्यावापृथिव्यो) रोदस्त्वम् तै० २ २ ९ ४ वायुर्वा अनयो (द्यावापृथिव्यो) वत्स मै० २ ५ ४ काठ० १३ ५]

द्यावापृथिवीय: प्रकाश-भूमिदेवताक (कूर्म = कच्छप) २४ ३४ **द्यावापृथिवीया:**=द्यावापृथिवीदेवताका (वशा =पशव) २४ १४ ['द्यावापृथिवी' इति व्याख्यातम् । तत सास्य देवता विषये 'द्यावापृथिवी शुना-

द्युम्नम् धनम् ४ ८ यशो धन वा ५ १० १ प्रकाशमय यशो धन वा ६ १९ ९ प्रकाशमय ज्ञानम् १ ६.८. सुखप्रकाशयुक्त धनम्, प्र०—द्युम्नमिति धननामसु पठितम्, निघ० २ १०, ३ ३६ प्रकाशकारकमुत्तम यश, भा०—कीर्ति, प्र०—द्युम्न द्योततेर्यशो वाऽन्न वा, नि० ५ ५, ३ ३८ विज्ञानसाधकम् (धनम्) ३ ४० विद्याप्रकाश यशो धन वा १ ७३ ४ विद्याप्रकाशयुक्त धनम् १ ५४ ११. प्रकाशयुक्त यशोऽन्न वा ११ ६७ यश कर धनं विज्ञान वा ३ ५६ ६ शुद्ध यश ६ ४६.७. धर्म्यं यश ७.२५ ३. प्रकाशमय ज्ञानम् १ ६ ८ **द्युम्नानि**=यशासि ४.४ ६. यशासि धनानि वा ५ २८ ३ प्रदीप्तानि यशासि, भा०—धनानि, वेदा, भोज्यादीनि वस्तूनि च २६ १८. यशासि जलान्यन्नानि धनानि वा ३ ४० ७ **द्युम्नस्य**=धनस्य यशसो वा ५ ७ ३. **द्युम्नाय**=यशसे धनाय वा ६ ६०.११ **द्युम्ने**=यशसे ऽन्नाय वा, प्र०—द्युम्न द्योततेर्यशो वाऽन्न वा नि० ५.५, १३.३५ **द्युम्नेषु**=यशस्विषु धनप्रापकेषु वा (वीरसैनिकेषु) ३ ३७ ७ **द्युम्नेन**=प्रकाशेनेव विद्यासुशिक्षाम्पेण १ ४८.१ यशस्विना धनेन ३ २४ ३ यशसा ६ ५ ५ **द्युम्नै:**=यशोधनयुक्तै (नृभि =नेतृभिर्जनै) ४ १६ १६ यशोभिर्धनैर्वा ४ १२.१ पुण्ययशोभिस्सह १ ७८ ३ यशसा प्रकाशमानै शस्त्रास्त्रै १ ७८ ४ धनैर्विज्ञानादिभिर्गुणै' सह १ ७८ १ चक्रवर्त्यादिराजधनै सह १ ९१ २ [द्युम्नम्-धननाम नि० २ १० द्युम्नम्=द्योततेर्यशो वा अन्न वा नि० ५ ५ द्युत दीप्तौ (भ्वा०) धातोरौणादिको न प्रत्ययो मकारश्चान्तादेश । द्युम्न हि बृहस्पति श० ३.१ ४ १६ सोमस्य त्वा द्युम्नेन (अभिषिञ्चामि) तै० स० १.८ १४ १. मै० २ ६.११]

द्युम्ना द्योतमानानि यशासि धनानि वा ६ १९ ६. [द्युम्नमिति व्याख्यातम् । ततो जसो शेरादेशस्य लोप]

द्युम्नवत् प्रशस्तकीर्त्तिमत् (ब्रह्म=बृहद् धनम्) ३ २९ १५ [द्युम्नमिति व्याख्यातम् । तत प्रशसाया मतुप्]

द्युम्नवत्तमः अतिशयेन यशोधनयुक्त (विद्वज्जन) ६ ४४.१ [द्युम्नवदिति व्याख्यातम् । ततोऽतिशायने तमप् प्रत्यय]

द्युम्नवान् यशस्वी (राजा) ५ २८.४ [द्युम्नमिति व्याख्यातम् । तत प्रशसाया मतुप्]

द्युम्नश्रवसे द्युम्न यश श्रव श्रुत यस्य तस्मै (विदुषे सज्जनाय) ५ ५४ १ [द्युम्न-श्रवस्पदयो समास । द्युम्नमिति व्याख्यातम् । श्रव =अन्ननाम निघ २ ७ धननाम निघ० २ १०]

द्युम्नसाता द्युम्नस्य प्रशसाया विभागे १.१३१.१ [द्युम्न-सातिपदयो समास । द्युम्नं द्योततेर्यशो वा अन्न वा नि० ५.५ साति=षण् सम्भक्तौ (भ्वा०) धातो. क्तिन् प्रत्यये 'जनसनखना सञ्झलो.' सूत्रेणाकारान्तादेश । समासे कृते 'सुपा सुलुग्०' इति सप्तम्या स्थाने डादेश']

द्युम्नहूतिभिः द्युम्नस्य धनस्य यशसो वाऽऽह्वानै. १.१२९.७ धनविषयकवार्त्ताभि' १ १२९ ७ **द्युम्नहूतौ**=धनयशसोर्हूति प्राप्तिर्यस्यां तस्याम् (क्रियायाम्) ४ १६ ६ द्युम्नेन धनेन यशसा वा हूतिराह्वान यस्या तस्याम् (क्रियायाम्) ६ २६ ८ [द्युम्न-हूतिपदयो समास । द्युम्नमिति व्याख्यातम् । हूति =ह्वेञ् स्पर्द्धाया शब्दे च (भ्वा०) धातो क्तिन् । यजादित्वात् सम्प्रसारणम्]

द्युम्नसाहम् द्युम्नानि धनानि सहन्ते येन तम् (हरि=हयम्) १ १२१ ८ [द्युम्नमिति व्याख्यातम् । तदुपपदे षह मर्षणे (भ्वा०) धातो 'छन्दसि सह' अ० ३ २.६३ सूत्रेण ण्वि]

द्युम्निनम् यशस्विन श्रीमन्तम् (राजाध्यक्षम्) ३ ३७.८ **द्युम्निनः**=प्रशस्तकीर्त्तिमत. (वीरजनान्) १ १३८ २ [द्युम्नमिति व्याख्यातम् । तत प्रशसाया मत्वर्थे 'अत इनिठनौ' सूत्रेण इनि प्रत्यय.]

द्युम्निनी: प्रशस्त द्युम्न धन यशो वा विद्यते यासा ता (विड्य =स्त्रिय.) १० ७ [द्युम्नमिति व्याख्यातम् । ततो मत्वर्थे इनि प्रत्ययान्तात् स्त्रिया ङीप्-प्रत्यय. । द्युम्निनीराप एता इति वीर्यवत्य इत्येवैतदाह श० ५ ३ ५ १६]

द्युम्निन्तमः बहूनि द्युम्नानि धनानि विद्यन्ते यस्य स द्युम्नी, अतिशयेन द्युम्नीति द्युम्निन्तम (मद =हर्ष), प्र०—अत्र 'नाद् घस्य' इति नुट् १ १२७ ९ अतिशयेन यशस्वी (सभेश) १ १७५ ५ [द्युम्नमिति व्याख्यातम् । ततो भूम्न्यर्थे इनि । ततोऽतिशायने तमप्-प्रत्यये 'नाद् घस्य' अ० ८ २ १७ सूत्रेण नुडागम]

द्युम्नी प्रशस्तधनी यशस्वी (परमेश्वरो विद्वान् जनो वा) १ ९१ २ बहुप्रशसा-धनयुक्त (इन्द्र =राजा) ३३ ९५ द्युम्नानि बहुविधानि धनानि भवन्ति यस्मिन् (राजपुरुष) प्र०—अत्र भूम्न्यर्थे इनि १ ३६ ८. ।

द्युम्नेभिः प्रकाशनर्यशोभि ६ ६१ १३ [द्युम्नमिति व्याख्यातम् । ततो भिसि 'बहुल छन्दसी' ति सूत्रेण ऐसादेशो न भवति]

प्र०—अत्र पञ्चम्यर्थे प्रथमा ३ ३ ११ कारणरूपेण प्रकाश २५ २३ कान्ति, प्र०—द्यौर्वै सर्वेषा देवानामायतनम्, शत० १४ ३ २ ८, १ २६ विज्ञानप्रकाशहेतु (वसु =यज्ञ) १ २ विद्युत्प्रकाश १ ६४ १६ विशाल सूर्यप्रकाश १.८ ५ प्रकाशरूप (पिता=सर्वपालक ईश्वर) २ ११ प्रकाशयुक्त-लोक ३१ १३ सदैव स्वप्रकाशस्वरूप (ईश्वर) आर्याभि० १ १७, ऋ० १ ६ १६ १० सर्व-प्रकाश ऋ० भू० १४३, अथर्व० १४ १ १ प्रकाशकर्मा (विद्या) १८ १८ प्रकाश-रूपा विद्युत् २३ ४३ भा०—अतीव सूक्ष्मा विद्युत् २३ ५४. भा०—सूर्यवत् न्यायविद्योभयप्रकाशक (राज्याधिकारी जन.) २० ४७ विज्ञानादिभि प्रकाशमान (अग्नि =सूर्यवद्विद्वान्) १२ १ स्वप्रकाश (सुरेता =जगदीश्वर) १२ २५ द्योत-माना (सूर्यज्योति) ऋ० भू० २०२, ऋ० ८.१.२३.७ विद्युत् सूर्यो वा ६ २० १ कामयमाना (स्त्री) ६ १७ ६ सूर्यकान्ति १ ६० ७ सूर्यद्युति १ ६५ २ दिव्या पुरुषाकृति ८ ३२. कामयमानो विद्वान् ६ ५२ २ अन्तरिक्षम् २३ ४८ विद्युदादिप्रकाश ६ १२ २ दिव्यगुणप्रदा वृष्टि प्र०—द्यौर्वै वृष्टि, शत० १३ २ ६ १६, २३ १२ प्रकाश इव विनय ११ २० विद्यान्यायप्रकाशक (अग्नि =विद्वान्राजा) १२ ३३ सत्यकाम (राजा) ५ ३६ ५ धर्मप्रकाश १८ २२ सब लोको से ऊपर जो आकाश है सो, आर्याभि० २ २५, ३६.१७ [द्योप्राति० प्रथमैकवचने 'गोतो णित्' सूत्र केचिद् 'ओतोणित्' इति पठन्ति, तन्मते सर्वनामस्थानस्य णित्वाद्वृद्धि । द्यो=द्युत दीप्तौ (भ्वा०) धातोर्बाहु० औणादिको डो प्रत्यय । द्यौर्वैवृष्टि श० १३ २ ६ १६ द्यौर्वै सर्वेषा देवानामायतनम् श० १४ ३ २ ८]

द्युमत् विज्ञानप्रकाशयुक्तम् (स्वस्ति =सुखम्) २ ६ ६. प्रकाशवत् (अग्नि =पावक) ५ १११ प्रशस्त-प्रकाशवत् (सुवीर्यम्) १ ७४ ६ प्रशस्तप्रकाशयुक्तं मन २६ ३ द्यौर्ज्ञानप्रकाशो विद्यते यस्मिँस्तत् (वसु=विद्या-सुवर्णादिधनम्) ३ १३ ७ द्यौ प्रकाशोऽस्त्यस्मिन् तद्वत् (अग्नि =विद्युत्) १५ २७ प्रशस्तविज्ञानयुक्तम् (सुवीर्यं= शोभन धनम्) ३ १० ८ द्यौ कामना विद्यते यस्य तत् (शम्=उत्तम सुखम्) ७ ८ ६ यथार्थज्ञानप्रकाशयुक्तम् (विज्ञानम्) ५ १८ ५ सत्यव्यवहारप्रकाशो विद्यते यस्मिन् (द्रविण=धनम्) ऋ भू ३०६ २६ ३ प्रकाशवत् (जलम्) ५ २३ ४ **द्युमतः**=प्रशस्ता द्यौ कामना विद्यते यस्य तस्य (सज्जनस्य) ६ ५० ११. विज्ञानप्रकाशयुक्तान् (विप्रान्= मेधाविनो विपश्चित) ६ १७ १४ **द्युमतीम्**=विद्या-प्रकाशवतीम् (धीतिं=धियम्) ६ ३८ १ प्रशस्ता द्यौ. कामना विद्यते यस्यास्ताम् (इषम्=अन्नादिकम्) ७.५ ८. **द्युमते**= द्यौ प्रशस्तो विद्याप्रकाशो विद्यते यस्मिँस्तस्मै (यूने जनाय) १.६३ ३ [द्युप्राति० प्रशसाया भूम्न्यर्थे वा मतुप् । द्युम-तीम् प्रयोगे स्त्रिया मतुप् । द्युमत्=द्युमान्, द्योतनवान् । नि० ६.१६. द्युमत्=ज्वलतिकर्मा निघ० १.१६]

द्युमत्तम ! द्यौर्बहु. सर्वज्ञ प्रकाशो विद्याप्रकाशो वा विद्यते यस्मिन् सोऽतिशयितस्तत्सम्बुद्धौ (इन्द्र=सभेश राजन्) १ ५३.३ **द्युमत्तमम्**=द्यौ प्रशस्त प्रकाशो यस्मिँस्तदतिशयितस्तम्) (रयिं=विद्याचक्रवर्त्यादिधन-समूहम्) ३ २५ प्रशस्ता द्यौविद्याप्रकाशो विद्यते यस्य यस्मिँस्तदतिशयितम् (दक्ष=बलम्) ६ ४४ ६ प्रशस्ता दिव प्रकाशा कामना वा विद्यन्ते यस्मिन् सोऽतिशयितस्तम् (विद्वास जनम्) १५ ४८ अतिशयेन प्रकाशवन्तम् (रयिं=धनम्), भा०—सदुपदेशाद्युत्तमगुणम् २५ ४७ प्रशस्त प्रकाशो विद्यते यस्मिन् स शब्दो द्युमान्, अतिशयेन द्युमान्, द्युमत्तमस्तम् (उलूखलव्यवहारम्) प्र०—अत्र प्रशसार्थे मतुप् १ २८ ५ **द्युमत्तमा**=अतिशयेन प्रशस्त-प्रकाशयुक्तानि (शोचीषि=तेजासि) २७ ११ [द्युमदिति व्याख्यातम् ततोऽतिशायने तमप् प्रत्यय । द्युमत्तमा—(यजु० २७.११) द्युमत्तमेति वीर्यवत्तमेत्येतत् श० ६ २ १.३२]

द्युमन्तम् प्रकाशवन्तम् (विद्वास जनम्) ५ २६.३ प्रशस्ता द्यौ प्रकाशो विद्यते यस्मिँस्तम् (भग=सेवनीय-मैश्वर्यम्) ३ ३० १६ द्यौर्बहुप्रकाशो विद्यते यस्मिँस्तम् (अग्नि=जगदीश्वर भौतिक वा), प्र०—अत्र भूम्न्यर्थे मतुप् २ ४. द्यौरनन्त प्रकाशो विद्यते यस्मिन् परमेश्वरे वा प्रशस्त प्रकाशो विद्यते यस्मिन् भौतिके तम्, प्र०—अत्र भूम्न्यर्थे प्रशसार्थे च मतुप् ३ १८ बहुकामयुक्तम् (सज्जनम्) ६ १७ ४ बहुप्रकाशवन्तम् (लोकम्) १ ६४ १४. दीप्ति-मन्तम् (विद्वास राजानम्) ७ १५ ७ **द्युमन्तः**=कामयमाना प्रकाशवन्तो वा (विद्वासो जना) ५ १२ ४ बहुप्रकाशवन्त (किरणा) ५ २५ ८ प्रशस्त-कामनायुक्ता (सर्वमित्रा जना) ५ ६६ २ द्यौर्बह्वीर्दीप्तिर्वर्त्तते येपु ते (अग्नय =विद्युदादय.) ७ १.४ **द्युमान्**=बहुविद्याप्रकाश (मनुष्य) ५ ३४ ३ बहुविद्याप्रकाशयुक्त (राजभृत्य) ४ १५ ४ विद्यादिसद्गुण-प्रकाशयुक्त (इन्द्र =सभाध्यक्ष) १ ६२ १२ बहु-कला-यन्त्रादिप्रकाशित (रथ =विमानादियानविशेष) ४ ३१ १४. [द्युमदिति व्याख्यातम् । तस्य रूपाणि]

द्युमः प्रकाशवान् (अग्नि =विद्वान् जन) ६ १० २. [द्युप्राति० मतुवर्थे 'द्युद्रुभ्या म.' अ० ५ २ १०८ सूत्रेण म प्रत्यय । द्युरिति अहर्नाम निघ० १ ६]

ज्योतिर्जागतच्छन्दो द्यौ स्थानम् गो० पू० १ २९. आदित्येन दिवा नक्षत्रैस्तेनासौ लोकस्त्रिवृत् ता० १०.१ १. द्यौरसि वायौ श्रिता । आदित्यस्य प्रतिष्ठा तै० ३ ११.१ १०. वायुरस्यन्तरिक्षे श्रित । दिव प्रतिष्ठा तै० ३ ११ १.९. द्यौरन्तरिक्षे प्रतिष्ठिता ऐ० ३ ६ साम वा असौ (द्युलोक) ऋगयम् (भूर्लोक) ता० ४.३ ५ दिवमेव साम्ना (जयति) श० ४ ६ ७ २ असौ (द्यौ) वै जुहू तै० ३ ३ १ १ असौ (द्यु) लोक उत्तरौष्ठ कौ० ३.७. द्यौर्वाऽउत्तरꣳ सधस्थम् श० ८ ६ ३ २३ द्यौरुत्तरवेदि श० ७ ३.१.२७ द्यौरेव तृतीया चिति. श० ८ ७ ४.१४ द्यौर्वै तृतीयꣳरज श० ६ ७.४ ५ द्यौर्हविर्धानम् तै० २ १ ५ १ द्यौस्सूक्तम् जै० उ० ३ ४ २ द्यौर्वा ऽअपा सदन दिवि ह्याप सन्ना श० ७ ५.२ ५६ आपो वै द्यौ श० ६ ४ १ ९ द्यौर्वै वृष्टि पूर्वचित्ति । श० १३.२ ६ १४. वृष्टिर्वै द्यौ तै० ३ २ ९ ३. तस्यै वा एतस्यै वसोर्धारायै । द्यौरेवात्मा श० ६ ३ ३.१५ तन्माता पृथिवी तत्पिता द्यौ तै० २ ७ १६ ३ द्यौर्यश श० १२.३ ४ ७ द्यौ वै सर्वेषा देवानामायतनम् श० १४ ३ २ ८ द्यौरिन्द्रेण गर्भिणी श० १४.९ ४ २१. ऐन्द्री द्यौ ता० १५ ४ ८ द्यौर्ब्राह्मणी जै० उ० ३.४.६ प्रजापतिर्वै स्वा दुहितरमभ्यध्यायद्दिवमित्यन्य आहुरुषसमित्यन्ये ऐ० ३.३३. असौ (द्युलोक) भविष्यत् तै० ३ ८ १८.६ सर्वेणात्मनार्तिमारिष्यसि क्षिप्रेऽमुलोक (द्युलोक) एष्यसीति श० १४ ३ २१ (देवा) अमु (द्युलोक) बर्हिर्णिधनेन (अभ्यजयन्) ता० १० १२ ३ द्यौर्लोकꣳ (द्युलोक) शस्यया (जयति) श० १४ ६ १ ९ (प्रजापति) जीमूतै नक्षत्रैश्च दिवम् (अदृहत्) श० ११ ८ १ २]

द्रप्सम् कमनीयम् (आनन्दम्) ७.३३ ११. अ०—सर्वत्राऽभिव्याप्तमानन्दम्, भा०—जगदीश्वरस्य सानन्द स्वरूप सर्वत्रोपलब्धम् १३ ५ पार्थिव भूगोलम् ४ १३ २ **द्रप्सः**=यज्ञपदार्थ-समूह प्र०—अत्र मन्त्रे 'वा शर्प्रकरणे खर्परे लोप' इति विसर्जनीय लोप अ० ८ ३ ३६ इति भाष्य-वार्त्तिकेन ७ २६ दुष्टाना विमोहनम् ६ ४१ ३ हर्षकारी रस प्र०—'दृप हर्षणमोहनयो' इत्यस्मादौणादिक स प्रत्यय किच्च 'अनुदात्तस्य चर्दुपधस्याऽन्यतरस्याम्' अ० ६ १ ५९ अनुनाऽमागम १ २६ हर्ष १४ ५ हर्ष उत्साह १३ ५ **द्रप्साः**=हर्षयुक्ता भृत्या ज्वालादयो गुणा वा १ ९१ ११ विमोहकारका (मेघा) ५ ६३.४. दृप्यन्ति सहृष्यन्ते बलानि सैन्यानि वा यैस्ते (इन्दव =सोमाद्योषधिगणा), प्र०—अत्र 'दृप हर्षणमोहनयो' इत्यस्माद् बाहुलकात् करणकारक औणादिक स प्रत्यय १ १४.४, [दृप हर्षमोहनयो: (दिवा०) धातोर्बाहु० औणादिक स प्रत्ययः किच्च । द्रप्स सभृत प्सानीयो भवति नि० ५ १४ द्रप्स. असौ वा ऽआदित्यो द्रप्स श० ७.४.१.२० स्तोको वै द्रप्सः गो० उ० २.२.१२]

द्रप्सिनः बहुद्रप्सो विविधो मोहोऽस्ति येषा ते (घोरवर्पस =वायव) १.६४.२. [द्रप्समिति व्याख्यातम्। ततो भूम्न्यर्थे मत्वर्थे इनि. प्रत्यय]

द्रव धाव ५ ३१ २ समीपमागच्छ ६ ४८ १६ **द्रवत्**=द्रवतु १.४४.७ द्रवति प्राप्नोति सद्यो गच्छति वा ६ ४५ ३२. **द्रवताम्**=गच्छेताम् ३ १४ ३. **द्रवन्ति**=गच्छन्ति २९ ४८. धावन्ति ४ ६ ५ **द्रवन्तु**=गच्छन्तु ४ १६ १ [द्रु गतौ (भ्वा०) धातोर्लोट् । अन्यत्र लेट् । द्रवताम्=प्रयोगे व्यत्ययेनात्मनेपदम् । द्रवन्ति द्रुधातोर्लट् । द्रवति गतिकर्मा निघ० २ १४]

द्रवत् द्रव प्राप्नुवत् (इन्द्रम्=ऐश्वर्यम्) ३ ३५ २ **द्रवतः**=द्रवीभूतस्य (वे =पक्षिण) ९ १५ धावत (श्येनस्य) ४ ४० ३. **द्रवन्ता**=गन्तारौ (प्रजापति प्रजाजनश्च) प्र०—अत्र 'सुपा सुलुक्०' अ० ७ १.३९ इति आकारादेश ७ १७ [द्रु गतौ (भ्वा०) धातो शतृप्रत्यय]

द्रवत् शीघ्रम्, प्र०—द्रवदिति शीघ्रनामसु पठितम्, निघ० २.१५, १ २.५

द्रवत्पाणी द्रवच्छीघ्रवेगनिमित्ते पाणी पदार्थविद्याव्यवहारा ययोस्तौ (अश्विनौ=जलाऽग्नी) १ ३ १. [द्रवत्-पाणि-पदयो समास । द्रवदिति व्याख्यातम्]

द्रवदश्वम् द्रवन्तो द्रुत गच्छन्तोऽश्वा यस्मिँस्तम् (रथ=विमानादियानम्) ४ ४३ २. [द्रवत्-अश्वपदयो समास]

द्रवन्ती जानन्ती गच्छन्ती वा (देवी=विदुषी स्त्री) ५ ४१ १८ [द्रु गतौ (भ्वा०) धातो शत्रन्तान् ङीप्-प्रत्यय]

द्रवयति आर्द्रीकरोति ६ ३ ४ [द्रवप्राति० 'तत्करोति तदाचष्टे' इति वार्त्तिकेन णिच्-प्रत्ययान्ताल् लट् । द्रव = द्रु गतौ धातो 'ऋदोरप्' इत्यप्]

द्रवरः यो द्रवे रमते, द्रवान् ददाति वा (राजा) ४ ४० २ ['द्रव' इत्युपपदे रमु क्रीडायाम् (भ्वा०) रा दाने (अदा०) धातोर्वा 'अन्येष्वपि दृश्यते' अ० ३.२.१०१ सूत्रेण ड. प्रत्यय]

द्रवः स्निग्ध (राजा) ४.२० २ [द्रु गतौ (भ्वा०) धातो. 'ऋदोरबि' त्यप्-प्रत्यय.]

द्यून् दिनानि १२ २८ प्रकाशान् ४ ४३ ३ दिवसान् ४ ४ ६ त्रिप्रकाशान् २ २८ २ [द्यु-प्रातिपदिकाद् द्वितीयाया वहुवचनम्। द्यु =अहर्नाम निघ० १ ९ द्युरित्यह्नो नामधेयम्, द्योतत इति सत. नि० १ ६]

द्योतताम् प्रकाशताम् १५ ५२ [द्युत दीप्तौ (भ्वा०) धातोर्लोट्]

द्योतना प्रकाशमाना (उपा) १.१२३ ४. [द्योतना उपो नाम निघ० १ ८]

द्योतनाय प्रकाशनाय ६ २० ८ [द्युत दीप्तौ (भ्वा०) धातोर्भावे ल्युडन्ताच्चतुर्थी]

द्योतनिम् प्रकाशरूपा विद्याम् ३ ५८ १. [द्युत दीप्तौ (भ्वा०) धातोर्बाहुलकादौणादिकोऽनि प्रत्यय]

द्योतयत् प्रकाशयति ६ ३९ ३ [द्युत् दीप्तौ (भ्वा०) धातोर्णिजन्तात् सामान्ये लड् । अडभावश्छान्दस]

द्यो: प्रकाशस्य ४ २७ ३ सूर्यस्य ६ ६७ ६ प्रकाशमानाया (तन्यतो =विद्युत) ४ ३८ ८ [द्युप्राति० षष्ठी। द्यु =अहर्नाम निघ० १ ९]

द्योत् द्योतयेत् ४ ४ ६.

द्यौः प्रकाश १ ५२ १० प्रकाश इव १ १३३ ६. विद्युत् सूर्यप्रकाशो वा १ ११२ २५ सूर्य इव वर्त्तमान. ११ ५८ सूर्यादि १ ५७ ५ सूर्यद्युति. १ ६५ २. प्रकाशमान परमात्मा सूर्यादिर्वा १ ८९ १० सूर्यविद्याप्रकाशो वा १ १०५ १९ विद्युत् वा सूर्यादिप्रकाशमानपदार्थ १ ११३ २० विद्युदिव विद्या ३ ५४.१९ आकाशस्य ४ १ १७ सत्यकाम ५ ३६ ५ कामयमान इव ५ ४५.३. कामयमानो विद्वान् ६ ५२ २ दिव्या पुरुपाकृति ८.३२ प्रकाश इव विनय ११ २० विज्ञानप्रकाशहेतु १ २ धर्मप्रकाशस्वरूप, प्रकाशमयो वा २ ११ स्वप्रकाश १२ २५. विद्यान्यायप्रकाशक १२ ३३ प्रकाशकर्मा १८ १८ कारणरूपेण प्रकाश २५ ३३ आकाशस्य, प्र०—षष्ठ्यर्थे प्रथमा, ३३ ११ दिव्यगुणप्रदा वृष्टि. । प्र०—द्यौर्वै वृष्टि शत० १३ २ ६ १४, २३ १२ द्यौरिव सूर्यप्रकाशवत् २ ४.४६ सूर्य इव ५ ५७ ४. यथा सूर्यप्रकाशयुक्ते आकाशे ३.५ **दिवम्**=सूर्यादिक जगत् १२ १०२ सत्यप्रकाशम् १५.६ अविद्यागुणप्रकाशम् ३८ १७ देदीप्यमाना राजनीतिम् ९ २४ **द्याम्**=कामनाम् ५ २९ ६ कमनीया विद्याम् ६ ६७ ५ प्रकाशमयी योगविद्याम् १७ ६८ प्रकाशसमूह लोकम् १ ३३ १४ राज्यपालनविनयप्रकाशम् १ ५२.११ प्रकाशमय दिनम् १.३२.४ जिसमे सूर्य का प्रतिभास आवे वैसी प्रकाशस्वरूप भूमि अथर्व० ९ १५ सस्कारविधि। **दिव:**=स्व सुख दृश्यते यस्मात् तम् ३ २ १४ दिव्या गुणा क्रिया स्वभावा वा ८ ३१ प्रकाशयुक्तान् किरणान् १ ३४ ८ कमनीयान् कामयमानान् वा ६ ५१.४ दिव्यगुणसमूहम् १ ५६ ६ ज्योतीषि ३ ५६ ६ व्यवहर्त्तृन् ५.५९ ७. **दिवा**=प्रीत्या सह ६ ३ ६ विज्ञानान्धकारप्रकाशेन सह १ ९८ २ **दिव:**=प्रकाशमानात् धर्माचरणात् १ ५४ ७. प्रकाशादाकर्षकाद्वा १.५६ ५ **दिव:**=राज्यप्रकाशस्य १ १५१ ४ द्योतनात्मकस्य परमात्मन १५.६० कमनीयस्य गृहस्थव्यवहारस्य १५ ६४ व्यवहारस्य १ १८५.१. कमनीयार्थस्य ५ १० ३. **दिवि**=कृषिविद्याप्रकाशे ४ ५७ ५ प्रजाव्यवहारे १ ३६ ३ कमनीये शुद्धे व्यवहारे ६ ३४ ४. आकाशे १ ८० १३ अन्तरिक्षे १ ८५ २. दिव्ये आकाशे ३ २ १३ प्रकाशयुक्तेऽन्तरिक्षे ५ २७ ६ प्रकाशमयेऽग्नौ १ १६३ ४ द्योतनात्मके ब्रह्मणि सूर्यादिप्रकाशे वा १ ९ १. प्रकाशनिमित्ते १.७ ३. द्योतनात्मके सूर्यप्रकाशेऽन्तरिक्ष इव न्यायप्रकाशे १ ५१ न्यायप्रकाशे १ ५२ ४ प्रकाशे १ ९१.१८ सर्वविद्याप्रकाशे १ १०५ १६ [दिवु क्रीडाविजिगीषाव्यवहारद्युतिस्तुतिमोदमदस्वप्नकान्तिगतिषु (दिवा०) धातो क्विप्-प्रत्यय' । द्यौ =दिव् प्राति० प्रथमैकवचने 'दिव औत्' अ० ७ १ ८४ सूत्रेण औदादेश । द्याम्=इति द्योप्राति० द्वितीयैकवचनम् । द्यौ =अद्युतदिव वा अद इति तद्दिवो दिवत्वम् ता० २०.१४ २ अथ यत्कपालमासीत् सा द्यौरभवत् श० ६ १.२ ३ (प्रजापति) व्यानादसृ (द्यु) लोकम् (प्रावृहत् कौ० ६ १० असौ (द्यौ) हरिणी तै० १ ८ ९.१ दिवा (रूप) हिरण्यकशिपु तै० ३ ९ २० २. प्राणो वै दिव श० ६ ७ ४ ३ असौ (द्यौ) जगती जै० उ० १ ५५ ३ या द्यौ साऽनुमति सा एव गायत्री ऐ० ३ ४८ द्यौर्वै वृहद् श० ९.१ २ ३७. अथ वै (पृथिवी) लोको मित्रोऽसौ (द्युलोक) वरुण श० १२ ९ २ १२ एषा वा प्रतिष्ठा वैश्वानर (यद् द्यौ) श० १० ६ १ ९ असौ वै (द्यु) लोक समुद्रो नभस्वान् श० ९ ४ २ ५ वागिति द्यौ जै० उ० ४ २२ ११ मूर्धा तु एष वैश्वानरस्य (यद् द्यौ) श० १०.६ १.९ द्यौर्महदुक्थम् श० १० १ २ २ यत् (अग्ने) शुचि (रूप) तद् दिवि (न्यवत्त) श० २ २ १ १४ द्यौर्वा अस्य (अग्ने) परम जन्म श० ९.२ ३ ३९ द्यौ. सावित्री गो० पू० १ ३३ स सुवरिति व्याहरत् । स दिवमसृजत् तै० २.२ ४ ३ स्वरित्यसौ (द्यु) लोक श० ८ ७४.५ द्यौर्वै तृतीयसवनम् श० १२ ८ २ १० असौ वै (द्यु) लोकस्तृतीयसवनम् गो० उ० ४ १८. साम्नामादित्यो देवत तदेव

द्वादशकपालः द्वादशसु कपालेषु संस्कृत (चरु = ाक) २९ ६० [द्वादश-कपालपदयो 'तद्धितार्थोत्तरपद-समाहारे च' इति समास]

द्वादशप्रधयः यानेषु प्रधय सर्वकलायुक्तानामराणा धारणार्था द्वादश, ऋ० भू० १९८, ऋ० २ ३ २४ ४८ [द्वादशप्रधिपदयो समास । द्वादश = द्वि-दशन्पदयो समास । प्रधि = प्रपूर्वाद् दधाते कि प्रत्यय]

द्वादशाकृतिम् द्वादश मासा आकृतिर्यस्य तम् (सूर्यम्) १ १६४ १३ [द्वादश-आकृतिपदयो समास]

द्वादशाक्षरेण साम्न्या गायत्र्या (छन्दसा) ९ ३३ [द्वादशअक्षरपदयो समास]

द्वादशारम् द्वादश अरा मासा अवयवा यस्य त सवत्सरम् १ १६४.११ [द्वादश-अरपदयो समास]

द्वादशी द्वादशाना पूरणा (क्रिया) २५ ४ [द्वि-दशन् पदयो समासे 'द्व्यष्टन सख्यायाम्०' अ० ६.३ ४७ सूत्रेणा-कारादेशे पूरणार्थे डट्प्रत्यये स्त्रिया 'ठिड्ढाण्०' इति सूत्रेण ङीप्]

द्वापराय द्वावपरौ यस्मिँस्तस्मै (सत्याचरणाय जनाय) ३०.१८ [द्वि-अपरपदयो समासे पूर्वपदस्याकारादेश । द्वापर-(युगम्) सजिहानस्तु द्वापर ऐ० ७ १५]

द्वारः द्वाराणि २७ १६ प्रवेश-निर्गमार्थानि द्वाराणि २१ ४६ गमनाऽऽगमनार्थानि द्वाराणि २८ ३६ विद्या-विनयद्वाराणि, भा०—विद्याधर्मद्वाराणि २८ ५ अवकाश-रूपा, भा०—अवकाशप्रदा, अवकाशप्रदानेनानन्दप्रदा (दिश) २९ ३० द्वाराणीव सुखनिमित्ताः (पत्नी) ५ ५ ५ द्वार इव सुशोभिता (वाच) १.१४२ ६ **द्वारिषु**=आवर-केषु व्यवहारेषु १ ५२ ३ **द्वारौ**=बाह्याभ्यन्तरस्थे मुखे ५ ३३ गृहादीन्द्रिययो प्रवेशनिर्गमनिमित्तौ १ ४८ १५ **द्वार्भ्यः**=सवर्णेभ्य आच्छादनेभ्य ३० १० [वारयतीति वार, दकारोपजनेन द्वार । अथवा=द्वारयति सवृणोति यया सा द्वा । बहुवचने द्वार । बाहु० औणादिक (उ० २ ५७) सूत्रेण क्विप्। द्वार जवतेर्वा द्रवतेर्वा वारयतेर्वा। यज्ञे गृहद्वार इति कात्थक्य । अग्निरिति शाकपूणि नि० ८ ९-१०]

द्वाविंशः द्वाविंशतिधा (सम्भरण =सम्यग्धारको गुण) १४ २३ [द्वि-विंशतिपदयो समासे पूर्वपदस्या कारादेशे पूरणार्थे ड प्रत्यये 'ति विंशतेर्डिति' इति तेर्लोप । वर्चो द्वाविंश तै० स० ४ ३ ८ १ मै० २ ८ ४]

द्विक्षत् द्वेष करे स० वि० १४१, अथर्व० ३ ३० ३ [द्विष अप्रीतौ (अदा०) धातोर्लिङर्थे लेटि रूपम्]

द्विजन्मा विद्याजन्मद्वितीय (विद्वज्जन) १.१४० २. द्वाभ्यामाकाशवायुभ्या जन्म प्रादुर्भावो यस्य (मेघस्थ-विद्युत्) १ १४९ ४ गर्भ-विद्याशिक्षाभ्या जात (द्विजो जन) १ १४९ ५ **द्विजन्मानम्**=द्वाभ्या वायुकारणाभ्या जन्म यस्य त वह्निम् १ ६० १ **द्विजन्मानः**=द्वे उत्पत्ति-विद्या-प्राप्तिरूपे जन्मनी येषान्ते (विद्वासो जना) ६ ५० २. [द्वि-जन्मन्पदयो समास]

द्विता द्वयोर्भाव ४ ४२.१ द्वयो राजप्रजयोरुपदेशको-पदेश्ययोर्वा भाव ६ ४५ ८ द्वयोरध्यापकाऽध्येत्रोरुपदेष्टृ-उपदेश्ययोर्भाव ६.१६ ४ द्वयो प्रजासभाध्यक्षयोर्भाव १ ६२ ७ [द्वि प्राति० भावे तल् प्रत्यय । स्त्रिया टाप्। द्विता = द्वैधम् नि० ५ ३.]

द्विताय द्वाभ्या जन्माभ्या विद्या प्राप्ताय (अतिथये) ५ १८ २ द्वयोर्वायुवृष्टि-जलशुद्ध्योर्भावाय १ २३ [द्वि-प्राति० भावे तल्प्रत्यय' । द्वि-इतपदयोर्वा समासे इकार-लोपश्छान्दस]

द्वितीयम् द्वयो सङ्ख्यापूरकम् (भा०—गृहाश्रमम्) १२ १८ **द्वितीयः**=द्वयो सख्यापूरको धनञ्जय १७ ३२ **द्वितीयाः**=रुद्रा २० १२ **द्वितीये**=द्वयो पूरणे (अहन्=दिने) ३९ ६ **द्वितीयैः**=एकादशप्राणाद्यै रुद्रै २०.२२ [द्विसख्यावाचिन प्राति० पूरणार्थे तीय. प्रत्यय । द्वितीय' =द्वितीयवान् हि वीर्यवान् श० ३ ७ ३ ८]

द्वितीयस्याम् अस्या भिन्नायाम् (पृथिव्या=भूमौ) ५ ९ **द्वितीया**=ताडनक्रिया २५ ६ **द्वितीयया**= द्वितीयया (अध्यापनक्रियया) २७ ४३ [द्वितीयमिति व्या-ख्यातम् । तत सप्तमी]

द्विपक्षा दो पक्षो वाली (शाला) स० वि० १६८, अथर्व० ९ ३ २१ [द्वि-पक्षपदयो समासे स्त्रिया टाप् प्रत्यय]

द्विपत् द्वौ पादौ यस्य स (मनुष्य-समूह) प्र०—अत्र द्विपादिति भवितव्येऽयस्मयादित्वाद् भसज्ञा, भत्वात् 'पाद पत्' इति पद्भाव १ ९४ ५ **द्विपदम्**=द्वौ पादौ यस्मिँ-स्तत् (विद्यासुशिक्षायुक्त विद्वासम्) २८ ३२ **द्विपदः**= मनुष्यादे (जगत =ससारस्य) २३ ३ द्वौ पादौ यस्य तस्य मनुष्यादे २५ ११ **द्विपदा**=द्वौ पादौ यस्या सा (ऋक्) २१ २० द्वौ पादौ यस्मिँस्तेन (वाकेन=यजुषा) १ १६४ २४. मनुष्यादिना २६ १६ **द्विपदाः**=द्वे पदे यासु ता (प्रजा) २३ ३४. **द्विपदी**=अभ्यस्तद्विवेदा (विदुषी स्त्री)

द्रविणम् धनम्, भा०—पुष्कला श्रियम्, प्र०—अत्र 'सुपा सुलुक्०' इति विभक्तेर्लुक् १८.५६. **द्रविणम्**=धनम् ३३ ५२ धन यशो वा ५ २८ २ बलम् १८ ८ वीर्यम् ऋ० भू० २११, अथर्व० १८ ३ ११ चक्रवर्त्तिराज्यादि सिद्ध धनम् १ ६४ १४ चतुर्विधपुरुषार्थेन धन-धान्योन्नति ऋ० भू० १०४, अथर्व० १२ ५ ८ श्रियम् १७ २८ विद्यादिश्रेष्ठ-धनम् ऋ० भू० २०३, अथर्व० ७ ६ ६७ १ द्रव्यम् ४.५.११ यश ४ ५ १२ राज्योद्भव द्रव्यम् १० ११ द्रवन्ति भूतानि यस्मिन् तद् धनम् प्र०—द्रविणमिति धन-नामसु पठितम् निघ० २ ६, ८ १७ धनं बल वा ७ ६ १ विद्यादिकम् ८ ६० द्रव्यरूप जगत् को आर्याभि० २ ३०, १७ १७ ऐश्वर्यम् १० १३ द्रव्योपार्जन और उसकी रक्षा को स० वि० १४४, अथर्व० १२ ५ ८ **द्रविण:**=प्रश-स्तानि द्रविणानि द्रव्यानि विद्यन्ते यस्य स (अग्नि = विद्वान् जन) ३ ७ १० **द्रविणानि**=द्रव्याणि यशांसि वा ४ ३३ १० धनानि यशांसि वा ४ ५८ १० **द्रविणाय**= ऐश्वर्याय ३ १० ६ **द्रविणा**=द्रविण धनम्, प्र०—अत्र 'सुपा सुलुक्०' इत्याकारादेश १५ ३ धनानि, भा०—सुखानि १४ ४ [द्रु गतौ (भ्वा०) धातो 'द्रुदक्षिभ्यामिनन्' उ० २.५१ सूत्रेण कर्मणि करणे वा कारके इनन् प्रत्यय । द्रविण धननाम निघ० २.१० बलनाम निघ० २ ६ धन द्रविणमुच्यते यदेनदभिद्रवन्ति । बल वा द्रविण यदेनेनाभि-द्रवन्ति नि० ८ १.]

द्रविणस: यज्ञकर्त्तार, द्रविणसम्पादका: (अ०—ऋत्विज) १ १५ ७ यशोधनस्य ४ ३४ ५ द्रव्यसमूहस्य विज्ञान प्रापण वा १ ६६ ८ [द्रविणमेव द्रविणस् । द्रविण-स्य सकारोपजनश्छान्दस । द्रविण व्याख्यातम् । द्रवि-णास =द्रविणसादिन इति वा द्रविणसानिन इति वा नि० ८ १]

द्रविणस्यव: आत्मनो द्रविणमिच्छमाना (मनुष्या) ५ १३ २ **द्रविणस्यु:**=आत्मनो द्रविणमिच्छु (विद्वानु-द्यमी जन) ६ १६ ३४ [द्रविण व्याख्यातम् । तत आत्मन इच्छाया 'क्यजन्तात् क्याच्छन्दसी' ति उ प्रत्यय । 'सुग् वक्तव्य' अ० ७ १ ५१ वा० सूत्रेण क्यचि सुगागम]

द्रविणो धन यशो वा ६ ६६ ३ [द्रविण व्याख्यातम् । तत. प्रथमैकवचनस्योकारश्छान्दस]

द्रविणोदस: यो द्रविणमत्ति तस्य (ऋत्विज), प्र०—ऋत्विजोऽत्र द्रविणोदस उच्यन्ते हविषो दातारस्ते चैन जन-यन्ति, नि० ८ २, २ ३७ ४ [द्रविणस् उपपदे अद भक्षणे (अदा०) धातोरसुन् प्रत्यय]

द्रविणोद:! यो द्रविणो ददाति तत्सम्बुद्धौ (अग्ने= विद्वन् श्रीमज्जन) २ ६ ३ ददातीति दा, द्रविणस्याऽऽत्म-शुद्धिकरस्य विद्यादेर्धनस्य दास्तत्सम्बुद्धौ (अ०—जगदीश्वर) १ १५ १० **द्रविणोदाम्**=यो द्रव्याणि ददाति तम् (अग्नि=परमेश्वर भौतिक वा), प्र०—अत्र 'अन्येभ्योऽपि दृश्यते' इति विच् १ ६६ १ द्रविण अर्थात् निर्वाह के सब अन्न, जलादि पदार्थ और विद्या आदि पदार्थों के देने वाले (ईश्वर) को आर्याभि० १ ४०, ऋ० १ ७ ३ ३ **द्रवि-णोदा:**=द्रविणासि विद्याबलराज्यधनानि ददातीति स परमेश्वरो भौतिकोऽग्निर्वा, प्र०—द्रविणमिति बलनामसु पठितम् निघ० २ ६ द्रविणोदा इति पदनामसु पठितम् निघ० ५ २ द्रविण करोति द्रविणाति, अस्मात् 'सर्वधातु-भ्योऽसुन्' इत्यसुन् प्रत्यय तद् ददातीति निरुक्त्या पदनामसु पठितत्वाज्ज्ञानस्वरूपत्वादीश्वरो, ज्ञानक्रियाहेतुत्वादग्न्या-दयश्च गृह्यन्ते 'द्रूयन्ते प्राप्यन्ते यानि तानि द्रविणानि अत्र 'द्रुदक्षिभ्यामिनन्' उ० २ ४६ अनेन द्रु-धातोरिनन् प्रत्यय १ १५ ७ धनप्रद (देव =विद्वज्जन) ७ १६ ११ धनदाता (भूगर्भविद्याविद्विद्वान् जन) ११ २२ ये द्रविण बल ददति ते (देवा =दिव्या प्राणा) प्र०—द्रविणोदा कस्माद्? धन द्रविणमुच्यते यदेनदभिद्रवन्ति, बल वा द्रविण यदेनेनाऽभि-द्रवन्ति, तस्य दाता द्रविणोदा, नि० ८ १ २, १२ २ यो द्रविणो धन यतो वा ददाति स (सद्वैद्य) २६ २२ सुष्ठूपासितो जगदीश्वर, सम्यग् योजितो भौतिकोऽग्निर्वा १ १५ ८ विभागादि-ज्ञापक (अग्नि =परमेश्वर) १ ६६ ८. यज्ञानुष्ठाता विद्वान् मनुष्य १ १५ ६. शौर्यादि-प्रद (अग्नि =परमेश्वर) १ ६६ ८ जीवनविद्याप्रद (अग्नि =ईश्वर) १ ६६ ८ यो द्रविणासि ददाति स (अग्नि =परमेश्वर) १ ६६ ८ द्रव्यदातार (देवा =विद्वासो जना) १७ ७० **द्रविणोदेषु**=ये द्रविणासि सुवर्णादीनि द्रव्यप्रदानि विद्याऽऽदीनि च ददति तेषु (विद्वज्जनेषु) १ ५३ १ **द्रविणोदौ**=यौ द्रविणसौ दत्तस्तौ अश्विनौ= अध्यापकोपदेशकौ) ५ ४३ ६ [द्रविणस् इत्युपपदे डुदाञ् दाने (जु०) धातो 'आतो मनिन्०' अ० ३ २ ७४ सूत्रेण चकाराद् विच् प्रत्यय । अथवा—द्रविणसुपपदे ददाते क प्रत्यय । द्रविणस् इति व्याख्यातम् । द्रविणोदा कस्मात् ? धन द्रविणमुच्यते यदेनदभिद्रवन्ति । बल वा द्रविण यदेने-नाभिद्रवन्ति । तस्य दाता द्रविणोदा ।··· तत्को द्रवि-णोदा ? इन्द्र इति कौष्टुकि । स बलधनयोर्दातृतम, तस्य च सर्वा बलकृति । 'ओजसो जातमुत मन्य एनम्' इति चाह । अथाप्यग्निं द्रविणोदसमाह, एष पुनरेतस्माज्जायते ।

७ ५८ ६. द्वेषादीन् दोषान् धर्मद्वेष्टॄन् मनुष्यान् वा ११६७ ६ ईर्ष्यादीन् दोषान् वा २ ३३ २ द्वेषकान् (दुर्जनान्) ६ १ ये द्विषन्ति ते (दुर्जना) ५ २० २. ये द्विषन्ति तान् (ह्वर =शत्रून्) ३८ २० द्वेषयुक्तानि (रपासि=पापानि) १ १५७ ४ द्वेष्टु (मर्त्तात्=मनुष्यात्) ४ १० ७ [द्विष अप्रीतौ (अदा०) धातो कर्त्तरि 'अन्येभ्यो ऽपि दृश्यन्ते' इति सूत्रेण विच्]

द्वेषः द्वेष्टि येन स (दुर्गुण) ६ १८ अप्रीति ७ ५६ १६ [द्विष अप्रीतौ (अदा०) धातोर्घञ्प्रत्यय कर्त्तृ-भिन्नेषु कारकेषु]

द्वेषते अप्रीतयति, प्र०—अत्र 'वहुल छन्दसि' इति शपो लुगभाव ११८० [द्विष अप्रीतौ (अदा०) धातोर्लट्। शपो न लुक् छान्दसत्वात्]

द्वेषांसि द्वेषादियुक्तानि कर्माणि, भा०—ईर्ष्याक्रोधादि-दोषान् २१ ३ द्वेषयुक्तानि जन्तुजातानि (भा०—द्वेषादीन्) २८ १५ द्वेषयुक्तानि कर्माणि २ २९ २ **द्वेषोभिः**=द्वेष-युक्तैस्सह (दुर्जनै) ७ ६० ६ **द्वेषोभ्यः**=दुष्टेभ्य, भा०—द्वेषादियुक्तेभ्य पुरुषेभ्य २१ ४३ यथा द्विषन्ति तेभ्यस्तथा (पापिजनेभ्य) ५ ३५ शत्रुभ्य २१ ४४ विरोधिभ्य (जनेभ्य) २१ ४५ [द्विष अप्रीतौ (अदा०) धातोरौणादिको ऽसुन्प्रत्यय]

द्वेषोयुतम् द्वेषादिभी रहितम् (अग्नि=परमविद्वासम्) ४ ११ ५ **द्वेषोयुतः**=द्वेषयुक्ता (अत्रव) ५ २ ६ [द्वेषस्-युतपदयो समास। 'द्वेषस्' इति पूर्वपदे व्याख्यातम्। युत=युमिश्रणेऽमिश्रणे च (अदा०) धातो क्त प्रत्यय]

द्वेष्टि अप्रीतयति, भा०—हन्यात् २६ १० विरुणद्धि २ २५ दु खयति २ २५ शत्रूयति २ १५ न प्रीणयति १६ ६४ कोपयति १ २६ वैरयति ३ ५३ २१ विरुध्यति १ २५. अप्रीणाति १ २६ अप्रसन्नयति ३५ १२ वैरायते २ २५ द्वेष, अप्रीति, शत्रुता करता है, आर्याभि० २ २९, ३६ २३ [द्विष अप्रीतौ (अदा०) धातोर्लट् प्रत्यय]

द्वौ स्वप्रकाशभूगोलौ १ ३५ ६ **द्वाभ्याम्**=कार्य-कारणाभ्याम् २३ ३४ विद्यापुरुषार्थाभ्याम् २७ ३३ **द्वयोः**=स्वात्म-परात्मनो १ ८३ ३ राजप्रजाजनयो ६ ४५ ५ [द्विप्राति० प्रथमाद्विवचने रूपम्। अन्यत्र तृतीया-षष्ठ्यो द्विवचने]

द्व्यक्षरेण दैव्या उष्णिहा (छन्दसा) ६ ३१. [द्वि-अक्षरपदयो समास]

धक् दहे १ १७८ १ दहेत् ६ १ १४ दहति २ ११.२१ दह्यात् २.१५ १०. **धक्तम्**=दहतम् ११८३ ४ **धक्षत्**=दहेत् प्र०—अत्र 'वाच्छन्दसि' इति भपुत्र न ११३०८. दहति २४७ **धक्षि**=दहसि, प्र०—अत्र शपो लुक् १ १४१ ८ दह, प्र०—अत्र विकरण-लुक् १३.१२ [दह भस्मीकरणे (भ्वा०) धातोर्लुङ्। 'मन्त्रे घसह्वरणश०' अ० २४८० सूत्रेण लेर्लुक्। 'धक्षत्' प्रयोगे लेट्। अन्यत्र लटि शपो लुक्]

धक्षुषः दहत (अग्ने) १ १४१ ७. [दह भस्मीकरणे (भ्वा०) धातोर्लिट क्वसु]

धक्षोः दाहकस्य (अग्ने) २ ४४ [दह भस्मीकरणे (भ्वा०) धातोर्वाहु० औणादिक वसु प्रत्यय]

धत्त धरत ८ १८ भा०—उन्नयत १७ ९८ धारयत ११७११ **धत्तन**=धत्त १ ६४ १४ धरत ११०३५ दधतु, प्र०—अत्र व्यत्यय 'तप्तनप्०' इति तनवादेशश्च १२० ७ **धत्तम्**=धरेतम् ७ ५३ ३ धरत, प्र०—अत्र लडर्थे लोट् १ ९३ ७ प्रयच्छतम् १ ९३ २ धरतम् ४ ५७ ८ धारयत २ १६ **धत्तः**=दध्याताम् २८ ७ **धत्तात्**=दध्या ३ ८ १ **धत्ताम्**=धारयत २ ३ आच्छा-दित, शोभायुक्त करे, स० वि० १४८, अथर्व० १४ १ ५३ **धत्ते**=धरति ३ १० ३ **धत्थ**=धरत ७ ३७.२ **धत्थः**=धरथ १ १५७ ५ धरेतम् ६ ६८ ६ **धत्स्व**=धारण कुरु ६ २५ [डुधाञ् धारणपोषणयो (जु०) धातोर्लोटि रूपाणि धत्तात्=दास्यसि नि० ८ १८. धत्ते=धा+लट्]

धनजितम् धन जयत्युत्कर्षति येन तम् (यज्ञम्) ११८ **धनजिते**=यो धनेन जयति तस्मै (इन्द्राय=विदुषे सभासेनेशाय) २ २१ १ [धनोपपदे जि जये (भ्वा०) धातो क्विप्। 'ह्रस्वस्य पिति कृति तुक्' इति तुगागम]

धनञ्जयम् यो धन जयति तम् (कवि=विद्वासम्) ३ ४२ ६ य शत्रुभ्यो धन जयति तम् (वीरपुरुषम्) ११ ३४. **धनञ्जयः**=यो धनेन जापयति स (ईश्वर) १ ७४ ३ [धनोपपदे जि जिये (भ्वा०) धातो 'संज्ञाया भृतृवृजिधारि०' अ० ३ २ ४६ सूत्रेण छन्दसि-असज्ञायामपि खच्। पूर्वपदस्य मुम्]

धनदाः ऐश्वर्यदाता (अग्नि=विद्वान् राजा) ६ २८ यो धन ददाति स (राजा) ७ ३२ १७ **धनदाम्**=वृष्टि-वद्राजनीतिम् १ ३३ १० [धनोपपदे डुदाञ् दाने (जु०) धातो कर्त्तरि क्विप्]

धनम् यद्धिनोति वर्धयति तत्, प्र०—धन करमात्? धिनोतीति सत, नि० ३ ६, १२ ८२ सुवर्णादिकम् १८ ५

१ १६४.४१ **द्विपदीम्**=द्वे अभ्युदय-नि श्रेयसे सुखे पदे यस्या ताम् (स्वाहा वाचम्) ८ ३० **द्विपदे**=मनुष्याद्याय १७.६६ पुत्राद्याय ३६ ८ द्वौ पादौ यस्य मनुष्यादेस्तस्मै ११ ८३ मनुष्यादि के लिए स० वि० ११४, १७ ६६ [द्वि-पादपदयो समासे समासान्तलोपे च द्विपात्। तत 'प्रयस्मयादीनि च छन्दसि' इति भत्वात् 'पाद पत्' इति पदादेश । स्त्रिया 'पादोऽन्यतरस्याम्' इति वा ङीप्प्रत्यय । 'टाव् ऋचि' सूत्रेण टाप् प्रत्यये तु 'द्विपदा' इति रूपमपि । द्विपदी-मध्यमेन चादित्येन च नि० ११ ४० द्विपदे= द्विपाद्भ्य नि० १२.१३.]

द्विपात् द्वौ पादौ यस्य स मनुष्यादि ४ ५१ ५. **द्विपादम्**=मनुष्यादिकम् १३ ४७ **द्विपादे**=मनुष्याद्याय १.१२१.३. [द्वि-पादपदयो समासे समासान्तलोप । द्विपात्-द्विपाद् वै पुरुष ऐ० ४.३ द्विपाद् यजमान कौ० १६ ११ चन्द्रमा द्विपात्तस्य पूर्वपक्षापरपक्षौ पादौ गो० पू० २ ८ द्विपाद् वै पुरुष श० २ ३ ४ ३३]

द्विबर्हज्मा यो द्वाभ्या बृहते स द्विबर्हस्तेन द्विबर्हेण युक्ता ज्मा भूमिर्यस्य (सूर्य इव राजा) ६ ७३ १ [द्विबर्ह-ज्मापदयो समास । द्विबर्ह ='द्वि' इत्युपपदे वृह वृद्धौ (भ्वा०) धातोरण् प्रत्यय । ज्मा भूमिनाम निघ० १ १]

द्विबर्हसः यो द्वाभ्या विद्यापुरुषार्थाभ्या वर्द्धते तस्य (विद्वज्जनस्य) १ १७६ ५ **द्विबर्हाः**=द्वाभ्या विद्या-विनयाभ्या बर्हं वर्धन यस्य स (सभेशो राजा) ७ ८ ६ द्वाभ्या विद्याविनयाभ्या वृद्ध (विविद्वान्=विपश्चिज्जन) ४ ५ ३ यो द्वाभ्या विद्याशिक्षाभ्या प्रतापप्रकाशाभ्या वा वर्धयति स (विद्वान् जन) १ ७१ ६ द्वयोर्व्यवहार-परमार्थ-योर्वर्धक (रुद्र =न्यायाधीश) १ ११४ १० द्वाभ्या विद्या-पुरुषार्थाभ्या यो वर्धते स (सोम =ओषधिरस) ७ २४ २ द्वे बर्हसी व्यावहारिक-पारमार्थिक-वृद्धिकरे विज्ञाने यस्य सः, प्र०—द्विबर्हा इति पदनामसु पठितम्, निघ० ४ ३, ७ ३९ योऽन्तरिक्ष-वायुभ्या द्वाभ्या वर्धते (इन्द्र =सूर्य) ६ १९ २. या द्वाभ्या रात्रिदिनाभ्या बृहयति वर्धयति (उषा) ५.८० ४. [द्वि-बर्हस्पदयो समास । बर्हस्=वृह वृद्धौ (भ्वा०) धातोरौणादिकोऽसुन्प्रत्यय । द्विबर्हा =द्वयो स्थानयो परिवृढो मध्यमे च स्थान उत्तमे च नि० ६ १७]

द्विमाता द्वयोरग्निजलयोर्माता प्रमापक (परिज्मा= वायु) १ ११२ ४ द्वे वाय्वाकाशौ मातरौ यस्याऽग्ने स (वरुण =परमात्मा) ३ ५५ ६ द्वयो. प्रकाशाऽप्रकाशवतो-र्लोकसमूहयोर्माता निर्माता (अग्नि =जगदीश्वर) १ ३१ २ [द्वि-मातृपदयो समास]

द्विरूपाः द्वे रूपे यासा ता (ऐन्द्राग्ना =वायुविद्यु-त्साम्न पशव) २४.८. [द्वि-रूपपदयो समासे स्त्रिया टाप्]

द्विषतः द्वेषयुक्तस्य (मूर्खजनस्य) ६ ४७.१९ शत्रो., भा०—दु खस्य १ २४ **द्विषते**=शत्रवे १ ५० १३ **द्विषन्तम्**=शत्रुम् (जनम्) १ ५० १३ [द्विष अप्रीतौ (अदा०) धातो शतृप्रत्यय]

द्विषः द्विषन्ति अप्रीणयन्ति याभ्य शत्रुसेनाभ्यो दु ख-क्रियाभ्यो वा ता प्र०—अत्र 'कृतो बहुलम्०' इति हेतौ क्विप् ४ २९. ये धर्मे द्विषन्ति तान् (कामादीन् शत्रून्) १ ६७ ७ दुष्टान् १ ९० ३ शत्रून् ६ ५१ १६ द्वेषयुक्ता क्रिया ५ २५ ९ शत्रो ६ २४ धर्मद्वेष्टॄन् (दुर्जनान्) ५ ४४ १२ वैरिण (दोषान्) ३ १५ १ शत्रुभूता व्यभि-चारिणीर्वृ पत्नी (स्त्री.) ११ ४९ द्वेषवृत्ती २ ७ ३ अप्रीते २ ७ २ **द्विषाम्**=द्वेष्टॄणाम् (दुर्जनानाम्) ७ ३४ १३. [द्विष अप्रीतौ (अदा०) धातो कर्त्तरि क्विप्। 'कृतो बहुलम्' इति वा करणे क्विप्]

द्विष्मः न प्रीणीम ३८ २३ अप्रीतयाम १३ ४७. विरुन्ध्म १५ १५ विरुद्ध्याम १ २५ हम द्वेष करते हैं आर्याभि० २ २६, ३६ २३ पीडयाम २ २५ अप्रीति कुर्याम, भा०—विरोधिन जानीम १६ ६४ अप्रीणीम १ २६. कोपयाम १ २६ न प्रसादयेम १७ १ वैरायामहे २ २५ [द्विष अप्रीतौ (अदा०) धातोर्लटि उत्तमबहुवचने रूपम्]

द्विः द्विवारम् (विद्याजन्मयुक्त द्विजम्) ४ ६ ८ [द्वि प्राति० 'द्वित्रिचतुर्भ्य सुच्' इति सूत्रेण क्रियाभ्यावृत्तिगणने सुच्]

द्वीपम् द्विधाऽपासि यस्मिँस्तम् (महानदम्) १ १६९ ३ [द्वि-अप्पदयो समासे 'ऋक्पूरब्धू ०' अ० ५ ४ ७४ सूत्रेण समासान्तोऽकार प्रत्यय । 'द्व्यन्तरुपसर्गेभ्योऽप ईत्' अ० ६ ३.९७ सूत्रेण अप आदेरीकारादेश]

द्वीप्याय द्वीपेषु द्विर्गतजलेषु देशेषु भवाय (जनसमूहाय) १५ ३१ [द्वीपमिति व्याख्यातम् । ततो भवार्थे यत्-प्रत्यय]

द्वे रात्रिदिने १ ९५ १ शरीरात्मबले १ १५५ ५. कार्यकारणे ३ ५६ २ अभ्युदय नि श्रेयसे (सुखे) ४.५८ ३. [द्विप्राति० नपुसके प्रथमाद्विवचने रूपम्]

द्वेषः द्विषत शत्रून्, प्र०—अत्र 'अन्येभ्योऽपि०' इति कर्त्तरि विच् १ ३४ ११ द्वेष्टॄन् दुष्टान् शत्रून् मनुष्यान्

विशेषेण, शतघ्न्यादिभिः शस्त्रास्त्रैः. २६ ३६ धनुषा २ २४ ८. **धन्वन्**=धन्वत्यन्तरिक्षे १ ११५ ६ धन्वनि २६ ४० धन्वनो बहुसिक्तस्य स्थलस्य १ ११६ ४. वालुकायुक्ते स्थले ६ ३४.४. **धन्वनः**=धनुषः १६ ६ स्थलस्या-न्तरिक्षस्य च, ऋ० भू० १६०, ऋ० १ ८ ८ ४. **धन्वानि**=अविद्यमानोदकादिदेशान् ५ ८३ १० अन्तरिक्षस्थानि (अपः=जलानि) ६ ६२.२ धनूंषि ६ ५६ ७ भा०—आग्नेयाऽस्त्रादीनि १६ ५६ अन्तरिक्षावयवान् १६ ६३ स्थलप्रदेशान् ४ १६ ७ [धवि गत्यर्थे (भ्वा०) धातो 'कनिन् युवृषितक्षिराजि०' उ० १ १५६ सूत्रेण कनिन्-प्रत्ययः । धन्व=अन्तरिक्षनाम निघ० १ ३. धन्व अन्तरिक्षं धन्वन्त्यस्मादापः नि० ५ ५ धन्वन्=धनुषि नि० ६.१८]

धन्वचरः यो धन्वन्यन्तरिक्षे चरति सः (राजा) ५ ३६ १. ['धन्वन्' इति व्याख्यातम् । तदुपपदे चर गतौ (भ्वा०) धातो 'चरेष्ट' अ० ३ २.१६. सूत्रेण ट. प्रत्ययः]

धन्वच्युताः धन्वनोऽन्तरिक्षाच्च्युता प्राप्ता (अ०—मेघा.) १ १६८ ५ [धन्वन्-च्युतपदयोः समासः । 'धन्वन्' इति व्याख्यातम्]

धन्वन्तरये सर्वरोगनाशकाय (ईश्वराय) प० वि०, [धनु=चिकित्साशास्त्रम्, तस्यान्तमृच्छति धनु+अन्त+ऋ+इन्]

धन्वर्णसः धन्वे स्थलेऽर्णांसि यासां ताः (नद्यः) ५ ४५ २ [धन्व-अर्णस्पदयोः समासः । दधातिधान्यहेतुर्भवतीति धन्वम् । अर्णम् उदकनाम निघ० १ १२. शकन्ध्वादित्वात् पररूपम्]

धन्वाति प्राप्नुयात् ३.५३.४ [धवि गत्यर्थे (भ्वा०) धातोर्लिटर्थे लेट् । आटागमः]

धन्वायिभ्यः धनूंनि धनूंष्येतुं शीलमेषां तेभ्यः (सैनिकेभ्य.) १६.२२ [धन याच्ये (जु०) धातो 'भृमृशीङ्' उ० १.७ सूत्रेण उ-प्रत्यये धनु । तदुपपदे इण् गतौ (अदा०) धातोस्ताच्छील्ये णिनि.]

धन्वासह यो धनुषा शत्रून् सहते सः (सभेशो राजा) प्र०—अत्र छान्दसोऽन्त्यलोपः. १.१२७ ३ [धनुष् उपपदे षह मर्षणे (भ्वा०) धातोरच् प्रत्ययः । पूर्वपदस्यान्त्यलोपे दीर्घश्छान्दसः]

धन्वेव यथा शस्त्रविशेषः ३.४५ १. [धनु-इव पदयोः समासः]

धमति 'प्राप्नोति १७ १६ [धमति-अर्चतिकर्मा निघं० ३ १४ गतिकर्मा निघं० २ १४ वधकर्मा निघ० २ १६ ततो लटि लेटि वा रूपम्]

धमनिम् वेदवाणीम् प्र०—धमनिरिति वाङ्नाम० निघं० १.११, २.११.८ धमनि=वाङ्नाम निघ० १ ११ धमति गतिकर्मा (निघ० २.१४) ततः 'अर्तिसृधृधम्य०' उ० २ १०२ सूत्रेण अनि प्रत्ययः]

धमन्तः कम्पयमाना (राजानो जनाः) १ ८५ १० कम्पयन्तः (राजप्रजाजनाः) ४ २ १८ [धमति=गतिकर्मा नि० ६ २ ततः शतृप्रत्ययः.]

धमन्तीः शब्दयन्त्यः (वाणी=वाचः) ३ ३० १०. [धमतिर्गतिकर्मा नि० ६ २ ततः शत्रन्तात् ङीप्-प्रत्ययः]

धमितम् प्रज्वालितम् (अग्निम्) २.२४ ७ [धमति गतिकर्मा निघ० २ १४ वधकर्मा निघ० २ १६ ततः क्त-प्रत्ययः]

धय पिब १७ ८८ **धयति**=पिबति २ ३५ ५. आधरति १ १७६ दुग्ध पीके बढता है, सं० वि० १०४, २ ३५ ५ [धेट् पाने (भ्वा०) धातोर्लोट् । अन्यत्र लट्]

धयन् दुग्धं पिबन् (पुत्र.) १६ ११. पय पिबन् (धरुण=पुत्र) ८ ५१ [धेट् पाने (भ्वा०) धातो शतृ-प्रत्ययः]

धरणी आधारभूता (स्त्री) १४ २१ [धरति सर्वमिति विग्रहे धृञ् धारणे (भ्वा०) धातो 'अर्तिसृधृ०' उ० २ १०२. सूत्रेणानि प्रत्ययः । ततः स्त्रियां 'कृदिकारादक्तिनः' इति ङीप्]

धरित्री सर्वेषां धारिका (स्त्री) १४.२२ [धरतीति धरित्री। धृञ् धारणे (भ्वा०) धातो 'अर्तिलूधूसूखनसहचर इत्र' उ० ४ १७३ सूत्रेण इत्रप्रत्ययः]

धरुणम् सर्वस्य धर्त्तृ (सत्यं=कारणादिकम्) ५ १५.२ धर्त्तारम् (विद्वांस जनम्) ५ १५ ५ धर्त्तव्यं पुत्रम्, अ०—गर्भम् ८ ५१. धारणकर्त्रीं पृथिवीम्, अ०—अन्तरिक्षम्, १ २३ १३ धरति सर्वलोकान् यत्तत् तेजश्च (अग्निः=परमेश्वर) १.१८ आधारकम् (रज) १ ५६ ५ सर्वमूर्त्तद्रव्याणामाधारम् १.५६.६ उदकम्, प्र०—धरुणमित्युदकनाम, निघ० १.१२, १ १२१ २ **धरुणः**=धारक. (अग्निः=पावक) ५ १५ १. धर्त्ता (विद्वान् जन) १.७३ ४ आधार (अ०—परमात्मा) १७ ८२ धारणगुण १४ २३. धर्त्ताऽऽधारभूत, भा०—व्यर्थव्ययस्याऽकर्त्ता (राजा) १२ २२ **धरुणे**=धारक (धर्मे) ५ १५ २ **धरुणेषु**=आधारेषु ३ ३ १ धारकेषु वाय्वादिषु १ ५२ २. [धृञ् धारणे (भ्वा०) धातोर्बाहुलकादौणादिक उनन्प्रत्ययः । धरुणेषु दकेषु ।

श्रियम्, भा०—करम् ६ १७ जगत् रूप धन को, स० प्र० २३८, १० ४८ ५ वस्तुमात्रम् ४० १ विद्यासुवर्णादिकम् १ ३६ ४ **धनानाम्**=द्रव्याणाम् ३ ३२ १७ विद्यासुवर्णादीनाम् ३ ३५ ११ राज्यविभूतिनाम् १ १० २ ५ पूर्ण विद्या-राज्यादि साध्यपदार्थानाम् १ ४ ६ **धनानि**= पृथिवीसुवर्णविद्यादीनि १ ३० १६ विद्या-धर्म-चक्रवर्त्ति-राज्यश्रीप्रसिद्धानि १ ४२ ६. **धनाय**=उत्तमधनप्राप्तये १ १०० ८ **धने**=विद्याचक्रवर्त्तिराज्यसिद्धे द्रव्ये १ ५४ ६ सुवर्ण-रत्नादौ १.११६ १५ **धनेन**=ऐश्वर्येण १ २ ७ [डुधाञ् धारणपोषणयो. (जु०) धातोर्बाहु० औणादिक (उ० २ ८१) क्यु. प्रत्यय । धनम् धिनोतीति सत नि० ३ ६. राष्ट्राणि वै धनानि ऐ० ८ २६ तस्माद् हिरण्य कनिष्ठ धनानाम् तै० ३.११ ८ ७ धन मे शस्य पाहि काठ० ७.३]

धनयन् विद्यादिधन कुर्यु १.७१.३ **धनयन्त**= आत्मनो धनमिच्छन्ति, प्र०—अत्राऽडभाव १ १६७ २ **धनयन्ते**=धनं कुर्वन्ति १ ८८.३ [धनपदाद् आत्मन इच्छाया क्यजन्ताल् लड् 'न छन्दस्यपुत्रस्य' इतीत्व न । अटोऽभावश्छान्दस । अथवा=धनप्राति० 'तत्करोति तदाचष्टे' इति णिजन्तस्य रूपाणि]

धनसातौ धनाना सविभक्तौ १८ ३२ [धन-साति-पदयो समास । साति =षण सम्भक्तौ (भ्वा०) धातो क्तिन्]

धनसाम् धनानि सनन्ति सभजन्ति यया ताम् (अथर्व्यम्=सेनाम्) १ ११२ १० यो धनानि सनोति विभजति तम् (विद्वास जनम्) प्र०—अत्र धनोपपदात् सन-धातोर्विट्-प्रत्यय १ ११२ ७ **धनसाः**=ये धनानि सनन्ति सभजन्ति ते (विद्वास) २ १० ६ [धनोपपदे षण सम्भक्तौ (भ्वा०) धातो 'जनसनखनक्रमगमो विट्' अ० ३ २ ६७ सूत्रेण विट् । 'विड्वनोरनुनासिकस्यात्' अ० ६ ४ ४१ सूत्रेणाकारान्तादेश]

धनस्पृत् यो धन स्पृणोति सेवते स (राजा) ३ ४६ २ **धनस्पृतम्**=धनस्पृहायुक्तम् (गृहपतिम्) ५ ८ २. धन स्पृणन्ति येन तम् (सुदक्ष=उत्तमवल-चातुर्य्यम्) ६ १६ ८ धनेन प्रीत सेवित वा (तोकम्=तनयम्) १ ६४ १४ धनैर्विद्यासुवर्णादिभि स्पृत प्रीत सेवितस्तम् (सभ्य-जनम्) १ ३६ १० [धनोपपदे स्पृ प्रीतिपालनयो (स्वा०) धातो क्विप् प्रत्यय । तुगागम]

धना द्रव्याणि १ १३० ६ धनानि १ ६४ १३ [धन-प्राति० जस शेरादेशस्य 'शेश्छन्दसि बहुलम्' इति लोपे रूपम्]

धनायति आत्मनो धनमिच्छति २३ ३० [धनपदाद् आत्मन इच्छाया क्याजन्ताल्लट्]

धनिनम् बहुधनवन्त प्रजास्थम् (जनम्) ४ २ १५ धार्मिक धनाढ्यम् (जनम्) १ ३३ ४ **धनिन.**=बहुधन-युक्तस्य (विदुषो जनस्य) १ १५० २ [धनप्राति० भूम्न्यर्थे इनि प्रत्यय]

धनिष्ठा अतिशयेन धनिनी (माता=जननी) ३३ ६४ [धनप्राति० मतुवन्ताद् अतिशायने इष्ठन् । 'विन्मतोर्लुक्' इति मतुपो लुक् । तत स्त्रिया टाप्]

धनुतरौ शीघ्र गमयितारौ (हरी=वायुविद्युतौ) ४.३५ ५

धनुत्रीः धन-धान्यादियुक्ता (सुखैश्वर्यैणि) ३ ३१ १६

धनुष्कारम् यो धनुरादीनि करोति तम् (शिल्पिन जनम्) ३० ७ [धनुष् उपपदे डुकृञ् करणे (तना०) धातोरण्प्रत्यय । धनुर्धन्वतेर्गतिकर्मण, वधकर्मणो वा । धन्वन्त्यस्माद् इषव नि० ६ १६]

धनुष्कृद्भ्यः धनुषा निर्मातृभ्य (शिल्पिजनेभ्य) १६ ४६ [धनुष्-उपपदे डुकृञ् करणे (तना०) धातो क्विप्-प्रत्यय । तुगागम । धनुष् इति पूर्वपदे व्याख्यातम्]

धनुः चापम् १६ १३ शस्त्राऽस्त्रम् २६ ३६. **धनोः**= धनुषो ज्याया १ ३३ ४ धनुष १ १४४ ५ [धन धान्ये (जु०) धातो 'अर्त्तिपृवपियजि०' उ० २ ११७ सूत्रेण उसि प्रत्यय । धनु =धन्वतेर्गतिकर्मण, वधकर्मणो वा, धन्वन्त्यस्माद् इषव । नि० ६ १६ वार्त्रघ्न वै धनु श० ५.३ ५ २७, वज्रो वै धनु मै० ४४ ३]

धन्या धन लब्धा (धिषणा=प्रज्ञा द्यौ पृथिवी वा) ६ ११ ३ धन लब्ध्री (धिषणा=प्रज्ञा) ५ ४१ ८ [धन-प्राति० लब्धार्थे 'धनगण लब्धा' अ० ४४ ८४ सूत्रेण यत्प्रत्यय । स्त्रिया टाप्]

धन्या धनाऽर्हाणि (ऐश्वर्याणि) ३ १ १६ [धनप्राति० 'तदर्हति' अ० ५ १ ६३ सूत्रेण यत् । प्रथमाबहुवचने शेर्लोप]

धन्व प्राप्तव्यानि (अ०—योजनानि) प्र०—अत्र गत्यर्थात् धविधातोरौणादिक कनिन् 'सुपा सुलुक्०' इति विभक्तेर्लुक् १ ३५ ८ धनुरादीनि २ ३३ १०. अन्तरिक्षम्, प्र०—धन्वेति अन्तरिक्षनाम निघ० १.३, २.३८ ७ धनुर्वेदम् ६ १२ ५ **धन्वना**=धनुरादिना शस्त्राऽस्त्र-

४.४.१.१. यो वै स धर्मः सत्यं वै तत् तस्मात् सत्यं वदन्त-माहुर्धर्मं वदतीति, धर्मं वा वदन्तं सत्यं वदतीति श० १४.४ २.२६. वरुणाय धर्मस्य पतये यवमयं चरुं निर्वपेत् मै० २ ६.६. वरुणोऽस्य प्रजा धर्मेण दाधार ऐ० आ० २.१.७. श्रीर्वै धर्मः । राज्यं वै धर्मः जै० ३.२३१]

धर्मपतीनाम् धर्म्मस्य रक्षितॄणाम् (धार्मिकजनानाम्) ६.३६ [धर्म-पतिपदयोः समासः]

धर्माणम् पक्षपातरहितं न्यायाचरणं धर्म्मम् ३४ ७ धर्मकारिणम् (सज्जनम्) १.१८७ १ [धर्मन्प्राति० द्वितीयैकवचनम् । धर्मन्=धृञ्धारणे (भ्वा०) धातोर्मनिन्-प्रत्ययः]

धर्ष धृष्णुहि, प्र०—विकरणव्यत्ययेनाऽत्र शप् ६ ८ [ञिधृषा प्रागल्भ्ये (स्वा०) धातोर्लेट् । विकरणव्यत्ययेन शप्]

धवध्वे कम्पयध्वे ५ ६०.३ (धूञ् कम्पने (क्र्या०) धातोर्लट् लेट् वा । विकरणव्यत्ययेन शप्]

धवीयान् अतिशयेन कम्पकः (वायुः=स्तेनः) ६.१२.५. [धूञ् कम्पने (क्र्या०) धातोस्तृचि धविता । धवितृप्राति० अतिशायने ईयसुन् । 'तुरिष्ठेमेयस्सु' सूत्रेण तृचो लोपः]

धात् दध्यात् ७ ३४ १७. दधातु ३ ५४ १२. दधाति १.६७.२. **धात**=धरत ६.५०.७ धत्त ६.६५ ३ धरन्ति ४ ३५ ८ दधति ७ ३६ ६ **धातन**=धत्त ७ ४७ ४ **धाति**=दधाति २७.२४ **धातु**=विजयमुत्तं दधातु, ऋ० भू० २२० [डुधाञ् धारणपोषणयोः (जु०) धातोर्लुङ्, अडभावः, 'गातिस्था०' इति सूत्रेण सिचो लोपः । 'धातन' प्रयोगे 'तप्तनप्तनथनाश्च' ति सूत्रेण तप्रत्ययस्य तनबादेशः । 'धाति' प्रयोगे लट् शपो लुक् च । 'धातु' प्रयोगे लोट् शपो लुक् च]

धातवे धातुं पातुम् १.१६४४९ [धेट् पाने (भ्वा०) धातोः 'तुमर्थे सेसेन०' इति सूत्रेण तवेङ् प्रत्ययः]

धाता दधाति सकलं जगत् पोषयति वा सः (ईश्वरः) पं० वि०, ऋ० ८ ८.४८ ३ सब जगत् का धारण पोषण करने वाला (परमात्मा) आर्याभि० २ ५४, ऋ० ८.८.४८.३. गृहाश्रम-धर्त्ता (गृहपतिः=गृहस्थो जनः) ८.१७. सर्वस्य संसारस्य राज्यस्य धर्त्ता (ईश्वरः) ३२ १५ धर्त्ता पोषको वा (अधिपतिः=सर्वेषां स्वामीश्वरः) १४ २८ **धातुः**=धर्त्तुर्वायोः ३२.१२ धारकस्य (पुरुषस्य) २५ ४ **धातृभिः**=धर्त्तृभिः (विद्वद्भिर्जनैः) ३३.६ यज्ञक्रिया-धारकैर्विद्वद्भिः (जनैः) ३.१५ **धात्रा**=सकल विश्व के धारण करने वाले परमात्मा ने, स० वि० १६६, ६.११३ ४. **धात्रे**=धारकाय (श्रीमते जनाय) २४.५. भा०—ये धातृगुणान्ते धारणाय २४ ६. [डुधाञ् धारण-पोषणयोः (जु०) धातोः कर्त्तरि तृच्प्रत्ययः । धाता सर्वस्य विधाता नि० ११ १० अग्नि वै धाता मै० ४ ३ ५ इयं (पृथिवी) वै धाता तै० ३ ८ २३.३. धाता वषट्कारः तै० स० ३ ४ ६.६. मै० ४.३.५ धाता षड्ढोता तै० २.२.८.४ प्रजापतिर्धाता श० ६ ५ १ ३८ मृत्युस्तदभवद् धाता तै० ३.१२ ६ ६. य सूर्यः स धाता स उ एव वषट्कारः ऐ० ३ ४८. संवत्सरो वै धाता तै० स० १.५ १.३, मै० ४ ३.६ स यः स धातासौ स आदित्यः श० ६ ५ १ ३७.]

धातु यद् दधाति तत् (हविः=होतव्यं द्रव्यम्) ५ ४४.३ [डुधाञ् धारणपोषणयोः (जु०) धातोः 'सितनि-गमि०' उ० १.६६. सूत्रेण तुन्प्रत्ययः]

धानम् धारणम् ३ ७ ६ [डुधाञ् धारणपोषणयोः (जु०) धातोर्ल्युट्प्रत्ययः]

धानानाम् भृष्टयवादन्नानाम् १६ २२. **धानाः**=पक्वान्नविशेषाः ३.३५.७. अग्नि-संस्कृतान्नविशेषान् ३ ३५ ३ भृष्टान्नानि ६ २६.४. यवाः ४.२४ ७ अग्निना भृष्टान्नविशेषाः ३ ५२ ६ भृष्टयवादयः १६.२१. धीयन्ते यासु ता दीप्तयः प्र०—धापृवस्य०, उ० ३.६ इति नः प्रत्ययः १.१६ २ धारकाः (गृहपतयः=गृहाश्रमिणः), प्र०—अत्र दधातेरौणादिको नः प्रत्ययः ८.११. [डुधाञ् धारणपोषणयोः (जु०) धातोः 'धापृवस्यज्यतिभ्यो नः' उ० ३.६ सूत्रेण नः प्रत्ययः । ततः स्त्रियां टाप् । अयं शब्दो-नित्यस्त्रीलिङ्गो बहुवचनान्तश्च । धाना भ्राष्ट्रे हिता भवन्ति फले हिता भवन्तीति वा नि० ५.१२.]

धानावत् परिपक्वा धाना विद्यन्ते यस्मिँस्तत् (सव-नम्=ऐश्वर्यम्) ३.४३.४ [धानाप्राति० भूमन्यर्थे मतुप् । धानेति व्याख्यानम्]

धानावन्तम् बह्वचो धाना विद्यन्ते यस्य तम् (आप्तं विद्वांसम्) ३.५२.१. सुसंस्कृतैर्धान्याऽन्नैर्युक्तम् भा०—सुसंस्कृतैं रसादिभिर्युक्तमन्नम् २० २६ [धानाप्राति० भूमन्यर्थे मतुबन्ताद् द्वितीयैकवचनम् । धानेति व्याख्यातम्]

धान्यम् तण्डुलादिकम् ५ ५३ १३ धातुमर्हं यद्, यज्ञात शुद्धं, रोगनाशकेन स्वादिष्ठतमेन सुखकारकमन्नं तत्, प्र०—अत्र 'दधातेर्यत् नुट् च' उ० ५ ४८. अनेन यत्प्रत्ययो नुडा-गमश्च १ २० [डुधाञ् धारणपोषणयोः (जु०) धातो

नि० १२ ३३ वरुणमित्युदकनाम निघ० १ १२ प्रतिष्ठा वै धरुणम् श० ७४२५ असावेवादित्यो धरुण एकविंश श० ८४११२]

धरुणह्वरम् धरुणानि धारकाणि ह्वराणि कुटिलानि यस्मिँस्तत् (तम) १ ५४ १० [धरुण-ह्वरपदयो समास । धरुण व्याख्यातम् । ह्वर =ह्वृ कौटिल्ये (भ्वा०) धातोरच्-प्रत्यय]

धरुणा धर्त्री (स्त्री) १३ ३४ पुष्टिकर्त्री (स्त्री) १४ २१ विद्या-धर्मधर्त्री (राजपत्नी) १३ १६ [धरुण व्याख्यातम् । तत स्त्रिया टाप्]

धरुणानि उदकानीव शान्तान्याचरणानि, प्र०—धरुणमित्युदकनाम, निघ० १ १२, ४ २३ ६ [धरुण व्याख्यातम्]

धर्णसि धर्ता (सर्वव्यापक ईश्वर) प्र०—अत्र 'सुपा सुलुक्०' इति विभक्तेर्लुक् १ १०५ ६ **धर्णसिम्**=धर्तारम् (विद्वास जनम्), प्र०—अत्र बाहुलकादसि प्रत्ययो नुडागमश्च १ १४१ ११ अन्यद्धारकम् (विद्वास जनम्) ५ ८ ४ **धर्णसिः**=धर्ता (विद्वान् जन) ५ ४३ १३ [धृञ् धारणे (भ्वा०) धातोर्बाहुलकादौणादिकोऽसि प्रत्ययो नुडागमश्च धर्णसिरिति बलनाम निघ० २ ६]

धर्णिः यो धरति स (अग्नि =विद्युत्) १ १२७ ७ [धृञ् धारणे (भ्वा०) धातोर्बाहु० औणादिको नि प्रत्यय]

धर्त्तः ! धारक (इन्द्र =सेनापते) १ १०२ ५ **धर्त्ता**=सकलव्यवहार-धारक (विद्वान् जन) २२ ३ पोषक (पदार्थ) ७ ३५ ३ धाता (परमात्मेव राजा) ३ ४६ ४ पराक्रमेणाकर्षणेन वा धारक (इन्द्र =सेनापति सूर्यो वा) १ ११ ४ **धर्तारा**=कला-कौशल-यन्त्रेषु योजितौ होम-रक्षण शिल्पव्यवहारान् धरतस्तौ (अग्निजले) १ १७ २ धर्त्तारौ (मित्रावरुणा=प्राणोदानौ) ५ ६६ ४ [धृञ् धारणे (भ्वा०) धातो कर्त्तरि तृच्प्रत्यय । 'धर्त्तारा' प्रयोगे 'सुपा सुलुग्०' इत्याकारादेश]

धर्त्रम् धारणम् १४ २३ धरति यद् येन वा (सर्वधातृ ब्रह्म), भा०—सर्वधारको वायु, प्र०—वायुर्वाव धर्त्रं चतुष्टोम, स आभिश्चतसृभिर्दिग्भि स्तुते तद्यत्तमाह धर्त्रमिति । प्रतिष्ठा वै धर्त्रम् । वायुरु सर्वेषा भूताना प्रतिष्ठा, तदेव तद्रूपमुपदधाति, स वै वायुमेव प्रथममुपदधाति, वायुमुत्तम वायुनेव तदेतानि सर्वाणि भूतान्युभयत परिगृह्णाति शत० ८ २ १ १६ अनेन प्रमाणेन धर्त्रशब्देन वायुरीश्वरश्च गृह्येते १ १८ [धृञ् धारणे (भ्वा०) धातो 'गुधृवीपचिवचि०' उ० ४ १६७ सूत्रेण स्त्र प्रत्यय । प्रतिष्ठा वै धर्त्रम् श० ८ ४ १ २६ वायुर्वाव धर्त्रं चतुष्टोम । स आभिश्चतसृभिर्दिग्भि स्तुते श० ८ ४ १.२६ धर्त्रमस्यन्तरिक्ष दृह, प्राण दृहापान दृह तै० स० १ १ ७ १]

धर्त्री धारिका (स्त्री), भा०—मातृवन्मान्यकर्त्री भूमि १४ २१ [धर्तृ प्राति० स्त्रिया ङीप्प्रत्यय । धर्तृ =धृञ् धारणे (भ्वा०) धातो कर्त्तरि तृच्]

धर्त्रे धारणशीलाय (अ०—होत्रे जनाय) १७ ५६ [धृञ् धारणे (भ्वा०) धातो कर्त्तरि तृच्]

धर्म धर्माणि ३ १७.१ धर्त्तव्यम् (अहिंसाख्यं व्यवहारम्) ३ १७ ५ धारणम् ६ ५ धारणाम् १८ ३० सत्यधारक (पुरुष स्त्रि वा) ३८ १४ धैर्यस्वरूप (सर्व सौख्यप्रदेश्वर), आर्याभि० २ ३१, ३८ १४ **धर्मन्**=धर्मे ५ १५ २ **धर्मणः**=न्यायस्य १० २६ धर्मस्य १० २६. धर्मात् ६ ७० ३ **धर्मणा**=धर्मेण, भा०—न्यायविनययुक्तेन व्यवहारेण ३८ १६ स्वधर्मेण १ १६० १. धारणसामर्थ्येन ३४ ४५ आकर्षण-धारणादिगुणेन ६.७० १ धर्म से स० वि० १२१, अथर्व० १४ १ ५१ **धर्मणाम्**=धर्माणा योगेन १ ५५ ३ **धर्मणे**=धर्मोन्नतये ४ ५३ ३ **धर्मभिः**=धर्माचरणै ५ ८१ ४ धर्म्मे ३ ६० ६ [धृञ् धारणे (भ्वा०) धातोर्बाहु० औणादिको मनिन्प्रत्यय]

धर्मम् वेदप्रतिपाद्यम् (कर्म) ऋ० भू० २११, अथर्व० १८ ३ १ १ पक्षपातरहित न्यायाचरण, वेदोक्त कर्म को, स० वि० १४४, अथर्व० १२ ५ ७ **धर्मः**=न्याय, ऋ० भू० १५१, ३८ १४ वेदोक्तो न्याय पक्षपातरहित सत्याचरणयुक्त सर्वोपकार ऋ० भू० १०३, अथर्व० १२ ५ ७ प्रताप ५ १६ ४ पक्षपातरहितो न्याय २० ६ **धर्माय**=धर्मरक्षणाय ३० ६ **धर्मेण**=न्यायाचरणेन १५ ६ **धर्माणि**=कर्त्तव्यानि ऋ० भू० १२६, ३१ १६ धर्मान् धारकाणि पृथिव्यादीनि वा ३४ ४२ धर्म्याणि कर्माणि ५ २६ ६ धारणात्मकानि (कर्माणि) ३१ १६. स्वस्वभावजन्यान् धर्मान् १ २२ १८ [धृञ् धारणे (भ्वा०) धातो 'अर्त्तिस्तुसुहुसृधृ०' उ० १ १४० सूत्रेण मन्प्रत्यय । एष धर्मो य एष (सूर्य) तपत्येष हीद सर्वं धारयति श० १४ २ २ २६ धर्म (साम) भवति । धर्मस्य धृत्यै ता० १४ ११ ३५ धर्मेण सर्वमिद परिगृहीतम् तै० आ० १० ६२ १ धर्मो मनुष्य काठ० ३७ १७ धर्मो वा अधिपति तै० ३ ६ १६ २ धर्मो हैन (ब्रह्मचारिणम्) गुप्तो गोपायति गो० १ २ ४ प्रतिरसि धर्माय त्वा धर्मं जिन्व तै० स०

इत्यस्य यङ्लुकि प्रयोग. १ ११.२ भृश नमस्कुर्म १ ७८.५ भृश नता स्म ४ ३२.४. **नोनुवन्त**=भृश शब्दायन्ते ४ २२ ४ **नोनुवुः**=भृश प्रशसेम ६ ४५ २५. [णु स्तुतौ (अदा०) धातोर्यङ्लुकि तहि तङि लिटि च रूपाणि। नौ अर्चतिकर्मा निघ० ३ १४]

नौभिः नौकाभि १ ११६.३ समुद्रे गमनागमनहेतु-रूपाभि ऋ० भू० १६०, ऋ० १.८८ ३ **नौ.**=बृहती नौका ५ ५६ २ **नावम्**=नुदन्ति चालयन्ति प्रेरते वा या ताम् (नौकाम्), प्र०—'ग्लानुदिभ्या डौ' उ० २ ६४. अनेनाऽय सिद्ध १ ११६.५ **नावः**=सागरोपरि नाव इव विमानानि, ऋ० भू०, १० १६ [नौ वाङ्नाम निघ० १ ११ णुद प्रेरणे (तुदा०) धातो 'ग्लानुदिभ्या डौ' उ० २ ६४ सूत्रेण डौ प्रत्यय । णौ प्रणोत्तव्या भवति, नमतेर्वा नि० ५ २३]

न्यक्रमीत् नितरा क्रमते ३ ३ ६३ नितरा क्रामति ६ ५६ ६ [नि+क्रमु पादविक्षेपे (भ्वा०) धातोर्लुङ्]

न्यक्रान् नितरा कुर्वन्ति २ ११ ८. [नि+डुकृञ् करणे (तना०) धातोर्लुङ् । 'मन्त्रे घसह्वरणश०' सूत्रेण लेर्लुक् । आडागमश्छान्दस]

न्यग्रोधः वट, भा०—सूर्य २३ १३ [न्यग् उपपदे रुह बीजजन्मनि प्रादुर्भावे च (भ्वा०) धातोरच्-प्रत्यय हस्य धकारश्छान्दस । न्यक्=नि+अञ्चु गतिपूजनयो (भ्वा०) धातो. क्विन् । ते यत्रयच्चोऽरोहस्तस्मान्न्यङ् रोहन्ति न्यग्रोहो न्यग्रोहो वै नाम त न्यग्रोह सन्त न्यग्रोध इत्याचक्षते ऐ० ७ ३० न्यञ्चो न्यग्रोधा रोहन्ति श० १३ २ ७ ३ परोक्षमिव ह वा एष सोमो राजा यन्न्यग्रोध ऐ० ७ ३१ क्षत्र वा एतद्वनस्पतीना यन्न्यग्रोध ऐ० ७ ३१]

न्यङ् यो न्यग्भूतस्सन् (सूर्य) ४ १३.५ यो नित्य-मञ्चति स (जीवात्मा) ४ १४ ५ **न्यञ्चम्**=यो निश्चितमञ्चति तम् (मेघम्) ५ ८३ ७ [नि+अञ्चु गतिपूजनयो (भ्वा०) धातो 'ऋत्विग्दधृग्०' इत्यादिना कर्त्तरि क्विन्]

न्यङ्कुः मृगविशेष २४ ३२ **न्यङ्कून्**=पशु-विशेषान् २४ २७. [नि+अञ्चु गतिपूजनयो (भ्वा०) धातोर्डु प्रत्यय । 'न्यङ्क्वादीना च' इति कुत्वम्]

न्यनमत् नितरा नमतु २.२४ २ [नि+णम प्रह्वत्वे शब्दे (भ्वा०) धातोर्लेट्]

न्यपद्यन्त निश्चय से प्राप्त होते है, स० वि० १३६, अथर्व० १४ २ ३२ [नि+पद गतौ (दिवा०) धातोर्लङ्]

न्यपादयन् निश्चयेन विनाशयेत् २ ११.१० [नि० पद गतौ (दिवा०) धातोर्णिजन्तात् लङ्]

न्यपावृणोः नितरा दूरीकरोति २ ११ १८. [नि+अप+वृञ् वरणे (स्वा०) धातोर्लङ्]

न्ययनम् निश्चितगमन स्थानम् १० ७ नि+इण्-गतौ (अदा०) धातोर्ल्युट्]

न्ययातन नितरा प्राप्नुत ५.५४ ५. नि०+या प्रापणे (अदा०) धातोर्लङ् । त-प्रत्ययस्य तनबादेशश्छान्दस]

न्ययामि नितरा प्राप्नोमि ६.३४ ४. [नि+यम गतौ (भ्वा०) धातोर्लङ् । व्यत्ययेन परस्मैपदम्]

न्यरन्धय निश्चयेन हिंसय ७ १६ २ [नि+रध हिंसासराध्यो. (दिवा०) धातोर्णिजन्ताल्लोट् । 'रधिजभो-रचि' सूत्रेण नुम्]

न्यर्थम् निश्चितोऽर्थो यस्मिँस्तम् (न्यायेन प्राप्त-पदार्थम्) ७.१८ ९ **न्यर्थानि**=निश्चिता अर्था येषु प्रयोजनेषु तानि ६ २७ ६ [नि-अर्थपदयो समास]

न्यर्बुदम् असख्यम् (सख्या), (न्यर्बुदमिति नर्व-निखर्व-महापद्म-शङ्कु सख्यानामप्युपलक्षकम्) १७ २ [नि-अर्बुदम्-पदयो समास । अर्बुदो मेघो भवति, अरणमम्बु तद्दोऽम्बुद, अम्बुमद् भातीति वा। अम्बुमद् भवतीति वा। स यथा महान् बहुर्भवति वर्षस्तदिवार्बुदम् नि० ३ १० यो वै वाचो भूमा तन्न्यर्बुदम् तै० ३ ८ १६ ३]

न्यलिप्सत नितरा लिम्पन्ति १ १९१ ३ [नि+लिप उपदेहे (तुदा०) धातोर्लुङ् ।

न्यविक्षत नितरा प्रविशन्ति १.१९१ ४ [नि+विश प्रवेशने (तुदा०) धातोर्लुङ् सामान्ये]

न्यविन्देयाम् नितरा प्राप्नुतम् ४ २८ ४ [नि+विद्लृ लाभे (तुदा०) धातोर्लङ्]

न्यवृणक् नित्य वृणक्षि १ ५३ ८ नितरा वृणक्ति २ १४ ७ [नि+वृजी वर्जने (रुधा०) धातोर्लङ्]

न्यसदत् नितरा सीदति २ ९ १ **न्यसदन्**=नितरा सीदन्ति १ १९१ ४ [नि+षद्लृ विशरणगत्यवसादनेषु (भ्वा०) धातोर्लुङ् । लृदित्त्वादङ्]

न्यसादयन्त नितरा स्थापयन्तु ३३ ७ नित्य कार्येषु नियोजयत । ३ ९ ९. [नि+षद्लृ विशरणगत्यवसादनेषु (भ्वा०) धातोर्णिजन्ताल् लङ्]

न्यसादि नितरा साद्यत १ ६० २ नितरा सद्यते ३ ४ ४ [नि+षद्लृ धातो. कर्मणि लुङ्]

(मर्त्त =मनुष्य), प्र०—अत्र 'सुधित-वसुधित-नेमधित-धिष्वधिषीय च' अ० ७.४.४५. इति छन्दसि निपातनात् क्त-प्रत्यये हित्व प्रतिषिध्यते 'सुपा सुलुक्०' इति सो स्थाने आकारादेश १ ७२ ४ नेमधितौ सङ्ग्रामे ७ २७ १ धार्मिकाऽधार्मिकयोर्मध्ये धार्मिकाणा ग्रहीतार (राजपुरुषा) ६.३३ ४ [नेमपूर्वस्य दधाते. क्तप्रत्यये 'सुधितवसुधित-नेमधित०' अ० ७ ४ ४५ सूत्रेण इत्वमिडागमो वा निपात्यते। नेम =णीञ् प्रापणे (भ्वा०) धातो 'अर्तिस्तु०' उ० १ १४० सूत्रेण मनूप्रत्यय । नेमधिता सग्रामनाम निघ० २ १७ नेमधिति सग्रामनाम निघ० २ १७]

नेमन्निषः नीयन्ते इष्यन्ते च यास्ता (गूर्त्तय = उद्यमयुक्ता कन्या) १ ५६ २

नेमयः कलाचक्राणि १.३८.१२ **नेमिम्**=चक्रम् ७ ३२ २० **नेमिः**=प्रापको लय धुरि इति भाषायाम् २ ५ ३. रथाङ्गम् ५ १३.६ [नेमि वज्रनाम निघ० २ २० णीञ् प्रापणे (भ्वा०) धातो 'नियो मि ' उ० ४ ४३ सूत्रेण नि प्रत्यय]

नेमः अर्द्धाऽधिकारी (पुमान्=अलस पुरुष) ५ ६१ ८ **नेमानाम्**=अन्नानाम्, प्र०—नेम इत्यन्ननाम निघ० २ ७, ६ १६ १८. [नेम इत्यर्धस्य ······ नेमोऽपनीत नि० ३ २० नेम. अन्ननाम निघ० २ ७]

नेमे प्रह्वीभूता भवति १.५७ ५ [णम प्रह्वत्वे शब्दे (भ्वा०) धातोर्लिट् । व्यत्ययेनात्मनेपदम्]

नेमे नियन्तार (राजभृत्या) ४ २४ ४ सर्वे (सोमपा =धार्मिका वीरजना) १ ५४ ८

नेशत् नश्येत् ६.५४.७ नाशयति ४.१ १७. [णश अदर्शने (दिवा०) धातोर्लेट् । विकरणव्यत्ययेन शप्]

नेषत् नयेत् १ १४१ १२ **नेषति**=नयेत् ५ ४६ १ **नेषि**=नयसि, प्र०—अत्र 'बहुल छन्दसि' इति शवभाव. १६ ५२. प्रापयसि प्र०—अत्र नीधातोर्लेटि 'बहुल छन्दसि' इति शपो लुक् । अन्तर्गतो ण्यर्थ' १ ६१ १ प्राप्नोषि, प्र०—अत्र 'बहुल छन्दसि' इति शवभाव ८ १५. **नेषथ**=नयथ ५ ५४ ६ [णीञ् प्रापणे (भ्वा०) धातोर्लेटि 'व्यत्ययो बहुलम्' इति शप्सिपौ विकरणौ । 'नेषि' प्रयोगे शपो लुक्]

नेषतमैः अतिशयेन प्रापिकारकै (विद्याप्रकाशै) १.१४१ १२ [नेषप्राति० अतिशायने तमप् । नेष =णीञ् प्रापणे (भ्वा०) धातोरौणादिक स]

नेष्टः ! नेत (विद्वज्जन) २६ १ विद्युत् पदार्थशोधकत्वात् पोषकत्वाच्च, नेनेक्ति सर्वान् पदार्थानिति, अ०—नेष्ट्री विद्युत्, प्र०—नप्तृनेष्टृ० उ० २.६५ अनेन निपातनम् १ १५ ३. **नेष्टुः**=नायकस्य (वेदस्य) २ ५.५ [णीञ् प्रापणे (भ्वा०) धातो कर्त्तरि तृच् । 'नप्तृनेष्टृ०' उ० २ ६५ सूत्रेण निपातनात् पुगागम । अथवा तृन् प्रत्यये 'नयते पुक् च' अ० ३ २ १३५ वा० सूत्रेण पुक् । अथवा णिजिर् शौचपोषणयो (जु०) धातो कर्त्तरि तृच्]

नेष्ट्रम् नयनम् (सत्कर्म) २ १ २ **नेष्ट्रात्**=विज्ञानहेतो (व्यवहारात्) प्र०—अत्र 'णेष्टृ गतौ' इत्यस्मात् 'सर्वधातुभ्य ष्ट्रन्' उ० ४ १६३ इति बाहुलकात् ष्ट्रन् प्रत्यय. १ १५ ६. प्रापणात् २ ३७ ३. विनयात् २६ २२. [नेषृ गतौ (भ्वा०) धातो 'सर्वधातुभ्य ष्ट्रन्' इत्युणादिसूत्रेण ष्ट्रन् प्रत्यय । णीञ् प्रापणे (भ्वा०) धातोर्वा रूपम्]

नैचाशाखम् नीचा शाखा शक्तिर्यस्मिँस्तम् (नास्तिक म्लेच्छजनम्) ३ ५३ १४ [नीचा-शाखापदयो समास । तत स्वार्थेऽण्प्रत्यय । नैचाशाख नीचाशाखो नीचै शाख । शाखा शक्नोते नि० ६ ३२]

नैषादम् निषादस्य पुत्रम् ३० ८ [निषादो व्याख्यात । ततोऽपत्यार्थेऽण् प्रत्यय । एतद्वा अवरार्ध्यमन्नाद्य यन्नैषाद कौ० २५ १५]

नो निषेधे ६ ५४ ३

नोधः स्तावक' (मनुष्य) १ ६४ १ **नोधाः**=यो नायकान् प्राप्तिकरान् धरति (सभाध्यक्ष) प्र०—अत्र णीञ् धातोर्बाहुलकादौणादिको डो प्रत्ययस्तदुपपदात् डुधाञ् धातोश्च क्विप् १ ६१ १४ [णु स्तुतौ (अदा०) धातो 'नुवो धुट् च' उ० ४ २२६ सूत्रेण असिर्धुडागमश्च । 'नो' इत्युपपदे वा दधाते क्विप् । नो=णीञ् प्रापणे धातोरौणादिको डो । नोधा ऋषि भवति नवन दधाति नि० ४.१६]

नोधाः स्तोता (इन्द्र =सभाध्यक्ष) प्र०—'नुवो धुट् च' उ० ४ २२३. अनेनौणादिकसूत्रेणाऽस्य सिद्धि १ ६२ १३ [नोधा इति व्याख्यातम्]

नोधाइव यो नौति सर्वाणि तद्वत् (विद्वज्जनवत्) प्र०—'नुवो धुट् च' उ० ४ २२३ अनेन नुधातोरसि प्रत्ययो धुडागमश्च १ १२४.४ [नोधा इति व्याख्यातम् । नोधस्-इव पदयो समास]

नोनाव अत्यन्तप्रशसित (सूर्य) १ ७६.२ [णुञ् स्तुतौ (अदा०) धातोर्यङ्लुगन्तात् कर्त्तरि अच्]

नोनुमः अतिशयेन स्तुम, प्र०—अत्र 'णु स्तुतौ'

पक्वज्ञाना परिपक्वस्वरूपा वा (पृक्ष=सम्बन्धिन.) ४ ४३ ५ [डुपचप् पाके (भ्वा०) धातो क्त । 'पचो व' अ० ८ २ ५२ सूत्रेण तकारस्य वकारादेश]

पक्वा पक्वफलयुक्ता (शाखा=वृक्षाऽवयवा) १.८.८ [पक्वम् इति व्याख्यातम् । ततो मत्वर्थीयस्य प्रत्ययस्य लुक् । स्त्रिया टाप्]

पक्षतिः पक्षस्य परिग्रहस्य मूलम् २५ ४. [पक्षप्राति० मूलार्थे 'पक्षात्ति' अ० ५ २ २५ सूत्रेण ति' प्रत्यय']

पक्षः परिग्रह ६ ४७ १६ **पक्षौ**=परिग्रहो कार्य-कारणरूपौ (पदार्थौ) १८ ५२ पार्श्वाविव १२ ४ [पणायति स्तौति व्यवहरति वा येन यत्र वा स पक्ष । पण व्यवहारे स्तुतौ च (भ्वा०) धातो 'गृधिपण्योर्दकौ च' उ० ३ ६६ सूत्रेण स । णकारस्य ककारादेश]

पक्षा पक्षौ २६ १२ [पक्ष व्याख्यातम् । तत 'सुपा सुलुग्०' इत्याकारादेश]

पक्षिणम् पक्षौ विद्यन्ते यस्मिँस्तम् (प्लव=नौकादिकम्) १ १८२ ५ **पक्षिणः**=विहङ्गमान् १.४८ ५ [पक्ष इति व्याख्यातम् । ततो मत्वर्थ इनि प्रत्यय]

पक्षोभिः पक्षै २६ ५ [पक्षस्प्राति० भिस् । पक्षम्=डुपचप् पाके (भ्वा०) धातो 'पचिवचिभ्या सुट् च' उ० ४ २२० सूत्रेण असुन्]

पक्ष्माणि परिग्रहीनान्यन्यानि (वस्त्राणि) १६ ८६ परिग्रहानि लोमानि वा २५ १ परिग्रहीतु योग्यानि कर्माणि, नेत्रोर्ध्वलोमानि वा २५ १ [पक्ष परिग्रहे (चुरा०) धातोर्बाहु० औणादिको मनुप्रत्यय]

पक्ष्या पक्षेपु साध्वी (वाणी) ३ ५३ १६ [पक्ष इति व्याख्यातम् । तत साध्वर्थे यत्, तत स्त्रिया टाप्]

पङ्क्तिराधसम् पङ्क्ते समूहस्य राध समिद्धिर्यस्मात्तम् (वीर-पुरुषम्) ३३ ८६ य पङ्क्ती समुदायान् राध्नोति तम् (यज्ञम्) ३७ ७ य पङ्क्तीर्धर्मात्मवीर-मनुष्य-समूहान् राध्नोति यद्वा पङ्क्त्यर्थ राधोऽन्न यस्य तम् (नर्य=हितकारिजनम्) १ ४० ३ [पङ्क्ति-राधस्पदयो समास । राधस्=राध ससिद्धौ (स्वा०) धातोरौणादिको ऽसुन् । राध धननाम निघ० २ १०]

पङ्क्तिः पङ्क्तिनामक छन्द १० १४ पञ्चाऽवयवो योग १४ १८ **पङ्क्त्या**=विस्तृतया क्रियया २३ ३३ **पङ्क्त्यै**=पङ्क्तिछन्दोऽर्थाय २४ १३ पङ्क्त्या १३ ५८ [पञ्च परिमाणमस्येति विग्रहे 'पङ्क्तिविंशति०' अ० ५ १ ५६ सूत्रेण पङ्क्ति शब्दो निपात्यते । पञ्चन्प्राति० ति प्रत्यये टिलोप. । पञ्चपदा पङ्क्ति ऐ० ५ १८ पञ्चाक्षरा पङ्क्ति तै० २ ७ १० २ चत्वारिंशदक्षरा पङ्क्ति कौ० १७ ३ पङ्क्तिर्विराणो पत्नी गो० उ० २ २ ६ पाङ्क्तो वै तन्त्र छन्द श० ८ २ ४ ३ पृथुग्यं वै पङ्क्ति श० १ २ २ ४ ६ पञ्चो पङ्क्त श० ८ ६ २ ३ श्रोत्र पङ्क्ति श० १० ३ ११ पङ्क्तिरूर्ध्वा (दिक्) श० ८ ३.१ २२ पङ्क्ति पञ्चपदा नि० ७ १२ पचि विस्तारे (चुरा०) धातो क्तिन् । चतुर्भ्य पादेभ्योऽग्रे गता विस्तृता पङ्क्तिश्छन्दसज्ञा । पङ्क्तिर्वा अन्नम् ऐ० ६ २० यजमानो वै पङ्क्ति मै० ३ ३ ६ यज्ञस्य पङ्क्ति (पत्नी) तै० आ० ३ ६ २ अन्न वै पङ्क्ति ऐ० आ० १.१ ३. गो० २ ६ २]

पचत् पचेत् ६ १० ११ [डुपचप् पाके (भ्वा०) धातोर्लेट्]

पचतम् परिपक्वम् (पितुम्=अन्नम्) १ ६१ ७ **पचत.**=पाक कुर्वन् (पुरोळा=अन्नविशेष) प्र०—अत्र पच-धातोरौणादिकोऽतच्-प्रत्यय ३ २८ २ **पचतैः**=परिपाकपरिणामै (प्राणै) २३ १२ [डुपचप् पाके (भ्वा०) धातोरौणादिकोऽतच्-प्रत्यय]

पचता पचनानि पक्तव्यानि (वस्तूनि) प्र०—अत्रौणादिकोऽतच् २१ ६० [डुपचप् पाके (भ्वा०) धातोरौणादिकोऽतच् । पचतप्राति० शेर्लोप]

पचता परिपक्वभाव प्राप्तेन (पुरोडाशेन=उत्तमाऽन्नेन व्यञ्जनेन च) २८ ४६ **पचते**=परिपक्वं सम्पादयते (सत्पुरुषाय) २ १२ १५ **पचन्**=पाचयन् २८ ३३ **पचन्तम्**=पाक कुर्वन्तम् (मज्जनम्) २ २० ३ परिपक्व कुर्वन्तम् (सत्पुरुषम्) २ १२ १४ [डुपचप् पाके (भ्वा०) धातो शतृप्रत्यय]

पचत्यम् पचने साधुम् (पुरोळाश=अन्नविशेषम्) ३ ५२ २ [पचनप्राति० साध्वर्थे यत् । नकारस्य तकारो वर्णव्यत्ययेन]

पचनम् पाकसाधनम् (कार्यम्) २५ २६ [डुपचप् पाके (भ्वा०) धातो करणे ल्युट्]

पचन्ति पकाते है स० वि० २१०, अथर्व० ६ ६ २ १३ **पचन्तु**=परिपक्व कुर्वन्तु १ १६२ १० परिपक्वा कुर्वन्तु ११ ६१. भा०—अग्नौ जुहुयु २५ ३३ सस्कारयुक्त कुर्वन्तु, दृढबलधारिणी वा कुर्वन्तु ११ १६ [डुपचप् पाके (भ्वा०) धातोर्लेट्]

पचात् पचेत् ४ २४ ७ [डुपचष् पाके (भ्वा०) धातोर्लेट्]

न्यसीदत् निषीदेत् ५ १.६ नितरा सीदति १७ १७ नित्य अवस्थित है, आर्याभि० २ ३०, १७.१७. **न्यसीदः**= नितरा तिष्ठे ६ १.२. [नि+षद्लृ विशरणगत्यवसादनेषु (भ्वा०) धातोर्लङ् । धातो सीदादेश]

न्यस्फुरत् नितरा वर्धयति २.११.६ [नि+स्फुर सचलने (तुदा०) धातोर्लङ् । अत्र वर्धनेऽपि धातूनामनेकार्थकत्वात्]

न्यागात् नितरा प्राप्नोति २ ३८ ३. [नि+आङ्+इण् गतौ (अदा०) धातोर्लुङ् । 'इणो गा लुङी' ति गादेश]

न्यानजे नित्यमस्येच्चालयेत् १ १६१ ४ [नि+अज गतिक्षेपणयो (भ्वा०) धातोर्लिट् । छान्दसत्वाद् वीभावो न, नुडागमश्चाभ्यासस्य]

न्यार्चन् नित्यमर्चन्तु १ ५२ १५ [नि+अर्च पूजायाम् (भ्वा०) धातोर्लङ्]

न्यावृणक् नितरा वृङ्धि ५ २६.१०. [नि+आङ्+वृजी वर्जने (रुधा०) धातोर्लङ्]

न्युप्त: नित्य स्थापितो व्यवहार' ८ ५७ [नि+टुवप् बीजसन्ताने (भ्वा०) धातो क्त]

न्युहीत् निवहेत् ७ ३७ ६ [नि+वह प्रापणे (भ्वा०) धातोर्लुङ् । छान्दस सम्प्रसारणम् आटोऽभावश्च]

न्यूहतु: नितरा देशान्तर प्रापयत १ ११६ १ **न्यूहथु:**=नितरा वाहयतम् १ ११७ ६ नितरा वहतम् १ ११२ १६ [नि+वह प्रापणे (भ्वा०) धातोर्लिट् । यजादित्वात्सप्रसारणम्]

न्यृञ्जते नितरा प्रसाध्नोति, प्र०—ऋञ्जति प्रसाधनकर्मा नि० ६ २१, १ ५४ २ **न्यृञ्जे**=नितरा प्रसाध्नुयाम् ३ ७ ८ नित्य भर्जयामि ३ ४७ नितरा साध्नोमि ४ २६ १ [नि+ऋजि भर्जने (भ्वा०) धातोर्लट् । ऋञ्जति प्रसाधनकर्मा नि० ६ २१]

न्यृण्वन् नितरा प्रसाध्नुवन् (विद्युदग्नि) ७ १.२ [नि+ऋणोति गतिकर्मा (निघ० २ १४) धातो शतृप्रत्यय]

न्यृण्वन् नित्य प्रसाध्नुवन्ति ७ ५ ६. [नि+ऋ गतौ (क्र्या०) धातोर्लङ् । आडभावश्छान्दस । विकरणव्यत्ययेन श्नु]

न्यृषन्ति नितरा प्राप्नुवन्ति १ ५२.७ [नि+ऋषी गतौ (तुदा० (धातोर्लट्]

न्यृष्टम् नितरा प्राप्तम् (अक्षयकोशम्) ४ २० ६ **न्यृष्टे**=निश्चित स्वरूप प्राप्ते (द्यावापृथिव्यौ) ३ ५५ २०. [नि+ऋषी गतौ (तुदा०) धातो क्त । ईदितत्वादनिट्त्वम्]

न्येरिरे निश्चयेन प्राप्नुयु ४ १ १ नितरा कम्पयन्ति गमयन्ति २.२ ३ प्रेरयन्ति ४ १.१ [नि+आङ्+ईर गतौ कम्पने च (अदा०) धातोर्लिट् । एरिर इतीर्त्तिरुपसृष्टोऽभ्यस्त. नि० ४ २३.]

न्यैरयत् प्रेरयेत् ६ ५६.३. [नि+ईर क्षेपे (चुरा०) धातोर्लङ् । ईर गतौ कम्पने च (अदा०) धातोर्वा णिजन्तात्लङ्]

न्योकसे निश्चितानि ओकासि स्थानानि येन तस्मै (इन्द्राय=परमेश्वराय), प्र०—ओक इति निवासनामोच्यते, नि० ३.३, १.६ १० **न्योका:**=निश्चितस्थान (सोम =सोमलताद्योषधिगण ऐश्वर्य वा) ५.४४ १४ [नि-ओकस्पदयो समास]

न्योषतात् नितरा दह १३.१२. निदह ४ ४.४ **न्योषति**=नित्य दहेत् १ १३० ८ [नि+उष दाहे (भ्वा०) धातोर्लोट् । 'तुह्योस्तातङ्०' इति तातङ् आदेश । अन्यत्र लट्]

न्यौहते निश्चयेन प्राप्नोति प्रापयति वा ५ ५२ ११. [नि+आङ्+वह प्रापणे (भ्वा०) धातोर्लट् । व्यत्ययेन शप्रत्यये सम्प्रसारणम्]

न्यौहत् न्यूहते १ १६४ २६ [नि+ऊह वितर्के (भ्वा०) धातोर्लङ्]

पक्तये पाककर्त्रे (श्रेष्ठजनाय) ४ २५ ७ **पक्तिम्**= पाकम् ४ २५ ६ **पक्तिः**=पाक ४ २४ ५ **पक्तीः**= पाकान् ७ ३२ ८. नानाविधान् पाकान् २८ ४६. पाचनप्रकाराणि २१ ५६ [डुपचष् पाके (भ्वा०) धातो. स्त्रियां क्तिन् । 'कृतो बहुलम्' इति कर्त्तर्यपि क्तिन्]

पक्थास: पाकविद्याकुशला परिपक्वज्ञाना वा (आर्या राजजना) ७ १८ ७ [डुपचष् पाके (भ्वा०) धातोर्बाहु० औणादिकस्थक्-प्रत्यय । पक्थप्राति० जसोऽसुगागम]

पक्थी पाचक (जन) ६ २०.१३ [डुपचष् पाके (भ्वा०) धातोरौणादिकस्थक्-प्रत्यय । पक्थप्राति० मत्वर्थे इनि.]

पक्वम् परिपक्वस्वभावम् (वाजिन=वेगवन्तमश्वम्) २५ ३५ पच्यमानम् (पय =रसम्) १ ६२ ६ शुद्धानन्दसिद्धम् (फलम्) ऋ० भू० १५६, १२ ६८ पाकेन सम्यक् सस्कृतम् (आहारम्) १ १६२ १२ **पक्व:**=परिपक्वफलादि ४ २० ५ उपभोक्तुमर्ह (यव) १.६६ २ **पक्वा:**=परि-

भवन्ति वीर्य पञ्चदशम् गो० पू० ५ ३ प्राणो वै त्रिवृदात्मा पञ्चदश ता० १९ ११ ३ क्षत्र पञ्चदश ऐ० ८.४ तस्माद्राजन्यस्य पञ्चदश स्तोम ता० ६ १ ८ त्रैष्टुभ पञ्चदशस्तोम ता० ५ १ १४ पञ्चदशो वै राजन्य तै० म० २ ५ १० १ पञ्चदशी ते अग्ने बाहू काठ० ३९ २ बाहू वै पञ्चदशस्तोमानाम् जै० २ १३५ यजमानो वै पञ्चदश मै० ४ ७ ६ यज्ञ पञ्चदशो वज्रमेवोपरिष्टाद् दधाति, रक्षसामपहत्यै काठ० २० १३ तै० स० ७ ३ ६ २ येन प्रतितिष्ठति स पञ्चदश जै० १ २५३. वीर्यं वै बृहद् वीर्यं पञ्चदश जै० २ ४०७ पञ्चदश माध्यन्दिन सवनम् मै० ४ ४ १०]

पञ्चदशाक्षरेण आसुर्य्या गायत्र्या (छन्दसा) ९ ३४. [पचदश-अक्षरपदयो समास]

पञ्चधा पञ्च ज्ञानेन्द्रिय-शब्दादिविषयप्रतिप्रादनेन पञ्चप्रकारा ३४ ११ [पञ्चन् सख्यावाचिन प्राति० 'सख्याया विधार्थे धा' अ० ५ ३ ४२ सूत्रेण धा-प्रत्यय]

पञ्चपञ्च पञ्चपञ्च प्राणा ३.५५ १८ [पञ्चन्-शब्दस्य वीप्साया द्वित्वम्]

पञ्चपादम् पञ्च क्षण-मुहूर्त्त-प्रहर-दिवस-पक्षा पादा यस्य त संवत्सर सूर्यं वा १ १६४ १२. [पञ्चन्-पादपदयो समास]

पञ्चमी पञ्चाना पूरणा (क्रिया) २५.४ (पञ्चन्-प्राति० पूरणार्थे डटि मडागमे च स्त्रिया ङीप्]

पञ्चरश्मिम् पञ्च प्राणापान-व्यानोदान-समाना रश्मय इव यस्मिँस्तम् [रथ=रमणीय यानम्) २ ४० ३ [पञ्चन्-रश्मिपदयो समास]

पञ्चविंशति पञ्चाधिका विंशति (सख्या) १८ २४. पञ्चन्विंशतिपदयो समास]

पञ्चविंशः पञ्चविंशतिप्रकार (स्तोम.=स्तोतव्यो विद्वानधिपति) १४ २५ पञ्चविंशतिधा (ओज =पराक्रम) १४ २३ [पञ्चविंशतिप्राति० 'स्तोमे डविधि पञ्चदशाद्यर्थे ' अ० ५ १ ५८ वा० सूत्रेण ड प्रत्यय]

पञ्चहोता पञ्च प्राणा होतार आदातारो यस्या सा (गौ =वाक्) ५ ४२.१. [पञ्चन्-होतृपदयो समास. । सवत्सरो वै पचहोता तै० २ २.४ ६. अग्नि पञ्चहोतॄणा होता तै० २ ३ ५ ६ सुवर्ग्यो वै पञ्चहोता तै० २ २.८ २. तस्मै (ब्रह्मणे) पञ्चम हूत. प्रत्यशृणोत् । स पञ्चहूतोऽभवत् पञ्चहूतो ह वै नामैष । त वा एत पञ्चहूत सन्त पञ्चहोतेत्याचक्षते परोक्षप्रिया इव हि देवा तै० २ ३ ११ ३-४]

पञ्चाक्षरेण दैव्या पङ्क्त्या (छन्दसा) ९ ३२.

पञ्चारे पञ्च तत्त्वानि अरा यस्मिँस्तस्मिन् (चक्रे) १.१६४ १३. [पञ्च-अरपदयो समाम. । अरा प्रत्यृता नाभौ नि० ४ २७]

पञ्चावयः पञ्चाऽवयो येषान्ते (पशुपालका जना) २४ १२ **पञ्चाविम्**=या पञ्च प्राणान् रक्षति ताम् (गा=पृथिवीम्) २८ २६. **पञ्चाविः**=पञ्चेन्द्रियाण्यवन्ति येन स (ओषधि) १४.१० पञ्चाऽवयो यस्य स (जन) १८ २६ य पञ्चभिरव्यते रक्ष्यते स. (गौ.=विद्वज्जन) २१.१४ [पञ्चन्-अविपदयो समासः । अवि =अवरक्षणादिषु (भ्वा०) धातोरौणादिक इन्]

पञ्चावी तत्स्त्री १८ २६ [पञ्चाविरिति व्याख्यातम् । तत स्त्रिया 'कृदिकारादक्तिन ' इति ङीप्]

पञ्चाशतम् पञ्चाशत्सख्यायुक्त विज्ञानम् ५ १८ ५ **पञ्चाशतः**=एतत्सङ्ख्याता (सेना) १ १३३ ४ [पञ्च दशत परिमाणमस्येति विग्रहे पचाशत् शब्दो निपात्यते 'पक्तिविंशति०' अ० ५.१ ५९. सूत्रेण । पञ्चाशत् प्राति० मत्वर्थीयस्य लुक्]

पठर्वा ये पठन्ति तान् विद्यार्थिन ऋच्छति प्राप्नोति स सेनाध्यक्ष १ ११२ १७. [पठ् इत्युपपदे ऋ गतौ (भ्वा०) धातोर्वनिप् प्रत्यय । पठ्=पठ व्यक्ताया वाचि (भ्वा०) धातो कर्त्तरि क्विप्]

पड्वीशम् पादवन्धनमाच्छादन वा १ १६२ १४. प्राप्ताना पदार्थाना विभाजकम् (विद्युदग्निम्) १ १६२ १६ यत्पादेषु विशति तत् (भा०—अश्वस्य गतिविशेष) २५ ३८ पद्भिर्विशन्तम् (अश्वम्) २५ ३९ **पड्वीशात्**=न्यायविरोधाचरणात्, भा०—विरोधात् १२ ९० [पादोपपदे विश प्रवेशने (तुदा०) धातोर् मूलविभुजादित्वात् क । पादस्य पदादेशो धातोरिकारस्य च दीर्घश्छान्दस]

पड्भिः पादै, प्र०—अत्र वर्णव्यत्ययेन दस्य ड २३ १३ विज्ञानादिभि ४ २ १२ [पादप्राति० तृतीयाबहुवचने 'पद्दन्नोमास्०' इत्यादिना पदादेश । वर्णव्यत्ययेन दस्य डादेश । पड्भि =पानैरिति वा स्पाशनैरिति व स्पर्शनैरिति वा क्वचित् नि० ५ ३]

पणयः प्रशसनीया (स्त्रिय) ४ ५१ ३ व्यवहरमाणा (वणिजो जना) १ १५१ ९ व्यवहारिण (असज्जना) ३५.१ व्यवहारयुक्ता (जना.) १ १२४ १० व्यवहारज्ञाः (सज्जना) ६ २० ४ **पणिना**=व्यवहर्त्रा वणिग्जनादिना ४ २५.७. **पणिभिः**=व्यवहारज्ञै स्तावकै

पच्यते परिपक्वो भवति १ १३५ ८ **पच्यन्ताम्**=परिपक्वा भवन्तु २२ २२ [डुपचष् पाके (भ्वा०) धातो कर्मणि लट् । अन्यत्र लोट्]

पच्यमानात् भा०—पीड्यमानात् (गात्राद्=अङ्गात्) २५ ३४ [डुपचष् पाके (भ्वा०) धातो कर्मणि शानच्]

पच्यस्व परिपक्वो भव १० ३१ परिपक्वा कुरु १९ १ पचस्व पाचय वा १९ १ उद्यतो भव, शुद्धबुद्धिमन्त दृढपुरुषार्थ वा कुर्वन्तु १० ३१ [डुपचष् पाके (भ्वा०) धातोर्लोट् । व्यत्ययेन श्यन्]

पज्रहोषिणा पज्र सङ्गतो होषो घोषो वाण्ययोस्तौ (इन्द्राग्नी=अध्यापकोपदेशकौ) ६ ५९ ४ [पज्र-होषपदयो समासे मत्वर्थे इनि । तत 'सुपा सुलुगि' ति सूत्रेणाकारादेश । पज्रहोषिणा=प्राजितहोषिणौ नि० ५ २२ पज्र =पद गतौ (दिवा०) धातोरौणादिको रक्-प्रत्यय दस्य ज । होष =घोष । घस्य हकारश्छान्दस]

पज्रः प्राजितैश्वर्य (राजपुरुष), प्र०—पृषोदरादित्वादिष्टसिद्धि ३३ ५० बलिष्ठ (विद्वज्जन) १ १५८ ३ **पज्राः**=प्रपन्ना (प्रजाजना) १ १२६ ५ पद्यन्ते गच्छन्ति मार्गान् यैस्ते (रथा) प्र०—अत्र वर्णव्यत्ययेन दस्य ज १.१२६ ४ प्राप्ता (अधर्माचारिणो जना) १ १९० ५ **पज्रे**=गमके (रथे) १ १२२ ७ **पज्रेषु**=शिल्पव्यवहारेषु, प्र०—अत्र पन धातोर्बाहुलकादौणादिको रक् प्रत्ययो वर्णव्यत्ययेन जकारादेशश्च १ ५१ १४ [पद गतौ (दिवा०) पन व्यवहारे स्तुतौ च (भ्वा०) धातोर्वा औणादिके रक्-प्रत्यये छान्दस रूप, पृषोदरादित्वात् साधनीयम्]

पज्राम् गन्त्रीम् (युवतिम्) १ १६७ ६ [पज्रप्राति० स्त्रिया टाप् । पज्र इति व्याख्यातम्]

पज्रासः विज्ञापयितृणि मित्राणि १ ११७ १० [पज्रप्राति० जसोऽसुगागम । पज्र इति व्याख्यातम्]

पज्रियः य पज्रान् प्राप्तव्यान् बोधानर्हति सः (विद्वान् जन) १ १२० ५ **पज्रियाय**=प्रज्रेषु पद्रेषु पदेषु भवाय (विद्यार्थिने) प्र०—अत्र पदधातोरौणादिको रक्, वर्णव्यत्ययेन दस्य ज । ततो भवार्थे य १ ११६ ७ **पज्रियेण**=प्राप्तव्येषु भवेन (कक्षीवता=विदुषा जनेन) १ ११७ ६ [पज्र इति व्याख्यातम् । ततो भवार्थे घ प्रत्यय । घस्येयादेश]

पञ्च पञ्चाना निकृष्टमध्यमोत्तमोत्तमतरोत्तमतमाना पञ्चविधानाम् (क्षितीना=पृथिवीलोकानाम्) १ ७ ९. भूतानि पञ्च २ १३ १० ब्राह्मण-क्षत्रिय-वैश्य-शूद्र-निषादानाम् १ १७६ ३ प्राणाऽपानव्यानोदानसमानान् २ ३४ १४ पञ्चत्व विशिष्टा गणना १८ २४ पाच प्राण, आर्याभि० १ १७, ऋ० १ ६ १६ १० एतत्सङ्ख्याका (जना =मनुष्या प्राणा वा) २५ २३ भूम्यादीनि पञ्चतत्वानि ५ ३५ २ पूर्वादिचतस्रो मध्यस्था चैका (दिश =आशा) १७ ५४ पञ्चभिरुत्क्षेपणादिभि कर्मभि, प्र०—'उत्क्षेपणमवक्षेपण०' वैशे० १ ७ अत्र 'सुपा सुलुक्०' इति भिसो लुक् १ ९ अध्यापकोपदेशकाऽध्येत्र्युपदेश्यसामान्या १ १२२ १३ यथाऽग्निवायु-मेघ-विद्युत्-सूर्यमण्डल-प्रकाशास्तथा १ १०५ १० पञ्चज्ञानेन्द्रियवृत्तय ३४ ४ **पञ्चभिः**=होत्रध्वर्यूद्गातृ-ब्रह्म-सभ्यैर्ऋत्विग्भि ३ ७ ७ समान-चित्त-बुद्ध्यहङ्कार-मनोभि १४ २८ **पञ्चसु**=भूतेषु तन्मात्रासु वा २३ ५२ राज्य-सेना-कोश-दूतत्व-प्राड्विवाकत्वसम्पन्नेष्वधिकारिषु ३ ३७ ९ [पञ्च पृक्ता सख्या स्त्रीपुनपुसकेष्वविशिष्टा नि० ३ ८ पचि व्यक्तीकरणे (भ्वा०) धातोर्बाहु० औणादिक कनिन् प्रत्यय । पञ्चति व्यक्तीकरोतीति विग्रह.]

पञ्चजनाः पञ्च-प्राणा इवोत्तम-मनुष्या, प्र०—पञ्चजना इति मनुष्यनाम, निघ० २ ३, ६ ५१ ११ [पञ्चन्-जनपदयो समास । पञ्चजना मनुष्यनाम निघ० २ ३ पञ्चजना =गन्धर्वा पितरो देवा असुरा रक्षासीत्येके, चत्वारो वर्णा निषाद पञ्चम इत्यौपमन्यव नि० ३ ८]

पञ्चदश पञ्चोत्तरा दश (सङ्ख्या) १८ २४ **पञ्चदशभिः**=प्रतिपदादि-तिथिभि १४ २९ [पञ्चन्-दशन्पदयो समास]

पञ्चदशम् चत्वारो वेदाश्चत्वार उपवेदा षडङ्गानि च मिलित्वा चतुर्दशविद्यास्तासा सख्यापूरक क्रियाकौशलम् (स्तोमम्) ९ ३४ **पञ्चदशः**=पञ्चदशाना तिथीना पूरक (पौर्णमासी) १३ ५५ पञ्चदशाना पूरण (स्तोम =स्तोता) २९ २१ पञ्चदशाना पूरण पञ्चदशविध (भान्त =प्रकाश १४ २३ प्राणेन्द्रिय-भूताना पञ्चदशाना पूरक (ग्रीष्मर्त्तु) १० ११ **पञ्चदशाय**=पञ्च दश च यस्मिन् सन्ति तस्मै (इन्द्राय=ऐश्वर्याय) २९ ६० [पञ्चन्-दशन्पदयो समासे कृते पूरणार्थे डट् । पञ्चदशो हि वज्र श० ४ ३ ३ ४ पञ्चदश एव सह गो० पू० ५ १५ चन्द्रमा वै पञ्चदश । एष हि पञ्चदश्यामपक्षीयते पञ्चदश्यामापूर्यते तै० १ ५ १० ५ अर्धमास पञ्चदश ता० ६ २ २ ग्रीवा पञ्चदशश्चतुर्दश ह्येवैतस्या करूकराणि

दिधनम्), अ०—स्वामित्व-सम्पादक, प्र० 'तत्करोति तदाचष्टे' इति पतिशब्दाण्णिच् १.४७. गच्छन् (सूर्य) १ १५२ ५ **पतयत्सु**=पतिरिवाचरत्सु (व्यवहारेषु) ६ ६ ५ **पतयद्भिः**=इतस्ततो धावयद्भि (विद्वद्भि) १ १५८ ३ पतन्त गच्छन्तम् (आत्मानम्) २६ १७ गमयन्तम् (अग्निम्=अश्वम्) १ १६३ ६ **पतयन्तः**=ऊर्ध्वमधो गच्छन्त (पक्षिण) १ १५५ ५ इतस्तत चलन्त सन्त (पक्षिसमूहा, दृश्यादृश्या सर्वलोका वा) १ २४.६ पतिरिवाचरन्त (भूम्यादिलोका) ४ ५४.५. [पतिप्राति० 'तत्करोति तदाचष्टे' इति वा० सूत्रेण पतिशब्दाण् णिचि शतरि च रूपम् । पत्लृ गतौ (भ्वा०) धातोर्वा णिजन्ताच् छतृप्रत्यय । पतयति गतिकर्मा निघ० २ १४.]

पतयत् पति स्वामी पालक इवाऽऽचरेत् ६ ७१ ५. **पतयन्त**=पतिमिवाचरन्तु, प्र०—अत्राऽडभाव १ १६९ ७ **पतयन्ति**=पतिरिवाचरन्ति १ ६ पतिमाचक्षन्ते ३ ५५ ३ पतन्ति गच्छन्ति, प्र०—चुरादित्वात् स्वार्थे णिच् १७.६५ [पतिप्राति० 'तत्करोति तदाचष्टे' इति णिजन्ताल्लेट् । अथवा पत्लृ गतौ (भ्वा०) धातो स्वार्थे णिचि लेटि रूपम्]

पतयः स्वामिन (जना) १६ ६१ पालका (जना) २० ५१. पालका स्वामिन (प्रजाजना) ६ ४७ १२. अधिष्ठातार (पित्रध्यापकादय) १६ ५४ **पतये**=स्वामिने (जनाय) १८ २८ रक्षकाय (सेनाधीशाय), पालकाय (सेनाधीशाय), प्र०—अत्र 'षष्ठीयुक्तश्छन्दसि वा' इति घिसज्ञा १६ १७ पालकेश्वराय ७.१ विघातकाय (राजपुरुषाय) १६ २१ दण्डेन निपातयित्रे (राजपुरुषाय) १६ २१. पातयिष्णवे (प्रजाजनाय) १६ २१ दण्डादिशोषकाय (पुरुषाय) १६ २० पालकाय (सेनापतये) १६ २० प्रपातकाय (राजपुरुषाय) १६ २२ **पतिभ्यः**=गृहीतपाणिभ्य (देवेभ्य =दिव्यगुणेभ्यो जनेभ्य) २६ ३०. **पतिम्**=य पाति रक्षति चराचर जगत्तमीश्वरं, य पाति रक्षति सज्जनाँस्तम् (इन्द्र=परमात्मान वीरपुरुष वा) १ १ १ १ पालक स्वामिनम् १ ११७ ७ सर्वाऽधिस्वामी (ईश्वर) को आर्याभि० १ १०, ऋ० १ ६ १५ ५ पालयितारम् (अग्निम्) १ ६० ५ पालक सूत्रात्मानम् ५ ४६ ३ अखिलैश्वर्य स्वामिनम् १२ ५६ पालक पाणिग्रहीतारम् १७ १ १. **पतिः**=पालको यजमान १७ ५२ पालयिता पालनहेतुर्वा अ०—पालक (अग्नि =सर्वस्वामीश्वर, प्रकाशादिगुणवान् भौतिको वा) ३ १२ अधिष्ठाता (इन्द्र =सेनापति) १ १०१ ५ प्रचारेण रक्षक (परमेश्वर) ११ ७ स्वामीश्वरो राजा वा ७ ३५ १० न्यायाधीश स्वामी १ ४० ५ पालको धनकोशेश ६.७५ १७ **पति**=अन्योऽन्यस्य पालकौ (दम्पती) १ ११६ ५ पालयितारौ (इन्द्रवायू=विद्युत्पवनौ) १.२३ ३ **पते!**=स्वामिन्नीश्वर १ १८ १ पालक सेनेश ५ ३५.५ **पतेः**=पत्यु प्र०—अत्र 'षष्ठीयुक्तश्छन्दसि वा' इति पतिशब्दस्य घिसञ्ज्ञा २ २४ १४ **पत्युः**=उसी नियुक्त पति का स० वि० १५२, १० १८ ८ **पत्ये**=पति की प्रसन्नता के लिए स० वि० १४१, अथर्व० ३ ३० २. स्वस्वामिने १ १२४ ७ [पति =पा रक्षणे (अदा०) धातो 'पातेर्डति' उ० ४ ५७ सूत्रेण डति प्रत्यय । पाति रक्षतीति पति । पत्लृ गतौ (भ्वा०) धातोर्वा औणादिक इन्प्रत्यय]

पतयिष्णु गमनशीलम् (यानम्) १ १६३ ११. पतनशीलम् (भा०—अनित्य शरीरम्) २६ २२ [पत्लृ गतौ (भ्वा०) धातोर्णिजन्ताण् 'णेश्छन्दसि' अ० ३.२ १२७. सूत्रेण ताच्छील्ये इष्णुच्-प्रत्यय]

पतरम् पतन्तम् (अग्निम्) २ २ ४ [पत्लृ गतौ (भ्वा०) धातोर्बाहु० औणादिकोऽर प्रत्यय]

पतरोरिव गन्तुरिव (अर्णवस्येव) १.१८२ ७ [पतरु-इवपदयो समास । पतरु =पत्लृ गतौ (भ्वा०) धातोर्बाहु० अरु प्रत्यय]

पतालि पतेत् ७ २५ १ [पत्लृ गतौ (भ्वा०) धातोर्लेट्]

पतिजुष्टा पति की सेवा मे तत्पर पतिव्रता नारी आर्याभि० १ ४६, ऋ० १ ५ १६ ३ [पति-जुष्टपदयो समास । जुष्टम्=जुषी प्रीतिसेवनयोः (तुदा०) धातोः क्त । ईदित्त्वादनिट्त्वम्]

पतिजुष्टेव पतिर्जुष्ट प्रीत सेवितो यया तद्वत् १ ७३ ३ [पतिजुष्टा-इवपदयो समास]

पतित्वम् पालकभावम् १ ११६ ५ [पतिप्राति० भावे त्व प्रत्यय]

पतिरिपः पत्युर्भूमि, प्रा०—रिप इति पृथिवीनाम निघ० १ १, ४ ५ ५ [पति-रिपपदयो समास । रिप इति पृथिवीनाम निघ० १ १]

पतिलोकम् पतिसुखम् ऋ० भू० २११, अथर्व० १८ ३ १ १ पति के घर वा सुख को स० वि० १३४, १० ८५ ४३ [पति-लोकपदयो समास]

पतिवेदनम् पाति रक्षति स पति, पतेर्वेदन प्रापण ज्ञान वा यस्मात्तम् (त्र्यम्बक=सर्वाध्यक्ष रुद्रम्) ३ ६० [पति-वेदनपदयो. समास । वेदनम्=विद्लृ लाभे (तुदा०)

(आप्तैर्मनुष्यै)१७ ६२ प्रशमितैर्व्यवहर्त्तृभि (विद्वन्मनुष्यै) ४ ५,८ ४ पणयो व्यवहारा स्तुतयश्च ताभि २ १७ **पणिम्**=व्यवहारम् १ ६३ ४ प्रशसनीयम् (वेदज्ञानम्) ६ ६१ १ व्यवहर्त्तारम् (स्तेन-जनम्) ६ ५.१ १४ **पणि:**=प्रशमित (विद्वान् जन) ५ ६१ ८ सत्य-व्यवहार १ ३३ ३ व्यवहर्त्ता (जन) १ १८० ७ **पणीन्**=प्रशस्तव्यवहारकर्त्रीन् (अध्येतॄनुपदेष्टॄश्च) १ १८४ २ प्रशमनीयान् व्यवहारान् ६ ३६ २ व्यवहर्तॄन् (विद्यार्थिन) ७ १६ ६ प्रशमिनान् (सज्जनान्) ६ ३३ २ **पणीनाम्**=द्यूतादिव्यवहार-कर्त्तॄणाम् (कितवानाम्) ६.५३.५ प्रशमिताना व्यवहर्तॄणाम् (व्यापारिकाना जनानाम्) ६ ४५ ३१ स्तुत्यव्यवहारकर्त्तॄणाम् (प्रजाजनानाम्) ७ ६ २ व्यवहारनिष्ठाना प्रशसनीयाना नृणाम् २ २४.६ **पणे**=स्तूयमानस्य (प्रजाजनस्य) ५ ३४ ७ स्तुत्यव्यवहारस्य १ ८३ ४. प्रशमितव्यवहारकर्त्तु (सत्पुरुषस्य) ६ ५३ ६ द्यूतकर्त्तु (पाखण्डिजनस्य) ६ ५३ ३ व्यवहारस्य ३ ५८.२ सदसद्व्यवहर्त्तु (जनस्य)१ १८२ ३ [पण व्यवहारे स्तुतौ च (भ्वा०) धातोरौणादिक इन् । पणि पणनात् नि० २ १७. पणीन्=वणिज नि० ६ २७]

पणिनेव गोपालेन वणिग्जनेनेव १ ३२ ११ [पणिना-इवपदयो समास । पणिरिति व्याख्यातम्]

पण्यमानः स्तूयमान (मित्र =सुहृज्जन) ८ ५५ [पण व्यवहारे स्तुतौ च (भ्वा०) धातो कर्मणि शानच्]

पत गृहाण १२ ४. प्रपातय १२ ८७ पतति गच्छति प्र०—अत्र व्यत्ययो लडर्थे लोट् च ३ ४६ गच्छ ४ ३४. **पतत्**=पतति ४ २७ ४ पतति गच्छति प्राप्नोति वा ३ ३६ ३ **पतथ**=अद्य आगच्छत १ १६८ ६ **पतथ.**= गच्छथ १ १८३ १ **पतन्ति**=पतन्तु गच्छन्तु, प्र०—लोडर्थे लट् १ २५ ४. उपरिष्टादध पतन्ति १ ७६ २ प्राप्नुवन्ति १ १६४ ४७ श्येनवच्छत्रुदले सञ्चरन्ति १३ १० **पतसि**=गच्छसि २ १६ ३ **पतात्**=गच्छेत् १ ४६ ३ **पतामि**=प्राप्नोमि १ ३३ २ [पत्लृ गतौ (भ्वा०) धातोर्लोटि लटि च रूपाणि]

पतङ्गम् य प्रतिपात गच्छति तम् (अग्नि=अश्वम्) १ १६३ ६ सूर्यं प्रति २६ १७ **पतङ्गान्**=अश्वान्, प्र०—पतङ्गा इत्यश्वनाम, निघ० १ १४, १३ १०. अग्निकणा इव वर्त्तमानानश्वान् ४ ४ २ **पतङ्गाय**=पतति गच्छतीति पतङ्गस्तस्मा सम्मै, भा०—पतन-पातनादिगुणप्रकाशिताय, भा०—तद्गुणप्रकाशाय ३ ८ **पतङ्गा.**=सूर्य इव देदीप्यमाना (आशव =अश्वा) १ १६८ ४ **पतङ्गै:**=अश्ववद् वेगिभि रथै १ १६६ ४ प्रतिपात वेगेन गन्तृभि (नर्यै) ऋ० भू० १६०, ऋ० १ ८८ ४ [पतङ्गा अश्वनाम निघ० १ १४ पत्लृ गतौ (भ्वा०) धातो 'पतेरङ्गच् पक्षिणि' उ० १ ११६ सूत्रेणाङ्गच्-प्रत्यय । बहुलवचनात् पक्षिणोऽन्यत्रापि । पतङ्ग =पततीव ह्येत्वङ्गेत्येति रश्मयुरीग्ने । पतङ्ग इत्याचक्षते जै० उ० ३ ३५ २ प्राणो वै पतङ्ग कौ० ८ ४]

पतङ्गर: य पतङ्गेऽग्नौ रमते, पतङ्ग ददाति वा स (राजा) ४ ४० २ [पतङ्गोपपदे रमु क्रीडायाम् (भ्वा०) धातो, रा दाने (अदा०) धातोर्वा ड प्रत्यय]

पततः पतनशीलस्य (मनुष्यस्य) ६ ४ ५ **पतताम्**= गच्छताम् (वीना=विमानाना सर्वलोकाना पक्षिणा वा) १ २५ ७ [पत्लृ गतौ (भ्वा०) धातो शतृप्रत्यय]

पतत्रि पतनशीलम्, भा०—सद्यो गमयितारम् (शिर =विमानम्) २६ १७ [पत्लृ गतौ (भ्वा०) धातो 'पतेरत्रिन्' उ० ४ ६६ सूत्रेणात्रिन् प्रत्यय]

पतत्रिणम् पतत्र. शीघ्र गन्तु बहुवेगो यस्यास्ति त (पक्षिणम्) १६ १० **पतत्रिण:**=पक्षिण १ ५८ ५ शत्रव पक्षिणो वा १ ६४ ११ पतनशीला (वय = पक्षिण) प्र०—अत्र 'पतेरत्रिन्' उ० ४ ६६ अनेनाऽय सिद्ध १ ४६ ३ **पतत्रिणौ**=पतत्राण्यूर्ध्वगमनानि सन्ति ययोस्तौ (पक्षौ=परिग्रहौ कार्यकारणरूपौ) १८ ५२ **पतत्रिभि:**=गमनशीलै (पक्षिभि) ६ ६२ ६ [पत्लृ गतौ (भ्वा०) धातो 'पतेरत्रिन्' उ० ४ ६६ सूत्रेणात्रिन् प्रत्यय । अथवा पत् धातो 'अमिनक्षि०' उ० ३ १०५ सूत्रेणात्रन्-प्रत्यय । ततो मत्वर्थ इनि]

पतत्रिणी पतितु विनाशयितु कुशिके १ १५८ ४ **पतत्रिणी:**=पतितु गन्तु शीला (सीरा =नदी) १२ ८३ [पतत्रिन् इति पूर्वपदे व्याख्यातम् । तत स्त्रिया 'ऋन्नेभ्यो ङीप्' इति ङीप्]

पतत्रैः गमनशीलै परमाण्वादिभि , भा०—अतिसूक्ष्मै कारणै १७ १६ पात होने वाले (गुरुत्व-द्रुत्व गुणों से) आर्याभि० २ ३८, १७ ६ [पत्लृ गतौ (भ्वा०) धातो 'अमिनक्षि०' उ० ३ १०५ सूत्रेणात्रन्-प्रत्यय]

पतन्ती गच्छन्ती (हरित =हरितवर्णा किरणा) ५ २६ ५ [पत्लृ गतौ (भ्वा०) धातो शत्रन्तात् ङीप् स्त्रियाम्]

पतयत् पतिरिवाऽऽचरति इति तत् (कवि.—विद्वान्) ५ ४५ ६. यत् पति करोतीति पतित्वसम्पादक तत् (विज्ञाना-

पत्यमाना: पतिरिवाऽऽचरन्ती (दिव =ज्योतीषि) ३ ५६ ५ प्राप्नुवन्त्य (स्त्रिय) ६ ६५ ३. [पतिपदादाचारेऽर्थे क्यङ् प्रत्ययान्ताच्छानच् । तत स्त्रिया टाप्]

पत्रम् पक्ष १९ ८६ [पत्लृ गतौ (भ्वा०) धातो 'दाम्नीशसयुयुज०' अ० ३ २ १८२ सूत्रेण करणे ष्ट्रन्-प्रत्यय]

पत्वभि: गमनै ५ ६ ७ **पत्वा**=पतति गच्छतीति स (अग्नि =विदुपो सुसन्तान) ११ ४६ योऽध पतति स. (अग्नि =सूर्यरूप) २२ १६ [पत्लृ गतौ (भ्वा०) धातो 'अन्येभ्योऽपि दृश्यन्ते' इति वनिप्]

पत्सुत:शी: य पादेषु अध शेते स (वृत्र =मेघ) प्र०—अत्र सप्तम्यन्तान् पादशब्दात् 'इतराभ्योऽपि दृश्यन्ते' अ० ५ ३ १४ इति तसिल् 'वाच्छन्दसि' इति विभक्त्यलुक्, शीङ्धातो क्विप् च १ ३२ ८

पथस्पथ: मार्गस्य मार्गस्य ३४ ४२ मार्गान् मार्गान् ६ ४६ ८ [पथ पदस्य वीप्साया द्वित्वम्]

पथ: धर्म-राज-प्रजा-मार्गात् १ ४२ २ मार्गान् २७ १२ उत्तममार्गान् १ ६०.४ **पथा**=उत्तममार्गेण ११०५ १८ गृहाश्रममार्गेण ५ ४७ ६ **पथाम्**=मार्गाणाम् ६ १४ **पथि**=व्यवहार-मार्ग मे आर्याभि० २ १८, ५ ३३ मार्गे ५ ३३ **पथिभि:**=सुमार्गै ६ ४८ ज्ञान-मार्गै, भा०—सर्वधर्म्यमार्गै. ३७ १७ **पन्था:**=देवप्रतिपादितो मार्ग ११०५ १६ मुक्ति का मार्ग आर्याभि० २ ८, ३१ १८ मार्गा, प्र०—अत्र वचनव्यत्ययेनैकवचनम् ३४ २७ धर्ममार्गा, प्र०—अत्र 'सुपा सुलुक्०' इति जस स्थाने सु १ ३५ ११ [पत्लृ गतौ (भ्वा०) धातो: 'पत स्थ च' उ० ४ १२ सूत्रेण इनि प्रत्यय । थकारान्तादेशश्च]

पथिकृत् सकलसुकृन्मार्ग-प्रचारक (बृहस्पति =परमेश्वरो) विद्वज्जनो वा २ २३ ६ य पन्थान करोति (इन्द्र =विद्वज्जन) ६ २१ १२ [पथिन्-उपपदे डुकृञ् करणे (तना०) धातो कर्त्तरि क्विप् । 'ह्रस्वस्य पिति कृति तुग्' इति तुगागम]

पथिरक्षय: ये पथिषु विचरता जनाना रक्षयो रक्षका (भा०—राजजना) १६ ६० [पथिन्-रक्षिपदयो समास । रक्षि=रक्ष पालने (भ्वा०) धातोरौणादिक इन्प्रत्यय]

पथीनाम् मार्गाणाम् ५ १ ११ मार्गे गन्तॄणाम्, भा०—गन्तुकानाम् (जनानाम्) २२ ३३ [पथिन्-प्राति० षष्ठ्या बहुवचने रूपम्]

पथेव पथा मार्गेणेव ११३६ ४ [पथिन्-इवपदयो समास । समासे विभक्तेरलुक् च]

पथेष्ठाम् यो धर्मे पथि तिष्ठति तम् (जनम्) ५ ५० ३ [पथोपपदे ष्ठा गति निवृत्तौ (भ्वा०) धातो' कर्त्तरि क्विप् । पथ =पथे गतौ (भ्वा०) धातो पचाद्यच्-प्रत्यय]

पथ्या पथोऽनपेता (स्त्री) ३ ५४ ५ स्वकक्षा विहायाऽन्यत्रागन्त्री (रात्रि) ३ ५५ १५ पथिषु साध्या (नीति) ७ १८ ३ **पथ्या:**=पथि साध्वीर्वीथी) ३ १२ ७ पथे हिता (वर्षा) ५ ५४ ६ पथि साधव (राय =श्रिय.) ६ १६ ५ पथिषु साध्वीर्गती ६ ६६ ७ या धर्मपथ्यानमर्हन्ति ता (प्रजा) ७.७ २ **पथ्याम्**=पथि साध्वी गतिम् ७ ४४ ५ धर्ममार्गम्, ऋ० भू० २०२, ऋ० ८ १ २३ ७. [पथिन्-प्राति० 'धर्मपथ्यर्थन्यायादनपेते' अ० ४ ४ ६२ सूत्रेणानपेतेऽर्थे यत् । तत. स्त्रिया टाप् । अथवा साध्वर्थे हितार्थे वा यत्]

पथ्याय पथि भवाय गन्तुकाय १६ ३७ **पथ्ये**=पथोऽनपेते कर्मणि ५ ५१ १४ [पथिन्-प्राति० भवार्थे यत् । अथवा अनपेतेऽर्थे पथिन्प्राति० यत्]

पथ्येव यथा पथि साध्वी गति , भा०—यथा धर्ममार्ग ११ ५ [पथ्या-इवपदयो समास । पथ्येति व्याख्यातम्]

पत्सु पादेषु ६ ८ **पद:**=प्राप्तव्यान् (चतुर =धर्मार्थकाममोक्षान्) २३ २० पदान् ११४६ २ **पदा**=पादेन ११३३ २ पदार्थप्राप्त्यो १ ८४ ८ प्रापकेण गमन-रूपेण ११६४ १७ पादाक्रमणेन १ ४२ ४ **पदि**=पद्यते जानाति प्राप्नोति येन व्यवहारेण तस्मिन्, प्र०—अत्र कृतो बहुलम्०' इति करणे क्विप् ४ १६ प्राप्तव्ये विज्ञाने ४ १२ ६ **पद्भ्याम्**=सेवा-निरभिमानाभ्याम् ३१ ११ पृथिवी-कारणसामर्थ्यात् ३१ १३ जो पग अर्थात् नीच अग के सदृश मूर्खत्वादि गुणो से स० प्र० ११४, ३१ ११ [पाद =पद गतौ (दिवा०) 'धातो पदरुजविशस्पृशो घञ्' इति घञ् । पादप्राति० शस्प्रभृतिषु परेषु 'पद्दन्नोमास्०' इत्यादिना पदादेश । पदा=पादेन नि० ५ १८]

पदज्ञा: ये पदानि प्राप्तव्यानि धर्मार्थकाम-मोक्षाख्यानि साधितु साधयितु वा जानन्ति ते (अङ्गिरस =प्राणविद्याविदो जना) १ ६२ २ ये पद प्राप्तव्य जानन्ति ते (पितर =विद्वासो जनका) ३ ५५ २ ये पद ज्ञातव्य प्रापणीयमात्मस्वरूप जानन्ति ते (पितर =ज्ञानिनो जना) ३४ १७ [पदोपपदे ज्ञा अवबोधने (क्र्या०) धातो क. प्रत्यय]

विद ज्ञाने (अदा०) धातोर्वा ल्युट्]

पतेम गच्छेम १८ ५२ [पत्लृ गतौ (भ्वा०) धातोर्लिङ्]

पत्तवे पत्तु प्राप्तुम् ४ १८ १ [पत्लृ गतौ (भ्वा०) धातोस्तुमर्थे तवेन्-प्रत्यय]

पत्तीनाम् नेनाऽङ्गानाम् १६ १६ [पद गतौ (दिवा०) धातो 'पदिप्रथिभ्या नित्' उ० ४ १८३. सूत्रेण नि प्रत्यय]

पत्नी स्त्री १६ ६४ भार्या म० वि० १२१, अथर्व० १४ १ ५१ पत्नीवद्वर्त्तमाना (उपा =प्रभातवेला) ३ ६१ ४ **पत्नीभिः**=स्वस्वस्त्रीभि १५ ५०. **पत्नीभ्यः**=भार्याभ्य २४ ५ पालिकाभ्य. क्रियाभ्य २४ ६ स्त्रीभ्य. २४ २४ **पत्नीम्**=स्त्रीवद् वर्त्तमानाम् (मही=भूमिम्) २१ ५ **पत्नीः**=यज्ञसम्वन्धिनी स्त्रिय १ १४० ६ द्रव्याणा शक्तय, प्र०—पत्युर्नो यज्ञसयोगे, अ० ४ १ ३३. अनेन ङीप् प्रत्ययो नकारादेशश्च। इय वै पृथिव्यदिति सेय देवाना पत्नी शत० ५ २ ५ ४ 'देवाना पत्न्य उशत्योऽवन्तु न प्रावन्तु न स्तुतयेऽपत्यजननाय चाऽन्न संसननाय च या पार्थिवासो या अपामपि व्रते कर्मणि ता नो देव्य सुहवा शर्म यच्छन्तु शरणम्। अपि च ग्ना व्यन्तु देवपत्न्य इन्द्राणीन्द्रस्य पत्न्य ग्नाय्यग्ने पत्न्यश्विन्यश्विनो पत्नी राड्राजते रोदसी रुद्रस्य पत्नी वरुणानी च वरुणस्य पत्नी व्यन्तु देव्य कामयन्ता च ऋतु कालो जायाना य ऋतुकालो जायानाम् नि० १२ ४६ देवाना विदुषा पालनयोग्याऽन्यादीना स्थित्यर्थेय पृथिवी वर्त्तते तस्माद् देवपत्नीत्युच्यते। यस्मिन् यस्मिन् द्रव्ये या या शक्तय सन्ति तास्तास्तेषा द्रव्याणा पत्न्य इवेत्युच्यन्ते १ २२ ६ स्त्री ११ ६१ भार्या युवतय १ ६२ ११ पत्न्य १ १०३ ७ दारान् १ १८६ ७ **पत्न्यः**=स्त्रिय २३ ३६ **पत्न्या**=युद्धादौ सगमनीये यज्ञे सयुक्तया स्त्रिया १ ८२ ६ **पत्न्यौ**=स्त्रीवद्वर्त्तमाने (अहोरात्रे) ३१ २२ [पतिप्राति० स्त्रियाम् 'पत्युर्नो यज्ञसयोगे' अ० ४ १ ३३ सूत्रेण ङीप् नकारान्तादेशश्च। श्रियै वा एतद्रूप यत् पत्न्य श० १३ २ ६ ७ गार्हपत्यभाजो वै पत्न्य कौ० ३ ६. अर्धो अर्द्धो वा एष आत्मन, यत्पत्नी तै० ३ ३ ५ जघनार्धो वा ऽएष यज्ञस्य यत्पत्नी श० १ ३ १ १२ पूर्वार्धो वै यज्ञस्याध्वर्युर्जघनार्ध पत्नी श० १ ६ २ ३ पत्नी धाय्या गो० उ० ३.३१ पत्नी स्थाली तै० २ १ ३ १ पत्नी भाजन वै नेष्टा ऐ० ६ ३ गो० उ० ४ ५ अन्तभाजो वै पत्न्य कौ० १६ ७ अर्धात्मा वा एष यजमानस्य यत् पत्नी जै० १ ८६ गृहा वै पत्न्यै प्रतिष्ठा श० ३ ३ १ १० पत्नी हि सर्वस्य मित्रम् तै० स० ६ २ ६ २ श्रद्धा पत्नी तै० आ० १० ६४ १ यद्वै पत्नी यज्ञे करोति तत् मिथुनम् तै० स० ६ २ १ १]

पत्नीवतः प्रशस्ता पत्नयो विद्यन्ते येषा तानस्मान् (सुगृहस्थान् जनान्) प्र०—अत्र प्रशसार्थे मतुप् १ १४ ७ प्रशस्ता यज्ञसम्वन्धिनी जाया यस्य तस्य (बृहस्पतिसुतस्य=गृहपत्यु पुत्रस्य) ८ ६ **पत्नीवद्भिः**=वहूच. पत्न्यो विद्यन्ते येषु तै (वरुथै =उत्तमैर्गृहे) ४ ५६ ४ **पत्नीवन्**!=प्रशस्ता यज्ञसम्वन्धिनी पत्नी यस्य तत्सम्बुद्धौ। (गृहपते) ८ १० **पत्नीवन्तः**=प्रशस्ता विद्यायुक्ता यज्ञसम्वन्धिन्य स्त्रियो विद्यन्ते येषान्ते (विद्वासो जना) १ ७२ ५ [पत्नीति व्याख्यातम्। तत प्रशसायामर्थे मतुप्]

पत्नीशालम् पत्न्या शाला पत्नीशालम् १६ १८ [पत्नीशाला पदयो समासे 'विभाषा सेनासुरा०' अ० २ ४ २५. सूत्रेण नपुसकत्वे ह्रस्वत्वम्]

पत्नीसंयाजान् ये पत्न्या सह समिज्यन्ते तान् (जनान्) १६ २६ [पत्नी-सयाजपदयो समास। सयाज = सम्+यज देवपूजादिषु (भ्वा०) धातोर्घञ् प्रत्यये कुत्वाभावे रूपम्]

पत्मन् धर्मात् पतनशील (दुराचारिन् पते!) हे चञ्चलचेत (दुराचारिन् पते) ८ ४८ पतन्ति यस्मिन् मार्गे तस्मिन् ५ ५ ७ पतन्ति गच्छन्ति यस्मिन् मार्गे तस्मिन् ६ ४.६ पत्मनि मार्गे ५ ४१ ३ [पत्लृ गतौ (भ्वा०) धातोर्बाहु० औणादिको मनिन्]

पत्मना उद्गमनेन ६ ३.७ [पत्मन् इति व्याख्यातम्]

पत्यते पतिं कुर्वते (विदुषे जनाय) २ ३७ २ [पतिपदाद् इच्छायामर्थे क्यजन्ताच् छतृप्रत्यय]

परिह्वयामहे सर्वत स्तुवीम १ ७ १० सर्वत स्वी-कुर्महे ५ ६४ १ [परि+हु दानादानयो (जु०) धातोर्लट् । 'बहुल छन्दसि' इति शप श्लुर्न भवति]

परिहितम् सर्वत सुखप्रदम् (ओज =बलम्) १ ११२ १० [परि+दधाते क्त । 'दधातेर्हि' इति हिरा-देश]

परिहिताः परित सर्वतो हिता हितकारिण (सर्वे मनुष्या) ऋ० भू० १०२, अथर्व० १२ ५ ३ सब के हित-कारी (स्त्रीपुरुषो !) स० वि० १४३, अथर्व० १२ ५ ३ [परिहित व्याख्यातम् । तत प्रथमाबहुवचनम्]

परिह्वृत् य परित सर्वतो ह्वरति कुटिला गति गच्छति स (दुर्जन) ६ ४ ५ [परि+ह्वृ कौटिल्ये (भ्वा०) धातो कर्त्तरि क्विप्]

परीणशे परित सर्वतो नश्यन्त्यदृश्या भवन्ति यस्मिँ-स्तस्मिन् (अहसि=पापे) प्र०—अत्र घञर्थे क प्रत्ययो 'अन्येपामपि०' इति दीर्घश्च १ ५४ १ [परि+णश अदर्शने (दिवा०) धातो 'घञर्थे कविधानम्' इति क प्रत्यय]

परीणसम् बहुविधम् (रयिं=धनम्) प्र०—परीणस इति बहुनाम निघ० ३ १, ३ २४ ५ **परीणसः**=बहून् (गृहान्) १ १३३ ७ बह्वृच (गूर्त्तय =उद्यमयुक्ता कन्या) १ ५६ २ **परीणसा**=बहुगुणया (राया=श्रिया) १ १२६ ६ बहुविधेन (राया=धनेन) ४ ३१ १२ [परी-णसा बहुनाम निघ० ३ १ अन्न वै परीणसम् जै० ३ १७४]

परीणहम् परितस्सर्वत प्रबन्धन सुखाच्छादकत्वेन व्यापन वा प्र०—'णह बन्धने' इत्यस्मात् 'क्विप् च' इति क्विप् 'नहिवृति०' अनेनाऽऽदेर्दीर्घ १ ३३ ८ [परि+णह बन्धने (दिवा०) धातो क्विप्प्रत्यये पूर्वस्य दीर्घ]

परीत्तः सर्वतो दत्त (जव =वेग) ६ ६ [परि+डुदाञ् दाने (जु०) धातो क्त । 'अच उपसर्गात्त ' इति तकारादेशे 'दस्ति' सूत्रेण दीर्घ]

परीत्य परित सर्वतोऽभिव्याप्य ३२ ११ सर्वत इत्वा प्राप्य विदित्वा च ऋ० भू० ८६, ३२ ११ व्यापक होकर स० वि० २१५, ३२ ११ एक कण भी उसके

निवृत्तौ (भ्वा०) धातोर्लुङ् । 'गातिस्था०' इति सिचो लुक्]

पर्य्यहृषत सर्वतो हरत ३५ १८ [परि+हृषु अलीके (भ्वा०) धातोर्लङ् । व्यत्ययेन श प्रत्यय]

पर्य्यागुः सर्वत आभिमुख्येन प्राप्नुवत १ ८८ ४. [परि+आङ्+इण् गतौ (अदा०) धातोर्लुङ् । 'इणो गा लुङी' ति गादेशे सिचो लुकि च रूपम्]

पर्य्यानयत् सर्वत आनयति ३ ६ ५. [परि+आङ्+णीञ् प्रापणे (भ्वा०) धातोर्लङ्]

पर्य्याभृतम् सर्वत आभिमुख्येन धृतम् (सह =बलम्) ६ ४७ २७ [परि+आङ्+डुभृञ् धारणपोषणयो (जु०) धातो क्त]

पर्य्याप सर्वत प्राप्नोति १ ७६ १ [परि+आप्लृ व्याप्तौ (स्वा०) धातोर्लिट्]

पर्य्यायन्ति सर्वत समन्तात् प्राप्नुवन्ति २ १३ २ [परि+आङ्+इण् गतौ (अदा०) धातोर्लट् । 'इणो यण्' इति यणादेश]

पर्य्यायिणीम् परित कालक्रमशाम् (स्त्रीम्) ३०.१५ [परि+इण् गतौ (अदा०) धातो ताच्छील्ये णिनि । स्त्रियां ङीप् । अथवा पर्यायप्राति० मत्वर्थ इनि । तत स्त्रियां ङीप्]

पर्य्यावर्त्तयाते सर्वत आवर्त्तयेत प्र०—लेट्-प्रथमैकवचन आडागमे णिजन्तस्य वर्त्ते प्रयोग ५ ३७ ३ [परि+आङ्+वृतु वर्त्तने (भ्वा०)+णिच्+लेट्]

पर्य्यावृतम् सर्वत आच्छादितम् (मेघम्) ६ ४७ २७ [परि+आङ्+वृञ् आवरणे (चुरा०) धातो क्त]

पर्य्यास सर्वतोऽस्यति ७ ३२ १० [परि+असु क्षेपणे (दिवा०) धातोर्लिट्]

पर्य्यासते सर्वत उपविशन्ति ३ ६ ३ [परि+आस उपवेशने (अदा०) धातोर्लट्]

पर्य्यासीत् सर्वतोऽस्ति ३२ १२ [परि+अस् भुवि (अदा०) धातोर्लङ्]

पर्य्युदगाम परित उत्कृष्टतया प्राप्नुयाम १ ५० १० सर्वत उत्कर्ष प्राप्नुयाम २७ १० [परि+उत्+गम्लृ गतौ (भ्वा०) धातोर्लुङि 'मन्त्रे घसह्वरणश०' अ० २ ४ ८० सूत्रेण लेर्लुक्]

पर्य्युद्बाधस्व सर्वतोऽपि निवर्त्तय ४ २८ [परि+उत्+बाधृ विलोडने (भ्वा०) धातोर्लोट्]

पर्य्युपस्थात् सर्वत समीप तिष्ठेत् १.६८.१. [परि+उप+ष्ठा गतिनिवृत्तौ (भ्वा०) धातोर्लुङ् । अडभाव सिचो लुक् च]

पर्य्यूढाः परित सर्वत ऊढा प्राप्यन्त. (सर्वे मनुष्या) ऋ० भू० १०२, अथर्व० १२ ५ ३ सब ओर से सदा सत्याचरण प्राप्त कराने वाले (स्त्री-पुरुषो !) स० वि० १४३, अथर्व० १२ ५ ३. [परि+वह प्रापणे (भ्वा०) धातो क्त]

पर्य्यूर्णोतु सर्वत ऊर्णोत्वाच्छादयतु, स्वीकरोतु १ ६८ १. [परि+ऊर्णुञ् आच्छादने (अदा०) धातोर्लोट् । आडभावश्छान्दस.]

पर्य्यूवुः परित सर्वतस्तन्तुवद् विस्तारयेयु १.६१.८. [परि+वेञ् तन्तुसन्ताने (भ्वा०) धातोर्लिट्]

पर्य्यूहामि परितो वितर्कतया तर्कयामि ६ ३ सर्वतो वितर्कयामि ५ २३ सर्वतस्तर्केण निश्चिनोमि ५ २५ [परि+ऊह वितर्के (भ्वा०) धातोर्लट् । व्यत्ययेन परस्मैपदम्]

पर्य्येता वर्जिता (जन) ७ ४०.३ सर्वत प्राप्त (इन्द्र=राजा) ६ २४ ५ सर्वतोऽनुग्रहीता (सहनशीलो विद्वान्) १ २७ ८ [परि+इण् गतौ (अदा०) धातो कर्त्तरि तृच् प्रत्यय]

पर्य्येति परित प्राप्नोति ६ ७५ १४ पर्य्यायेण प्राप्नोति १ ६५ ६ सर्वत प्राप्नोति गच्छति वा ६ ४८ २१ **पर्य्येमि**=भा०—सर्वतोऽनन्तस्वरूपेण पूर्णोऽस्मि, सर्वत प्राप्तोऽस्मि २३ ५० **पर्य्येषि** =तूने अपनी व्याप्ति से व्याप्त कर रखा है स० प्र० ४२३, ६ ८३ १ [परि+इण् गतौ (अदा०) धातोर्लट् । पर्येति =परिखिद्यति नि० ६.१५]

पर्व पालनम् २३ ४० पालनम् (राजानम्) ४ १९ ६ अङ्गमङ्गम् १ ६१ १२ **पर्वभिः**=पूर्णै साधनाङ्गै (नमोभि =अन्नै) १ ३ ४३ **पर्वाणि**=पूर्णानि पालनानि ४ २२ २ [पॄ पालनपूरणयो (जु०) धातो 'स्नामदिपद्यर्ति-पॄशकिभ्यो वनिप्' उ० ४ ११३ सूत्रेण वनिप् । पर्व पुन पृणाते प्रीणातेर्वा, अर्धमासपर्व, देवानस्मिन् प्रीणन्तीति । तत् प्रकृतीतरत् सन्धिसामान्यात् नि० १ २०]

पर्वणा पर्वणा पूर्णेन पूर्णेन साधनेन प्र०—अत्र 'नित्यवीप्सयो ' इति द्विर्वचनम् १ ६४ ४ [पर्वन् इति व्याख्यातम् । पर्वणा पदस्य वीप्सायां द्वित्वम्]

पर्वतच्युतः ये पर्वतान् मेघान् च्यावयन्ति ते (मरुत=मानवा) ५ ५४ ३ **पर्वतच्युते**=पर्वतान्मेघांश्च्युतो य पर्वत मेघ च्यावयति वा तस्मै (विदुषे शिल्पिने) ५ ५४ १

क प्रत्यय । पर्णमिति व्याख्यास्यते]

पर्णम् पत्रम् ४ २७ ४ पक्षम् १ ११६ १५ प्रजा-पालनम् ४ ४० ३ **पर्णाय**=य प्रतिपालयति तस्मै (पुरुषाय) १६ ४६ **पर्णे**=पर्णवच्चञ्चले जीवने भा०—क्षणभङ्गुरे जीवने ३५ ४ चलिते पत्रे १२ ७९ **पर्णैः**=पक्षै ११८३ १ [पृ पालनपूरणयो' (जु०) धातो 'धापॄवस्यज्यतिभ्यो न' उ० ३ ६ सूत्रेण न प्रत्यय । गायत्री वै पर्ण तै० ३ २ ११ सोमो वै पर्ण श० ६ ५ ५ १ ब्रह्म वै पर्ण तै० १ ७ १९ ३. राष्ट्र वै पर्ण श० ६ ५ १ १]

पर्णयम् पर्णानि परस्वानि वस्तूनि याति प्राप्नोति त चौरम् १ ५३ ८ [पर्णोपपदे या प्रापणे (अदा०) धातो कर्त्तरि क प्रत्यय]

पर्णशदाय य पर्णानि शीयते छिनत्ति तस्मै (पुरुषाय) १६ ४६ [पर्णोपपदे शद्लृ शातने (भ्वा०) धातोर्मूल-विभुजादित्वात् क कर्त्तरि]

पर्णा पर्णानि ११८२ ७ [पर्णप्राति० नपुसके जस शेर्लोपश्छन्दसि । पर्णमिति व्याख्यातम्]

पर्णिनः पक्षिण ६ ४६ ११ [पर्णप्राति० मत्वर्थे इनि प्रत्यय]

पर्तृभिः पालकै (शुभगुणै) ६ ४८ १० [पृ पालन-पूरणयो (जु०) धातो कर्त्तरि तृच्]

पर्यक्रमीत् परिक्राम्यति ४ १५ ३ [परि+क्रमु पादविक्षेपे (भ्वा०) धातोर्लुङ्]

पर्यगात् परित सर्वतोऽगाद् व्याप्तवानस्ति प० वि० सब मे व्यापक है स० प्र० २४४, ४० ८ सर्वतो व्याप्तो-ऽस्ति ४० ८ आकाश के समान सब जगह मे परिपूर्ण (व्यापक ईश्वर), आर्याभि० २ २, ४० ८ [परि+इण् गतौ (अदा०) धातोर्लुङ् । 'इणो गा लुङि' सूत्रेण गादेशे सिचो लोपे च रूपम्]

पर्यगृभ्णा. सर्वतो गृहाण ५ ३१ ७ [परि+ग्रह उपादाने (क्र्या०) धातो लङ् सामान्यकाले]

पर्यतिष्ठत् सर्वत आवृत्य स्थित १ ३२ ८ [परि+ष्ठा गतिनिवृत्तौ (भ्वा०) धातोर्लङ् । शिति धातोस् तिष्ठा-देश]

पर्यदधास्थाः सर्वतो दधासि दधाति वा प्र०—अत्र लडर्थे लङ् पक्षे व्यत्ययश्च २ १७ [परि+डुधाञ् धारण-पोषणयो (जु०) धातोर्लङ्]

पर्यनुवाति सर्वतोऽनुगच्छति ९ १५. [परि+अनु+वा गतिगन्धनयो (अदा०) धातोर्लट्]

पर्यनेषत सर्वतोऽनेपत ३५ १८ [परि+णीञ् प्रापणे (भ्वा०) धातोर्लङ् । 'व्यत्ययो बहुलम्' इति द्विविकरणता (शप् सिप् च)]

पर्यपश्यत् सर्वत पश्येत् ३ २६ ८ सर्वत पश्यति ३२ १२ **पर्यपश्यन्**=सर्वत पश्येयु ११६८ ९ **पर्य-पश्यन्त**=परित पश्यन्ति ११४६ ४ [परि+दृशिर् प्रेक्षणे (भ्वा०) धातोर्लङ् । 'पर्यपश्यन्त' प्रयोगे व्यत्ययेना-त्मनेपदम्]

पर्यभवत् सर्वतो भवति ३२ १२ **पर्यभूवन्**=परित-स्सर्वेनस्तिरस्कुर्वन्ति १ ३३ १० [परि+भू सत्तायाम् (भ्वा०) धातो सामान्ये लङ्]

पर्यभूषत् सर्वतो भूषत्यलङ्करोति २ १२ १ [परि+भूष अलकारे (भ्वा०) धातोर्लङ् । पर्यभूषत्=पर्यगृह्णात् पर्यरक्षद् अत्यक्रामदिति वा नि० १० १०]

पर्यभूषयन् सर्वतो भूषयेयु, भा०—सर्वत सुभूषिता भवन्ति ३३ २२ [परि+भूष अलङ्कारे (चुरा०) धातोर्लङ्]

पर्यमथ्नात् सर्वतो मथ्नाति १ ९३ ६ [परि+मन्थ विलोडने (क्र्या०) धातोर्लङ्]

पर्ययच्छत् सर्वतो यच्छेत् १ ६१ ११ [परि+यमु उपरमे (भ्वा०) धातोर्लङ् । 'इषुगमियमा छ' इति सूत्रेण छकारादेश]

पर्यवदन् सर्वत उपदिशन्तु भा०—विद्या प्रदद्यु १२ ९१ [परि+वद व्यक्ताया वाचि (भ्वा०) धातोर्लङ्]

पर्यवसृष्टा सर्वत शत्रुप्रेरिता (दिद्युत्=न्यायदीप्ति) ७ ४६ ३ [परि+अव+सृज विसर्गे (तुदा०) धातो क्त । तत स्त्रिया टाप्]

पर्यवृञ्जन् परिवृञ्जन्ति ३ ५६ ४ [परि+वृजी वर्जने (रुधा०) धातोर्लङ्]

पर्यश्नोतु सर्वतोऽश्नुताम्, व्याप्नोतु अ०—सर्वत प्राप्नोतु प्र०—अत्र व्यत्ययेन परस्मैपदम् ३ ३६ **पर्य-श्याम**=सर्वत प्राप्नुयाम ३ ११ ८ [परि+अशूङ् व्याप्तौ सघाते च (भ्वा०) धातोर्लोट् । व्यत्ययेन परस्मैपदम् । 'पर्यश्याम' प्रयोगे लिङ् । परस्मैपद तु व्यत्ययेनैव]

पर्यषस्वजत् परिष्वजति ११८२ ७ [परि+ष्वञ्ज परिष्वङ्गे (भ्वा०) धातोर्णिजन्ताल् लुङ्]

पर्यसर्पत् परित सर्वतो विजानीत ११६१ १२ [परि+सृप्लृ गतौ (भ्वा०) धातोर्लङ्]

पर्यस्थात् सर्वतस्तिष्ठेत् ४ ६ ४ [परि+ष्ठा गति-

[पर्वतोपपदे च्युङ् गतौ (भ्वा०) धातो कर्त्तरि क्विप्। पर्वतमिति व्याख्यास्यते]

पर्वतम् पर्वताकार मेघम् ५ ३२ १ पर्वतमिवोच्छ्रितम् (अश्मान=मेघम्) ४ ५६ ४ मेघाश्रित जलमिव पर्वताश्रित शत्रुम् १ ५७ ६ **पर्वतस्य**=प्र०—पर्वत इति मेघनाम निघ १ १०, १० १६ शैलस्य ५ ३६ २ **पर्वतः**=पर्वताऽऽकारो घनसमूहवान् मेघ १ ५४ १० पक्षीव पर्ववान् मेघ ५ ४५ ३ **पर्वतान्**=मेघान् शैलान् वा ५ ४६ ३ शैलानिवोच्छ्रितान् मेघान् ३ २६ ४ **पर्वताः**=जलप्रदा मेघा ५ ४१ ६ ह्रस्वा महान्त शैला १८ १३ **पर्वते**= गिरौ मेघे वा १ ५७ २ पर्वताकारे (अश्मन्=अश्मनि मेघे) १७ १ **पर्वतेन**=ज्ञानेन ब्रह्मचर्यादिना वा ३५ १५ **पर्वतेभिः**=मेघै सह ४ ३४ ८ **पर्वतेभ्यः**=गिरिभ्य ३० १६ **पर्वतेषु**=अभ्रेषु २ १२ ११ शैलेषु मेघावयवेषु वा १ ८४ १४ [पर्व पूरणे (भ्वा०) धातो 'भृमृदृशियजिपर्वि०' उ० ३ ११० सूत्रेणातच्प्रत्यय । पर्वत इति मेघनाम निघ० १ १० पर्ववान् पर्वत पर्व पुन पृणाते प्रीणातेर्वा नि० १ २० पर्वतम्=मेघम् नि० १० ६ 'तप् पर्वमरुद्भ्या वक्तव्य' इति पर्वन्प्राति० मत्वर्थे तप्]

पर्वता इव यथा मेघा शैला वा धर्त्तार सन्ति तथैव मूर्त्तद्रव्यधर्त्तार (रुद्रा=वायव) १ ६४.३ [पर्वता इव पदयो समास]

पर्वतासः मेघा ६ ५२ १ शैला ६ ५२ ४ पर्वताकारा मेघा ३ ३० ३ पर्वाण्युत्सवा विद्यन्ते येषान्ते (राजजना) ३३ ५० प्र०—अत्र 'पर्वमरुद्भ्या तप्' इति तप्प्रत्यय शैला इवोच्छ्रिता मेघा ४ १७ २ [पर्वत इति व्याख्यातम् । ततो जसोऽसुगागम । विष्णु पर्वताना (अधिपति) तै० स० ३ ४ ५ १]

पर्वती पर्वण=पर बहुज्ञान विद्यतेऽस्या क्रियाया सा पर्वती (धिषणा=धारणावती द्यौ), प्र०—अत्र सम्पदादित्वात् क्विप्, भूम्नि मतुप् 'उगितश्च' इति ङीप्। प प्रशस्त प्रापण यस्या सा (धिषणा=वाग्, वेदवाणी, बुद्धि), अ०—ब्रह्मज्ञानवती धिषणा प्र०—अत्र प्रशसार्थे मतुप् १ १६

पर्वतेष्ठाम् पर्वते मेघे स्थिता विद्युतमिव शुद्धस्वरूपम् (परमात्मानम) ६ २२ २ [पर्वतोपपदे ष्ठा गतिनिवृत्तौ (भ्वा०) धातो क्विप्। सप्तम्या अलुक्]

पर्वशः सन्धित (भा०—शरीराऽवयवान्) २३ ४२ अङ्गमङ्गम् १ ५७ ६ [पर्वन्प्राति० वीप्साया शस्-प्रत्यय । पर्वन् इति व्याख्यातम्]

पर्शवः परानन्यान् शृणन्ति हिंसन्ति ते पर्शव पार्श्वस्था मनुष्यादय प्राणिन १ १०५ ८ [परोपपदे शॄ हिंसायाम् (क्र्या०) धातो 'आङ्परयो शमिशॄभ्या डिच्च' उ० १ ३३ सूत्रेण कु प्रत्यय । पर्शु स्पृशते नि० ४ ३ पर्शवो बृहत्य श० ८ ६ २ १० पर्शव (बहुवचने) परशव उ ह वै पङ्क्तय कौ० १० ४]

पर्षणिम् सेचनीयाम् (नावम्) १ १३१.२ [पृषु सेचने (भ्वा०) धातोर्बाहु० औणादिकोऽनि प्रत्यय]

पर्षत् सिञ्चेत् १ १८६ ३ पार प्रापयतु ३ २० ४ सन्तारयति १ ६१ १ **पर्षति**=पारयति ५ २५ १ **पर्षथ**=सिञ्चत, दत्त १ ८६ ७ **पर्षथः**=सिञ्चथ ५ ७३ ८ **पर्षन्**=सिञ्चन्तु ४ ३६ १ पारयति ७ ६० ७ उल्लङ्घेयु ७ ४० ४ **पर्षि**=सिञ्चसि १ १२६ ५ पालयसि प्र०—अत्र विकरणाभाव ३ १५ ३ पिपूरय २ ७ २ पारयसि २ ३३ ३ पूरयसि ७ २३ २ [पृषु सेचने (भ्वा०) धातोर्लेट् । 'पर्षन्' प्रयोगे लङ् । अडभाव । 'पर्षि' प्रयोगे लट् । विकरणस्य शपो लुक् । पॄ पालनपूरणयो (जु०) धातोर्वा रूपम्]

पर्षि सिक्तमुदकम् १ १७४ ६ [पृषु सेचने (भ्वा०) धातोर्बाहु० औणादिक इन् प्रत्यय]

पलक्षी पले चञ्चले अक्षीणी यस्या सा (पक्षिणी) २४ ४ [पल-अक्षिपदयो समासे शकन्ध्वादित्वात्पररूपम्]

पलस्तिजमदग्नयः प्रजमिता विदिता अग्नय पलस्तयो वयोज्ञानवृद्धाश्च जमदग्नयो यैस्ते (सज्जना) ३ ५३ १६ [पलस्ति-जमदग्निपदयो समास । जमदग्नय प्रजमिताग्नयो वा प्रज्वलिताग्नयो वा नि० ७ २५]

पलिक्नीम् श्वेत-केशाम् (स्त्रियम्) ३० १५ **पलिक्नीः**=श्वेतकेशा (युवतय) ५ २ ४ [पलितप्राति० स्त्रिया 'छन्दसि क्नमित्येके' अ० ४ १ ३६ वा० सूत्रेण तकारस्य क्नम् ङीप् च । पलितमिति व्याख्यास्यते]

पलितस्य प्राप्तवृद्धाऽवस्थस्य (विदुषो जनस्य) १ १६४ १ **पलितः**=जातश्वेतकेश (युवा पुत्र) १ १४४ ४ श्वेत-केश (दूत=वृद्धो दूत इव परमात्मा) ३ ५५ ६ [पलितस्य=पालयितु नि० ४ २५ फल निष्पत्तौ (भ्वा०) धातो 'फलेरितजादेश्च प' उ० ५ ३४ सूत्रेणेतच् प्रत्यय आदेश्च पकारादेश]

पवताम् चलतु ३६ १० **पवते**=पवित्रीकरोति १६ ५ विजानीयात् प्र०—लेट्-प्रयोग, पूतो भवेत्, ज्ञान-

१४ ११ ११ पशव काल्यम् (नाम) ता० ११ ४ १० पशवो वै रयिष्ठम् (नाम) ता० १४.११ ३१ पशव शक्वर्यः ता० १३ १ ३ पशवो वै रेवत्यो मधुप्रियम् ता० १३ ७ ३ पशवो वै रैवत्य ता० १३ १० ११. रेवत्यो हि पशवस्तस्मादाह रेवती रमध्वम् इति श० २ ३ ४ २६ रन्तयो यज्ञ इति पशव इति श० ११ ६ ३ ६ पशवो वै बर्हि गो० २४ पशवो वै यूपमुच्छ्रयन्ति श० ३ ७ २ ४ पशवश्छन्दोमा गो० ५ १६ पशवो वै छन्दांसि श० ७ ५ २ ४२ पाङ्क्ता वै पशव श० १ ८ १ १२ गायत्रा पशव तै० ३ २ १ १ त्रैष्टुभा पशव कौ० १० २ पशवो जगती कौ० १६ २ पशवो बृहती कौ० १७ २ बार्हता पशव श० १३ ८ ३ १५ पशवो वा उष्णिक् ता० ८ १० ४ पशवो वालखिल्या ता० २० ६ २ पशवो वा अक्षरपङ्क्तय कौ० १६ ८ पशव पृष्ठ्यानि कौ० २१ ५ पशव प्रयाज गो० ३ १६ पशवो वै प्रयाजा कौ० ३ ४ पशव परिमाद श० १० १ २ ८ अथ यत्तृचि परिनिर्रष्टि ते पशव श० २ ३ २ १६ पशवो वै पुरीषम् श० १ २ ५ १७ पशवो वै वयासि श० ६ ३ ३ ७ वपुर्हि पशव गो० ५ ६ पुरुष पशूनाम् (अधिपति) ता० ६ २ ७ ओषधय पशव मै० २ ५ १]

पशुपतये पशूना पालकाय (रुद्राय=दुष्टाना रोदकाय) २४ ३ **पशुपतिम्**=पशूना पालक, जगद्धर्त्तार रुद्र सर्वप्राणम् ३६ ८ **पशुपतेः**=पशुरक्षकस्य पुरुषस्य ३६ ६ [पशु-पतिपदयो समास । 'पति समास एव' इति विभक्तत्वाद् गुण । पशुपति =ओषधयो वै पशुपतिस्तस्माद् यदा पशव ओषधीर्लभन्तेऽथ पतीयन्ति श० ६ १ ३ १२. यत्पशुपतिर्वायुस्तेन कौ० ६ ४]

पशुपाः य पशून् पाति स (जन) ४ ६ ४. य पशून् पाति रक्षति स (देव =विद्वज्जन) ६ ५८ २ [पशूपपदे पा रक्षणे (अदा०) धातो कर्त्तरि क्विप्]

पशुपा इव यथा पशुपालकस्तथा (पुरुष) १ ११४ ६ यथा पशुपालको गवादिभ्यो दुग्धादिक गृहीत्वा गोस्वामिने समर्पयति तथा १ १४४.६ [पशुपा-इवपदयो समास । पशुपा =पशूपपदे पा रक्षणे (अदा०) धातो कर्त्तरि क्विप्]

पशुमत् पशवो विद्यन्ते यस्मिँस्तत् (श्रव =श्रवणमन्न वा) ४ ३८ ५ [पशुप्राति० भूम्न्यर्थे प्रशसाया वा मतुप्]

पशुमत्यै बहव पशवो विद्यन्ते यस्या तस्यै (प्रजायै) ५ ४१ १७ [पशुप्राति० भूम्न्यर्थे मतुबन्तात् टीप्]

पशुमान् बहुपशुयुक्त (गातु =भूमि) ३ ५४ १८ [पशुप्राति० भूम्न्यर्थे मतुप् । य एव विद्वानग्निमुपतिष्ठते पशुमान् भवति तै० स० १.५ ६ ३]

पशुरक्षि पशूना रक्षक (मनुष्य) ६ ४६ १२ [पशु-रक्षिपदयो समास । रक्षि =रक्ष पालने (भ्वा०) धातोरौणादिक इन्]

पशुषः पशून् ५ ४१ १ **पशुषे**=बन्धकाय (अस्मै=उपदेशकाय) १ १७ १० [पशूपपदे षण् सम्भक्तौ (भ्वा०) धातो 'जनसनखन०' अ० ३ २ ६७ सूत्रेण विट् । 'विड्वनोरनुनासिकस्यात्' अ० ६ ४ ४१. सूत्रेणात्वादेश 'सनोतेरन' अ० ८ ३ १०८ सूत्रेण मूर्धन्य पशुषाप्राति० द्वितीयाबहुवचने रूपम्]

पशुसनि पशून् सनति सम्भजति येन त (अपत्यम्) १६ ४८ [पशूपपदे षण सम्भक्तौ (भ्वा०) धातो हि० औणादिक इन-प्रत्यय]

पशुसाधनी पशून् साध्नुवन्ति यया सा (पशुवर्धनक्रिया) ६ ५३ ६. [पशु-साधनीपदयो समास । साधनी= साध सत्सिद्धौ (स्वा०) धातो करणे ल्युट् । तत स्त्रिया ङीप्]

पश्चा पश्चिमा (दिक्) २ २७ ११ पश्चात् ४ १ १८ [अपरप्राति० अस्तातेरर्थे 'पश्चपश्चा च छन्दसि' अ० ५ ३ ३३ सूत्रेणा आप्रत्यय पश्चादेशश्च निपात्यते]

पश्चात् पश्चिमदेशात् ५ ११ पश्चिमाया दिशि वर्त्तमान (आदित्य) १३ ५६ पश्चिमत (देशात्) ३७ १२ [अपरप्राति० अस्तातेरर्थे (दिग्देशकालेषु) 'पश्चात्' अ० ५ ३ ३२ सूत्रेणाति. प्रत्यय पश्चादेशश्च निपात्यते]

पश्चात्सद्भ्यः ये पश्चात् सीदन्ति तेभ्य (देवेभ्य = दिव्यसुखप्रदेभ्यो जनेभ्य) ९ ३५. **पश्चात्सदः**=ये पश्चिमाया दिशि सीदन्ति ते (देवा =सर्वविद्याविदो विद्वज्जना) ६ ३६ [पश्चादिति व्याख्यातम्, तदुपपदे षद्लृ विशरणगत्यवसादनेषु (भ्वा०) धातो क्विप् कर्त्तरि]

पश्चादोषाय पश्चाद् दोषदानाय ३० १७ ['पश्चा' इति व्याख्यातम् । पश्चा-दोषपदयो समास]

पश्य समीक्षस्व ३ २३ २ **पश्यत्**=ज्ञानदृष्ट्या पश्यति भा०—जानाति ३२ ८. पश्येत् प्र०—अत्र लड्यडभाव. १ १६४ १६ **पश्यत**=सम्प्रेक्षध्वम् ६.४ सम्यग् विजानीत १ ७२ १६ **पश्यति**=प्रेक्षते १ २५ ११ **पश्यन्**=समीक्षन्ते १ १७४ ६ **पश्यन्ति**=सम्प्रेक्षन्ते

पवित्रवान् बहूनि पवित्राणि कर्माणि विद्यन्ते यस्य स (पावक) १ १६० ३. [पवित्रप्राति० भूम्न्यर्थे मतुप्]

पवित्रे पवित्रकरणहेतू प्राणाऽपानगती, अ०—शुद्धौ (वैष्णव्यौ=पवनपावकौ) १ १२ शुद्धाचरणे (वैष्णव्यौ=अध्येत्रध्यापकौ) १० ६ [पवित्र व्याख्यातम्। तस्य प्रथमाद्विवचने रूपम्]

पवीरवत् प्रशस्त पवीर फालो विद्यते यस्मिन् तत् (लाङ्गल=काष्ठम्) १२ ७१ [पवीरप्राति० प्रशसार्थे मतुप्। पवीर=पवि वज्रनाम (निघ० २ २०), तत इरन् मत्वर्थीयश्छान्दस। पवि शल्यो भवति यद् विपुनाति काय तद्वत् पवीरमायुधम्। तद्वान् इन्द्र पवीरवान् नि० १२ ३०]

पवीरवस्य वज्रध्वने १ १७४.४ [पवि-रव-पदयो समास। पूर्वस्य दीर्घ। पवि वज्रनाम निघ० २ २०]

पवीरवि यो धनादिरक्षार्थं पवीर शस्त्र वाति प्राप्नोति तस्मिन् (अर्ये=वैश्ये) ३३ ८२ [पवीरोपपदे वा गति-गन्धनयो (अदा०) धातो क प्रत्यय। सप्तम्यामकार-लोपश्छान्दस]

पवेथाम् प्राप्नुतम् ७ २७ प्रापयेयाम् ७ २८ [पवते गतिकर्मा (निघ० २ १४) धातोर्लोट्]

पशवः गवादय २० ६६ सिंहादय १४ ३० गाय आदि सब पशु स० वि० १४५ अथर्व० १२ ५ १० **पशु**=पशुमिव प्र०—अत्र 'सुपा सुलुक्०' इति विभक्ते-र्लुक् ३ ५३ २३ **पशुना**=व्यवहृतेन विक्रीतेन गवादिना ४ २६ **पशुभिः**=हस्त्यश्वगवादिभि ५ २८ **पशुभ्यः**=पशुओ के लिए स० प्र० १५२ अथर्व० १४ २ १८. **पशुम्**=प्रसिद्धम् (गवादिकम्) १३ ४७ द्रष्टव्यम् (अश्वादिकम् १३ ४८ पश्यन्तम् (कामासक्त स्वपतिम्) ५ ६१ ५ सर्वद्रष्टारम् (परमेश्वरम्) ऋ० भू० १२८, ३१ १५ **पशुः**=पश्यकश्चतुष्पात् सिंहादि ६ ६ यो दृश्यते भोग्य-पदार्थसमूह समक्षे स्थापित स प्र०—अत्र 'अर्जिदृशि-कमि०' उ० १ २७ इत्यौणादिक-सूत्रेणाऽस्य सिद्धि ३ ५७ दृश्य, द्रष्टव्य (अग्नि=वह्नि) २३ १७. **पशून्**=पशुवद् वर्त्तमानान् मूर्खत्वयुक्तान् गवादीन् वा १ ७२ ६ गोहस्त्यश्वादीन् ६ ३१ श्रिय प्रजा वा, प्र०—श्रीर्हि पशव शत० १ ८ ३ ३६ प्रजा वै पशव शत० १ ४ ६ १७ हरिणादीनारण्यान् ६ ३१ [दृशिर् प्रेक्षणे (भ्वा०) धातो 'अर्जिदृशिकम्यमि०' उ० १ २७. उ प्रत्यय धातोश्च पशिरादेश। पशु=पश्यते नि०

पशव (अग्नि) एतान् पञ्चपशूनपश्यत्। पुरुषमश्व गामवि-मज यदपश्यत्तस्मादेते पशव श० ६ २ १ २ तऽएते सर्वे पशवो यदग्नि। श० ६ २ १ १२ अग्निर्हि देवाना पशु ऐ० १ १५ योनिर्वै पशूनामाहवनीय (अग्नि) कौ० १८ ६ रौद्रा वै पशव श० ६ ३ २ ७ वायुप्रणेत्रा वै पशव. श० ४ ४ १ १५ त्वष्टुर्हि पशव श० ३ ८ ३ ११ पशवो वै सविता श० ३ २ ३ ११ अन्तरिक्षदेवत्या खलु वै पशव तै० ३ २ १ ३ पशवो वै वैश्वदेवम् (शस्त्रम्) कौ० १६ ३ सप्त ग्राम्या पशव सप्तारण्या श० ३ ८ ४ १६ पशवो वै घृतश्चुत ता० ६ १ १७. पशवो वै हविष्मन्त श० १ ४ १ ६ पशवो वै हविष्पङ्क्ति कौ० १३ २ पशवो वै हरिश्रिय ता० १५ ३ १० श्रीर्वै पशव ता० १३ २ २ पशवो यश श० १२ ८ ३ १ शान्ति. पशव ता० ४ ५ १८ इन्द्रिय वै वीर्य रस पशव ता० १३ ७ ४ पशवो वै वसु ता० ७ १० १७ पशवो वै रयि तै० १ ४ ४ ६ पशवो वै राय श० ३ ३ १ ८ पशवो वै रायस्पोष श० ३ ४ १ १३ पुष्टि पशव श० ३ १ ४ ६ पौष्णा पशव श० ५ २ ५ ६ साहस्रा पशव कौ० २१ ५ पशव सहस्रम् ता० १६ १० १२ पशव शिपि तै० १ ३ ८ ५ पशवो वै मरुत ऐ० ३ १६ पशुर्वै मेध ऐ० २ ६ वाजो वै पशव ऐ० ५ ८ पशवो वै वाजिनम् तै० १ ६.३ १० अन्न पशव श० ६ २ १ १५ पशवो वै धाना गो० उ० ४ ६ पशवो वा इडा कौ० ३ ७ प्राणा पशव श० ७ ५ २ ६ गृहा वै पशव श० १ ८ २ १४ पशवो वा उत्तरवेदि तै० १ ६ ४ ३ पशवो वै चतुरुत्तराणि छन्दासि ता० ४ ४ ६ आत्मा वै पशु. कौ० १२ ७ यजमान पशु तै० २ १ ५ २. वज्रो वै पशव श० ६ ४ ४ ६ पशवो वै ग्रावाण ता० ६.६ १३ पशवो वै उक्थानि कौ० २८ १० पशव ऊमा श० ७ १ १ ६ पशवो वै नियुत ता० ४ ६ ११ प्रजा पशव सूक्तम् कौ० १४ ४ स्तोमो वै पशु ता० ५ १० ८ पशवो वै सप्तदश ता० १६ १० ७ पशवो वै प्रतिहर्त्ता ता० ६ ७ १५ पशव स्वर गो० उ० ३ २२ पशवो वै बृहद्रथन्तरे ता० ७ ७ १ पशवो वै ज्यैत[illegible] (साम) ता० ७ १० १३ पशवो वै वामदेव्यम् (साम) ता० ४ ८ १५ वाम हि पशव ऐ० ५ ६ पशवो वै वैरूपम् (साम) ता० ५ ३.१२ पशवो वै लोम (साम) ता० १ ३ ११ ११ पशवो वै रौरवम् (साम) ता० ७ ५ ८. पशवो वै यण्वम् (साम) [illegible] १३ ३ ६ पशवो वै श्रद्धय (साम) पशूनाम-[illegible] १५ ३ ४ पशव सद्दो विशीवग [illegible] ता [illegible] पशवो वै सुरूप (साम) [illegible]

धातोर्लिट् । सम्प्रसारणमकारलोपश्च छान्दस]

पाकम् परिपक्वव्यवहारम् १.१६४.२१. पचन्ति परिपक्व ज्ञानं कुर्वन्ति यस्मिन् धर्म्ये व्यवहारे तम् १ ३१.१४ **पाकः**=ब्रह्मचर्यादितपसा परिपचनीयः (मनुष्य.) १.१६४.५. **पाकाय**=परिपक्वत्वाय ३ ६.७. परिपक्व-व्यवहाराय ४.५.२. [डुपचष् पाके (भ्वा०) धातोर्घञ् प्रत्यय । पाक. प्रशस्यनाम निघ० ३.४ पा पाने (भ्वा०) धातोर्वा 'अर्भकपृथुकपाका वयसि' उ० ५.५३. सूत्रेण कन् प्रत्ययो निपात्यते]

पाकारो: मुखादिपाकस्यारोर्मर्मच्छिदः शूलस्य च १२.९७ [पाक-अरुरादयो समास । पाकमिति व्याख्यातम् । अरु=ऋ गतौ (भ्वा०) धातोर् औणादिको बाहु० उ. प्रत्यय]

पाक्या विद्यायोगाभ्यामेव परिपक्वधिय (देवान्=विदुषो जनान्) प्र०—अत्र विभक्तेराकारादेश १ १२०.४. पाकोऽस्याऽस्तीति पाकी (विज्ञानपुरस्सर. परमात्मा) प्र०—अत्र 'सुपा सुलुक्०' इति ड्यादेश २ २७.११ [पाक इति व्याख्यातम् । ततो मत्वर्थ इनि. । पाकी प्राति० 'सुपा सुलुग्०' इति ड्यादेश]

पङ्क्तिराधसम् य. पङ्क्ती समुदायान् राध्नोति तम् (यज्ञम्) ३७.७. ['पङ्क्ति' इत्युपपदे राध समिद्धौ (स्वा०) धातोरौणादिकोऽसुन्-प्रत्यय.]

पाङ्क्तान् पङ्क्तिरूपेण गन्तॄन् पक्षिविशेषान् २४.२६. **पाङ्क्ताय**=पङ्क्तिषु साधवे (शाक्वराय=शक्तिजाय यस्माय) २९ ६०. **पाङ्क्तेन**=पङ्क्तिप्रकाशितेन (छन्दसा=स्वच्छेनाऽर्थेन) १३.५३. [पङ्क्तिप्राति० 'तत्र साधु ' इत्यर्थे भवार्थे वा अण् प्रत्यय']

पाजः बलम् प्र०—पाजस् इति बलनाम निघ० २ ६, १ ११५ ५ **पाजः**=बलम् ७ ३ ४ प्र० पातेर्बले जुट् च उ० ४.२०३. इत्यसुन् १३ ६ अन्नादिकम् ७.१० १. **पाजसा**=बलेन ११४६ [पा रक्षणे (अदा०) धातोः 'पातेर्बले जुट् च' उ० ४.२०३. सूत्रेणासुन्प्रत्यय' । पाज अन्ननाम निघ० २ ७ बलनाम निघ० २.९ पाज =पात-नात् नि० ६ १२]

पाजसी रक्षणनिमित्ते (द्यावाक्षामा=सूर्यपृथिव्यौ) प्र०—अत्र विभक्ते पूर्वसवर्ण. 'पातेर्बले जुट् च' उ० ४.२०३ अनेन पा धातोरसुन् जुडागमश्च १ १२१.११. [पाजस् इति व्याख्यातम्]

पाजस्यम् पाजस्वन्नेषु साधु (यवादिकमन्नम्) २५ ८. [पाजस् इति व्याख्यानम् । तत्र 'तत्र साधु' इत्यर्थ यत्]

पाञ्चजन्यम् पञ्चसु जनेषु प्राणादिषु भवा प्राप्त-योगसिद्धिम् (ऋषि=वेदपारगाध्यापकम्) १ ११७.३. पञ्चजना प्राणा बलवन्तो यस्य तदपत्यम् ५ ३२ ११. **पाञ्चजन्यः**=पञ्चसु सकलविद्येषु अध्यापकोपदेशक-राज-सभा-सेना-सर्वजनाधीशेषु जनेषु भव (इन्द्र=सेनाद्यधि-पति.) प्र०—अत्र 'बहिर्देवपञ्चजनेभ्यश्चेति वक्तव्यम्' अ० ४ ३ ५८. इति वार्त्तिकेन ञ्य प्रत्यय' १ १००.१२. पञ्चाना पञ्चसु वा जनेषु साधु. (अग्नि=विद्वज्जन) २६ ६. पांच प्राणों का जनक (ईश्वर) आर्याभि० १ ३४ ऋ० १ ७ १० १२. **पाञ्चजन्याः**=पञ्चजनेभ्यो हिता (अग्नय=आहवनीयादय पावका) प्र०—पञ्चजना इति मनुष्यनाम निघ० २ ३, १८.६७ [पञ्चन्-जनपदयो. समासे भवार्थे 'बहिर्देवपञ्चजनेभ्यश्चेति वक्तव्यम्' अ० ४ ३ ५८. वा० सूत्रेण ञ्य. प्रत्यय. । पाञ्चजन्यया=पञ्चजनीनया नि० ३ ८ पञ्चजना =गन्धर्वा पितरो देवा असुरा रक्षासीत्येके चत्वारो वर्णा निषाद पञ्चम इत्यौपमन्यव नि० ३.८. एष वा अग्नि पाञ्चजन्य तै० स० ५ ३ ११ ३]

पाञ्चजन्यासु पञ्चसु दिनेषु प्राणेषु भवासु (कृष्टिषु=मनुष्यादिप्रजासु) ३ ५३ १६ [पाञ्चजन्यमिति व्याख्यातम् । तत. स्त्रिया टाप्]

पाणिघ्नम् य. पाणिभ्या हन्ति तम् (पुरुषम्) ३० २० [पाणीत्युपपदे हन हिंसागत्यो (अदा०) धातो 'कृतो बहुल वा' इति वा० सूत्रेण टक्]

पाणिना स्तुतिसमूहेन १ २० किरणसमूहेन व्यव-हारेण १.१६ **पाणिभिः**=करै २ ३१ २ **पाणी**=बाहू ४ २१ ९ प्रशसनीयौ (बाहू=भुजौ) ६ ७१ १ [पाणि =पण व्यवहारे स्तुतौ च (भ्वा०) धातो 'पणिपणाय्योरुडाय-लुकौ च' उ० ४ १३३ सूत्रेण इण्प्रत्यय आयलुक् च । पाणि. पणायते पूजाकर्मण प्रगृह्य पाणी देवान् पूजयन्ति नि० २ २६ पाणी वै गभस्ती श० ४.१.१ ९]

पात् रक्षतु ४.५५ ५. **पात**=रक्षत २७ २८ **पातम्**=रक्षत, प्र०—अत्र व्यत्ययः ४ ९ रक्षतम् १ १२० ४. प्राप्नुतम् १.४६ ५ पालयत १ ९३ ८. पिबतम् १ १५३ ४ **पाताम्**=रक्षताम् १ १८५ १० **पाति**=रक्षति ५.१२.६. प्राप्नोति ३ ५ ५ पालयति ४.५ ८. **पातु**=रक्षति प्र०—अत्र लडर्थे लोट् २ ५. रक्षतु ४ १६ पालयतु पालयति वा ४ १५ **पाथ**=रक्षका भवथ १ ८६ १. प्राप्नुत ८ ३१. **पाथः**=रक्षथ. १.१५६.३ **पान्ति**=

१.२२ २० अवलोकन्ते ६ ५ देखते हैं आर्याभि० १ २१ ऋ० १ २ ७ २० **पश्यात्**=सम्प्रेक्षते ४ २५ ४ **पश्यात्**=पश्येयु १ ११३ ११ **पश्यामि**=सप्रेक्षे १ ३०. **पश्येम**=हम देखें आर्याभि० २ २७, २५ २१ [दृशिर् प्रेक्षणे (भ्वा०) धातोर्लोट् । शिति पश्यादेश । अन्यत्र लड्, लोट्, लट्, लेट् लिड् च]

पश्यद्भ्यः सप्रेक्षमाणेभ्य (मनुष्येभ्य) १ ११३ ५ **पश्यन्**=सत्याऽसत्यं प्रेक्षमाण (सुवीर पालको जन) १ ११६ २५ पर्य्यालोचमान (गोतम =विद्वज्जन) १ ८८ ५ विजानन् (परमेश्वर) ७.६० २. समीक्षमाण (वैश्वानर =ब्रह्मचारी जन) ६.६ ३ दर्शयन् (सविता= सूर्य) प्र०—अत्राऽन्तर्गतो ण्यर्थ ३३ ४३ देखता हुआ (पति) स० वि० १२२, अथर्व० १४ १ ५७ दिखाता हुआ (सविता=सूर्य) स० प्र० ३१३, ३३ ४३ **पश्यन्तौ**= समीक्षमाणौ (देवौ=देदीप्यमानौ विद्वज्जनौ) २६ ७ [दृशिर् प्रेक्षणे (भ्वा०) धातो शतृ-प्रत्यय । शिति पश्यादेश]

पश्व इष्टिः पशो सङ्गति १ १८० ४ [पश्व-इष्टि-पदयो समास. पश्व =पशुप्राति० षष्ठी। गुणाऽभाव-श्छान्दस 'जसादिषु छन्दसि वावचनम्' अ० ७ ३ १०९ (वा०) इति विकल्पनात् । इष्टि =यज देवपूजासगतिकरण-दानेषु (भ्वा०) धातो स्त्रिया क्तिन्]

पश्वयन्त्रासः पश्वानि दृष्टानि यन्त्राणि यैस्ते (मनुष्या) ४ १ १४. [पश्व-यन्त्रपदयो समासे जसोऽसु-गागम]

पश्वः पशून् ४ ६ ३ गवादीन् (पशून्) ६ १ १२. पशो ४ २ १८ **पश्वा**=अपहृतस्य पशो स्वरूपाङ्गपाद-चिह्नाऽन्वेषणेन १ ६५ १ **पश्वे**=पशुसमूहाय १ ४३ २ [पशव इति व्याख्यातम् । पशुप्राति० 'जसादिषु छन्दसि वा वचनम्' अ० ७ ३ १०९ वा० सूत्रेण गुणादीना विकल्पे यणादेशे रूपम्]

पश्विषे पशूनामिषे वृद्धीच्छायै १ १२१ ७ [पशूपपदे इषु इच्छायाम् (तुदा०) धातो सम्पदादित्वात् क्विप् स्त्रियाम्]

पष्ठवाट् य पष्ठेन पृष्ठेन वहति स उष्ट्रादि प्र०— वर्णव्यत्ययेन ऋकारस्याऽकारादेश १४ ९ प्र०—इद पद पृषोदरादिना सिद्धम् २१ १७ [पृष्ठोपपदे वह प्रापणे (भ्वा०) धातो 'वहश्च' अ० ३ २ ६४ सूत्रेण ण्वि प्रत्यय । ऋकारस्याकारश्छान्दस]

पष्ठौही वडवाऽऽदि १८ २७ [पष्टवाट् इति व्याख्या-तम् । तत. 'तस्येदम्' इत्यण्-प्रत्यये स्त्रिया ङीपि 'वाह ऊठ्' इत्यूठि 'एत्येधत्यूठ्सु' इति वृद्धि । प्रजनन वै पष्ठौही। प्रजनन ब्रह्मा जै० २ २०३ धात्रे द्वादशकपाल, पष्ठौह्य-प्रवीता दक्षिणा काठ० १५ ३]

पसः राष्ट्रम् २३ २२ लिङ्गम् २० ९. राष्ट्रं पस श० १३ २९ ६. भगस्सौभाग्य पस काठ० ३८ ४]

पस्त्यसदः ये पस्त्येषु गृहेषु सीदन्ति तान् (नॄन्= उत्तमविदुषो जनान्) ६.५१ ९. [पस्त्योपपदे षद्लृ विशरण-गत्यवसादनेषु (भ्वा०) धातो कर्त्तरि क्विप् । पस्त्य गृहनाम निघ० ३ ४]

पस्त्याभिः पस्त्यानि गृहाणि विद्यन्ते यासु भूमिषु ताभि प्र०–पस्त्यमिति गृहनाम निघ० ३ ४ तत 'अर्शआदि-भ्योऽच्' अ० ५ २ १२७. इत्यच्-प्रत्यय १ ४०.७ **पस्त्या-नाम्**=गृहाणा जीवशरीराणा वा १ १६४ ३० **पस्त्याम्**= गृहम् ४ ५५ ३ **पस्त्यासु**=पस्त्येभ्यो गृहेभ्यो हितास्वासु प्रजासु १ २५ १० गृहशालासु १० ७ न्यायगृहेषु १० २६ [पस्त्यम् गृहनाम (निघ० ३ ४) ततो मत्वर्थे 'अर्शआदिभ्यो ऽच्' अ० ५ २ १२७ सूत्रेणाच् । अथवा हितार्थे यत् । विशो वै पस्त्या श० ५ ३ ५ १९]

पस्त्यावत् गृहवत् २ ११ १६ **पस्त्यावतः**=प्रश-स्तानि पस्त्यानि गृहाणि विद्यन्ते यस्य (विदुषो जनस्य) १ १५१ २ प्रशमितानि पस्त्यानि विद्यन्ते येषु तान् (क्षयान्=निवासान्) ४ ५४ ५ [पस्त्यमिति गृहनाम निघ० ३ ४ तत प्रशसाया मतुप् । मतुपि पूर्वस्य दीर्घ-श्छान्दस]

पस्पशे स्पृशति कर्त्तुं शक्नोति वा प्र०—अत्र लडर्थे लिट् १ २२ १९ बध्नाति प्र०—अत्र लडर्थे लिट् ६ ४ समर्थ हुआ आर्याभि० १.२३ ऋ० १ २ ७ १९ [स्पश बाधनस्पर्शनयो (भ्वा०) धातोर्लिट् । व्यत्ययेनात्मनेपदम्]

पस्पृधानम् पुन. पुन स्पर्धमानम् (एतश=अश्वम्) १ ६१ १५ **पस्पृधानेभ्यः**=स्पर्द्धमानेभ्य ईप्समानेभ्यो वा (नृभ्य =मनुष्येभ्य) २ १९ ४ [स्पर्द्ध सङ्घर्षे (भ्वा०) धातो शानचि सम्प्रसारणमकारलोपश्च छान्दसम् । सुगा-गमोऽपि न आगमशासनस्याऽनित्यत्वात्]

पस्पृधानासः स्पर्धमाना (प्रजा) ७ १८ ३. [स्पर्ध संघर्षे (भ्वा०) धातो शानच् । ततो जसोऽसुक् । आगम-शासनस्याऽनित्यत्वात् मुग् आगमो न भवति]

पस्पृधे स्पर्द्धन्ते ६ ३४ १ [स्पर्ध संघर्षे (भ्वा०)

पाद ऋ० १३८३८ पाद पद्यते नि० २.= दिश पादा तै० म० ७ ५.२५ १]

पादा चरणौ प्र०—अत्राऽऽकारादेश ८ २३ पादौ ६ २९ ३ मूर्खत्वादिनीचगुणैरुत्पन्नौ (शूद्रौ) ऋ० भू० १२५,३१ १० पद्यते गम्यते याभ्या गमनागमनाभ्या तौ (चरणौ) प्र०—अत्र 'सुपा सुलुक्०' इत्याकारादेश १ २४ ८ [पद गतौ (दिवा०) धातोर्घञ् । 'सुपा सुलुग्०' इत्याकारादेश]

पादि गच्छ ११४६ प्रतिपद्यताम्, प्राप्यताम् ११०५ ३ पाद्येत ६ २० ५ [पद गतौ (दिवा०) धातोर्लुङि रूपम् । अडभावश्छान्दस]

पान्तम् रक्षन्तम् (इन्द्र=परमैश्वर्यम्) ७ ३३ २ [पा रक्षणे (अदा०) धातो शतृप्रत्यय । अर्हन्ते पान्तम् । ता० ६ १ ७ पान्तम्=पानीयम् । नि० ७ २५ पान्तो वै पुरुष जै० ३ ९५ रात्रि पान्तम् । जै० १ २१४]

पान्ता रक्षकौ (अध्यापकोपदेशकौ) ११२२ ४ [पा रक्षणे (अदा०) धातो शत्रन्तात् प्रथमाद्विवचनस्याकारादेश]

पापतीति प्रकर्षेण पुन पुन पतति गच्छति ६ ६ ५ [पतॢ गतौ (भ्वा०) धातोर्यङ्लुगन्ताल्लट्]

पापत्वाय पापस्य भावाय ७ ३२ १८ [पापप्राति० भावे त्व प्रत्यय]

पापया अधर्मरूपया (क्रियया) १ २९ ५ [पापप्राति० स्त्रिया टाप्]

पापस्य पापाऽऽचारस्य (रक्षस) ११२९ ११ **पापा:**=अधर्माऽऽचरणा (जना) ११९० ५ [पा रक्षणे (अदा०) धातो 'पानीविषिभ्य प.' उ० ३ २३ सूत्रेण प प्रत्यय । पान्ति रक्षन्त्यस्मादिति विग्रह । पापप्राति० मत्वर्थीयस्य लुक् । पाप पानाऽपेयाना पापत्यमानोऽवाङेव पततीति वा पापत्यतेर्वा स्यात् नि० ५ २]

पापास: अधर्माचारा (दुर्जना) ४ ५ ५ [पापप्राति० जसोऽसुगागम । पापास =पापा नि० ६ २५]

पाप्मना अधर्मात्मना जनेन ६४ पापेन १६ ११ **पाप्मने**=पापाऽऽत्मने (दुर्जनाय) ३० १८ पापाऽऽचरणाय ३० ५ **पाप्मा**=अपराध ६ ३५ **पाप्मानम्**=दुष्टकर्मकारिणम् (भा०—दुष्ट जनम्) २६ १० रोगादिकम् १२ ९६ [पा रक्षणे (अदा०) धातो पा पाने (भ्वा०) धातोर्वा 'नामन्-सीमन्व्योमन्०' उ० ४ १५१ सूत्रेण मनिन्-प्रत्यय पुगागमश्च निपात्यते । पाप्मा वाऽअशस्ति श० ६.३ २ ७ पाप्मा वै सपत्न श० ८.५ १ ६ पाप्मा वै वृत्र श० ११ ५ ७ १३ पाप्मा वै मृत्यु श० ६ ३ ३ ८ वरुणो वाऽएत गृह्णाति य पाप्मना गृहीतो भवति श० १२.७ २ १७. श्रमो वै पाप्मा श० ६ ३ ३ ७ पाप्मा वै वृत्र. श० ८.५ १ ६ पाप्मा मृत्यु काठ० १४ ६ भ्रातृव्यो वै पाप्मा जै० ३ २२२]

पायनाय पानाय १११६ ९ [पा पाने (भ्वा०) धातोर्णिजन्ताल् ल्युट् । योऽन्तादेश]

पायय पाययति वा अ०—लत्पाने हेतुरस्ति ११५४ ३ [पा पाने (भ्वा०) धातोर्णिजन्ताल्लोट् । व्यत्ययेन परस्मैपदम्]

पाययते रक्षा कारयते १ ५६ १ [पा रक्षणे (अदा०) धातोर्णिजन्ताल्लट् । लुगागमस्तु न छन्दसि सर्वविधीना विकल्पनात्]

पायव: रक्षका (आप्ता भृत्या) ४४.१३ पालका (राजपुरुषा) ५ १२ ४ **पायवे**=पालनाय ६ ४७ २८ गुह्यावयवदाहाय ३९ १० **पायुना**=पाय्विन्द्रियेण २५ ७ **पायुभि:**=रक्षणै रक्षकैर्वा ५ ३० २ रक्षणोपायै ११८९ ४ रक्षकै (विद्वद्भि) ११४३ ८ रक्षादिभि ३४ १३ **पायुम्**=पात्यनेन त गुह्येन्द्रियम् ६ १४ य पिबति तम् (जनम्) २ २ ४ **पायु:**=पालनकर्ता (परमेश्वर) १ ८९ ५ पालक (अग्नि =नृपति) २ १ ७ गुदेन्द्रियम् २० ८ सर्वस्य रक्षक (ईशान =ईश्वर) २५ १८. निरन्तर रक्षक (ईश्वर) आर्याभि० १ १० ऋ० १ ६ १५ ५ पालनहेतु (सभाध्यक्ष) प्र०—अत्र 'पा रक्षणे' इत्यस्मादुण् १ ३१ १३ [पा रक्षणे (अदा० धातो 'कृवापाजि०' उ० १ १ सूत्रेण उण्प्रत्यय]

पारत: पारात् ४ ३० १८ [पारप्राति० 'तसि प्रकरणे आद्यादिभ्य उपसंख्यानम्' अ० ५ ४ ४४ वा० सूत्रेण तसि]

पारम् परभागम् १ ४६ ११ सर्वदु खेभ्य पृथग्भूतम् (परतटम्) ३ १८ परतटम् ११८३ ६ **पार:**=य पारयिता स (इन्द्र =राजा) ५ ३१ ८ **पाराय**=मृगकर्मसमाप्त्यर्थम् ३० १६ **पारे**=अपरभागे १ ५२ १२ समुद्रभूमिपरभागे २ ११ ८ [पार कर्मसमाप्तौ (चुरा०) धातोरच्प्रत्यय । पार पर भवति नि० २ २४]

पारय दु खात्पार देश गमय ६ २० १२ पार प्रापय १ ९७ ७ दु खाचारात् पृथक्कृत्वा श्रेष्ठाचार नय ११८९ २ तीरे प्रापय ११७४ ९ **पारयतम्**=पारयत २.३९ ४

रक्षन्ति ५ ६७ ३ प्राप्नुवन्ति २ ११ १४ पालयन्ति ५ ५२ २ **पान्तु**=सतत रक्षन्तु ४ ११ पालयन्तु २ ३ ८ **पासतः**=रक्षेताम् ७ ३४ २३ **पासि**=रक्षसि १ १३४.५ पालयसि २ १ ६ **पाहि**=अ०—दूरे रक्ष ३ ४८ पाति रक्षति २ १६. रक्षय प्र०—अत्रान्तर्गतो ण्यर्थ ३ ३७ पाति वा ३ १७ पालय २ ६ रक्षा कीजिए स० वि० १४६, ३.३७ रक्षयति पाति वा १ २ १ पालन कर आर्याभि० २ ३३, ३ १७ **पाः**=रक्ष ४ २० ४ [पा रक्षणे (अदा०) धातोर्लेट् । अन्यत्र लोट् लट् लङ् च । पातमित्यत्र पा पाने (भ्वा०) धातोर्वा लुङ् अडभाव]

पातयति जागरयति १ ४८ ५ [पत्लृ गतौ (भ्वा०) धातोर्णिजन्ताल् लट्]

पातल्ये पतनशीले (प्राणिनि) ३ ५३ १७ [पाताल-प्राति० भवार्थे यत् । पाताल =पत्लृ गतौ (भ्वा०) धातो 'पतिचण्डिभ्यामालञ्' उ० १ ११७ सूत्रेण आलञ्]

पातवे पातुम् प्र०—अत्र पा-धातोस्तुमर्थे तवेन्-प्रत्यय २० ५९ पातु पान कर्त्तुम् १ २८ ६ रक्षितुम् २६ २५ [पा पाने (भ्वा०) धातोस्तुमर्थे तवेन्-प्रत्यय]

पातवै पातु रक्षितुम् ३ ४६ ५ [पा रक्षणे (अदा०) धातोस्तुमर्थे तवैप्रत्यय]

पाता रक्षक (इन्द्र =ऐश्वर्यकारी राजा) ६ २३ ३. पानकर्त्ता (इन्द्र =राजा) प्र०—अत्र तृन्-प्रत्यय ६ ४४ १५ [पा रक्षणे (अदा०) पा पाने (भ्वा०) धातोर्वा कर्त्तरि तृच् तृन् वा]

पात्नीवतः प्रशस्ता पत्नी यज्ञसम्बन्धिनी तद्वतोऽयम् भा०—विवाहितस्त्रीव्रत (जन) १८ २० [पत्नीशब्दात् प्रशसायामर्थे मतुप् । 'छन्दसीर' अ० ८.२ १४ सूत्रेण मतोर्मस्य वकार । पत्नीवत्-प्राति० 'तस्येदमिति' अण्-प्रत्यय । रेत सिक्तिर्वै पात्नीवतग्रह कौ० १६ ६ रेतो वै पात्नीवत. गो० उ० ४ ५ अग्निर्हि देवाना पात्नीवत नेष्ट-र्त्विजाम् कौ० २८ ३]

पात्रम् पिवति पाति वा येन ६ ४४ १६ दातु योग्यम् (प्रय =अन्नादिकम्) २ ३७ ४ पद्यते येन तत् (रथम्) १ ८२ ४ पान्ति रक्षन्ति तम् ३३ ८ य पातिस्तम् (राजा-नम्) ६ ७ १ पालनम् १ १२१ १ पत्राणा ज्ञानाना समूहम् १ ११० ५ पाति रक्षति समस्त शिल्पव्यवहार यस्तम् (अग्निम्) ७ २४ काष्ठादिक पात्रम् १ १७५ ३ **पात्राणि**= यै पिवन्ति तानि १९ ८६ **पात्रेषु**=पानसाधनेषु १६ ६२ [पा रक्षणे (अदा०) पा पाने (भ्वा०) धातोर्वा 'दादिभ्य-श्छन्दसि' उ० ४ १७० सूत्रेण त्रन्प्रत्यय । 'सर्वधातुभ्य ष्ट्रन्' उ० ४ १५९. सूत्रेण वा ष्ट्रन् पात्र पानात् नि० ५ १ पत्रप्राति० वा समूहार्थे अण्]

पात्रस्येव यथा पात्रस्य मध्ये १ ७५ १ [पात्रस्य-इव-पदयो समास]

पात्रा पात्राणि सुवर्णरजतादीनि १ १०४ ८ शत्रूणा यानानि ६.२७ ६ भोजनाद्यर्थ सुवर्णादि पात्रो को आर्याभि० १.४६ ऋ० १ ७ १९ ८ [पात्रप्राति० शेर्लोप-श्छन्दसि । पोत्रमिति व्याख्यातम्]

पाथन रक्षत १ १६६ ८ [पा रक्षणे (अदा०) धातो-र्लोट् । त-प्रत्ययस्य थनादेश 'तप्तनप्तनथनाश्च' इति सूत्रेण]

पाथसि अन्ने १३ ५३ **पाथः**=पालकमन्नम् २१ ४० रक्षणीयमाचरणम् प्र०—पाथ इति पदनाम, निघ० ४ ३, ८ ५० पृथिव्यादिकम् ७ ५ ७ अन्तरिक्षमार्गम् १ ११३.८ पृथिव्याद्यन्नम् ३.५५ १०. अन्नाद्यैश्वर्यम् ७ ४७ ३. वर्त्म १ १५४ ५ विज्ञानाचरणम् ८ ५० ज्ञातव्य कर्म्म ८ ५० मार्गम् ३ ८.९ रक्षकमन्नम् २ ३ ९ अन्नमुदक वा ३ ३१ ६ पाति शरीरमात्मानञ्च येन तदन्नम्, प्र०—'अन्ने च' उ० ४ २०५. अनेन पातेरन्नेऽसुन्प्रत्यय थुडागमश्च २ १७ उदकम् ७ ३४ १० **पाथांसि**=फलादीनि २१ ४७ अन्नानि २१ ४६. रक्षणीयान्याचरणानि प्र०—पाथ इति पदनाम निघ० ४ ३, ८ ५० ३ [पा रक्षणे (अदा०) धातो 'उदके थुट् च' उ० ४ २०४ 'अन्ने च' उ० ४ २०५ सूत्रेण वा असुन्प्रत्यय थुडागमश्च । पाथोऽन्तरिक्ष पथा व्याख्यातम् । उदकमपि पाथ उच्यते पानात् । अन्नमपि पाथ उच्यते पानादेव नि० ६ ६]

पाथ्यः पथिषु भव (वृषा=वर्षकस्सूर्य) ६ १६ १५ [पाथस् इति व्याख्यातम् । ततो भवार्थे यत् । पथिन्प्राति० वा भवार्थे यत्]

पादगृह्य पादान् ग्रहीतु योग्य (शत्रुर्जन) ४ १८ १२ [पादोपपदे ग्रह उपादाने (क्र्या०) धातो क्यप् प्रत्यय-श्छान्दस]

पादम् चरणम् ७ ३२.२ **पादः**=एकोऽगो भागो वा ३१ ३ प्रकाश्यमान जगदेकगुणम् ऋ० भू० १२१, ३१ ३ **पादाः**=पत्तव्या (कर्मोपासनाज्ञानानि काला सवनानि वा) ४ ५८ ३ पद्यन्ते गच्छन्ति यैस्ते २९ २० अधिगमसाधनानि १७ ९१. **पादौ**=नीचस्थानीयौ (पदार्थौ) ३१.१० चरणौ ६ ४७ १५ [पद गतौ (दिवा०) धातो. 'पदरुजविशस्पृशो घञ्' इति घञ्प्रत्यय । प्रतिष्ठा वै

योग्या (इक्षव =गुडादिनिमित्ता) २५ १ पालनीया (धिय =प्रज्ञा) ७ २७ १ **पार्ये**=पालयितव्ये (शूरसातौ=सङ्ग्रामे) ६ २६ १ पालनीये पूर्णे वा (दिवि=प्रकाशे) ७ ३२ १४ पालयितु पूरयितु योग्ये (दिवि=कामे) ७ ३२ २१ पूरयितव्ये (शर्मन्=गृहे) ६ ३३ ५ पारयितव्ये (भरद्वाजे=राज्यपोषकव्यवहारे) ६ १७ १४ [पार कर्मसमाप्तौ (चुरा०) धातोर्णिजन्ताद् यत् अथवा पृ पालनपूरणयो (जु०) धातो 'ऋहलोर्ण्यत्' इति ण्यत्-प्रत्यय]

पार्वतेयी पर्वतस्य मेघस्य दुहितेव या सा पार्वतेयी (धिषणा=धारण वती द्यौ) प्र०—पर्वत इति मेघनामसु पठितम्, निघ० १ १०, पर्वतस्येय घनपङ्क्ति पार्वती तस्याऽपत्य दुहितेव पार्वतेयी वृष्टि 'स्त्रीभ्यो ढक्' अ० ४ १ १२० अनेन ढक्-प्रत्यय १ १९ [पर्वत इति मेघनाम निघ० १ १० तत 'तस्येदम्' इत्यण्प्रत्ययान्तान् ङीप्। तत 'स्त्रीभ्यो ढक्' इत्यपत्यार्थे ढक्। 'टिड्ढाणञ्०' इति ङीप्]

पार्श्वत: समीपात्, उभयत इतस्ततोऽङ्गात् २१ ४४, ४३, ४५ [स्पृश सस्पर्शने (तुदा०) धातो 'स्पृशे श्वण्शुनौ पृ च' उ० ५ २७ सूत्रेण श्वण्प्रत्यय 'पृ' आदेशश्च। स्पृशति येन स पार्श्व । तत 'तसिप्रकरणे आद्यादिभ्य उपसख्यानम्' अ० ५ ४ ४४ वा० सूत्रेण तसि]

पार्श्वयो: वाम-दक्षिणभागयो २४ १ **पार्श्वे**=अग्रे पृष्ठे ३१ २२ [पूर्वपदे व्याख्यातम्। पार्श्वौ द्यावापृथिवीनाम निघ० ३ ३०]

पार्ष्ण्या पार्ष्णिषु कक्षासु साधूनि (ताडनानि) २५ ४० स्पर्शकारकेण (कशया) १ १६२ १७ [पर्षति सिञ्चतीति विग्रहे पृषु सेचने (भ्वा०) धातो 'घृणिपृश्निपार्ष्णि०' उ० ४ ५२ सूत्रेण नि प्रत्ययो वृद्धिश्च निपात्यते। पार्ष्णि प्राति० 'तत्र साधु' इत्यर्थे यत्। तत शेर्लोप]

पावक ! पवित्रकारक पवित्रताहेतोर्वा (विश्वेश्वर भौतिकाऽग्ने वा) १ १३ १ पवित्रकर्त्त शुद्धिहेतुर्वा (अग्ने=जगदीश्वर भौतिकोऽग्निर्वा) १ १२ १० पुनाति पवित्रता करोति तत्सम्बुद्धावीश्वर ! पवित्रताहेतुरग्निर्वा १ १२ ९ वह्निवत् पवित्रकारक (विद्वज्जन) ३ १० ८ जनाऽन्त करणशोधक (अग्ने=विद्याप्रकाशोपदेशक) १७ ८ **पावकम्**=पवित्रकारकम् (मरुता गणम्) १ ६४ १२ पवित्रकर वह्निम् ५ ४ ३ **पावक:**=पवित्रकर (अग्निरिव विद्वज्जन) ५ ७ ४ शुद्धिप्रचारक (विद्वान् राजा वा) १७ १५ शोधक (भा०—पवित्रो जन) १७ ११ पवित्रकारी (विद्वान् गृहस्थो जन) १७ ७ प्रकाशितयशा (राजा) ७ ३ ९ पवित्रीकर (विद्वज्जन) ७ ९ १ **पावका:**=पवित्रा पवित्रकरा (प्रजासेनाध्यक्षा) ३ ३१ २०. **पावके**=वह्निरिव पवित्रस्तस्मिन् (राजनि) ६ ५ २ [पूङ् पवने (भ्वा०) धातो कर्त्तरि ण्वुल्-प्रत्यय । यद्वै शिव शान्त तत्पावकम् श० ९ १ २ ३० अन्न वै पावकम् श० २ २ १ ७]

पावकया पावकस्य क्रियया ६ १५ ५ पवित्रकारिकया (कृपा=सामर्थ्येन) १७ ९१ **पावका**=पाव पवित्रकारक व्यवहार काययति शब्दयति या सा (सरस्वती=सर्वविद्याप्रापिका वाक्) प्र०—'पूञ् पवने' इत्यस्माद्भावार्थे घञ्, तस्मिन् सति 'कै शब्दे' इत्यस्माद् 'आतोऽनुपसर्गे क' अ० ३ २ ३ इति क प्रत्यय 'उपपदमतिङ्' अ० २ २ १९. इति समास. १ ३ १० पवित्रकारिका (सरस्वती=सुसस्कृता वाक्) २० ८४. पवित्रस्वरूप और पवित्र करने वाली सत्यभाषणमय मङ्गलकारक वाणी आर्याभि० १ ८ ऋ० १ १ ६ १० **पावकायै**=पवित्रकर्त्र्यै (सरस्वत्यै=वाचे) २२ २० **पावका:**=पवित्रकर्त्र्य (आप =जलानि) ७ ४९ २ पवित्रा (मिह =सेचका वृष्टय) ३ ३१ २० पवित्रकर्मकर्त्र्य (उपस =प्रभातवेलेव दुहितर) ४ ५१ २. वह्नय इव वर्त्तमाना (मरुत =मनुष्या) ७ ५६ १२ [पूङ् पवने (भ्वा०) धातो कर्त्तरि ण्वुल्। तत स्त्रिया टाप्। 'पावकादीना छन्दस्युपसख्यानम्' अ० ७ ३ ४५ वा० सूत्रेण इत्व न भवति। अथवा पाव-कपदयो समासे स्त्रिया टाप्। पाव =पूङ् पवने (भ्वा०) धातोर्घञ्। क =कै शब्दे (भ्वा०) धातो क प्रत्यय]

पावकवर्चा: पवित्रीकारिकाया विद्युतो वर्चो दीप्तिरिव वर्चोऽध्ययन यस्य स (पुत्र) १२ १०७ [पावकावर्चस्-पदयो समास । पूर्वपदस्य ह्रस्व]

पावकवर्णम् अग्निवत् प्रकाशमानम् (यज्ञ=गृहाश्रमाख्यम्) १७ ६ **पावकवर्णा:**=पावकवत् पवित्रो गौरो वर्णो येषा ते ब्रह्मवर्चस्विन (विपश्चित =विद्वासो जना) ३३ ८१ [पावक-वर्णपदयो समास]

पावकशोचिषम् पवित्रकरदीप्तिम् (विद्युदाख्य वह्निम्) ३ ९ ८ पावकस्य शोचिरिव शोचिर्दीप्तिर्यस्य तम् (अग्नि=वह्निम्) ४ ७ ५ **पावकशोचिष:**=पावकस्याऽग्ने शोचिर्दीप्तिरिव शोचिर्यस्य विदुषस्तस्य ३ ११ ७. **पावक-**

पारयथ=पार प्राप्नुथ २ ३४ १५. **पारयन्ति**=पार गमयन्ति १ १८२ ६ **पारयात्**=समुद्रपार गमयेत् १ १४० १२ [पार कर्मसमाप्तौ (चुरा०) धातोर्लोट्। अन्यत्र लटलेटावपि]

पारयन्ता पार गमयन्तौ (इन्द्राविष्णू=महाराजशिल्पिनौ) ६ ६९ १ [पार कर्मसमाप्तौ (चुरा०) धातो शतृप्रत्यय। 'सुपा सुलुग्०' सूत्रेण प्रथमाद्विवचनस्याकारादेश]

पारयन्ती विजय प्रापयन्ती (ज्या=प्रत्यञ्चा) २९ ४० पार प्रापयन्ती (योषा=पत्नी) ६ ७५ ३ [पार कर्मसमाप्तौ (चुरा०) धातो शत्रन्तात् ङीप्। पारयन्ती=पार नयन्ती नि० ९ १८]

पारयामसि रोगसमुद्रात् पार गमयेम १२ ९६ [पार कर्मसमाप्तौ (चुरा०) धातोर्लेट्। 'इदन्तो मसि' इति मस इदन्तता]

पारयिष्णवः रोगजदुःखेभ्य पार नेतु समर्था (ओषधी=सोमादीन्) १२ ७७ **पारयिष्णुः**=दुःखात् पारयिता (सेनाध्यक्षो राजा) ६ ९ [पार कर्मसमाप्तौ (चुरा०) धातो 'णेश्छन्दसि' अ० ३ २ १२७ सूत्रेण तच्छीलादिष्वर्थेषु इष्णुच्]

पारावतघ्नीम् पाराऽवारघातिनीम् (सरस्वती=विदुषी स्त्रियम्) ६ ६१ २ ['पारावत' इत्युपपदे हन हिंसागत्यो (अदा०) धातो टक् 'क्तो बहुल वा' इति वा० सूत्रेण। ततो ङीप्। पारावतघ्नीम्=पारावारघातिनीम् नि० २ २४]

पारावतान् कलरवान् (कपोतान्) २४ २५ **पारावताः**=परावति दूरदेशे भवा (चित्रा=रूपाणि) ५ ५२ ११ [परप्राति० मतुप्प्रत्यये परवत्। छान्दस पूर्वस्य दीर्घ। परावत्प्राति० भवार्थेऽण्। अथवा पारापतशब्दोऽयम्। पकारस्य वकार पृषोदरादित्वात्। पारापत=परोपपदे आङ्पूर्वात् पततेरच्प्रत्यय]

पारिषत् सुखे प्रजा पालयेत् प्र०—अत्र पॄ-धातोर्लेटि सिप् 'सिब्बहुल णिद्' इति वार्तिकेन णित्वाद् वृद्धि १ १०० १४ [पॄ पालनपूरणयो (जु०)धातोर्लेट्। 'सिब्बहुल लेटि' इति सिप्। तस्य च णित्वाद् वृद्धि]

पारुष्णान् पक्षिविशेषान् २४ २४

पार्जन्यः पर्जन्यवद्गुण (सुपर्ण=पक्षिविशेष) २४ ३४ मेघदेवताक (पशु) २४ ३ **पार्जन्याः**=मेघदेवताका (नभोरूपा=पशव पक्षिणो वा) २४ ६ [पर्जन्य इति व्याख्यातम्। तत 'साऽस्य देवता' इति सूत्रेण अण्प्रत्यय]

पार्थवानाम् पृथौ विस्तीर्णाया विद्याया भवाना राज्ञाम् ६ २७ ८ [पृथुप्राति० 'तत्र भव' इत्यर्थेऽण्प्रत्यय]

पार्थिवम् पृथिव्या सम्बन्धि (रज=लोक) ३४ ३२ पृथिव्या विकारम् (रज=द्व्यणुकादिरेणु) १३ २८ पृथिव्या विदितम् (रज=अणुत्रसरेण्वादि) १ ९० ७ पृथिवीमय पृथिव्यामन्तरिक्षे वा विदितम् (रज) १ ८१ ५ **पार्थिवस्य**=पृथिव्या विदितस्य पदार्थविज्ञानस्य १ १४४ ६ **पार्थिवः**=पृथिव्या विदित (पदार्थ) २७ ३६ **पार्थिवात्**=पृथिवीसयोगात (दिव=प्रकाशात्) प्र०—'सर्वभूमिपृथिवीभ्यामणञौ' अ० ५ १ ४१ इति सूत्रेण पृथिवीशब्दादञ्प्रत्यय १ ६ १० **पार्थिवानाम्**=पृथिव्यामन्तरिक्षे विदिताना मध्ये १ ९५ ३ **पार्थिवानि**=पृथिव्यामन्तरिक्षे भवानि विदितानि वा (परमाण्वादीन्) ६ ६१ ११ पृथिव्या विकारा अन्तरिक्षे विदितानि च (रजासि=लोकान्) प्र०—अत्र 'तत्र विदित इति च' अ० ५ १ ४३ अनेनाऽञ्-प्रत्यय ५ १८ पृथिवीविकारजातानि (शारीरिकबलादीनि) १ १५५ ४ अन्तरिक्षे विदितानि कार्याणि (रजासि=लोकान्) प्र०—पृथिवीत्यन्तरिक्षनाम निघ० १ ३, ५ ८१ ३ पृथिव्यादिकृतानि वा (कार्याणि) ६ ६ ६ **पार्थिवाः**=पृथिव्या विदिता राजानो बहुमूत्या पदार्था वा ७ ३५ ११ **पार्थिवे**=पृथिवीसम्बन्धिभूगर्भविद्यायाम् ऋ० भू० २६४ [पृथिवीप्राति० विदितार्थे 'तत्र विदित इति च' सूत्रेण निमित्ते सयोगोत्पातौ च 'सर्वभूमिपृथिवीभ्यामणञौ' सूत्रेणाञ्प्रत्यय। अथवाभवार्थेऽञ्]

पार्थिवा पृथिवीत्याख्यस्य कारणस्य विकारभूतानि भूगोलाख्यानि कार्याणि १ ६४ ३ पृथिव्या विदितानि (वसूनि=द्रव्याणि) ६ ४५ २० [पार्थिवप्राति० शेर्लोपश्छन्दसि। पार्थिव इति व्याख्यातम्]

पार्थिवासः पृथिव्या विदिता (अग्नय=पावका) ३५ ८ पृथिव्या भवा (पदार्था) ६ ५० ११ [पार्थिवप्राति० जसोऽसुगागम। पार्थिव इति व्याख्यातम्]

पार्यम् पार्य्यते समाप्यते कर्म येन तम् (वीरजनम्) १ १२१ १२ **पार्याणि**=परितु पूरयितु योग्यानि (पक्ष्माणि=कर्माणि नेत्रोर्ध्वलोमानि वा) २५ १ **पार्याय**=दुःखेभ्य पारे वर्त्तमानाय (जनाय) १९ ४२ पारभवाय (व्यवहाराय) ४ १६ ११ दुःखपार गमयते (अवसे=रक्षणायाय) ४ २५ १ **पार्याः**=परितु पालयित

२ ३१. विद्याऽऽनन्ददायकास्तत्सम्बुद्धौ (जनकादय) २ ३१ सेवितु योग्यास्तत्सम्बुद्धौ, ये पान्ति विद्यान्नादिदानेन तत्सम्बुद्धौ, अन्नभोगादि विद्याशिक्षकास्तत्सम्बुद्धौ, श्रेष्ठाना पालका दुष्टेपु क्रोधकारिणस्तत्सम्बुद्धौ, पापाऽऽपत्काल-निवारकास्तत्सम्बुद्धौ, प्रीत्या पालकास्तत्सम्बुद्धौ, विद्या-दातारस्तत्सम्बुद्धो, धर्म्यजीविकाज्ञापकास्तत्सम्बुद्धौ, दुःख-नाशकत्वेन रक्षकास्तत्सम्बुद्धौ (जनकादय) २.३२ पान्त्यन्नसुशिक्षाविद्यादानेन तत्सम्बुद्धौ (भ०—जनका विद्याप्रदाश्च जना) ३ ५५ विज्ञानवन्त (विद्वासो जनका) ३ ५५ २ ऋतव इव पालयितार (सज्जना) ७ १८ १ प्रजापालका (विद्वासो जना) १९ ४५. रक्षितार (जीवन्तो विद्वास) १९ ४६ पालनक्षमा (राजपुरुषा) २९ ४६ **पितरौ**=पालकौ मातापितरौ १५ ५३ माता पिता च द्वौ १९ ११ जननीजनकौ १ १२१ ५ **पितः!**= पालयितो रुद्र (सभाध्यक्ष) १ ११४ ९. पितृस्वरूप (सद्वैद्य) २.३३ १ **पिता**=प्रजापालको राजा १ १६६ १६ सर्वपालकेश्वर पालनहेतु सूर्यलोको वा २ ११ पालकोऽग्निर्विद्युद्वा १ १६० २ जगतो जनक (इन्द्र = ईश्वर) ४ १७ १७ ज्ञानप्रदानेनाऽऽस्तिकत्वेन वा रक्षक (विद्वान्) ३२ ९ पालयिता (सज्जन) १ १६४ अनूचानो-ऽध्यापक १ ८० १६ सर्वपालक ईश्वर २ ११ नित्य पालन करने वाला (जनक) आर्याभि० २ ४२, १७.२७ **पितुः**= जनकवद्वर्त्तमानस्याऽध्यापकस्य १ ११९ ८ जनकस्येश्वरस्य वा ३२ ९ मध्यलोकस्य ३४ ३२ उत्पादिकाया विद्युतः १७ ६० पालकस्य जनकस्य १ ८७ ५ **पितृभिः**=ज्ञानिभि ऋतुभिर्वा प्र०—त वा एते ऋतव शत० २ १ ३ २ अनेन पितृशब्दादृतवो गृह्यन्ते 'पितर इति पदनामसु पठितम्' निघ० ५ ५ अनेन ज्ञानवन्तो मनुष्या गृह्यन्ते ५ ११ **पितृभ्यः**=राज्यपालकेभ्यो वीरेभ्य १ ११९ ४ पालकेभ्यो जनकाऽध्यापकादिभ्य १९ ३६ जनकेभ्यो विद्यासुशिक्षा-दातृभ्यो वा ३५ २० पालनहेतुभ्य ऋतुभ्य प्र०—ऋतवो वै पितर शत० २ ५ २ ३२, २ ७. ये चतुर्विंशतिवर्ष-पर्यन्तेन ब्रह्मचर्येण विद्यामधीत्याध्यापयन्ति ते वसुसञ्ज्ञका पितरस्तेभ्य ऋ० भू० २६५, १९ ३६ **पितृभ्याम्**= जनकजननीभ्याम् ३ ७ ६ अधिष्ठातृ-शिक्षकाभ्याम् १ १११ १ **पितॄन्**=ऋतून् ८ ६० पूर्वोक्तान् (२९-३३) मन्त्रेषूक्त-गुणेभ्यो युक्तान् जनकान् विद्याप्रदांश्च २ ३४ भा०— विद्यावयोवृद्धान् पित्रादीन् १९ ६१ **पितॄणाम्**=जनकाना स्वामिना वा ६ ४६.१२ जनक-जननीनाम् २४ १८ पाल-काना विज्ञानवता विदुषा रक्षाऽनुयुक्तानामृतूना वा १ १०९ ३ **पित्रा**=पालकेनाऽऽचार्येण वा ६ ६ ३ वायुना २२ १९ **पित्रे**=विद्या-प्रकाशदानेन पालयित्रे (दिवे= प्रकाशाय) १ ७१ ५ **पित्रोः**=द्यावापृथिव्यो ३ ५ ८ वाय्वाकाशयो १ १६० ३ जनकजनन्यो ३ २६ ९ माता-पित्रोरिव विद्याऽऽचार्ययो ६ ७ ४ [पाति रक्षतीति पिता। पा रक्षणे (अदा०) धातो 'नप्तृनेष्टृत्वष्टृ०' उ० २ ९५ सूत्रेण तृजन्तो निपात्यते। माता च पिता चेति पितरौ। 'पिता मात्रा' अ० १ २ ७० सूत्रेण एकशेष। पिता पाता वा पालयिता वा नि० ४ २१ पिता=गोपिता नि० ६ १५ पितर =मनुष्या वै जागरित पितर सुप्तम् श० १२ ९ २.१. रात्रि पितर श० २ १ ३ १ तिर इव वै पितरो मनुष्येभ्य श० २ ४ २२ १. पितरो नमस्या श० १ ५ २.३ यानग्नि-रेव दहन्त्स्वदयति ते पितरो ऽग्निष्वात्ता श० २ ६.१ ७ ये वा यज्वानो गृहमेधिन। ते पितरोऽग्निष्वात्ता तै० १ ६ ९ ६ अर्धमासा वै पितरोऽग्निष्वात्ता तै० १ ६ ८ ३ अथ ये दत्तेन पक्वेन लोक जयन्ति ते पितरो बर्हिषद श० २ ६ १ ७ ये वै यज्वान, ते पितरो बर्हिषद तै० १ ६ ९.६ मासा वै पितरो बर्हिषद तै० १ ६ ८ ३. तद् ये सोमेने-जाना। ते पितर सोमवन्त श० २ ६ १ ७ सोमप्रयाजा हि पितर तै० १ ६ ९ ५ इन्दव इव हि पितर। मन इव ता० ६ ९ पितृदेवत्यो वै सोम श० २ ४ २ १२ ओषधि-लोको वै पितर श० १३ ८ १ २० षड् वा ऋतव पितर श० ९ ४ ३ ८ क्षत्र वै यमो विश पितर श० ७ १ १ ४ य (अर्धमास) अपक्षीयते स पितर श० २ १. ३ १ अपक्षयभाजो वै पितर कौ० ५ ६ अपराह्ण पितर श० २ १ ३ १ अन्तभाजो वै पितर कौ० १९ ८. मर्त्या पितर श० २ १ ३ ४ अनपहतपाप्मान पितर श० २ १ ३ ४ पितृलोक पितर कौ० ५ ७ पितर प्रजापति गो० उ० ६ १५ मन पितर श० १४ ४ ३ १३ ह्नीका हि पितर तै० १ ३ १० ६ हरणभासा हि पितर तै १ ३. १० ७ ऊष्मभागा हि पितर तै० १ ३ १० ६ देवा वा एते पितर गो० उ० १ २४ स्विष्टकृतो वै पितर गो० उ० १ २५ स्वधा वै पितॄणामन्नम् श० १३.८ १ ४ पितरा युवाना (यजु० १५ ५३) वाक् च वै मनश्च पितरो युवाना श० ८ ६ ३ २२ प्राणो वै पिता ऐ० २ ३८ एष वै पिता य एष (सूर्य) तपति श० १४ १ ४ १५ असौ (द्यौ) पिता तै० ३ ८ ९ १ श० १३ १ ६ १ एष वै पिता य एष (सूर्य) तपति श० १४ १ ४ १५ त्रयो वै पितर (सोमवन्त, बर्हिषद, अग्निष्वात्ता) श० ५ ५ ४ २८ पितरो नाराशस काठ० ३४ १६ सवत्सरो वै पिता वैश्वानर

शोचिषे=पावकस्य शोचि प्रकाश इव प्रकाशो यस्य तस्मै (विदुषे जनाय) ५ २२ १. **पावकशोचे**=पावकस्याऽग्ने शोचिर्दीप्तिरिव द्युतिर्यस्य तत्सम्बुद्धौ (अग्ने=विद्वज्जन) ३ २ ६ पवित्रप्रकाशक (परमेश्वर) ६ १५ १४ [पावक-शोचिष्पदयो समास । शोचिष् ज्वलतो नाम निघ० १ १७ पावकशोचिषम्=पावकदीप्तिम् नि० ४ १४ 'पावकशोचे' पदे 'शोचि' रितीकारान्त पद न तु सकारान्तम्]

पावकास. पवित्रकारका (मत्वान=वलपराक्रम-प्राणिभूतगणा) १ ६४ २ पवित्रकारिका (वाच) १ १४२ ६ [पावकप्राति० जसोऽसुगागमः]

पावकेभिः पवित्रै (मरुद्भि=मनुष्यै) ५ ६०.८ [पावकप्राति० भिस ऐसादेशो न भवति 'वहुल छन्दसि' सूत्रेण]

पावीरवी शोधयित्री (विदुषी कन्या) ६ ४६ ७ [पविरिति वज्रनाम (निघ० २ २०) ततो मत्वर्थीय इरन् छान्दस । पवीरमायुध तद्वान् पवीरवान् । पवीरवत्प्राति० 'सास्य देवता' इत्यण्प्रत्यये छान्दस रूपम् । पवि शल्यो भवति यद् विपुनाति काय तद्वत् पवीरमायुधम्, तद्वान् इन्द्र पवीरवान् । '' '''तद्देवता वाक् पावीरवी, पावीरवी च दिव्या वाक् नि० १२ ३० वाग्वै सरस्वती पावीरवी ऐ० ३ ३६]

पाशद्युम्नस्य पाशात् प्राप्त द्युम्न यशोधन येन तस्य (उत्तमजनस्य) ७ ३३ २ [पाश-द्युम्नपदयो समास । पाशमिति व्याख्यास्यते । द्युम्नम्=धननाम निघ० २ १०]

पाशम् वन्धनम् भा०—पापवन्धनम् १२ १२ धर्म्य वन्धनम् १२ ६५ वन्धन को, स० वि० १६६, अथर्व० २ ३ २४ **पाशान्**=वन्धनानि ५ २ ७ वन्धकान् (मोहादीन्) ७ ५६ ८ अधर्माचरणजन्यवन्धान् १ २४ १३ **पाशाः**=वन्धनानि २ २७ १६ **पाशैः**=वन्धनसाधनै प्र०—'पश वन्धने' इत्यस्य रूपम् १ २५ अ०—वन्धनहेतुभि किरणै १ २६ साम-दाम-दण्ड-भेदादिकर्मभि १ २६ [पश वन्धने (चुरा०) धातोर्घञ्प्रत्यय । पाश पाशयतेर्विपाशनात् नि० ४ २ वारुणो वै पाश तै० ३ ३ १० १ नैर्ऋतो वै पाश श० ७.२ १ १५]

पाशिनः वहुपाशयुक्ता व्याधा २० ५३ पाशवन्तो वन्धनाय प्रवृत्ता (जना) ३ ४५ १ [पाशमिति व्याख्यातम् । ततो भूम्न्यर्थ इनि प्रत्यय]

पाष्या पोषणयोग्यानि कर्माणि प्र०—अत्र पिष्लृ-धातोर्ण्यत्, वर्णव्यत्ययेन पूर्वस्याऽऽकार 'सुपा सुलुक्०' इत्याकारादेशश्च १ ५६ ६ [पिष्लृ सञ्चूर्णने (रुधा०) धातोर्ण्यत् । धातोरिकारस्याकारश्छान्दस । पाष्यप्राति० शेर्लोपश्छन्दसि]

पास्त्यस्य गृहे भवस्य (जनस्य) ४ २१ ६ [पस्त्य-प्राति० भवार्थेऽण् । पस्त्यमिति गृहनाम निघ० ३ ४]

पांसव्याय पांसुषु धूलिषु भवाय (जनाय) १६ ४५ [पांसुप्राति० भवार्थेऽण् । पांसु=पसि नाशने (चुरा०) धातो 'अर्जिदृशिकम्यमिपशि०' उ० १ २७ सूत्रेण कु. प्रत्ययो दीर्घश्च]

पांसुरे प्रशस्ता पासवो रेणवो विद्यन्ते यस्मिन्नन्तरिक्षे तस्मिन् प्र०—'नग-पासु-पाण्डुभ्यश्चेति वक्तव्यम्' अ० ५ २ १०७ अनेन वार्तिकेन प्रशसार्थे र प्रत्यय १ २२ १७ पासवो रेणवो रजासि रमन्ते यस्मिन्नन्तरिक्षे तस्मिन् ५ १५ [पासुरिति पूर्वपदे व्याख्यातम् । तत मत्वर्थे 'नगपासुपाण्डुभ्यश्चेति वक्तव्यम्' अ० ५ २ १०७ वा० सूत्रेण र प्रत्यय]

पिकः कोकिल २४ ३६ [अपि कायति शब्दायते इति विग्रहे 'अपि' उपपदे कै शब्दे (भ्वा०) धातो क प्रत्यय]

पिङ्गलः सुन्दर वर्णयुक्त (ब्रह्मचारी) स० वि० ६३ अथर्व० ११ ५ २६ [पिजि वर्णे (अदा०) धातोर्वाहु० औणादिक कल प्रत्यय]

पिङ्गाक्षम् पिङ्गे पीतवर्णेऽक्षिणी यस्य तम् (जनम्) ३० २१ पीताऽक्षन् (जनम्) ३० २१ [पिङ्ग-अक्षिपदयो समास]

पिठीनसे पिठीव नासिका यस्य तस्मै (वीरजनाय) ६ २६ ६ [पिठी-नासिकापदयो समासे नासिकाया स्थाने नस् आदेश]

पिणक् पिष्या ३ ३० ८ [पिष्लृ सञ्चूर्णने (रुधा०) धातोर्लङि छान्दस रूपम्]

पितरम् पालक जनक विद्वास वा १ १९४ ७ पालक सूर्यम् १ १६४ १८ परमात्मानम् १ १६४ २२ पितृवत् पालन-निमित्तम् (सूर्यम्) १ १६४ १२ पालयितार जनकमध्यापक वा प० वि० पितृवद्वर्त्तमानम् (विपश्चित=विद्वज्जनम्) ३ २६ ६ भा०—रक्षकम् (स्व=आदित्यम्) ३ ६ **पितरः**=ये पान्ति पितृवद् रक्षन्ति विद्यासुशिक्षादिदानैस्ते (अङ्गिरसः=विद्वासो जना) १ ६२ २. विज्ञान-वयोवृद्धा (धर्मिष्ठा जना) ६ ७५ ६. पान्ति पालयन्ति सद्विद्यासुशिक्षाभ्या ये ते तत्सम्बुद्धौ (भा०—विद्वासोऽध्यापका).

विशरणगत्यवसादनेषु (भ्वा०) धातो 'कृत्यल्युटो बहुलम्' इति कर्त्तरि ल्युट्]

पितृषदे पितरो विद्याविज्ञापका विद्वांस सीदन्ति यस्मिँस्तस्मै (राज्ञे) १ ११७ ७ ['पितृ' इत्युपपदे षद्लृ विशरणगत्यवसादनेषु (भ्वा०) धातोरधिकरणे क्विप्]

पितेव यथा दयमान पिता तथा १ १०४ ९ पितृवत् २ २९ ५. जनक इव ६ ५२ ६ [पिताऽइव-पदयो समास]

पित्तम् तेज १७ ६]

पित्र्या पितृषु भवा (धी =प्रज्ञा) ३ ३९ २ [पितृ-प्राति० भवार्थे यत्। तत स्त्रिया टाप्]

पित्र्याणि पितृभ्य आगतानि (सख्या=मित्रभाव-कर्माणि) १ ७१ १० पितृणा सेवनादीनि ७ ५६ २३ [पितृप्राति० आगतप्रार्थे 'पितुर्यच्च' अ० ४ ३ ७९ सूत्रेण यत्]

पित्र्यास: पितृभ्यो हिता (मर्त्ता =मनुष्या) ७ १ ९ [पितृप्राति० हितार्थे यत्। पित्र्यप्राति० जसोऽसुक्]

पित्व: अन्नादिकम् ६ २० ४ अन्नस्य ५ ७७ ४ सुरभिपानम् १९ ५६

पिद्व: मृगविशेष २४ ३२

पिनष्टि सघर्षयति १ १९१ २ [पिष्लृ सञ्चूर्णने (रुधा०) धातोर्लट्]

पिनाकम् पाति रक्षति आत्मान येन तद्धनुर्वर्मादिकम् प्र०—'पातेर्नुक् च' उ० ४ १५ इति पातेराक प्रत्यय १६ ५१ [पा रक्षणे (अदा०) धातो 'पिनाकादयश्च' उ० ४ १५ सूत्रेणाक प्रत्यय। पिनाक प्रतिपिनष्टयनेन नि० ३ २१.]

पिनाकावस: पिनष्टि शत्रून् येन तत् पिनाक तेनाऽवसो वा पिनाकस्यावसो रक्षण वा यस्मात् स (रुद्र = शूरवीर सेनाध्यक्ष) ३ ६१ [पिनाक-अवसपदयो समास.। पिनाकमिति व्याख्यातम्। अवस =अव रक्षणादिषु (भ्वा०) धातोरसच्प्रत्यय]

पिन्व पुष्णीहि सिञ्च १४ ८ सेवस्व ६.३९ ५ सुशिक्षया सिञ्च १४ १७ **पिन्वत**=सिञ्चत ५ ८३ ६ **पिन्वतम्**=सेवेथाम् १ ११८ २ तर्पयतम् ५ ६२ ३ सिञ्चतम् १ १५१ ६ सुखयतम् ६ ६३ ८ प्रीत्या सेवेथाम् १ ३४ ३ प्रापयतम् १ ३४ ४ **पिन्वताम्**=सुखयेताम् ६ ७० ६ **पिन्वते**=सेवते सिञ्चति वा प्र०—अत्र व्यत्ययेनाऽऽत्मनेपदम् १ ५४ ७ प्रीणाति १ १२५ ५ सेवन्ते ५ ८३ ४ **पिन्वथ**=प्रीणयतम् ५ ६२ २ सेवेथाम् १ ११२ ३ **पिन्वध्वम्**=सेवध्वम् ७ ३४ ३ **पिन्वन्त**=सिञ्चन्ति ७ ३४.३. **पिन्वन्ति**=सेवन्ते सिञ्चन्ति वा १ ६४ ६ प्रीणन्ति ५ ५४ ८ **पिन्वसि**=सेवसे १.१२९ ३ ददासि ७.५ ८ **पिन्वस्व**=तृप्नुहि भा०—सुख लभस्व ३८ ४. सन्तुष्टो भव ३८ ४ स्वतन्त्रतया सदैव पुष्टिमत प्रसन्नान् कुरु ऋ० भू० १५२, ३८ १४ यथावत् पुष्ट कर आर्याभि० २ ३१, ३८ १४ समर्थ कर पुष्ट और बल से युक्त कर, आर्याभि० २ ३१, ३८ १४. [पिवि सेवने सेचने च (भ्वा०) धातोर्लोट्। अन्यत्र लड् अपि]

पिन्वमानम् सिञ्चमानम् (समुद्रम्=अन्तरिक्षमिव-सागरम् १३.२ **पिन्वमान:**=सिञ्चन् (वाजी=वेग-वानश्व) १७ ९५ सेवमान (अग्नि =जातप्रज्ञो जन) २९.१ प्रसादयन् (विद्वज्जन) ४ ५८ ७ [पिवि सेवने सेचने च (भ्वा०) धातो शानच्। व्यत्ययेनात्मनेपदम्]

पिन्वमाना सयुक्ता (सरस्वती=नदी) ६ ५२.६ सिक्ता सेविता (सीता=काष्ठपट्टिका) १२ ७० **पिन्वमाना:**=सेवमाना प्रीतिहेतव (गुदा =गुह्येन्द्रियाणि) प्र०—पिवि सेवने सेचने च १९ ८६ सिञ्चमाना प्रीणन्त्य (नद्य) ७ ५० ४ *सिञ्चन्त्य (सिन्धव =नद्य)* ६ ५२ ४ **पिन्वमाने**=सेवन्त्यौ (नद्यौ) ३ ३३ २. [पिवि सेवने सेचने च (भ्वा०) धातो शानच्। तत स्त्रिया टाप्]

पिपर्त्तन पूरयन्तु १ १६६ ६ पिपृत, विद्याभि सेवया वा पूर्ण कुरुत १ १५६ ३. पालयन्तु १ १०६ १ [पृ पालन-पूरणयो (जु०) धातोर्लोट्। तप्रत्ययस्य तनबादेशश्छान्दस]

पिपर्त्ति पुष्टान् प्रसन्नान् करोति ऋ० भू० २३५, प्रपिपूर्त्ति १ १६४ पूर्ण करोति १ १५२ ३ तृप्त कर देता है स० वि० ८० अथर्व० ११ ५ ४ **पिपर्त्तु**=पालयतु पूरयतु वा १८ ५७ **पिपर्षि**=पालयसि, सद्गुणै पूरयसि वा ६ १५ ११ [पृ पालनपूरणयो (जु०) धातोर्लट्। अन्यत्र लोट्]

पिपिन्वथु: पिपूर्त्तम् १ ११२ १२. (पिवि सेवने सेचने च (भ्वा०) धातोर्लिट्]

पिपिशे पिश्यात् २ ३३ ९ पिनष्ट्यवयव इव वर्त्तते ६ ४९ ३ आश्रीयते ५ ५७ ६ **पिपिश्रे**=स्थूलाऽवयवानि कुर्वन्ति ५ ६० ४ [पिश अवयवे (तुदा०) धातोर्लिट्। 'पिपिश्रे'। प्रयोगे 'इरयो रे' सूत्रेण 'रे' आदेश। व्यत्ययेनात्मनेपदम्]

पिपिष्टे पिष्ट प्र०—अत्र व्यत्ययेनाऽऽत्मनेपदम् १ ३२ ६ [पिष्लृ सञ्चूर्णने (रुधा०) धातोर्लिट्। व्यत्येनात्मनेपदम्। षकारस्य शकारो वर्णव्यत्ययेन]

प्रजापति श० १५ १ १६]

पृषती अङ्गै सुसिक्ता (पशु-जाति) २४ २ **पृषतीभिः**=स्वगमनागमनवेगादिगुणै १ ६४ ८ मरुद्गतिभि २ ३६ २ वेगादिभि ५ ५८ ६ वायुगतिसदृशगतिविशिष्टाभि-र्धाराभि २ ३४ ३ पर्षन्ति सिञ्चन्ति धर्मवृक्ष याभिरद्भि १ ३७ २ **पृषतीषु**=सेचनकर्त्रीषु (भा०—उत्तमासु विद्यासु) ५ ६० २ **पृषती:**=अग्निवायुयुक्ता अप १ ८५ ५ मरुत्सम्बन्धिनीरप १ ८५ ४ सेचननिमित्ता गती ३ २६ ४ सेचनकर्त्रीरुदकधारा ५ ५७ ३ वायुजलगती ५ ५५ ६ पर्षन्ति सिञ्चन्ति याभिर्नाडीभिर्नदीभिस्ता (अ०—नाडी-र्नदीर्वा) २ १६ पर्षन्ति सिञ्चन्ति याभिस्ता शीघ्रगती मरुता धारणवेगादयोऽश्वा प्र०—पृषत्यो मरुतामित्या-दिष्टोपयोजननामसु पठितम् निघ० १ १५, १ ३६ ६ [पृषदिति शत्रन्त व्याख्यातम् । तत स्त्रिया ङीप् । पृषती गौर्धेनुर्दक्षिणा, सा हि वैश्वदेवी मै० २ ३ २ वैश्वदेवी हि पृषती काठ० १२ २]

पृषती सेक्तारौ जलगुणौ १ १६२ २१ स्थूलौ (हरी=हरणशीलावश्वौ) २५ ४४ [पृषदिति व्याख्यातम् । ततो नपुसके प्रथमाद्विवचने रूपम् । लिङ्गव्यत्यय]

पृषदश्वः पृषदिव वेगवन्तस्तुरङ्गा यस्य स (सेना-पति) १ ८७ ४ **पृषदश्वान्**=सिञ्चकानाशुगामिन पदार्थान् वा ५ ४२ १५ **पृषदश्वाः**=सिक्तजलाग्निनाऽऽशु-गामिनो महान्त (मरुत =विद्वासो मनुष्या) ७ ४० ३ पृषत पुष्ट्यादिना ससिक्ताऽङ्गा अश्वा येषान्ते (मरुत = मनुष्या) २५ २० सेनाया पृषन्तोऽश्वा येषान्ते (देवा = विद्वज्जना) १ ८९ ७ [पृषद्-अश्वपदयो समास । पृषदिति व्याख्यातम्]

पृषदश्वासः पृषत स्थूला सिञ्चिता अश्वा यैस्ते (प्राज्ञा राजजना) २ ३४ ४ पृषत पुष्टा पुष्टा अश्वा येषान्ते (देवा =विद्वज्जना) १ १८६ ८ पृषत सेचका अश्वा वेगादयो गुणा येषु ते (गन्तार =वायव) ३ २६ ६ [पृषद्-अश्वपदयो समासे जसोऽसुगागम । पृषदिति व्याख्यातम्]

पृषदाज्यम् दध्याज्यादिभोज्य वस्तु ३१ ६ पर्षन्ति सिञ्चन्ति क्षुन्निवृत्त्यादिकारकमन्नादि वस्तु यस्मिँस्तत् पृषच्चा-ऽऽज्य घृत मधुदुग्धादिकञ्च तत् (भक्ष्याऽन्नोपलक्षण वस्तु) ऋ० भू० १२३, ३१ ६ [पृषद्-आज्यपदयो समास । पृष-दिति व्याख्यातम् । आज्यम्='आङ् पूर्वादञ्जे सज्ञायामुप-सख्यानम्' अ० ३ १ १०६ वा० सूत्रेण अञ्जेराङ्पूर्वात् क्यप् । अन्न हि पृषदाज्यम् श० ३ ८ ४ ८ प्राणो हि पृष-दाज्यम् श० ३ ८ ४ ८ पय पृषदाज्यम् श० ३ ८ ४ ८ पशवो वै पृषदाज्यम् तै० १ ६ ३ २ प्राणापानौ वै पृष-दाज्यम् मै० ३ १० २ ४ प्राणापानौ वा एतौ पशूना यत् पृषदाज्यम् तै० स० ६ ३ ६ ६ ऐन्द्राग्न पृषदाज्य देवतया काठ० ३६ २]

पृषद्योनिः स्पृपतिर्वृष्टिर्योनिर्यस्या सा (गी =वाक्) ५ ४२ १ [पृषद्-योनिपदयो समास । पृषद् इति व्याख्या-तम् । योनि =यु मिश्रणेऽमिश्रणे च (अ०) धातो 'वहि-श्रिश्रुयुद्रु०' उ० ४ ५१ सूत्रेण नि प्रत्यय । योनि = परियुतो भवति नि० २ ८]

पृषद्वत् सेचकवत् ७ २ ४ [पृषत्प्राति० तुल्यार्थे वति । पृषदिति व्याख्यातम्]

पृषन्तम् विद्यादिशुभगुणान् सिञ्चन्तम् (जनम्) ४ ५० २ **पृषन्तः**=स्थूलाऽङ्गा (त्र्यम्बका =गवादय) २४ १८ [पृषु सेचने (भ्वा०) धातोरौणादिकोऽति प्रत्यय शतृवच्च]

पृष्टबन्धो य पृष्टान् जनानुत्तरेषु बध्नाति तत्सम्बुद्धौ [अग्ने=प्रकाशात्मन् विद्वन्) ३ २० ३ [पृष्ट-बन्धुपदयो समास । पृष्ट =प्रच्छ ज्ञीप्सायाम् (तुदा०) धातो क्त]

पृष्टः विदुष प्रति य पृच्छ्यते प्रष्टव्यो वा स (अग्नि =विज्ञानस्वरूप ईश्वर विद्युदग्निर्वा) १ ६८ २ सिक्त स्थित (अग्नि =सूर्य) ३३ ६२ प्रष्टु योग्य (रथ =रमणीय यानम्) ३ ४६ ४ ज्ञातुमिष्ट (अग्नि = प्रसिद्ध पावक) १८ ७३ [प्रच्छ ज्ञीप्सायाम् (तुदा०) धातो क्त]

पृष्ट्यामयी पृष्टौ पृष्ठ आमय क्लेशरूपो रोगो विद्यते यस्य स (विद्वज्जन) १ १०५ १८ [पृष्टचामयी= पृष्ठरोगी नि० ५ २१]

पृष्ठम् ज्ञीप्सितम् (स्व =सुखम्) १७ ६५ उपरि-भागम् १ १६६ ५ भूम्याद्यधिकरणम् ऋ० भू० १५४ अर्वाग् व्यवहार ११ २० पृथिवी आदि सब लोक का आधार आर्याभि० २ १३, १८ २६ परभागम् (नाक= मोक्षसुखम्) ३ २ १२ ज्ञातुमिच्छा १८ २६ प्रश्न शिष्ट च २२ ३३ प्रच्छनीयम् (धनम्) ४ ५ ६ पश्चाद्-भागम् १ ११५ ३ प्रच्छन्नम् ६ २१ पृष्ठभागम् १ ५८ २. आधा-रम् २३ ५० अधिकरणम् (समुद्रम्=अन्तरिक्षमिव सागरम्) १३ २ **पृष्ठात्**=समीपात् १७ ६७ उपरिभागात्

पुम्पाणां समूहे साध्व्य (स्त्रिय) २१ ४३ [पौरुषेय इति व्याख्यातम्। तत स्त्रिया 'टिड्ढाणञ्०' इति ङीप्]

पौल्कसम् पुल्कसस्याऽन्त्यजस्याऽपत्यम् प्र०—अत्र पृषोदरादित्वादभीष्टसिद्धि ३० १७

पौष्णः पूष्ण पृथिव्या अय सम्बन्धी (प्रजापति = जीव) ३६ ५ पूषदेवताका (श्याम पशु) २६ ५८ **पौष्णाः**=पुष्टिनिमित्तमेघदेवताका (श्यामा पशव) २४ ७ पुष्टिकरमेघदेवताका (श्यामा पशव) २४.१४ पुष्टिकर-सम्बन्धिन (कुलुङ्गाऽज-नकुलादय) २४ ३२ **पौष्णी**=पूषदैवत्यौ (पिशङ्गौ=पीतवर्णौ पशू) २६ ५६ [पूषन् इति व्याख्यातम्। तत 'सास्य देवता' इत्यण्-प्रत्यये 'अन्' अ० ६ ४ १६७ सूत्रेण प्रकृतिभावे प्राप्ते 'षपूर्वहन्धृत-राज्ञामणि' अ० ६ ४ १३५ सूत्रेणाकारलोप.]

पौंस्यम् पुसु साधु (बलम्) ४.३० २३. पुम्भ्यो हितम् (वीर्यं=पराक्रमम्) ४ ३० ८ पुरुषार्थम् २ १३ १० पुरुषार्थस्य भावम् १ १५५ ४ पुसो भावम् १ १५५ ३ पुसो भाव कर्म बल वा १ ८० १० पुरुषार्थयुक्त बलम् १.१०१ ३ **पौंस्यानि**=वचनानि ६ ३६.३ **पौंस्याय**= पुसु भवाय बलाय ७ ३० १ **पौंस्ये**=पुसो भवे यौवने १ ५६ ३ [पौंस्यानि बलनाम निघ० २ ९ पौंस्ये सग्राम-नाम निघ० २ १७ पुसुप्राति० भावे कर्मणि वा ष्यञ् प्रत्यय। अथवा हितार्थे साध्वर्थे भवार्थे वा यत् छान्दस]

पौंस्या पुम्भ्यो हितानि बलानि ४ ३२ ११ पुसो बलानि प्र०—पौंस्यानीति बलनामसु पठितम् निघ० २.९ 'शेर्लुगत्र १ ५ ६ पुमामिमानि बलानि ५ ५६ ४ पुरुषार्थ-जानि बलानि ६ ४६ ७ पुसु साधूनि बलानि १ १३६ ८ पौंस्यमिति व्याख्यातम्। तत शेर्लोपश्छन्दसि]

पौंस्येभिः उत्कृष्टै शरीरात्मबलै १ १०० १० पुरुषार्थै १ १६५ ७ [पौंस्यमिति व्याख्यातम्, तत 'बहुल छन्दसी' ति भिस ऐसादेशो न भवति]

प्यायताम् सर्वतो वर्धताम् ३८ १८ वर्धयताम्, प्र०—अत्राऽन्तर्गतो ण्यर्थ ५.७ **प्यायध्वम्**=आप्यायामहे वा प्र०—अत्र पक्षे व्यत्यय १ १ **प्यायन्ताम्**=पुष्टा भवन्तु १ ९३ १२ **प्यायय**=वर्धय वर्धयति वा ५ ७ **प्यायस्व**=पुपाण ३८ २१ प्यायते वा २ १४ वर्धस्व वर्धयेद् वा ५ ७ [ओप्यायी वृद्धौ (भ्वा०) धातोर्लोट्]

प्यासिषीमहि स्तुवीमहि प्र०—अत्र 'प्यैङ् स्तुतौ' धातो 'सिब्बहुलं छन्दसि' अ० ३ १ ३४ अनेन वार्त्तिकेन सिप् प्रत्यय २ १४ सर्वतो वर्द्धेमहि ३८ २१ [प्यैङ् वृद्धौ (भ्वा०) धातोर्लिङ्। सिब्विकरणश्छान्दस]

प्र प्रकृष्टार्थे क्रियायोगे १ १०.११ गुणैर्यत्प्रकृष्ट तदर्थे क्रियायोगे २ ११ अत्यन्तम् ८ ३ प्रगत १० ३० प्रकृष्ट-तया २.१५ प्रकृष्टम् २ १२ प्रयत्नेन १७ ३९ अधिक आर्याभि० २ ११, ३४ ३६ [आ इत्यर्वागर्थे, प्र परेत्यस्य प्रातिलोम्यम् नि० १ ३ प्रेव नश्यसि पराचीव नश्यसि नि० ९ २८ अन्तरिक्ष वै प्र ऐ० २ ४१ प्राणो वै प्र ऐ० २ ४०]

प्रउगम् प्रयोगार्हम् (उक्थ्यम्=उपदेष्टु योग्य वचनम्) १५ ११ [प्राणा प्रउगम् कौ० १४ ४ आर्ति-च्छन्दस प्रउग कौ० २३ ६ ग्रहोक्थ वा एतद्यत्प्रउगम् ऐ० ३ १]

प्रकङ्कताः प्रकृष्टपीडाप्रदाश्चञ्चला (सर्पादय) १ १९१ ८ [प्र-कङ्कतपदयो समास। कङ्कतम्=ककि गतौ (भ्वा०) धातोर्बाहु० औणादिकोऽतच्]

प्रकरत् प्रकृष्टतया कुर्यात ४ २९ ३ [प्र+डुकृञ् करणे (तना०) धातोर्लुङ्। 'कृमृदृरुहिभ्य ०' इति च्ले स्थानेऽङ्]

प्रकरितारम् विक्षेप्तारम् (पुरुषम्) ३० १२ [प्र+ कॄ विक्षेपे (तुदा०) धातो कर्त्तरि तृच्]

प्रकलवित् य प्रकृष्ट कलन सङ्ख्या वेत्ति स (इन्द्र =राजा) ७ १८ १५ [प्रकलोपपदे विद ज्ञाने (अदा०) धातो कर्त्तरि क्विप्। प्रकलविद् वणिग् भवति, कलाश्च वेद प्रकलाश्च नि० ६ ६]

प्रकामाय प्रकृष्टकामनासिद्धये ३० १२ [प्र-काम-पदयो समास। काम =कमु कान्तौ (भ्वा०) धातोर्घञ्]

प्रकामोद्याय य प्रकृष्टै कामैरुद्यतस्तस्मै (पुरुषाय) ३० ९

प्रकुपितान् प्रकोपयुक्तान् शत्रूनिव वर्त्तमानान् (पर्वतान्=मेघान्) २ १२ २ [प्र+कुप क्रोधे (दिवा०) धातो क्त प्रत्यय]

प्रकृणुध्वम् प्रकुरुध्वम् १ १२२ ४ **प्रकृण्वे**=प्रकर्ष-तया करोमि १ १३८ २ [प्र+डुकृञ् करणे (तना०) धातोर्लोट्। विकरणव्यत्ययेन श्नु]

प्रकृथ प्रकर्षेण कुरुथ प्र०—अत्र लोडर्थे लट् विक-रणस्य लुक् च १ ११२ ८ [प्र+डुकृञ् करणे (तना०) धातोर्लट्। विकरणस्य लुक्]

प्रकेतम् प्रकृष्ट विज्ञानम् २ १७ ७ **प्रकेतः**=प्रकृष्टा केत प्रज्ञा यस्य स (भा०—अध्यापक उपदेष्टा च जन)

पेषी पेषाकार गर्भस्थ वीर्य क्रनवती (युवति) ५ २ २

पैङ्गराजः पक्षिविशेष २४ ३४

पैजवनस्य वेगयुक्तस्य (नप्तु =पौत्रस्य) ७ १८ २२ क्षमाशीलस्य पुत्रस्य ७ १८ २३ क्षमाशीलाज्जातस्य पुत्रस्य ७ १८ २५ [पैजवन पिजवनस्य पुत्र । पिजवन पुन. स्पर्द्धनीयजनो वाऽमिश्रीभावगतिर्वा नि० २ २४]

पैतृमत्यम् पितृमता भावमेव ७ ४६ [पितृमत्प्राति० भावे ष्यञ्-प्रत्ययो ब्राह्मणादित्वात् । अथवा 'वाङ्मतिपितृमता छन्दस्युपसख्यानम्' अ० ४ १ ८५ वा० सूत्रेण प्राग्दीव्यतीयेष्वर्थेषु ण्य प्रत्यय]

पैद्वः सुखेन प्रापक (वाजी=ज्ञानवान् जन) १ ११६ ६ यो यान मार्गे शीघ्रवेगेन गमयिता ऋ० भू० १६४, ऋ० १ ८ ६ १ [पैद्व अश्वनाम निघ० १ १४]

पोता पवित्रकर्त्ता (अग्नि =विद्वज्जन) ४ ६ ३ पवित्र पवित्रकर्त्ता वा (पुरोहित) १ ९४ ६ शोधक (सूर्य) २५ २ [पूञ् पवने (क्र्या०) धातो कर्त्तरि तृच्-प्रत्यय.]

पोत्रम् पवित्रम् (कर्म्म) २ १ २ पवित्रकारकम् (श्रेष्ठ वस्तु) १ ७६ ४ **पोत्रात्**=पुनाति येन गुणेन तस्मात् प्र०—अत्र 'सर्वधातुभ्य ष्ट्रन्' उ० ४ १६३ इति पूञ्धातो ष्ट्रन्-प्रत्यय स्वरव्यत्ययश्च १ १५ २ पवित्रकर्त्तु (विदुषो जनात्) २ ३७ २ [पूञ् पवने (क्र्या०) धातोरौणादिक ष्ट्रन्प्रत्यय । अथवा पूञ्धातो 'हलसूकरयो पुव' अ० ३ २ १८३ सूत्रेण करणे ष्ट्रन्-प्रत्यय]

पोषम् शरीरात्मपुष्टिकारकम् (सुवीर्यं=विद्याभ्यासम्) १ ९३ २ पुष्टिम् २३ ३१. आत्मशरीरयो पुष्ट्या सुखप्रदम् (रयिं=विद्यासुवर्णादि-सुधनम्) १ १ ३ पोषकम् (हिरण्य=तेजो सुवर्णं वा) ३४ ५० महापुष्टि करने वाले (रयिं=विद्यादि तथा सुवर्ण आदि धन को) आर्याभि० १.३ ऋ० १ १ १ ३ उत्तमाना धनाना भोगम् ३ २० **पोषस्य**=पोषकस्य जनस्य १२ ८ **पोषः**=बहुगुणयोगेन पुष्ट (पदार्थ) प्र०—भूमा वै रायस्पोष शत० ३ १ १ १२, ३ २० **पोषाय**=पुष्यन्ति प्राणिनो यस्मिन् व्यवहारे तस्मै ३ २३ पोषणकराय (पुरुषाय) ११ ७६ पुष्टिकराय (राये=धनाय) १ १४२ १० **पोषे**=पुष्टौ १७ ५४ पुष्यन्ति=यस्मिँस्तस्मिन् (यज्ञे) ५ ५ ६ पोषणे १७ ५४ **पोषेण**=पालनेन १२ ८ पोषणेन १७ ५० घृतदुग्धादिपुष्टिकारकपदार्थप्राप्त्या प० वि० । पुष्यन्ति येन तेन (पदार्थेन) ४ २२ **पोषैः**=पुष्टिकारकैराप्तविद्याजनितैर्वीर्ययुक्तैर्व्यवहारै ३ ३७ उत्तम पुष्टिकारक व्यवहारो से स० वि० १४६, ३ ३७ [पुष पुष्टौ (भ्वा०) धातोर्घञ् अथवा कर्त्तरि अच्]

पोषयत् पोषयेत् ५ ६ ७ [पुष पुष्टौ (दिवा०) धातोर्णिजन्ताल् लङ्]

पोषयित्नु पोषकम् (अध्यापनासनम्) ७ २ ९. पोषयित्री (धर्मशिक्षा) ३ ४ ९ पुष्टिकरम् (द्रव्यम्) ४ ५७.१ [पुष पुष्टौ (दिवा०) धातो 'स्तनिहृषिपुषि०' उ० ३ २९ सूत्रेण णिजन्ताद् इत्नुच् प्रत्यय । पोषयित्नु=पुष्ट पोषयितृ नि० १० १५]

पोष्या पोषयितुमर्हाणि (वार्याणि=धनादीनि) १ ११३ १५ [पुष पुष्टौ (दिवा०) धातोर्ण्यत् । तत शेर्लोपश्छन्दसि]

पोष्या पोषण करने योग्य पत्नी स० वि० १४७, अथर्व० १४ १ ५२. **पोष्याणाम्**=पोषितु योग्यानाम् (हरीणा=मनुष्याणाम्) ४ ४८ ५. [पुष पुष्टौ (दिवा०) धातोर्ण्यत् । तत स्त्रिया टाप्]

पोष्यावतः बहव पोष्या पोषणीया विद्यन्ते येषान्तान् (नॄन्) ५ ४१ ८ [पोष्यप्राति० भूम्न्यर्थे मतुप् । मतुप्प्रत्यये परे दीर्घश्छान्दस]

पौञ्जिष्ठम् पुल्कसम् ३०.८

पौर पुरोर्मनुष्यस्याऽपत्य तत्सम्बुद्धौ ५ ७४ ४ **पौरम्**=पुरि भव मनुष्यम् ५ ७४ ४ **पौरः**=पुरि भव (इन्द्र =वैद्य) २ ११ ११ **पौराय**=पुरि भवाय (मनुष्याय) ५ ७४.४ [पुरव मनुष्यनाम निघ० २.३ ततोऽपत्यार्थेऽण् । उकारलोपश्छान्दस । अथवा पुर्-प्राति० भवार्थेऽण्]

पौरुकुत्सिम् पुरवो बहव कुत्सा शस्त्राऽस्त्रविद्यायोगा यस्य तस्याऽपत्यम् (सत्पुरुषम्) ७ १९ ३ [पुरु-कुत्सपदयो समासे कृतेऽपत्यार्थे 'अत इञ्' इतीञ् प्रत्यय । पुरु=बहुनाम निघ० ३ १ कुत्स =वज्रनाम निघ० २ २०]

पौरुकुत्स्यस्य बहुवज्रादिशस्त्राऽस्त्रविदोऽपत्यस्य (सूरे =मेधाविनो जनस्य) ५ ३३ ८ [पुरु-कुत्सपदयो समासे कृतेऽपत्यार्थे यञ्-प्रत्यय]

पौरुषेयः पुरुषाणा समूह १५ १५ [पुरुषप्राति० समूहार्थे 'पुरुषाद् वधविकारसमूह तेनकृतेष्विति वक्तव्यम्' अ० ५ १ १० वा० सूत्रेण ढञ् । ढस्य एयादेश]

पौरुषेयीम् पौरुषेयस्य रीतिम् ७ ४ ३ **पौरुषेय्याः**=पुरुषसम्बन्धिन्या (युक्ताहारविहारक्रियाया) २१ ४४.

चिकित्सकौ) २८ ७ **प्रचेतः**=प्रकृष्ट-प्रज्ञ (विद्वज्जन) १.११३ १. प्रकृष्टविज्ञान (अग्ने=विद्वज्जन) ६ १३ ३ प्रकर्षेण प्रज्ञया युक्त (अध्यापक) ७ १७ ५ **प्रचेताः**=प्रकृष्ट चेत प्रज्ञा यस्य स, भा०—यो न मूढ (विद्वान् जन) २० ३७ य अयानान् प्रचेतयति स (अग्नि=विद्युत्) २ १० ३ प्रकृष्टञ्चेत सज्ञानमस्य स (कवि=क्रान्तप्रज्ञो मेधाविजन) २६ २५ प्रकृष्टयुक्तो विज्ञापको वा (अग्नि=विद्वान्) ३ २५ १ यथा प्राण प्रचेतयति तथा (जगदीश्वरो विद्वान् वा पुरुष) ५ ३१ प्राज्ञ प्रज्ञापक (अग्नि=विद्वान् जन) ४ ६ २ प्रज्ञापयिता (महाविद्वज्जन) ७.४ ४ प्रकर्षेण प्रज्ञापक (अग्निरिव गृहपालको मनुष्य) ७ १६ ५ प्रकृष्ट ज्ञानस्वरूप, प्रकृष्ट ज्ञान को देने वाला (ईश्वर) आर्याभि० २ १६, ५ ३१ य. प्रकृष्टविज्ञान (विश्वकर्मा=विद्वान् जन.) यया प्रकृष्टतया चेतन्ति सजानन्ति सा (वाक्) ५ ११ प्रकृष्टतया सदर्थज्ञापिका (स्त्री) ३.६१.१. [प्र-चेतस्पदयो समास । चेतस्=चिती सज्ञाने (भ्वा०) धातोरसुन् । चेत प्रज्ञानाम निघ० ३ ६ प्रचेता =प्रवृद्धचेता. नि० ८ ५. प्रचेतस=प्रवृद्धचेतस नि० ६.१६.]

प्रचेतसा प्रकृष्टतया प्रज्ञाननिमित्ते (क्षितिसूर्यौ) १ १५६.१ प्रकृष्टज्ञानौ (मित्रावरुणौ=अध्यापकोपदेशकौ) ५.७१ २ प्रकृष्ट चेतो विज्ञान ययोस्तौ (कवी=मेधाविनौ) २८ ३० [प्र-चेतस्पदयो समासे 'सुपा सुलुक्०' इति प्रसमाद्विवचनस्याकारादेश']

प्रचेतुने प्रचेतयन्त्यानन्देन यस्मिँस्तस्मिन् (पदे=प्राप्तु योग्ये व्यवहारे) १ २१ ६ [प्र+चिती सज्ञाने (भ्वा०) धातोश्छान्दस रूपम्]

प्रचोदयन् प्रज्ञापयन् (अध्यापक) ३ २७ ७. [प्र+चुद सञ्चोदने (चुरा०) धातो शतृप्रत्यय]

प्रचोदयन्ता प्रेरयन्तौ (काक्षु=शिरिपनी जनौ) २६ ३२ [प्र+चुद् सञ्चोदने (चुरा०)+शतृ। 'सुपा सुलुग्०' इत्याकारादेश । प्रचोदयन्ता=प्रचोदयमानौ नि० ८.१२.]

प्रचोदयात् सद्गुणकर्मस्वभावेषु प्रेरयतु ३ ६२ १० भा०—अधर्माचरणान्निवर्त्य धर्माचरणे प्रेरयेत् २२ ६. प्रकृष्ट प्रेरयेत भा०—नित्य प्रवर्त्तयेत् ३ ३५ प्रेरणा करे स० वि० ७५, ३६ ३ बुरे कामो से छुटाकर अच्छे कामो मे प्रवृत्त करे स० प्र० ५१, ३६ ३ [प्र+चुद सञ्चोदने (चुरा०) धातोर्लेट्]

प्रच्छत् प्रयत्नेन दुष्टस्वभावदूरीकरणार्थं कर्म्म १५ ५. [प्र+छद अपवारणे (चुरा०) धातो क्विप्]

प्रच्छिदम् य प्रच्छिनत्ति तम् (नरम्) ३०.१७ [प्रोपपदे छिदिर् द्वैधीकरणे (रुधा०) धातो कर्त्तरि क्विप्]

प्रच्यावयति प्रकर्षेण चालयति ७ १६ १ **प्रच्यावयन्ति**=प्रकृष्टतया प्रचालयन्ति १.६४ ३. निपातयन्ति ५.५६.४ **प्रच्यावयसि**=प्रापयसि ३ ४३.७ [प्र+च्युङ् गतौ (भ्वा०) धातोर्णिजन्ताल् लट्]

प्रच्यावयन्तः विमानादीनि यानानि प्रचालयन्त सन्त (सभाद्यध्यक्षादय) १ ८५ ४ [प्र+च्युङ् गतौ (भ्वा०) धातोर्णिजन्ताच् छतृप्रत्यय]

प्रजज्ञिवान् प्रजात सन् (अग्नि=वह्नि) ३.२ ११ [प्र+जनी प्रादुर्भावे (दिवा०) धातोर्लिट' क्वसु प्रत्यय]

प्रजज्ञे प्रकृष्टतया जायताम् १.१२१.६. [प्र+जनी प्रादुर्भावे (दिवा०) धातोर्लिट् । 'गमहन०' इत्युपधालोप]

प्रजननम् प्रजनयन्ति येन तत् (अपत्यम्) १६ ४८ प्रकटनम् ३ २६ १ **प्रजननाय**=सन्तानोत्पादनाय ३.६३ [प्र+जनी प्रादुर्भावे (दिवा०) धातो करणे ल्युट् । प्रजापति. प्रजननम् । जै० २ ६५. प्रजनन वै सोम जै० ३ १६१ प्रजनन सप्तदश काठ० २१ १ प्रजा वै पशव प्रजननम् जै २.१०८. यानि द्वादश (अक्षराणि) प्रजनन तत् जै० १ २०४ सवत्सरो वै प्रजननम् काठ० ७.१५.]

प्रजनय प्रकटय ३४ ३६ प्रकट कीजिए स० वि० १५६, ७ ४१ ३. अच्छे प्रकार मे उत्पन्न कर आर्याभि० २ ११, ३४ ३६ [प्र+जनी प्रादुर्भावे (दिवा०) धातार्णिजन्तात्लोट्]

प्रजनयन् निष्पादयन्नेव (योगी) ७ १३. परमेश्वर इव प्रकटयन् (न्यायाधीशो राजा) ७ १८ [प्र+जनी प्रादुर्भावे (दिवा०) धातोर्णिजन्ताच्छतृप्रत्यय']

प्रजभ्रुः प्रकर्षेण धरन्तु ३ ५४ १ [प्र+हृञ् हरणे (भ्वा०) धातोर्लिट् । 'हृग्रहोर्भश्छन्दसि' इति हकारस्य भकारादेश]

प्रजया सर्वेण ससारेण ८ ३६. स्वसन्तानादिना ८ १७ राज्येन सन्तानसमूहेन वा ५ २८ प्रजातया (सृष्ट्या) ३२.५ सुसन्तानाद्यया सह १ १३६ ६ सुपुत्रादियुक्तया १ ६३ ३ सुसन्तानै २० २२ सन्तानेन १२ ७ **प्रजा**=सुसन्ताना यज्ञसम्पादिका (सृष्टि) १ २३. **प्रजानाम्**=प्राणिमात्राणाम् ३४ २. उत्पन्नाना पदार्थानाम् ३७ १४. सर्वेषा व्यवहाराणाम् ३४ ५ मनुष्यादीनाम् १६ ४७ पालनीयानाम् (सन्तानानाम्) १८ २८. **प्रजाभिः**=प्रजातै

३४ १८ प्रकृष्टप्रज्ञ (वसिष्ठ =पूर्णविद्वान् जन) ७ ३३ १२ प्रकृष्टप्रज्ञावान् प्रज्ञापक (अग्नि =स्वप्रकाशस्वरूपो जगदीश्वर) ७ ११ १ **प्रकेतेन**=प्रकृष्टेन विज्ञानेन १५.६ **प्रकेतैः**=प्रकृष्टाभि प्रज्ञाभि ७ ३३ ९ [प्र+केतपदयो. समास । केत प्रज्ञानाम निघ० ३ ९ प्रकेत =प्रकेतनम् प्रज्ञाततमम् नि० २ १९]

प्रक्रमते प्रकर्षेण प्राप्नोति १ १५४ १ [प्र=क्रमु पादविक्षेपे (भ्वा०) धातोर्लट् । व्यत्ययेनात्मनेपदम्]

प्रक्रीळान् प्रकृष्टान् विहारान् ४ ४१ ११ **प्रक्रीडेन**= उत्तमक्रीडया ३९ ९ [प्र+क्रीडृ विहारे (भ्वा०) धातोर्घञ् प्रत्यय]

प्रक्रीळिनः प्रकृष्टा क्रीळा विद्यते येषान्ते (वत्सास = सद्यो जाता वत्सा) ७ ५६ १६ [प्रक्रीडाप्राति० प्रशसायाम् इनि प्रत्यय]

प्रखादः अतिभक्षक (इन्द्र =सेनेश) १ १७८ ४ [प्र+खादृ भक्षणे (भ्वा०) धातोरच् कर्त्तरि]

प्रखिदते प्रकृष्टतया क्षीणाय (जनाय) १६ ४६ [प्र+खिद दैन्ये (दिवा०) धातो शतृ । व्यत्ययेन श]

प्रगर्द्धिनः प्रकर्षोऽभिकाङ्क्षिण (श्येनस्य) ९ १५ प्रलुब्धस्य (श्येनस्य) ४ ४० ३ [प्र+गृधु अभिकाङ्क्षायाम् (दिवा०) धातोस्ताच्छील्ये णिनि]

प्रगाथाः ये प्रकर्षेण गीयन्ते ते (विद्वासो जना) १९ २४ [प्र+गाथपदयो समास । गाथ =गै शब्दे (भ्वा०) धातो 'उपिकुपिगार्त्तिभ्यस्थन्०' उ० २ ५ सूत्रेण थन् । मन प्रगाथ जै० उ० ३ १ ४ ३ प्राणापानौ वै वार्हत प्रगाथ कौ० १५ ४]

प्रगाय अधिक स्तुहि ६ ४० १ **प्रगायत**=प्रशसत ५ ६८ १. [प्र+गै शब्दे (भ्वा०) धातोर्लोट्]

प्रगाहमानः प्रयत्नेन विलोडन कुर्वन् (इन्द्र =सेनापति) १७.३९ [प्र+गाहू विलोडने (भ्वा०) धातो शानच्]

प्रगिरिभ्यः प्रकर्षेण शैलेभ्य १ १०९ ६ [प्र-गिरिपदयो समास]

प्रगूर्त्त उद्यच्छत १ १७३ २ [प्र+गुर्वी उद्यमने (भ्वा०) धातोर्लोट् । विकरणस्य शपो लुक्]

प्रघासिनः प्रघस्तुमत्तु शीलमेषा तान् (अ०—अतिथीन्) ३ ४४ **प्रघासी**=वहव प्रकृष्टा घासा भोज्यानि विद्यन्ते यस्य स (भा०—बह्वन्नसामर्थ्यो गृहस्थ-जन) १७ ८५ [प्र+घस्लृ अदने (भ्वा०) धातोस्ताच्छील्ये णिनि । अथवा प्र-घासपदयो समासे मतुवर्थे इनि]

प्रचक्षय प्रख्यापय १ १३४ ३ [प्र+चक्षिङ् व्यक्तायां वाचि (अदा०) धातोर्णिजन्ताल्लोट्]

प्रचर विजानीह्यनुतिष्ठ ४ ३७ [प्र+चर गतौ (भ्वा०) धातोर्लोट्]

प्रचर्षणी सम्यक् सुख-प्रापकौ (इन्द्राग्नी=विद्युद्भौतिकाग्नी) प्र०—चर्षणिरिति पदनाम निघ० ४ २, १ १०९ ५ [प्र-चर्षणिपदयो समास । चर्षणि =चायिना नि० ८ १४]

प्रचाकशत प्रकाशते ४ ५३ ४ [प्र+काशृ दीप्तौ (भ्वा०) धातोर्णिजन्ताल्लुङ् । अडभावश्छान्दस]

प्रचातयस्व प्रकर्षेण हिंस्य हिन्धि वा ५.४ ६ प्रकृष्टतया नाश प्रापय प्र०—चनतिर्गतिकर्मा निघ० २ १४, ७ १ ७ [प्र+चनति गतिकर्मा (निघ० २ १४) धातोर्णिजन्ताल्लोट्]

प्रचिकितः प्राप्तविज्ञान (पित्रादिजन) १९ ५२ [प्र-चिकितपदयो समास]

प्रचिकितुः विजानन्ति ७ ११ ३ [प्र+कि ज्ञाने (जु०) धातोर्लिट्]

प्रचिकित्स रोगनिवारणायेव विघ्ननिवारणोपाय कुरु ३४ २३ [कित निवासे रोगापनयने च (भ्वा०) धातो प्रपूर्वाद् 'गुप्तिज्किद्भ्य सन्' इति स्वार्थे सन्नन्ताल् लोट्]

प्रचेकिते प्रकृष्टतया जानाति १ ५५ ३ [प्र कि ज्ञाने (जु०) धातोर्लट् । व्यत्ययेनात्मनेपदम्]

प्रचेतयति प्रकृष्टतया सम्यङ् ज्ञापयति १ ३ १२ प्रज्ञापयति २० ८६ [प्र+चिती सज्ञाने (भ्वा०) धातोर्णिजन्ताल् लट्]

प्रचेतसम् प्रकर्षेण ज्ञापयितारम् (अध्यापकम्) ७ १६ १२ प्रकर्षेण सञ्ज्ञापकम् (अग्नि=पावकम्) ३ २९ ५ प्रकृष्टं चेतो विज्ञान यस्य यस्माद् वा तम् (विद्यावन्त जनम्) १ ४४ ११ प्रकृष्टप्रज्ञायुक्तम् (विद्वासम्) ४ १ १ विविधप्रज्ञानयुक्तम् (अग्नि=विद्वास जनम्) ४ ११ प्रकृतप्रज्ञम् (पुरुषम्) प्र०—चेता इति प्रज्ञानाम निघ० ३ ९, १२ ११० **प्रचेतसः**=प्रकृष्ट चेत सज्ञान येभ्यस्ते (वायव) १ ६४ ८ शिक्षया प्रकर्षेण विज्ञापितान् (अश्वान्=तुरङ्गान्) २९ ५० प्रकृष्ट चेतो विज्ञान यासा ता (सेना) १ ८४ १२ प्रकृष्ट चेतो ज्ञान यस्य तस्य (परमेश्वरस्य) २ २३ २ प्रज्ञापका (विद्वज्जना) ५ ८७ ९ **प्रचेतसे**=प्रकृष्ट चेत प्रज्ञा यस्य तस्मै (महाराजाय) ७ ३१ १० **प्रचेतसौ**=प्रकृष्टविज्ञानयुक्तौ (भिषजा=

पालकस्य (ईश्वरस्य) २१११ प्रजाना पति पालनहेतु सूर्यस्तस्य ४.२६. विश्वम्भरस्य जगदीश्वरस्येव धार्मिकस्य राज्ञ ६ २१ **प्रजापतौ**—प्रजाया पालके परमेश्वरे ३५ ६ [प्रजा-पतिपदयो समास । 'पति समास एव' इति घि-सञ्ज्ञकत्वेन गुणादय । प्रजापति यज्ञनाम निघ ३ १७. प्रजापति. पाता वा पालयिता वा नि० १० ४१ तद् यदग्रवीत् (ब्रह्मा) प्रजापते प्रजा सृष्ट्वा पालयस्वेति तस्मात् प्रजा-पतिरभवत् तत् प्रजापते प्रजापतित्वम् गो० पू० १ ४. एष वै प्रजापति, यदग्नि तै० १ १ ५.५ यो ह खलु वाव प्रजापति., स उ वेवेन्द्र तै० १ २ २ ५ एष प्रजापतिर्यद्-धृदयम् श० १४ ८ ४ १ य प्रजापतिस्तन्मन जै० उ० १ ३३ २ वाग्वै प्रजापति श० ५ १ ५ ६ स एष सवत्सर. प्रजापति षोडशकल श० १४ ४ ३ २२ प्रजापतिर्वै सप्तदश ता० २.१० ५ सवत्सरो वै पिता वैश्वानर प्रजापति श० १ ५ १ १६ एष वै प्रत्यक्ष यज्ञो यत्प्रजापति. श० ८.३ ४.३. प्रजापतिरश्वमेध श० १३ २ २ १३. एष ह प्रजाना प्रजा-पतिर्यद् विश्वजित् गो० पू० ५ १० यो ह्येव सविता स प्रजापति श० १२ ३ ५.१ प्राणो हि प्रजापति प्रजापति ह्येवेद सर्वमनु (प्रजायते) श० ४ ५ ५ १३ अन्न वा ऽयं प्रजापति श० ७ १ २ ४ वायुर्ह्येव प्रजापति ऐ० ४ २६ अर्धं ह प्रजापतेर्वायुरर्ध प्रजापति श० ६ २ २ ११ स एष वायु प्रजापति श० ८ ३ ४ १५ प्रजापति प्रणेता तै० २ ५ ७ ३ प्रजापतिर्वै भूत तै० ३.१ ६ ३ प्रजापतिर्बन्धु तै० ३ ७ ५ ५ प्रजापतिस्त्वातिरिक्तयो प्रतिष्ठा ऐ० ५.२४ एकविंशो वै प्रजापति ऐ० १ ३० हिरण्मय प्रजापति श० १० १ ४ ६ प्रजापतिर्वै हिरण्यगर्भ. श० ६ २ २ ५ प्रजा-पतिर्वै ब्रह्मा गो० उ० ५ ८ ब्रह्म वै प्रजापतिर्ब्राह्मो हि प्रजापति श० १३ ६ २ ८ प्रजापतिर्वै चन्द्रमा. श० ६ १ ३ १६ सोमो हि प्रजापति श० ५ १ ५ २६ प्रजापति स्वर ष० ३ ७ प्रजापति स्वरसामान कौ० २४ ४ सर्वाणि छन्दासि प्रजापति श० ६ २ १ ३० पाङ्क्त प्रजा-पति श० १० ४.२ २३ आनुष्टुभ प्रजापति तै० ३ ३. २ १. अतिच्छन्दो वै प्रजापति कौ० २३ ४,८ प्रजापतेर्वा एतदुक्थ यत्प्रातरनुवाक ऐ० २ १७ (योऽय चक्षुषि पुरुष) एष प्रजापति जै० उ० १ ४३ १० प्रजापति सदस्य गो० पू० ५ ४ प्रजापतिर्वाऽउद्गाता श० ४ ३ २ ३ प्रजापति-रुद्गीथ तै० ३ ८ २२ ३ अथर्वा वै प्रजापति गो० पू० १ ४ सत्य हि प्रजापति श० ४ २ १ २६ प्रजापतिर्वै गार्ह-पत्य कौ० २७ ४ घृतश्च वै मधु च प्रजापतिरासीत् तै० ३ ३ ४ १ प्रजापतिर्ह्यात्मा श० ६ २ २ १२ पुरुष प्रजा-पति श० ६ २.१ २३ एष उ एव प्रजापतिर्यो यज्ञो गो० २.१८ पिता प्रजापतिः गो० उ० ६ १५ मनुर्वै नाम प्रजा स प्रजापति श० ८ १ १.२ पशवो वै पशूना प्रजापति श० ५.२.५ १७ प्रजनन प्रजापति श० ५.१.३ १० स प्रजापतिरश्वमेधेन ... [illegible] को नाम प्रजापतिरभवत् को वै नाम प्रजापति गो० ३.२१ कम् वै प्रजापति श० ७ ५.२ १३ स (प्रजापति.) उ वाव भुवनस्य गोप्ता जै० उ० ३ ७ १४ प्रजापतिर्वै कृत्स्न. श० ८ ४ १.१४. प्रजापतिर्वै कृत्स्न विराट्स्य ६.३.१ १६ प्रजा-पतिर्वै वृषणा श० ६ ७ ४ ३ प्रजापतिर्वै वृषाता श० ६ ७ ४ ५ प्रजापतिरग्नि श० ६ ५ १ ३८ प्रजापतिर्वै यमदग्नि श० १३ २ २ १४ प्रजापतिर्वै चतुर्होता तै० २ २ ३ ५. प्रजापतिर्वै दशहोता तै० २.२ १ १ प्रजापति सप्तहोता होता तै० २.३ ५.६ प्रजापतिर्वै द्रोणकलश श० ४ ३ १ ६. प्रजापतिरेव निधनम् जै० उ० १ ५८.६ प्रजा-पतिर्वै क्षत्रम् श० ८.२.३ ११. प्रजापतिर्वै चितानि श० ३ १ ३ २२ इमे लोका प्रजापति. श० ७ ५ १ २७ प्रजा-पतिर्वा ऽमूल्लोकान् (त्रीन्) लोकाननुसृजत् श० ४.६ १ ४. द्यावापृथिवी हि प्रजापति श० ५ १ ५ २६ प्राजापत्यो वा ऽयं (भू) लोक. तै० १.३.७ ५ प्रजापतिर्वै पृथिव्यै जनिता श० ७ ३ १.२०. सप्तर्षयो वा ऽग्रे प्रजापतिर-सृजन्त श० १० २ ३ १८ स एव पुरुष प्रजापतिरभवत् । यान् वै तान् सप्तपुरुषान् एक पुरुषमकुर्वंस्ल प्रजापतिर-भवत् श० १० २.२ १ एक उ वै प्रजापति कौ० २६ ७ प्रजापति सर्वा देवता तै० ३ ३ ७ ३ उभयस्वैतत् प्रजा-पतिर्यच्च देवा यच्च मनुष्या श० ६ ८ १ ४ मातेव च हि पितेव च प्रजापति श० ५ १ ५ २६ रूप वै प्रजापति ... नाम वै प्रजापति तै० २ २ ७ १. सर्वमु ह्येवेद प्रजापति श० ५ १ १ ४ प्रजापतिर्वै विश्वजित् कौ० २५ १२ अपरि-मितो हि प्रजापति गो० उ० १ ७ उभयम्वेतत् प्रजापति-निरुक्तश्चानिरुक्तश्च परिमितश्चापरिमितश्च श० ६ ५ ३ ७. अनिरुक्त उ वै प्रजापति कौ० २३ २,६ प्रजापतिर्वै देवा-नामन्नादो वीर्यवान् तै० ३ ८ ७ १ प्रजापतिर्वै देवाना वीर्य-वत्तम श० १३ १ २.५ अथ यत्पर भा (सूर्यस्य) प्रजा-पतिर्वा स श० १ ६ ३.१० यत्पर भा प्रजापतिर्वा स इन्द्रो वा श० २ ३ १ ७. प्रजापतिर्वा अमृत श० ६ ३ १ १७ प्रजापतिश्चतुस्त्रिंशो देवानाम् ता० १७ ११ ३ पूर्ण इव हि प्रजापति तै० २ १ २ १ प्रजापतिर्हि स्वा-राज्यम् ता० १६ १३ ३ अन्तो वै प्रजापति श० ५.१ ३ १३ प्रजापतिर्विराजम् (साम) ता० १६ ५ १० साहस्र.

(पशुभि) ६ ७० ३ पालनीयाभि (सन्ततिभि) ५ ४ १०. अनुकूलाभि स्त्र्यौरसविद्यासन्तान-मित्र-भृत्य-राज्य-पश्वादिभि ३ ३७ भा०—सभ्यसैन्य-प्रजाजनै ७ २६ पुत्रपौत्रादि उत्तमगुणवाली प्रजाओ से आर्याभि० २ ३५, ३ ३७ **प्रजाभ्यः**=उत्पन्नाभ्य सृष्टिभ्य ४ २५ स्वसन्तानेभ्य १२.७२ पालनीयाभ्य (प्राणिभ्य) ११ ३८ प्रसिद्धाभ्य (मानुषीभ्य =मनुष्यादिभ्य) ११ ४५ प्रजाताभ्यो विद्युदादिभ्य १३ ५७ **प्रजाम्**=या प्रजायते ताम् (सृष्टिम्) ४ १३ स्वसन्तानान् सरक्षणीयान् जनान् ६ ३. पुत्रपौत्रप्रभृतिम् १६ ४८ पुत्रपौत्रादिकाम् ११२५ १. उत्तमान् सन्तानान् राष्ट्र वा ४ ३६ ६ सुसन्तानरूपाम् (सृष्टिम्) ३४ १० उत्पन्ना सृष्टिम् ५ १७ पालनीयाम् (सृष्टिम्) ६.२५ उत्पादनीयाम् (सन्ततिम्) ५ २७ सन्ततिम् २५ ७ सुसन्तानम् ११ ५८ सत्यबलधर्मयुक्ताम् (सृष्टिम्) ११ ५८ सुप्रजाताम् (सन्तानोत्पत्तिम्) ११ ५८ राज्यम् ११७६ ६ प्रजा को स० वि० १३८, अथर्व० १४ २.३१ **प्रजायाः**= मनुष्यादिसृष्टये प्र०—अत्र चतुर्थ्यर्थे षष्ठी १.१५६ २ विद्यमानाया (सृष्टे) ३ ३६ **प्रजायै**=प्रजासुखाय ७ ५७ ६ **प्रजासु**=प्रकृतिजीवादिषु ३२ ८ जनेषु ३४.३ प्रजाओ मे स० प्र० २४७, ३४ ३. **प्रजाः**=प्रादुर्भूता पालनीया (सृष्टय) १४३ ६ समुत्पन्ना (सृष्टय) १ ६७ ५. मनुष्यादिसृष्टय ४ २५ जगत्स्था (सृष्टय) ४ २५ प्रजननीया (प्रजाजना.) ६ २६ प्रजा एव ७ १८. सरक्षणीया (सृष्टय) ७.१७ प्रजायन्ते यास्ता (सन्ततय) १ ६६ २ पालनीया (सन्ततय) १४ २६ तदधीनपालना (सन्ततयः) ६ २१. प्रजाता. (सर्वलोका) ३ ५५.१६. [प्र+जनी प्रादुर्भावे (दिवा०) धातो 'उपसर्गे च सज्ञायाम्' अ० ३ २ ६६ सूत्रेण ड प्रत्यय । स्त्रिया टाप् । प्रजा अपत्यनाम निघ० २ २ प्रजा वै तोकम् श० ७ ५ २ ३६. प्रजा वै सूनु श० ७ १ १ २७. प्रजा वै तन्तु ऐ० ३ ११ प्रजा वा अप्नुरित्याहु गो० पू० ५.६ प्रजा वा ऽअरी श० ३ ६ ४ २१ प्रजा वा ऽइष श० १ ७ ३ १४ प्रजा वै भूतानि श० २ ४ २ १ प्रजा वै बर्हि कौ० ५ ७, १८ १० प्रजानुरूप ऐ० ३ २३ प्रजाशस्त्रम् श० ५ २ २ २० प्रजा पशव सूक्तम् कौ० १४ ४ प्रजा वा उक्थानि तै० १ ८ ७ २ प्रजा. सतो बृहती गो० उ० ६.८ आदित्या वा इमा प्रजा ता० १८ ८ १२ द्वय्यो ह वा ऽइदमग्रे प्रजा आसु । आदित्याश्चाङ्गिरसश्च श० ३ ५.१.१३ वैश्वदेव्यो वै प्रजा तै० १ ६ २ ५ आगस्त्यो वै प्रजा श० १३ ३ ४ ५, आयास्यो वै प्रजा तै० ३ ६ ११ ४. आद्या हीमा प्रजा विश श० ४ २ १ १७]

प्रजवः प्रकृष्टो वेग ७.३३ ८ [प्र+जु इति सौत्रो धातु, वेगिताया गती । तत 'जवसवौ छन्दसि वक्तव्यौ' अ० ३ ३ ५६ वा० सूत्रेण अच्प्रत्यय]

प्रजवेते प्रगच्छत ३ ३३ १ [प्र+जु इति सौत्रो धातु । ततो लट्]

प्रजातम् उत्पन्नम् (मन) १ १६४ १८ **प्रजातः**= प्रसिद्ध उत्पन्न (पुत्र =अध्येता) १ ६६ १ [प्र+जनी प्रादुर्भावे (दिवा०) धातो क्त । धातो स्थाने जादेश]

प्रजानतीव यथा विज्ञानवती विदुषी तथा (उषा) १ १२४ ३ [प्रजानती-इवपदयो समास । प्रजानती= प्र+ज्ञा अवबोधने (क्र्या०)+शतृ+ङीप्]

प्रजानन् प्रकृष्टतया जानीयु १ ७२.१० [प्र+ज्ञा अवबोधने (क्र्या०) धातोर्लङ् । अटोऽभाव]

प्रजानन् प्रज्ञावान् सन् (सम्राट्=चक्रवर्त्ती राजा) ६ २४ प्रकृष्टतया जानन् (पति) १३ ३४ प्रकर्षेण जानन् सन् (न्यायाधीश) ३५ १ प्रकृष्टतया बुद्ध्यमानः (इन्द्र =शिल्पिजन) ३ ३५ ४ प्रकर्षेण विदन्त्सन् (अश्व = शीघ्रगामी वह्नि) २६ १० प्रकर्षता से जानता हुआ गृहस्थ जन) स० वि० १८६, अथर्व० ६ ५ १ विद्वान् (पुरुषार्थिजन) ३ २६.१६. [प्र+ज्ञा अवबोधने (क्र्या०) धातो शतृ-प्रत्यय]

प्रजापतये प्रजापालकाय (विदुषे जनाय) २२ ५ प्रजाया पालकाय (विदुषे गृहस्थाय) २२ ४ प्रजास्वामिने (राज्ञे) २४ २६ प्रजारक्षकाय (राजपुरुषाय) १८ २८ **प्रजापतिम्**=विश्वस्य पालक स्वामिनम् (परमेश्वरम्) २३ ६४ **प्रजापतिः**=प्रजापालक ईश्वर १४ ३ प्रजापालको जीव १६ ७८ प्रजापालक सूर्य २३.६३ प्रजाया स्वामी (परमेश्वर) ८ ५४ विश्वस्याऽध्यक्ष (ईश्वर) ८ ३६ सन्तानादिपालक (गृहपति) ८ १०. सर्वस्या प्रजाया स्वामित्वात् (ईश्वर) ३२ १ प्रजाया पालकोऽधिष्ठाता (परमेश्वर) ३२ ५ प्रजापालक सभेशो राजा १६ ७५ सब जगत् का पति (स्वामी) और पालन करने वाला (परमात्मा) आर्याभि० २ ४, ३२ १ सब ससार का अधिष्ठाता पालक (ईश्वर) आर्याभि० २ ५४ सकल सृष्टि की उत्पत्ति और पालन करने हारा सर्वव्यापक स्वामी परमात्मा स० वि० १८७, १६ ७७ **प्रजापते**=प्रजाया स्वामिन्नीश्वर १० २० प्रजारक्षक (राजन्) २३ ८ **प्रजापतेः**=सन्तानादिरक्षकस्य (गृहपते) ८ १० प्रजाया

प्रणव गो० उ० ३ ११. ब्रह्म वै प्रणव कौ० ११.४]

प्रणिदधात प्रणिधरत ५.२२.२. [प्र+नि+डुधाञ् धारणपोषणयो (जु०) धातोर्लोट्]

प्रणिनाय प्रकर्षेण प्रापय ३ ८ ११ यथा त्व प्रणये-न्नया अ०—प्रापयनि ५ ४३ [प्र=णीञ् प्रापणे (भ्वा०) धातोर्लिट्]

प्रणीतयः प्रकृष्टा नीतय ६ ४५ ३ [प्र+णीञ् प्रापणे (भ्वा०) धातो स्त्रिया क्तिन्]

प्रणीतम् प्रकृष्टतया प्रापितम् (तम.=अन्धकाररूप दु खम्) १ ११७.१३ **प्रणीतः**=प्रकृष्टतया सम्मिलित. (अग्नि =पावक) १६ १७ [प्र+णीञ् प्रापणे (भ्वा०) धातो क्त]

प्रणीतिषु प्रकृष्टासु नीतिषु १ ११४ २ **प्रणीतिः**= प्रकृष्टा नीनि ६ ४८.२० **प्रणीतौ**=प्रकृष्टाया नीतौ ३ १५ १ प्रकृष्टाया धर्म्याया नीतौ ११ ४६ [प्र+णीञ् प्रापणे (भ्वा०) धातो स्त्रिया क्तिन्]

प्रणीती प्रकृष्टा चासौ नीतिस्तया प्र०—अत्र 'सुपा सुलुक्०' इति पूर्वसवर्णदीर्घ १६११. प्रकृष्टा नीतिम् प्र०—अत्र पूर्वसवर्णादेश ७ ३५ प्रकृष्टनीत्या ७ २८ ३. [प्रणीतिप्रानि० तृतीयैकवचनस्य पूर्वसवर्णदीर्घश्छान्दस]

प्रणीयते प्रकर्षेण प्राप्यते ३ २७ ८ **प्रणीयन्ते**= प्रयुक्त किये जाते हैं स० वि० २०६, अथर्व० ६ ६.१५ [प्र+णीञ् प्रापणे (भ्वा०) धातो कर्मणि लट्]

प्रणुद प्रकृष्टतया दूरे क्षिप १५.१ प्रकर्षेण हिन्धि १५ २. **प्रणुदाति**=प्रकर्षेण दूरीकरोतु २ ३०. [प्र+ णुद प्रेरणे (तुदा०) धातोर्लोट्। अन्यत्र लेटि आडागम.]

प्रणेतः प्रकर्षेण प्रापक (ईश्वर) ७.४१ ३ पुरुषार्थ प्रति प्रेरक (ईश्वर) ३४.३६. य सत्याऽनृते प्रणयति तत्सम्बुद्धौ (इन्द्र=परमैश्वर्ययुक्त जन) ३ ३०.१८. सर्वेषां नयनकर्त्त (विद्वत्पिन) २.२८ ३ सब के उत्पादक सत्याचार मे प्रेरक (ईश्वर) स० वि० १५६, ७ ४१ ३ **प्रणेता**= प्रकृष्टतया नेता (अग्नि =पावकवद्विद्वज्जन) २.६ २. प्रेरक (अग्नि.=पावक.) ३ २३ १ **प्रणेतारः**=प्रकृष्ट न्याय कुर्वन्त (विद्वज्जना.) ३ ५७.२ प्रनायका (देवा = वायुविद्यावेत्तृजना) १ १६६ ५ प्रेरका (मेधाविनो जना) ५ ६१ १५ [प्र+णीञ् प्रापणे (भ्वा०) धातो कर्त्तरि तृन्]

प्रणेनी प्रकर्षेण न्यायकृत् (इन्द्र =राजा) ६ २३ ३. [प्र पूर्वात् णीञ् प्रापणे (भ्वा०) धातोर्यङ्लुगन्तात् क्विप्]

प्रणेषत् प्रकृष्ट नय प्राप्नुयात् प्रापयेद् वा २ २०.३. [प्र+णीञ् प्रापणे (भ्वा०) धातोर्लेट् । 'व्यत्ययो बहुलम्' इति शप्सिपौ]

प्रणोनुमः प्रकृष्टमतिशयेन स्तुम., पुन पुनर्नमस्कुर्म्मः प्र०—अत्र 'णु स्तुतौ' इत्यस्य यङ्लुकि प्रयोग 'उपसर्गाद-समासेऽपि णोपदेशस्य' अ० ८.४.१४ इति णकारादेशश्च १ ११ २ प्रकर्षेण भृशन्नमेम ७.३१.४. [प्र+णु स्तुतौ (अदा०) धातोर्यङ्लुगन्ताल् लट्]

प्रण्यः प्रकृष्टा नीतिर्यासा ता (सत्स्त्रिय) ३ ३८.२ [नी=णीञ् प्रापणे (भ्वा०) धातो क्विप् । प्र-नीपदयो समास.]

प्रतक्वा यथा प्रतकति प्रकर्षेण हर्षतीति तथा (भगवान्) प्र०—अत्र 'अन्येषामपि दृश्यन्ते' इति वनिप् ५ ३२. सब का ज्ञाता, सत्यासत्यकारी जनो के कर्मो की साक्ष्य रखने वाला (ईश्वर) आर्याभि० २.१७, ५.३२. [प्र+तक हसने (भ्वा०) धातो. कर्त्तरि वनिप्]

प्रतताः विस्तीर्णा. स्वरूपगुणा. (प्रजासेनाध्यक्षा:) ३ ३१.२०. [प्र+तनु विस्तारे (तना०) धातो क्त । 'अनुदात्तोपदेश०' इत्यनुनासिकलोप]

प्रतनु प्रकृष्टतया विस्तृणुहि १३.२० [तनु विस्तारे (तना०) धातोर्लोट्]

प्रतरणः दु खान् प्रकृष्टतया तारक (विद्वान् जन) १ ६१ ६ य. प्रकृष्टतया दु खानि तरति (अग्नि =अध्या-पक) २ १.१२. प्रतरति दु.खानि येन स (यज्ञ) ४.३७ प्रतारक. (राजा) ६ ४७ २६ शत्रुबलस्योल्लङ्घक (वन-स्पति =वनादिपालको विद्वान् राजा) २६ ५२. **प्रतर-णाय**=नौकादिना परतटादर्वाचीनतटप्राप्ताय प्रापयित्रे वा (पुरुषाय) १६ ४२. [प्र+तॄ प्लवनसन्तरणयो (भ्वा०) धातो करणे ल्युट्। कर्त्तरि वा 'कृत्यल्युटो बहुलमि' ति ल्युट् । प्रतरण प्रतारयिता ऐ० ३ १३.]

प्रतरणी दोष और शोकादि से पृथक् रहने वाली (वरानना स्त्री) स० वि० १३८, अथर्व० १४.२ २६. **प्रतरणीम्**=प्रतरन्ति यया ताम् (विद्याम्) ५ ४६ १. [प्र+तॄ प्लवनसन्तरणयो (भ्वा०) धातोर्ल्युडन्तान् ङीप्]

प्रतरत दु खान्युल्लङ्घयत भा०—दु खसागर सहजत सन्तरत ३५ १०. [प्र+तॄ प्लवनसन्तरणयो. (भ्वा०) धातोर्लोट्]

प्रतरम् प्रकृष्टतया तरति प्लावयति दूरीकरोति दु ख येन तत् (आयु =जीवनम्) १ ५३ ११ प्रतरन्ति दु.ख येन

प्रजापति तै० स० ५ २ ८ ३]

प्रजापतिगृहीतया प्रजापतिर्गृहीतो यया स्त्रिया तया १३ ५४ [प्रजापति-गृहीतपदयो समास । गृहीत =ग्रह उपादाने (क्र्या०)+क्त]

प्रजापतिभक्षितस्य प्रजास्वामिनेश्वरेण सेवितस्य भक्षितस्य वा (पयस =उदकस्य दुग्धस्य वा ३८.२८ [प्रजापति-भक्षितपदयो समास]

प्रजायन्ते प्रकृष्टतयोत्पद्यन्ते ३ ३६ ५ **प्रजायेमहि**= प्रकृष्टतया जायेमहि १ ६७ ४ [प्र+जनी प्रादुर्भावे (दिवा०) धातोर्लट् । अन्यत्र लड् अडभावश्च]

प्रजावत् प्रजा विद्यन्ते यस्मिँस्तत् (ब्रह्म =धनमन्न वा) ६ १६ ३६ प्रशस्ता प्रजा भवन्ति यस्मात्तत् (आयु = अन्नम्) १ ११३.१७ वह्वच प्रजा विद्यन्ते यस्य तत् (सौभग =महदैश्वर्यम्) ५ ८२ ४ **प्रजावता**=प्रशस्ता प्रजा विद्यन्ते यस्मिँस्तेन (राधसा =विद्यासुवर्णादिधनेन) १ ६४ १५ **प्रजावतः**=प्रशस्ता प्रजा येषु तान् (वाजान्= सङ्ग्रामान्) १ ९२ ७ प्रशस्ता प्रजा विद्यन्ते यस्मिँस्तस्य (वाजस्य=अन्नादेर्विज्ञानस्य वा) ३ १६ ६ [प्रजाप्राति० प्रशसाया भूम्न्यर्थे वा मतुप्]

प्रजावती प्रजापालनतत्परा (विधवा स्त्री) ऋ० भू० २१४, अथर्व० १४ २ १८ उत्तम पुत्र-पौत्रादि से सहित (स्त्री) स० प्र० १५२, अथर्व० १४ २ १८ प्रजा को प्राप्त होने वाली (सौभाग्यप्रदा नारी) स० वि० १३९, अथर्व० १४ २ ३२. **प्रजावतीषु**=प्रशस्तप्रजायुक्तासु (रीतिषु) ७ १ ११ **प्रजावतीः**=वहुप्रजा विद्यन्ते यासु ता (उपस =प्रभातवेला) ६ २८ १ बहुप्रशसितप्रजायुक्ता (इष =अन्नादीच्छा) ६ ५२ १६ भूयस्य प्रजा वर्त्तन्ते यासु ता (अघ्न्या =गा) प्र०—अत्र भूम्न्यर्थे मतुप् १.१ प्रशस्ता प्रजा विद्यन्ते यासा ता (गा) ६ २८ ७ [प्रजा-प्राति० प्रशसाया भूम्न्यर्थे वा मतुवन्तान् ङीप्]

प्रजावतः वह्वच प्रजा उत्पन्ना विद्यन्ते येषु मासेषु तान् प्र०—अत्र भूमार्थे मतुप् १ २५ ८ **प्रजावन्तम्**= वहुप्रजायुक्तम् (रयिं=धनम्) ४ ५३ ७ वह्वच प्रजा विद्यन्ते यस्य तम् (रयिं=धनम्) ४ ५१ १० **प्रजावन्तः**= वह्वच सुसन्तानराष्ट्राख्या प्रजा विद्यन्ते येषान्ते (मनुष्या) प्र०—अत्र भूम्न्यर्थे मतुप् ३ ५६ **प्रजावान्**=सन्तानवान् (गातु =भूमि) ३ ५४ १८ वह्वच प्रजा विद्यन्ते यस्य स (परमेश्वर) ३ ५६ ३ वह्वय प्रजा विद्यन्ते यस्मिन् स (भग =ऐश्वर्यम्) ३ ३० १८ [प्रजाप्राति० भूम्न्यर्थे मतुप्]

प्रजासनि प्रजा सनति येन तत् (अपत्यम्) १ ६ ४८. [प्रजोपपदे पण सम्भक्तौ (भ्वा०) धातो 'छन्दसि वनसन-रक्षिमथाम्' अ० ३ २ २७ सूत्रेण इन् प्रत्यय.]

प्रजिगतः प्रकर्षेण भृश प्राप्नुत प्र०—अत्र यडन्तात् परस्य लट शतृ यडो लुक् 'वाच्छन्दसि' इत्यभ्यासस्येत्वम् १ १५० २ **प्रजिगाति**=प्रकर्षेण गच्छति ६ ६ १ प्रकृष्ट-तया प्रशसति १ ८७ ५ प्रकर्षेण स्तौति ३ २७ १ [प्रपूर्वाद् गा स्तुतौ (जु०) धातोर्यडन्ताच्छतृ । यडो लुक् च । अन्यत्र लट्]

प्रजिन्व प्रकृष्टतया प्रीणीहि ३ १५ ६ **प्रजिन्वन्**= प्रकृष्टतया तर्प्पयन्तु १ ७१ १ [प्रपूर्वाज् जिवि प्रीणनार्थे (भ्वा०) धातोर्लोट् । अन्यत्र लड् । अडभावश्छान्दस]

प्रजिहीते प्रकर्षेण प्राप्नोति १ १६६ ५ [प्रपूर्वाद् ओहाङ् गतौ (जु०) धातोर्लट्]

प्रजुजुषुः प्रकृष्टतया सेवेरन् १ १५२ ५ [प्रपूर्वाज् जुषी प्रीतिसेवनयो (तुदा०) धातोर्लिट् । व्यत्ययेन परस्मै-पदम्]

प्रजुहोमि प्रकर्षेण क्षिपामि १ १६२ १९

प्रज्ञानम् प्रजानाति येन तद् बुद्धिस्वरूपम् (मन) ३४ ३ उत्कृष्ट ज्ञान वाला (मन =मन) स० प्र० २४६, ३४ ३ **प्रज्ञानाय**=प्रकृष्टज्ञानवर्द्धनाय भा०—प्रज्ञादानाय ३० १० [प्र+ज्ञा अवबोधने (क्र्या०) धातो करणे ल्युट् । प्रज्ञान ब्रह्म ऐ० आ० २ ६]

प्रज्ञानीः प्रज्ञापिनी व्यवहारसाधिका (दिश) ऋ० भू० ५ [प्र+ज्ञा अवबोधने (क्र्या०) धातोर्ल्युडन्तान् ङीप्]

प्रज्ञेषम् प्रकर्षेण जानीयाम् प्र०—जानातेर्लेटि सिपि रूपम् २० २५ [प्र+ज्ञा अवबोधने (क्र्या०) धातोर्लेटि सिपि च रूपम्]

प्रणक् प्रणश्यतु प्र०—अत्र लोडर्थे लुड् 'मन्त्रे घस-ह्वरणश०' अ० २ ४ ८० अनेन सूत्रेण च्लेर्लुक् च १.१८ ३ प्रणष्टो भवेत् २ २३ १२ प्रणाशयेत् ७ ५६ ९ [प्र+णश् अदर्शने (दिवा०) धातोर्लुड् । 'मन्त्रे घसह्वरणश०' इति च्लेर्लुक्]

प्रणयति प्राप्नोति २ २९ ४ डालता है स० वि० २०९, अथर्व० ९ ६ १४ **प्रणयन्ति**=प्रकर्षेण प्राप्नुवन्ति १ ८३ २ **प्रणयन्तु**=प्रीणयन्तु ७ १७ **प्रणयसि**= प्रापयसि १ १२९ १ [प्र+णीञ् प्रापणे (भ्वा०) धातोर्लट्]

प्रणवैः ओङ्कारैं १९ २५ [प्रणव =अमृत वै

प्रतिचक्ष्येव प्रत्यक्ष दृष्ट्वेव १ १२४ ८. [प्रतिचक्ष्य-इवपदयो समास । प्रतिचक्ष्येति व्याख्यातम्]

प्रतिजन्यानि प्रत्यक्षेण जनितु योग्यानि (नानालोकान्तराणि) ४ ५० ७ [प्रतिपूर्वाज् जनी प्रादुर्भावे (दिवा०) धातो 'तकिशसि०' वा० सूत्रेण यत्प्रत्यय']

प्रतिजन्यानि जन जन प्रति योग्यानि (धनानि) ४ ५० ६ [प्रति-जन्यपदयो समास]

प्रतिजरन्ते स्तुवन्ति ५ ८० १ [जरते अर्चतिकर्मा निघ० ३ १४]

प्रतिजागरासि प्रत्यक्ष सब कामो मे जागती रहे स० वि० १३८, अथर्व० १४ २ ३१ [प्रति+जागृ निद्राक्षये (अदा०) धातोर्लेट् । 'लेटोऽडाटौ' इत्याडागम]

प्रतिजागृहि यजमान प्रबोधयाऽविद्यानिद्रा पृथक्कृत्य विद्याया जागरूक कुरु १८ ६१ अविद्यानिद्रा त्यक्त्वा विद्यया चेत १५ ५४ अविद्याऽन्धकारनिद्रात सर्वान् जीवान् पृथक्कृत्य विद्यार्कप्रकाशे जागृतवान् कुरु ऋ० भू० ३०५, १५ ५४ [प्रति+जागृ निद्राक्षये (अदा०) धातोर्लोट्]

प्रतिजानते प्रतिज्ञया व्यवहारस्य साधकाय (सज्जनाय) ३ ४५ ४ [प्रति+ज्ञा अवबोधने (क्र्या०) धातो. शतृ]

प्रतिजूतिवर्पस प्रतीत जूतिर्वेगवद् वर्पो रूप येषा ते (राजपुरुषा) ३ ६० १ [प्रति-जूति-वर्पस्-पदाना समास जूति =जु वेगितायां गतौ (सौत्रो धातु) धातो क्तिया 'ऊतियूतिजूति०' अ० ३ ३ ९७ सूत्रेण क्तिन् उदात्तश्च निपात्यते । वर्प =रूपनाम निघ० ३ ७]

प्रतितिष्ठामि प्रतिनिधिभावेन तिष्ठामि भा०—सर्वपूज्यो भवामि २०.१० [प्रति+ष्ठा गतिनिवृत्तौ (भ्वा०) धातोर्लट्]

प्रतिदधानेभ्य: ये शत्रून् प्रति शस्त्राणि दधति तेभ्य (सैनिकेभ्य) १६ २२ [प्रति+डुधाञ् धारणपोषणयो (जु०) धातो शानच्]

प्रतिदह प्रत्यक्ष भस्मीकुरु १५ ३७ पुन पुनर्दहति प्र०—अत्र व्यत्यय' १ १२ ५ [प्रति+दह भस्मीकरणे (भ्वा०) धातोर्लोट्]

प्रतिदीधिम प्रतीत्या प्रकाशयेम ३३ ४१ [प्रति+दीधीङ् दीप्तिदेवनयो (अदा०) धातोर्लिङ्]

प्रतिदुवस्व प्रत्यक्ष सेवस्व ५.४६ २ [प्रति+दुवस्यति परिचरणकर्मा (निघ० ३ ५) धातोर्लोट् । व्यत्ययेनात्मनेपदम्]

प्रतिदुहीयत् प्रतिपादयन् (इन्द्र =राजा) २ ११ २१ [प्रति+दुह प्रपूरणे (अदा०) धातो' शतरि छान्दस रूपम्]

प्रतिदृक्षत प्रत्यक्ष पश्यन्ति १ ४८.१३ [प्रति-दृशिर् प्रेक्षणे (भ्वा०) धातोर्लुङ् । क्सो विकरणश्छान्दस । व्यत्ययेनात्मनेपदञ्च]

प्रतिदोषम् यथा रात्रि रात्रि प्रति सुखम्वथा ६.७१ ४ प्रति-जन यो दोषस्तम् प्र०—अत्रोत्तरपदलोप ३४ ३६. रात्रि रात्रि प्रति, प्र०—अत्र रात्रेर्गमनदागुत्वाद् दिनस्यापि ग्रहणमस्ति प्रतिदिनमयमित्यर्थं 'दोषेति रात्रिनामसु पठितम्' निघ० १ ७, १.३५.१० [प्रति-दोषापदयो समास दोषेति रात्रिनाम निघ० १.७.]

प्रतिद्रवन्ती प्रत्यक्ष जानन्ती गच्छन्ती वा (देवी=विदुषी) ५ ४१ १२ [प्रति+द्रु गतौ (भ्वा०) धातो. शत्रन्तात् ङीप्]

प्रतिधत् प्रतिदधाति ४.२७.५. [प्रति+डुधाञ् धारणपोषणयो (जु०) धातोर्लेट् । विकरणव्यत्ययेन श]

प्रतिधर्ता प्रत्यक्ष धारक (मित्र =निपुण) १५ १० प्रतीत्या धर्ता (बृहस्पति =सूर्य) १५ १४ [प्रति+धृञ् धारणे (भ्वा०) धातो कर्तरि तृच्]

प्रतिधातवे प्रतिधर्त्तुम् ८ २३ प्रतिधातुम् प्र०—अत्र 'तुमर्थे सेसेन०' इत्यनेन तवेन्प्रत्यय. १ २४ ८ [प्रति+डुधाञ् धारणपोषणयो (जु०) धातोस्तुमर्थे तवेन्-प्रत्यय]

प्रतिधिना प्रतिदधाति यस्मिंस्तेन (पृथिव्या =भूगर्भविज्ञानेन) १५ ६ [प्रति+डुधाञ् धारणपोषणयो (जु०) धातो 'कर्मण्यधिकरणे च' इति कि प्रत्यय]

प्रतिधीयताम् प्रतिधीयन्ताम् प्र०—अत्र वचनव्यत्ययेनैकवचनम् ३६ ११ स्थापन करो आर्याभि० २ २३, ३६ ११ [प्रति+डुधाञ् धारणपोषणयो (जु०) धातो कर्मणि लोट्]

प्रतिधीयमानम् सम्यग् ध्रियमाणम् (ज्ञानम्) १ १५५ २ [प्रति+डुधाञ् धारणपोषणयो (जु०) धातो कर्मणि शानच्]

प्रतिपचता प्रत्यक्ष पचतानि पक्तव्यानि (खाद्यान्नानि) २१ ६० [प्रति-पचतपदयो समासे शेर्लोपश्छन्दसि पचत=डुपचष् पाके (भ्वा०) धातोरौणादिक अतच्]

प्रतिपत् पद्यते विचार्यते योऽर्थविषय स पत्, पत पत प्रतीति प्रतिपत् (इन्द्र =सभासेनापति) ७ ३८ प्रतिपद्यते प्राप्यते या सा (लक्ष्मी) १५ ८ [प्रति-पत्पदयो समास । पत्-पद गतौ (दिवा०) धातो कर्मणि क्विप्]

प्रतिपदे ऐश्वर्याय १५ ८ [प्रतिपूर्वात् पद गतौ

तम् (उत्तमाऽन्नम्) ५.३४.१. प्रकर्षेण दुःखात्तारक व्यवहारम् ५.५५ ३ पाकस्य सन्तारकम् (पाचकम्) भा०—पाक-कर्त्तारम् १२ २६ प्रतरन्ति येन तत् (आयु =जीवनम्) ४ १२.६ प्रकृष्टम् (पुरुषार्थमाश्रित्य) १ ६४ ४ पुष्कलम् (आयु =जीवनम्) २ ३२.१ शत्रूणा वलोल्लङ्घनम् ६ ४७ ७ प्रतरति शत्रुबलानि येन तत्सैन्यम् १ १४१ १३ पारस्य सन्तारकम् (पाककर्त्तार जनम्) १२ २६ [प्र+तॄ प्लवनसन्तरणयो (भ्वा०) धातो 'ॠदोरप्' इत्यप्प्रत्यय]

प्रतराम् प्रतरन्त्युल्लङ्घयन्ति शत्रुबलानि यया नीत्या ताम् १७ ५१ [प्रतर व्याख्यातम् । तत स्त्रिया टाप्]

प्रतवसः प्रकृष्टानि तवासि बलानि सैन्यानि येषा ते (नृतमास =नायका जना) १ ८७ १ **प्रतवसे**=प्रकृष्ट-वलाय (वाताय=विज्ञानाय) ४ ३ ६ [प्र-तवस्पदयो समास । तवस् वलनाम निघ० २ ६]

प्रतस्थुः प्रतिष्ठन्ते २ १५ ५ [प्र+ष्ठा गतिनिवृत्ती (भ्वा०) धातोर्लिट्]

प्रतारि प्रकर्षेण प्लूयते ४ १२ ६]प्र+तॄ प्लवन-सन्तरणयो (भ्वा०) धातो कर्मणि लुङ्]

प्रतारिषत् प्रकृष्टतया वर्द्धयेत् ४ ३६ ६ **प्रतारिषः**= सन्तारयसि ३४ ८ **प्रतारिष्टम्**=प्रकर्षेण वर्धयतम् ३४ ४७ प्रयत्नेन पारयतम् १ १५७ ४ **प्रतारीः**=प्रतारय उल्लङ्घय ६ ८ ७ [प्र+तॄ प्लवनसन्तरणयो (भ्वा०) धातोर्लेटि सिपि च रूपम् । 'सिव् वहुल णिद् वक्तव्य' इति वा० सूत्रेण सिपो णित्वेन वृद्धि]

प्रति आभिमुख्येन १ ४८ २ वीप्सायाम् १ १६६ ७ प्रतिनिधौ २ १ १५ क्रमाऽर्थे १ ६२ १ योगे १ ५५ १ क्रियार्थे पञ्चादर्थे १ १४ प्रत्यक्षे १५ ३७ इत्थभूताख्याने १ १६ व्याप्तौ २० ३७ प्रतीतार्थे १ २५.२० क्रियायोगे १ १६ वीप्सार्थे, अ०—पुन पुन १ १२ ५ प्राप्त्यर्थे १ ५७ ४ प्रतिवन्धने १ ८८ ६ इन्द्रियागोचरेऽर्थे अ०—इत्थभूतम् प्र०—प्रतीत्येतस्य प्रातिलोम्य प्राह नि० १ ३, १.६ ४ [अभि इत्याभिमुख्यम्, प्रतीत्यस्य प्रातिलोम्यम् नि० १ ३]

प्रतिकामम् काम काम् प्रति (सोम) ३ ४८.१ काम काम प्रतीति प्रतिकामम् भा०—प्रतिक्षण सुखम् १६ ५१ [प्रति-कामपदयो समास]

प्रतिक्षत्रे धर्मेण प्रतीते क्षत्रे विद्याधर्मप्रचारिते देशे ऋ० भू० २२०, २० १० [प्रति-क्षत्रपदयो समास]

प्रतिक्षियन्तम् प्रत्यक्ष निवसन्तम् (वायुम्) ११.२३ पदार्थ पदार्थ प्रति वसन्तम् (अग्निम्) २.१०.४ [प्रति-क्षियन्पदयो समास । क्षियन्=क्षि निवासगत्यो (तुदा०) धातो शतृप्रत्यय]

प्रतिख्यातः ख्यात ख्यात प्रतीति (वात =वाह्यो वायु) ८ ५८ [प्रति-ख्यातपदयो समास. । ख्यात =ख्या प्रकथने (अदा०) धातो क्त]

प्रतिगात् प्रत्येति १.१०४ ५ [प्रति+इण् गतौ (अदा०) धातोर्लुङ् । अटोऽभाव । 'इणो गा लुङी' ति गादेश]

प्रतिगृभाय प्रतीत्या गृहाण ६.४७ २८ प्रतिगृहाण ४ ४ १५ [प्रतिपूर्वाद् ग्रह उपादाने (क्र्या०) धातोर्लोट् । 'छन्दसि शायजपि' इति श्न स्थाने शायजादेश । धातोर्हकारस्य भकारो 'हृग्रहोर्भश्छन्दसि' वा० सूत्रेण]

प्रतिगृभ्णन्ति प्रतिगृह्णन्ति २५.३७ **प्रति-गृभ्णाति**=प्रतिगृह्णाति १ ५५ २ **प्रतिगृभ्णातु**=प्रति-गृह्णाति अ०—प्रतिगृभ्णाति प्र०—अत्र हृग्रहोर्भश्छन्दसि हस्य भत्व वक्तव्यम् अ० ५ २ ३२ इति हकारस्य स्थाने भकार लडर्थे लोट् च १ १६ **प्रतिगृभ्णीत**=स्वीकुर्वीत १२ ३५ [प्रति+ग्रह उपादाने (क्र्या०) धातोर्लट् । हस्य भकारादेश । अन्यत्र लोट् लिङ् चापि]

प्रतिगृह्णतः प्रतिग्रहण करने हारो (गृहस्थ जनो) को स० वि० १६७, अथर्व० ६ २.३ १६ [प्रति+ग्रह उपादाने (क्र्या०) धातो शतृप्रत्यय]

प्रतिगृह्णामि प्रतिग्रहण करता हूँ स० वि० १६७, अथर्व० ६ २ ३ १५ [प्रति+ग्रह उपादाने (क्र्या०) धातोर्लट्]

प्रतिगृह्य प्रत्यक्षेण दत्त्वा गृहीत्वा च १ १२५ १ [प्रति+ग्रह उपादाने (क्र्या०) धातो क्त्वा । समासे क्त्वो ल्यप्]

प्रतिचक्षणाय प्रत्यक्ष कथनाय ६ ४७ १८ [प्रति+चक्षिङ् व्यक्तायां वाचि (अदा०) धातोर्ल्युट् । 'वहुल सज्ञा-छन्दसोरिति वक्तव्यम्' अ० २ ४ ५४ वा० सूत्रेण ख्याञ्-आदेशस्य प्रतिषेध]

प्रतिचक्ष्य निषेध्य २ २४ ७ प्रत्यक्षेण प्रत्याख्याय २.२४ ६ [प्रति+चक्षिङ् व्यक्तायां वाचि (अदा०) धातो क्त्वा । समासे क्त्वो ल्यप् । 'वर्जने प्रतिषेधो वक्तव्य' इति ख्याञ् न भवति]

प्रतिचक्ष्या प्रत्यक्षेण द्रष्टु योग्या (उषा) १.११३ ११ [प्रति+चक्षिङ् व्यक्तायां वाचि (अदा०) धातोर्ण्यत् । स्त्रिया टाप्]

प्रतिरः=प्रकृष्टतया प्लव दु:खात्पार गच्छ ३.४०.३ **प्रतिरेत**=प्रवर्धये ७.५८.३ [प्र+तॄ प्लवनसन्तरणयो (भ्वा०) धातोर्लोट्। व्यत्ययेन शप स्थाने श। अन्यत्र लट्, लङ्, लिङ् च। 'प्रतिरते' प्रयोगे व्यत्ययेनात्मनेपदम्। प्रतिरन्तु प्रवर्धयन्तु। नि० १२.३७ प्रतिरते=प्रवर्धयते नि० ११.६]

प्रतिरक्षन् प्रत्यक्षतया पालयन् (गृहस्थो राजजन प्रजाजनो वा) ८.२४ [प्रति+रक्ष पालने (भ्वा०) धातो शतृप्रत्यय]

प्रतिरन् प्रकर्षेण दु:खात्तरन् (नमस्य=पूजितु योग्यो विद्वान्) १.४४.६ [प्र+तॄ प्लवनसन्तरणयो (भ्वा०) धातो शतृ। व्यत्ययेन श]

प्रतिरवेभ्यः ये रवान् प्रति रुवन्ति शब्दायन्ते तेभ्य (पुरुषेभ्य) ३८.१५ [प्रति+रु शब्दे (अदा०) धातोरच्-प्रत्यय। प्राणा वै प्रतिरवा प्राणान् हीद सर्वं प्रतिरतम् श० १४.२.२.३४]

प्रतिरूपः तदाकारवर्त्तमान (इन्द्र=जीव) ६.४७.१८ [प्रतिरूपपदयो समास। य आदित्ये (पुरुष) स प्रतिरूप जै० उ० १.८.२.४]

प्रतिलामि प्रत्यक्षतया स्निह्यामि २३.२४ [प्र+तिल स्नेहने (तुदा०) धातोर्लट]

प्रतिलोभयन्ती प्रत्यक्ष मोहयन्ती (स्वसेना) १७.४४ [प्रति+लुभ गार्ध्ये (दिवा०) धातोर्णिजन्ताच्छतृ। तत स्त्रिया ङीप्। प्रतिलोभयन्ती प्रतिलोभयमाना नि० ९.३१]

प्रतिवद प्रत्यक्षतयोपदिश १.१६ **प्रतिवदत्**= प्रतिवदेत् १.११९.६ [प्रति+वद व्यक्तायां वाचि (भ्वा०) धातोर्लोट्। अन्यत्र लेट्]

प्रतिवस्तोः दिन दिन प्रति अ०—प्रतिदिनम् भा०—नित्यम् प्र०—वस्तोरित्यहर्नामसु पठितम् निघ० १.९, ३.८ [प्रति-वस्तो पदयो समास। वस्तो अहर्नाम निघ० १.९]

प्रतिविध्य प्रतिताडय १३.१३ [प्रति+व्यध ताडने (दिवा०) धातोर्लोट्। 'ग्रहिज्या०' सूत्रेण सम्प्रसारणम्]

प्रतिवेत्तु प्रतिजानातु अ०—प्रतिजानन्तु १.१९ पश्चाद् जानातु ज्ञापयतु वा प्र०—प्रतीत्येतस्य प्रातिलोम्य प्राह नि० १.३, १.१४ अ०—यथावज्जानन्तु १.१९ [प्रति+विद ज्ञाने (अदा०) धातोर्लोट्]

प्रतिवेदयन् स्वगुण प्रत्यक्षतया प्रज्ञापयन् (प्राज्ञो जन) १.१६२.४ विज्ञापयन् (अज=पशुविशेष) २५.२७. [प्रति+विद ज्ञाने (अदा०) धातोर्णिजन्ताच्छतृ]

प्रतिवेशाः प्रतीता वेशा धर्मप्रवेशा येषा ते (राजजना) ११.७५ विरुद्ध-व्यवहारा. (अराजजना.) प० वि० प्रतिकूला: (प्रजाजना) ऋ० भू० २६८, अथर्व० १९.७.७ [प्रति-वेशपदया समास। वेश=विश प्रवेशे (तुदा०) धातोर्घञ्]

प्रतिवोचे प्रतिवदेयमुपदिशेय वा ४.५.१० [प्रति+वच परिभाषणे (अदा०) धातोर्लुङ्। अडभाव। व्यत्ययेनात्मनेपदम्]

प्रतिश्रवाय य प्रतिशृणोति प्रतिजानीते तस्मै (भा०—अव्यापकाय) १६.३४ [प्रति+श्रु श्रवणे (भ्वा०) धातोरच्]

प्रतिश्रुत्कायै प्रतिज्ञायै (स्त्रियै) ३०.१९. प्रतिश्राविकायै (ध्वन्याख्यायै क्रियायै) २४.३२

प्रतिश्रृणीहि प्रतिहिन्धि ३.३०.१७ (प्रति+शॄ हिंसायाम् (क्र्या०) धातोर्लोट्]

प्रतिष्कभे प्रतिष्कम्भते प्रतिबध्नाति शत्रून् येन कर्मणा तस्मै प्र०—अत्र सौत्रात् स्कम्भु-धातो प्रतिपूर्वात् क्विप् १.३९.२ प्रतिष्टम्भनाय पराङ्मुखतया पराजयकरणाय च ऋ० भू० १५१. शत्रुओं के वेग को थामने के लिए आर्याभि० १.२२, ऋ० १.३.१८.२ [प्रति+स्कम्भु (सौत्रो धातु) धातो क्विप्]

प्रतिष्टोभति प्रतिबन्धेन बध्नाति १.८८.६ **प्रतिष्टोभन्ति**=प्रत्यक्षतया स्तुवन्ति ५.८४.२ प्रस्तोभन्ति प्र०—अत्र व्यत्ययेन परस्मैपदम् १.१६८.८. [प्रति+ष्टुभु स्तम्भे (भ्वा०) धातोर्लट्]

प्रतिष्ठ प्रतिष्ठति वा प०—अत्राऽन्त्यपक्षे व्यत्ययो लडर्थे लोट् च अ०—कृपयेम यज्ञ विद्या च प्रतिष्ठापय २.१३ **प्रतिष्ठत**=प्रकृष्टतया प्रतिष्ठा प्राप्नुत अ०—प्रतिष्ठध्वम् प्र०—अत्र 'वाच्छन्दसि सर्वे विधयो भवन्ति, इति नियमात् 'समवप्रविभ्य स्थ' अ० १.३.२२ इत्यात्मनेपद न भवति १.१५.९ **प्रतिष्ठात्**=प्रतितिष्ठति २.१५.७ [प्र+ष्ठा गतिनिवृत्तौ (भ्वा०) धातोर्लोट्। 'पाघ्राध्मा०' इति शिति तिष्ठादेश। 'समवप्रविभ्य स्थ.' इत्यात्मनेपद न भवति छन्दसि सर्वविधीना विकल्पनात्। 'प्रतिष्ठात्' प्रयोगे लेट्]

प्रतिष्ठा प्रतिष्ठन्ति यस्या सा (सत्क्रिया) १४.२३ **प्रतिष्ठायै**=सर्वत्र सत्काराय १५.६४ सत्कृतये भा०—सत्काराय १३.१९ प्रतितिष्ठन्ति सत्कार प्राप्नुवन्ति यस्या तस्यै (सत्क्रियायै) २.२५ [प्रति+ष्ठा गतिनिवृत्तौ (भ्वा०)

(दिवा०) धातो सम्पदादित्वात् क्विप्]

प्रतिपप्रथे प्रत्यक्ष प्रख्याति २ २४ ११ [प्रति+प्रथ प्रख्याने (भ्वा०) धातोर्लिट्]

प्रतिपश्यति प्रत्यक्ष देखता है स० वि० २०६, अथर्व० ६.६ १ ३ [प्रति+दृशिर् प्रेक्षणे (भ्वा०) धातोर्लट्]

प्रतिपस्थानः य प्रस्थान गमन प्रति वर्त्तते स (व्यवहार) १८ १६ [प्रति-प्रस्थानपदयो समास। प्रस्थानम्=प्र+ष्ठा गतिनिवृत्तौ (भ्वा०) धातोर्ल्युट्। पापीय प्रतिप्रस्थानम् मै० ४ ६ २]

प्रतिप्रसिस्रते प्रत्यक्ष प्रसरन्ति गच्छन्ति ५ १ १ [प्रति+प्र+सृ गतौ (जु०) धातोर्लट्। अभ्यासस्येत्वमात्मनेपदञ्च छान्दसम्]

प्रतिबुद्धाः प्रतीतेन ज्ञानेन युक्ता (जना) १ १९१ ५ [प्रति+बुध अवगमने (दिवा०) धातो क्त]

प्रतिभूषति प्रत्यक्षतयाऽलङ्करोति १ ४६ १२, ६ ५२ ८ [प्रति+भूष अलङ्कारे (भ्वा०) धातोर्लट्]

प्रतिभृतस्य धृत धृत प्रति वर्त्तमानस्य (भृत्यवर्गस्य) ४ २० ४ [प्रति-भृतपदयो समास। भृतम्=डुभृञ् धारणपोषणयो (जु०) धातो क्त]

प्रतिमन्वानः प्रत्यक्षेण विजानन् (परमेश्वर) २३ ५२ [प्रति+मनु अवबोधने (तना०) धातो शानच्]

प्रतिमा प्रतिमीयन्ते परिमीयन्ते सर्वे पदार्था यया सा भा०—परिमाणसाधन पदार्थतोलनार्थम् (वस्तु) १५ ६५ प्रतिमीयते यया तत्परिमापक सदृश तोलनसाधन प्रतिकृतिराकृतिर्वा ३२ ३ प्रतिमीयते यया क्रियया सा १४ १८ परिमाण, सादृश्य वा मूर्त्ति स० प्र० ४३२, ३२ ३ प्रतिनिधि प्रतिकृति, प्रतिमान तोलनसाधन, परिमाण, मूर्त्यादिकल्पनम् ऋ० भू० ३००, ३२ ३. प्रतिमीयतेऽनया सा (यया परिमाण क्रियते) ऋ० भू० १४७, ऋ० ८ ७ १८० ३ **प्रतिमाम्**=प्रतीयन्ते सर्वे पदार्था यया ताम् (बुद्धिम्) भा०—परिमाणम् १३ ४१ [प्रति=माङ् माने शब्दे च (जु०) धातो स्त्रियाम् 'आतश्चोपसर्गे' इति अङ्, ततष्टाप्। असौ वै लोक प्रतिमैष ह्यन्तरिक्षलोके प्रतिमित इव श० ८ ३ ३ ५]

प्रतिमानम् परिमाणसाधनम् ४ १८ ४ सादृश्य परिमाण वा १ ३२ ७ समन्तात् प्रतिमीयते परिणीयते प्रतिमिमते येन तत् (स्व=सुखमन्तरिक्ष वा) १ ५२ १२ प्रतिमीयते यत् (जगत्) १ १०२ ८ अतिसमर्थानामुपमा १ १०२ ६ परिमाणसाधक (इन्द्र=परमेश्वरो विद्युद्वा) २ १२.६ परिमाणसाधकम् (ज्ञानम्) ३ ३१ ८ प्रतिमान अर्थात् परिमाण का कर्त्ता (ईश्वर) आर्याभि० १ १३, ऋ० १ ४.१४ १२. [प्रति+माङ् माने (जु०) धातो करणे ल्युट्]

प्रतिमिताम् प्रतिमान अर्थात् एक द्वार, कोण और कक्ष के सम्मुख दूसरे द्वार, कोण और कक्ष वाली (शाला) को स वि० १६६, अथर्व० ६ ३.३ १ [प्रति+माङ् माने (जु०) धातो क्त। 'द्यतिस्यति०' इतीत्वम्। स्त्रिया टाप्]

प्रतिमिमाति प्रतिगच्छति १ १६४ २६ [प्रति+माङ् माने (जु०) धातोर्लट्। व्यत्ययेन परस्मैपदम्]

प्रतिमिमीते प्रत्यक्षतया रचयति १ १६४ २४. [प्रति+माङ् माने (जु०) धातोर्लट्]

प्रतिमुचः प्रत्यक्षतया छोडे स० वि० १६६, अथर्व० ६ ३ ३ २४ [प्रति+मुच्लृ मोचने (तुदा०) धातोर्लङ्। अडभावश्छान्दस। 'शे मुचादीनाम्' इति नुमागमोऽपि न भवति, आगमशासनस्यानित्यत्वात्]

प्रतिमुचीष्ट प्रतिमुञ्चत ७ ५६ ८ [प्रति+मुच्लृ मोचने (तुदा०) धातोराशिषि लिङ्। 'छन्दस्युभयथे' ति सार्वधातुकत्वात् सलोप]

प्रतिमुच्यते प्रत्यक्षतया त्यजति ५ ८१ २ प्रकाश्यते १२ ३ [प्रति+मुच्लृ मोचने (तुदा०) धातो कर्मणि लट्]

प्रतिमुञ्चमानाः मुञ्चन्ते आभिमुख्य ये प्रतीत मुञ्चन्ते त्यजन्ति ते (असुरा=दुष्टा मनुष्या) २ ३० [प्रति+मुच्लृ मोचने (तुदा०) धातो शानच्]

प्रतिमै प्रतिमातुम् ३ ६० ४ (प्रति+माङ् माने (जु०) धातोरतुमर्थे कै प्रत्ययश्छान्दस]

प्रतिमोदध्वम् प्रत्यक्षतयाऽऽनन्दयत १२ ७७ [प्रति+मुद हर्षे (भ्वा०) धातोर्लोट्]

प्रतियन् प्राप्नुवन्ति ३ ४ ५ **प्रतियन्ति**=प्राप्नुवन्ति १.१८० ४. प्रापयन्ति १ ११६ २ [प्रति+इण् गतौ (अदा०) धातोर्लङ्। आटोऽभावश्छान्दस। अन्यत्र लट्]

प्रतिर प्रकृष्टतया तारय ५ ३३ सन्तारय १ ६४ १६ विस्तारय ३ १७ २ क्लेश मत होने दे आर्याभि० २ १८, ३ ५५ **प्रतिरत**=निष्पादयत ७ ५७ ५ **प्रतिरते**=प्रत्यक्ष प्लवते सन्तरति वा प्र०—अत्र व्यत्ययेनाऽऽत्मनेपदम् विकरणव्यत्ययेन शश्च १ १०४ ४ **प्रतिरन्तु**=सुशिक्षया वर्द्धयन्तु १.८६ २ पूर्णं भोजयन्तु २५ १५ **प्रतिरन्ते**=प्रकृष्टतया तरन्ति उल्लङ्घयन्ति १ ११३ १६ प्रकर्षेणोल्लङ्घयन्ते ३ ५३ ७ सन्तरन्ति १ १२५ ६.

प्रतीची दिक्सोमो देवता काठ० ७ २ तै० ३ ११ ५ २ प्रतीची दिङ् मरुतो देवता मै० १.५.४ प्रतीच्येव मह गो० १ ५ १५ या प्रतीची सा सर्पाणाम् श० ३ १ १ ७. सम्राडसि प्रतीची दिक् तै० स० ४ ३ ६ २]

प्रतीचीनम् अस्मान् प्रत्यभिमुख प्राप्नुवन्तम् (राजानम्) ५ ४४ १ अविद्यादिदोषेभ्य प्रतिकूलम् भा० — अविद्याध्वान्तौघध्वसनम् (वृजन =योगवलम्) ७ १२ पश्चाद्भूतम् (विश्व =सर्व जगत्) ३ ५५ ८ **प्रतीचीनः**= पूर्वाऽभिमुख (गृह) स० वि० १६८, अथर्व० ६ २ ३ २२. [प्रतीच इति व्याख्यातम् । तत 'विभाषाञ्चेरदिक् स्त्रियाम्' अ० ५ ४ ८ सूत्रेण स्वार्थे ख प्रत्यय]

प्रतीतये सुखप्राप्ताय ज्ञानाय वा १ ३६ २० [प्रति+ इण् गतौ (अदा०) धातो स्त्रिया क्तिन्]

प्रतीत्येन प्रतीतौ भवेन (वचसा =वचनेन) ४ ५ १४ [प्रतीतिप्राति० भवार्थे यत् । प्रतीति =प्रति+इण् गतौ (अदा०)+क्तिन्]

प्रतूर्तम् अतितूर्णम् भा०—शीघ्रम् ११ १२ [प्र+ ञित्वरा सम्भ्रमे (भ्वा०) धातो क्तप्रत्यये 'ज्वरत्वर०' सूत्रेण वकारस्य उपधायाश्च स्थाने ऊठ् । प्रतूर्तम्= यद्वै क्षिप्र तत् तूर्तम् यत् क्षिप्रात्क्षेपीयस्तत्प्रतूर्तम् श० ६ ३.२.२.]

प्रतूर्तये सद्योऽनुष्ठानाय १ १२९ २ **प्रतूर्तिषु**=हनन-कर्मसु सङ्ग्रामेषु ३३ ६६ **प्रतूर्तिः**=शीघ्रगति १४ २३ प्रकृष्टा तूर्णा गतिर्यस्य स: (पराक्रम) ६ ६ [प्र+ञित्वरा सम्भ्रमे (भ्वा०) धातो स्त्रिया क्तिन्प्रत्यये 'ज्वरत्वर०' इति सूत्रेण वकारस्योपधायाश्च स्थाने ऊठ् । सवत्सरो वाव प्रतूर्ति श० ८ ४.१ १३]

प्रतूर्वतः शीघ्र कर्त्तु (मित्रस्य) ५ ६५ ४ **प्रतूर्वन्**=हिसन् (स्वस्तिगव्यूति =राजा) ११ १५. [प्र+ञित्वरा सम्भ्रमे (भ्वा०) धातो शतरि छान्दस रूपम् । प्रतूर्वन्=(त्वरमाण) प्रतूर्वन्नेह्यपक्रामन्नशस्ती-रिति पाप्मा वा ऽअशस्तिस्त्वरमाण एह्यवक्रामन् पाप्मान-मित्येत् श० ६ ३ २ ७]

प्रतृदः प्रकर्षेणाऽविद्यादिदोषहिंसक (वसिष्ठो= आप्तो विद्वान् ७ ३३ १४ [प्र+उतृदिर् हिंसानादरयो (रुधा०) धातोरिगुपधलक्षण क]

प्रत्न प्राचीन दीर्घायुष्क (राजन्) ६ ३९ ५ **प्रत्नम्**=प्राक्तनम् (विद्युदाख्य वह्निम्) ३ ९ ८ पुरातनम् (सधस्थ=गर्भाशयम्) ११ ४८ प्राचीनम् (गृहाश्रमिणाम्) ५ ८ १ कारणरूपेणाऽनादिम् (अ०—विश्व राज्यम्) प्र०—नञ्च पुरा पुराणे प्राद् वक्तव्य अ० ५ ४ २५ इति पुराणार्थे प्र०—शब्दात् त्नप्-प्रत्यय. १ ३६ ४ **प्रत्नस्य**=पुरातनस्याऽनादे (पितु =जगदीश्वरस्य) १.८७ ५ प्राक्तनस्य (रेतस - वीर्यस्य) ३ ३१.१० **प्रत्नः**—प्राचीनविद्याऽध्येता (होता=गुणदाता राजा) १११७ १ प्रागधीतविद्य (मनुष्य)' ६ ६२ ४ प्राक्तन (अग्नि =भौतिकमग्निम्) २.७ ६ **प्रत्नाय**=प्राचीनाय (इन्द्राय=सभाद्यध्यक्षाय) १ ६१ २ [प्रप्राति० 'नञ्च पुराणे प्रात्' अ० ५ ४ २५ वा० सूत्रेण पुराणार्थे त्नप् प्रत्यय । प्रत्नम्=पुराणनाम निघ० ३ २७ प्रत्न पुराण नि० १२ ३१ प्रत्नम्=अय वा गर्भ—ऋत्विय प्रत्न सधस्थमासदद् इत्यय वो गर्भ ऋतव्य सनातनसधस्थमासदद् इत्येतत् श० ६ ४ ४.१७ स्वर्गो लोक प्रत्न तै० स० १ ५ ७ १]

प्रत्नथा प्रत्न. प्राचीन इव (इन्द्र =दुष्टविदारको राजा) ६ १७ ३ प्राक्तनाना योगिनामिव (योगिजना) ७ १२ प्राचीनम् (वा =जलमिव) १.१३२ ३ प्राचीनेनेव (वलेन) ५ ८ ५ प्रत्न प्राक्तन इव (वैश्वानर =पावक) ३ २ १२ प्रत्नमिव (वृजन =वलम्) ५ ४४.१ [प्रत्न व्याख्यातम् । तत इवार्थे 'प्रत्नपूर्व०' इति थाल्प्रत्यय । प्रत्नथा =प्रत्न इव नि० ३ १६]

प्रत्नवत् प्रत्न प्राचीनो निधिर्विद्यते यस्मिंस्तत् (रेवत्=प्रशस्तपदार्थगुक्त द्रव्यम्) १ १२४ ९ प्रत्न प्राचीन कारण विद्यते यस्मिंस्तद्वत् (आकाशवत्) ६ ६५ ६ प्राचीनवत् (सूर्यवत्) ६ १६ २१ पुरातनम् (परमात्मानम्) ६ २२ ७ [प्रत्न व्याख्यातम् । ततो मतुप् अथवा तुल्यार्थे वति प्रत्यय]

प्रत्ना पूर्वकालीनि (विज्ञानानि) ६ २१ ६ प्राचीनानि (वस्तूनि) १ १०५ ५ [प्रत्न व्याख्यातम् । तत शेर्लोप-श्छन्दसि]

प्रत्नानि प्राक्तनानि (सख्या=सख्यु कर्माणि) १ १०८ ५ [प्रत्न व्याख्यातम्]

प्रत्नाम् अनादिवर्त्तमाना पुराणीमनादिस्वरूपेण नित्याम् (द्युतम्=कारणस्था दीप्तिम्) प्र०—प्रत्नमिति पुराणनामसु पठितम् निघ० ३ २७, ३ १५ [प्रत्न व्याख्यातम् । तत स्त्रिया टाप्]

प्रत्नासः प्राक्तना पूर्वमधीतविद्या (विप्रा =मेधाविजना) ४ ५० १ प्राचीना (राजसुहृद) ६ २१ ५ भूता

धातोः स्त्रियाम् 'आतञ्चोपसर्गे' इत्यङ् । ततष्टाप् । प्रतिष्ठा ह्रस्वनाम निघ० ३ २ इमेऽउ लोका प्रतिष्ठा चरित्रम् श० ८.३ १ १० एषा वै कृत्स्ना प्रतिष्ठा यज्ज्योतिरतिरात्र । जै० २ ३१३ प्रतिष्ठा पुच्छ वयसाम् । ऐ० आ० १ ४ २ प्रतिष्ठा यज्ञायज्ञियम् मै० ३ ३ ५ प्रतिष्ठा वै रथन्तरम् ऐ० २ ४ प्रतिष्ठा वै स्विष्टकृत् ऐ० २ १० प्रतिष्ठोदरमन्नाद्यानाम् ऐ० आ० १ ५ १ याश्चतस्र प्रतिष्ठा इमा एव नाश्चतस्रो दिश जै० उ० १ ६ १ २ यत् प्रतिष्ठा त्रयस्त्रिंश इत्यन्तो हि स जै० ३ ३०६]

प्रतिष्ठितम् प्रतिष्ठित रहता हुआ स० प्र० १६, अथर्व० ११ २४ २ **प्रतिष्ठितः**=प्राप्तप्रतिष्ठ (सभेश) २० ६ **प्रतिष्ठिताः**=प्राप्तप्रतिष्ठा (मनुष्या) ऋ० भू० १०२, अथर्व० १२ ५ ३ प्रतिष्ठा को प्राप्त हुए (हे स्त्री-पुरुषो) स० वि० १४३, अथर्व० १२ ५ ३ [प्रति+ष्ठा गतिनिवृत्तौ (भ्वा०) धातो क्त । 'द्यतिस्यतिमा०' इतीत्वम्]

प्रतिष्ठिता प्रतिष्ठितानि (ऋग्यजु सामानि) ३४ ५ प्रतिष्ठित होते हुए (ऋग्, यजु, साम, अथर्व वेदो के ज्ञान) स० प्र० १८४, ३४ ५ [प्रतिष्ठितमिति व्याख्यातम् । तत शेर्लोपश्छन्दसि]

प्रतिष्ठित्यै प्रतिष्ठायै १५ १२ प्रतितिष्ठन्ति· यस्या तस्यै १५ १० [प्रति+ष्ठा गतिनिवृत्तौ (भ्वा०) धातो स्त्रिया क्तिन् । द्वाभ्या खनति प्रतिष्ठित्य तै० म० ५ १ ४ १ द्विपाद्वै यजमान प्रतिष्ठित्यै जै० ३ २६५]

प्रतिष्ठि: प्रतिष्ठित प्रतिष्ठावान् (सज्जन) ६ १८ १२ [प्रति+ष्ठा गतिनिवृत्तौ (भ्वा०) धातोरौणा० इन् किच्च बहुलवचनात्]

प्रतिसदृक्षासः आप्तसदृशा (मनुष्या) १७ ८४ [प्रति-सदृक्षपदयो समासे जसोऽसुक् । सदृक्ष·=समानोपपदे दृशिर् प्रेक्षणे (भ्वा०) 'दृशे क्सश्च वक्तव्य' अ० ३ २ ६० वा० सूत्रेण क्स । समानस्य सभाव]

प्रतिसदृङ् यस्त त प्रति सदृश पश्यति स (अ०—पुरुष) १७ ८१ [प्रति-सदृक्पदयो समास । सदृक्=समानोपपदे दृशिर् प्रेक्षणे (भ्वा०) धातो 'त्यदादिषु०' सूत्रेण क्विन् । 'क्विन्प्रत्ययस्य कु' इति कुत्वम्]

प्रतिसर्य्याय ये प्रतीते धर्मे सरन्ति तेषु भवाय (धार्मिकाय जनाय) १६ ३३. [प्रति+सृ गतौ (भ्वा०) धातोरच् प्रत्यय । प्रतिसरप्राति० भवार्थे यत्]

प्रतिस्पशः बाधनानि १३ ११ [प्रति+स्पश बाधन-स्पर्शयो (भ्वा०) धातो. क्विप्प्रत्यय । घञर्थे को वा । वचनव्यत्यय]

प्रतिस्फुर पुरुषार्थय ४ ३ १४ [प्रति+स्फुर सचालने (तुदा०) धातोर्लोट्]

प्रतिहर्य प्रत्यक्षतया कामयस्व १ १४४.७ प्रतिकाम-यते ५ ५७ १ **प्रतिहर्यन्ति**=प्रत्यक्ष कामयन्ते १ १६५ ४. **प्रतिहर्यथ**=पुन पुनर्विजानीथ १ ४० ६ [प्रति+हर्य-धातोर्लोट् । हर्यति कान्तिकर्मा निघ० २ ६ हर्यति गतिकर्मा निघ० २ २४ प्रतिहर्यते प्रतिकामयते नि० ११ १३]

प्रतिहिताभिः प्रत्यक्षेण धृताभि (सेनाभि) १७ ३५ **प्रतिहिताः**=प्रतीत्या वृता (ऋषय =विषय-प्रापका पञ्च ज्ञानेन्द्रियाणि मनो बुद्धिश्च ३४.५५ [प्रति-हितापदयो समास । हिता=डुधाञ् धारणपोषणयो (जु०) धातो क्तप्रत्ययान्ताट् टाप् । 'दधातेर्हि' इति हिरादेश]

प्रतीकम् प्रत्येति येन तत् सैन्यम् ७ ८ १. प्रतीति-करम् (ज्योति) ७ ३६ १ येन प्रत्येति तल्लिङ्गम् २६ ३८ विजयप्रतीतिकरम् (बलम्) ७ ३ ६ [प्रति+इण् गतौ (अदा०) धातो कक्-प्रत्ययो बाहु० औणादिक । प्रतीक प्रत्यक्त भवति प्रतिदर्शनमिति वा नि० ७ ३१ मुख प्रतीकम् श० १४ ४ ३ ७]

प्रतीचः पश्चात् स्थितान् (शत्रून्) ३ ३० ६ यत् प्रत्यग् गच्छति तस्य (तमस) १ १७३ ५ [प्रति+अञ्चु गतिपूजनयो (भ्वा०) धातो 'ऋत्विक्०' इति क्विन् । 'अनिदिताम्०' इति नलोपे द्वितीयाबहुवचने शस्-प्रत्यये 'अच' इत्यल्लोपे 'चौ' इति दीर्घे रूपम्]

प्रतीची प्रतीचीन गच्छन्ती (उषा) १ ६२ ६ प्रत्यञ्चतीति (उषा) १ १२४ ७ पश्चिमदिशा प्राप्ता (योषा) ५ ८०.६ पश्चिमा (दिक्) १५ १२ प्रत्यञ्चति प्राप्नोति सा (उष =उषा) ३ ६१ ३ **प्रतीचीम्**= पश्चिमा दिशम् १० १२ पश्चिमा क्रियाम् ५ १२ १ पश्चिम द्वार युक्त (गृह) स० वि० १६८, अथर्व० ६ २ ३ २२ **प्रतीचीः**=पश्चिमा (दिश.) १६ ६४. प्रतीतम[illegible] (प्रजा) ४ ३ २ प्रतिकूल वर्त्तमाना ([illegible]) ३ १८ १ **प्रतीच्यै**=या प्रत्यगञ्चति [illegible] पृष्ठभागा तस्यै (दिशे) २२ २४. [[illegible] नम् । तत स्त्रियाम् ' [illegible] । प्रतीची अभिमुखी नि०

५ ४४.१२ [प्रति+इण् गतौ (भ्वा०) धातोर्लट्]

प्रत्यैरयतम् प्रत्यक्षतया प्रापयताम् १ ११७ २२ [प्रति+ईर गतौ (अदा०) धातोर्णिजन्ताल्लङ्]

प्रत्यौहताम् प्रतीत्या वितर्केण प्राप्नुताम् २७ ६ [प्रति+ऊह वितर्के (भ्वा०) धातोर्लङ्। प्रत्यौहत=प्रत्यूहते नि० २ ९]

प्रत्वक्षसः प्रत्यक्षतया शत्रूणां छेत्तार (नृतमास = नायका जना) १ ८७ १ प्रत्यक्षेण सूक्ष्मकर्त्तार (मरुत = मनुष्या) ५ ५७ ४ [प्र+त्वक्षू तनूकरणे (भ्वा०) धातोरौणादिकोऽसुन्प्रत्यय]

प्रथताम् विस्तारयतु १ २२ **प्रथते**=विस्तृणोति १ १२४ ५ प्रकटयति २९ २९ **प्रथन्ताम्**=प्रख्यान्तु ७ ३ ५ **प्रथन्तु**=उपदिशन्तु प्र०—अत्र व्यत्ययेन परस्मैपदम् १५ १० [प्रथ प्रख्याने (भ्वा०) धातोर्लोट्। 'प्रथते' प्रयोगे लट्। 'प्रथन्तु' प्रयोगे व्यत्ययेन परस्मैपदम्]

प्रथमच्छत् य प्रथमान् विस्तृतान् छादयति स (परमेश्वर) १७ १७ विस्तीर्ण जगत् को रच के अनन्तरूप से आच्छादित करने वाला (परमात्मा) आर्याभि० २ ३०, १७ १७ [प्रथमोपपदे छद अपवारणे (चुरा०) धातो कर्त्तरि क्विप्। प्रथम =प्रथ प्रख्याने (भ्वा०) धातो 'प्रथेरमच्' उ० ५ ६८ इति अमच्प्रत्यय]

प्रथमजम् प्रथमे वयसि ब्रह्मचर्याश्रमे वा जातम् (ओज =बलपराक्रमम्) ३४ ५१ [प्रथमोपपदे जनी प्रादुर्भावे (दिवा०) धातोर्ड प्रत्यय]

प्रथमजान् प्रथमाद्विस्तीर्णात् कारणादुत्पन्नान् (पदार्थान्) २४ १६ **प्रथमजाम्**=य प्रथम जायते तम् (मेघम्) प्र०—अत्र 'जनसन०' इत्यादि अ० ३ २ ६७ अनेन जनधातोर्विट् प्रत्यय १ ३२ ३ सृष्टिकालयुगपदुत्पन्नमेवम् १ ३२ ४ यश्च प्रथमानि सूक्ष्मभूतानि जनयति त परमानन्दस्वरूप मोक्षाख्य परमेश्वरम् ऋ० भू० ८९, ३२ ११ सब महत्तत्त्वादि सृष्टि को धारण करके पालन कर रहे (ईश्वर) को स० वि० २१५, ३२ ११ **प्रथमजा**=प्रथमात्कारणाज्जाता (पूर्वोक्ता महत्तत्त्वादय) १ १६४ ३७ प्रथमे विस्तीर्णे ब्रह्मणि जाता प्रसिद्धा (ऋषय =वेदार्थविद पुरुषा) १८ ५२ य प्रथम जात स (सूर्य इव राजा) ६ ७३ १ प्रथमाद्विस्तीर्णात् कारणाज्जाता वायव १५ १२ अस्मदादौ जाता: (ऋषय =वेदविद्यापुरस्सरा परमयोगिन) १८ ५८ आदिजा (ऋषय =वायव प्राणा) १५ १४ प्रथमतो जाता वायव १५ १० आदौ जाता विद्वांस (जना) १५ ११ [प्रथमोपपदे जनी प्रादुर्भावे (दिवा०) धातोर्ड प्रत्यय। प्रथमजाम्=अत्र प्रथमोपपदे जनी प्रादुर्भावे (दिवा०) धातो 'जनसनखनक्रमगमो विट्' इति विट्। 'विड्वनोरनुनासिकस्यात्' अ० ६ ४ ४१ सूत्रेण नकारस्याकारादेश]

प्रथमजाम् प्रथमोत्पन्ना वेदचतुष्टयीम् भा०—धर्माचरण-वेद-योगाभ्यास-सत्सङ्गादिभि कर्मभिर्जाता शरीरपुष्टिमात्माऽन्त करणशुद्धि च ३२ ११ **प्रथमजाः**= प्रथमाज्जाता (दिव्य =सत्स्त्रिय) ३७ ४ [प्रथमज इति व्याख्यातम्। तत स्त्रिया टाप्]

प्रथमभाजम् य प्रथमान् भजति सेवते तम् (देव= दातार विद्वास जनम्) ६ ४९ ९ [प्रथमोपपदे भज सेवायाम् (भ्वा०) धातो 'भजो ण्वि' अ० ३ २ ६२ सूत्रेण ण्वि। अण् प्रत्ययो वा]

प्रथमम् आदिम कार्यम् १३ ३४ आदौ (दामान= दातार जनम्) ४ ५४ २ विस्तृतमनादि (गर्भ =प्रकृत्याख्यम्) १७ ३० प्रख्यातम् (अग्नि=पावकम्) ३ २९ ५ सब कार्यो मे पहले वर्त्तमान और सब के मुख्य कारण (ईश्वर) को आर्याभि० १ ४०, ऋ० १ ७ ३ ३ विस्तृत विस्तारयितृ (ब्रह्म=सर्वेभ्यो बृहत् परमेश्वरम्) १३ ३ विस्तीर्णम् (केतु=प्रज्ञाम्) १४ १ सर्वोत्कृष्टम् (सभाध्यक्षम्) १ ७७ ३ सब जगत् के आदि-कारण (ईश्वर) को आर्याभि० २ २८, १३ ३ सर्वेष्वग्रगन्तारम् (प्रजापतिम्) १ ३१ ११ जीवनस्याऽऽदिमनिमित्तम् (अग्नि=रूपगुणम्) १ ३५ १ पुर १ १८५ १० आदिम पृथिव्या गमनम् २ १८ २ **प्रथमस्य**= विस्तीर्णस्याऽऽदिमाऽवयवस्य वा १ १२३ ९ आदिमाऽऽश्रमब्रह्मचर्यस्य ३ १५ ४ अनादि सदा मुक्त परमात्मा का स० प्र० ३३०, १ २४ २ **प्रथमः**=प्रख्यातो विद्वान् (जन) १ ८३ ५ विस्तीर्णोऽग्नि १५ २६ आदिम प्रख्यातो वा (सभेश) १ १३४ ६ सर्वस्य प्रथयिता (इन्द्र =सेनापति) प्र०—अत्र 'प्रथेरमच्' उ० ५ ६८, १ १०१ ५ जन्मादे पूर्वगादिम (जगदीश्वर) १२ १०२ विस्तीर्णगुणकर्मा (अग्नि) २ १० १ यज्ञक्रियायामुपास्य आदिम साधन वा (अग्नि) ३ १५ प्रख्यातिमान् (गिल्पिजन) १ १६३ २. पहिला (विवाहित पति) स० प्र० १५३, १० ८५ ४० अनादिस्वरूपो जगत कल्पादौ सदा वर्त्तमान (अग्नि = विज्ञान स्वरूप ईश्वर) १ ३१ १ कारणरूपेणाऽनादिर्वा कार्येष्वादिम (अग्नि =ईश्वर सभाध्यक्षो वा) १ ३१ ३ अनादिस्वरूप पूर्वं मान्यो वा (अग्नि =ईश्वर) १ ३१ २

(पितर =जनका) ४ २ १६ [प्रत्नं व्याख्यातम् ततो जसोऽसुक्]

प्रत्ने पुरातन्यौ (रोदसी=भूमिसूर्यलोकौ) ६.१७ ७ [प्रत्न व्याख्यातम्। तत स्त्रिया टापि प्रथमाद्विवचने रूपम्]

प्रत्यक्षम् साक्षात्कारता से स० वि० २०८, अथर्व० ६ ६ ११ [प्रति-अक्षिपदयो समासे 'अव्ययीभावे शरत्-प्रभृतिभ्य' अ० ५ ४ १०७ सूत्रेण टच्प्रत्यय]

प्रत्यख्यत् प्रकाशयति ४ १३ १ [प्रति+ख्या प्रकथने (अदा०) धातोर्लुङि 'अस्यतिवक्तिख्यातिभ्य०' इति च्ले स्थाने अङ्]

प्रत्यग्रभीत् प्रतिगृह्णाति २८ २३ [प्रति+ग्रह उपादाने (क्र्या०) धातोर्लुङ्। 'हृग्रहोर्भश्छन्दसि' इति हस्य भकारादेश]

प्रत्यग्रभीष्म प्रतिगृह्णीयाम ६ ४७.२२ [प्रति+ग्रह उपादाने (क्र्या०) धातोर्लुङ्। हस्य भकारश्छान्दस]

प्रत्यङ् य प्रत्यञ्चति स (जगदीश्वर) १ ५० ५ प्रतिपदार्थमञ्चति प्राप्नोति य स (देव =ईश्वर) ३२.४ य प्रत्यक्षमञ्चति प्राप्नोति स (सोम =निष्पादितौषधिरस) १६ ३ प्रत्यञ्चतीति (विद्वज्जन) १ १४४ ७ पूजितो भव (अ०—राजप्रजाजन) १० ३१. **प्रत्यञ्चम्**=पश्चात्स्थितम् (सेनाध्यक्षम्) १० ८ य प्रत्यञ्चति तम् (अग्निं=विद्युतम्) ७ १२ १ प्रत्यञ्चन्तम् (अग्निम्) २ १० ५ प्रत्यगञ्चतीति शरीरस्थ वायुम् ११ २४ **प्रतीचः**=पश्चात् स्थितान् (जनान्) ३ ६० ६ य प्रत्यगञ्चति तस्य (तमस =अन्धकारस्य) १ १७३ ५ [प्रति+अञ्चु गतिपूजनयो (भ्वा०) धातो 'ऋत्विग्०' इति क्विन्प्रत्यये 'अनिदिताम्०' इति नलोपे 'उगिदचाम्०' नुमि हल्ङ्याबादिसयोगान्तलोपयो 'क्विन्-प्रत्ययस्य कु' इति कुत्वं रूपम्। 'प्रतीच' प्रयोगे तु शसि भसञ्ज्ञायाम् 'अच' इत्यल्लोपे 'चौ' इति दीर्घे रूपम्]

प्रत्यदर्शि प्रत्यक्षतया दृश्यते ४ ५२ १ प्रतियोक्तु दृश्यते १ ६२ ५ [प्रति+दृशिर् प्रेक्षणे (भ्वा०) धातो कर्मणि लुङ्]

प्रत्यदृक्षत प्रतिदृश्यन्ते ४ ५२ ५ [प्रति+दृशिर् प्रेक्षणे (भ्वा०) धातोर्लुङ्। छन्दसि सर्वविधीना विकल्पनात् 'न दृश' इति क्सप्रत्ययस्य प्रतिषेधो न भवति]

प्रत्यधत्तम् प्रत्यक्षतया भरतम् १ ११६ १५ [प्रति+डुधाञ् धारणपोषणयो (जु०) धातोर्लङ्]

प्रत्यधायि प्रतिध्रियते १ १८४ ६ [प्रति+डुधाञ् धारणपोषणयो (जु०) धातो कर्मणि लुङ्]

प्रत्यनुगृभ्णातु पश्चात् प्रतिगृह्णातु प्रतिगृह्णाति वा अ०—प्रत्यनुगृह्णातु प्रकृष्टतयाऽनुगत गृह्णाति प्र०—अत्र 'हृग्रहो०' इति हस्य भ., पक्षे लडर्थे लोट् च १ २० [प्रति+अनु+ग्रह उपादाने (क्र्या०) धातोर्लोट्। हस्य भकारश्छान्दस]

प्रत्यन्वमदन् प्रत्यक्षतया पुनर्हृष्यन्तु १ ५२ १५ [प्रति+अनु+मदी हर्षे (दिवा०) धातोर्लङ्। व्यत्ययेन शप्]

प्रत्यपद्महि प्रत्यक्षतया व्याप्त्या प्राप्नुयाम ४ २६ [प्रति+पद गतौ (दिवा०) धातोर्लङ्। 'बहुल छन्दसि' इति शपो लुकि श्यनोऽप्यभाव]

प्रत्यभूत्स्महि प्रत्यक्षतया विजानीयाम ४ ५२ ४ [प्रति+भू सत्तायाम् (भ्वा०) धातोश्छान्दस रूपम् व्यत्ययेनात्मनेपदम्]

प्रत्यस्तम् प्रतीक्षितम् (शिर =उत्तमाऽङ्गम्) १० १४ [प्रति+असु क्षेपणे (दिवा०) धातो क्त]

प्रत्यहन् प्रतिहन्ति १ ३२ १२ [प्रति+हन हिंसागत्यो (अदा०) धातोर्लङ्]

प्रत्यायम् प्रतीत्या प्राप्नुयाम् प्र०—अत्र लिङर्थे लङ् १ ११ ६ [प्रति+इण् गतौ (अदा०) धातोर्लङ्]

प्रत्याश्रावः य. प्रतिश्राव्यते स (विद्वान् जन) १६ २४ [प्रति+आङ्+श्रु श्रवणे (भ्वा०) धातोर्घञ्]

प्रत्युदायन् प्रत्युदायन्ति, उद्यन्ति प्रतियन्ति वा ३ ३१ ४ [प्रति+उत्+इण् गतौ (अदा०) धातोर्लङ्]

प्रत्युष्टम् प्रतिदग्धव्यम् (रक्ष =विघ्नकारी प्राणी) १ २६ यत् प्रतीत च तद्दुष्ट दग्ध च तत् (रक्ष =रक्ष-स्वभावो दुष्टो मनुष्य) १ ७ नित्य प्रजापालनाय तापनीय (रक्ष =परसुखासहो मनुष्य) १ २६ [प्रति+उष दाहे (अदा०) धातो क्त]

प्रत्युष्टाः प्रत्यक्षतया उष्टा दग्धव्यास्ते (अरातय =शत्रव) १ ७ प्रत्यक्ष ज्वालनीया (अरातय =परसुखासोढारो मनुष्या) १ २६ प्रतिदग्धव्या (अरातय) १ २६ [प्रति+उष दाहे (भ्वा०) धातो क्त]

प्रत्येतन प्रतीतिं कुरुत ६ ४२ ४ [प्रति+आङ्+इण् गतौ (अदा०) धातोर्लोट्। तप्रत्ययस्य तनबादेश]

प्रत्येति प्रतीत प्रापयति ८ ४ प्रत्यक्ष प्राप्नोति ३३ ६८ प्रतीत प्राप्नोति प्रापयति वा प्र०—अत्राऽन्तर्गतो ण्यर्थ १ १०७ १ प्रत्यक्ष प्राप्नोति विजानाति वा

प्रदधन्युः प्रधरन्त प्र०—अत्र 'नाच्छन्दसि' इति नुडागमो यागुडभाव ४ ३ १२ [प्र+डुधाञ् धारण-पोषणयो (जु०) धातोर्लिङि छान्दस रूपम्]

प्रदधिरे प्रकर्षेण दधति १ १५१ २ [प्र+डुधाञ् धारणपोषणयो (जु०) धातोर्लिट्]

प्रदरान् उदराऽवयवान् २५ ७ [प्र+दॄ विदारणे (क्र्या०) धातोरप् प्रत्यय 'ऋदोरप्' इति]

प्रदशस्यतम् प्रकृष्टतया दत्तम् १ १५८ १ [प्र+दाशृ दाने धातोर्लोट्। धातोर्ह्रस्वश्छान्दस। विकरण-व्यत्ययेन द्विविकरणता]

प्रदातारम् प्रकृष्टतया दानशीलम् (पुरुषम्) ७ ४६ [प्र+डुदाञ् दाने (जु०) धातो कर्तरि तृच्। ताच्छील्ये तृन् वा]

प्रदातुः प्रकृष्टतया शोधयतु (विदुषो जनस्य) प्र०—'दैप शोधने' इत्यस्य रूपम् १ १३ ११ [प्र+दैप् शोधने (भ्वा०) धातो कर्त्तरि तृच्]

प्रदिवः प्राचीन (अग्नि=विद्युत) ४ ७ ८ [प्रदिव पुराण नि० ८ १८ प्रदिव पुराणनाम निघ० ३ २७]

प्रदिवः प्रकृष्टप्रकाशस्य (परमेश्वरस्य) ६ ६२.८ प्रकृष्टा द्यौ प्रकाशो येषा ते (प्रियाचारा जना) ३ ४३ १ प्रकृष्टान् विद्याविनयप्रकाशान् ३ ३८ ५ सुप्रकाशान् (लोकान्) ४ ६ ४ प्रकर्षेण कमनीयान् (मघोन=धनाढ्यान् जनान्) ६.४४ १२ प्रकृष्टा द्यौ प्रकाशमाना विद्या येषान्ते (सोमा=पदार्था) ३ ३६ २ प्रकर्षेण विद्याविनयप्रकाशस्य ३.४७ २ प्रकृष्ट सूर्यात् १ १०९ ६ प्रकर्षेण विद्यादिसद्-गुणान् कामयमानान् (मेधाविजनान्) ४ ३४ ३ प्रकृष्टा द्यौ, प्रकाशिता विद्या २ ३ १ प्रकृष्टस्य न्यायप्रकाशस्य १ ५३ २ प्रकृष्टद्युतिमत (विदुषो जनस्य) १ १४१ ३ **प्रदिवा**=प्रकृष्टप्रकाशवता (केतुना=प्रज्ञया) ५ ६० ८ **प्रदिवि**=प्रद्योतनात्मकेऽग्नौ ५ ६२ ४ प्रकृष्टाया कामना-याम् ६ २१ ८ प्रकृष्ट-प्रकाशे ३ ४६ ४ प्रकर्षेण कमनीये व्यवहारे ६ ४१ ३ [प्र+दिव्पदयो समास। दिव्=दिवु क्रीडाविजिगीषाव्यवहारद्युतिस्तुतिमोदमदस्वप्नकान्ति-गतिषु (दिवा०) धातो क्विप्। प्रदिव=पूर्वेष्वप्यह सु नि० ४ ८]

प्रदिशम् प्रकृष्टा दिशम् १७ ६६ दिशोपदिग्युक्त देशम् २ ४२ २ प्रदिश्यते सर्वैर्जनैस्ताम् (दिशम्) १ ९५ ३ **प्रदिशः**=दिक्प्रदिक्स्याञ्छत्रून् ६ ७५ २ दिशोपदिश ३६ प्रकृष्टगुणयुक्ता दिश २७ १ आग्नेयाद्या उपदिश ३२ ११ ऐशान्यादि उपदिशाएँ, ऊपर नीचे आर्याभि० २ १०, ३२ ११ दिशो विदिशश्च २५ १२ अभ्यन्तरदिश ६ १९ प्रकृष्टा दिश' १८ ३६ पूर्वाद्या ऐशान्याद्या वा ७.३५.८. या. प्रदिश्यन्ते ता १८ ६२ उपदिशाओ को म० वि० २१५, ३२ ११ **प्रदिशा**=उपदिशा २० ३६ प्रदेशेन ज्ञानमार्गेण प्र०—अत्र 'घञर्थे कविधानम्' इति क 'सुपा सुलुक्०' इत्याकारादेशश्च १ १०१ ७. वेदादिशास्त्र-प्रदेशेन निर्देशेन प्रमाणेन २९ ३२ प्रकृष्टया दिशा निर्देशेन २९ २९ आज्ञया १ १६४ ३६ **प्रदिशि**=प्रदिशन्ति यया तस्याम् (वाचि=वाण्याम्) २९ ३६ उपदिशि २ १२ ७ [प्र-दिश्पदयो समास। दिश=दिश अतिसर्जने (तुदा०) धातो 'ऋत्विक्०' इत्यादिना कर्मणि क्विन् निपात्यते। प्रदिशाप्रयोगे-प्रपूर्वाद् दिश अतिसर्जने (तुदा०) धातो 'घञर्थे कविधानमि' ति क प्रत्यय, तृतीयैकवचनस्य चाका-रादेश। प्रदिशो दिगाश्रयाणि भूतानि नि० ११ ३७]

प्रदिशमानः प्रकर्षेणोपदिशन् (भा०=गुरुजन) प्र०—अत्र व्यत्ययेनाऽऽत्मनेपदम् ३ ३१ २१ [प्र+दिश अतिसर्जने (तुदा०) धातो शानच्। व्यत्ययेनात्मनेपदम्]

प्रदिशा प्रकर्षेण बोधयन्त्यौ (देवी=देदीप्यमानौ विद्वांसौ) २९.७ [प्र+दिश अतिसर्जने (तुदा०) धातो 'घञर्थे कविधानमि' ति क। 'सुपा सुलुग्०' इत्याकारादेश]

प्रदिष्टाः या प्रदिश्यन्ते ता (दिश=पूर्वाद्या) ३ ३० १२ [प्र+दिश अतिसर्जने (तुदा०) धातो क्त]

प्रदीध्याना प्रदीप्यमाना (उषा) १ ११३ १०. [प्र+दीधीङ् दीप्तिदेवनयो (अदा०) धातो शानच्, तत स्त्रिया टाप्]

प्रदृप्तिः प्रकृष्टो मोह. ६ ३ २ [प्र+दृप हर्षमोहनयो. (दिवा०) धातो स्त्रिया क्तिन्]

प्रदोधुवत् प्रकृष्टतया कम्पयन् (इन्द्र=वैद्य) २ ११ १७ [प्र+धूञ् कम्पने (क्र्या०) धातो शतृप्रत्यय। 'बहुल छन्दसी' ति शप श्लु। यङ्लुगन्ताद्वा शतृ]

प्रदोषम् रात्र्यारम्भे १ १९१ ५ [प्र+दोषापदयो' समास। दोषा रात्रिनाम निघ० १ ७]

प्रधनस्य प्रकृष्टस्य धनस्य १ १६९ २ **प्रधने**=प्रकृष्टानि धनानि यस्मात्तस्मिन् (आजा=सङ्ग्रामे) १ ११६ २ [प्र+धनपदयो समास। प्रधन इति सग्रामनाम, प्रकीर्णा-न्यस्मिन् धनानि भवन्ति नि० ९ २१]

प्रधयः धारिका धुर १.१६४ ४८ **प्रधीन्**=चक्रस्थानि तीक्ष्णानि कीलकानीव वर्त्तमानान् जगत्कण्टकान्

आदिम साधक (विद्वान् जन) ७ ४४ ८ **प्रथमाः**= आदिमा पृथिव्यादयोऽष्टौ वसव २० १२. पृथुवृद्धय. (विद्वांसो जना) २ ३४ १२ प्रख्याता आदिमा (विप्रा = धीमन्तो जना) ४ २ १५ [प्रथ प्रख्याने (भ्वा०) धातो 'प्रथेरमच्' उ० ५ ६८ सूत्रेण अमच्प्रत्यय । प्रथम इति मुख्यनाम, प्रतमो भवति नि० २ २२ प्रथमम्=परमम् नि० ३ ७]

प्रथमश्रवस्तमः अतिशयेन प्रथम श्रव श्रवणमन्न वा यस्मात् स (रयि =श्री) ४ ३६ ५ [प्रथम-श्रवस्पदयो समासे अतिशायने तमप् । श्रवम् अन्ननाम निघ० २ ७ धननाम निघ० २ १०]

प्रथमा विस्तारकौ (विद्वांसौ स्त्रीपुरुषौ) ३ ४ ७ आदिमौ विद्यावलविस्तारकौ (कवी=अध्यापकोपदेशकौ) १ १८८.७ प्रख्यातौ (विद्वदुपदेशकौ) ३.७ ८ [प्रथमप्राति० 'सुपा सुलुक्०' इति सूत्रेण प्रथमाद्द्विवचनस्याकारादेश]

प्रथमा आदिमा (क्रिया) २५ ६ विस्तृताऽऽदिमा (उषा) १ ११३ ८ प्रख्याता (वैद्या स्त्री) ३३ ५६ [प्रथमप्राति० स्त्रिया टाप् । प्रथम इति व्याख्यातम्]

प्रथमा प्रख्यातानि (धर्म=धर्माणि) ३ १७ १ आदिमानि (असुर्याणि=मेघादीनामिमानि चिह्नानि) ४ ४२ २ [प्रथम-प्राति० शेर्लोपश्छन्दसि]

प्रथमानम् प्रख्यातम् (यानम्) २६ ४. [प्रथ प्रख्याने (भ्वा०) धातोश्शानच्]

प्रथमानि अनादिभूतानि मुख्यानि (धर्माणि) भा०— अनादिकालीनधर्माणि ३१ १६ आदिमानि ब्रह्मचर्याख्यानि १ १६४ ४३ ब्रह्मचर्य-विद्याग्रहण-दानादीनि ६ ७२ १ [प्रथम व्याख्यातम् । ततो नपुंसके प्रथमाबहुवचनम्]

प्रथमानाः प्रख्याता (पुरुषा) २० ४० [प्रथ प्रख्याने (भ्वा०) धातो ताच्छील्यादिषु चानश्]

प्रथयन् विस्तारयन् (परमेश्वर) ४ ५३ २ ,प्रकटीकुर्वन् (अग्न्यादिपदार्थविद्यो मनुष्य) ३ १४ ४ **प्रथयन्तः**=प्रख्यापयन्त (विप्रा =मेधाविजना) ५ ४३ ७ [प्रथ प्रख्याने (भ्वा०) धातोर्णिजन्ताच्छतृप्रत्यय]

प्रथयस्व विस्तारय १२ १०६ [प्रथ प्रख्याने (भ्वा०) धातोर्णिजन्ताल्लोट्]

प्रथस्व प्रख्याता भव १३ १७ विस्तारय १ २२ प्रख्याहि ५ ५ ४ विस्तृतमुखो भव ११ २६ प्रख्यातो भव १३ २ [प्रथ प्रख्याने (भ्वा०) धातोर्लोट्]

प्रथस्वतीम् बहु प्रथ प्रख्याति प्रशसा विद्यते यस्या ताम् (सती स्त्रियम्) १५ ६४. प्रथा प्रख्याता कीर्त्तिर्विद्यते यस्यास्ताम् (विदुषी प्रजापालिका राज्ञीम्) १३ १७. उत्तम-विस्तीर्णविद्यायुक्ताम् (स्त्रीम्) १४ १२ [प्रथस्=प्रथ प्रख्याने (भ्वा०) धातोरौणा० असुन् । प्रथस्-प्राति० प्रशसाया भूम्यर्थे वा मतुबन्तात् ङीप्]

प्रथः सर्वजगत्-प्रसारक (ईश्वर) ऋ० भू० १६८ [प्रथ प्रख्याने (भ्वा०) धातो कर्त्तरि अच्]

प्रथानाम् विस्तीर्ण-सौन्दर्य-प्रख्याताम् (भार्याम्) ६ ६४ ३ **प्रथाना**=प्रथते तरङ्गै शब्दायमाना (सिन्धु = नदी) १ ६२ १२ पक्षिशब्दै शब्दायमाना (उषा) १ ६२ १२ [प्रथ प्रख्याने (भ्वा०) धातो शानच्प्रत्ययान्ताट् टाप् । 'आने मुग्' इति न भवत्यागमशासनस्यानित्यत्वाच्छान्दसत्वाद्वा]

प्रथिना पृथोर्भावस्तेन (अ०—सुविस्तृतेन स्वप्रकाशेन) प्र०—पृथुशब्दादिमनिच् 'छान्दसो वर्णलोपो वा' इति मकारलोप १ ८ ५ [पृथुप्राति० भावे कर्मणि वा 'पृथ्वादिभ्य ०' अ० ५ १ १२२ सूत्रेणेमनिच् । मकारलोपश्छान्दस । 'र ऋतोहलादेर्लघोरि' ति ऋकारस्य रेफादेश.]

प्रथिमा पृथोर्भाव (विस्तीर्णपदार्थसमूह) १८ ४ [पृथुप्राति० भावे इमनिज् इति पूर्वपदे व्याख्यातम् । पृथु महान्तम् नि० १२ २३]

प्रथिष्ट प्रथते ५ ५८ ७ [प्रथ प्रख्याने (भ्वा०) धातोर्लुङ् । अडभावश्छान्दस]

प्रथुयामन् बहुप्रापक (विवाहितजन) ६ ६४ ४ [प्रथूपपदे या प्रापणे (अदा०) धातो कर्त्तरि मनिन्]

प्रदक्षिणित् य प्रदक्षिणामेति स (शिल्पिजन) प्र०—अत्र व्यत्ययेनैकवचनम् २ ४३ १ य प्रदक्षिणमेति गच्छति स (जन), प्र०—अत्र इण्-धातो क्विप् 'छान्दसो वर्णलोपो वा' इत्यन्त्यस्याऽकारलोप ३ १६ २ य प्रदक्षिणां नयति स (विद्वान् जन) ५ ६० १ य प्रदक्षिणमेति स (आपूर्ण कलश) प्र०—अत्र शकन्ध्वादेराकृतिगणत्वात् पररूपमेकादेश ३ ३२ १५ या प्रदक्षिणमेति सा (घृताची= रात्रि) प्र०—अत्र 'वाच्छन्दसि' इत्यल्लोप ४ ६ ३ दक्षिणेन पार्श्वेनैति गच्छतीति (विद्वान् जन) ५ ३६ ४ [प्रदक्षिणोपपदे इण् गतौ (अदा०) धातो कर्त्तरि क्विप् । शकन्ध्वादित्वात् पररूप छान्दसो वर्णलोपो वेत्याकारलोप]

प्रदद्रिरे विदीर्णान् कुर्वन्ति भा०—विदृणन्ति प्र०— व्यत्ययेनाऽत्राऽऽत्मनेपदम् ३३ ७० [प्र+दॄ विदारणे (क्र्या०) धातोर्लिट् । व्यत्ययेनात्मनेपदम्]

पादपूरणे' अ० ८ १ ६ इति द्वित्वम् १ ४० ७ प्र०—अत्र पादपूरणाय द्वित्वम् १ १२६ ८ [प्र-पदस्य पादपूरणे द्वित्वम्। आ इत्यर्वागर्थे प्र परेत्येतस्य प्रातिलोम्यम् नि० १ ३]

प्रप्रधेहि अतिप्रकृष्टतया धेहि ११ ८३ [प्र+डुधाञ् धारणपोषणयो (जु०) धातोर्लोट्। प्र-पदस्य पादपूरणे द्वित्वम्]

प्रप्रपिब प्रकृष्टतया पिव ५ ३८ प्रकृष्टमिव पिब ५ ४१ [प्र+पा पाने (भ्वा०) धातोर्लोट्]

प्रप्रणीतन अतिप्रकर्षेणाऽलङ्कुरुत ५ ५ ५ [प्र+णीञ् प्रापणे (भ्वा०) धातोर्लोट्। तप्रत्ययस्य तनादेशश्छान्दस]

प्रप्ररोचते अतिप्रकर्षेण प्रकाशते १२ ३४ [प्र+रुच दीप्तावभिप्रीतौ च (भ्वा०) धातोर्लट्]

प्रप्रविवाय अतिप्रकर्षेण दूर गमयति ७ ६ ३ [प्र+वी गतिव्याप्तिप्रजनकान्त्यसनखादनेषु (अदा०) धातोर्लिट्]

प्रप्रशसिषम् अतिप्रकर्षेण प्रशसेयम् २७ ४२ [प्र+शसु स्तुतौ (भ्वा०) धातोर्लुड। अडभावश्छान्दस]

प्रप्राऽतियन्ति अतिप्रकर्षेण गच्छन्ति ३ ६ ३ [प्र+अति+इण् गतौ (अदा०) धातोर्लट्। 'इणो यण्' इति यणादेश]

प्रप्रुथ्य प्रपूर्य्य ३ ३२ १ [प्र+प्रोथृ पर्याप्तौ (भ्वा०) धातो क्त्वा। समासे क्त्वो ल्यप्। धातोरोकारस्य ह्रस्वश्छान्दस]

प्रप्रोथाय अत्यन्त पर्याप्ताय (पदार्थाय) २२ ७ [प्र+प्रोथृ पर्याप्तौ (भ्वा०) धातोर्घञ्]

प्रप्लुत: प्रकृष्टगुणै प्राप्त (समुद्र =अन्तरिक्षम्) ८ ५६ [प्र+प्लुङ् गतौ (भ्वा०) धातो क्त]

प्रफर्व्यम् प्रफर्वितु गमयितु योग्यम् (रथवाहनम्=रथवहनसाधनम्) १२ ७१ [प्र+फर्व गतौ (छान्दसो धातु) धातोर्ण्यत्]

प्रबभसत् प्रकर्षेण प्रदीप्येत् प्रभर्त्सेत् ४ ५ ४ [प्र+भस भर्त्सनदीप्त्यो (जु०) धातोर्लेट्]

प्रबुधाय प्रकृष्टज्ञानवते (जनाय) २२ ७ **प्रबुधे**=जागरिते (समये) ४ १४ [प्र+बुध अवगमने (भ्वा०) धातोरिगुपधलक्षण कर्त्तरि क। 'प्रबुधे' प्रयोगे घञर्थे क प्रत्यय]

प्रबुध्यस्व प्रकृष्ट-ज्ञान और उत्तम व्यवहार को यथावत् जान म० वि० १४०, अथर्व० १४ २ ७५ [प्र+बुध अवगमने (दिवा०) धातोर्लोट्]

प्रबोधयन्ती प्रकृष्टतया जागरण प्रापयन्ती (उषा) १ ११३ १४ जागरयन्ती (उषा =प्रभातवेला) ४ १४ ३ **प्रबोधयन्ती:**=जागरयन्त्य (उपस =प्रभाता) ४ ५१ ५ [प्र+बुध अवगमने (दिवा०) धातोर्णिजन्ताच्छन्तान्ताच्च डीप्]

प्रब्रवाम प्रकृष्टतयोपदिशेम ४.५८ २ प्रकर्षेणाऽध्यापयेमोपदिशेम वा भा०—वेदानध्यापयेम सत्यमुपदिशेम ३६ २४ **प्रब्रवीतु**=प्रकृष्टतया ब्रूयात् १ १६१ १३ **प्रब्रवीषि**=प्रकर्षेणोपदिशति ४ ४२ ७ [प्र+ब्रूञ् व्यक्तायां वाचि (अदा०) धातोर्लङ्। अडभावश्छान्दस.। 'बहुल छन्दसी' ति शपो लुङ् न। अन्यत्र लडि शपो लुक् 'ब्रुव ईट्' इतीडागम। 'प्रब्रवीषि' प्रयोगे लट्]

प्रब्रुवाण: य प्रकर्षेण वाचयत्युपदेशयति वा स (अध्यापक उपदेशको वा) १ ५५ ४ प्रकृष्टतया वदन् (उपदेशक) २ ४२ १ [प्र+ब्रूञ् व्यक्तायां वाचि (अदा०) धातो शानच्]

प्रब्रूहि प्रत्यक्ष कथय १ ६१ १३ [प्र+ब्रूञ् व्यक्तायां वाचि (अदा०) धातोर् लोट्]

प्रभञ्जन् य प्रभग्नान् करोति स भा०—हिंसन् (बृहस्पति =सेनापति) १७ ३६ [प्र+भञ्जो आमर्दने (रुधा०) धातो शतृप्रत्यय.]

प्रभर प्रकृष्टतया धर १ ६१ १२ **प्रभरत**=प्रकर्षेण दधाति ४ २६ ४ प्रधरत ३ १० ५ **प्रभरध्वम्**=प्रकृष्टतया धरत ३४ १७ प्रधरध्वम् १ १२२ १. **प्रभरध्वे**=प्रकृष्टतया धरत ५ ५६ ४ **प्रभरन्त**=प्रभरन्ति २ १३ २ प्रदधति १ १७३ ४ **प्रभरामहे**=प्रकृष्टतया पुष्येम २ २० १ प्रकर्षेण धरामहे १६ ४८ **प्रभरे**=प्रकृष्टतया धरे १ ५७ १ प्रकर्षेण धरामि ५ १२ १ [प्र+भृञ् भरणे (भ्वा०) धातोर्लोट्। अन्यत्र लङ्लटावपि]

प्रभर्ता प्रकृष्टाना विद्याना धर्त्ता (इन्द्र =सेनेश.) १ १७८ ३ [प्र+भृञ् भरणे (भ्वा०) धातो कर्त्तरि तृच्]

प्रभर्त्ति प्रकृष्टतया बिभर्त्ति प्र०—अत्र 'बहुल छन्दसि' इति शपो लुक् १ १७३ ६ [प्र+भृञ् भरणे (भ्वा०) धातोर्लट्। 'बहुल छन्दसी' ति शपो लुक्]

प्रभर्त्तुम् प्रकर्षेण धर्त्तुम् ३ ४८ १ [प्र+भृञ् भरणे (भ्वा०) धातोस्तुमुन्]

दुष्टान् ४ ३० १५ [प्र+डुधाञ् धारणपोषणयो (जु०) धातो 'उपसर्गे घो कि' अ० ३ ३ ९२ सूत्रेण कि प्रत्यय । प्रधि प्रहितो भवति नि० ४ २७]

प्रधाक् प्रकृष्टतया दहेत् प्र०—अत्र 'मन्त्रे घसह्वर०' इत्यादिना लेर्लुग् 'बहुल छन्दसि' इत्यडभाव १ १५८ ४ [प्र+दह भस्मीकरणे (भ्वा०) धातोर्लुङ् । मन्त्रे घसह्वर०' इति लेर्लुक् अटोऽभावश्च]

प्रधीव यथा सर्वस्य धर्त्री रथाऽवयवा २ ३९ ४ [प्रधी-इवपदयो समास । प्रधी=प्रधिप्राति० ङीप्]

प्रनक्षन्त प्रकर्षेण व्याप्नुवन्तु ७ ४२ १ [प्र+नक्षति व्याप्तिकर्मा निघ० २ १८ धातोर्लङ् अटोऽभावश्च]

प्रनय प्रकृष्टतया प्राप्नुहि १२ २६ [प्र+णीञ् प्रापणे (भ्वा०) धातोर्लोट्]

प्रपत प्रपातय १२ ८७ [प्र+पत्लृ गतौ (भ्वा०) धातोर्लोट्]

प्रपथिन् प्रकृष्ट पन्था विद्यते यस्य तत्सम्बुद्धौ (राजन्) ६ ३१ ५ [प्र—पथिन्पदयो समास]

प्रपथिन्तमम् अतिशयेन प्रकृष्टपथगामिनम् (इन्द्र = सेनेशम्) १.१७३ ७ [प्र-पथिन्पदयो समासेऽतिशायने तमप् । 'नाद् घस्य' अ० ८ २ १७ सूत्रेण नुडागम]

प्रपथेषु प्रकृष्टेषु सरलेषु मार्गेषु १ १६६ ९ [प्र-प्रथिन्पदयो समासे 'ऋक्पूर०' इति समासान्तोऽकार]

प्रपथ्याय प्रकृष्टेषु धर्मपथिषु साधवे (जनाय) १६ ४३ प्रकर्षेण पथ्यकरणाय २२ २० [प्रपथमिति पूर्वपदे व्याख्यातम् । तत साध्वर्थे यत्]

प्रपदैः प्रकृष्टै पदैर्गमनै ६ ७५ ७ प्रकृष्टै पारगमनै २९ ४४ [प्र+पद गतौ (दिवा०) धातोर् 'घञर्थे कविधानम्' इति भावे क]

प्रपद्यस्व प्राप्नुहि १७ ४५ **प्रपद्ये**=प्राप्नोमि ३ ४३ प्राप्नुयाम् ३३ १ यथावत् प्राप्त होऊ आर्याभि० २४९, ३ ४३ प्राप्त होता हूँ स० वि० १४७, ३ ४३ प्राप्नोमि ऋ० भू० २४०, ३ ४३ [प्र+पद गतौ (दिवा०) धातोर्लोट्]

प्रपश्यन् प्रकर्षेण समीक्षन्ते १ १७४ ६ [प्र+दृशिर् प्रेक्षणे (भ्वा०) धातोर्लङ् । अटोऽभावश्छान्दस]

प्रपा जलपान स्नान आदि का स्थान स० वि० १४२, अथर्व० ३ ३० ६ [प्र+पा पाने (भ्वा०) धातो 'घञर्थे कविधानम्' अ० ३ ३ ५८ वा० सूत्रेण क । स्त्रिया टाप्]

प्रपितामहेभ्यः ये पितामहाना पितरस्तेभ्य १९ ३६ येऽष्टाचत्वारिंशद्वर्षप्रमितेन ब्रह्मचर्येण विद्यापारावार प्राप्याऽध्यापयन्ति ते आदित्याख्या. प्रपितामहास्तेभ्य ऋ० भू० २९६, १९ ३६ [प्र—पितामहपदयो समास । पितामह =पितृप्राति० 'नाम्या पितरि डामहच्' अ० ४ २ ३६ वा० सूत्रेण पितरि डामहच्]

प्रपित्वम् प्रकृष्ट प्रापणम् ३ ५३ २४ प्राप्तिम् ५ ३१ ७ **प्रपित्वे**=प्राप्तव्ये समये स्थाने वा १.१०४ १ उत्तरस्मिन् (उत्तरायणे) १ १३० ९ पदार्थानां प्रापणे ३४ ३७ प्राप्तौ ६ ३१ ३ प्रकृष्टप्राप्ते (दिवसे) ४ १६ १२ प्रकर्षेण प्राप्ते समये १ १८९ ७ प्रकर्षेणैश्वर्यस्य प्राप्तौ ७ ४१ ४ प्रकर्षता उत्तमता की प्राप्ति मे स० वि० १५६, ७ ४१ ४ [प्रपित्वेऽभीक इत्यामन्नस्य । प्रपित्वे प्राप्ते नि० ३ २०. प्रपित्वे उत्तराणि पदानि निघ० ३.२९.]

प्रपिन्वध्वम् प्रकृष्टतया सेवध्वम् ३ ३३ १२ [प्र+पिवि सेवने सेचने च (भ्वा०) धातोर्लोट् । व्यत्ययेनात्मनेपदम्]

प्रपिस्पृशति प्रकर्षेणाऽत्यन्त स्पृशति ६ ४९ १२ [प्र+स्पृश सम्पर्शने (तुदा०) धातोश्छान्दस रूपम्]

प्रपीताः प्रकर्षेण पीता वृद्धा (उषास =प्रभाता) ३४ ४० प्रकर्षेण पीता वर्धयित्र्य (विदुष्य स्त्रिय) ७ ४१ ७ [प्र-पीतापदयो समास । पीता =ओप्यायी वृद्धौ (भ्वा०) धातो क्त । 'प्याय पी' इति पीभावे स्त्रिया टाप्]

प्रपीनम् प्रकृष्टतया स्थूलम् (स्तनम्=दुग्धाधारम्) १७ ८७ [प्र-पीनपदयो समास । पीनम्=ओप्यायी वृद्धौ (भ्वा०) धातो क्त । 'प्याय पी' इति पीभावे 'ओदितश्च' इति निष्ठानत्वम्]

प्रपीनाम् प्रवृद्धाम् (सुमर्ति=प्रज्ञाम्) १७ ७४ [प्रपीन व्याख्यातम् । स्त्रिया टाप्]

प्रपीपय प्रकर्षेण वर्द्धय ३ १५ ६ **प्रपीपयन्त**= प्रकृष्टतया वर्द्धयन्ति १ १८१ ६ (प्र+ओप्यायी वृद्धौ (भ्वा०) धातोर्यङ्लुगन्ताल्लोट् । व्यत्ययेन शप् । अन्यत्र लङचटोऽभाव]

प्रपृञ्चती प्रकृष्टा चाऽसौ पृञ्चती चाऽर्थसम्बन्धेन सकलविद्यासम्पर्क-कारयित्री शब्दोच्चारणसाधिका (वेना= वेदचतुष्टयी वाक्) १ २ ३ [प्र—पृञ्चतीपदयो समास । पृञ्चती=पृची सम्पर्के (रुधा०) धातो शत्रन्तात् ङीप्]

प्रप्र अतिप्रकर्षम् ७ ८ ४ अतिप्रकृष्टे १ १३८ १ अतिप्रकर्षेण ३ ९ ३ प्रत्यर्थे प्र०—अत्र 'प्रसमुपोद

प्रमा श० ८ ३ ३ ५ प्रमोपपदे गतौ देवशब्दे (चुरा०) धातोरच् कर्तरि नुम् छान्दस । प्रमिण=अन्तरिक्षे शब्दस्य गर्जनशीलस्येत्यर्थ । मगन्द कुसीदी, माङ्गदो मामागमिष्यतीति च ददाति, तदपत्य प्रमगन्दोऽत्यन्तकुसीदिकुलीन नि० ६ ३२]

प्रमतिम् प्रकृष्टा प्रज्ञाम् ४ १६ १८ प्रकृष्ट ज्ञानम् १ ७१ ७ **प्रमतिः**=प्रकृष्टा चाऽसौ मतिश्च प्रमति १ १०९ १ प्रकृष्टा गति २ २९ २ प्रकृष्टा बुद्धि १ ६४ १ [प्र-मतिपदयो समास । मति=मन ज्ञाने (दिवा०) धातो स्त्रियां क्तिन् । 'मन्त्रे वृषेषपचमन०' इत्युदात्त]

प्रमतिः प्रकृष्टा मतिर्ज्ञान यस्य स (सर्वमङ्गलकारक सभाध्यक्ष) १ ३१ ६ प्रकृष्टप्रज्ञ (वरतमोऽध्यापक) ७ २९ ४ प्रकृष्टा मतिर्भान यस्य स (अग्नि=सभाध्यक्ष) १ ३१ १०. [प्र-मतिपदयो समास । मतिरिति व्याख्यातम् । मतय=मेधाविनाम । निघ० ३ १५]

प्रमत्या प्रकृष्टा मतिर्मनन यस्या तया (देव्या सेनया १ ५३ ५ [प्र-मतिपदयो समास]

प्रमदे प्रमादाय ३० ६ [प्र+मदी हर्षे (दिवा०) धातो 'प्रमदसमदौ हर्षे' अ० ३ ३ ६८ सूत्रेण अप्प्रत्ययो निपात्यते]

प्रमन्द प्रशमय ६ १८ ९ **प्रमन्दते**=प्रकर्षेणानन्दयति १२ ६४ [प्र+मदि स्तुतिमोदमदस्वप्नकान्तिगतिषु (भ्वा०) धातोर्लोट् । अन्यत्र लट्]

प्रमन्दुः प्रकृष्टमानन्दमाप्नुवन्ति ७ ३३ १ [प्र+मदि स्तुतिमोदादिषु (दिवा०) धातोर्लिट् । 'वा छन्दसीति' द्वित्व न भवति]

प्रमन्महे याचामहे प्र०—मन्मह इति याच्ञाकर्मा निघ० ३ १६, ३४ १६ प्रकृष्टतया मन्यामहे याचामहे वा १ ६२ १ [मन्महे याच्ञाकर्मा निघ० ३ १९]

प्रमहसः प्रकृष्टस्य महत (राज्ञ) ५ २८ ४ [प्र—महस्पदयो समास महस्=मह पूजायाम् (भ्वा०) धातोरौणा० असुन् । मह=महन्नाम निघ० ३ ३]

प्रमा प्रमाण यथार्थविज्ञानम् १५ ६५ यया प्रमीयते सा प्रज्ञा १४ १८ यथार्थज्ञान यथार्थज्ञानवान् तत्साधिका बुद्धि ऋ० भू० ४७ [प्र+माङ् माने शब्दे च (जु०) धातो स्त्रियाम 'आतश्चोपसर्गे' इत्यङ् । ततष्टाप् । अन्तरिक्षलोको वै प्रमा, अन्तरिक्षलोको ह्यस्माल्लोकात् प्रमित इव श० ८ ३ ३ ५]

प्रमिनतः प्रकर्षेण हिंसन (वेशस्य=प्रवेशस्य) ४.३ १३. [प्र+मिनाति वधकर्मा (निघं० २ १९) धातोर्लट्]

प्रमिनती प्रकृष्टतया हिंसन्ती (उषा) १ ९२.११ [प्र+मिनाति वधकर्मा (निघ० २ १९) धातो शत्रन्तान् ङीप्]

प्रमिनन्ति परिमातु शक्नुवन्ति १ २४ ६ प्रकर्षेण हिंसन्ति ४ ५ ४ [प्र+मिनाति वधकर्मा (निघ० २ १९) धातोर्लट्]

प्रमिमय प्रक्षिपेयम् २ २९ ५ [प्र+डुमिञ् प्रक्षेपणे (स्वा०) धातोर्लिट् । 'मिनातिमिनोतिदीङा ल्यपि च' इति प्राप्तमात्व न भवति छान्दसत्वात्]

प्रमिमीतः प्रजनयत ५ ७६.२. [प्र+माङ् माने शब्दे च (जु०) धातोर्लट् । व्यत्ययेन परस्मैपदम्]

प्रमियम् प्रहिंसितुम् ४ ५५ ७ [प्र+मिनाति वधकर्मा (निघ० २ २९) धातोश्छान्दस रूपम्]

प्रमिये मरण प्राप्नुयाम् ४ ५४ ४ [प्र+मिनाति वधकर्मा (निघ० २ १९) धातोश्छान्दस रूपम्]

प्रमीनती प्रकृष्टतया हिंसन्ती (उषा) १ १२४ २ [प्र+मीञ् हिंसायाम् (क्र्या०) धातो शत्रन्तान् ङीप्]

प्रमीयसे प्रकर्षेण म्रियसे ५ ७९ १० [प्र+मीञ् हिंसायाम् (क्र्या०) धातो कर्मणि लट्]

प्रमुञ्च प्रकृष्टतया त्यज १६ ९ [प्र+मुच्लृ मोचने (तुदा०) धातोर्लोट् । 'शे मुचादीनाम्' इति नुम्]

प्रमुञ्चन् प्रकर्षेण मुक्ता कुर्वन् (अग्नि=राजा) २७ ७ प्रकृष्टतया हापयन् (विद्वान् पति) १.१४० ८ [प्र+मुच्लृ मोचने (तुदा०) धातो शतृ]

प्रमुदः प्रकृष्ट प्रसन्नताए स० वि० १६७, ६ ११३ ११ **प्रमुदा**=प्रकृष्टेन हर्षेण ३९ ९ **प्रमुदे**=प्रकृष्टाऽऽनन्दाय ३० १० [प्र+मुद हर्षे (भ्वा०) धातो सम्पदादित्वाद् भावे क्विप्]

प्रमुदितः प्रकृष्टत्वेन हर्षित (पुत्र) १९ ११ [प्र+मुद हर्षे (भ्वा०) धातो क्त]

प्रमुमुग्धि प्रमोचय २१ ३ प्रकृष्टतया मुञ्च पृथक्कुरु ४ १ ४ [प्र+मुच्लृ मोचने (तुदा०) धातोर्लोट् । 'बहुल छन्दसी' ति शप श्लु]

प्रमुषायति प्रकृष्टतया चोरयति ५ ४४ ४ [मुष स्तेये (क्र्या०) धातो प्रपूर्वाण् णिजन्ताल् लट् । गुणाऽभावश्छान्दस]

प्रमृक्ष. प्रकृष्टतया सिञ्च ४ ३० १३ [प्र+मृषु सेचने (भ्वा०) धातोर्लुङ् । अडभावश्छान्दस । क्सो विकरण]

प्रभर्मणि प्रकर्षेण बिभर्त्ति राज्यादीन् यस्मिँस्तस्मिन् (विदुषि राजनि) १ ७९ ७ (प्र+भृञ् भरणे (भ्वा०) धातोर्मनिन्प्रत्यय]

प्रभवति प्रकृष्टतया वर्त्तते १ ५५ ४ [प्र+भू सत्तायाम् (भ्वा०) धातोर्लट्]

प्रभवन्तम् उत्पद्यमानम् (पृष्ठम्=आधार) २ १३ ४ [प्र+भू सत्तायाम् (भ्वा०) धातो शतृप्रत्यय]

प्रभवः उत्पत्ति २ ३८ ५ [प्र+भू सत्तायाम् (भ्वा०) धातो 'ऋदोरप्' इति अप्प्रत्यय]

प्रभासि प्रदीप्यसे १ १२१ ७ [प्र+भा दीप्तौ (अदा०) धातोर्लट्]

प्रभिन्दन् यथा शत्रुदल विदारयँस्तथा (अग्नि=पापिना दग्धा वीरसेनापति) ५ ३७ [प्र+भिदिर् विदारणे (रुधा०) धातो शतृप्रत्यय]

प्रभु उत्तमप्रभावकारकम् (राध=धनम्) १.९ ५ समर्थम् (भा०—ब्रह्म) २ २४ १० [प्र+भू सत्तायाम् (भ्वा०) धातो 'विप्रसभ्यो ड्वसज्ञायाम्' अ० ३ २ १८० सूत्रेण डु प्रत्यय]

प्रभुञ्जती प्रकृष्ट पालन कुर्वती (उषा) १ ४८ ५ [प्र+भुज पालनाभ्यवहारयो (रुधा०) धातो शत्रन्तान् ङीप्]

प्रभुवत् प्रकृष्टतया भवेत् प्र०—अत्र लेट् १ ११९ ७ [प्र+भू सत्तायाम् (भ्वा०) धातोर्लेट् । विकरणव्यत्ययेन श]

प्रभुः समर्थ (ईश्वर) १ १८८ ९ सर्वसामर्थ्ययुक्त सर्वशक्तिमान् (परमात्मा) स० प्र० ४२३, ९ ८३ १ [प्र+भू सत्तायाम् (भ्वा०) धातो 'विप्रसभ्यो ड्वसज्ञायाम्' अ० ३ २ १८० सूत्रेण डु प्रत्ययस्ताच्छील्ये यज्ञ इव प्रभूर्भूयासम् ऐ० आ० ५ १ १]

प्रभूतम् पुष्कलम् (रत्न=सुवर्णहीरकादिकम्) ३ ५४ ३ [प्र+भू सत्तायाम् (भ्वा०) धातोरौणादिक क्त]

प्रभूती समर्थौ (राजाऽमात्यौ) ४ ४१ ७ [प्र+भू सत्तायाम् (भ्वा०) धातो स्त्रिया क्तिन् । तत द्विवचनम्]

प्रभूती बहुत्वेन (अभिमानेनाऽज्ञानेन वा) ४ ५४ ३ [पूर्वपदे द्रष्टव्यम्]

प्रभूतौ बहुत्वे (भावे) ३ १९ ३ [प्र+भू सत्तायाम् (भ्वा०) धातो सज्ञाया क्तिच् । तत सप्तमी]

प्रभूवरीः प्रभुत्वयुक्ता (वाच) २३ ३५ [प्र+भू सत्तायाम् (भ्वा०) धातो 'अन्येभ्योऽपि दृश्यन्ते' अ ३ २ ७५ सूत्रेण क्वनिप् । तत स्त्रिया 'वनो र च' अ० ४ १ ७ सूत्रेण ङीप् रेफश्चान्तादेश]

प्रभूवसो प्रभु सर्वसमर्थश्च वसु सुखेषु वासप्रदश्चासौ तत्सम्बुद्धौ (इन्द्र=जगदीश्वर) १ ५७ ४ य समर्थश्चाऽसौ वासयिता च तत्सम्बुद्धौ (इन्द्र=राजन्) ७ २२ २ [प्रभु—वसुपदयो समास । पूर्वपदस्य दीर्घश्छान्दस]

प्रभूषतः प्रकृष्टतयाऽलङ्कुरुत १ १५९ १ [प्र+भूष अलङ्कारे (भ्वा०) धातोर्लट्]

प्रभूषन् अलङ्कुर्वन् (अद्वितीय ब्रह्म) ३ ५५.१ [प्र+भूष अलङ्कारे (भ्वा०) धातो शतृ]

प्रभूः समर्थ (अग्नि=सूर्यरूप) २२ १९ [प्र+भू सत्तायाम् (भ्वा०) धातो कर्त्तरि क्विप्]

प्रभृतम् प्रकर्षेण धृतम् (तृण=घासविशेषम्) २५ ३१ **प्रभृतस्य**=प्रकर्षेण धारकस्य पोषकस्य वा (वचस) १२ ४२ **प्रभृतः**=प्रकर्षेण हवनादिना पोषित (अद्रि) ३३ ७८ **प्रभृताः**=प्रकृष्टतया धृता (अ०—विद्वासो जना) १ ५१.१२ [प्र+भृञ् भरणे (भ्वा०) धातो क्त]

प्रभृता प्रकर्षेण धारणे पोषणे वा ५ ३२ ५ [प्रभृत व्याख्यातम् तत 'सुपा सुलुक्०' इति सप्तम्या आकारादेश]

प्रभृतिम् प्रकृष्टा धारणा पोषण वा २ २४ १ **प्रभृतौ**=प्रकृष्टधारणे ५ ३२ ७ प्रकृष्टतया धारणे ७ ३८ २ [प्र+भृञ् भरणे (भ्वा०) धातो स्त्रिया क्तिन्]

प्रभृथस्य प्रकर्षेण ध्रियमाणस्य (आयो=जीवनस्य) ५ ४१ ९ **प्रभृथे**=प्रकृष्टे पालने २ ३४ ११ प्रकर्षेण धारिते जगति ७ ४० ५ शुद्धकरणे व्यवहारे ५ ४१ ४ **प्रभृथेषु**=प्रकर्षेण धर्त्तव्येषु (धर्मेषु) ५.३३ ५ [प्र+डुभृञ् धारणपोषणयो (जु०) धातोर्बाहु० औणादिक थक्प्रत्यय । प्रभृथस्य=प्रभृतस्य नि० ११ ४९]

प्रभेदति प्रकृष्टतया भिनत्ति ५ ८६ १ [प्र+भिदिर् विदारणे (रुधा०) धातोर्लट् । विकरणव्यत्ययेन शप्]

प्रभ्रियन्ते प्रकृष्टतया ध्रियन्ते १ १४ ४ [प्र+भृञ् भरणे (भ्वा०) धातो कर्मणि लट्]

प्रभ्वी समर्था (भा०—त्रिगुणात्मिका मात्रा) १ १८८ ५ [प्रभुरिति व्याख्यातम् । तत स्त्रियाम् 'वोतो गुणवचनात्' इति ङीष्]

प्रमगन्दस्य य कुलीनो मा गच्छति स तस्य (सज्जनस्य) ३.५३ १४ [प्रमीयते प्रकृष्ट निर्मीयते यस्मिन् मेघ प्रमा=अन्तरिक्षम् । अन्तरिक्षलोको वै

क्त । ततश्शेर्लोपश्छन्दसि]

प्रयतान् सुशिक्षितान् (अश्वान्=तुरङ्गान्) १ १२६ २ **प्रयताः**=प्रयतमाना (गाव =धेनव) ५ ३३ १० [प्र+यमु उपरमे (भ्वा०) धातो क्त । ततो द्वितीया]

प्रयतानि प्रयत्नेन सावितानि (हवींषि=अन्नादीनि) १६ ५६ [प्र+यती प्रयत्ने (भ्वा०) धातो क्त. । तलोपश्छान्दस । यमु उपरमे (भ्वा०) धातोर्वा प्रोपसर्गात् क्तः]

प्रयतासु नियतासु (अ०—वृष्टिषु) १ १६६ ४ [प्र+यमु उपरमे (भ्वा०) धातो क्तान्तात् टाप् स्त्रियाम्]

प्रयति प्रैति प्रकृष्ट ज्ञान ददातीति प्रयत् तस्मिन् (अध्वरे=यज्ञे) प्र०—'इण् गतौ' इत्यस्माल्लट स्थाने शतृ-प्रत्यय १ १६ ३ प्रयतन्ते यस्मिँस्तत्र (यज्ञे=सङ्गन्तव्ये यज्ञादिव्यवहारे) २८ १४ प्रयत्नसाध्ये (यज्ञे) ६ १० १ **प्रयत्सु**=प्रयत्नसाध्येषु वर्त्तमानेषु (अध्वरेषु=यज्ञेषु) २७ १४ **प्रयद्भ्यः**=प्रयत्न कुर्वद्भ्य (मरुद्भ्य = मनुष्यादिभ्य) ५ ५४ ६ **प्रयन्तम्**=प्रयत्न कुर्वन्तम् (विद्वास जनम्) ५ ६४ २ [प्र+इण् गतौ (अदा०) धातो शतृप्रत्यये 'इणो यण्' इति यणादेश । यती प्रयत्ने (भ्वा०) धातोर्वा प्रोपसर्गात् क्विप्]

प्रयति प्रकृष्ट सुखमेति येन तस्मिन् (अध्वरे=अहिंसनीये यज्ञे) प्र०—अत्र 'कृतो बहुलम्' इति करण-कारके कृत् ४ ५ प्रयत्यते जनैर्यस्तस्मिन् (यज्ञे) प्र०—'कृतो बहुलम्' अ० ३ ३ १३ इति वार्त्तिकेन कर्मणि क्विप् ८ २० प्रयतन्ते यस्मिँस्तत्र (यज्ञे=सङ्गन्तव्ये यज्ञादिव्यवहारे) २८ १४ [प्र+यती प्रयत्ने (भ्वा०) धातो 'कृतो बहुलम्' इति कर्त्तृ भिन्नकारकेष्वपि क्विप्]

प्रयतिम् प्रयतन्ते यया ताम् (सभाम्) १ १२६ ५ **प्रयतिः**=प्रयतन्ते यया सा (त्वक्) २० १२ प्रयतते येन स (भा०—यज्ञ) प्र०—अत्र 'सर्वधातुभ्य०' इत्यौणादिक इ-प्रत्यय १८ १ प्रयतनशील (रश्मि =किरणो दीप्ति) ३३ ७४ [प्र+यती प्रयत्ने (भ्वा०) धातोरौणादिक इ प्रत्यय]

प्रयती प्रयत्यै प्रदानाय प्र०—अत्र प्रपूर्वाद् यमधातो क्तिन्, तस्माच्चतुर्थ्येकवचने 'सुपा सुलुक्०' इतीकारादेश. १ १०६ २ [प्र०+यमु उपरमे (भ्वा०) धातो स्त्रिया क्तिन् । ततश्चतुर्थ्या स्थाने 'इयाड् डयाजीकाराणामुपसख्यानम्' अ० ७ १ ३६, वा० सूत्रेण ईकारादेश । प्रयती-प्रदानेव नि० ६.६]

प्रयत्येतन प्रनीर्ति कुरुत ६ ४२ २ ['प्रयति' उपपदे इण् गतौ (अदा०) धातोर्लोट् । तस्य तनवादेश]

प्रयन् प्रकृष्टतया गच्छन् (गौ =पृथिवीगोल) ३ ६ [प्र+इण् गतौ (अदा०) धातो. शतृ-प्रत्यय]

प्रयन्त प्रयच्छत प्र०—अत्र शपो लुक् ३३.४८ [प्र+यमु उपरमे (भ्वा०) धातोर्लोटि शपो लुक्]

प्रयन्तम् प्रयत्न कुर्वन्तम् (सूर्यम्) १ १५२ ४ [प्र+इण् गतौ (अदा०) धातो शतृप्रत्यय]

प्रयन्तः प्रकृष्टनियमकर्त्त (परमेश्वर विद्वन्वा) १ ७६ ४ **प्रयन्ता**=प्रकर्षेण नियन्ता (इन्द्र =राजा) ७ १६ १ प्रकर्षेण यमनकर्त्ता सन् (इन्द्र =सर्वाधीश) १ ५१ १४ [प्र+यमु उपरमे (भ्वा०) धातो कर्त्तरि तृच्]

प्रयन्तारा प्रयच्छन्ति याभ्या तौ (पाणी=बाहू) ४ २१ ६ [प्र+यमु उपरमे (भ्वा०)+तृच् । 'सुपा सुलुग्०' इत्याकारादेश]

प्रयन्ति प्रकृष्टतया गच्छन्ति १ ६७ ५ प्रकर्षेण प्राप्नुवन्ति ३.४० ४ **प्रयन्तु**=प्रकृष्टतया गच्छन्तु ७ ३४ १८ **प्रयन्धि**=प्रयच्छ ३.३६ ६ [प्र+इण् गतौ (अदा०) धातोर्लट् । अन्यत्र लोट् । 'प्रयन्धि' प्रयोगे प्रोपसर्गाद् यमु उपरमे (भ्वा०) धातोर्लोटि शपो लुकि च रूपम्]

प्रयम्यमानान् प्रकर्षेण प्रापितनियमान् (व्यवहारान्) ३ ३६ २ [प्र+यमु उपरमे (भ्वा०) धातो कर्मणि शानच्]

प्रययुः प्रकृष्टतया प्राप्नुवन्ति ५ ५३ १२ प्रयान्ति ४ १६ ५ [प्र+या प्रापणे (अदा०) धातोर्लिट्]

प्रयवयन् प्रकर्षेण सयोजयन् विभाजयन् वा (अ० राजा) ३ ४८ ३ [प्र+यु मिश्रणेऽमिश्रणे च (अदा०) धातोर्णिजन्ताच्छतृ । वृद्ध्यभावश्छान्दस]

प्रयष्टे प्रकर्षेण यष्टुम् ३ ७ १ [प्र+यज देवपूजासगतिकरणदानेषु (भ्वा०) धातोश्छान्दस रूपम्]

प्रयसः कमनीयस्य (अन्धस =अन्नस्य) २ १६ १ **प्रयसा**=येन प्रीणन्ति तृप्यन्ति कामयन्ते वा शिष्टान् विदुष शुभान् गुणान् तेन (अन्नेन) सह १ ७१ ३ प्रयत्नेन ३ ५४ ३ प्रीतेन (प्रयत्नेन) ४ ५ ६ **प्रयसे**=प्रयतमानाय (वरुणाय=उत्तमाय व्यवहाराय) ५ ६६ १ [प्र+यसु प्रयत्ने (दिवा०) धातो क्विप्, 'कृतो बहुलम्' इति वार्त्तिकेन]

प्रयस्ता प्रेरिता (उखा=पाकस्थाली) ३ ५३ २२ [प्र+यमु प्रयत्ने (दिवा०) धातो क्त । तत स्त्रिया टाप्]

प्रयस्वतीः प्रयो बहुविध तर्प्पण विद्यते यासु ता.

प्रमृण प्रकर्षेण बाधस्व ६ ४४ १७ प्रकृष्टतया हिन्धि ४.१६ १२. [प्र+मृण हिंसायाम् (तुदा०) धातोर्लोट्]

प्रमृणन् प्रकर्षेण हिंसन् (इन्द्र =सैनिकजन) ३ ३० ६ **प्रमृणन्तम्**=प्रकृष्टतया शत्रून् हिंसन्तम् (इन्द्र= सेनापतिम्) १७ ३८ [प्र+मृण हिंसायाम् (तुदा०) धातो शतृप्रत्यय]

प्रमृणः ये प्रकृष्टतया मृणन्ति हिंसन्ति तान् (शत्रुसेना-जनान्) १७ ३६ [प्र+मृण हिंसायाम् (तुदा०) धातो कर्त्तरि क्विप्]

प्रमृणीहि प्रकर्षेण हिन्धि १३ १३

प्रमृशाय प्रकृष्टविचारशीलाय भा०—सुविचाराय (जनाय) १६ ३६ [प्र+मृश आमर्शने (तुदा०) धातोरि-गुपधलक्षण कर्त्तरि क]

प्रमृषन्त प्रकृष्टतया सहन्ते ७ १८ २१ [प्र+मृष तितिक्षायाम् (दिवा०) धातोर्लङ् । विकरणव्यत्ययेन श । अटोऽभाव]

प्रमृषे सुखै सयोजये ३ ९ २ [प्र+मृष तितिक्षा-याम् (दिवा०) धातोर्लट् । व्यत्ययेन श । धातूनामनेकार्थ-कत्वेन गिश्रणेऽपि । प्रमृषे=प्रमृष्यते नि० ४ १५]

प्रमोदाः प्रकृष्टा आनन्दयोगा भा०—पराऽऽनन्दा २० ६ [प्र=मुद हर्षे (भ्वा०) धातोर्घञ्]

प्रमोषीः प्रकृष्टतया स्तेनयेः १ १०४ ८ प्रकर्षेण चोरये २१ २ प्रकृष्टतया मुष्णीयात् खण्डयेन् प्र०—अत्र लिङर्थे लुङ् ४ २३ प्रकर्षेण पृथक्कुरु प० वि० अ०—खण्डन कुर्य्यात् ४ २३ प्रत्यक्ष चुरा और चुरवा आर्याभि० १ ४६, ऋ० १ ७ १६ ८ [प्र+मुष स्तेये (क्र्या०) धातोर्लुङ्]

प्रम्लोचन्ती प्रकृष्टतया सर्वानोपध्यादिपदार्थान् म्लोच-यन्ती (दीप्ति) १५ १७ [प्र+म्लुचु गत्यर्थे (भ्वा०) धातो शत्रन्तात् ङीप्]

प्रय इव यथा प्रीतमन्नम् १.६१ २ [प्रय -इवपदयो समास । प्रय =अन्ननाम निघ० २ ७ उदकनाम निघ० १ १२]

प्रयक्षतमम् अत्यन्तपूजनीयम् (कर्म्म) १ ६२ ६ [प्र-यक्षपदयो समासेऽतिशायने तमप् । यक्ष =यजधातोरौणा० स प्रत्यय]

प्रयक्षन् प्रकृष्टतया यजन्ते २ ५ १ **प्रयक्षन्त**=प्रकृष्ट-तया गोपत हिंस्त १ १३२ ५ [प+यज देवपूजासगति-करणदानेपु (भ्वा०) धातोर्लङ् । अडभाव । विकरण-व्यत्ययेन सिप्]

प्रयक्षे प्रकर्षेण यष्टु सङ्गन्तुम् ३ ३१ ३ [प्र+यज-देवपूजासगतिकरणदानेषु (भ्वा०) धातोस्तुमर्थे से प्रत्यय]

प्रयच्छतु प्रकृष्टतया ददातु ६ २६ **प्रयच्छन्ति**= प्रकृष्ट ददति ३ ३३ [प्र+दाण् दाने (भ्वा०) धातोर्लट् । शिति प्रत्यये 'पाघ्रा०' इत्यादिना यच्छादेश]

प्रयज प्रकर्षेण सङ्गच्छस्व ३ १७ ५ **प्रयजे**=प्रकृष्ट-तया सङ्गच्छेयम् २ ६ ३ प्रकर्षेण सङ्गच्छे १७ ७५ [प्र+यज देवपूजासगतिकरणदानेषु (भ्वा०) धातोर्लोट्]

प्रयज्यवः प्रकर्षेण यज्ञसम्पादका (अमात्यजना) ६ ४८ २० प्रकर्षेण सङ्गन्तार (मरुत =गृहस्थिजना) ७ ५६ १४ प्रकृष्टयज्यव सङ्गन्तारो मनुष्या ५ ५५ १ प्रकृष्ट यज्यवो येपा तत्सम्बुद्धौ (मरुत =सभाध्यक्षादय) १ ८६ ७ प्रकृष्टो परोपकाराख्यो यज्ञो येपा राजपुरुषाणा तत्सम्बुद्धौ १ ३९ ९ **प्रयज्यवे**=प्रयजन्ति येन तस्मै (धीमते जनाय) ५ ८७ १ **प्रयज्यो**=यो यत्नेन यष्टु सङ्गन्तु योग्यस्तत्सम्बुद्धौ (परमेश्वर) ६ २१ १० य प्रकर्षेण यजति तत्सम्बुद्धौ (यजमान कवे) ६ ४९ ४ य प्रयजति तत्सम्बुद्धौ (अग्ने=विद्वन् जन) ३ ६ २ प्रकर्षेण यज्ञकर्त्त (देव=विद्वज्जन) ६ २२ ११ **प्रयज्योः**=प्रयोक्तु योग्यस्य अत्यस्य=अश्वस्य) १ १८० २ [प्र+यज देवपूजासगति-करणदानेपु (भ्वा०) धातो 'यजिमनिशुन्धि०' उ० ३.२०. सूत्रेण युच्प्रत्यय । प्रयज्युम्=प्रततयज्यम् नि० ५ २.]

प्रयतदक्षिणम् प्रयता प्रयत्नेन दत्ता दक्षिणा यस्मा-त्तत् (वसु=धनम्) ६ ५३ २ प्रयता प्रकृष्टतया यता विद्या-धर्मोपदेशरूपा दक्षिणा येन तम् (नर=विनयाभियुक्त मनुष्यम्) १ ३१ १५ [प्रयता-दक्षिणापदयो समास । प्रयता=प्र+यमु उपरमे (भ्वा०) धातो क्त, ततष्टाप् । दक्षिणा दक्षते समर्द्धयतिकर्मणो व्यृद्ध समर्द्धयतीति नि० १ ७]

प्रयतम् प्रयत्नसाध्यम् (विजयम्) ४ २७ ५ प्रयत्नेन सिद्धम् (यज्ञम्) ३ ३५ १०. **प्रयतस्य**=प्रयत्न कुर्वत (जीवस्य) ४ ५ १० **प्रयतः**=प्रयतमाना (भा०—अध्या-पका) ४ १५ ८ **प्रयता**=प्रयत्नेन ५ ३० १२ [प्र+यती प्रयत्ने (भ्वा०) धातो क्त । 'छान्दसो वर्णलोपो वा' इति तलोप । अथवा यमु उपरमे (भ्वा०) धातो क्त]

प्रयता प्रकर्षेण दत्तानि (धनानि) ५ ३४ ४ प्रयत्नेन साधितानि (हवीपि=अन्नानि) १ ६ ६६ प्रयत्नसाध्यानि (द्रव्याणि) ५ ४२ ३ [प+यमु उपरमे (भ्वा०) धातो

प्रयुच्छसि अत्यन्त प्रमाद्यसि ८ ३ [प्र+युच्छ प्रमादे (भ्वा०) धातोर्लट्]

प्रयुज्याताम् प्रयुक्तौ भवतः ७ ४२ १ [प्र+युजिर् योगे (रुधा०) धातोः कर्मणि लोटि प्रथमस्य द्विवचनम्]

प्रयुञ्जती प्रयोगं कुर्वती (माता) ५ ८७ १ [प्र+युजिर् योगे (रुधा०) धातोः शत्रन्तात् ङीप्]

प्रयुञ्जते प्रयुञ्जन्ति १ ४८ ४ [प्र-युजिर् योगे (रुधा०) धातोर्लट्। 'प्रोपाभ्यां युजेरयज्ञपात्रेषु' अ० १ ३ ६४ सूत्रेणात्मनेपदम्]

प्रयुतम् दश लक्षाणि (विनव — दुग्धदात्री गाव इव (प्र०—प्रयुतमिति कोटेरप्युपलक्षणम् १७ २. ना-लङ्कृत्याकम् (सङ्ख्यम्) ६ १८ बहुविधम् (अहि—मेघम्) ५ ३२ २ [अयुत नियुत प्रयुत तत्सङ्ख्याम् नि० ३ १०]

प्रयुतः विभक्त सन् मिलितः (राजा—प्राप्तमान भूयं) ३ ५५ ४. [प्र+यु मिश्रणेऽमिश्रणे च (अदा०) धातोः क्त]

प्रयुताम् अप्रकृष्टयोधाम् (विनु — वाचम्) ३ ५७ १ [प्रयुत व्याख्यातम्। ततष्टाप्]

प्रयुधः ये प्रकर्षेण युध्यन्ते ते (नर —नायका जना) ५ ५९ ५ [प्र+युध सम्प्रहारे (दिवा०) धातोः कर्तरि क्विप्]

प्रयुयुधुः प्रकृष्टतया सङ्ग्रामं कुर्युः ५ ५९ ५ [प्र+युध सम्प्रहारे (दिवा०) धातोर्लिट् व्यत्ययेन परस्मैपदम्]

प्रयै प्रयातुम् १ १४२ ६ [प्र+या प्रापणे (अदा०) धातोस्तुमर्थे 'प्रयै रोहिष्यै अव्यथिष्यै' पा० ३ ४ १० सूत्रेण कैं-प्रत्ययो निपात्यते]

प्रयोभि. कमनीयैर्लक्षणैः (अ०—पदार्थै सह) ७ ८ कमनीयैर्गुणकर्मस्वभावैः ३ ३ ५६ तृप्तिकरैस्सर्वैरभि पदार्थे सह प्र०—'प्रीञ् तर्पणे कान्तौ च' इत्यस्मादौणादिकोऽसुन् प्रत्ययः १ २ ४ [प्रीञ् तर्पणे कान्तौ च (क्र्या०) धातोरौणा० असुन्प्रत्ययः]

प्ररर्ष्शे प्रकर्षेणातिरिणक्ति ६ १८ १२]

प्रराध्यम् प्रकर्षेण साद्धुं योग्यम् (श्रुत—ज्ञानम) ५ ३९ ३ [प्र+राध संसिद्धौ (स्वा०) धातोर्ण्यत्]

प्ररिक्वा य सर्वा प्रजा प्रकृष्टतया निर्गाय व्याप्तवान् स (इन्द्र —जगदीश्वर) १ १०० १५ प्रकृष्टतया मे उनमें व्यापक होके इनसे अतिरिक्त—विलक्षण भिन्न ही परिपूर्ण हो रहा (जगदीश्वर) आर्याभि० १ ३२, ऋ० १.१०० १५ [प्र+रिचिर् विरेचने (रुधा०) रिच वियोजनसम्पर्चनयो (चुरा०) धातोरौणादिकः क्वनिप्। अत्राकारादेश उत्वम्]

प्ररिरिचे प्रकृष्टतयाऽतिरिच्यते पृथक्त्वे ७.२१.३ प्रकृष्टतया निर्गतो प्राणिन वर्तते १.६१ ६ परिपूर्णोऽसि १.१०२.२५ अतिरिच्यते ३ ४६ ३ पृथगसि तो अर्हो ६.३० १. प्रकृष्टतया निर्गतो १.५९.५ [प्र+रिचिर् विरेचने (रुधा०) धातोर्लिट्]

प्ररीयते प्रकृष्टतया निर्गच्छति ५ १८ [प्र+रीङ् श्रवणे (दिवा०) धातोर्लट्। अत्र श्रवणार्थो धातुर्गमन-भावेन ग्राह्यः। रीयते गतिकर्मा निघ० २.१४]

प्ररुज प्रकर्षेण भङ्ग्ध्वि १ १०३ ४ प्रभङ्ग्धि, नष्ट करके नष्ट कर ४ आर्याभि० १ ४२, ऋ० १.१३३.४ **प्ररुजन्ति**=प्रभञ्जन्ति ४.२ १० [प्र+रुजो भङ्गे (तुदा०) धातोर्लट्। अत्र लट्]

प्ररुरुहुः प्रादुर्भवेयु. ७.२४ ३ [प्र+रुह बीजजन्मनि प्रादुर्भावे च (भ्वा०) धातोर्लिट्]

प्ररेके प्रकृष्टा रेका शङ्का सम्भावितस्मिन् व्यवहार ३.३० १६ [प्र+रेकृ शङ्कायाम्. रेका शङ्का। रेकृ=रेकृ शङ्कायाम् (भ्वा०) धातोर्घञ्। ततष्टाप् स्त्रियाम्]

प्ररेचनम् प्रकृष्टतया रेचन पुरीषस्य त्यागम् १ १०६ [प्र+रिचिर् विरेचने (रुधा०) धातोर्ल्युट्]

प्ररेजयत् पालनेन कम्पयते ४.२२ ३. [प्र+रेजति गतिकर्मा (निघ० २.१४) धातोर्णिजन्ताल्लङ्]

प्ररोचि प्रकृष्टतया जगति प्रकाश्यते १ १२१ ३ [प्र+रुच दीप्तावभिप्रीतौ च (भ्वा०) धातोः कर्मणि लुङ्]

प्ररोहन्ती प्रकृष्टतया वर्धमाना (दूर्वे दूर्वावद्वर्त्तमानौषधि) १३ २० [प्र+रुह बीजजन्मनि प्रादुर्भावे च (भ्वा०) धातोः शत्रन्तात् ङीप्]

प्रवक्षणाः नदी ऋ० भू० २८३, १ ३२ १ [प्र+वह प्रापणे (भ्वा०) धातोर्युच्। स्त्रियां टाप्]

प्रवक्ष्यामः प्रवदिष्यामः २५ २४ [प्र+वच परिभाषणे (अदा०) धातोर्लृट्]

प्रवणे प्रवन्ते गच्छन्ति वीरा यस्मिन् तस्मिन् (रणे—सङ्ग्रामे) १ ११६ ३ निम्नप्रवाहे १ १०४ ३ निम्ने देशे ५ ५४ ४ निम्नमार्गे १ ५२ ५ गमने १ ५२ ६ **प्रवणेषु**=निम्नमार्गेषु १ ५४ १० [प्रुङ् गतौ (भ्वा०) धातोरधिकरणे ल्युट्। प्रवते गतिकर्मा निघ० २ १४.]

(विश=प्रजा) ३.६ ३ [प्रयम्प्राति० भूम्न्यर्थे मतुवन्तात् ङीप्। प्रयस् इति व्याख्यास्यते]

प्रयस्वन्तः प्रयतमाना (जना) ३ ५२ ६ बहुप्रयत्नशीला (राजप्रजाजना) १ १३० १ प्रशस्तानि प्रयासि प्रज्ञानानि विद्यन्ते येषा ते (मानुषास=१ ६० ३ **प्रयस्वान्**=प्रयत्नवान् (मर्त्त=मनुष्य) ३ ५६.२. [प्रयस्प्राति० प्रशसाया मतुप्। प्रयस्=प्र+यमु प्रयत्ने (दिवा०) धातो क्विप्]

प्रयंसत् प्रकर्षेण नियच्छेत् १ ६६ ८ प्रेरयेत् १ १६० ३ **प्रयंसि**=प्रकृष्टतया यच्छसि १ ६१ २ प्रकर्षेण प्राप्नोषि नियच्छसि वा ५ ३६ ४ [प्र+यमु उपरमे (भ्वा०) धातोर्लेट्। 'प्रयसि' प्रयोगे लटि शपो लुक्]

प्रयः प्रीणाति य स (शिल्पि-जन) प्र०—अत्रौणादिकोऽसुन्-प्रत्यय १ ११६ १ प्रियमाण स्यानम् १ ११८ ४ कमनीयम् (वस्तु) ४ ४६ ३ प्रीयते काम्यते यत्तत्सुखम् १ ३१ ७ प्रीणन्ति तृप्यन्ति येन तदन्नम् १ ४५ ८ प्रीतिम् १ १३४ १ प्रीतिकारक वच १ १३२ ३ तृप्तिकारकमन्नम् १ ६१ १ अन्नादिकम् ६ ६३ ७ अतीव प्रियम् (भा०—सुखम्) ५ ५१ ७ [प्रीञ् तर्पणे कान्तौ च (क्र्या०) धातोरौणादिकोऽसुन् प्रय अन्ननाम निघ० २ ७ उदकनाम निघ० १ १२]

प्रयाजेभिः प्रयजन्ति यैरतै (कर्म्मभि) १६ १६ [प्र+यज देवपूजासगतिकरणदानेषु (भ्वा०) धातोर्घञ्। 'प्रयाजानुयाजौ यज्ञाङ्गे' अ० ७ ३ ६२ सूत्रेण कुत्वाभावो निपात्यते। 'बहुल छन्दसी' ति भिस ऐसादेशो न भवति। अथ किन्देवता प्रयाजानुयाजा आग्नेया इत्येके। छन्दो देवता इत्यपरम्। ऋतुदेवता इत्यपरम्। पशुदेवता इत्यपरम् प्राणदेवता इत्यपरम्। आत्मदेवता इत्यपरम् आग्नेया इति तु स्थिति। भक्तिमात्रमितरत् नि० ८ २२. प्रजया ह वै नामैतद् यत्प्रयाजा इति श० १ ५ ३ १ ते (प्रयाजा) वाऽआज्यहविषो भवन्ति श० १ ५ ३ ४ ऋतवो ह वै प्रयाजा तस्मात् पञ्च (प्रयाजा) भवन्ति, पञ्च ह्यृतव श० १ ५ ३ १ प्रयाजा प्राञ्चो हूयन्ते तद्धि प्राणरूपम्। श० ११ २ ७ २७ य इमे शीर्षन्प्राणास्ते प्रयाजा ऐ० १ १७ प्राणा वै प्रयाजा ऐ० १ ११ रेत सिच्य वै प्रयाजा कौ० १० ३. पशवो वै प्रयाजा कौ० ३ ४ वसव प्रयाजेषु काठ० ३४ १६ यज्ञमुख वै प्रयाजा वीर्य वै प्रयाजा मै० १ ७ ३ पञ्च प्रयाजा। इमऽएवास्य ते शीर्षण्या पञ्च प्राणा श० ११ २ ६ ४ एकादश प्रयाजा मै० १ १० ८]

प्रयाणम् गमनम् ४ ४६ ७ प्रयान्ति सर्वाणि सुखानि येन तत् प्रकृष्ट प्राणम् ११ ६ प्रकृष्ट प्रापणम् १२ ३ यात्राम् ५ ४६ २ प्रकर्षेण याति गच्छति येन तत् (महिमानम्) ५.८१ ३ [प्र+या प्रापणे (अदा०) धातोर्ल्युट्]

प्रयातन प्राप्नुवन्तु १ १६५ १३ [प्र+या प्रापणे (अदा०) धातोर्लोट्। तप्रत्ययस्य तनबादेश]

प्रयातु प्रकृष्टतया गच्छतु २६ ८ **प्रयाथः**=प्रकर्षेण गच्छथ १ १८० ६ **प्रयासि**=प्रकृष्ट प्राप्नोषि प्रापयति वा अ०—प्रापयसि प्र०—अत्र पक्षे व्यत्यय ३ ५२ **प्रयाहि**=प्रयाण कुरु ६ ३२ ४ प्रकृष्टतया प्राप्नुहि १२ ३२ प्रकर्षेण गच्छ १ १६६ ६ [प्र+या प्रापणे (अदा०) धातोर्लोट्। 'प्रयाथ' प्रयोगे तु लट्]

प्रयाभिः कमनीयाभि (नियुद्भि=नियतैर्गुणै) २७ २७ [प्रीञ् तर्पणे कान्तौ च (क्र्या०) धातोरौणादिकोऽकार। तत स्त्रिया टाप्]

प्रयामनि प्रयाणे १ ११६ ३ [प्र+या प्रापणे (अदा०) धातोरौणादिको बहुलवचनात् मनिन्]

प्रयाः ये सद्य प्रयान्ति ते (जना) ३ २६ १५ [प्र+या प्रापणे (अदा०) धातो कर्त्तरि क्विप्]

प्रयांसि प्रीतानि कान्तानि वस्तूनि १ ८६ ७ प्रियतमानि (वस्तूनि) ६ १६ ४४ कमनीयानि (वस्तूनि) १ १६६ ३ कमनीयान्यन्नादीनि ३ ११ ७ कमनीयानि विज्ञानादीनि ३४ १८ [प्रीञ् तर्पणे कान्तौ च (क्र्या०) धातोरौणादिकोऽसुन्]

प्रयुक्ति प्रयुज्यते यस्मिंस्तत् कर्म ६ ११ १ [प्र+युजिर् योगे (रुधा०) धातो क्तिच् प्रत्यय]

प्रयुक्तिः प्रकृष्टा युक्तिर्यस्य. स (विद्वान् जन) १ १५३ २ **प्रयुक्तिषु**=प्रकृष्टेषु योजनेषु १ १५१ ८. [प्र-युक्तिपदयो समास। युक्ति=युजिर् योगे (रुधा०) धातो स्त्रिया क्तिन्]

प्रयुग्भ्यः ये प्रयुञ्जते तेभ्य (भा०—दुष्टेभ्यो जनेभ्य) ३० ८ ये प्रयुञ्जन्ति तेभ्य (दुर्जनेभ्य) ३० ८ **प्रयुजम्**=व्यवहारेषु प्रयुक्तम्, य सर्वान् युनक्ति त सम्प्रयुक्त वा (अग्नि=योगाभ्यासजनिता विद्युतम्) ११ ६ **प्रयुजः**=प्रकर्षेण युञ्जन्ति ते (राजान) १ १८६ ६ **प्रयुजे**=या धर्मक्रिया प्रकृष्टैर्गुणैर्युनक्ति, योजयति वा तस्यै ४ ७ [प्र+युजिर् योगे (रुधा०) धातो. 'सत्सूद्विषद्रुहदुह०' अ० ३ २ ६१ सूत्रेण क्विप्]

(जन्म) १ १५१ ३ प्रवक्तु योग्यम् (वीर्य=बलरूप कर्म) ३.३३.७ प्रकृष्टतया वक्तु योग्यं यथा स्यात् तथा (पन्था'= वेदप्रतिपादितो मार्ग) १ १०५ १६. [प्र+वच परिभाषणे (अदा०) धातोर्ण्यत्]

प्रवाच्य: प्रवक्तु योग्य (विद्यार्थिजन) ४ ३६.५ [प्र+वच परिभाषणे (अदा०) धातोर्ण्यत्]

प्रवाच्या प्रकृष्टतया वक्तु योग्या (मेना=वाणी) १.५१ १३ [प्रवाच्य इति व्याख्यातम् । तत स्त्रिया टाप्]

प्रवाच्या प्रकर्षेण वक्तु योग्यानि (राज्यानि) ४ २२ ५. [प्रवाच्य-प्राति० शेर्लोपश्छन्दसि]

प्रवावृजे प्रकृष्टतया व्रजति गच्छति ३३ ४४ प्रव्रजति ७ ३६ २ [प्र+व्रज गतौ (भ्वा०) धातोर्लिट् । तुजादित्वादभ्यासस्य दीर्घ । धातो रेफस्य ऋकारश्छान्दस.]

प्रवावृते प्रवर्त्तने १.१६१.१५. [प्र+वृतु वर्त्तने (भ्वा०) धातोर्लिट् । तुजादित्वादभ्यासस्य दीर्घ]

प्रवाहण: यथा वायुर्महानदो वा तथा (जगदीश्वरो विद्वान्वा) ५ ३१ स्व-स्व नियमपूर्वक चलाने वाला तथा सब का निर्वाह करने वाला (ईश्वर) आर्याभि० २.१६, ५ ३१ [प्र+वह प्रापणे (भ्वा०) धातोर्णिजन्तात् 'कृत्यल्युटो बहुलम्' इति ल्युट्]

प्रवाह्याय ये प्रवोढुं योग्यास्तेषु मावदे (जनाय) १६ ४३ [प्र+वह प्रापणे (भ्वा०) धातोर्ण्यत् । तत 'तत्र साधु' रिति यत्]

प्रविवक्ते प्रकर्षेण चलितव्ये (अध्वनि=मार्गे) ६ ५० ५

प्रविगृभ्णन्ति प्रविग्राहयन्ति प्र०—अत्र णिज्लोप. १.१६२ १५ [प्र+वि+ग्रह उपादाने (क्र्या०) धातोर्णिजन्ताल्लट् । णिचो लोपश्छान्दस । 'हृग्रहोर्भश्छन्दसि' इति वा० सूत्रेण धातोर्हकारस्य भकार]

प्रवितिरते प्रविवर्धयति ७ ५६ २. [प्र+वि+तृ प्लवनतरणयो (भ्वा०) धातोर्लट् । व्यत्ययेन श-प्रत्यय आत्मनेपदश्च । तिरते प्रवर्धयते नि० ११ ६]

प्रविदा प्रकृष्टविज्ञानेन ३ ७.६ [प्र+विद ज्ञाने (अदा०) धातो. 'कृतो बहुलम्' इति भावे क्विप्]

प्रविद्धम् प्रकर्षेण व्यथितम् (तौग्र्य=बलदातृषु भव जनम्) १ १८२ ६ [प्र+व्यध ताडने (तुदा०) धातो क्त: । 'ग्रहिज्या०' इति सूत्रेण सम्प्रसारणम्]

प्रविद्वान् प्रकर्षेण वेत्तीति प्रविद्वान् (मर्त्त=मनुष्य) २.१४७.५. प्रकृष्टो विद्वान् (पूर्णो विद्वज्जन) ७ ३३ १२ [प्र+विद ज्ञाने (अदा०) धातो शतृ । 'विदे शतुर्वसुरिति वसुरादेश:]

प्रविन्दसे प्रकृष्टतया लभसे २ १३ ११. [प्र+विद्लृ लाभे (तुदा०) धातोर्लट् । शे मुचादीनाम्' इति नुम्]

प्रविवक्मि प्रकृष्टतया विशेषेण वदामि प्र०—अत्र 'वाच्छन्दसि' इति कुत्वम् १ १६७ ७. [प्र+वि+वच् परिभाषणे (अदा०) धातोर्लट् । कुत्व छान्दसम्]

प्रविश प्रवेश कर स० वि० १३८, अथर्व० १४.२.२६. **प्रविशन्ति**=प्रविष्ट होने (डूबते) हैं, महाक्लेश भोगते हैं स० प्र० ३०६, ४० ६ [प्र+विश प्रवेशने (तुदा०) धातोर्लोट् । अन्यत्र लट्]

प्रविशत् प्रवेश कुर्वत् सत् (इन्द्रियम्=उपस्थ पुरुषलिङ्गम्) १६.७६ [प्र+विश प्रवेशने (तुदा०) धातो शतृ-प्रत्यय]

प्रविष्ट: प्रवेश कुर्वाण सन् (अग्नि=विद्वान् मनुष्य) ५ ४ (प्र+विश प्रवेशने (तुदा०) धातो क्त.]

प्रविहि प्राप्नुहि प्र०—अत्र विकरणव्यत्ययेन ह्रस्वम् २.२६ २ [प्र+वी गतिव्याप्तिप्रजनकान्त्यसनखादनेषु (अदा०) धातोर्लोट् । धातोर्ह्रस्वश्छान्दस]

प्रवीता कमिता (विद्वज्जन) ३४ १४ प्रकर्षेण व्याप्ता विद्युत् ३ २६ ३ [प्र+वी गतिव्याप्तिप्रजनादिषु (अदा०) धातो क्तान्तात् स्त्रिया टाप् । यद्वा वी धातो प्रोपसर्गात् कर्त्तरि तृच् । गुणाऽभावश्छान्दस । वेति कान्तिकर्मा निघ० २.६]

प्रवीय: प्रकृष्टतया व्याप्नुथ १ १५१ ३. [प्र+वी गतिव्याप्तिप्रजनादिषु (अदा०) धातोर्लट्]

प्रवीर: प्रकृष्टश्चाऽसौ वीरश्च (इन्द्र=सेनापति) १७ ३७. [प्र-वीरपदयो समास. । वीरो वीरयत्यमित्रान् वेतेर्वा स्याद् गतिकर्मणो वीरयतेर्वा नि० १ ७]

प्रवृक्तम् प्रवर्जितम् (नौकादिकम्) १ ११६ २४. **प्रवृक्त:**=शरीरात् पृथग्भूत. (प्रजापति=जीव) ३६ ५. [प्र+वृजी वर्जने (रुधा० अदा०) धातो क्त]

प्रवृजे प्रवृजते यस्मिंस्तस्मिन् (न्यायालये) ५ ३० १५. [प्र+वृजी वर्जने (रुधा०) धातोर्घञर्थे क प्रत्यय]

प्रवृञ्जते प्रकर्षेण त्यजन्ति ७ २.४ **प्रवृञ्जे**= प्रकृष्टतया छिनद्मि १ ११६ १. [प्र+वृजी वर्जने (रुधा०) धातोर्लट् । व्यत्ययेनात्मनेपदम्]

प्रवृणे स्वीकरोमि ३ १६.१. [प्र+वृञ् वरणे (स्वा०) धातोर्लट् । विकरणव्यत्ययेन श्ना]

प्रवृत् य प्रवर्त्तते स (सत्पुत्र) ३ ३१ ३ यत् कार्य-

प्रवणेभिः गमनादिभि ३ २२ ४ [प्रवणमिति व्याख्यातम् । ततो भिस ऐसादेशो न भवति 'बहुल छन्दसि' सूत्रेण]

प्रवतम् निम्न स्थलम् ५ ३१ १ **प्रवतः**=अधोमार्गान् ४ १६ ३ निम्नदेशान् ४ १७ ७ प्रवण प्राप्तान् बाणानिव १ १४४ ५. नम्रान् (निम्नदेशान्) ६ ४७ १४ निम्नान् (देशान्) ७ ३२ २७ अधस्ताद् वर्त्तमानान् (लोकान्) ४ २२ ४ गमनाऽर्हान् (देशान्) ७ ५० ४ **प्रवता**=निम्नमार्गेण ३.५ ८ अर्वाचीनेन मार्गेण ३ ३० ६ **प्रवताम्**=गच्छताम् (अपा=जलानाम्) २ १३ २ **प्रवत्सु**=निम्नासु (भूम्यादिषु) ६ ४७ ४ **प्रवद्भिः**=ये नीचमार्गे प्रवन्ते प्लवन्ते तै (अ०—मार्गे) १ ३३ ६ **प्रवद्भ्यः**=प्रयत्न कुर्वद्भ्य (मरुद्भ्य =मनुष्यादिभ्य) ५ ५४ ६ ['प्र' इत्युपसर्गाद् अव रक्षणगत्यादिषु (भ्वा०) इति धात्वर्थे 'उपसर्गाच्छन्दसि धात्वर्थे अ० ५ १ ११८ सूत्रेण वति प्रत्यय । यद्वा प्रोपसर्गाद् गत्यर्थकावधातो शतृप्रत्यये धातोरकारस्य लोपे रूपम् । प्रवत उद्वतो निवत इत्यवतिकर्मा नि० १० २० प्रवत गतिकर्मा० निघ० २ १४ सवत्सरो वै प्रवत शश्वतीरप ता० ४ ७ ६]

प्रवतः नम्रत्वादिगुणप्रदानाम् (विद्वज्जनानाम्) ७ ३७ ५. [प्रवतमिति पदे द्रष्टव्यम्]

प्रवतेव निम्नस्थलेनेव ४ ३८ ३ [प्रवता-इवपदयो समास]

मन्दिनम् कमनीयम् (हरि=हयम्) १ १२१ ८ स्तुत्य जनम् १ १२१ १२ **मन्दिनः**=स्तोतुमर्हा (ग्ना) २ ११ ११ सर्वस्याऽऽनन्दस्य जनयितु (राजजनस्य) २.११ २० सुख कामयमाना (मनुष्या) १ १३४ २ आनन्दयितार (हरयः=अश्वा) ४ ४५ ४ **मन्दिना**=हर्षकारेण बलिना (परमेश्वरेण) १ ५४ ४. **मन्दिने**=आनन्दिन आनन्दप्रदाय (पुरुषाय) १ १० ११ मन्दितु मन्दयितु शीलवते (इन्द्राय=ऐश्वर्यमिच्छवे जीवाय) १.९ २. **मन्दिभिः**=तज्ज्ञापकैर्हर्षकरैश्च गुणै. (स्तोमेभि=स्तोत्रै) १ ९ ३ [मदि स्तुतिमोदमदस्वप्नकान्तिगतिषु (भ्वा०) धातोस्ताच्छील्ये णिनि। मन्दिने=मन्दी मन्दते स्तुतिकर्मण नि० ४ २४.]

मन्दिनिस्पृशः आनन्दस्य स्पर्शयितार (हसास=अश्वा) ४ ४५ ४ [मन्दिन्-उपपदे नि+स्पृश सस्पर्शने (तुदा०) धातो क्विप्]

मन्दिम् मन्दन्ति हर्षयन्त्यस्मिंस्तम् (चक्रि=यानशीघ्रचालनस्वभावम्) १ ९ २ [मन्दप्राति० मत्वर्थ इनि। नकारलोपश्छान्दस]

मन्दिषीमहि शयीमहि ४ १४. [मदि स्तुत्यादिषु (भ्वा०) धातोर्लिङ्]

मन्दिष्ठ अतिशयेन मन्दिता तत्सम्बुद्धौ (सभाऽध्यक्ष) १ ५१ ११ [मदि स्तुतिमोदमदादिषु (भ्वा०) धातो तृजन्तादतिशायन इष्ठन्। तृचो लोप]

मन्दू आनन्दितावानन्दकारकौ (वायुसूर्यौ) प्र०—मन्दू इति पदनामसु पठितम् निघ० ४ १, १ ६ ७ [मदि स्तुतिमोदादिषु (भ्वा०) धातो उ। मन्दू मदिष्णू नि० ४ १२]

मन्दे आनन्देय आनन्दयामि वा ५ ४ १ [मदि स्तुतिमोदमदादिषु (भ्वा०) धातोर्लट्]

मन्द्रजिह्वम् मन्द्रा आनन्दजनिका जिह्वा वाणी यस्य तम् (अग्नि=परमविद्वज्जनम्) ४ ११ ५ मन्द्रा मोद

तस्या हि तेषा मनास्योतानि, अग्निर्वै देवाना मनोता तस्मिन्हि तेषा मनास्योतान्यग्नि' सर्वा मनोता, अग्नौ मनोता सगच्छन्ते ऐ० २ १०]

मनोधृतः मनो विज्ञान धृत यैस्ते (सत्पुरुषा) ३.३८ २ [मनस्-धृतपदयो समास]

मनोयुजः मनसा विज्ञानेन युज्यन्ते ते (वह्नय =विद्युदादय) प्र०—अत्र 'सत्सूद्विष०' अ० ३ २.६१ अनेन 'कृतो वहुल' इति कर्मणि क्विप् १ १४ ६ ये मनसा सदसद्विज्ञानेन युञ्जन्ति योजयन्ति वा ते (देवा =विद्वज्जना) ४ ११. ये मनसा युज्यन्ते ते भृत्या १ ५१ १० ये मनसा ब्रह्म युञ्जते ते (आप्तजना) ४ ४८ ४ ये मन इव युञ्जते ते वेगवत्तरा (अश्वास =वेगादयो गुणा) ५ ७५ ६ [मनसुपपदे युजिर् योगे (रुधा०) धातो 'सत्सूद्विष०' इति क्विप् । 'कृतो वहुलमि' ति कर्मणि क्विप्]

मनोवाताः मन इव वातो वेगो यासा ता (सत्स्त्रिय) ३ ३८ २ [मनस्-वातपदयो समास]

मन्तवः ज्ञातु योग्या (वस्त्रादय पदार्था) १ १५२ १ [मन ज्ञाने (दिवा०) धातो 'कमिमनिजनि०' उ० १ ७३ सूत्रेण तु]

मन्तवे विज्ञातुम् १ ११२.२ [मन ज्ञाने (दिवा०) धातोस्तुमर्थे तवेन्]

मन्तवै मन्तु योग्य (अन्यगोत्रजोऽनौरसो वा पुत्र) ७ ४ ८ [मन ज्ञाने (दिवा०) धातोस्तुमर्थे तवै । मन्तवै मन्तव्य नि० ३ ३]

मन्तुमः प्रशस्तविज्ञानयुक्त (विद्वज्जन) ६ ५६ ४ मन्तु प्रशस्त ज्ञान विद्यते यस्य तत्सम्बुद्धौ (अ०—विद्वज्जन) १ ४२ ५ [मन्तुप्राति० प्रशसाया मत्वर्थे म प्रत्ययश्छान्दस । मन्तु =मन ज्ञाने (दिवा०) धातोस्तु]

मन्त्रम् उच्चार्यमाण वेदाऽवयव विचार वा १ ३१ १३ वेदस्थ विज्ञानहेतु (भा०—वेदमन्त्रम्) ३ ११ वेदाख्यम् (भा०—सर्वेपा जीवाना हितसाधक वेदोपदेशम्) ३४ ५७ वेदस्थमन्त्रसमूहम् १ ४० ५ मन्वते गुप्तान् पदार्थान् परिभाषन्ते येन तम् (श्रुतिसमूहम्) प्र०—मन्त्रा मननात् नि० ७.१२, १ ४०.६ **मन्त्रः**=ईश्वरमारभ्य पृथिवीपर्यन्ताना गुप्तप्रसिद्धसामर्थ्यगुणाना पदार्थाना भाषणमुपदेशन ज्ञान वा भवति यस्मिन् येन वा स (वेदोपदेश) ऋ० भू० ६३, ऋ० ८ ८४६ ३ विचार १ १५२ २ विचारवान् (गुरु) १ १४७ ४ **मन्त्रान्**=वेदाऽवयवान् विचारान् वा १ ६७ २ **मन्त्राः**=विचारसाधका (वेदोपदेशा) ३४ ५३. वेदस्य श्रुतयो विचारा वा ६ ५० १४ [मत्रि गुप्तभाषणे (चुरा०) धातोर्घञ् । मन्त्रा मननात् नि० ७ १२ वाग् वै मन्त्र श० ६ ४ १ ७ ब्रह्म वै मन्त्र श० ७ १ १ ५]

मन्त्रयन्ते गुप्त भाषन्ते १ १६४.१० [मत्रि गुप्तभाषणे (चुरा०) धातोर्लट् । मन्त्रयते अर्चतिकर्मा निघ० ३ १४]

मन्त्रिणे विचारकर्त्रे राजपुरुषाय (अमात्याय) १६ १६. [मन्त्र-प्राति० मत्वर्थे इनि । अथवा मत्रि गुप्तभाषणे (चुरा०) धातो 'वा छन्दसि' नियमेन निरुपपदादपि ताच्छील्ये णिनि]

मन्त्रेभिः ज्ञानयुक्तैर्विचारै १ ६७ ३ [मन्त्र-प्राति० भिस ऐस् न छान्दसत्वात्]

मन्थत मन्थन कुरुत ३ २९ ५. **मन्थन्ति**=विलोडयन्ति ३ २९ ६ **मन्थामि**=विलोड्य निवारयामि, विलोडनादिक्रियया निष्पादयामि ५ २ [मन्थ विलोडने (भ्वा०) धातोर्लोट् । अन्यत्र लट्]

मन्थाम् घृतादि निस्सारण मन्थानम् प्र०—अत्र 'छान्दसो वर्णलोपो वा' इति नकारलोप १ २८.४ [मन्थ विलोडने (भ्वा०) धातोर्बाहु० औणा० आनच् । न लोपश्छान्दस । अथवा मथिन्प्राति० द्वितीयैकवचनम्]

मन्थिनम् मन्थितु शील यस्य तम् (सोमम्=ऐश्वर्यकारक पेयम्) ३ ३२ २. **मन्थिनः**=न्यायकारिण (पुरुषस्य) ७ १८ **मन्थी**=मथितु शील (पदार्थ) १८ १९ मन्थितु शीलमस्य न्यायाधीशस्य स (राजा) ७ १८ पदार्थाना मन्थनसाधन १३ ५७ मथ्नातीति (पदार्थ) ८ ५७ [मन्थ विलोडने (भ्वा०) धातोस्ताच्छील्ये णिनि । मन्थी=अत्तैव शुक्र आद्यो मन्थी श० ४ २ १ ३ चन्द्रमा एव मन्थी श० ४ २ १ १ मन्थी सक्तुश्री तै० स० ४ ४ ६ १]

मन्थिपाः ये मन्थन्ति शत्रून् तान् वीरान् पान्ति ते (देवा =विद्वासो जना) ७ १७ ['मन्थिन्' उपपदे पा रक्षणे (अदा०) धातो क]

मन्थिशोचिषा सूर्यदीप्त्येव ७ १८ [मन्थिन्-शोचिप्पदयो समास]

मन्द प्रशसय ६ १८ ९ **मन्दतु**=आनन्दयतु ७ २२.१ प्रशसतु ६ १७ ३ **मन्दन्तु**=कामयन्तु १ १३४ २ **मन्दसे**=हर्षसि १ ५१ १२ सर्वत्राऽऽनन्दयसि ३६ ७ **मन्दस्व**=आनन्दय २ ३६ ३ आनन्द ६ २३ ८. **मन्दामहे**=स्तुम १.१२२ १३ [मदि स्तुतिमोदमदस्वप्न-

यति वा ५ ६ **मन्यते**=जानाति मन्यते वा २३.३१ **मन्यथाः**=जानीया १ १२६ ७ **मन्यसे**=जानासि १ १२६ ५ **मन्यासै**=मन्यस्व ३४ ८ **मन्ये**=जानीयाम् १ १२७.१ सत्करोमि १५ ४७ विजानीयाम् १ १०४.७ [मन ज्ञाने (दिवा०) धातोर्लङ् । छन्दसि अटोऽभाव । अन्यत्र लोटि लटि च रूपाणि । मन्यते इति कान्तिकर्मा निघ० २ ६ मन्यते इति अर्चतिकर्मा निघ० ३ १४ मन्यासै मन्यस्व नि० ११ २७]

मन्यमानम् अभिमानिनम् (जनम्) ६ १९ १२ **मन्यमानस्य**=विज्ञातु (विदुषो जनस्य) ३ ३२ ४ **मन्यमानः**=विजानन् (ईश्वर) ३४ ३५ सत्याभिमानी (राजा) ४ २९ २ जानने वाला (ईश्वर) स० वि० १५६, ७ ४१.२ अभिमानी (राज्यशासक) २ २३ १२ **मन्यमानान्**=अभिमानिन (शूरान् जनान्) १ १७८ ५. **मन्यमानाः**=विजानन्त (जनास =युद्धवीरा जना) ३ ५३ २३ **मन्यमानैः**=विद्याऽऽर्जवयुक्तैर्दुराग्रहरहितै-र्मनुष्यैर्ज्ञानसम्पादकै किरणैर्वा १ ३३ ९ [मन ज्ञाने (दिवा०) धातो शानच् । 'ताच्छील्यवयोवचनशक्तिषु चानश्' इति शक्तौ चानश् वा]

मन्यव. क्रोधादयो व्यवहारा ४ ३१ ६ **मन्यवे**=आन्तर्यक्रोधाय ३०.१४ न्यायव्यवस्थापालनहेतवे १ ८० ११ शत्रूणामुपरि क्रोधाय १३.३६ क्रोधयुक्ताय वीराय १६.१ क्रोधात् प्र०—अत्र पञ्चम्यर्थे चतुर्थी ३३ ६७ मन्यन्तेऽभि-मान कुर्वन्ति यस्मिन् स मन्यु क्रोधो दुष्टाचरणेषु दुष्टेषु तद्भावनाय प्र०—यजिमनि० उ० ३ २०. अनेन मन्यते-र्युच् प्रत्यय २ ३२ **मन्युना**=दुष्टाचारिण पाप च प्रति वर्त्तमानेन क्रोधेन ३९ ८ **मन्युभिः**=क्रोधादिभि ७ ५६ २२ **मन्युम्**=मननम् भा०—आज्ञाम् २१ ५७ **मन्युः**=अभि-मान १८ ४ दुष्टकाम और दुष्टो पर क्रोधकारी (ईश्वर) स० प्र० २४६, १९ ९ दुष्टानामुपरि क्रोधकृत् (ईश्वर) आर्याभि० २ ६, १९ ९ दुष्टाचारोपरि क्रोधकृत् (मन) भा०—दुष्टेषु क्रोधाविष्करणम् २० ६ [मन ज्ञाने (दिवा०) धातो 'यजिमनिशुन्धि०' उ० ३ २० सूत्रेण युच् । मन्युरिति क्रोधनाम निघ० २ १३ मनधातोर्दीप्त्यर्थाद्वा युच् । मन्यते कान्तिकर्मा निघ० २ ६ मन्यु =मन्यतेर्दीप्तिकर्मण क्रोध-कर्मणो वधकर्मणो वा मन्यन्त्यस्माद् इषव नि० १० २९ पशूना वा एष मन्युर्यद्वराह तै० १ ७ ९ ४]

मन्याभिः विज्ञानक्रियाभि २५ २ [मन ज्ञाने (दिवा०) धातो 'वा छन्दसि' इति स्त्रिया श । ततष्टाप्]

मन्युमत्तमः प्रशसितो मन्यु क्रोधो यस्य सोऽतिशयित (राजा) ४.३०.७. [मन्युप्राति० प्रशसाया मतुप् । ततो ऽतिशायने तमप्]

मन्युमीः यो मन्यु मीनाति हिनस्ति स (इन्द्र =सेना-पति.) १.१००.६. यो मन्यु मिनोति स (जगदीश्वरो विद्वान् वा) २.२३.४. ['मन्यु' इत्युपपदे मीञ् हिंसायाम् (क्र्या०) धातो. कर्त्तरि क्विप्]

मन्ये सत्करोमि १५.४७ विजानीयाम् १.१०४.७. **मन्येथाम्**=विजानीतम् ३ ५८ ४. [मन ज्ञाने (दिवा०) धातोर्लट् । मन्यते इति अर्चतिकर्मा निघ० ३ १४]

मन्वत मन्यन्ते ४१.१६ [मनु अवबोधने (तना०) धातोर्लङ् । अडभावश्छान्दस]

मन्वानः मननशील (विद्वत्सङ्गप्रियो जन) ५ ५२ १५ [मनु अवबोधने (तना०) धातोस्ताच्छील्ये चानश्]

ममकस्य मादृशस्य (पितु =जनकस्य) प्र०—अत्र बाहुलकान्मन्धातोर्डमकन् प्रत्यय. १ ३१ ११. **ममकाय**= ममाऽय ममकस्तस्मै (सूनवे=औरसाय विद्यापुत्राय वा) प्र०—अत्र 'सज्ञापूर्वको विधिरनित्य अ० ६ ४ १४६. इति वृद्ध्यभाव १.३४ ६ [अस्मत्प्राति० शैषिकेऽण्-प्रत्यये 'तवकममकावेकवचने' अ० ४ ३ ३. सूत्रेण ममकादेश । वृद्ध्यभावश्छान्दस. । 'सज्ञापूर्वको विधिरनित्य' इति वा वृद्धिर्न । अन्यत्र मन ज्ञाने (दिवा०) धातोर्बाहु० औणा० उमकन्]

ममत् प्रमादयन्ती (युवति =प्रमदा) ४ १८ ८ हर्षन् (विरोधिजन) ४ १८ ९ [मदी हर्षे (दिवा०) धातो शतृ । विकरणव्यत्ययेन श्लु]

ममतुः परिमीयेते ३ ३२ ७ [माङ् माने (जु०) धातोर्लिट् । वचनव्यत्यय । परस्मैपद च व्यत्ययेन]

ममत्तु आनन्दतु ३ ५१ ११ आनन्दयतु ७ २२ २ हर्षयतु १.१२२ ३. आनन्द प्र०—अत्र विकरणस्य श्लु १ १२१ ९ **ममत्सि**=हर्षयसि ४ २१ ९ **ममदन्**=हर्षन्ति ४ ४२.६. **ममदः**=आनन्द ७ २४ १ **ममन्द**=मन्दते कामयते २ ३३ ६ **ममाद**=हृष्येत् २ २२ १ हर्षति ६ ४७.२ हर्षयति ७ २९ १. [मदी हर्षे (दिवा०) धातो-र्लोट् । 'बहुल छन्दसी' ति शप श्लु । शपोऽभावे तत्स्थानीय-श्यनोऽप्यभाव । अन्यत्र लटि लङि लिटि च रूपाणि । 'ममन्द' प्रयोगे मदि स्तुतिमोदमदादिषु (भ्वा०) धातोर्लिटि व्यत्ययेन परस्मैपदम्]

ममन्दुषी प्रशंसनीयाऽऽनन्दकरी (स्त्री) ५ ६१ ९

कारिणी जिह्वा यस्य तम् (अतिथिम्) १ १६० १ मन्द्रा प्रशसनीया जिह्वा यस्य तम् (राजानम्) ५ २५ २ मन्द्रा आनन्ददा कल्याणकारी जिह्वा यस्य त विद्वासम् ४ ५० १ **मन्द्रजिह्वः**=मन्द्रा आनन्दप्रदा कमनीया जिह्वा वाणी यस्य स (सविता=विद्वान्राजा) ६ ७१ ४ [मन्द्रा-जिह्वा-पदयो समास । मन्द्रा=मदि स्तुतिमोदमदादिपु (भ्वा०) धातो 'स्फायितञ्चि०' उ० २ १३ सूत्रेण रक् । ततष्टाप् । मन्द्रजिह्व मन्दनजिह्व मोदमानजिह्वमिति वा नि० ६.२३]

मन्द्रजिह्वा मन्द्रा प्रशसिता जिह्वा ययोस्तौ (अध्यापकोपदेशकौ) १ १४२ ८ [मन्द्रा-जिह्वापदयो समास । ततो द्विवचनस्याकारादेश]

मन्द्रतमम् अतिशयेन प्र ासादिसत्कृतम् (विद्वज्जनम्) ३३ १३ अतिशयेनाऽऽनन्दकरम् (सज्जनम्) ६ ४ ७ **मन्द्रतमः**=अतिशयेनाऽऽनन्दयुक्त (विद्वज्जन) ५ २२ १ अतिशयेनाऽऽनन्दयिता (होता =दातृ-जन) ६ ११ २ [मन्द्रप्राति० अतिशायने तमप् । मन्द्र =मदि रतुतिमोदा-दिपु (भ्वा०) धातोरौणा० रक्]

मन्द्रतरः अतिशयेनाऽऽह्लादक (विद्वान् जन) ३ ७ ६ [मन्द्रप्राति० अतिशायने तरप्]

मन्द्रम् प्रशसनीयम् (सोमम्=ऐश्वर्यम्) ४ २६ ६ आनन्दप्रदम् (अतिथि=सत्योपदेशक जनम्) ४ २ ७ **मन्द्रस्य**=आनन्दत आनन्दयत (वचनस्य) ६ ३९ १ आनन्दप्रदस्य (विदुप पुरुषस्य) ३ ६ ७ **मन्द्रः**= प्रशसित (होता=विद्यादाता जन) १.१४१ १२ आनन्दित (अग्नि =विद्यार्थिजन) ५ ११ ३ आनन्दप्रद आनन्दित (अग्नि =परमात्मा) ४ ६ ५ कमनीयो हर्षयिता (वेधा = मेधाविजनः) ३ १४ १ आह्लादक (अग्नि =विद्वज्जन) ३ १० ७ स्तुत आनन्दप्रद (राजा) ३३ ६४ स्तोतुमर्हो धार्मिक (सज्जन) प्र०—अत्र 'स्फायितञ्चिवञ्चि०' उ० २ १३ इति रक्प्रत्यय १ २६ ७ पदार्थप्रापकत्वेन हर्षहेतु (राजदूत) १ ३६ ६ **मन्द्राः**=आह्लादयितार (उपदेशका जना) १ १२२ ११ **मन्द्रैः**=प्रशसितै (हरिभि =अश्वै) २० ५३ आनन्दप्रदै (हरिभि = अश्वै किरणैर्वा) ३ ४५ १ [मदि स्तुत्यादिपु (भ्वा०) धातो 'स्फायितञ्चि०' उ० २ १३ इति रक्]

मन्द्रया विज्ञानानन्दप्रदया (वाण्या) ५ २६ १ प्रश-सितयाऽऽनन्दप्रदया (जिह्वया=वाचा) ७ १६ ९ आह्लाद-कामना विज्ञानप्रदया स्तुत्या १ ७६ ५. आनन्दसाधिकया (जिह्वया=सत्यप्रियया वाचा) १७.८ **मन्द्रा**=आनन्द-प्रदा (अग्नेर्ज्वाला) १ १०० १६ **मन्द्राभिः**=आनन्द-कारिकाभि (जिह्वाभि =वाग्भि) ६ १६ २ [मन्द्रमिति व्याख्यातम् । तत स्त्रियां टाप् । मन्द्रा वाङ्नाम निघ० १.११]

मन्द्रा आनन्दप्रदानि हवींपि २७ १५ [मन्द्र-प्राति० शेर्लोपश्छन्दसि]

मन्धातारम् यानेन सद्यो दूरदेश गमयितार मेधा-विनम् १ ११२ १३ [मन्धाता मेधाविनाम निघ० ३ १५]

मन्म मन्तव्य विज्ञानम् ७ १० २ विज्ञानजनक शास्त्रम् १ १३१ ६ मन्तु योग्य ज्ञानम् १.१२९ ६ ज्ञातु योग्यम् (ज्ञानम्) १ १२९ ६ ज्ञानोत्पादक कारणम् ५ १२ २ मन्तव्यम् (अनेकविध सुखम्) २ १९ ८ मन्तव्य वेदोक्त ज्ञानम् १ १२० ३ **मन्मना**=येन मन्यते विजानाति तेन (मनसा=विज्ञानेन) १८ ७५ मन्यते जानाति येन तेन (ज्ञानेन) १ १४० १ विज्ञानवता (मनसा=चित्तेन) ३ १४ ५ **मन्मभिः**=ज्ञानविशेषै सह ३ ११ ८ मन्यन्ते जानन्ति यैस्तै (भा०—गुणप्रकाशै विद्यासाक्षात्कारै) प्र०—अत्र सर्वधातुभ्यो मनिन् उ० ४ १४५ इति मनिन्-प्रत्यय. ३ ५३ विद्वद्भि ४ ३ १५ विज्ञानैर्मन्यमानैर्वा (विप्रेभि =विपश्चिद्भि) १ १२७ २ **मन्मानि**= विज्ञानानि १.१६५ १३ मन्तव्यानि विज्ञानानि ७ ६१ २ यानानि २९ २६ [मन ज्ञाने (दिवा०) धातोरौणादिको मनिन् । मन्म मन नि० ६ २२ मन्म मननानि नि० १० ४२ मन्मभि मननीयै नि० १० ५]

मन्मनः मम मन १ १४०.११ [अस्मद्-मनस्-पदयो समास । 'प्रत्ययोत्तरपदयोश्च' इति अस्मदो मादेश]

मन्मनाम् मन्यमानाम् (प्रज्ञाम्) १ १५१ ६

मन्मसाधनः यो मन्मानि विचारयुक्तानि कार्याणि साधयति स (परमेश्वर) १ ९६ ६. मन्म विज्ञान साधन यस्य स (विद्वज्जन) १.१५१ ७ [मन्म इति व्याख्यातम् । तदुपपदे साध ससिद्धौ (स्वा०) धातोर्ल्युट् । 'कृत्यल्युटो वहुलम्' इति कर्त्तर्यपि ल्युट्]

मन्महे विजानीम ५ ५८ ३ मन्यामहे याचामहे वा १ ६२ १ [मन ज्ञाने (दिवा०) धातोर्लट् । 'वहुल छन्दसि' सूत्रेण शपो लुकि श्यनोऽप्यभाव । मन्महे याञ्चाकर्मा निघ० ३ १९]

मन्यत मन्येत ४ १७ ४ मन्यसे ४.१७.१. **मन्य-ताम्**=विज्ञापयनु स्वीकुरुताम् ४ २० स्वीकरोतु स्वीकार-

कारिका (ऊतय =रक्षणादिक्रिया) १ ६१ ६ सुखस्य भावयितार (वैद्या) १ ८६ ४ या मय सुख भावयन्ति ता (आप =सत्स्त्रिय) प्र०—मय इति सुखनाम निघ० ३.६, ३६ १४ **मयोभुवा**=सुख भावुकेन (अवसा= अन्नादिना) ६ ७६ ५ सुखसाधकेन (अवसा=रक्षणादिना) ५ ७७ ५ या मय सुख भावयति तया सत्यप्रियमङ्गल-कारिण्या (वाचा=वेदवाण्या) प्र०—अत्राऽन्तर्गतो ण्यर्थ 'क्विप् चे' ति क्विप् ३ ४७ **मयोभूः**=मय सुख भावयन् (स्वस्तिगव्यूति =राजा) ११ १५ यो मय आनन्द भावयति स भा०—सुखकारी (विद्वज्जन) १८.४५ सुख भावुक (विद्वज्जन) १८ ४५ मय सुख भावयति या सा (ऊति =नीति) १ ११७ १६. [मयस्-उपपदे भू सत्तायाम् (भ्वा०) धातो क्विप्। मयोभुव सुखभुव नि० ६ २५]

मयोभुवा सुख भावयितारौ (अश्विनौ=वाय्वग्नी) १ ६२ १८. सुख भावुकौ (अश्विनौ=अध्यापकोपदेशकौ) ५ ४२ १८ ['मयोभू' रिति व्याख्यातम्। ततो द्विवचनस्याकारादेश]

मयोभुः सुख भावुक (राजा) ६ ५२ ६ [मयस्-उपपदे भू सत्तायाम् (भ्वा०) धातोर्डु]

मयोभून् मय सुख भावुकान् (सुवीरान्) १ ८४ १६ [मयस्-उपपदे भू सत्तायाम् (भ्वा०) धातो क्विप्। मयोभून्=सुखभूनि नि० १३ ३६]

मराति म्रियते १ १६१ १० **मराम**=म्रियेमहि १ १६१ १० **मरामहे**=अकालमृत्यु क्षणभङ्गुर-देहे प्राग्नुयाम प्र०—अत्र विकरणव्यत्यय १ ६१ ६ [मृङ् प्राणत्यागे (तुदा०) धातोर्लेट्। विकरणव्यत्ययेन शप् परस्मैपद च। अन्यत्र लडपि। मरते=म्रियते नि० ११ ३८]

मरीचयः किरणा प्र०—'मृकणिभ्यामीचि' उ० ४ ७०, १६ ३६ **मरीचीः**=किरणान् २५ ६ [मृङ् प्राणत्यागे (तुदा०) धातो. 'मृकणिभ्यामीचि' उ० ४ ७० सूत्रेण ईचि। मरीचि एता वाऽआप स्वराजो यन्मरीचय श० ५ ३ ४.२१ सूर्यस्य मरीचि (पत्नी) तै० आ० ३ ६ २]

मरीचिपेभ्यः रश्मिभ्य ७ ६ किरणरक्षितृभ्य (देवेभ्य =वाय्वादिभ्य) ऊव ७ ३ ['मरीचि' इत्युपपदे पा रक्षणे (अदा०) धातो क। मरीचिपा. रश्मिनाम निघ० १ ५]

मरुतः वायव प्र०—'मृग्रोरुति' उ० १ ६४ इति मृङ्-धातोरुतिप्रत्यय मरुत इति पदनामसु पठितम् निघ० ५ ५ अनेन गमनागमनक्रियाप्रापका वायवो गृह्यन्ते १.१५ २. सभाद्यध्यक्षादयो मनुष्या १ ८७ २ मरणधर्माण (मर्या.=मनुष्या) ३ ५४ १३ विद्वासो मनुष्या ५ ५८ ६ सुशिक्षिता मानवा ५ ५८ ४ मननशीला (मनुष्या) ५ ५६ ४ मरणधर्माणो मनुष्यास्तत्सम्बुद्धौ १ ८५ १२ पुरुषार्थिनो मनुष्या ५ ५४ १४ शिल्पिनो मनुष्या ५ ६३.५. विद्वत्तमा (जना) १ १६५ १५ मरुद्वत्सुचेष्टा (जना) १ १६६ ६. महाबलिष्ठा (जना) १ १६७ ६ ब्रह्माण्डस्था अन्ये वायव १८ १७ हिरण्यानि रूपाण्यृत्विजो विद्वासश्च (गृहस्था) ८ ३१. मरणधर्मयुक्ता (विद्वासो जना) २ ३४.१. मरणधर्मस्य (देवस्य=विदुषो जनस्य) ६ ४८ २० उत्तमा मनुष्या ६ ६६ ८ परीक्षका विपश्चित १ ८६.२. प्राणादय १ ५२ ६ प्राण इव प्रिया सभासद १ १७१ ४ प्राणवायुवत्प्रिया (विद्वज्जना) २ ३४ ७ वायव इव व्याप्तविद्या मनुष्या ७.५७ ७. वायव इव वेगबलयुक्ता (धार्मिका विद्वज्जना) ३ ३२.४ वायुवद् बलिष्ठा शूरवीरा १७ ४० पवना १ १०७ २ सूक्ष्माऽवयवा १ १६१ १४ वायव इव ज्ञानयोगेन शीघ्र गन्तारो मनुष्या १ ८५ ६ युक्त्या सेविता वायव १ ६४ १३ वायुवच्छीघ्रगमनकारिणो जना १ ३८ ३ योगाभ्यासिनो व्यवहारसाधका वा जना १.३८ ११ प्राण इव नेतार (मनुष्या) ७ ५६ १ शरीरत्यागहेतव (वायव) १ ६४ ६ वायुविद्यावेत्तार (जना) १ १६६ ५ प्राण इव प्रियाचरणा (मनुष्या) ५.५५ ४ मरणशीला (मनुष्या) ५ ५७ ८ ज्ञानक्रियानिमित्तेन शिल्पव्यवहारप्रापकान् (वायून्) प्र०—मरुत इति पदनामसु पठितम् निघ० ५ ५ अनेन प्राप्त्यर्थो गृह्यते १ २३ १० मननशीलान् मनुष्यान् ३३ ४६. विदुपाऽतिथीन् अ०—ऋत्विज भा०—यज्ञसम्पादका मनुष्या ३ ४४. **मरुताम्**= विदुषाम् (जनानाम्) १८ ४५. मनुष्याणा वायूना वा ५ ५३ १ पशूनाम् १४ २५ ऋतावृती यजता विदुषाम् १ ११४ ६ प्राणानामृत्विजा वा १० २३. पूर्णविद्याबलयुक्ताना पुरुषाणाम् १७ ४१ प्राणादि पवनो के ग्रार्याभि० १.२७, ऋ० ५ ३ २७ २५ **मरुत्सु**=मनुष्येषु ४ १ ३ स्तावकेषु (जनेषु) १ १४२ ८ **मरुद्भिः**=वायुभिरिव स्वमित्रै सह ३ ४७ ४ प्राणैरिव वर्त्तमानै श्रेष्ठैर्जनै सह १ १३६ ७ दिव्यगुणैर्देवै सह १ १६ ६ धनञ्जयाख्यै सूक्ष्मै १ १६ ८ अनेकविधैर्निमित्तभूतैर्वायुभि १ १६ ६ उपर्यधोगमनशीलैर्वायुभि १.१६ ७. प्राप्तहेतुभि सह १ १६ ५. विद्वद्भि पवनैर्वा १ १०७ २ **मरुद्भ्यः**= पश्वादिभ्य प्रजाभ्य ३० ५ वायुवद् वर्त्तमानेभ्यो मनुष्येभ्य २४.१६ वायूनामाधारबलाकर्षणेभ्य १ ८५ ८ मनुष्येभ्य

[मदि स्तुतिमोदादिषु (भ्वा०) धातोर्लिट क्वसु । ततो ङीप्]

ममहन्त सत्कुर्वन्तु प्र०—अत्र 'तुजादीनाम्०' इत्यभ्यासदैर्घ्यम् ७ ५२ २ **ममहन्ताम्**=वर्धन्ताम् प्र०—व्यत्ययेनाऽत्र शप श्लु १ ९४ १६ सत्कारेण वर्धयन्ताम् १ १०० १९ सत्कारहेतवो भवन्तु १ ९६ ९ **ममहस्व**=भृश सत्कुरु ३ ५२ ६ **ममहे**=मह्यति प्र०—अत्र 'मह पूजायाम्' इत्यस्माल्लटि 'बहुल छन्दसि' इति श्लुर्विकरणो व्यत्ययेनाऽऽत्मनेपद तुजादित्वाद् दीर्घ १ ६५ १३ सत्कुर्याम् ५ २७ १ **ममुः**=मान कुर्वन्ति १ ११०.५ [मह पूजायाम् (भ्वा०) धातोर्लङ् । व्यत्ययेन श्लुरात्मनेपदश्च । अन्यत्र लोटि लटि च रूपाणि]

ममाते मिमाते परिछिन्त प्र०—अत्र 'बहुल छन्दसि इत्यभ्यासेत्वप्रतिषेध ३ ३२ ७ **ममिरे**=निर्मिमते ७ २१ ७ मिमीते १ ५७ ५ व्याप्नुवन्ति ५ ५५ २ निर्मिमीरन् ३ ३८.३ मिनुयु २९ १९ **ममे**=सृजति ५ ८५ ५ मिमीते १ ५७ ५ मापयति १ १६० ४ [माङ् माने शब्दे च (जु०) धातोर्लट् । 'वा छन्दसी' त्यभ्यासेत्वप्रतिषेध । अन्यत्र लिट्]

ममृड्युः सुखयन्ति ४ १८ ८ [मृड सुखने (तुदा०) धातोर्लिटि छान्दस रूपम्]

ममृवान् मृत सन् १ ११६ ३ योगक्षेमविरह ऋ० भू० १८९, १ ११६ ३ [मृङ् प्राणत्यागे (तुदा०) धातोर्लिट क्वसु]

मम्नाते अभ्यासाते ७ ३१ ७ [म्ना अभ्यासे (भ्वा०) धातोर्लिट् । व्यत्ययेनात्मनेपदम् । कर्मणि वा रूपम्]

मम्रुषीः=म्रियमाणा (स्त्रिय) १ १४० ८ [मृङ् प्राणत्यागे (तुदा०) धातोर्लिट क्वसु । तत स्त्रिया ङीप्]

मय इव सुखमिव १ १७५ ६ [मय-इवपदयो समास]

मयः ऐहिक सुखम् १८.८ सुखकारी (अग्नि=भौतिक सूर्यरूप) २२ १९ सुख सुखविशेषो वा ७ ४७ [मय इति सुखनाम निघ० ३ ६ यद्वै शिव तन्मय तै० २ २ ५ ५]

मयन्दम् यन्नय सुख ददाति तम् (छन्दः=विद्याधर्मशमादिकर्म) १४ ९ ['मयम्' इत्युपपदे डुदाञ् दाने (जु०) धातो क । मयन्दम्=यद्वा अनिरुक्त तन्मयन्दम् श० ८ २ ३ १३]

मयस्कराय य सर्वेषा प्राणिना मय सुख करोति तस्मै (परमेश्वराय सेनाधीशाय वा) १६ ४१ मन, इन्द्रिय, प्राण और आत्मा को सुख करने वाले (ईश्वर) के लिए आर्याभि० २ २६, १६ ४१ सुखकारकाय प० वि० [मयस्-उपपदे डुकृञ् करणे (तना०) धातो 'कृञो हेतुताच्छील्यानुलोम्येषु' अ० ३ २ २० सूत्रेण ट । मयस् सुखनाम निघ० ३ ६]

मयुम् जाङ्गलम् (पशु=चतुष्पाद गवादिकम्) १३ ४७. शस्यादिहिंसकम् पशुम् १३ ४७ **मयुः**=किन्नर २४ ३१ [डुमिञ् प्रक्षेपणे (भ्वा०) धातो 'भृमृशीङ्तॄ०' उ० १ ७ सूत्रेण उ]

मयूखैः ज्ञानप्रकाशादिगुणै रश्मिभिर्वा प्र०—मयूखा इति रश्मिनामसु पठितम् निघ० १ ५, ५ १६ [माङ् माने शब्दे च (जु०) धातो 'माङ ऊखो मय च' उ० ५ २५ सूत्रेण ऊखो मयादेशश्च । मयूखा रश्मिनाम निघ० १ ५]

मयूररोमभिः मयूराणा लोमानीव लोमानि येषान्तै (हरिभि=अश्वै किरणैर्वा) ३ ४५ १ मयूरस्य रोमाणीव रोमा येषान्तै (हरिभि=अश्वै) २० ५३ [मयूररोमन्-पदयो समास]

मयूर्यः मयूराणा स्त्रिय १ १९१ ४ [मयूरप्राति० स्त्रिया ङीप् । प्रथमाबहुवचने रूपम् । मयूर=मीञ् हिंसायाम् (क्र्या०) धातो 'मीनातेरूरन्' उ० १ ६७ सूत्रेण ऊरन्]

मयोभवाय मय सुख भवति यस्मात्तस्मै (परमेश्वराय सेनाधीशाय वा) १६ ४१ सर्वोत्तमसौख्यप्रदाय (ईश्वराय) प० वि० सासारिक सुख के करने वाले (ईश्वर) के लिए आर्याभि० २ २६, ३६ ४१ [मयस्-उपपदे भू सत्तायाम् (भ्वा०) धातो 'ऋदोरप्' इत्यप्]

मयोभु मय सुख भवति यस्मात्तत् (सज्ज्ञानम्) २ २७ ५ परमसुख भवति यस्मात्तत् (भेषजम्=औषधम्) १ ८९ ४ सुख भावुकम् (ब्रह्म=जगदीश्वरम्) ५ ४२ २ सुखकारि (भेषजम्=औषधम्) २५ १७ **मयोभुना**=यो मयासि सुखानि भावयति तेन (राया=धनेन) ३ १६.६ [मयस्-उपपदे भू सत्तायाम् (भ्वा०) धातो 'डुप्रकरणे मितद्र्वादिभ्य उपसख्यानम्' अ० ३ २ १८० वा० सूत्रेण डु]

मयोभु सुख भावुकानि (भेषजा=रोगनिवारकौषधानि) २ ३३ १३. ['मयोभु' इति व्याख्यातम् । तत शे 'सुपा सुलुक्०' इति लुक्]

मयोभुवम् सुखकारकम् (देव=विद्वास जनम्) १ १३८ २. सुख भावुकम् (विदुष जनम्) १ १३८.१ **मयोभुवः**=सुख भावुका (मनुष्या) ५ ५८ २ सुख-

मरुद्वृधः मनुष्यैर्वर्धमानान् (भा०—वर्नैश्वर्योपायान्) ३.१३ ६ [मरुदुपपदे वृधु वृद्धौ (भ्वा०) धातो क्विप्। मरुद्वृध =सर्वा नद्य , मरुत एना वर्धयन्ति नि० ९ २४]

मरुन्नेत्राः मरुति ब्रह्माण्डस्थे वायौ नेत्र नयन येषा ते (देवा =सर्वेभ्य सुखदातारो विद्वज्जना) ९ ३६ **मरुन्नेत्रेभ्यः**=मरुतामृत्विजा प्रजास्थाना सज्जनाना वा नेत्रमिव नायकत्व येषा तेभ्य (देवेभ्य =दिव्यन्याय-प्रकाशकेभ्यो विद्वद्भ्य) ९ ३५ [मरुत्-नेत्रपदयो समास । मरुत इति व्याख्यातम्। नेत्रम्=णीञ् प्रापणे (भ्वा०) धातोरौणा० ष्ट्रन्। ये देवा पश्चात्सदो मरुन्नेत्रा मैं० २ ६ ३]

मर्कटः वानर २४ ३० [मर्क इति सौत्रो धातु । ततो बाहु० औणा० अटन्]

मर्कः मृत्युनिमित्त खल्वन्यायकारी (दुर्जन) ७ १८ मरणदु खदो दुर्नय ७ १७ **मर्काय**=मृत्युनिमित्ताय वायवे अ०—दुष्टाना प्रशमनाय श्रेष्ठव्यवहारस्थापनाय ७ १६ [मर्च इति सौत्रो धातु चेष्टायामर्थे। तत 'इण्-भीकापा०' उ० ३ ४३ इति कन्]

मर्चयति शब्दयति १ १४७ ५ उच्चरति १ १४७ ४. बाधते ५ ३ ७ **मर्चयात्**=सुमार्गे नयेत् २ २३ ७ [मर्च शब्दार्थे (चुरा०) धातोर्लेट्। अन्यत्र लिङ्]

मर्जयध्वम् शोधयत ७.२४ **मर्जयन्त**=शोधयन्तु ५ ३.३ शोधयन्ति १ ६१ २. घर्षणादिना शोधयन्तु ७ ३.५ **मर्जयेम**=शोधयेम ४ ४ ८ [मृजू शौचालङ्करणयो (चुरा०) धातोर्लोट्। अन्यत्र लङि लिङि च रूपाणि। वृद्ध्यभावश्छान्दस]

मर्जयन्तः शोधयन्त (गोतमासो जना) १ ६० ५. [मृजू शौचालकरणयो (चुरा०) धातो शतृ। वृद्ध्यभाव । मर्जयन्त गमयन्त नि० १२ ४२]

मर्डिता सुखप्रदाता (धार्मिको मनुष्य) १ ८४ १९ सुखयिता (इन्द्र =ईश्वर) ४ १७ १७ **मर्डितारम्**= सुखकरम् (इन्द्र=राजानम्) ४ १८ १३ [मृड सुखने (तुदा०) धातो कर्त्तरि तृच्। मर्डिता सुखयिता नि० १३ २८]

मर्त्त मरणधर्मयुक्त (मनुष्य) ५ ६६ १ **मर्त्तम्**=मनुष्यम् १ १३६ ५ **मर्त्तस्य**=मरणधर्मसहितस्य प्राणिजातस्य १ ९२ १०. मननशीलस्य नरस्य ६ २८ ४ **मर्त्ता.**=मनुष्य ४ ८ **मर्त्ताः**=अविद्वांसो मनुष्या ४ १७ १९ मरणधर्माणो मनुष्या ३ ९ ६. साधारणमनुष्या १ १०० १५ **मर्त्तेषु**=मरणधर्मेषु कार्येषु ५ १८ १ [मर्त्त इति मनुष्यनाम निघ० २ ३ मृङ् प्राणत्यागे (तुदा०) धातो 'हसिमृग्रिण्०' उ० ३ ८६ सूत्रेण तन्]

मर्त्तभोजनम् मर्त्तेभ्यो मनुष्येभ्यो भोजन मर्त्ताना पालन वा १ ८१ ६ मर्त्तेभ्य इद भोजनम् ७ ३८ २. मर्त्ताना मनुष्याणा भोज्य वस्तु १ ११४ ६. [मर्त्त-भोजनपदयो समास । भोजनम्=भुज पालनाभ्यवहारयो (रुधा०) धातोर्ल्युट्]

मर्त्तभोजना मर्त्ताना मनुष्याणा भोजनानि पालनानि ७ १६ ४ [मर्त्त-भोजनपदयो समासे शेर्लोपश्छन्दसि]

मर्त्तासः शरीरयोगेन जन्म-मरणसहिता (मनुष्या) २ १.१४ मननशीला मनुष्या. ३ ९ १ मरणधर्माण (मनुष्या) १ १०५ १६ [मर्त्तप्राति० प्रथमाबहुवचने जसो ऽसुक्]

मर्त्यकृतम् साधारणमनुष्याऽऽचरितम् (एन = दुष्टाचरणम्) ८ २७ मर्त्यैराचरितम् (एन =पापम्) २० १८ अनित्यदेहेन निष्पादितम् भा०—अज्ञानादनुष्ठितम् (एन =पापम्) ३ ४८ [मर्त्य-कृतपदयो समास]

मर्त्यम् प्रजास्थ मनुष्यम् ६ ३७ पृथिव्यात्मक लोकम् ऋ० भू० १४२, ३३ ४३ मनुष्य-लोकम् ऋ० भू० १४२, ३३ ४३ मनुष्यशरीरधारिणम् (शत्रुम्) ५ ३५ ५ नाशसहित कार्य्यम् ३४ ३१ मनुष्यादिप्राणिजातम् ३३ ४३ विद्वास मनुष्यम् १.१८ ५ कर्म्म, प्रलयप्राप्तिव्यवस्थया कालव्यवस्थया वा मरणधर्मयुक्त प्राणिनम् १ ३५.२ **मर्त्यस्य**=साधारणमनुष्यस्य ६ ४८ २० मरणधर्मकस्य विश्वस्य मनुष्यस्य ऋ० भू० १३०, ३१ १७ अविदुष. (पुरुषस्य) २ ७ २ पीडितस्य मनुष्यस्य मर्त्तस्य ७ २५ ३. **मर्त्यः**=सुशिक्षितो धार्मिको भृत्यो मनुष्य १ ८३ १. अविद्वान् मनुष्य १ १९ २ **मर्त्यान्**=मरणधर्मान् मनुष्यादीन् ४ ५८ ३ **मर्त्यानाम्**=अविदुषाम् (जनानाम्) ४ १२ ५ मरणधर्माणा शत्रूणाम् ५.४ १ विद्याविज्ञानरहिताना मनुष्याणाम् ऋ० भू० २०५, १९ ४७ **मर्त्याय**= मरणधर्माय (मनुष्याय) ४ १२ ३ मनुष्यसुखाय ५ ४१ ७. नराय पतये १ १२४ १२ मनुष्य के लिए मं० वि० १०५, ५ ४१ ७ **मर्त्ये**=मर्त्यलोके ३ २९ **मर्त्येन**=मरणधर्मेण शरीरेण १ १६४ ३० मरणधर्मसहितेन शरीरादिना १ १६४ ३८ **मर्त्येषु**=नश्यमानेषु पदार्थेषु १ ७७ १. मरणधर्मेषु मनुष्येषु कार्येषु वा ४ १६ **मर्त्यैः**=अविद्वद्भिर्मनुष्यैः २० १८ मृत्युधर्मैं (मनुष्यैः) ८ २७ मरणधर्मैं

५ ५ ११ प्राण इव प्रियेभ्य (भा०—विद्वज्जनेभ्य) २४ १६ [मृङ् प्राणत्यागे (तुदा०) धातोः 'मृग्रोरुति' उ० १ ६४. सूत्रेण उति । मरुत ऋत्विङ्नाम निघ० ३ १८ पदनाम निघ० ५ ५ मरुत् हिरण्यनाम निघ० १ २ मरुत् रूपनाम निघ० ३.७ मरुतो मितराविणो वा मितरोचिनो वा महद् द्रवन्तीति वा नि० ११ १४ मरुतो रुग्मय ता० १४.१२ ९ युञ्जन्तु त्वा मरुतो विश्ववेदस इति युञ्जतु त्वा देवा इत्येवैतदाह श० ५ १ ४ ९ गणशो हि मरुत ता० १९ १४ २ मरुतो गणाना पतय तै० ३ ११ ४ २ सप्त सप्त हि मारुता गणा श० ९ ३ १ २५ मारुत सप्त-कपाल (पुरोडाश) ता० २१ १० २३ मरुतो वै देवाना भूयिष्ठा ता० १४ १२ १. मरुतो ह वै देवविशो ऽन्तरिक्ष-भाजना ईश्वरा कौ० ७ ८. अहुतादो वै देवाना मरुतो विट् श० ४ ५ २ १६ मरुतो वै देवानामपराजितमायतनम् तै० १ ४ ६ २ अप्सु वै मरुत श्रित गो० उ० १ २२ आपो वै मरुत ऐ० ६ ३० पङ्क्तिश्छन्दो मरुतो देवताष्ठीवन्त श० १० ३ २ १० मरुत् स्तोमो वा एप (षोडशस्तोम) ता० १७ १ ३ ओजो वै वीर्यं मरुत जै० ३ ३०९ कीनाश (कृषी कर्मकरा) आसन्मरुत सुदानव तै० २ ४ ८ ७ चत्वारिंशन्मरुतो देवा जै० १ ३४ मरुतो गणाना पतय तै० ३ ११ ४ २ वीर्यं मरुत जै० १ ३०३]

मरुत्तमा अतिशयेन विद्वद्युक्तौ (अश्विना=अध्यापको-पदेशकौ) १ १८२ २ [मरुत्प्राति० अतिशायने तमप् । ततो द्विवचनस्याकारश्छान्दस]

मरुत्वतः प्रशसितविद्वद्युक्तस्य (राज्ञ) ५ ४२ ६ **मरुत्वते**=मरुतो वहवो मनुष्या कार्यसाधका विद्यन्ते यस्य तस्मै (शिल्पिजनाय) ३ ३५ ७. प्रशस्तानि मरुदस्त्राणि विद्यन्ते यत्र तस्मै (इन्द्राय=रणाय) ७ ३८ प्रजासम्वन्धाय प्र०—अत्र सम्वन्धे मतुप् 'भय' इति मस्य वत्वम् ७ ३५ प्रशसितप्रजायुक्ताय (इन्द्राय=सभापतये) ७ ३६ प्रजापालन-सम्बद्धाय (राज्यैश्वर्याय) ७ ३८ प्रशसिता मनुष्या यस्मिन् तस्मै (विद्युद्रूपाग्नये) ५ ८७ १ **मरुत्वन्तम्**=प्रशस्त-प्रजायुक्तम् (इन्द=सम्राज प्रजापतिम्) ७ ३६ प्रशस्ता मरुतो मनुष्या विद्यन्ते यस्य तम् (इन्द्र=परमैश्वर्यवन्त राजानम्) ३ ४७ ५ सर्वप्राणियुक्तमृत्विग्युवत वा (इन्द्र= जगदीश्वर सभाध्यक्ष वा) ११०१ ३ प्रशस्ता मरुतो विद्यावन्त ऋत्विजोऽध्यापका विद्यन्ते यस्मिँस्तम् (अ०— अध्यापकम्) ११०११ मरुत सम्वन्धिनो विद्यन्ते यस्य तम् (इन्द्र=विद्युतम्) प्र०—अत्र सम्बन्धार्थे मतुप् 'तसौ मत्वर्थे' अ० १ ४ १९ इति भत्वाज्जश्त्वाऽभाव १ २३ ७

मरुत्व: ।=प्रशस्तविद्यायुक्त (विद्वज्जन) ११०१.८. प्रशसितवनयुक्त (इन्द्र=राजन्) ३ ५१ ७ मरुत प्रशस्ता धर्मसम्वद्धा. प्रजा यस्य तत्सम्बुद्धौ (इन्द्र=सम्राट्) ७.३५. **मरुत्वान्**=मरुतो वहवो वायवो विद्यन्ते यस्मिन् स (सूर्य) ६ ४७ ५ प्रशस्ता मरुत प्रजा सेना वा विद्यन्ते यस्य स (इन्द्र =शत्रुजित् सेनापति) ७ ३८ प्रशस्तवायु-मान् (इन्द्र =सूर्य) १ ८०.११ यस्य सृष्टौ सेनाया वा प्रशस्ता वायवो मनुष्या वा विद्यन्ते स (इन्द्र =परमेश्वर. सभाध्यक्षो वा) ११०० २ प्रशस्तरूपवान् (इन्द्र =विद्यु-दादिरूपोऽग्नि) ३ ४ ६ मनुष्यादिवहुप्रजायुक्त (वैद्यो जन) २.३३ ६ अत्यन्त वलवान् (इन्द्र =परमात्मा) आर्याभि० १ ३२ ऋ० १ ७ १० १५. [मरुत्-प्राति० सम्बन्धार्थे प्रश-साया भूम्न्यर्थे वा मतुप् । 'भय' इति मतुपो मस्य वत्वम् । 'तसौ मत्वर्थे' इति भत्वाज्जश्त्व पदकार्य न भवति । मरुत्वान्=मरुद्भिस्तद्वान् नि० ४ ८]

मरुत्वती प्रशस्तरूपयुक्ता (राज्ञी) २ ३० ८ प्रशस्ता मरुतो मनुष्या विद्यन्ते यस्या सा (वाणी=सकलविद्या-युक्ता वाक्) ७ ३१ ८ **मरुत्वतीः**=मनुष्यादिप्रजा-सम्बन्धिनी (अप =जलानि) १ ८० ४ [मरुत्-प्राति० मतुवन्तात् स्त्रिया ङीप्]

मरुत्वतीयम् वहवो मरुतो व्याख्यातारो मनुष्या विद्यन्ते यस्मिँस्तत्र भवम् (उक्थ=वाच्यम्) १५ १२ [मरुत्-प्राति० भूम्न्यर्थे=मतुप् । तत 'सास्य देवता' इत्यर्थे 'द्यावापृथिवी शुनासीर०' अ० ४ २ ३२ सूत्रेण छ । छस्येयादेश । छन्दसि भवार्थेऽपि]

मरुत्वतीयाः मरुता सम्वन्धिनो व्यवहारा १८.२० [मरुत्वत्-प्राति० भवार्थे छ । मरुद्वतीयम्—(शस्त्रम्) पवमानोक्थ वा एतद् यत् मरुत्वतीयम् ऐ० ८ १ तदेतद् वार्त्रघ्नमेवोक्थ यन्मरुत्वतीयमेतेन इन्द्रो वृत्रमहन् । कौ० १५ २ तदेतत् पृतनाजिदेव सूक्त यन्मरुत्वतीयमेतेन ह इन्द्र पृतना अजयत् कौ० १५ ३ वज्रो वै मरुत्वतीया (ग्रहा.) मै० ४ ६ ८]

मरुत्स्तोत्रस्य मरुता वेगादिगुणै स्तुतस्य (वृजनस्य= व्यवहारस्य) ११०१ ११ [मरुत्-स्तोत्रपदयो समास]

मरुद्गण मरुता मनुष्याणा वायूना वा गण समूहो वा यस्य तत्सम्बुद्धौ भा०—न्यायाधीश (इन्द्र=राजन्) ३३ ६५ **मरुद्गणः**=मरुतामुत्तमाना मनुष्याणा गण. समूहो यस्य स (इन्द्र =राजा) ६ ५२ ११ **मरुद्गणाः**= मरुता मनुष्याणा समूहा २ ४१ १५ [मरुत्-गणपदयो समास]

क्विप्-प्रत्यये पृषोदरादित्वाद् रूपसिद्धि]

मलिम्लुचाय स्तेनाय प्र०—मलिम्लुच इति स्तेननाम निघ० ३ २४, २२ ३० [मलिन्-उपपदे म्लुचु गत्यर्थे (भ्वा०) धातो क]

मशर्शारस्य यो मशान् दुष्टान् शब्दान् शृणाति हिनस्ति तस्य (राज्ञ) प्र०—अत्र पृषोदरादिना पूर्वपदस्य रुगागम १ १२२ १५ [मशोपपदे शॄ हिंसायाम् (क्र्या०) धातोरण्]

मस्तिष्केण शिरस्स्थमज्जातन्तुसमूहेन २५ २ [मस्त मस्तकम् इष्यति स्वाधारत्वेन प्राप्नोतीति विग्रहे मस्तोपपदे इषु गतौ (दिवा०) धातो क । पृषोदरादित्वाद् रूपसिद्धि]

महत् पुष्कलम् (वीर्यं=पराक्रमम्) २ १७ ३. सर्वेभ्यो वृहत् (चेतनमात्रस्वरूप ब्रह्म) ३ ५५ ५ -पूज्य वृहत् (यश) ३२ ३ विस्तीर्णम् (आवपन=क्षेत्रम्) २३ ६ वडे (असुरत्वम्=चेतनमात्र ब्रह्म) स० प्र० ११०, ३ ५५ १६ वडा (यश=धर्मयुक्त कामो का करना) स० प्र० ४५५, ३२ ३ महोत्तमगुणविशिष्टम् (पौंस्य=पुरुषार्थयुक्त वलम्) १ १०१ ३ **महान्ति**=विज्ञानादीनि ५ ५९ ४ [महत् उदकनाम निघ० १ १२ महत् महन्नाम निघ० ३ ३ महति पूजयति पूज्यते वा तन्महदिति विग्रहे मह पूजायाम् (भ्वा०) धातो 'वर्त्तमाने पृषद्वृहन्महत्'० उ० २ ८४ सूत्रेण अति । महान् कस्मान् मानेनान्याञ्जहानीति शाकपूणि । महनीयो भवतीति वा नि० ३ १३ महद्वा अन्तरिक्षम् ऐ० ५ १८,१९ अन्तो वै महत् ऐ० ५ २, १२ एप ह वै महान् देवा यद्यज्ञ गो० १ २ १६.]

महत पूज्यस्य व्यापकस्य वा (सत्यस्य=जगदीश्वरस्य) २ १५ १ पूजनीयस्य (राज्ञ) ४ २२ ५ प्रवलान् (शत्रून्) १ १७८ ५ आकाशादे २० ३२ **महति**=विशाले (सधस्थे=सहस्थाने) ११ १८ व्यापकत्वादिमहागुणविशिष्टे (अन्तरिक्षे=अन्तरिक्षय आकाशे) १६ ५५ **महते**=वृहते पूजिताय वा (इन्द्रियाय=धनाय) १ १०४ ६ वहुविधाय (धनाय) १.१०४ ७ वडे (क्षत्राय=चक्रवर्त्ति राज्य के लिए) स० प्र० १८३, ६ ४० विशिष्टाय पूज्यतमाय (सौभगाय=सुष्ठु ऐश्वर्याणा भावाय) ५ ४३ सत्कर्त्तव्याय (क्षत्राय=क्षत्रियकुलाय) १० १८ **महत्सु**=महाप्रवलेषु (आजिषु=सङ्ग्रामेषु) १.८१ १ **महद्भि**=महाशयै (राजप्रजाजनै) ४ ४१ २ महासुखकारकैर्गुणै १.७२ ६ महागुणविशिष्टै (वाजेभि=मेध्यै) ४ २२ ३. **महद्भ्य**=महाशयेभ्यो विद्यावयोभ्या वृद्धेभ्य पूज्येभ्य (राजपुरुषेभ्य) १६ २६ **महद्भ्याम्**=पूज्याभ्याम् (पित्राचार्यादिभ्याम्) ३ ७ ६ **महान्**=सर्वोत्कृष्ट पूज्यतमश्च (इन्द्र=भगवान् जगदीश्वर) ७ ३६ महागुणकर्मस्वभाव (इन्द्र=ईश्वर) ७ ४० महाशय (इन्द्र=राजा) ६ ४५ १३ सर्वेभ्यो ज्येष्ठ (विद्युद्रूपोऽग्नि) ३८.२२ सर्वेभ्यो वरीयान् सर्वै पूज्यश्च (ईश्वर) १३.२ गुणैर्महत्त्वयुक्त (वर) १ ५६ ३ पूज्यतमो महाशय (इन्द्र=ऐश्वर्यवान् विद्वज्जन) ३ ३६ ५ सर्वोत्कृष्ट (सेनापति) १ ८१ ४ सर्वेभ्यो महत्तम (इन्द्र=परमेश्वर) १४.१० सर्वोत्कृष्ट ईश्वर सूर्यलोको वा परिमाणेन महत्तम १ ६ १ सर्वथाऽनन्तगुणकर्मस्वभावसामर्थ्येन युक्त (इन्द्र=सर्वजगद्राज) १ ८ ५ महत्त्वपरिमाणत सर्वेभ्योऽधिक (वेदविद् आप्तो विद्वज्जन) ३ ५३ ६. महत्त्वादिगुणविशिष्ट (ईश्वर) ३३ ३९ पूजनीयतम (राजा) ३३ ६५ व्याप्त सन् (परमात्मा) ३ ५५ ६ अतिविस्तीर्ण (अग्नि=विद्युत्) ४ ७ ७ व्याप्त्यादिमहागुणविशिष्ट (कवि=काल) १ ६५ ४ महत्त्वपरिमाण (अग्नि=सूर्यलोक) ३ ६ ४ **महान्तम्**=विद्यावयोवृद्ध जनम् प० वि० । १ ११४ ७ वृद्धतमम् (परमेश्वरम्) ऋ० भू० १३१, ३१ १८ महागुणविशिष्ट पूज्य जनम् १६ १५ महत्परिमाणम् (कोश=मेघम्) ५ ८३ ८ वडो से भी वडे (ईश्वर) को आर्याभि० २ ८, ३१ १८ **महान्त**=परिमाणेनाऽधिका (विद्वासो=जना) १ १६६ ११ [महदिति व्याख्यातम् । 'महान्' इत्येवमादौ 'सान्तमहत सयोगस्ये' ति दीर्घ । प्रजापतिर्वाव महान् ता० ४ १०.२ अग्निर्वै महान् जै० उ० ३ ४ ७ प्राण एव महान् श० १० ४ १ २३]

महय पूजयोपकुरु वा १ ५२ १ **महयसे**=सत्क्रियसे ६ १५ २ **महयन्**=सत्कुर्वन्ति ७ ४२ ३ **महयन्त**=पूजयेयु ३ ३ ३ **महेत्**=पूजयेत् १.१११ ३ **महेम**=सत्कुर्याम ७ २ ३ [मह पूजायाम् (भ्वा०) धातोर्णिजन्ताल्लोट् । अन्यत्र लट् लङ् च । 'महेत्' इत्यादौ लिङ् मह पूजायाम् इति चुरादावपि । महयति अर्चतिकर्मा निघ० ३ १४]

महयते महते (राये=धनाय) ७ ३२ १६ **महयन्**=सत्कुर्वन् (प्रजाजन) १ ५४ २ **महयन्तम्**=सत्कर्त्तव्यम् (कामम्) १ १७८ १ **महयन्त**=महानिवाऽऽचरन्त (प्रजाजना) ४ १७ १८ पूजयन्त (विद्वासो जना) ५ ३१ ४ [मह पूजायाम् (चुरा०) धातो शतृ । महत्-प्राति० वा 'उपमानादाचारे' सूत्रेणाचारे क्यजन्ताच्छतृ]

शरीरे ३ ४८ [मर्त्य इति मनुष्यनाम निघ० २.३ अनात्मा हि मर्त्य श० २ २ २ ८ मर्त्यान्=मनुष्यान् नि० १३ ७]

मर्त्यत्रा मर्त्येषूपदेशका (जना) ७ ५२ १ मर्त्येषु मनुष्येषु ६ ६२ ८ [मर्त्यप्राति० 'देवमनुष्यपुरुषपुरुमर्त्येभ्य०' अ० ५ ४ ५६ सूत्रेण सप्तम्यन्तात् त्रा प्रत्यय]

मर्त्यासः मनुष्या १.११३ ११ [मर्त्यप्राति० प्रथमा बहुवचने जसोऽसुक्]

मर्त्येषितः मर्त्यै सेनास्थैरितरैश्चेषितो विजय १.३९ ८. [मर्त्य-इषितपदयो समास । इषित =इषु इच्छायाम् (तुदा०) धातो क्त]

मर्धतः हिंसत ६ ६० ४ **मर्धति**=हिंसति ७ ५६ ४ **मर्धन्ति**=योधयन्ति ११६६ २ हिंसन्ति ३.५४ १४ **मर्धिषत्**=अभिकाङ्क्षेत् ७ ३२ ५ **मर्धिष्टम्**=हिंस्तम् ३३ ८८ **मर्धीः**=अभिकाङ्क्षे ७ २५ ४ उन्दितान् कुरु ४.२० १० [मृधु उन्दने (भ्वा०) धातोर्लेट् । धातूनामनेकार्थकत्वादत्र हिंसने । अन्यत्र लेट् लुङ् च]

मर्म जीवननिमित्तम् १ ६१ ६ गुह्याऽवयवम् ५ ३२ ५. यस्मिन् प्रहते म्रियते तत् ३ ३२ ४ **मर्माणि**=शरीरस्थान् जीवनहेतूनवयवान् ६ ७५.१८ यानि ताडितानि सन्ति सद्यो मरणजनकान्यङ्गानि १७ ४९ [मृङ् प्राणत्यागे (तुदा०) धातोर्मनिन् । 'कृतो बहुल वे' ति वार्तिकेन कर्त्तृ भिन्ने कारकेऽपि मनिन्]

मर्मर्त्तु भृश प्राप्नोतु २ २३ ६ मृङ् प्राणत्यागे (तुदा०) धातोर्यङ्लुगन्ताल्लोट्]

मर्मृजत शुद्धा भूत्वा शोधयन्ति ४ ११ १४ **मर्मृजतः**=भृश शोधयत ४ २ १६ **मर्मृजन्त**=अत्यन्त मार्जयन्तु शोधयन्तु १.१३५ ५ [मृजू शौचालकरणयो (चुरा०) धातोर्यङ्लुगन्ताल्लोट् । अन्यत्र लटि लङि च रूपाणि]

मर्मृजेन्यः अत्यन्तमलङ्करणीय (विद्वान् राजा) ११८९ ७ भृश शोधक (अग्नि) २ १० १. [मृजू शौचालकरणयो (चुरा०) धातोर्यङ्लुगन्तात् कृत्यार्थे केन्य]

मर्मृजमा भृश शुद्ध शोधयिता (अग्निः=वैद्यराजो विद्वान्) ३ १८ ४ [मृजू शौचालकरणयो (चुरा०) धातोर्यङ्लुगन्तान् मनिन्]

मर्मृज्यते अतिशयेन शुद्ध्यते १ ६५ ८ **मर्मृज्यन्ते**=शोधयन्ति ४ १५ ६ [मृजू शौचालकरणयो (चुरा०) धातो क्रियासमभिहारे यङन्ताल् लट्]

मर्मृज्यमानाः भृश शुद्धा (युवतय =स्त्रिय) २ ३५ ४. उत्तम ब्रह्मचर्यव्रत और सद्विद्याओ से अत्यन्त युक्त (युवतिया) स० वि० १०४, २.३५ ४ [मृजू शौचालकरणयो (चुरा०) धातोर्यङन्ताच्छानच् । तत स्त्रिया टाप्]

मर्मृशत् अतिशयेन सहमान (मज्जन) ११४० ५ भृश विचारयन् (विद्वज्जन) ३.३८ १ [मृश आमर्शने (तुदा०) धातोर्यङ्लुगन्ताच्छतृ]

मर्य इव यथा मनुष्य १ ६१ १३ प्राप्त होने वाले पति के समान स० वि० १३६, अथर्व० १४ २ ३७ **मर्या इव**=यथा विद्वासो मनुष्या ५ ५९ ३. [मर्य-इवपदयो. समास]

मर्यः मनुष्य ४ २० ५. मरणधर्मा मनुष्य १.१६३ ८. पतिर्मनुष्य १ ११५ २ **मर्याः**=मरणधर्माण (नर = नेतारो जना) ५ ५३ ३ मरणधर्मशीला मनुष्यास्तत्सम्बोधने प्र०—मर्या इति मनुष्यनामसु पठितम् निघ० २ ३, १.६ ३ मरणधर्मका (वायव) १ ६४ २ [मर्य इति मनुष्यनाम निघ० २ ३ मर्यो मनुष्यो मरणधर्मा नि० ३ १४ मर्या इति मनुष्यनाम । मर्यादाभिधान वा स्यात् नि० ४ २]

मर्यकम् मर्यम् (अपत्यम्) ५ २ ५ [मर्य-प्राति० स्वार्थे कन्]

मर्यश्रीः मर्याणा श्री शोभा यस्मात् स (अग्नि = पावक) २ १० ५ मर्याणा मनुष्याणा श्रीरिव ११ २४ (मर्य-श्रीपदयो समास]

मर्यादायै न्यायाऽन्यायव्यवस्थायै भा०—प्रश्नोत्तरकरणसामर्थ्याय ३० १० [मर्यादा=मर्यैरादीयते । मर्यादामर्यादिनोर्विभाग नि० ४ २]

मर्यासः मनुष्या ५ ६१ ४ [मर्यप्राति० जसोऽसुक्]

मर्षिष्ठाः विनाशये १ ७१ १० [मृङ् प्राणत्यागे (तुदा०) धातोर्लिङ्]

मलम् अशुद्धिकरम् अ०—अविद्यारूपम् ६ १७ [यन् मृज्यते शोध्यत इति विग्रहे मृजू शौचालकरणयो (चुरा०) धातो 'मृजेष्टिलोपश्च' उ० १ ११० सूत्रेण कल धातोष्टिलोपश्च]

मलादिव यथा मलिनताया २० २० [मलाद्-इव पदयो समास]

मलिम्लवः ये मलिना सन्तो म्लोचन्ति गच्छन्ति ते (स्तेनास =गुप्ताश्चौरा) ११ ७९ **मलिम्लून्**=मलिनाचारान् सिंहादीन् भा०=गवादिहिंसकान् पशून् पुरुषान् वा ११ ७८ [मलिन्-उपपदे म्लुचु गत्यर्थे (भ्वा०) धातो

बलादिगुणविशिष्टमनीकम्) १ ५७ ६ महत्तमम् (सिन्धु=समुद्रम्) २ ११ ६ महान्त महाशय सर्वाऽव्यक्षम्) ६ २६.१ [महत्-प्राति० षष्ठ्या बहुवचने 'छान्दसो वर्णलोपो वे' ति तलोपे रूपम्]

महामनसाम् महान्ति मनांसि विज्ञानानि येषा तेषाम् (देवाना=विद्वत्पुरुषाणाम्) १७ ४१ [महत्-मनस्पदयो समास]

महारथः महान्तो रथा वीरा वा यस्य स (राजन्य=राजपुत्र) २२ २२ [महत-रथपदयो. समास]

महावद्रिणा महावर्णयुक्तेन (पदा=पादेन) १.१३३.२. [महत्-वद्रिपदयो समास]

महावधः महान् वधो नाशन येन स (महारोग) ५.३४ २ **महावधात्**=महतो हननात ५ ८३ २. [महत्-वधपदयो समास । वध=हन हिंसागत्यो (अदा०) धातो 'हनश्च वध' अ० ३ ३ ७६. सूत्रेणाप् वधादेशश्च । महावधात्=महान् ह्रस्य वध नि० १० ११ वध. बलनाम निघ० २ ९ वज्रनाम निघ० २ २०]

महावीरम् महांश्चासौ वीरश्च तमिव महाकर्षण-प्रकाशादिना युक्त सूर्यलोकम् १ ३२ ६ **महावीरस्य**=महांश्चासौ वीरश्च तस्य (सेनापते) १६ १४. [महत्-वीरपदयो. समास]

महावैलस्थे महागर्त्तयुक्ते (स्थाने) १ १३३.३. [महत्-वैलपदयो समास । ततो महावैलोपपदे तिष्ठते क । वैलम्=विल-प्राति० स्वार्थेऽण्]

महावैश्वदेवः महता विश्वेषा सर्वेषामय व्यवहार १८ २० [महत्-वैश्वदेवपदयो समासः । वैश्वदेव=विश्व-देव-प्राति० स्वार्थेऽण् । देव=दिवु क्रीडाविजिगीषाव्यव-हारादिषु (दिवा०) धातोर्घञ्]

महाव्राताः महान्तो व्राता व्रतेषु कुशला जना सखायो यस्य स (इन्द्र=परमैश्वर्ययुक्तो जन) ३ ३०.३ [महत्-व्रातपदयो समास । व्रात=व्रतप्राति० कुशलार्थेऽण् । व्रतमिति कर्मनाम वृणोतीति सत नि० २ १३]

महासेनासः महती सेना येषान्ते (वीरजना.) ७ ३४ १६ [महतीसेनापदयो. समास । ततो जसोऽसुक्]

महि पूज्य महत् (श्रव=श्रवणम्) १२ १०६ महत् पूजितम् (जात=विज्ञानम्) १ १५६ २. महत्तम पूजनीयम् (शर्म=गृह गृह वा) १ ६३ ८. महासुखप्रद पूज्यतमम् (क्षत्रम्) १ ५४ ११ महागुणविशिष्टम् (क्षत्रम्=राज्यम्) १ ५४ ८ महत् (नम=अन्नम्) १ ६२ २ महान्तम् (श्रेष्ठ-जनम्) ४ ३ १४ महान् (वृद्धो जन) ५ ६० ३ महते पूजिताय (पूरवे=मनुष्याय) १.१३० ७ महान्त. (अर्चय=दीप्तय) ५.६ ७ [महि महत् नि० ११ ९ महि=मह पूजायाम् (भ्वा०) धातोरौणा० इन्]

महिकेरवः महयो महान्त केरव. कारव शिल्पविद्या-साधका येषान्ते (प्रियमेधा=महाविद्वांसो जना) प्र०—अत्र कृञ्-धातोरुण् प्रत्ययो वर्णव्यत्ययेनाकारस्य एकारश्च १ ४५.४ [महि-केरुपदयो समास । 'महि' व्याख्यातम् । केरु.=करोतेरुण्, वर्णव्यत्ययेनाकारस्य एकार]

महिक्षत्रौ महत्क्षत्र ययोस्तौ (अध्यापकोपदेशकौ) ५ ६८ १ [महि-क्षत्रपदयो समास । क्षत्रम् धननाम निघ० २ १०]

महित्वनम् महिमानम् ५ ५५.४. महत्वम् (वीर्यं=सामर्थ्यम्) ५ ५४.५ महत्त्वम् ४ ३६ ३ महिमा २ २३.४ **महित्वना**=महिम्ना प्र०—महित्वनेनेति प्राप्ते 'वा छन्दसि सर्वे विधयो भवन्ति' इति विभक्तेराकारादेश । समीक्षा—अत्र सायणाचार्येण व्यत्ययेन नाभाव कृत सोऽशुद्ध. १ ८५ ७ महत्त्वेन ५ २ ९ स्वमहिम्ना प्र०—अत्र बाहुलकादौणादिक इत्वनि प्रत्यय ११ ६ [मह पूजा-याम् (भ्वा०) धातोर्बाहु० औणा० इत्वनि । 'महित्वना' प्रयोगे महित्वन्-प्राति० टास्थाने आकारादेश]

महित्वम् महेर्महतो भावम् १ ११६ १ महत्वम् १ ५९ ६ महागुणस्वभावम् (प्रभावम्) १ ५६ ४ महत्त्वम् ७.४० ५ मह्यते पूज्यते सर्वैर्जनैरिति महिस्तस्य भाव प्र०—अत्रौणादिक 'सर्वधातुभ्य इन्' इति इन्प्रत्यय ततो भावार्थे त्व-प्रत्यय. १ ८ ५ महिमानम् ३३.३७ महिमा १ १३८ १ पूज्यत्व महागुणविशिष्टत्व परिमाणेनाधिक-त्वञ्च १ ६१ ९ [महि-प्राति० भावे त्व । महि=मह-पूजायाम् (भ्वा०) धातोरौणा० इन् । महित्वम्=माहा-भाग्यम् नि० ७ २३]

महित्वा महत्त्व प्राप्य ५ ५८ ३ प्रशसय्य १.१०६ ६. सत्कृत्य १ ६७ ५ पूजितो भूत्वा १ ६८ १ सत्कार को प्राप्त होकर स० वि० १३९, अथर्व० १४ २ ३२ पूजयित्वा ४ ४२ ३ सत्कार प्राप्य ७ २०.४ महत्या व्याप्त्याऽभिव्याप्य १ ५२.१३ [मह पूजायाम् (भ्वा०) धातो क्त्वा]

महित्वा स्वमहिम्ना २३ ३ महागुणवत्त्वेन प्र०—अत्र 'सुपा सुलुक्०' इत्याकारादेश १ ६१ २ महत्त्वेन पूज्येन १ १६४.२५ अपनी अनन्त महिमा से स० वि० ५, २३ ३. ['महित्वम्' इति व्याख्यातम् । ततो विभक्तेराकारादेश]

महयमानः पूज्यमान (अग्नि=आप्तो विद्वज्जन) ३ २५ ५ [मह पूजायाम् (चुरा०) धातो शानच्]

महयामसि पूजयाम ३ ३७ ४ [मह पूजायाम् (चुरा०) धातोर्लट्। 'इदन्तो मसि' रितीदन्तता मस्प्रत्ययस्य]

महसा महता (बलेन) १ १६२ १७ महत्त्वेन २५ ४०. बड़े प्रेम से स० वि० १४०, अथर्व० १४ २ ४३, **महसे**= महते (व्यवहाराय) ३० १९ पूजनाय ३० २० **महः**= महस्त्वयुक्त पूज्य वस्तु १८ ५ महत्सुखम् २ ३२ १ महद्विज्ञानम् ६ २९ १ महिमा १ १९.२ महान्तम् भा०—सत्यम् (धर्माणाम्) ३४ ७ महत् (अनीक=विजयमान सैन्यम्) ४ १२ २ महसे (सूर्याय=परमेश्वराय) सूर्यलोकाय वा) प्र०—अत्र 'सुपा सुलुक्०' इति डेर्लुक् ४ ३५ महता (शर्मणा=गृहसम्बन्धिमुखेन) प्र०—अत्र 'सुपा सुलुक्०' इति विभक्तेर्लुक् १ २२ ११ महान्ति पूजनीयानि (वपूंषि=रूपवन्ति शरीराणि) ३ ५७ ३ महते (सख्याय=मित्रत्वाय) ४ ३१ ११ पूज्यवेदशास्त्रवोधयुक्ता (वाड्) २० ६ महतीम् (धिय=प्रजाम्) १ १० २ १ महान् पूजनीय (देव=परमात्मा) ४ ५८ ३ महत्तरम् (भा०—महान्तमानन्दम्) ३ ४६ कीर्त्तियोगान्महत् (नाम=प्रख्यातिम्) ६ ४४ ८ महत्तत्वात् अ०—अव्यक्तात् ५ १९ महत् (अर्ण=शब्दसमुद्रम्) प्र०—अत्र 'सर्वधातुभ्योऽसुन्' इत्यसुन् प्रत्यय १ ३ १२ अ०—महासि क्रियासिद्धिकराणि (वस्तूनि) ३ २० महति (वुध्ने=अन्तरिक्षे) ४ १ ११ महागुणसमूहम् ३ २० महान् (अध्यापक) १ १९० ८. महागुणविशिष्टस्य (नृम्णस्य=धनस्य) १ ५५ ३ **महांसि**=महान्ति सैन्यानि ५ २८ ३ तेजांसि ३३ १२ **महोभिः**=महद्भिर्गुणकर्मस्वभावै ३ ४६ वृहद्भिर्गुणै ५ ६२ ३ सुपूजितैर्गुणै २० ४० सत्कारै ७.३७ १. [मह पूजायाम् (भ्वा०) धातोरौणादिकोऽसुन्। मह उदकनाम निघ० १ १२. महन्नाम निघ० ३ ३ महो महत नि० ९ २५ पशवो वै महस्तस्माद् यस्यैते वहवो भवन्ति भूयिष्ठमस्यकुले महीयन्ते श० ११ ८ १ ३ यज्ञो वै देवाना मह श० १ ९ १ ११ अध्वर्युरेव मह गो० पू० ५ १५ यजुर्वेदो मह श० १२ ३ ४ ९ वायुर्मह श० १२ ३ ४ ८ प्राणो मह श० १२ ३ ४ १० प्रतीच्येव मह गो० पू० ५ १५ सुवर्गो वै लोको मह तै० ३ ८ १८.५ रुद्रा एव मह गो० पू० ५ १५ ग्रीष्म एव मह गो० पू० ५ १५ त्रिष्टुवेव मह गो० पू० ५ १५ पचदश एव मह गो० पू० ५ १५]

महस्वन्तः महासि पूजनानि सत्करणानि विद्यन्ते येषा ते (सोमा=सभासद पुरुषा) २१ ४२ [महस् इति व्याख्यातम्। तत प्रशसायां मतुप्]

महाकुलः महत्कुल यस्य स (विद्वज्जन) १.१६१.१ [महत्-कुलपदयो समास]

महागयम् महान्तो गया गृहाणि, प्रजा धन वा यस्य तम् (विद्वास जनम्) प्र०—गयमिति गृहनाम निघ० ३ ४ 'अपत्यनाम' निघ० २ २. धननाम च निघ० २ १०, २६ ९. [महत्-गयपदयो समास]

महाञ्जिः महागति २४.४ [महत्-अञ्जिपदयो समास.। अञ्जि=अञ्जू (गत्यर्थे) धातोरौणा० इन्]

महादेवम् महांश्चाऽसौ देवश्च त परमात्मानम् ३९ ८ **महादेवस्य**=महतो विदुष (पुरुषस्य) ३९ ९. [महत्-देवपदयो समास। 'आन्महत समानाधिकरणजातीययो' अ० ६ ३ ४६. सूत्रेणाकारादेशो महत। देवाश्च महादेवा' तै० आ० १ ९ ३]

महाधने महान्ति धनानि प्राप्नुवन्ति यस्मिँस्तस्मिन् सङ्ग्रामे ७ ३२ २५ महान्ति धनानि यस्मात्तस्मिन् सङ्ग्रामे प्र०—महाधन इति सङ्ग्रामनामसु पठितम् निघ० २ १७, १७ ५ युद्ध मे आर्याभि० १ २४, ऋ० ५ ३ २१ २५ [महत्-धनपदयो समास। महाधने सग्राम नाम निघ० २ १७]

महानाम् महता पूज्यानाम् (देवाना=विदुषा जनानाम्) १.१८७ ६ [महत्-प्राति० षष्ठ्या वहुवचनम्। छान्दसो वर्णलोपो वे' ति तलोप]

महानाम्न्यः महन्नाम यासा ता भा०—महाकीर्त्तय (वाच) २३ ३५ [महत्-नामन्पदयो समासे स्त्रिया ङीबन्तात् प्रथमावहुवचनम्]

महानि पूजनीयानि वृहत्तमानि (कृतानि=कर्माणि) २.११ ६ महान्ति (व्रता=शीलानि) ३ ६ ५ महान्ति पूज्यानि (करणानि=कर्माणि) २ १५ १ [महत्-प्राति० नपुसके प्रथमावहुवचने रूपम्। तलोपश्छान्दस]

महान्ता महागुणौ (इन्द्राग्नी=वाय्वग्नी) प्र०—अत्र 'सुपा सुलुक्०' इत्याकारादेश १ २१ ५ महान्तौ पूजनीयौ (अश्वा=तुरगौ महान्तौ जनौ वा) ६ ६७ ४ [महत्-प्राति० द्विवचनस्य 'सुपा सुलुक्०' इत्याकारादेश]

महाम् महताम् (पुरुषाणाम्) प्र०—अत्र 'छान्दसो वर्णलोपो वा' इति तलोप ४ ५ ९ महान्तम् (अग्निम्) प्र०—अत्र 'वाच्छन्दसि' इति नकारतकारलोप सवर्णदीर्घत्वेनाऽस्य सिद्धि ३ २ ३ पूज्यं (तेनापतिम्) १ ११२ १४ पूजनीयम् (इन्द्र=राजानम्) ३ ४९ १ पूज्यतमम् (उरू=

सूत्रेण तृच् । स्वस्रादित्वाट्टाप्न । मातर नदीनाम निघ० १ १३ माता ग्रन्तरिक्षम्, निर्मीयन्तेऽस्मिन् भूतानि नि० २ ८]

मातरा जलाऽग्नी ३ ७ १ मातृवन्मान्यकर्त्र्यौ (रोदसी=भूमिसूर्यलोकौ) ६ १७ ७ मानकारकौ (ग्रध्यापकोपदेशकौ) १ १२२ ४ मातरौ धातृजनन्यौ १ १४० ३. मातापितरौ १२ १० ७ मान्यप्रदे (रात्रिदिने) ५ ५ ६ मानयित्र्यौ (नक्तोपासा=रात्रिदिने) १ १४२ ७ मान्यकर्त्तारौ मातापितरौ १ ५५ ३ जनकजनन्यौ ३ १ ७ जनकौ ७ ७.३ मातापितृरूपौ राजप्रजाजनौ ग्र०—द्यावाभूमी ४ २२ ४ मातृवद्वर्त्तमाने (धेनू=दुग्धदात्र्यौ गावौ) २८ ६ [मातृ-प्राति० द्विवचनस्याकारादेश 'सुपा सुलुक्०' इति सूत्रेण]

मातरापितरा जनकजनन्यौ ४ ६ ७ [मातृ-पितृपदयो समासे द्विवचनस्याकारादेश । पूर्वपदस्य च ग्रराङ् ग्रादेशश्छान्दस]

मातरिश्वा यो मातर्यन्तरिक्षे श्वसिति स वायु १ ७१ ४ प्राण १ १४१ ३ ग्रन्तरिक्षशयान (ग्रग्नि) ३ ५ १० ग्राकाशे शयिता वायु १ ६० १ ग्रन्तरिक्षे शयानो वायु १ १४८ १ यो वायौ श्वसिति स (भौतिकोऽग्नि) ३ २९ ११ ग्रन्तरिक्षस्थ वायु स० वि० १२२, ग्रथर्व० १४ १ ५४ मातर्यन्तरिक्षे श्वसिति प्राणान् धरति वायुस्तद्वद्वर्त्तमानो जीव ४० ४ **मातरिश्वनः**=मातर्यन्तरिक्षे श्वसिति ग्राश्वनिति वा तस्य वायो प्र०—'श्वन्नुक्षन्०' उ० १ १५७ ग्रनेनाऽय शब्दो निपातित १ २ **मातरिश्वने**=ग्रन्तरिक्षस्थाय वायवे १ १४३ २ **मातरिश्वानम्**=मातरिश्वा वायुस्तल्लक्षणम् (ईश्वरम्) १ १६४ ४६ यो मातरिश्वा वायुरिव बलवान् तम् जो वायु के समान ग्रत्यन्त बलवान् हे उस (ईश्वर) को स० प्र० १५, १ १६४ ४६ यो मातरि वायौ श्वसिति तम् (ग्रग्नि=विद्युदादिरूप वह्निम्) ३ २९ २ [मातरि ग्रन्तरिक्षे श्वयति गच्छति वर्धते वेति विग्रहे 'मातरि' इति सप्तम्यन्तोपपदे टुग्रोश्वि वृद्धौ (भ्वा०) धातो 'श्वन्नुक्षन्पूषन्०' उ० १ १५९ सूत्रेण कनिन् । ग्रथवा मातरि श्वसिति जीवयति शेते वेति विग्रहे 'मातृ' इत्युपपदे श्वस प्राणने (ग्रदा०) धातो कनिन्-प्रत्यये निपातनाद्रूपसिद्धि । शीङ् शये (ग्रदा०) धातोर्वा कनिन् । मातरिश्वा वायुर्मातर्यन्तरिक्षे श्वसिति मातर्याशु ग्रनितीति वा नि० ७ २६ प्राणो मातरिश्वा ऐ० २ ३८ ग्रय वै वायुर्मातरिश्वा योऽय पवते श० ६ ४ ३ ४]

मातवै मानाय १ १६४ २८ [माङ् माने (जु०) धातोस्तुमर्थे तवैप्रत्यय.]

मातृतमाम् ग्रतिशयेन मातरो मातृवत्पालिका नद्य प्र०—मातर इति नदीनाम निघ० १.१३, ग्रत्र 'सुपा व्यत्यय ३ ३३.३. **मातृतमासु**=ग्रतिशयेन शास्त्रोक्तशिक्षया मानकर्त्रीषु धात्रीषु १० ७ **मातृतमाः**=ग्रतिशयेन मातर इव वर्त्तमाना (नद्य) १ १५८ ५. ग्रतिशयेन मातृवत् कृपालव (जनित्री=जनन्य.) ६.५०.७. [मातृ-प्राति० ग्रतिशायने तमबन्तात् स्त्रिया टाप्]

मातृमृष्टेव विदुष्या मात्रा सत्यशिक्षाप्रदानेन शोधितेव (युवति) १ १२३ ११ [मातृमृष्टा-इवपदयो समास । मातृमृष्टा='मातृ' उपपदे मृजू शौचे (चुरा०) धातो क्तान्तात् टाप्]

मात्या मतेर्भाव कर्म वा (वाक्=वक्ति यया सा) १३ ५८ [मतिप्राति० भावे कर्मणि वा ष्यञ् । तत. स्त्रिया टाप्]

मात्रया यया सर्व मिमीते तया (बुद्ध्या) १३ २ भागेन १५ ११ लेशविशेषेण १५ १० **मात्रा**=मीयते यया सा भा०—परिमाणम् २३ ४७ भा०—व्यवहारसाधक वस्तु २३ ४८ **मात्राभिः**=शब्दादिभि सूक्ष्मैर्व्यवहाराऽवयवै ३ ४६ ३. सूक्ष्माऽवयवै ३ ३८ ३ [माङ् माने (जु०) धातो 'हुयामाश्रुभसिभ्यस् त्रन्' ४ १६८ सूत्रेण त्रन् । तत स्त्रिया टाप् । मात्रा मानात् नि० ४ २५ यद्वेव मिमीते तस्मान्मात्रा श० ३ १ ४ ८]

मादनम् ग्रानन्दनम् ७ ३१ १ [मदी हर्षे (दिवा०) धातोर्णिजन्ताल् ल्युट्]

मादयध्यै मोदयितुम् प्र०—ग्रत्र 'मदी हर्षग्लेपनयो इति' णिजन्तादध्यै प्रत्यय ३ १३ मादयितुमानन्दयितुम् ६ २२ ३.

मादयध्वम् सुखयत ६ ५२ १७ परस्परानानन्दयत ४ ३४ ८. ग्रानन्द प्रापयत १ ८५ ६ हर्षयत ३३ ५३ हर्षयध्वम् २ १८ **मादयन्ताम्**=ग्रानन्दयन्तु ७ ३९ ५ ग्रानन्दयन्ताम् ७ ५१ २. तृप्ता भूत्वाऽस्मानानन्दयन्तु २० ४६ हृष्यन्तु भा०—सुखिनो भवन्तु भावयन्तु वा २ १३ **हर्षयन्तु**=३ ४ ११ **मादयन्तु**=हर्षयन्तु ७ ३३ ५ **मादयन्ते**=हर्षयन्ति १ ५९ १ **मादयस्व**=ग्रानन्द प्रापय १ ८१ ८ हर्षयस्व १७ ८८ ग्रानन्दयस्व २७ २८ ग्रानन्दय हर्षितो वा भव १ १० १ ९ ग्रानन्दानन्दय वा ६ ४१ ५ **मादयाते**=मादये हर्षयेत् ७ ४७ २ **मादयाध्यै**=ग्रानन्दत १ १६१ ८. मादयध्वम् प्र०—लेट्

महिन महत्तम (इन्द्र=सर्वसुखप्रद राजन्) ६ २६ ८. **महिनस्य**=महत (राज्ञ) ६ ३३ ५ [मह पूजायाम् (भ्वा०) धातो 'महेरिनण् च' उ० २ ५६ सूत्रेण चकारेणानुवृत्त इनन्]

महिनः महान्त (देवा =दिव्यगुणा विद्वासो जना) ६ ५२ १५ [महिन्-प्राति० जस् महिन्=महिनि महत्युदकवतीति वा नि० ११ ३७ महिन्=मह पूजायाम् (भ्वा०) धातोरौणा० इन्]

महिना महिम्ना प्र०—अत्र 'छान्दसो वर्णलोपो वा' इति मकारलोप १ ३२.८ महत्त्वेन १ १२२ ११ स्वस्य महिम्ना व्यापकत्वेन २७ २६. अपनी महिमा से आर्याभि० २.३२, १७ १८ **महिने**=सत्कर्त्तव्याय (राज्ञे) ७ ३१.११. [महिमन्-प्राति० टा-प्रत्यये मकारलोपश्छान्दस । महिमन्=महत्-प्राति० भावे 'पृथ्वादिभ्य इमनिज्वा' इतीमनिच्]

महिना महती (सरस्वती=वाक्) ६ ६१ १३ [महिन-प्राति० स्त्रिया टाप् । महिनः=मह पूजाया धातोरौणा० इनन्]

महिनि पूज्ये (पृथिवि=भूमे) ५ ८४ १ [मह पूजायाम् (भ्वा०) धातोरौणा० इन् । तत स्त्रिया ङीपि सम्बुद्धौ रूपम्]

महिनी महत्यौ (द्यावापृथिवी) १ १६० २. [महिनीति व्याख्यातम् । ततो द्विवचनस्य पूर्वसवर्णदीर्घ]

महिमघस्य महन्मघ पूज्य धन यस्य तस्य (पुरुपार्थिनो जनस्य) १ १२२ ८ महि-मघपदयो. समास । 'महि' इति व्याख्यातम् । मघम् =धननाम निघ० २ १०]

महिमनः महिम्न ६ २७ ३ [महत्-प्राति० भावे पृथ्वादित्वाद् इमनिच् । तत षष्ठ्यादौ विभक्तौ अकारलोपाऽभावश्छान्दस]

महिमा महतो भाव १८ ४ महती प्रशसा ७ ४५ २ माहात्म्यम् भा०—महत्त्वम् ३१ ३ प्रशसासमूह. ७ २८ २ प्रताप ६ ५६ २ **महिमानम्**=स्तुत्यस्य, पूज्यस्य, व्यवहारस्य भावम् १ ६१ ८ उत्तमप्रतिष्ठाम् १ ८५ २ स्तुतिविषयम् (प्रयाण=प्रकृष्ट प्राणम्) ११ ६ पूज्य ब्रह्मचर्यजितेन्द्रियत्वादिशुभकर्म सत्कारजन्यम् (अपत्यम्) ८ ३० स्वप्रभावम् २ १७ २ महत्त्वम् २९ २७ **महिमानः**=महत्त्वयुक्ता (देवा =विद्वासो जना) ३१ १६ पूज्यमाना (मनुष्या) ३३ ७४ पूज्या सन्त (देवा =देवगणा) ऋ० भू० १२९, ३१ १६ पूज्यता प्राप्नुवन्त (देवा =विद्वासो जना) १ १६४ ५० **महिम्नः**=महतो भावस्य सकाशात् २३ ६४ **महिम्ने**=महतो भावाय २३ २ [मह पूजायाम् (भ्वा०) धातोरौणा० अतिप्रत्यये महत् । महत्-प्राति० भावे 'पृथ्वादिभ्य इमनिज्वा' इतीमनिच् । प्राणा हि महिमान काठ० ३७ १६ यज्ञो वै महिमा श० ६ ३ १ १८ राजा महिमा तै० ३ ९ १० १. श० १३ २ ११ २]

महिरत्न पूज्यैर्गुणै रमणीय (विद्वज्जन) १ १४१ १० [महि-रत्नपदयो समास । 'महि' इति व्याख्यातम् । रत्नम्=रमु क्रीडायाम् (भ्वा०) धातो 'रमेस्त च' उ० ३ १४ सूत्रेण न तकारश्चान्तादेश]

महिवृधे महता वर्धकाय (महाराजाय) ७.३१ १०. ['महि' इत्युपपदे वृधु वृद्धौ (भ्वा०) धातो क्विप्]

महिव्रतः महान्ति व्रतानि धर्म्याणि कर्माणि यस्य स. (महाराज) ६ ६८ ९ **महिव्रत**=महि महद्व्रत शील यस्य तत्सम्बुद्धौ (विद्वज्जन) १ ४५.३ [महि-व्रतपदयो समास । व्रतमिति कर्मनाम वृणोतीति सत नि० २ १३]

महिष पूजनीयतम (महाराज) ३.४६ २ **महिषम्**=महान्तम् (पुत्र=सन्तानम्) ४ १८ ११ **महिषस्य**=महतो लोकसमूहस्य १ ९५ ९ **महिषः**=महान् (सूर्य) १ १२१ २ सर्वगुणैर्महान् (अग्नि) ३ ७ **महिषाणाम्**=महता पदार्थानाम् ५ २९ ८ **महिषान्**=महत (पदार्थान्) ६ १७ ११. **महिषाः**=महान्त (असुरा =विद्वासो जना) ७ ४४ ५ महान्त पूजनीया (यजमाना) १९ ३२. [मह पूजायाम् (भ्वा०) धातो 'अविमह्योष्टिषच्' उ० १ ४५ सूत्रेण टिषच् । महिष महन्नाम निघ० ३.३ महिषा महान्त नि० ७ २६ अग्निर्वै महिष स हीद जातो महान्त्सर्वमैव्णात् श० ७ ३ १ २३ प्राणा वै महिषा श० ६ ७ ४ ५ ऋत्विजो वै महिषा श० १२ ८ १ २]

महिषा महिषाणा महता पशूनाम् ५ २९ ७ [महिष इति व्याख्यातम् । तत षष्ठ्या स्थाने आकारादेशश्छान्दस]

महिषासः पूजितगुणा महान्त (गिरय =मेघा) १ ६४ ७ [महिषप्राति० जसोऽसुक्]

महिषी महारूप-बल-शीलादियोगेन पूजनीया (युवति) ५ २ २ **महिषीम्**=महाशुभगुणाम् (पत्नीम्) ५ ३७ २ उत्तम कुल मे उत्पन्न हुई विद्या-शुभगुण-रूप-सुशीलतादियुक्त (विदुषी स्त्री) स० वि० १०५, ५ ३७ ३ [महिष इति व्याख्यातम् । तत स्त्रिया टित्त्वात् ङीप् । महिषीयैव प्रथमा वित्ता (भार्या) सा महिषी श० ६ ५ ३ १.

मनुष्य २१ ६१ मनुष्याऽऽकृति (पुरोहित.) १ ४४ १० सभापतिर्मनुज १.३७ ४ **मानुषात्**=मानवात् २ ३.३. **मानुषाणाम्**=नराणाम् १ १२७.८ मानुषेषु भवानाम् (जनाना=मनुष्याणाम्) ४ ६ ५ मनुष्यजातिस्थानाम् (राज्यपालनाऽर्हगुणानाम्) ६ १६ ६ **मानुषाय**=मनुष्याणामस्मै (क्षयाय=गृहाय) १ १२३ १ **मानुषे**=मनुष्याणामस्मिन् सग्रामे ७ १८.६ **मानुषेषु**=मनुष्यसम्बन्धिषु (यज्ञेषु=सत्सु कर्मसु) ७ २ ७ युवत्याऽऽहारविहारकर्तृषु (विक्षु=प्रजासु) १ ६० ४. अविद्वत्सु (जनेषु) ४ ५४ ३ **मानुषान्**=मनुष्यादीन् १ ४८ ७ [मनुप्राति० 'मनोर्जातावञ्यतौ षुक् च' अ० ४ १ १६१ सूत्रेण अञ् षुगागमश्च। मनुष्यप्राति० वा भवार्थेऽण्। मानुषम्=यदत्रुवन्मेद प्रजापते रेतो दुषदिति तन्मादुषमभवत् तन्मादुषस्य मादुषत्व मादुष ह वै नामैतद् यन् मानुष तन्मादुष सन् मानुषम् इत्याचक्षते। (इद मे मादुषत्) ता० ८ २ १० पशवो मानुषा क० ४१ ६. यन्मन्द्र मानुष तत् तै० स० २ ५ ११ १]

मानुषप्रधना. मनुष्याणा प्रकृष्टानि धनानि याभ्यस्ता (मरुत) १ ५२ ६ [मानुष-प्रधनपदयो समास]

मानुषा मनुष्याणामिमानि (युगा=वर्षाणि) ५ ५२ ४ मनुष्यसम्बन्धीनि (युगा=वर्षाणि वर्षसमुदितानि वा) ६ १६ २३ मनुष्येषु भवानि (युगानि=वर्षाणि) १ १०३ ४ मनुष्याणा हिनकारकाणि (वस्तूनि) १ ५१.१ मनुष्यैर्निर्मितानि (कर्माणि) ७ ४ १ [मानुषप्राति० शेर्लोपश्छन्दसि। मानुषमिति व्याख्यातम्]

मानुषास. मननशीला मानवा १ ६० ३ मनुष्या ७ ७ ४ [मानुषप्राति० जसोऽसुक्]

मानुषी मानुषाणामियम् (प्रजा) १ ७२ ८ **मानुषीणाम्**=मनुष्यसम्बन्धिनीनाम् (विशा=प्रजानाम्) ३ ११ ५ मनुष्यादिरूपाणाम् (प्रजानाम्) ५.१ ६ **मानुषीभ्य.**=मनुष्यादिभ्य (प्रजाभ्य) ११ ४५ **मानुषीषु**=मनुष्याणामिमासु (विक्षु=प्रजासु) ३ ५ ३. **मानुषीः**=मनुष्याणामिमा प्रजा ६ ६५ १ मनुष्यसम्बन्धिन्य (प्रजा) ५ ८ ३ मानुषाणामविदुषामिमा (विश=प्रजा) १७ ८६ [मानुषप्राति० स्त्रिया ङीप्। मानुषम्=मनुष्यप्राति० 'तस्येदमि' त्यण्]

मानुषेभिः मनुष्यै ७ ३८ १ [मानुषप्राति० भिस ऐस् न 'बहुल छन्दसि' सूत्रेण]

मानेभिः ये मन्यन्ते तैर्विद्वद्भि १ १८४.५ [मानप्राति० भिस्। ऐस् न भवति छान्दसत्वात्]

मान्थालः जन्तुविशेष २४ ३८.

मान्दार्यस्य मान्दस्य स्तोतुर्मङ्गलतमगुणकर्मस्वभावस्य च (कारो.=शिल्पिनो जनस्य) १.१६५ १५. प्रशसनीयकस्य शिल्पिन ३४ ४८. सर्वेभ्य आनन्दप्रदस्योत्तमस्य (कारो=क्रियाकुशलजनस्य) १.१६८ १० आनन्दिनो धार्मिकस्य (कारो.) १ १६६.१५ [मान्द-आर्यपदयो समास.। मान्द.=मदि स्तुतिमोदमदादिषु (भ्वा०) धातो-रच्प्रत्यये मन्द। तत स्वार्थिकेऽणि मान्द.। आर्य.=ऋ गतिप्रापणयो (भ्वा०) धातो 'ऋहलोर्ण्यत्' इति ण्यत्]

मान्दाः ये जनान् मदन्त्यानन्दयन्ति त एव मान्दा (राजपुरुषा) १० ४ [मान्द इति पूर्वपदे व्याख्यातम्]

मान्यमानम् मान्याना मान सत्कारो यस्मात्तम् (धार्मिक प्राज्ञम्) ७ १८ २०. [मान्य-मानपदयो. समास। मान्य=मान पूजायाम् (चुरा०) धातोर्ण्यत्। मान=मान+घञ्]

मान्यस्य प्रशसितु योग्यस्य (कारो=शिल्पिजनस्य) १.१८४ ४. सत्कर्तव्यस्य (कारो=शिल्पिनो जनस्य) ३४ ४८ माननीयस्य योग्यस्य (शिल्पिन) १.१६५ १४ सत्कर्तु योग्यस्य (कारो=शिल्पिन) १ १६७ ११ मातु योग्यस्य (कारो) १.१६८ १० [मान पूजायाम् (चुरा०) धातोर्ण्यत्]

मामकाः मदीया (जीवा) १६.४६ **मामकानाम्**=मदीयाना वीराणाम् (सत्वनाम्=प्राणिनाम्) १७ ४२ [अस्मद्-प्राति० शैषिकेऽण्प्रत्यये 'तवकममकावेकवचने' इति ममकादेश]

मामतेयम् ममताया प्रजाया अपत्यम् १ १४७ ३ मम भावो ममता, तस्या इदम् (कार्यम्) ४ ४ १३ **मामतेयः**=ममताया कुशल (लोभातुरो जन) १ १५८ ६ [ममताप्राति० अपत्यार्थे 'तस्येदमि' त्यर्थे कुशलार्थे वा ढक्। ममता=मम+तल्। मम=अस्मद्+ङस्]

मेधम् ज्ञानक्रियामय शुद्ध यज्ञम् सर्वैर्विद्वद्भि शुभैर्गुणै कर्मभिर्वा सह सङ्गमम् १ ३ ९ पवित्रम् (शृतपाक=सुसस्कृत पाकम्) २५ ३३ सङ्गतम् (अन्नम्) १ १६२ १० पवित्रकारकम् (पशु=चतुष्पाद गवादिकम्) १३ ४७ **मेधाय**=सुखसङ्गमाय १३ ४७ बुद्धिप्रापणाय दुष्टहिंसनाय वा २२ १९ अध्ययनाऽध्यापनसङ्ग्रामादियज्ञेषु १ ७७ ३ [मेधृ मगमे (भ्वा०) धातोर्घञ्। मेध यज्ञनाम निघ० ३ १७ धननाम निघ० २ १० मेधायेत्यन्नायेत्येतत् श० ७ ५ २ ३२ सर्वेषा वा ऽएष पशूना मेधो यद् व्रीहियवौ श० ३ ८ ३ १ मेदो वै मेध श० ३ ८ ४ ६ पशुर्वै मेध ऐ० २ ६ मेधो वा एष पशूना यत् पुरोडाश कौ० १० ५ मेधो वा आज्यम् तै०३ ९ १२ १]

मेधया धारणावत्या बुद्ध्या ऋ० भू० १४९, ३२ १४. **मेधा**=पवित्रकारिका प्रज्ञा समीक्षा—केचिद् भ्रान्ता मेधा इत्यत्र मेध्या इति पदमाश्रित्याद्युदात्तेन मेध्यपदार्थायैतत्पदमिच्छन्ति तच्चाऽसमञ्जसमेव कुत ? मेधा इत्यन्तोदात्तस्य दर्शनात् भट्टमोक्षमूलरोऽपि 'मेधा' इति सविसर्ग पद मत्वा बुद्धिपदार्थायैनत् पद विवृणोति तच्चाऽप्यसमञ्जसमेव। कुत ? मेधा इति निर्विसर्जनीयस्य पदस्य जागरूकत्वात् १ ८८ ३ **मेधाम्**=प्रज्ञा धन वा ३२.१४ सङ्गता प्रज्ञाम् ३२ १३ धारणावती बुद्धिम् १ १८ ६ भा०—शुद्ध विज्ञान धर्मज धन वा ३२ १४ शुद्धा धियम् ३२ १५. सर्वविद्यासम्पन्न बुद्धि को आर्याभि० २ ५४, ३२ १४ यथार्थधारणा वाली बुद्धि को आर्याभि० २ ५३, ३२ १४ **मेधायै**=प्रज्ञोन्नतये ४ ७ [मेधा धननाम निघ० २ १० मेधा मतौ धीयते नि० ३ १९ मेधृ सगमे (भ्वा०) धातो मेधा आशुग्रहणे (कण्ड्वा०) धातोर्वा 'षिद्भिदादिभ्योऽङ्' इति स्त्रियाम् अङ्]

मेधयुम् मेध हिंसा कामयमानम् (शूरवीरम्) ४ ३८ ३ [मेधपदात् 'छन्दसि परेच्छायामिति वक्तव्यम्' अ० ३ १ ८ वा० सूत्रेण क्यजन्ताद् नाच्छील्य उ। मेध = मेधृ मेधाहिंसनयो (भ्वा०) धातोर्घञ्]

मेधसातये मेधाना पवित्राणा सविभागाय १ १२९ १ [मेध-सातिपदयो समास। मेध इति व्याख्यातम्। साति = षण सभक्तौ (भ्वा०) धातो स्त्रिया क्तिन्। 'जनसनखनाम्०' इत्याकारान्तादेश]

मेधसाता शुद्धसङ्ग्रामविभक्ते ४ ३७ ६ मेधाना सङ्गमाना सातिर्दान येषु (समियेषु=सङ्ग्रामेषु) प्र०—अत्र सप्तमी-बहुवचनस्य 'सुपा सुलुक्०' अ० ७ १ ३९ इति डादेश ९ १७ [मेधसातिरिति व्याख्यातम्। तत सप्तम्या स्थाने डादेश]

मेधाविनम् प्रशस्ता मेधा विद्यते यस्य तम् (मनुष्यम्) ३२.१४ मेधया भाषयान्वितम् प० वि०। [मेधाप्राति० प्रशसायामर्थे 'अस्मायामेधास्रजो विनि' रिति विनि। मेधावी कस्मात् मेधया तद्वान् भवति नि० ३ १९.]

मेधिर मेधाविन् (अग्ने=सत्पुरुष) ३ २१ ४ **मेधिरः**=सङ्गमक (विद्वज्जन) ३ १ २ मेधावी (विद्वान्) प्र०—अत्र 'मेधारथाभ्यामिरन्निरचौ' अ० ५ २ १०९ इति वार्त्तिकेन मत्वर्थीय इरन्प्रत्यय १ १०५ १४ सङ्गमयिता (विद्वज्जन) १ १४२ ११ सङ्गन्ता (इन्द्र=राजा) ६ ४२ ३ **मेधिराय**=धीमते (इन्द्राय=विद्वज्जनाय) १ ६१ ४ **मेधिराः**=ये मेधन्ते शास्त्राणि ज्ञात्वा दुष्टान् हिंसन्ति ते (मेधाविनो मनुष्या) प्र०—अत्र मिधृ मेधृ मेधाहिंसनयो इत्यस्माद् बाहुलकादौणादिक इरन्प्रत्यय १ ११ ७ [मेधाप्राति० मत्वर्थे 'मेधारथाभ्यामिरन्निरचौ वक्तव्यौ' अ० ५ २ १०९ वा०सूत्रेण इरन्। अथवा मेधृ मेधाहिंसनयो (भ्वा०) धातोर्बाहु० औणा० इरन्]

मेध्यः सङ्गमनीयः (सप्ति=शिल्पी विद्वज्जन) २९ ३ **मेध्याय**=पवित्राय (विदुषे जनाय) ५ १ १२ मेधेषु भवाय (पुरुषाय) १६ ३८ सर्वशुभलक्षणसङ्गताय पवित्राय भा०—सुशीलाय (कवये=मेधाविविद्यार्थिने) १५ २५ [मेधृ सगमे (भ्वा०) धातोर्ण्यत्। अथवा मेधप्राति० भवार्थे यत्। मेध्या वा आप श० १ १ १ १]

मेध्यातिथिम् मेध्या सङ्गमनीया पवित्रा अतिथयो

यजासि=यजे ३ २६ ८ याजये ११ ३५ यजेत् ६ ४ १ **यजे**=सङ्गच्छे १७ ७५ सङ्गच्छेय २ ६ ३ **यजेत**=सङ्गच्छेत ७ ६० ६ [यज देवपूजादिषु (भ्वा०) धातोर्लेट्। 'सिब् बहुल लेटी' ति सिप्। अन्यत्र लङ्, लुङ्, लट्, लोट्, लिङ् च। यजि यज नि० ६ १३]

यक्षदृशः ये यक्षान् पूजनीयान् पश्यन्ति ते (मर्त्त = बलिष्ठा राजजना) ७ ५६ १६ [यक्षोपपदे दृशिर् प्रेक्षणे (भ्वा०) धातो क्विन्]

यक्षभृत् यो यक्षान्पूज्यान् विदुषो बिभर्त्ति स. (विद्वान् जन) १ १९० ४ [यक्षोपपदे डुभृञ् धारणपोषणयोः (जु०) धातो. क्विप्]

यक्षम् दानम् ५.७० ४. पूजनीय सङ्गत वा (मन) प्र०—अत्रौणादिक. सन् प्रत्यय ३४ २. सङ्गन्तव्यम् (सद = वस्तु) ४ ३ १३ [यज देवपूजासंगतिकरणदानेषु (भ्वा०) धातोर्बाहु० औणा० सन्। यक्ष पूजायाम् (चु०) धातोर्वा घञ्]

यक्षुः सङ्गन्ता (सज्जन) ७ १८.६. [यज देवपूजासंगतिकरणदानेषु (भ्वा०) धातोर्बाहु० औणा० सन्-प्रत्ययान्तात् । यक्ष पूजायाम् (चुरा०) धातोर्वा बाहु० औणा० उ]

यक्ष्म राजरोग १२ ८७ **यक्ष्मस्य**=क्षयस्य, राजरोगस्य भा०—यक्ष्मादिरोगस्य १२ ८५ **यक्ष्माणाम्**=महारोगाणाम् १२ ९७ **यक्ष्मात्**=क्षयादिरोगात् १२.९८. [यक्ष पूजायाम् (चुरा०) धातो 'अर्तिस्तुसु०' उ० १ १४०. सूत्रेण मन्]

यक्ष्यमाणम् यज्ञ करिष्यमाणम् (पुत्रम्) १ १२५.४ **यक्ष्यमाणान्**=यज्ञ निर्वर्त्स्यत. (मानुषान्) १ ११३ ९. [यज देवपूजासंगतिकरणदानेषु (भ्वा०) धातो 'लृट सद्वा' इति शानच्]

यच्छ यच्छति फलादिभिर्ददाति प्र०—अत्र व्यत्ययो लडर्थे लोट् १.२२ १५. देहि ३५ २१ निगृहाण ७ ४ उपगृह्णीहि ६ २५ गृहाण १३ २४ प्रदेहि १.५८ ८. निगृह्णीहि ७ १६.८ निधेहि ६.२१. उपगृहाण ७ १६ ८ ददातु ३६ १३. **यच्छत**=दत्त ७.५६ १ ददत २.२७ ६ गृह्णीत ४ ५१ १० **यच्छतम्**=दद्यातम् ३४ २८. दत्त. प्र०—अत्र व्यत्ययो लडर्थे लोट् च १ २१.६. विस्तारयत. प्र०—अत्र पुरुषव्यत्ययो लडर्थे लोट् च १.१७ ८. यच्छतो यमनं कुरुत १.९२.१६. **यच्छताम्**=सत्यापयतम् २ ४१ २०. **यच्छति**=ददाति ५.८० २. **यच्छतु**=गृह्णातु ६ २४ ददातु भा०—दद्यात् २६ १०. अनुगृह्णातु ४ ५७ ७ निगृह्णातु ४.३२ १५ **यच्छध्वम्**=उद्यमिन कुरुत ७ ४३ २ **यच्छन्ताम्**=निगृह्णन्तु १.६ **यच्छन्ति**=प्रददति ७ ९०.८ निगृह्णन्ति ६ ७५ ६ **यच्छन्तु**=ददतु ७.३६ ७. **यच्छसे**=ददामि १ ८४ ६ **यच्छस्व**=विस्तारय विस्तारयति वा प्र०—अत्र पक्षे लडर्थे लोट् 'आङो यम हन.' अ० १ ३ २८ अनेनात्मनेपदम् आङ्पूर्वको यमधातुर्विस्तारार्थे ३ ३८ सर्वतो देहि आयच्छति विस्तारयति वा प्र०—अत्र पक्षे व्यत्यय मिद्धिश्च पूर्ववत् ३.३६ **यच्छामि**=गृह्णामि ३८ ६ [यमु उपरमे (भ्वा०) धातोर्लोट्। 'इषुगमि यमा छ' इति शिति छादेश । अन्यत्र लङ् अपि। 'यच्छध्वम्' इत्यादौ 'आङो यमहन' सूत्रेण 'वा छन्दसी' ति नियमेन निरुपपदपि आत्मनेपदम्। यच्छताम्=नियच्छताम् नि० ६.३८ यच्छतु=यच्छन्तु नि० १२ ४५]

यच्छतात् देहि १ ४८ १५ [यमु उपरमे (भ्वा०) धातोर्लोट्। तुह्योस्तातङ्०' इति तातङ्]

यच्छमानाः निग्रहीतार (मर्त्त =बलिष्ठा योद्धृजना) ७.५६ १३ [यमु उपरमे (भ्वा०) धातोस्ताच्छील्ये चानश्]

यजतम् सङ्गन्तव्यम् (निष्क=सुवर्णाभूषणम्) २.३३ १० सङ्गतम् (गर्त =बलम्) ५ ४६.५ पूजनीयम् (गृहपतिम्) ५ ८.१. **यजतस्य**=यजन्ति सङ्गच्छन्ते येन तस्य (क्षत्रस्य=राष्ट्रस्य) ५ ४४ १० सङ्गन्तु योग्यस्य (अ०—व्यवहारस्य) २६ २७ **यजतः**=सङ्गन्ता पूजनीय (विद्वान् जन) ५ ४१.६ सत्कर्त्ता (जन) ५ ४४.१२ यष्ट सङ्गन्तुमर्ह (अग्नि =ईश्वर) १ ५६.७ सङ्गतिप्रकाशादयो दाता (सविता=सूर्यो वायुर्वा) १ ३५ ४ **यजताय**=सङ्गमाय २ १६ ४. सत्सङ्गन्त्रे (इन्द्राय=विद्वत्सभासेनेशाय) २.२११ **यजताः**=ये सर्वा विद्या सङ्गच्छन्ते ते (विद्वासो जना) ६ ५० २ **यजतेभ्यः**=विद्वत्सेवकेभ्य २.५ ८. [यज देवपूजासगतिकरणदानेषु (भ्वा०) धातो 'भृमृदृशियजि०' उ० ३ ११० सूत्रेणातच्। यजते=यजिये नि० ८ ११. यजतस्य=यजियस्य नि० ८ ७]

यजतः सङ्गतान् (जनान्) २ १४ १० **यजते**=यो यज्ञं करोति तस्मै (जनाय) १ ३१ १५ **यजन्**=सङ्गच्छमान (त्वष्टा=विद्युत) २० ४४ **यजन्तौ**=सत्कुर्वन्तौ (स्त्रीपुरुषौ) २ ३ ७ [यज देवपूजासगतिकरणदानेषु (भ्वा०) धातो शतृ]

यजता सङ्गन्तव्या (सरस्वती=वाक्) ५ ४३ ११

यम् (जनम्) ३० १६ [मैनोपपदे अल भूषणपर्याप्तिवारणेषु (भ्वा०) धातोरण्]

मो निषेधार्थे ३ ४६ निवारणे ४ २३

मोकी रात्रि ३ ३८ ३ [मोकी रात्रिनाम निघ० १ ७]

मोदते हर्षति २ ५ ६ **मोदध्वम्**=सुखयत ११ ४७ [मुद हर्षे (भ्वा०) धातोर्लट्। अन्यत्र लोट्]

मोदमानः हर्षोत्साहयुक्त (पुरुष) ३ ४१ आनन्दित (पति) सं० वि० १४६, ३ ४१ **मोदमानौ**=अत्यन्त प्रसन्न हुए (स्त्री पुरुष) स० वि० १४०, अथर्व० १४ २ ४३ **मोदमानाः**=आनन्दिता सन्त (देवा =विद्वासो जना) २० ४६ [मुद हर्षे (भ्वा०) धातोस्ताच्छील्ये चानश्। अथवा लट शानच्]

मोदमानाः आनन्दयन्त्य (वध्व =स्त्रिय) ५ ४७ ६ [मुद हर्षे (भ्वा०)+शानच्+टाप्]

मोदः हर्ष १८ ५ **मोदाय**=आनन्दाय २२ ६ **मोदाः**=हर्षा उत्साहा २० ६ सम्पूर्ण हर्ष स० वि० १६७, ६ ११३ ११ [मुद हर्षे (भ्वा०) धातोर्घञ्]

मोषथ चोरयत ५ ५४ ६ [मुष स्तेये (क्र्या०) धातोर्लट्। विकरणव्यत्ययेन शप्]

मोषीः नाशय विनाशयेद्वा प्र०—अत्र लोडर्थे लिडर्थे च लुङभावोऽन्तर्गतो ण्यर्थश्च १ २४ ११ स्तेनये १ १०४ ८ मुष्णीयात् खण्डयेत् प्र०—अत्र लिडर्थे लुङ् ४ २३ [मुष स्तेये (क्र्या०) धातोर्लुङ्। अडभावश्छान्दस]

मोहः मूढाऽवस्था ४० ७ [मुह वैचित्ये (दिवा०) धातोर्घञ्]

मौक् मोचय प्र०=अत्र 'मुच्लृ मोक्षणे' इत्यस्माल्लोडर्थे लुङभावे च्ले सिजादेशे 'बहुल छन्दसि' इतीडभाव 'वदव्रज०' इति वृद्धि 'सयोगान्तस्य लोप' इति सिज्लुक् १ २५ त्यज, त्यजतु १ २६

मौञ्जा. मुञ्जानामिमे (मुञ्जपादपस्था जीवा) १ १६१ २ [मुञ्जप्राति० 'तस्येदम्' इत्यर्थेऽण्। मुञ्जो विमुच्यत इषीकया नि० ६ ८]

म्यक्ष गमय २ २८ ६. [म्यक्षति गतिकर्मा निघ० २ १४ ततो लोट्]

म्रद दण्डय ६ ५३ ३ [म्रद मर्दने (भ्वा०) धातोर्लोट्]

यकृत् हृदयाद् दक्षिणे स्थित मासपिण्डम् १६ ८५ हृदयस्थो रोहित पिण्ड ३६ ६ **यक्ना**=यकृना शरीराऽवयवेन ३६ ८ [यकृद् यथा कथा च कृत्यते नि० ४ ३ यजतीति यकृदिति विग्रहे यज, देवपूजासगतिकरणदानेषु (भ्वा०) धातोर्बाहु० औणा० ऋतिन् प्रत्यय। बहुलवचनाद् जकारस्य ककार। 'यक्ना' प्रयोगे यकृत्प्राति० शस्प्रभृतिषु 'पद्दन्नोमास्०' इति 'यकन्' आदेश। यकृत् सविता ऋ० १२ ९ १ १५]

यक्षत् यजेत् दद्यात् १७ ६२ सत्कुर्यात् १६ ६५. सङ्गच्छेत ७ १७ ४ सङ्गमयेत् २१ ३७ **यक्षतः**=सङ्गच्छत २ ३ ७ **यक्षताम्**=सयच्छेते १.१४२ ८ सङ्गमयताम् ११८८ ७ यजत सङ्गमयत प्र०—अत्र 'सिब् बहुल लेटि' इति बहुलसग्रहणात् लेटि प्रथमपुरुषस्य द्विवचने शप पूर्व सिप् १ १३ ८ **यक्षन्त**=रोपत हिंस्त १.१३२ ५. **यक्षि**=सङ्गच्छस्व ६ ४ १ यजसि प्र०—अत्र लडर्थे लुङ् १ ७५ ५ सत्करोषि सङ्गच्छसे ५.२६ १ ददासि २ ६ ८ यज सुख सङ्गमय ६ १६ ६ प्र०—अत्र 'बहुल छन्दसि' इति शपो लुक् १७ ८ यजामि प्र०—अत्राऽडभावो लुङ् आत्मनेपद उत्तमपुरुषैकवचने प्रयोगो लडर्थे लुङ् च १ १३ १ याजय प्र०—अत्र सामान्यकाले लुडभावश्च १ ३१ १७ सङ्गमयामि १ १४ १ **यक्ष्व**=सङ्गमय प्राप्नुहि वा ५ ४२ ११ सत्कुरु सङ्गच्छस्व १ ४५ १० **यज**= यज्ञ कुरु २८ १५ सङ्गमयाऽस्य सिद्धि सम्पादय १ १४ ११ यजति शिल्पविद्याया सङ्गमयति प्र०—अत्र व्यत्ययो लडर्थे लोट् च १ १५ १२ गमय १ १८८ ६ सङ्गच्छस्व १ २६ १ प्राप्नुहि २८ ७ सत्कुरु देहि उपदिश वा ३३ ३. एकीभव ६ ११ यजते २१ ४८ **यजत**=सङ्गच्छध्वम् ३८ ६ पूजयत ४ ११ **यजतम्**=सङ्गच्छेतम् ६ ५८ १ सङ्गच्छेथाम् ५ ६७ १ **यजतः**=सङ्गच्छेते २० ४१ **यजताम्**=गृह्णातु २१ ४७ सङ्गमयतु ६ १५.१३ **यजति**=यजेत् प्र०—लेट्, प्रयोगोऽयम् १ १३६ १० सङ्गच्छते १ १३३ ७ सत्करोति १ १५१ ७ पूजयति १ १२० ५ **यजध्वम्**=सत्कुरुत ६ २६ १ सङ्गच्छध्वम् ५ ७७ १ **यजन्ति**=पूजयन्ति सङ्गमयन्ति वा ४ ३७ ददति १६ ६ सङ्गच्छन्ते १० ३२ **यजन्ते**=पूजयन्ति सगतिं कुर्वते १ २८ **यजसि**=सङ्गच्छसे २९ २५ **यजस्व**=सङ्गच्छस्व १७ २१ सुखानि देहि १ ७ ५ सङ्गमय ६ ११ १ **यजाति**=यजेत् ३ ४ १०. सङ्गच्छेत १ ७७ २ **यजाते**=यजेत १ ८४ १८ **यजातै**=यजेत १ ८४ १८. **यजाम**=प्रेरयेम ५ ६० ६ दद्याम १ २७ १३ **यजामः**=पूजयाम ३ ३२ ७ **यजामहे**=प्राप्नुयाम १ ४० ४ सत्कुर्महे १ १५३ १ पूजयामहे १ १५.१० सङ्गच्छामहे १ २६ ६ प्र०—सत्कुर्वीमहि ३ ६०

१६ ३२ सर्वेभ्य सुखदातार (सर्वोपकारिजना) १७.६६ **यजमाने**=यज्ञानुष्ठातरि (जने) ६ ११. सङ्गत-धर्म्यव्यवहारकर्त्तरि (सज्जने) ३ २६ ८ [यज देवपूजासंगतिकरणदानेषु (भ्वा०) धातो 'पूङ्यजो शानन्' अ० ३ २.१२८. सूत्रेण शानन्। ताच्छील्ये वा चानश्। यद् यजते तद् यजमान श० ३ २ १ १७. यजमानो ह्येव स्वे यज्ञे प्रजापति श० १ ६ १ २० इन्द्रो वै यजमान श० २.१ २ ११ यजमानो मेधपति ऐ० २ ६ यजमानो वै मेधपति' कौ० १० ४ यजमानो हि यज्ञपति श० ४ २.२ ६०. यजमानो वै यज्ञपति श० ११ २ १२, १ २ २ ८ यजमानोऽग्नि. श० ६ ३ ३ २१ स उ ऽ एव यजमानस्तस्मादाग्नेयो भवति श० ३ ६ १ ६ आहवनीयभाग्यजमान. क० ३.६ मनो यजमानस्य (रूपम्) श० १२ ८ २ ४ यजमानो वै दाश्वान् श० २ ३ ४ ३८ यजमानो वै मामहान (यजु० १७ ५५) श० ६ २ ३ ६ यजमानो वै सुम्नयु. श० १४ १ २१. यजमानो वै हव्यदाति. श० १४ १ २४ यजमान पशु तै० २ १ ५ २ यजमानो वै यूप ऐ० २ ३ श० १३.२. ६ ६ एप वै यजमानो यद् यूप तै० १.३ ७ ३. यजमानो वाऽ एप निदानेन यद् यूप श० ३ ७ १ ११ यजमानदेवत्यो वै यूप तै० ३ ६ ५ २ यजमानो वै प्रस्तर ऐ० २ ३ श० १ ८ १ ४४, १ ८ ३ ११ तै० ३ ३ ६ ७ ता० ६ ७ १७. यजमानो प्रस्तर तै० ३ ३ ६ २ यजमानो यज्ञ श० १३ २ २ १ यजमानो वै यज्ञ ऐ० १ २८ आत्मा वै यज्ञस्य यजमान श० ६ ५ २ १६. सवत्सरो यजमान श० ११ २ ७ ३२ एप वै यजमानो यत्सोम तै० १ ३ ३ ५ यजमानो वाऽ अग्निष्ठा श० ३ ७ १ १६ यजमानो हि सूक्तम् ऐ० ६ ६ यजमान स्रुच तै० ३ ३ ६ ३. यजमानदेवत्या वै वपा तै० ३ ६ १० १ यजमानच्छन्दसामेवोष्णिक् कौ० १७ २ यजमानच्छन्दस पक्ति कौ० १७ २ यजमानच्छन्दस द्विपदा (ऋक्) कौ० १७ २ यजमानो वै द्वियजु (इष्टका) श० ७ ४ २ १६ या वै काश्च यज्ञ ऽऋत्विज ऽआशिषमाशासते यजमानस्यैव सा श० १ ६ १ २१ त्वङ्मासस्नाय्वस्थिमज्जा एतमेव तत्पश्चधा विहितमात्मान वरुणपाशान्मुञ्चति (यजमान) तै० १ ५ ६ ८ स ह सर्वतनूरेव यजमानोऽमुष्मिँल्लोके सम्भवति य एव विद्वान् निष्क्रीत्या यजते श० ११ १ ८ ६ यशो वै यजमान जै० १ २५६]

यजमानासः विद्यासङ्गतिविद (विद्वासो जना) ३ ३५ ५ सम्यग् ज्ञातार (जना) २ १८ ३ [यजमानमिति व्याख्यातम्। ततो जसोऽसुक्]

यजिष्ठम् सुखानामतिशयित दातारम् (ईश्वरम्) १.४४ ५. अतिशयेन सङ्गमयितारम् (अग्निं=विद्युदग्निम्) ४ ८.१ **यजिष्ठः**=अतिशयेन यष्टा सङ्गमयिता (विद्वज्जन) १.७७ १. पूजितुमर्ह. (आप्तो जन) ४ २.१. अतिशयेनानन्दशिल्पविद्ययां सङ्गतिहेतु (अग्नि) ३ १५.१.८. अतिशयेनेष्टा (अध्यापक उपदेशको वा जन) ४ १ ४ **यजिष्ठेन**=अतिशयेन यष्ट्रा सङ्गन्त्रा तेन (मनसा=विज्ञानेन) १८.७५ [यज देवपूजासंगतिकरणदानेषु (भ्वा०) धातोस्तृजन्तादतिशायन इष्ठन्। 'तुरिष्ठेमेयस्सु' इति तृचो लोप]

यजीयान् अतिशयेन यष्टा सङ्गन्ता (विद्वज्जन) ३ १७.५ अतिशयेन यज्ञकर्त्ता (यजमान.) ५ १ ५ [यजदेवपूजासंगतिकरणदानेषु (भ्वा०) धातोस्तृजन्तादतिशायन ईयसुन्। 'तुरिष्ठेमेयस्सु' इति तृचो लोप.। यजीयान् यष्टृतर: नि० ८ ८]

यजुर्भिः यजन्ति सङ्गच्छन्ते यैर्यजुर्वेदविद्यावयवैर्मन्त्रै १६ २८ यजुर्वेदस्थमन्त्रोक्तै कर्मभि ४.१. **यजुर्भ्यः**= याजकेभ्यो यजुर्वेदविभागेभ्यो वा ३८ ११ **यजुषा**= सत्सङ्गेन क्रियया वा ५ ६२.५. **यजुः**=यजति येन स यजुर्वेद. १८ २६ **यजूंषि**=यजुर्मन्त्रा १८ ६७ यजुश्श्रुतय १२.४. [यज देवपूजासंगतिकरणदानेषु (भ्वा०) धातो 'अर्तिपृवपियजि०' उ० २ ११७ सूत्रेण उसि। यजुर्यजते नि० ७.१२ यजो ह वै नामैतद् यद् यजुरिति श० ४ ६ ७ १३ एप (वायु) हि यन्नेवेद सर्वं जनयत्येत यन्तमिदमनुप्रजायते तस्माद् वायुरेव यजु। अयमेवाकाशो जू। यद् इदमन्तरिक्षमेत ह्याकाशमनुजवते तदेतद् यजुर्वायुश्चान्तरिक्ष च यच्च जूश्च तस्माद् यजु श० १० ३ ५ २ यजुरित्येप (पुरुष) हीद सर्वं युनक्ति श० १० ५ २ २० प्राणो वै यजु प्राणे हीमानि सर्वाणि भूतानि युज्यन्ते श० १४.८ १४.२. प्राण एव यजु श० १० ३ ५ ४. अष्टौ (बृहतीसहस्राणि ८००० × ३६= २८८००० अक्षराणि) यजुषाम् श० १० ४ २ २४ व्यृद्धमु वा ऽएतद् यज्ञस्य। यदयजुष्केण क्रियते श० १३ १ २ १ (प्रजापति) यजुर्भ्योऽधिविष्णुम् (असृजत) तै० २ ३ २ ४ यजूंषि विष्णु (स्वभागरूपेणाभजत) श० ४ ६ ७ ३ आज्याहुतयो ह वा ऽएता देवानाम्। यद् यजूंषि श० ११ ५ ६ ५ अन्नमेव यजु श० १० ३ ५ ६ (सूर्य) यजुर्वेदे तिष्ठति मध्ये अह्न तै० ३ १२ ६ १ (आदित्यस्थ) पुरुषो यजूंषि श० १० ५ १ ५ आदित्यानीमानि शुक्लानि यजूंषि वाजसनेयेन याज्ञवल्क्येनाख्यायन्ते श० १४ ६ ४ ३३ आदित्यानीमानि यजूंषीत्याहु श० ४ ४ ५ १६ अथ य एष एतस्मिन् मण्डले पुरुष सोऽग्निस्तानि यजूंषि स यजुषा

यजते=सङ्गन्तव्ये (द्यावापृथिव्यौ) ४ ५६ २ [यज देवपूजादिषु (भ्वा०) धातोरौणा० अतच् । तत स्त्रिया टाप्]

यजता दातारावध्यापकोपदेशकौ ४ १५ ८. [यज देवपूजादिषु (भ्वा०) धातोरौणा० अतच् । ततो द्विवचनस्याकारादेश]

यजतेभिः सङ्गतैरश्वादिभि ५ १ ११ [यजतमिति व्याख्यातम् । ततो भिस ऐस् न भवति छान्दसत्वात्]

यजत्र पूजनीयतम (इन्द्र=शत्रुविदारक राजन्) ६ २५ ८ सङ्गन्त (अग्ने=विद्युदाख्य तेज) ६ २२ २ सङ्गच्छमान (वैद्य जन) १ १८९ ३ पूजनीय. (इन्द्र=ऐश्वर्यवज्जन) ३ ३५ १० सङ्गन्तु योग्य (अग्ने=विद्वज्जन) १२ ४८ दात (परमेश्वर विद्वन्वा) १ ७६ ४ **यजत्रम्**=सङ्गन्तव्यम् (सेनापतिम्) ११ ७६ **यजत्रः**=सङ्गमकर्त्ता (पुरुष) १ १२१ १ सङ्गन्तव्यो ध्येय (ईश्वर) ७ ५२ ३ सङ्गन्ता (मर्य=मनुष्य) १ १७३ २ **यजत्रान्**=यष्टु सङ्गमयितुमर्हान् (देवान्=विद्वज्जनान्) प्र०—अत्र 'अमिनक्षियजिवधि०' उ० ३ १०५ अनेन यज धातोरत्रन् प्रत्यय १ १४ ७ **यजत्राः**=सङ्गन्तार पूजनीया (विद्वासो जना) ३ ३ ५३ सङ्गमयितु योग्या (मनुष्या) १ १४ ८ विदुषा सत्कर्त्तार सङ्गतिकर्त्तार भा०—पूज्या (देवा=विद्वासो जना) ३ ३ ५१ सङ्गता (अश्वा=किरणा) ३ ६ ८ पूजका, उपदेशका, सङ्गतिकर्त्तारो दातारश्च (धीरा=मेधाविजना) १ ६५ १ सङ्गतिकरणशीला (प्राज्ञा जना) २ २७ १६ यजन्ति सङ्गच्छन्ते ये ते (देवा=विद्वज्जना) १ ८९ ८ सङ्गमयितार (विद्वासो जना) ६ ५२ १७ सङ्गन्तव्या (विद्वासो जना) ६ ५२ १३ सुसङ्गते कर्त्तार (विद्वज्जना) २ २९ ६ सद्व्यवहार सङ्गच्छमाना (सज्जना) ६ ५१.९ **यजत्रैः**=यज्ञसाधकैविद्वद्भि सह ६ १० [यज देवपूजासगतिकरणदानेषु (भ्वा०) धातो 'अमिनक्षियजिवधिपतिभ्योऽत्रन्' उ० ३ १०५ सूत्रेणात्रन् । यजत्रमिति यज्ञियमित्येतत् श० ६ ६ ३ ९]

यजत्रा सङ्गमयितारौ (स्त्रीपुरुषौ) १ १८० ५ सङ्गम्य सत्कर्त्तव्यौ (इन्द्राग्नी=स्वामिशिल्पिनौ) १ १०८ ७ ['यजत्र' इति व्याख्यातम् । तत 'सुपा सुलुक्०' इति द्विवचनस्याकारादेश]

यजत्रे सङ्गते (द्यावापृथिव्यौ) ३ ३१ १७ सङ्गन्तव्ये (सूर्यभूमी) ७ ५३ १ [यज देवपूजादिषु (भ्वा०) धातोरौणा० अत्रन् । तत स्त्रिया टाप्]

यजथाय यजनाय सङ्गमनाय ३.५.९ समागमाय ३ ४ १ सत्करणाय २.२८ १. विद्यासङ्गमनाय ३ १९ ५ [यज देवपूजादिषु (भ्वा०) धातोर्बाहु० औणा० अथ प्रत्यय]

यजध्यै यष्टु सङ्गन्तुम् ४ २१ ५. [यज देवपूजादिषु (भ्वा०) धातोस्तुमर्थेऽध्यैन् । यजध्यै यजनाय नि० ८ १२]

यजमानम् विद्यासुशिक्षाभ्या सुखदातारम् (भा०—अध्यापकोपदेशकम्) १७ ८६ विद्यादातारम् (विद्वास जनम्) १ १५६ ५ सत्याऽनुष्ठानस्य यज्ञस्य कर्त्तारम् (जनम्) २० ७३ सर्वेभ्य. सुख ददमानम् (सज्जनम्) १९ ३३ अभयस्य दातारम् (आर्यम्=उत्तमगुणकर्मस्वभावम्) १ १३० ८ सुखप्रदम् (पुरुषम्) ७ १८ यज्ञानुष्ठातारम् (सभाध्यक्ष राजानम्) ६ ६ सङ्गन्तारम् (विद्वासम्) ५.४५ ५ **यजमानस्य**=यज्ञाऽनुष्ठातु (पुरुषस्य) २ ३ य परमेश्वर सर्वोपकार धर्म्म च यजति तस्य विदुष (अ०—जीवस्य) १ १ शिल्पविद्या चिकीर्षो, सर्वमित्रस्य वा (पुरुषस्य) २ ३ सुखप्रदातु (धनाढ्यजनस्य) २ ३० ६ यज्ञनिष्पादकस्य (सज्जनस्य) १ ५१ ८ सर्वेषा सुखाय यज्ञकर्त्तु (सत्पुरुषस्य) ७ ५७ २ यो यजने देवान् विदुष सत्करोति, सङ्गच्छते, सुखानि ददाति वा तस्य (राज्ञ) २२ २२ यष्टु सङ्गन्तु विदुष पूजितु च शील यस्य तस्य (पुरुषस्य) १२ ४४ सङ्गम कर्त्तु योग्यस्य पूज्यस्य मनुष्यस्य ४ ३४ शिल्पक्रियाविद (विद्वज्जनस्य) ४ १० धार्मिकस्य जीवस्य ४ ३३ सत्पुरुष का स० प्र० २३८, १० ४९ १ **यजमानः**=त्रिविधस्य यज्ञस्याऽनुष्ठाता (सज्जन) १ २४ ११ यो यजते स (विद्वज्जन) १८ ४८ विद्वत्सेवासङ्गते कर्त्ता (मनुष्य) ३ ३ ३ यज्ञकर्त्ता (सज्जन) ६ ५१ १२ सङ्गन्ता (मनुष्य) ३ ११ ५ योगप्रद आचार्य १७ ७३ **यजमानात्**=धर्म्येण सङ्गतात् (मर्त्तात्=मनुष्यात्) ४ १० ७ **यजमानाय**=सङ्गतिकरणविद्याविदे (सत्पुरुषाय) ६ १५ १६ उपदेश्याय पालकाय वा (सज्जनाय) १ ८३ ३ सङ्गच्छमानाय (जनाय) २० ७१ परोपकारार्थं यज्ञ कुर्वते (सत्पुरुषाय) ७ १६ ६ यजति विदुष पूजयति सद्गुणान् सङ्गच्छते ददाति च तस्मै (पुरुषाय) ५ १२ परोपकारार्थयज्ञानुष्ठात्रे (प्रजाजनाय) ६ ३३ सत्योपदेशकाय विद्यासङ्गमयित्र आचार्याय साङ्गोपाङ्गवेदाऽध्यापकाय, क्रियाकौशलसहिताना सर्वासा विद्याना प्रवक्त्रे, धर्मेण सङ्गन्तु शीलाय वा (परमविदुषे) ११ ५८ पुरुषार्थिने (विद्वज्जनाय) २८ १५ सङ्गत्यै प्रवर्त्तमानाय जीवाय २८ १६ **यजमानाः**=ये यजन्ति ते विद्वास

विज्ञानस्य ७ २३ इज्यतेऽसौ यज्ञस्तस्य महिम्न कर्म्मणो वा । विदुषां सत्कारस्य सङ्गतस्य सत्सङ्गत्योत्पन्नस्य विद्याऽऽदिदानस्य शिल्पक्रियोत्पाद्यस्य वा (व्यवहारस्य) १ १ १ ज्ञानक्रियाभ्यामनुष्ठेयस्य (भा०—क्रियाकाण्डस्य) २ १९ **यज्ञः**=इज्यते यस्मिन् स (व्यवहार) १ २३. सङ्गन्ता (सेनाध्यक्ष) १७ ४० अभिधेय (अग्निसङ्गको व्यवहार) ४ ११ स्त्रीपुरुषाभ्यां सङ्गमनीय (गृहाश्रम) ८ ४० पूजनीय (अ०—ईश्वर) १७ ६२ सङ्गत ससार १ १८ ७ राजपालनीयो व्यवहार ७ ३४ १७ सत्सङ्गत्यादिस्वरूप ६ ३८ ४ अनुष्ठातुमर्हो व्यवहार ४ ५८ ९ अध्यापनोपदेशाख्य (व्यवहारः) ४ ३४ ३. सङ्गमनीय. शिल्प ६.६८ १. रेखागणिते व्यासाख्यो मध्यरेखाख्य ऋ० भू० १४७, २३ ६२ यष्टुं सङ्गन्तुमर्हं सूर्य १ १६४.३५ व्यापक. परमेश्वर २२ ३३ सर्वैः पूजनीयो जगदीश्वर २३ ६२. सत्य सङ्गतो व्यवहार ५ २६ ८ अग्निष्टोमादिर्विज्ञानमयो व्यवहारो वा ३४ ४ सम्पूजनीय प्रजारक्षणनिमित्तो विद्याप्रचारार्थो गृहाश्रम ८ २२ य इज्यते सङ्गम्यते स (भा०—अग्निहोत्रादि) १८ ४२ यजनीय (अग्नि) १ १८८ ? यजधातोरर्थ (देवपूजा-सङ्गतिकरण-दानाख्य) ९ २१ राजधर्म्मशिल्पकार्यसङ्गत्योन्नत (व्यवहार) १ १७३ ४ सङ्गन्तव्यो धर्म्म १८ २९ अच्छे प्रकार करने योग्य यतिधर्म स० वि० २०६, अथर्व० ९ ६ ११. योगरूप (व्यवहार) स० प्र० २४७, ३४४ जो जो अच्छा काम है आर्याभि० २ १३, १८ २९ सद्विद्याव्यवहारवर्धको व्यवहार ६ ४० ४. सङ्गन्तुमर्हो ब्रह्मचर्याख्य (व्यवहार) १ १५६ १ **यज्ञात्**=सच्चिदानन्दादिलक्षणात् पूर्णात् पुरुषात् (परमेश्वरात्) ऋ० भू० ९, ३१ ६ अध्ययनाऽध्यापनाद्धोमलक्षणाद्वा ५ ११ पूजनीयात् पुरुषात् (जगदीश्वरात्) ३१ ६ पूजनीयतमात् (पुरुषात्) ३१ ७ **यज्ञान्**=विद्यादिप्रापकान् व्यवहारान् ३ ९ ६ **यज्ञानाम्**=अग्निहोत्राद्यश्वमेधान्तानां योगजातशिल्पोपासनाज्ञानानाम् १ ४८ ३ सङ्गतानां व्यवहाराणाम् ३ ३ ३ सङ्गन्तव्यानां पदार्थानाम् २९ ६ **यज्ञाय**=यो यजति सत्येन सङ्गच्छते तस्मै (विद्वज्जनाय) ६ ४० १ ज्ञानक्रियामयाय यागाय १ ९३ ६ विद्वत्सत्काराद्यनुष्ठानाय ३ ३९ ८ सङ्गतिविज्ञानाय ३ ३० १५ **यज्ञाः**=सत्या व्यवहारा ४ ३७ २ अग्निहोत्राद्याः शिल्पान्ता (व्यवहारा) ७ ३५ ७ **यज्ञे**=सङ्गन्तव्ये कर्त्तव्ये १ १२ ७ व्यापके परमेश्वरे सर्वोपकारकेऽश्वमेधादौ शिल्पविद्याक्रियाकुशलत्वे च ऋ० भू० १०८, अथर्व० १२ ५ ३ विद्यादानाख्ये (व्यवहारे) १.१४२.५. वर्षादिजलव्यवहारे ४ ५८.२ सम्यग् ज्ञातव्ये (गृहाश्रमे) ५ ७५ ८ अग्निहोत्रादौ धर्म्ये सङ्गतव्यवहारे योगाभ्यासे वा ३४ २ विद्वत्सेवा-सङ्ग-विद्यादानादिक्रियाख्ये २० १०. शिल्पसम्पाद्ये व्यवहारे ३.३५ ६. विद्वानों के सत्कार शिल्पविद्या और शुभगुणों के दान में स० वि० १४३, अथर्व० १२ ५ ३ यष्टव्ये (अ०—ससारे) १ १३.३ **यज्ञेन**=सत्यभाषणादिव्यवहारेण १८ ६ सुनियमानुष्ठानाख्येन भा०—सुनियमपालनेन १८ ७ सुखसिद्धिकरेणेश्वरेण १८ ८ धर्मपालनेन १८ ४. सत्कर्त्तव्येन परमात्मना १८ ३. पूजनीयेन परमेश्वरेण जगदुपकारकेण व्यवहारेण वा १८ १ सत्यधर्मोन्नतिकरेणोपदेशाख्येन १८.५ होमादिना ६ ५२ १ सङ्गत्याख्येन २.२१ ५. ब्रह्मचर्याद्याचरणेन धर्मेणेश्वराज्ञापालनेन धर्मेण विद्याभ्यासेन शिष्टाचरितेन प्रत्यक्षविषयेण शब्दप्रमाणाभ्यासेन वा ९ २१ विद्वत्सत्काराख्येन ६ ५ ५ योगाभ्यासादिना २२ ३३ सङ्गमनेन १२ १०३ स्तुतिप्रार्थनोपासनरीत्या पूजनेन ऋ० भू० १२९ परमेश्वरस्य विदुषां च सत्करणेन सङ्गतेन कर्मणा विद्यादिदानेन सह २२ ३३ अग्न्यादिदिव्यपदार्थसमूहेन १.१६४ ५०. विद्यैश्वर्योन्नतिकरणेन १८ १६. सङ्गतिकरणेन योगेन दानेन वियोगेन वा अ०—योगतो विपरीतेन दानरूपेण मार्गेण उक्त पुनःपुनर्योगेन गुणनेन मार्गेण भा०—यजधातोर्हि य सङ्गतिकरणार्थस्तेन सङ्गतिकरणं कस्याश्चित् सङ्ख्याया कयाचित् सह योगकरणम् यश्च दानार्थस्तेनैव सम्भाव्य कस्याश्चिद् दानं व्ययीकरणमिदमेवम् । एवं गुणन-भाग-वर्ग-वर्गमूल-घन-घनमूल-भागजाति-प्रभागजातिप्रभृतयो ये गणितभेदा सन्ति, ते योगवियोगाभ्यामेवोत्पन्नत्वाद्यज्ञस्तेन १८ २४ सङ्गतिकरणयोग्येन परमात्मना १८ २२ सर्वपदार्थवर्धकेन कर्म्मणा १८ ९ शमदमादियुक्तेन योगाभ्यासेन १८.११ वायुविद्याविधानेन १८ २३ कालचक्रज्ञानधर्माद्यनुष्ठानेन १८ २३. पशुपालनविधिना १८ २६ सर्वान्नप्रदेन परमात्मना १८ १२ पुरुषार्थानुष्ठानेन १८.१५ पृथिवी-कालविज्ञापकेन (व्यवहारेण) १८ १८ प्रशस्तधनप्रापकेणेश्वरेण १८ १० **यज्ञेभिः**=कर्मोपासनाज्ञाननिष्पादकैः कर्म्मभि प्र०—अत्र 'बहुल छन्दसि' इति भिस ऐस् न १ २४ १४ विद्वत्सेवासत्यभाषणादिभि. ६ ३ २ **यज्ञेषु**=सत्कारेषूपासनादिष्वग्निहोत्रादिषु शिल्पेषु वा ४ १६ विद्याधर्मप्रचाराख्येषु व्यवहारेषु ६ १६ ३ क्रियाकाण्डादिविज्ञानान्तरेषु सङ्गमनीयेषु १ १४ ११ सन्ध्योपासनादिषु सत्कर्मसु ६ १४ २ **यज्ञैः**=विद्वत्सङ्गादिभि ७.२१ १ विद्याविज्ञानप्रचारैः

लोक श० १०.५.२.१ अग्निर्यजुषाम् (समुद्र) श० ९.५.२.१२ अथ यन्मनो यजुष्टत् जै० उ० १.२५.६ मनो यजुर्वेद श० १४.४.३.१२ मन एव यजूंषि श० ४.६.७.५ मनो वै यजु श० ७.३.१.४० (प्रजापति) भुव इत्येव यजुर्वेदस्य रसमादत्त तदिदमन्तरिक्षमभवत्। तस्य यो रस प्राणेदत् स वायुरभवद् रसस्य रस जै० उ० १.१.४ भुवरिति यजुर्भ्योऽक्षरत् सोऽन्तरिक्षलोकोऽभवत् ष० १.५ यजुषा वायुर्देवत तदेव ज्योतिस्त्रैष्टुभ छन्दोऽन्तरिक्ष स्थानम् गो० पू० १.२९. वायोर्यजुर्वेद (अजायत) श० ११.५.८.३ अन्तरिक्ष वै यजुषामायतनम् गो० पू० २.२४. अन्तरिक्षलोको यजुर्वेद ष० १.५ अन्तरिक्ष यजुषा (जयति) श० ४.६.७.२ यजुर्वेद क्षत्रियस्याहुर्योनिम् तै० ३.१२.९.२. दक्षिणाम् (दिशम्) आहुर्यजुषामपाराम् तै० ३.१२.९.१ सर्वा गतिर्याजुषी हैव शश्वत् तै० ३.१२.९.१ यजुर्वेदो मह श० १२.३.४.९ यजुर्वेद एव मह गो० पू० ५.१५ श्रद्धा वै तद् यद् यजु श० १३.८.२.७ तस्माद् यजूंषि निरुक्तानि सन्त्यनिरुक्तानि श० ४.६.७.१७ मज्जा यजु श० ८.१.४.५ (दक्षिणनेत्रस्य) यदेव ताम्रमिव बभ्रुरिव तद् यजुषाम् (रूपम्) जै० उ० ४.२४.१२ अथ यत्कृष्ण तदपा रूपमन्नस्य मनसो यजुष जै० उ० १.२५.९ न (प्रजापति) यजूंष्येव हिङ्कारमकरोत् जै० उ० १.१.३.३ तस्य (यमस्य) पितरो विश ··· 'यजूंषि वेद ······ यजुषा-मनुवाक व्याचक्षाणइवानुद्रवेत् श० १३.४.३.६ वज्री वै यजु ष्याशी श० १.२.१.७, ३.५.२.११, ३.६.१.१७]

यजुषे यजुषे यजन्ति येन तस्मै तस्मै प्रति १.३०. [यजुषे पदस्य वीप्साया द्वित्वम्। यजुष् इति व्याख्यातम्]

यज्ञ य सङ्गम्यते तत्सम्बुद्धौ (भ०—सम्पादक विद्वन्) ८.६२ यो यजति सङ्गच्छते स यज्ञो गृहस्थस्तत्सम्बुद्धौ प्र०—अत्रौणादिको न प्रत्यय ८.२२ इज्यते सर्वैर्जनै स यज्ञ ईश्वरस्तत्सम्बुद्धौ क्रियासाध्यो वा प्र०—अत्राऽन्त्यपक्षे 'सुपा सुलुक्०' इति सोर्लुक् २.१९ **यज्ञम्**=यजति सङ्गच्छते येन तम् (विद्यासुशिक्षाव्यवहारम्) १.१७०.४ पूजनीयं सर्वरक्षकमग्निवत्तपनम् (ईश्वरम्) ३.१.१६ यजनीयम् (भा०—विद्याज्ञानबलवर्धक कर्म) १.१३.२ क्रियाकौशलम् १.१०.४ सङ्गन्तव्यम् (भा०—आनन्दम्) १७.६८ प्रथममन्त्रोक्तम्—इज्यतेऽसौ यज्ञस्त महिमान कर्म वा १.१.४ विद्वत्सत्कार-सत्सङ्ग-शुभगुण-दानाख्यम् ३.२.११ सम्पूजनीयम् (पुरुषम्=ईश्वरम्) ३१.९ शिल्पविद्यामहिमान कर्म च १.३.१० धर्म्यं व्यवहारम् ७.११.५ राजधर्मानुष्ठानाख्यम् ४.२०.३ सर्वपूज्य परमेश्वरम् ऋ० भू० १२४, ३१.९ अग्निहोत्राद्यश्वमेधान्त शिल्पविद्यामय च ऋ० भू० १२७ ३.१.१४ सङ्गतिकरणम् ५.४३.१७ सुखदान-साधक व्यवहारम् ३४.६ अन्नाद्युत्तमपदार्थदानम् ५.४.५ गृहाश्रमव्यवहारम् ५.५.५ सुखाना सङ्गमक व्यवहारम् ११.७ धर्मार्थकाममोक्षव्यवहारम् १.१६४.५० क्रिया-काण्डजन्य समारम् २.२१ यानाख्य सङ्ग्रामाख्य हवनाख्य वा ३३.३३ मानस ज्ञानमयन् ३१.१५ पूर्व्यं द्वितीय-मन्त्रोक्त त्रिविधम्—विद्याज्ञान-धर्मानुष्ठानवृद्धाना देवाना विद्वुषामैहिकपारमार्थिक-सुखसम्पादनाय सत्करण सम्यक् पदार्थ-गुणसमेल-विरोधज्ञानसङ्गत्या शिल्पविद्याप्रत्यक्षीकरण नित्य विद्वत्समागमानुष्ठान शुभविद्या-सुखधर्मादिगुणाना नित्य दानकरणमिति २.६ सुखाय यष्टुमर्हम् (व्यवहारम्) २.१२ सङ्गन्तुमर्हं व्यवहारम् १९.८० सङ्गन्तव्य सत्कर्त्तव्य वा गृहाश्रमम् १७.५४ कर्मोपासनाज्ञानाख्यम् २.५८ सुशिक्षोपदेशाख्यम् १.२२.३ रागद्वेषरहित न्यायदयामयम् ३.१.२२ विद्यावृद्धिकर व्यवहारम् ४.३४.६ सत्सङ्गाख्य व्यवहारम् ३.१.२ अध्ययनाध्यापनादिकम् ४.३३.३ विद्याप्रज्ञावर्द्धकम् (सत्कर्म्म) ४.३४.१ सर्वविद्यामयम् (ऋत=सत्यमुदक वा) १.१०५.४. सत्यजनक व्यवहारम् ५.८७.९ परोपकाराख्यम् ६.१०.६ प्रजापालनाख्यम् ४.२०.२ विद्याविनयाभ्या सङ्गत पालनाख्यम् ३.४०.३ विज्ञानसङ्गतिमयम् ५.८७.३ सङ्गन्तव्य धर्म्मम् १२.६० योगम् ७.११ विद्याप्रचाराख्य व्यवहारम् ५.५.२ विद्याधर्म-सङ्गमयितारम् (व्यवहारम्) ११.८ राजप्रजासम्बद्ध व्यवहारम् '७.१९ विज्ञानशिल्पसङ्गमनीयम् (व्यवहारम्) ५.१७ सर्वशास्त्रबोध और पूजनीयतम (ईश्वर) को आर्याभि० १८ ऋ० १.१६.१० धनादिसङ्गमकम् (सद्व्यवहारम्) १.१८८.७ प्राप्तव्यमानन्दम् २९.८ सर्व-सुखावह गृहाश्रमम् ८.२१ सङ्गत योग्य बोधम् २९.८ अनेकविधव्यवहारम् २९.३६ विद्वत्सत्कारादिमय व्यवहारम् ३.२५.४ सर्वं सङ्गत व्यवहारम् ६.६२.२ पुरुषार्थसाध्यम् (व्यवहारम्) १.२०.२ सर्वेषा सुखजनक राजधर्मम् ९.१

यज्ञस्य=शिल्पविद्यासिद्धस्य (व्यवहारस्य) ४.९ सङ्गन्तु-मर्हस्य जगत २.५.२ सत्यव्यवहारस्य २०.३७ सङ्गम-नीयस्य विद्याबोधस्य १.६६.६ अग्निहोत्राद्यश्वमेधान्तस्य क्रियासमूहजन्यस्य सर्वजगदुपकारकस्य (व्यवहारस्य) यद्वा परमेश्वरस्य सामर्थ्यात् प्रकृत्यादिपृथिव्यन्तकार्यकारणसङ्ग-त्योत्पन्नस्य जगतोऽथवा सत्सङ्गतिकरणादुत्पन्नस्य विद्यादि-विज्ञानयोगादे वे० भा० न० सयोगादुत्पन्नस्य जगत २३.५७. यजनकर्म्मणे १९.३१ योगविद्याप्रापकस्य

४ १७ ते वै पश्चान्यद् भूत्वा पश्चान्यद् भूत्वा कल्पेतामाहावश्च हिंकारश्च प्रस्तावश्च प्रथमा च ऋगुद्गीथश्च मध्यमा च प्रतिहारश्चोत्तमा च निधनञ्च वषट्कारश्च ते यत् पश्चान्यद् भूत्वा पश्चान्यद् भूत्वा कल्पेता तस्मादाहु' पाङ्क्तो यज्ञ पाङ्क्ता पशव इति ऐ० ३ २३ गो० उ० ३ २० पाङ्क्तो यज्ञ श० १ ५ २ २६, ३ १ ४ २० गो० पू० ४ २४ गो० उ० २ ३ पाङ्क्तो वै यज्ञ ऐ० १ ५ कौ० १ ३ ४ तै० १ ३ ३ १ श० १ १ २ १ ६ पाङ्क्तो यज्ञ ता० ६ ७ १२ ऐ० ३ २३ यज्ञो वा आश्रावणम् श० १ ५ १ १ एप वै यज्ञो यदग्नि श० २ १ ४ १६ अग्निर्यज्ञ श० ३ २ २ ७ अग्निरु वै यज्ञ श० ५ २ ३ ६ अग्निर्वै यज्ञ श० ३ ४ ३ १६ ता० ११ ५ २ अग्निर्वै योनिर्यज्ञस्य श० १ ५ २ ११ शिर एतद् यज्ञस्य यदग्नि श० ९ २ ३ ३१ अग्निर्वै यज्ञमुखम् तै० १ ६ १ ८ एप हि यज्ञस्य सुक्रतुर् (ऋ० १ १२ १) यदग्नि श० १ ४ १ ३५ वाग्घि यज्ञ श० १ ५ २ ७ वाग्वै यज्ञ ऐ० ५ २४ श० १ १ २ २ वागु वै यज्ञ श० १ १ ४ ११ वाग्यज्ञस्य (रूपम्) श०. १२ ८ २ ४ अय वै यज्ञो योऽय (वायु) पवते ऐ० ५ ३ ३ श० १ ९ २ २८ अय वाव यज्ञो योऽय (वायु) पवते जै० उ० ३ १ ६ १ अयमु वै य (वायु) पवते स यज्ञ गो० पू० ३ २ वान्तो वै यज्ञ श० ३ १ ३ २६ सवत्सरो यज्ञ श० ११ २ ७ १ सवत्सरो यज्ञ प्रजापति श० २ २ २ ४ सवत्सरसमितो वै यज्ञ पञ्च वा ऽऋतव सवत्सरस्य त पञ्चभिराप्नोति तस्मात् पञ्च जुहोति श० ३ १ ४ ५ यज्ञ एव सविता गो० पू० १ ३३ जै० उ० ४ २७ ७ स य स यज्ञो ऽसौ स आदित्य श० १४ १ १ ६ यज्ञो वै यजमानभाग ऐ० ७ २६ यजमानो वै यज्ञ ऐ० १ २८ यजमानो यज्ञ श० १३ २ २ १ आत्मा वै यज्ञ श० ६ २ १ ७ पुरुपो वै यज्ञ कौ० १७ ७ गो० उ० ५.४ श० १ ३ २ १ तै० ३ ८ २३ १ जै० उ० ४ २ १ गो० पू० ४ २४ गो० उ० ६ १२ स (पुरुप) यज्ञ गो० पू० १ ३९ पुरुषो सम्मितो यज्ञ श० ३ १ ४ २३ पशवो यज्ञ श० ३ २ ३ ११ कतमो यज्ञ इति पशव इति श० ११ ६ ३ ९ शतोन्मानो वै यज्ञ श० १२ ७ २ १३ यज्ञो वै भुवनज्येष्ठ कौ० २५ ११ यज्ञो वै भुवनस्य नाभि तै० ३ ९ ५ ५ यज्ञो वै भुवनम् तै० ३ ३ ७ ५ यज्ञो वा अन्न श० १ १.२ ७ आपो वै यज्ञ ऐ० २.२० श० ३ ८ ५ १ यज्ञो वा ऽआप कौ० १२ १ श० १ १ १ १२ तै० ३ २ ४ १ ऋतेरक्षा वै यज्ञ ऐ० २ ७ परोक्ष यज्ञ श० ३ १ ३ २५ अयज्ञो वा एप योऽपत्नीक त० २ २ २ ६ पूर्वार्धो वै यज्ञस्याध्वर्युर्जघनार्घ पत्नी श० १ ९ २.३ अथ श्रीणि वै यज्ञस्येन्द्रियाणि। अध्वर्युर्होता ब्रह्मा तै० १ ८ ६ ६. ज्येष्ठयज्ञो वा एप यद् द्वादशाह ऐ० ४ २५ यज्ञ वा ऽअनुप्रजा श० १.८ ३ २७ यज्ञाद् वै प्रजा प्रजायन्ते श० ४.४.२ ९ रेतो वा ऽअत्र यज्ञ श० ७.३ २ ९ (यज्ञस्य) प्राणो धूम श० ६.५ ३ ८ एतच्छिरो यज्ञस्य यद् विपुवान् कौ० २६ १ शिरो वै यज्ञस्यातिथ्यम् श० ३ २ ३ २० शिरो वा एतद् यज्ञस्य यदातिथ्यम् ऐ० १ १७.२५. कौ० ८ १. एतद्वै यज्ञस्य शिरो यन्मन्त्रवान् ब्रह्मौदन. गो० पू० २ २६ शिरो वै यज्ञस्योत्तर आघार श० १४ ५ ५ उत्तरत उपचारो हि यज्ञ श० ८ ६ १ १६ चक्षुपी वा ऽएते यज्ञस्य यदाज्यभागी श० ११.७ ४ २ एतद्वै प्रत्यक्षाद् यज्ञरूप यद् घृतम् श० १२ ८ २ १५ मृगधर्मा (=पलायनशील) वै यज्ञ ता० ६ ७ १० यज्ञो वै मैत्रावरुण कौ० १३ २ मनो (वै यज्ञस्य) मैत्रावरुण. श० १२ ८ २ २३ ऐ० २ ५ विराड् वै यज्ञ श० १ १ १ २२ वैराजो यज्ञ गो० पू० ४ २४ गो० उ० ६ १५ यज्ञो वै स्तोम श० ८ ४ ३ २ नासामा यज्ञो अस्ति श० १ ४ १ १ एते वै यज्ञा वागन्ता ये यज्ञायज्ञीयान्ता ता० ८ ६ १३ यद्वै यज्ञस्यान्यूनातिरिक्त तच्छिवम् श० ११ २ ३ ९ यद्वै यज्ञस्यान्यूनातिरिक्त तत् स्विष्टम् श० ११ २ ३ ९ विष्णुर्वै यज्ञस्य दुरिष्ट पाति ऐ० ३ ३८ यद्वै यज्ञस्य दुरिष्ट तद्वरुणो गृह्णाति ता० १३.२ ४ यज्ञो यज्ञस्य प्रायश्चित्ति ऐ० ७ ४ यद् यज्ञेऽभिरूप तत् समृद्धम् कौ० ९ ६ गो० उ० ४ १८ एतद्वै यज्ञस्य समृद्ध यद् रूपसमृद्ध यत्कर्म क्रियमाणमृगभिवदति ऐ० १ ४ व्यृद्ध वै तद् यज्ञस्य यन्मानुपम् श० १ ४ १ ३५ हवीपि ह वा ऽआत्मा यज्ञस्य श० १ ६ ३ ३९ आहुतिर्हि यज्ञ श० ३ १ ४ १ यज्ञो विककत श० १४ १ २ ५ यज्ञो वा अवति ता० ६ ४ ५ भैपज्ययज्ञा वा एते यच्चातुर्मास्यानि तस्माद् ऋतुसन्धिपु प्रयुज्यन्ते ऋतुसन्धिषु वै व्याधिर्जायते गो० उ० १ १९ कौ० ५ १ एष ह वै यजमानस्यामुष्मिँल्लोक ऽआत्मा भवति यद् यज्ञ श० ११ १ ८ ६ यज्ञेन वै देवा दिवमुपोदक्रामन् श० १ ७ ३ ७ स्वर्गो वै लोको यज्ञ कौ० १४ १ यज्ञेन वै तद् देवा यज्ञमयजन्त यदग्निनाऽग्निमयजन्त ते स्वर्गं लोकमायन् ऐ० १.१६]

यज्ञकेतुः यज्ञस्य प्रापक (विद्वान् जन) ४ ५१ ११ [यज्ञ-केतुपदयो समास । केतु प्रज्ञानाम निघ० ३ ९]

यज्ञनीः यज्ञ त्रिविध नयति प्रापयतीति स (भौतिको ऽग्नि) प्र०—अत्र 'सत्सूद्विषद्रुह०' इति क्विप् १ १५ १२

१ ८ ३ ५ सत्कर्मानुष्ठाने ६ २४ ६ विद्वत्सत्कार-सङ्ग-दाने ६ ३४ २ सङ्गन्तव्यै साधने ७.२ २ विद्वत्सत्कार-शिल्प-क्रिया-विद्यादिदानाख्यैर्व्यवहारै ३ ३ २ ५ [यज देवपूजा-सगतिकरणदानेषु (भ्वा०) धातो 'यजयाचयतविच्छप्रच्छ-रक्षो नङ्' अ० ३ ३ ९० इति नङ्। बहुलवचनादौणादिको वा न । यज्ञ =यज्ञ नाम निघ० ३ १७ यज्ञ कस्मात् ? प्रख्यात यजतिकर्मेति नैरुक्ता । याच्ञ्यो भवतीति वा यजुरुन्नो भवतीति वा बहुकृष्णाजिन इत्यौपमन्यवो यजूष्येन नयन्तीति वा नि० ३ १९ यज्ञ.=यज्ञोखा नि० १० ४५ स (सोम) तायमानो जायते स यन् जायते तस्माद् यञ्जो यञ्जो ह वै नामैतद् यद् यज्ञ इति श० ३ ९ ४ २३ प्राण (यज्ञस्य) सोम कौ० ९ ६ अध्वरो वै यज्ञ श० १ २ ४ ५ यज्ञो वै मख श० ६ ५ २ १ तै० ३ २ ८ ३ ता० ७ ५ ६ मख इत्येतद् यज्ञनामधेयम् गो० उ० २ ५ यज्ञो वै नम श० ७ ४ १ ३०, २ ४ २ २४, २ ६ १ ४२ यज्ञो वै स्वाहा-कार श० ३ १ ३ २७ यज्ञो वै भुज्यु (यजु० १८ ४२) यज्ञो हि सर्वाणि भूतानि भुनक्ति श० ९ ४ १ ११ यज्ञो भग (यजु० ११ ७) श० ६ ३ १.१९ गातु वित्त्वेति यज्ञ वित्त्वेत्येवैतदाह । (गातु =यज्ञ) श० १ ९ २ २८, ४ ४ ४ १३ यज्ञो वा ऽऋतस्य योनि (यजु० ११ ६) श० १ ३ ४ १६. यज्ञो ह वै मधुसारघम् श० ३ ४ ३ १३ यज्ञो वै महिमा (यजु० ११ ६) श० ६ ३ ११८ यज्ञो वै देवाना मह श० १ ९ १ ११ एष ह वै महान् देवो यद् यज्ञ गो० पू० २ १६ यज्ञो वै बृहन्विपश्चित् श० ३ ५ ३ १२ यज्ञो वा अर्यमा तै० २ ३ ५ ४ यज्ञो वै तार्प्यम् तै० १ ३ ७ १, ३ ९ २० १. यज्ञो वै वसु (यजु० १ २) श० १ ७ १ ९ यज्ञो विदद्वसु ता० १५ १० ४ यज्ञो वै विदद्वसु ता० ११ ४ ५ यज्ञोऽसुरेषु विदद्वसु ता० ८ ३ ३ यत् सयद्वसु (यजु० १५ १८) इत्याह यज्ञ हि सयन्तीतीद वस्विति श० ८ ६ १ १९ यज्ञो वै सुतर्मा नौ कृष्णाजिन वै सुतर्मा नौ ऐ० १ १३ यज्ञो वै स्व (यजु० १ ११) अहर्देवा सूर्य श० १ १ २ २१ यज्ञो वै सुम्नम् (यजु० १२ ६७) श० ७ २ २ ४, ७ ३ १ ३४ यज्ञो वै श्रेष्ठतम कर्म (यजु० १ १) श० १ ७ १ ५ यज्ञो हि श्रेष्ठतम कर्म तै० ३ २ १ ४ यज्ञो वै विट् (यजु० ३८ १९) श० १४ ३ १ ६ यज्ञो वै विशो यज्ञे हि सर्वाणि भूतानि विष्टानि श० ८ ७ ३ २१ ब्रह्म यज्ञ श० ३ १ ४ १५ ब्रह्म हि यज्ञ श० ५ ३ २ ४ ब्रह्म वै यज्ञ ऐ० ७ २२ सैषा त्रयी विद्या (=ऋक्सामयजूषि) यज्ञ श० १ १ ४ ३ एष वै प्रत्यक्ष यज्ञो यत् प्रजापति श० ४ ३ ४ ३ यज्ञ प्रजापति श० ११ ६ ३ ९. यज्ञ उ वै प्रजापति कौ० १० १ १३ १ तै० ३ ३ ७ ३ एष वै यज्ञ एव प्रजापति श० १ ७.४ ४. प्रजापतिर्यज्ञ ऐ० २ १७, ४ २६. श० १ १ १ १ १३, १ ५ २ १७ तै० ३ २ ३ १ गो० उ० ३ ८, ४ १२, ६ १ प्रजापतिर्वै यज्ञ गो० उ० २ १८ तै० १ ३ १० प्राजापत्यो यज्ञ तै० ३ ७ १.२ इन्द्रो यज्ञस्यात्मा श० ९ ५ १ ३३ इन्द्रो यज्ञस्य देवता ऐ० ५ ३४, ६ ९ श० २ १ २ ११ इन्द्रो वै यज्ञस्य देवता श० १ ४ १ ३३, १ ४ ५ ४ तदाहु किन्दैवत्यो यज्ञ इति ऐन्द्र इति ब्रूयात् गो० उ० ३ २३ एते वै यज्ञस्यान्त्ये तन्वौ यदग्निश्च विष्णुश्च ऐ० १ १ विष्णुर्यज्ञ गो० उ० १ १२ तै० ३ ३ ७ ६ यज्ञो वै विष्णु स यज्ञ श० ५ २ ३ ६ स य स विष्णुर्यज्ञ स, स य स यज्ञोऽसौ स आदित्य श० १४ १ १ ६ विष्णुर्वै यज्ञ ऐ० १ १५ यज्ञो विष्णु ता० १३ ३ २ गो० उ० ६ ७ पवित्रे स्थो वैष्णव्यौ (यजु० १ १२) इति यज्ञो वै विष्णुर्यज्ञिये स्थ इत्येवैतदाह श० १ १ ३ १ यज्ञो वै विष्णु (यजु० २२ २०) श० १ ३ १ ८ ८ यज्ञो वै विष्णु कौ० ४ २ ता० ९ ६ १० श० १ १ २ १३ गो० उ० ४ ६ तै० १ २ ५ १ यज्ञो वै विष्णु शिपिविष्ट ता० ९ ७ १० विष्णवे हि गृह्णाति यो यज्ञाय (हवि) गृह्णाति श० ३ ४ १ १४ अथेम विष्णु यज्ञ त्रेधा व्यभजन्त, वसव प्रात सवन रुद्रा माध्यन्दिन सवन-मादित्यास्तृतीयसवनम् श० १४ १ १ १५ तद् यदेनेन (यज्ञेन विष्णुना) इमा सर्वां (पृथिवीम्) समविन्दन्त तस्माद् वेदिर्नाम श० १ २ ५ ७ त (यज्ञ) वेद्यामन्वविन्दन् ऐ० ३ ९ यज्ञो वै वैष्णुवारुण कौ० १६ ८. मित्रा-बृहस्पती वै यज्ञपथ श० ५ ३ २ ४ यज्ञमुख वा ऽउपाशु श० ५ २ ४ १७ देवा यज्ञिया श० १ ५ २ ३ एतद्वै देवा-नामपराजितमायतन यद् यज्ञ तै० ३ ३ ७ ७ सर्वेषा वा ऽएष भूताना सर्वेषा देवानामात्मा यद् यज्ञ श० १४ ३ २ १ यज्ञ उ देवानामात्मा श० ८ ६ १ १० यज्ञो वै देवानामात्मा श० ९ ३ २ ७ (प्रजापतिर्देवानब्रवीत्) यज्ञो वोऽन्नम् श० २ ४ २ १ यज्ञ उ देवानामन्नम् श० ८ १ २ १० देवरथो वा एष यद् यज्ञ ऐ० २ ३७ कौ० ७ ७ एते वै यज्ञमवन्ति ये ब्राह्मणा शुश्रुवाꣳसो ऽनूचानो एते ह्येन तन्वत ऽएतऽएन जनयन्ति श० १ ८ १ २८ एतैर्ह्यत्र (यज्ञे) उभयैरर्थो भवति यद् देवैश्च ब्राह्मणैश्च श० ३ ३ ४ २० यज्ञो वै देवेभ्योऽपाक्रामत्स सुपर्णरूप कृत्वाचरत् त देवा एतै (सौपर्णै) सामभिरारभन्त ता० १४ ३ १० वय इव ह वै यज्ञो विधीयते श० ४.१ २ २५ त्रिवृद्धिर्यज्ञ श० १ १ ४ २३ त्रिवृत्प्रायणा हि यज्ञास् त्रिवृदुदयना श० २ ३

यज्ञायज्ञियम् श० ६ १ २ ३६. स्वर्गो वै लोको यज्ञायज्ञियम् श० ६ ४ ५ १० (साम) योनिर्वै यज्ञायज्ञियम् ता० ८ ६ ३ देवा वै ब्रह्म व्यभजन्त तस्य यो रसोऽत्यरिच्यत तद् यज्ञायज्ञियमभवत् ता० ८ ६ १ एषा वै प्रत्यक्षमनुष्टुब् यद् यज्ञायज्ञियम् ता० १५ ६ १५ यज्ञायज्ञीय ह्येव महाव्रतस्य पुच्छम् ता० ५ १ १८ अतिशय वै द्विपदा यज्ञायज्ञीयम् ता० ५ १ १६ वाचो रसो यज्ञायज्ञीयम् ता० १८ ५ २१ वाग् यज्ञायज्ञीयम् ता० ५ ३ ७ एते वै यज्ञा वागन्ता ये यज्ञायज्ञीयान्ता ता० ८ ६ १३ एषा वै शिशुमारी यज्ञपथेऽप्यस्ता यज्ञायज्ञीयम् ता० ८ ६ ६ पशवोऽन्नाद्य यज्ञायज्ञीयम् ता० १५ ६ १२ पन्था वै यज्ञायज्ञीयम् ता० ४ २ २१ कथमिव यज्ञायज्ञीयङ्गेयमित्याहुर्यथाऽनड्वान् प्रस्तावयमाण इत्थमिव चेत्थमिव चेति ता० ८ ७ ४]

यज्ञायते यज्ञ कामयमानाय (जनाय) ५ ४१ १ [यज्ञपदाद् आत्मन इच्छायामर्थे क्यजन्ताल्लट् । व्यत्ययेनात्मनेपदम्]

यज्ञास: सर्वे धर्म्या व्यवहारा ६.२३ ८ सङ्गन्तव्या (विद्वासो जना) ५ ६ २ [यज्ञप्राति० जसोऽसुक्]

यज्ञियम् यज्ञकर्माऽर्हतीति यज्ञियो देशस्तम् प्र०— तत्कर्माऽर्हतीति उपसख्यानम् अ० ५ १ ७१ इति वार्त्तिकेन घ प्रत्यय १ ६ ४ यज्ञ कर्त्तुमर्हम् (विद्वज्जनम्) ६ १६ ४ राज्यव्यवहारनिष्पादकम् (स्तोम=स्तुति प्रशसाम्) ३ ६० ७ यज्ञाऽर्हम् (भागम्) ३ ६० १ यज्ञसम्बन्धिनम् (भागम्) २ २३ २ यज्ञाऽनुष्ठानार्ह स्वरूपम् १२ १०४ यो यज्ञमर्हति तम् (भागम्) १ १६१ ६ यज्ञाऽङ्गसमूहनिष्पादकम् (तेज) ५ ६ यथायोग्य देश गन्तुमर्हम् (रथ=यानम्) १ ११६ १ यज्ञनिष्पन्नम् (सुखम्) १ २० ८ यज्ञसम्पादकम् (अग्नि=पावकम्) ३.२ १३ **यज्ञियस्य**=यज्ञमर्हत (सज्जनस्य) ३ १ २१ यज्ञमनुष्ठातुमर्हस्य (राज्ञ) २० ५२ पूजनार्हस्य (परमेश्वरस्य) ३ ३२ ७ विद्वत्सेवा-सङ्ग-विद्यादानानि कर्त्तुमर्हस्य (राज्ञ) ६ ४७ १३ **यज्ञिय.**=यज्ञ कर्त्तुमर्ह (विद्वज्जन) १ १४२ ३ यो यज्ञमर्हति स (अग्नि=विद्वान्) ४ १५ १ यज्ञेषु कुशल (इन्द्र= परमैश्वर्यप्रापको (जन) ३ ३२ १२ **यज्ञियान्**=यज्ञसाधकान् (देवान्=विदुषो जनान् १ १८८ ३ **यज्ञियानाम्**=यज्ञ सम्पालितुमर्हाणाम् (प्रजाजनानाम्) ६ ४१ १ यज्ञस्य साधकानाम् (प्राज्ञाना विद्वज्जनानाम्) ३ ३३ ११ सत्सङ्गतिमर्हाणाम् (विदुषा जनाना) ६ ६३ ५ यज्ञसिद्धिकर्तॄणाम् (सज्जनानाम्) ४ ४३ १ ये यज्ञमर्हन्ति तेषाम् (पित्रादीनाम्) १६ ५० यज्ञस्य पर्नि विधातुमर्हाणाम् (देवानाम्=आप्ताना विपश्चिताम्) ८ १५ यज्ञसम्पादनकुशलानाम् (विद्वज्जनानाम्) १७ १३ **यज्ञियाय**=यज्ञाऽर्हाय (वैदिक कर्मणे) ३८ ११. यज्ञकर्मार्हतीति यज्ञियो योद्धा तस्मै ११२७ १० **यज्ञिया:**=यज्ञ सम्पादितुमर्हा (विद्वज्जना) ५ ८७ ६ विद्यावृद्धिमययज्ञप्रचाराऽर्हा (देवा= विद्वासो जना) २.४१ २१ ये यज्ञ कर्त्तुमर्हन्ति ते (देवा.= विद्वत्तमा जना) ७ ३५ १५ ये सत्सङ्गति कर्त्तुमर्हा (देवा=विद्वासो जना) ६ ५२ १४ यज्ञकर्त्तार (विद्वज्जना.) ५ ५२ १ यज्ञसाधनाऽर्हा (विद्याविजना) ११४२ ६ **यज्ञिये**=यज्ञसम्बन्धिनि कर्मणि ७ २ ६ **यज्ञियेभ्य:**=यज्ञमनुष्ठातु योग्येभ्य (विद्वज्जनेभ्य) ११३६ ७ यज्ञसिद्धिकरेभ्य (देवेभ्य=विद्वद्भ्य) ३३ ५४ सत्यभाषणादियज्ञाऽनुष्ठातृभ्य (देवेभ्य=जीवेभ्य) ४ ५४ २ **यज्ञियेषु**=राजपालनादिसङ्गतेषु व्यवहारेषु ७.३२ १३ [यज्ञप्राति० 'तदर्हतीत्यर्थे' यज्ञर्त्विग्भ्या घखञौ' अ० ५ १ ७१ वा०सूत्रेण घ । 'तत्कर्मार्हतीत्युपसख्यानम्' अ० ५ १ ७१ वा०सूत्रेण दा घ । घस्येयादेश यज्ञियाय यजनाय नि० १०.८ यज्ञियानाम्=यज्ञसम्पादिनाम् नि० ७ २७ यज्ञिया देवा यज्ञसम्पादिन नि० ६ २७ वनस्पतयो हि यज्ञिया नहि मनुष्या यजेरन् यद्वनस्पतयो न स्यु श० ३ २ २ ६.]

यज्ञिया या यज्ञमर्हति सा (भा०—सर्वोत्तमा वाग् विद्युद्वा) ४ १६ **यज्ञियाम्**=या यज्ञमर्हति ताम् (अरमतिं=पूर्णा प्रज्ञाम्) ७ ४२ ३ [यज्ञियमिति व्याख्यातम् । तत स्त्रिया टाप्]

यज्ञियानि कर्मोपासनाज्ञानसम्पादनाऽर्हाणि कर्म्माणि १ ७२ ३ यज्ञसिद्धयेऽर्हाणि (नामानि=जलानि सज्ञा वा) ६ १४ शिल्पादियज्ञार्हाणि (नामानि=जलानि) १ ८७ ५. [यज्ञियमिति व्याख्यातम्]

यज्ञियास: या यज्ञमर्हन्ति ता अ०—यज्ञिया' (आशिष=इच्छा) ४५ ये यज्ञमर्हन्ति ते (देवास= विद्वास) ४५ यज्ञक्रियाकुशला (विद्वासो जना) १ ७३ ७ यज्ञसम्पादने योग्या (विद्वासो जना) १ ७२ ६ यज्ञसिद्धिकरा (देवा=विद्वज्जना) ७ ३६ ४ अहिसया यज्ञस्याऽनुष्ठातार (विद्वज्जना) ३ ५४ १८ शिल्पव्यवहारकर्त्तार (विद्वासो जना) ३ ५४ १३ ये शिल्पाख्य यज्ञमर्हन्ति ते (जना) १ १४८ ३ ये सत्यप्रिय व्यवहार कर्त्तुमर्हन्ति ते (जगद्धितैषिणो जना) ६ ४६ ११ [यज्ञियमिति

[यज्ञोपपदे णीञ् प्रापणे (भ्वा०) धातो 'सत्सूद्विषद्रुह०' इति क्विप्]

यज्ञन्यम् यज्ञ नयति प्रापयतीति यज्ञनीस्तम् (यज्ञपति=यजमानम्) प्र०—अत्र 'अमि पूर्व' अ० ६ १ १०६. इत्यत्र 'वा छन्दसि' इत्यनुवर्त्तनात्पूर्वरूपादेशो न भवति २ ६ [यज्ञोपपदे णीञ् प्रापणे (भ्वा०) धातो क्विप्। ततोऽमि पूर्वरूपैकादेशो न भवति छान्दसत्वात्]

यज्ञपतिम् यज्ञस्याऽनुष्ठातार स्वामिन यज्ञस्य कामयितार वा (मनुष्यम्) १ १२ उपदेशेन धर्मरक्षकम् भा०—पूर्णविद्य प्रगल्भ निष्कपटमाप्त जनम् १२ ६० एतस्य यज्ञस्य पालकम् (जनम्) ११ ७ राज्यपालकम् (अ०—स्वामिनम्) १७ ५४ सङ्गम्याना गृहाश्रमिणा पालक राजानम् ८ २२ गृहाश्रमस्य पालक पुरुषम् पालिका स्त्रिय वा ८ ७ सङ्गतस्य न्यायस्य पालकम् (पुरुषम्) ७ २० यथा होत्रादयो यज्ञपति रक्षन्तो यतन्ते तथा ५ ३८ यज्ञपालयितारम् (यजमान यज्ञसम्पादक विद्वास वा) ५ ३ यज्ञस्य राज्यस्य पालकम् (राजानम्) ३० १ **यज्ञपतिः**=यज्ञस्य स्वामी यज्ञकर्त्ता यजमान समीक्षा—धात्वर्थाद्यज्ञार्थस्त्रिविधो भवति—विद्याज्ञानधर्मानुष्ठानवृद्धाना देवाना विदुषामैहिक पारमार्थिक-सुखसम्पादनाय सत्करण सम्यक् पदार्थगुणसम्मेलविरोधज्ञानसङ्गत्या शिल्पविद्या-प्रत्यक्षीकरण नित्य विद्वत्समागमाऽनुष्ठान शुभविद्या-सुख-धर्मादिगुणाना नित्य दानकरमिति १ २ यज्ञस्य स्वामी पालक (देव =जगदीश्वर सूर्यलोको वा) १ २२ **यज्ञपते**=राजधर्माऽग्निहोत्रादिपालक (गृहपते) ८ २२ गृहाश्रमस्य पालक (गृहपते) ८ २५ **यज्ञपतौ**=यज्ञस्य युक्तस्य व्यवहारस्य पालके स्वामिनि ३३ ३० [यज्ञ-पतिपदयो. समास । यजमानो हि यज्ञपति श० ४ २ २ १० यजमानो वै यज्ञपति श० १ १ २ १२. वत्सा उ वै यज्ञपति वर्धन्ति यस्य ह्येते भूमिष्ठा भवन्ति स हि यज्ञपतिर्वर्धते श० १ ८ १ २८]

यज्ञप्री. यो यज्ञ प्राति पूरयति स (विद्वज्जन) २७ ३१ [यज्ञोपपदे प्रा पूरणे (अदा०) धातो क्विप्। आकारस्येकारश्छान्दस]

यज्ञबन्धुः यज्ञस्य न्यायव्यवहारस्य भ्रातेव वर्त्तमान (अग्नि =राजा) ४ १ ६ [यज्ञ-बन्धुपदयो समास]

यज्ञ यज्ञम् प्रतिव्यवहारम् ३ ६ १० [यज्ञम् पदस्य वीप्साया द्वित्वम्]

यज्ञवनसम् यज्ञस्य विद्याव्यवहारस्य विभाजक राज्यव्यवहारस्य विभक्तारम् (अध्यापक राजान वा) ४ १ २ [यज्ञ-वनस्पदयो समास । वनस्=वन सम्भक्तौ (भ्वा०) धातोरौणादिकोऽसुन्]

यज्ञवन्तः प्रशस्ता यज्ञा प्रयत्ना येषा ते (जना) ३ २७ ६ [यज्ञप्राति० प्रशसाया मतुप्]

यज्ञवाहसम् या यज्ञ परमेश्वरस्योपासन शिल्पविद्यासिद्ध वा वहति प्रापयति ताम् (धियम्) ४ ११ **यज्ञवाहसः**=यज्ञान् वोढु शील येषा ते (मरुत =परीक्षका विपश्चितो जना) १ ८६ २ **यज्ञवाहसि**=यज्ञान् सङ्गतान् राजधर्मादीन् वहन्ति यस्मिन् राज्ये तस्मिन् ६ ३७ **यज्ञवाहसे**=यज्ञस्याऽध्ययनाऽध्यापनस्य प्राप्तये ३ ८ ३ यज्ञस्य प्रापकाय (सज्जनाय) ३ २४ १ [यज्ञोपपदे वह प्रापणे (भ्वा०) धातोर्णिजन्ताद् औणा० असुन्]

यज्ञवाहसा यज्ञान्. हुतद्रव्यान् वहत प्रापयतस्तौ (अश्विनौ=सूर्याचन्द्रमसौ) प्र०—'अत्र सुपा सुलुक्०' इत्याकारादेश १ १५ ११ यज्ञप्रापकौ (इन्द्रवायू=राजाऽमात्यौ) ४ ४७ ४ ['यज्ञवाहम्' इति व्याख्यातम्। ततो द्विवचनस्याकारादेशश्छान्दस]

यज्ञवृद्धम् यज्ञे पूज्य विद्वासम् ६ २१ २ [यज्ञ-वृद्धपदयो समास]

यज्ञश्रियम् चक्रवर्त्तिराज्यादेर्महिम्न श्रीलक्ष्मी शोभा ताम् प्र०—राष्ट्र वा अश्वमेध शत० १३ १ ६ ३ अनेन यज्ञशब्दाद्राष्ट्र गृह्यते 'यज्ञो वै महिमा' श० ६ २ ३ १८, १४ ७ [यज्ञ-श्रीपदयो समास]

यज्ञसाधनः यज्ञस्य विद्वत्सत्कारस्य साधनानि यस्य स (विद्वज्जन) १ १४५ ३ [यज्ञ-साधनपदयो समास]

यज्ञसाधम् यो यज्ञ प्रजापालन साध्नोति तम् (रुद्र=सभाध्यक्षम्) १ ११४ ४ यो यज्ञैर्विज्ञानादिभिर्ज्ञातु शक्यस्तम् (अग्नि=परमेश्वरम्) १ ९६ ३ यज्ञ साध्नुवन्तम् (विद्वास जनम्) १ १२८ २ सब ससार और विज्ञानादि यज्ञ का साधक सब का जनक (ईश्वर) आर्याभि० १ ४०, ऋ० १ ७ ३ ३ [यज्ञोपपदे साध ससिद्धौ (स्वा०) धातो 'कर्मण्यण्' इत्यण्]

यज्ञायज्ञा यज्ञे यज्ञे प्र०—अत्र 'सुपा सुलुक्०' इत्याकारादेश २७ ४२ [यज्ञे पदस्य वीप्साया द्वित्वम्। सप्तम्या आकारादेशश्छान्दस]

यज्ञायज्ञियम् यज्ञा सङ्गतव्या व्यवहारा अयज्ञास्त्यक्तव्याश्च तान् यदर्हति तत् (साम=तृतीयो वेद) १२ ४ [यज्ञ-अयज्ञपदयो समासे 'तदर्हती' त्यर्थे घ । चन्द्रमा वै

(जीवाय) २२ ८ गच्छते (जनाय) १ १८८ २ **यन्**=गच्छन् (रथ =यानम्) प्र०—अत्र 'इण' धातो' शतृप्रत्ययो यणादेशश्च १ १८३.२ य एनि रा (अग्नि =भौतिक) ६.३ ७ **यन्तम्**=गच्छन्त प्राप्नुवन्त वा (विद्यार्थिजनम्) १ १०५ १८ प्रयत्न कुर्वन्तम् (सज्जनम्) ५ ६४ २ **यन्त:**=उपयन्त (अ०—मुविद्वास) १७ ६८ प्राप्नुवन्त (पुरुषार्थिमनुष्या) १ १४० १३ **यन्तौ**=गमयन्तौ (अध्यापकोपदेशकौ) १ १३६ ४ [इण् गतौ (अदा०) धातो शतरि यणादेशे रूपम्]

यता प्राप्ता (घृताची=रात्रि) ४ ६ ३ [यतते गति-कर्मा (निघ० २ १४) धातोरौणा० अन्। तत स्त्रिया टाप्]

यताना प्रयतमाना (हसा =पक्षिविशेषा) ३ ८ ६ [यती प्रयत्ने (भ्वा०) धातो शानच्। मुकोऽभावश्छान्दस]

यति या सङ्ख्या येषान्तान् अ०—यावत (पितॄन्) १६ ६७ [यत्सर्वनाम्न सख्यापरिमाणे डतिश्छान्दस]

यती गच्छन्ती (भूमि) ५ ५६ २ यतमाना (विदुषी स्त्री) ५ ४५ ७ **यतीषु**=नियतासु सेनासु ४ ३८ ७ [इण् गतौ (अदा०) धातो शत्रन्तान् ङीप्]

यतीरिव प्रयत्नसाध्या क्रिया इव ५ ५३ ५ [यती-इवपदयो समास]

यतुनस्य यत्नशीलस्य (विद्वज्जनस्य) ५ ४४ ८ [यती प्रयत्ने (भ्वा०) धातोर्बाहु० औणा० उनन्]

यतोजा: यस्माज्जात भा०—यस्मादुत्पन्न (चन्द्रमा) २३ ५६ भा०—उपादानकारणम् (प्रकृति) २३ ६० [यतस्-उपपदे जनी प्रादुर्भावे (दिवा०) धातोर्ड। यतस्=यत्सर्वनाम्न पञ्चम्यन्तात् तसिल्]

यतोयत: यस्माद्यस्मात् स्थानात् ३६ २२ [यतस्-पदस्य वीप्साया द्विर्वचनम्। यत =यत्सर्वनाम्नस् तसिल्]

यत्काम. य कामो यस्य स (जन) ४४ **यत्कामा:**=य पदार्थ कामो येषान्ते (अस्मदादिजना) २३ ६५ यस्य यस्य काम कामना येषान्ते (प्रजाजना) १० २० जिस जिस पदार्थ की कामना वाले हम लोग स० वि० ६, १० १२१ १० [यत्-कामपदयो समास]

यत्र यस्मिन् ब्रह्मणि १७ ३० यस्मिन् देशे १ ८३ ६ यस्मिन् समये २ २४ ८ येषु ६ ३ जिस परमात्मा के सामर्थ्य से आर्याभि० २ ४०, १७ २६ [यत्सर्वनाम्न 'सप्तम्यास्त्रल्' इति त्रल्]

यथा येन प्रकारेण १२ ८५ जिस प्रकार से आर्याभि० १ ५३, ऋ० २ ८ १२ ३ जैसे आर्याभि० २ ५०, २५ १८ [यत्सर्वनाम्न 'प्रकारवचने थाल्' अ० ५ ३ २३ सूत्रेण थाल्। यथा=इव नि० ३ १५]

यथाकृतम् येन प्रकारेणाऽनुष्ठितम् (कर्म-फलम्) ७ १८.१० [यथा-कृतपदयो समास]

यथापूर्वम् जैसे पूर्व कल्प मे स० प्र० २६६, १० १९० ३ यथा पूर्वकल्पसृष्टौ प० वि०। १ १९० ३ [यथा-पूर्वपदयो समास]

यथाभागम् भागमनतिक्रम्य कुर्वन्तीति भा०—यथा-योग्य भोगम् २ ३१ भाग भाग प्रतीति प्र०—अत्र वीप्सार्थे प्रति २ ३१ [यथा-भागपदयो समास]

यथायथम् यथायोग्यम् २१ ५८ यथाऽर्थम् ५ ४०. [यथा-पदस्य 'यथास्वे यथायथम्' अ० ८ १ १४ सूत्रेण द्वित्व नपुसकता च निपात्यते]

यथावशम् वश कामनामनतिक्रम्य करोतीति १६ ६० वशमनतिक्रम्य वर्त्तते तत् ३ ४८ ४ वशमनतिक्रम्य करोति ५ ३४ ६ वशमनतिक्रम्य यथा स्यात्तथा २ २४ १४ [यथा-वशपदयो समास]

यदवे मनुष्याय ५ ३१ ८ **यदुम्**=इतरधनाय यततेऽसौ यदुर्मनुष्यस्तम् प्र०—अत्र यती प्रयत्ने इत्यस्माद् बाहुलका-दौणादिक उ प्रत्ययस्तकारस्य दकार १ ३६ १८ यत्नशील मनुष्यम् ६ २०.१२ प्रयतमानम् (नरम्) ६.४५ १ **यदुषु**=प्रयत्नकारिषु मनुष्येषु प्र०—यदु इति मनुष्यनाम निघ० २ ३, १ १०८ ८ [यदव =मनुष्यनाम निघ० २ ३ यती प्रयत्ने (भ्वा०) धातोरौणा० उ। तस्य दकारादेश]

यदा यस्मिन् काले ४ २४ ८ [यत्सर्वनाम्न 'सर्वै-कान्यकियत्तद काले दा' इति दा]

यदि आकाङ्क्षार्थे १ ११ ३ सामर्थ्यानुकूलविचारे १ २७ १३ चेत् ४ ५ ११

यदिव सङ्गतमिव १ १६४ ३७ [यत्-इवपदयो समास। यत्=इण् गतौ (अदा०) धातो शतृ]

यन् गच्छेयु प्र०—अत्राऽडभाव १ १७३ ३ प्राप्नु-वन्ति ३ ४५ **यन्त**=प्राप्नुवन्ति ५ ४६ १२ ददति ६ ५१ ५ **यन्ति**=प्राप्नुवन्ति गच्छन्ति वा १७ २७ यान्ति प्राप्नुवन्ति १ ५५ प्रापयन्ति १ ११६ २ इच्छन्ति १ १२३ १२ **यन्तु**=प्राप्नुवन्तु २० ४० गच्छन्तु १७ ४० आगच्छन्तु १६ ५८ गमयन्तु ५ ६२ ४ [इण् गतौ (अदा०) धातोर्लङ्। आडभावश्छान्दस। अन्यत्र लट् लोट् च। यन्ति याच्ञाकर्मा निघ० ३ १६]

यन्त प्रयच्छत प्र०—अत्र यम-धातो. 'बहुल छन्दसि'

व्याख्यातम् । ततो जसोऽमुक्]

यज्ञे यज्ञे प्रतियज्ञम् १.१३६ १. सङ्गन्तव्ये सङ्गन्तव्ये व्यवहारे ५ ५ ६ [यज्ञे पदस्य वीप्साया द्वित्वम्]

यज्ञेषम् यज्ञकरणेच्छाविशिष्टम् (लोक=देशम्) ऋ० भू० २१६, २० २५ [इषु इच्छायाम् (तुदा०) धातोर्घञर्थे कप्रत्यये सति 'इष' इति रूपम् । यज्ञ-इषपदयो. समास]

यज्यवः सत्कर्त्तव्या (जनास =सज्जना) ३ १६ ४. सङ्गन्तार (नर =नायका जना) २ १४ ८ **यज्यवे**= यज्ञानुष्ठानाय यजमानाय वा ५ ४१ ३ सङ्गताय (वरुणाय= श्रेष्ठाय) २६ १७ होमादिशिल्पविद्यासाधकाय विदुषे प्र०— अत्र 'यजिमनिशुन्धिदसि०' उ० ३ २० अनेन यजधातोर्युच् प्रत्यय १ ३१ १३ **यज्यून्**=सत्यभाषणादियज्ञाऽनुष्ठातॄन् (विदुषो जनान्) ५ ३१ १३ यज्यो =सङ्गन्तुमर्हस्य सत्यव्यवहारस्य ४ २३ २ [यज देवपूजासगतिकरणदानेषु (भ्वा०) धातो 'यजिमनिशुन्धि०' उ० ३ २० सूत्रेण युच्]

यज्वनः विदुषां सेवकस्य सङ्गच्छमानस्य (सज्जनस्य) ६.२८ ४ यज्ञाऽनुष्ठातु (सज्जनस्य) प्र०—अत्र 'सुयजोर्ङ्वनिप्' अ० ३ २ १०३ अनेन यजधातोर्ङ्वनिप्प्रत्यय. १ १३ १२ यज्ञ करने वाले (प्रजाजन) का स० प्र० २३८, १० ४६ १ **यज्वने**=यज्ञस्य कर्त्रे (सज्जनाय) ६ २८ २ **यज्वा**=सङ्गन्ता (परमेश्वर) ६ १५ १४ [यज देवपूजासगतिकरणदानेषु (भ्वा०) धातो 'सुयजोर्ङ्वनिप्' अ० ३ २ १०३ सूत्रेण ङ्वनिप् । कर्त्तरि वनिप् वा]

यज्वरी. शिल्पविद्यासम्पादनहेतून् १ ३ १ [यज देवपूजासगतिकरणदानेषु (भ्वा०) धातोर्वनिप् ङ्वनिप् वा तत स्त्रिया 'वनो र च' इति ङीप् रेफश्चान्तादेश]

यतङ्करः य प्रयत्न करोति स (मनुष्य) ५ ३४ ४ [यतोपपदे डुकृञ् करणे (तना०) धातो कर्त्तरि खच् छान्दस । यत =यती प्रयत्ने (भ्वा०) धातोर्घञर्थे क । यमु उपरमे (भ्वा०) धातोर्वा क्त.]

यतति यतते प्र०—अत्र व्यत्ययेन परस्मैपदम् ७.३६ २ **यतथः**=यतेथे ५ ७४ २ प्रेरयथः ५ ६५ ६ [यती प्रयत्ने (भ्वा०) धातोर्लट् । व्यत्ययेन परस्मैपदम्]

यतते व्यवहारयति १ ६५ ७ सयतो भवति १ ६८ १ साध्नोति ३ १६ ४ यत्न करोति १ १८६ ११ **यतन्ते**=यातयन्ति प्र०—अत्र भावितण्यर्थ १ १६३ १०. **यतस्व**=प्रयत्न कुरु ७ ४५ **यतेम**=प्रयत्न कुर्याम ६ १ १० [यती प्रयत्ने (भ्वा०) धातोर्लट् । अन्यत्र लोट् लिङ् च । यतते गतिकर्मा निघ० २ १४]

यतन् यत्न कुर्वन् (राजा) ५ ४८ ५ [यती प्रयत्ने (भ्वा०) धातो शतृ । व्यत्ययेन परस्मैपदम्]

यतमानः प्रयतमान (राजा) ५ ४४ [यती प्रयत्ने (भ्वा०) धातो शानच्]

यतमानाः प्रयत्न कुर्वन्त्य (उषस) १ १२३ १२ [यती प्रयत्ने (भ्वा०) धातो शानच्-प्रत्ययान्तात् स्त्रिया टाप्]

यतयः सन्यासी लोग स० वि० १६८, १०.७२ ७. **यतये**=यतमानाय सन्यासिने ७ १३ १ [यमु उपरमे (भ्वा०) धातो सज्ञाया क्तिच् । यती प्रयत्ने (भ्वा०) धातोर्वोणा० इन्]

यतरश्मयः यता निगृहीता रश्मय किरणा रज्जवो वा येषान्ते (अश्वास =अश्वाद्यास्तुरङ्गा वा) ५ ६२ ४ [यत-रश्मिपदयो समास । यत =यमु उपरमे (भ्वा०) धातो क्त]

यतस्रुक् उद्यतक्रियासाधन (मनुष्य) ४ २ १० यता उद्यता स्रुचो येन स (अग्नि =विद्वज्जन) ४ १२ १ **यतस्रुचः** यता गृहीता स्रुचो यैस्ते (ऋत्विजो मनुष्या) ३ २ ५ यता स्रुक् यज्ञसाधन यैस्ते ऋत्विज ३ ८ ७ यता स्रुचो यज्ञपात्राणि यैस्तान् ऋत्विज २ ३४ ११ प्राप्तोद्यमा (जना) १ १४२ ५ उद्यता कर्मसाधनानि यैस्ते (जना) ३ २७ ६ **यतस्रुचे**=उद्यतयज्ञपात्राय यजमानाय १ १४२ १ [यत-स्रुच्पदयो समास । यत =यमु उपरमे (भ्वा०) धातो क्त । यत =यमु उपरमे (भ्वा०) धातो क्त । यतस्रुच ऋत्विङ्नाम निघ० ३ १८]

यतस्रुचा यता नियता स्रुच साधनानि याभ्यामुपदेशाभ्या तौ (विद्वासौ जनौ) १ ८३ ३ यता उद्यता स्रुच स्रुग्वत्कलादयो ययोस्तौ (इन्द्राग्नी=वायुविद्युतौ) १ १०८ ४ [यतस्रुगिति व्याख्यातम् । ततो द्विवचनस्याकारश्छान्दस]

यतः जिस सामर्थ्य से आर्याभि० १ ११, ऋ० १ २ ७ १६ जिस देश से आर्याभि० २ ७, ३६.२२. यस्मात् १२ ५२ यस्य प्रकृत्याख्यकारणस्य सकाशात् १७ २० येन विज्ञानेन ६ ४ हेत्वर्थे १ २५ १७. [यत्सर्वनाम्न 'पञ्चम्यास्तसिल्' इति तसिल्]

यतः प्रापकान् (देवान्=दिव्यान् गुणान्) ११ ३ [इण् गतौ (अदा०) धातो शत्रन्ताद् द्वितीयाबहुवचनम्]

यति प्रयतन्ते यस्मिन् तस्मिन् (सन्मार्गे) ७ ४३ ४ **यते**=यत्नशीलाय (विद्यार्थिने) ५ २७ ४ प्रयतमानाय

एष वै यमो य एष (सूर्य) तपति श० १४.१ ३.४. अथैष एव गार्हपत्यो यमो राजा श० २ ३ २ २ अग्निर्वाव यम गो० उ० ४ ८ अग्निर्वै यम श० ७ २ १ १० यमो ह वा ऽअस्या (पृथिव्या) अवसानस्येष्टे श० ७ १ १ ३, अय वै यमो योऽय (वायु) पवते श० १४ २ २ ११. यम पन्था तै० २ ५ ७ ३ (यमाय) दण्डपाणये स्वाहा प० ५ ४. याम शुक हरितमालभेत गो० उ० २ १ क्षत्र वै यमो विश पितर श० ७ १ १ ४ यमो वैवस्वतो राजेत्याह तस्य पितरो विश श० १३ ४ ३ ६ पितृलोको यम कौ० १६ ८ कि देवतोऽस्या दक्षिणाया दिश्यसीति यमदेवत इति श० १४ ६ ६ २२ अनुराधा प्रथम अपभरणीरुत्तम तानि यमनक्षत्राणि तै० १ ५ २ ७]

यमराज्यम् यमस्य न्यायाधीशस्य स्थानम् ३५ १६. **यमराज्ये**=यमस्य सभाधीशस्य राष्ट्रे १६ ४५ राजसभायाम् ऋ० भू० २५८, १६ ४५ [यम-राज्यपदयो समास]

यमसानः नियन्ता सन् (अश्व =तुरङ्ग) ६ ३ ४. [यमु उपरमे (भ्वा०) धातोर्बाहु० औणा० असानच्]

यमसूम् या यमान् नियन्तॄन् सूते ताम् (स्त्रियम्) ३० १५ **यमसूः**=या यम सूर्य सूते सा विद्युत् ३ ३६ ३ [यमोपपदे पूङ् प्राणिगर्भविमोचने (अदा०) धातो कर्त्तरि क्विप्]

यमा यमौ उपरतौ (सूर्याचन्द्रमसौ) ३.३६ ३ [यमप्राति० द्विवचनस्य 'सुपा सुलुक्०' इत्याकारादेश]

यमितवा इव निग्रहीतुमर्हे इव (सूर्यो वा सारथिरिव) प्र०—अत्र यमधातोस्तवै प्रत्यय 'वाच्छन्दसि सर्वे विधयो भवन्ति' इतीडागम १ १८४ [यमितवै-इवपदयो समास । यमितवै=यमु उपरमे (भ्वा०) धातोस्तुमर्थे तवै । इडागमश्छान्दस]

यमिष्ठा अतिशयेन यन्तारौ (मित्रावरुणा=अध्यापकोपदेशकौ) ६ ६७ १ [यमु उपरमे (भ्वा०) धातोस्तृजन्तादतिशायन इष्ठन् । 'तुरिष्ठेमेयस्सु०' इति तृचो लोप । द्विवचनस्याकार]

यमिष्ठासः अतिशयेन नियन्तार (सारथय) १ ५५ ७ [यमिष्ठप्राति० जसोऽसुक् । यमिष्ठ इति व्याख्यातम्]

यमुना नियन्तार (राजादयो जना) ७ १८.१६ [यमु उपरमे (भ्वा०) धातो 'अजियमि०' (उ० ३ ६१) इत्युणादिसूत्रेण उनन् । विभक्तेर्लुक्]

यमुनायाम् यमनियमान्वितायां क्रियायाम् ५ ५२ १७ [यमु उपरमे (भ्वा०) धातो 'अजियमि०' उ० ३ ६१ सूत्रेणोनन् ततष्टाप् स्त्रियाम्]

यमे यच्छन्ति बलपराक्रमौ याभ्या ते (अन्नजले) २ ७ [यमु उपरमे (भ्वा०) धातो 'यम समुपनिविषु च' इति चानुकृष्टानुपसर्गेऽप्यप्]

यम्यः यमाय न्यायकारिणे हित (भा०—राजा) ५ ४४ ४ [यमप्राति० हितार्थे यत्]

यम्या या सर्वान् प्राणिनो निद्रया नियच्छति सा रात्रि प्र०—यम्येति रात्रिनाम निघ० १ ७, ३ ५५ ११ रात्रिदिने ५.४७ ५ [यम्या रात्रिनाम निघ० १.७]

यम्या न्यायकर्त्र्या (स्त्रिया) १२ ६३ **यम्यै**=यमस्य न्यायकर्त्तु स्त्रियै २५.५.

यय गच्छन् ५ ६१ २. **ययथुः**=यातम् १ ११७ १३ **ययन्थ**=यच्छति १ ५६ १. **ययाथ**=प्राप्नुया ३ ३३ १० गच्छ ६ ७० ४. प्राप्नुत ५ २६.६ **ययाम**=प्राप्नुयाम ७ ३८.१ **ययुः**=प्राप्नुवन्ति ६ ६५ २. गच्छन्ति ५ ८६ ३ यान्ति २३ १६ प्राप्नुयु २ ५ ५ **ययौ**=याति गच्छति ४.२६ ५ प्राप्नोति ३ ३३ ६ [या प्रापणे (अदा०) धातोर्लिटि मध्यमबहुवचने रूपम् । 'ययन्थ' प्रयोगे यमु उपरमे (भ्वा०) धातोर्लिट् । अन्यत्र लिट्लकारे रूपाणि । 'ययाम' प्रयोग इडभावश्छान्दस]

ययातिवत् यथा प्रयत्नवन्त पुरुषा. कर्माणि प्राप्नुवन्ति प्रापयन्ति च तद्वत् प्र०—अत्र 'यती प्रयत्ने' इत्यस्मादौणादिक इन्प्रत्यय स च बाहुलकाण्णित् सन्वच्च । समीक्षा—इद सायणाचार्येण भूतपूर्वस्य कस्यचित् ययाते राज्ञ कथासम्बन्धे व्याख्यात तदशुद्धम् १ ३१.१७ [ययातिप्राति० तुल्यार्थे वति । ययाति=यती प्रयत्ने (भ्वा०) धातोरौणा० इन् । स च बहुलवचनात् णित् सन्वच्च]

ययिम् प्राप्तव्य मार्गम् १ ८७ २ याति सोऽय मेघस्तम् १ ५१.११. **ययिः**=यो याति स (नियमपालको जन) ५.७३.७. याता (विद्वज्जन) ५ ८७ ५ [या प्रापणे (अदा०) धातो 'आदृगमहन०' इति किर्लिट्वच्च]

ययुः यो याति स (अग्नि=सूर्यरूपः) २२ १६ [या प्रापणे (अदा०) धातो 'यो द्वे च' उ० १ २१ सूत्रेण उ सन्वच्च]

ययम् ययिं यातारम् (रथम्) प्र०—अत्र 'आदृगमहन०' इति कि प्रत्यय 'अमि पूर्व' इत्यत्र 'वाच्छन्दसि' इत्यनुवर्त्तनात् पूर्वसवर्णाऽभावपक्षे यणादेश २ ३७ ५ [या प्रापणे (अदा०) धातो 'आदृगमहन०' इति कि ।

इति शपो लुक् १ ८५ १२ [यमु उपरमे (भ्वा०) धातोर्लोट् । 'बहुल छन्दसी' ति शपो लुक्]

यन्तन वियच्छत ५ ५५ ६ [यमु उपरमे (भ्वा०) धातोर्लोटि शपो लुकि च रूपम् । तप्रत्ययस्य तनबादेश]

यन्ता नियमकर्त्ता (परमेश्वर) ५ ३५ नियामक (विद्वज्जन) १८ २८ निग्रहीता (अग्नि =पावक इव सज्जन) ३ १३ ३ नियन्ता (मनुष्य) ६ २२ **यन्तारम्**= नियन्तारमुपरतम् (वेतन=परमात्मानम्) ३ ३ ८ **यन्तारः**=ये यान्ति प्राप्नुवन्ति ते (सूरय =धार्मिका विद्वास) ७ १६ ७ निगृहीतेन्द्रिया (वीरा पुरुषा) ३३ १४ [यमु उपरमे (भ्वा०) धातो कर्त्तरि तृच् । यन्ता=अपानो वै यन्ताऽपानेन ह्यय यत प्राणो न पराङ् भवति ऐ० २ ४० वायुर्वै यन्ता ऐ० २ ४१]

यन्ता यन्तौ प्राप्नुवन्तौ (जनौ) १ १३१ ३ [इण् गतौ (अदा०) धातो शतृ । द्विवचनस्याकारादेशश्छान्दस]

यन्तारा नियन्तारौ (कालसृष्टिक्रमौ) १ १६२ १६ [यमु उपरमे (भ्वा०) धातो. कर्त्तरि तृच् । द्विवचनस्याकारादेशश्छान्दस]

यन्तुरम् यन्तारम् (अग्नि=विद्वासम्) प्र०—अत्र यम-धातोर्बाहुलकात्तुर प्रत्यय ३ २७ ११ [यमु उपरमे (भ्वा०) धातोर्बाहु० औणा० तुर]

यन्त्रम् यन्त्रयति सङ्कुचति चालयति निबध्नाति वा येन तत् (कलायन्त्रम्) ४ १८ यन्त्र्यते, यन्त्रयन्ति सङ्कोचयन्ति विलिखन्ति चालयन्ति वा येन तत् (भा०—यानकलाकीलयन्त्रादिकम्) १ ३४ १ **यन्त्रेण**=कलाकौशलतयोत्पादितेन (साम्राज्येन) १८ ३७ [यमु उपरमे (भ्वा०) धातो 'गुधृवीपचि०' उ० ४ १६७ सूत्रेण स्त्र । अथवा यत्रि सकोचने (चुरा०) धातोर्घञ्]

यन्त्रिये शिल्पविद्यासिद्धाना यन्त्राणामर्हे योग्ये निष्पादने ६ ३० [यन्त्रप्राति० अर्हत्यर्थे घश्छान्दस]

यन्त्री यन्त्रनिमित्ता भा०—यन्त्रवज्जितेन्द्रिया अ०—भूमिरिव (स्त्री) १४ २२ यन्त्रवत्स्थिता (भा०—भूमिवत् क्षमान्विता स्त्री) १४ २२ [यत्रि सकोचने (चुरा०) धातोरौणा० इन् । तत स्त्रियाम् 'कृदिकारादक्तिन' इति ङीप्]

यन्धि नियच्छ ६ २४ ६ प्रयच्छ ४ ३२ ७ यच्छ १ १२१ १४ [यमु उपरमे (भ्वा०) धातोर्लोट् । शपो लुक् । यन्धि याच्ञाकर्मा निघ० ३ १६]

यमत् उपरमेत १२ ११. नियच्छेत् ५ ३४ २ यच्छति ५ ४६ ५ यमति=नियमयति प्र०—अत्र 'छन्दस्युभयथा' इति शप आर्धधातुकत्वाण् णिलोप १ १०० ६ यच्छेत् प्र०—अत्र लेटि 'बहुल छन्दसि' इति शत्रभाव १ १४१ ११ **यमतुः**=सयच्छत ६ ६७ १ **यमते**=यच्छति प्र०—'वाच्छन्दसि' इति छादेशो न १ १२७ ३ **यमन्**=निग्रह कुर्वन्तु ५ ४४ ५ यच्छन्तु ३ ४५ १ **यमसे**=निगृह्णामि ५ ३३ ३ नियच्छसि १० २० **यमिष्ट**=नियच्छेत् ५ ३२ ७ **यमुः**=नियच्छेयु ५ ६१ ३ [यमु उपरमे (भ्वा०) धातोर्लेट् । 'वा छन्दसी' ति छादेशो न । अन्यत्र लट् लङ् लुङ् लिट् च]

यमनः य सद्गुणान् यच्छति स, भा०—जितेन्द्रिय (विद्वज्जन) १८ २८ उपरन्ता (मनुष्य) ६ २२ [यमु उपरमे (भ्वा०) धातो 'कृत्यल्युटो बहुलम्' इति कर्त्तरि ल्युट्]

यमनी आकर्षणेन नियन्तु शीला आकाशवद् दृढा (स्त्री) १४ २२ [यमु उपरमे (भ्वा०) धातोर्ल्युडन्तात् स्त्रिया ङीप्]

यमनेत्राः यमेष्वहिंसादिषु योगाङ्गेषु नीतिषु वा नेत्र प्रापण येषा ते (देवा.=योगिनो न्यायाधीशा) ६ ३६ **यमनेत्रेभ्यः**=यमस्य वायोर्नेत्र नयनमिव नीतिर्येषा तेभ्य (देवेभ्य =विपश्चिद्भ्य) ६ ३५ [यम-नेत्रपदयो समास । यममिति व्याख्यास्यते । नेत्रम्=णीञ् प्रापणे (भ्वा०) धातोरौणा० ष्ट्रन्]

यमम् नियन्तारम् (वीरजनम्) २ ५ १ यच्छति येन तम् (श्रव =सर्वविद्याश्रवणम्) १ ७३ १० सुनियमम् ३ २७ ३ वेगवाला होने से वायु को स० वि० २१६, ८ २४ २२ **यमस्य**=उपरतस्य मृत्योरिव शत्रुसमूहस्य १.११६ २ न्यायाधीशस्य (राज्ञ) २५ ४ सर्वनियन्तु (ईश्वरस्य) १ ८३ ५ वायो १ ३५ ६ **यमः**=सर्वोपरत (सेनेश) १ ६६ ४ नियन्ता न्यायाधीश इव (अर्वा=वेगवान् वह्निरिव वर्त्तमानो जन) २६ १४ यन्ता (परमेश्वर) ३५ १ वायु, विद्युत् और सूर्य स० वि० २१६, ८ ५७ न्यायो सयमी सन्तान १६ ५१ यच्छति सोऽय सूर्य ८ ५७ सत्यविद्याव्यवस्थापक (परमेश्वर) ऋ० भू० २६०, १६ ५१ **यमाय**=नियन्त्रे न्यायाधीशाय वायवे वा ३६ १३. दण्डदानाय ३० १४. **यमेन**=नियामकेन (वायुना) १ १६३ २ वायुना विद्युता वा सह ७ ३३ १२. नियन्त्रा जगदीश्वरेण ७ ३३ ६ न्यायाधीशेन १२ ६३. [यमु उपरमे (भ्वा०) धातो कर्त्तरि पचाद्यच् । यम = यच्छतीति सत नि० १० १६. यम पदनाम निघ० ५ ४

यद् यविष्ठ इति यद्वै जात इद सर्वमयुवत तस्माद् यविष्ठ श० ७ ५ २ ३८]

यविष्ठ्य यो वेगेन पदार्थान् यौति सयुनक्ति सहतान् भिनत्ति वा स युवाऽतिशयेन युवा यविष्ठो यविष्ठ एव यविष्ठ्यस्तत्सम्बुद्धौ (अग्ने=सुखप्रदात सभेश) १ ३६ ६ येऽतिशयेन युवानस्तेषु साधो (राजन्) ७ १६ १० अतिशयेन ब्रह्मचर्यविद्याभ्या प्राप्तयौवन (विद्वदुपदेशक) ३ ९ ६ यविष्ठ्येष्वतिशयेन युवसु कुशलस्तत्सम्बुद्धौ (अग्ने=विद्वज्जन) ३ २८ २ योऽतिशयेन युवा पदार्थानाममिश्रीकरणे वलवान् स यविष्ठ यविष्ठ एव यविष्ठ्यस्तत्सम्बुद्धौ (अग्ने) प्र०—अत्र युवन्-शब्दादिष्ठन् प्रत्ययस्ततो 'नवसूर्त्तमर्त्तयविष्ठेभ्यो यत्' अ० ५ ४ ३६ इति वार्त्तिकेन स्वार्थे यत्प्रत्यय ३ ३ हे वलवत्तम (ईश्वर) आर्याभि० १ १२

यविष्ठ्यम्=योऽतिशयितेषु युवसु भवम् (ऋत्विजम्) ५ २६ ७ [यविष्ठ=युवन्प्राति० अतिशायन इष्ठन्। यविष्ठप्राति० 'नवसूर्त्तमर्त्तयविष्ठेभ्यो यत्' अ० ५ ४ ३६ वा०सूत्रेण स्वार्थे यत्। साध्वर्थे कुशलार्थे वा यत्। यविष्ठो ह्यग्नि श० १ ४ १ २६]

यव्यम् यवाना भवन क्षेत्रम् १ १४० १३ [यवप्राति० 'यवयवकषष्टिकाद् यत्' अ० ५ २ ३ सूत्रेण भवने क्षेत्रे ऽभिधेये यत्]

यव्या यवेषु साधूनि हवींषि यव्यानि प्र०—अत्र 'शेश्छन्दसि०' इति शेर्लोप ३ ४६ [यवप्राति० 'तत्र साधु' रित्यर्थे यत्। यव्यप्राति० शेर्लोपश्छन्दसि]

यव्या नदीव १ १७३ १२ [यव्या नदीनाम निघ० १ १३ यव्या मासा श० १ ७ २ २६]

यव्या मिश्रिताऽमिश्रितगत्या १ १६७ ४ [यव्यप्राति० तृतीयैकवचनस्य 'सुपा सुलुग्०' इति डादेश । यव्यमिति व्याख्यातम्]

यव्यावत्याम् यवे भवा यव्या पाका विद्यन्ते यस्या सेनायाम् ६ २७ ६ [यव्यप्राति० मतुवन्तात् स्त्रियां ङीप् तत सप्तमी। यव्य=यवप्राति० भवार्थे यत्]

यशसम् अतिकीर्तियुक्तम् (रयिम्) १ ९२ ८ यशस्विनम् (पतिम्) ५ ३२ ११ कीर्तिकारकम् (रयिं=श्रियम्) ३ १ १९ सर्वोत्तमकीर्तिवर्धकम् (रयि=विद्यासुवर्णाद्युत्तमधनम्) १ १ ३ यश कीर्त्तिर्विद्यते यस्य तम् (देव=दातार विद्वासम्) ६ ४९ ९ शिष्टाचारादिकीर्त्तिमत् (धनम्) वे० भा० न० १ १ ३ **यशसः**=यशस्विन (मनुष्या) ४ ५१ ११ **यशसे**=प्रशसिताय (विदुषे जनाय) ५ १५ १

यशसौ=कीर्त्तिधनयुक्ते (द्यावापृथिवी=द्यौर्भूमिश्च) ५ ४३ २. [यशस्प्राति० प्रशसाया मतुवर्थे 'अर्शादिभ्योऽच्' अ० ५.२ १२७ सूत्रेणाच्। यशस् इति व्याख्यास्यते]

यशसा सत्कीर्त्या १ १२२ ४ उत्कृष्ट गुणग्रहण सत्याचरण यशस्तेन ऋ० भू० १०१, अथर्व० १२ ५ २ सर्वोत्तमसत्कर्मानुष्ठानोद्भूतसत्यकीर्त्या ऋ० भू० १९१, अथर्व० १३ ४ ४९ उदकेनाऽन्नेन धनेन वा ५ ८ ४ **यशसे**=सत्कीर्त्यै २० ३ **यशः**=कीर्त्तिकर धर्म्यकर्माचरणम् भा०—ईश्वराज्ञापालनम् ३२ ३ परमकीर्त्तिसाधकम् (राध=धनम्) जल वा १ १० ७ कीर्त्ति १८ ८ सत्कीर्त्तिकथनम् २० ५ धर्मयुक्त कामो का करना स० प्र० ४५५, ३२ ३ [अशूङ् व्याप्तौ सघाते च (स्वा०) धातो 'अशेर्देवने युट् च' उ० ४ १९१. सूत्रेणासुन् युडागमश्च। यश उदकनाम निघ० १ १२ अन्ननाम निघ० २ ७ धननाम निघ० २ १० सामवेद एव यश. गो० पू० ५ १५ सामवेदो यश श० १२ ३ ४ ९ उद्गातैव यश गो० पू० ५ १५ आदित्यो यश श० १२ ३ ४.८ आदित्य एव यश गो० पू० ५ १५ चक्षुर्यश श० १२ ३ ४ १० चक्षुरेव यश गो० पू० ५ १५ प्राणा वै यश श० १४ ५ २ ५ द्यौर्यश श०१२ ३ ४ ७ द्यौरेव यश गो० पू० ५.१५ वर्षा एव यश गो० पू० ५ १५ जगत्येव यश गो० पू० ५ १५ सप्तदश (स्तोम) एव यश गो० पू० ५ १५ उदीच्येव यश गो० पू० ५.१५ पशवो यश श० १२ ८ ३ १ यशो वै सोमो राजा ऐ० १ १३ यशो वै सोम श० ४ २ ४ ९. सोमो वै यश तै० २ २ ८ ८ यश उ वै सोमो राजान्नाद्यम् कौ० ९ ६ यशो हि सुरा श० १२ ७ ३ १४ यशो वै हिरण्यम् ऐ० ७ १८ यशो देवा श० २ १ ४ ९ तस्माद् (देवा) यश श० ३ ४ २ ८ श्रीर्वै यश जै० ३ २५८]

यशस्तमम् अतिशयेन कीर्त्तिकारकम् (अग्निम्) ७ १६ ४ **यशस्तमस्य**=अतिशयेन यशस्विनो बहुजलयुक्तस्य वा (अग्ने=पावकस्य) २ ८ १ [यशस्प्राति० अतिशायने तमप्। 'यशस्' इति व्याख्यातम्]

यशस्वतः यशो विद्याधर्मसर्वोपकाराख्या प्रशसा विद्यते येषा तान् (मनुष्यान्) प्र०—अत्र प्रशसार्थे मतुप् १ ९ ६ **यशस्वता**=बहु यशो विद्यते यस्मिँस्तेन (राया=धनेन) ३ १६ ६

यशस्वतीः पुण्यकीर्त्तिमत्या (कुमारिका) १ ७९ १ [यशस्प्राति० प्रशसाया मतुवन्तात् स्त्रिया ङीप्]

यशोभगिन्यै यशासि सत्यवचनादीनि कर्माणि

लिट्वच्च । ततो 'अमि पूर्व' इति पूर्वसवर्णादेशो न भवति छान्दसत्वात्]

यवन्त वियोजयेयु ५ २ ५ [यु मिश्रणेऽमिश्रणे च (अदा०) धातोर्लङ् । अटोऽभाव, शपश्च लुङ् न छान्दसत्वात्]

यवम् अन्नविशेषम् ७ ३ ४ धान्यसमूहम् २३ ३८ यवादिधान्यम् १६ ६ **यवस्य**=उत्तमस्य यवादेरन्नस्य १ ५३ २ **यव**=सुखकारी धान्यविशेष १ ६६ २ मिश्राऽमिश्रव्यवहार १ १३५ ८ मिश्रणाऽमिश्रणकर्त्ता (पुरुष) ५ २६ सयोगविभागकर्त्ता (सभाध्यक्ष) ६ १ **यवानाम्**=मिश्रितानाम् (पदार्थानाम्) १४ २६ [यु मिश्रणेऽमिश्रणे च (अदा०) धातो 'ऋदोरप्' इत्यप् । यदयुवत तस्माद् यवा नाम श० ३ ६ १, ८ ६ निर्वरुणत्वाय एव यवा ता० १८ ६ १७ वरुण्यो यव श० ४ २ १ ११ वरुण्यो ह वा ऽअग्रे यव श० २ ५ २ १ वारुण यवमय चरु निर्वपति तै० १ ७ २ ६ वारुणो यवमयश्चरु श० ५ २.४ ११ तस्य (सोमस्य) अश्रु प्रास्कन्दत् ततो यव समभवत् श० ४ २ १ ११ स य सर्वासामोषधीना रसऽआसीत्त यवेष्वदधुस्तस्माद् यत्रान्या ऽओषधयो म्लायन्ति तदेते मोदमाना वर्धन्ते श० ३ ६ १ १० सैनान्य वा एतदोषधीना यद् यवा ऐ० ८ १६ देवा त (मेधम्) खनन्त इवान्वोपुस्तमन्वविन्दस्ताविमौ व्रीहियवौ श० १ २ ३ ७ सर्वेषा वा एष पशूना मेधो यद् व्रीहियवौ श० ३ ८ ३ १ विड् वै यव श० १३ २ ६ ८ राष्ट्र यव तै० ३ ६ ७ २ अथ ये फेनास्ते यवा श० १२ ७ १.४ ते (पूर्वपक्षा) हीद सर्वं युवते श० ८ ४ २ ११ स यो देवानाम् (अर्धमास =शुक्लपक्ष) आसीत् । स यवायुवत हि तेन देवा श० १ ७ २ २५ योऽसुराणाम् (अर्धमास =कृष्णपक्ष) स यवायुवत हि त देवा श० १ ७ २ २६ पूर्वपक्षा वै यवा श० ८ ४ २ ११]

यवमन्तः बहवो यवा विद्यन्ते येषा ते (अ०—कृषीवला) १६ ६ बहुयवादिधान्ययुक्ता (अ०—कृषीवला) २३ ३८ [यवप्राति० भूम्न्यर्थे मतुप्]

यवय प्र०—अत्र 'वाच्छन्दसि' अ० १ ४ ६ इति भाष्यवार्त्तिकेन वृद्ध्यभाव ६ १ श्रेष्ठैर्गुणै सह मिश्रय दोषेभ्यश्च दूरीकारय ५ २६ वियुहि ६ १ मिश्रय प्र०—'प्रातिपदिकाद्धात्वर्थे बहुलमिष्ठवच्च' इति यवशब्दाद्धात्वर्थे णिच् १ ५ १० [यवप्राति० 'प्रातिपदिकाद् धात्वर्थे बहुलम् इष्ठवच्चे' ति वा०सूत्रेण णिजन्तात्लोट् । वृद्ध्यभावश्छान्दस]

यवसप्रथमानाम् यवसो यवाऽन्न प्रथम येषा तेषाम् (अग्निष्वात्ताना=गृहीताग्निजनानाम्) २ १ ४३. यवसस्य विस्तारकाणाम् (अवत्तानाम्=उदारचेतोजनानाम्) २ १ ४५ मिश्रिताऽमिश्रिताद्यानाम् (शतक्रियाणा=विद्वद्विशिष्टातृजनानाम्) २ १ ४४ [यवस-प्रथमपदयो समास । यवस =यु मिश्रणेऽमिश्रणे च (अदा०) धातो 'वहियुभ्या णित्' उ० ३ ११६ सूत्रेण असच् । बहुलवचनात् णित्व न]

यवसम् धान्यपलादिकम् ३ ४५ ३ सोमलताम् ५ ८७ २ **यवसात्**=भक्षणीयाद् घासाद्यात् ७ १८ १० **यवसे**=घासे ७ ३ २ बुषादौ ५ ५३ १६ **यवसेन**=बुसादिनेव ४ ४२ १० अभीष्टेन तृणबुसादिना ७ १० [यु मिश्रणेऽमिश्रणे च (अदा०) धातोर्वहि० औणा० असच्]

यवसाद ये यवसमन्नादिकमदन्ति ते (द्रप्सा =भृत्या ज्वालादयो गुणा वा) १ ६४ ११. [यवसोपपदे अद भक्षणे (अदा०) धातोरण्]

यवसे अद्याय घासाय ५ ६ ४ बुसाद्याय ६ २ ६ [यु मिश्रणेऽमिश्रणे च (अदा०) धातोरौणा० असुन्]

यवसेव बुसादिनेव ४ ४१ ५ [यवसा-इवपदयो: समास । यवसा=यवस्प्राति० तृतीया]

यवाशिरम् यो यवानश्नाति तम् (सोम=रसम्) २ २२ १. यवा अश्यन्ते यस्मिँस्तम् (भोजनम्) ३ ४२ ७ **यवाशिर:**=यवाद्योषधिसयोगेन सस्कृतस्य (अन्नस्य) १ १८७ ६. [यव-अशिरपदयो समास । अशिर =अश भोजने (क्र्या०) धातो 'अशेर्नित्' उ० १ ५२ सूत्रेण किरच्]

यविष्ठ अतिशयेन युवन् (अग्ने=श्रोतृजन) १२ ४२. अतिशयेन प्राप्तयौवन (अग्ने=विद्याविनयप्रकाशितजन) ४ १२ ४ अतिशयेन सङ्गमयितो विभाजक वा (अग्ने=जगदीश्वर) ६ १५ १४ यौति मिश्रयति विविनक्ति वा सोऽतिशयितस्तत्सम्बुद्धौ (अग्ने=पदार्थविद्यावेत्तविद्वन्) १ २२ १० शरीरात्मबलाभ्या युक्त (अग्ने=राजन्) ६ ४८ ८ **यविष्ठम्**=बलवत्तरम् (अग्नि=विद्वज्जनम्) १ ४४ ४ अतिशयेन विभाजकम् (अग्नि=विद्युतम्) ७ १२ १ **यविष्ठ:**=अतिशयेन युवा (जन) १ १४१ ४ अतिशयेन यौवन प्राप्त (प्रशसमानो जन) ७ ७ ३ [युवन्-प्राति० अतिशायन इष्ठन् । 'स्थूलदूरयुव०' अ० ६ ४ १५६ सूत्रेण यणादिपरस्य लोप पूर्वस्य च गुण । युवन्=यु मिश्रणेऽमिश्रणे च (अदा०) धातो 'कनिन् युवृषितक्षि०' उ० १ १५६ सूत्रेण कनिन् । एतद्धाम्य (अग्ने) प्रिय धाम

गच्छामि २ १६ ७. प्राप्नोमि १ २४ ११ **यासत्**=उपागच्छेत् ५ ४० ५ प्राप्नुयात् ४ २० १ प्रापयेत् ६ ६६ ५ प्राप्नोति १७ १६ यायात् २० ४८ प्रापयति १ ७१ ६ प्रयतेत ६ १६ २८ **यासिष्टम्**=प्राप्नुत ७ ४० ५ यातम् १ ११६ ४ **यासिसीष्ठाः**=प्रेरयेथा, प्र०—अत्र 'वा छन्दसि' इति मूर्धन्यादेशाभाव ४ १ ४ याया प्राप्नुया २१ ३ **यासीष्ट**=प्राप्नुयात प्र०—अत्र व्यत्ययेनात्मनेपदम् १ १६५ १५ **याहि**=प्राप्तो भव भवति वा १ ३ ४ गच्छ गच्छति वा प्र०—अत्र पक्षे व्यत्यय १ २ १ याति समन्तात् प्रापयति १ ३ ६ **यासि**=गच्छसि ४ १६ ११ प्राप्नोपि प्रापयति वा प्र०—अत्र पक्षे व्यत्यय ३ ५२ याति प्र०—अत्र पुरुषव्यत्यय १ १२ ४ [या प्रापणे (अदा०) धातोर्लेट्। अन्यत्र लङ्, लोट्, लट्, लिङ् च। याति गतिकर्मा निघ० २ १४]

यात् यावन्ति (विज्ञानानि) प्र०—'छान्दसो वर्णलोपो वा इति वलोप। 'शेश्छन्दसि बहुलम्' इति शेर्लोप ६ २१ ६ [यत् सर्वनाम्न परिमाणे 'यत्तदेतेभ्य परिमाणे वतुप्' अ० ५ २ ३६ सूत्रेण वतुप्। आ सर्वनाम्न इति वतुपि प्रत्यय आकारादेशे यावदिति रूपम्]

यातन प्राप्नुत ४ ३४ ६ प्राप्नुवन्तु १ १६५ १३ [या प्रापणे (अदा०) धातोर्लोटि म० बहुवचने तस्य तनबादेश]

यातयज्जनः यातयन्त प्रयत्नकारयितारो जना यस्य स (अर्यमा=न्यायाधीश) १ १३६ ३ प्रेरयन् (मित्र = आप्तो विद्वज्जन) ३ ५६ ५ पुरुषार्थवत्पुरुप (अर्यमा= न्यायेश) १ १३६.३ [यातयत्-जनपदयो समास। यातयत्=यती प्रयत्ने (भ्वा०) धातोर्णिजन्ताच्छतृ]

यातयज्जना यातयन्तो जना ययोस्तौ (मित्रावरुणौ= अध्यापकोपदेशकौ) ५ ७२ २. ['यातयज्जन' इति व्याख्यातम्। ततो द्विवचनस्याकारादेशश्छान्दस]

यातयति पुरुपार्थयति ३ ५६ १ [यती प्रयत्ने (भ्वा०) धातोर्णिजन्तात्लट्। यातयति वधकर्मा निघ० २ १९]

यातयन्तम् सन्तानाय प्रयतन्तम् (पतिम्) ५ ३२ १२ [यती प्रयत्ने (भ्वा०) धातोर्णिजन्ताच्छतृ]

यातयमानः दण्ड प्रयच्छन् (अग्नि=विद्वज्जन) ६ ६ ४ [यती प्रयत्ने (भ्वा०) धातोर्णिजन्ताच्छानच्]

यातयासे: प्रेरये ५ ३ ६ [यती प्रयत्ने (भ्वा०) धातोर्णिजन्ताल्लिडि छान्दस रूपम्]

यातवः सङ्ग्राम ये यान्ति ते (योद्धृजना) ७ २१ ५ [या प्रापणे (अदा०) धातो 'कमिमनिजनि०' उ० १ ७३. सूत्रेण तु.]

यातवे यातु प्राप्नुम् प्र०—अत्र 'तुमर्थे से०' इति तवेन् प्रत्यय १.४४ ४ यातु गन्तुम् १ १५७ १ [या प्रापणे (अदा०) धातोस्तुमर्थे तवेन्]

यातः गमनादिव्यवहारप्रापक (अ०—नृपापति) १ ३२ १५ प्राप्त (रथ=रमणीय यानम्) १ १४१ ८ **याताः**=ये प्राप्तास्ते (नर=नायका जना) ५ ३३ ५ [या प्रापणे (अदा०) धातो 'गत्यर्थाकर्मक०' अ० ३ ४ ७२ सूत्रेण कर्तरि क्त]

यातारम् देशान्तरे प्रापयितारम् (सूर्यादिव्य कमप्यर्थम्) १ ३२ १४ [या प्रापणे (अदा०) धातो कर्त्तरि तृच्]

यातुजूनाम् ये यान्ति ये च जवन्ते तेषाम् (दुष्टधर्माचारिणा जनाना) १३ १३ प्रापकवेगानाम् (जनानाम) ४ ४ ५ [यातु-जूपदयो समास। यातु=या प्रापणे (अदा०) धातोरौणा० तु। जू=जु (सौत्रो धातु) धातो 'भ्राजभासधुर्विद्युत्०' अ० ३ २ १७७ सूत्रेण क्विप्]

यातुधानान् अन्यायेन परपदार्थधारकान् (रक्षस= दुष्टाञ्जनान्) ३४ २६ यातवो यातना पीडा धीयन्ते येषु तान् दस्यून् १ ३५ १० **यातुधानानाम्**=ये यान्ति परपदार्थान् दधति तेषाम् (भा०—उत्कोचकानाम्) १३ ७ **यातुधानाः**=प्रजापीडकाः (जना) १५ १६ **यातुधानेभ्यः**=यान्ति येषु ते यातवो मार्गास्तेभ्यो धन येषा तेभ्य (महात्मजनेभ्य) ३० ८ [यातूपपदे डुधाञ् धारणपोषणयो (जु०) धातो 'कृत्यल्युटो बहुलम्' इति कर्त्तरि ल्युट्। यातुरिति व्याख्यातम्। यातुधाना हेति मं० २८ १०]

यातुधान्यः रोगकारिण्यो व्यभिचारिण्यश्च स्त्रिय १६ ५ यातूनि दुराचरणशीलानि दधति ता (दुर्व्यथा) १ १६१ ८ [यातुधानमिति ल्युडन्त व्याख्यातम्। तत स्त्रिया ङीप्]

यातुम् गन्तुम् ५ १२ २ [या प्रापणे (अदा०) धातोस्तुमुन्]

यातुमतीनाम् बहवो यातवो हिंसका विद्यन्ते यासु सेनासु तासाम् १ १३३ २ हिंस्राणा सेनानाम् १ १३३ ३ [यातुप्राति० भूम्न्यर्थे मतुप्-प्रत्ययान्तात् स्त्रिया ङीप्। यातु=या प्रापणे (अदा०) धातोरौणा० तु। यातयति वधकर्मा निघ० २.१९]

यातुमावतः यान्ति प्राप्नुवन्ति ते यातव मत्सदृशा

भजितु शील यस्यास्तस्यै भा०—कीर्त्तिहेतुभूतायै (सरस्वत्यै=वेदवाण्यै) २ २० ['यशस्' इत्युपपदे भज सेवायाम् (भ्वा०) धातोस्ताच्छील्ये णिनिप्रत्यये छान्दस रूपम्। अथवा यशस्-भगिनीपदयो समास। भगिनी=भगप्राति० मत्वर्थ इनि। तत स्त्रिया ङीप्]

यष्टवे यष्टुम् प्र०—अत्र यजवातोस्तवेन्प्रत्यय १ १३ ६ सङ्गन्तुम् ४ ३७ ७ [यज देवपूजासगतिकरणदानेषु (भ्वा०) धातोस्तुमर्थे तवेन्]

यष्टा सङ्गन्ता, सुष्ठु विज्ञाता दाता वा (गोपा=गवा पाता जन) २ ६ ६ [यज देवपूजासगतिकरणदानेषु (भ्वा०) धातो कर्त्तरि तृच्]

यह्वो क्रियाकौशलयुक्तस्याऽपत्य तत्सम्बुद्धौ प्र०—यहुरित्यपत्यनामसु पठितम् निघ० २ २, १ २६ १० सुसन्तान १५ ३५ पुत्र १ ७४ ५

यह्व हे महागुणविशिष्ट (अग्ने=पावकवत्पवित्र राजन्) २६ २८ **यह्वम्**=गुणैर्महान्तम् (अग्नि=परमेश्वरम्) १ ३६ १ **यह्वः**=महान् (अग्नि) ३ १ १२ [यह्व=महन्नाम निघ० ३ ३ यह्व इति महतो नामधेय यातश्च हूतञ्च भवति नि० ८ ८ यज देवपूजासगतिकरणदानेषु (भ्वा०) धातो 'शेवायह्वजिह्वा०' उ० १ १५४ सूत्रेण वन्प्रत्यय जकारस्य हकारो निपात्यते]

यह्वतीः यह्वान् महत इवाऽऽचरन्ती (अप=जलानि) प्र०—यह्व इति महन्नाम निघ० ३ ३ यह्व-शब्दादाचारे क्विप् १ १०५ ११ बडे व्यापक आकाशस्थ (आप=प्राणप्रद वायुए) स० वि० १६६, ६ ११३ ८ [यह्व आचारे क्विबन्तात्छतृ। तत स्त्रिया ङीप्]

यह्वा इव महान्तो वृक्षा इव ५ १ १ महान्तो धार्मिका जना इव १५ २४ [यह्वा इवपदयो समास]

यह्वाः महत्य (सिन्धो प्रवाहा) ४ ५८ ७ [यह्वप्राति० स्त्रिया टाप्]

यह्वी महती महत्यौ (उपे=स्त्रियौ) २१ १७ कारणमूनू (रात्रिदिने) १ १४२ ७ बडे ही शुभ गुण कर्म स्वभाव वाले दोनो स्त्रीपुरुप स० वि० १०५, ५ ४१ ७ [यह्वप्राति० स्त्रिया ङीप् छान्दस। ततो द्विवचनस्य पूर्वसवर्णश्छान्दस]

यह्वी महती (विदुपी स्त्री) ५ ४१ ७ **यह्वीः**=महत्य स्त्रिय ३ १४ महती (गिर) १ ५६ ४ महाविद्यागुणस्वभावयुक्ता (युवतय=प्राप्तयौवना स्त्रिय) ३ १ ६ महत्यो रुधिरविद्युदादिगतय १ ७१ ७ [यह्व महन्नाम निघ० ३ ३ तत: स्त्रिया ङीप्]

यसत् ददाति ६ ४६ ७ यच्छेत् प्राप्नुयात् ४ २५ ४. यच्छन्तु प्रददतु प्र०—अत्र वचनव्यत्ययेन बहुवचनस्थाने एकवचनम् १ १०७ २ प्रदद्यात् ४ ५४ ६ दद्यात् ५ २ २ नियच्छेत् १ ६६ ८ प्रेरयेत् १ १६० ३ **यंसते**=रक्षति १ १४३ ७ यच्छन्ति १ ८० ३ **यसन्**=प्रयच्छन्ति प्र०—अत्र 'वाच्छन्दसि' इत्युसभावो लुङ्यडभावश्च १ ३६ ७ यच्छन्तु ददतु १ ६० ३ **यंसि**=दुष्टाचारान्निरुणत्सि, प्र०—अत्र शपो लुक् १ ६३ ८ प्राप्नोपि नियच्छसि वा ५ ३६ ४ यच्छ, दुष्टेभ्य कर्मभ्य उपरतोऽसि प्र०—अत्र लोडर्थे लट् १ ४२ ६ [यसन्=यच्छन्तु नि० ६ १८ यमु उपरमे (भ्वा०) धातोर्लेटि सिपि च रूपम्। अन्यत्र लुङ् लट् च]

याचति याचना करता है स० वि० २०६, अथर्व० ६ ६ १.४ [टुयाचृ याच्ञायाम् (भ्वा०) धातोर्लट्। याचति वधकर्मा निघ० २ १६]

याच्छ्रेष्ठाभिः शत्रुवधकर्मण्युत्तमाभि (ऊतिभि=रक्षादिभि) ३ ५३ २१

याज्याभिः याभि क्रियाभिरिज्यन्ते ताभि १६ २० यज्ञसम्बद्धक्रियाभि २० १२ **याज्याः**=यज्ञक्रिया २० १२ [याज्यम्=यज देवपूजासगतिकरणदानेषु (भ्वा०) धातोर्ण्यत्। तत स्त्रिया टाप्। यजूंष्यपि याज्या काठ० ११ १० वृष्टिर्वै याज्या ऐ० २ ४१]

यात् यायात् प्र०—लेट्-प्रयोग १ ८० १५ **यात**=गच्छत भा०—अर्थकाममोक्षान् प्राप्नुत २१ ११ गमयत १ ८६ १० अभीष्ट स्थान प्राप्नुत १ ३७ १४ समन्तात्प्राप्नुत १ १७१ २ **यातम्**=प्राप्नुतम् ४ १३ १ आगच्छतम् ६ ६७ ३ प्राप्नुयातम् ७ ५३ २ उपागतम् १ ११८.११ गच्छत प्र०—अत्र व्यत्यय १ २ ५ प्राप्नुत १.२ ६ गमयत १ ३ ३ प्रापयतम् १ ३० १७ गच्छतम् १ ४७ २ **यातः**=गमयत आगमयतञ्च ऋ० भू० १६६, ऋ० १ ३ ५ ७ **याताम्**=गच्छताम् ४ २८ ३ **याति**=प्राप्नोति प्रापयति वा। प्र०—अत्र पक्षेऽन्तर्गतो ण्यर्थ १ ३५ २ **यातु**=गच्छतु १ ११८ १ आगच्छतु ४ १६ १ प्राप्नोति प्राप्नोतु वा १ ३५ १० **याथ**=गच्छत ६ ५० २ प्राप्नुथ २ ३४ ३ प्राप्नुत १ ३६ १ गच्छथ ३ ६० ४ **याथः** गच्छथ १ १८३ ३ प्राप्नुतम् १ ३४ २ प्राप्नुथ १ १३५ ७ **यान्ति**=गच्छन्ति १ ८८ २ **यान्तु**=प्राप्नुवन्तु १ १६७ २ **यामः**=प्राप्नुयाम ३ ३३ ६ **यामि**=

[या प्रापणे (अदा०) धातोर्मनिन् । 'वा छन्दसी' ति दीर्घ-[illegible] न]

यामकोशाः यान्ति [illegible] ते यामा मार्गास्तेषा कोशा. [illegible] ३०.१५ [याम-कोशपदयो समास । कोश मेघनाम नि० १ १०]

यामयन्ति नियमयन्ति २५ ३६ [यमु उपरमे (भ्वा०) धातोर्णिजन्ताल्लट्]

यामश्रुतेभिः यामा श्रुता यैस्तै (सूरिभि.=[illegible]) ५ ५२ १५ [याम-श्रुतपदयो समास]

यामहूतमा यौ यामानाह्वयतस्तावतिशयितौ ([illegible]=अध्यापकोपदेशकौ) ५ ७३ ६ [यामहूप्राति० [illegible] तमप्। ततो द्विवचनस्याकारश्छान्दस । [illegible] = यामोपपदे [illegible] स्पर्द्धाया शब्दे च (भ्वा०) धातो कर्त्तरि क्विप्]

यामहूतिषु उपरमाऽऽह्वानरूपकर्म्मसु ५ ६१ १५ [याम-हूतिपदयो समास । 'याम' इति व्याख्यातम् । [illegible] =[illegible] स्पर्द्धायाम् (भ्वा०) धातो. स्त्रिया क्तिन्]

यामास. यम-नियमान्विता (अध्यापकोपदेशका) ५ [illegible].१२ [यामप्राति० जसोऽसुक्]

याम्याय यो यामेषु न्यायकारिषु साधुस्तस्मै (न्याया-धीशाय) १६ ३३ [यामप्राति० 'तत्र साधु' रित्यर्थे यत । 'याम' इति व्याख्यातम्]

यावत् यावत्परिमाणा (सिन्धव =समुद्रा) ३८ २६. **यावती**=यावत्परिमाणे (द्यावापृथिवी) ३८ २६ [यत् सर्वनाम्न 'यत्तदेतेभ्य. परिमाणे वतुप्' इति वतुप् । आ सर्वनाम्न ' इत्या [illegible] प्रत्यय आकारादेश]

यावय वियोजय प्र०—अत्र तुजादीना० इत्यभ्यास-दीर्घम् ६ ४८ १२ वियोजय ६ ४६ ६ **यावयन्तु**=दूरी-कुर्वन्तु प्र०—अत्र 'मन्त्रितापाम्' इत्यादिना दीर्घत्वम् ७.४४ ३ **यावयस्व**=पृथक्कुरु [illegible] ५ ४२ ६ **यावी:**=अयावी [illegible] १.१२६ ३ [यु मिश्रणेऽमिश्रणे च (अदा०) धातोर्णिजन्ताल्लोट् । 'यावी' प्रयोगे लुङ्]

यावयद्द्वेषसम् यावयन्त द्वेष्टार द्वेषस द्वेष्टार पृथ-[illegible] ([illegible]) ६ ५ [illegible].४ **यावयद्द्वेषाः**= [illegible] द्वेषाकर्षणकर्माणि ययो [illegible] [illegible]) १ ११२ १२ [यावयत्-द्वेषस्पदयो समास । यावयत् [illegible] यु मिश्रणेऽमिश्रणे च (अदा०) धातो-[illegible] । द्वेषस्=द्विष [illegible] (अदा०) धातोरसुन्० [illegible]]

यावा यो याति स (विद्वज्जन) ७ १.५ [या प्रापणे (पदा०) धातो कर्त्तरि वनिप्]

याशूनाम् प्रयतमानानाम् (सज्जनानाम्) प्र०—अत्र यसु प्रयत्ने धातोर्बाहुलकादुण्प्रत्यय सस्य शश्च १ १२६ ६

यासिषत् यातुमिच्छतु १ १७४ ५. [या पापणे (अदा०) धातोरिच्छायामर्थे सन्नन्ताल्लेट् । 'वा छन्दसी' ति द्वित्व न]

युक्तग्रावा युक्तो ग्रावा मेघो येन स (पावक) ५ ३७ २. युक्तो ग्रावा मेघो यस्मिन् स (वीर-सन्तान) ३ ४ ६ युक्तो योजितो ग्रावा मेघो येन स (वीरपुरुष) ७ २ ६ **युक्तग्राव्णः**=युक्ता ग्रावाणो मेघा पाषाणो वा यस्मिस्तस्य (महत पदार्थस्य) २ १२.६ [युक्त-ग्रावन्पदयो समास । ग्रावा मेघनाम निघ० १ १० ग्रावाण पदनाम निघ० ५ ३ ग्रावाणो हन्तेर्वा गृणातेर्वा गृह्णातेर्वा नि० ६ ८]

युक्तः सहित. (विद्वज्जन.) १.६६ ४ कृतप्रयोजन (अश्वः) १ ८२ ५ **युक्तान्**=नियुक्तान् (अध्यक्षान्) १ २६ ५ सुखसम्पादकान् (वसन्तादीनृतून्) १.२३ १५. **युक्तानाम्**=समाहितानाम् (प्रजाजनानाम्) ४ ३२.१७ **युक्ताः**=सम्बद्धा (पदार्था) १ १६४ १६ एकीभूता: (ग्रावाण.=मेघा) ३४.१६ उद्युक्ता. (ग्रावाण.=मेघाः) ३ ३०.२ कृतयोगा (हरय.=मनुष्या) ७.२८.१. योजिता (हरय =मनुष्या) ३ ५३ ४ **युक्तेन**=कृतयोगाभ्यासेन (मनसा=विज्ञानेन शक्त्या=सामर्थ्येन च) .११ २. योग-युक्तेन (मनसा) ऋ० भू० १५६, ११.३ [युजिर् योगे (रुधा०) युज समाधौ (दिवा०) धातोर्वा क्त]

युक्ता सम्यक् सम्बद्धौ (हरी =अश्वौ) १ ८४ ३ युक्तौ (हरी) ८ ३३ कृतयोगाभ्यासौ (अश्विनौ=सभासेना-धीशौ) १ ११६ १८ युक्तेन (राया=धनेन) ७.४३.५ [युक्तप्राति० द्विवचनस्याकारादेशश्छान्दस.]

युक्ताऽश्वम् युक्ता अश्वा येन तत् (रयि=धनम्) ५.४१.५. [युक्त-अश्वपदयो समास]

युक्तासः सयोजिता. (अश्वा =अश्वा) १ ११८ ४ नियोजिता. (हरय =नियतिनो मनुष्या) ६ ३७ १ [illegible] योगाभ्यासा (आसा जना) ४.४८ ४ [युक्तप्राति० जसो असुक्]

युक्त्वा सयोज्य १ १७७ १ [युजिर् योगे (रुधा०) धातो क्त्वा]

युक्त्याय समाधाय युक्त्वा ऋ० भू० १५६, ११.४

इति मावन्त यातवश्च ते मावन्तश्च तान् (प्रजाजनान्) समी०—अत्र सायणाचार्येण यातुरिति पूर्वपद मावानित्युत्तर-पद चाऽविदित्वा यातुमावत्पदान्मतुप् कृतस्तदिद पदपाठाद् विरुद्धत्वादशुद्धम् १ ३६ २० **यातुमावान्**=गच्छन्मत्सदृश (विद्वज्जन) ७ १ ५ [यातु-मावत्पदयो समास । यातुरिति व्याख्यातम् । मावत्=अस्मत्प्राति० 'वतुप्-प्रकरणे युष्मदस्मद्भ्या छन्दसि सादृश्य उपसख्यानम्' अ० ५ २ ३६ वा०सूत्रेण सादृश्ये वतुप् । 'आ सर्वनाम्न' इत्याकारादेश । 'प्रत्ययोत्तरपदयोश्च' इति मपर्यन्तस्यास्मदो मादेश]

यातेव यथा दण्डप्रापक (भा०—राजा) १ ७० ६ गच्छन्निव (पथिक इव) ७ ३४ ५ [याता-इवपदयो समास]

याथन प्राप्नुत प्र० अत्र तकारस्य स्थाने थनादेश १ २३.११ गच्छथ ५ ५७ २ प्राप्नुथ प्र०—अत्र 'तप्तनप्तन०' इति थस्य स्थाने थनादेश १ ३६ ३. [या प्रापणे (अदा०) धातोर्लोटि तस्य थनादेश]

याथातथ्यतः यथार्थतया ४० ८. यथावत् रीतिपूर्वक स० प्र० २७३, ४० ८ [यथातथप्राति० भावे ष्यञ् । तत सार्वविभक्तिक तसि]

यादमानः याचमान (विद्वज्जन) प्र०—अत्र वर्ण-व्यत्ययेन चस्य द ,३ ३६ १ [टुयाचृ याच्ञायाम् (भ्वा०) धातो शानच् । वर्णव्यत्ययेन चकारस्य दकार]

यादमानाः अभिगच्छन्त्य (सिन्धव =नद्य) ६ १६ ५ [यती प्रयत्ने (भ्वा०) धातो शानजन्तात् स्त्रिया टाप् । धातोर्वृद्धि तस्य च दकारश्छान्दस]

यादसे जलजन्तवे ३० २० [याद =उदकनाम निघ० १ १२]

यादुरी प्रयत्नशीला (नीति) प्र०—अत्र यतधातो-र्बाहुलकादौणादिक उरी-प्रत्यय तस्य द १ १२६ ६]

यादृश्मिन् यादृशे व्यवहारे ५ ४४ ८ [यादृश्मिन्= यादृशे नि० ६.१५]

याद्राध्यम् ये यान्ति ते यातस्तैराध्य याद्राध्य ससाध-नीयम् (योनिं=कारण वह्निम्) २ ३८ ८ [यात-राध्य-पदयो समास । यात =या प्रापणे (अदा०) धातो कर्त्तरि क्त । राध्यम्=राध ससिद्धौ (स्वा०) धातोर्ण्यत्]

याद्वम् ये यान्ति तान् यो याति तम् (सज्जनम्) ७ १६.८ [या प्रापणे (अदा०) धातोरौणा० तुप्रत्यये यातु । तत 'वा छन्दसी' ति पूर्वसवर्णो न भवति । तस्य दकारश्छान्दस]

यानान् यान्ति येषु तान् (पथ =मार्गान्) २६ २६ [या प्रापणे (अदा०) धातोरधिकरणे ल्युट्]

यान्तम् गच्छन्तम् (सज्जनम्) ३ ३२ १४ **यान्तः**= प्राप्नुवन्त (जना) ४.२५ ८ [या प्रापणे (अदा०) धातो शतृ]

यान्ता गच्छन्तौ (अश्विना=शिल्पिनौ) १ ११७ १२ [या प्रापणे (अदा०) धातो शतरि द्विवचनस्याकार-श्छान्दस]

याम प्राप्तव्य कर्म २ ३४ १० **यामनि**=प्रापणीये मार्गे ३ ५४ १४ यान्ति यस्मिँस्तस्मिन् वर्त्तमाने समये ७ ३२ २६ यातरि (मर्त्ते) १ १३८ ३ **यामभिः**=प्रहरै यमोद्भवै कर्मभिर्वा ५ ६६ ५ यान्त्यायान्ति यैस्तै स्वकीयै गमनागमनै १ ३७ ११ [या प्रापणे (अदा०) धातोरौणा० मनिन्]

यामः याति गच्छति येन स यामो रथ १ ३४ १ यान्ति यस्मिँस्तस याम प्रहर ६ ६६ ७ यो याति स (पुरुष) ४ ५१ ४ मर्यादा १ १०० २ गमनम् प्रापणम् १ १६६ ४ **यामम्**=प्रहर प्राप्तव्य वा (सुखम्) ७ ५६ ६ **यामाय**=यथार्थव्यवहारप्रापणाय प्र०—अर्त्तिस्तुसु० उ० १ १३६ इति या-धातोर्म-प्रत्यय १ ३७ ७ **यामाः**= वायुदेवताका (कर्णा =पशव) २४ ३ **यामे**=यान्ति येन यानेन तस्मिन् ११ १३ **यामेन**=उपरतेन (भा०—विद्यादिशुभगुणदानेन) ५ ५३ १२ **यामेषु**=यमादियुक्त-शुभव्यवहारेषु प्रहरेषु वा ५ ५६ ७ स्व-स्वगमनरूपमार्गेषु १ ३७ ८ यान्ति येषु मार्गेषु तेषु १ ८७ ३ [या प्रापणे (अदा०) धातो 'अर्त्तिस्तुसुहु०' उ० १ १४० सूत्रेण मन् । अथवा यमप्राति० 'साम्य देवते' त्यर्थेऽण्]

यामन् याति गच्छति प्राप्नोति स यामा तस्मिन्नस्मिन् ससारे प्र०—अत्र 'सुपा सुलुक्०' इति विभक्तेर्लुक् १.३३ २ यान्ति यस्मिन् मार्गे तस्मिन् प्र०—अत्र 'सर्वधातुभ्यो मनिन्' इत्यौणादिको मनिन्प्रत्यय १ ८५ १ याम्ने सुख-प्राप्तये प्र०—अत्र या-धातोरौणादिको मनिन् १ ११६ १३ यामनि मार्गे १ १६६ १ यान्ति येन यस्मिन् वा तस्मिन् (रथे मार्गे वा) ७ ५८ २ यामनि मार्गे प्रहरे वा १७ १०. यान्ति गच्छन्ति यस्मिन् मार्गे ३ २ १४ [या प्रापणे (अदा०) धातो कर्त्तरि मनिन् । औणादिको वा मनिन् अधिकरणे]

यामनः ये यान्ति ते (वायव इव मनुष्या) ५ ५७ ३

युज्यमानः समाहित सन् (वाजी=राजा) ६ ८ [युज समाधौ (दिवा०) धातो शानच्]

युज्यमाना सयुक्तौ (हरी=अश्वौ) ३ ३५ १ ['युज्यमान' इति व्याख्यातम् । ततो द्विवचनस्याकारादेश]

युज्यसे समादधासि १ २८ ५ **युज्याताम्**=युक्तौ भवत ७ ४२ १ **युज्येथाम्**=युज्येते युक्तौ कुरुत ४ ३३ [युज समाधौ (दिवा०) धातोर्लट् । अन्यत्र लोट्]

युज्याभिः योजनीयाभि (विद्याभि) ७ ३७ ५ [युजिर् योगे (रुधा०) धातोर्बाहु० औरणा० क्यप् । तत स्त्रिया टाप्]

युज्येभिः योजनीयैं कर्म्मभि १ १६५ ७ योजितु योग्यैं (गुणैं) १ १४५ ४ योक्तव्यैं (शुष्मैं =वलैं) ६ ३ ८ [युज्यप्राति० भिसि 'बहुल छन्दसी' ति ऐस् न । युज्य =युजिर् योगे (रुधा०) धातोरौणा० क्यप्]

युञ्जते स्थिरा कुर्वते ५ १४ समादधते ५ १४ समादधति ३७ २ युक्त कुर्वन्ति ऋ० भू० १५६, ११ १ अभ्यस्यन्ति १.४८ ४ **युञ्जन्ति**=युक्त कुर्वन्ति २३ ५ युञ्जन्तु प्र०—अत्र लोडर्थे लट् १ ६ २ योजयन्ति १ ६ १ परमानन्द प्राप्नुवन्ति ऋ० भू० १५६, १२ ६७ **युञ्जन्तु**=प्रेरताम् ६ ८ **युञ्जाथे**=नियुक्तौ भवत १ १५१ ४ [युजिर् योगे (रुधा०) धातोर्लट्]

युञ्जा युञ्जानौ (हरी=धारणाकर्पणगुणौ) १ १६२.२१ योजकौ (हरी=हरणशीलावश्वौ) २५ ४४ [युजिर् योगे (रुधा०) धातो 'ऋत्विग्दधृग्०' इत्यादिना क्विन् । ततो द्विवचनस्याकारादेश]

युञ्जानः योग कुर्वाण सन् (मनुष्य) ऋ० भू० १५६, ११ १ योगाभ्यास भूगर्भविद्या च कुर्वाण (सविता=ऐश्वर्यमिच्छुर्मनुष्य) ११ १ [युजिर् योगे (रुधा०) धातो शानच्]

युतद्द्वेषसः युता अमिश्रिता पृथग्भूता द्वेषा येभ्यस्ते (भा०—सर्वप्रजामनुष्या) १ ५३ ४ [युत-द्वेषस्पदयो समास । युत'=यु मिश्रणेऽमिश्रणे च (अदा०) धातो क्त । द्वेषस्=द्विष अप्रीतौ (अदा०) धातोरसुन्]

युत्कारेण यो व्यूहैर्युतो मिश्रितानमिश्रितान् भृत्यान् करोति तेन भा०—युद्धविद्याकुशलेन (इन्द्रेण=सेनापतिना) १७ ३४ ['युत्' इत्युपपदे डुकृञ् करणे (तना०) धातोरण् । युत्=यु मिश्रणेऽमिश्रणे च (अदा०) धातो क्विप्]

युत्सु मिश्रिताऽमिश्रितकरणेषु युद्धेषु १७ ३६ सङ्ग्रामेषु प्र०—अत्र सम्पदादिलक्षण. क्विप् १ ६२ २१. [यु मिश्रणेऽमिश्रणे च (अदा०) धातो सम्पदादिलक्षण क्विप्]

युधम् युध्यमानम् (शत्रुजनम्) १.५३ ७ **युधः**=यो युध्यते स (इन्द्र =सर्वसेनाधिपति) १७ ३५ युध सम्प्रहारे (दिवा०) धातोरिगुपधलक्षण क]

युधः ये युध्यन्ते ते (नरा =नायका मनुष्या) १७ ३४ **युधा**=यो योधयति तेन (ओजसा) १ ५३.७ युध्यन्ते यस्मिन् सङ्ग्रामे तेन १.५६ ५ युध्यमानेन सैन्येन ५ २५ ६ सम्प्रहारेण २ २२ २ युद्धेन १ १७४.४ **युधि**=युद्धे २ २४ ६ **युधे**=युध्यन्ति यस्मिन् सङ्ग्रामे तस्मै १ ६१ १३ [युध सम्प्रहारे (दिवा०) धातो क्विप्]

युधये युद्धाय ५ ३० ४ सङ्ग्रामाय ५ ३० ६ [युध सप्रहारे (दिवा०) धातो. 'इक् कृष्यादिभ्य ' अ० ३ ३.१०८ वा० सूत्रेण इक्]

युध्मस्य योद्धु शीलस्य (इन्द्रस्य=राज्ञ) ३ ४६ १ **युध्मः**=यो युध्यते स (इन्द्र =सूर्य इव सभाध्यक्ष) १ ५५ २ अविद्याकुटुम्बस्य प्रहर्त्ता (उपदेशक) १ ५५ ५ योद्धा (इन्द्र =विद्युदिव राजा) ७ २० ३. [युध सम्प्रहारे (दिवा०) धातो 'इषियुधीन्धि०' उ० १.१४५. सूत्रेण मक्]

युध्य युध्यस्व प्र०—अत्र व्यत्ययेन परस्मैपदम् १ ६१ २३ योधय गमय प्र०—अत्राऽन्तर्भावित ण्यर्थ, युध्यतिर्गतिकर्मा निघ० २ १४, ३४ २३ **युध्यन्**=युद्ध कुर्वन्ति प्र०—अत्र व्यत्ययेन परस्मैपदमडभावश्च १ ६३ ७ **युध्यै**=युद्ध कुर्याम ४ १८ २ **युयुधाते**=युध्येते १ ३२ १३ **युयुधुः**=सङ्ग्राम कुर्यु ५ ५६ ५ युध्यन्ते ४ ३० ३ **युयोध**=युध्येत् ६ २५ ५ [युध सम्प्रहारे (दिवा०) धातोर्लोट् । व्यत्ययेन परस्मैपदम् । अन्यत्र लङ्, लोट्, लिट् च । युध्यते गतिकर्मा निघ० २ १४]

युध्यतः युद्ध कुर्वत (शत्रो) १ ५२.५ प्रहरत (योद्धृजनस्य) प्र०—अत्र. व्यत्ययेन परस्मैपदम् ३ ५५ ८ युद्धमाचरत (सैनिकस्य) १ ५२ १४ **युध्यते**=युद्धङ्कुर्वते (जनाय) ४ ३० ४ **युध्यन्तम्**=युद्धे प्रवर्त्तमानम् (वृषभ=मेघम्) १ ३३ १४ [युध सम्प्रहारे (दिवा०) धातो शतृ । व्यत्ययेन परस्मैपदम्]

युध्यमानाः युद्ध कुर्वन्त (राजपुरुषा) ४ २५ ८ [युध सम्प्रहारे (दिवा०) धातो शानच्]

युध्यामधिम् यो युधि सङ्ग्राम आमम् रोग दधाति त

युक्त कृत्वा ११ ३ [युजिर् योगे (रुधा०) धातो क्त्वा। 'क्त्वो यक्' अ० ७ १ ४७ सूत्रेण क्त्वो यगागम]

युक्ष्व सर्वविद्याप्रकाशाय युङ्क्ष्व योजय प्र०—अत्र 'छान्दसो वर्णलोपो वा' इति नलोप १ १० ३ युनक्ति प्र०—अत्र 'वहुल छन्दसि' इति विकरणस्य लुक् १.६२ १५ योजय ३३ ४ प्र०—अत्र 'वहुल छन्दसि' इति शपो लुकि श्नमभाव १ १४ १२ सयोजय ६ १६ ४३ [युजिर् योगे (रुधा०) धातोर्लोट् । 'वहुल छन्दसी' ति शपो लुकि श्नमोऽप्यभाव]

युगम् वर्षम् ३ ५३ १७ **युगानि**=वर्षाणि कृतत्रेता-द्वापर-कलिसज्ञानि वा १ ११५ २ सवत्सरादीनि १.९२ ११ **युगे**=अपरजन्मनि १ १६६ १३ [युजिर् योगे (रुधा०) धातोर्घञ् । उञ्छादिपाठादगुणत्वम्]

युगा युगानि १२ १११ वर्षाणि वर्षसमुदितानि वा ६ १६ २३ वर्षसमूहा. ५ ७३ ३ योगयुक्तानि कर्म्माणि ऋ० भू०१५६, १२.६७ [युगप्राति० शेर्लोपश्छन्दसि]

युगे युगे वर्षे वर्षे सत्ययुगादौ वा ६ १५ ८ वर्ष-समुदाये वर्षसमुदाये ६ ८.५ ['युगे' पदस्य वीप्साया द्विर्वचनम्]

युगेव अश्वादिवत्सयोजितौ (वायुविद्युतौ) २ ३९ ४ [युगा-इवपदयो समास । युगा=युगाद् द्विवचनस्याकार]

युङ् समाधाता (ब्रह्म) १० २५. [युजिर् योगे (रुधा०) धातो' 'ऋत्विग्दधृक्०' इत्यादिना क्विन्]

युङ्क्ते युक्तो भवति १ ८४ १६ कलाकौशलेन प्रेरित सम्पर्चयति १ १४ ३. समवैति १ १२४ ११ **युङ्क्ष्व**= युक्तो भव ७ ४२.२ **युङ्ग्ध्वम्**=सयोजयत ५ ५६ ६ **युजन्त**=युञ्जते ६ ६६ ६ [युजिर् योगे (रुधा०) धातो-र्लट् । अन्यत्र लोट् लङ् च]

युच्छतः हर्षं कुरुत ५ ५४ १३ **युच्छति**=प्रमाद्यति ५ ५४ १३ **युच्छसि**=अत्यन्त प्रमाद्यसि ८.३. [युच्छ प्रमादे (भ्वा०) धातोर्लट्]

युजम् योक्तुमर्हम् भा०—प्रशसनीयम् (रयिं= ऐश्वर्यम्) १९ ६४ योजकम् (विद्वत्तम जनम्) ६ ४५ १६ युक्तम् (अग्नि=विद्युतम्) २ २५ १ योक्तारम् (योद्धृजनम्) १ १२९.४. योगयुक्तम् (सखायम्) १ १२९ ४ यो युज्यते तम् (सखाय=मित्रम्) प्र० अत्र क्विप् १.३३ १०. समाधातुमर्हम् (रयिम्) ४.३७ ५ **युजः**=यो युञ्जते तान् (प्रजाजनान्) ४ ३२ ६ समाहिता (स्त्रिय) २३ ३७ प्रियस्य यो युनक्ति स युक् सखा तस्य सख्यु प्र०—अत्र युजिर् योगे इत्यस्माद् 'ऋत्विग्दधृग्० इति क्विन् १ १० ६. **युजा**=कृपया धार्मिकेषु स्वसामर्थ्यसयोजकेन (इन्द्रेण= युद्धोत्साहप्रदेश्वरेण) १ ८ ४ योगयुक्तया (पुरन्ध्या= प्रज्ञया) ७ ३२ २० यो न्यायेन युनक्ति तेन (विदुषा राज्ञा) ७ ३१ ६ यो युनक्ति मूहुर्त्तादिकालाऽवयवपदार्थै मह तेन (इन्द्रेण=सूर्येण (विद्युता वा) १ २३ ९ युक्तेन (सेनाधीशेन) १ १०२ ४ यो युङ्क्ते तेन राज्ञा ६ ४४ २२ युनक्ति यया तया (सेनया) प्र०—अत्र 'कृतो वहुलम्' इति करणे क्विप् १ ३९ ४ [युजिर् योगे (रुधा०) धातो कर्त्तरि क्विप् । 'कृतो वहुलमि' ति वा करणे क्विप्]

युजा समाहितौ (भिषजा=सद्वैद्यौ) २१ १८ [युजमिति व्याख्यातम् । ततो द्विवचनस्याकारादेशश्छान्दस]

युजानम् समादधानम् (नम =सत्कारम्) प्र०—अत्र वाहुलकादौणादिक आनच्प्रत्यय किच्च १ ६५ १ **युजानः**= धारयन् (सूर्य) ६ ३९ २ युक्त सन् (इन्द्र =यानम्) २ १८ ५ **युजानाः**=समाहितात्मान (हरय =राज्य-कर्माधिकारिजना.) ६ ४४ १९ [युजिर् योगे (रुधा०) धातोर्वाहु० औणा० आनच् किच्च । शानचि वा विकरणस्य लुक्]

युजाना युक्ता (प्रातर्वेला) ५ ८०.३ [युजानमिति व्याख्यातम् । तत स्त्रिया टाप्]

युजे युनज्मि ७ २३ ३ आत्मनि समादवे ११ ५ **युज्महे**=समादधीमहि प्र०—अत्र 'वहुल छन्दसि' इति श्यनो लुक् १ १६५ ५ [युज समाधौ (दिवा०) धातोर्लटि विकरणस्य लुक्]

युजेव यथा सयुक्तौ (अश्वौ) २ २४ १२ [युजा-इव-पदयो. समास । युजेति व्याख्यातम्]

युज्यम् योक्तुमर्हम् (रयिं=धनम्) ७ ३६ ७ समा-धातुमर्हम् (पय =दुग्धमुदकमन्न वा) ६ ५२ १० **युज्यः**=युञ्जन्ति व्याप्त्या सर्वान् पदार्थान् ते युजो देश-कालाकाशादयस्तत्र भव (विष्णु =व्यापकेश्वर) १ २२ १९ उपयुक्ताऽऽनन्दप्रद (परमेश्वर) १३ ३३ युक्त (राजप्रजाजन) १० ३१ युनक्ति सदाचारेणेति युज्य (सभाध्यक्ष) प्र०—अत्रौणादिक क्यप् ६ ४ युक्त समाधातुमर्हो वा (सोम =ओषधिरस) १९ ३ योग्य (परमेश्वर) आर्याभि० १ २३, ऋ० १ २ ७.१९ **युज्याय**=योक्तु योग्याय व्यवहाराय ७ १९ ९ [युजिर् योगे (रुधा०) धातोरौणा० क्यप् । अथवा=युजिर-धातो कर्त्तरि क्विपि युज् । ततो भवार्थे यत्]

युवते ब्रह्मचर्येणाधीत्यविद्ये पूर्णयुवावस्थे (कन्ये) ५ २ २

युवते युनक्ति ७ ४ २ [यु मिश्रणेऽमिश्रणे च (अदा०) धातोर्लट् । विकरणव्यत्ययेन श । व्यत्ययेन चात्मनेपदम्]

युवद्रिक् युवा प्रापक' (कामः=इच्छा) ४.४४.७ युवा प्राप्नुवन् (काम =इच्छा) ४ ४३.७ [युष्मदुपपदे अञ्चु गतौ (भ्वा०) धातो क्विप् । 'विष्वग्देवयोश्च०' अ० ६ ३ ६२ सूत्रेण टेरद्र्यादेश । युष्मदो युवादेश-श्छान्दस]

युवधिता युवयोर्हितानि (धाम=धामानि) ६ ६७.६. [युष्मद्-धितपदयो समासे शेर्लोपश्छन्दसि । युष्मदो युवादेशश्छान्दस । धित.=दधाते क्त । 'दधातेर्हि' रिति हिरादेशो न भवति छान्दसत्वात्]

युवन् यौवन प्राप्नुवन् (विद्वज्जन) १.१४१ १०. **युवभिः**=प्राप्तयुवावस्थै (मनुष्यै) ३ ३१.७. **युवा**= प्राप्तयौवन (जन) २२ २२ बलिष्ठ (विद्वज्जन) ५ १ ६. युवाऽवस्थास्थ (पुत्र) १.१४४ ४ सुखै सयोजको दुखैर्वि-योजकश्च (इन्द्र =परमेश्वर आप्तो जनो वा) २ २० ३. शरीरात्मबलयुक्त (इन्द्र =राजा) ६.४५.१ पूर्णेन ब्रह्म-चर्येण युवावस्था प्राप्य कृतविवाह' (गृहपति) ७.१५.२ मिश्रणाऽमिश्रणकर्त्ता (इन्द्र =विद्वान् सेनापति. सूर्यो वा) १ ११ ४ यौति मिश्रयति पदार्थै. सह पदार्थान् वियोजयति वा (अग्नि =प्रसिद्धो रूपवान् दहनशील) १ १२ ६. तरुणावस्थ (इन्द्र =सभापति) ७ ३२. विभाजकः (अग्नि =पावक) ३ २३ १ **युवानम्**=युवत्वसम्पादकम् (रेत) ३३ ११ सर्वस्य जगत सयोजक विभाजक वा (इन्द्र=परमेश्वरम्) ३ ३२ ७ बलवन्तम् (तौग्र्य=राज-पुत्रम्) १ ११८.६ पूर्णबलम् (वीरपुरुषम्) २ ३३ ११ सम्प्राप्तयौवनम् (पतिम्) २ ३५ ४ सम्पादितयौवनम् (पतिम्) १ ११७ १३ भेदकम् (इन्द्र =विद्युतम्) २ १६ १. **युवानः**=प्राप्ताऽऽत्मशरीरयौवना (नर =नायका जना) ५.५८ ८ मिश्रणामिश्रणकर्त्तृत्वेन बलिष्ठा (रुद्रा = वायव) १.६४ ३ [यु मिश्रणेऽमिश्रणे च (अदा०) धातो 'कनिन् युवृषितक्षि०' उ० १ १५६ सूत्रेण कनिन् । युवा प्रयौति कर्माणि नि० ४ १६ प्राणो वै युवासा ऐ० २ २]

युवन्यून् आत्मनो मिश्रितानमिश्रितान् पदार्थानिच्छून् (विद्वद्गणान्) ५ ४२ १५ [युवन्-पदाद् आत्मन इच्छाया क्यजन्ताद् उ]

युवमानः संयोजको भेदकश्च (जीवात्मा) प्र०— अत्र व्यत्ययेन श आत्मनेपदञ्च १ ५८.२ [यु मिश्रणेऽमिश्रणे च (अदा०) धातो शानच् । विकरणव्यत्ययेन श । आत्मनेपदञ्च व्यत्ययेन]

युवयुजम् युवाभ्या युज्यते तम् (रथम्) प्र०—अत्र 'वाच्छन्दसि सर्वे विधयो भवन्ति' इति अप्राप्तोऽपि युवादेश १ ११६ ५ [युष्मदुपपदे युजिर् योगे (रुधा०) धातो क्विप् । युष्मदो युवादेशश्छान्दस.]

युवयुः युवा कामयमानः (सज्जन) ६.६३.३. [युष्मत्पदाद् आत्मन इच्छायामर्थे क्यजन्ताद् उ. । युवा-देशश्छान्दस]

युवयूः युवा कामयमाना. (प्रजा) ४.४१.८ [युव-युरिति व्याख्यातम् । तत स्त्रियामूङ्प्रत्यय]

युवशा युवानो विद्यन्ते ययोस्तौ (शिल्पिनौ) प्र०— अत्र लोमादिपामादिना मत्वर्थीय श १ १६१ ७. युवैर्मि-श्रितामिश्रितैस्तद्वल्कृतानि विस्तृतानि (कर्त्तव्यानि) १ १६१.३ [युवन्प्राति० मत्वर्थे 'लोमादिपामादिपिच्छा-दिभ्य. शनेलच.' अ० ५ २.१०० सूत्रेण श.]

युवसे सयोजयसि ६.६०.२ मिश्रय प्र०—अत्र विकरणात्मनेपदव्यत्यय. १५ ३० **युवस्व**=सयोजय ७ ५.६ कर्म्मसु प्रेर्ष्व ४ ४८ ५ प्रेरयस्व ४ ४८ ५ मिश्र-यस्व २७ २७ **युवामहे**=विभजामहे ६ ५७ ६. **युवासे**= मिश्रय ६.३५ ३ **युवेथे**=सङ्गमयथ १ १८०.६ [यु मिश्रणेऽमिश्रणे च (अदा०) धातोर्लट् । व्यत्ययेन श आत्मने-पदञ्च । अन्यत्र लोट् लेट् चापि]

युवाकवः सम्पादितमिश्रितामिश्रितक्रिया. (वृक्त-बर्हिष =शिल्पविद्याविदो विद्वास) प्र० 'यु मिश्रणेऽमिश्रणे च' इत्यस्माद्धातोरौणादिक आकु प्रत्यय. १ ३ १ ये युवा कामयन्ते ते (विद्वास) ३ ३ ५८ **युवाकुः**=सुसयोजक (विद्वज्जन) ७ ६० ३ मिश्रिताऽमिश्रित (सोम =ऐश्वर्य-लाभ) ३ ५८ ६ यो यावयति मिश्रयति सयोजयति सर्वा-भिर्विद्याभि सह जनान् स (अध्यापक उपदेशको वा) १ १२० ३ [यु मिश्रणेऽमिश्रणे च (अदा०) धातोर्बाहु० औणा० आकु । स च कित्]

युवाकु मिश्रीभाव पृथग्भाव वा प्र०—अत्र बाहुल-कादौणादिक काकु प्रत्यय 'सुपा सुलुक्०' इति विभक्तेर्लुक् च १ १७ ४. सुखेन मिश्रिताय दुखै पृथग्भूताय वा (राये= धनाय) १ १२० ६. [यु मिश्रणेऽमिश्रणे च (अदा०) धातो-र्बाहु० औणा० काकुः]

शत्रुम् ७ १८ २४ [युधि-ग्रामधिपदयो समासे सप्तम्या अलुक्। ग्रामधि =ग्रामोपपदे डुधाञ् धारणपोषणयो (जुहो०) धातो 'कृतो बहुल वे' ति कर्त्तरि कि]

युनक्त युङ्ग्ध्वम् भा०—कृषि योग च कुरुत १२ ६८ **युनक्ति**=नियुक्त करोति योजयति भा०—आदिशति प्र०—अत्र सर्वत्राऽन्तर्गतो ण्यर्थ प्रयोजनाय १ ६ **युनजत**= युनक्ति ७ ३६ ४ **युनजते**=युञ्जते प्र०—अत्र 'बहुल छन्दसि' इत्यलोपो न ७ २७ १ **युनज्मि**=समादधे १० २१. सयोजयामि ७ १६ ६ सुगन्धैर्द्रव्यैर्युक्त करोमि १८.५१ नियुक्त करता हूँ स० वि० १४३, अथर्व० ३ ३० ६ [युजिर् योगे (रुधा०) धातोर्लङ्। अडभाव। अन्यत्र लङ् लट्। 'वा छन्दसी' त्यल्लोपोऽपि न भवति]

युनजन् युञ्जन् (जन.) ६ ६७ ११ [युजिर् योगे (रुधा०) धातो. शतृ। अल्लोपस्तु न 'वा छन्दसीति' नियमेन]

युयवन् युवन्तु पृथक्कुर्वन्तु प्र०—अत्र लेटि शप श्लु ६ १६ वियुज्यन्ताम् ७ ३८ ७ [यु मिश्रणेऽमिश्रणे च (अदा०) धातोर्लेडि शप श्लौ सति छान्दस रूपम्। युयवन् यावयन्तु नि० १२ ४४.]

युयुजानसप्ती युयुजानौ सप्ती वेगाकर्षणौ ययोस्तौ (वायुविद्युतौ) ६ ६२ ४ [युयुजान-सप्तिपदयो. समास। 'युयुजान' इति व्याख्यास्यते। सप्ति अश्वनाम निघ० १ १४]

युयुजानः समादधन् (अग्नि =विद्वान् पुत्र) ४ २ २ युक्तान् कुर्वन् (विद्युद्विद्याविज्जन) ६ ५६ ५ [युज समाधौ (दिवा०) धातोर्लिट कानच्]

युयुजे युञ्जीत १ १६१ ६ **युयुज्रे** =युञ्जते ५ ५३ १ युञ्जन्ति ६ २५ ३ योज्यन्ताम् प्र०—अत्र लोडर्थे लिट् 'इरयो रे' अ० ६ ४ ७६ इति रे आदेश १ ४६ ८ [युजिर् योगे (रुधा०) धातोर्लिट्। 'युयुज्रे' प्रयोगे 'इरयो रे' इति 'रे' आदेश]

युयुतम् विभाजयतम् ६ ५६ ८ [यु मिश्रणेऽमिश्रणे च (अदा०) धातोर्लोटि 'बहुल छन्दसी' ति शप श्लौ सति रूपम्]

युयुत्सन्तम् योद्धुमिच्छन्तम् (शत्रुम्) ५.३२ ५ [युध सम्प्रहारे (दिवा०) धातोरिच्छायामर्थे सन्नन्ताच्छतृ]

युयुधयः साधु युद्धकारिण. (पुरुषा) प्र०—'उत्सर्गश्छन्दसि सदादिभ्यो दर्शनात्' अ० ३ २.१७१ अनेन वार्तिकेनाऽत्र युधधातो किन्प्रत्यय १ ८५ ८ [युध सम्प्रहारे 'किकिनावुत्सर्गश्छन्दसि सदादिभ्यो दर्शनात्' अ० ३ २ १७१ वा० सूत्रेण कि। लिट्वच्च]

युयूषतः सविभाजयत ६ ६२.१. मिश्रयितुमिच्छत १ १४४ ३ [यु मिश्रणेऽमिश्रणे च (अदा०) धातोरिच्छायाया सन्नन्ताल्लट्]

युयूषन् मिश्रयितुमिच्छन् (राजा) ४.१६ ११. [यु मिश्रणेऽमिश्रणे च (अदा०) धातोरिच्छायामर्थे सन्नन्ताच्छतृ]

युयोत प्रापयत त्याजयत ३ ५४ १८. गृह्णीत वा पृथक्कुरुत २ २६ २ पृथक्कुरुत प्र०—अत्र 'बहुल छन्दसि' इति शप श्लु 'तप्तनप्तन०' इति तबादेश १ ३६ ८ **युयोतन**=सयोजयत ५ ८७ ८ [यु मिश्रणेऽमिश्रणे च (अदा०) धातोर्लोटि, शप श्लौ च रूपम्]

युयोति मिश्रयति १ ६२ ११ **युयोतु**=वियोजयतु ५ ५० ३ पृथक्करोतु ६ ४७ १३ **युयोथाः**=पृथक्कुर्या २ ३३ १ **युयोधि**=वियोजय ७.४३ पृथक्कुरु १ १८६ ३ दूरीकुरु प्र०—अत्र 'बहुल छन्दसि' इति शप श्लु ५ ३६ पृथक्करोषि २ ३३ ३ अधर्माचरण से सदा दूर रखिये स० वि० २१४, ४० १६ [यु मिश्रणेऽमिश्रणे च (अदा०) धातोर्लेट्। 'बहुल छन्दसी' ति शप श्लु। अन्यत्र लोट्]

युयोप युप्यति विमोह करोति १ १०४ ४. [युप विमोहने (दिवा०) धातोर्लिट्]

युवत् मिश्रणाऽमिश्रणयुक्तम् (भा०—कारणम्) प्र०—अत्र यु-धातोरौणादिको बाहुलकात् कतिन्प्रत्यय १ ११ ११ मिश्रयित्रमिश्रकौ वा (इन्द्राग्नी=विद्युद्भौतिकावग्नी) १ १०६ १ [यु मिश्रणेऽमिश्रणे च (अदा०) धातोर्बाहु० औणा० कतिन्]

युवतयः मिश्रामिश्रत्वकर्मणा सदाऽजरा (दशदिश) १ ६५ २ प्राप्तयौवनावस्था ब्रह्मचारिण्य (कन्या) ३ ५५ १६ प्रौढयौवना (कन्या) २ ३५ ११ पूर्णायुवावस्थास्थस्त्रिय स० प्र० ११०, ३ ५५.१६. बीसवे वर्ष से चौबीसवें वर्ष वाली कन्याएँ स० वि० १०४, २ ३५ ४ **युवतिः**=नवयौवना (दुहिता) १ ११८ ५ प्राप्तयौवनाऽवस्था (स्त्री) ५ ६१ ६ युवाऽवस्थाया विद्यामधीत्य कृतविवाहा (माता) ५ ४७ १ चतुर्विंशतिवार्षिकी (कन्या) १ १२३ १० पूर्णाऽवस्था सती कृतविवाहा (माता) ५ २ १ **युवती**=प्राप्तयौवनाऽवस्थे (स्वसारा=भगिन्यौ) ३ ५४ ७ **युवत्योः**=युवावस्था प्राप्तयो स्त्रीपुरुषयो. ६ ४६ २ [युवन्प्राति० स्त्रिया 'यूनस्ति' अ० ४ १ ७७ सूत्रेण ति। 'युवन्' इति व्याख्यास्यते। युवति प्रयुवतीम् नि० १० २६]

यावद्वा श० १ २ ४ १ यजमानो वै यूप ऐ० २ ३. श० १३ २ ६ ६ यजमानदेवत्यो वै यूप तै० ३ ६.५ २ यजमानो वाऽएष निदानेन यद् यूप श० ३ ७ १ ११]

यूपवाहाः ये यूपं वहन्ति प्रापयन्ति ते (मनुष्या) १ १६२ ६ [यूपोपपदे वह प्रापणे (भ्वा०) धातो. कर्त्तर्यण्]

यूपव्रस्काः यूपस्य स्तम्भस्य छेदका (शिल्पिनो जना) २५.२६. यूपाय स्तम्भाय ये वृश्चन्ति ते (मनुष्या) १ १६२ ६ [यूपोपपदे ओव्रश्चू छेदने (तुदा०) धातो क्विप्]

यूपेव स्तम्भ इव दृढौ (पितरा=पितरौ) ४ ३३ ३. [यूपा-इवपदयो समास । यूपा=यूपप्राति० द्विवचनस्याकारादेशश्छान्दस]

यूयवन् पृथक्कुर्वन्तु २११० [यु मिश्रणेऽमिश्रणे च (अदा०) धातोर्लङि छान्दसे द्वित्वे तुजादित्वाद् अभ्यासस्य दीर्घत्वे रूपम् । 'बहुल छन्दसी' ति शपो न लुक्]

यूयुविः विभागकर्त्ता (विद्वज्जन) ५.५० ३ [यु-मिश्रणेऽमिश्रणे च (अदा०) धातोर्बाहु० औणा० क्विन्। बहुलवचनाद् धातोर्द्वित्वेऽभ्यासस्य च दीर्घत्वे रूपम्]

यूष्णः वर्द्धकस्य (पुरुषस्य) २५ ३६ रसस्य १ १६२ १३ **यूष्णा**=क्वथितेन रसेन २५ ६ [यूषप्राति० शस्प्रभृतिषु 'पद्दन्नोमास्हृत्०' अ० ६ १ ६३ सूत्रेण 'यूषन्' आदेश । यूप=यूष हिंसायाम् (भ्वा०) धातोरच्]

येजे यजति ६ ३६ २ [यज देवपूजासगतिकरणदानेषु (भ्वा०) धातोर्लिट्]

येतिरे प्रयतन्ते १ ८५ ८ यतन्ते ५ ५६ २ [यती प्रयत्ने (भ्वा०) धातोर्लिट्]

येमतुः नियच्छत ५.६१ ६ गमयतम् ५ ७३ ३ देशान्तरे यच्छथ प्र०—अत्र लडर्थे लिट् १ ३० १६ **येमाते**=नियमेन गच्छत ४४८ ३ **येमिरे**=सयम कुर्वन्ति ३३ ६५ प्राप्नुवन्तु १२ ११६ नियमेन धारयन्ति ऋ० भू० १३६, ऋ० ६ १ ६ ३ आकर्षणधारणनियम प्राप्नुवन्ति ऋ० भू० १४०, ऋ० ६ १.६ ४ स्थितिं लभन्ते ऋ० भू० १४० यच्छन्ति ३ ५६ ८ यच्छेयु १ १३५ १. उद्युञ्जन्ति ११० १ **येमुः**=नियच्छन्ति ६ २१ ६ यच्छेयु ४ २१ ४ **येमे**=यच्छति ५ ३२ १० [यमु उपरमे (भ्वा०) धातोर्लिट् । 'येमे' एतदादिषु व्यत्ययेनात्मनेपदम्]

येमानम् नियन्तारम् (दृढज्ञानम्) ४ १ १५ **येमानः**= नियच्छन्त (सज्जना) ४ ४४ ३ नियमयन्त (धार्मिका जना) ४ २३ १० [यमु उपरमे (भ्वा०) धातोर्लिट कानच् । 'अत एकहल्मध्ये०' इत्यकारस्यैकारादेशोऽभ्यासलोपश्च]

येषन्ती स्रवन्ती (उखा=पाकस्थाली) ३ ५३.२२ [यसु प्रयत्ने (दिवा०) धातो शत्रन्तान् ङीप् । अकारस्यैकार]

येषम् प्रयतेयम् २ २७.१६. [यसु प्रयत्ने (दिवा०) धातोर्लङ् । धातोरकारस्य एकारश्छान्दस । अटोऽभाव. । 'यसोऽनुपसर्गादि ति श्यनो विकल्पे शप्]

येष्ठः अतिशयेन याता (शिल्पी जन) ५.७४ ८. [या प्रापणे (अदा०) धातो तृजन्तादतिशायन इष्ठन्प्रत्यये तृचो लोप]

येष्ठा अतिशयेन नियन्तारौ (अश्विनौ=अध्यापकोपदेशकौ) ५ ४१.३. ['येष्ठ' इति व्याख्यातम् । ततो द्विवचनस्याकारादेश.]

यो या समी—अत्र महीधरेण 'या' इत्यशुद्धं व्याख्यातम् ५ ६. [यद् सर्वनाम्न. स्त्रिया प्रथमैकवचने 'या' इति रूपम् । अकारस्यौकारो वर्णव्यत्ययेन]

योक्तारम् योजकम् भा०—योगाभ्यासकर्त्तारम् (पुरुषम्) ३० १४ [युजिर् योगे (रुधा०) धातो कर्त्तरि तृच्]

योक्त्रम् योजनम् ५ ३३.२ **योक्त्रे**=अश्वादि यान के जोटे स० वि० १४२, अथर्व० ३ ३० ६ [योक्त्राणि अङ्गुलिनाम निघ० २ ५ योक्त्राणि योजनानि निघ० ३ ६. युजिर् योगे (रुधा०) धातो 'दाम्नीशसयुयुज०' अ० ३.२.१८२ सूत्रेण करणे ष्ट्रन्]

योगक्षेमः अप्राप्तस्य प्राप्तिलक्षणो योगस्तस्य रक्षण क्षेम (भा०—काम०) २२.२२ [योग-क्षेमपदयो. समास योगक्षेम =यद् योक्त्र स योग । यदास्ते स क्षेम । योगक्षेमस्य क्लृप्त्यै तै० ३ ३ ३ ३]

योगम् सयोजनम् ११८ ७ **योगः**=युज्यते यस्मिन् स १ ३४ ६ **योगाय**=युञ्जन्ति यस्मिँस्तस्मै ३० १४ **योगे**=सर्वसुखसाधनप्राप्तिसाधके (व्यवहारे) १.५ ३ अप्राप्तस्य प्राप्तिलक्षणे २२ २२ अनुपात्तस्योपात्तलक्षणे ७ ५४ ३ समागमे यमाद्यनुष्ठाने वा ४ २४ ४ [युजिर् योगे (रुधा०) धातोर्घञ् । योग =यद् योक्त्र स योग तै० ३ ३ ३ ३]

योगे योगे युञ्जते यस्मिन् यस्मिन् (वाजे वाजे= सङ्ग्रामे सङ्ग्रामे) ११.१४ अनुपात्तस्योपात्तलक्षणे योग तस्मिन् प्रति योगे १ ३० ७ [योगे-पदस्य वीप्साया द्वित्वम्]

योग्याभिः पृथिवीभि ३ ६ ६ [युजिर् योगे (रुधा०)

युवाना सयोजकौ वायुविद्युतौ ६ ६२४ युवानौ युवसदृशौ (पितरा=मातापितरौ) १ ११० ८ पूर्णयुवावस्थास्थौ (मातापितरौ) १५.५३ मिश्रितामिश्रितयो कर्त्तारौ (अध्यापकोपदेष्टारौ) २१ ६ [युवन्प्राति० प्रथमाद्विवचनस्याकारादेशश्छान्दस]

युवायव: युवामिच्छव (सोमास =ऐश्वर्ययुक्ता जना १ १३५ ६ [युष्मत्प्राति० आत्मन इच्छायामर्थे क्यजन्ताद् उ । अस्मदो युवादेशश्छान्दस]

युवायुजम् युवाभ्या युज्यते तम् (रथ=सैन्यादियुक्त यानम्) प्र०—अत्र 'वाच्छन्दसि सर्वे विधयो भवन्ति' इत्यप्राप्तोऽपि युवादेश १ ११६ ५ [युष्मदुपपदे युजिर् योगे (रुधा०) धातो कर्मणि क्विप् । युष्मदो युवादेशश्छान्दस]

युवावते त्वा रक्षते (राजपुरुषाय) ३ ६२ १ [युष्मद्-अवत्पदयो समास । युवादेशश्छान्दस । अवत्=अव रक्षणे (भ्वा०) धातो शतृ]

युष्मयन्ती: या युष्मानाचक्षते ता (गिर =सुशिक्षिता वाणी) २ ३६ ७ [युष्मत्प्राति० 'तत्करोति तदाचष्ट' इति वा० सूत्रेण णिजन्ताच्छत्रन्ताच्च ङीप्]

युष्माकाभि: युष्माभिरनुकम्पिताभि सेनाभि १ ३६ ८ [युष्मत्प्राति० अनुकम्पायामर्थे 'अव्यय सर्वनाम्नामकच् प्राक् टे' इति सूत्रेणाकच्]

युष्माकेन युष्माक सम्बन्धेन प्र०—अत्र 'वाच्छन्दसि' इत्यनण्यपि युष्माकादेश १ १६६ १४ [युष्मत्प्राति० शैषिकेऽणि 'तस्मिन्नणि च युष्माकास्माकौ' अ० ४ ३ २. इति विहितो युष्माकादेशोऽनण्यपि भवति छान्दसत्वात्]

युष्मादत्तस्य युष्माभिर्दत्तस्य (राय =धनस्य) ५ ५४ १३ [युष्मद्-दत्तपदयो समासे पूर्वपदस्याकारादेशश्छान्दस]

युष्मानीत: युष्माभिरानीत (सज्जन) २ २७ ११. [युष्मद्-आनीतपदयो समासे पूर्वपदस्याकारादेशश्छान्दस]

युष्मावत्सु युष्मत्सदृशेषु (विद्वज्जनेषु) २ २६ ४ [युष्मत्प्राति० 'वतुप्प्रकरणे युष्मदस्मद्भ्या छन्दसि सादृश्ये उपसख्यानम्' अ० ५ २ ३६ वा०सूत्रेण वतुप् । 'आ सर्वनाम्न' इत्याकारादेश]

युष्मे युष्मान् ४ १० ८ युष्माकम् ६.१८ ५ [युष्मत्प्राति० 'सुपा सुलुक्०' इति सुपा स्थाने 'शे' आदेश]

युष्मेषित: यो युष्माभिर्जेतुमिषित स (अ०—शत्रुजन) प्र०—अत्र 'छान्दसो वर्णलोपो वा' इति दकारलोप समी०–इद सुगमपक्ष विहाय सायणाचार्येण प्रत्ययलक्षणादि- कोलाहल कृत १ ३६ ८ [युष्मद्-इषितपदयो समास । पूर्वपदस्य दकारलोपश्छान्दस । इषित =इष गतौ (दिवा०) धातो क्त]

युष्मोत: युष्माभि पालित सरक्षितो रक्षितो वा (अर्वा=अश्व इव सहनशीलो जन) सम्राट विप्रो वा ७ ५८ ४ [युष्मद्-ऊतपदयो समासे पूर्वपदस्य दकारलोपश्छान्दस । ऊत =अव रक्षणादिषु (भ्वा०) धातो क्त । 'ज्वरत्वरस्त्रिव्यविमवामुपधायाश्च' इत्युपधाया ऊठ्]

यूथम् समूहम् ४ ३८ ५ सेनासमूहम् ५ २ ४ **यूथेन**=सुखप्रापकपदार्थसमूहेनाऽथवा वायुगणेन सह प्र०—'तिथपृष्ठयूथगूथप्रोथा' उ० २.१२ अनेन यूथ-शब्दो निपातित १ १० २ [यु मिश्रणेऽमिश्रणे च (अदा०) धातो 'तिथपृष्ठगूथयूथप्रोथा' उ० २ १२ सूत्रेण थक् निपात्यते]

यूथा समूहान् १ ८१ ७ [यूथमिति व्याख्यातम् । तत शेर्लोपश्छन्दसि]

यूथेव यूथानि समूहा इव ७.६० ३ सैन्यानीव ४ २ १८ गोसमूहान् वृषभ इव १ ७८ समूह इव ६ ४६ १२ [यूथा-इवपदयो समास]

यूप: स्तम्भ १ ५१ १४ मिश्रितो व्यवहारयत्नोदय १६ १७ **यूपात्**=मिश्रितादमिश्रिताद् बन्धनात् ५ २७ **यूपे**=स्तम्भ मे स० वि० २०६, अथर्व० ६ ६ २ ५ [यु मिश्रणेऽमिश्रणे च (अदा०) धातो 'कुयुभ्या च' उ० ३ २७ सूत्रेण प प्रत्ययो दीर्घश्च । यूथ यौते. समायुत भवति नि० ४ २४ (देवा) त वै (य) यूपेनैवायोपयस्तद् यूपस्य यूपत्वम् ऐ० २ १ (देवा) यदेनेन (यूपेन यज्ञ) अयोपयस्तस्माद् यूपो नाम श० १ ६ २ १ तस्माद् यूपऽएव पशुमालभन्ते नऽर्त्ते यूपात् कदाचन श० ३ ७ ३ २ पशवो वै यूपमुच्छ्रयन्ति श० ३ ७ २ ४ गर्तन्वान् यूपोऽतीक्ष्णाग्रो भवति श० ५ २ १ ७ अष्टाश्रिर्यूपो भवति श० ५ २ १ ५ सप्तदशारत्निर्यूपो भवति तै० १ ३ ७ २ खादिरो यूपो भवति श० ३ ६ २ १२ स्तुप एवास्य (यज्ञस्य) यूप श० ३ ५ ३ ४. यूप स्थाणु श० ३ ६ २ ५ खलेवाली यूपो भवत्येतया हि त रसमुत्कूपन्ति ता० १६ १३ ८ वैष्णवो हि यूप श० ३ ६ ४ १ असौ वा अस्य (अग्निहोत्रस्य कर्त्तु) आदित्यो यूप ऐ० ५ २८ आदित्यो यूप तै० २ १ ५ २ वज्रो यूप श० ३ ६ ४ १६ वज्रो वा एष यद् यूप कौ० १० १ ऐ० २ १ वज्रो वै यूप प० ४ ४ वज्रो वै यूपशकल श० ३ ८ १ ५ एष वै यजमानो यद् यूप तै० १.३ ७ ३ (चतुर्द्धा विभक्तस्य वज्रस्य) यूपस्तृतीय वा

योनिर्वाऽउत्तरवेदि श० ७ ३ १ २८. योनिर्वै गार्हपत्या चिति श० ७ १ १ ८ योनिरेव वरुण श० १२ ९ १ १७ योनिर्वै पुष्करपर्णम् श० ६ ४ १ ७ योनिर्मुञ्जा श० ६ ६ २ १५ परिमण्डला हि योनि श० ७ १ १ ३७ अन्धमिव वैतमो योनि जै० उ० ३ ९ २ मासेन वा ऽउदर च योनिश्च सहिते श० ८ ६ २ १४ योनिरुलूखलम् श० ७.५ १ ३८. योनिर्वै वामदेव्यम् जै० ३ ३०१]

योषण: मिश्रणशीला युवतय १ १४१ २ भार्य्या ४ ५ ५ [यु मिश्रणेऽमिश्रणे च (अदा०) धातोर्बाहु० औणा० युच्, पुगागमश्च। 'युष' इति सौत्रो धातु । ततो युजन्ताट् टाप् स्त्रियाम्]

योषणा स्त्री ५ ५२ १४ **योषणाम्**=स्वपत्नीम् ३ ६२ ८ भार्य्याम् ४ ३२ १६ स्वस्त्रियम् ३ ५२ ३ **योषणा:**=योषा इव वर्त्तमाना (दिव =ज्योतीषि) ३ ५६ ५ **योषणे**=स्त्रियाविव (उषासानक्ता=रात्रिदिने) २९ ३१ ['युष' इति सौत्रो धातु । ततो वाहु० औणा० युच् । स्त्रिया टाप्]

योषत् वियोजये २ ३३ ९ विनश्येत् २ १८ ८ युज्येत ४.२ ९ [यु मिश्रणेऽमिश्रणे च (अदा०) धातोर्लेट् । सिब्-विकरण]

योषा प्राप्तयौवना (युवति) १ १२३ ११ विवाहिता स्त्री ऋ० भू० २११, ऋ० ७.८ १८ २ विद्याभिर्मिश्रिता-ऽविद्याभि पृथग्भूता स्त्री प्र०—अत्र यु-धातोर्बाहुल-कात्कर्मणि स प्रत्यय १.१०१ ७ विदुषी स्त्री २९ ४१ कामिनी स्त्रीव (उषा) १ ९२ ११ भार्य्या १ १२३ ९ प्रौढा ब्रह्मचारिणी युवति १ ११९ ५ **योषाम्**=स्वभार्याम् १ ११५ २ युवतिं कन्याम् १ ११७ २० **योषे**=कृतपूर्वा-परविवाहे परस्पर विरुद्धे स्त्रियाविव १ १०४ ३ [यु मिश्रणेऽमिश्रणे च (अदा०) धातोर्बाहु० औणा० स । तत स्त्रिया टाप् । योषा यौते नि० ३ १५ योषा वाऽइय वाग्य-देन न युवता श० ३ २ १ २२ योषा हि वाक् श० १ ४ ४.४ वागिति स्त्री (योषा) जै० उ० ४ २२ ११ योषा वै वेदि श० १ ३ ३ ८ योषा वै वेदिर्वृषाग्नि श० १ २ ५ १५. योषा वाऽअग्नि श० १४ ९ १ १६ योषा हि स्रुक् श० १ ४४.४ योषा वै स्रुग्वृषा स्रुव श० १ ३ १ ९ योषा वै पत्नी श० १ ३ १ १८ न वै योषा कचन हिनस्ति श० ६ ३ १ ३९ तस्मात्पुमान् दक्षिणतो योषामुपशेते जै० उ० १ ५३ ३ दक्षिणतो वै वृषा योषामुपशेते श० ६ ३ १.३०. अरत्निमात्राद्धि वृषा योषामुपशेते श० ६ ३ १ ३० तस्माद् यदा योषा रेतो धत्तेऽथ पयो धत्ते श० ७ १ १ ४४ पुरन्धिर्योषा (यजु० २२ । २२) इति । योषित्येव रूप दधाति तस्माद्रूपिणी युवति प्रिया भावुका श० १३ १ ९ ६ पुरन्धिर्योषेत्याह । योषित्येव रूप दधाति तस्माद्रूपिणी युवति प्रिया भावुका तै० ३ ८ १३ २ योषा वै सिनीवाली (यजु० ११ । ५६) एतद्वु वै योषायै समृद्धरूप यत् सुकपर्दा सुकुरीरा स्वौपशा श० ६.५ १.१० पश्चाद् वरीयसी पृथु-श्रोणिरिति वै योषा प्रशसन्ति श० ३ ५ १ ११.]

यो: गच्छतो गमयितु (रगस्य) प्र०—अत्र या प्रापणे इत्यस्माद्धातोर्बाहुलकादौणादिक कु प्रत्यय १ ७४ ७ त्यक्तव्यस्य (रोगस्य) २ ३३ १३ [या प्रापणे (अदा०) धातोर्बाहु० औणा० कु । तत षष्ठी]

यो: पदार्थाना पृथक्करणम् प्र०—अत्र युधातोर्डोसि. प्रत्ययोऽव्ययत्वञ्च १ ९३ ७ धर्मार्थकाममोक्षप्रापणम् १ १०६ ५ प्रापक. (परमेश्वर) १ १८९.२ मिश्रितम् (भेषजम्=औषधम्) ५ ५३ १४ दु खात्पृथग्भूतम् (श= सुखम्) ५ ४७ ७ सयुक्तम् (शम्) ५ ६९ ३. सुखनिमित्तौ (इन्द्रापूषणा=विद्युद्वायू) ७ ३५.१ दूरीकरणे १९ ५५. दु खवियोजनम् १ ११४ २ दु खवियोजक सुखसयोजक (अग्नि =वैद्यराजो विद्वज्जन) ३ १८ ४ मिश्रयिता भेदको वा (विद्वान् जन) ३ १७ ३ सुकृताज्जनितम् (श=सुखम्) ४ १२ ५ [यु मिश्रणेऽमिश्रणे च (अदा०) धातोर्बाहु० औणा० डोसि]

यो: प्रापयति ६ ५० ७ प्रजा के रोगो का नाश कर आर्याभि० १ ४५, ऋ० १ ८ ५ २ **यौमि**=मिश्रयाम्यग्नौ प्रक्षिप्य वियोजयामि वा १ २२ **यौष्म**=युक्ता भवेम ४ २२ **यौ:**=पृथक् कुर्य्या २ ३२ २ [यु मिश्रणेऽमिश्रणे च (अदा०) धातोर्लङ् अडभाव । वृद्धेरभावश्च । अन्यत्र लट् लुड् लड् च]

रक्ष पालय ३ ३० रक्षति ४१४ रक्षा करो आर्याभि० १ २०, ऋ० १ ९ २० ८ **रक्षतम्**=रक्षत १ ९३ ८ **रक्षताम्**=आप दोनो रक्षा करें स० वि० १६७, अथर्व० ९ २ ३ १९ **रक्षध्वम्**=सतत पालयत प्र०—अत्र व्यत्ययेनात्मनेपदम् ४ २७ **रक्षन्ति**=पालयन्ति १ ४१ १ **रक्षन्ते**=रक्षन्ति प्र०—अत्र व्यत्ययेनात्मनेपदम् १ ९० २ पालयन्ति १ ६२ १० **रक्षसि**=पालयसि ३ ३६ **रक्षस्व**=पालय प्र०—अत्र व्यत्ययेनात्मनेपदम् ५ ३९ **रक्षिषत्**=रक्षेत् ७ १२ २ **रक्षथे**=रक्षतम् प्र०—अत्र लोडर्थे लट् व्यत्ययेनात्मनेपदञ्च १ ३४ ८,

धातोर्ण्यत् । ततष्टाप् स्त्रियाम्]

योज योजयति अ०—सयोजय, प्र०—अत्र विकरणव्यत्ययेन शप् लडर्थे लोडन्तर्गतो ण्यर्थ ३ ५१ युक्तान् कुरु १.८२ १. योजय युङ्क्ते वा ३ ५२ **योजते**=युनक्ति प्र०—अत्र व्यत्ययेन शप् १५ ३३ **योजम्**=युनज्मि २ १८ ३ [युजिर् योगे (रुधा०) धातोर्लोट्। विकरणव्यत्ययेन शप् अन्यत्र लट् लङ् च]

योजनम् योक्तुमर्हं विमानादियानम् १ ८८ ५. युजन्ति येन तदाकर्षणाख्यम् (वीर्यं=सामर्थ्यम्) ५ ५४.५. **योजनानि**=क्रोशान् १ १२३ ८ **योजनेन**=योगेन १ ९२ ३ **योजनेषु**=वन्धनेषु १.१६४ ९ [युजिर् योगे (रुधा०) धातोर्ल्युट् । योजनानि अंगुलिनाम निघ० २ ५]

योजना योजनानि वहून् क्रोशान् ९ १३ युज्यन्ते सर्वाणि वस्तूनि येषु भुवनेषु तानि प्र०—अत्र 'शेश्छन्दसि०' इति शेर्लोप १ ३५ ८ [योजनप्राति० शेर्लोपश्छन्दसि]

योजनेभिः अनेकैर्योजनैर्युक्तै (रजोभि =ऐश्वर्यप्रदैर्मार्गै.) ६ ६२ ६ [योजनप्राति० 'वहुल छन्दसी' ति भिस ऐसादेशो न भवति]

योजि अयोजि २ १८ १ [युजिर् योगे (रुधा०) धातो कर्मणि लुङ् । अडभावश्छान्दस]

योतोः मिश्रिताऽमिश्रितकर्त्तु (निर्णायकस्य राज्ञ) ६ १८ ११ [यु मिश्रणेऽमिश्रणे च (अदा०) धातोर्वाहु० औणा० तु । तत षष्ठी]

योत्सि युध्यसे प्र०—अत्र 'वहुल छन्दसि' इति श्यनभाव १ १३२ ४ [युध सम्प्रहारे "(दिवा०) धातोर्लट् । 'वहुल छन्दसी' ति शपो लुकि श्यनोऽप्यभाव]

योधत् युध्यते ६ ३९ २ [युध सम्प्रहारे (दिवा०) धातोर्लेट् । व्यत्ययेन शप्]

योधम् युद्धकर्त्तारम् (युद्धकुशल वीरम्) ६ २६ ४ **योधः**=प्रहर्त्ता १ १४३ ५ योद्धा (निरभिमानी राजा) ७.३१ ६ [युध सम्प्रहारे (दिवा०) धातोरिगुपधलक्षण क कर्त्तरि]

योधानः योद्धु शील (वीरपुरुष) १ १२१ ८ [युध सप्रहारे (दिवा०) धातोस्ताच्छील्ये चानश् । विकरणव्यत्ययेन शप्]

योधि वियोजय ५ ३ ८ [यु मिश्रणेऽमिश्रणे च (अदा०) धातोर्लोट् । 'अडितश्च' अ० ६ ४ १०३. सूत्रेण हेर्धिरादेश]

योधिष्टम् युध्येयाताम् ६ ६० २ [युध सम्प्रहारे (दिवा०) धातोर्लुङ् । अडभावश्छान्दस]

योधीयान् अतिशयेन योद्धा (सेनापति) १ १७३ ५ [युध सम्प्रहारे (दिवा०) धातोस्तृजन्ताद् ईयसुन् । 'तुरिष्ठेमेयस्सु' इति तृचो लोप]

योना गर्भाशये १ १६४ ३२ जन्मनिमित्ते (दम्पती) १ १४४ ४ योनौ निमित्ते सति १ ६५ २ गृहे ४ १ ११२ [योनिप्राति० 'सुपा सुलुक्०' सूत्रेण सप्तम्या प्रथमाद्विवचनस्य च स्थाने डादेश]

योनिम् सुखसाधक दु खविच्छेदकमुपदेशम् १२ ५९ गृहम् ६ १५ १६ कारणम् १७ ६० परमात्माख्य गृहम् १७ ७३ जन्मस्थानम् १९ ७६. स्वरूपम् ३१ १९ उदकम् ३ ३३ ४ मिश्रिताम् (उखा=पाकस्थालीम्) ११ ५९ स्थानमाकाशम् १३ ३ राजधर्मासनम् १२ १७ सत्यधर्मानुष्ठान वेदविज्ञानमेव प्राप्तिकरणम् ऋ० भू० १३२, ३१ १९ देहधारणकारणम् भा०—गर्भाशयम् १२ ३८ प्रकृति, स्वात्मस्वभावम् ८ २२ आदिकारण (परमात्मा) को आर्याभि० २ २८, १३ ३ **योनिषु**=युवन्ति मिश्रीभवन्ति येषु कार्येषु कारणेषु वा तेषु प्र०—अत्र 'वहिश्रिश्रुयु०' उ० ४ ५३ अनेन यु-धातोर्नि प्रत्ययो निच्च १ १५ ४ निमित्तेषु २ ३९ ४ **योनिः**=दु खवियोजक सुखसंयोजको व्यवहार १२ ५२ वसति ७ २१ स्थित्यर्थ स्थानविशेष ७ २२ ऐश्वर्यकारणम् ८ ३९ निवसति ९ २ न्यायासनम् १ १०४ १ निमित्त प्रयोजनम् ११ १२ जगत्कारण प्रकृति ३३ २ विद्यासम्वन्ध २० ३३ गृहे न्यायकर्त्री (राजपत्नी) १० २६. असम प्रमाणम् ८ ४१ राज्यभूमि ८ ३८ सन्ताननिमित्ता ३ ५३ ४ सयोगवियोगवित् (अ०—विद्वज्जन) ११ २९ जलम् २३ ४ **योनीः**=चिती १७ ७९. **योनेः**=स्वकारणात् २ ३५ १० **योनौ**=जन्मनि स्थले वा ३ २१ यज्ञे प्र०—'यज्ञो वा ऋतस्य योनि ' श० १ ३ १ १६, २ ९ कालाख्ये कारणे २९ ३१ युवन्ति यस्या सा योनिर्गृह जन्मान्तर वा तस्याम् २ २० आधारे ३ १ ७ समुद्रे १३ ५३ वन्धच्छेदके मोक्षप्रापके (विद्यावोधे) १२ ५४ क्षेत्रे १२ ६८ गृहाश्रमे १५ ५९ **योन्याम्**=गर्भाऽऽधारे १९ ८७ [यु मिश्रणेऽमिश्रणे च (अदा०) धातो. 'वहिश्रिश्रुयु०' उ० ४ ५१. सूत्रेण नि । योनि =उदकनाम निघ० १ १२ गृहनाम निघ० ३ ४ योनिरन्तरिक्ष महानवयव परिवीतो वायुना । अयमपीतरो योनिरेतस्मादेव परियुतो भवति नि० २ ८ योनिर्वाऽउखा श० ७ ५ २ २.

दुष्टगुणकर्मस्वभावहन्ता (विद्वज्जन) १.१२९.६. [रक्षस्-उपपदे हन हिंसागत्यो (अदा०) धातो. क्विप् । 'इन्हन्-पूषार्यम्णा शौ, सौ च' इति नियमादुपधाया न दीर्घ । अग्निर्वै देवाना रक्षोहा मै० २ १ ११ साम वै रक्षोहा तै० स० ६ ६.३.१ तै० ब्रा० ५ ६ ४]

रक्षोहत्याय दुष्टाना हननाय ६ ४५ १८ [रक्षस्-हत्यपदयो समास । हत्यम्=हन हिंसागत्यो. (अदा०) धातो 'हनस्त च' इति क्यप् तान्तादेशश्च]

रघवः सद्य कारिण (मनुष्या:) ४.५.१३ **रघुः**= लघु (श्येन इव सूर्य) ५ ४५ ६. [लघुप्राति० जस् । 'बालमूल०' अ० ८ २ १८ वा० सूत्रेण वा लत्वम्]

रघुद्रुवः ये रघून्यास्वादनीयान्यन्नानि द्रवन्ति ते (कृपीवला) १ १४० ४ ये रघु लघु द्रवन्ति गच्छन्ति ते (सूरय =विद्वासो जना) प्र०—अत्र कपिलकादित्वा-ल्लत्वम् १५ ४२ [लघूपपदे द्रु गतौ (भ्वा०) धातोर् क्विप् । 'बालमूललघ्वसुरालमङ्गुलीना वा रो लत्वमापद्यत इति वक्तव्यम्' अ० ८.२.१८ इति वा० सूत्रेण वा लत्वम्]

रघुपत्मजंहाः यो लघुपतन जहाति स (अग्नि) ६ ३.५ [रघुपत्मोपपदे ओहाक् त्यागे (जु०) धातोश्छान्दस श । रघुपत्म=रघु-पत्मपदयो समास । रघु =लघु । पत्म=पत्लृ गतौ (भ्वा०) धातोरौणा० मन्]

रघुपत्वानः ये रघून् पथ पतन्ति ते (सप्तय = अश्वा) प्र०—अत्र 'अन्येभ्योऽपि०' इति वनिप्प्रत्यय १ ८५ ६ [रघूपपदे पत्लृ गतौ (भ्वा०) धातो कर्त्तरि वनिप् । रघु =लघु]

रघुमन्यवः लघुक्रोधा (वीरयोद्धार) प्र०—अत्र वर्णव्यत्ययेन लस्य र १ १२२ १ [लघु-मन्युपदयो समास लस्य रेफ । मन्यु क्रोधनाम निघ० २ १३]

रघुयत् सद्योगन्त्री (भा०—गौरिव वस्तु) ४ ५ ६ [रघूपपदे इण् गतौ (अदा०) धातो शतृ]

रघुया रघव क्षिप्र गन्तार (वय =पक्षिण) प्र०—अत्र 'सुपा सुलुक्०' इति जस स्थाने याजादेश २ २८ ४ [लघुप्राति० जस स्थाने याच् 'सुपा सुलुक्०' सूत्रेण]

रघुष्यत् सद्य स्यन्दमानम् (सैन्यम्) ४ ५ ६. **रघुष्यदम्**=यो रघु लघु स्यन्दति तम् (अग्नि=विद्यु-दादिरूप वह्निम्) ३ २६ २ लघुगमनम् ५ २५ ६ यो लघु स्यन्दति तम् (रथ=विमानादियानम्) ५ ७३ ५ **रघुष्यदः**= ये रघुपु स्यन्दन्ते ते (कृषीवला) १ १४०.४ ये मार्गान् स्यन्दन्ते ते (सप्तय =अश्वा) प्र०—गत्यर्थाद्विधानो-बाहुलकादौणादिक उ. प्रत्ययो नकारलोपश्च १ ८५ ६. [रघूपपदे स्यन्दू प्रस्रवणे (भ्वा०) धातो कर्त्तरि क्विप्]

रघुस्पदः रघव आशुगा स्यन्दन प्रस्रवणानि प्रकृष्टगमनानि येषा ते (गिरय) १ ६४.७. [रघु-स्यद् पदयो समास । वर्णव्यत्ययेन यस्य पकार । स्यद्=स्यन्दू प्रस्रवणे (भ्वा०) धातो क्विप्]

रघ्वी लघ्वी (क्रिया) ६ ६३ ६ **रघ्वीः**=गमनशीला नद्य. १ ५२.५ [लघुप्राति० स्त्रिया ङीप् । लघु =लघि गतौ (भ्वा०) धातो 'लङ्घिबंह्योर्नलोपश्च' उ० १ २६. सूत्रेण उ. । नलोपश्च । लकारस्य रेफ]

रघ्वीरिव लघ्व्यो ब्रह्मचारिण्य इव ४ ४१ ६. यथा गमनशीला नद्य १ ५२ ५ [रघ्वी-इवपदयो समास । रघ्वी =रघु+ङीप्+जस्प्रत्यये पूर्वसवर्णदीर्घ:]

रजतनाभी रजतवर्णनाभियुक्तौ (पिशङ्गौ= पीतवर्णौ पशू) २९ ५९ [रजत-नाभिपदयो समास]

रजतम् रागविषयमानन्दस्वरूपम् (ब्रह्म) ऋ० भू० १९२ [रञ्ज रागे (भ्वा०) धातो: 'पृषिरञ्जिभ्या कित्' उ० ३ १११. सूत्रेण अतच् किच्च]

रजता. अनुरक्ता भा०—पत्न्यास्सिन् प्रीता (स्त्रिय) २३.३७. [रजतमिति व्याख्यानम् ततो जस्]

रजयित्रीम् विविधरागकारिणीम् (ओषधिम्) ३०.१२ [रञ्ज रागे (भ्वा०) धातोर्णिजन्तात् तृच् । तत स्त्रिया ङीप् । णिचि रञ्जेर्णौ मृगरमणे अ० ६ ४ २४. वा०सूत्रेण नलोप.]

रजसः लोकस्यैश्वर्यस्य वा १३ १५ लोकसमूहस्य ४.१ ११ लोकान् १ १६ ३ रागविषयस्य १.५२.१४ अन्तरिक्षस्य मध्ये १ ५२ ६. लोकजातस्य ७ ३५ ५. भूगोल-स्य १ ६२ १ उस घर का स० वि० १६७, अथर्व० ६ २ ३ १५ पृथिवीलोकस्य १.३३.७ **रजसा**=अन्धकार-लक्षणेन ३४ २५ लोकसमूहेन ३३ ४३ रजोरूपेण रजतरूपेण वा (रथेन) प० वि० । किरण द्वारा स० प्र० ३१३, ३३ ४३ **रजसि**=ऐश्वर्ये २ २ ४ **रजसी**=रात्र्यहनी ६ ९ १ रजोभिर्निर्मिते (द्यावापृथिवी=सूर्यभूमी) ४.५६ ३ **रजः**= सकारण लोकसमूहम् १ ५८ ५. लोकलोकान्तरम् ५ ४८ २ अणुत्रसरेण्वादि १ ६० ७ ऐश्वर्यम् ३ १ ५ पृथिव्यादि-लोकजातम् १.५६ ५ सूक्ष्म सर्वलोककारण परमाण्वादिकम् १ ८३ २ द्व्यणुकादिरेणु १३ २८ कण १ १४१ ७ सर्वलोकैश्वर्यसहितम् (ब्रह्म) ऋ० भू० १९२, अथर्व०

रक्षेथे ३ ५४ १६ [रक्ष पालने (भ्वा०) धातोर्लोट् । अन्यत्र लट् लेट्, व्यत्ययेनात्मनेपदमपि]

रक्षणेभिः अनेकविधैरुपायैः ४ ३.१४. [रक्ष पालने (भ्वा०) धातोर्ल्युट् । ततो भिस ऐस् न भवति छान्दसत्वात्]

रक्षमाणः रक्षन् सन् (अ०—सभेश्वर) प्र०—अत्र व्यत्ययेन शानच् १ ३१ १२ **रक्षमाणाः**=रक्षा कुर्वन्त (विद्वासो जना) १.७२ ५ ये रक्षन्ति ते (विद्वास.) १.१४६ ४ [रक्ष पालने (भ्वा०) धातो शानच् । व्यत्ययेनात्मनेपदम्]

रक्षमाणा यौ रक्षतस्तौ (प्राणोदानतुल्यौ विद्वासौ) ५ ६२ ५ [रक्ष+शानच्=रक्षमाण । ततो द्विवचनस्याकारादेश]

रक्षमाणासः ये रक्षन्ति ते (देवा=विद्वज्जना) १ ६६ ६ [रक्षमाणप्राति० जसोऽसुक्]

रक्षसः दस्युचोरादीन् ३४ २६ दुष्टान् मनुष्यान् दोषान् वा १ ७६ ३ दुष्टाचारान् मनुष्यान् ५ ४२ १० दुष्टा (द्विप=व्यभिचारिणीर्वृषली) ११ ४६ परपीडकस्य (दुर्जनस्य) १ १२६ ११ राक्षस, हिंसाशील, दुष्टस्वभाव-देहधारी से आर्याभि० १ १२, ऋ० १ ३ १० १५ **रक्षसाम्**=दुष्टकर्मकारिणा प्राणिनाम् ५ २६ रक्षन्ति परार्थहननेन स्वार्थमिति रक्षासि तेषाम् (स्वार्थिजनानाम्) ६ १६ **रक्षसे**=दुष्टाना विनाशाय ५ २ ६ **रक्षः**=दुष्टकर्मकारी मनुष्य १ ८६ ६ दुर्गन्धादिदु खजालम् १ ६ रक्ष स्वभावो दुष्टो मनुष्य १ ७ दुष्ट-व्यवहारान् प्र०—अत्र व्यत्ययेनैकवचनम् १ २१ ५ विघ्नकारी प्राणी परसुखाऽसहो मनुष्य, बन्धनेन रक्षितव्यम् १ २६ दुष्टाचारम् राक्षसम् ६ ३८ रक्षति सर्वत स्वार्थनिमित्तीभूत कर्म अ०—दुष्टस्वभाविनम् ६ १६ सर्वथा स्वार्थरक्षक परार्थहन्ता (दुष्टो जन) ६ १६ दस्युस्वभाव ११६. दुःख निवारणीयम् ११६ दुष्टस्वभावो जन्तु ११४ **रक्षांसि**=दुष्टान् दोषान्वा १८ ५२ रक्षयितव्यानि (कार्याणि) ७ १५ १० दुष्टानि कर्माणि दुष्टस्वभावान् प्राणिन १ ७६ १२ हिंसकान् दस्यून् ६ १६ दुष्टाचारान् ६ १६ २६ परपीडका स्वार्थिन (असुरा) २ २६ पालयितव्यानि (अन्ना=रुधिराणि) २५ ६ अन्यान् प्रपीड्य स्वात्मानमेव ये रक्षन्ति ते (भा०—चोरा) ३४.५१ [रक्ष पालने (भ्वा०) धातो 'सर्वधातुभ्योऽसुन्' उ० ४ १८६ इत्यसुन् । रक्षो रक्षितव्यमस्माद् । रहसि क्षणोतीति वा । रात्रौ नक्षत इति वा नि० ४ १८ अग्निर्वै रक्षसामपहन्ता श० १ २ १ ६. अग्निर्वै रक्षसामपहन्ता कौ० ८ ४ अग्निर्वै ज्योतीरक्षोहा श० ७ ४ १ ३४ ते (देवा) ऽविदु । अय (अग्नि) वै नो विरक्षस्तम. श० ३ ४ ३ ८ अग्नेर्वा ऽएतद्रेतो यद्धिरण्य नाष्ट्राणा रक्षसामपहन्ता श० १ ३ ४ ८ तत् (रक्ष.) सीसेनापजघान । तस्मात् सीस मृदु सृतजव हि श० ५ ४ १ १०. ते (देवा) एत रक्षोहण वनस्पतिमपश्यन् कार्ष्मर्य्यम् श० ७ ४.१ ३७ देवा ह वा ऽएत वनस्पतिषु रक्षोघ्न ददृशुर्यत् कार्ष्मर्य्यम् श० ३.४ ११६ यदापामार्गहोमो भवति रक्षसामपहत्यै तै० १.७ १८ अपामार्गैर्वै देवा दिक्षु नाष्ट्रा रक्षांस्यपामृजत श० ५ २ ४ १४ ब्राह्मणो हि रक्षसामपहन्ता श० १ १ ४ ६ साम हि नाष्ट्राणा रक्षसामपहन्ता श० ४ ४ ५ ६ स या वै दृप्तो वदति यामुन्मत्त सा वै राक्षसी वाक् ऐ० २ ७ आपो वै रक्षोघ्नी तै० ३ २ ३ १२ वज्रो वाऽआपस्तद्वज्रेणैवैतन्नाष्ट्रा रक्षांस्यतोऽपहन्ति श० १ ७ १.२ असृग् भाजनानि ह वै रक्षासि कौ० १० ४ रक्षसा हि स भाग. (असृग् रूप) श० १ ६ २ ३५]

रक्षस्विनः रक्षासि दुष्टस्वभावा निन्दिता मनुष्या विद्यन्ते येषु सङ्घातेषु तान् १ १२ ५ रक्षासि निन्दिता पुरुषा सन्ति येषु व्यवहारेषु ते प्र०—अत्र निन्दितार्थे विनि १ ३६ २० **रक्षस्विने**=पापी हिंसक दुष्टात्मा के लिए आर्याभि० १ २६ [रक्षस्प्राति० निन्दाया मत्वर्थे विनि । पुरुष पुरुषो हि रक्षस्वी तै० आ० ५ ६ ४]

रक्षिता रक्षणकर्त्ता (ईशान=ईश्वर) २५ १८ रक्षा करने मे तत्पर (ईश्वर) आर्याभि० १ १०, ऋ० १ ६ १५ ६ [रक्ष पालने (भ्वा०) धातो कर्त्तरि तृच्]

रक्षो रक्षैव १ १७४ ३ [रक्ष पालने (भ्वा०) धातोर्लोट् । वर्णव्यत्ययेनाकारस्योकारादेश]

रक्षोयुजे यो रक्षासि दुष्टान् मनुष्यान् युनक्ति तस्मै (अवमात्मने जनाय) ६ ६२ ८ [रक्षमुपपदे युजिर् योगे (रुधा०) धातो क्विप्]

रक्षोहणम् रक्षसा दुष्टाना हन्तारम् (विद्वज्जनम्) २ २३ ३ यया येन धार्मिकेण पुरुषेण रक्षासि हन्यन्ते तथा (पुरुषम्) ५ २३ **रक्षोहणः**=यथा यूय रक्षासि दुष्टान् दस्य्वादीन् हथ तथा तान् ५ २५ **रक्षोहणौ**=यथा रक्षसा हन्तारौ प्रजासभाद्यध्यक्षौ तथाऽहम् ५ २५ यथा रक्षसा शत्रूणा हन्तारौ भवथस्तथाऽहम् ५ २५ **रक्षोहा**=यो रक्षासि दुष्टान् हन्ति स (सूर्यो विद्वज्जनो वा) ५ २४ यो दुष्टाना रोगाणा हन्ता स (भिषक्=वैद्य) १२ ८०

वा नि० ६ ३३.]

रण्यानि रमणीयानि लोकजातानि ३ ५५ ७ रणेषु साधूनि कर्म्माणि १८५ १० [रमु क्रीडायाम् (भ्वा०) धातोर्यत्प्रत्यये मकारस्य नकारश्छान्दसः। रण-शब्दाद्वा साध्वर्थे यत्]

रण्वभिः रमणीयैः (धनैः) ५ ४४ १० [रमु क्रीडायाम् (भ्वा०) धातोर्बाहु० औणा० व । ततो भिस ऐसादेशो न छन्दसि]

रण्वम् उपदेशकम् ११२६७ शब्दायमानम् (अग्नि=पावकम्) ३ २६.१ रमणीयम् (उपदेशकम्) ६.२६ १ **रण्वः**=रमयिता (जगदीश्वरः) २ २४ ११ रमणीयस्वरूप (अग्नि=राजा) ४ १ ८ रममाण (सूनु=अपत्यम्) ६ २ ७ शब्दविद्यावित् (विद्वज्जन) १ १४४ ७ रमणीय (वाजी=अश्व) प्र०—अत्र रमधातो-र्बाहुलकादौणादिको व प्रत्यय १ ६६ ३ [रमु क्रीडायाम् (भ्वा०) धातोरौणा० बहुलवचनाद् व । मकारस्य नकारो वर्णव्यत्ययेन]

रण्वया रमणीयया (गातुमत्या=प्रशस्तवाग्भूमि-युक्तया) ७ ५४ ३ **रण्वा**=या रण्वति सुख प्रापयति सा (पुष्टि) १ ६५ ३ प्रशसनीया (पुष्टि=धातुवृद्धि) २ ४ ४ रमणीया (पुष्टि) ४ १६ १५ (रण्वमिति व्या-ख्यातम्, ततष्टाप् स्त्रियाम्। अथवा रवि गत्यर्थे (भ्वा०) धातो 'गुरोश्च हल' इत्यकार । ततष्टाप्]

रण्वसन्दृक् या रण्वान् रमणीयान् पदार्थान् सन्दर्श-यति सा (उषा=प्रभातवेला) ३ ६१ ५ रमणीय य सम्यक् पश्यति स (वीरपुरुष) ७ १ २१ **रण्वसन्दृशम्**= रमणीयसदृशम् (विद्वज्जनम्) ६ १६ ३७ [रण्वोपपदे सम्पूर्वाद् दृशिर् प्रेक्षणे (भ्वा०) धातो क्विन्। रण्वमिति व्याख्यातम्]

रण्विते शब्दायमाने (उपासानक्ता=रात्रिदिने) २ ३.६. [रवि गत्यर्थे (भ्वा०) धातो. क्त]

रताः ये रमन्ते ते (सम्भोगिजना) ४० ६ रममाणा ४० १२ [रमु क्रीडायाम् (भ्वा०) धातोर्बाहु० औणा० क्त । 'गत्यर्थाकर्मक०' इति वा कर्त्तरि क्त]

रतिः [illegible]णम् ८ ५१ [रमु क्रीडायाम् (भ्वा०) धातो स्त्रिया क्तिन्]

रत्नधातमम् रत्नानामतिशयेन धर्त्तारम् (राजानम्) ५ ८ ३ रमणीयानि पृथिव्यादीनि सुवर्णादीनि च रत्नानि दधाति धापयतीति रत्नधा अतिशयेन रत्नधा इति रत्नधातम-स्तम् (अग्नि=परमेश्वर भौतिक वा) १ १ १ रत्नानि सर्वजनै रमणीयानि प्रकृत्यादिपृथिव्यन्तानि ज्ञान-हीरक-सुवर्णादीनि च जीवेभ्यो दानार्थं दधातीति रत्नधा अतिशयेन रत्नधा स रत्नधातमस्तम् (अग्निम्) वे० भा० न० १ १ १. रत्न अर्थात् रमणीयपृथिव्यादिकों को अपने सेवकों के लिए धारण करने वाले (ईश्वर) को आर्याभि० १ २, ऋ० १ १ १ १ **रत्नधातमः**=रत्नानि रमणीयानि सुखानि दधाति येन सोऽतिशयित. (स्तोम=स्तुतिसमूह) १ २० १ [रत्नधाप्राति० अतिशायने तमप्। रत्नधा=रत्नोपपदे डुधाञ् धारणपोषणयो (जु०) धातो क्विप् कर्त्तरि। रत्न-धातमम्=रमणीयाना धनाना दातृतमम् नि० ७ १५.]

रत्नधाभिः या रत्नानि द्रव्याणि दधति ताभि (स्वपत्नीभि) ४ ३४ ७ **रत्नधाम्**=यो रत्नानि रमणी-यानि विज्ञानानि हीरकादीनि भुवनानि वा दधातीति तम् (परमेश्वरम्) ४ २५ **रत्नधाः**=यो रत्नानि दधाति स (पुरुष पतिर्वा) ३८ ५. रत्नानि रमणार्थानि पृथिव्यादीनि वस्तूनि दधातीति स (विद्युदग्नि) १ १५ ३ रत्नानि रमणीयानि वस्तूनि दधाति स (सुपुत्र) १ १६४ ४६ रमणीयवस्तु धर्त्ता (विद्वज्जन) २६ २१ [रत्नोपपदे दधातेर्धातो कप्रत्ययान्तात् टाप् स्त्रियाम्। अथवा रत्नोपपदे दधाते कर्त्तरि क्विप्]

रत्नधेभिः ये रत्नानि दधति तैः [ऋभुभि= मेधाविभिर्जनैः) ४ ३५ ७ ये रत्नानि द्रव्याणि दधति तैः (सिन्धुभि=नदीभि समुद्रैर्वा) ४ ३४ ८ [रत्नोपपदे डुधाञ् धारणपोषणयो (जु०) धातो क । ततश्छन्दसि भिस ऐसादेशो न]

रत्नधेयम् रत्नानि धीयन्ते यस्मिँस्तत् (पात्रम्) ४.३४ ४ रत्नानि धेयानि यस्मिँस्तत् (दुरोण=गृहम्) ४.१३ १ रत्नानि धेयानि येन तम् (जनम्) ५ ४२ ७. **रत्नधेयानि**=रत्नानि धीयन्ते येषु तानि (धनाधिकरणानि) ७.५३ ३ **रत्नधेयाय**=रत्नानि धीयन्ते यस्मिन् कोषे तस्मै ४ ३४ ११ [रत्न-धेयपदयो समास । रत्नमिति व्याख्यास्यते। धेयम्=डुधाञ् धारणपोषणयो (जु०) धातो 'अचो यत्' इति यत्]

रत्नधेया रत्नानि धनानि धीयन्ते यया तस्यै (प्रज्ञायै) ४ ३४ १ [रत्नधेयमिति व्याख्यातम्। ततष्टाप् स्त्रियाम्]

रत्नम् सुवर्णहीरकादिकम् ३ ५४ ३ रमन्ते जनाना मनासि यस्मिँस्तत् (वसु=उत्तमद्रव्यम्) १ ४१ ६ धनम् ३ ८ ६ रमणीय सुवर्णादिकम् १ ५३ १ रमणीय ज्ञान

११४.५१. **रजांसि**=लोकविशेषाणि ६ ३० ३. उत्तम-मध्यम-निकृष्टानि (लोकलोकान्तराणि) ४ ५३ ५ स्थानानि ३४ १६ लोकानैश्वर्याणि वा ४ ४५ ७ लोकस्थानानि २ ३६ ७ पृथिव्यादीनि स्थूलानि तत्त्वानि १ १६४ ६ **रजोभिः**=ऐश्वर्यप्रदैर्मार्गैः ६ ६२ ६ परमाणुभिर्लोकैर्वा सह ६ ६२ २ [रञ्ज रागे (भ्वा०) धातो 'भूरञ्जिभ्या कित्' उ० ४ २१७ सूत्रेणासुन् किच्च । रज =रात्रिनाम निघ० १ ७ पदनाम निघ० ४ १ रजसी =द्यावापृथिवीनाम निघ० ३ ३० रजतेर्ज्योती रज उच्यते, उदक रज उच्यते, लोका रजास्युच्यन्ते, असृगहनी रजसी उच्येते नि० ४ १९ रजस =अन्तरिक्षलोकस्य नि० १२ ७ रजस्सु= उदकेषु नि० १० ४४ इमे वै लोका रजासि श० ६ ३ १ १८ द्यौर्वै तृतीय रज श० ६ ७ ४ ५]

रजस्तुरम् यो रजासि लोकान् तुरति त तूर्णगमनागमनहेतुम् (मरुता गणम्) १ ६४ १२ **रजस्तूः**=यो रज उदक तौति वर्धयति स (वीरजन) ६ ६६ ७ यो रजासि लोकान् वर्धयति स (विद्वज्जन) ६ २ २ ['रजस्' इत्युपपदे तुर त्वरणे (जु०) धातो क्विप्]

रजस्याय रज सु लोकेषु परमाणुषु वा भवाय (जनाय) १६.४५ [रजस्प्राति० भवार्थे यत्]

रजःशया या रज सु सूर्यादिलोकेषु शेते सा (तनू = व्याप्ति) ५ ८ [रजस्-उपपदे शीङ् शये (अदा०) धातो 'अधिकरणे शेते' अ० ३ २ १५ सूत्रेणाच् । तत स्त्रिया टाप्]

रजिम् पङ्क्तिम् ६ २६ ६. [रञ्ज रागे (भ्वा०) धातो 'इक् कृष्यादिभ्य' इति वासूत्रेण स्त्रियाम् इक्]

रजिष्ठम् अतिशयेन ऋजु कोमलम् (पन्थाम्= पन्थानम्) प्र०—अत्र ऋजु-शब्दादिष्ठनि 'विभाषर्जोश्छन्दसि' अ० ६ ४ १६२ इति ऋकारस्य रेफादेश १ ९१ १ **रजिष्ठाः**=अतिशयेन रजितार (देवा =आदित्यादय) ७.५१ २ **रजिष्ठैः**=अतिशयेन रजस्वलैः (मार्गैः) १ ७९ ३ [ऋजुप्राति० अतिशायन इष्ठन्-प्रत्यये 'विभाषर्जोश्छन्दसि' अ० ६ ४ १६२ सूत्रेण ऋजोर् ऋकारस्य रेफ । रजस्प्राति० वा अतिशायन इष्ठन रजस्-शब्दान् मतुवर्थकप्रत्ययस्य लोपश्छान्दस । रजिष्ठैः =ऋतुतमैः रजस्वलतमैः प्रपिष्टतमैरिति वा नि० ८ १९]

रज्जुसर्जम् यो रज्जु सृजति तम् (शिल्पिजनम्) ३० ७ [रज्जूपपदे सृज विसर्गे (तुदा०) धातो 'कर्मण्यण्' इत्यण्]

रज्जुः रज्जु १ १६२ ८ [सृज विसर्गे (तुदा०) धातो 'सृजेरसुम् च' उ० १ १५ सूत्रेण उ प्रत्ययोऽसुमागम आदिसकारलोपश्च । पुनर्ऋकारस्य यणादेश आगम सकारस्य जश्त्व च । अथाप्याद्यन्तविपर्ययो भवति नि० २ २ वरुण्या वै यज्ञे रज्जु श० ६ ४ ३ ८ वरुण्या रज्जु श० १ ३ १ १४ वरुण्या वा ऽएपा यद्रज्जु श० ३ २ ४ १८]

रण उपदिश ५ ५१ ८. **रणन्**=उपदिशन्तु ४ ३३ ७ **रणन्त**=रमध्वम् ७ ५७ ५ **रणन्ति**=शब्दायन्ते ३.७.५ [रण शब्दे (भ्वा०) धातोर्लोट् । अन्यत्र लङ् लट् च । रणऽशब्दाद्वाचारे क्विप् तता लङि 'रणन्त' इति रूपम्]

रणन् उपदिशन् (विद्वज्जन) ५ ५३ १६ [रण शब्दे (भ्वा०) धातो शतृ]

रणयन् शब्दयन्तु स्तुवन्तु प्र०—अत्र लड्यडभाव १ १०० ७ **रणयन्त**=शब्दयन्ति ४ ७ ७ रण सङ्ग्राम इवाचरन्ति ३ ५७.२ रमेरन् रमयेयुर्वा ६ १ ४ शब्दयेयु १ १४७ १ **रणयन्तु**=शब्दयन्तु ६ २८ १ [रण शब्दे (भ्वा०) धातोर्णिजन्तात्लङ् अडभाव । रणप्राति० वा आचारे क्यच्-प्रत्यये छान्दस रूपम्]

रणाय सङ्ग्रामाय ३६ १४ युद्धाय १ ६१ ६ **रणाः**=रममाणा (गृहस्था जना) ६ २७ १. [रण शब्दे (भ्वा०) धातो 'वशिरण्योरुपसख्यानम्' अ० ३ ३ ५८ वा० सूत्रेण कर्त्तरि कारके अप् । रण सग्रामनाम निघ० २ १७ रमु क्रीडायाम् (भ्वा०) धातोर्वा बाहु० औणा० नक् । रणाय रमणीयाय सग्रामाय नि० ४ ८ रणाय रमणीयाय नि० ९ २७]

रणिष्टन शब्दयत २ ३६ ३ वदत २९ २४ [रण शब्दे (भ्वा०) धातोर्लङ् अडभाव । तस्य तनबादेश]

रणे रणे युद्धे युद्धे १ ७४ ३ ['रणे' पदस्य वीप्साया द्वित्वम्]

रण्यति रमते ५ १८ १ उपदिशति प्र०—अत्र विकरणव्यत्यय १ ८३ ६ **रण्यथः**=रमयथ ५ ७४ ३ **रण्यन्ति**=रणन्ति शब्दयन्ति प्र०—अत्र व्यत्ययेन शप स्थाने श्यन् १ ३८ २ [रण-शब्दे (भ्वा०) धातोर्लट् । विकरणव्यत्ययेन शप श्यन्]

रण्यवाचः रमणीयभाषा ३ ५५ ७ [रण्या-वाच्-पदयो समासे पूर्वपदस्य ह्रस्व । रण्या=रमु क्रीडायाम् (भ्वा०) धातो 'पोरदुपधाद्' इति यत्, ततष्टाप् स्त्रियाम् । मकारस्य नकारो वर्णव्यत्ययेन । रमु धातोर्वा बाहु० औणा० डण्यन्प्रत्यय । रण्यी रमणीयौ सग्राम्यौ

रथन्तराय यो रथैः समुद्रादीस्तरति तस्मै (अग्नये—पावकाय) २९.६० **रथन्तरे**=अन्तरिक्षे १.१६४.२५. **रथन्तरेण**=यत्र रथेन तरति तत्र तेन (तेजसा=सूर्य-प्रकाशेन) २१.२३ [रथोपपदे तॄ प्लवनसन्तरणयो (भ्वा०) धातो. 'ऋतोरप्' इत्यप् । नुडागमश्छान्दस । इय (पृथिवी) वै रथन्तरम् कौ० ३.५. प० २.२ ता० ६.८.१८. श० ५.५.३.५ अय वै (पृथिवी) लोको रथन्तरम् ऐ० ८.२. रथन्तरो वा अय (भू०) लोक तै० १.१.८.१ रथन्तर हीयम् (पृथिवी) श० १.७.२.१७ उपहूत रथन्तर सह पृथिव्या तै० ३.५.८.१ श० १.८.१.१९ वाग्वै रथन्तरम् ऐ० ४.२८. वाग् रथन्तरम् ता० ७.६.१७ ब्रह्मवर्चस वै रथन्तरम् तै० २.७.१.१. ब्रह्म वै रथन्तरम् ऐ० ८.१.२ ता० ११.४.६ ऋग् रथन्तरम् ता० ७.६.१७. अपानो रथन्तरम ता० ७.६.१४ यद्धृस्व तद् रथन्तर यद्दीर्घ तद् बृहत् कौ० ३.५. देवरथो वै रथन्तरम् ता० ७.७.१३ अन्न वै रथन्तरम् ऐ० ८.१ राथन्तरी वै रात्री ऐ० ५.३० गायत्री वै रथन्तरस्य योनि ता० १५.१०.५. गायत्र वै रथन्तरम् ता० ५.१.१५. गायत्र वै रथन्तर गायत्रश्छन्द ता० १५.१०.६ एतद्वै रथन्तरस्य स्वमायतन यद् बृहती ता० ४.४.१० अग्निर्वै रथन्तरम् ऐ० ५.३०. उप वै रथन्तरम् ता० १६.५.१४ ऐद् रथन्तरम् ता० ७.६.१७ त्रिवृच्च त्रिणवश्च राथन्तरी तावजश्चाश्वश्चान्वसृज्येता तस्मात्तौ राथन्तर प्राचीन प्रधूनुत ता० १०.२.५ चतुरक्षर रथन्तरम् तै० २.१.५.७ प्रजनन वै रथन्तरम् ता० ७.७.१६ यद्रथन्तर तच्छ्यावरम् ऐ० ४.१३ रथन्तरमेतत् परोक्ष यच्छ्यैतम् ता० १३.२.८ यद्वै रथन्तर तद्वैरूपम् (साम) ऐ० ४.१३. रथन्तरमेतत्परोक्ष यद् वैरूपम् (साम) ता० १२.२.५. रथन्तर ह्येतत् परोक्ष यच्छ्यैतम्(साम)ता० ७.१०.८ रथन्तर वै सम्राट् तै० १.४.४.६. रथन्तर साम्नाम् (प्रतिष्ठा) ता० ६.३.४. तेजो रथन्तर साम्नाम् ता० १५.१०.६ वसन्तेनर्तुना देवा वसव स्त्रिवृतास्तुतम् । रथन्तरेण तेजसा । हविरिन्द्रे वयो दधु तै० २.६.१९.१ (सामवेद उवाच) रथन्तर नाम ते सामाघोरश्चाक्रूरश्च गो० पू० २.१८ श्रीरेषा यद् रथन्तरम् जै० १.३३० समुद्र एष यद् रथन्तरम् जै० १.३३२]

रथप्राम् यो रथानि यानानि पूर्यते तम् (वायु=पवनम्) ६.४९.४ यो रथान् यानानि प्राति व्याप्नोति तम् (वायु=प्राणादिलक्षणम्) ३३.५५ [रथोपपदे प्रा पूरणे (अदा०) धातोः क्विप्]

रथप्रोतः रथो रमणीयस्तेजसमूह प्रोतो व्यापितो येन स (सेनापति) १५.१७. [रथ-प्रोतपदयो समास प्रोत =प्र+वेञ् तन्तुसन्ताने (भ्वा०) धातो क्त । तस्य (आदित्यस्य) रथप्रोतश्चासमरथश्च सेनानीग्रामण्याविति वार्षिकौ तावृतू श० ८.६.१.१८]

रथयुजम् रथेन युक्तम् (पवनम्) ५.४१.६. **रथयुजः**=ये रथ युञ्जते ते (शिल्पिनो जना) १.१३६.४ [रथोपपदे युजिर् योगे (रुधा०) धातो क्विप्]

रथयुः आत्मनो रथमिच्छुः (इन्द्र =सर्वाऽधीशः, १.५१.१४ रथ कामयमान (जन.) ७.२.५ [रथपदाद् आत्मन इच्छायामर्थे क्यजन्ताद् उ । क्यचि प्राप्ते त्वस्य 'न छन्दस्यपुत्रस्य' इति निषेध.]

रथवत् प्रशस्तरथादियुक्तम् (परमैश्वर्यम्) ७.२७.५ प्रशसितरथसहितम् (राध.=धनम्) ५.५७.७ [रथप्राति० प्रशसायामर्थे मतुप्]

रथवते बहवो रथा विद्यन्ते यस्य तस्मै (महाशय-जनाय) १.१२२.११. [रथवदिति व्याख्यानम् । ततश्चतुर्थी]

रथवाहनम् रथान् वहन्ति गमयन्ति येन तत् [हवि =आदातव्याग्नीन्धनजलकाष्ठधात्वादि) २९.४५ रथ वहति येन तत् (साधनम्) १२.७१ [रथोपपदे वह प्रापणे (भ्वा०) धातोर्णिजन्ताल्ल्युट् करणे]

रथवीतिः यो रथेन व्याप्नोति मार्ग स (विद्वज्जन) ५.६१.१९ **रथवीतौ**=रथाना गतौ ५.६१.१८ [रथ-वीतिपदयोः समास । वीति =वी गतिव्याप्तिप्रजनकान्त्य-सनखादनेषु (अदा०) धातो स्त्रिया क्तिन् औणा० वा ति किच्च]

रथस्पतिः रथस्य स्वामी ५.५०.५ [रथ-पतिपदयो समास । सुडागमश्छान्दस]

रथस्वनः रथस्य स्वन शब्द इव शब्दो यस्य स (सेनापति.) १५.१६ [रथ-स्वनपदयो समास । स्वन =शब्दे (भ्वा०) धातो 'स्वनहसोर्वा' सूत्रेणाप् । तस्य (वायो) रथस्वनश्च रथेचित्रश्च सेनानीग्रामण्याविति ग्रैष्मौ तावृतू श० ८.६.१.१७.]

रथा जलस्थलाऽन्तरिक्षेषु गमयितारौ (यानविशेषौ) ७.१८.२२ [रथप्राति० 'सुपा सुलुक्०' सूत्रेणाकारादेश]

रथासः रमणीयानि यानानि भा०—रमणीया गतय २७.३२ रमणसाधना (विमानादियानविशेषा) २.१२.७ रमणीया (वायुवेगा) २.४१.१ [रथप्राति० जसोऽसुक्]

रथाँ इव यथा रथानधिष्ठाय १.१३०.५ [रथान्-

साधन वा १ १४१ १० रमणीयस्वरूपम् १.५८ ७ रम्यानन्द वस्तु १ १२५ १ रमणीय जगत् २ ३८ १ [रमु क्रीडायाम् (भ्वा०) धातो 'रमेस्त च' उ० ३ १४. सूत्रेण न । तकारश्चान्तादेश । रत्न धननाम निघ० २ १०.]

रत्नवन्तम् बहूनि रत्नानि धनानि विद्यन्ते यस्मिँस्तम् (अध्वरम्=अहिंसादिलक्षण धर्म्यं व्यवहारम्) ३ २८ ५ [रत्नप्राति० भूम्न्यर्थे मतुप्]

रत्ना विद्यादिरमणीयप्रज्ञाधनानि ७ १७.७. [रत्न-प्राति० शेर्लोपश्छन्दसि]

रत्निनः बहूनि रत्नानि धनानि विद्यन्ते येषु तान् (प्रजाजनान्) ७ ४० १ [रत्नप्राति० भूम्न्यर्थे इनि]

रत्निनीम् रमणीयाम् (वाचम्) १ १८२ ४ [रत्न-प्राति० भूम्न्यर्थे इनिप्रत्ययान्तात् स्त्रिया ङीप्]

रत्सि रमसे ५ १० १ [रमु क्रीडायाम् (भ्वा०) धातोर्लेटि शपो लुकि वर्णव्यत्ययेन च तादेशे रूपम् । पर-स्मैपदमपि व्यत्ययेनैव]

रथ रमणीयस्वरूप (विद्वज्जन) २६ ५४ **रथम्**=विमानादियानविशेषम् ६ ४७ २७ रमणीयस्वरूप ससारम् १ ७० ४ रमणसाधन यानम् १ ११२ २ रमणीय विद्या-प्रकाश यान वा ८ ३३. रमणीय सूर्यलोकम् ६.४४ २४ रमणीय भू-समुद्राकाशयानम् १७ ३७ रमते येन तद् विमानादियानम् ५ ७५ १ रमणस्याधिकरणम् (यानम्) १ ५४ ६ रमणीय किरणम् ६ ६३ ५ ज्ञानम् १ ८२ ४ विद्याप्रकाशम् ८ ३३ **रथः**=रयते जानाति येन स रथ. अ०—विज्ञानम् ३ ३६ रमणीयो व्यवहार ६ ४९ ५. रमणाय तिष्ठति यस्मिन् स १ १२० ११ रन्तु योग्यः (यानविशेषः) १ १८३ २ रमणसाधन. २३ १४ वाहनम् १ १२३ १ गमनसाधन यानम् २ १८ १ युद्धक्रीडासाधक-तम १ ११७ २ सद्यो गमयिता विमानादियानविशेष ४ ३१ १४ **रथाय**=समुद्रादिषु रमणाय १ १४० १२ विमानादियानसमूहसिद्धये १ १११ ३ **रथे**=रमणीये यान इव शरीरे ६ ४७ १६ रमणीये जगति ६ ५५ ६ गमनहेतौ रमणसाधने विमानाऽऽदौ १ १३.४ भूजलाकाशगमनार्थे याने प्र०—यज्ञसयोगाद्राजा स्तुति लभेत० नि० ९ ११ रथ इति पदनाम निघ० ५ ३. आभ्या प्रमाणाभ्या रथशब्देन विशिष्टानि यानानि गृह्यन्ते १ ६ २ रमयति येन तस्मिन् (याने) १ १६ २ रमणीये लोके १ ५० ८ **रथेन**=रमणहेतुना यानेन ३३ ७३ गमकेन यानेन ३३ ३३. रमणानन्दादि-व्यवहारसाधक-ज्ञानतेजोरूपेण (यानेन) ऋ० भू० १४२, ३३ ४३ रम्येण स्वरूपेण १ १२३ ७ रमणीयेनानन्दस्व-रूपेण प० वि० । [रमु क्रीडायाम् (भ्वा०) धातो 'हनिकुषि-नीरमिकाशिभ्य क्थन्' उ० २ २ सूत्रेण क्थन् । रथ पदनाम निघ० ५ ३ रथ.=रहतेर्गतिकर्मण । स्थिरतेर्वा स्याद् विपरीतस्य रममाणोऽस्मिंस्तिष्ठतीति वा, रपतेर्वा, रसतेर्वा नि० ९.११ वज्रो वै रथ तै० स० ५ ४ ११ २ काठ० २१ १२ वैश्वानरो वै देवतया रथ तै० २ २.५ ४ त वा एत रस सन्त रथ इत्याचक्षते गो० १ २ २१]

रथ इव रमणीयाऽऽकाश इव ६ ६१ १३ [रथ-इवपदयो समास]

रथकारम् विमानादिरचक शिल्पिनम् ३० ६ **रथकारेभ्यः**=ये रथान् विमानादियानसमूहान् कुर्वन्ति तेभ्य शिल्पिभ्य १६ २७ [रथोपपदे डुकृञ् करणे (तना०) धातोरण्]

रथक्षयाणि रथस्य निवासरूपाणि गृहाणि ६ ३५ १ [रथ-क्षयपदयो समास । क्षयम्=क्षि निवासगत्यो (तुदा०) धातो. 'एरच्' इत्यच्]

रथगृत्सः रथस्य प्रवेता गृत्सो मेधावीव वर्त्तमान (सारथि) प्र०—गृत्स इति मेधाविनाम निघ० ३.१५ गृत्सो मेधावी गृणाते स्तुतिकर्मण नि० ९ ५, १५ १५ [रथ-गृत्सपदयो समास । गृत्स मेधाविनाम निघ० ३ १५. गृत्स इति मेधाविनाम गृणाते स्तुतिकर्मण नि० ९ ५]

रथतुरम् यो रथेन सद्यो गच्छति तम् (शत्रुम्) ४ ३८ ३ **रथतूर्भिः**=यो रथान् विमानादियानानि तूर्वन्ति शीघ्र गमयन्ति तै (अश्वै) १ ८८ २ [रथोपपदे तुर्वी हिंसायाम् (भ्वा०) धातो क्विप् । 'राल्लोप ' सूत्रेण वलोप । अथवा रथोपपदे तुर त्वरणे (जु०) धातो क्विप्]

रथनाभाविव यथा रथस्य रथचक्रस्य मध्यमे काष्ठे सर्वेऽवयवा लग्ना भवन्ति तथा ३४ ५ जैसे रथ के मध्य धुरा मे स० प्र० २४७, ३४ ५ [रथनाभौ-इव-पदयो समास । रथ-नाभौ=रथ-नाभिपदयो समासे कृते सप्तमी]

रथन्तरम् रथैस्तरन्ति येन तत् (साम) १० १० यद्रथै रमणीयैस्तारयति तत् (सुखम्) १३ ५४ रथै रमणीयैं-र्यानैस्तरन्ति येन तत् (मार्गम्) ११ ८ यदस्मिन् लोके तारक वस्त्वस्ति तत् १५ ५ रथैस्तारकम् (साम=एत-द्वत कर्म) १५ १० सामस्तोत्रविशेष १८ २९ क्रिया-सिद्धिफलभोग शिल्पविद्याजन्य वस्तु च ऋ० भू० १५४,

रथेष्ठाम् यो रथे तिष्ठति तम् (शिल्पिनम्) ६ २१ १ रथे तिष्ठन्तम् (इन्द्र=हृद्य पतिम्) ६ २२ ५ **रथेष्ठाः**= यो रथे तिष्ठति स (युवा=प्राप्तयौवनजन) २२ २२ ये रथे तिष्ठन्ति ते (वीरजना) ६ २९ २ [रथोपपदे ष्ठा गतिनिवृत्तौ (भ्वा०) धातो कर्त्तरि क्विप्। सप्तम्या अलुक्]

रथौजाः रथेनौजो बल यस्य स (सूर्य-रश्मि) १५ १५ [रथ-ओजस्पदयो-समास]

रथ्यम् रथेभ्यो हितमश्वमिव प्रापकम् (पतिं= जगदीश्वरम्) ७ ५ ५ रथ वोढुमर्हम् (अग्निम्) ६ ७ २ रथाय हितम् (अश्व=तुरङ्गम्) ६ ४६ २ रथस्य वोढारम् (अश्वम्) २७ ३८ रथेपु विमानादियानेपु हितम् (रयिं= श्रियम्) ६ ४९ १५ **रथ्यस्य**=रथे याने भवस्य (वातस्य= वायो.) ५ ४१ ३ रथेपु रमणीयेपु साधो (पुष्टे) ४ ४१ १० **रथ्यः**=यो रथ वहति स (सप्ति=अश्व) २ ३१ ७ रथाय हितोऽश्व ७ २१ ३ रथे साधू रथ्य सारथि भा०—सुशिक्षित सारथि ३४ ४६ बहुरथादियुक्त (मरुत=प्राणवत्प्रिया जना) ५ ५४ १३ रथस्य वोढा (इन्द्र=सभाव्यक्ष) १ १२१ १४ [रथप्राति० हितार्थे भवार्थे साध्वर्थे वा यत्। रथप्राति० वा वहत्यर्थे 'तद्वहति-रथयुगप्रासङ्गम्' अ० ४ ४.७६ सूत्रेण यत्। रथे योगाय रथ्या नि० १० ३]

रथ्यः बहुरथवन्त (अमात्यादिजना) ४ १७ २१ रमणीयबहुरथादियुक्ता (राजपुरुषा) ४ १६ ११ रथेपु साधव (तुरङ्गा) १ १४८ ३ बहवो रथा विद्यन्ते येपा ते (वीरजना) ७ ५६ २१ [रथीप्राति० जस्। रथी=रथ-प्राति० मत्वर्थे 'छन्दसीवनिपौ वक्तव्या' विति ईकार प्रत्यय]

रथ्या यो रथ वहति तेन (चक्रेण) १ ५३ ९ [रथ-प्राति० वहतीत्यर्थे यत्। तत 'सुपा सुलुक्०' सूत्रेण टा-स्थाने डादेश]

रथ्या रथेपु साधू (अश्विना=अध्यापकोपदेशकौ) ५ ७५ ५ [रथ्यमिति व्याख्यातम्। ततो द्विवचनस्याकारा-देशश्छान्दस]

रथ्यासः रथेपु साधव (अश्वा=तुरङ्गा) ६ ३७ ३ [रथ्यमिति व्याख्यातम्। ततो जसोऽसुक्]

रथ्येव यथा रथेपु साधू अश्वौ ७.३९ १ यथा रथाय हितावश्वौ २ ३९ २ रथेपु साधूनीव (उत्तमरथानानि) ४ १ ३ यथा रथेपु साधूनि (चक्राणि) १ १८० ४ यथा रथाय हितानि (वस्तूनि) २ ३९ ३ [रथ्या-इवपदयो समास। रथ्या=रथ्यप्राति० द्विवचनस्याकारादेश शेर्लोपो वा छन्दसि]

रथ्येव रथेपु साध्वी गतिरिव ३ ३६ ६ रथाय हितेव (ध्वनि) २ ४ ६. [रथ्या-इवपदयो समास। रथ्या= रथ्यमिति व्याख्यानम्। ततष्टाप् स्त्रियाम्]

रद विलिख १ १६९ ८ ससेध १ ६१.१२ **रदति**= विलिखति १ १६६ ६. [रद विलेखने (भ्वा०) धातोर्लोट् अन्यत्र लट्]

रदन्ता सुष्ठु लिखन्तौ (अश्विनौ=राजप्रजाजनौ) १ ११७ ११ (रद विलेखने (भ्वा०) धातो शत्रन्ताद् द्विवचनस्याकारादेशश्छान्दस.]

रदन्ती लिखन्ती (उषा=प्रातर्वेला) ५ ८० ३ **रदन्तीः**=भूमिं विलिखन्त्य (धुनय=रश्मिगतय) २ ३० २ [रद विलेखने (भ्वा०) धातो शत्रन्तात् ङीप्]

रदावसो यो रदेपु विलेखनेपु वसति तत्सम्बुद्धौ (इन्द्र=राजन्) ७ ३२.१८ [रदोपपदे वस निवासे (भ्वा०) धातोर्बाहु० औणा० उ। तत सम्बुद्धौ रूपम्। संहिताया दीर्घ]

रधम् हिंसेयम् १ ५० १३ [रध हिंसासराध्यो (दिवा०) धातोर्लङ् अटोऽभाव। व्यत्ययेन शप्]

रध्य सराध्नुहि १० २८ [रध हिंसासराध्यो (दिवा०) धातोर्लोट्]

रध्रचोदनम् धनस्य प्राप्तये प्रेरकम् (राजानम्) ६ ४४ १० [रध्र-चोदनपदयो समास। रध्रम्=रध हिंसा-सराध्यो (दिवा०) धातोर्बाहु० औणा० रक। चोदनम्= चुद सञ्चोदने (चुरा०) धातो. 'कृत्यल्युटो बहुलमि' ति ल्युट्]

रध्रचोदः यो रध्रान् सरोधकान् चुदति प्रेरयति स (इन्द्र=विद्याप्रकाशको जन) २ २१ ४ [रध्रोपपदे चुद सञ्चोदने (चुरा०) धातो 'कर्मण्यण्' इत्यण्]

रध्रतुरः हिंसकहिंसक (राजा) ६ १८ ४ [रध्रो पपदे तुर्वी हिंसार्थे (भ्वा०) धातो क्विप्। वचनव्यत्यय]

रध्रम् सराधनम् २ ३४ १५ समृद्धिमन्तम् (अदारि-द्रयम्) ७ ५६ २० **रध्रस्य**=सराध्नुवत (यजमानस्य= धनाढ्यजनस्य) २ ३० ६ हिंसकस्य (दुर्जनस्य) २ १२ ६ [रध हिंसासराध्यो (दिवा०) धातोर्बाहु० औणा० रक्]

रन् ददमानौ (वसू=अध्यापकोपदेशकौ) प्र०—दन्व-दस्य सिद्धि १ १२० ७ [डुदाञ् दाने (जु०) धातो शतृ। 'बहुल छन्दसी' ति शपो लुक्। वर्णव्यत्ययेन दस्य रेफ]

रन्त रमन्ते प्र०—अत्र लङि 'बहुल छन्दसि' इति

इवपदयो समास]

रथिनः प्रशस्ता रथा येषान्ते (नर =नायका जना) ६ ४७ २१ प्रशस्तरथयुक्ता वीरा (जना) २६ ५७ प्रशस्तरथस्य (महिमघस्य जनस्य) १ १२२ ८ **रथीनाम्**= नित्ययुक्ता रथा विद्यन्ते येषा योद्धॄणा तेषाम् प्र०—अत्र 'अन्येषामपि दृश्यते' अ० ६ ३ १३७ अनेन दीर्घ १ ११ १ प्रशस्ताना वीराणाम् प्र०—अत्र 'छन्दसीवनिपौ' इतीकार १२ ५६ **रथिभ्यः**=प्रशस्ता रथा विद्यन्ते येषा तेभ्य (राजपुरुषेभ्य) २२ १६ **रथीः**=रथस्वामी (सज्जन) प्र०—अत्र 'वा छन्दसि सर्वे विधयो भवन्ति' इति सोर्लोपो न १ २५ ३ प्रशस्ता रथा यस्य सन्ति स (अग्नि =विद्वज्जन) प्र०—अत्र 'छन्दसीवनिपौ च वक्तव्यौ' अ० ५ २ १०६ अनेन रथ-शब्दान्मत्वर्थं ई-प्रत्यय १ ४४ २ बहवो रथा विद्यन्ते यस्य स (अग्नि =पावक) ३ ३ ६ बहुरथवान् (विद्वज्जन) ६ ५५ १ प्रशस्ता रथा रमणसाधनानि यानानि विद्यन्ते यस्य स (अग्नि =विद्वज्जन) १५ ४५ बहुप्रशसितरथ (अग्नि =विद्वज्जन) ६ ४८ ६ [रथप्राति० प्रशसाया नित्यसम्बन्धे वा मत्वर्थं इनि । 'रथीनाम्' प्रयोगे छान्दस दीर्घत्वम् । अथवा=रथप्राति० मत्वर्थे 'छन्दसीवनिपौ' वक्तव्यौ' अ० ५ २ १०६ वा० सूत्रेण ईकार प्रत्यय]

रथिनीः बहवो रमणसाधका रथा विद्यन्ते यासु ता (इष =सेना) प्र०—अत्र भूम्न्यर्थे इनि 'सुपा सुलुक्०' इति पूर्वसवर्णादेशश्च १ ६ ८ [रथप्राति० भूम्न्यर्थे इनि । तत स्त्रिया ङीप्, तत शस पूर्वसवर्णदीर्घश्छान्दस ।

रथियन्तीव आत्मनो रथिन इच्छन्तीव सेना १ १६६ ५ [रथिन्-शब्दाद् आत्मन इच्छायामर्थे क्यजन्ताच् छतरि ङीपि रथियन्तीति रूपम् । रथियन्ती-इवपदयो समास]

रथिरम् यो रथिषु रमते तम् (राजानम्) ७ ७ ४ रथा रमणीयानि यानानि भवन्ति यस्मिँस्तम् (अग्नि= पावकम्) ३ २६ १ **रथिरः**=रथादियुक्त (इन्द्र =राजा) ३ ३१ २० प्रशस्ता रथा विद्यन्ते यस्य स (मनुष्य) ३ १ १७ ['रथिन्' इत्युपपदे रमु क्रीडायाम् (भ्वा०) धातोर् कर्त्तरि ड । अन्यत्र रथप्राति० प्रशसाया भूम्न्यर्थे वा मत्वर्थे 'मेधारथाभ्यामिरन्निरचौ' अ० ५ २ १०६ वा०सूत्रेण इरन्]

रथीतमम् बहवो रथा रमणाधिकरणा पृथिवी-सूर्यादयो लोका विद्यन्ते यस्मिन् स रथीश्वर सोऽतिशयितस्तम् । रथा प्रशस्ता रमणविजयहेतवो विमानादयो विद्यन्ते यस्य सोऽतिशयित शूरस्तम् (इन्द्रम्=परमात्मान वीरपुरुष वा) प्र०—'रथिन ईद्वक्तव्य' अ० ८ २ १७. इत्यत्र पठितेनाऽनेन वार्त्तिकेनेकारादेश १ ११ १ अतिशयेन प्रशस्तरथयुक्तम् (इन्द्र=परमैश्वर्यम्) १२ ५६ अतिशयेन रथी यस्तम् (इन्द्र=सभेशम्) १५ ६१ प्रशस्ता रथा सुखहेतव पदार्था विद्यन्ते यस्मिन् सोऽतिशयितस्तम् (इन्द्र= परमात्मानम्) १७ ६१ **रथीतमः**=अतिशयेन रथयुक्त (इन्द्र =सूर्येणेव राजा) ६ ५६ २ बहवो रथा विद्यन्ते यस्य सोऽतिशयित (राजा) ६ ४५ १५ [रथप्राति० मत्वर्थे 'छन्दसीवनिपौ' अ० ५ २ १०६ वा०सूत्रेण ईकारप्रत्यये रथी । ततोऽतिशायने तमप् । अथवा रथिन्प्राति० अतिशायने तमप्-प्रत्यये घसञ्ज्ञके परे 'ईद्रथिन' अ० ८ २ १७ वा० सूत्रेण रथिन ईकारादेश]

रथीतमा प्रशसितरथयुक्तौ (अश्विना=अध्यापकोपदेशकौ) १ १८८ २, प्रशस्ता रथा विद्यन्ते ययो सकाशात्तावतिशयितौ (अश्विनौ=अग्निजले) १ २२ २ [रथीतममिति व्याख्यातम् । ततो द्विवचनस्याकारादेशश्छान्दस]

रथीतरः अतिशयेन रथयुक्तो योद्धा (इन्द्र =सेनेश) १ ८४ ६ [रथीप्राति० अतिशायने तरप् । रथी=रथप्राति० मत्वर्थे 'छन्दसीवनिपौ वक्तव्यावि' ति ईकार]

रथीरिव प्रशसितो रथवान् यथा ५ ६१ १७ यथा सारथिस्तथा ३३ ४ प्रशस्तरथादियुक्त सेनेश इव ४ १५ २ यथा शत्रुभि सह बहुरथादिसेनाङ्गवान् योद्धा युध्यति तथा भा०—महारथिवत् १३.३७ [रथी-इवपदयो समास । रथी =रथप्राति० मत्वर्थे 'छन्दसीवनिपौ वक्तव्यौ' इति वा० सूत्रेण ईकार]

रथीव बहवो रथा विद्यन्ते यस्य तद्वत् (सारथि) ५.८३ ३ [रथी-इवपदयो समास । रथी=रथप्राति० मत्वर्थे ईप्रत्यय]

रथेचित्रः रथे रमणीये चित्राण्याश्चर्यरूपाणि चिह्नानि यस्य स (ग्रामणी) १५ १६ [रथ-चित्रपदयो समासे सप्तम्या अलुक्]

रथेशुभम् यो रथे शुम्भते तम् (शर्ध=बलम्) ५ ५६ ६ रमते गच्छति येन तस्मिन् विमानादियाने शोभनम् (शर्ध =बलम्) १.३७ १ [रथे सप्तम्यन्तोपपदे शुभ दीप्तौ (भ्वा०) शुभ शोभार्थे (तुदा०) धातोर्वा इगुपधलक्षण कर्त्तरि क । घञर्थे को वा भावे]

(विदुषो जनान्) प्र०—अत्र रमधातोर्मतुप् प्रत्ययः ततो मतुप्, तत ईयसुनि 'विन्मतो०' इति मतुल्लोप 'टे' इति टिलोप. 'छान्दसो वर्णलोपो वा' इतीकारलोप. १ १२०.४.]

रम रमस्व प्र०—अत्राऽऽत्मनेपदे व्यत्ययेन परस्मैपदम् ६ ८ **रमताम्**=क्रीडन्तु ७२ १६ **रमते**=क्रीडते २ ३८ ७ **रमध्वम्**=रमण कुर्वन्तु प्र०—अत्र व्यत्यय. ३ २१. क्रीडध्वम् ३ ३३ ५ **रमस्व**=क्रीडस्व १३ ३५ रमता रमयतु वा ४ २२ **रमेयाम्**=अ०—अनुतिष्ठत ५ १७ [रमु क्रीडायाम् (भ्वा०) धातोर्लोट्। व्यत्ययेन परस्मैपदम्। अन्यत्र यथा प्राप्तात्मनेपदे लोट्]

रमय क्रीडयाऽऽनन्दय ५ ५२ १३. **रम्णातु**=रमयतु प्र०—अत्राऽन्तर्गतो ण्यर्थो विकरणव्यत्ययश्च ४ २१ [रमु क्रीडायाम् (भ्वा०) धातोर्णिजन्ताल्लोट्। अन्यत्र रमतेर्लोट्। विकरणव्यत्ययेन श्ना]

रम्भिणीव यथाऽऽरम्भिका गृहकार्येषु चतुरा स्त्री १ १६८ ३ [रभ राभस्ये (भ्वा०) धातोस्ताच्छील्ये णिन्यन्तात् ङीपि रम्भिणीति रूपम्। 'रभेरशब्लिटो.' अ० ७ १.६३ सूत्रेण नुम्। रम्भिणी-इवपदयो. समास]

रम्भी आरम्भी (पुरुषार्थी जन) २ १५ ६ [रभ राभस्ये (भ्वा०) धातोस्ताच्छील्ये णिनि। नुमागम]

रयिदौ श्रीप्रदौ (सभासेनेशौ) ३ ५४ १६ [रयि-इत्युपपदे डुदाञ् दाने (जु०) धातो क.]

रयिन्तमः अतिशयेन धनाढ्य (प्रजाजन.) ६ ४४ १. [रयिप्राति० अतिशायने तमप्। नुडागमश्छान्दस]

रयिपतिः धनस्वामी (अग्नि =पावकवद्विद्वज्जन.) २ ६ ४. धनरक्षक (सोम =पदार्थसमूह) २ ४० ६ धनाना पालयिता (अग्नि =भौतिक) १.६० ४ श्रीश: (वेदविज्जन.) १.७२ १ **रयिपते**=धनस्वामिन् (इन्द्र= राजश्रीश्वर वा) ६ ३१ १. [रयि-पति-पदयो. समास]

रयिभिः चक्रवर्त्तिराज्यश्रियादिभि १ ६४.१० **रयिम्**=द्रव्यम् २ १५ ५ विद्याराज्यश्रियम् १ ६२ ८ चक्रवर्त्तिराज्यसिद्ध धनम् १ ३४ १२ ऐश्वर्यम १६ ६४ विद्यासुवर्णादियुक्तम धनम् १ १ ३ प्रशस्तद्रव्यसमूहम् १ ७३.८ सम्पत्तिम् १५ ५६ धर्म-मोक्ष-विद्या-चक्रवर्त्तिराज्याऽऽरोग्यादिरूप धनम् ऋ० भा० न० १.१ ३. धर्मश्रियम् २० ५८ विद्यादि तथा सुवर्णादि धन को आर्याभि० १ ३, ऋ० १.१.१ ३. **रयिः**=निधिसमूह १ ७३ १ श्रियाश्री १८ १० द्रव्यरूप (अग्नि =अध्यापक) २.१ १२ द्रव्यसमूह १ ६६ १. **रयीणाम्**=राज्यश्रियादिधनानाम् १.६८.४. परमोत्तमाना चक्रवर्त्तिराज्यादिधनानाम् ३.१३. वर्त्तमाना पृथिव्यादिकार्यद्रव्याणाम् १ ६६.७. विद्याचक्रवर्त्तिराज्योत्पन्नश्रियाम् १० २०. धनैश्वर्यो के सं० वि० ६,१०.१२१ १०. [रयि =उदकनाम निघ० १ १२. धननाम निघ० २ १०. रयिरिति धननाम रातेर्दानकर्मण. नि० ४.१७. रयिरिति मनुष्या (उपासते) श० १०.५२.२०. वीर्य वै रयि श० १३.४२.१३ पुष्ट वै रयिः श० २.३.४.१३. पशवो वै रयि तै० १४४६ एष वै रयिर्वैश्वानर. श० १०.६.१.५ रयि सोमो रयिपतिर्दधातु तै० २.८.१.६]

रयिमान् प्रशस्ता रययो धनानि विद्यन्ते यस्मिन् स (अग्नि.=भौतिक. पावक) प्र०—अत्र प्रशमार्थे मतुप् 'रयिरिति धननामसु पठितम्' निघ० २.१०, ३ ४०. विद्याविज्ञानधनयुक्त (अग्नि.=उपदेशको विद्वज्जन.) १२ ५६ [रयि प्राति० प्रशंसाया मतुप्]

रयिमिव यथोत्तमा श्रियम् १ ६० १ [रयिम्-इवपदयो समास.]

रयिवतः बहुधनवत (जनान्) ६ ६८ ५ **रयिवः**= प्रशस्ता रययो विद्यन्ते यस्य तत्सम्बुद्धौ (सेनेश) प्र०— अत्र 'छन्दसीर' इति मस्य व १८ ७४ बहुधनयुक्त (विद्वन्राजन्) ६ ५ ७. श्रीमन् (जिज्ञासो) ११२६ ७ [रयिप्राति० मतुप् प्रशंसायामर्थे भूम्न्यर्थे वा। 'छन्दसीर' इति मतुपो मस्य वकार। 'रयिव' प्रयोगे सम्बुद्धौ मतुवसो रु सम्बुद्धौ छन्दसि' अ० ८ ३.१. सूत्रेण रुत्वम्]

रयिवित् द्रव्यवेत्ता (विद्वज्जन) ३ ७.३ पदार्थविद्यायुक्त (अलंविद्यो जन) २ १ ३ [रयि इत्युपपदे विद ज्ञाने (अदा०) धातो क्विप्]

रयिवृधः ये रयिं वर्धयन्ति ते (स्वपत्यानि=सुसन्ताना.) २७ २३ [रयि इत्युपपदे वृधु वृद्धौ (भ्वा०) धातो कर्त्तरि क्विप्]

रयिषाच ये रयिणा सह समवयन्ति ते (मनुष्या) १.१८० ६. [रयि इत्युपपदे षच समवाये (भ्वा०) धातो 'कर्मण्यण्' इत्यण्]

रयिषाट् यो रयिं द्रव्य सहते स (देव =जीवात्मा) १ ५८ ३ ['रयि' इत्युपपदे षह मर्षणे (भ्वा०) धातो 'छन्दसि सह' इति ण्वि]

रयिस्थानः रायस्तिष्ठन्ति यस्मिन् स (इन्द्र = सेनेश.) ६ ४७ ६ [रयि-स्थानपदयो समास। स्थानम्= ष्ठा गतिनिवृत्तौ (भ्वा०) धातोरधिकरणे ल्युट्]

शपो लुक् १.६१.११ रमन्ताम् ७.३६ ३ **रन्ते**=रमते ७ ३६ ३ [रमु क्रीडायाम् (भ्वा०) धातोर्लेट्। शपो लुक्। अन्यत्र लोट् लट् च। रन्त=अरमन्त नि०। १२ ४३]

रन्तयः रमु रमन्ते ते (वायव) ७ १८ १० **रन्ति**=रमणम् २२ १६ **रन्ते**=हे रमणीये (पत्नि) ८ ४३ [रमु क्रीडायाम् (भ्वा०) धातो' क्तिच्। 'न क्तिचि दीर्घश्च' अ० ६ ४.३६ सूत्रेण दीर्घस्यानुनासिकलोपस्य च निषेध। क्तिनि वा छान्दसो दीर्घानुनासिकलोपयोर्निषेध]

रन्धय निवारय ३.५३ १० ताडय ६ ५३ ७ हिंसय ६ १८ १२ हिन्धि १ १३२.४ समापय प० वि०, समूलेन विनाशय, मूलसहित नष्ट कर दीजिये आर्याभि० १ १४, **रन्धयत्**=समाप्नोति २ १६ ६ **रन्धयस्व**=ताडयस्व ३ ३० १६. **रन्धयः**=हिंसय ६.४३ १ **रन्धि**=नाशय ४ २२ ९ **रन्धीः**=संराध्नुहि, प्र०—अत्राडभाव. १.१७४ २ हिंस्या ४.१६ १३ [रध हिंसासंराध्यो (दिवा०) धातोर्णिजन्तात्लोट्। 'रधिजभोरचि' अ० ७ १ ६१ सूत्रेण नुम्। अन्यत्र लङ् लुङ् लोट् च। रन्धय=रध्यति। नि० ६ ३२]

रन्धयन् हिंसन् (विद्वान् राजा) १ ५० १३ सेनया ग्रामादिभिर्वा हिंसयन् (इन्द्र=सभासेनाशालान्यायाधीश) १.५१ ६ [रध हिंसासंराध्यो. (दिवा०) धातोर्णिजन्ताच्छतृ। 'रधिजभोरची' नि नुम्]

रन्धिम् वशीकरणम् ७ १८ १८ [रध हिंसासंराध्यो (दिवा०) धातोरौणा० इन्]

रपत् व्यक्तं वदेत् १ १७४ ७ [रप व्यक्तायां वाचि (भ्वा०) धातोर्लेट्]

रपसा पापेन ७.५० १ अपराधेन ७ ५० २ **रपः**=प्राणेन्द्रियचाञ्चल्यजन्यमपराधम् २५ ११ पापफलमिव रोगाख्य दुःखम् १२.८४. **रपांसि**=हिंसनानि ६ ३१.३ व्यक्तोपदेशप्रकाशकानि शोभनानि वचनानि १.६६.४ पापानि दुःखप्रदानि १.३४ ११ [रप=रपो रिप्रमिति पापनामनी भवत नि० ४ २१]

रप्शते विशेषेण राजते ४ ४५ १

रप्शदूधभिः व्यक्तशब्दस्पर्शै २ ३४ ५ [रप्शत्-ऊधन्-पदयो समास। रप्शत्=रप व्यक्तायां वाचि (भ्वा०) धातो शतृ। शपो शस्य न लोपश्छान्दसत्वात्। ऊधन्=ऊध उद्धततर भवति उपोन्नद्धमिति वा। स्नेहानुप्रदाना-सामान्याद् रात्रिरप्यूध उच्यते नि० ६ १९]

रप्सुदा ये रूपम् रूप ददाते (मही=द्यावापृथिव्यौ) ३३ १६ सुरूपप्रदे (पृथिवीसूर्यौ) ३३ ७१. [रप्सु-उपपदे दुदाञ् दाने (जु०) धातो. क.। ततो द्विवचनस्याकारादेश.]

रभध्वम् प्रारम्भ कुरुत ३५.१० युद्धारम्भ कुरुत १७ ३८. **रभन्ते**=प्रवर्त्तयन्ति ३ २९ १३ **रभस्व**=आरम्भ कुरु २७ ५ **रभामहे**=आरम्भ कुर्याम ६ ५७ ५ **रभे**=आरम्भ कुर्वे ४ ६ **रभेमहि**=आरम्भ कुर्वीमहि १ ५३ ४. शत्रुभिस्सह युध्येमहि आरम्भ कुर्याम १ ५३ ५. [रभ राभस्ये (भ्वा०) धातोर्लोट्। अन्यत्र लट्, लिङ् च]

रभसम् वेगम् ६ ६१ १. वेगवन्तम् (वायुम्) ११.७३ वेगवन्तम् (अग्निम्) २.१० ४ **रभसः**=वेगम् प्र०—अत्र द्वितीयार्थे प्रथमा २१ ३८ **रभसाय**=वेगयुक्ताय (केतवे—विज्ञानाय) १ १६६.१ [रभ राभस्ये (भ्वा०) धातो 'अत्यविचमि०' उ० ३ ११७ सूत्रेणासच्। व्यतिष्ठमन्नै रभस स्थानमित्यवकाशवन्तमन्नैरन्नाद दीप्यमानमित्येतत् श० ६ ३ ३ १६]

रभः महान् (शिशु) १ १४५ ३ [रभस - महन्नाम निघ० ३ ३ रभ राभस्ये (भ्वा०) धातोरौणा० असुन्]

रभसा रोगरहितानि (वपूंषि=रूपवन्ति शरीराणि) ३.१ ८ [रभसमिति व्याख्यातम्। ततो द्विवचनस्याकारा-देश]

रभसानः वेगवान् (राजा) ६ ३ ८ [रभ राभस्ये (भ्वा०) धातोर्बाहु० औणा० असानच्]

रभसासः वेगवन्त (क्षुरा=धर्म्यसम्बद्धा) १ १६६ १० [रभसमिति व्याख्यातम्। ततो जसोऽसुक्]

रभसाः वेगयुक्ता (सुनाम=सुशिक्षिता भृत्या) १ ८२ ६ [रभसमिति व्याख्यातम्। ततो जस्]

रभस्वतः कार्यारम्भं कुर्वत आलस्यरहितान् पुरुषा-र्थिन (मनुष्यान्) ६ १ ६ [रभस्-प्रा-नि० मतुबन्तात् द्वितीयाबहुवचनम्]

रभिष्ठाः अतिशयेनाऽऽरब्धार (मनुष्या) ५ ५८ ५ [रभ राभस्ये (भ्वा०) धातो तृजन्तादतिशायन इष्ठन्। इष्ठन्-प्रत्यये तृचो लोप]

रभीयस इव अतिशयेनाऽऽरब्धस्येव २१ ४६ [रभीयस-इवपदयोर्लोप। रभीयस=रभ राभस्ये (भ्वा०) +तृन्+ईयसुन्+ङस्]

रभोदाम् रभसो वेगयुक्तस्य दातारम् (इन्द्र=दल पतिम्) ६ २२ ५ [रभस उपपदे दुदाञ् दाने (जु०) धातो कर्त्तरि क्विप्]

रभ्यस [illegible]

ये रश्मयस्ते विश्वे देवा श० ४ ३ १ २६ एते वै विश्वे देवा रश्मय श० २ ३ १ ७ एते वै रश्मयो विश्वे देवा श० १२ ४ ४ ६ तस्य (सूर्यस्य) ये रश्मयस्ते सुकृत श० १ ९ ३ १० रश्मय एव हिंकार जै० उ० १ ३३ ६ रश्मयो वाव होत्रा गो० उ० ६ ६ रश्मयो वै दिवाकीर्त्यानि (सामानि) तै० १ २ ४ २ रश्मयो वा एत आदित्यस्य यद् दिवाकीर्त्यानि ता० ४ ६ १३ तस्य (सूर्यस्य) ये रश्मयस्ते ते देवा मरीचिपा श० ४ १ १ १५ मासा वै रश्मयो मरुतो रश्मय ता० १४.१२ ९ ये ते मारुता (पुरोडाशा) रश्मयस्ते श० ९ ३ १ २५ अन्न रश्मि श० ८ ५ ३ ३ प्राणा रश्मय तै० ३ २ ५ २ एते वा ऽउत्पवितारो यत् सूर्यस्य रश्मय श० १ १ ३ ६ एते वै पवितारो यत्सूर्यस्य रश्मय श० ३ १ ३ २२ तद् यदेकैकस्य रश्मेर्द्वौ द्वौ वर्णौ भवत गो० उ० ६ ६ (सविता) रश्मिभिर्वर्षं (ममदधात्) गो० पू० १ ३६]

रश्मीरिव यथा किरणान् तथा १ १४१ ११. [रश्मी -इवपदयो समास]

रश्मीवतीम् प्रशस्तविद्याप्रकाशयुक्ताम् (स्त्रीम्) १५ ६३ [रश्मिप्राति०प्रशसायामर्थे मतुवन्तात् डीप्]

रश्मेव किरणवद् रज्जुवद् वा ६ ६७ १ [रश्मा-इवपदयो समास । रश्मा=रश्मिप्राति० 'सुपा सुलुक्०' सूत्रेण डादेश]

रसम् आनन्दम् १९ ८३ विद्याऽऽनन्दम् १९ ७९ सारभूतम् १९ ७५ सारम् ९ ३ विद्यौषधिफलम् १.७१ ५ स्वादिष्ठमोषध्यादिभ्यो निष्पन्न सारम् १ १०५ २ **रसस्य**=भुक्ताऽन्नत उत्पन्नस्य शरीरवर्द्धकस्य १ ३७ ५ **रसः**=सर्वद्रव्यसार १८ ९ आनन्दवर्धक स्नेहरूप (भा०—होमादिना शुद्धजलम्) ३९ १५ दुग्ध-घृतादि ऋ० भू० १०४, अथर्व० १२ ५ १० मधुरादि ३९ ४ वीर्य धातु ९ ३ **रसात्**=जिह्वाविषयात् ३१ १७ **रसानाम्**=मधुरादीनाम् १ १८७ ५ **रसाय**=रसभूताय विज्ञानानन्दप्रापणाय २ ३१ **रसाः**=स्वाद्वन्नानि षड्विधा १ १८७ ४ **रसेन**=स्वाभाविकेन रसगुणेन सह १ २३.२३. सारेणाऽऽर्द्रेणाऽऽनन्दकारकेण १ २१ [रस =वाङ्नाम निघ० १ ११ उदकनाम निघ० १ १२ अन्ननाम निघ० २ ७ रस आस्वादनस्नेहनयो (चुरा०) धातोरच् । घञर्थे को वा । रसो वै मधु श० ६ ४ ३ २ अपो देवा मधुमतीररसानित्यपो देवा रसवतीरगृह्णन्नित्येवैतदाह (मधु=रस) श० ५ ३ ४ ३ स्वधायै त्वेति रसाय त्वेत्येवैतदाह (स्वधा=रस) श० ५ ४ ३ ७ रसो वा आप श० ३ ३ ३ १८]

रसवत् बहुरसयुक्तम् (पय =दुग्धम्) ५ ४४ १३ [रसप्राति० भूम्न्यर्थे मतुप्]

रसवान् महौषधिप्रशस्तरसप्रचुर (ओषधिसार) ६ ४७ १ [रसप्राति० प्रशसायामर्थे मतुप्]

रसा रसाऽऽनन्दप्रदा जना प्र०—अत्र 'सुपा सुलुक्०' इति डादेश ३३ २१ [रसप्राति० जस स्थाने डादेशश्छान्दस]

रसा रसादिगुणयुक्ता (मही=वाग् भूमिर्वा) ५ ४१.१५ पृथिवी ५ ५३ ९ **रसाम्**=प्रशस्त रस जल विद्यते यस्या ताम् (नदीम्) प्र०—रस इत्युदकनाम निघ० १ १२. अर्शआदित्वान्मत्वर्थीयोऽच्प्रत्यय १ ११२ १२. [रसप्राति० मत्वर्थेऽर्शादित्वादच् । तत स्त्रिया टाप् । रसा-नदी रसते. शब्दकर्मण नि० ११ २५]

रसाशिरः यो रसानश्नाति स (सूर्य) ३ ४८ १ [रसोपपदे अश भोजने (क्र्या०) धातो 'अशेर्नित्' उ० १ ५२ सूत्रेण किरच्]

रसिनः प्रशस्तो रसो विद्यते यस्मिँस्तस्य (पदार्थस्य) १९ ३५ [रसप्राति० प्रशसायामर्थे इनि]

रहसूरिव या रह एकान्ते सूते सा (जननी) २ २९ १. [रहसू -इवपदयो समास । रहसू =रहस्-उपपदे षूङ् प्राणिगर्भविमोचने (अदा०) धातो क्विप् । पूर्वपदस्य सकारस्य लोपश्छान्दस]

रहूगणाः रहवोऽधर्मत्यागिनो गणा सेविता यैस्ते (विद्वासो जना) १ ७८ ५ [रहु-गणपदयो समास । पूर्वपदस्य दीर्घ सहितायाम् । रहु =रह त्यागे (भ्वा०) धातोर् उ]

रंसु रमणीयम् (अभ्वम्=उदकम्) २ ४ ५ [रमु क्रीडायाम् (भ्वा०) धातोर्बाहु० औणा० सु प्रत्यय । रमु धातोर्वा विच् । ततो रम्प्राति० सप्तमी । रमु रमणीयेषु नि० ६ १७]

रंसुजिह्वः रमणीयवाक् (अग्नि =राजा) ४ १.८ [रसु-जिह्वपदयो समास]

रँहमाणः गच्छन् (भौतिकोऽग्नि) २२ १८ [रहि गतौ (भ्वा०) धातो शानच् । व्यत्ययेनात्मनेपदम्]

रंहयन्तः गमयन्त (मरुत =वायव) १ ८५ ५ [रहि गतौ (भ्वा०) धातोर्णिजन्ताच्छतृ]

रह्यः गमयितु योग्य (रथ) २ १८ १. [रहि गतौ

रयीयन् आत्मनो रयिमिच्छन् (राजा) ३.६२ २. [रयिशब्दाद् आत्मन इच्छायामर्थे क्यजन्ताच्छतृ]

रय्या धनेन १२ १० विद्याश्रिया १२.७ प्राश्रीपिकया (धारया=सस्कृतया वाचा) १२.४१ **रय्यै**= लक्ष्म्यै १४ २२ श्रियै ६ २२ [रयिप्राति० तृतीया। अन्यत्र चतुर्थी]

ररक्ष रक्षेत् १ १४७ ३ पालय ४ ४.१३ [रक्ष पालने (भ्वा०) धातोर्लिट्]

ररते राति ददाति ५ ७७ ४ **राथाम्**=दद्यातम् प्र०—अत्र रा-धातोर्लोटि 'वहुल छन्दसि' इति शप श्लु व्यत्ययेनात्मनेपदश्च १.११७ २३. **रराथे**=रातम् ६.७२ ५ **ररिम**=दद्याम ३ ३५.१ रमेमहि २ ५ ७ दद्म प्र०—अत्र रा दाने लिट् १८ ७५ **ररिषे**=प्रयच्छसि २ १ ५ **ररीथाः**=दद्या ६ ४४ ११ **ररीध्वम्**=दत्त ५ ८३ ६ **ररे**=दद्याम् ७ ३६.६ ददामि ७ ५६ ५ [रा दाने (अदा०) धातोर्लट्। 'बहुल छन्दसी' ति शप श्लु। व्यत्ययेनात्मनेपदश्च। अन्यत्र लिट्]

ररप्शे अतिरिणक्ति ६ १८ १२. स्तूयते प्र०—अत्र रभ-धातोर्लिटि सस्य श ४ २० ५ [रभ राभस्ये (भ्वा०) धातोर्लिटि थास्। तस्य स्थाने 'से' इत्यादेश। तस्य सस्य शकारो वर्णव्यत्ययेन। 'अत एकहल्मध्ये०' इत्येत्वमभ्यासलोपश्च छान्दसत्वान्न भवति]

रराटम् परिभाषित जगत् ५ २१ **रराटे**=ललाटे २४ १]

रराणता रममाणेन मनसा १ १७१ १]

रराणः विद्या ददत् सन् (देव =विद्वज्जन) ७ २ ६ रममाण (विद्वान् जन) ३ ४ ६ दाता (वैद्य) ५ ४१ ८ ददन् (इन्द्र =ऐश्वर्यधर्त्ता सज्जन) ६ २३ ७ दाता सन् (अग्नि =विद्वज्जन) ३ १ २२ भृश दाता (अग्नि = विद्वान्) ४ २ १० **रराणाः**=ददमाना (ऋभव =मेधाविजना) ४ ३६ ८ [रा दाने (अदा०) धातो शानच्। व्यत्ययेनात्मनेपदम्। 'वहुल छन्दसी' ति शप श्लु। लिट कानज्वा। रराण रातिरभ्यस्त नि० २ १२]

रराणा दातारौ (अश्विनौ=सभासेनेशौ) १ १७७ २४ [रा दाने (अदा०)+लिट कानच्। ततो द्विवचनस्याकारादेश]

रराणा सुष्ठु-दात्री (सुलक्षणा विदुषी स्त्री) २ ३२.५ ['रराणा' इति व्याख्यातम्। तत. स्त्रिया टाप्]

ररद विलिखति वर्षयति ७ ४६ १ [रद विलेखने (भ्वा०) धातोर्लिट्]

ररिवान् दाता (विद्वान् पुरुष) १.१३८.४ [रा दाने (अदा०) धातोर्लिट क्वसु]

रवथः महाशब्दकारी (वज्र =शस्त्रास्त्रसमूह) १ १०० १३ [रु शब्दे (अदा०) धातो 'शीङ् शपिरुगमि०' उ० ३ ११३. सूत्रेण अथ प्रत्यय.]

रवम् शब्दम् ३ ३१.६ **रवः**=ध्वनि १ ६४ १० **रवेण**=विद्युत शब्देन १ ६२ ४ स्तुतिसमूहेन १ ७१ २ [रु शब्दे (अदा०) धातो 'ऋदोरप्' इत्यप्]

रशनया रश्मिना २१ ४६ **रशना**=व्याप्नुवती (रज्जु) २५ ३७ व्यापिका (रज्जु) १ १६२ ८ **रशनाम्**=स्नेहिका क्रियाम् १.१६३ २ रशनावत् किरणगतिम् २६ १३ अङ्गुलिम् २८ ३३ व्यापिका रज्जुमिव २२ २. **रशनाः**=रज्जव २६ १६ आस्वादनीया (गोप =रक्षका जना) १ १६३ ५ [अशूङ् व्याप्तौ (स्वा०) धातो 'अशेरश् च' उ० २ ७५ सूत्रेण युच् धातोरशादेशश्च। स्त्रिया टाप्। रशना अङ्गुलिनाम निघ० २ ५ ऊर्ग् वै रशना तै० स० ६ ३ ४ ५ ओषधयो रशना काठ० ३४ १५]

रश्मयः रज्जव किरणा वा २६ ४२ **रश्मये**= शोधनाय ३८ ६ **रश्मिना**=किरणसमूहेन १५ ६ **रश्मिभिः**=प्रकाशकैर्गुणै किरणैर्वा १ ३१ अन्त प्रकाशकैर्गुणै १ ३१ प्रकाशैर्गमनागमनै ४ ४ सूर्यकिरणै सह १ १६ ८ **रश्मिम्**=प्रकाशम् ५ ७ ३ सूर्यप्रकाशम् ४ २२ ८ **रश्मिः**=येनाऽश्नाति स (व्यवहार) प्र०—अत्र 'अश भोजने' धातोर्बाहुलकान् मि प्रत्ययो रशादेशश्च उ० ४ ४६, १८ १६ किरणो दीप्ति ३३ ७४ प्रकाशक प्रकाशमयो वा (सूर्य =जगदीश्वरो विद्वान् जीवो वा) २ ४६ ज्योति १ ३५ ७ **रश्मीन्**=विद्याविज्ञानतेजासि १ १०६ ३ अश्वनियमनार्था रज्जू १० २२ **रश्मे**= रश्मिवद्वर्त्तमान (विद्वज्जन) ५ ६६ ५ [अशूङ् व्याप्तौ (स्वा०) धातो 'अश्नोतेरश् च' उ० ४ ४६ सूत्रेण मि प्रत्ययो रशादेशश्च। अश भोजने (क्र्या०) धातोर्वा बाहु० औणा० मि रशादेशश्च। रश्मय रश्मिनाम निघ० १ ५ रश्मि = यमनात् नि० २ १५ अथ य कपाले रसो लिप्त आसीत्ते रश्मयोऽभवन् श० ६ १ २ ३ युक्ता ह्यस्य (इन्द्रस्य) हरय शता दशेति। सहस्र हैत आदित्यस्य रश्मय जै० उ० १ ४४ ५ अभीशवो वै रश्मय श० ५ ४ ३ १४ रश्मयो ह्यस्य (सूर्यस्य) विश्वे देवा श० ३ ६ २ ६ तस्य (सूर्यस्य)

सुराद्यत्' अ० ४ १.१३७. सूत्रेणापत्ये यत् । 'राज्ञोऽपत्ये जातिग्रहणम्' अ० ४ १ १३७ वा०सूत्रेण जातौ यत् । 'राजेरन्य' उ० ३ १०० सूत्रेणान्य प्रत्ययो वा । चतुरक्षर प्रजापतिश्चतुरक्षरो राजन्य. श० ५ १.५.१४. तस्माद् बाहुवीर्यो (राजन्य) बाहुभ्या हि सृष्ट ता० ६ १ ८ क्षत्र राजन्य ऐ० ८ ६ श० १३ १ ५ ३ क्षत्रस्य वा ऽएतद्रूप यद्राजन्य श० १३ १.५ ३ ओज क्षत्र वीर्यं राजन्य । ऐ० ८ २ वृषा वै राजन्य ता० ६ १० ९. युद्ध वै राजन्यस्य वीर्यम् श० १३ १ ५.६ युद्ध वै राजन्यस्य तै० ३ ९.१४.४. तस्माद् राजन्यस्य पञ्चदश स्तोमस्त्रिष्टुप् छन्द इन्द्रो देवता ग्रीष्म ऋतु ता० ६ १ ८ त्रिष्टुप् छन्दा वै राजन्य. तै० १ १ ९ ६ आनुष्टुभो राजन्य तै० १ ८.८.२ ता० १८ ८ १४ ऐन्द्रो वै राजन्य' तै० ३ ८ २३ २. ऐन्द्रो राजन्य ता० १५ ४ ८ औदुम्बरेण राजन्य अभिषिञ्चति तै० १ ७ ८ ७. पार्थरश्म राजन्याय ब्रह्मसाम कुर्वीत ता० १३ ४ १८ तस्मादपि (दीक्षित) राजन्य वा वैश्य वा ब्राह्मण इत्येव ब्रूयात् ब्रह्मणो हि जायते यो यज्ञाज् जायते श० ३ २ १ ४०]

राजपुत्रा राजा पुत्रो यस्या सा (अदिति'=मातेव) २ २७ ७ [राजन्-पुत्रपदयो समास]

राजयातै प्रकाशमान हो स० वि० १८३, अथर्व० ६ १० ९८ १ [राजृ दीप्तौ (भ्वा०) धातोर्णिजन्ताल् लेट्]

राजस्व: राजवीरप्रसविका (अध्यापिका परिचारिका अध्येत्र्यश्च स्त्रिय) १० ६ राजजनिका. (अप = जलानि प्राणान् वा) १० १ [राजसूप्राति० प्रथमाबहुवचनम् । राजसू =राजोपपदे षूङ् प्राणिगर्भविमोचने (अदा०) धातो कर्त्तरि क्विप्]

राजाना देदीप्यमानावध्यापकोपदेशकौ २ ३९ ६ प्रकाशमानौ सभासेनेशौ १ १३६ ४ विद्यादिशुभगुणैः प्रकाशमानौ राजप्रजाजनौ ३ ३८ ६ राजमानौ (सभासेनेशौ, राजामात्यौ) ५ ६२ ९ [राजन्प्राति० द्विवचनस्याकारादेशश्छान्दस]

राजासन्द्यै राजान सीदन्ति यस्या तस्यै (वेद्यै= यज्ञस्थल्यै) १९ १६ [राजासन्दीप्राति० चतुर्थी । राजासन्दी=राजन्-आसन्दीपदयो समास]

राजेव यथा सभाध्यक्ष १ ६७ १ प्रकाशमानो नृप इव ६ ४.४ [राजा-इवपदयो समास]

राज्ञी राजमाना (स्त्री) १४ १३ राजमाना प्रधाना भा०—उत्तमा (स्त्री) १५ १० [राजन्प्राति० स्त्रिया ङीप्]

राट् यो राजते स (राजा) १ १२१ ३ या राजते सा (नीति') १८.२८. प्रकाशमाना (स्त्री) १४ २२ राजमाना (स्त्री) १४.२१. [राजृ दीप्तौ (भ्वा०) धातो 'सत्सूद्विषद्रुह०' अ० ३.२ ६१ सूत्रेण क्विप्]

राततमा अतिशयेन दातव्यानि (ब्रह्माणि धनानि अन्नानि वा) १ ६१ १ [राततमप्राति० शेर्लोपश्छन्दसि । राततम =रा दाने (अदा०)+क्त+अतिशायने तमप्]

रातम् दत्तम् (औषधम्) २५ ३४ [रा दाने (अदा०) धातो क्त]

रातहविषे दत्तदानव्याय (जनाय=सत्पुरुषाय) २ ३४ ८ [रात-हविष्पदयो समास]

रातहव्यस्य दत्तदानव्यस्य (विदुषो जनस्य) ५.६६ ३ **रातहव्य:**=प्रदत्तहवि (राजा) १ ११८ ११ रातानि दत्तानि हव्यानि येन स (सत्पति.=सभाध्यक्षो जन) १.५४ ७ रात गृहीतु योग्य हव्य दत्त येन स (अग्नि= विद्युत्) ४ ७ ७ [रात-हव्यपदयो समास । रातम्=रा दाने (अदा०) धातो क्त । हव्यम्=हु दानादानयो (जु०) धातोर्यत्]

रातहव्या रात दत्त हव्य गृहीतु योग्य वस्तु याभ्या तौ (इन्द्रावरुणा=विद्युज्जले) ७ ३५ १ दातव्यदानौ (इन्द्राविष्णू=वायुसूर्यौ) ६ ६९ ६ रात दत्त हव्यमादातव्य सुख याभ्यान्तौ (इन्द्रावरुणा=विद्युज्जले) ३६ ११ [रात-हव्यमिति व्याख्यातम् । ततो द्विवचनस्याकारादेश.]

रातहव्याम् रातानि हव्यानि दातव्यानि दानानि यया ताम् (मही=वाचम्) ५ ४३ ६ [रात-हव्यपदयो समासे स्त्रिया टाप्]

राता दत्तानि (हवींषि=अन्नादीनि) ३ ३५ ७ [रातप्राति० शेर्लोपश्छन्दसि । रातम्=रा दाने (अदा०)+क्त]

रातानि दत्तानि (ऐश्वर्याणि) १ १३१ १ [रातप्राति० नपु० प्रथमाबहुवचनम्]

रातिनी बहवो राता दातारो विद्यन्ते यस्या सा (घृताची=रात्रि) ४ ६ ३ **रातिनीम्**=रातानि दत्तानि विद्यन्ते यस्या ताम् (घृताची=रात्रिम्) ३ १९ २ [रातप्राति० भूम्न्यर्थे इनि । तत स्त्रिया ङीप् । रातम्=रा दाने (अदा०) धातो क्त]

रातिम् दातारम् (वह्निम्) १ ६०.१ विद्यादान-

(भ्वा०) धातोर्ण्यत्]

रह्या गमनीयानि (उन्नमस्थानानि) ४.१ ३ [रहि गतौ (भ्वा०) धातोर्ण्यत्। तत शेर्लोपश्छन्दसि]

रंह्यै गत्यै अ०—युद्धभूमिषु गत्यै यथार्थतया युद्ध-कर्मणि प्रवृत्त्यै ६ १८. [रहि गतौ (भ्वा०) धातो 'इक् कृष्यादिभ्य' इति वा० सूत्रेण इक्। ततश्चतुर्थी। रहि:= गति नि० १०.२९]

राका राति ददाति सुख या सा (सरस्वती=वाक्) प्र०—राकेति पदनाम निघ० ५.५, ५ ४२.१२ पौर्णमासी-वद्वर्त्तमाना (विदुषी स्त्री) २ ३२ ८ **राकाम्**=पूर्णप्रकाश-युक्तेन चन्द्रेण युक्ता रात्रीम् २ ३२ ४ **राके**=सुखप्रदे रात्रिरिव (विदुषि स्त्रि) २ ३२.५ [रा दाने (अदा०) धातो 'कृदाधारार्चिकलिभ्य क' उ० ३ ४० सूत्रेण क। तत. स्त्रिया टाप्। राका पदनाम निघ० ५ ५ अनुमती राकेति देवपत्न्याविति नैरुक्ता, पौर्णमास्याविति याज्ञिका, या पूर्वा पौर्णमासी साऽनुमतिर्योत्तरा सा राकेति विज्ञायते नि० ११ ३०. राका रातेर्दानकर्मण नि० ११ ३० योत्तरा (पौर्णमासी) सा राका ऐ० ७ ११. प० ४ ६ गो० उ० १ १० योषा सा राका ऐ० ३ ४८ या राका सा त्रिष्टुप् ऐ० ३ ४७]

राजति प्रकाशते १ १४३ ४ प्रकाशयति प्र०—अत्राऽन्तर्भावितो ण्यर्थ १ ३ १२ **राजथ:**=प्रकाशेते ५ ३८ ३ प्रकाशेथे ५ ६३ २ **राजसि**=प्रकाशयसि १ १४४ ६ प्रकाशसे १ १८८ १ **राजामि**=प्रकाशे ४ ४२.२ [राजृ दीप्तौ (भ्वा०) धातोर्लट्। राजति ऐश्वर्य-कर्मा निघ० २ २१]

वपुष्यः वपुष्षु रूपेषु भव (अग्नि=राजा) ४ १ ८ वपुषि सुन्दरे रूपे भव (अतिथि) ५ १ ९ वपुष्षु साधु (अग्नि=विद्वज्जन) ४ ११ २ [वपुष् इति व्याख्यातम् । ततो भवार्थे साध्वर्थे वा यत्]

वपुष्या वपुषि भवानि (सुरूपाणि यानानि) १ १८३ २ [वपुष्य इति व्याख्यातम् । ततश्शेर्लोप-श्छन्दसि]

वपुष्ये वपुषि रूपे भवे (भूमिसूर्यौ) १ १६० २ [वपुष्प्राति० भवार्थे यत् । ततो द्विवचने रूपम्]

वप्ससः सुरूपस्य (विद्वज्जनस्य) १ १८१ ८ [वप्स=रूपनाम निघ० ३ ७]

वभ्रः उद्गलितोदान (प्राणवायु) ११ ७४ [वभ्र

काय (जनाय) २.१३ १२. प्राप्तव्याय सुखाय ४ १६ ६.

वय्येव पदसाधिका नलिकेव २ ३ ६ [वय्या-इवपदयो. समास]

वरत् वृणुयात् ६ ४५ २४. **वरते**=स्वीकरोति ४ ४२ ६ **वरथः**=स्वीकुरुथ ५ ३१ ६ **वरन्त**=वारयन्ति ३ ३२ ६ वृण्वन्तु, प्र०—अत्र विकरणव्यत्ययेन शप् १ १२१ १५ निवारयन्ति ४ ६ ६. वरयन्ति २ २४ ५. स्वीकुर्यु १ १४० १३ **वरन्ते**=स्वीकुर्वन्ति ४ ३२ ८ **वराते**=वृणुयाताम् ५ ३२ ६ वृणुते १ ६५ ३ [वृञ् वरणे (स्वा०) धातोर्लेट् । व्यत्ययेन शप् । अन्यत्र लट् लङ् चापि वरन्ते=वारयन्ति नि० १० २६]

वरत्राः रश्मय ४ ५७ ४. [वृञ् वरणे (स्वा०) धातो. 'वृञश्चित्' उ० ३ १०७ सूत्रेणात्रन्]

वरम् अतिश्रेष्ठम् (सूरिं=युद्धविद्याकुशल जनम्) १.११६ ३. परमोत्तम विज्ञानधनम् १ ४४ वरणीय वस्तुसमुदायम् २ ५ ५ रत्नादिकम् १ १४० १३ **वराय**= स्वीकरणाय १ १४३ ५ श्रैष्ठ्याय १ ७६ १ श्रेष्ठत्वाय ७ ५६.२ [वृञ् वरणे (स्वा०) धातोरच् । अथवा वृणोतेः 'ग्रहवृदृनिश्चिगमश्च' अ० ३ ३ ५८ सूत्रेण घञोपवादोऽप् । वरो वरयितव्यो भवति नि० १ ७ वर इव वै स्वर्गो लोक जै० २ ६६ वरो न प्रतिगृह्य तै० म० ७ १ ६ ५ सर्वं वै वर श० २.२.१ ४]

वरशिखस्य वरा श्रेष्ठा शिखा यस्य तस्य (सूर्य इव राज्ञ) ६ २७ ४ वरा शिखा यस्य तद्वत् मेघस्य ६ २७.५ [वरा-शिखापदयो समास]

वरसत् यो वरेषूत्तमेषु पदार्थेषु सीदति स (परमेश्वर) १० २४ यो वरेषु श्रेष्ठेषु सीदति स (जीवात्मा) ४ ४० ५. य उत्तमेषु विद्वत्सु सीदति स (ईश्वरो जीवो वा) १२ १४ [वरोपपदे षद्लृ विशरणगत्यवसादनेषु (भ्वा०) धातो कर्त्तरि क्विप् । एष (सूर्य) वै वरसद् वर वा एतत् सद्मना यस्मिन्नेष आसन्नस्तपति ऐ० ४ २०]

वरस्या अतिशयेन वरौ (भा०—स्त्रीपुरुषौ) ५ ७३ २. [वरपदाद् इच्छायामर्थे क्यच्प्रत्ययान्तात् कर्त्तर्यच् । ततो द्विवचनस्याकार । क्यचि च 'सुग् वक्तव्य ' अ० ७ १ ५१ वा०सूत्रेण सुगागम]

वरस्याम् स्वीकर्त्तव्या प्रशसाम् ६ ४६ ११ [वरस्येनि पूर्वपदे व्याख्यातम् । तत स्त्रियाम् । 'अ प्रत्ययादि' त्यकार । ततष्टाप्]

वरा श्रेष्ठ तुल्य गुण कर्म स्वभाव वाले (स्त्रीपुरुष) स० वि० १३७, अथर्व० १४.१ ६ श्रेष्ठौ श्रोतृश्रावकौ ५ ४४.१२. [वरप्राति० 'सुपा सुलुक्०' इति द्विवचनस्याकारादेश]

वरा इव यया प्रशस्तविद्याधर्मकर्मस्वभावा' (विद्वांसो जना.) १.८३.२ वरैस्तुल्या (मनुष्या) ५ ६०.४ [वरा-इवपदयो. समास]

वराहम् मेघम् १ ६१.७. [वराहो मेघो भवति वराहार , 'वरमाहारमाहार्षी ' इति च ब्राह्मणम् नि० ५.४ अङ्गिरसोऽपि वराहा उच्यन्ते नि० ५.४ वराह मेघनाम निघ० १ १०. पशूना वा एष मन्युर्यद् वराह तै० १.७ ६ ४ ता (पृथिवी प्रजापति) वराहो भूत्वाऽहरन् तै० म० ७ १. ५ १ अग्नौ ह वै देवा घृतकुम्भ प्रवेशयाचक्रुस्ततो वराह सम्बभूव श० ५ ४ ३ १६ आण्डाभ्या वराहौ (अजायेताम्) जै० २.२६७]

वराहुम् वराणा धर्म्याणा व्यवहाराणा धार्मिकाणा जनानाञ्च हन्तार दस्यु शत्रुम् १ १२१ ११. **वराहून्**= वरमाह्वयत शब्दायमानान् (रथान्) १ ८८ ५ [वरोपपदे हन हिंसागत्यो. (अदा०) धातो 'दुप्रकरणे मितद्र्वादिभ्य उपसङ्ख्यानम्' अ० ३ २ १८० वा०सूत्रेण दु । वरोपपदे ह्वेञ् स्पर्धाया शब्दे च (भ्वा०) धातोर्वा दु । अथाप्येते माध्यमिका देवगणा वराहव उच्यन्ते नि० ५ ४]

वरांसि वरणीयानि धर्म्याणि कर्माणि ४ २१ ८ वराणि (कर्म्माणि) १ १६० २ उत्तमानि वस्तूनि ६ ६२.१. [वृञ् वरणे (स्वा०) धातोरसुन् । वरस्प्राति० प्रथमाबहुवचने रूपम्]

वरिमता बहुस्थूलत्वेन सह १ १०८ २ [उरु बहुनाम निघ० ३ १ ततो भाव इमनिच्-प्रत्यये वरादेशे च छान्दस रूपम्]

वरिमन् बहुगुणयुक्त (विद्वज्जन) ४ ५४-४ अतिशयेन श्रेष्ठे (सुम्ने=सुखे) ६ ६३ ११ बहुशीलसत्ययुक्तम् (व्रत= स्वीकृतक्षमादिगुणम्) ३ ५६ ३ **वरिमा**=वरस्य श्रेष्ठस्य भाव. १८.४ **वरिम्णा**=श्रेष्ठगुणसमूहेन ३ ५ बहोर्भावेन १५ ११ अतिशयेनोरुर्बहुस्तेन व्यापकत्वेन १३ २. महापुरुषार्थेन १५ १० [उरु बहुनाम (निघ० ३ १) उरुप्राति० भावे 'पृथ्वादिभ्य इमनिज्वा' अ० ५ १ १२२. सूत्रेणेमनिच् । ततश्च 'प्रियस्थिर०' इत्यादिना वर्-आदेश]

वरिवस्यन् सेवमान (इन्द्र.=विद्वान् राजा) ६ २०.११ **वरिवस्यन्तः**=परिचरन्त (मरुत =उत्तम-

वयाकिनम् व्यापिनम् (विद्वज्जनम्) ५ ४४ ५ [वी गतिव्यप्तिप्रजनादिषु (अदा०) धातोर्बाहु० औणा० आकिन् प्रत्यय]

वयाम् वयसामवस्थावता प्राणिनाम्, प्र०—अत्राऽऽमि टिलोपश्छान्दस ३४ ४८ व्यापिका सुखनीतिम् १५ २४ शाखाम् ५ १ १ **वयाः**=शाखा २ ३५ प्रापक (रुद्र = शूरवीरजन) ७ ४०.५ पक्षिण ६ १३ १ [वयस् इति व्याख्यातम् । तत आमि टिलोपश्छान्दस. । वया. शाखा वेतेर्वातायना भवन्ति नि० १ ४]

वयावन्तम् बहुपदार्थयुक्तम् (क्षय=गृहम्) ६ २ ५

वयिष्यन् व्यय करिष्यन् (वसिष्ठ =पूर्णविद्वज्जन) ७ ३३ १२ [वय गतौ (भ्वा०) धातोर्लृट शतृ । व्यत्ययेन परस्मैपदम्]

वयुनम् कर्म्म प्रज्ञान वा ५ ४८ २ प्रज्ञाम् ३ ३ ४ **वयुनानि**=विज्ञानानि, भा०—विद्या २९ ५१ ज्ञानानि ६ ७५ १४ प्रशस्तानि कर्माणि प्रज्ञाश्च ५ ३६. प्रज्ञान और उत्तम कर्म स० वि० ७, ४० १६ **वयुनेषु**=पृथिवीमारभ्य परमेश्वरपर्यन्ताना विज्ञानेषु ६_७ ५ प्रज्ञापनेषु २ ३४ ४ [अज गतिक्षेपणयो (भ्वा०) धातो 'अजियमिशीङ्भ्यश्च' उ० ३ ६१ सूत्रेण उनन् । 'अजेर्व्यघञपो ' अ० २ ४ ५६ सूत्रेणाजेर्वीत्ययमादेश । वयुनम्=प्रशस्यनाम निघ० ३ ८ प्रज्ञानाम निघ० ३ ९ पदनाम निघ० ४ २. वयुन वेते कान्तिर्वा प्रज्ञा वा नि० ५ १५ वयुनानि प्रज्ञानानि नि० ८ २०]

वयुनवत् प्रज्ञावत् ६ २१ ३ [वयुनमिति व्याख्यातम् । ततो मतुप्]

वयुनशः प्रज्ञानेन ६ ५२ १२ [वयुनप्राति० 'बह्वल्पार्थाच्छस्०' अ० ५ ४ ४२ सूत्रेण शस्]

वयुना प्रज्ञानानि कर्माणि वा १ १६२ १८ वयुनानि प्रशस्यानि कमनीयानि वा कर्म्माणि १ ९२ ६ [वयुनप्राति० शेर्लोपश्छन्दसि]

वयुनावत् प्रज्ञानवत् ४ ५१ १ [वयुनप्राति० मतुप् । सहिताया दीर्घ । वयुनावत् प्रज्ञानवत् नि० ५ १५]

वयुनावित् यो वयुनानि प्रज्ञानानि वेत्ति स , भा०—सर्वज्ञ. (अ०—जगदीश्वर) ३७ २ यो वयुनानि प्रशस्तानि कर्म्माणि वेत्ति स '(योगिजन), प्र०—वयुनमिति प्रशस्यनामसु पठितम् निघ० ३ ८ अत्र 'अन्येषामपि दृश्यते' इति दीर्घ ५ १४ सर्वेषा जीवाना शुभाऽशुभानि यानि प्रज्ञानानि प्रजाश्च तानि यो वेद स (परमेश्वर) ऋ० भू० १५६ [वयुनोपपदे विद ज्ञाने (अदा०) धातो कर्त्तरि क्विप् । 'अन्येषामपि दृश्यते' इति दीर्घ । वयुनाविदित्येष (प्रजापति) हीद वयुनमविन्दत् श० ६ ३ १.१६]

वयोधसम् चिरायुर्धारकम् (इन्द्र=राजानम्) २८.३१. चिरञ्जीविनम् (इन्द्रम्) २८.४२ प्राणधारिणम् (इन्द्र=जीवम्) २८ ३९ आयुषो धर्त्तारम् (इन्द्रम्) २८.४५ बहुवयो धारकम् (इन्द्र=राजानम्) २८ ४४ जीवनधारकम् (इन्द्रम्) २८ ४१ कमनीयसुखधारकम् (इन्द्र=परमैश्वर्यम्) २८ ३० वयोवर्धकम् (इन्द्र=सूर्यम्) २८ ३५ कमनीयाना विद्यावोधादीना धातारम् (इन्द्र=विद्वज्जनम्) २८ २८ कामनाधारकम् (इन्द्र=परमैश्वर्यम्) २८ २९ वय कर्मोपासनाज्ञानानि वत्सा इव यस्य तम् (जीवस्वरूपम्) २८ २७ **वयोधसा**=वयो जीवन दधाति येन तेन (आधीतेन=अध्ययनेन) १५ ७ **वयोधाः**=यो वय प्रजनन दधाति स (मनुष्य) २ ३ ९ यो वय कमनीयमायुर्दधाति स (वैद्य) ५ ४३ १३ अ०—जितेन्द्रियत्वेन जीवनवर्धयिता (अग्नि = पावक इव सेनापति) १५ ५२ यो वयो जीवन कमनीय वस्तु दधाति स (इन्द्र =ईश्वर) ४ १७.१७ य कमनीयानि वयासि जीवनधनादीनि दधाति स (अग्नि =विद्युदिव राजा) ४ ३ १० [वयस् इति व्याख्यातम् । तदुपपदे डुधाञ् धारणपोषणयो (जु०) धातो 'वयसि धाञ ' उ० ४ २२९ सूत्रेण असि । वयोधा इति श्रोत्रम् तै० स० ५ ३ ६ २]

वयोनाधैः वयासि विज्ञानानि नह्यन्ति यैर्विद्वद्भि, वेदादिशास्त्रप्रज्ञापनप्रबन्धकै (देवै =विद्वद्भि), वयासि जीवनादीनि गायत्र्यादिछन्दासि वा नह्यन्ति यै प्राणैस्तै, पूर्णविद्याविज्ञानप्रचारप्रबन्धकै (देवै), ये वय कामयमान जीवन नह्यन्ति तै (देवै) १४ ७ [वयस् इति व्याख्यातम् । तदुपपदे णह बन्धने (दिवा०) धातो 'कर्मण्यण्' इत्यण् 'नहो ध ' इति ह्रस्य ध]

वयोवयः कमनीय जीवन जीवनम् ५ १५.४ [वयस्पदस्य वीप्साया द्विर्वचनम्]

वयोवृधः ये वयसा वर्धन्ते, वयो वर्धयन्ति वा (विद्वज्जना) ५ ५४ २ [वयस् इत्युपपदे वृधु वृद्धौ (भ्वा०) धातो कर्त्तरि क्विप्]

वयोवृधा ये वय कमनीय जीवन वर्धयतस्ते (रात्रिदिने) ५ ५ ६ [वयस् इत्युपपदे वृधु वृद्धौ (भ्वा०) धातो क्विप् । ततो द्विवचनस्याकारश्छान्दसम्]

वय्यम् यो वयते जानाति तम् (विद्वज्जनम्), प्र०—अत्र वयधातोर्बाहुलकादौणादिको यत्प्रत्यय १ ५४ ६ ज्ञातारम् (विद्वास जनम्) १ ११२ ६ **वय्याय**=तन्तुसन्तान-

३.३१. आह्लादकस्य जलचन्द्रादे १ ११५ १. वरस्य (परमेश्वरस्य विदुषो वा) १ ६१ ३ सर्वोत्कृष्टस्य (राज्ञ) १७.४१. सर्वेभ्यो वरस्य श्रेष्ठस्य जगदीश्वरस्य ३४ ४५ वरेषु श्रेष्ठेषु कर्मसु गुणेषु वर्त्तमानस्य (ईश्वरस्य) प० वि० मेघस्य, प्र०—वरुण इति पदनाम निघ० ५ ६, २ २८ ४ वीरगुणोपेतस्य (राज्ञ) ८ २३. उदानस्येव बलवतो रोगस्य ६ ७४ ४ सूर्यस्य वायोर्वा ६ ७० १ दु खेनाच्छादकस्य तिरस्कर्त्तु (सभाध्यक्षस्य राज्ञ) ५ ३६ वरितु प्राप्तु योग्यस्य श्रेष्ठस्य जगत वरपदार्थसमूहस्य उत्कृष्टगुणसमूहस्य, वायो, प्र०—अनेन ज्ञानप्राप्तिर्गमधातोरर्थस्य ग्रहणम् ४ ३६ वरस्य प्राप्तव्यस्य सुखस्य १३ ५० सम्बन्धस्योत्तमस्य (कृष्टे =मनुष्यस्य) ४ ४२ २ उत्कृष्ट व्यवहार के स० वि० १२२ अथर्व० १४ १.५७ अग्नेर्विद्युतो वा ७ ४२ **वरुणः**=जल वायुश्चन्द्रो वा १ १७ ५ बाह्याऽभ्यन्तरस्थो वायु १ २३ ६ श्रेष्ठतम उत्तमव्यवहारहेतुर्वा (राजा=परमेश्वर सूर्यो वा) १ २४ १३ उदान इव श्रेष्ठ (इन्द्र =राजा) २५ २४ शमादिगुणान्वित (महाविद्वज्जन) ६ ६२ ६ आप २ ३८ ६ वरणीय (विद्वज्जन) ५ ६८ २ दुष्टाना बन्धकृच्छ्रेष्ठ (राजा) ५ ३ १ सर्वोत्तमोऽधिपति परमेश्वर प० वि०। जलाधिपति (राजपुरुष) ७ ५६ २५ जलमिव शान्तिप्रद (दार) ७ ४० ७ वरो विद्वान् ७ ३८ ४ वरस्वभाव (राजा) १० २८ धर्माचरणेन श्रेष्ठ (मित्र =सर्वस्य सुहृज्जन) ६.३६ पुरुषोत्तम (सम्राट्) १० २७ जलसमूह ८ ५६ श्रेष्ठाचार (ऋभुक्षा =महाविद्वज्जन) ५ ४१ २ सर्वोत्कृष्ट स्वीकरणीय, परमोत्तम (ईश्वर) आर्याभि० ११ ऋ० १ ६ १८ ६ वरगुणाढ्योऽर्थ १४ २० सर्वोत्तमप्रबन्धकर्त्ता (जगदीश्वर) ४ ४२ २ विविधपाशै शत्रूणा बन्धक (राजा) १ २५ १३ सकलविद्यासु वर (मनुष्य) १ २६ ४ चन्द्रसमुद्रतारकादिसमूह १ ४० ५ उत्तमगुणयोगेन श्रेष्ठत्वात् सर्वाध्यक्षत्वाऽर्ह (भा०—सभासेनाध्यक्ष) १,४१ १ वरो जीव २ ३८.८. वरगुणप्रद वर, सर्वोत्तम, प्रशस्तविद्योऽनूचानो विद्वानध्यापक, सत्योपदेष्टाऽऽप्ता ७.४७ जल यस्याऽवयव. स (मेघ) २६ १ य सर्वान् शिष्टान् मुमुक्षून् धर्मात्मनो वृणोति, अथवा य शिष्टैर्मुमुक्षुभिर्धर्मात्मभिर्व्रियते वर्य्यते वा स वरुण परमेश्वर, जो आत्मयोगी, विद्वान्, मुक्ति की इच्छा करने वाले, मुक्त और धर्मात्माओ से ग्रहण किया जाता है, वह ईश्वर, अथवा 'वरुणो नाम वर श्रेष्ठ' जिसलिए परमेश्वर सबसे श्रेष्ठ, सर्वोत्तम है इसलिए उसका नाम वरुण है, प्र०—वृञ् वरणे, वर ईप्सायाम् इन धातुओ से औणादिक उनन्-प्रत्यय होने से वरुण शब्द सिद्ध होता है स० प्र० २०, ३६ ६ **वरुणाय**=समुद्रादिषु गमनाय ३६ २ उत्तमाय व्यवहाराय ५ ६६ १ प्रशस्तैश्वर्याय ८ २३ **वरुणे**=स्वीकर्त्तव्ये जने ३३ १७ **वरुणेन**=वरेण पुरुषार्थेन ४ ३४.७. [वृञ् वरणे (स्वा०) धातो 'कृवृदारिभ्य उनन्' उ० ३ ५३ सूत्रेण उनन्। वरुणो वृणोतीति सत नि० १० ३ वरुण पदनाम निघ० ५ ४ (आप) यच्च वृत्वाऽतिष्ठस्तद्वरुणोऽभवत्त वा एत वरण सन्त वरुण इत्याचक्षते परोक्षेण। परोक्षप्रिया इव हि देवा भवन्ति प्रत्यक्षद्विष गो० पू० १.७ वरुणो वै जुम्बक (यजु० २५ ६) श० १३ ३ ६ ५ तै० ३.६.१५ ३ रात्रिर्वरुण ऐ० ४ १० ता० २५.१० १० वारुणी रात्रि तै० १ ७ १०.१. य प्राण स वरुण गो० उ० ४ ११ यो वै वरुण सोऽग्नि श० ५ २ ४ १३. यो वा ऽग्नि स वरुणस्तदप्येतद् ऋषिणोक्त त्वमग्ने वरुणो जायसे यदिति ऐ० ६ २६ अथ यत्रैतत् प्रदीप्ततरो भवति तर्हि हैष (अग्नि) भवति वरुण श० २ ३ २ १० स यदग्निर्घोरसस्पर्शस्तदस्य वारुण रूपम् ऐ० ३ ४ वरुण्यो वाऽएष योऽग्निना शृतोऽथैष मित्रो य ऊष्मणा शृत श० ५ ३ २.८ य (अर्द्धमास) अपक्षीयते स वरुण ता० २५ १० १० य. (अर्द्धमास) एवापूर्यते स वरुण श० २ ४.४ १८ क्लोमा वरुण श० १२ ६.१ १५ श्रीर्वै वरुण कौ० १८ ६ वरुण (श्रिय) साम्राज्यम् (आदत्त) श० ११ ४ ३ ३ द्यावापृथिवी वै मित्रावरुणयो प्रिय धाम ता० १४ २.४ अय वै (पृथिवी) लोको मित्रोऽसौ (द्युलोक) वरुण श० १२ ६ २ १२ व्यानो वरुण श० १२ ६ १.१६ अपानो वरुण श० ८ ४ २ ६. योनिरेव वरुण श० १२.६ १ १७ वरुणो दक्ष श० ४.१ ४ १ वरुण एव सविता जै० उ० ४.२७ ३ स वा एषो (सूर्य) ऽप प्रविश्य वरुणो भवति कौ० १८ ६. वरुण आदित्यै (उदक्रामत्) ऐ० १.२४ वरुण आदित्यै (व्यद्रवत्) श० ३ ४ २ १ सवत्सरो वरुण श० ४ ४ ५ १८ सवत्सरो हि वरुण श० ४.१ ४.१० क्षत्र वरुण श० ४ १ ४ १ गो० उ० ६ ७ क्षत्र वै वरुण श० २ ५.२ ६ कौ० ७ १० क्षत्रस्य राजा वरुणोऽधिराज तै० ३ १ २ ७ इन्द्र उ वै वरुण स उ वै पयोभाजन कौ० ५ ४ इन्द्रो वै वरुण स उ वै पयोभाजन गो० उ० १ २२ तद् यदेवात्र पयस्तन्मित्रस्य सोम एव वरुणस्य श० ४ १ ४ ६ वारुण यवमय चरु निर्वपति तै० १ ७ २ ६ वारुणो यवमयश्चरु श० ५ २ ४.११. वरुण्यो ह वा ऽग्रे यव श० २ ५ २-१ वरुण्यो यव श० ४ २ २ ११ निर्वरुणत्वाय एव यवा ता० १८ ६.१७

राजजना) ७ ५६ १७. [वरिवस्प्राति० परिचर्यायामर्थे 'नमोवरिवश्चित्रङ क्यच्' अ० ३ १ १९ सूत्रेण क्यच्। तत शतृ]

वरिवस्यन्तु सेवन्ताम् ६ ५२ १५ परिचरन्तु १ १२२ ३ [वरिवस्प्राति० परिचर्याया क्यच् ततो लोट्]

वरिवस्या वरिवसि परिचर्याया भवानि सेवनकर्माणि १ १८१ १ [वरिवस्प्राति० भवार्थे यत्। तत शैर्लोप-श्छन्दसि]

वरिवः विद्वत्परिचरणम् १५ ५ सुखकारक सेवनम् ७ ४४ सत्यसेवनम् १५ ४. भृश रक्षणम् ५ ३७ चक्रवर्त्ती राज्य और साम्राज्य धन को आर्याभि० १ ४३ [वरिव धननाम। निघ० २ १०]

वरिवोदाः सत्यधर्मविद्वत्सेवाप्रापिका हेतय =शस्त्रास्त्रोन्नतय) १७ १५ [वरिवस् इत्युपपदे डुदाञ् दाने (जु०) धातो क। तत स्त्रिया टाप्]

वरिवोधाम् वरिव परिचरण सुखसेवन दधाति येन तम् (रथ=यानम्) १.११९ १ [वरिवस् उपपदे डुधाञ् धारणपोपणयो (जु०) धातो करणे क्विप्]

वरिवोवित् परिचरणवेत्ता (विद्वज्जन) २६ १७ **वरिवोविदम्**=येन वरिव परिचरण विन्दति तम् (रयिं=धनम्) २० ८३ वरिव सेवन विन्दति येन तम् (रयिम्) २.४१ ९ **वरिवोविदः**=ये वरिव परिचरण विन्दन्ति जानन्ति यद्वा वरिवो धन वेदयन्ति प्रापयन्ति ते (भा०—समर्था विद्वासो जना) ३३.९४ **वरिवोविदा**—परिचरण विन्दति प्राप्नोति येन तेन पराक्रमेण १ १७५ ५ [वरिवस् उपपदे विद् ज्ञाने (अदा०) धातो क्विप् कर्त्तरि। विद्लृ लाभे (तुदा०) धातोर्वा क्विप्]

वरिवोवित्तरा याऽतिशयेन परिचरणलब्ध्री (सुमति =शोभना प्रज्ञा) ३३ ६८ वरिव सेवन विद्वद्वन्दन वा यया सुमत्या साऽतिशयिता ६ १०७.१ वरिव' सत्य व्यवहार वेत्त्यनया साऽतिशयिता (सुमति) ८ ४ [वरिवो-विदिति व्याख्यातम्। ततोऽतिशायने तरबन्ताट् टाप्]

वरिष्ठम् अतिश्रेष्ठम् (वज्र =शस्त्रविशेषम्) ५ ४८ ३ **वरिष्ठः**=अतिशयेन वरिता (इन्द्र =राजा) ६ ३७ ४ **वरिष्ठे**=अतिशयेन वरे (बन्धुरे=प्रेमबन्धने) ६ ४७ ९ [वरप्राति० अतिशायन इष्ठन्। वृञ् वरणे (स्वा०) धातोस्तृजन्तादतिशायन इष्ठनि तृचो लोप। वरिष्ठ वर्पिष्ठम्। नि० ५ १]

वरिष्ठया अतिशयेन स्वीकर्त्तव्यया (सुमत्या) ५.२५ ३. **वरिष्ठा**=अतिशयेनोत्तमा (काकुत्=सुशिक्षिता वाक्) ६ ४१ २ **वरिष्ठाम्**=अतिशयेन वरा गतिम् ११ १२ [वरिष्ठमिति व्याख्यातम्। तत स्त्रिया टाप्। इय (पृथिवी) वै वरिष्ठा सवत्। श० ६ ३ २ २]

वरीमन् अतिशयेन वरे (सुखे) ६ ६३ ३ [वृञ् वरणे (स्वा०) धातोर्बाहु० औणा० ईमनिन्]

वरीमभिः वृण्वन्ति ये तैः शिल्पिभि १ ५५ २ स्वीकर्त्तुमर्हैं (गुणैः) १ १५९ २. वरणीयै (ऐश्वर्यै) १ १३१ १ [वृञ् वरणे (स्वा०) धातोर्बाहु० औणा० ईमनिन्]

वरीयसी अतिशयेन वरा (गातु =भूमि) १ १३६ २ [वरप्राति० अतिशायन ईयसुन्। तत स्त्रिया ङीप्]

वरीयः अतिशयेन वरणीय वरम् (स्योन=सुखम्) २९ २९ अत्युत्तम धनादिकम् ५ ४९ ५ अतिशयित बह्वैश्वर्य्यम् १७ ४९ अतिशयेन बहु (अन्तरिक्षम्= आकाशम्) २ १२ २ [वरप्राति० अतिशायन ईयसुन्। बहु-वाचिन उरुशब्दाद्वातिशायन ईयसुन्। प्राति० वरादेश। वरीयः वरतरम् उरुतर वा नि० ८ ९]

वरीवर्त्ति समन्ताद् भृशमावृणोति समन्ताद्वर्त्तते वा ३७ १७ [वृञ् वरणे (स्वा०) धातोर्यङ्लुगन्ताल्लट्]

वरीवृजत् भृश वर्जय ७ २४ ४ [वृजी वर्जने (अदा०) धातो शतरि 'दाधर्त्तिदर्धर्त्ति०' अ० ७ ४ ६५ सूत्रेण श्लौ रीगागमोऽभ्यासस्य निपात्यते]

वरुण सर्वोत्कृष्ट जगदीश्वर १ ५० ६ शत्रुच्छेदक उत्कृष्टमेनापते १० १६. वरतम (राजन्) २.२७ १० प्रशस्त (राजन्) ६ २२ न्यायकारिन् (राजन्) ६.२२ उत्तमकर्मकारिन् (मित्र) ५ ६९ २ उदान इवोत्तम विद्वन् (जन) ३३ ४६ अतिश्रेष्ठ (विद्वज्जन) ३३ ४८ अत्युत्तम (अ०—विद्वज्जन) २१ २. वायुरिव वर्त्तमान (सत्पुरुष) २ २८ ७ शत्रूणा बन्धक (भा०—धार्मिक जन) १२ १२ वरप्रापक (विद्वज्जन) २० १८ श्रेष्ठ सचिव ४ ४१ ६

वरुणम्=बहि स्थ प्राण शरीरस्थमपान वा १ २ ७ ऊर्ध्वगमनबलहेतुमुदान वायुम् १ २३ ४ ईप्सितव्यम् (अर्यमण=न्यायेशम्) ६ ५१ ३ जलमिव शान्त्यादिगुणम् (राजपुरुषम्) ४ ३९ ४ श्रेष्ठगुणम् (मित्र=सखायम्) ४ २ ४ क्रियाहेतुमुदान वरगुणयुक्त विद्वास वा १ १०६ १

वरुणयोः=उदान इव वर्त्तमानयो (अध्यापकाध्येत्रो) ६ ५१ १ **वरुणस्य**=वायोर्जलस्य वा, प्र०—वरुण इति पदनामसु पठितम् निघ० ५ ४. अनेन प्राप्तिसाधनो गृह्यते

वृनम् श० ६ ५ ४ ६]

वरूथम् गृहम् ७ ३० ४ स्वीकर्त्तुमर्हम् (पदार्थम्) ११८९ ६ प्रशस्त गृहम् ७ ३२ ७ वरणीयमुत्तमम् (कर्म्म) १ ११६ ११ वर श्रेष्ठम् (भेपज =रोगनाशक-व्यवहारम्) प्र०—अत्र 'जॄवृभ्यामूथन्' उ० २.६ अनेन वृञ्-धातोरूथन् प्रत्यय १ २३ २१ वर्त्तुमर्ह गृहम् ५ ३५ [वृञ् वरणे (स्वा०) धातो 'जॄवृञ्भ्यामूथन्' उ० २ ६ सूत्रेण ऊथन्। वरूथम्=गृहनाम निघ० ३ ४]

वरूथिने प्रशस्तानि वरूथानि गृहाणि विद्यन्ते यस्य तस्मै (जनाय) १६ ३५ [वरूथप्राति० प्रशसाया मत्वर्थे इनि । ततश्चतुर्थी । वरूथमिति व्याख्यातम्]

वरूथ्यम् वरूथे गृहे भवम् (छर्दि) ६ ६७ २ गृहेषु साधु (शर्म =गृहम्) ५ ४६ ५ [वरूथमिति व्याख्यातम् । ततो भवार्थे साध्वर्थे वा यत्]

वरूथ्य उत्तमेषु गृहेषु भव (राजा) ५ २४ १२ वर (विद्वान्) १५ ४८ यो वरूथ्येषु श्रेष्ठेषु गुणकर्मस्वभावेषु भव. (अग्नि =सर्वाभिरक्षकेश्वर:) ३ २५ वरूथ्येषु गृहेषु साधु (अग्नि =वेदविदध्यापकोपदेशक) २५ ४७ [पूर्वपदे व्याख्यातम्]

वरेण्यम् अतिश्रेष्ठम् (भर्ग =सकलदोषनाशक परमात्मस्वरूपम्) प्र०—अत्र 'वृञ एण्य' उ० ३ ९८ अनेन वृञ्-धातोरेण्य प्रत्यय ३ ३५ वर्त्तुमर्हमत्युत्तमम् (भर्ग शुद्धस्वरूपम्) ३० २ स्वीकर्त्तव्यम् (भर्ग =सर्वदु खप्रणाशक तेज स्वरूपम्) ३६ ३ अतिशयेन वर्त्तव्यम् (गृहपतिम्) ५ ८ १ सर्वेभ्य उत्कृष्ट प्राप्तु योग्यम् (भर्ग =दु खमूल-भर्जक-परमात्मस्वरूपम्) ३ ६२ १० स्वीकर्त्तुमर्हम् (वसु= द्रव्यम्) ६ १६ ३३ प्रशस्तगुणकर्मस्वभावकारकम् (रयिम्) १.७९ ८ स्वीकार करने योग्य, अतिश्रेष्ठ (भर्ग =शुद्धस्वरूप) स० प्र० ५१, ३६ ३ अतीवोत्तमम् (अव =रक्षणादिक कर्म्म) ५ ३५ ३ यद्वर वर्त्तुमर्हमतिश्रेष्ठम् (भर्ग = परमात्मस्वरूपम्) प० वि० । वरितु स्वीकर्त्तुमर्हम् (सुत= पुत्र विद्यार्थिन वा) ३ १२ १ स्वीकर्त्तु भोक्तुमर्हम् (सोम= महौषधिविशिष्टमन्नम्) ३ ४० ५. वरीतुमर्ह श्रेष्ठम् (शेव= सुखस्वरूप जीवम्) १ ५८ ६ अतिश्रेष्ठ, ग्रहण और ध्यान करने योग्य (भर्ग =परमात्मस्वरूप) स० वि० ७५, ३६ ३ **वरेण्य:**=वर्त्तु स्वीकर्त्तुमर्ह (अोपविसार) १ १७५ २ वरणीयो जन २१ १२ वरितुमर्होऽतिश्रेष्ठ (विद्वज्जन) ३ २७ ६ सर्वत उत्कृष्टतम (परमेश्वर) १.२५ ३ स्वीकर्त्तु योग्य (विश्पति =सभापती राजा) १ २६ ७. [वृञ् वरणे (स्वा०) धातो 'वृञ एण्य' उ० ३ ९८ सूत्रेण एण्य. वरेण्य =वरणीय नि० १२.१३. अग्निर्वै वरेण्यम् जै० उ० ४ २८ १ आपो वै वरेण्यम् जै० उ० ४ २८ १ चन्द्रमा वै वरेण्यम् जै० उ० ४ २८ १]

वर्क् वर्जयसि, प्र०—अत्र 'मन्त्रे घसह्वर०' इति च्लेर्लुक् १ ६३ ७ छिनत्सि ६ २६ ३ **वर्क्तम्**=त्यजेताम् ६ ५९ ७. त्यजतम् १ १८३ ४ [वृजी वर्जने (अदा०) धातोर्लुङि 'मन्त्रे घसह्वर०' अ० २ ४ ८० सूत्रेण च्लेर्लुक् । अडभावश्छान्दस]

वर्चसा वर्चन्ते दीप्यन्ते सर्वे पदार्था यस्मिन् वेदाध्ययने तेन २ २४ तेजसा ८ १६ प्रकाशेन ३५ ३ विद्यादीप्त्या १३ ४०. साङ्गोपाङ्गवेदाध्ययनेन २० २२ अन्नाऽध्ययनादिना १२.७ **वर्चसे**=अध्यापनाय २६ ९ स्वप्रकाशाय वेदप्रवर्त्तकाय (अग्नये=विज्ञानमयाय न्यायव्यवहाराय) ८ ३८ निजात्मप्रकाशाय, योगबलप्रकाशाय, सद्गुणप्रकाशाय, रोगाऽपहारकायौषधाय ७ २८ शब्दार्थसम्बन्धविज्ञानाय, शुद्धसिद्धान्तप्रकाशाय, प्रागल्भ्याय, अध्ययनदीप्त्यै, पराक्रमाय, अन्नाय ७ २७ **वर्च:**=वर्चन्ते दीप्यन्तेऽनेन तद्वर्चो विद्याप्रापणम्, अ०—वेदचतुष्टयम्, विद्याव्यवहारप्रापकम्, अ०—शरीरात्मबलम्, प्रकाशक विद्युत्सूर्यप्रसिद्धाग्न्याख्य तेज ३ ९ अध्यापनतेज ३ ८ ३ अन्नम् ३ २४ १ विद्याप्राप्ति दीप्ति वा ३ १७ विज्ञान तेजो वा ४ १७ विज्ञानप्रकाश १२ ४८ य सर्वविदा ज्योतिषा, ज्ञानवता जीवाना वर्चोऽन्तर्यामितया सत्योपदेष्टा (परमेश्वर), ऋ० भू० २४८, ३ ९ सद्विद्याप्रचार सम्यगध्ययनाऽध्यापनप्रबन्ध कर्म ऋ० भू० १०४, अथर्व० १२ ५ ८ विद्याबलन्यायदीपनम् ९ ३७ पढी हुई विद्या का विचार स० वि० १४४, अथर्व० १२ ५ ८ **वर्चांसि**=प्रकाशमानाऽध्ययनानि ९ २२ [वर्च दीप्तौ (भ्वा०) धातोरौणादिकोऽसुन् । वर्च अन्ननाम निघं० २ ७ सूर्यस्य वर्चसा ता० १ ३ ५ सूर्यस्य वर्चसा (त्वाभिषिञ्चामीति) श० ५ ४ २ २. ततोऽस्मिन् (अग्नौ) एतद् वर्च आस श० ४ ५ ४ ३ वर्च्चो वा ऽएतद् हिरण्यम् श० ३ २ ४ ९ वर्चो वै हिरण्यम् तै० १ ८ ९ १ यद् वै वर्चस्वी कर्म चिकीर्षति शक्नोति वै तत् कर्त्तुम् श० ५.२. ५ १२ वर्चो द्वाविंश (यजु० १४ २३) सवत्सरो वाव वर्चो द्वाविंशस्तस्य द्वादश मासा सप्तर्त्तवो द्वेऽहोरात्रे सवत्सर एव वर्चो द्वाविंशस्तद् य तमाह वर्च इति सवत्सरो हि सर्वेषा भूताना वर्चस्वितम श० ८ ४ १ १६]

वर्चस्यम् वर्चसेऽध्ययनाय हितम् (हिरण्य =तेजोमय

वरुण पर्णानि ऐ० १ २५ यत् पञ्चाद्वासि वरुणो राजा भूतो वासि जै० उ० ३ २१ २ एषा (उत्तरा) वै वरुणस्य दिक् तै० ३ ८ २० ४ यद्वै यज्ञस्य दुरिष्ट तद्वरुणो गृह्णाति तां० १३ २ ४ यद्वस्य (ईजानस्य) दुरिष्ट भवति वरुणो ऽस्य तद् गृह्णाति श० ४ ५ १.६ वरुणेन (यज्ञस्य) दुरिष्ट (शमयति) तै० १ २ ५ ३ वरुण (यज्ञस्य) स्विष्टम् (पाति) ऐ० ३ ३८ सत्यानृते वरुण तै० १ ७ १०.४ अनृते खलु वै क्रियमाणे वरुणो गृह्णाति तै० १ ७ २ ६ वरुणो वा एत गृह्णाति य पाप्मना गृहीतो भवति श० १२ ७ २ १७ वरुण धर्मणा पते तै० ३ ११ ४ १ वरुण (एवैन) धर्मपत्तीना (सुवते) तै० १ ७ ४ २ वरुणो वा ऽआर्पयिता श० श० ५ ५ ४.३१ सवो वै देवाना वरुण श० ५ ३ १ ५ वरुणो ऽन्नपति श० १२ ७ २ २० वरुण सम्राट् सम्राट्पति तै० २ ५ ७ ३ श० ११ ४ ३ १० वरुणो वै देवाना राजा श० १२ ८ ३ १० विराड् वरुणस्य पत्नी गो० उ० २ ९ अथ यदप्सु वरुण यजति स्व एवैन तदायतने प्रीणाति कौ० ५ ४ अप्सु वै वरुण तै० १ ६ ५ ६ वरुण्यो वा अवभृथ श० ४ ४ ५ १० वरुण्या वाऽएता आपो भवन्ति या स्यन्दमानाना न स्यन्दन्ते श० ५ ३ ४ १२. वरुणस्य वा अभिषिच्यमानस्याप इन्द्रिय वीर्य निरघ्नन्। तत् सुवर्णं हिरण्यमभवत् तै० १ ८ ६.१ वरुण्यो वै ग्रन्थि श० १ ३ १ १६ वरुण्यो हि ग्रन्थि श० ५ २ २ १७ वरुण्या वा ऽएषा यद्रज्जु श० ३ २ ४ १८ वरुण्या वै यज्ञे रज्जु श० ६ ४ ३ ८ वरुण्या रज्जु श० १ ३ १ १४ वारुणो वै पाश तै० ३ ३ १० १ श० ६ ७.३ ८ वारुणम् एककपाल पुरोडाशो भवति श० ४ ४ ५ १५ वारुणो दशकपाल (पुरोडाश) तां० २१.१० २३ तद्धि वारुण यत्कृष्ण (वास) श० ५ २ ५ १७. वरुणस्य सायम् (काल) आमवोऽपान तै० १ ५ ३ १ खलतेर्विक्लिधस्य शुक्लस्य पिङ्गाक्षस्य मूर्द्धन् जुहोति। एतद्वै वरुणस्य रूपम् तै० ३ ९ १५ ३. वारुणो वा अश्व तै० २ २ ५ ३ (प्रजापति) वारुणमश्वम् (आलिप्सत) श० ६ २ १ ५ स हि वारुणो यदश्व श० ५ ३ १.५ एष वै प्रत्यक्ष वरुणस्य पशुर्यन्मेष श० २ ५.२.१६. वारुणी च हि त्वाष्ट्री चावि श० ७ ५ २.२० यज्ञो वै वैष्णुवारुण कौ० १६ ८ वरुणसवो वा ऽएप यद् राजसूयम् श० ५ ३ ४.१२ यो राजसूय स वरुणसव तै० २ ७ ६ १ मैत्रो वै दक्षिण वारुण सव्य तै० १ ७ १० वरुण्या वा ऽएता ओपधयो या कृष्टे जायन्ते श० ५ ३ ३ ८ वरुण्या वा ऽएषा (शाखा) या परशुवृक्णाथैषा मैत्री (शाखा) या स्वयम्प्रशीर्णा श० ५ ३ २ ५ वरुण्य वा ऽएतद् यन् मथितम् (आज्यम्) अथैतन् मैत्र यत् स्वयमुदितम् श० ५ ३ २ ६]

वरुणध्रुतः वरुणेन ध्रुत स्थिरीकृत (अर्यमा=न्यायाधीश) ७ ६० ९ [वरुण-ध्रुतपदयो समास। ध्रुत = ध्रु गतिस्थैर्ययो (तुदा०) धातो क्त]

वरुणमिव पार्श्वैर्न्वक व्याघ्रमिव ६.४८ १४ प्राणोदानाविव वर्त्तमानौ राजाऽमात्यौ ५ ६२ ८ [वरुणम्-इवपदयो समास]

वरुणशेषसः वरुण उत्तमो जन शेपो येपान्ते (मनुष्या) ५ ६५ ५ [वरुण-शेपपदयो समास]

वरुणा श्रेष्ठौ (होतृयजमानौ) ८ ५९ उत्तमौ (अध्यापकोपदेशकौ) ५ ६४ ६ [वरुण इति व्याख्यातम्। ततो द्विवचनस्याकारादेश]

वरुणानी वरस्य भार्य्या ५ ४६ ८ **वरुणानीम्**=श्रेष्ठस्य स्त्रियम् २ ३२ ८ यथा वरुणस्य जलस्येव शान्तिमाधुर्यादिगुणयुक्ता शक्तिरतथाभूतम् (स्त्रियम्) १ २२ १२ [वरुणप्राति० स्त्रियाम् 'इन्द्रवरुणभव०' अ० ४ १ ४९ सूत्रेण स्त्रिया ङीप् आनुक् च। वरुण इति व्याख्यातम्। वरुणानी वरुणस्य पत्नी नि० १२ ४६]

वरुणानी जलादिपदार्थयुक्ते (रोदसी=द्यावापृथिव्यौ) ७ ३४ २२. [वरुणानीति व्याख्यातम्। ततो द्विवचनस्य पूर्वसवर्णदीर्घश्छान्दस]

वरुण्यात् वरुणेपु वरेपु भवादपराधात्, भा० श्रेष्ठापराधात् १२ ९०. [वरुणप्राति० भवार्थे यत्]

वरूता वरिता स्वीकर्त्ता (इन्द्र=विद्वज्जन), प्र०—'असित०' इत्यादिषु निपात १ १६९ १ श्रेष्ठ (इन्द्र = परमैश्वर्यप्रदो राजा) ६ २५.७ वारयिता (इन्द्र =विद्वज्जन) २ २० २ [वृञ् वरणे (स्वा०) धातो 'असितस्कभित०' अ० ७.२ ३४ सूत्रेण तृच्-प्रत्यय ऊडागमो निपात्यते]

वरूत्री वर्त्तुमर्हा (वरणीया विद्या) ७ ४० ६ वरणीया नीतियुक्ता माता ७ ३८ ५ वरसुखप्रदा (माता) ५ ४१ ५ **वरूत्रीभिः**=वरणीयाभिर्विद्याभि ७ ३४ २२ **वरूत्रीम्**=वरयित्रीम्, भा०—आकर्पणसम्बन्धनीम् (माया=प्रज्ञापिका विद्युतम्) १३ ४४ वरितु स्वीकर्त्तुमर्हाम् (धिषणा=वाचम्) १ २२ १० **वरूत्रीः**=अत्यन्त वरा (श्रीमन्तो विद्वास) ३ ६२ ३ वरा (देवी =कमनीया स्त्रिय) ११.६१ [वृञ् वरणे (स्वा०) धातो कर्त्तरि तृजन्तात् स्त्रिया ङीप्। 'असितस्कभित०' अ० ७ २ ३४. सूत्रेणोडागम। अहोरात्राणि वै वरूत्रयोऽहोरात्रैर्हीद सर्वं

(गरुजन) ५ २६ १४ निवारक (प्रतिरोधिजन.) ४ २० ७ विपरिवर्तयिता (भा०—राजपुरुष), प्र०—अत्र वृणोतेस्तृच् 'छन्दस्युभयथा' इति सार्वधातुकत्वादिडभाव १ ४० ८ [वृतु वर्त्तने (भ्वा०) वृतु वरणे (दिवा०) धातो. कर्त्तरि तृच्। वृणोतेर्वा कर्त्तरि तृच्। 'छन्दस्युभयथे' ति सार्वधातुकत्वाद् इटोऽभाव]

वर्तिका सङ्ग्रामे प्रवर्त्तमाना (सेना) १ ११७ १६ 'वत्तख' इति भाषायाम् २४ ३० **वर्त्तिकाम्**=विनयादि-सहिता नीतिम् १.११८ ८ चटकापक्षिणीम् १ ११६.१४. शकुनि-स्त्रियम् १ ११२.८ **वर्तिकाः**=पक्षिविशेषा २४ २० [वृतु वर्त्तने (भ्वा०) धातो कर्त्तरि ण्वुल्। तत स्त्रिया टापि 'वर्त्तका शकुनौ प्राचामुपसंख्यानम्' अ० ७ ३ ४५ वा०सूत्रेण वेत्वम्]

वर्ति. वर्त्तन्ते व्यवहरन्ति यस्मिन्मार्गे तम्, प्र०—'हृपिषिरुहिवृति०' उ० ४ ११६ इत्यधिकरण इ-प्रत्यय 'सुपा सुलुक्०' इति द्वितीयैकवचनस्य स्थाने सुरादेश १ ३४.४ वर्तन्ते यस्मिन् गमनाऽऽगमनकर्मणि तत् (रय=रमणयानम्) १ ६२ १६ मार्ग ६ ४६ ५ वर्त्तमान (मार्गम्) २० ८१ सन्मार्गम् १ १८४ ५ [वृतु वर्त्तने (भ्वा०) धातो 'हृपिषिरुहिवृति०' उ० ४.११६ सूत्रेणाधिकरण इ]

वर्तोभ्याम् गमनाऽऽगमनाभ्याम् २५ १ [वृतु वर्त्तने (भ्वा०) धातोरौणा० असुन्। ततस्तृतीयाया द्विवचने रूपम्]

वर्त्मानि मार्गान् १ ८५ ३. [वर्त्मन्प्राति० प्रथमाबहुवचनम्। वर्त्मन्=वृतु वर्त्तने (भ्वा०) धातोरौणा० बाहु० मनिन्]

वर्ध वर्धस्व, प्र०—अत्र व्यत्ययेन परस्मैपदम् ६ १८ १ वर्धय ५ ५६ २ **वर्धत्**=वर्धते ५.६२ ५ वर्धयेत् ५ ६२ ५ **वर्धतम्**=वर्धयाम् ४ ५० ११ **वर्धतु**=वर्द्धताम् ४ ५३ ७ **वर्धन्**=वर्धयन्तु ६ ५१ ११ **वर्धन्त**=वर्धन्ते ५.१६ ३. **वर्धन्ति**=वर्धन्ते ५ ३६ ५ वर्धयन्ति ६ १ ५ **वर्धन्तु**=वर्धयन्तु, प्र०—अत्र व्यत्ययेन परस्मैपद णिजर्थोऽन्तर्गत ३ १० ६ वर्धन्ताम् ३ ५२ ८ [वृधु वृद्धौ (भ्वा०) धातोर्लोट्। व्यत्ययेन परस्मैपदम्। अन्यत्र लेट्, लोट्, लङ्, लट् च। वर्धन्तु वर्धयन्तु नि० १ ११]

वर्धत. यो गुणैर्दोषैर्वा वर्धते तस्य (वृद्धस्य सज्जनस्य) १ ५१ ६ [वृधु वृद्धौ (भ्वा०) धातो शतृ। तत षष्ठ्या एकवचनम्]

वर्धनम् विद्यादिगुणाना वर्धकम् (उक्थ=स्तोत्रम्) १ १० ५ येन वर्धयन्ति तत् (सुखोन्नयनम्) १ ८० १ वर्धते येन तत् (ब्रह्म=धनम्) ६ २३ ५ वृद्धिकरम् (वच=वचनम्) १ ११४ ६ वर्द्धयितारम् (शिशु=बालकम्) १ १४० ३ सब का ज्ञान बढाने वाले (ईश्वर) को स० प्र० २३८, १०.४६ १. **वर्धनः**=उन्नेता (यज्ञ=सङ्गतो ससार) ३ ३२ १२ **वर्धनेन**=वृद्धिनिमित्तेन न्यायेन सह ८.४६ [वृधु वृद्धौ (भ्वा०) धातो 'नन्दिग्रहिपचादिभ्य०' अ० ३ १ १३४ सूत्रेण ल्यु। करणे ल्युट् वा। 'अनुदात्तेतश्च हलादे' अ० ३ २ १४९ सूत्रेण वा तच्छीलादिषु युच्]

वर्धना सुखाना वर्द्धनानि १.५२ ७. यानि वर्धन्ते तानि (ब्रह्माणि=धनान्यन्नानि वा) ५ ७३ १० उन्नतिकराणि कर्माणि ७ २२.७ [वर्धन इति व्याख्यातम् तत प्रथमाबहुवचने शेर्लोप]

वर्धनानि वृद्धिकराणि (ब्रह्माणि=धनानि) ६ २३ ६ [वृधु वृद्धौ (भ्वा०) धातोर्ल्युट् करणे]

वर्धनेभिः वर्धकै साधनै ३ ३६ १ [वृधु वृद्धौ (भ्वा०) धातोर्ल्युट्। वर्धनप्राति० 'बहुल छन्दसी' ति भिस ऐस् न भवति]

वर्धमानम् हानिरहितम् (जगदीश्वर भौतिकमग्नि वा) ३ २३ ह्रासरहितम् (अग्नि=परमेश्वरम्) ११ ८ अत्यन्त वृद्धिमन्तम् (अग्नि=परमेश्वरम्) वे० भा० न० **वर्धमानः**=यो वर्धते स (जीव.) ६ ६ ४ सर्वथोत्कृष्ट (ईश्वर) १३ २ यो विद्यया क्रियाकौशलेन नित्य वर्धते स (विद्वज्जन) ११.२६ [वृधु वृद्धौ (भ्वा०) धातो शानच्]

वर्धमानाः वृद्धिशीला (सत्स्त्रिय) ३ ३८ २ [वर्धमानमिति व्याख्यातम्। ताच्छील्ये चानश् वा]

वर्धय उन्नय १ १२५ ३ सर्वोत्कृष्टता सम्पादय सम्पादयति वा, अ०—वर्द्धयति ३ १४ उत्कृष्ट सम्पादय ११०४ **वर्धयन्ति**=उन्नयन्ति १ ५४ ८ **वर्धयन्तु**=बढाया करो स० वि० १२२, अथर्व० १४.१ ५४ **वर्धयाति**=वर्द्धयेत् १८ ३४ [वृधु वृद्धौ (भ्वा०) धातोर्णिजन्ताल् लोट्। अन्यत्र लट् लेट् चापि]

वर्धयन् उन्नयन् (सोम=सखा) ३ ६२ १५ [वृधु वृद्धौ (भ्वा०) धातोर्णिजन्ताच्छतृ]

वर्धयन्तीः उन्नयन्त्य (कुमार्य्य) १ ७१ ३ [वृधु वृद्धौ (भ्वा०) धातोर्णिजन्ताच्छतृ। तत स्त्रिया ङीप्]

वर्धयमानः विद्यासुशिक्षयोन्नयमान (जन) १ १२५ १

सुवर्णम्) ३४ ५० [वर्चस्प्राति० हितार्थे यत्]

वर्चस्वत् प्रशस्तानि वर्चांस्यन्नानि यस्मात्तत् (हिरण्य=तेजोमय सुवर्णम्) ३४ ५० [वर्चस्प्राति० प्रशसाया मत्वर्थे मतुप्। मतुप्सूत्र 'इतिकरणस्ततश्चेद् विवक्षा' इति नियमेन पञ्चम्यर्थेऽपि मतुप्]

वर्चस्वान् विद्याविज्ञानवान् (विद्वज्जन.) १३ ४० सर्वविद्याऽध्ययनयुक्त (सभापती राजा) प्रशस्तविद्याध्ययन (प्रजासभासेनाजन) ८ ३८ [वर्चस्प्राति० प्रशसाया भूम्न्यर्थे वा मतुप्]

वर्चस्विन् बहु वर्चोऽध्ययन विद्यते यस्मिन् तत्सम्बुद्धौ (अग्ने=तेजोमय सभापते) ८ ३८. [वर्चस्-प्राति० भूम्न्यर्थे (मत्वर्थे) 'अस्मायामेधास्रजो विनि' अ० ५ २ १२१ सूत्रेण विनि]

वर्चिनम् देदीप्यमानम् (शम्बर=मेघम्) ६.४७ २१. **वर्चिनः**=बह्वधीतस्य (दासस्य=सेवकस्य) ४ ३० १५ प्रदीप्तस्य (सर्ववलस्य राज्ञ) २ १४ ६ [वर्च दीप्तौ (भ्वा०) धातोस्ताच्छील्ये णिनि]

वर्चोदसौ सूर्याचन्द्रमसाविवाऽतिथ्याध्यापकौ ७ २७ न्यायप्रकाशकौ सर्वाधिष्ठातारौ सभापतिन्यायाधीशाविव योगाऽऽरुढ-योगजिज्ञासू ७ २८ **वर्चोदाः**=योगब्रह्मविद्याप्रद, विद्याप्रद, वर्चो वल ददातीति तत्सम्बुद्धौ भा०—पूर्णविद्य (अ०—विद्वज्जन) ७ २८ दीप्ति ददातीति (सूर्य) ४ ३. सकलविद्याध्ययनप्रदा (हेतय =शस्त्रास्त्रोन्नतय) १७ १५ यो वर्चो विज्ञान ददातीति, तत्प्राप्तिहेतुर्वा (अग्नि =सर्वविद्यामयेश्वरो विद्याहेतुर्भौतिकोऽग्निर्वा) ३ १७ वर्चो विद्या दीप्ति वा ददातीति, भा०—प्रकाशहेतुर्विद्याप्रदो वा (सूर्य =जगदीश्वरो विद्वान् जीवो वा) २ २६ यथायोग्य प्रकाश ददाति तत्सम्बुद्धौ, दीप्तिप्रदो जाठराग्निरिव, वर्चो विद्यावल ददातीति, सत्यवक्तृत्वप्रद, तज्ज्ञानद, विज्ञानप्रद (अध्येताऽध्यापको वा) ७ २७ विद्यादि तेज अर्थात् विज्ञान देने वाला (ईश्वर) आर्याभि० २.३३, ३ १७ [वर्चस् इत्युपपदे डुदाञ् दाने (जु०) धातोरौणा० असुन्]

वर्चोधाम् या वर्चो विद्या दीप्ति दधाति ताम् (धियम्) ४ ११ [वर्चस् इत्युपपदे डुधाञ् धारणपोषणयो (जु०) धातो क । तत स्त्रिया टाप्]

वर्णम् रूपम् २ १२ ४ स्वीकर्त्तव्यम् (आर्य= धार्मिक जनम्) ३ ३४ ६ आज्ञापालन-स्वीकरणम् १.१०४ २ स्वीकर्त्तुमर्हमतिसुन्दरम् (रूपम्) ४.२ स्वीकरणीयम् (इद=जलम्) २ ५ ५ स्वीकारम् ३ ३४ ५ चक्षुर्विषयम् (वस्तुस्वरूपम्) १ ७३ ७. स्वस्वरूपम् १ ११३ २ **वर्णः**=वरीतु योग्य (सूर्य-प्रकाश) ४.२६ **वर्णाय**= स्वीकरणाय ३० ६. सुरूपसम्पादनाय ३० १७ **वर्णे**= शुक्लादिगुणे २.१ १२ **वर्णेन**=तेजसा ४ ५ १३. **वर्णौ**=परस्परेण व्रियमाणौ सुन्दरस्वरूपौ (स्त्रीपुरुषौ) १.१७२ ६. [वृञ् वरणे (स्वा०) धातो 'कृवृजृ०' उ० ३ १०. सूत्रेण न प्रत्यय । वर्ण वृणोते नि० २ ३ चत्वारो वै वर्णा । ब्राह्मणो राजन्यो वैश्य शूद्र श० ५ ५ ४ ६]

वर्त वर्त्तते १.१०५ १४. **वर्तस्व**=वर्तस्व वर्त्तते वा १२.१०३. **वर्ते**=वर्त्तमानो भवेयम् २ २७ [वृतु वर्त्तने (भ्वा०) धातोर्लोट् । पुरुषव्यत्यय । परस्मैपदञ्च व्यत्ययेन। अन्यत्र लोट् लट् च]

वर्तनिम् वर्त्तन्ते यस्मिँस्त मार्गम् ३ ७ २ स्वकीयमार्गम् ऋ० भू० १३८, ऋ० ८.२ १० १ वर्त्तन्ते यस्मिँस्त न्यायमार्गम् ७ १८ १६ **वर्तनिः**=वर्त्तमान (श्येनी) १ १४० ६. [वृतु वर्त्तने (भ्वा०) धातोरधिकरणे 'वृतेश्च' उ० २.१०६. सूत्रेणानि]

वर्तनी गमनागमनसत्क्रिया १ ५३ ८ वर्त्तते यया क्रियया सा १ ५३ ८ **वर्तनीम्**=मार्गम् ५ ६१ ६ **वर्तनीः**=मार्गान् ४ १६ २ [वृतु वर्त्तने (भ्वा०) धातो करणे ल्युट् । ततो ङीप् स्त्रियाम्]

वर्तम् वर्त्तयतम् ६ ६२ ११ **वर्तयतु**=प्रवृत्त कारयतु ४ २०. **वर्तयथ**=निष्पादयथ १ ३६ ३ **वर्तया**=दूरीकुरु २ २३ ७ **वर्तयाते**=वर्तयेत, प्र०—प्रथमैकवचनस्य आडागमे णिजन्तस्य वर्ते प्रयोग. ५ ३७ ३ **वर्तयासि**=वर्तये २३.७. [वृतु वर्त्तने (भ्वा०) धातोर्णिजन्ताल् लोट् । 'छन्दस्युभयथेति' आर्धधातुकत्वान् णेर्लोप । अन्यत्र लट् लेट् च]

वर्तमानः वर्ततेऽसौ वर्त्तमान (पदार्थ) १ ३५ २. [वृतु वर्त्तने (भ्वा०) धातो शानच्]

वर्तयध्यै वर्तयितुम् ५ ४३ २ [वृतु वर्त्तने (भ्वा०) धातोर्णिजन्तात् तुमर्थेऽध्यै प्रत्यय]

वर्तयामसि प्रवर्तयाम १८ ६८ [वृतु वर्त्तने (भ्वा०) धातोर्णिजन्ताल्लट् । 'इदन्तो मसि' रिति मस इदन्तता]

वर्तवे वरितु स्वीकर्त्तुम् ३.३३ ४ [वृञ् वरणे (स्वा०) धातोस्तुमर्थे तवेन् प्रत्यय.]

वर्ता वर्तयिता (असाधुजन) ६.६६ ८. स्वीकर्त्ता

[वर्षोपपदे ह्वेञ् स्पर्धाया शब्दे च (भ्वा०) धातो क्विप्]

वर्षिमा वृद्धस्य भाव १८४ [वृद्धप्राति० भाव इमनिच् प्रत्यये 'प्रियस्थिर०' अ० ६ ४ १५७ सूत्रेण वर्षिरादेश]

वर्षिष्ठम् अतिशयेन वृद्धम् (ऋत=सत्य कारणम्) ३ ५६ २ वृद्धिकारकम् (रयिं=धनम्), प्र०—अत्र वृद्ध-शब्दादिष्ठन् वर्षिरादेशश्च १८१ **वर्षिष्ठाय**=अति-वृद्धाय श्रेष्ठाय (नाकाय=अविद्यमानदुःखाय मोक्षाय) ३०.१२ अतिशयेन वृष्टिकराय (विदुषे जनाय) ५ ७ १. **वर्षिष्ठे**=अतिशयेन वृद्धो वर्षिष्ठस्तस्मिन् विशाले सुख-स्वरूपे (नाके=मोक्षे) १ २२ [वृद्धप्राति० अतिशायन इष्ठन्-प्रत्यये 'प्रियस्थिर०' अ० ६ ४ १५७ सूत्रेण वर्षि-रादेश.। वृषु सेचने (भ्वा०) धातोर्वा तृजन्ताद् इष्ठन्प्रत्यये तृचो लोप]

वर्षिष्ठया अतिशयेन वृद्धया (इषा=उत्तमान्नादि-समूहेन) १८८१. **वर्षिष्ठा**=अतिशयेन वृद्धा (तनू) ५.८ [वर्षिष्ठमिति व्याख्यातम्। तत स्त्रिया टाप्]

वर्षिष्ठा अतिशयेन वृद्धानि (नृम्णानि=धनानि) ४ २२ ६ [वर्षिष्ठप्राति० प्रथमावहुवचने शेर्लोपश्छन्दसि]

वर्षीयसि सर्वसुखमभिवर्षति (यज्ञे) ६ ११ **वर्षीयसे**=अतिशयेन विद्यावृद्धाय (विदुषे जनाय) १६ ३० **वर्षीयान्**=अतिशयेन वृद्धो महान् (इन्द्र=सूर्य) २३ ४८ [वृद्धप्राति० अतिशायन ईयसुन्प्रत्यये 'प्रिय-स्थिर०' अ० ६ ४ १५७ सूत्रेण वर्षिरादेश]

वर्षीयः अतिशयेन श्रेष्ठम् (वय=कमनीयमायु) ६ ४४ ६ वृद्धम् (इन्द्र=सूर्य) २३ ४७. [वृद्धप्राति० अतिशायन ईयसुन्प्रत्यये 'प्रियस्थिर०' इति वर्षिरादेश]

वर्षः यज्ञकर्मणा सर्वसुखसेचक (यजमान वातो वा) ६ ११. [वृषु सेचने (भ्वा०) धातोरौणा० असुन्]

वर्ष्मन् यो वर्षति तत्सम्बुद्धौ (विद्वज्जन) ४ ५४ ४ सद्गुणाना सेचक (पुरुषार्थिजन) ३ ८ ३ **वर्ष्माणम्**= वर्षकम् (सूर्यकिरणसमूहम्) ६ ४७ ४ वर्ष के मेघमण्डले २८ १ सेचने ३ ५ ६ सुखवृष्टिनिमित्ते (अ०—जगति) ५.१७ [वृषु सेचने (भ्वा०) धातो कर्त्तरि मनिन्]

वर्ष्यम् वर्षासु भवम् (नभ=अन्तरिक्षम्) ५ ८३ ३ **वर्ष्यान्**=वर्षासु साधून् (मेघान्) ५ ८३.३ [वर्षाप्राति० भवार्थे यत्]

वर्हि उत्सन्नाऽभूत् ३ ५३ १७]

वलम् वक्रगतिम् ४ ५० ५ मेघम् ६ १८ ५ वलयुक्तम् (मेघम्) १ ६२ ४ वलम् २ १४ ३. **वलस्य**=वलवत. शत्रो १ ५२ ५ **वलः**=वल, वलवान् (इन्द्र=विद्वज्जन) ३ ३० १० [वल मेघनाम निघ० १.१०. वलम्=वृञ् वरणे (स्वा०) धातो कर्त्तर्यच्। छान्दस लत्वम्। वलो वृणोते नि० ६ २]

वलंरुजः यो वल मेघ रुजति स (इन्द्र=सूर्य) ३.४५ २ [वलोपपदे रुजो भङ्गे (तुदा०) धातोश्छान्दस खश्]

वल्गते गच्छते (जनाय) २२ ७ [वल्ग् गत्यर्थे (भ्वा०) धातो शतृ]

वल्गू अत्युत्तमौ (वायुविद्युतौ) ६.६२ ५ शोभनवाचौ (सभासेनेशौ), प्र०—वल्गु इति वाङ्नाम निघ० १.११, ६.६३.१ [वल सवरणे सञ्चरणे च (भ्वा०) धातो 'वलेर्गुक्' च उ० १.१६ सूत्रेण उ । गुणागमश्च। वल्गु वाङ्नाम निघ० १.११.]

वल्गूयति सत्करोति ४ ५० ७ [वल्गूयति गतिकर्मा निघ २ १४ अर्चतिकर्मा निघ० ३ १४]

वल्मीकान् मार्गान् २५ ८. [वल सवरणे सञ्चरणे च (भ्वा०) धातो: 'अलीकादयश्च' उ० ४ २५ सूत्रेण कीकन्। वहुलवचनात् मुडागमश्च। श्रोत्र ह्येतत् पृथिव्या यद् वल्मीक तै० ११३४ ऊर्ज वा एत रस पृथिव्या उपदीका उद्दि-हन्ति यद् वल्मीकम् तै० ११३.४ प्राजापत्यो वै वल्मीक । तै० ३ ७ २ १ सर्पाणा वल्मीको गृहा मै० ४ १.१३.]

वल्हामसि प्रधाना भवाम भा०—प्रधानपुरुषा भवेम २३ ५१ [वल्ह प्राधान्ये (भ्वा०) धातोर्लट्। व्यत्य-येन परस्मैपदम्]

ववक्ष वहतु, प्र०—अत्र वर्त्तमाने लिटि 'वाच्छन्दसि' इति सुडागम ३ ७ ६ वहति ४.७ ११. **ववक्षिथ**= वोढु प्राप्तुमिच्छथ २ २४ ११. वोढुमिच्छ ३ ६ ३ वहति, प्र०—अत्र पुरुषव्यत्यय २ २२ ३. वोढुमिच्छसि, प्र०— अत्र लडर्थे लिट्, सन्नन्तस्य वहधातोरय प्रयोग 'वहुल छन्दसि' इत्यनेनाऽभ्यासस्येत्त्वाऽभाव ११०२८ **वव-क्षिरे**=रुष्टा स्यु २ ३४ ४ **ववक्षे**=रुष इव विरुध्यति ३ ५ ८ वक्षति रोष सङ्घात करोति १ ६१.६ सहन्ति, प्र०— अय वक्ष सङ्घाते इत्यस्य प्रयोग ११४६ २ वहति ७८ २ **ववक्षुः**=वक्षयन्ति रोपयन्ति १ ६४ ३. [वह प्रापणे (भ्वा०) धातोर्लिटि छान्दस सुट्। अथवा वक्ष रोपे सघाते च (भ्वा०) धातोर्लिट्। ववक्षिथ महन्नाम निघ० ३ ३ ववक्षे प्रब्रूपे नि० ५ ८]

[वृधु वृद्धौ (भ्वा०) धातोर्णिजन्ताच्छानच्]

वर्धयामसि वर्द्धयाम, अ०—प्रदीपयाम, प्र०—अत्र 'इदन्तो मसि' इनीकारादेश ३.३ [वृधु वृद्धौ (भ्वा०) धातोर्णिजन्ताल्लट् 'इदन्तो मसि' इति मस इदन्तत्वम्]

वर्धसे शमादिषु स्वात्मानमुन्नयसि ७ १२ **वर्धस्व**=वर्धस्व वर्धते वा, अ०—वर्धय, प्र०—अत्राऽन्त्यपक्षे व्यत्ययो लडर्थे लोट् च २ १४ **वर्धान्**=वर्द्धयेत् ६ ३८ ४ **वर्धान्**=वर्धयेयु, प्र०—अत्र व्यत्ययेन परस्मैपदम् १ ७० ४ वर्धयेरन् ६ ३८ ४ **वर्धासे**=वर्धसे ६ १६ १६ वृद्धो भव २६ १३ **वर्धिषीमहि**=पूर्णां वृद्धिं प्राप्नुयाम ३८ २१. [वृधु वृद्धौ (भ्वा०) धातोर्लेट्। अन्यत्र लोट्, लेट्, लङ्, लिङ् च]

वर्धः यो वर्धयति तत्सम्बुद्धौ (अग्ने=विज्ञानप्रद जन) १ ७१ ६. [वृधु वृद्धौ (भ्वा०) धातोरौणा० असुन्]

वर्पणीतिः वर्पस्य रूपस्य नीतिर्नायक (इन्द्र=राजा), प्र०—अत्र नीतौ कर्त्तरि क्तिच् ३ ३४ ३ वर्पाणि नानाविधाना रूपाणि नीति प्राप्तिर्यस्य स (सभेशो राजा) ३३.२६ [वर्प-नीतिपदयो समास। वर्प रूपनाम निघ० ३ ७ नीति=णीञ् प्रापणे (भ्वा०) धातो क्तिन् कर्त्तरि क्तिच् वा]

वर्पसः रूपस्य, प्र०—वर्प इति रूपनाम निघ० ३ ७, १ १४१ ३ **वर्पः**=रूपयुक्त (राजसेनाधीशरथ.) ३ ५८.६ रूपम् १ १४० ५ **वर्पांसि**=सुन्दराणि रूपाणि ६ ४४ १४ [वृङ् सम्भक्तौ (क्र्या०) धातो 'वृङ्शीङ्भ्या रूपस्वाङ्गयो पुट् च' उ० ४ २०१ सूत्रेणासुन्। वर्प इति रूपनाम वृणोतीति सत नि० ५ ८.]

वर्म कवचम् २६ ४५ रक्षकम् (कवचम्) १८ ३ सर्वतो रक्षणम् ११ ३० वर्म इव रक्षकम् (ईश्वरम्) ६ ७५ १६ [वर्म गृहनाम निघ० ३ ४ वृञ् वरणे (स्वा०) धातोर्मनिन्]

वर्मिणः कवचिन (वीरराजपुरुषा) ६ २७ ६ **वर्मिणे**=बहूनि वर्माणि शरीररक्षासाधनानि विद्यन्ते यस्य तस्मै (पुरुषाय) १६ ३५ **वर्मी**=कवचवान् (योद्धृजन) २६.३८ कवचधारी (सैनिक) ६ ७५ १ [वर्मन्-प्राति० मत्वर्थे इनिश्छान्दस]

वर्मेव कवचमिव १ १४१ १० [वर्मन्=इवपदयो समास]

वर्वर्त्ति भृश वर्तते १ १६४ ११ [वृतु वर्त्तने (भ्वा०) धातोर्यङ्लुगन्तात्लट्]

वर्वृतति भृश गच्छति ६ ४६ १४ [वृतु वर्त्तने (भ्वा०) धातोर्यङ्लुगन्तात् लट्। व्यत्ययेन श]

वर्षतु शब्दविद्याया वृष्टिं करोतु १ २६ सिञ्चतु १ २६ [वृषु सेचने (भ्वा०) धातोर्लोट्]

वर्षते यो वर्षति तस्मै (मेघाय) २२ २६. [वृषु सेचने (भ्वा०) धातो शतृ]

वर्षनिर्णिजः वर्षस्य वृष्टे शोधका पोषका वा (वाय्वादिपदार्था.) ३ २६ ५ ये वर्ष निर्णेनिजन्ति ते (मरुत=मनुष्या) ५ ५७ ४ [वर्षोपपदे निरुपसृष्टान् णिजिर् शौचपोषणयो (जु०) धातो क्विप्]

वर्षम् वृष्टिरिव १६ ६४ [वृषु सेचने (भ्वा०) धातो 'अज्विधौ भयादिभ्य उपसख्यानम्०' इति वा०सूत्रेण अच्]

वर्षवृद्धम् शस्त्राऽस्त्राणा वर्धयितारम् वृष्टेवर्द्धक यज्ञम् १ १६ [वर्षोपपदे वृधु वृद्धौ (भ्वा०) धातोर्बाहु० औणा० क्त]

वर्षाभिः वर्षन्ति मेघा यासु ताभि (वृष्टिभि) २१ २५ **वर्षाभ्यः**=वर्षर्त्तौ कार्यसाधनाय २४.११. **वर्षाः**=यासु मेघा वर्षन्ति ता (वृष्ट्य) १३ ५६ [वृषु सेचने (भ्वा०) धातो 'अज्विधौ भयादिभ्य उपसख्यानम्०' इत्यच्। तत स्त्रिया टाप्। वर्षा वर्षत्यासु पर्जन्य नि० ४ २७ (ऋतु) यद् वर्षति तद् वर्षाणाम् (रूपम्) श० २ २ ३ ८ यदा वै वर्षा पिन्वन्ते ऽथैना सर्वे देवा सर्वाणि भूतान्युपजीवन्ति श० १४ ३ २ २२ मरुतो वै वर्षस्येशते श० ६ १ २ ५ षड्भि पार्जन्यैर्वा मारुतैर्वा (पशुभि) वर्षासु (यजते) श० १३ ५ ४ २८ वर्षं सावित्री गो० पू० १ १३ वर्षा वै सर्व ऽऋतव श० २ २ ३ ७ वर्षा ह त्वेव सर्वेषामृतूना रूपम् श० २ २ ३ ७ वर्षा पुच्छम् (सवत्सरस्य) तै० ३ ११.१० ४ वर्षा उत्तर (पक्ष सवत्सर) तै० ३ ११ १० ३ वर्षा एव यश गो० पू० ५ १५ वर्षा उद्गाता तस्माद् यदा बलवद् वर्षति साम्न इवोपब्दि क्रियते श० ११ २ ७ ३२ (प्रजापतिः) वर्षामुद्गीथम् (अकरोत्) जै० उ० १.१२ ७ वर्षा उद्गीथ प० ३ १ वर्षाशरदौ सारस्वताभ्याम् (अवरुन्धे) श० १२ ८ २ ३४ वर्षाभिर्ऋतुनादित्या स्तोमे सप्तदशे स्तुत वैरूपेण विशौजसा तै० २ ६ १६ १ वर्षा ह्यस्य (वैश्यस्य) ऋतु. ता० ६ १ १० तस्माद् वैश्यो वर्षास्वादधीत विड्ढि वर्षा श० २ १ ३ ५ तस्य (आदित्यस्य) रथप्रोतश्चासमरथश्च (यजु० १५ १७ सेनानीग्रामण्याविति वार्षिकौ तावृतू श० ८ ६ १ १८]

वर्षाह्वः या वर्षा आह्वयति सा भेकी २४ ३८

४ ४२ २ स्वीकर्त्तु (मनुष्यस्य) ६ २०.२. [वृञ् वरणे (स्वा०) धातो 'आद्गमहन०' अ० ३.२ १७१. सूत्रेण कि । लिड्वद्भावेन द्वित्वञ्च । वव्रि =रूपनाम निघ० ३.७ वव्रिरिति रूपनाम वृणोतीति सत नि० २ ८]

वव्रिवांसम् विभजन्तम् (अहिं=मेघम्) ६ २० २. आवरकम् (वृत्र=मेघम्) २ १४ २ विवृतम् (वृत्रम्) ४ १६ ७. व्रियमाणम् (शत्रुम्) ३.३२ ६ [वृञ् वरणे (स्वा०) वृञ् आवरणे (चुरा०) धातोर्वा लिट क्वसु]

वव्रुः विवृण्वति ४ १ १५ वृणुयु १२ २८ **वव्रे**= वृणोति ३ ३८ ८ व्रियते १ ६२ ७ [वृञ् वरणे (स्वा०) धातोर्लिट्]

वशम् स्वाधीनताम् १ ११६ २१. कमनीयम् (अश्व्यम्=अश्वेषु साधुम्) १ ११२.१० **वशस्य**= वशवर्त्तिन (प्रजाजनस्य) ६ २४ ५ **वशः**=कामयमान (विद्वज्जन) १ १२६ १ वशित्वगुणप्रापक (परमेश्वर ओषधिराजो वा) १ ६१ ६ **वशान्**=शमदमादियुक्तान् धार्मिकाञ्जनान् १ ८२ १३ कामयमानान् पदार्थान्, अ०— उत्कृष्टव्यवहारसाधकान् कामान् ३ ५२ वशवर्त्तिन (जनान्) १ १८१ ५ **वशानाम्**=कमनीयानाम् (विद्वज्जनानाम्) ३ ६० ४ **वशाः**=देदीप्यमाना (पशव.) २४ १४ **वशे**=प्रकान्ते यस्मिँस्तस्मिन्, प्र०—अत्र बाहुलकादौणादिकोऽन् प्रत्यय ४ ११. वश मे स० प्र० १६, अथर्व० ११ २४ २ [वश कान्तौ (अदा०) धातो 'वशिरण्योरुपसख्यानम्' अ० ३ ३ ५८ वा०सूत्रेण भावेऽप्। बाहु० औणा० वा अन्। वष्टि कान्तिकर्मा निघ० २ ६.]

वशा कमनीयानि (धना=धनानि) २ २४ १३. [वशमिति व्याख्यातम्। तत शेर्लोपश्छन्दसि]

वशा वन्ध्या गौ १८ २७ अप्रसूता (गौ) २१ २१ कमिताऽऽहुति २ १६ **वशाभिः**=कमनीयाभिर्गोभि २ ७ ५ **वशाः**=देदीप्यमाना (द्यावापृथिवीया पशव.) २४ १४ [वश कान्तौ (अदा०) धातोरच्। ततष्टाप्। यद् वशमस्रवत्सा वशाऽभवत् तस्मात्सा हविरिव ऐ० ३ २६ यदा न कञ्चन रस पर्यशिष्यत तत एषा मैत्रावरुणी वशा समभवत्तस्मादेषा न प्रजायते श० ४ ५ १ ६ सा हि मैत्रावरुणी यद् वशा श० ५ ५ १ ११ वशामनूवन्ध्यामालभते श० २ ४ ४ १४ इयं (पृथिवी) वै वशा पृश्नि श० १ ८ ३ १५ इयं (पृथिवी) वै वशा पृश्निर्यदिदमस्या मूल चामूल चान्नाद्य प्रतिष्ठित तेनेय वशा पृश्नि श० ५ १ ३ ३.]

वशाम कामयेमहि १ १६५ ७ **वश्मि**=कामये २ ३१ ७. [वश कान्तौ (अदा०) धातोर्लेट्। अन्यत्र लट्]

वशासः ये वशं प्राप्ता (महाढ्या जना) ६ ६३.६ [वशमिति व्याख्यातम्। ततो जसोऽसुक्]

वशिम् वशकर्त्तारम् (इन्द्र=जीवम्) २८ ३३. [वश कान्तौ (अदा०) धातोर्बाहु० औणा० इन्]

वशी वशं कर्त्तुं शील (इन्द्र=सभाध्यक्ष) १ १०१ ४ जितेन्द्रिय (राजा) ८.५० वशीकर्त्तुं समर्थ (सविता=परमेश्वर) ४ ५३ ६ वशं कर्त्तुं शीलमस्य स (ईश्वर) प० वि०। जितेन्द्रियोऽन्तःकरण (इन्द्र.=सेनापति) १७.३५ [वश कान्तौ (अदा०) धातोरस्मात्छीलार्थे णिनि]

वषट् क्रियाकौशलम् ११ ३६.

वषट्कारान् ये वषट् धर्म्या क्रिया कुर्वन्ति तान् (भा०—सत्क्रियान् मनुष्यान्) १६ २०. **वषट्काराः**= उत्तमा क्रिया. २० १२ **वषट्कारेण**=होम क्रिया के तुल्य स० वि० २०६, अथर्व० ६ ६ २ ५ **वषट्कारैः**= श्रेष्ठै कर्म्मभि २१ ५३. उत्तमकर्म्मभि २० १२ [वषट् इत्युपपदे डुकृञ् करणे (तना०) धातोरण्। स यै वौगिति करोति। वाग्वै वषट्कारो वाग्रेतो रेत एवैतत् सिञ्चति षडित्यृतवो वै षट् तद् ऋतुष्वेवैतद् रेत सिच्यते तद् ऋतवो रेत सिक्तमिमा. प्रजा प्रजनयन्ति तस्मादेव वषट् करोति श० १ ७ २ २१ वाक् च वै प्राणापानौ च वषट्कार ऐ० ३ ८ वाक् च ह वै प्राणापानौ च वषट्कार गो० उ० ३ ६ तस्यै (वाचे) द्वौ स्तनौ देवा उपजीवन्ति स्वाहाकार च वषट्कार च श० १४ ८ ९ १ प्राणो वै वषट्कार श०, ४ २.१.२९ एष एव वषट्कारो य एष (सूर्य) तपति श० १.७ २ ११ एष वै वषट्कारो य एष (सूर्य.) तपति श० ११.२ २ ५ य. सूर्य स धाता स उ एव वषट्कार ऐ० ३.४८ यो धाता स वषट्कार ३ ४७. निमेषो वषट्कार तै० २.१.५ ६. त्रयो वै वषट्कारा वज्रो धामच्छद् रिक्त ऐ० ३ ७ त्रयो वै वषट्कारा वज्रो धामच्छद् रिक्त । स यदेवोच्चैर्बलवषट्करोति स वज्र ··· । अथ य सभ सन्ततो निर्हाणच्छत्स्व धामच्छत् ······ । अथ येनैव षट् पराप्नोति स रिक्त गो० उ० ३ ३ वज्रो वै वषट्कार ऐ० ३ ८ कौ० ३ ५ गो० उ० ३ ५ वज्रो वषट्कार श० १ ३.३ १४ वज्रो वा एष यद् वषट्कारो य द्विष्यात्त ध्यायेद् वषट्करिष्यस्तस्मिन्नेव त वज्रमास्थापयति ऐ० ३ ६ देवेपुर्वा एषा यद् वषट्कार ता० ८ १ २ देवपात्र वाऽएष यद् वषट्कार श० १ ७ २ १३ देवपात्र वा एतद्

ववन्द वन्दति नमस्करोति ६ ६३ ३ प्रशसति ६ ५१ १२ **ववन्दिम**=प्रणमेम ५ २५ ६ **ववन्दिरे**=प्रणमन्तु ३ ५४ ४ आनन्दन्तु ३ ५४ ४ [वदि अभिवादन-स्तुत्यो (भ्वा०) धातोर्लिट् , व्यत्ययेन परस्मैपदम्]

ववन्म याचामहे ७ ३७ ५ [वनु याचने (तना०) धातोर्लिट् । व्यत्ययेन परस्मैपदम्]

ववर्जुषीणाम् भृश दोपान् वर्जयन्तीनाम् (विशा=प्रजानाम्), प्र०—अत्र यङ्नुगन्ताद् व्रजे क्विवन्त रूपम् १ १३४ ६ [वृजी वर्जने (अदा०) धातोर्लिट क्वसु । तत स्त्रिया ङीप्]

ववर्त वर्त्तने, प्र०—अत्र शप श्लुस्तस्य स्थाने तप् च १ १६५ २ **ववर्तत्**=वर्तने ४ ४४ ३ वर्तयेत् ४ २४ १ **ववर्थ**=वर्तते ३ ४३ ७ [वृतु वर्त्तने (भ्वा०) धातोर्लट् । 'बहुल छन्दसी' ति शप श्लु । तप्रत्ययस्य च स्थाने तवादेशश्छान्दस । अन्यत्र लङि छान्दस द्वित्वम् । ववर्थ प्रयोगे लिटि वृतुधातोर्तलोपश्छान्दस]

ववर्थ वृणोपि, प्र०—अत्र वर्तमाने लिट् १ ६१ २२ [वृञ् वरणे (स्वा०) धातोर्लिटि 'बभूथाततन्थ०' अ० ७ २.६४ सूत्रेण निपातनाद् इडभावे रूपम्]

ववर्ध वर्धते ५ २.२ [वृधु वृद्धौ (भ्वा०) धातोर्लिट् व्यत्ययेन परस्मैपदम्]

ववर्ह वर्धयति २ २३ १३ [वृह वृद्धौ (भ्वा०) धातोर्लिट्]

ववव्रुषः रूपवत (तमसः=अन्धकारस्य), प्र०—अत्र वव्रिरिति रूपनाम धातोर्लिट क्वसु १ १७३.५]

ववाच उक्तवान् प्र०—'सम्प्रसारणाच्च' इत्यत्र 'वाच्छन्दसि' इत्यनुवर्त्तनाद् यजादेश १ ६७ ४ [वच परिभाषणे (अदा०) धातोर्लिट् । 'वा छन्दसी' ति पूर्वरूपाऽभावे यणादेशे च रूपम्]

ववार वृणात्युद्घाऽटयति, प्र०—अत्र वर्त्तमाने लिट् १ ३२ ११ [वृञ् वरणे (स्वा०) धातोर्लिट्]

ववाशिरे शब्दायन्ते २ २ २ [वाशृ शब्दे (दिवा०) धातोर्लिट्]

ववृक्तम् छिन्तम् ६ ६२ १० [वृजी वर्जने (अदा०) धातोर्लोट् । 'बहुल छन्दसी' ति शप श्लु । व्यत्ययेन परस्मैपदञ्च]

ववृजु. त्यक्तवन्त १ ३३ ५. [वृजी वर्जने (अदा०) धातोर्लिट् । व्यत्ययेन परस्मैपदम्]

ववृतत् वर्त्तते ६ १७ १० **ववृतीमहि**=भृश वर्त्तेमहि १ १३८ ४ **ववृतीय**=वर्त्तेयम् १ १८६ १० वर्त्तेयामि, प्र०—अत्र 'बहुल छन्दसि' इति साऽभ्यासत्वम् १ १८० ५. **ववृत्यात्**=वर्त्तेत, प्र० —अत्र व्यत्ययेन, परस्मैपदम्, शप स्थाने श्लुश्च १ १०७ १ वर्त्तयेत् ६ १७ १३ वर्त्तताम् ८ ४ वर्त्तेत, १ १०७ १ आवर्त्तताम् प्र०—वृतुधातोर्लिङि विकरणाऽऽत्मनेपद व्यत्ययेन श्लुर्द्वित्वञ्च ३३ ३८ **ववृत्याम्**=वर्त्तयेयम् लिङ्-प्रयोगोऽय 'बहुल छन्दसि' इत्यादिभिर्द्वित्वादिकम् १ ५२ १ **ववृत्याम**=वर्त्तयेम ७ २७ ५ **ववृत्याः**=वर्त्तये ६ १११ वर्त्तेथा १ १७३ १३ प्रवर्त्तये ६ ५० ९ प्रवर्त्तय ७ ४२ ३ **ववृत्युः**=वर्त्तेरन् १ १३५ ५ **ववृत्स्व**=वर्त्तस्व ३ ६१ ३ वर्त्तते ३ ३२ ५ वर्त्तताम् २ १६ ८ [वृतु वर्त्तने (भ्वा०) धातोर्लुङ् । अटोऽभाव । 'वा छन्दसी' ति द्वित्वम् । 'वृद्भ्य स्यसनो ' इति परस्मैपदम् । अन्यत्र लिङ् लोट् च]

ववृतन वर्त्तन्ते ५ ६१.१६ [वृतु वर्त्तने (भ्वा०) धातोर्लोट् व्यत्ययेन परस्मैपदम् । शप स्थाने श्लु , तस्य च तनप्]

ववृधन्त वर्धयन्ति ४ २ १७ [वृधु वृद्धौ (भ्वा०) धातोर्लङ् । 'बहुल छन्दसी' ति शप श्लु]

ववृधध्यु: वर्धयितुम्, प्र०—अत्र 'बहुल छन्दसि' इति शप. श्लुस्तुजादित्वाद् दीर्घश्च १ १२२ १

ववृमहे वृणुयाम ३ ९ १ स्वीकुर्महे ६ ४ ७ [वृञ् वरणे (स्वा०) धातोर्लिट्]

वव्ने सम्भजति ५ ७४ ७ याचते, प्र०—वनु याचने इत्यस्माल्लडर्थे लिट्, वन सम्भक्तौ इत्यस्माद् वा 'छान्दसो वर्णलोपो वा' इत्यनेनोपधालोप १ ३६ १७

वव्रम् वरणीयम् (मेघम्) ५ ३२ ८ **वव्रः**=कूप १ ५२ ३ [वव्र कूपनाम निघ० ३ २३]

वव्राज व्रजति प्राप्नोति ३ १ ६ [व्रज गतौ (भ्वा०) धातोर्लिट्]

वव्रासः सद्यो गन्तार (भा०—धन्या मनुष्या), प्र०—अत्र व्रजधातोर्बाहुलकादौणादिको ड प्रत्ययो द्वित्वञ्च १ १६८.२ [व्रज गतौ (भ्वा०) धातोर्बाहु० औणा० डो द्वित्वञ्च । ततो जसोऽसुक्]

वव्रिणा रूपेण १ ५४ १० **वव्रिम्**=सविभक्तारम् (दातृजनम्) १ १११ १० रूपयुक्त पदार्थममूहम् १.४६ ९ वर्त्तुमर्हम् (पदम्) १ १६४ ७ स्वकीय रूपम् १ १६४ २९. रूपम् ५ ७४ ५ **वव्रिः**=अङ्गीकर्त्ता (भा०—प्राणी) ५ १९ १ **वव्रे**:=स्वीकर्त्तव्यस्य (कृष्टे =मनुष्यस्य)

यद् वषट्कार ऐ० ३ ५. देवपात्र वै वषट्कार गो० उ० ३ १. एत एव वषट्कारस्य प्रियतमे तनूर्यदोजश्च सहश्च कौ० ३ ५ ओजश्च ह वै सहश्च वषट्कारस्य प्रियतमे तन्वौ ऐ० ३ ८ तस्य वाऽएतस्य ब्रह्मयज्ञस्य चत्वारो वषट्-कारा यद् वातो वाति यद् विद्योतते यत् स्तनयति यदव-स्फूर्जति तस्मादेव विद्वान् वाति विद्योतमाने स्तनयत्यव-स्फूर्जत्यधीयीतैव वषट्काराणामच्छम्बट्काराय श० ११ ५ ६ ९ वषट्कारो हैष परोक्ष यद् वेट्कार श० ९ ३ ३ १४]

वषट्कारेभिः भा०—श्रेष्ठकार्य्यै, कर्म्मभि १ ९ १९ [वषट्कारप्राति० 'बहुल छन्दसी' ति भिस ऐस् न भवति]

वषट्कृतम् क्रियया निष्पादितम् (सोम=सदोषधि-रसम्) २ ३६ १ सङ्कल्पितमिव (यज्ञपदार्थसमूहम्) ७ २६ क्रियासिद्धम् (अश्वम्) २५ ३७ **वषट्कृतस्य**=क्रिया-निष्पादितस्य शिल्पविद्याजन्यस्य (विज्ञानस्य) १ १२० ४ [वषट्-कृतपदयो समास]

वषट्कृति वषट् करोति येन यज्ञेन तस्मिन्, प्र०—अत्र 'कृतो बहुलम्' इति वार्तिकमाश्रित्य करणे क्विप् १ १४ ८ [वषट् इत्युपपदे डुकृञ् करणे (तना०) धातो करणे क्विप् तत सप्तमी]

वषट्कृतिम् सत्यक्रियाम् ७ १४ ३ सत्क्रियाम् ७ १५ ६ वषट् क्रिया क्रियते यया रीत्या ताम् १ ३१ ५ [वषट् इत्युपपदे करोते क्तिन्]

वष्टयः कामयमाना (किरणसमूहा) ५ ७९ ५ [वश कान्तौ (अदा०) धातो क्तिन्]

वष्टि कामयते २ ३७ १ प्रकाशते १ ३३ ३ **वष्टु**= प्रकाशयतु २० ८४ कामयताम् २९ ८ कामसिद्धिप्रकाशिका भवतु १ ३ १० कामना-युक्त हो आर्याभि० १ ८, ऋ० १ १ ६ १० [वश कान्तौ (अदा०) धातोर्लट्। अन्यत्र लोट्। वष्टि कान्तिकर्मा निघ० २ ६]

वसतः निवसत ६ ३८ २ **वसः**=निवासय ७ ८ ३ **वसाते**=वसेताम् १९ ८९ **वसाथाम्**=आच्छादयतम् ११ ३० **वसाथे**=आच्छादयथ १ १५२ १ [वस निवासे (भ्वा०) धातोर्लट्। अन्यत्र लड् लेट् च। वस आच्छादने (अदा०) धातोर्वा रूपम्]

वसतिम् निवासम् ५ २ ९ **वसतिः**=निवसति ३५ ४ यत्र वसन्ति सा १८ १५ यो निवसति स (विद्वान् जन) ६ ३ ३ **वसत्या**=वसन्ति यस्या तया १ ६६ ५ [वस निवासे (भ्वा०) धातो 'वहिवस्यर्तिभ्यश्चित्' उ० ४ ६० सूत्रेणाति]

वसना आच्छादनानि १ ९५ ७ [वस आच्छादने (अदा०) धातोर्ल्युट्। तत प्रथमाबहुवचने शेर्लोपश्छन्दसि]

वसन्तः य सुगन्धादिभिर्वासयति स (ऋतु) १३ ५४ **वसन्ताय**=वसन्तर्त्तौ सुखाय २४ ११ **वसन्तेन**= वसन्ति सुखेन यस्मिँस्तेन (ऋतुना) २१ २३ [वस निवासे (भ्वा०) धातो 'तॄभूवहिवसिभासि०' उ० ३ १२८ सूत्रेण झच्। एतौ (मधुश्च माधवश्च) एव वासन्तिकौ (मासौ) स यद् वसन्तऽओषधयो जायन्ते वनस्पतय पच्यन्ते ते नो हेतौ मधुश्च माधवश्च श० ४ ३ १ १४ तस्य (अग्ने) रथगृत्सश्च रथौजाश्च (यजु० १५ १५) सेनानीग्रामण्याविति वासन्तिकौ तावृतू श० ८.६ १ १६ यदेव पुरस्ताद् वाति तद् वसन्तस्य रूपम् श० २ २ ३ ८ तस्य (सवत्सरस्य) वसन्त एव द्वार हेमन्तो द्वार त वाऽएत सवत्सर स्वर्गं लोक प्रपद्यते श० १ ६ १ १९ मुख वा एतद् ऋतूना यद् वसन्त तै० १ १ २ ६ तस्य (सवत्सरस्य) वसन्त शिर तै० ३ ११ १० २ ऊर्ग् वै वसन्त ऐ० ४ २६ वसन्त आग्नीध्रस्तस्माद् वसन्ते दावाश्चरन्ति तद् ह्यग्निरूपम् श० ११ २ ७ ३२ वसन्त समिद्धोऽन्यानृतून् समिन्धे श० १ ३ ४ ७ वसन्तो वै समित् श० १ ५.३ ९ समिधो यजति वसन्तमेव वसन्ते वा इद सर्व समिध्यते कौ० ३ ४ वसन्तो हिंकार। प० ३ १ स (प्रजापति) वसन्तमेव हिकारमकरोत् जै० उ० १ १२ ७ षड्भिराग्नेयै (पशुभि) वसन्ते (यजते) श० १३ ५ ४ २८ वसन्तेनर्त्तुना देवा वसवस्त्रिवृता स्तुतम्। रथन्तरेण तेजसा। हविरिन्द्रे वयो दधु तै० २ ६ १९ १ वसन्त एव भर्ग गो० पू० ५ १५ वसन्तो वै ब्राह्मणस्यर्त्तु तै० १ १. २ ६ श० १३ ४ १ ३ तस्माद् ब्राह्मणो वसन्तऽआदधीत ब्रह्म हि वसन्त श० २ १ ३ ५]

वसया निवासहेतुना जीवनेन २५ ९ **वसाम्**= वीररसनीतिम् ६ १९ [वस निवासे (भ्वा०) धातोरौणा० अन्। ततष्टाप् स्त्रियाम्]

वसर्हा वसाना वासहेतूनामर्हक (परिज्मा=अग्नि), प्र०—अत्र शकन्ध्वादिना पररूपम् १ १२२ ३ [वस-अर्हन्-पदयो समासे शकन्ध्वादिना पररूपम्। वस=वस निवासे (भ्वा०) धातोरौणा० अन्। अर्हन्=अर्ह पूजायाम् (भ्वा०)+शतृ]

वसवः ये वसन्ति तत्सम्बुद्धौ (देवा=विद्वासो जना) ४ ५५ १ पृथिव्यादय इव प्रथमविद्याकल्पा, (अ०—विद्वासो जना) ३८ ६ वसु-सज्ञका (मरुत=विद्वज्जना) २ ३४ ९. सुखवासप्रदा (पिता, माता, भ्राता च) ६ ५१ ५

१.५३ ३ वस्तु १८ १५ धनप्रदम् (भौतिकमग्निम्) १५ ४७ विद्यादिधनसमूहम् १ ४७ ६ कार्यकारणद्रव्यम् १ ४७ ६ वस्तुजातम् १ ८१ ६ जलाख्य द्रव्यम् ६ ४७ २२ **वसुना**=प्रशस्तेन धनेन १ ८३ १ **वसूनाम्**=पृथिव्यादितत्त्वाना धनाना वा ७ ७ ७ पृथिव्यादिपदार्थानाम् १२ ६६ **वसूनि**=विज्ञानादिधनानि १ ८४ २० विद्याचक्रवर्त्तिराज्यप्राप्त्याणि उत्तमानि धनानि १ १५ ८. [वसुरिति वसव पदे व्याख्यातम्]

वसु वसूनि धनानि ६ ७ द्रव्याणि २७ ४० विज्ञानानि धनानि वा ६ ४८ १५. वासस्थानानि १ ८१ ७ [वसुरिति व्याख्यातम्। तत 'सुपा सुलुक्०' इति जसो लुक्]

वसुता वसूना द्रव्याणा भाव ६ १ १३ [वसुप्राति० भावे तल्। ततष्टाप् स्त्रियाम्]

वसुतातिम् धनमेव १ १२२ ५ **वसुतातिः**=धनाद्यैश्वर्ययुक्त (सभाध्यक्ष) १ १२२ १२ [वसुप्राति० स्वार्थे तातिल् छान्दस]

वसुदानः उत्तमोत्तमपदार्थस्य दाता (परमेश्वर) ऋ० भू० २४६, [वसूपपदे डुदाञ् दाने (जु०) धातो कर्त्तरि ल्युट् 'कृत्यल्युटो बहुलम्' इति सूत्रेण]

वसुदावन् यो वसूनि द्रव्याणि ददाति तत्सम्बुद्धौ (विद्वज्जन) २ ६ ४ यो वसूनि धनानि सुपात्रेभ्यो ददाति तत्सम्बुद्धौ (सूरे=विद्वज्जन) १२ ४३ **वसुदावा**=यो वसूनि ददाति स (न्यायाधीशो जन) २ २७ १२ [वसूपपदे डुदाञ् दाने (जु०) धातो कर्त्तरि वनिप्]

वसुदेयाय वसूनि द्रव्याणि देयानि येन तस्मै (विद्वज्जनाय) ६ ३६ ५ देय वस्तु यस्य तस्मै (विदुषे जनाय) २ ३५ ७ दातव्यधनाय १ ५४ ६ [वसु-देयपदयो समास। वसुरिति व्याख्यानम्। देयम्=डुदाञ् दाने (जु०) धातोर्यत्]

वसुधातम योऽतिशयेन वसूनि दधाति स, भा०—अतिधनी (अग्नि=पावक) २७ १५ [वसूपपदे डुधाञ् धारणपोषणयो (जु०) धातो क्विप्। ततोऽतिशायने तमप्]

वसुधितिम् पृथिव्यादिवसूना धितिर्यस्मात्तम् (वायुम्) २७ २४ वसूना द्रव्याणा धारकम् (अग्नि=विद्युदग्निम्) ४ ८ ३ वसूना धितयो यस्य तम् (विद्वास जनम्) १ १२८ ८ **वसुधिती**=यौ वसूनि धरतस्तौ (अध्यापकोपदेशकौ) १ १८१ १ वसूना पदार्थाना धर्त्र्यौ द्यावापृथिव्यौ ३ ३१ १७ विद्याधारिके (भा०—अध्यापिकोपदेशिके स्त्रियौ) २८ ३८ वसूना धितिर्ययोर्द्यावापृथिव्योस्ते (द्यावापृथिवी) ४ ४८ ३ द्रव्यधारिके (उपासानक्ता) २८ १५ [वसु-धितिपदयो समास। वसुरिति व्याख्यातम्। धिति=डुधाञ् धारणपोषणयो (जु०) धातो क्तिन्। औणादिको वा नि.। 'दधातेर्हि' रिति न भवति छन्दसि सर्वविधीना विकल्पनात्। धातोरित्त्वमपि छान्दसम्। वसुधिती वसुधान्यौ नि० ६ ४१]

वसुधेयस्य वसुधेय यस्मिँस्तस्य (विदुषो जन य) २१ ४८ कोपस्य २८ १४ ससारस्य २१ ५८ पृथिव्याद्याधारस्य (भा०—ससारस्य) २१ ५७ द्रव्याधारस्य (ससारस्य) २८.३५ धनाऽऽधारस्य कोपस्य २८ ३६. वसूनि धेयानि यस्मिँस्तस्य जगत २८ १२ अन्तरिक्षस्य मध्ये २८ १५ वस्वैश्वर्यं धेय यत्र तस्यैश्वरस्य २८ १६ सर्वपदार्थाधारस्य ससारस्य २१ ५६ धनकोशस्य २१.४६ [वसु-धेयपदयो समास। धेयम्=डुधाञ् धारणपोषणयो (जु०) धातोर्यत्। वसुधेयस्य वसुधानाय नि० ६ ४१ इन्द्रो वसुधेय श० १ ८ २ १६]

वसुनीथ वेदादिशास्त्र-बोधाख्य सुवर्णादिधनञ्च यो नयति तत्सम्बुद्धौ (अध्यापक श्रोतर्वा) १२ ४४ [वसूपपदे णीञ् प्रापणे (भ्वा०) धातो कर्त्तरि 'हनिकुषिनीरमिकाशिभ्य क्थन्' उ० २ २ सूत्रेण क्थन्]

वसुपतिम् वसूनामग्निपृथिव्यादीना पति पालक स्वामिनम् (इन्द्र=धारकमीश्वरम्), प्र०—कतमे वसव इति? अग्निश्च पृथिवी च वायुश्चान्तरिक्ष चाऽऽदित्यश्च द्यौश्च चन्द्रमाश्च नक्षत्राणि चैते वसव, एतेषु हीद सर्वं वसु हितम्, एते हीद सर्व वासयन्ते, तद्यदिद सर्व वासयन्ते तस्माद्वसव इति श० १४ ५ ७ ४, १ ६ ६ धनस्वामिनम् (विद्वज्जनम्) ३.३६ ६ **वसुपतिः**=धनपालक (विद्वज्जन) ७ ४५ ३ वसूना पदार्थाना पालक (विद्वान् जन) ६ ५२ ५ पृथिवी आदि वासहेतु भूतो का पति (ईश्वर) आर्याभि० १ ३०, ऋ० ६ ३ ४० २४.

वसुपत्नी वसूना पालिका (पृथिवी) १ १६४ २७ [वसु-पत्नीपदयो समास। पत्नी=पतिप्राति० स्त्रिया 'पत्युर्नो यज्ञसयोगे' अ० ४ १ ३३ सूत्रेण ङीप् नकारादेशश्च]

वसुमता प्रशस्तानि सुवर्णादीनि विद्यन्ते यस्मिँस्तेन (रथेन) १ ११८ १० प्रशसितधनयुक्तेन (रथेन) १ १२५ ३ बहुधनयुक्तेन (रथेन=यानेन) ४ ४ १० **वसुमते**=बहवो वसवश्चतुर्विंशतिवर्षब्रह्मचर्यसम्पन्ना विद्वासो विद्यन्ते यत्र तस्मै कर्मणे ६ ३२ **वसुमन्तम्**=बह्वैश्वर्यम् (जनम्) ६ ६८ ६ बहुविधद्रव्यसहितम् (रयि=धनम्) ४ ३४ १०.

वाना:=स्वगुणैं सर्वानाच्छादयन्त (विद्वासो जना), प्र०—अत्र 'वहुल छन्दसि' इति शपो लुड् न शानचि व्यत्ययेन मकारस्य वकार १ ६० २ [वस निवासे (भ्वा०) धातो शानच्। व्यत्ययेनात्मनेपदम्। मकारस्य वकारो वर्णव्यत्ययेन। वस आच्छादने (अदा०) धातोर्वा शानचि छान्दस रूपम्। अन्यत्र वसु आनपदयो समासे छान्दस रूपम्]

वसव्यम् वसुपु द्रव्येषु भवम् (राध =धनम्) २ १३ १३ वसुपु पृथिव्यादिपु भवम् (राध) २ १४ १२. **वसव्यस्य**=वसुपु धनेपु साधो (सौभगस्य=महदैश्वर्यस्य) ४ ५५ ८ [वसुप्राति० भवार्थे साध्वर्थे वा यत्]

वसव्या वसुपु धनेपु साध्वी (सूनृता=सत्यप्रियवाणी) ७ ३७ ३ [वसव्यम् इति व्याख्यातम्। तत स्त्रिया टाप्]

वसानम् आच्छादय तम् (सूर्यम्) १ १५२ ४ **वसान:**=प्राप्त (वैश्वानर =राजा) ४ ५ १५ वासयन् (सूर्य) १३ ३१ शरीरमाच्छादयन् (सभासेनेश) १६ ५१ आच्छादित (विद्वज्जन) ३ १ ५ धारयन् (राजा) ६.२९ ३. स्वीकुर्वाण (विश्वरूपोऽग्नि) ३३ २२ धरन् (राजा) ५.४८ ५ आच्छादक (अग्नि) २ १० १ गृह्णन् (सूर्य) ३ ३८ ४ [वस आच्छादने (अदा०) धातो शानच्]

वसाना परिदधती (पत्नी) १ १२२ २ स्वीकुर्वती (उपा) १ १२४ ३ धारयन्ती (सुन्दरी स्त्री) ३ ३९ २ **वसाना:**=वस्त्राभूषणैराच्छादिना (विदुष्य स्त्रिय) १०,७ [वस आच्छादने (अदा०) धातो शानजन्तात् स्त्रिया टाप्]

वसापावान वसा निवास पान्ति ते (वीरजना) ६ १९ [वसोपपदे पा रक्षणे (अदा०) धातो कर्त्तरि वनिप्। वसा=वस निवासे (भ्वा०) धातोरच्। ततष्टाप्]

वसाम् वसता प्राणिनाम् ५ २ ६ [वस निवासे (भ्वा०) धातो क्विप्। तत पष्ठी विभक्ति].

वसिष्ट वसेत् २ ३६ १ **वसिष्व**=धर, प्र०—अत्र 'छन्दस्युभयथा' इत्यार्धधातुकमाश्रित्य लोट्यपि वलादिलक्षण इट् १ २६ १ [वस निवासे (भ्वा० धातोर्लुड्। अटोऽभाव। व्यत्ययेनात्मनेपदम् इडागमश्च छान्दस। अन्यत्र लोट्]

वसिष्ठ अतिशयेन वसो (अग्ने=वह्निरिव राजन्) ७ १ ८ प्रशस्तविद्वन् (जन) ७ ३३ १० **वसिष्ठम्**=यो वसति धर्मादिकर्मसु सोऽतिशयितस्तम् (नर्य्यं=नृपु साधु सत्पुरुपम्) १ ११२ ९ उत्तम विद्वासम् ७ ३३ १३ **वसिष्ठस्य**=अतिशयेन विदुप ७ ३३ ५ **वसिष्ठ**=अतिशयेन वसुमोन् (पूर्णविद्वज्जन) ७ ३३ १२ अतिशयेन विद्यादिधनयुक्त (आप्तो विद्वान्) ७ ३३ १४ अतिशयेन वसु. (विद्वज्जन) ७ ४२ ६ अतिशयेन विद्यासु कृतवास (विद्वज्जन) ७ २६ ५ अतिशयेन धनाढ्य (मनुष्य:) ७ ९ ६ अतिशयेन वासयिता (ऋपि) १३ ५४ **वसिष्ठा:**=धनेऽत्यन्त वास कुर्वन्त (नर =नेतारो जना) ७ ३३ ४ अतिशयेन सद्गुणकर्मसु निवासिन (सज्जना) ७ ३७ ४ येऽतिशयेन धनिन (पितर =ज्ञानिनो जनका) १९ ५१ अतिशयेन वसव (विद्वास पितर) ७ ७ ७ अतिशयेन ब्रह्मचर्ये कृतवासा (विद्वज्जना) ७ ३३ ३ सर्वविद्यायुत्तमगुणेष्वतिशयेन रममाणा (पितर) ऋ० भू० २६०, [वस निवासे (भ्वा०) धातो कर्त्तरि तृजन्तादतिशायन इष्ठन्। 'तुरिष्ठेमेयस्सु' इति तृचो लोप। यद्वै नु श्रेष्ठस्तेन वसिष्ठोऽथो यद् वस्तृतमो वसति तेनोऽएव वसिष्ठ श० ८ १ १ ६ येन वै श्रेष्ठस्तेन वसिष्ठ (हिंकार) गो० उ० ३ ९ एप (प्रजापति) वै वसिष्ठ श० २ ४ ४ २ प्रजापतिर्वै वसिष्ठ कौ० २५ २ प्राणा वै वसिष्ठ ऋपि श० ८ १ १ ६ सा ह वागुवाच। (हे प्राण) यद्वा ऽह वसिष्ठाऽस्मि त्व तद् वसिष्ठोऽसीति श० १४ ९ २ १४ अग्निर्वै देवाना वसिष्ठ ऐ० १ २८ वसिष्ठस्य जनित्रे (सामनी) भवतो वसिष्ठो वा एते पुत्रहत सामनी अपश्यत् स प्रजया पशुभि प्राजायत ता० १९ ३ ८ ततो वै वसिष्ठपुरोहिता भरता प्राजायन्त ता० १५ ५ २४ ये वै ब्राह्मणा शुश्रुवासस्ते वसिष्ठा जै० २ २,४२ रथन्तरमाजभार वसिष्ठ ऐ० आ० ३ १ ६]

वसिष्ठहनु: वसिष्ठस्याऽतिशयेन वासहेतोर्हनुरिव हनुर्यस्य तम् (राजतुल्य जनम्), प्र०—अत्र 'सुपा सुलुक्०' इत्यम स्थाने सु ३९ ८ [वसिष्ठ-हनुपदयो समास]

वसिष्ठास: अतिशयेन वासयितार (सेनाजना) ७ २३ ६ अतिशयेन वसव (प्रजाजना) २० ५४ [वसिष्ठ इति व्याख्यातम्। ततो जसोऽसुगागम]

वसीय: अतिशयेन वस्तृ वसीय (प्राण) १८ ८ [वस निवासे (भ्वा०) धानो तृजन्तादतिशायन ईयसुन्। तृचो लोप]

वसु सुखेपु वसन्ति येन तद्धन विद्याऽऽरोग्यादिसुवर्णादिक वा, प्र०—वस्विति धननामसु पठितम् निघ० २ १०, १ १० ६ वसन्ति सुखेन यत्र तद् विज्ञानम् १ ५५ ८ सुखेपु वासयितृ (राध.=धनम्) २ २२ ३ पर प्रकृष्ट द्रव्यम्

सा (भार्या) ७ १ ६ [वसु सुबन्ताद् आत्मन इच्छायामर्थे क्यजन्तात् 'क्याच्छन्दसि' सूत्रेण उ.। अथवा वसूपपदे यु मिश्रणेऽमिश्रणे च (अदा०) धातो क्विप्। 'अन्येषामपि०' इति दीर्घ.। वसूयव वसुकामा नि० ६ ५.]

वस्त वस्ते आच्छादयति, प्र०—अत्र वर्त्तमाने लङट्-भावश्च १ २५ १३ **वस्तम्**=निवास कुर्याताम् ऋ० भू० २०६, ऋ० ८ ३ २८ २ **वस्ताम्**=आच्छादयताम् १७ ४६ छादयतु ६ ७५ १८ **वस्ते**=आच्छादयति ३ ५५ १४ कामयते ४ २५ २ धरति २६ ४८ [वस आच्छादने (अदा०) धातोर्लेट् अटोऽभावश्च। अन्यत्र लोट् लट् च। व्यत्ययेन परस्मैपदञ्च]

वस्तवे निवस्तुम् १ ४८ २ [वस निवासे (भ्वा०) धातोस्तुमर्थे तवेन्]

वस्तः व्यवहारैराच्छादितो युक्त (पुरुष) १४.६ आच्छादक (प्राज्ञो जन) १ १६१ १३ दिन मे म० प्र० १५१, १० ४० २ [वस आच्छादने (अदा०) धातो क्त औणादिको बहुलवचनात्]

वस्ता आच्छादयिता (परमात्मेव राजा) ३ ४६ ४ [वस आच्छादने (अदा०) धातोस्तृच्। उडभावश्छान्दस]

वस्तिना नाभेरधोभागेन २५ ७ **वस्तिः**=वासहेतु (पुरुष) १६ ८८ [वस आच्छादने (अदा०) वस निवासे (भ्वा०) धातोर्वा 'वसेस्ति' उ० ४ १८० सूत्रेण ति]

वस्तो. दिनम् ६ ४ २ दिनात् २६ २६ दिने २८ १२ दिवसस्य मध्ये ६ २५ ६ प्रतिदिनम् १ १७७ ५ दिन दिनम् ३ ८ [वस्तो अहर्नाम निघ० १ ६ वस्तो दिवा नि० ३ १५]

वस्तोः वासयितुम् १ १७४ ३. [वस निवासे (भ्वा०) धातोस्तुमर्थे तोसुन्]

वस्तोः वसथ ऋ० भू० २१०, [वस निवासे (भ्वा०) धातोर्लेट्। शपो लुक्। वर्णव्यत्ययेना-कारस्योकार]

वस्त्रदाः ये वस्त्राणि ददति ते (धनाढ्या जना) ५ ४२ ८ [वस्त्रोपपदे डुदाञ् दाने (जु०) धातो क]

वस्त्रमथिम् यो वस्त्राणि मथ्नाति तम् (तायु=तस्करम्) ४ ३८ ५ [वस्त्रोपपदे मथे विलोडने (भ्वा०) धातो 'छन्दसि वनसनरक्षिमथाम्' इति इन्। वस्त्रमथिम्=वस्त्रमाथिनम् नि० ४ २४]

वस्त्रा वस्त्राणि ५ ४७ ६ आच्छादनानि १ १३४ ४ [वस्त्रप्राति० शेर्लोपश्छन्दसि]

वस्त्राणि शरीराच्छादकानि १.१५२ १ कार्पासौर्ण-कौषेयकादीनि १.२६ १. **वस्त्रैः**=वासोभि ७ १४ ३ [वस आच्छादने (अदा०) धातोरौणा० ष्ट्रन्। वस्त्र वस्ते नि० ४ २४]

वस्त्रेणेव यथा पटेन १.१४० १ [वस्त्रेण-इव-पदयो समास]

वस्त्रेव यथा वस्त्राणि प्राप्यन्ते तथा ५ २६.१५ [वस्त्रा-इवपदयो समास। वस्त्रा=वस्त्रप्राति० शेर्लोप-श्छन्दसि]

वस्नम् हट्टव्यस्तरम् (विविधव्यापारम) ४.२४ ६. [वस निवासे (भ्वा०) धातो 'धापृवस्य०' उ० ३ ६ सूत्रेण न.]

वस्नयन्ता वस्नमिवाचरन्तौ राजप्रजाजनौ ६ ४७ २१ [वस्नप्राति० आचारेऽर्थे क्यच्। तत शत्रन्ताद् द्विवचन या-कारादेश]

वस्नेव पण्यक्रियेव ३ ४६ [वस्ना-इवपदयो समास]

वस्म निवास-स्थानम् ४.१३ ४ **वस्मनः**=निवसन्त (वय=पक्षिण) २.३१ १. [वस निवासे (भ्वा०) धातोर्बाहु० औणा० मनिन्]

वस्यःइष्टये वसीयसोऽतिशयितस्य धनस्य सङ्गमनाय १ १७६ १ वसीयस इष्टये सङ्गतये, प्र०—अत्र वसु-शब्दा-न्मतुप् ततोऽतिशय ईयसुनि 'विन्मतोर्लुक्' अ० ५ ३ ६५ इति मतोर्लुक् 'टे.' अ० ६ ४ १५५ इति टेर्लोपस्तत 'छान्दसो वर्णलोपो वा' इतीकारस्य लोपश्च १.२५ ४ [वस्यस्-इष्टिपदयो=समास। इष्टि=यज देवपूजासंगति-करणदानेषु (भ्वा०) धातो स्त्रियां क्तिन्। यजादित्वात् किति सम्प्रसारणम्]

वस्यसः येऽतिशयेन वसन्ति ते वसीयासस्तान् (भा०—सुजननिवासान्), प्र०—अत्र 'छान्दसो वर्णलोपो वा' इतीकारलोप ३ ५८ अतिशयेन वसीयसो वसुमत (जनान्) २ १७ ८ [वसुप्राति० प्रशसाया मतुवन्तादति-शायन ईयसुन्। अन्यत् पूर्वपदे व्याख्यातम्]

वस्यसी अतिशयेन वसुमती (स्त्री) ५ ६१ ६ [वस्यस् इति व्याख्यातम्। तत स्त्रियां ङीप्]

वस्यः अतिशयेन वासहेतुम् (धनधान्यादिकम्) ६ ४४ ७ अतिशयेन धनम्, प्र०—अत्र वसुशब्दादीयसुन् प्रत्यय 'छान्दसो वर्णलोपो वा' इतीकारलोप १ ३१ १८ वसुषु साधु (विद्वज्जन) १.१०६ १ वशीय (स्वस्वामिन राजानम्) ७ ३२ १६ अत्युत्तम धनम् २ ३६ ५ वसीयसो-

प्रशस्तधनप्रापक देशम् २ २४ २ [वसुप्राति० प्रशंसायां मतुप् । भूम्न्यर्थे वा]

वसुमती बहूनि वसूनि द्रव्याणि विद्यन्ते यस्या सा (इडा=प्रशसनीया वाणी) २८ १८ **वसुमतीम्**=वसूनि बहूनि वस्तूनि भवन्ति यस्या ताम्, भा०—बहु-सुखप्रापिकाम् (छायाम्=आश्रयम्), प्र०—अत्र भूम्न्यर्थे मतुप् २.८ [वसु-प्राति० भूम्न्यर्थे मतुप् । तत स्त्रिया ङीप्]

वसुमती बहवो वसवो विद्यन्ते ययोस्ते (द्यावापृथिवी) ३ ३० ११ [वसुमतीति व्याख्यातम् । ततो द्विवचनस्य पूर्वसवर्णदीर्घश्छान्दस]

वसुवनिम् धनाना सम्भाजनम् ७ १ २३ [वसूपपदे वन सम्भक्तौ (भ्वा०) धातो 'छन्दसि वनसनरक्षिमथाम्' इति सूत्रेण इन् । अग्निर्वै वसुवनि श० १ ८ २ १६]

वसुवने ऐश्वर्यसेवकाय (जनाय) २१ ५८ धनसेविने (पुरुषाय) २८ ३६ द्रव्ययाचिने (पुरुषाय) २८ ३६ धन-विभाजकाय (मनुष्याय) २८ ३५ धनसेवनाय २१ ४६ वसुप्रदाय जीवाय २८ २० पदार्थविद्यायाचिने (भा०—सुपात्राय याचमानाय) २८ २१ यो वसूनि वनुते याचते तस्मै (पुरुषाय) २८ १६ धनेच्छुकाय (नृपाय जनाय वा) २१ ५६. पृथिव्यादिसेवकाय (जीवाय) २१ ५७ धनप्रापणाय २१.४८ [वसूपपदे वन सम्भक्तौ (भ्वा०) धातो कर्त्तरि क्विप् । वनु याचने धातोर्वा क्विप् । वसुवने वसुवननाय नि० ६ ४१]

वसुवने पृथिव्यादीना सविभागे जगति २८ १५ धनदानाधिकरणे (जगति) २८ १६ [वसूपपदे वन सम्भक्तौ (भ्वा०) धातोर्घञर्थे क]

वसुवाहनम् वसूना द्रव्याणा वाहनम् (रथ=विमाना-दियानम्) ५ ७५ १ [वसु-वाहनपदयो समास । वाहनम्= वह प्रापणे (भ्वा०) धातोर्णिजन्ताल् ल्युट्]

वसुवित् यो वसूनि धनानि विन्दति प्राप्नोति स (पुरुष पतिर्वा) ३८ ५ वसूनि सर्वाणि द्रव्याणि विदन्ति ये येन वा (ईश्वरो विद्वान्वा) १ ९१ १२ यो वसूनि सर्वाणि वस्तूनि यथावद्वेत्ति वेदयति वा स (परमात्मा) ३ २६ सब पृथिवी आदि वसुओं का जानने वाला, सर्वज्ञ और विद्यादि धन का दाता (ईश्वर) आर्याभि० १ ३८, ऋ० १ ६ २१ १२ [वसूपपदे विद ज्ञाने (अदा०) धातो कर्त्तरि क्विप्]

वसुवित्तमम् वसून् पृथिव्यादिलोकान् वेत्ति सोऽति-शयितस्तम्, पृथिव्यादिलोकान् वेदयति सूर्यरूपेणाग्निरेतान् प्रकाश्य प्रापयति स वसुवित्, अतिशयेन वसुविदिति वसु-वित्तमो वा तम् (परमेश्वर भौतिकमग्निं वा) ३ ३८ योऽतिशयेन वसु वेत्ति तम् (देव=दातार जनम्) ६ १६.४१ यो वसूनि विन्दति स वसुवित्, सोऽतिशयितस्तम् (अग्नि= बहुश्रुत सज्जनम्) १ ४५ ७ **वसुवित्तमः**=यो वसूनि द्रव्याणि वेदयति प्रापयति सोऽतिशयित , भा०—पदार्थ-प्राप्तये साधकतम' (अग्नि=ईश्वरो भौतिकोऽग्निर्वा) ३ ३६ [वसुविदिति व्याख्यातम् । ततोऽतिशायने तमप्]

वसुविदा बहुधनप्रदौ (अ०—अध्यापकोपदेशकौ) १ ४६ २ वसुविदावग्निजलवद् वर्त्तमानावध्यापकोपदेशकौ १ ४६ २ [वसुविद्प्राति० प्रथमाद्विवचनस्य 'सुपा सुलुक्०' इत्याकारादेश । वसुविद्=वसूपपदे विद्लृ लाभे (तुदा०) विद सत्तायाम् (दिवा०) धातोर्वा क्विप्]

वसुश्रवाः वसूनि सर्वाणि श्रवासि श्रवणानि यस्य स (अग्नि=सर्वाभिरक्षकेश्वर) ३.२५ वसूनि धनानि श्रवणे यस्य स (अग्नि=वेदविदध्यापकोपदेशक) २५ ४७ धनधान्ययुक्त (राजा) ५ २४ २ वसूनि धनानि श्रवास्य-न्नानि च यस्मात् स (अग्नि=भौतिक) १५ ४८ [वसु-श्रवस्पदयो समास । वसु धननाम निघ० २ १० श्रव अन्ननाम निघ० २.७]

वसूयन्तः आत्मनो वसूनि विज्ञानादीनि धनानीच्छन्त: (आयव=विद्वासो जना) १ १३० ६ [वसु सुबन्ताद् आत्मन इच्छाया क्यजन्ताच्छतृ]

वसूया आत्मनो वसूना धनानामिच्छया १ १६५ १ आत्मनो वसूनीच्छन्ति तया (सुक्षेत्रिया=सुनीत्या) १ ९७ २ [वसुसुबन्ताद् आत्मन इच्छायामर्थे क्यच् । तत स्त्रिया 'अ प्रत्ययाद्' इत्यकार । ततष्टाप्]

वसूयवः आत्मनो वसूनि विद्याधनानीच्छन्त (मतय=विद्वज्जना) १ ६२.११ ये वसून् पृथिव्यादीन् युवन्ति मिश्रयन्त्यमिश्रयन्ति ते विद्वास १ ४६ ४ आत्मनो वस्विच्छव (मनुष्या) ५ २५ ६ वसूनि धनानि कामय-माना (धार्मिका मनुष्या) ७ ३२ २ य आत्मनो वसूनि द्रव्याणीच्छन्ति ते (मनुष्या), प्र०—अत्र वसु-शब्दात् 'सुप आत्मन क्यच्' इति क्यच् प्रत्यय 'क्याच्छन्दसि' उयु प्रत्यय 'अन्येषामपि०' इति दीर्घ १ १२८ ८ ये वसूनि युवन्ति मिश्रयन्ति ते (विद्वासो जना) ३.२६ १ **वसूयुम्**= आत्मनो वसु द्रव्यमिच्छुम् (सज्जनम्) ४ ४४ १ **वसूयु** = आत्मनो धनमिच्छु (जन) ५ २६.१५ वसूनि धनानि कामयमान (राजा) ७ ३४.२१ या वसूनि द्रव्याणि कामयति

वहमानाः प्राप्नुवत्य (उषस) १.१२३ १२. [वह प्रापणे (भ्वा०) धातो शानच् । तत स्त्रिया टाप्]

वहिष्ठयोः अतिशयेन वोढ्रो (अश्वयो) ६ ४७.६ **वहिष्ठान्**=अतिशयेन वोढॄन् विद्याधर्मप्रापकान् (नॄन्) १ १२१ १२ **वहिष्ठाः**=अतिशयेन वोढार (अग्न्यादि-पदार्था) ५ ५६ ६ [वह प्रापणे (भ्वा०) धातो कर्त्तरि तृजन्तादतिशायन इष्ठन् । 'तुरिष्ठेमेयस्सु' इति तृचो लोप.]

वहिष्ठा अतिशयेन वोढा (वायु =पवन), प्र०—अत्राऽऽकारादेश १ १३४ ३ [वहिष्ठ इति पूर्वपदे द्रष्टव्यम्, नत 'सुपा सुलुक्०' इति सोराकारादेश]

वहिष्ठेभिः अतिशयेन वोढृभि. (किरणाकर्षणादिभि) ४ १३ ४ [वहिष्ठ इति व्याख्यातम् । ततो भिस ऐस् न भवति छन्दसि]

वहीयसः सद्यो देशान्तरे प्रापकानग्न्यादीन् १ १०४ १. [वह प्रापणे (भ्वा०) धातो कर्त्तरि तृजन्तादतिशायन ईयसुन् । तृचो लोप]

वहेन प्रापणेन २५ ३ [वह प्रापणे (भ्वा०) धातो-र्घञर्थे क]

वह्नयः वहन्ति प्रापयन्ति वार्त्ता पदार्थान् यानानि च यैस्ते (अ०—विद्युदादय), प्र०—अत्र वहिश्रिश्रुयु०' उ० ४.५१ अनेन करणे नि प्रत्यय १ १४ ६ सुखस्य वोढार (विश्वेदेवास =समस्ता वेदपारगा विद्वास) १ ३.६ शुभकर्मगुणाना वोढार (ऋभव =मेधाविजना) १ २० ८ विद्वासो जितेन्द्रिया सुशीला मनुष्या) १ ४८ ११ वोढारो-ऽश्वा २ २४.१३ अग्नय इव वर्त्तमाना (विद्वज्जना) ५ ७६ ४ **वह्नये**=राज्यभार वोढ्रे (वेधसे =विवेकिजनाय) २ २१ २ **वह्निभिः**=वोढृभिर्मरुद्भिस्सह १ ६ ५ वहनसमर्थै (देवै =विद्वद्भि) १ ४४ १३ कार्यनिर्वाहकै (देवै =विद्वज्जनै) ३३ १५ **वह्निम्**=प्रापकम् (अपत्यम्) ३ ३१ २ वाहकम् (मनुष्यम्) ३ १ १ पदार्थाना वोढारम् (अग्निम्) १ ६० १ **वह्निः**=पावकवद् वोढा विद्वान् १ ११३ १७ वोढा वायु ३ २० १ विद्याया वोढा (विद्वज्जन) २७ १४ सद्यो वोढाऽग्नि ३५ १३ वोढा विद्यासुखप्रापक (अग्नि =राजा) ७ १६ ६ सुखाना प्रापक (परमेश्वरो विद्वान् वा) १ ७६ ४ स्वप्रकाशक, सर्वरसवाहक (ईश्वर) आर्याभि० २ १६, ५ ३१ [वह प्रापणे (भ्वा०) धातो 'वहि श्रिश्रुयुद्रुग्लाहात्वरिभ्यो नित्' उ० ४ ५१ सूत्रेण नि । वह्नि अश्वनाम निघ० १ १४ वह्नि वोळ्हा नि० ३४ वह्निम् पुत्रम् नि० ३ ६ वह्नय =वोढार नि० ८ ३ वह्निर्वा अनड्वान् तै० १ १ ६.१० वह्निर्होता तै० म० २ २ १० ५ वह्निरग्नि हव्यवाहन मै० १ २ १२ काठ० २ १३ वह्निना हि तत्र गच्छति यत्र जिगमिषति जै० २ ८६]

वह्नितमम् वहनि प्रापयति यथायोग्य सुखानि स वह्नि सोऽतिशयितस्तम् (ईश्वर भौतिकमग्नि वा) १ ८ **वह्नितमः**=अतिशयेन वोढा (विद्वज्जन) २१.३. **वह्नितमान्**=अतिशयिता वह्नयो वोढारस्तान् (विदुषो जनान्) ६.७. [वह्निरिति व्याख्यानम् । ततोऽतिशायने तमप्]

वह्येशयाः या वह्ये प्रापणीये शेरते ता (नारी.=स्त्रिय ७ ५५ ८ [वह्योपपदे शीङ् शये (अदा०) धातो 'अधिकरणे शेते.' सूत्रेणाच् । सप्तम्या अलुक् । वह्यम्=वह प्रापणे (भ्वा०) धातो 'वह्य करणम्' अ० ३ १ १०२ सूत्रेण करणे यत् । वहधातोर्वा बाहु० 'अघ्न्यादयश्च' उ० ४ ११२ सूत्रेण यक्]

वशनर्तिनम् वशे नर्त्तितु शील यस्य तम् (शैलूष नट वा) ३० २१ [वशोपपदे नृती गात्रविक्षेपे (दिवा०) धातोस्ताच्छील्ये णिनि]

वंशमिव यथोत्कृष्टैर्गुणै शिक्षणैश्च स्वकीय वश-मुद्यमवन्त कुर्वन्ति तथा १ १० १. [वशम्-इवपदयो समास]

वंसगः यो वस सम्भजनीय गच्छति गमयति वा स वृषभ १ ५५ १ यो वसान् सत्यासत्यविभाजकान् गच्छति स (राजा) ५ ३६ १ सम्भक्ता (इन्द्र =सभेश) १.१३०.२२ वस धर्मसेविन, सविभक्तपदार्थान् गच्छतीति (इन्द्र =ईश्वर सूर्यो वा) १ ७ ८ यो वस सम्भजनीय व्यवहार गच्छति स (उग्र =तेजस्विजन) ६ १६ ३६ [वसोपपदे गम्लृ गतौ (भ्वा०) धातोर्ड प्रत्यय 'अन्येष्वपि दृश्यते' सूत्रेण । वसा =वन सम्भक्तौ (भ्वा०) धातोरौणा० बाहु० स]

वंसत् विभजेत् ६ ६८ ५ **वंसाम**=विभजेम ६.१६.८ **वंसि**=सम्भजसि ५ ७० १ **वंसीमहि**=विभजेम ६ १६ १० **वंस्व**=सम्भज १ ४८ ११ [वन सम्भक्तौ (भ्वा०) धातोर्लेट् । सिब् विकरणश्छन्दसि । 'व्यत्ययो बहुलम्' इति द्विविकरणता । अन्यत्र लटि शपो लुक् । लोटि चाप्यग्रे शपो लुक् । व्यत्ययेनात्मनेपदञ्च]

वा पक्षान्तरे १ ८ ६ चाऽर्थे १८ ३२ अथवा ५ ८५ ७ यद्वा आर्याभि० २ ३६, ३६ २ व्यवहाराऽन्तरे

ऽतिधनाढ्यान् (जनान्) ५ ५५ १० वसीयोऽतिशयेन सुष्ठु धनम् ६ ४७ ७ वसीयान् (राजा) ५ ३१ २ अतिशयेन वासयितृ (महद्वस्तु ब्रह्म) २ २ १३ अत्युत्तम वास स्थानम् २ १ १६ वस्तु योग्य (विद्वान् जन) १ १४१ १२ अतिशयेन वसु तत् (अपूप=भोज्य पदार्थम्) १२ २६ अतिशयेन श्रेष्ठ धनम् ४ २१ ४ [वसुप्राति० अतिशायन ईयसुन्। ईकारलोपश्छान्दस। अथवा वसुप्राति० 'तत्र साधु' रिति यत्]

वस्यान् अतिशयेन वासकर्त्ता (सोम=महैश्वर्ययोग) ६ ४१ ४ [वस निवासे (भ्वा०) धातो कर्त्तरि तृजन्ताद् अतिशायन ईयसुन्। 'तुरिष्ठेमेयस्सु' इति तृचो लोप 'छान्दसो वर्णलोपो वे' ति प्रत्ययस्येकारस्य लोप]

वस्वः धनानि ४ १७ ११ वसुनो धनस्य १९ ६३ वसुना सुखेन वासहेतोर्धनस्य ३ १९ ३ वसोर्धनस्य १ ५१.१ वसूनि १ ७१ ९ द्रव्याणि, प्र०—'वाच्छन्दसि सर्वे विधयो भवन्ति' इति नुमभावे 'जसादिषु छन्दसि वा वचनम्' इति गुणाभावे च यणाऽऽदेश १ ९० २ पृथिव्यादे ५ १५ १

वस्वी याऽग्न्यादिपदार्थाख्यवसुविद्यासम्बन्धिनी वसुभिश्चतुर्विंशतिवर्षकृतब्रह्मचर्यै प्राप्ता सा (वाग् विद्युद्वा) ४ २१ पृथिव्यादिवसुसम्बन्धिनी (सन्दृष्टि=विद्यादर्शनम्) ६ १६ ७५ वसूनामियम् (दक्षिणा) ६ ६४ १ धनसम्बन्धिनी (शक्ति=सामर्थ्यम्) ७ २० १० धनकारिणी (शक्ति) ७ २१ १० **वस्वीभिः**=धनप्रापिकाभि क्रियाभि ३ १३ ५ **वस्वीः**=बहुपदार्थयुक्ता (पुरन्धी=द्यावापृथिव्य) ५ ४१ ६ [वसुरिति वसव पदे द्रष्टव्यम्। तत स्त्रियाम् 'वसुशब्दाद् गुणवचनाद् ङीब्राद्युदात्तार्थम्' अ० ४ १ ४४ वा०सूत्रेण ङीप्। वस्वी रात्रिनाम निघ० १.७]

वह प्राप्नुहि ३५ २० प्रापय ३३ ७० प्राप्नोतु ६ ६४ ५ गमय ६ ६४ ४ वहसि प्रापयसि, वहति प्रापयति वा, प्र०—अत्र पक्षान्तरे पुरुषव्यत्यय १ १३ १ **वहत**=वहन्ति, प्र०—अत्र व्यत्ययो लडर्थे लोट् च १ २३ २२ **वहतम्**=प्रापयतम् १ ४७ ६ प्राप्नुतम् ३ ५३ १ प्राप्नुत १ ३४ १२ **वहताम्**=प्रापयताम् ३ ४१ ९ **वहति**=प्राप्नोति प्रापयति वा ३ ५८ १ **वहतु**=प्राप्नोतु १३ ३४ **वहते**=प्राप्नोति प्रापयति वा ५ ३० ३ **वहथ**=प्राप्नुथ ६ ६५ ४ **वहथः**=प्राप्नुथ १ ११९ ३ **वहध्वे**= प्राप्नुत ५ ६० ७ वहत ५ ५२ १३ **वहन्ति**=चालयन्ति १ १६४ ३ प्रापयन्ति १ १६४ १४ प्राप्नुवन्ति १ ५० १ **वहन्तु**=प्राप्नुवन्तु प्रापयन्तु वा ६ ४४ १९ गमयन्तु ५ ३१ ९ **वहन्ते**=प्राप्नुवन्ति ५ ५८ १ **वहसि**=धारण करता है स० वि० २०८, अथर्व० ९ ५ १७ प्राप्नोषि १८ ६२ **वहसे**=प्राप्नोषि प्रापयसि वा ५ ३९ ५ **वहातः**=प्राप्नुत ३ ४३ ४ वहेताम् ३ ३५ २ **वहाते**=वहेताम् ५ ३७ ३ उठा सकते है स० वि० १०५, ५ ३७ ३ **वहान्**=वहन्तु प्राप्नुवन्तु २० ५६. समन्तात् प्राप्नुयु १ ८४ १८ **वहामि**=प्राप्नोमि प्रापयामि वा ५ ४६ १ **वहासि**=प्राप्नुया १ ७४ ६ **वहेथे**=प्राप्नुथ १ १८० ९ प्रापयत १ १३५ ८ प्रापयेताम्, प्र०—अत्र पुरुषव्यत्यय ४ ४५ ३ **वहेयुः**=प्राप्नुवन्तु ६ ३७ ३ **वहतः**=प्रापयत ३३ ७८ प्राप्नुत १ ८४ २ धरत ५ ४१ ७ [वह प्रापणे (भ्वा०) धातोर्लोट्। अन्यत्र लट्, लेट्, लिङ, लङ् च। वहते गतिकर्मा निघ० २ १४]

वहतः वहनशीला (शक्तय) ३ ७ ४ [वह प्रापणे (भ्वा०) धातो शतृ। विभक्तिव्यत्यय]

वहतुम् वहति प्राप्नोति स्त्रियमिति वहतुर्भर्त्ता तम्, भा०—स्वाभीष्ट पतिम् १७ ९७ वोढारम् (भा०—स्वसदृश पतिम्) ४ ५८ ९ प्रापकम् (जनम्) १ १८४ ३

वहतू=प्रापकौ (यजमानपुरोहितौ (७ १ १७ [वह प्रापणे (भ्वा०) धातो 'एधिवह्योश्चतु' उ० १ ७७ सूत्रेण चतु। वहतुम्=वहनम् नि० १२ ११]

वहन् प्राप्नुवन् प्रापयन्वा (रथ=विमानादियानम्) ५ ७७ ३ **वहन्तः**=उपदेशेन प्राप्नुवन्त (मनुष्या) १ ६९ ५ ब्रह्मचर्यादि तप का आचरण करते हुए (मनुष्य लोग) स० प्र० ४२३, ९ ८३ १ [वह प्रापणे (भ्वा०) धातो शतृ]

वहन्ता प्रापयन्तौ (वायुविद्युतौ) ६ ६२ ४ प्राप्नुवन्तौ (अश्विनौ=सभासेनेशौ) १ ११६ १९ [वह प्रापणे (भ्वा०) धातो शत्रन्ताद् द्विवचनस्याकारादेश]

वहन्ती प्रवाह प्रापयन्त्य (नद्य) २ ३५ ९ प्रापयन्ती स्वादिष्ठा आप २ ३४ [वह प्रापणे (भ्वा०) धातो शत्रन्तात् ङीप् स्त्रियाम्]

वहमानः प्राप्नुवन् प्रापयन् वा (सूर्य) ७ ४५ १

वहमाना=नयन्तो धूर्त्ता (शत्रव) १ १७४ ६ [वह प्रापणे (भ्वा०) धातो शानच्]

वहमाना प्रापयन्तौ (विद्युदाघातौ) ५ ३१ ९ [वह प्रापणे (भ्वा०) धातो शानच्। ततो द्विवचनस्याकारादेशश्छान्दस]

त्वष्टा वाग्वीद सर्व ताष्टीव ऐ० २ ४ वाग्वै दध्यङ्ङाथर्वणः (यजु० ११ ३३) श० ६ ४ २ ३ वाग्वा अर्बुदम् तै० ३ ८ १६ ३ वाग्वै भर्ग श० १२ ३ ४ १० वागेव भर्ग गो० पू० ५ १५ वाग्वा उत्तरनाभि श० १४ ३ १ १६ वागुदय-नीयम् कौ० ७ ६ वाग् वामभृत् श० ७ ४ २.३५ वाग्वै शर्म (ऋ० ३ १३ ४) ऐ० २ ४० वाग्वै स्रक् श० ६ ३ १ ८ वागेवादाभ्य (ग्रह) श० ११ ५ ६ १ वाग्वै सीताममर श० ७ २ ३ ३ वागिति श्रोत्रम् जै० उ० ४ २२ ११ वाग्वा इन्द्र कौ० २ ७ वाग्वैन्द्री ऐ० २ २६ एतद्ध वा इन्द्राग्न्यो प्रिय धाम यद् वागिति ऐ० ६ ७ गो० उ० ५ १३ अग्निर्मे वाचि श्रित तै० ३० १० ८ ४ सा या सा वागग्निस्स जै० उ० १ २८ ३ सा या सा वाग् आसीत् सोऽग्निरभवत् जै० उ० २ २ १ या वाक् सोऽग्नि गो० उ० ४ ११ वागेवाऽग्नि श० ३ २ २ १३ वाग्वाऽअग्नि श० ६ १ २ २८ जै० उ० ३ २ ५ तपो मे तेजो मे ऽन्नम् मे वाङ् मे । तन्मे त्वयि (अग्नौ) जै० उ० ३ २० १६ वाग्वाऽअग्न्य (अग्ने) स्वो महिमा श० १४ २ १७ वाग्वा ऽअस्य (प्रजापते) स्वो महिमा श० २ २ ४ ४ प्रजापतिर्वा इदमेक आसीत्तस्य वागेव स्वमासीद् वाग् द्वितीया स ऐक्षते मामेव वाच विसृजा इय वा इद सर्व विभवन्त्येष्यतीति स वाच व्यसृजत काठकसहितायाम् १२ ५ प्रजापतिर्हि वाक् तै० १ ३ ४ ५ वाग्वि प्रजापति श० १ ६ ३ २७ वाग्वै प्रजापति श० ५ १ ५ ६ प्रजापतिर्वै वाक्पति श० ३ १ ३ २२ तदेता वा ऽअस्य (प्रजापते) ता पञ्च मर्त्यास्तन्व आसन् लोम त्वङ् मासमस्थि मज्जाथैता अमृता मनो वाक् प्राणश्चक्षु श्रोत्रम् श० १० १ ३ ४ वाग्वा ऽइद कर्म प्राणो वाचस्पति श० ६ ३ १ १६ नमो वाचे प्राणपत्न्यै स्वाहा ष० २ ६ वाक् च वै प्राणश्च मिथुनम् श० १ ४ १ २ सा ह वागुवाच हे प्राण यद्वा ऽअह वसिष्ठा ऽस्मि त्व तद् वसिष्ठोऽसीति श० १४ ६.२.१४ वाग्वातस्य पत्नी गो० उ० २ ६ वाग्वै वायु तै० १ ८ ८ १ ता० १८ ८ ७ तस्मात् सर्वे प्राणा वाचि प्रतिष्ठिता श० १२ ८ २ २५ तस्या (वाच) उ प्राण एव रस जै० उ० १ १ ७ यावद्वै प्राणेष्वापो भवन्ति तावद्वाचा वदति श० ७ ३.५.१६ वाक् च वै मनश्च देवाना मिथुनम् ऐ० ५ २३ तस्य (मनस) एषा कुल्या यद्वाक् जै० उ० १ ५८ ३ वाग्दैवत्य साम वाचो मनो देवता जै० उ० १ ५६ १४ वाग्वै मनसो ह्रसीयसी श० १ ४ ४ ७ अपरिमिततरमिव हि मन परिमिततरेव हि वाक् श० १.४ ४ ७ मनो ह पूर्वं वाचो यद्धि मनसाभिगच्छति तद्वाचा वदति ता० १ १ १ ३ वागिति मन जै० उ० ४ २२ ११ वाक् च वै मनश्च हविर्धाने कौ० ६ ३ सा या सा वागसौ स आदित्य श० १० ५ १ ४ वागिति चन्द्रमा जै० उ० ३ १३ १२ वाग्घ चन्द्रमा भूत्वोपरिष्टात् तस्थौ श० ८.१.२ ७. वाग् वै देवाना मनाना गो० २ १०. कौ० १० ६ वाग्यज्ञस्य (रूपम्) श० १२ ८ २.४. वाग्घि यज्ञ श० १ ५ २ ७ वाग्वै यज्ञ गो० ५ २४ श० १.१.२ २. वागु वै यज्ञ श० ११.४ ११ वाचो रसो यज्ञायज्ञीयम् (साम) ता० १८ ५.२१. वाग् यज्ञायज्ञीयम् (साम) ता० ५.३ ७ वाग्वै रूपम् (साम) ता० १६.५ १६ वाग्यज्ञस्य होता गो० २ ५ २८ वाग्वै यज्ञस्य होता श० १२.८.२ २३ वाग्घोता श० १ ५ १ २१ गो० उ० ५.४. वागेव होता गो० पू० २ १०. गो० उ० ३.८ वाग् वै होता (यजु० १३ ७) कौ० १३ ६ वाग्घोता षड् होतृणाम् तै० ३ १२ ५ २ अग्निर्वै होताधिदेवत वागध्या-त्मम् श० १२ १ १ ४ गो० पू० ४.४ वाग्वै हविष्कृत् श० १ १ ४ ११. उद्गातारो वै वाचे भागधेय कुर्वन्ति ता० ६.७ ५ वाक् सर्व ऋत्विज. गो० उ० ३.८ वाचा पशून् दाधार तस्माद् वाचा सिद्धा वाचाहूता आयन्ति तस्माद्ध नाम जानते ता० १०.३ १३ त्र्यावृद् वै० वाक् ता० १० ४ ६.६ त्रेधा विहिता हि वाग्-ऋचो यजूꣳषि सामानि श० ६ ५ ३.४ सा वाऽएषा वाक् त्रेधा विहिता ऋचो यजूꣳषि सामानि श० १० ४ ५ २ वागिति सर्वे देवा जै० उ० १.६ २ वागेव देवा श० १४ ४ ३.१३ वाग् देव. गो० पू० २ १० वज्र एव वाक् ऐ० २ २१ वाग्वि वज्र ऐ० ४ १ वज्रस्तेन यद् वाक् ऐ० २ १६ वाक् च ह वै प्राणापानौ च वषट्कार गो० उ० ३ ६ वाक् च वै प्राणापानौ च वषट्कार ऐ० ३ ८ वाग्वै वषट्कारो वाग्रेत श० १ ७ २ २१ वागु हि रेत श० १ ५ २ ७ शीर्ष्णो ह्ययमधि वाग् वदति श० १ ४ ४ ११ वाग्घृदये (श्रिता) तै० ३ १० ८ ४ तदेतत् तुरीय वाचो निरुक्त यन्मनुष्या वदन्ति श० ४ १ ३ १६ वाग्वै देवाना (पुरान्नमास) तै० १ ३ ५ १ वाग् वै वाजस्य प्रसव तै० १ ३ २ ५ वाग् योनि ऐ० २ ३८ उदीचीमेव दिशम् । पथ्यया स्वस्त्या प्राजानस्तस्मादत्रोत्तरा हि वाग् वदति कुरु पचालत्रा श० ३ २ ३ १५ तस्मादुदीच्या दिशि प्रज्ञाततरा वागुद्यत उदञ्च उ एव यन्ति वाच वाच शिक्षितु यो वा तत आगच्छति तस्य वा शुश्रूषन्त इति कौ० ७ ६. अयातयाम्नी वा ऽइय वाक् श० ४५ ८ ३ वागु सर्वं भेषजम् श० ७ २ ४ २८ प्रादेशमात्र हीदमभिवाग्

१ ८ ६ समुच्चये ७ २६ विकल्पे १ ७१ ६ अन्यत्र १ १० ८ ७ विचारणे १ ८ ३ ६. [वा विचारणार्थे समुच्चयार्थे नि० १ ५]

वाक् वक्ति यया सा वाणी १८ २६ उच्यते यया सा ३ ८. यो वदति स (प्रजापति =जीव) ३९ ५ कर्मेन्द्रियाणामुपलक्षणम् २२ ३३ सब शास्त्र के उपदेशक, अनन्तविद्यास्वरूप (ईश्वर) आर्याभि० २ १८, ५ ३३ सत्य प्रिय वाणी अथर्व० १२ ५ ७, स० वि० १४४ **वाचम्**= वचन्ति वाचयन्ति सर्वा विद्या यया ताम्, सत्यलक्षणा वेदचतुष्टयीम् २ १८ वक्त्यनया ता वाणीम् ६ १४ विद्याधर्मसत्यान्विता वाणीम् १ १ ३० ६ उत्तम वाणी को स० वि० ८०, अथर्व० ११ ५ २४ उपदेशम् ६ २१ ११ ऋग्वेदादि चारो वेदो की वाणी को स० प्र० ६७, २६ २ सुखदायक वाणी को स० वि० १४१, अथर्व० ३ ३० ३ **वाचा**=वेदवाण्या स्वकीयया वा ३ ४७ **वाचे**= वागिन्द्रियहोमाय ३९ ३ वेदार्थसुशिक्षायुक्तवाणीविज्ञानाय ९ ३९ [वच परिभाषणे (अदा०) धातो 'क्विब् वचिप्रच्छिश्रि०' उ० २.५७ सूत्रेण क्विप् धातोर्दीर्घत्व सम्प्रसारणाऽभावश्च। वाक् कस्माद् वचे नि० २ २३ वाचि आस्ये नि० ८ २१ वाक् वाङ्नाम निघ० १ ११. वाक् पदनाम निघ० ५.५ वाग्वै गौ (यजु० १२ ६८ श० ७ २ २ ५ वाग्वै धेनु गो० पू० २ २१ ता० १८ ९ २१ वाच धेनुमुपासीत। तस्याश्चत्वार स्तना स्वाहाकारो वषट्कारो हन्तकार स्वधाकारस् तस्यै द्वौ स्तनौ देवा उपजीवन्ति स्वाहाकार च वषट्कार च हन्तकार मनुष्या स्वधाकार पितरस्तस्या प्राण ऋषभो मनो वत्स श० १४ ८ ९ १. वाग्वै शबली ता० २१ ३ १ वाक् तु सरस्वती ऐ० ३ १ वागेव सरस्वती ऐ० २ २४ वाग्घि सरस्वती ऐ० ३ २ वाग्वै सरस्वती कौ० ५ २ ता० ६ ७ ७ श० २ ५ ४ ६. तै० १ ३ ४ ५ गो० उ० १ २० ऐ० ६ ७ वाग्वै सरस्वती पावीरवी ऐ० ३ ३७ सरस्वती वाचमदधात् तै० १ ६ २ २. अथ यत् स्फूर्जयन् वाचमिव वदन् दहति तदस्य (अग्ने) सारस्वत रूपम् ऐ० ३ ४. सा (वाक्) ऊर्ध्वो दातनोद् यथापा धारा सततैवम् (सरस्वती= वाक्) ता० २० १४ २ वाग्वै समुद्र ता० ७ ७ ९ वाग्वै समुद्रो मन =समुद्रस्य चक्षु ता० ६ ४.७ वाग्वै समुद्रो (ऋ० ४ ५८ १) न वै वाक् क्षीयते न समुद्र क्षीयते ऐ० ५ १६ वाग्वै सरिर छन्द (यजु० १५ ४) श० ८ ५ २ ४ वाग्वै सरिरम् (यजु० १३ ५३) श० ७ ५ २ ५३. वाग्वै सोमक्रयणी (गौ) निदानेन श० ३ २ ४.१० वाग्वाऽएषा निदानेन यत्साहस्री (गौ) तस्य। एतत् सहस्र वाच प्रजातम् श० ४ ५ ८ ४ तदाहु किं तत् सहस्रम् (ऋ० ६ ६९ ८) इतीमे लोका इमे वेदा अथो वागिति ब्रूयात् ऐ० ६.१५ वाग्वै सिनीवाली (यजु० ११ ५५) श० ६ ५ १ ९ वाक् सावित्री गो० पू० १ ३३ जै० उ० ४ २७ १५ वाग्वै सार्पराज्ञी कौ० २७ ४ वागेव सुपर्णी (माया) श० ३ ६ २ २ वाग्वाव शतपदी ष० १ ४ वाग्वै रेवती श० ३ ८ १ १२ वागषाढा श० ६ ५ ३ ४ वाग्वाऽअषाढा श० ७ ४ २ ३४ वाग्वै पथ्या स्वस्ति कौ० ७ ६ श० ३ २ ३ ८ वाग्घ्येषा (पथ्या स्वस्ति) श० ३ २ ३ १५ जूरसि (यजु० ४ १७) (जू) इत्येतत् ह वा अस्या (वाच) एक नाम श० ३ २ ४ ११ तस्यै (वाचे) जुहुयाद् वेकुरा नामासि ता० ६ ७ ६ वाग्वै धिषणा (यजु० ११ ६१) श० ६ ५ ४ ५ वाग्वै मति (यजु० १३ ५८) वाचा हीद सर्व मनुते श० ८ १ २ ७ वाग्वै बृहती श० १४ ४ १ २२ यदस्यै वाचो बृहत्यै पतिस्तस्माद् बृहस्पति जै० उ० २ २ ५ बृहस्पति (एवैन) वाचा (सुवते) तै० १ ७ ४ १ अथ बृहस्पतये वाचे नैवार चरु निर्वपति श० ५ ३.३ ५ वाग्वै राष्ट्री ऐ० १ १९ इय (पृथिवी) वै वागदो (अन्तरिक्षम्) मन ऐ० ५ ३३ इय (पृथिवी) वै वाक् श० ४ ६ ९ १६ वागिति पृथिवी जै० उ० ४ २२ ११ वागेवाय (पृथिवी) लोक श० १४ ४ ३ ११ वागित्यन्तरिक्षम् जै० उ० ४ २२ ११ वागिति द्यौ जै० उ० ४ २२ ११ वाग्वै लोकम्पृणा (इष्टका) श० ८ ७ २ ७ वाग्वै विराट् श० ३ ५ १ ३४ वाग्वै विश्वामित्र कौ० १० ५ वाग्वै विश्वकर्मऽर्षि (यजु० १३ ५८) वाचा हीद सर्वं कृतम् श० ८ १ २ ९ वागेव सस्तुत् छन्द (यजु० १५ ५) श० ८ ५ २ ५ वाग्वा अनुष्टुप् ऐ० १ २८ श० १ ३ २ १६ गो० उ० ६ १६ वागनुष्टुप् कौ० ५ ६ श० १० ३ १ १ तै० १ ८ ८ २ ता० ५ ७ १ महिषी हि वाक् श० ६ ५ ३ ४ वागित्यृक् जै० उ० १ ९ २ वागृक् जै० उ० ४ २ ३ ४ सा या सा वागृक् सा जै० उ० १ २५ ८ वागेवऽर्ग्वेद श० १४ ४ ३ १२ वागेवऽर्चश्च सामानि च मन एव यजूꣳषि श० ४ ६.७ ५ वाग् ब्रह्म गो० पू० २ १०, वाग्घि ब्रह्म ऐ० २ १५ वाग्वै ब्रह्म ऐ० ६ ३. श० २ १ ४ १० वागिति तद् ब्रह्म जै० उ० २ ९ ६ सा या सा वाग् ब्रह्मैव तत् जै० उ० २ १३ २ ब्रह्मैव वाच परम व्योम तै० ३ ९ ५.५ वाग्वै ब्रह्म च सुब्रह्म चेति ऐ० ६ ३ वाग्वै सुब्रह्मण्या ऐ० ६ ३ वागुक्थम् ष० १ ५ वाग्घि शस्त्रम् ऐ० ३ ४४ वाक् शस ऐ० २ ४ गो० उ० ६ ८ वाग्वै रथन्तरम् ऐ० ४ २८. वाग्वै

वदति श० ६ ३ १ ३३ सेय वागृतुपु प्रतिष्ठिता वदति श० ७ ४ २ ३७ तस्मात् सवत्सरवेलाया प्रजा (शिशव) वाच प्रवदन्ति श० ७ ४ २ ३८ स (प्रजापति) वाचमयच्छत् स सवत्सरस्य परस्ताद् व्याहरद् द्वादशकृत्व ऐ० २ ३३ वाक् सवत्सर सा० १० १२ ७ सर्वां वाच पुरुषो वदति ता० १३ १२ ३ ता वनस्पतयश्चतुर्द्धा वाच विन्यदधुर्दुन्दुभौ वीणायामक्षे तूणवे तस्मादेषा वदिष्ठैषा वल्गुतमा वाग्या वनस्पतीना देवाना ह्येषा वागासीत् ता० ६ ५ १३. परमा वा एषा वाग्या दुन्दुभौ ता० १ ३ ६ २ एषा वै परमा वाग् या सप्तदशाना दुन्दुभीनाम् श० ५ १.५ ६ एतद् वाचश्छिद्र यदनृतम् ता० ८.६ १३ वाचो वा एतौ स्तनौ सत्यानृते वाव ते गो० उ० ४ १६ वाचो वाव तौ स्तनौ सत्यानृते वाव ते ऐ० ४ १ एतद्वै वाचो जित यद् ददामीत्याह ऐ० ८ ६ एकाक्षरा वै वाक् ता० ४ ३ ३ योषा हि वाक् श० १ ४ ४ ४ योषा वा ऽइय वाग् यदेन'न युविता श० ३ २ १ २२ वागिति स्त्री जै० उ० ४ २२ ११]

वाकम् अथर्ववेदम् यजु १ १६४ २४ **वाकाः**=उच्यन्ते यास्ता (आशिष =इच्छासिद्धय) १७ ५७ **वाकेन**=यजुषा १ १६४.२४ [वच परिभाषणे (अदा०) धातोर्घञ् । 'चजो कु ०' इति कुत्वम्]

वाक्पतिः यो वाचो वेदविद्याया पति स्वामी पालयिता स (परमात्मा) ४४ [वाच्-पतिपदयो. समास । प्रजापतिर्वै वाक्पति श० ३ १ ३ २२ वाक्पतिर्होता तै० आ० ३ ११ अय वाव वाक्पतिर्योऽय (वायु) पवते श० ४ १ ३ १५]

वाघतः यज्ञविद्यानुष्ठानेन सुखसम्पादिन ऋत्विज १ ३ ५ मेधावी (सज्जन), प्र०—वाघत इति मेधाविनाम निघ० ३ १५, ३ २ १ ये वाचा दोषान् घ्नन्ति ते मेधाविन (ऋत्विजो जना) ३ ३७ २ सुशिक्षिताभिर्वाग्भिरविद्या हन्यते येन स मेधावी (अ०—विद्वान् जन) १५ २२ यश्शिक्षितया वाचा हन्ति जानाति स (इन्द्र =विद्वान् जन) २० ८२ वाग्विद्यायुक्ता (ऋभव =मेधाविनो जना) १ ११० ४ **वाघते**=वाक् हन्यते ज्ञायते येन तस्मै विदुष ऋत्विजे मनुष्याय १ ३१ १४ [वाघत मेधाविनाम निघ० ३ १५ ऋत्विङ्नाम निघ० ३ १८ वाघत वोढारो मेधाविनो वा नि० ११ १६]

वाचस्पतिम् वाचो वेदवाण्या पालकम् (राजानम्) १७ २३ [वाच्-पतिपदयो समासे षष्ठ्या अलुक् । वाचस्पति =वाच पाता वा पालयिता वा नि० १० १७ वाचस्पतिर्होता मै० १ ६ १ यो वै वाचो ऽध्यक्ष स वाचस्पति मै० २ २ ५.]

वाच्यः वाचो भाव कर्म्म वा १३ ५८ [वाच्प्राति० भावे कर्मणि वा ब्राह्मणादित्वात् ष्यञ् । ब्राह्मणादिराकृतिगण]

वाजजठरः वाजो क्षुद्रवेगो जठरे यस्मात् स (घर्म =प्रताप) ५.१६.४. [वाज-जठरपदयो समास । वाज इति व्याख्यास्यते]

वाजजित् वाजमन्न जयति येन स. (अग्नि), प्र०—वाज इत्यन्ननामसु पठितम् निघ० २ ७. अत्र 'कृतो बहुलम्०' इति करणे क्विप् २ ७ वाज सर्वस्य वेग जयति स ईश्वर. वाज जयति येन वा स भौतिक (अग्नि) २ १४ सङ्ग्राम विजयमान (सेनाध्यक्षो राजा) ६ ६ **वाजजितम्**=वाज युद्ध जयति येन तम् (भौतिकमग्निम्) २ ७ यो येन वा वाज सङ्ग्राम जयति तम् (ईश्वर भौतिकमग्नि वा) २ १४ **वाजजितः**=सङ्ग्राम जेतु शीला (जना) ६ ६ सङ्ग्राम जयन्त (वाजिन =योद्धृजना) ६ ६ विजितसङ्ग्रामा (विद्वासो राजपुरुषा) ६ १६ [वाजोपपदे जि जये (भ्वा०) धातो क्विप् । वाजजिद् (साम) भवति सर्वस्याप्त्यै सर्वस्य जित्यै ता० १३ ६ २०]

वाजदा विज्ञानप्रदौ (अध्यापकोपदेशकौ) १ १३५ ५ [वाजोपपदे डुदाञ् दाने (जु०) धातो क । ततो द्विवचनस्याकार]

वाजदाव्नाम् वाजस्य विज्ञानस्याऽन्नस्य दातॄणामुपदेशकाना वा १ १७ ४ [वाजोपपदे डुदाञ् दाने (जु०) धातो कर्त्तरि वनिप् । तत षष्ठी]

वाजदाः यो वाजमन्नादिक ददाति स (इन्द्र =ऐश्वर्यवान् विद्वान्) ३ ३६ ५ [वाजोपपदे डुदाञ् दाने (जु०) धातो कर्त्तरि क्विप्]

वाजपतिः अन्नाद्यधिष्ठाता, भा०—अन्नवान् (भा०—पुरुष) १८ ३३ अन्नादिरक्षक (जन) १८ ३४ अन्नादीना स्वामी (अग्नि) ४ १५ ३ अन्नादिरक्षको गृहस्थ इव ११ २५. [वाज-पतिपदयो समास । वाज इति व्याख्यास्यते एष (अग्निः) हि वाजाना पति ऐ० २ ५]

वाजपस्त्यः वाजानि अन्नानि पस्त्ये गृहे यस्य स (देव =विद्वज्जन) ६ ५८ २ [वाज-पस्त्यपदयो समास । पस्त्य गृहनाम निघ० ३.४ वाजपस्त्यम्=वाजपतनम् नि० ५ १५]

वाजपेशसम् वाजस्य विज्ञानस्य पेशो रूप यस्या ताम्

अन्नाना सम्भक्ततमे नि० ६ ३५]

वाजसातये वाजस्य वेगस्य सम्भजनाय ३३ ७५ युद्धविभागाय पदार्थविभागाय वा १ १३०.१ वाजस्य सङ्ग्रामस्य सम्यक् सेवनाय २ ३१.३ धनादिसविभागाय ३ ३७ ५ सङ्ग्रामान्नादीना विभागाय वा ५ ३५ ६ विज्ञानस्य धनस्य वा प्राप्तायाऽथवा सङ्ग्रामाय ६ ५३ ४ अन्नादीना विभागो यस्मिँस्तस्मै (न्यायव्यवहाराय) ६ ५७ १ सङ्ग्रामविभाजिकायै (धिये=प्रज्ञायै) ६ ५३ १ वाजाना वेगादीना सम्भागाय ३३ ९१ परोपकार के अर्थ विज्ञान और अन्न आदि के दान के लिए स० वि० १४०, अथर्व० १४ २ ७२ **वाजसातौ**=वाजान् धनाद्यान् पदार्थान् सनन्ति विभजन्ति यस्मिँस्तस्मिन् सङ्ग्रामे ३ ३० २२ विज्ञानाविज्ञान-सत्यासत्यविभाजके (भरे=युद्धे) ३ ३४ ११ पदार्थाना विभागविद्यायाम् ३ ३९ ९ वाजानामन्नादीना विभागो यस्मिँस्तस्मिन् (भरे=पोषणे) ३ ३६ ११ वाजान्यन्नानि सम्भजन्ति यया तस्या युधि ३६ ११ स्वस्य स्वस्याऽशस्य दानमये व्यवहारे ३ ४९ ५ [वाज-साति-पदयो समास । वाज इति व्याख्यातम् । साति=षण सम्भक्तौ (भ्वा०) धातो स्त्रिया क्तिन् । 'जनसनखना सञ्झलो' अ० ६ ४ ४२ सूत्रेणाकारादेश । वाजसातौ सग्रामनाम निघ० २ १७ वाजसातये अपत्यजननाय चान्नससननाय च नि० १२ ४५]

वाजसाम् वाजस्याऽन्नादेर्विभाजिकाम् (धिय=प्रज्ञाम्) ६ ५३ १० [वाजोपपदे षण सम्भक्तौ (भ्वा०) धातोर्विट् । 'विड्वनोरि' त्याकारादेश । स्त्रिया टाप्]

वाजसाः वाजान् सङ्ग्रामान् सनन्ति सम्भजन्ति येन स (पराक्रम) ९ ६ यो वाजान् सग्रामान् विभजति स (वीरसेनापति) ९ ५ [वाजोपपदे षण, सम्भक्तौ (भ्वा०) धातो कर्त्तरि विट् । 'विड्वनोरि' त्याकारादेश]

वाजा अन्नानि ६ ४८ ४ [वाज इति व्याख्यातम् । ततश्शेर्लोपश्छन्दसि]

वाजासः अन्नाद्यैश्वर्ययोगा ४ ८ ७ वेगवन्त (विद्वज्जना) ५ ९ २ विज्ञानवन्त (ऋभव=प्राज्ञा) ४ ३५ ६ [वाजप्राति० जसोऽसुक्]

वाजिन् जिज्ञासो (विद्या पिपठिषुछात्र) २३ १५ वेगवन् (अ०—सेनाध्यक्ष राजन्) ९ ६ शास्त्रोक्तक्रिया-कुशलताबोधयुक्त (राजन्) ९ ८ प्रशस्तज्ञानयुक्त विद्वन् ११ १२ प्रशस्तविज्ञानवन् (अ०=विद्वन्सभेश राजन्) ११ १६ प्राप्तैश्वर्य (अ०—विद्वज्जन) ११ २१ अश्व इव वेगादिगुण सेनाधीश २९ १६. प्रशस्तशास्त्रयोगाभ्यासकृत्य-सहित (अ०—सेनाध्यक्ष राजन्) ९ ९. **वाजिनम्**=वाजिना विज्ञानवतामिदमवयवभूत विज्ञानम् १३ ३९ ज्ञानबल-प्रदम् (आदित्यम्) ६ ५५ ४ विज्ञानयुद्धविद्याकुशलम् (सेनाध्यक्षम्) १.१०९ ४ बहूनि वाजा अन्नादीनि यस्मिँस्त-माहारम् १ १६२ १२ बहुवेगवन्तम् (राजजनम्) ४ ३८ २ अश्वम् १ १२९ २ धार्मिक शूरवीर मनुष्य प्राप्तिनिमित्त सूर्यलोक वा. प्र०—वाजिन इति पदनाम निघ० ५ ६ अनेन युद्धेषु प्राप्तवेगहर्षा शूरा सूर्यलोका वा गृह्यन्ते १ ४ ८ प्रशस्तज्ञानवन्तम् (जनम्) १ १२९ १ वेगवन्तमश्वम् २५ ३५ विजयप्रापकम् (इन्द्र=ईश्वरम्), प्र०—वाजिन इति पदनामसु पठितत्वात् प्राप्त्यर्थोऽत्र गृह्यते १ ४ ९. प्रशस्तो वाजो वेगो यस्यास्ति तम् (पुरुषम्) १ ६४ ६ बलवन्तम् (सेनेशम्) १ १७६ ५ वाजा प्रशस्तानि अन्नानि विद्यन्ते येषु तेषामिद सार वस्तु १९ २१ बह्वन्नसाररूपम् १९ २३. वाजिन=गन्तु योग्यस्य (सूर्यस्य) २ २४ १० वेगगुणवतो जलादय १ १६२ १८ प्रकृष्टविज्ञानवन्त (सूरय=विद्वासो जना) २ २ ११ वाज प्रशस्त. परा-क्रमो बल वा येषा ते (अश्वा=अश्व इव वेगवन्तो जना) ९ ६ बहुविज्ञानाऽन्नबलवेगयुक्ता (विप्रा=मेधावि-जना) ७ ३८ ८ तुरङ्गा ३४ ३९ वाज परमोत्कृष्ट-विद्याबलाभ्यामात्मनो देहस्य प्रशस्तो बलसमूहो येषामस्ति ते विजानन्त (भा०—मनुष्या) १ ११ २ प्रशस्तो बोधो येषामस्ति ते (देवा=विद्वज्जना), प्र०—अत्र प्रशसार्थे इनि, गत्यर्थाद् विज्ञान गृह्यते १ २३ १९ प्रशस्तयुद्ध-विद्याविद सुशिक्षितास्तुरङ्गा ९ १६ प्रशस्तप्रज्ञा (राजपुरुषा) ९ १७ अश्वानग्न्यादीन्वा २९ ४३ ज्ञानवन्तो योद्धार ७ ३८ ७ **वाजी**=वेगवानश्व ११ १८ विज्ञान-वान् (औरस स्वगोत्रजो वा पुत्र) ७.४ ८ वेगबलादि-युक्त (तनय=पुत्र) ७ १ १४ बलवानश्व इव (अग्नि=विद्वज्जन) ४ १५ १ प्रशस्तविज्ञान (ब्रह्मणस्पति=राजपुरुष) २ २४ १३ विज्ञापको दिवस ५ १ ४ प्राप्त-नीति (अर्वा=विज्ञानयुक्त पुत्र) ११ ४४ बह्वन्नवान् (धार्मिको जन) ४ ३ १२ प्रशस्तो वेगोऽस्याऽस्तीति (अग्नि) १ ७४ ८ महाबलवान् और वेगवान् (ईश्वर) आर्याभि० १ ५२ ऋ० २ ८ १२ २ प्रशस्तो वाजो शास्त्र-बोधो यस्य स (इन्द्र=सेनापति) १७ ३७ वेग १ १६२ २१ [वाज इति व्याख्यातम् । ततो भूम्न्यर्थे प्रशसायामर्थे वा इनि । वाजिनम्=अन्नवन्तम् । नि० १० २८ वाजी अश्वनाम निघ० १ १४ वाजी वेजनवान्

वाजयन्ता वाजमन्नादिकमिच्छन्तौ (इन्द्राग्नी=वायु-विद्युतौ) ६ ६० १. गमयन्तौ (हरी=किरणौ) २ ११ ७ [वज गतौ (भ्वा०) धातोर्णिजन्ताच्छतृ । ततोद्विवचनस्याकारश्छान्दस । अथवा वाज अन्ननाम निघ० २ ७ बलनाम निघ० २ ९ तत इच्छायामर्थे क्यजन्ताच्छतृ]

वाजयन्ती प्रापयन्ती (विदुषी स्त्री) ५ १ ३ **वाजयन्तीम्**=सवलाना विद्याना प्रज्ञापिकाम् (धिय=प्रज्ञाम्) १ १०९१ सत्याऽसत्यविज्ञापयन्तीम् (गिर=वाचम्) ३ ६२ ८ **वाजयन्तीः**=ज्ञापयन्त्य (धिय =प्रज्ञा कर्माणि वा) ४ ४१ ८ [वज गतौ (भ्वा०) धातोर्णिजन्ताच्छतृ । तत. स्त्रिया ङीप्]

वाजयन्ती प्रज्ञापयन्त्यौ (उपसा=प्रात साय सन्धिवेले) ३ १४ ३ [वाजयन्तीति व्याख्यातम् । ततो द्विवचनस्य पूर्वसवर्णदीर्घश्छान्दस]

वाजयन्निव यथा गमयन् (अग्नि =विद्वज्जन) २ ८ १ [वाजयन्-इवपदयो समास]

वाजयुम् यो वाजयति वेगेन गच्छति तम् (रथम्) २ ३१ २ **वाजयुः**=यो वाज वेग कामयते स (सज्जन) २ २० १ य आत्मनो वाजमिच्छु (अपान्नपात्=सूर्याख्योऽग्नि) २ ३५ १ वाजमन्न कामयमान (मनुष्य) ५ १९ ३ वाज प्रशस्तमन्न धन वाऽऽत्मन इच्छति (धर्मात्माऽऽप्तो-विद्वान् राजाऽध्यापक परीक्षको वा) ७ ३१.३ [वज गतौ (भ्वा०) धातोर्णिजन्तादौणा० वाहु० उ । अथवा वाज-शब्दाद् इच्छायामर्थे क्यजन्तात् 'क्याच्छन्दसी' उयु प्रत्यय.]

वाजरत्ना वाजो वोधो रत्न धन ययोस्तौ (अध्यापकोपदेशकौ) ४ ४३ ७ [वाज रत्नपदयो समासे द्विवचनस्याकारादेशश्छान्दस]

वाजरत्ना विज्ञानधनप्राप्तिसाधिका (सुमति) ४ ४४ ७ **वाजरत्नाः**=धनधान्योन्नतिकरी (धिय =प्रज्ञा उत्तमानि कर्माणि वा) ६ ३५ १ [वाज-रत्नपदयो समासे स्त्रिया टाप्]

वाजरत्नाः विज्ञानादीनि रत्नानि येषान्ते (ऋभव =मेधाविजना) ४ ३४ २ वाजा अन्नादयो रत्नानि सुवर्णादीनि च येषान्ते (ऋभव) ४ ३५ ५ विज्ञानधनवन्त (पतय =स्वामिन) ५ ४९ ४ [वाज-रत्नपदयो समास । वाज अन्ननाम निघ० २ ७ वाज वलनाम निघ० २ ९]

वाजवत् वाजो वहुविध भोक्तव्यमन्नमस्त्यस्मिन् तत् (श्रव =विद्यासुवर्णादिधन च), प्र०—वाज इत्यन्ननाम निघ० २ ७ अत्र भूम्न्यर्थे मतुप् १ ९ ७ [वाजप्राति० भूम्न्यर्थे मतुप्]

वाजवतीः प्रशस्ता वाजा वेगादयो गुणा विद्यन्ते यासु नौकादिपु ता , प्र०—अत्र प्रशसार्थे मतुप् १ ३४ ३ प्रशस्तविज्ञानयुक्तान् (इप =अन्नादीन्) ६ ६० १२ **वाजवत्या**=वाज प्रशस्तमन्न युद्ध वा विद्यते यस्या तया (शक्ती=शक्त्या) १ ३१ १८ **वाजवत्यै**=वाज प्रशस्त ज्ञान विद्यते यस्या तस्यै (इपे=इच्छायै) १ १२० ९ [वाजप्राति० प्रशसायामर्थे मतुवन्तात् स्त्रिया ङीप्]

वाजवन्तम् वह्वन्नविज्ञानसाधकम् (रयिं=धनम्) ४ ३४ १० वाजा शुष्कान्नविशेपा विद्यन्ते यस्य तम् (विद्वासमध्यापकम्) ३ ५२ ६ [वाजप्राति० भूम्न्यर्थे मतुप्]

वाजश्रवसम् वाजो वेग श्रवोऽन्न यस्मात्तम् (अग्नि=पावकम्) ३ २ ५ **वाजश्रवसः**=वाजोऽन्न विद्या श्रवण च पूर्ण येषान्ते (प्रजाजना) ६ ३५ ४ [वाज-श्रवस्पदयो समास । श्रव अन्ननाम निघ० २ ७ धननाम निघ० २ १०]

वाजश्रुतासः वाज विज्ञान श्रुत यैस्ते (नर =नायका विद्यार्थिजना) ४ ३६ ५ [वाज-श्रुतपदयो समासे जसो ऽसुक्]

वाजसनिम् वाजस्य सनिर्विभागो यस्य तम् (रयिं=राज्यश्रियम्) २० ७९ अन्नविज्ञानविभाजकम् (इन्द्र=राजानम्) ३ ५१ २ [वाजोपपदे पण सम्भक्तौ (भ्वा०) धातो 'छन्दसि वनसनरक्षिमथाम्' अ० ३ २ २७ सूत्रेण इन् । अथवा वाज-सनिपदयो समास । सनि =पण सम्भक्तौ (भ्वा०) धातोरौणा० इन्]

वाजसातम अतिशयेन वाजाना विज्ञानादिपदार्थाना विभाजक (विद्वज्जन) ५ २० १ **वाजसातमम्**=यो वाजान् प्रशस्तान् वोधान् सम्भजते सोऽतिशयितस्तम् (विद्वज्जनम्) १ ७८ ३ वाजाना विज्ञानाना वेगानामतिशयेन विभाजकम् (विद्वास जनम्) ५ १३ ५ [वाजसाप्राति० अतिशायने तमप् । वाजसा =वाजोपपदे पण सभक्तौ (भ्वा०) धातो 'जनसनखनक्रमगमो विट्' अ० ३ २ ६७ सूत्रेण विट् । 'विड्वनोरनुनासिकस्यात्' अ० ६ ४ ४१ सूत्रेणाकारादेश]

वाजसातमा वाजस्य विज्ञानस्य धनस्य वाऽतिशयेन विभक्तारौ (इन्द्राग्नी=सभासेनेशौ) ३ १२ ४ वाजान् युद्धसमूहान् सनन्ति सम्भज्य विजयन्ते याभ्या तावतिशयितौ (अ०—स्त्रीपुरुषौ) १ २८ ७ [वाजसातम इति व्याख्यातम् । ततो द्विवचनस्याकारादेशश्छन्दसि । वाजसातमा=.

वाजेध्यायै वाजेनान्नेन युद्धेन वा इध्या दीपनीया सेना यज्ञपात्रे वा यया क्रिया तस्यै (सेनायै) वाजेन बहुसाधनसमूहेन सङ्ग्रामेण सेनया यज्ञेन वा प्रकाशनीयायै सत्यनीत्यै १ २६. [वाज-इध्यापदयो समास । इध्या= ञिइन्धी दीप्तौ (रुधा०) धातोर्बाहु० औणा० यक्। स्त्रिया टाप्]

वाजेभिः वाजैरन्नादिसामग्रीभि १ ११० ९ विज्ञानैरन्नै सङ्ग्रामैर्वा १ ११० ७ सर्वविद्याप्राप्तिनिमित्तैरन्नादिभि सह, प्र०—वाज इत्यन्ननाम निघ० २ ७, १ ३ १० विमानादियानै सह १ ५ ३. वेगविज्ञानादिगुणवद्भि. (महाशयै) ६ ३२ ४ [वाज इति व्याख्यातम् । ततो 'बहुल छन्दसी' ति भिस ऐसादेशो न भवति]

वाजे वाजे सङ्ग्रामे सङ्ग्रामे ७.३८ ८ युद्धे-युद्धे २१ ११ व्यवहारे व्यवहारे ६ ६१ १२ [वाजे पदस्य वीप्साया द्वित्वम् । वाजे सग्रामनाम निघ० २ १७]

वाञ्छन्तु अभिलषन्तु, भा०—अनुकूला स्यु १२ ११ [वाञ्छि इच्छायाम् (भ्वा०) धातोर्लोट् वाञ्छति कान्तिकर्मा निघ० २ ६]

वाट् वहन्ति सुखानि यया क्रियया सा वाट्, प्र०—निपातोऽयम् २ १८ क्रियार्थे २ २० सुष्ठु ३८ ६ [वाट् निपातोऽस्य चादिषु पाठात्]

वाट् येन वहति स (अग्नि) १८ ३८ वहनम् १८ ३६ अ०—धर्मप्रापणम् १८ ४३ **वाहः**=ये वहन्ति ते (विप्रा =मेधाविजना) ३ ३० २० [वह प्रापणे (भ्वा०) धातो 'वहश्च' सूत्रेण निरुपपदादपि ण्वि]

वाढे प्रापणे १ १८१ ७]

वाणम् वाणादिशस्त्राऽस्त्रसमूहम् १ ८५ १० वाणीम् ४ २४ ९ [वण शब्दार्थे (भ्वा०) धातो 'हलश्च' इति सज्ञाया घञ् । वाण वाङ्नाम निघ० १ ११ (वाण) शततन्त्रीको भवति ता० ५ ६ १३ अन्तो वै वाण. (वाद्य नाम) ता० ५ ६ १२ वाण. शततन्तुर्भवति तै० स० ७ ५ ९ २]

वाणिजम् वणिगपत्यम् ३० १७ **वाणिजाय**= वणिजा व्यवहारेषु कुशलाय (पुरुषाय) १६ १९ [वणिज्-प्राति० अपत्यार्थे कुशलार्थे वाऽण् । वणिक् पण्य नेनेक्ति नि० २ १७]

वाणी वाक् ७ ३१ ८ वेदवाक् ६ ६३.६ **वाणीः**= सप्तद्वारावकीर्णा वाच ३ ७ १ वेदचतुष्टयी १ ७ १ वेदवाच १ १६४ २४ [वण शब्दार्थे (भ्वा०) धातो 'इण् अजादिभ्य' अ० ३ ३ १०८ वा०सूत्रेण इञ् । तत स्त्रियां 'कृदिकारादक्तिन' इति ङीष् । वाणी वाङ्नाम निघ० १.११ वाणी =बहुनाद् वाचो वा वदनात् नि० ६.२]

वाणी उपदेशकाविव, प्र०—इञ् वपादिभ्य इति शब्दार्थाद् वणधातोरिञ् १.११९ ५. [वाणीति व्याख्यातम्]

वाणीची वाक् ५ ७५ ४ [वाणीची वाङ्नाम नि० १ ११]

वात इव वायुवत् २६ २२ [वात-इवपदयो समास]

वातचोदितः वायुना प्राणेन वा प्रेरित (विद्वज्जन) १ १४१ ७ [वात-चोदितपदयो समास. । चोदित = चुद सञ्चोदने (चुरा०) धातो क्त]

वातजूतः वायुना वेग प्राप्त (अग्नि) १ ६५ ४ वायुना प्राप्तवेग (अ०—सूर्य) ३३ ३० वातेन वायुना जूत. प्राप्तवेग (अग्नि =विद्युद्वद्वर्त्तमानो जीव) १.५८.४

वातजूताः=वात इव जूत शीघ्रगमन येषान्ते (कृषीवला) १ १४० ४ वायुना प्राप्ततेजस्का, भा०—येषा वायु प्रदीपकस्ते (अग्नय =पावका) ३३ २ वायुप्रेरितास्त्रसरेण्वादिपदार्था ४ ३३ १ [वात-जूतपदयो समास. । जूत =जवति गतिकर्मा (निघ० २ १४.) धातो क्त]

वातजूता वायुवद्वेगौ (अश्वौ) १ ९४ १० [वात-जूतपदयो समासे द्विवचनस्याकारादेशश्छान्दस]

वातजूतासः वायुरिव वेगवन्त (भामास =क्रोधा) ६ ६ ३ [वातजूत इति व्याख्यातम् । ततो जसोऽसुक्]

वातत्विषः वातस्य त्विट् कान्तिर्येषान्ते (मरुत = मनुष्या) ५ ५७ ४ वातविद्यया त्विष कान्तयो येषान्ते (मरुत) ५ ५.४३ [वात त्विष्पदयो समास । त्विष्= त्विष दीप्तौ (भ्वा०) धातो सपदादित्वात् क्विप्]

वातप्रमियः वातेन प्रमातु ज्ञातु योग्या (तरङ्गा) १७ ९५ या वात वायु प्रमिन्वन्ति ता (नदीप्रवाहा) ४ ५८.७ [वातोपपदे प्रोपसृष्टात् माङ् माने (जु०) धातो क्विप् । धातोरीकारादेशश्छान्दस । अथवा 'वातप्रमी' उ० ४ १ सूत्रेण वातोपपदे डुमिञ् प्रक्षेपणे (क्र्या०) धातोर्निपातनाद् रूपसिद्धि]

वातम् वायुम् २५ २ प्राप्तम् (रेत =वीर्यम्) १९ ८४ **वातस्य**=प्राणस्य १ १८१ १२ **वातः**=वाति गच्छतीति (वायु) १८ ४१ पवन १४ २० गन्ता (भृत्य) १५ ६२ बाह्यो वायु ८ ५८ मध्यो वायु १ १६१ १४ **वातान्**=वायुवद् वेगयुक्तान् (अराती =शत्रून्) ४ २७ २

नि० २ २८ यत् मद्ये वाजान्त्समजयत् तस्माद् वाजीनाम तै० ३ ६ २१ २ (हे ऽश्व त्व) वाज्यसि ता० १ ७ १ वाजिनो ह्यश्वा श० ५ १ ४ १५ (ग्रश्वो) वाजी (भूत्वा) गन्धर्वान् (ग्रवहत्) १० ६ ४ देवाश्वा वै वाजिन कौ० ५ २ देवाश्वा वै वाजिनो ऽत्र देवा साश्वा ग्रभीष्टा प्रीता भवन्ति गो० उ० १ २० ग्रग्निर्वायु सूर्य । ते वै वाजिन तै० १ ६ ३ ६ ग्रादित्यो वाजी तै० १ ३ ६ ४ इन्द्रो वै वाजी ऐ० ३ १८ पशवो वै वाजिन गो० उ० १ २० ऋतवो वै वाजिन कौ० ५ २ श० २ ४ ४ २२ गो० उ० १ २० छन्दासि वै वाजिन गो० उ० १ २० तै० १ ६ ३ ६ उक्थ्या वाजिन गो० उ० १ २२ इन्द्रिय वै वीर्य वाजिनम् ऐ० १ १३ योषा पयस्या रेतो वाजिनम् श० २ ४ ४ २१ रेतो वाजिनम् तै० १ ६ ३ १० पशवो वै वाजिनम् तै० १ ६ ३ १० एप (तार्क्ष्य) वै वाजी देवजूत ऐ० ४ २०]

वाजिन इव सुशिक्षितानश्वानिव ३ ४ ६ [वाजिन-इवपदयो समास । वाजी ग्रश्वनाम निघ० १ १४]

वाजिना ज्ञान-गमन-प्राप्तिरूपाणि (भा०—ब्रह्म-चर्याध्ययनमननानि) ३ २० २ वहुवेगविज्ञानयुक्तौ (तुरङ्गौ, ग्रध्यापकोपदेशकौ वा) ६ ६७ ४ वेगवन्तावश्वौ २ २४ १२ [वाजप्राति० मत्वर्थ इनि. ततस्तृतीया । विभक्तिव्यत्यय । ग्रथवा वाजिन्प्राति० द्विवचनस्याकारादेश]

वाजिनानि शीघ्रगमनानि १७ ४२ **वाजिनेषु**= वाजिनाना सङ्ग्रामाणामवयवेषु कर्मसु १३ ४८ [वाजिन्-प्राति० 'तस्येदम्' इत्यर्थेऽण् । तत प्रथमावहुवचनम् । वाजिन पदनाम निघ० ५ ६ वाजिनेषु वाग्ज्ञेयेषु वलवत्स्वपि नि० १ २०]

वाजिनि प्रशस्तविज्ञानयुक्ते (सरस्वति=विदुषि स्त्रि) ६ ६१ ६ विज्ञानवति (उपर्वद्वर्त्तमाने स्त्रि) ३ ६१ १. **वाजिनी**=वजितु प्राप्तु शील यस्या सा (प्राची=पूर्वा दिक्) ३ ६ १ **वाजिनीम्**=वलवेगवतीम् (ग्र०—सेनाम्) १.२६ [वाजप्राति० प्रशसायामर्थे इनि । तत स्त्रिया ङीपि सम्बुद्धौ रूपम् । ग्रथवा वज गतौ (भ्वा०) धातो-स्ताच्छील्ये णिनि । ततो ङीप् । वाजिनी उषोनाम निघ० १ ८]

वाजिनीवति वहवो वाजिन्य क्रिया विद्यन्ते यस्या-स्तत्सम्बुद्धौ (विदुषि स्त्रि) १ ४८ १६ वाजयन्ति ज्ञापयन्ति गमयन्ति वा यासु क्रियासु ता प्रशस्ता वाजिन्यो विद्यन्ते ऽस्या तत्सम्बुद्धौ (उप) १.९२.१५. विज्ञानक्रियायुक्ते सरस्वति=विद्यायुक्ते स्त्रि) ६ ६१ ४ वह्वन्नाद्यैश्वर्ययुक्ते (उष =प्रभातवेले) ३ ४ ३ ३ **वाजिनीवती**=प्रशस्त-विद्यायुक्ता (सरस्वती=सुसस्कृता वाक्) २० ८४ सर्वोत्तम क्रिया, विज्ञानयुक्त (वाणी) ग्रार्याभि० १ १८ ऋ० १ १ ६ १० प्रशस्तविज्ञानक्रियासहिता (देवी= विदुषी माता) ६ ६१ ४ सर्वविद्यासिद्धक्रियायुक्ता, वाजिन क्रियाप्राप्तिहेतवो व्यवहारास्तद्वती (सरस्वती=सर्वविद्या-प्रापिका वाक्), प्र०—वाजिन इति पदनाम निघ० ५ ६ ग्रनेन वाजिनी इति गमनार्था प्राप्त्यर्था च क्रिया गृह्यते १ ३ १० [वाजनीति पूर्वपदे व्याख्यातम् । ततो भूम्न्यर्थे प्रशसाया वा मतुवन्तात् स्त्रिया ङीप् । तत सम्बुद्धौ रूपम् । वाजिनीवती उषो नाम निघ० १ ८ वाजिनीवती ग्रन्नवति नि० १२ ६ वाजिनीवती ग्रन्नवती नि० ११ २६]

वाजिनीवतोः प्रशस्ता विज्ञानादियुक्ता सभा सेना च विद्यते ययोस्तयो (सभासेनेशयो) १ १२० १० **वाजिनी-वान्**=प्रशस्तवेगक्रियायुक्त (शिल्पिजन) १ १२२ ८ वेगक्रियाज्ञानयुक्त: (शिल्पी जन) ५ ३६ ६ [वाजिनी-शब्दात् प्रशसायामर्थे मतुन् । वाजिनीति व्याख्यातम्]

वाजिनीवसू यौ वाजिनीमन्नादियुक्ता सामग्री वास-यतस्तौ (ग्रश्विना=विद्यायुक्तौ महाविद्वासौ) ५ ७५ ३ धनधान्यप्रापकौ (सज्जनौ ५ ७४ ७ यौ विज्ञानक्रिया वास-यतस्तौ (ग्रश्विना=ग्रध्यापकोपदेशकौ) ५ ७८ ३ यौ वाजिनी वेगवती क्रिया वासयतस्तौ (शिल्पिजनौ) २ ३७ ५ उषोवत्प्रकाशवेगयोर्वसत (इन्द्रवायू=सूर्यपवनौ), प्र०— वाजिनीत्युषसो नामसु पठितम् निघ० १ ८, १ २ ५ यौ वाजिनी वह्वन्नादिक्रिया वासयतस्तौ (ग्रध्यापकोपदेशकौ) ५ ७४ ६ वाजिनीवसो=यो वाजिनीमुपस वासयति तत्सम्बुद्धौ (इन्द्र=विद्वन् जन) ३ ४२ ५ [वाजिनीति व्याख्यातम् । तदुपपदे वस निवासे (भ्वा०) धातोर् ग्रौणा० उ]

वाजिनेय. वाजिन्या ज्ञानवत्या ग्रपत्यम् (वाजी= ज्ञानी जन) ६ २६ २ [वाजिनीति व्याख्यातम् । ततोऽप-त्यार्थे 'स्त्रीभ्यो ढक्' ग्र० ४ १ १२० सूत्रेण ढक् । ढस्य स्थान एयादेश]

वाजिन्तमम् प्रशसिता वहवोऽतिशयिता वाजिनो विद्यन्ते यस्मिँस्तम् (रयि=धनम्) ४ ३७ ५ [वाजी ग्रश्वनाम निघ० १ १४ वाजिन्प्राति० ग्रतिशायने तमप् । 'नाद्घस्ये' ति नुडागम]

१ ३ ३ ४. प्राणो वै वामदेव्यम् श० ६ १ २.३८ पशवो वै वामदेव्यम् तां० ४ ८ १५ इद वा वामदेव्य यजमानलोको ऽमृतलोक स्वर्गो लोक ऐ० ३ ४६. उपहूत वामदेव्य सहान्तरिक्षेण श० १.८ १.१९ अन्तरिक्ष वै वामदेव्यम् तैं० १.१ ८ २ तां० १५ १२ ५ अन्तरिक्ष वामदेव्यम् श० २.१ ५ ७]

वामनम् ह्रस्वाङ्गम् ३० १० **वामनः**=वक्राङ्ग (पशु) २४ ७ **वामनाय**=वाम प्रशस्त विज्ञान विद्यते यस्य तस्मै पुरुषाय, प्र०—वाम इति प्रशस्यनाम निघ० ३ ८ अत्र 'पामादित्वान्न' अ०—५ २ १ १०, १६ ३० **वामना:**=वक्रावयवा (पशव पक्षिणो वा) २४ ८ [वाम प्रशस्यनाम निघ० ३ ८ ततो मत्वर्थे 'लोमादि-पामादि०' अ० ५ २ १०० सूत्रेण न । वामनो ह विष्णु-रास श० १ २ ५ ५ स हि वैष्णवो यद् वामन (गौ) श० ५ २ ५ ४ वैष्णवो वामन (पशु) श० १३ २ २ ६ वैष्णव वामनम् (पशुम्) आलभन्ते तैं० १ २ ५ १]

वामनीतिः वामा प्रशसिता नीतिर्यस्य स (इन्द्र = राजा) ६ ४७ ७ [वामा-नीतिपदयो समास । वामा= वामप्रशस्यनाम निघ० ३ ८ तत स्त्रिया टाप्]

वामभाजः प्रशस्यकर्मसेविन, भा०—माङ्गलिका सन्त (गृहपतय) ८ ६ ये वाम भजन्ति ते (प्रजाजना) ६ ७१ ६ प्रशस्तकर्मसेविनश्श्रेष्ठभोगा वा (सखाय = सुहृज्जना (३ ५५ २२ [वामोपपदे भज सेवायाम् (भ्वा०) धातो 'भजो ण्वि अ० ३ २ ६२ सूत्रेण ण्वि । वाम प्रशस्यनाम निघ० ३ ८]

वामम् वमत्युद्गिरति येन तम् (भा०—वायुम्), प्र०— 'टुवम उद्गिरणे' अस्माद्धातो 'हलश्च' इति घञ् उपधा-वृद्धिनिषेधे प्राप्ते 'अनाचमिकमिवमीनामिति वक्तव्यम्' अ० ७ ३ ३४ इति वार्त्तिकेन वृद्धि १ ३३ ३ प्रशस्य गृहाश्रम धर्म्मम् ८ ५ प्रशस्त-वस्तु ४ ५ १३ अत्युत्कृष्टम् (सुखम्) ६.३१ ६ श्रेष्ठ विज्ञानम्, भजनीय धनम्, प्राप्तव्यम् (न्यायम्) ४ ३० २४ प्रशस्त गुणकर्मसमूहम् ४ ५ सुरूपम् (प्रकाशात्मानम्) १ १४१ १२ अत्युत्कृष्टम् प्रशसनीयम्, प्रशस्यसुखम् (भा०—सुखम्) ६ ७१ ६ **वामस्य**=शिल्पगुणैः प्रशस्तस्य (विदुषो जनस्य) १ १६४ १ **वामानि**=वननीयानि सम्भजनीयानि धनानि ५ ८२ ६. **वामेन**=प्रशसितेन प्रकाशेन १ ४८.१ [टुवम उद्गिरणे (भ्वा०) धातो हलश्चे' ति घञ् । वाम प्रशस्यनाम निघ० ३ ८ वामम्=वननीयम् नि० ६ २२ वामम् वसूनि वननीयानि नि० ११ ४६. प्राणा वै वामम् श० ७.४.२.३५ वाम हि पशव ऐ० ५ ६ य वै गां यमश्व य पुरुष प्रश-मन्ति वाम इति न प्रशमन्ति तां० १३ ३ १६]

वामं वामम् प्रशस्य प्रशस्यम् (सत्यमुपदेशम्) ४ ३० २४. [वामम् पदस्य वीप्सायां द्वित्वम् । वाम प्रशस्यनाम निघ० ३ ८]

वामा प्रशस्ता वाक् १ ४०.६ [वाम. प्रशस्यनाम निघ० ३ ८ तत स्त्रिया टाप्]

वामा प्रशस्यानि कर्म्माणि ६ १.६ [वाम प्रशस्य-नाम निघ० ३ ८ तत. शेर्लोपश्छन्दसि]

वामी बहुप्रशस्तकर्म्मा (आप्तो राजा) ६ ४८ २० **वामी.**=प्रशस्ता (इष =अन्नाद्या) ३ ५३ १ [वाम प्रशस्यनाम निघ० ३ ८ ततो भूम्न्यर्थे (मत्वर्थे) इनि]

वायतस्य विज्ञानवत (उत्तमजनस्य) ७ ३३.२.

वायवः सर्वक्रियाप्राप्तिहेतव स्पर्शगुणा भौतिका प्राणादय, अ०—प्राणान्त करणेन्द्रियाणि, प्र०—वायुरिति पदनाम निघ० ५ ४ अनेन प्राप्तिसाधका वायवो गृह्यन्ते वा गतिगन्धनयो इत्यस्मात् 'कृवापा०' उ० १ १ अनेना-ऽप्युक्तार्थो गृह्यते १ १ विज्ञानबलयुक्ता (जना) २.११ १० **वायवे**=वायुवद् गत्यादिसिद्धये यद्वा वाति प्रापयति योगबलेन व्यवहारानिति वायुर्योगविचक्षणस्तस्मै तादृश-सम्पन्नाय ७ ८ बलवते (इन्द्राय=पुरुषाय) ५ ५१ ४ वायुवद्बलाय ५ ५१ ७. प्राप्तु योग्याय (इन्द्राय=धनाय) १ १४२ १२. वायुस्पर्शाय ३० २१ वायुविद्यायै २७.२३. पवनाय २२ ५ **वायुना**=स्पर्शवता गतिमता पवनेन सह १ १४ १० **वायुम्**=प्राणादिलक्षणम् ३३ ५५ वातम् ३३ १३ प्राणादिकम् ६ ४ ७ वेगवन्तम् (पवनम्) ५.४१ ६. **वायुः**=यो वाति स (पवन) ६ ४ ५ पवन इव बलवान् (परमात्मेव राजा) ३ ४६ ४ गमनागमनशील पवन १ २४ विज्ञानवान् अनन्तबल (ईश्वर) आर्याभि० २ ५४, ३२ १५ प्राण इव प्रिय. (अधिपति =स्वामीश्वरः) १४.१४ सूक्ष्म पवन, स्थूल पवन १ १३४ ३ बलिष्ठो बलप्रद. (ईश्वर) ३२ १५ अनन्तबलवत्त्वसर्ववातृत्वाभ्या परमेश्वरो वायुशब्दवाच्य (ईश्वर) ३२ १ धनञ्जयादि-स्वरूप पवन २०.२६ सब जगत् का धारण करने वाला, अनन्त बलवान्, प्राणो से भी प्रियस्वरूप (ईश्वर) आर्याभि० २ ४, ३२.१ **वायो**=वाति जानाति सूचयति सदसत्-पदार्थानिति वा वायुस्तत्सम्बुद्धौ, अ०—हे गुणग्राहक सद-सद्विवेचनशील शिष्य ६ १६ ज्ञानस्वरूपेश्वर १.२.५

वाताय=विज्ञानाय ४ ३ ६ यो वाति तस्मै (वायवे) २२ २६ वायो शुद्धये सुखवृद्धये वा १ ६. गृहस्थाय वायवे ओषधिस्थवायुविज्ञानाय, वायुवेगगतिविज्ञानाय, वायुविद्यार्थै वायो शोधनाय वा, उदानाय, प्राणशक्तिविज्ञानाय ३८ ७ **वाते**=विज्ञातव्ये व्यवहारे, प्र०—वात इति पदनामसु पठितम् निघ० ५ ४, ८ २१. वायाविव ६ ६ [वात =वा गतिगन्धनयो (अदा०) धातो क्त । 'निर्वाणोऽवाते' इति प्रतिषेधान् निष्ठानत्व न भवति अथवा 'हसिमृ०' उ० ३ ८६ सूत्रेण तन् । वात पदनाम निघ० ५ ४ वात =वातीति सत नि० १० ३४ वातो हि वायु श० ८ ७ ३ १२ यो वै प्राण स वात श० ५ २ ४ ६ प्राणो वै वात श० ११ २ १४ एप (वात.) हीद सर्वं व्यच करोति श० ६ ४.१ १० न वै वातात् किञ्चनाशीयोऽस्ति न मनस किञ्चनाशीयोऽस्ति तस्मादाह वाता वा मनो वेति श० ५ १ ४ ८ वातो वै यज्ञ श० ३ १ ३ २६ युक्तो वातोऽन्तरिक्षेण ते सह ता० १ २ १ वाग् वातस्य पत्नी गो० उ० २ ६ तस्मादेपोऽर्वाचीनमेव वात पवते श० ८ ७ ३ ६ मनसा सकल्पयति तत् प्राणमभिपद्यते, प्राणो वात वातो देवेभ्य आचष्टे श० ३ ४ २ ६. वातो हि वायु श० ८ ७ ३ १२]

वातयामसि वात इव प्रेरयेम १ १२८ २ [वात-प्राति० 'तत्करोति तदाचष्टे' वा० सूत्रेण णिजन्ताल्लट् । 'इदन्तो मसि' इतीदन्तत्वम् । वात सुखसेवनयो (चुरा०) धातोर्वा लट्]

वातरंहसः वातस्य रहो गमनमिव गमन येषान्ते (विद्युदादय.) १ १८ २ **वातरंहाः**=वात इव रहो गमन यस्य स (रथ) १ ११८ १ वायुवद्वेगवन्तोऽग्न्यादय ५ ७७ ३ [वात-रहस्पदयो समास । रहस्=रहि गतौ (भ्वा०) धातोरौणा० असुन् । वातरहा क्षिप्रनाम निघ० २ १५]

वातस्वनसः वातस्य स्वन शब्द इव शब्दो येषान्ते (गृहस्था) ७ ५६ ३ [वात-स्वनस्पदयो समास । स्वनस्=स्वन शब्दे (भ्वा०) धातोरौणा० असुन्]

वातापे वात इव सर्वान् पदार्थान् व्याप्नोति यस्तत्-सम्बुद्धौ (परमेश्वर) १ १८७ ८ वातवत्सर्वव्यापिन् (ईश्वर) १ १८७ ६ [वातोपपदे आप्लृ व्याप्तौ (स्वा०) धातोरौणा० इन् । तत सम्बुद्धि । इन्द्र उ वै वातापि स हि वातमाप्त्वा शरीराण्यर्हन् प्रति प्रैति कौ० २७ ४ वातापयो हवनश्रुत मै० १ ६ १]

वाताप्यम् वातेन शुद्धेन वायुनाऽऽप्तु योग्यम् (गोरभस=गवा महत्त्वम्) १ १२१ ८, [वात-आप्यपदयो समास । आप्यम्=आप्लृ व्याप्तौ (स्वा०) धातोर्ण्यत् । वाताप्य पदनाम निघ ४ ३ वाताप्यमुदक भवति वात एतदाप्याययति नि० ६ २८]

वाति गच्छति ६ ३५ **वातु**=प्रापयतु १ ८६ ४ गच्छतु ७ ३५ ४ **वान्ति**=गच्छन्ति ५ ८३ ४ [वा गति-गन्धनयो (अदा०) धातोर्लट् । अन्यत्र लोडपि । वाति गतिकर्मा निघ० २ १४]

वात्याय वायुविद्याया भवाय (जनाय) १६ ३६ [वातप्राति० भवार्थे यत्]

वादिष्टम् वदतम् ५ १७ [वद व्यक्तायां वाचि (भ्वा०) धातोर्लुङ् । अटोऽभावश्छान्दस]

वानस्पत्यः वनस्पतेर्विकारो रसमय (अद्रि =मेघ) १ १४ यो वनस्पतेर्विकारस्त हवि सस्कारार्थम् (मूसलादि) १ १५ [वनस्पतिप्राति० विकारेऽर्थे 'दित्यदित्यादित्यपत्युत्तर-पदाण्ण्य ' अ० ४ १ ८५ सूत्रेण ण्य]

वापुषः वपुषि भव (पृक्ष =अन्नम्) ५ ७५ ४ [वपुष्प्राति० भवार्थेऽण् । वपुष् रूपनाम निघ० ३ ७ उदकनाम निघ० १ १२]

वामजाताः वामेषु प्रशस्येषु कर्मसु वा जाता प्रसिद्धा (गात्रादय.), प्र०—वाम इति प्रशस्यनाम निघ० ३ ८, १२ १०८ [वाम-जातपदयो समास । वाम प्रशस्यनाम निघ० ३ ८]

वामदेवस्य गुरुणयुक्तस्य विदुष ४ १६ १८ [वाम-देवपदयो समास । वाम प्रशस्यनाम निघ० ३ ८]

विद्वांसा पूर्णविद्यायुक्तावध्यापकोपदेशकौ १ १२० ३. सर्वशुभगुणविद्याविज्ञापकौ (अध्यापकोपदेशकौ) १ १२० ३ [विद्वान् इति व्याख्यानम् । ततो द्विवचनस्याकारादेश]

विद्विषते परस्पर विद्वेष करते हैं स० वि० १४२, अथर्व० ३ ३० ४ **विद्विषामहै**=परस्पर हम विद्वेष अप्रीति करते हैं आर्याभि० २ १ तै० आ० १० १. [वि+द्विष अप्रीतौ (अदा०) धातोर्लटि प्रथमबहुवचनम्]

विधतः परिचरत (मित्रस्य) ५ ६५ ४ यो विधान करोति तस्य (विद्वज्जनस्य) १ ७३ १. ताडयितॄन् (विद्युद्ग्नीन्) १ १६७ ५ सेवकान् (जनान्) ७ १ ६ **विधते**=विधात्रे (मनुष्याय) १ ११६ ७ सेवमानाय (मर्त्याय=मनुष्याय) ६ ६५ ३ विधान कुर्वते (जनाय=परोपकारे प्रसिद्धायाध्यापकाय) ७ १६ १२ सत्कर्मे (सज्जनाय) ६ ५ ३ पुरुषार्थं कुर्वते (जनाय) ४ ४४ ४ विविधव्यवहार यथावत् कुर्वते (वाघते=मेधाविजनाय) ४ २.१३ **विधन्तः**=परिचरन्त (भृगव=विद्वांसो जना) २ ४.२. [वि+डुधाञ् धारणपोषणयो (जु०) धातो शतृ । 'वा छन्दसी' ति द्वित्व न भवति]

विधन् विदधतु १ १४९ ७ **विधन्त**=सेवन्ते ३ ३ १ [वि+डुधाञ् धारणपोषणयो (जु०) धातोर्लट् । छन्दसि द्वित्वाऽभावे झेर्जुसादेशोऽपि न भवति]

विधर्त्तः यो विविधान् शुभान् गुणान् धरति तत्सम्बुद्धौ (विद्वन् पते) २ १ ३ **विधर्त्ता**=विविधाना लोकाना धर्त्ता (परमात्मा) ७ ४१ २ यो विविधान् पदार्थान् धरति स (ईश्वर) ३४ ३५ विशेषेण धर्त्ता (वीर=रक्षको मनुष्य) ७ ५६ २४ विविधाऽऽकर्षणेन पृथिव्यादिधारक, अ०—पोषक (सूर्य) १५ ११ विविधस्य शीतस्य धर्त्ता (सोम=चन्द्र) १५ १३ विविधाना रत्नाना धारक (राजा) १५ १२ [वि+डुधाञ् धारणपोषणयो (जु०) धातो कर्त्तरि तृच् । विधर्त्ता विधारयिता नि० १२ १४]

विधर्मणि विशिष्टे धर्मे ६ ७१ १ विविधश्च तद्धर्म च तस्मिन् ३ २ ३ विरुद्धधर्मण्याकाशे १ १६४ ३६

विधर्मन् विशेषधर्माऽनुष्ठाने (विद्वज्जन) ५ १३ ८. [वि-धर्मन्पदयोः समासः । धर्मन् धृञ् धारणे (भ्वा०) धातोर्मनिन्]

विधवाम् जिसको पति नहीं, पतिविहीनानाम् (मानव = जननीम्) ४ १८ १२. [वि-धवापदयोः समासः । विधवा विधातृका भवति, विधवनाद्वा विधावनाद्वा इति चर्मशिरा, अपि वा धव इति मनुष्यनाम, तद्वियोगाद् विधवा नि० ३ १५]

विधाता विधानकर्ता (ईश्वर) ६ ५० १२ निर्माता (ईश्वर) १० ८२ सर्वेषां पदार्थानां कर्मफलानाञ्च विधानकर्ता (परमेश्वर) ३२ १०. कर्मानुसारेण फलप्रदाता जगन्निर्माता (परमेश्वर) १० ८२. सब कामों का पूर्ण करने वाला (परमात्मा) स० वि० ६, ३२.१०. भिन्न भिन्न जगत् का उत्पादक (ईश्वर) आर्याभि० २.४०, १० ८२. सब मोक्षसुखादि कामों का विधायक सिद्धिकर्ता (ईश्वर) आर्याभि० २.४२, १०.८२ [वि+डुधाञ् धारणपोषणयो (जु०) धातो. कर्तरि तृच् । विधाता मेधाविनाम निघ० ३ १५ चन्द्रमा मन धाता न विधाता न गो० उ० १.१०. विधाता धाता व्याख्यात. नि० ११ ११]

विधाति विदध्यात् १.१२० १ **विधा.**=विविधाया दधामि १ ७२ ३ विधेहि ४ ६ ११ **विधिषे**=विशेषेण दधासि १ ७०.५ **विधेम**=कुर्याम १.१८६ १. विशेषेण १९.३ विधान कुर्याम ४.७. वदेम ५ ३६ परिचरेम १३ ४ प्राप्नुयाम सेवेमहि वा, प्र०—विदधेमहि गतिकर्मा निघ० २ १४, २ ३५.१२ सत्कुर्याम ६ १ १० निष्पादयेम ८ २५ क्रिया करें स० वि० ७, ४० १६ [वि+डुधाञ् धारणपोषणयो (जु०) धातोर्लट् । 'वा छन्दसी' ति द्वित्व न भवति । अन्यत्र मुड् लिङ् च । विधेम परिचरणकर्मा निघ० ३.५. विधतिर्दानकर्मा नि० १०.२३]

विधाभिः अद्भि, विविधानि वस्तूनि दधति याभि प्राणचेष्टाभि ताभि, विविधाभि सत्कियाधारिकाभि क्रियाभि, सत्यरक्षाभि गुणव्यापिकाभिर्वा (क्रियाभि) १४ ७ [वि+डुधाञ् धारणपोषणयो (जु०) धातो 'आतश्चोपसर्गे' अ० ३ ३ १०६ सूत्रेण क्रियामङ् । ततष्टाप्]

विधायि विशिष्टतया ध्रियते १ १५८.३. [वि+डुधाञ् धारणपोषणयो (जु०) धातो कर्मणि लुङ् । अडभावश्छान्दस]

[विघ्नन् इति व्याख्यातम् । विभक्तिव्यत्यय]

विघ्नापसः विज्ञानेन युक्तानि कर्माणि येषान्ते (ऋभव =मेधाविनो जना), प्र०—अत्र तृतीयाया अलुक् १.१११ १ वेदन विघ्न तद्विद्यते येषु तानि विज्ञाननिमित्तानि समन्तादपासि कर्माणि येषा ते (अ०—मनुष्या) १ ३१ १ विघ्ननानि विन्निनान्यपासि कर्माणि येषान्ते, भा०—विज्ञाननिमित्तानि कर्माणि येषान्ते (मरुत = मनुष्या) ३४ १२ [विघ्नना-अपस्पदयो समास । समासे तृतीयाया अलुक् । विघ्ननेति व्याख्यातम् । अपस् कर्मनाम निघ० २ १ विघ्नापसम् =विदितकर्माणाम् नि० ११ ३३]

विद्यद्भिः विद्यमानै (ग्रावभि =मेघै), प्र०—अत्र व्यत्ययेन परस्मैपदम् २६ ४ [विद सत्तायाम् (दिवा०) धातो शतृ । व्यत्ययेन परस्मैपदम्]

विद्यया यथार्थ ज्ञान से स० प्र० ३१३, ४० १४ आत्मशुद्धाऽन्त करणमयोगधर्मजनितेन पदार्थदर्शनेन ४० १४ **विद्यायाम्** =शब्दार्थसम्बन्धविज्ञानमात्रेऽवैदिकाचरणे ४०.१२ [विद ज्ञाने (अदा०) धातो 'सज्ञाया समजनिपदनिपत०' अ० ३ ३ ९९ सूत्रेण स्त्रिया क्यप् । ततष्टाप् । विद्या वै धिपणा तै० ३ २ २ २ विद्या ह वै ब्राह्मणमाजगाम नि० २ ४ विद्यया देवलोक (जय्य) देवलोको वै लोकाना श्रेष्ठस्तस्माद् विद्या प्रशसन्ति श० १४ ४ ३ २४. विद्यया सह म्रियेत न विद्यामूपरे वपेद् । मनु० २ ११३]

विद्युत् स्तनयित्नु १ ६४ ९. विद्युतम् २५ १ विशेषेण द्योतमानाम् २५ २ **विद्युतः**=सौदामिन्य १ १०५ १ विशेषेण द्योतमानान् (पुरूपात्=ईश्वरात्) ३२ २ विविधतया द्योतयन्ते याम्ना १ २३ १२ **विद्युता**= विद्युन्निष्पन्नेनाऽस्त्रसमूहेन १ ८६ ९ **विद्युते**=विद्युदिवाऽभिव्याप्ताय (भगवते=परमेश्वराय) ३६ २१ [वि+द्युत दीप्तौ (भ्वा०) धातो क्विप् 'भ्राजभासधुर्विद्युत०' अ० ३ २ १७७ सूत्रेण । (प्रजापति) तान् (देवान्) व्यद्यत् । यद् व्यद्यद् तस्माद्विद्युत तै० ३ १० ९ १ विद्युद् ब्रह्मेत्याहु । दिदानाद् विद्युत्० श० १४ ८ ७ १ विद्युद् वाऽशनि श० ६ १ ३ १४ विद्युत् सावित्री जै० उ० ४ २७ ९ विद्युदेव सविता गो० पू० १ ३३ अथैतस्याम् उदीच्यान्दिशि भूयिष्ठ विद्योतते प० २ ४ वृष्टिर्वै याज्या विद्युदेव, विद्युद्धीद वृष्टिमन्नाद्य सप्रयच्छति ऐ० २ ४१ वृष्टिर्वै विराट् तस्या एते घोरे तन्वौ विद्युच्च ह्रादुनिश्च श० १२ ८ ३ ११. विद्युद्वाऽअपा ज्योति श० ७ ५ २ ४९ (वसोर्धारायै) विद्युत्स्तन श० ९ ३ ३ १५ यो विद्युति (पुरुष) स सर्वरूप । सर्वाणि ह्येतस्मिन् रूपाणि जै० उ० १ २७ ६]

विद्युतयन्त विद्युतयन्तु २ ३४ २ [विद्युदिति व्याख्यातम् । तत 'तत्करोति तदाचष्टे' इति णिजन्ताल् लड् । अडभाव]

विद्युत्याय विद्युति भवाय (पुरुषाय) १६ ३८ [विद्युत्प्राति० भवार्थे यत्]

विद्युद्रथः विद्युता चालितो रथ. ३ १४ १ **विद्युद्रथाः**=विद्युद्युक्ता रथा यानानि येषान्ते (मर्या = मनुष्या) ३ ५४ १३ [विद्युत्-रथपदयो समास]

विद्युन्मद्भिः तारयन्त्रादिसम्बद्धा विद्युतो विद्यन्ते येषु तै (रथेभि =विमानादिभिर्यानै) १ ८८ १ [विद्युत्प्राति० सम्बन्धे (मत्वर्थे) मतुप्]

विद्युन्महसः ये विद्युद्विद्याया महसो महान्त (मरुत =मनुष्या) ५ ५४ ३ [विद्युत्-महस्पदयो समास महस्=मह पूजायाम् (भ्वा०) धातोरौणा० असुन् । मह महन्नाम निघ० ३ ३].

विद्योत् दीप्यमानाऽऽग्नेयास्त्रादे, प्र०—अत्र द्युत्धातोर्विच्, पञ्चम्येकवचनञ्च व्यत्ययेन २० २ [वि+द्युत् दीप्तौ (भ्वा०) धातोर्विच् । विभक्तिव्यत्यय]

विद्योतमानाय विद्युत प्रवर्त्तकाय (मघन-मेघाय) २२ २६ [वि+द्युत दीप्तौ (भ्वा०) धातो शानच्]

विद्रधे विशेषेण दृढे (विज्ञानकर्मणी) ४ ३२ २३ [विद्रधे पदनाम निघ० ४ १ विद्रधे विद्धे नि० ४ १५]

विद्रे विन्दन्ति लभन्ते, प्र०—अत्र 'छन्दसि वा द्वे भवत ' अ० ६ १ ८ इत्यनेन वार्तिकेन द्विर्वचनाऽभाव १ ८७ ६ [विद्लृ लाभे (तुदा०) धातोर्लिटि प्रथमबहुवचनम् । द्वित्व न भवति छान्दसत्वात् । 'इरयो रे' इति रे-आदेश]

विद्वान् यो वेत्ति स (राजा) १२ १५ सकलविद्यावित् (पूर्णविद्यो जन) ४ ४२ ३ साङ्गोपाङ्गा विद्या विदन् (इन्द्र =शिल्पिजन) ३ ३५ ४ यो वेत्ति सर्वा विद्या स (विद्वज्जन) १ ४५ ५ सकलविद्याप्रापक, परिमितविद्याप्रदो वा (परमेश्वरो वैद्यो वा) १ ९४ १६. सकलशास्त्रवित् (इन्द्र =विद्वज्जन) २ १५ ७ ज्ञानवान् (विद्वज्जन) १ २४ १३ अनन्तविद्य ईश्वर आप्तमनुष्यो वा १ ९० १ जानन् सन् (गृहपति) ८ १३ पण्डित ३२ ९ सबको जानने वाला (परमात्मा) स० प्र० २४७, ४० १६. सर्वविद्याऽऽधार (ईश्वर) २ ६.८ आविर्विद्यः

विविधानि यन्त्रकलाजलचक्रभ्रमणयुक्तानि पक्षांसि पार्श्वे स्थितानि ययोस्तौ (रथे=याने), प्र०—अत्र 'सुपा सुलुक्०' इति आकारादेशः १/६ २ [वि-पक्षस्पदयो समासे प्रथमा-द्विवचनस्याकारादेशश्छान्दस । पक्षस्=डुपचष् पाके (भ्वा०) धातो 'पचिवचिभ्या सुट् च' उ० ४ २२१ सूत्रेणा-सुन् । सुडागमश्च]

विपरिण: व्यवहर्त्ता (जन) १ १८० ७ [वि+पण व्यवहारे स्तुतौ च (भ्वा०) धातोरौणा० इन्]

विपतथ विशेषेणाऽथ आगच्छथ १ १६८ ६ [वि+पतॢ गतौ (भ्वा०) धातोर्लट्]

विपतयत: विशिष्टतया पतिरिवाऽऽचरत (कर्णा=कर्णौ) ६ ६ ६. [वि-पतिपदयो समासे कृत आचारेऽर्थे क्विप् । ततो लट्]

विपतमन: विशेषेण गमनशीलस्य (अत्यस्य=अश्वस्य) १ १८० २. [वि+पतॢ गतौ (भ्वा०) धातोर्मनिन् । तत षष्ठी]

विपथय: विविधा विरुद्धा वा पन्थानो येषान्ते (विद्या-धर्ममार्गा) ५ ५२ १० [वि-पथिपदयो समास । पथि=पथे गतौ (भ्वा०) धातोर्बाहु० औणा० इन्]

विपन्यया विशेषव्यवहारयुक्तया (क्रियया) ३३ ९. विशिष्टोद्यमेन ६.१६ ३४ विशेषेण स्तुत्या प्रशसितया प्रज्ञया क्रियया वा ३ २८ ५ स्तोतु योग्यया धर्म्यया नीत्या १.११६ ७ **विपन्या**=विपणौ विविधव्यवहारे साध्व्या (प्रशसया) ४१.१२ [वि+पण व्यवहारे स्तुतौ च (भ्वा०) धातो 'अवद्यपण्यवर्या०' अ० ३ १ १०१. सूत्रेण यत् । तत स्त्रिया टाप् । णकारस्य नकारो वर्णव्यत्ययेन । पनधातोर्वा यत्]

विपन्यव: विशेषेण प्रशसिता (विप्रा =मेधावि-जना.) ३ १० ६ विशेषेणाऽऽत्मन पन स्तवनमिच्छव. (जना) १ १३८ ३ विशेषेण स्तावका. (आयव =मनुष्या) ५ ४३ १४ विशेषेण स्तुत्या व्यवहर्त्तार. (सत्पुरुषा) २ २० १ विविध जगदीश्वरस्य गुणसमूह पनायन्ति स्तुवन्ति ये ते (विप्रास =मेधाविन), प्र०—अत्र बाहुलकादौणादिको युच् प्रत्यय. १.२२ २१ *विविधव्यवहारकुशला* (मेधाविन) १ १०२ ५ विशेषेण स्तोतुमर्हा ईश्वरस्य वा स्तावका विप्रास =मेधाविजना) ३४ ४४ [वि+पन व्यवहारे स्तुतौ च (भ्वा०) धातोर्घञर्थे क-प्रत्यये विपनम् । तत आत्मन इच्छायामर्थे क्यजन्ताद् उ-प्रत्यये विपन्यु । अथवा व्यवहारस्तुत्यर्थकात पनधातोर्बाहु० औणा० युच् ।

विपन्यव मेधाविनाम निघ० ३ १५]

विपन्यामहे विशेषेण स्तुमहे १ १८० ७ [वि+पन व्यवहारे स्तुतौ च (भ्वा०) धातोर्लट् । विकरणव्यत्ययेन श्यन्]

विपपृच्यात् विशेषेण सयुज्येत ४ २४ ५ [वि+पृची सम्पर्के (रुधा०) धातोर्लिङ् । द्विर्वचन छान्दसम्]

विपयन्ति विशेषतया गच्छन्ति ७ २१ २ [वि+पि गतौ (तुदा०) धातोर्लट् । विकरणव्यत्ययेन शप्]

विपरेतन विरुद्ध चली जावें, फिर पास कभी न आवें स० वि० १३८, अथर्व० १४ २.२६. [वि+परा+इण् गतौ (अदा०) धातोर्लोट् । तस्य तनबादेश]

विपर्वम् विविधैरङ्गोपाङ्गै पूर्णम् (वृत्र=धनम्) १ १८७ १ विगतानि पर्वाणि ग्रन्थयो यस्य तम् (वृत्र=मेघम्) ३४ ७. [वि-पर्वन्पदयो समास. । न लोपश्छान्दस । पर्वन्=पॄ पालनपूरणयो (जु०) धातो 'स्नामदिपद्यर्ति-पॄशकिभ्यो वनिप्' उ० ४ ११४ सूत्रेण वनिप् । विपर्वम् विपर्वाणम् नि० ६.२५.]

विपश्चितम् पण्डितम् ३ २७ २ विद्वासम्, य आप्त सन्नुपदिशति तम् (इन्द्र=विद्यापरमैश्वर्ययुक्त मनुष्यम्) १४४ **विपश्चित:**=अनन्तविद्यात् (सदसस्पते=परमेश्वरात्) १ १८.७ अनन्तविद्यस्य (ईश्वरस्य) ३७.२ अखिलविद्यायुक्तस्याऽऽप्तस्यैव वर्त्तमानस्य (विप्रस्य=मेधाविजनस्य) ११.४ सदसद्विवेका विद्वास (उपदेशका जना) ४ ३६ ७ [विपश्चित् मेधाविनाम निघ० ३ १५ यज्ञो वै बृहन् विपश्चित् श० ३ ५.३ १२]

विपश्य विविधतया प्रचक्ष्व ७ ४५ **विपश्यति**=विविधतया प्रेक्षते ३ ६२ ६ [वि+दृशिर् प्रेक्षणे (भ्वा०) धातोर्लोट् । अन्यत्र लट् । शिति प्रत्यये धातो पश्यादेश]

विप: मेधावी (सज्जन), प्र०—विप इति मेधावि-नाम निघ० ३.१५, ६ ४४ ६ विविध पातीति विपो मेधावी (प्रजाजन) ७ १७ **विपाम्**=मेधाविनाम् (जनानाम्), प्र०—अत्र 'वाच्छन्दसि' इति नुडभाव ३ १० ५ [वि+पा रक्षणे (अदा०) धातो 'आतश्चोपसर्गे' अ० ३ १ १३६ सूत्रेण क । विप. मेधाविनाम निघ० ३ १५]

विपा यौ विविधप्रकारेण पातस्तौ (अध्यापकोपदेशकौ) ५ ६७.१ [विप इति व्याख्यातम् । ततो द्विवचनस्या-कारादेश]

विपाका विविधगुणै परिपक्वा (त्वेषा=प्रदीप्त)

विधारयः यो विशेषेण धारयति स (अ०—परमात्मा) १७८२ [वि+धृञ् धारणे (भ्वा०) धातोर्णिजन्ताद् 'अनुपसर्गाल्लिम्पविन्दधारि०' अ० ३ १.१३८ सूत्रेण छन्दसि सोपसर्गादपि श । छन्दसि सर्वविधीना विकल्पनात्]

विधारे विधारयामि २२ १८ [वि+धृञ् धारणे (भ्वा०) धातोर्णिजन्ताल्लट् । 'छन्दस्युभयथा' सूत्रेणार्धधातुकत्वान् णेर्लोप]

विधावतः विविधान् मार्गान् धावत (रथान्) १ ८८ ५ [वि+धावु गतिशुद्ध्यो (भ्वा०) धातो शतृ]

विधूताय येन विविध धूत कम्पित तस्मै (जीवाय) २२ ८ [वि+धूञ् कम्पने (क्र्या०) धातो क्त । ततश्चतुर्थी]

विधूनुथ विशेषेण कम्पयथ ५ ५४ १२ [वि+धूञ् कम्पने (क्र्या० धातोर्लट्]

विधून्वानाय यो विविध धुनोति तस्मै (जीवाय) २२ ८ [वि+धूञ् कम्पने (क्र्या०) धातो शानच् । ततश्चतुर्थी ।

विधृतिम् विशेषेण धारणाम् २५ ६ विविध धारणाम् (अग्नि=योगाभ्यासजनिता विद्युतम्) ११ ६६ **विधृतिः**=विविधा धारणा यस्या सा (पत्नी) ३७ १२. [वि+धृतिपदयो समास । धृतिम्=धृञ् धारणे (भ्वा०) धातो स्त्रिया क्तिन् । तस्मात् (द्वे तृणे) तिरश्ची निदधाति तस्माद्वेव (अनयो) विधृती (इति) नाम श० १ ३ ४ १०]

विध्य ताडय २ ३० ४ **विध्यत्**=विध्यति १ ६१ ७ **विध्यताम्**=ताडयतम् ६ ७५ ४ ताडयेताम् २६ ४१ **विध्यति**=ताडयति ४ ८ ८ [व्यध ताडने दिवा०) धातोर्लोट् । 'ग्रहिज्या०' सूत्रेण सम्प्रसारणम् । अन्यत्र लेट् लट् च ।

विध्यता ताडनकर्त्रा (सभाध्यक्षादिजनेन) १ ८६ ६ [व्यध ताडने (दिवा०) धातो शतृ । 'ग्रहिज्या०' सूत्रेण सम्प्रसारणम्]

विनक्तु वेचयति वेचयतु वा, प्र०—अत्राऽऽद्ये पक्षे लडर्थे लोडन्तर्गतो ण्यर्थश्च १ १६ [विचिर् पृथक्भावे (रुधा०) धातोर्लोट्]

विनयन्ति विविधतया प्राप्नुवन्ति १ ६४ ६ [वि+णीञ् प्रापणे (भ्वा०) धातोर्लट्]

विनयः विविधो नयो यस्य स (राजपुरुष) २ २४ ६ [वि+नयपदयो समास । नय.=णीञ् प्रापणे (भ्वा०) धातो 'एरच्' इत्यच्]

विनशन् व्याप्नुवन्ति, अ०—प्राप्नुवन्ति, प्र०—नशतीति व्याप्तिकर्मा निघ० २ १८, २ ३५ ६ विनाश कर सकते है स० वि० १०४, २ ३५ ६ [वि+नशत् व्याप्तिकर्मा (निघ० २ १८) । ततो लङ्, अडभावश्छान्दस । अथवा वि+णश अदर्शने (दिवा०) धातोर्लङ् । विकरणव्यत्ययेन शप् । अथवा लुङि पुषादित्वाच् च्लेरङि रूपम्]

विनशिने विनष्टु शीलाय (दुर्जनाय) ६ २० [वि+णश अदर्शने (दिवा०) धातोस्ताच्छील्ये णिनि । ततश्चतुर्थी]

विनाशम् विनश्यन्त्यदृष्टा पदार्था भवन्ति यस्मिन् तम् ४० ११ **विनाशेन**=नित्यस्वरूपेण विज्ञातेन कारणेन सह ४० ११ [वि+णश अदर्शने (दिवा०) धातोर्घञ्]

विनाशयन् अविद्याऽदर्शन प्रापयन् (सभाद्यध्यक्ष) १ ५५ ६ [वि+णश अदर्शने (दिवा०) धातोर्णिजन्ताच्छतृ]

विनिक्षे विनाशाय ५ २ ६ [विनिक्षे विनिक्षणाय नि० ४ १८ वि+नि+क्षणु हिंसायाम् (तना०) धातोस्तुमर्थे के]

विनिश्चक्रुः विशेषेण नितरा कुर्याम ४ ३६ ४ [वि+निस्+डुकृञ् करणे (तना०) धातोर्लिट्]

विनीनशः विशिष्टतया भृश नाशये ६ ४८ १७ [वि+णश अदर्शने (दिवा०) धातोर्णिजन्ताल् लुङ्]

विनुदः विविधतया प्रेरकस्य (जगदीश्वरस्य) २ १३ ३ [वि+णुद प्रेरणे (तुदा०) धातो कर्त्तरि क्विन्]

विन्द प्राप्नुहि ७ १३ ३ लभेम् ७ १८ १८ **विन्दत्**=विन्दति ६ ४४ २३ **विन्दते**=प्राप्नोति ७ ३२ २१ लभते ४ २६ प्राप्त होवे स० प्र० ६८, अथर्व० ३.२४ ११ १८. **विन्दन्**=जानन्ति ४ १ १६ लभन्ते १ १०५ १ **विन्दन्ति**=लभन्ते १ १०५ १ **विन्दसि**=लभसे १ १७६ १. **विन्दसे**=लभसे २ १३ ११ **विन्धे**=विन्दामि, प्र०—अत्र वर्णव्यत्ययेन दकारस्य धकार १ ७ ७ [विद्लृ लाभे (तुदा०) धातोर्लोट् । 'शे मुचादीनाम्' इति नुम् । अन्यत्र लङ् लट् च]

विन्दमानः प्राप्नुवन् (वीर=पुरुषार्थिजन) ३ ५५.२०. [विद्लृ लाभे (तुदा०) धातो शानच् । 'शे मुचादीनाम्' इति नुम्]

विपक्षसा विविधं परिगृहीतौ (हरी=हयौ) २३.६

प्रख्याने (भ्वा०) धातोर्लिट्]

विप्रमन्मनः विप्रस्य मन्म विज्ञान यस्मिँस्तस्य (वचनस्य) ६ ३६ १ [विप्र-मन्मनृपदयो समास । मन्मन्= मन ज्ञाने (दिवा०) धातोर्मनिन्]

विप्रयच्छतात् विषशेतया प्रत्यक्ष देहि १.४८ १५ [वि+प्र+दाण् दाने (भ्वा०) धातोर्लोटि 'पाघ्रा०' सूत्रेण यच्छादेशे 'तुह्योस्तातङ्०' इत्याशिपि तातङ्]

विप्रराज्ये विप्राणा मेधाविना राज्ये राष्ट्रे ३३ ८३ [विप्र-राज्यपदयो समास]

विप्रवाहसा यौ विद्वद्भि प्रापणीयौ (सज्जनौ) ५ ७४ ७ [विप्र-वाहसपदयो समासे द्विवचनस्याकारश्छान्दस । वाहस् =वह प्रापणे (भ्वा०) धातो 'वहियुभ्या णित्' उ० ३ ११६ सूत्रेणासच्]

विप्रासः भा०—योगाभ्यासादिना शुद्धाऽन्त करणात्मान (जना) ३४ ४४ [विप्र इति व्याख्यातम् । ततो जसोऽसुक्]

विप्रेभिः विपश्चिद्भि १ १२७ २ मेधाविभि (ऋभुभि =मेधाविमनुष्यै) १ २० १ [विप्रप्राति० 'बहुल छन्दसि' सूत्रेण भिस ऐसादेशो न भवति]

विप्रुतम् विविधाना व्यवहाराणा वेत्तारम् (ऋपिम्= अध्यापकम्) १ ११७ ४ विप्रवमाणम् (नौकादिकम्) १ ११६ २४ **विप्रुद्भिः**=विशेपेण पूर्णै (पदार्थै) २५ ६ [वि+प्रुड् गतौ (भ्वा०) धातो क्विप्]

विबध्नते विशिष्टतया बध्नन्ति, प्र०—अत्र व्यत्ययेनात्मनेपदम् १ २८ ४ [वि+बन्ध बन्धने (क्र्या०) धातोर्लट् । व्यत्ययेनात्मनेपदम्]

विबभाज विशेपेण भजेत सेवेत ७ १८ २४ [वि+ भज सेवायाम् (भ्वा०) धातोर्लिट्]

विबलम् विविध बल यस्मात् तत् (छन्द =स्वाधीन्यम्) १४ ६ [वि-बलपदयो समास]

विबाधते विशेपतया विलोडयन्ति १ ५१ १० **विबाधसे**=निवारयसि २ २३ ५ **विबाधिष्ट**=विशिष्टतया बाधयन्तु ७ २३ ३ [वि+बाधृ विलोडने (भ्वा०) धातोर्लट् । अन्यत्र लुङ्, अटोऽभावश्छान्दस]

विबाध्य नि सार्य २ २३ ३ [वि+बाधृ विलोडने (भ्वा०) धातो क्त्वा । समासे क्त्वो ल्यप्]

विबाल्यम् विगत बाल्य यस्य तम् (सिन्धु=नदम्) ४ ३० १२ [वि+बाल्यपदयो समास]

विबीभयत् विशेपेण भयितु शक्नोति १ ८० १२ [वि+ञिभी भये (जु०) धातोर्णिजन्ताल्लुङ् । अडभावश्छान्दस]

विबोधय विविधतया बोधयति, प्र०—अत्र व्यत्यय १.१२४ विशिष्टतयाऽवगमय १ २२ १ [वि+बुध अवगमने (भ्वा०) धातोर्णिजन्ताल्लोट्]

विभक्ता सत्याऽसत्ययोर्विभाजक (इन्द्र =परमैश्वर्ययुक्तो राजा) ७ २६ ४ विभज्य दाता (विद्वज्जन) ५ ४६ ६ विविधाना पदार्थाना सभागकर्त्ता (विद्वज्जन) १.२७ ६ विभागकर्त्ता (राजा) ४ १७.११. **विभक्तारम्**=जीवेभ्यस्तत्तत्कर्मानुकूलफलविभाजयितारम् विविधपदार्थाना पृथक् पृथक् कर्त्तार वा (सवितार=परमेश्वर सूर्य वा) १ २२ ७. [वि+भज सेवायाम् (भ्वा०) धातो कर्त्तरि तृच्]

विभक्ता विभाग प्राप्ता (प्रजाजना) ६ ३६ १ भिन्ने-भिन्ने (रोदसी=द्यावापृथिव्यौ) ७ १८ २४ [वि+ भज सेवायाम् (भ्वा०) धातो क्त । ततो द्विवचनस्याकारादेशश्छान्दस]

विभज विशेपेण सेवस्व १ ८१ ६ **विभजतु**= विभाग करोतु ७ ४५ **विभजाति**=विभजेत् २ २६ १ **विभजामि**=पालन के लिए विभाजित करता हूँ स० प्र० २३८, १० ४८ **विभजासि**=विभजे १ १२३.३. [वि+ भज सेवायाम् (भ्वा०) धातोर्लोट् । अन्यत्र लेट् लट् च]

विभजन् विभाग कुर्वन् (शूर =निर्भयो जन) १ १०३ ६ **विभजन्तः**=विविधतया सेवमाना (जना) २ १३ ४ [वि+भज सेवायाम् (भ्वा०) धातो शतृ]

विभञ्जनुः शत्रूणा विभञ्जक (इन्द्र =राजा) ४ १७ १३ [वि+भञ्जो आमर्द्दने (रुधा०) धातोर्बाहु० औणा० अनुङ्]

विभरन्ते विशेषेण धरन्ति ५ ११ ४ [वि+भृञ् भरणे (भ्वा०) धातोर्लट्]

विभरा. ये विशेपेण भरन्ति पोषयन्ति ते (विद्वज्जना) ५ ३१ ६ [वि+भृञ् भरणे (भ्वा०) धातो कर्त्तर्यच्]

विभवः व्यापका (अश्वा =किरणा) ३ ६ ६ **विभुभिः**=सद्गुणादिपु व्याप्तै (सज्जनै) ७ ४८ २ **विभुवे**=व्यापकाय वायवे २२ ३० **विभुः**=सर्वव्यापक सर्वसभामेनाङ्गै शत्रुबलेषु व्यापनशीलो वा (जगदीश्वरः सभाध्यक्षो वा) १ ३१ २ सर्वमार्गव्यापनशील (याम = रथ) १ ३४ १. व्यापक ईश्वर १ १४१ ६ **विभून्**= व्यापकान् (भा०—आकाशकालदिश) २० २३ [वि+

१ १६८ ७. [वि-पाकपदयो समासे स्त्रिया टाप् । पाक = पच् + घञ्]

विपाट् या विविध पटति गच्छति विपाटयति वा सा (नदी) ३ ३३ १ **विपाशम्**=विगता पाड् बन्धन यस्या ताम् (विदुषीम्) ३ ३३ ३ **विपाशि**=विगतपाशे बन्धन-रहिते (मार्गे) ४ ३०.११ [वि+पट गतौ (भ्वा०) धातोश्छान्दसो ण्वि: । अथवा-वि+पश बन्धने (चुरा०) धातो ण्वि । विपाड् विपाटनाद्वा विप्राशनाद्वा विप्रापणाद्वा पाशा अस्या व्यपाश्यन्त वसिष्ठस्य मुमूर्षतस्तस्माद् विपाड् उच्यते पूर्वमासीदुरुञ्जिरा नि० ९ २५]

विपानम् विविध पान रक्षण यस्मात्तत् (अमृतम्) १९ ७५ विविध पान येन तत् (इन्द्रिय=जिह्वादिकम्) १९ ७६ विशिष्टेन पानेन युक्तम् (इन्द्रिय=विदुषा जुष्टमात्मबलम्) १९ ७९ विविधरक्षाऽन्वितम् (इन्द्रिय=प्रज्ञानम्) १९ ७४ विविधशब्दार्थसम्बन्धयुक्ताम् (इन्द्रिय=दिव्या वाचम्) १९ ७३ विविधपाननिमित्तम् (इन्द्रिय=धनम्) १९ ७८ विविधराजधर्मरक्षणम् ऋ० भू० ३०६, [वि-पानपदयो समास । पानम्=पा रक्षणे (अदा०) पा पाने (भ्वा०) धातोर्वा ल्युट्]

विपिपानम्=औषधरसाना विविध पान कर्तुं शीलम् (सद्वैद्यम्) १ ११२ १५ **विपिपानस्य**=विविधानि पानानि यस्मात्तस्य (अद्रे=मेघस्य) ७ २२ ४ **विपिपान:**=विशेषेण रक्षन् (विद्वज्जन) ४ १६ ३ **विपिपाना:**=विविधरक्षादिकर्त्तार (अध्यापकोपदेशका) २० ७६ [वि+पा रक्षणे (अदा०) धातोर्लिट कानच् । अभ्यासस्येकारादेशश्छान्दस]

विपिपाना विविध राज्य रक्षमाणौ (अश्विना=सभासेनेशौ) १० ३३ [विपिपानमिति व्याख्यातम् । ततो द्विवचनस्याकारादेशश्छान्दस]

विपीपयन्त व्याप्याययन्ति १ १८१ ५ [वि+ओप्यायी वृद्धौ (भ्वा०) धातोर्णिजन्ताल् लुङि धातो पी इत्यादेशे छान्दस रूपम्]

विपृक्त: विशेषेण सम्बद्ध (अर्वा=वह्निरिव वर्त्तमानो जन) २९ १४ स्वरूपेण सम्पर्करहित (अग्नि) १ १६३ ३ [वि+पृची सम्पर्के (रुधा०) धातो क्त]

विपृक्वत् विशेषेण सम्बद्धम् (अमृतम्) ५ २ ३ [वि+पृची सम्पर्के (रुधा०) धातोर्भावे क्विप्प्रत्यये विपृच् । तत सम्बन्धे (मत्वर्थे) मतुप् । 'झय' इति मतोर्मस्य वकार]

विपृङ्क्त विससर्ग कुरुत १९ ११ [वि+पृची सम्पर्के (रुधा०) धातोर्लोट्]

विपृच: ये वियुञ्जते वियुक्ता भवन्ति ते (मनुष्या) १९ ११ **विपृचे**=वियोजनाय ४ १३ ३ **विपृचौ**=विगत-सम्पर्कौ (राजप्रजाजनौ) ९ ४ [वि+पृची सम्पर्के (रुधा०) धातो कर्त्तरि क्विप्]

विप्र मेधाविन् (जन) १ १२७ २ विविधज्ञानेन पदार्थान् प्राति पूरयति स विद्वान् तत्सम्बुद्धौ १ १४ २ **विप्रम्**=आप्त मेधाविनम् (जनम्) १५ ४७ विद्यासुशिक्षा-योगेन मेधाविनम् १ ११९ ७ विद्याविनयाभ्या धीमन्तम् (सज्जनम्) ६ १५ ७ **विप्रस्य**=विशेषेण प्राति व्याप्नोति तस्य (सवितु=परमात्मन) ५ ८१ १ अनन्तप्रज्ञाकर्मणो जगदीश्वरस्य ५ १४ सर्वशास्त्रविदो मेधाविन (जनस्य) ११४ **विप्र:**=मेधावीव सर्ववेत्ता (ईश्वर) ४ २६ १ **विप्रा:**=विविधमेधाव्यापिनो मेधाविन (योगिन) ३७ २ विद्यासुशिक्षाजातप्रज्ञा (राजपुरुषा) ९ १८ **विप्रै:**=विविधान् पदार्थान् प्रान्ति तै किरणै १ ६२ ४ [वि+प्रा पूरणे (अदा०) धातो 'आतश्चोपसर्गे' अ० ३ १.१३६ सूत्रेण कर्त्तरि क । अथवा—वपति धर्ममिति विग्रहे डुवप बीजसन्ताने छेदने च (भ्वा०) धातो 'ऋज्रेन्द्राग्रवज्रविप्र०' उ० २ २९ सूत्रेण रन्प्रत्ययान्तो निपात्यते । बहुलवचनाद् धातोरुपधाया इत्वम् । विप्रा मेधाविन नि० ७ १८ ये वै ब्राह्मणा शुश्रुवासोऽनूचानास्ते विप्रा श० ३ ५ ३ १२ विप्रा ह्येते यच्छुश्रुवास तै० २ ५ ९ २ विप्र मेधाविनाम निघ० ३ १५ (यजु० ११४) विप्रा विप्रस्येति प्रजापतिर्वै विप्रो देवा विप्रा श० ६ ३ १ १६ एते वै विप्रा यद् ऋषय श० १ ४ २ ७]

विप्रजूत: विप्रैर्मेधाविभिर्जूत शिक्षित (विद्वज्जन) २० ८८ विप्रैर्मेधाविभिर्विद्वद्भिर्ज्ञात (इन्द्र=परमेश्वर) १ ३ ५ [विप्र-जूतपदयो समास । विप्र इति व्याख्यातम् । जूत=जू सौत्रो धातु, वेगिताया गतावर्थे, तत क्त]

विप्रतम: अतिशयेन योगी (मर्य=मनुष्य) ३ ३१ ७ [विप्रप्राति० अतिशायने तमप्]

विप्रथन्ताम् विशेषेण प्रख्यान्तु २ ३ ५ **विप्रथस्व**=विशेषतया प्रख्याहि ५ ५ ४ [वि+प्रथ प्रख्याने (भ्वा०) धातोर्लोट्]

विप्रदुहन्ति विशिष्टतया पूरितान् कुर्वन्ति ४ २४ ९ [वि+प्र+दुह प्रपूरणे (अदा०) धातोर्लट्]

विपप्रथे विविधतया प्रथते १ ५५ १ [वि+प्रथ

भू सत्तायाम् (भ्वा०) धातो 'विप्रसम्भ्यो ड्वसञ्ज्ञायाम्' अ० ३ २ १८० सूत्रेण डु]

विभाक् यो विभजति (इन्द्र =राजा) ७ १८ १३ [वि+भज सेवायाम् (भ्वा०) धातो 'भजो ण्वि' इति ण्वि]

विभागे विभजन्ति यस्मिँस्तस्मिन् व्यवहारे ७ ५६.२१ विशेषेण भजनीये व्यवहारे ७ ४० १ सेवनव्यवहारे १ १०६ ५ [वि+भज सेवायाम् (भ्वा०) धातोर्घञ्]

विभाति विशेषेण प्रकाशते ३७ १६ विशेषेण प्रकाशयन् प्रकाशयिता भवति ३२ ७ विविधतया प्रकाशते १ ६२ ६ प्रदीप्यते १२ २२ विशिष्टतया प्रकाशयति १ ६२ ११ **विभासि**=विविधान् दीपयति १ ६२ ८ **विभाहि**=प्रकाशय १ ७ ६६ विविधतया भाहि १ ११३ १६ [वि+भा दीप्तौ (अदा०) धातोर्लट्। अन्यत्र लोडपि]

विभाती विविधानि मूर्त्तद्रव्याणि प्रकाशयन्ती (उषा) १ ६२ ६ विविधतया सद्गुणैः प्रकाशमाना (युवति) १ १२३ १० प्रकाशन्ती (उषा) १.१२४.६ **विभातीनाम्**=प्रकाशयन्तीना सूर्यकान्तीनाम् १ ११३ १५ **विभातीः**=विशेषेण प्रकाशयन्ती (उषस) ३ ६.७. विविधतया प्रकाशवती (उषस) १ ११३.१७ प्रकाशयन्त्य (उषस) ४ ५१ १ विशेषेण दीप्तिमत्य (उषस) ७ ३५ १० विशिष्टप्रकाशान् १ १२३ ६ [वि+भा दीप्तौ (अदा०) धातो शत्रन्तात् स्त्रिया ङीप्]

विभावम् विशेषेण भावुकम् (विद्युतम्) १ १४८ १ [वि+भू सत्तायाम् (भ्वा०) धातो 'कर्मण्यण्' इत्यण्]

विभावरि विविधा दीप्तयो यस्यास्तत्-सम्बुद्धौ (देवि) १ ४८ १ प्रशस्तविविधप्रकाशयुक्ते (स्त्रि) ४ ५२ ६ या विविधतया भाति प्रकाशयति तत्सम्बुद्धौ (उषः) १ ४८ १० प्रकाशमाने (स्त्रि) ५ ७६ १० प्रकाश-युक्तोषर्वद्वर्त्तमाने (विदुषि स्त्रि) ५ ७६ ४ विविध जगत् भाति दीपयति सा विभावरी, प्र०—अत्र 'वनो र च' अ० ४ १ ६ अनेन ङीप् रेफादेशश्च १ ३० २० [विभाप्राति० मत्वर्थे 'छन्दसीवनिपौ' अ० ५ २ १०६ वा०सूत्रेण वनिप् अथवा वि+भा दीप्तौ (अदा०) धातो कर्त्तरि वनिप्। तत उभयत्रापि स्त्रिया 'वनो र च' इति ङीप् रौ। विभावरी उषो नाम निघ० १ ८]

विभावसुम् प्रकाशयुक्त वसु धन यस्य तम् (राजानम्) ५ २५ २ **विभावसुः**=यो विविधा भा वासयति स (अग्नि) ३ २ २ यो विविधासु भासु विद्याप्रकाशेषु वा वसति स (अग्नि =सभेशो विद्वज्जन) १७ ५३ येन विविधा भा विद्यादीप्तिर्वास्यते स (अग्नि =विद्वज्जन) १२ ३१ **विभावसो**=विशिष्टा भा दीप्ति वासयति तत्सम्बुद्धौ (अग्ने) १ ४४ १० यो विविधाया भाया वसति तत्सम्बुद्धौ (अग्ने=विद्वज्जन) १२ १०६ विविधतया भाया दीप्त्या सहित वसु धन यस्य तत्सम्बुद्धौ (अग्ने= गृहपते) ११ ४० प्रकाशितधन (राजन्) २६ २ स्वप्रकाश (विद्वज्जन) ५ २५ ७ [विभा-वसुपदया समास। विभा= वि+भा दीप्तौ (अदा०) धातो स्त्रियाम् 'आतश्चोपसर्गे' अ० ३ ३ १०६ सूत्रेणाङ्। ततष्टाप्। वसुरिति व्याख्यातम् (यजु० १२ १०६) (प्रभूवसु) महि भ्राजन्ते अर्चयो विभावसविति महतो भ्राजन्ते ऽर्चय प्रभूवसवित्येतन् श० ७ ३ १ २६]

विभावः विभावय १ ५८ ६ [वि+भू प्राप्तौ (चुरा०) धातोर्लङ्। णेर्लोपो ऽडभावश्च छान्दसत्वात्]

विभावा यो विविधान् पदार्थान् भाति प्रकाशयति स (अग्नि) १ ६६ १ विशेषेण प्रकाशक (परमेश्वर) ६ १० १ यो विशेषेण भाति प्रकाशयति स (अग्नि) १ ५६.७ य सर्वं विभातीति स (विद्वान् सूर्यो वा) १ ६६ ५ विशेषेण भानवान् (अतिथि) ५ १ ६ विभववान् (अग्नि =राजा) ४ १ ८ विविधविद्याप्रकाशयुक्त (अग्नि =विद्वज्जन) ४ १ १२ विशेषदीप्तिमान् (जन) ६ ११ ४. यो विभाति स. (अग्नि) १ १४८ ४ [वि+भा दीप्तौ (अदा०) धातो 'आतो मनिन्क्वनिब्वनिपश्च' अ० ७ २ ७४ सूत्रेण वनिप्]

विभाः यो विभाति स (अग्नि =पावक) ७ ८ २ [वि+भा दीप्तौ (अदा०) धातो कर्त्तरि क्विप्]

विभिदुः विदृणन्ति ६ ६५ ५ **विभिनत्**= विभिनत्ति २ १५ ८ [वि+भिदिर् विदारणे (रुधा०) धातोर्लिट्। 'वा छन्दसी' ति द्वित्व न भवति]

विभिन्दन् विदारयन् सन् (विद्वान् सेनाद्यध्यक्ष) १ १०३ ३ [वि०+भिदिर् विदारणे (रुधा०) धातो शतृ]

विभिन्दुना विविधभेदकेन (रथेन) १ ११६ २० [वि+भिदिर् विदारणे (रुधा०) धातोर्बाहु० औणा० उ। बहुलवचनाच्च नुमागम]

विभिः वयन्ति गच्छन्ति ये ते वय पक्षिणस्तैः. १ ११६ ३ वियति गन्तृभि पक्षिभिरिव (अश्वै =यानै)

विमुच्य विशेषेण त्यक्त्वा ३ ३२.१ [वि+मुच्लृ मोचने (तुदा०) धातो क्त्वा । समासे क्त्वो ल्यप्]

विमुच्यध्वम् विमुक्ता भवत, प्र०—विकरणव्यत्ययेन श्यन् ६ १२. **विमुच्यन्ताम्**=विशेषेण त्यजन्ताम् ३५ ३ [वि+मुच्लृ मोचने (तुदा०) धातोर्लोट् । व्यत्ययेन श्यन्]

विमुञ्च विशेषेण त्यज २७ ३३ **विमुञ्चति**= विशिष्टतया त्यजति, विविच्य प्रक्षिपति, विविधतया त्यजति २ २३. [वि+मुच्लृ मोचने (तुदा०) धातोर्लोट् । अन्यत्र लट्]

विमुमुग्धि विशेषेण मोचय ५ २ ७. **विमुमुचः**= विमोचये ३ ४१ ८ [वि+मुच्लृ मोचने (तुदा०) धातोर्लोट् । 'बहुल छन्दसी' ति शप श्लु]

विमृधे विशिष्टा मृध शत्रवो यस्मिँस्तस्मै सङ्ग्रामाय, विगतशत्रवे (इन्द्राय=परमानन्दप्राप्तये) ८ ४४ [वि-मृध्पदयो. समास । मृध. सग्रामनाम निघ० २ १७]

विमोक्तारम् दु खाद्विमोचकम् (पुरुषम्) ३० १४. [वि+मोक्तृपदयो समास । मोक्तृ=मुच्लृ मोचने (तुदा०) धातो तृच्]

विमोचनम् पृथक्करणम् ३ ५३ ५ [वि+मुच्लृ मोचने (तुदा०) धातोर्ल्युट्]

वियत् विविधै प्रकारैर्यतते येन तत् (छन्द =धैर्यम्) १५ ५ **वियतम्**=अजितेन्द्रियम् (दुर्जनम्) ४ १६ ३. [वि+यती प्रयत्ने (भ्वा०) धातो क्विप् करणे । अन्यत्र विपूर्वाद् यमु उपरमे (भ्वा०) धातो क्त । वियत् अन्तरिक्षनाम निघ० १ ३]

वियन्त विशिष्टतया ददति ६ ५१ ५ प्रयच्छत १ ८५ १२ [वि+यमु उपरमे (भ्वा०) धातोर्लोट् । विकरणस्य लुक्]

वियन्तन वियच्छत ५ ५५ ६ [वि+यमु उपरमे (भ्वा०) धातोर्लोट् । 'बहुल छन्दसी' ति शपो लुक् । तप्रत्ययस्य तनबादेश]

वियन्तः विशेषेण प्राप्नुवन्त (विद्वज्जना) ४.३८ ६ [वि+इण् गतौ (अदा०) धातो शतृ]

वियन्ता विविधान् प्राप्नुवन्तौ (जडचेतनौ) १.१६४ ३८, [वि+इण् गतौ (अदा०) धातो शतृ । द्विवचनस्याकारादेशश्छान्दस]

वियन्ति व्याप्नुवन्ति ७.४३ १ [वि+इण् गतौ (अदा०) धातोर्लट्]

वियमुः विशेषतया नियच्छेयु ५.६१.३ **वियेमिरे**= विशेषेण नियच्छन्ति ४ ५४ ५. **वियंसत्**=विशेषेण यच्छेत् १ १८९ ६ [वि+यमु उपरमे (भ्वा०) धातोर्लिट् । अन्यत्र लिट् लेट् च । 'बहुल छन्दसीति' शपो लुक्]

वियययुः विशिष्टतया यातम् १ ११७ १६ **वियात**=विगमयत विनष्ट कुरुत १ ८६ १० **वियाति**= विविक्ततया प्राप्नोति १ ४८ ७. **वियासि**=विशेषेण प्राप्नोषि ६ १२ ६ **वियाहि**=विशेषेण प्राप्नुहि, अ०— दूरीकुरु ३.३१ १६ [वि+या प्रापणे (अदा०) धातोर्लिट् । अन्यत्र लोट् लट् च]

वियवन्त वियोजयेयु ५ २ ५. **वियोषत्**=वियुज्येत् ४ २ १० विनश्येत् २ १८ ८ सन्दधीत ४ १६ २० **वियौष्टम्**=वियुक्तौ भवेतम् ऋ० भू० २०६, ऋ० ८ ३ २८ २. वियुक्त होवो म० वि० १३७, अथर्व० १४ १ २२ विरोधी वा पृथक् पृथक् भाव वाले करो स० वि० १४२, अथर्व० ३.३० ५. **वियौष्म**=वियुक्ता मा भवेम, वियुक्ता भवेम ४.२२ [वि+यु मिश्रणेऽमिश्रणे च (अदा०) धातोर्लङ् । शपो न लुक् । अडभावश्च । अन्यत्र लेट् लुङ् च]

वियासाय विविधप्राप्तये ३९ ११ [वि+या प्रापणे (अदा०) धातोर्बाहु० औणा० असच् । ततश्चतुर्थी]

वियुता वियुक्तानि (शरीराणि) ४.७ ७ [वियुतप्राति० शेर्लोपश्छन्दसि । वियुत =वि+यु मिश्रणेऽमिश्रणे च (अदा०) धातो क्त]

वियुताः वियुक्ता (गाव) ५ ३० १० **वियुते**= मिश्रितामिश्रिते (द्यावापृथिव्यौ) ३ ५४ ७ [वि+यु मिश्रणेऽमिश्रणे च (अदा०) धातो क्त । स्त्रियां टाप् । वियुते द्यावापृथिव्यौ वियावनात् निघ० ४ २५]

वियुयुवत् वियोजयति ६ ४४ १६ [वि+यु मिश्रणेऽमिश्रणे च (अदा०) धातोर्णिजन्ताल् लुङ्]

वियूय पृथक्कृत्य, अ०—सत्यासत्ये विविच्य १० ३२ विभज्य १६ ६ वियोज्य सम्मिश्र्य च २३ ३८ [वि+यु मिश्रणेऽमिश्रणे च (अदा०) धातो क्त्वा । समासे क्त्वो ल्यप्]

वियोतारः विभाजका (आप्ता विद्वज्जना) ४ ५५ २ [वि+यु मिश्रणेऽमिश्रणे च (अदा०) धातो कर्त्तरि तृच्]

विरक्षति विविध प्रकार से पालन करता है

समास । तक्षति करोतिकर्मा (नि० ४ १९) तत क्तप्रत्यये तष्टम्]

विभ्वने विभुत्वाय ६ ६१ १३ [वि+भू सत्तायाम् (भ्वा०) धातोर्बाहु० औणा० कनिन्]

विभ्वान्=विभून् विद्याव्याप्तानमात्यान् ७ ४८ ३ [वि+भू सत्तायाम् (भ्वा०) धातोर्बाहु० औणा० वन् । स च डित्]

विभ्वासहम् यो विभूनासहते तम् (रयिं=धनम्) ५ १० ७ [विभूपपदे आङ्+षह मर्षणे (भ्वा०) धातो कर्त्तरि क्विप्]

विभ्वीः व्यापिका (त्रिगुणात्मिका मात्रा) १.१८८.५ [विभूरिति व्याख्यातम् । तत स्त्रिया 'भुवश्च' सूत्रेण ङीप्]

विमदाय विविधाऽऽनन्दाय १ ११२.१९ विविधा मदा हर्षा यस्मिन् व्यवहारे तस्मै १ ५१ ३. विशेषमद-युक्ताय (शयवे=शयानाय पुरुषाय) १ ११७ २० विशिष्टो मदो हर्षो यस्मात्तस्मै (अर्भकाय=ह्रस्वाय- बालकाय) १.११६ १ [वि-मदपदयो समास । मद =मदी हर्षे (दिवा०) धातो 'मदोऽनुपसर्गे' अ० ३ ३ ६७. सूत्रेण अप् । विमदेन वै देवा असुरान् व्यमदन् कौ० २२ ६]

विमध्ये विशेषाऽन्धकारे ४ ५१ ३ [वि-मध्यपदयो समास]

विमनाः विविध मनो विज्ञान यस्य स (परमेश्वर) १७ २६ विविध अनन्त विज्ञान वाला (परमात्मा) आर्याभि० २ ४०, १७ २६ [वि-मनस्पदयो समास मनस् इति व्याख्यातम् । विमना विभूतमना नि० १० २६]

विममिरे व्याप्नुवन्ति ५ ५५ २ **विममुः**=मान कुर्वन्ति १ ११० ५ **विममे**=विविधतया मिमीते ५ १८. विशिष्टतया मापयति १ १६० ४ विशेषेण रचयति १.१५४.१ विशिष्टतया सृजति ५ ८५ ५ विशेषेण विधत्ते ५ ८१ ३ विमानयानवन्निर्मिमीते ११ ६ [वि+माङ् माने शब्दे च (जु०) धातोर्लिट् । 'विममु.' प्रयोगे मा माने (अदा०) धातोर्लिटि रूपम्]

विमहसः विविधतया पूजनीया (मरुत =विद्वासो गृहस्था) ८ ३१ विशेषेण महागुणविशिष्टान् (विद्वज्-जनान्) ५ ८७.४. विविधानि महासि पूज्यानि कर्माणि येषा तत्सम्बुद्धौ (विद्वासो जना) १ ८६ १ [वि-महस्पदयो समास । महस् महन्नाम निघ० ३ ३ महस्=मह पूजा-याम् (भ्वा०) धातोरौणा० असुन्]

विमानम् वियतिगमकम् (रथ=रमणीय यानम्) २.४० ३ विशेष मान परिमाणयुक्त (लम्बी ऊँची छत) स० वि० १६७, अथर्व० ९ २ ३ १५ **विमानः**=विमान-मिव स्थित (सूर्य) १७ ५९ विविध मान यस्य स (अर्वा=वज्रो विद्युद्वा) ३ २९ ७ विमानयानमिव धर्त्ता (धर्म =यज्ञ) १८ ६६ विविध मान यस्मिन् स (देव = ईश्वर.) ३२ ६ विशेष मानयुक्त, सब लोको का निर्माण-कर्त्ता (ईश्वर) स० वि० ८, ३२.६ **विमाने**=विगत मान परिमाण यस्याऽन्तरिक्षस्य तस्मिन् ७ १६ [वि-मानपदयो. समास । मानम्=माङ् माने शब्दे च (जु०) धातोर्ल्युट्]

विमितानि विशेषेण परिमितानि (सानूनि=प्रान्त-देशान्) ६.७.६. [वि-मितपदयो समास । मितम्=माङ् माने शब्दे च (जु०) धातो क्त]

विमिन्वन् विशेषेण प्रक्षिपन् (विद्वज्जन) ४ ५६ १. [वि+डुमिञ् प्रक्षेपणे (स्वा०) धातो शतृ]

विमिन्वन् विशिष्टतया प्रक्षिपन्ति ३ ३१ १२. [वि+डुमिञ् प्रक्षेपणे (स्वा०) धातोर्लङ् । अडभाव-श्छान्दस]

विमिमानः विशेषेण निर्माता सन् (शिल्पिजन) १.१८६ ४. [वि+माङ् माने शब्दे च (जु०) धातोर्लिट कानच् । लट शानज्वा । 'भृञामित्' इत्यभ्यासस्येत्वम्]

विमिमाय विमिमीते २ १५ ३ [वि+डुमिञ् प्रक्षेपणे (स्वा०) धातोर्लिट् । मा माने (जु०) धातोर्वा विपूर्वाल् लिटि छान्दस रूपम्]

विमुच विशिष्टतया त्यज, प्र०—अत्र 'वाच्छन्दसि' इत्युपधा-नकारलोपः १.१०७ ४ **विमुचध्वम्**=विशेषतया त्यजत १ १७१ १ **विमुचन्ति**=उपरमन्ति २ २८ ४ त्यजन्ति ५ ६२ १ **विमुच.**=विमुञ्च १ ४२ १ मोचय ६ ५५ १ [वि+मुच्लृ मोचने (तुदा०) धातोर्लोट् । अन्यत्र लट् लङ् चापि । 'शे मुचादीनामि' ति प्राप्तो नुम् न भवति 'वा छन्दसी' ति नियमात्]

विमुचम् विमुचन्ति येन तम् (अज्ञानम्) ५ ४६ १. [वि+मुच्लृ मोचने (तुदा०) धा तोर्घञर्थे क]

विमुचा यौ दुख विमुञ्चतस्तौ (राजप्रजाजनौ) ६ ४० १. [वि-मुचपदयो समासे द्विवचनस्याकारादेश. मुच.=मुच्लृ मोचने (तुदा०) धातोरिगुपधलक्षण क. कर्त्तरि]

त्रिंशदक्षरा वा एषा विराट् तै० ३ ८.१० ४ ता० १० ३.१२. तै० १ ६ ३ ४. सा विराट् त्रयस्त्रिंशदक्षरा भवति ऐ० २ ३७. त्रयस्त्रिंशदक्षरा वै विराट् कौ० १४.२. श० ३ ५ १ ८ एषा वै परमा विराड् यच्चत्वारिंशद् रात्रय पङ्क्तिर्वै परमा विराट् ता० २४ १० २. सहस्राक्षरा वै परमा विराट् ता० २५ ६ ४ विराड् वाऽनाधृष्ट छन्द. (यजु० १४ ६) श० ८ २.४ ४. स (प्रजापति) पुरुषमेधेनेष्ट्वा विराडिति नामाधत्त गो० पू० ५ ८ बृहद् विराट् तै० १ ४ ४ ६]

विराषाट् वीरान् ज्ञानवता प्राप्तिशीलान् जीवान् सहते स (विद्युदाख्या दीप्ति), प्र०—अत्र वर्णव्यत्ययेन दीर्घेकारस्य स्थाने ह्रस्वेकारोऽकारस्थाने आकारश्च 'स्फायित चि०' उ० २ १३ इत्यजधातोरक्-प्रत्यय 'छन्दसि सह' अ० ३ २ ६३ इति ण्वि 'सहे साढ स' अ० ८ २ ५६ इति षत्वम् १ ३५ ६ [वीरोपपदे षह मर्षणे (भ्वा०) धातो 'छन्दसि सह' इति ण्वि । वर्णव्यत्ययेन दीर्घेकारस्य ह्रस्वेकार, अकारस्य चाकारादेश । वीर =अज गतिक्षेपणयो (भ्वा०) धातो 'स्फायितञ्चि०' उ० २ १३ सूत्रेण रक् । 'अजेर्व्यघञपो' अ० २.४ ५६ सूत्रेणाज्धातो स्थाने वीरित्यादेश]

विरिष्यथ विशेषेण हिंस्यथ ५ ५४ ४ [वि+रिष हिंसायामर्थे (भ्वा०) धातोर्लट् । विकरणव्यत्ययेन श्यन्]

विरुक्मता विविधा रुचो भवन्ति यस्मात्तेन (ओजसा=बलेन) १ १२७ ३ **विरुक्मन्तः**=प्रशस्ता विविधा रुचो दीप्तयो विद्यन्ते येषु ते (वीरजना) १ ८५ ३ **विरुक्मान्**=विविधदीप्तियुक्त (योगिजन) ६ ४९ ५ [वि-रुच्पदयो समासे कृते तत. प्रशंसायामर्थे मतुप् । रुच्=रुच दीप्तावभिप्रीतौ च (भ्वा०) धातो क्विप्]

विरुज विशेषेण प्रभग्न कुरु ४ ३ १४ [वि+रुजो भङ्गे (तुदा०) धातोर्लोट्]

विरुद्धे विरुद्धस्वरूपे (रात्र्युषसौ) १ ११३ ३ [वि+रुधिर् आवरणे (रुधा०) धातो क्त । ततो द्विवचनम्]

विरुद्रस्य विविधा रुद्रा प्राणा यस्मिंस्तस्य (प्रस्रवणस्य=वातस्य) १ १८० ८ [वि-रुद्रपदयो समास । रुद्र इति व्याख्यातम्]

विरुरुचुः विरोचन्ते प्रकाशन्ते १५ २६. विशेषेण दीपयेयु ३३ ६ विदीपयन्ति, प्र०—अत्र लडर्थे लिट् ३.१५ [वि+रुच दीप्तावभिप्रीतौ च (भ्वा०) धातोर्लिट् । व्यत्ययेन परस्मैदम्]

विरुहेम विविधतया वर्द्धेमहि ५ ४३. विशेषेण वर्द्धेमहि ३ ८ ११ [वि=रुह बीजजन्मनि प्रादुर्भावे च (भ्वा०) धातोर्लिङ् । 'लिङ्याशिष्यङ्' अ० ३ १ ८६ सूत्रेण अङ्]

विरूपम् विविधानि रूपाणि यस्मिंस्तम् (विद्युदग्निम्) ३ १ १३. **विरूपान्** विविधस्वरूपान् (पदार्थान्) ३० २२ **विरूपेभ्यः**=विविधानि रूपाणि येषा तेभ्य (राजपुरुषेभ्य) १६ २५ [वि-रूपपदयो समास । विरूपो नानारूप नि० ३ १७]

विरूपवत् विविधानि रूपाणि यस्य तद्वत् १ ४५.३ [वि-रूपपदयो समासे कृते ततस्तुल्यार्थे वति]

विरूपा विविधानि रूपाणि येषु तानि (वस्तूनि) ३ ३८ ९ [वि-रूपपदयो समास । तत्र शेर्लोपश्छन्दसि]

विरूपाः विविधरूपा विकृतरूपा वा (वीरा =व्याप्तयुद्धविद्याजना) ३ ५३.७ विविधानि रूपाणि दाना ता (प्रजा) १ ७० ४ **विरूपे**=विविध रूप ययोरह्नो रात्रेश्च ते १ ६२.८. तम प्रकाशाभ्या विरुद्धरूपे (द्यावाक्षामा=प्रकाशभूमी) १२ २. विरुद्धस्वरूपे (रात्रिदिने) ५ १ ४ विविधरूपे विरुद्धरूपे वाऽहोरात्रे ६ ४९ ३ [वि-रूपपदयो समासः । विरूपास. बहुरूपा नि० ११ १७]

विरेचि विरिच्यते ४ १९ ५ [वि+रिचिर् विरेचने (रुधा०) धातो कर्मणि लुङ् । अटोऽभावश्छान्दस]

विरोकिणः विविधो रोको रुचिर्विद्यते येषु ते (रश्मय =किरणा) ५.५५ ३ [वि-रोकपदयो समासे विरोक । ततो मत्वर्थ इनि. । रोक =रुच दीप्तौ (भ्वा०) धातोर्घञ्]

विरोके अभिप्रीते प्रदीपने वा ३ ५ २ विविधतया रुचिकरे व्यवहारे १० १६ [वि-रोकपदयो समास । रोक =रुच दीप्तावभिप्रीतौ च (भ्वा०) धातोर्घञ्]

विरोचते विशेषेण प्रकाशते ३ २९ ६ [वि+रुच दीप्तावभिप्रीतौ च (भ्वा०) धातोर्लट्]

विरोचमानम् विविधदीप्तियुक्तम् (बुध्न=विज्ञानम्) १ ९५ ९. विविधप्रकारेण प्रकाशमानम् (अहोरात्रव्यवहारम्) १ ९५ २ **विरोचमानः**=प्रकाशमान (राजा) ५.४४ २ [वि+रुच दीप्तावभिप्रीतौ च (भ्वा०) धातो शानच्]

विरोधत् विशेषेण निरुणद्धि स्वीकरोति १ ६७ ५ [वि+रुधिर् आवरणे (रुधा०) धातोर्लट् । विकरणव्यत्ययेन शप्]

स० वि० ८०, अथर्व० ११ ५ १७ [वि+रक्ष पालने (भ्वा०) धातोर्लट्]

विरद विशेषतया ससेध १६११२ [वि+रद विलेखने (भ्वा०) धातोर्लोट्। राध ससिद्धौ (स्वा०) धातोर्वा लोटि छान्दस रूपम्]

विरप्शम् महान्त ससारम् ४ ५० ३ [विरप्शी महन्नाम निघ० ३ ३]

विरप्शिन् महागुणविशिष्टेश्वर वा महैश्वर्यमिच्छुक मनुष्य, प्र०—विरप्शीति महन्नामसु पठितम्, निघ० ३ ३, १ २८ महन् (इन्द्र=राजन्) ६ ४० २ **विरप्शिनः**= सर्वसामग्र्या महान्त (नृतमास) १ ८७ १. पूर्णविद्या शिक्षावीर्या (मरुत=वायव इव विद्वज्जना) १ १६६ ८ **विरप्शिने**=प्रशसिताय (वीरपुरुषाय) ६ ३२ १. **विरप्शी**=महान् (इन्द्र=सेनाधीश) २० ४६. महाविद्यायुक्ता (मही=वेदचतुष्टयी पृथिवी वा) १ ८८ विविधा प्रसिद्धा उपदेशा विद्यन्ते यस्य स (पुरुषोत्तम) ३ ३६ ४ [विरप्शी महन्नाम निघ० ३ ३]

विररप्शे=विशेषेण स्तूयते, प्र०—अत्र रभधातोर्लिटि सम्य श ४ २० ५.

विराजतः विशेषेण देदीप्येते ११८८ ६ **विराजति**=विशेष प्रकाशयति, प्र०—अत्राऽन्तर्गतो ण्यर्थ ३ ८ विशेषेण प्रकाशते ३३ ३० अ०—विविधतया प्रकाशयति १.३ १२ **विराजथ**=विशेषेण प्रकाशध्वम् १ १८८ ४ **विराजथः**=विशिष्टतया प्रकाशेथे ५ ६३ ७ [वि+राजृ दीप्तौ (भ्वा०) धातोर्लट्]

विराजम् विविधाना पदार्थाना प्रकाशकम् (छन्द) २८ ३१ विविधै पदार्थै राजमानम् (गा=पृथिवीम्) १३ ४३ विराट्छन्दो वाच्यम् (अर्थम्) ६ ३३ **विराजः**= विविधैर्गुणै राजमाना प्रकाशमाना (सत्यस्त्रिय.) १७ ३ विविधोत्तमराजपालिता (प्रजा) ऋ० भू० २२२, अथर्व० ६ १० ६८ २ **विराजा**=विशेषेण प्रकाशेन ३८.२७ **विराजे**=विराट्छन्दसे २४ १३ **विराट्**=यद् विविध राजते तत् (छन्द=बलम्) २१ १६ विविधशास्त्रश्रवणयुक्तम् (श्रोत्रम्) २० ५ यो विविधतया राजते (अग्नि=पावक) २० ५५ विशेषेण राजमान (अग्नि= राजा) २७ ७ विविधै पदार्थै राजमाना (स्त्री) १५ ११ विविधविद्याविनयप्रकाशयुक्ता (स्त्री) १४ १३ विविधविद्याप्रकाशनम् १४ १८ या विविधासु राजते (अ०— स्त्री) १३.२४ विविधै पदार्थै राजते प्रकाशते स विराट् ब्रह्माण्डरूप, भा०—सर्व समष्टिरूप जगत् ३१ ५ यो विविधेषु गुणेषु कर्मसु वा राजते स (विद्वज्जन) १ १८८ ५ सूर्यचन्द्रनेत्रा वायुप्राण पृथिवीपाद इत्याद्यलङ्कारलक्षणलक्षितो हि सर्वशरीराणा समष्टिदेह (ब्रह्माण्डशरीर) ऋ० भू० १२२, ३१ ५ [वि+राजृ दीप्तौ (भ्वा०) धातो कर्त्तरि क्विप्। विराट् विराजनाद्वा विराधनाद्वा विप्रापणाद्वा। विराजनात् सम्पूर्णाक्षरा, विराधनादूनाक्षरा, विप्रापणादधिकाक्षरा नि० ७ १३ वृष्टिर्वै विराट् तस्या एते घोरे तन्वौ विद्युच्च ह्रादुनिश्च श० १२ ८ ३ ११ विराडग्नि श० ६ २ २ ३४ वाग्वै विराट् श० ३ ५ १ ३४ विराड्ढीयम् (पृथिवी) श० २ २ १ २० इय (पृथिवी) वै विराट् श० १२ ६ १ ४०. गो उ० ६ २ (यजु० १३ २४) अय वै (पृथिवी) लोको विराट् श० ७ ४ २ २३ (यजु० १३ ४३) विराड् वै गौ श० ७ ५ २ १६ एषा वै स्तनवती विराड् य काम कामयते तमेता दुग्धे। अन्न विराट् कौ० ६ ६ तै० १ ६ ३ ४ ता० ४ ८ ४ अन्न वै विराट्, तस्माद् यस्यैवेह भूयिष्ठमन्न भवति स एव भूयिष्ठ लोके विराजति तद् विराजो विराट्त्वम् ऐ० १ ५ अन्न विराट् श० ७ ५ २ १६ ऐ० १ ५ विराडन्नम् ऐ० ५.१६ अन्न वै श्रीर्विराट् गो० पू० ५ ४ गो० उ० १ १६ श्रीर्विराडन्नाद्यम् कौ० ११ श्रीर्वै विराड् यशोऽन्नाद्यम् गो० पू० ५ २० गो० उ० ६ १५ एतद्वै कृत्स्नमन्नाद्य यद् विराट् कौ० १४.२ विराडन्नाद्यम् ऐ० ४ १६ ऊर्ग्विराट् तै० १ २ २ २ वैराजीर्वा आप कौ० १२ ३ वैराजो वै पुरुष तां० २.७ ८ तै० ३ ६ ८ २ विराड् वै यज्ञ श० ११ १ २२ वैराजो यज्ञ गो० पू० ४ २४ गो० उ० ६ १५ विराड् वाऽग्निष्टोम कौ० १५ ५ वैराज सोम कौ० ६ ६ श० ३ ३ २ १७ विराड् वरुणस्य पत्नी गो० उ० २ ६ अथैतद् वामेऽक्षणि पुरुषरूपम्। एषाऽस्य पत्नी विराट् श० १४ ६ ११ ३ सा (विराट्) तत ऊर्ध्वारोहत्। सा रोहिण्यभवत् तै० १.१ १० ६ विराट् सृष्टा प्रजापते। ऊर्ध्वारोहद् रोहिणी योनिरग्ने प्रतिष्ठिति तै० १ २ २ २७ सर्वदेवत्य वा एतच्छन्दो यद् विराट् श० १३ ४ १ १३ सत् विराट् छन्दसा ता० १५ १२ २ विराड् वै छन्दसा ज्योति ता० ६ ३ ६ विराड् हि छन्दसा ज्योति ता० १० २ २ विराजो वा एतद् रूप यदक्षरम् ता० ८ ६ १४ दशाक्षरा वै विराट् श० १ १ १ २२ दशाक्षरा विराट् ऐ० ६ २० गो० पू० ४.२४ गो० उ० १.१८ ता० ३ १३ ३ दशदशिनी विराट् कौ० २ ३ दश च ह वै चतुर्विराजोऽक्षराणि गो० पू० ५ २० त्रिंशदक्षरा वै विराट् ऐ० ४ १६. श० ३ ५ १ ७

विवहन्ति विशेषेण प्रापयन्ति ४ २१ ८ [वि+वह प्रापणे (भ्वा०) धातोर्लट्]

विव: विशेषेण वृणोषि १ ६२ ५ विवृणोति, प्र०—अत्र 'मन्त्रे घसह्वर०' इति च्लेर्लुगडभावश्च १३ ३ विवृत विभक्त करता है आर्याभि० २ २८, १३ ३ [वि+वृञ् वरणे (भ्वा०) धातोर्लुङ्। 'मन्त्रे घसह्वर०' सूत्रेण च्लेर्लुक्। अडभावश्छान्दस। विव व्यवृणो नि० १० ६]

विंशति: एतत्सङ्ख्याकानि (शता=शतानि सैन्यानि) १ ८० ९ **विंशती**=चत्वारिंशत् (शतय) २७ ३३ [विंशति द्विदशन नि० ३ १० प्रजापतेर्विस्रस्तादाप आयस्ताम्वितान्वविंशद् यदविशन् तस्माद् विंशति श० ७ ५ २ ४४]

विवाच: विविधा वाणी ३ ३४ १० विविधविद्या-शिक्षायुक्ता वाचो येषान्ते (चर्षणय=मनुष्या) ६ ३१ १ **विवाचि**=विरुद्धा वाचो यस्मिन् सङ्ग्रामे भवन्ति तस्मिन् ७ ३० २ विविधविद्यानुशिक्षायुक्ते (वाग्-व्यवहारे) १ १७८ ४ विविधासु विद्यासु प्रवृत्ता वाक् तस्याम् ७ २३ २ विविधार्थसत्यार्थप्रकाशिका वाचो यस्मिन् व्यवहारे ६ ४५ २६ [वि-वाच्पदयो समास। विवाक् सग्रामनाम निघ० २ १७]

विवाय सवृणोति १ ७१ ४ दूर गमयति ७ ६.३ गच्छेत् १ १५६ ५ [वि गतिव्याप्तिप्रजनादिषु (अदा०) धातोर्लिट् अथवा अज गतिक्षेपणयो (भ्वा०) धातोर्लिट्। 'अजेर्व्यघञपोरि' ति वी-आदेश]

विवावृते विशेषेण पुन पुनरावर्तते, प्र०—अत्र 'तुजादीनाम्०' इति दीर्घ १ १६४ १४ [वि+वृतु वर्त्तने (भ्वा०) धातोर्लिट्। तुजादित्वादभ्यासस्य दीर्घ.]

विवावृधु: विशिष्टतया वर्धन्ते ५ ५९ ६. **विवावृधे**=विशेषेण वर्द्धते १ १४१ ५ [वि+वृधु वृद्धौ (भ्वा०) धातोर्लिट्। तुजादित्वादभ्यासस्य दीर्घ]

विवास विवसति ५ ५३ १ **विवासत**=परिचरत ६ १५ ६ **विवासते**=परिचरति १.११७ १ **विवासथ:**=सेवेथाम् १ ११६ ६ **विवासन्ति**=परिचरन्ति ७.३५. **विवाससि**=परिचरसि १.७४ ६ **विवासान्**=सेवेरन् १ १७३.१ **विवासे**=परिचरामि १.४१ ८ वासयामि ७.५८.५. **विवासेत्**=सेवेत ६.१६ ४६ **विवासेम**=नित्य परिचरेम ६ ३८ ५ **विवासेयम्**=परिचरेयम् २.३३.६. [विवासति परिचरणकर्मा निघ० ३ ५ विवाससि परिचरसि। विवासनि परिचर्यायाम् नि० ११ २३ विवासेम परिचरेम नि० २ २४]

विवासाय विविधप्राप्तये ३९ ११. [विवासति परिचरणकर्मा निघ० ३ ५ ततो भावे घञन्ताच्चतुर्थी वि+वस निवासे (भ्वा०) धातोर्वा घञ्। प्राप्त्यर्थे ऽपि वसिर् धातूनाम अनेकार्थकत्वात्]

विविक्त. पृथक्कुरुत ३ ५४ ८ [विचिर् पृथग्भावे (रुधा०) धातोर्लट्। विकरणव्यत्ययेन श्लु]

विविक्त्यै विवेकाय ३० १३ [वि+विचिर् पृथग्-भावे (रुधा०) धातो क्तिन्। ततश्चतुर्थ्या एकवचनम्]

विविक्वान् विविक्त (मनुष्य) ३ ५७ १ [विचिर् पृथग्भावे (रुधा०) धातोर्लिट क्वसु]

विविचिम् विवेचक विभागकर्त्तारम् (राजानम्) ५ ८ ३ [वि+विचिर् पृथग्भावे (रुधा०) धातोरौणा० इन् कर्त्तरि]

विविड्ढि व्याप्नुहि, प्र०—अत्र 'वाच्छन्दसि सर्वे विधयो भवन्ति' इति नियमात् 'निजा त्रयाणां गुण: श्लौ' अ० ७ ४ ४५. अनेनाभ्यासस्य गुणनिषेध १ २७ १० [विप्लृ व्याप्तौ (जु०) धातोर्लोट्। गुणाऽभावश्छान्दस। विविड्ढि कुरु नि० १० ८]

विवित्से विशेषेण प्राप्नोषि, प्र०—अत्र व्यत्ययेनात्मने-पदम् १ ३२ ४ **विविदत्**=प्राप्नोति ७ २१ ६ **विविदयु.**=विन्दत, प्र०—अत्र व्यत्यय ६ ७२ १ **विविदु:**=वेदयन्ति १ ७१ २ **विविदे**=विन्देत २ १५ ६. लभते ४ १८ १३. विज्ञायते ७ ७ १ विन्दति ४ २६ ५ प्राप्त होता है स० प्र० १५३, १० ८५ ४० [विद्लृ लाभे (तुदा०) धातोर्लट्। 'बहुल छन्दसी' ति श्लु:। अन्यत्र लेट् लिट् च। आत्मनेपद व्यत्ययेन]

विविद्रिरे लभन्ते २ २१ ५. **विविद्रे**=लभन्ते ६ २७ २ विदन्ति ६ २७.१. [विद्लृ लाभे (तुदा०) धातोर्लिट्। आत्मनेपद व्यत्ययेन। रुडागमश्छान्दस। अन्यत्र 'इरयो रे' इति रे-आदेश]

विविद्वान् विशेषेण विपश्चित् ४ ५ ३ विशेषतया वेत्ता (जन) ३ ३१ १५. [वि+विद ज्ञाने (अदा०) धातो शतृ। 'विदे शतुर्वसुरि' ति वसुरादेश]

विविध्यन्ति बाणा इव सक्षतान् कुर्वन्ति, भा०—विपादिना घ्नन्ति १६ ६२ [वि+व्यध ताडने (दिवा०) धातोर्लट् 'ग्रहिज्यावयिव्यधि०' इति सम्प्रसारणम्]

विविध्यन्तीभ्य: शत्रुवीरान् निहन्त्रीभ्य (स्त्रीभ्य)

विरोह विविधतया प्रादुर्भव ५ ४३ विशेषेण वर्द्धस्व ३ ८ ११ [वि+रुह बीजजन्मनि प्रादुर्भावे च (भ्वा०) धातोर्लोट्]

विरोहिता विरोहणकर्त्री (युवति =स्त्री) ५ ६१ ६ [वि+रुह बीजजन्मनि प्रादुर्भावे च (भ्वा०) धातोर्णिजन्तात् क्त । ततष्टाप्]

विलायकः येन विविधतया लीयते श्लिष्यते स (विद्वज्जन) २० ३४. [वि+लीङ् श्लेषणे (दिवा०) धातो कर्त्तरि ण्वुल्]

विलिष्टम् परिपूर्णम् (सर्वव्यवहारशोधनम्), प्र०—अत्र विरुद्धार्थे वि-शब्द २ २४ विरुद्धमल्पमपि व्यसनम् २३ ४१. विशेषेण न्यूनमङ्गम् ८ १४ रोमादिमललेशम् ८.१६ [वि+लिश अल्पीभावे (दिवा०) धातो क्त]

विलोहित विविधान् पदार्थानारूढस्तत्सम्बुद्धौ (सभेश राजन्) १६ ५२ **विलोहितः**=विविधं शुभगुणकर्मस्वभावं रोहितो वृद्ध (रुद्र =सेनेश) १६ ७. **विलोहिताः**=विविधरक्तवर्णा (भा०=वृद्धिजीवना सर्पादय) १६ ५८ [वि-लोहितपदयो समास । लोहित =रुह बीजजन्मनि प्रादुर्भावे च (भ्वा०) धातो. 'रुहे रश्च लो वा' उ० ३ ९४ सूत्रेण इतन् रेफस्य च लकार]

विल्मैः प्रदीप्तसाधनै (अन्नै) २ ३५ १२. [विल्म भिल्म भासनमिति वा नि० १ २०.]

विवक्तन वदत, उपदिशत १ १५६.३. [वि+वच परिभाषणे (अदा०) धातोर्लोट् । तस्य तनबादेश । कुत्वञ्च छान्दसम्]

विवक्मि विशेषेण वदामि, प्र०—अत्र 'वाच्छन्दसि' इति कुत्वम् १ १६७ ७ विशेषेणोपदिशामि ३ ५७ ४ विवेकेन परीक्षयामि ७ २२ ५ [वि+वच् परिभाषणे (अदा०) धातोर्लट् । कुत्व छान्दसम्]

विवक्षत इव वक्तुमिच्छोरिव (जनस्येव) २३ २३. [विवक्षत-इवपदयो समास । विवक्षत =वच परिभाषणे (अदा०) धातोरिच्छायामर्थे सन्नन्ताच्छतृ]

विवधः विशेषेण बध्नन्ति पदार्था यस्मिंस्तदन्तरिक्षम् १५ ५ [वि-बन्ध बन्धने (क्र्या०) धातो 'हलश्च' त्यधिकरणे घञ् । वर्णव्यत्ययेन बकारस्य वकार]

विवधीत् विशिष्टतया हन्ति ५ ४४ १२ [वि+हन हिंसागत्यो (अदा०) धातोर्लुङ् । अडभाव । 'लुङि च' सूत्रेण वधादेश]

विवरे अवकाशे १ ११२ १८

विवर्त्तनम् विशेषेण वर्त्तन्ते यस्मिंस्तत् (कार्यम्) २५ ३८ विविधं वर्त्तनम् १ १६२ १४ [वि+वृतु वर्त्तने (भ्वा०) धातोरधिकरणे ल्युट्]

विवर्त्तमानाय विशेषेण वर्त्तमानाय (पदार्थसमूहाय) २२ ८. [वि+वृतु वर्त्तने (भ्वा०) धातो शानच्]

विवर्त्तः विविधं वर्त्तते यस्मिन्त्स (सवत्सर) १४ २३ [वि+वृतु वर्त्तने (भ्वा०) धातोरधिकरणे घञ्]

विवर्हि उत्पन्नाभूत् ३ ५३ १७.

विवलम् विविध वल यस्मात् तत् (छन्द.=आनन्दम्) १४ ६ [वि-बलपदयो समास । बकारस्य वकारो वर्णव्यत्ययेन]

विववर्थ विगन्तु वृणोषि, प्र०—अत्र वर्त्तमाने लिट् 'बभूथाततन्थ०' अ० ७ २ ६४ सूत्रेण निपातनाच्च साधु १ ६१.२२ [वि+वृञ् वरणे (स्वा०) धातोर्लिटि 'बभूथाततन्थ०' अ० ७.२.६४ सूत्रेण निपात्यते]

विववार विगतार्थत्वेन विवृणोति २० ३६ **विवव्रुः**=विशेषेण वृणुयु १२ २८ **विवव्रे**=विशेषतया व्रियते १ ६२ ७ [वि+वृञ् वरणे (स्वा०) धातोर्लिट्]

विववृते विशिष्टतया वर्त्तते १ १६६ ९ [वि+वृतु-वर्त्तने (भ्वा०) धातोर्लिट्]

विवष्टि विशेषेण कामयते ७ १६ ११ [वि+वश कान्तौ (अदा०) धातोर्लट्]

विवसः विशेषतया निवासय ७.८ ३. **विवस्व**=विशेषेण वस, प्र०—अत्र व्यत्ययेनात्मनेपदम् १ १८७ ७. [वि+वस निवासे (भ्वा०) धातोर्लोट् । व्यत्ययेनात्मनेपदम् । अन्यत्र लङि मध्यमैकवचनेऽटोऽभावे च रूपम्]

विवस्वतः सूर्यस्य ३ ५१ ३ सवितु ३ ३४ ७ प्रकाशमानस्य (सूर्यस्य) १.५३ १ परमेश्वरस्य १.५८ १. **विवस्वते**=सूर्यलोकाय १ ३१ ३ **विवस्वन्**=विविधे स्थाने वसति तत्सम्बुद्धौ (विद्वन् गृहपते) ८ ५ **विवस्वान्**=सूर्य इव ७ ९ ३ [विवस्वन आदित्यात । विवस्वान् विवासनवान् नि० ७ २६ असौ वाऽआदित्यो विवस्वानेष ह्यहोरात्रे विवस्ते तमेष वस्ते सर्वतो ह्येनेन परिवृत' श० १०.५ २ ४. विवस्वानादित्य एष ते सोमपीथ श० ४.३ ५.१८. (देवा आदित्या) य (मार्तण्डम्) उ ह तद् विचक्रु स विवस्वानादित्यस्तस्येमा प्रजा. श० ३ १.३ ४]

विवस्वत्याः या विवस्वति साध्व्य (उषस = प्रभातान्) ३ ३० १३ [विवस्वत्प्राति० साध्वर्थे यत् । तत स्त्रियां टाप्]

प्रविशतु १२ १०५ **विशन्ति**=प्राप्नुवन्ति ६ ३६ ३ प्रविशन्ति ३ ४६ ४ **विशन्तु**=आविष्टा भवन्तु १ ५ ७ प्राप्नुवन्तु ४ ५० १० **विशस्व**=प्रवेश कुरु १८ ३ [विश प्रवेशने (तुदा०) धातोर्लोट्। अन्यत्र लडपि। विशस्व प्रयोगे व्यत्ययेनात्मनेपदम्]

विशतात् विशतु, तिष्ठतु ३४ ५० विशताम् ८ ४२ [विश प्रवेशने (तुदा०) धातोर्लोटि 'तुह्योस्तातङ्०' इति तातङ्]

विश् वैश्यवर्ग प्रजा व ३८ १४ ऋ० भू० १५२ उत्तम प्रजा को श० वि० १४४, अथर्व० १२ ५ ८. अनेक विद्योद्यम, बुद्धि, विद्या, धन और धान्य आदि वलयुक्त प्रजा को आर्याभि० २ ३१, ३८ १४ **विशः**=प्रजा भा०—सुसन्ताना १२ ५५ प्रजाय। १३ ११ मनुष्या ६ १४ २ धनानि २ २४ १० या निशन्ति ता (प्रजा) १५.६० मनुष्याद्या प्रजा २१ १६ **विशाम्**=पालनीयानाम् (प्रजानाम्) ११२१ ३ **विशे**=प्रजा के अर्थ स० वि० १३८, अथर्व० १४ २ २७ [विश मनुष्यनाम निघ० २ २ विशाम् मनुष्याणाम् नि० ५ २७ यज्ञो वै विशो यज्ञे हि सर्वाणि भूतानि विष्टानि श० ८ ७ ३ २१ यज्ञो वै विट् श० १४ ३ ३ ६ निडुक्थानि ता० १८ ८.६ विट् शस्त्रम् प० १४ विट् सूक्तानि ऐ० २ ३३ विशो ग्रावाण श० ३ ९ ३ ३ विड् वै ग्रावाण ता० ६ ६ १ विड् वै गर्भ श० १३ २ ९ ६ तै० ३ ९ ७ ३ विड् वै शकुन्तिका (यजु० २३ २२) श० १३ २ ९ ६ तै० ३ ९ ७ ३ विड् वै हरिणी तै० ३ ९ ७ २ विशो वै पस्त्या श० ५ ३ ५ १९ विशो वै सूच्य श० १३ २ १० २ विशो होत्राशसिन ऐ० ६ २१ गो० उ० ६ ३ विट् सप्तदश ता० १८ १०.९ विड् वै सप्तदश ता० २ ७ ५ विश सप्तदश ऐ० ८ ४. वर्षाभिर्ऋतुनादित्या स्तोमे सप्तदशे स्तुत वैरूपेण विशौजौसा तै० २ ६ १९ १ राष्ट्राणि वै विश ऐ० ८ २६ विट् सुरा श० १२ ७ ३ ८ आया हीमा प्रजा विश श० ८ २ १ १७ अन्न वै विश श० ४ ३ ३ १२ अन्न विश श० २ १ ३ ८ अन्न वै क्षत्रियस्य विट् श० ३ ३ २ ८ तस्माद् राष्ट्री विश घातुक श० १३ २ ९ ६ तस्माद् राष्ट्री विशमत्ति श० १३ २ ९ ८ दैव्यो वा ऽएता विशो यत्पशव श० ३ ७ ३ ९ अपरजना ह वै विशो ऽदेवी गो० उ० ६ १६ क्षत्र वै -प्रस्तरो विश इतर वर्हि श० १ ३ ४ १० तस्माद् ब्रह्म च क्षत्र विशि प्रतिष्ठते श० १२ २ ७ १६ स्वरिति (प्रजापति) विशम् (अजनयत) श० २ १ ४ १२ स विशमसृजत यान्येतानि देवजातानि गणश आख्यायन्ते वसवो रुद्रा आदित्या विश्वे देवा मरुत इति श० १४.४ २ २४. पूषा विशा विट्पति तै० २ ५ ७ ४. तस्या (विश) राजा गर्भ ता० २ ७ ५. अहुतादो वै विश श० २ ५ २ २४ भूमो वै विट् श० ३ ९ १.१७ अनिरुक्तेव हि विट् श० ९ ३ १ १५.]

विशल्यः विगतानि शल्यानि यस्य स. (सेनापति) १६ १० [वि-शल्यपदयो समास.]

विशस्त विशेषेण ताडयत हिंस्त ११६२ १८ विशिष्टतया छिन्त २५ ४१ [वि+शसु हिंसायाम् (भ्वा०) धातोर्लोट्। 'बहुल छन्दसी' ति शपो लुक्]

विशस्ता विच्छेदक (ऋतु'=वसन्तादि) २५ ४२ [वि+शसु हिंसायाम् (भ्वा०) धातो कर्त्तरि तृच]

विशारि विशेषतया हिंस्यात् ३ ५३ १७ [वि+शॄ हिंसायाम् (क्र्या०) धातो कर्मणि लुङ् अटोऽभाव]

विशालम् विस्तीर्णम् (छन्द) १४.९ विस्तीर्ण कर्म्म १५ ५

विशासतु उपदिशन्तु, भा०—शिक्षेयु २३ ४२ **विशास्ति**=विशेषेणोपदिशति २३ ३६. [वि+शासु अनुशिष्टौ (अदा०) धातोर्लोट्। अन्यत्र लट्]

विशिक्षुः सुशिक्षक (अग्नि=राजा) २.११० [वि+शिक्ष विद्योपादाने (भ्वा०) धातो कर्त्तरि बाहु० औणा० कु]

विशिखासः विगतशिखा सन्यासिन, भा०—परिव्राज १६ ५९ [वि-शिखापदयो समास। ततो जसोऽसुक्]

विशिखा इव शिखारहिता (कुमारा) इव ६ ७५ १७ यथा विगतशिखा विविधशिखा वा (कुमारा=बालका.) १७ ४८ [विशिखा-इवपदयो समास। विशिखा=वि-शिखापदयो समास]

विशिप्रियाणाम् विविधे धर्म्ये कर्म्मणि हनु-नासिके येषा तेषाम् (गृहाश्रमिणाम्), प्र०—शिप्रे हनुनासिके वा नि० ६ १७, ६ ४ [वि-शिप्रपदयो समास। शिप्रे हनुनासिके वा नि० ६ १७]

विशिशिप्रम् विशी शिप्रे शोभने हनुनासिके यस्य तम् (मखायम्) ५ ४५ ६ [विशिन्-शिप्रपदयो. समास शिप्रे हनुनासिके वा नि० ६ १७]

विशिश्नथ विशिष्टतया हिन्धि २ २८ ७

विश्रृण्विरे विश्रृण्वन्ति ४ ८ ६ [वि+श्रु श्रवणे (भ्वा०) धातोर्लिट्। 'छन्दस्युभयथा' अ० ३ ४ ११७ सूत्रेण लिट सार्वधातुसज्ञाया 'श्रुव. शृ च' इति श्नु शृ

१६ २४ [वि+व्यध ताडने (दिवा०) धातो शत्रन्तान् ङीप्]

विविनक्तु विशेषेण वेचयति वेचयतु वा, अ०—पृथक्करोति प्र०—अत्राऽऽद्ये पक्षे लडर्थे लोडन्तर्गतो ण्यर्थश्च १ १६ [वि+विचिर् पृथग्भावे (रुधा०) धातोर्लोट्]

विविप्रे विशेषतया क्षिपन्ति ३ ३२ ४

विविवर्ह विशेषेण वर्द्धयति २ २३ १३ [वि+वृह वृद्धौ (भ्वा०) धातोर्लिट्। अभ्यासस्येत्व छान्दसम्]

विविशुः आविशन्ति ५ १९ २. प्रविशेयु ३ ७.१ [विश प्रवेशने (तुदा०) धातोर्लिट्]

विविषुः व्याप्नुवन्ति ६.३२ ५ **विविष्मः**=व्याप्नुमः ६.२३.५ [विष्लृ व्याप्तौ (जु०) धातोर्लिट्]

विवृक्णा विविधतया छिन्नानि (अ०—स्कन्धासि), प्र०—अत्र ओव्रश्चू छेदने इत्यस्मात्कर्मणि निष्ठा 'ओदितश्च' इति नत्व निष्ठादेश 'षत्वस्वरप्रत्ययेड्विधिपु सिद्धो वक्तव्य' अ० ८ २.६ इति वार्त्तिकेन झलि षत्वे कर्त्तव्ये झत्परत्वाभावात् षत्व न भवति 'चो कु' इति कुत्व 'शेश्छन्दसि०' इति शेर्लोप १ ३२ ५ विविधच्छेदन-साधनेन वज्रेण १ ३२ ३ ऋ० भू० २८४ [वि+ओव्रश्चू छेदने (तुदा०) धातो क्त । तत शेर्लोपश्छन्दसि]

विवृत् यद्विविधैराकारैर्वर्त्तते तज्जगदुपकर्त्ता (विद्वज्जन) १५ ९. **विवृते**=जगदुपकाराय १५ ९ [वि+वृतु वर्त्तने (भ्वा०) धातो क्विप्]

विवृत्ताय विविधतया कृतवर्त्तमानाय (जीवाय) २२ ८ [वि+वृतु वर्त्तने (भ्वा०) धातो क्त । ततश्चतुर्थी]

विवृश्चत् विविधतया छिनत्ति १ ६१ १० **विवृश्चति**=विशेषेण छिनत्ति ३ ५३ २२ **विवृश्चः**=विशेषतया छिन्धि ४ १७ ७ [वि+ओव्रश्चू छेदने (तुदा०) धातोर्लेट् अन्यत्र लट् लङ् च]

विवृश्चन् विविधतया छिन्दन् (इन्द्र=सूर्य) २ १५ ६ [वि+ओव्रश्चू छेदने (तुदा०) धातो शतृ]

विवेक्षि व्याप्नोषि ७ ३ ४ [विष्लृ व्याप्तौ (जु०) धातोर्लट्]

विवेति विशेषतया व्याप्नोति १ ४८ ६ **विवेषि**=प्राप्नोषि १ १८९ ७ **विवेः**=प्राप्नोषि, प्र०—अत्र 'बहुल छन्दसि' इति श्लु १ ६९ ४ [वी गतिव्याप्तिप्रजनादिषु (अदा०) धातोर्लट् 'बहुल छन्दसी' ति शप श्लु । अन्यत्र लट् लङ् च]

विवेद विन्दति ३ ३९ ५ वेत्ति ४ ५ ९ विजानाति १ १८५ १ विजानीयात् ३ ३२ ४ [विद्लृ लाभे (तुदा०) धातोर्लिट्। विद ज्ञाने (अदा०) धातोर्वा लटि 'विदो लटो वा' इति तिपो णल्। विवेद जानाति नि० ३ २२]

विवेनतम् विरुद्ध कामयेथाम् ५ ७८ १ **विवेनः**=कामये ५ ३१ २ विरोधेन कामयथा ६ ४४ १०

विवेश विशति १ १६४ २१ प्रविष्टवान् ३ ३ ४ प्रविष्टोऽस्ति १ ९८ २ विशेत् ३ ३४ ५. विश ३ ३१.५ व्याप्नोति ४ ५८ ३ **विवेशुः**=विशन्ति ४ २३ ९. [विश प्रवेशने (तुदा०) धातोर्लिट्। विवेश विशति नि० १० ४६]

विवेष वेवेष्टि ५ ७७ ४ व्याप्नोति २ ३५ १३. व्याप्नुयात् ७.२१ ४ **विवेषः**=व्याप्नोति ७ ३७ ५ [विष्लृ व्याप्तौ (जु०) धातोर्लिट् । अन्यत्र लङ्]

विवोचति विविच्योच्याद्वदेत्, प्र०—अत्र लेटि वचधातोर्व्यत्ययेनौकारादेश १ १०५ ४ **विवोचन्**=विशेषेणोपदिशन्ति ४ १ १४ **विवोचः**=उपदिश ४ ५ १२ व्यवोचो विवदे ६ २२ ४ **विवोचेः**=विशेषतया ब्रूया १ १३२ ३ [वच परिभाषणे (अदा०) धातोर्लेट्। विकरणव्यत्ययेनाडि 'वच उम्' इत्युमागमे गुणे च रूपम् । अन्यत्र लुङ। तत्र 'अस्यतिवक्ति०' सूत्रेण अङ्। अन्यत्र लिङि 'लिङ्याशिष्यङ्' अ० ३ १ ८६ सूत्रेणाङ्। विवोचत् विवक्ष्यति नि० ७ ३०]

विव्यक् व्याप्नुयात् ७ २१ ६

विव्ययुः सन्तनुत वेष्टयतम् ६ ७२ ५ [वी गतिव्याप्तिप्रजनादिषु (अदा०) धातोर्लिटि मध्यमद्विवचने रूपम्]

विव्याच छलयति ३ ३९ ४. [व्यच व्याजीकरणे (तुदा०) धातोर्लिट्]

विव्ये कामयते ४ २२ २ सवृणोति १ १७३ ६ [वी गतिव्याप्ति कान्त्यादिषु (अदा०) धातोर्लिट् । व्यत्ययेनात्मनेपदम्]

विव्रता विविधानि व्रतानि शीलानि याभ्या तौ (हरी=सेनान्यायप्रकाशौ) १ ६३ २ [वि-व्रतपदयो समास । ततो द्विवचनस्याकारादेश]

विश विशति, अ०—प्रविशति ३ २२ प्राप्नुहि १ १७९ १ **विशत**=प्रवेश कुरुत ४ १३ **विशतु**=

नवकर्मेष्टक्रिय (पति) १४ १४ **विश्वकर्माणम्**=अखिलेषु कर्मसु कुशलम् (अ०—महात्मानम्) १७ २३ विश्वानि सर्वाणि धर्म्याणि कर्म्माणि यस्य तम् (ईश्वर सभेश वा) ८ ४५ [विश्व-कर्मन्पदयो समास । विश्वम् बहुनाम निघ० ३ १ विश्वकर्मा पदनाम निघ० ५ ४ विश्वकर्मा सर्वस्य कर्त्ता नि० १० २५ विश्वम् सर्वम् नि० ३ २२. यद्वै विश्व सर्व तत् श० ३ १ २ ११ तदन्न वै विश्वम्प्राणो मित्रम् जै० उ० ३ ३ ६ कर्मन् इति व्याख्यातम् । अथो विश्वकर्मणे । विश्व वै तेषा कर्म कृत सर्व जित भवति ये सवत्सरमासते श० ४ ६ ४ ५ वाग्वै विश्वकर्मर्षिर्वाचा हीद सर्व कृतम् श० ८ १ २.९. प्रजापतिर्वै विश्वकर्मा। श० ७ ४ २ ५ सवत्सरो विश्वकर्मा ऐ० ४ २२. असौ वै विश्वकर्मा योऽसौ (सूर्य.) तपति कौ० ५ ५. गो० उ० १ २३ विश्वकर्मा त्वादित्यैरुत्तरत पातु । श० ३ ५.२ ७ असौ (द्यौ) विश्वकर्मा तै० ३ २ ३ ७ (इन्द्र) विश्वकर्मा भूत्वाऽभ्यजयत् तै० १ २ ३.३ इन्द्रो वै वृत्र हत्वा विश्वकर्माऽभवत् प्रजापति प्रजा सृष्ट्वा विश्वकर्माऽभवत् ऐ० ४ २२. विश्वकर्माऽयमग्नि श० ९ २ २ २ अय वै वायुर्विश्वकर्मा योऽय पवतेऽएष हीद सर्व करोति श० ८ १ १ ७ वैश्वकर्मण एककपाल पुरोडाशो भवति । विश्व वा एतत् कर्म कृत सर्व जित देवानामासीत् साकमेधैरीजानाना विजिग्यानानाम् श० २ ५ ४ १० (प्रजापति) वैश्वकर्मण पुरुषम् (आलिप्सत) श० ६ २ १.५]

विश्वकाय विश्वस्याऽनुकम्पकाय (विद्वज्जनाय) १ ११६ २३ अनुकम्पिनाय समग्राय राज्ञे १ ११७.७ [विश्वमिति व्याख्यातम् । तत 'अनुकम्पायाम्' अ० ५ ३ ७६ सूत्रेण क प्रत्यय]

विश्वकृष्टय: विश्वा कृष्टिर्येभ्यस्ते (मरुत =वायव) ३.२६ ५ **विश्वकृष्टिम्**=विश्वे सर्वे कृष्टयो मनुष्या विजयिनो यस्मात्तम् (राजपुरुषम्) ४ ३८ २ **विश्वकृष्टि:**=विश्वा सर्वा कृष्टीर्मनुष्यादिका प्रजा १ ५९ ७ [विश्वा-कृष्टिपदयो समास । कृष्टय. मनुष्यनाम निघ० २ ३]

विश्वगूर्त्त: विश्व सर्वं भोज्य वस्तु निगलित येन स (इन्द्र =सूर्य सभाध्यक्षो वा) १.६१ ९ [विश्व-गूर्त्तपदयो समास) गूर्त्तम्=गुर्वी उद्यमने (भ्वा०) धातो क्त । गॄ निगरणे (तुदा०) धातोर्वा क्त. प्रत्यय]

विश्वगूर्त्ती समग्रोद्यमौ (स्त्रीपुरुषौ) १ १८० २ [विश्वोपपदे गुर्वी उद्यमने (भ्वा०) धातो. क्तिन्]

विश्वचक्षसे विश्वस्य चक्षुर्दर्शन यस्मात्तस्मै सूराय=सूर्यलोकाय) १ ५० २ **विश्वचक्षा:**=यो विश्व सर्वं जगच्चष्टे पश्यति स (अ०—जगदीश्वर) १७ १८ सब ससार का द्रष्टा (ईश्वर) आर्याभि० २ ३२ १७ १८ [विश्वचक्षस्पदयो समास । चक्षस्=चक्षिङ् व्यक्तायां वाचि, अय दर्शनेऽपि (अदा०) धातोरौणा० असुन्]

विश्वश्चन्द्रा: विश्वानि समग्राणि चन्द्राणि सुवर्णादीनि येषा ते (अप =जलानीव व्याप्तविद्या), प्र०—अत्र 'ह्रस्वाच्चन्द्रोत्तरपदे मन्त्रे' इति सुडागम ३.३१.१६ विश्वानि चन्द्राणि सुवर्णादीनि याभ्यस्ता (श्रिय) १ १६५ ८ [विश्व-चन्द्रपदयो समास । चन्द्रम् हिरण्यनाम निघं० १ २ 'ह्रस्वाच्चन्द्रोत्तरपदे मन्त्रे' इति सुडागम]

विश्वचर्षणिम् सर्वदर्शकम् (तनय=विद्वास पौत्रम्) १ ६४.१४. विश्वे चर्षणयो धार्मिका मनुष्या कार्यद्रष्टारो यस्य तम् (इन्द्र=दुष्टाचारिशत्रुविनाशक नृपम्) ६ ४४ ४ विश्वप्रकाशकम् (अग्निम्) ५ १४ ६ **विश्वचर्षणि:**=विश्वे सर्वे चर्षणयो मनुष्या रक्ष्या यस्य स (सेनाध्यक्ष), प्र०—अत्र 'कृषेरादेश्च च' उ० २ १०० अनेनाऽनि प्रत्यय आदेश्चकारादेशश्च १ २७ ९ विश्वप्रकाशक (अग्नि) ५ ९.३ अखिलविद्याप्रकाश ५ २३ ४ विश्वे चर्षणयो मननशीला मनुष्या यस्य स (विद्वज्जन) ६ २.२ **विश्वचर्षणे**=समस्तद्रष्टव्यदर्शन (राजन्) ५ ३८ १ विश्वस्य सर्वस्य जगतश्चर्षणिर्द्रष्टा तत्सम्बुद्धौ (इन्द्र=भगवन्) १.९.३ [विश्व-चर्षणिपदयो समास । चर्षणय मनुष्यनाम निघ० २ ३ चर्षणि=कृष विलेखने (भ्वा०) धातो 'कृषेरादेश्च च' उ० २ १०० सूत्रेण अनि । कृष्धातोश्चादे ककारस्य चकारादेश । विश्वचर्षणि पश्यतिकर्मा निघ० ३ ११]

विश्वजनस्य विश्वस्मिन् जगति सर्वस्य जनसमूहस्य ५.२८ [विश्व-जनपदयो समास]

विश्वजन्यम् विश्वाञ्जनितु योग्य विश्वसुखजनक वा (राध.=धनम्) ६ ४७ २५ [विश्व-जन्यपदयो समास । विश्वजन्यम् सर्वजन्यम् नि० ११ १० जन्यम्=जनी प्रादुर्भावे (दिवा०) धातो 'तकिशसिचतियतिजनीनाम्०' अ० ३ १ ९७ वा०सूत्रेण यत् । 'भव्यगेय०' अ० ३ ४ ६८ सूत्रेण कर्त्तरि यत्]

विश्वजन्या या विश्व जनयन्ति ता (अ०—अप), प्र०—अत्र 'भव्यगेय०' इति कर्त्तरि जन्यशब्द 'सुपा

आदेशश्च । 'वा छन्दसी' ति द्वित्व न भवति । व्यत्ययेनात्मनेपदञ्च]

विशे विशे प्रजायै प्रजायै १५ २६ विशोविश = प्रजाया प्रजाया मध्ये ६ ४६ २. [विशे पदस्य वीप्साया द्वित्वम् । अन्यत्र विश पदस्य वीप्साया द्वित्वम्]

विशौजाः विशा प्रजया सहौज पराक्रमो यस्य स (राजा) १० २८ [विशा-ओजस्पदयो समास । समासे तृतीयाया अलुक्]

विश्पतिम् प्रजाया पालकम् (सूर्यम्) १ १६४ १ विशिष्टाना पालकम् (राजानम्) ३ १३ ५ विशः प्रजास्तासा स्वामिन पालनहेतु वा (अग्नि=परमेश्वर विद्युदग्नि वा) १ १२ २ प्रजापति ७ ५५ ५ **विश्पतिः** = विशा प्रजाना पालक सभापती राजा, प्र०—अत्र 'वाच्छन्दसि सर्वे विधयो भवन्ति' इति नियमाद् 'व्रश्च-भ्रस्जसृज०' इति षत्व न भवति १ २६ ७ [विश-पति-पदयो समास । 'व्रश्चभ्रस्ज०' इति प्राप्त षत्व न भवति छान्दसत्वात् । विश मनुष्यनाम निघ० २ ३ विश्वपति सर्वस्य पातार वा पालयितार वा नि० ४ २६]

विश्पतीव प्रजापालकाविव (वायुसूर्यौ) ३३ ४४ [विश्पती-इवपदयो समास । विश्पतिरिति व्याख्यातम्]

विश्पत्नीम् प्रजाया पालिकाम् (शक्तिम्) ३ २६ १ **विश्पत्न्यै** = विश प्रजाया पालयित्र्यै (उत्तमपत्न्यै) २ ३२.७ [विश्पतिप्राति० स्त्रिया 'विभाषा सपूर्वस्य' अ० ४ १ ३४ सूत्रेण नकारादेशो ङीप्]

विश्पलाम् विशा पालिका विद्याम् १ ११७ ११ विश प्रजा पात्यनेन सैन्येन तल्लाति यया ताम् (सेनाम्) १ ११२ १०, **विश्पलायाः** = प्रजाया १ ११८ ८. **विश्पलायै** = विशा प्रजाना पलायै सुखप्रापिकायै नीत्यै। १ ११६ १५ [विश्पोपपदे ला आदाने (अदा०) धातो क ततष्टाप् स्त्रियाम् । विश्पा = विश् इत्युपपदे पा रक्षणे (अदा०) धातो क । तत स्त्रिया टाप्]

विश्पलावसू विशा पालयितारौ च तौ वासकौ (अध्यापकोपदेशकौ) १ १८२ १ [विश्पल-वसुपदयो समास । विश्पलेति व्याख्यातम् पूर्वपदे]

विश्या इव यया विक्षु प्रजासु साधवो वणिग्जना १ १२६ ५ [विश मनुष्यनाम निघ० २ ३ तत' साध्वर्थे यत् । तत स्त्रिया टापि विश्या रूपम् । विश्या-इवपदयो. समास]

विश्येषु विक्षु प्रजासु भवेषु वणिग्जनेषु १८.४८, [विश. मनुष्यनाम निघ० २ ३ ततो भवार्थे यत्]

विश्रथय विशेषेण हिन्धि २ २८ ५ [वि+श्रथ दौर्बल्ये (चुरा०) धातोर्लोट्]

विश्रयध्वम् विशिष्टतया सेवध्वम् ५ ५ ५ **विश्रयन्ताम्** = विविधतया सेवन्ताम् १ १३.६ **विश्रयाति** = विशेष कर आश्रय करती है स० वि० १३६, अथर्व० १४ २.३८ [वि+श्रिञ् सेवायाम् (भ्वा०) धातोर्लोट् । अन्यत्र लेट्]

विश्रिता विविधैराप्तै श्रिता सेविता (गी = वाक्) १ ११७ १ विश्रिता = विविधप्रकारै सेवमाना (नद्य) १.५५ २. [वि+श्रिञ् सेवायाम् (भ्वा०) धातो क्त । तत' स्त्रिया टाप्]

विश्रुतम् यद्विविध श्रूयते तद्यश १.५२ ११ [वि+श्रु श्रवणे (भ्वा०) धातो क्त]

विश्रुताय विशेषेण श्रुता गुणा यस्मिँस्तस्मै (नरे = नायकाय) ३४ १६ यो विविधैर्गुणै श्रूयते तस्मै (सभाद्यध्यक्षाय) १ ६२ १ [वि-श्रुतपदयो समास । श्रुतम् = श्रु श्रवणे (भ्वा०) धातो क्त]

विश्रुति विविधा श्रुतय श्रवणानि तद्वति (पत्नि) ८ ४३ [वि-श्रुतिपदयो समास । श्रुति = श्रु श्रवणे (भ्वा०) धातो स्त्रिया क्तिन्]

विश्वकर्मणः विश्व सर्वं कर्म्म क्रियमाणमस्य स विश्वकर्मा तस्य परमेश्वरस्य ऋ० भू० १३०, ३१.१७ विश्वानि सर्वाणि सत्यानि कर्माणि यस्याऽऽश्रयेण तस्मात् सूर्यात् ३१ १७ **विश्वकर्मणा** = विश्वानि समग्राणि धर्म्यकर्माणि यस्य पत्युस्तेन १३ १६ **विश्वकर्मणे** = विश्व कर्म क्रियमाण कृत येन तस्मै (पत्ये = जगदीश्वराय) १७ ७८ अखिलकर्मणोत्पादनाय (इन्द्राय = ऐश्वर्याय), अखिलकर्मसाधनाय (इन्द्राय) ८ ४५ अखिलशुभकर्मानुष्ठानाय १२ ४३ **विश्वकर्मन्** = अखिलशुभकर्मसेविन्) (सर्वसभेश) १७ २४ समग्रोत्तमकर्मकारिन् (अ०—जगदीश्वर) १७ २१ **विश्वकर्मा** = विश्वानि सर्वाणि कर्माणि यस्या यस्य वा सा वाक्, स विद्वान् वा ५ ११ विश्व सम्पूर्ण क्रियाकाण्ड सिध्यति यया सा (वाक्) १४ अखिलोत्तमक्रिय' (प्रजापति = परमेश्वर) १२ ६१ विश्वान्यखिलानि कर्म्माणि यस्मात् स (अ०—वायु) १३ ५५ सर्वोत्तमकर्मा सभापति ८ ५४ विश्व सर्व जगत् कर्म्म क्रियमाण यस्य स., भा०—सर्वजगत्स्रष्टा (परमेश्वर) १७.२६. अखिलशुभक्रियाकुशल. (पति.) १४.११.

विश्वमिव ५ ४४ १ सर्वेषामिव ७ १२ [विश्वसर्वनाम्न. 'प्रकारवचने थाल्' अ० ५ ३ २३ सूत्रेण थाल्। अथवा इवार्थे 'प्रत्नपूर्वविश्वेमात् थाल् छन्दसि' अ० ५.३ १११. सूत्रेण थाल्। विश्वथा=विश्व इव नि० ३ १६.]

विश्वदर्शतम् विश्वस्य प्रकाशकम् (राजानम्) ५ ८ ३ सर्वविद्यावोधस्य द्रष्टारम् (अग्नि=विद्वास जनम्) १२ १११. सर्वैविद्वद्भिर्द्रष्टव्य जगदीश्वरम्) १.२५ १८ **विश्वदर्शतः**=यो विश्वस्य दर्शयिता (सूर्य) १ ५० ४ यो विश्वै सर्वै सम्प्रेक्षितु योग्य (विद्वज्जन) १ ४४ १०. विश्वेन द्रष्टव्य (राजपुरुष) ३ ३ ३६ [विश्व-दर्शतपदयो समास। दर्शत =दृशिर् प्रेक्षणे (भ्वा०) धातो. 'भृमृदृशि०' उ० ३ ११० सूत्रेणातच्]

विश्वदानीम् विश्व समग्र दान यस्यास्ताम् (विद्वद्-वृत्तिम्) १ १६४ ४० [विश्व-दानपदयो समासे स्त्रिया ङीप्। दानम्=डुदाञ् दाने (जु०) धातोर्ल्युट्]

विश्वदानीम् सर्वदा ६ ५२ ५ सर्वस्मिन् काले ४ ५० ८. [विश्वसर्वनाम्न सप्तम्यन्ताद् काले वर्त्तमानाद् दानी छान्दस। विश्वदानीम् सर्वदा नि० ११ ४४]

विश्वदृष्टः विश्वेन दृष्ट (सूर्य) १ १९१ ८ सर्वैर्दृष्ट (भिषग्जन) १.१९१ ६ **विश्वदृष्टाः**=विश्वैस्सर्वैर्दृष्टा ये ते (जना) १.१९१ ६ [विश्व-दृष्टपदयो समास]

विश्वदेवनेत्राः विश्वेषु देवेषु नेत्र प्रज्ञान येषान्ते (देवा =विद्वास) ६ ३६ **विश्वनेत्रेभ्यः**=सर्वविद्वत्तुल्या नेत्रा नीतिर्येषा तेभ्य. (देवेभ्य) ६ ३५ [विश्वदेवपदयो समासे ततो विश्वदेव-नेत्रपदयो समास। नेत्रम्=णीञ् प्रापणे (भ्वा०) धातोरौणा० ष्ट्रन्]

विश्वदेवम् विश्वस्य प्रकाशकम् (सवितार=परमात्मानम्) ५ ८२ ७ **विश्वदेवः**=विश्वेषा सर्वेषा देव. प्रकाशक (आप्तो जन) ६ ६७ ६ **विश्वदेवाय**=विश्वेऽखिला देवा विद्वासो यस्मिँस्तस्मै (इन्द्राय=धनाय) १ १४२ १२ विश्वस्य प्रकाशाय ४ ५० ६ **विश्वदेवाः**=सर्वे विद्वास ७ ३५ ११ [विश्वदेवपदयो समास। देव = दिवु क्रीडाविजिगीषाव्यवहार द्युतिस्तुतिमोदमदस्वप्नकान्ति-गतिषु (दिवा०) धातो कर्त्तरि अच्। भावे वा घञ्]

विश्वदेवेभिः स्वकीयै रश्मिभि, प्र०—'रश्मयो ह्यस्य विश्वे देवा श० ३ ७ ३ ६, २ २२ [विश्व-देवपदयो समासे 'बहुल छन्दसी' ति भिस ऐसादेशो न भवति]

विश्वदेव्य विश्वेषु देवेषु साधो (विद्वज्जन) ३ ६२ ४ **विश्वदेव्यम्**=विश्वेषु देवेषु पृथिव्यादिषु भवम् (अग्नि=विद्युतम्) १ १४८ १ विश्वेभ्यो देवेभ्यो हितम् (भगम्=ऐश्वर्यम्) २२ १४ **विश्वदेव्यः**=विश्वान् समग्रान् देवान् दिव्यगुणानर्हति (समुद्र) १ ११० १ विश्वेषु सर्वेषु देवेषु दिव्यगुणेषु साधु (छाग=छागदुग्धम्) १ १६२ ३. [विश्वदेवप्राति० साध्वर्थे भवार्थे हितार्थे वा यत्]

विश्वदेव्यावती विश्वेषु देवेषु विद्वत्सु भव विज्ञान प्रशस्त विद्यते यस्या सा (अदिति =अध्यापिका), प्र०—अत्र 'सोमाश्वेन्द्रियविश्वदेव्यस्य मतौ' अ० ६ ३ १३१ इति दीर्घत्वम् ११.६१ [विश्वदेव्यप्राति० प्रशसायामर्थे मतुप्। तत स्त्रिया ङीप्। 'मन्त्रे सोमाश्वेन्द्रिय०' इति मतौ परे पूर्वस्य दीर्घ]

विश्वदेव्यावते विश्वानि देव्यानि विद्यन्ते यस्मिँ-स्तस्मै (सर्वरक्षकाय पुरुषाय) ३८ ८ [विश्वदेव्यमिति व्याख्यातम्। ततो मतुवन्ताच् चतुर्थी]

विश्वदोहसम् विश्व सर्वविज्ञानान् दोग्धि यया ताम् (धेनु=विद्या-युक्ता वाचम्) ६ ४८ १३ [विश्वोपपदे दुह प्रपूरणे (अदा०) धातो. करणे औणा० असुन्]

विश्वदोहसः विश्व सर्व जगद् गुणैर्दुहन्ति पिपुरति ते, विश्वस्मिन् सुखप्रपूरका (विद्वासो जना) १ १३० ५ [पूर्वपदे व्याख्यातम्]

विश्वध विश्व दधातीति तत्सम्बुद्धौ (इन्द्र=ईश्वर) १ ६३ ८ यो विश्व दधाति स (राजा सेनेशो वा), प्र०—अत्र 'छान्दसो वर्णलोपो वा' इति सलोप ७ २२ ७. [विश्वो-पपदे डुधाञ् धारणपोषणयो (जु०) धातोर्क]

विश्वध विश्वै सर्वै प्रकारैरिति विश्वध, प्र०—अत्र छान्दसो ह्रस्व १ १७४ १० [विश्वप्राति० प्रकारे धाप्रत्ययश्छान्दस। ह्रस्वश्च वर्णव्यत्ययेन]

विश्वधायसम् सर्वव्यवहार-धनधर्त्तारम् (गृहपतिम्) ५ ८ १ विश्वस्य धारणसमर्थम् (भा०—परमेश्वरम्) २ १७ ५. यो विश्वा समग्रा विद्या दधाति तम् (ब्रह्म-चारिणम्) ७ ४ ५ **विश्वधायाः**=यो विश्व दधाति स (विद्वज्जन), प्र०—अत्र विश्वोपपदाद् बाहुलकादसुन् युडा-गमश्च १ ७३ ३ या विश्व सर्वं जगद्विद्यागुणै सह दधाति सा (वाक्), प्र०—अत्र विश्वोपपदे डुधाञ्-धातोरसुन् प्रत्ययो बाहुलकाण्णिच्च १ ४ या विश्व सर्वं गृह्णाति गृहाश्रम राजव्यवहार दधाति सा (राजपत्नी) १३ १८ [विश्वोप-पदे डुधाञ् धारणपोषणयो (जु०) धातोरौणा० असुन्, स च णित्। णित्त्वाद् युगागम। विश्वधाया (यजु० १३ १८) (=पृथिवी) अस्या हीद सर्वं हितम् श० ७ ४ २,७

सुलुक्०' इति जस स्थाने आकारादेश. १ १६६ ८
विश्वजन्याम्=या विश्वमखिल जगज्जनयति प्रकटयति ताम् (सुमतिं=प्रज्ञाम्) १७ ७४ विश्व समग्रमपत्य जायते यस्यास्ताम् (सुमतिं=शोभनप्रज्ञा स्त्रियम्) ३ ५७ ६. विश्व जन्य यया ताम् (अदितिं=कालविद्याम्) ७ १० ४
विश्वजन्ये=सर्वस्य जनयित्र्यौ (द्यावापृथिवी=प्रकाशभूमी) ३ २५ ३ [विश्व जन्यपदयो समास । तत स्त्रिया टाप् । 'सुपा सुलुक्०' इति जस स्थाने आकार]

विश्वजन्याः विश्वानि जन्यानि सुखानि येषु ते (प्रजाजना) ६ ३६ १ [विश्व-जन्यपदयो समास । जन्यम्=जनी प्रादुर्भावे (दिवा०) धातो 'तकिशसि०' इति यत्]

विश्वजिते यो विश्व जयति तस्मै (इन्द्राय=विद्वत्सभासेनेशाय) २ २१ १ [विश्वोपपदे जि जये (भ्वा०) धातो कर्त्तरि क्विप् । विश्वजित् (यज्ञ) (देवा) विश्वजिता विश्वमजयन् ता० २२ ८ ४ विश्वजिता वै प्रजापति सर्वा प्रजा अजनयत् सर्वमुदजयत् तस्माद् विश्वजित् कौ० २५ १३ एष ह प्रजाना प्रजापतिर्यद् विश्वजित् गो० पू० ५ १० प्रजापतिर्विश्वजित् कौ० २५ ११ ततो वा इदमिन्द्रो विश्वमजयद् यद् विश्वमजयत्तस्माद् विश्वजित् ता० १६ ४ ५ इन्द्रो विश्वजिद् इन्द्रो हीद सर्वं विश्वमजयत् कौ० २४ १ अथ यद् विश्वजितमुपयन्ति । इन्द्रमेव देवता यजन्ते श० १२ १ ३.१५ सर्वं विश्वजित् कौ० २५ १४ सर्वं वै विश्वजित् श० १० २ ५ १६ स वा एष विश्वजिद् य सहस्रसवत्सरस्य प्रतिमा गो० पू० ५ १० एकाहो वै विश्वजित् कौ० २५ ११ स कृत्स्नो विश्वजिद् योऽतिरात्र कौ० २५ १४ चक्रीवान् वा एष (विश्वजित्) यज्ञ कामाय ता० १६ १५ ४]

विश्वजिन्व विश्व-पोषक (महाविद्वज्जन) ६ ६७ ७. [विश्वोपपदे जिवि प्रीणनार्थे (भ्वा०) धातो कर्त्तरि अच्]
विश्वजुवम् समग्रवेगाम् (वेनु=वाचम्) ४ ३३ ८ [विश्व-जूपदयो समास । जू=जूरिति सौत्रो धातु । तत क्विप्]

विश्वतश्चक्षुः विश्वत सर्वस्मिञ्जगति चक्षुर्दर्शन यस्य स (परमेश्वर) १७ १६ सब जगत् मे जिसकी दृष्टि है, जिससे अदृष्ट कोई वस्तु नही है वह (ईश्वर) आर्याभि० २ ३४, १७ १६ [विश्वतस्-चक्षुस्पदयो समास । विश्वत=विश्वप्राति० आद्यादित्वात् तसि । चक्षुस्=चक्षिङ् व्यक्ताया वाचि अय दर्शनेऽपि (अदा०) धातो 'चक्षे शिच्च' उ० २ १२१ सूत्रेण उसि]

विश्वतस्पात् विश्वत सर्वत्र पात् गतिर्व्याप्तिर्यस्य स, भा०—सर्वत्राऽभिव्याप्त (परमेश्वर) १७ १६ [विश्वतस्-पादपदयो समास । विश्वत=विश्व+तसि । पाद=पद गतौ (दिवा०) धातो भावे घञ् । 'पादस्य लोपोऽहस्त्यादिभ्य' इति समासान्तो अन्त्यलोप]

विश्वतः सर्वत सर्वेषा जलपृथिवीमयाना पदार्थाना विविधाश्रयात्, प्र० —षष्ठ्या व्याश्रये अ० ५ ४ ४८ इत्यनेन तसि प्रत्यय १ १४ सर्वा, प्र०—अत्र प्रथमान्तात्तसि ५ २६ सर्वेभ्य (जनेभ्य) १ ७ १० विश्वस्य मध्ये १ १० १२ सब प्राणियो से, आर्याभि० १ २०, ऋ० १ ६ २० ८ सर्वाभ्यो दिग्भ्यः १ ८६ १ [विश्वमिति व्याख्यातम् । तत 'आद्यादिभ्य उपसख्यानमि' ति तसि]

विश्वतुरा यद्विश्व सर्वं तुरति त्वरयति तेन (राया=प्रशस्तधनेन) १ ४८ १६ [विश्वोपपदे तुर त्वरणे (जु०) धातो क्विप् । तत तृतीयैकवचनम्]

विश्वतूर्त्तिः विश्वस्मिँस्त्वरमाणा (सरस्वती=प्रशस्तज्ञानवती वाक्) २० ४३ या विश्व सर्वं जगत् त्वरति (उपदेशिका स्त्री) २ ३ ८ [विश्व-तूर्त्तिपदयो समास । तूर्त्ति=ञित्वरा सम्भ्रमे (भ्वा०) धातो स्त्रिया क्तिन् । 'ज्वरत्वर०' सूत्रेण ऊठ् उपधावकारयोश्च लोप]

विश्वतूः विश्वान् शत्रून् तूर्यति हिनस्ति स (युद्धविद्यासु कुशलो राजा) ३३ ६६ [विश्वोपपदे तूरी गतित्वरणहिंसनयो (दिवा०) धातो कर्त्तरि क्विप्]

विश्वतोधारम् विश्वत सर्वतो धारा सुशिक्षिता वाचो यस्मिँस्तम् (यज्ञम्) १७ ६८ [विश्वतस्-धारापदयो समास । धारा वाङ्नाम निघ० १ ११ विश्वतोधार सर्वतोधारम् नि० १३.८]

विश्वतोबाहुः सर्वतो बाहुर्बलं वीर्यं वा यस्य स, भा०—अनन्तसामर्थ्य (परमेश्वर) १७ १६ [विश्वतस्-बाहुपदयो समास]

विश्वतोमुख सर्वत्र व्यापकत्वादन्तर्यामितया सर्वोपदेष्ट (जगदीश्वर) १ ६७ ६ विश्वत सर्वतो मुखमुत्तममैश्वर्यं यस्य तत्सम्बुद्धौ (परमात्मन्) १ ६७ ७ स्वशक्ति से सब जीवो के हृदयो मे नित्य सत्योपदेश करने वाले (ईश्वर) आर्याभि० १ ३६, ऋ० १ ७ ५ ६ **विश्वतोमुखः**=विश्वत सर्वतो मुखमुपदेशनमस्य स (परमेश्वर) १७ १६ [विश्वतस्-मुखपदयो समास]

विश्वथा सर्वथा १ १४१ ६ विश्वस्मिन् २ २४ ११

मिन्वे=विश्वतर्पके (रोदसी) १ ७६ २ विश्वव्यापिके (रोदसी=राजप्रजाव्यवहारौ) ३ ३८ ८ [विश्वोपपद इवि व्याप्तौ (भ्वा०) धातोरच् कर्त्तरि । औणादिको वा अन् । विभक्तेरलुक् । विश्वमिन्वप्राति० स्त्रिया टाप् । विश्व-मिन्वा. विश्वमाभिरेति नि० ८ १०.]

विश्वमिन्वेभिः सर्व जगद्व्यवहार प्रापयद्भिः (मरुद्भिः=मनुष्यैः) ५ ६० ८ [विश्वमिन्व इति व्याख्यातम् । ततो भिस ऐसादेशो न भवति 'बहुल छन्दसी' ति सूत्रेण]

विश्वयत् यो विश्व करोति स (सत्पुरुष) ७ ५० १. [विश्वप्राति० 'तत्करोति तदाचष्टे' वा०सूत्रेण णिच् । तत. शतृ]

विश्वरूपम् विश्वस्य रूप यस्मिन् परमात्मनि वा विश्व. सर्वो रूप गुणो यस्य तम् (भौतिकमग्निम्) १ १३.१० विश्वानि बहूनि रूपाणि यस्मिन् प्रकाशे तम् १.३५ ४ विचित्रस्वरूपम् (निष्क=सुवर्णाभूषणम्) २ ३३.१०. विश्वानि कर्माणि वस्तूनि वा रूपयन्तम् (बृहस्पति=राजानम्) ३ ६२.६. विविधस्वरूपम् (प्रजानुखम्) २.११.१९ सर्वरूपवत्पदार्थदर्शकम् (आदित्य=सूर्यम्) १३ ४१ **विश्वरूपः**=विश्व रूप यस्य स (अज=जन्मादिरहितो जीव) २५.२५ विश्व समग्रं रूप यस्य स (भा०—सर्वपदार्थस्थो विद्युदाख्योऽग्नि) ३३ २२. विश्वानि रूपाणि यस्मात् स (सूर्य) ३ ३८.४. अखिल रूप यस्मिन् यस्माद्वा स (ईश्वर) ३ ५६.३. [विश्व-रूपपदयो समास । विश्वरूप सर्वरूप नि० १० ३४. स (इन्द्र) यत्र त्रिशीर्षाण त्वाष्ट्र विश्वरूप जघान श० १.२ ३ २ त्वष्टुर्ह वै पुत्र । त्रिशीर्षा षडक्ष आस तस्य त्रीण्येव मुखान्यासुस्तद् यदेव रूप आस तस्माद् विश्वरूपो नाम श० ५.५ ४ २. तस्य (विश्वरूपस्य) सोमपानमेवैकं मुखमास । सुरापाणमेकमन्यस्माऽअशनायैक तमिन्द्रो विद्वेष तस्य तानि शीर्षाणि प्रचिच्छेद श० १ ६ ३ २.]

विश्वरूपा विविध सुन्दर रूप को धारण करने वाली (स्त्री) स० वि० १३६, अथर्व० १४ २ ३२. **विश्वरूपाम्**=समग्रशास्त्रवरूपविदम् (धेनु=वाचम्) ४ ३३ ८. विश्वानि सर्वाणि रूपाणि यस्या पृथिव्या ताम् १ १६१.६. **विश्वरूपाः**=नानारूपा. (धेनव=गाव.) ३ १.७. विविधरूपगुणा. (द्वार=द्वाराणि) २९ ५ [विश्व-रूप-पदयो. समासे स्त्रिया टाप् । विश्वरूपमिति व्याख्यातम्]

विश्वरूपी विश्व सर्व रूप यस्या सा (महिता=विद्युत्), प्र०—अत्र 'जातेरस्त्रीविषयादयोपधात्' अ० ४ १.६३. इति ङीप् प्रत्यय ३.२२ [विश्व-रूपपदयो समासे कृते तत. स्त्रियां 'जातेरस्त्रीविषयाद्०' इति ङीप् । विश्वरूपी (=कामधेनु) इय (पृथिवी) वै देव्यदितिर्विश्वरूपी (विश्व-रूपा धेनु कामदुघा मे अस्तु अथर्व० ४.३४.८. विश्व-रूपा धेनु कामदुघाऽस्येका अथर्व० ९ ५ १०.) तै० १ ७ ६ ७.]

विश्वरूप्यम् विश्वेष्वखिलेषु रूपेषु भवम् (पदार्थ-विद्याभावम्) १.१६४ ९ [विश्व-रूपप्राति० भवार्थे यत्]

विश्ववार विश्वैः सर्वैर्वरणीय (अग्ने=विज्ञान-स्वरूपेश्वर) ७.५ ८. विश्वान् सर्वानानन्दान् वृणोति तत्सम्बुद्धौ (योगिजन) ७.७ **विश्ववारम्**=यो विश्व सर्व-मुत्तम व्यवहार वृणोति तम् (वायु=पवनम्) ६ ४९ ४ यो विश्व सर्व सुख करोति तम् (रयम्) ६ ३७ १. **विश्व-वारस्य**=विश्वे सर्वे वारा. स्वीकारा यस्मिँस्तस्य (राय.=धनस्य) ६ २३.१० समग्रस्वीकरणीयस्य (वित्तुप) ५.४४.११. समग्र सुख स्वीकृत यस्मात्तस्य (राय) २ ३६ १०. **विश्ववारः**=यो विश्व वृणोति स (अग्नि.=पावक) ३.१७.१. [विश्वोपपदे वृञ् वरणे (स्वा०) धातो 'कर्मण्यण्' इत्यण्]

विश्ववारम् येन विश्व सर्व वृणोति तत् (रयिम्) १.४८ १३. अखिलवरपदार्थयुक्तम् (रयि=श्रियम्) ५.४ ७ **विश्ववाराणि**=विश्वैः सर्वैर्वरणीयानि (द्रविणानि=द्रव्याणि) ६ ५ १. [विश्व-वारपदयो समास । वार=वृञ् वरणे (स्वा०) धातोर्घञ्]

विश्ववारा विश्वस्मिन् वारो वरण यस्या सा (दीधिति=दीप्ति) ३.४ ३. सर्वैरेव स्वीकर्त्तुं योग्या (संस्कृति=विद्यासुशिक्षाजनिता नीति) ७ १४. सर्वै-र्मनुष्यैर्वरणीया (उषा) ५.८०.३. **विश्ववाराभिः**=सर्वै स्वीकरणीयाभिर्गतिभि ६ २२ ११ **विश्ववारायाः**=चारो ओर की वायु को स्वीकार करने वाले द्वार के स० वि० १६६, अथर्व० ९ ३ ३ १. **विश्ववाराः**=या सर्वं जगद् वृण्वन्ति ना (उषस) १ १२३ १२. **विश्ववारे**=सर्वसुखवरितारौ (मातरा=जनकौ) ७ ७.३ या विश्व सर्व भद्र वृणोति तत्सम्बुद्धौ (कुमारि!) १ ११३.१९. सर्वतो वरणीये (उपर्वद्वर्त्तमाने स्त्रि) ३ ६१.१ [विश्व-वारपदयो समासे कृते तत स्त्रिया टाप् । विश्वोपपदे वृञ् वरणे (स्वा०) धातोर्वाऽण् । तत. स्त्रिया टाप् छान्दस]

विश्वविदम् यो विश्वानि सर्वाणि शास्त्राणि वेत्ति

वृष्टिर्वै विश्वधाया तै० ३ २ ३ २]

विश्वधाः विश्व दधातीति, अ०—ससारस्य सुखधारक (वसो =यज्ञ) १ २ [विश्वोपपदे दधाते कर्त्तरि क्विप्]

विश्वधेनाम् समग्रवाचम् ४ १९.६, **विश्वधेनाः**= विश्वा सर्वा धेना वाचो येषान्ते (देवा =विद्वास) ४ १९ २ [विश्वा-धेनापदयो समास । धेना वाङ्नाम निघ० १ ११]

विश्वपिशः विश्वस्याऽवयवभूता (शूरवीरा विद्वज्जना) ७ ५७ ३ [विश्व-पिशपदयो समास । पिश = पिश अवयवे (तुदा०) धातोर्घञर्थे क]

विश्वपेशसम् विश्वानि सर्वाणि पेशासि रूपाणि यस्या ताम् (धियम्) १ ६१ १६ **विश्वपेशसा**=विश्वानि सर्वाणि पेशासि रूपाणि यस्मात्तेन (राया) १ ४८ १६ सर्वस्वरूपेण ४.४८ ३ [विश्व-पेशस्पदयो समास । पेशस् रूपनाम निघ० ३ ७ हिरण्यनाम निघ० १ २]

विश्वप्स्न्या विश्व सर्व योग्य वस्तु प्सायते भक्ष्यते यया (धारया=वाचा) १२ १०. विश्वान् सर्वान् भोगान् यया प्साति तया (धारया=वाचा) १२.४१ [विश्वोपपदे प्सा भक्षणे (अदा०) धातोर्न्हु० औणा० अनि किच्च बाहुलकात् । तत स्त्रिया 'कृदिकारादक्तिन ' इति ङीप्]

विश्वप्सु विविधरूपम् (ब्रह्म=धनम्) ६.३५ ३. [विश्वप्सुपदयो समासः । प्सु रूपनाम निघ० ३ ७]

विश्वप्स्न्यस्य विश्वेषु समग्रेषु प्स्नुषु स्वरूपेषु भवस्य (अग्ने) ७.४२ ६. **विश्वप्स्न्याय**=विश्वस्य पालनाय ।

विश्वभरसम् ससारस्य धारकम् (अग्नि=विद्युद्रूपम्) ४ १ १९ **विश्वभराः**=यो विश्व बिभर्त्ति स (विद्वज्जन) ११ ३२ [विश्वोपपदे भृञ् भरणे (भ्वा०) धातोरौणा० असुन्]

विश्वभानुषु विश्वस्मिन् भानुषु सूर्येष्विव प्रकाशकेषु (मरुत्सु=मनुष्येषु) ४ १ ३ [विश्व-भानुपदयो समास]

विश्वभृतः ये विश्व बिभ्रति ते, भा०—विश्वम्भरा (राजपुरुषा) १० ४ [विश्वोपपदे भृञ् भरणे (भ्वा०) धातो क्विप्]

विश्वभेषजीः विश्वा सर्वा भेषज्य ओषध्यो यासु ता (आप =जलानि), प्र०—अत्र 'केवलमामक०' अ० ४ १ ३० अनेन भेषजशब्दात् ङीप् प्रत्यय' १ २३ २० [विश्वा-भेषजीपदयो समास । भेषजी=भेषजप्राति० स्त्रिया 'केवलमामक०' इति ङीप् । भेषजम् उदकनाम निघ० १ १२ सुखनाम निघ० ३ ६]

विश्वभोजसम् विश्वस्य समग्रस्य जनस्य पालकम् (इषम्=अन्नम्) ६ ४८ १३. **विश्वभोजाः**=यो विश्व भुनक्ति पालयति स (विद्वान् शिल्पी) ५ ४१ ४ [विश्वोपपदे भुजपालनाभ्यवहारयो (रुधा०) धातोरौणा० असुन् 'विदिभुजिभ्या विश्वे' उ० ४ २३९ सूत्रेण]

विश्वभोजसा विश्वस्य पालकौ (अरुषा=जलाग्नी) ७ १६ २ [विश्वभोजस् इति व्याख्यातम् । ततो द्विवचनस्याकारादेश]

विश्वम् जगत् १ ८१ ९ कृतप्रवेशम् (गर्भ=प्रधान प्रकृतिम् २७ २५ विशन्ति परम्मिँस्तत्सर्वम् (भुवनम्) ५ ६३ ७ **विश्वस्य**=सर्वप्राणिसमूहस्य २ ३ ससारस्य ३९ ८. अखिलपदार्थजातस्य १५ ३३ [विश प्रवेशने (तुदा०) धातो 'अशूप्रुषिलटिकणि०' उ० १ १५१ सूत्रेण क्वन् । सर्वादिगणे पाठाच्च सर्वनामसज्ञश्चापि । यद्वै विश्व सर्व तत् श० ३ १ २ ११ तदन्न वै विश्वम्प्राणो मित्रम् जै० उ० ३ ३ ६]

विश्वमायुः विविधसुखरूपमायु ऋ० भू० २०६, ऋ० ८ ३ २८ २ शतवार्षिक सुखयुक्तमायु ऋ० भू० २२५, अथर्व० १९ ७ ५५ ६ [विश्व-आयुपदयो समास । विभक्तेरलुक् । इय (पृथिवी) वै विश्वायु तै० ३ २ ३ ७]

विश्वमिन्व यो विश्व मिनोति तत्सम्बुद्धौ (इन्द्र= राजन्) ७ २८ १ विश्व सर्वं जगन्मिन्व व्याप्त येन तत्सम्बुद्धौ (अग्ने=परमेश्वर) ३ २० ३ **विश्वमिन्वः**= विश्व मिनोति व्याप्नोति यस्स (सोम =पदार्थसमूह) २ ४० ६ [विश्वोपपदे मिनोति गतिकर्मा (निघ० २ १४) धातोरच्-प्रत्यये छान्दस रूपम् । अथवा मिवि सेवने (भ्वा०) धातोरच् । धातूनामनेकार्थकत्वादत्रव्याप्तिरर्थ । अथवा विश्वोपपद इवि व्याप्तौ (भ्वा०) धातोरच् कर्त्तरि । विभक्तेरलुक्]

विश्वमिन्वम् यद्विश्व सर्वं विज्ञानमिन्वति प्राप्नोति तत् (स्तोमम्) प्र०—अत्र विभक्त्यलुक् १ ६१ ४ [विश्वोपपदे इवि व्याप्तौ (भ्वा०) धातोरच् कर्त्तरि । विभक्तेरलुक्]

विश्वमिन्वा या विश्व सर्वं जगन्मिनोति सा (उषा =प्रातर्वेला) ५ ८० २ **विश्वमिन्वाः**=विश्वव्यवहारव्यापिन्य (जनय =जाया) २९ ३० **विश्व-**

विश्वसामन् विश्वानि सामानि यस्य तत्सम्बुद्धौ (विद्वज्जन) ५ २२ १ **विश्वसामा**=विश्व सर्वं साम सन्निधौ समीपे यस्य स (राजा) १८ ३९ [विश्व-सामन् पदयो समास]

विश्वसाहम् यो विश्वानि सर्वाणि शत्रुसैन्यानि सहते तम् (इन्द्र=नृपम्) ६ ४४ ४ सर्वसहम् (इन्द्र=राजानम्) ३ ४७ ५ [विश्वोपपदे षह मर्षणे (भ्वा०) धातो 'छन्दसि सह' इति कर्त्तरि ण्वि]

विश्वसुविदः विश्वानि सर्वाणि सुष्ठुतया विदन्ति याभ्यस्ता (सूनृता =सुष्ठुसत्यप्रियवाच) १ ४८ २ [विश्वोपपदे सुपूर्वाद् विद ज्ञाने (अदा०) धातो 'कृतो बहुलमि ति अपादाने क्विप्]

विश्वसौभग विश्वेषा सर्वेषा सुभगाना श्रेष्ठाना-मैश्वर्याणा भावो यस्य तत्सम्बुद्धौ (पृथिवीराज्यादियुक्त सभाध्यक्ष) १ ४२ ६ **विश्वसौभगः**=विश्वे सुभगा शोभनैश्वर्या भोगा येन स (रथ) १ १५७.३ [विश्व-सौभगपदयो समास । सौभग =सुभगप्राति० 'तस्येदम्' इत्यण्]

विश्वह विश्वेष्वहस्सु, प्र०—अत्र 'छान्दसो वर्णलोपो वा' इत्यलोप 'सुपा सुलुक्०' इति विभक्तेर्लुक् २ १२ १५ [विश्व-अहन्पदयो समासः । अह्नोऽकारलोपश्छान्दस]

विश्वहा सर्वाणि दिनानि २.३२ ३ प्र०—अत्र 'कृतो बहुलम्' इत्यधिकरणे क्विप् 'सुपा सुलुक्०' इत्य-धिकरणस्य स्थाने आकारादेश १ १११.३ विश्वानि च तान्यहानि च विश्वहानि, प्र०—अत्र 'छान्दसो वर्णलोपो वा' इत्युत्तरपदादिलोप २ ३५ १४ बहूनि च तानि अहानि च प्र०—अत्र 'शेश्छन्दसि०' इनि लुक् 'विश्वमिति बहुनाम' निघ० ३ ९, ८ ५

विश्वहा विश्व हन्ति जानाति प्राप्नोति वा स (सज्जन) २ १४ १५ विश्वान् सर्वान् हन्ति स (इन्द्र =सभाध्यक्ष) १ १०२ ११ [विश्वोपपदे हन हिंसागत्यो (अदा०) धातो क्विप् । 'सौ चे' ति दीर्घ]

विश्वाची या विश्व सर्व जगदञ्चति व्याप्नोति सा (दीप्ति) १५ १८ **विश्वाचीः**=या विश्वमञ्चन्ति प्राप्नुवन्ति ता द्युती १७ ५९ [विश्वोपपदे अञ्चु गति-पूजनयो (भ्वा०) धातो 'ऋत्विक्०' इति क्विन् । 'अनि-दिताम्०' इति नलोपे 'अञ्चतेश्चोपसख्यानम्' इति स्त्रिया ङीपि भसञ्ज्ञायाम् 'अच ' इत्यकारलोपे 'चौ' इति पूर्वपदस्य दीर्घ । वेदिरेव विश्वाची श० ८.६.१.१९ [अप्सरा वेदि यजु० १७ ५९) विश्वाचीरभिचष्टे घृताचीरिति स्त्रुचश्चैतद वेदीश्चाह श० ९ २ ३ १७]

विश्वानरः यो विश्वानि सर्वाणि भूतानि नयति स (सविता=ईश्वर) १ १८६ १. विश्वेषा नायक (उपदेशक) ३३ ३४ **विश्वानराय**=विश्वे नरा नायका यस्मात्तस्मै, भा०—सर्वाव्यभाय (परमेश्वराय) ३३ २३ [विश्व-नरपदयो समासे पूर्वपदस्य दीर्घश्छान्दस । विश्वानर कस्माद् विश्वान् नरान्नयति । विश्व एन नरा नयन्तीति वा । अपि वा विश्वानर एव स्यात् प्रत्यृत सर्वाणि भूतानि तस्य वैश्वानर. नि० ७ २]

विश्वापुषम् समग्रपुष्टिकरम् (रयि=धनम्) २५ ४५ सर्वपुष्टिप्रदम् (रयिम्) १ १६२ २२. [विश्वोपपदे पुष पुष्टौ (दिवा०) धातो क्विप् । पूर्वपदस्य दीर्घ]

विश्वाप्सुम् विश्वं समग्र रूप गुणो यस्य तम् (अग्निम्) १.१४८ १. [विश्व-प्सुपदयो समास । प्सु रूपनाम निघ० ३ ७]

विश्वाभुवे यो विश्वे भवते प्राप्नोति विश्वाभूर्यस्य वा विश्व भवति यस्मादिति वा तस्मै भा०—सर्वव्याप्ताय (ईश्वराय) ३३ २३ [विश्वोपपदे भू सत्तायाम् (भ्वा०) धातो, भू प्राप्तौ (चुरा०) धातोर्वा क्विप् । पूर्वपदस्य सहिताया दीर्घ । विश्वाभुवे=सर्व विभूताय नि० ११ ९.]

विश्वामित्रः विश्व मित्र येन भवति स (ऋषि.) १३ ५७. सर्वेषां सुहृत् (भा० वेदविदाप्तजन) ३ ५३ ९ **विश्वामित्राय**=विश्व सर्व जगन्मित्र यस्य तस्मै (सज्ज-नाय) ३ ५३ ७ [विश्व-मित्रपदयो समास । पूर्वपदस्य 'मित्रे चर्षौ' अ० ६ ३.१३०. सूत्रेण दीर्घ । विश्वामित्र सर्वमित्र नि० २.२४ विश्वस्य ह वै मित्र विश्वामित्र आस, विश्व हास मित्र भवति य एव वेद ऐ० ६.२० (यजु० १३ ५७) श्रोत्र वै विश्वामित्र ऋषिर्यदेनेन सर्वत शृणोत्यथो यदस्मै सर्वतो मित्र भवति तस्माच्छ्रोत्र विश्वा-मित्र ऋषि श० ८ १ २ ६ तदन्न वै विश्वम्प्राणो मित्रम् जै० उ० ३ ३ ६ वाग्वै विश्वामित्र कौ० १० ५ राष्ट्र आहिंसन्त स विश्वामित्रो जाह्नवो राजैतम् (चतूरात्रम्) अपश्यन् स राष्ट्रमभवदराष्ट्रमितरे ता० २१ १२ २]

विश्वायु विश्व सम्पूर्णमायुर्यस्मात्तत् (क्षत्र=धन राज्य वा) ७ ३४ ११ सम्पूर्णमायुष्करम् (राध =धनम्) ५ ५३ १३ सर्व जीवनम् ६ २० ५ [विश्व-आयुपदयो समास । आयु अन्ननाम निघ० २ ७]

विश्वायुम् प्राप्तसमग्रशुभगुणम् (सखायम्) १ १२९ ४

तम् (अग्नि=मेधाविजनम्) ३.१६१ य समग्र विन्दति तम् (अग्निम्) ३ २६ ७ विश्वे विदन्ति ताम् (वाचम्) १ १६४ १० [विश्वोपपदे विद ज्ञाने (अदा०) धातो कर्त्तरि क्विप्]

विश्वविदा विश्व सर्व सुख विन्दति याभ्या ते रोदसी=द्यावापृथिव्यौ) ६ ७० ६ [विश्वोपपदे विद्लृ लाभे (तुदा०) धातो कर्त्तरि क्विप्। ततो द्विवचनस्याकारादेश]

विश्ववेदसम् विश्वानि सर्वाणि सुखानि विन्दति यस्मात्तम् (विद्वज्जनम्) १ ४४ ७ विश्वस्मिन् विद्यमानम् (विद्युदग्निम्) ४ ८ १ समग्रविदितारम् (अग्निम्=ईश्वरम्) १ ४३ ४ यो विश्व वेत्ति स विश्ववेदा परमेश्वर विश्व सर्व सुख वेदयति प्रापयति स भौतिकोऽग्निर्वा तम्, प्र०—अत्र 'विदिभुजिभ्या विश्वे' उ० ४ २३८ अनेनाऽसि प्रत्यय ३ ३८ विश्वानि सर्वाणि शिल्पादिसाधनानि विन्दन्ति यस्मात्त सर्वप्रजासमाचारज्ञ वा (अग्निम्) १ ३६ ३ **विश्ववेदस:**=सकलविद्यावेनार (मरुत = विद्वासो मनुष्या) ६ ८ समग्रैश्वर्य्या (मरुत) ५ ६० ७ ये विश्वानि सर्वाणि कर्माणि वेदयन्ति प्रापयन्ति ते (वायव) १ ६४ ८ विश्वानि सर्वाणि वस्तूनि विदन्ति येभ्यस्ते (नर =नायका जना.) १ ६४ १० यैर्विश्व विन्दन्ति ते (मरुत =वायव) ३ २६ ४ **विश्ववेदा:**=विश्वस्य वेदो विज्ञान विश्वेषु सर्वेषु पदार्थेषु वेद स्मरण वा यस्य स (ईश्वर) १ ८९ ६ विश्व सर्वमौषध विदित येन स (पूषा=पोषको वैद्य) १० ६ समग्रधन (इन्द्र =राजा) २० ५१ यथा सूत्रात्मा पवनस्तथा ५ ३१ समग्रवित् (अग्नि =राजा) ४४ १३ यो विश्व धन विन्दति स (अग्नि =विद्वज्जन) ३ २५ १ विश्व सर्व जगद्वेदो धन यस्य स (इन्द्र =परमेश्वर) २५ १६ सत्र जगत् मे विद्यमान प्राप्त और लाभ कराने वाला (परमात्मा) आर्याभि० २ १६, ५ ३१ [विश्वोपपदे विद्लृ लाभे (तुदा०) विद ज्ञाने (अदा०) विद सत्तायाम् (दिवा०) विद विचारणे (रुधा०) विद चेतनाख्याननिवासेषु (चुरा०) धातोर्वा 'विदिभुजिभ्या विश्वे' उ० ४ २३६ सूत्रेण असुन्। विश्व-वेदस्पदयोर्वा समास । वेद धननाम निघ० २ १०]

विश्ववेदसा विश्व वेदो विज्ञान ययोस्तौ (विद्वासौ जनौ) १ १३६ ३. विश्वान्यखिलान्यन्नानि धनानि वा ययोस्तौ (अश्विनौ=क्षत्रधर्मव्यापिनौ सभासेनेशौ) १ ४७ ४ [विश्ववेदसमिति व्याख्यातम् । ततो द्विवचनस्याकारादेश]

विश्वव्यचसम् विश्वव्यापकम् (इन्द्र=विद्युतम्) ३ ४६ ४ **विश्वव्यचा:**=यथा विश्वस्मिन् व्यचो व्याप्तिर्यस्यास्ति तथा (ईश्वर) ५ ३३ विश्व व्यचति प्रकाशेनाऽभिव्याप्य प्रकटयति स (सूर्य) १३ ५६ विश्व व्यचति व्याप्नोति स विद्युद्रूपोऽग्नि १५ १७ सहज से सब जगत् को विस्तृत करने वाला (परमात्मा) आर्याभि० २ १८, ५ ३३ [विश्व-व्यचस्पदयो समास । व्यचस्=व्यच व्याजीकरणे (तुदा०) धातोरौणा० असुन् । (यजु० १३ ५६) असौ वा ऽआदित्यो विश्वव्यचा या ह्येवैष उदेत्यथेद सर्व व्यचो भवति श० ८ १ २ १ (यजु० १८ ४१ वात) एष (वात) हीद सर्व व्यच करोति श० ६ ४ १ १० अन्तरिक्ष विश्वव्यचा तै० ३ २ ३ ७]

विश्वशम्भुवम् य सर्वस्मै जगते श सुख भावयति प्रकटयति तम् (अग्नि=विद्युदाख्यम्), प्र०—अत्राऽन्तर्गतो ण्यर्थ 'क्विप् च' इति क्विप्प्रत्यय १ २३ २० **विश्वशम्भुव:**=या विश्वस्मै श सुख भावयन्ति ता (आप = प्राणा जलानि वा) ४ ७ **विश्वशम्भुवा**=विश्वस्मिन् श सुख भावुकेन (धर्म्मेण) १ १६० ४ **विश्वशम्भू:**= विश्वस्मै श सुख भावुक, भा०—पूर्णशरीरात्मबल (सर्वाधिपती राजा) १७ २३ विश्व सर्व श सुख भावयति स (सभापति) ८ ४५ [शम्भू =शम् उपपदे भू सत्तायाम् (भ्वा०) धातो =कर्त्तरि क्विप्। अन्तर्गतो ण्यर्थ । शम् सुखनाम निघ० ३ ६ ततो विश्व-शम्भूपदयो समास]

विश्वशर्धसौ समग्रबलयुक्तौ (अध्यापकोपदेशकौ) ५ ३४ ८ [विश्व-शर्धस्पदयो समास । शर्धस् बलनाम निघ० २ ६]

विश्वशुचे यो विश्व सर्व जगच्छोधयति तस्मै (यतये=सन्यासिने) ७ १३ १ [विश्वोपपदे ईशुचिर् पूतीभावे (दिवा०) धातो कर्त्तरि क्विप्। शोचति ज्वलतिकर्मा निघ० १.१६]

विश्वश्चन्द्रा. विश्वानि चन्द्राणि सुवर्णानि याभ्यस्ता (श्रिय) १ १६५ ८. समग्राणि सुवर्णादीनि येषान्ते (व्याप्तविद्या विद्वज्जना) ३ ३१ १६ [विश्व-चन्द्रपदयो समास । चन्द्रम् हिरण्यनाम निघ० १ २]

विश्वश्रुष्टि. विश्वा. श्रुष्टयस्त्वरिता गतयो यस्य स (मनुष्य) प्र०—अत्र श्रुधातोर्बाहुलकादौणादिक क्तिन् प्रत्यय १ १२८ १ [विश्व-श्रुष्टिपदयो समास । श्रुष्टीति पदनाम निघ० ४ ३ श्रुष्टि इति क्षिप्रनाम । आशु अष्टीति नि० ६ १२]

स (इन्द्र =शूरवीरजन), प्र०—अत्राऽन्तर्गतो ण्यर्थ १ ३३.४ [विपूपपदे शाृ अदर्शने (दिवा०) धातो क्विन् छान्दस । विपु =विष्लृ व्याप्तौ (जु०) धातोर्बाहु० औणा० कु]

विपुराम् यो विष्वगगच्छति तम् (ध्रुवम्=अन्तरिक्षम्) ३ ५४ ८ **विपुरास्य**=विषमस्य (समाचारस्य) ४.६ ६ शरीरे व्याप्तस्य (जन्तो =जीवस्य) ७ २१ ५ **विपुराः**=व्याप्ताविद्यस्य (मनुष्यस्य) ५ ३४ ६ **विपुराः**=विद्या व्याप्नुवन्त (सखाय) ५ १२ ५ [विपुण. पदनाम निघ० ४ १ विपुरास्य विषमस्य नि० ४ १६ विष्लृ व्याप्तौ (जु०) धातोर्बाहु० औणा० उनन् स च कित्]

विपुरूपम् व्याप्तस्वरूपम् (धनम्) ७ २७ ३ व्यापक विविधरूप वा (नलदम=परम्पर युद्धलक्षणम्) ६ २०. **विपुरूपः**=प्राप्तविद्य (विद्वज्जन) ५ १५.४ विपूरिण व्याप्तानि रूपाणि येन स (गृहस्थो जन) ८ ३० **विपुरूपे**=विरुद्धस्वरूपे (पयसि=उदके) १ १८६ ४ [विपुरूपपदयो. समास । विपु=विष्लृ व्याप्तौ (जु०) धातोर्बाहु० औणा० कु । विपुरूपे विषमरूपे नि० १२ १७]

विपुरूपाणि व्याप्तरूपाणि (सव्रता=समानकर्माणि) ६ ७० ३. **विपुरूपे**=व्याप्तस्वरूपे (अहनी=रात्रिदिने) ६ ५८.१ [पूर्वपदे व्याख्यातम्]

विषुवतः प्रगस्ता विपुर्व्याप्तिर्यस्य तस्य (मध्व=मधुरादिगुणयुक्तस्य रसस्य) १ ८४ १० **विषुवता**=व्याप्तिमता (धूमेन) १ १६४ ४३ [विपुप्राति० प्रशसायामर्थे मतुप् । विपुरिति विष्लृ व्याप्तौ (जु०) धातोरौणा० बाहु० कुप्रत्यये रूपम्]

विषूचः व्याप्तान् (अश्वान्=विद्युदादीन्) ६ ५६ ५. [विपूपपदे अञ्चु गतिपूजनयो (भ्वा०) धातो. 'ऋत्विक्०' इति क्विन् । 'अनिदिताम्' इति नलोप । शस्-प्रत्यये भसज्ञायाम् 'अच' इत्यकारलोपे 'चौ' इति दीर्घत्वे रूपम्]

विषूचिका या विविधानर्थान् सूचयति सा (विदुषी राज्ञी) १६ १० [वि+सूच पैशुन्ये (चुरा०) धातोर् ण्वुल् । तत स्त्रिया टाप् । अथवा 'रोगाख्यायां ण्वुल्-बहुलम्' इति ण्वुल् । ततष्टाप्]

विषूची या विपून् व्याप्तानञ्चति सा (रात्रि) ३ ५५ १५ **विषूचीम्**=विपूच्यादिरोगम् ६ ७४ २ **विपूचीः**=व्याप्नुवती (विश =प्रजा) ६ २५ २ समग्रशरीरव्यापकान् रोगान् २ ३३ २ विविधा गती १ १६४ ३१ [विपूपपदे अञ्चु गतिपूजनयो (भ्वा०) धातो क्विन् । 'अञ्चतेश्चोपसख्यानम्' इति ङीप्]

विषूचीना विष्वगञ्चितारौ (जङ्घेऽरनी) १ १६४ ३८ [विषूच इति व्याख्यातम् । तत विभाषाऽञ्चे०' अ० ५.४.८ सूत्रेण स्वार्थे ख । तत स्त्रियां टाप्]

विषूचीनान् विरुद्धमाचरत. (सपत्नान्=अरीन्) १७ ६४ [विपूपपदे अञ्चुधातो क्विन् । तत स्वार्थे ख]

विषूचोः व्याप्तविद्या-धर्म-सुशीलयोर्द्वयो (सुहृज्जनयो) ७ १८.६ [विपूपपदे अञ्चु गतिपूजनयो (भ्वा०) धातो 'ऋत्विक्०' इति क्विन् । विपुरिति व्याख्यातम्]

विषूवृतम् विपुणा व्यापकेन गमनेन वृतम् (रथम्) २ ४० ३ [विपु-वृतपदयो. समास । पूर्वपदस्य सहितायां दीर्घ]

विष्कभायत् विशेषेण दधाति ६ ४४ २४ विशेषेण स्कभ्नाति ५ २९ ४ [वि+स्कम्भु धारणार्थे सौत्रो धातु । ततो लङ् । 'स्तम्भुस्तुम्भु०' इति प्राप्तस्य श्नु-विकरणस्य 'छन्दसि शायजपि' अ० ३ १ ८४. सूत्रेण शायजादेश । अडभावश्छान्दस]

विष्कभिते विशेषेण धृते दृढीकृते (द्यावापृथिवी=सूर्यभूमी) ३४ ४५ [वि+स्कम्भु धारणार्थे सौत्रो धातु । तत क्त]

विष्कभ्नन्तः ये विशेषेण स्कभ्नन्ति धरन्ति ते (कृतकृत्या विद्वज्जना) ३ ३१.१२ [वि+स्कम्भु धारणार्थे सौत्रो धातु । तत शतरि 'स्तम्भुस्तुम्भु०' इति श्ना]

विष्टपम् व्याप्तिम्, प्र०—अत्र विषधातोर्बाहुलकादौणादिकस्तप प्रत्यय १४ २३. विष्टान् प्रविष्टान् पाति येन तत् (नाक=सुखम्) १८ ५१ विशिष्ट सुख स० वि० १६७, **विष्टपाय**=विशन्ति यत्र तस्मै मार्गाय ३० १२ **विष्टपि**=अन्तरिक्षे १ १६ ३ [विष्लृ व्याप्तौ (जु०) धातोर्बाहु० औणा० तप प्रत्यय । अथवा विष्टोपपदे पा रक्षणे (अदा०) धातो 'कृतो बहुलम्' इति करणे कः । विष्ट.=विश प्रवेशने (तुदा०) धातो क्त । अथवा विश प्रवेशने (तुदा०) धातोर्बाहु० औणा० तप । विष्टपि प्रयोगेऽकारलोपश्छान्दस. । विष्टपम्=साधारणनाम निघ० १ ४.

विष्टवादित्यो भवति आविष्टो रसान् । आविष्टो भास ज्योतिषाम् । आविष्टो भासेति । अथ द्यौराविष्टा ज्योतिर्भि पुण्यकृद्भिश्च नि० २ १४]

विष्टम् व्याप्तम् (सत्यम्) ३ ३०.६ [विष्लृ व्याप्तौ (जु०) धातो क्त.]

यो विश्व सर्व बोधयति तम् (पुरुषम्) १ १२८ ८

विश्वायुः=पूर्णमायुर्यस्या सा (वाक्) १ ४ विश्व सम्पूर्ण-मायुर्यस्मात् स (धर्म =यज्ञ) १ २२ विश्व शतवार्षिकम-धिक वाऽऽयुर्यस्मात् स (श्रव =धनम्) १.९७ अखिल जीवन यस्य स (विद्वज्जन) १ ७३४ विश्व सर्वमायु र्यस्माद्यस्य वा (१ ६८ ३) पूर्णायु (इन्द्र =राजा) ३ ३१ १८ [विश्व-आयुपदयो समास । आयु =इण् गतौ (अदा०) धातो 'छन्दसीण ०' उ० १ २ सूत्रेण उण् । 'एते-र्णिच्च' उ० २ १२०. सूत्रेण वा उसि । इय (पृथिवी) वै विश्वायु तै० ३ २ ३ ७]

विश्वायुपोषसम् अखिलाऽऽयु पुष्टिकारकम् (रयिम्) १ ७९ ९ समग्रायु पुष्टिकराम् (रयि=श्रियम्) ६ ५९ ९ [विश्वायूपपदे पुष पुष्टौ (दिवा०) धातोरौणा० असुन्]

विश्वावसुः विश्व वासयति य स (अग्नि = परमेश्वर) २ ३ [विश्वोपपदे वस निवासे (भ्वा०) धातो 'शृस्तृ०' उ० १ १० सूत्रेण उ । पूर्वपदस्य सहिताया दीर्घ]

विश्वासाहम् विश्वान् सर्वान् सहते तम् (इन्द्र= सम्राजम्), प्र०—अत्र विश्वपूर्वात् सहधातो. 'छन्दसि सह ' अ० ३ १ ६३ इति ण्वि 'अन्येषामपि०' इति दीर्घश्च ७ ३६ [विश्वोपपदे षह मर्षणे (भ्वा०) धातोर्ण्वि]

विश्वाहा सर्वाणि दिनानि ७ १० [विश्व-अहन्-पदयो समासे शेर्लोपश्छन्दसि]

विश्वे अन्तरिक्षे प्रविष्टे (रोदसी=द्यावापृथिव्यौ) ४ ५६ ४ [विश प्रवेशने (तुदा०) धातो 'अशूप्रुषि०' उ० १ १५१ सूत्रेण क्वन्]

विश्वेदेवासः सर्वे विद्वास २.१३ विश्वे सर्वे च ते देवा विद्वासश्च ते, प्र०—विश्वेदेवा इति पदनाम निघ० ५ ६, १ ३ ७ समस्ता विद्यावन्तो विद्वास (जना) १ ३ ८ [विश्व-देवपदयो समासे जसो ऽसुक् । विभक्तेरलुक् । अर्थेष स्वर्ग एव लोको विश्व एव देवा जै० १ ३३५ अनन्ता विश्वेदेवा श० १४ ६ १.११ एते वै विश्वेदेवा यत् सर्वे देवा गो० २ १ २० ता (दिश) उ एव विश्वे-देवा जै० उ० २ १ २ श्रोत्र विश्वेदेवा श० ३ २ २ १३ सर्वं वै विश्वेदेवा श० १ ७ ४ २२ विशो विश्वेदेवा श० २ ४ ३ ६]

विश्वेदेवाः सर्वे दिव्यगुणयुक्ता मनुष्या पदार्थाश्च १४ २० विश्व प्रकाशका ईश्वरगुणा सर्वे विद्वासो वा प० वि० । सब विद्वान् द्योतक वेदमन्त्र, इन्द्रिया, सूर्यादिकरणे तथा तत्रस्थ गुण आर्याभि० २ ३५, ३६ १७ [विश्व-देवपदयो समास । विभक्तेरलुक् । विश्वेदेवा पदनाम निघ० ५ ६]

विश्व्या विश्वस्मिन् भवा (अभिभा=अभित कान्ति) २ ४२ १ [विश्वप्राति० भवार्थे यत् । तत स्त्रिया टाप् । विश्व्या सर्वत नि० ६ ३]

विषक्ताम् विविधै पदार्थैर्युक्ताम् (गा=पृथिवीम्) १ ११७ २० [वि+षस्ज गतौ (भ्वा०) धातो षच् समवाये (भ्वा०) धातोर्वा क्त । तत स्त्रियां टाप्]

विषम् व्याप्नोत्यङ्गानि यत्तत् १ १६१ ११ प्राण-हरम् (वस्तु) १ १९१ १४ उदकम् ६ ६१ ३ **विषेण**= विपर्ययकरेण निजवलेन १ ११७ १६ [विष्लृ व्याप्तौ (जु०) धातोरिगुपधलक्षण क । विष विप्रयोगे (क्र्या०) धातोर्वा क । विषम् उदकनाम निघ० १ १२ विषमित्युदकनाम विष्णातेर्विपूर्वस्य स्नाते शुद्धयर्थस्य, विपूर्वस्य वा सचने नि० १२ २६ यवमात्र वै विषस्य न हिनस्ति गो० उ० १ ३]

विषमेभ्यः विकटदेशेभ्य ३० १६ [वि-समपदयो समास । 'सुविनिर्दुर्भ्य सुपिसूतिसमा' अ० ८ ३ ८८ इति षत्वम्]

विषह्य विशेषेण सोढ्वा ७ २१ ७ [वि+षह मर्षणे (भ्वा०) धातो क्त्वा । समासे क्त्वो ल्यप्]

विषाणम् प्रविष्टम् (दुष्टजनम्) ५ ४४.११

विषाणिनः विपाणमिव तीक्ष्णा हस्ते नखा येषान्ते (राजजना) ७ १८ ७ [विषाणप्राति० मत्वर्थ इनि]

विषाहि विशेषेण कर्मसमाप्ति कुरु ४ ११ २ [वि+ षोऽन्त कर्मणि (दिवा०) धातोर्लोट् । 'बहुल छन्दसी' ति शपो लुक्]

विषितस्तुका विविधतया सिता बद्धा स्तुका स्तुति-र्यया सा (प्रवरा स्त्री) १ १६७ ५ [विषिता-स्तुकापदयो समास । विषित =वि+षिञ् बन्धने (स्वा०) धातो क्त । स्तुका=ष्टुञ् स्तुतौ (अदा०) धातोर्बाहु० औणा० कन् । तत स्त्रिया टाप् । बहुलवचनादेव गुणाऽभाव । विषिते विमुक्ते नि० ६ ३६]

विषितः व्याप्त (वायु =स्तेन) ६ १२ ५ [विष्लृ व्याप्तौ (जु०) धातो क्त । इडागमश्छान्दस]

विषितासः व्याप्ता (आप्ता पुष्पा) ६ ६ ४ [विषित इति व्याख्यातम् । ततो जसो ऽसुक्]

विषिते विद्याशुभगुणकर्मव्याप्ते (अध्यापिकोपदेशिके) ३ ३३ १ [विषित इति व्याख्यातम् । ततष्टाप् स्त्रियाम्]

विषुणक् वेविषत्यधर्मेण ये ते विषवस्तान् नाशयति

वैष्णव रूपम् कौ० ८ २ यो वै विष्णु स यज्ञ श० ५ २ ३ ६ विष्णुर्यज्ञ गो० उ० १ १२ तै० ३ ३ ७ ६ विष्णुर्वै यज्ञ ऐ० १ १५ पवित्रे स्थो वैष्णव्यौ (यजु० १ १२) इति यज्ञो वै विष्णुर्यज्ञियै स्थ इत्येवैतदाह श० १.१ ३ १ यज्ञो वै विष्णु श० १३ १ ८ ८ यज्ञो वै विष्णु कौ० ४ २ श० १ १ २ १३ गो० उ० ४ ६ तै० १ २ ५ १ यज्ञो वै विष्णु शिपिविष्ट ता० ९ ७ १० यज्ञो वै वैष्णुवारुण कौ० १६ ८ यज्ञो विष्णु श० १ ६ ३ ६ ता० १३.३ २. गो० उ० ६ ७ विष्णवे हि गृह्णाति यो यज्ञाय (हवि) गृह्णाति श० ३ ४ १ १४ अथेम विष्णु त्रेधा व्यभजन्त। वसव प्राप्त सवन रुद्रा माध्यन्दिन सवनमादित्यास्तृतीय-सवनम् श० १४.१ १ १५ स य स विष्णुर्यज्ञ स। स य स यज्ञोऽसौ स आदित्य श० १४ १.१ ६ स उ एव मख स विष्णु श० १४ १ १ १३ (प्रजापति) यजुर्भ्योऽधि विष्णुम् (असृजत)। तद् विष्णु यश आर्च्छत्। तम् (विष्णुम्) आलभत। विष्णोरध्योषधीरसृजत तै० २ ३ २ ४ यजूंषि विष्णु श० ४ ६ ७ ३ यो वै विष्णु सोम स श० ३ ३ ४ २१ यत्तदन्नमेष स विष्णुर्देवता श० ७ ५ १ २१ वीर्य्यं विष्णु तै० १ ७ २ २ प्रादेशमात्रो वै गर्भो विष्णु श० ६ ५ २ ८ अग्निर्वाऽग्रह सोमो रात्रि-रथ यदन्तरेण तद् विष्णु श० ३ ४ ४ १५ यदह दीक्षते तद्विष्णुर्भवति श० ३ २ १ १७ विष्णु सर्वा देवता ऐ० १ १ तस्माद् आहुर्विष्णुर्देवाना श्रेष्ठ इति श० १४ १ १.५ अग्निर्वै देवानामवमो विष्णु परम ऐ० १ १. अन्तो विष्णुर्देवतानाम् ता० २१ ४ ६ अग्निर्वै देवानामवराध्यो विष्णु परार्ध्य कौ० ७ १ अग्निर्वै यज्ञस्यावराध्यो विष्णु परार्ध्य श० ५ २ ३ ६ एते वै यज्ञस्यान्त्ये तन्वौ यदग्निश्च विष्णुश्च ऐ० १ १ अग्नाविष्णू वै देवानामन्तभाजौ कौ० १६ ८ आग्नावैष्णवमेकादशकपाल पुरोडाश निर्वपति श० ३ १ ३ १ यज्ञो विष्णु श० १ ६ ३ ९ यज्ञो वै विष्णु श० १.१ २ १३ इमे वै लोका विष्णोर्विक्रमण विष्णो-र्विक्रान्त विष्णो क्रान्तम् श० ५ २ २ ६ स (विष्णु) इमाँल्लोकान् विचक्रमेऽथो वेदानथो वाचम् ऐ० ६ १५ वामनो ह विष्णुरास श० १ २ ५ ५ स हि वैष्णवो यद् वामन (गौ) श० ५ २ ५ ४ वैष्णव वामनम् (पशुम्) आलभन्ते तै० १ २ ५ १ वैष्णवो वामन (पशु) श० १३ २ २ ६ चक्रपाणये (विष्णवे) स्वाहा प० ५ १० विष्णुर्वै देवाना द्वारप ऐ० १ ३० विष्णवागाना पते तै० ३ १ १ ४ विष्णुर्वै यज्ञस्य दुरिष्ट पाति ऐ० ३ ३८. पक्ति-विष्णो पत्नी गो० उ० २ ९ विष्णो श्रोणा तै० १ ५ १४ यच्छ्रोत्र स विष्णु गो० उ० ४ ११. वैष्णवा पुरुषा श० ५ २ ५ २ वैष्णवो हि यूप श० ३ ६ ४.१ वैष्णवस्त्रिकपाल (पुरोडाश) ता० २१ १० २३ अथ यद् वैष्णव। त्रिकपालो वा पुरोडाशो भवति चरुर्वा श० ५ २ ५ ४. तान् (पशून्) विष्णुरेकविंशेन स्तोमेनाप्नोत् तै० २.७ १४ २ विष्णुस्तेजनम् ऐ० १ २५ तथैवैतद् यजमानो विष्णुर्भूत्वेमाँल्लोकान् क्रमते। स य स विष्णु-र्यज्ञ स श० ६ ७ २ १० तद् यदेनेन (यज्ञेन विष्णुना) इमा सर्वां (पृथिवी) समविन्दन्त तस्माद् वेदिर्नाम श० १ २ ५ ७ यन्वेवात्र विष्णुमन्वविन्दँस्तस्माद् वेदिर्नाम श० १ २ ५ १० वैष्णव हि हविर्धानम् श० ३ ५ ३ १५ या सा द्वितीया (ओकारस्य) मात्रा विष्णुदेवत्या कृष्णा वर्णेन यस्ता ध्यायते नित्य स गच्छेद् वैष्णव पदम् गो० पू० १ २५ पक्तिर्विष्णो पत्नी गो० उ० २ ९ विष्णुर्वै यज्ञस्य दुरिष्ट पाति ऐ० ३ ३८]

विष्णाप्वम् विष्णानि कृषिव्याप्तानि कर्माण्याप्नोति येन पुरुषेण तम् १ ११७ ७. विष्णान् विद्याव्यापिनो विदुष आप्नोति बोधस्तम्, प्र०—अत्र विष्लृ-धातोर्नक् तत आप्लृ-धातोरु 'वाच्छन्दसि' इति पूर्वसवर्णप्रतिषेधात् यण् १ ११६ २३ [विष्णोपपदे आप्लृ व्याप्तौ (स्वा०) धातो-र्बाहु० औणा० उ। विष्ण =विष्लृ व्याप्तौ (जु०) धातो-र्बाहु० औणा० नक्]

विष्णुपत्न्यै विष्णुना व्यापकेन पालितायै (अन्त-रिक्षरूपायै) २९ ६० [विष्णु-पत्नीपदयो समास। पत्नी=पा रक्षणे (अदा०) धातो 'पातेर्डति' उ० ४ ५८ इति डति। तत स्त्रिया ङीप् नकारश्च]

विष्पट् यो विषो व्याप्नुवत पटति प्राप्नोति स (विद्वज्जन) १ १८९ ६ [विष् इत्युपपदे पट गतौ (भ्वा०) धातो क्विप्। विष्=विष्लृ व्याप्तौ (जु०) धातो क्विप्]

विष्पतिम् प्रजापालकम् (अग्नि=पावकम्) ३ २ १० विश सर्वस्या प्रजाया पालक स्वामिनम् (चेतन=परमात्मानम्) ३ ३ ८ **विष्पते**=प्रजास्वामिन् (विद्वज्जन) ६ २ १० [विश्-पतिपदयो समास। विश मनुष्यनाम निघ० २ ३]

विष्पतीव विशा प्रजाना पालको राजेव ७ ३९ २ [विष्पति-इवपदयो समास]

विष्पर्धस ये विशेषेण स्पर्द्धन्ते तान् (विद्वज्जनान्) ५ ८७ ४ परस्पर विशेषत स्पर्द्धमाना (विद्वास) १ १७३ १० **विष्पर्धा**:=विशेषेण य स्पर्द्धते स

विष्टम्भनीम् आधारभूताम् (स्त्रियम्) १४.५ [वि+स्तम्भु धारणार्थे सौत्रो धातु । ततो ल्युट्-प्रत्ययान्तात् स्त्रिया ङीप् । 'स्तम्भे' अ० ८ ३ ६७ सूत्रेण षत्वम्]

विष्टम्भः विशो वैश्यस्य विष्टम्भो रक्षण येन स (अधिपति) १४ ६ **विष्टम्भेन**=विशेषेण स्तभ्नोति शरीर येन तेन (आहार-रसेन) १५ ६ [वि+स्तम्भु धारणार्थे सौत्रो धातु । ततो घञ् । प्रजापतिर्वै विष्टम्भ श० ८ २ ३ १२]

विष्टः प्रविष्ट (वायु) १ १४८ १ [विश प्रवेशने (तुदा०) धातो क्त]

विष्टारपङ्क्तिः सर्वा दिश १५ ४ [(यजु० १५ ४) दिशो वै विष्टारपङ्क्तिश्छन्द श० ८ ५ २ ४.]

विष्टारः प्रसार ५ ५२.१० [वि+स्तॄञ् आच्छादने (क्र्या०) धातो 'छन्दोनाम्नि च' अ० ३ ३ ३४ सूत्रेण घञ् । 'छन्दोनाम्नि च' अ० ८ ३ ९४ सूत्रेण षत्वम्]

विष्टिभिः व्याप्तिभि १.९२ ३ [विष्लृ व्याप्तौ (जु०) धातो स्त्रिया क्तिन्]

विष्टिरः ये विशेषेण तरन्ति ते ऋतव २ २३ १० [वि+तॄ प्लवनसन्तरणयो (भ्वा०) धातो क्विप् । 'ॠत इद्धातो' इतीत्व रपरत्वञ्च । सुडागमश्छान्दस]

विष्टी व्यापनशीलावश्विनौ, प्र०—अत्र 'क्तिच्-क्तौ च सज्ञायाम्' अ० ३ ३.१७४ अनेन क्तिच्प्रत्यय १ २० ४ [विष्लृ व्याप्तौ (जु०) धातो क्तिच् । विष्टी कर्मनाम निघ० २ १]

विष्टीमिनम् विशिष्टा बहव ष्टीमा आर्द्रीभूता पदार्था विद्यन्ते यस्मिँस्तम्, भा०—आर्द्रीभावम्, अ०—लालामगु=न्यायम् २३ २६ [विष्टीमप्राति० भूम्न्यर्थ इनि । विष्टीम =वि+ष्टीम आर्द्रीभावे (दिवा०) धातोर्घञ्]

विष्टुतीः विविधाश्च ता स्तुतयश्च ता १६ २८ [वि-स्तुतिपदयो. समास]

विष्ट्वी कर्म्म ३ ६० ३ व्यापनशीलानि (शमी=कर्माणि) १ ११० ४ [विष्ट्वी कर्मनाम निघ० २ १ कृत्वा नि० ११ १६ विष्लृ व्याप्तौ (जु०) धातो क्त्वा । 'स्नात्व्यादयश्च' अ० ७ १ ४६ सूत्रेण निपातनाद् ईत्वम्]

विष्ठाः या विविधेषु स्थानेषु तिष्ठन्ति ता (वुध्न्या = सूर्यादयो लोका) १३ ३ विशेषेण तिष्ठति यज्ञो यासु ता (ऋतव) २३ ५७ भा०—स्थितिसाधिका (षड्तव) २३ ५८ निवासो के स्थान आर्याभि० २ २८, १३ ३. [वि+ष्ठा गतिनिवृत्तौ (भ्वा०) धातो क । ततष्टाप् स्त्रियाम् । क्विप्-प्रत्ययान्त वा]

विष्ठितम् व्याप्तम् (जगत्) २९ ५५ विशेषेण स्थितम् (जगत्) ६ ४७ २९ [वि-स्थितपदयो समास । स्थितम्=ष्ठा गतिनिवृत्तौ (भ्वा०) धातो क्त । विष्ठितम् स्थावरम् नि० ६ १३.]

विष्ठिता विशेषेण स्थितानि (शृङ्गाणि=सेनाङ्गानि) २९ २२ [विष्ठितमिति व्याख्यातम् । ततश्शेर्लोपश्छन्दसि]

विष्णवि व्यापके परमेश्वरे, प्र०—अत्र 'वाच्छन्दसि' इति घिसज्ञाकार्याऽभावे गुणादेशेऽवादेश ३३ ९७ [विष्णु-प्राति० सप्तम्या एकवचने 'वा छन्दसि' इति नियमेन घिसज्ञाकार्ये 'अच्च घे' इत्यस्याभावे गुणेऽवादेशे च रूपम्]

विष्णवे व्यापकाय विद्युद्रूपाय (अग्नये) २२ ६. व्यापनशीलाय, यज्ञाय, अ०—उपासनादियज्ञाय ५ १८ सर्वविद्याकर्मव्यापनस्वभावाय (सोमभृते=यजमानाय) ५ १ व्याप्तिशीलाय विज्ञानप्राप्तिलक्षणाय वा यज्ञाय ५ १ **विष्णुना**=व्यापकेन परमेश्वरणेव शुभगुणकर्मस्वभावेन १० ३० **विष्णुम्**=व्यापक व्यान धनञ्जय वा हिरण्य-गर्भम् ६ २१ ६ **विष्णुः**=वेवेष्टि व्याप्नोति चराचर जगत् स परमेश्वर, प्र०—'विषे किच्च' उ० ३ ३८ अनेन विष्लृधातो नु प्रत्यय किच्च १ २२ १६ सर्वविद्याङ्ग-व्यापनशील (योग्य सेनाध्यक्ष) १ ६१ ७ सकलविद्या-योगाङ्गव्यापी योगिराज ११ ६० स्वदीप्त्या व्यापक सूर्य १ १५६.४. सर्वशुभगुणकर्मसु व्याप्त (गृहपति) ८ १७ व्यापिका विद्युत् ८ ५७ यो वेवेष्टि व्याप्नोत्यन्तरिक्षस्थल-वाय्वादिपदार्थान् स यज्ञ, प्र०—यज्ञो वै विष्णु श० १ १ २ १३, २ २५ विश्वान्तर्यामीश्वर १ २२ १८ परमेश्वर इव न्यायकारी (अ०—सर्वप्रधानपुरुष) ६ ३१ शिल्पविद्या-व्यापनशीलो मनुष्य १ ८५ ७ चर और अचर रूप जगत् मे व्यापक परमात्मा स० प्र० २१, ३६ ६ **विष्णो**= सर्वाऽन्त प्रविष्ट (जगदीश्वर) ५ १६ सर्वव्यापिन् जगदीश्वर व्यापनशील प्राणो वा ५ १६ **त्रिष्णोः**=व्याप्तु शीलस्य विद्युद्रूपाग्ने १२ ५ [विष्लृ व्याप्तौ (जु०) धातो 'विषे किच्च' उ० ३ ३८ सूत्रेण नु प्रत्यय । विष्णु यज्ञनाम निघ० ३ १७ पदनाम निघ० ४.२ पदनाम निघ० ५ ६ यद् विषितो भवति तद् विष्णुर्भवति, विष्णुर्विशतेर्वा व्यश्नोतेर्वा नि० १२ १८ यज्ञो वै विष्णु शिपिविष्ट ता० ९ ७ १० तद् यदेवेद क्रीतो विशतीव तद् हास्य (सोमस्य)

४ १६.५ [वि+सृ गतौ (भ्वा०) धातो कर्त्तरि क्विबन्ताच्छस्]

विसृपः योद्धृभिर्विविध यत् सृप्यते तस्य (क्रूरस्य= युद्धस्य), प्र०—'सृपितृदो कसुन्' अ० ३ ४ १७. अनेन भावलक्षणे सृपि-धातो कसुन् १ २८ [वि+सृप्लृ गतौ (भ्वा०) धातो 'सृपितृदो कसुन्' अ० ३ ४ १७ सूत्रेण कसुन्]

विसृष्टधेना विविधविद्यायुक्ता धेना वाग् यस्या सा (स्त्री) ७ २४ २ [विसृष्टा-धेनापदयो समास । धेना वाङ्-नाम निघ० १ ११ विसृष्टा=वि+सृज विसर्गे(तुदा०)+क्त+टाप्]

विसृष्टरातिः विविधा सृष्टा रातयो दानादीनि येन स (शूरजन) १ १२२ १० (विसृष्टा-रातिपदयो समास । राति=दानकर्मा (निघ० ३ २०) धातो क्तिन् स्त्रियाम्]

विसृष्टिः विविधा सृष्टि ऋ० भू० ११६, ऋ० १० १३० ७ [वि+सृज विसर्गे (तुदा०) धातो क्तिन् स्त्रियाम्]

विस्तिरः सुखविस्तारक (विद्वज्जन) १ १४० ७ [वि+स्तॄ आच्छादने (क्र्या०) धातोर् मूलविभुजादित्वात् कर्त्तरि क । 'ऋत इत्०' इतीत्व रपरत्वञ्च । विसस्रे विवृणुते नि० १ १६.]

विस्तृणीताम् वितनोतु ७ १७ १ [वि+स्तॄ आच्छादने (क्र्या०) धातोर्लोट्]

विस्पन्दमाने विशेषेण गम्यमाने (मरुति) ३९ ५ [वि+स्पदि किञ्चिच्चलने (भ्वा०) धातो शानच्]

विस्रसः जीर्णावस्थाया २ ३९ ४ [वि+स्रंसु अवस्रंसने (भ्वा०) धातो क्विप् सम्पदादित्वात् स्त्रियाम्]

विस्रुतिः विविधतया स्रवण गमन यस्मिन् स (मार्ग) १ ४६ ११ [वि+स्रुतिपदयो समास । स्रुति=स्रु गतौ (भ्वा०)+क्तिन्]

विस्रुहः विसरन्ति विशेषेण गच्छन्ति ता (आप) ६.७ ६ [विस्रुह आपो भवन्ति विस्रवणात् नि० ६ ३. वि+स्रु गतौ (भ्वा०) धातो क्विप् । तुक्स्थाने हुक् आगमश्छान्दस]

विस्रुहा यो विश्रून् रोगान् हन्ति स (राजा) ५ ४४ ३. [विस्रु इत्युपपदे हन हिंसागत्यो (अदा०) धातो क्विप् 'नौ चे' ति दीर्घ]

विहत्य विनिवर्त्य हत्वा ५ ४ ५ [वि+हन हिंसा-गत्यो (अदा०) धातो क्त्वा । समासे क्त्वो ल्यप्]

विहन् विहन्ति ६ ४७ २ [वि+हन् हिंसागत्यो (अदा०) धातोर्लङ् । अडभावश्छान्दस]

विहन्ता विशेषेण नाशक (सूर्य इव योद्धृजन) १ १७३ ५. [वि+हन हिंसागत्यो (अदा०) धातो कर्त्तरि तृच्]

विहरन् विचरन् (सविता=सूर्य) ४ १३ ४ [वि+हृञ् हरणे (भ्वा०) धातो शतृ]

विहवन्त विशेषेणाऽऽह्वयन्ति ७ २८ १ [वि+ह्वेञ् स्पर्द्धायाम् शब्दे च (भ्वा०) धातोर्लङ् । अडभावश्छान्दस । 'बहुल छन्दसि' अ० ६ १ ३४ सूत्रेण सम्प्रसारणम्]

विहवे विशेषेण ह्वयति शब्दयति यस्मिँस्तस्मिन् उत्तमाङ्गमस्तके) ३ ८.१० [वि+ह्वेञ् स्पर्द्धाया शब्दे च (भ्वा०) धातो 'ह्व सम्प्रसारण च न्यभ्युपविषु' अ० ३ ३ ७२ सूत्रेण अप् सम्प्रसारणञ्च]

विहव्यः विहोतुमर्ह (इन्द्र =धनकामो जन) २ १८ ७ विविधै साधनैरादातुमर्ह (मन्त्री) १७.२४ विविधतया ग्रहीतु योग्य (सोम =उत्पन्न) पदार्थसमूह १ १०८ ६ विविधानि हव्यानि साधनानि यस्य स (राजा) ८ ४६ विशेषेण स्तोतु योग्य (अग्नि =राजा) २७.५. [वि+हु दानादानयो (जु०) धातो 'अचो यत्' सूत्रेण यत् । 'वान्तो यि प्रत्यय' इति वान्तादेश । विहव्यम् (सूक्तम्) जमदग्नेर्त्त्व वा ऋषीणाञ्च सोमौ ससुतावास्ता तत एतज् जमदग्निर्विहव्यमपश्यत् तमिन्द्र उपावर्त्तत यद् विहव्य होता शमतीन्द्रमेवैषां वृङ्क्ते ता० ९ ४ १४]

विहायाः योऽनर्थान् विजहाति स (ऋभु.=मेधा-व्याप्तो जन) ३ ३६ २ विजिहीते सद्यो गच्छति येन स (विद्युदादिस्वरूपोऽग्नि) ४ ११ ४ विविधेषु पदार्थेषु व्याप्त (परमेश्वर), प्र०—अत्र ओहाङ् गतौ इत्यस्मादसुन् णित्कार्यञ्च १७ २६ महान् (अग्नि =विद्वज्जन), प्र०—विहायेति महन्नाम निघ० ३ ३, ६ १३ ६ महती (अर्या= वैश्यकन्या) १ १२३ १ [वि+ओहाक् त्यागे (जु०) धातो, ओहाङ् गतौ (जु०) धातोर्वोणा० असुन् णिच्च । णित्वाद् युगागम । विहाया व्याप्ता नि० १०.२६ विहाया महन्नाम निघ० ३ ३]

विहि व्याप्नुहि, प्र०—अत्र 'वाच्छन्दसि' इति ह्रस्व ४ ४८ १ प्राप्नुहि ३.२१ ५ [वी गतिव्याप्तिप्रजनादिषु (अदा०) धातोर्लोट् । धातोर्ह्रस्वश्छान्दस]

विहितानि रचितानि (तत्त्वानि) १ १६४ १५

(छन्द =प्रकाश) १५ ५ [वि+स्पर्द्ध (भ्वा०) धातोरौणा० असुन्]

विष्पितस्य व्याप्तस्य कर्म्मण ७ ६० ७ [विष्पितो विप्राप्त नि० ६ २०]

विष्पुलिङ्गकाः ह्रस्वा पक्षिण १ १९१ १२ [विष्पुलिङ्गप्राति० 'ह्रस्वे' अ० ५ ३ ८६ सूत्रेण क]

विष्फुरन्ती विशेषेण चालयन्त्यौ (धनुर्ज्ये) २६ ४१ कम्पयन्त्यौ (योषा=पत्न्यौ) ६.७५ ४ [वि+स्फुर सचलने (तुदा०) धातोः शत्रन्तान् स्त्रिया ङीप् । 'स्फुरतिस्फुलत्योर्निनिविभ्य' इति षत्वम् । विष्फुरन्ती विघ्नत्यौ नि० ६ ४०]

विष्य अन्त कुरु ५ ८५ ८ **विष्यताम्**=अन्ते भवताम् २ ४० ४ **विष्यतु**=विमुञ्चतु २७ २० **विष्यन्**=व्याप्नुवन्ति ५ ४५ १ **विष्यन्ति**=विशेषेण कार्याणि समापयन्ति १ ८५ ५ **विष्यस्व**=स्वराज्येन विशेषत प्राप्नुहि १ १० १ १०. **विष्यामि**=व्याप्त होता हू स० वि० १२२, अथर्व० १४ १ ५७ [वि+षोऽन्त कर्मणि (दिवा०), धातोर्लोट् । अन्यत्र व्यत्ययेनात्मनेपदम्]

विष्वक् सर्वश ४ ४ २ सर्वत ४ १२.४ विषु व्याप्तमञ्चतीति ७ ४३ १ व्याप्तम् (रप =अपराधम्) ७ ३४ १३ य सर्वमञ्चति (सज्जन) ६.६ ३. [विषूपपदे अञ्चु गतिपूजनयो (भ्वा०) धातो क्विप् । विषु=विष्लृ व्याप्तौ (जु०) धातोर्बाहु० औणा० उ किच्च]

विष्वङ् यो विषु सर्वत्राऽञ्चति प्राप्नोति स (पुरुष =परमेश्वर) ३१ ४ **विषूचोः**=व्याप्तविद्याधर्मसुशीलयोर्द्वयो (सुहृज्जनयो) ७ १८ ६ [विषूपपदे अञ्चु गतिपूजनयो (भ्वा०) धातो 'ऋत्विग्दधृक्०' अ० ३ २ ५९ सूत्रेण क्विन्]

विष्वद्र्यक् यद् विष्वगञ्चति व्याप्नोति तत् (मन = चित्तम्) ७ २५ १ [विष्वक् इत्युपपदे अञ्चु गतिपूजनयो (भ्वा०) धातो कर्त्तरि क्विप् । 'विष्वग्देवयोश्च टेरद्रि०' अ० ६ ३ ९२ सूत्रेण विष्वक् शब्दस्य टेरद्रिरादेश]

विष्वाचः विविधगतिमत (शत्रुमण्डलस्य)१ ११७ १६ [विषूपपदे अञ्चु गतिपूजनयो (भ्वा०) धातो क्विप् । अकारस्य वर्णव्यत्ययेनाकारादेश]

विसदृशा विविधधर्म्यव्यवहारैस्तुल्यानि (जीविता= जीवनानि) १ ११३ ६ [वि-सदृशपदयो समासात् 'शेर्लोपश्छन्दसी' ति शेर्लोप । सदृश =समानोपपदे दृशिर् प्रेक्षणे (भ्वा०) धातो 'समानान्ययोश्चेति वक्तव्यम्' अ० ३.२ ६०, वा०सूत्रेण कञ् । 'दृग्दृशवतुपु' अ० ६ ३ ८९ सूत्रेण समानस्य सादेश]

विसर्जनम् यजमानेन होतृभिश्च हविषस्त्यागो मौन वा १ १५ [वि+सृज विसर्गे (तुदा०) धातोर्भावे ल्युट्]

विसर्पत विशेषेण गच्छत १२ ४५ **विसर्पति**= विविधतया गच्छति, भा०—सर्प इव गच्छति २३ ५६ [वि+सृप्लृ गतौ (भ्वा०) धातोर्लोट् । अन्यत्र लट्]

विसर्माणम् यो विसृजति तम् (वित्त=धन भोग वा) ५ ४२ ६ [वि+सृप्लृ गतौ (भ्वा०) धातो कर्त्तरि मनिन्]

वृष्टयः वर्षा ५ ५३ ६ **वृष्टचा**=वृष्टिविद्यया १५ ६ **वृष्टिम्**=वर्षणम् ५ ५८ ३ वर्षम् २ ६ ५ जल-समूहम् २.१६. **वृष्टिः**=दुष्टाना शक्तिर्बन्धिका शक्ति १ १५२ ७ जलवर्षम् १८ ६ अन्तरिक्षाज्जलस्याऽव. पत-नम् १ ३८ ८ [वृषु सेचने (भ्वा०) धातो 'मन्त्रे वृषेष-पच०' अ० ३ ३ ९६ सूत्रेण क्तिन् उदात्तश्च । वृष्टि (प्रजापति) तम् (पाप्मानम्) अवृञ्चन् । यदवृञ्चन् तस्माद् वृष्टि तै० ३ १० ९ १ (सविता) रश्मिभिर्वर्षं (समदधात्) गो० पू० १ ३६ वृष्टिर्वै याज्या विद्युदेव विद्युद्धीद वृष्टिमन्नाद्य सप्रयच्छति ऐ० २ ४१ वृष्टिर्वै विराट् तस्या एते घोरे तन्वौ विद्युच्च ह्लादुनिश्च श० १२ ८ ३.११ तौ (अनड्वाहौ) यदि कृष्णौ स्याता-मन्यतरो वा कृष्णस्तत्र विद्याद् वर्षिष्यत्यसम पर्जन्यो वृष्टिमान् भविष्यतीत्येतद्व विज्ञानम् श० ३ ३ ४ ११ अन्न वृष्टि गो० पू० ४.४ ५ वृष्टिर्वै विश्वधाया तै० ३ २ ३ २. तस्माद्या दिश वायुरेति ता दिश वृष्टिरन्वेति श० ८ २ ३ ५ मित्रावरुणौ त्वा वृष्ट्यावताम् (यजु० २ १६) श० १ ८.३ १२ इत प्रदाना वै वृष्टिरितो ह्यग्निर्वृष्टि वनुते श० ३ ८ २ २२ अर्वाचीनाग्रा हि वृष्टि तै० ३.३ १.३. वृष्टि सम्मार्जनानि तै० ३ ३ १ २ यदा वै द्यावापृथिवी सञ्जानायेऽथ वर्षति श० १ ८ ३ १२ वृष्टिर्वै वृष्ट्वा चन्द्रमसमनुप्रविशति ऐ० ८ २८]

वृष्टिद्यावा वृष्टिश्च द्यौश्च याम्यान्तौ (वायुविद्युतौ) ५.६८ ५ [वृष्टि-दिव्पदयो समास । 'दिवो द्यावा' अ० ६ ३.२९ सूत्रेण दिवो द्यावादेश]

वृष्टिमानिव बह्वयो वृष्ट्यो विद्यन्ते यस्मिँस्तद्व १ ७ ४० [वृष्टिमान्-इवपदयो समास]

वृष्टिवनये वृष्टे सविभाजकाय (रश्मये =शोधनाय) ३८ ६ [वृष्टि इत्युपपदे वन सम्भक्तौ (भ्वा०) धातो 'छन्दसि वनसन०' अ० ३ २ २७ इतीन् । वृष्टिवनिम् वृष्टि-याचिनम् नि० २ १२]

वृष्टीव यथा वृष्ट्या, प्र०—अत्र टा-स्थाने पूर्व-सवर्णादेश २ ५ ६ [वृष्टी-इवपदयो समास । वृष्टी-प्राति० टास्थाने 'सुपा सुलुक्०' इति पूर्वसवर्णदीर्घ]

वृष्ट्वी वृष्ट्वा वर्षित्वा ५ ५३.१४ [वृषु सेचने (भ्वा०) धातो क्त्वा । 'स्नात्व्यादयश्च' अ० ७ १.४९ सूत्रेणेदन्तत्वम्]

वृष्णम् जलेन सुसिक्तम् (धूम =वाष्पाख्यम्) ३ २९ ९ **वृष्णात्**=निकृष्टवर्णात् तमस १ १२३ ९ [वृषु सेचने (भ्वा०) धातोर्बाहु० औणा० न किच्च]

वृष्णि सुखवर्षकम् (शव =बलम्) ५ ३५ ४ [वृषु

वेदिर्भवत्येतत् (स्थान) वा ग्रस्या (पृथिव्याः) वीर्यवत्तमम् ता० १६ १३ ६ वेदिर्वै देवलोक श० ८ ६ ३ ६ वेदिर्वै सलिलम् श० ३ ६.२ ५ वेदिरेव विश्वाची (ग्रप्सरा) (यजु० १५ १८) श० ८ ६ १ १६. स विश्वाचीरभिचष्टे घृताची (यजु० १७ ५९) इति स्रुचश्चैतद् वेदीश्चाह (विश्वाची=वेदि । घृताची=स्रुक्) श० ९ २ ३.१७ योषा वै वेदि श० १ ३ ३ ८ योषा वै वेदिर्वृषा वेद श० १.९ २ २१ योषा वै वेदिर्वृषाग्नि श० १ २ ५ १५ सा वै (वेदि) पश्चाद् वरीयसी स्यात् । मध्ये सह्वारिता पुन. पुरस्तादुर्वी श० १ २ ५ १६ व्याममात्री (वेदि) पश्चात्स्या-दित्याहु. । एतावान् वै पुरुष पुरुषसम्मिता हि त्र्यरत्नि प्राची श० १ २ ५ १४ तस्मात् त्र्यगुला वेदि स्यात् श० १ २ ५ ९ (वेदि) चतुरगुल गेया तै० ३ २ ९ ११ सा वै (वेदि) प्राक् प्रवणा स्यात् श० १ २ ५ १७. अथो (वेदि) उदक्प्रवणा श० १ २ ५ १७]

वेदिषत् यो वेद्या पृथिव्या सीदति स (परमेश्वर) १० २४ यो वेद्या जगत्या यज्ञशालाया वा सीदति स (जीवो ब्रह्म वा) १२ १४ **वेदिषदः**=ये वेद्या पृथिव्या सीदन्ति ते (असुरा=दुष्टस्वभावा प्राणिन) प्र०—यावती वेदिस्तावती पृथिवी श० १ २ ३ ७, २ २६ [वेदि इति व्याख्यातम् । तदुपपदे षद्लृ विशरणगत्यवसादनेषु (भ्वा०) धातो क्विप्]

वेदी विन्दन्ति सुखानि यस्या सा (यज्ञस्थली) ६ १ १० वेद्याम्, प्र०—अत्र 'सुपा सुलुक्०' इति ङेर्लोप २ ३ ४ **वेद्या**=यस्या हूयते तया (यज्ञभूम्या) १८.६३ यज्ञसामग्र्या १९ १७ सुखप्रापिकया (विद्यया) ६ १३.४. **वेद्याम्**= हवनाऽऽधारे कुण्डे २८ १२. [वेदि इति व्याख्यातम् । तत 'कृदिकारादक्तिन' इति ङीप्]

वेद्यम् विचार्य्यम् (विषयमात्रम्) १८.११ **वेद्यः**= वेदितु योग्य. (परमेश्वर) ६ ४ २ [विद विचारणे (रुधा०) विद ज्ञाने (अदा०) धातोर्ण्यत्]

वेद्याभिः वेदितव्याभि (क्रियाभिः) ६ ९ १ वेत्तु योग्याभि प्रजाभि ३ ५ ९ १ ज्ञातव्याभिर्नीतिभि ७.२१ ५ [विद ज्ञाने (अदा०) धातोर्ण्यत् । ततष्टाप् स्त्रियाम्]

वेधसः मेधाविन (विद्वज्जना) ५ ५२ १३. सकल-विद्याधातुर्विधातु (परमात्मन) १ ७२ १. प्राज्ञान् (नॄन्= नायकाञ्जनान्) ४ २ १५ **वेधसे**=धारणाय (सुमखाय) १ ६४ १ प्राज्ञाय (इन्द्राय=सभासेनेशाय) २.२१ २. **वेधः**=अनन्तविद्य (इन्द्र=जगदीश्वर) ४.४२.७. प्रज्ञाप्रद (जगदीश्वर) १.७३.१० **वेधाः**=विविधशास्त्रजन्यमेधायुक्त (विश्पति=प्रजापति), प्र०—'विधाञो वेध च' उ० ४ २३२ अनेनाऽसुन्प्रत्ययो वेधादेशश्च १ ६० २. ज्ञान-वान् (जन) १.६९ २ पोषक. (पशु=गवादि) १ ६५ ५. [वेधा' मेधाविनाम निघ० ३.१५ डुधाञ् धारणपोषणयो (जु०) धातोर् 'विधाञो वेध च' उ० ४ २२५ सूत्रेणासुन् वेधादेशश्च इन्द्रो वै वेधा ऐ० ६ १० गो० उ० २ २० वेधसे विधात्रे नि० १० ६.]

वेधसा प्राज्ञौ (अश्विनौ=अध्यापकोपदेशकौ) १ १८१.७. [वेधस् इति व्याख्यातम् । ततो द्विवचनस्या-कारादेशश्छान्दस]

वेधस्तम अतिशयेन सर्वविद्याधर (विद्वज्जन) १ ७५ २. **वेधस्तमः**=विद्वत्तम (जन) ६ १४ २ [वेधस् इति व्याख्यातम् । ततोऽतिशायने तमप्]

वेन काम्यस्वरूप (ईश्वर) १ ४३ ९ **वेनस्य**=मेधा-विन (सभाद्यध्यक्षस्य) १ ६१.१४ **वेनः**=कमनीयश्चन्द्र ७ १६. आनन्दस्वरूप, कामना करने योग्य, प्राप्त करने योग्य अनन्तविद्यायुक्त (ईश्वर) आर्याभि० २.२८, १३.३ कामयमान (राजा) ५ ३६ ४. पण्डितो विद्वान् (जन) ३२ ८ कमनीय (ईश्वर), प्र०—वेनतीति कान्तिकर्मा निघ० २.६, १३ ३ [अज गतिक्षेपणयो (भ्वा०) धातो 'धापॄवस्यज्यतिभ्यो न' उ० ३ ६ इति न । 'अजेर्वी०' इति व्यादेश । वी गतिव्याप्तिप्रजनकान्त्यादिषु (अदा०) धातोर्वा बाहु० औणा० न । वेनतीति कान्तिकर्मा निघ० २ ६ वेन मेधाविनाम निघ० ३ १५ यज्ञनाम निघ० ३ १७ वेन (ऋ० १० १२३ १.) अय वै वेनोऽस्माद्वा ऊर्ध्वा अन्ये प्राणा वेनन्त्यवाञ्चोऽन्ये तस्माद् वेन ऐ० १ २० (यजु० १३ ३) असावादित्यो वेनो यद्वै प्रजिजनिषमाणो ऽवेनत्तस्माद् वेन श० ७ ४ १ १४ (ऋ० १० १२३ १) इन्द्र उ वै वेन कौ० ८.५ आत्मा वै वेन कौ० ८ ५]

वेनतम् कामयतम् ५ ७५ ७ **वेनः**=कामये ५ ३१ २ कामयथा ६ ४४ १० कामयस्व १ ४३ ९ [वेनति कान्ति-कर्मा निघ० २ ६ ततो लोट् । अन्यत्र लङ्]

वेनतः सर्वशास्त्रै श्रुतस्य कमनीयस्य (विद्वज्जनस्य), प्र०—अत्र वेनृधातोर्बाहुलकादौणादिकोऽतन् प्रत्यय १ ८६ ८ [वेनृ गतिज्ञानचिन्तानिशामनवादित्रग्रहणेषु (भ्वा०) धातो शतृ । वेनति कान्तिकर्मा निघ० २ ६]

वेनन्ता वादित्रवादकौ (शिल्पिजनौ), प्र०—अत्र वेनृ धातोर्वादित्रार्थो गृह्यते 'सुपा सुलुक्०' इत्याकारादेशः

व्याप्नोति ६ १५ १ प्राप्नोति १ १४१ ६ **वेतु**=विद्यादि-सद्गुणेषु जातविज्ञानान् करोतु ऋ० भू० २४६, ३ १० व्याप्नोति, प्र०—अत्र लडर्थे लोट् ३ १० प्राप्नोतु ७ १५ ६ व्याप्नोतु १० २६ कामयताम् १ ७७ ४ [वी गतिव्याप्ति-प्रजनकान्त्यसनखादनेषु (अदा०) धातोर्लेट्। अन्यत्र लोट्। वेति कान्तिकर्मा निघ० २ ६ गतिकर्मा निघ० २ १४ अत्तिकर्मा निघ० २ ८]

वेत्तु जानातु ज्ञापयतु वा, अ०—कृपया वेदयतु १ १४ **वेत्थ**=जानासि ३५ २० **वेद**=जानासि वेत्ति वा २ २१. जानाति १ १०५ ६ जानीयात् ३ ४ १० जानामि ३१ १८ जानीयाम् २ १४ १० विदन्ति ७ ५६ २ विजानीत ४० १४ जानीहि ५ १२ ३ **वेदत्**=प्राप्त होवे स० वि० १२२, अथर्व० १४ १ ५७ विजानीयात् ५ ३० ३ विद्यात् २ ३५ २ [विद ज्ञाने (अदा०) धातोर्लोट्। अन्यत्र लट् लेट् च]

वेदः प्राप्नुहि १ ४३ ६ (विद्लृ लाभे (तुदा०) धातोर्लोटि छान्दस रूपम्]

वेदनम् विज्ञानम् ४ ३० १३ धनम् १ १७६ ४ प्रापणम् ७ ३२ ७ [विद ज्ञाने (अदा०) विद्लृ लाभे (तुदा०) धातोर्वा ल्युट्]

वेदम् वेदः ज्ञापको, वेदयिता, वेत्ति चराचर जगत् स जगदीश्वर, विदन्ति येन स ऋग्वेदादिर्वा २ २१

वेदेन=ईश्वरप्रकाशितेन वेदचतुष्टयेन १६ ७८. [विद ज्ञाने (अदा०) धातो कर्त्तर्यच्। 'हलश्च' अ० ३ ३ १२१ सूत्रेण करणे वा घञ्। (वेद =दर्भमुष्टि) प्राजापत्यो वेद तै० ३ ३ २ १ प्राजापत्यो वै वेद तै० ३ ३ ७ २ प्रजापतेर्वा एतानि श्मश्रूणि यद् वेद तै० ३ ३ ६ ११ योषा वै वेदिर्वृषा वेद श० १ ६ २ २१ वृषा वै वेदो योषा पत्नी कौ० ३ ६ अथो सर्वेषा वा एष वेदाना रसो यत् साम श० १२ ८ ३ २३ अनन्ता वै वेदा तै० ३ १० ११ ३ तदाहु किं तत् सहस्रम् (ऋ० ६ ६९ ८) इतीमे लोका इमे वेदा अथो वागिति ब्रूयात् ऐ० ६ १५ वेदो ब्रह्म जै० उ० ४ २५ ३ ते सर्वे त्रयो वेदा। दश च सहस्राण्यष्टौ च शतान्यशीतीनाम् (१०८००×८०=८६४००० अक्षराणि) अभवन् श० १० ४ २ २५ चत्वारोऽस्यै (स्वाहायै) वेदा शरीर षडङ्गान्यङ्गानि ष० ४ ७ चत्वारो वा इमे वेदा ऋग्वेदो यजुर्वेद सामवेदो ब्रह्मवेद इति गो० पू० २ १६ स इमानि त्रीणि ज्योतींष्यभितताप। तेभ्यस्तप्तेभ्यस्त्रयो वेदा अजायन्ताग्नेर्ऋग्वेदो वायोर्यजुर्वेद सूर्यात् सामवेदं श० ११ ५ ८ ३ नाऽवेदविन्मनुते त बृहन्तम् तै० ३ १२ ९ ७ एतानि ह वै वेदानामन्त श्लेषणानि यदेता (भूर्भुव स्वरिति) व्याहृतय ऐ० ५ ३२ वेदा सोऽपहतपाप्मानन्ता श्रियमश्नुते य एव वेद यश्चैव विद्वान् एवमेता वेदाना मातर सावित्री सम्पदमुपनिषदमुपास्ते गो० पू० १ ३६ एवमिमे सर्वे वेदा निर्मिता गो० पू० २ १०]

वेदयामसि वेदयाम प्रज्ञापयाम ४ ३६.२ [विद ज्ञाने (अदा०) धातोर्णिजन्ताल्लट्। 'इदन्तो मसि' इति मस इदन्तता वेदयामसि वेदयाम नि० ६ ३१]

वेदसः धनाद्विज्ञानाद्वा २ १७ ६ **वेदसा**=वित्तेन ३ ६० १ **वेदसाम्**=विद्यादिधनानाम् १ ८६ ५ **वेदः**=विदन्ति सुखानि येन तद्धनम्, विज्ञानधनम् १ ८१ ६ द्रव्यम् ४ २५ ७ [वेद धननाम निघ० २ १०. विद ज्ञाने (अदा०) विद्लृ लाभे (तुदा०) धातोर्वा असुन्]

वेदि विज्ञायते ४ १६ ४ [विद ज्ञाने (अदा०) धातो. कर्मणि लुङ्। अडभावश्छान्दस]

वेदिम् वेत्ति यया ता प्रज्ञाम् १ १७० ४. हवनार्थं कुण्डम् ७ ६० ६ अग्निस्थानम् ५ ३१ १२ **वेदिः**=विदन्ति शब्दान् यस्या साऽऽकाशवायुस्वरूपा (भा०—ब्रह्माण्डाख्या) १ १६४ ३५ विदन्ति सुखान्यनया सा (यज्ञस्थली) २ १. यत्र हूयते सा (यज्ञस्थली) १८ २१ मध्यरेखा, भा०—यद्यस्य भूगोलस्य मध्यस्था रेखा क्रियेत तर्हि उपरिष्टाद् भूमेरन्त प्राप्नुवती सती व्यास-सज्ञा लभते, अयमेव भूमेरन्तोऽस्ति २३-६२ यज्ञभूमि १६ १७ कुण्डादिकम् ७ ३५ ७ [विद ज्ञाने (अदा०) धातो 'हृपिषिरुहिवृति०' उ० ४ ११९ सूत्रेण इन्। त (यज्ञ) वेद्यामन्वविन्दन् यद् वेद्यामन्वविन्दस्तद् वेदेर्वेदित्वम् ऐ० ३ ६ यन्न्वेवात्र विष्णुमन्वविन्दस्तस्माद् वेदिर्नाम श० १ २ ५ १० तद् यदेनेन यज्ञेन विष्णुना) इमा सर्वा (पृथिवी) समविन्दन्त तस्माद् वेदिर्नाम श० १ २ ५ ७ वेदिर्देवेभ्योऽनिलायत। ता वेदेनान्वविन्दन् तै० ३ ३ ६ १० पृथिवी वेदि ऐ० ५ २८ तै० ३ ३ ६ २, इय (पृथिवी) वै वेदि श० ७ ३ १ १५ एतावती वै पृथिवी यावती वेदि तै० ३ २ ६ १२ यावती वै वेदिस्तावती पृथिवी श० ३ ७ २ १ तस्मादाहुर्यावती वेदिस्तावती पृथिवीति श० १ २ ५ ७ यावती वै वेदिस्तावतीयम्पृथिवी जै० उ० १ ५ ५ तस्या (पृथिव्या) एतत् परिमित रूप यदन्तर्वेद्यथैष भूमाऽपरिमितो यो बहिर्वेदि ऐ० ८ ५ वेदिर्वै परोऽन्त पृथिव्या तै० ३.६ ५ ५. उर्वरा

वेषाय सर्वशुभगुणविद्याव्याप्तये भा०—सर्वविद्यासुखेषु व्याप्ताय, सर्वा विद्या सम्यक् पठित्वा तासां सर्वत्र प्रचारीकरणाय १६ [विष्लृ व्याप्तौ (जु०) धातोर्भावे घञ्]

वेष्पः वेवेष्टि व्याप्नोति पृथिवीमन्तरिक्षं वा स यज्ञोदयो वाष्पो ज्ञानसमूहो वा, प्र०—'पानीविषिभ्यः पः' उ० ३ २३ इत्यनेन विषेः पः प्रत्ययः १३०. [विष्लृ व्याप्तौ (जु०) धातोः 'पानीविषिभ्यः प.' उ० ३.२३. इति प]

वेहत् अकाले वृषभोपगमनेन गर्भघातिनी (गौ) २४ १. यस्य वीर्यं यस्या गर्भो वा विहन्यते स सा च (गौ) १८ २७ या प्रसवं विहन्ति सा (गौ) २१ २१ **वेहतम्**=गर्भस्राविकाम् (गाम्) २८ ३३ [विशेषेण हन्तीति विग्रहे विपूर्वाद् हन हिंसागत्योः (अदा०) धातोः 'सञ्चत्तृपद्वेहत्' उ० २ ८५ सूत्रेण अति प्रत्ययान्तो निपात्यते। निपातनाद् वेरुपसर्गस्यैकारादेशो धातोश्च टिलोपः]

वेः प्राप्नुयाः ४ ३ १३ निश्चि वेदयति प्रापयति वा, प्र०—अत्र लडर्थे लट् 'वी गति०' इत्यस्य प्रयोगोऽडभावश्च २६ आवहति १ ७७ २ स्वीकुर्याः १ १७३ १ जानाति २ ५ ३ [वी गतिव्याप्तिप्रजनादिषु (अदा०) धातोर्लङ्। अडभावश्च]

वेः व्याप्तस्य (अध्वरस्य=शिल्पिजनस्य) ४ ७ ८ गन्त्याः (रिपः=पृथिव्याः) ३ ५ ५ कमनीयस्य (यज्ञस्य=विद्याबोधस्य) १ ६६ ६ व्यापकस्य परमेश्वरस्य ३ ७ ७. प्राप्तस्य (मनुष्यस्य) ३ ५ ६ विहगस्य पक्षिण इव ६ १५ १४ [वी गतिव्याप्तिप्रजनादिषु (अदा०) धातोः, वा गतिगन्धनयोः (अदा०) धातोर्वा 'वातेर्डिच्च' उ० ४ १३४ सूत्रेण इण्। डित्वाट् टेर्लोपः]

वै खलु १ १० ५ २ निश्चये २ ३३ ६. निश्चयेन २५ ४४ निश्चय करके स० वि० २१०, अथर्व० ६ ६ ३.१. ही स० वि० २०६, ६ २ ६ [चादिषु पाठान्निपातः। 'स्वरादिनिपातमव्ययम्' इत्यव्ययसञ्ज्ञा]

वैकर्णयोः विविधेषु कर्णेषु श्रोत्रेषु भवयोर्व्यवहारयोः ७ १८ ११ [वि-कर्णपदयोः समासे भवार्थेऽण्]

वैदथिनाय विदथिना सङ्ग्रामकर्त्रा निर्मिताय (युद्धव्यवहाराय) ५ ३६ ११ विज्ञानवतोऽपत्याय ४ १६ १३ [विदथिन्प्राति० अपत्यार्थे कृतार्थे वाण्। प्रकृतिभावश्च। विदथिन्=विदथप्राति० मत्वर्थे इन्। विदथ यज्ञनाम निघ० ३ १७. विदथानि पदनाम निघ ४.३]

वैददश्विः योऽश्वान् विदन्ति न विददश्वस्तस्यापत्य वैददश्वि (ऐश्वर्यवान् पुरुष) ५ ६१ १० [विददश्वप्राति० अपत्यार्थे इञ्। विददश्व. विदद्-अश्वपदयोः समासः। विदद्=विद्लृ लाभे (तुदा०) धातोः शतृ। 'बहुलं छन्दसि' इति शपो लुकि प्राप्तेऽपि लुङ्। ततो नुमपि न भवति]

वैद्युताः विद्युद्देवताकाः (पश्वः=पश्वादयः) २४ १० [विद्युत्प्राति० 'सास्य देवता' इति अण्]

वैनंशिनाय विनष्टं शीलं यस्य तस्यायं बोधन्तस्मै (जनाय) १८.२८ विनाशशीलेषु कर्मसु भवाय (सुग्णाय=सुगर्भजनाय) ६.२० [वि+णश अदर्शने (दिवा०) धातोः ताच्छील्ये णिनि। ततो विनशिन्प्राति० 'तस्येदम्' इत्यर्थेऽण्]

वैन्दम् निषादस्यापत्यम् ३०.१६

वैरदेये वैरं देयं येन तस्मिन् (अनल्पकर्मणि) ५ ६१.८ [वैर-देयपदयोः समासः]

वैरहत्याय वैरं हत्या च यस्मिन् कर्मणि तस्मै ३० १३ [वैर-हत्यापदयोः समास.]

वैराजम् यद्विविधैरर्थैः राजते तदेव (साम) १० १३ विविधानां पदार्थानामिदं प्रकाशकम् (साम=सामवेदस्य ज्ञानम्) १३ ५७ विराट् प्रतिपादकम् (साम) १५.१३. **वैराजेन**=विराजि भवेनाऽर्थेन २१ २६ **वैराजाभ्याम्**=विराट्छन्दोज्ञापिताभ्याम् (मित्रावरुणाभ्याम्=प्राणोदानाभ्याम् २६ ६० [विराज्प्राति० स्वार्थे भवार्थे वा अण्। विराज्=वि+राजृ दीप्तौ (भ्वा०) धातोः क्विप्। वैराजम् (साम) ऐ० ४.१३ स वैराजमसृजत तदग्नेर्घोषोऽन्वसृज्यत ता० ७.८.११ यद् बृहत्तद् वैराजम् ऐ० ४ १३ प्रजापतिर्वैराजम् ता० १६ ५ १७]

वैरिणाः वीरिणेषु भवाः (कीटविशेषाः) १ १९१ ३ [वीरिणप्राति० भवार्थेऽण्]

वैरूपम् विविधानि रूपाणि प्रकृतानि यस्मिंस्तत् (साम) १५ १२ विविधानि रूपाणि यस्मात्तस्येदम् (जगज्ज्ञानम्) १३ ५६ **वैरूपेण**=विविधानां रूपाणां भावेन (ओजसा=बलेन) २१ २५ **वैरूपेभ्यः**=विविधस्वरूपेभ्यः (देवेभ्यः=दिव्यगुणेभ्यो जनेभ्यः) २६ ६० [वि-रूपपदयोः समासे ततः 'तस्येदम्' इत्यर्थे स्वार्थे वा अण्। वैरूपम् (साम) देवा वै तृतीयेनाह्ना स्वर्गं लोकमायँस्तानसुरा रक्षांस्यन्ववारयन्त ते विरूपा भवत विरूपा भवतेति भवन्त आयन्स्ते यद् विरूपा भवत विरूपा भवतेति भवन्त आयंस्तद् वैरूपं सामाऽभवत्तद् वैरूपस्य वैरूपत्वम्

१ २५ ६ [वेनइ् इति व्याख्यातम् । ततो द्विवचनस्याकारादेश]

वेनाम् कमनीया कामसिद्धिम् ऋ० भू० १६४, ऋ० १ ३ ४ १ कामिना यात्राम्, प्र०—'धापृवस्यज्यतिभ्यो न.' उ० ३ ६ इत्यजधातोर्न प्रत्यय १.३४२ [वेन इति व्याख्यातम् । तत स्त्रिया टाप्]

वेन्यस्य कमितु योग्यस्य (सूर्यस्य) २ २४ १० **वेन्यः**=कमनीय (वेधा =मेधावी जन) ६ ४४ ८ [वेनति कान्तिकर्मा निघ० २ ६ ततो ण्यत्]

वेपते कम्पने ५ ३६ ३ **वेपध्वम्**=कम्पध्वम् ३ ४१ कम्पायमान होवो स० वि० १४६, ३ ४१ **वेपेते**=चलत. १ ८० ११ [टुवेपृ कम्पने (भ्वा०) धातोर्लट् । अन्यत्र लोट्]

वेपयन्ति कम्पयन्ति ३ २६ ४ चालयन्ति १ ३९ ५ [टुवेपृ कम्पने (भ्वा०) धातोर्णिजन्ताल्लट् । 'निगरणचलनार्थेभ्य' इति परस्मैपदम्]

वेपसा वेगेन १ ८० १२ राज्यपालनादिकर्म्मणा, प्र०—वेपस इति कर्मनामसु पठितत् निघ० २ १, ४.११ २ [टुवेपृ कम्पने (भ्वा०) धातोरौणा० असुन् । वेप कर्मनाम निघ० २ १]

वेपिष्ठः अतिशयेन कम्पक (विप्र =मेधाविजन) ६ ११ ३ [टुवेपृ कम्पने (भ्वा०) धातो तृजन्तादतिशायन इष्ठन् । 'तुरिष्ठेमेयस्सु' इति तृचो लोप]

वेपी धीमती (कन्या) ६ २२ ५

वेम्र प्रजनम् १९ ८३ [वी गतिव्याप्तिप्रजनकान्त्यादिषु (अदा०) धातोर्बाहु० औणा० मन्]

वेरिव उड्डीयमानस्य पक्षिण इव १ ११६ १५ [वे-इवपदयो समास]

वेविजानः कम्पमान (वि =पक्षी) ४ २६ ५ [ओविजी भयचलनयो (तुदा०) धातोर्लिट कानच् । शानचि वा छान्दस श्लु]

वेविजे भृश विभीत, प्र०—ओविजी भयचलनयो इत्यस्माद् यङ्लुगन्ताद् व्यत्ययेनात्मनेपदमेकवचनञ्च १ १४० ३

वेविज्यते अत्यन्त सम्यग् विभेति १ ८० १४ [ओविजी भयचलनयो (तुदा०) धातोर्यङन्ताल्लट्]

वेविदानः विज्ञापयन् (विद्युदग्नि) ५ १६ ५ **वेविदानाः**=अतिशयेन विज्ञानवन्त (विद्वासो जना) १ ७२ ४, भृश प्रतिजानन्त. (विद्वज्जना) ३.५४ ४ [विद ज्ञाने (अदा०) धातोर्यङ्लुगन्ताच्छानच् । व्यत्ययेनात्मनेपदम्]

वेविदाम यथावल्लभेमहि ७ २४.६ प्राप्नुयाम ७ २५ ६ [विद्लृ लाभे (तुदा०) धातोर्लेट् । 'बहुल छन्दसी' ति श्लु]

वेविषत् भृश व्याप्नोति ३ २ १० [विष्लृ व्याप्तौ (जु०) धातोर्यङ्लुगन्ताल्लट्]

वेविषतः व्याप्नुवत (सम्बन्धिजनस्य) ६ २१ ५ [विष्लृ व्याप्तौ (जु०) धातो शतृ]

वेविषाणाः शत्रुबलानि व्याप्नुवन्त (वीरराजपुरुषा) ७ १८ १५ [विष्लृ व्याप्तौ (जु०) धातो शानच् । व्यत्ययेनात्मनेपदम्]

वेवेति भृश व्याप्नोति, प्र०—अत्र 'वाच्छन्दसि' इत्यडभाव ३ ५५ ९ गच्छति ४ ३८ ६ [वी गतिव्याप्तिप्रजनादिषु (अदा०) धातोर्यङ्लुगन्ताल्लट्]

वेशम् यो विशति तम् (प्रमादम्) ५ ८५ ७. **वेशस्य**=प्रवेशस्य ४ ३ १३ [विश प्रवेशने (तुदा०) धातोरच् कर्त्तरि । भावे वा घञ् । 'पदरुजविशस्पृशो घञ्' अ० ३ ३ १६ सूत्रेण वा कर्त्तरि घञ् । वेश कर्मनाम निघ० २ १]

वेशय प्रापय १ १७६ २ [विश प्रवेशने (तुदा०) धातोर्णिजन्ताल्लोट्]

वेश्मनि घर अर्थात् स्थान मे स० वि० २१०, अथर्व० ९ ६ २ १३ [विश प्रवेशने (तुदा०) धातोर्बाहु० औणा० मनिन्]

वेश्यम् वेशेषु प्रवेशेषु भवम् (सर्वहितम्) ४ २६ ३ [वेशमिति व्याख्यातम् । ततो भवार्थे यत्]

वेश्या वेशी प्रवेशयित्री सूची तया ७ १८ १७ उपदेष्टु योग्येन (सख्या=मित्रत्वेन) ६ ६१ १४ [विश प्रवेशने (तुदा०) धातोर्ण्यत् । तत स्त्रिया टाप्]

वेषणा व्याप्तेन पदार्थेन ४ ३३ २ [विष्लृ व्याप्तौ (जु०) धातोर्बाहु० औणा० युच्]

वेषणे व्याप्ते व्यवहारे ५ ७ ५ [विष्लृ व्याप्तौ (जु०) धातोर्ल्युट्]

वेषत् अभिगच्छतु, प्र०—तिपि लेट्-प्रयोग १ १८० ६ **वेषि**=व्याप्नोषि १ ७६ ४ प्राप्नोषि २.२४ १५ कामयसे १ १७३.८ [वी गतिव्याप्तिप्रजनकान्त्यादिषु (अदा०) धातोर्लेट् । अन्यत्र लट्]

वेषन्ती. व्याप्नुवन्त्य. (नद्य) १.१८१ ६ [विष्लृ व्याप्तौ (जु०) धातो शत्रन्तात् ङीप् । 'बहुल छन्दसी' ति शप. श्लुत्]

विदुषी (रत्री) १६ ४४ [विश्व-देवपदयो समासाद् भवार्थे ऽण्णन्तान् ङीप्]

वैश्वदेव्यः विश्वदेवदेवताका (वत्सतर्या =वत्सा) २४.५. [विश्वदेवप्राति० 'सास्य देवता' इत्यर्थे 'देवाद् यञञौ' इति यञ्]

वैश्वव्यचसम् प्रकाशकम् (चक्षु =नयनम्) १३ ५६ [विश्व-व्यचस्पदयो समासात् 'तस्येदम्' इत्यर्थे ऽण्]

वैश्वानर प्रधानपुरुष ३ ३ १० विश्वस्मिन् राजमान (ईश्वर) ७ ५ ८ यो विश्वान् नरान् धर्मकार्येषु नयति तत्सम्बुद्धौ (राजन्) ६ ७ ४ सर्वनेत (जगदीश्वर सभाध्यक्षो वा) १ ५९ ५ सर्वेषु मनुष्येषु विद्याप्रकाशक (ईश्वर विद्वन्वा) १ ६८ ३ विश्वस्मिन् विद्याधर्मप्रकाशनेन नायक (राजन्) ६ ७ ५ **वैश्वानरम्**=सर्वत्र प्रकाशमानम् (अग्नि =विद्युतम्) ६ २१ सर्वेषु नरेषु नीतिषु प्राप्तेषु पदार्थेषु व्याप्तम् (अग्निम्) ३ ३ ५ विश्वेभ्यो नरेभ्यो हितम् (अग्निम्) ३३ ८ विश्वेषु नायकेषु विराजमानम् (अग्निम्) ३ २६ २ विश्वेषु वस्तुषु नायकम् (अग्निम्) २२ ३ यो विश्वान्नरानानन्दान् नयति तम् (अग्निम्) ७ २४ **वैश्वानरस्य**=विश्वेषु नरेषु जीवेषु भवस्य (ईश्वरस्य) १ ६८ १ **वैश्वानरः**=शरीरनेता जाठराग्नि सर्वस्य नेता परमेश्वरो वा ४ १५ पावक ३.२ १२ विद्युदग्नि २६ ७ विश्वस्य नेता स एव (अग्नि =विद्युत्) १८ ७३ विश्वेषु नरेषु यो राजते स एव (अग्नि =सूर्य) १८ ७२ विश्वस्मिन् नरे नेतव्ये प्रकाशमान (अग्नि) ६ ६ १ य सकलस्य जगतो नयनकर्त्ता स (परमेश्वर) ऋ० भू० २०३, सर्वनियन्ता (परमात्मा) १ ५९ ६ विश्वेषा सर्वेषा नराणामय सत्कार १८ २० सर्वेषा जीवाना नेता (ईश्वर) १ ६८ १ विश्वेषा नराणा हित (अग्नि =सूर्य) ३३ ६२ विश्वेषु नरेषु प्रकाशमान (राजा) ४ ५ २ विश्वे सर्वे नरा यस्मिन् स एव (ईश्वर) १२.२६ विश्वस्य ससारस्य प्रकाशक (परमेश्वर) ६ ६ ७ **वैश्वानरात्**=सर्वनरहितकरात् (ईश्वरात्) ३३ ६० **वैश्वानराय**=अखिलपदार्थाना नयनाय प्रापणाय (पावकाय) १४ ७ परब्रह्मोपासकाय १ ५९ ४ विश्वेषा नराणामिद सुखसाधक तस्मै (अग्नये =शास्त्रविज्ञानाय) १४ ७ अग्निकर्मसाधनाय २६ ७ **वैश्वानराः**=सर्वेषु मनुष्येष्विमे सत्यधर्मविद्याप्रकाशका (देवा =विद्वासो जना) ११ ६० ये विश्वेषु नरेषु राजन्ते (देवा =उपदेशका जना) ११ ५८ [विश्व-नरपदयो समासाद् भवार्थे हितार्थे 'तस्येदम्' इत्यर्थे वा अण्। वैश्वानर कस्मात् ? विश्वान् नरान् नयति। विश्व एन नरा नयन्तीति वा। अपि वा विश्वानर एव स्यात् प्रत्यृत सर्वाणि भूतानि तस्य वैश्वानर नि० ७.२१ तत्को वैश्वानर ? मध्यम इत्याचार्या। अथासावादित्य इति पूर्वे याज्ञिका।... अथापि वैश्वानरीयो द्वादशकपालो भवति।......अथापि ब्राह्मण भवत्यसौ वा आदित्यो ऽग्निर्वैश्वानर इति अथापि निविन् सौर्य वैश्वानरी भवति नि० ७ २३ अग्निर्वा एष वैश्वानरो यत् सवत्सर जै० २ ३७६ आत्मा वैश्वानर (अग्ने) तै० स० ५ ६ ६ ३ प्राणो वै पूर्वो वैश्वानरो ऽपान उत्तर जै० ३ ८. वैश्वानरो द्वादशकपाल (पुरोडाश) श० ६ ६ १ ५ शिर एव वैश्वानर श० ६ ६.१६ सवत्सरो वैश्वानर मै० ३ ४ ४ श० ५.२ ५ १५ स एषो ऽग्निर्वैश्वानरो यत्पुरुष श० १० ६ १ ११ वैश्वानर द्वादशकपाल निर्वपति हिरण्य दक्षिणा तै० ब्रा० १ ८ ८ १]

वैश्वानरज्योतिः विश्वेषु नरेषु प्रकाशमान वैश्वानर, वैश्वानर च तज्ज्योतिश्च वैश्वानरज्योति (अ०=ब्रह्म) २०.२३ [वैश्वानर-ज्योतिष्पदयो समास]

वैष्णवम् यद् विष्णोर्यज्ञस्येद साधन साधक वा तत् (जगत्) ५.२१. विष्णोरिद विज्ञानम् ५ २५ **वैष्णवः**= विष्णुदेवताक (वामन =वक्राङ्ग. पशु) २४ १. **वैष्णवान्**=यज्ञाऽनुष्ठातॄन् विष्णुर्यज्ञो देवता येषान्तान् विष्णोर्यज्ञस्येमान् (सभाद्यध्यक्षादिजनान्) ५ २५ **वैष्णवाः**=विष्णोर्व्यापकस्येश्वरस्येमे उपासका (सभाद्यध्यक्षादिजना) ५ २५ [विष्णुप्राति० 'तस्येदम्' इत्यर्थे 'सास्य देवता' इत्यर्थे वाऽण्]

वैष्णवी विष्णोरिय क्रिया ५ २५ विष्णुदेवताका (जहका=जोक इति भाषायाम्) २४ ३६ **वैष्णवीम्**= विष्णोर्व्यापकस्येमा वाचम् ५ २३ विष्णो समग्रविद्याव्यापकस्येय रीतिस्ताम् ५ २५ [वैष्णवमिति व्याख्यातम् तत. स्त्रिया ङीप्]

वैष्णव्यौ यज्ञस्येमौ व्याप्तिकर्त्तारौ पवनपावकौ तौ १ १२ सकलविद्यासुशिक्षाशुभगुणस्वभावव्यापिनौ (अध्येत्र-ध्यापकौ १० ६ [विष्णु यज्ञनाम निघ० ३ १७ तत 'तस्येदम्' इत्यर्थे ण्यश्छान्दस]

वोच उपदिशामि ६ ५९ १ उपदिश ११३२ १ **वोचत्**=वक्ति ६ १५ १० उच्यात् ४ ५ ३ उपदिशेत् १ ११७ २२ **वोचत**=वदत, प्र०—प्रत्राऽडभाव २ २१ २ **वोचति**=उच्याद् वदेत् १ १०५ ४ उच्या ११२३ ३ वदति, प्र०—वचेर्लेट्यट् 'वच उम्' इत्युमागम १६ ६५

ऐ० ५ १ (यद् द्याव इन्द्र ते शतम् ऋ० ८ ७० ५) इत्यस्यामृच्युत्पन्न वैरूप साम इति ऐ० ४ १३ यद्वै रथन्तर तद् वैरूपम् ऐ० ४ १३. रथन्तरमेतत् परोक्ष यद् वैरूपम् ता० १२ २ ५ ६ बृहदेतत् परोक्ष यद् वैरूपम् ता० १२ ८ ४ वाग् वैरूपम् ता० १६ ५ १६ पशवो वै वैरूपम् ता० १४ ९ ८ दिशा वा एतत् माम यद् वैरूपम् ता० १२ ४ ७ वर्षाभिर्ऋतुनादित्या स्तोमे सप्तदशे स्तुत वैरूपेण विशौजसा तै० २ ६ १९ १-२ आदित्यास्त्वा जागतेन छन्दसा सप्तदशेन स्तोमेन वैरूपेण साम्नाऽऽरोहन्तु तानन्वारोहामि स्वाराज्याय ऐ० ८ १२]

वैलस्थानके वैलानि विलयुक्तानि स्थानानि यस्मिँस्तस्मिन् (महावैलस्थे=महागर्त्तयुक्ते स्थाने) १ १३३ ३ [वैल-स्थानपदयो समासे समासान्त कप्]

वैलस्थानम् विलानामिद वैल तदेव स्थान वैलस्थानम् १ १३३ १ [वैल स्थानपदयोः समास । वैलम्=विलप्राति० 'तस्येदम्' इत्यण्]

वैवस्वतः सूर्य का प्रकाश स० वि० १६६, ९ ११३ ६ [विवस्वन्प्राति० 'तस्येदम्' इत्यण् । विवस्वत आदित्याद् विवस्वान् विवासनवान् प्रेरितवत नि० ७ २६]

वैशन्तम् वेशन्तस्य विशतो जनस्येमम् (इन्द्र= परमैश्वर्यम्) ७ ३३ २ **वैशन्ताय**=वेशन्तेषु क्षुद्रेषु जलाशयेषु भवाय (जनाय) १६ ३७ [वेशन्तप्राति० भवार्थेऽण् । 'तस्येदम्' इत्यर्थे वा । वेशन्त=विश प्रवेशने (तुदा०) धातो 'जृविशिभ्या झच्' उ० ३ १२६ सूत्रेण झच्]

वैशन्ताभ्यः वेशन्ता अल्पजलाशयास्ता एव ताभ्य ३० १६ [वेशन्तप्राति० स्वार्थेऽण् । वेशन्त इति पूर्वपदे व्याख्यातम्]

वैश्यम् विक्षु प्रजासु भवम् (अपत्यम्) ३० ५ **वैश्यः**=यो यत्र तत्र विशति प्रविशति (तदपत्यम्) स (भा०—व्यवहारविद्याकुशलो जन) ३१ ११ [विश मनुष्यनाम निघ० २ ३ ततो भवार्थे यत् । तत स्वार्थे ऽण् । विश्प्राति० वा अपत्यार्थे यञ्-प्रत्ययश्छान्दस । वैश्यो वै पुष्यतीव कौ० २५ १५ वैश्यो वै ग्रामणी श० ५ ३ १ ६ जगतीच्छन्दा वै वैश्य तै० १ १ ९ ७ जगतो वै वैश्य ऐ० १ २८ वैश्वदेवो हि वैश्य तै० २ ७ २ २ विड् उ विश्वे देवा श० १० ४ १ ९ शरद् वै वैश्यस्यर्त्तु तै० १ १ २ ७ तस्मादु बहुपशुर्वैश्वदेवो हि जागतो (वैश्य) वर्षा ह्यस्य (वैश्यस्य) ऋतुस्तस्माद् ब्राह्मणस्य च राजन्यस्य चाद्योऽधरो हि सृष्ट ता० ६ १ १० तस्माद् वैश्यो वर्षास्वादधीत विड्ढि वर्षा श० २ १ ३ ५ तस्माद् वैशीपुत्र नाभिषिञ्चति श० १३ २ ९ ८ अथ यदि दधि वैश्याना स भक्षो वैश्यास्तेन भक्षेण जिन्विष्यसि वैश्यकल्पस्ते प्रजायामाजनिष्यते ऽन्यस्य बलिकृदन्यस्याऽऽद्यो यथाकाम ज्येयो यदा वै क्षत्रियाय पाप भवति वैश्यकल्पोऽस्य प्रजायामाजायन ईश्वरो हास्माद् द्वितीयो वा तृतीयो वा वैश्यतामभ्युपैतो स वैश्यतया जिज्यूषित ऐ० ७ २९ तस्मादपि (दीक्षितं) राजन्य वा वैश्य वा ब्राह्मण इत्येव ब्रूयाद् ब्राह्मणो हि जायते यो यज्ञाज् जायते श० ३ २ १ ४० वैश्य च शूद्र चानु रासभ श० ६ ४ ४ १२ मारुतो हि वैश्य तै० २ ७ २ २ एतद् वै वैश्यस्य समृद्ध यत् पशव ता० १८.४ ६. विड् वै यव श० १३ २ ९ ८ ऋग्भ्यो जात वैश्य वर्णमाहु तै० ३ १२ ९ २ विट् तृतीयसवनम् कौ० १६ ४ रायोवाजीय (साम) वैश्याय (कुर्यात्) ता० १३ ४ १८]

वैश्वकर्मणम् यस्माद्विश्वानि निर्वृतानि भवन्ति तत् (मन=मननशील प्रेरक कर्म्म) १३ ५५ **वैश्वकर्मणः**= विश्वान्यखिलानि कर्माणि यस्मात् स एव, भा०—सर्वरोगनिहन्ता (अग्नि=पावक) १८ ६५ विश्वानि समग्राणि कर्माणि यस्य स एव (अग्नि=गृहस्थो जन) १८ ६४ **वैश्वकर्मणाः**=विश्वकर्मदेवताका (मञ्चरा=मार्गा) २४ १७ [विश्व-कर्मन्पदयो समासात् स्वार्थे 'सास्य देवते' त्यर्थे वा ऽण्]

वैश्वदेवम् विश्वेषा देवानामिदम् (सवनम्=आरोग्यकर हवनादिकम्) १९ २६ यद्विश्वेषा देवाना विदुषामिद तत् (यन्त्रम्) ४ १८ यथा विश्वेषा देवानामिदमन्तरिक्षमधिकरण तथा ५ ३० **वैश्वदेवः**=विश्वदेवदेवताक (शिल्प पशु) २९ ५८ विश्वेषा देवानामय सम्बन्धी (विचार) १८ २० विश्वेषा देवाना दिव्याना जीवाना पदार्थाना वा य सम्बन्धी स (प्रजापति=जीव) ३९ ५ [विश्व-देवपदयो. समासे 'तस्येदम्' इत्यर्थे 'सास्य देवते' त्यर्थे वाऽण् । वैश्वदेवम् (पर्व) यद् विश्वे देवा समयजन्त तद् वैश्वदेवस्य वैश्वदेवत्वम् तै० १ ४ १० ५ प्रजापतिर्वै वैश्वदेवम् कौ० ५ १ (शस्त्रम्) पाञ्चजन्य वा एतदुक्थ यद् वैश्वदेवम् ऐ० ३ ३१ पवमानोऽस्य वा एतद् यद् वैश्वदेवम् कौ० १६ ३. पशवो वै वैश्वदेवम् कौ० १६ ३]

वैश्वदेवाग्निमारुते वैश्वदेवाग्निमरुद्व्याख्यायिके (वेदस्य द्वयवचने) १५ १४ [वैश्वदेव-अग्निमरुद्प्राति० 'तस्य व्याख्यान०' इत्यण्]

वैश्वदेवी विश्वासा देवीना विदुषीणा मध्य इय

व्यचरत् विचरति १ १०३.३ [वि+चर गतौ (भ्वा०) धातोर्लङ्]

व्यचस्वतीम् प्रशस्त व्यचो विज्ञान सत्करण विद्यते यस्यास्ताम् (स्त्रियम्) १४ १२ प्रशस्तविद्याव्यापिकाम् (सती स्त्रियम्) १५ ६४ बहु व्यचो व्यञ्चन विद्यागमन सत्करण वा विद्यते यस्यास्ताम् (विदुषी प्रजापालिका राज्ञीम्) १३ १७ **व्यचस्वतीः**=गमनाऽवकाशयुक्ता (द्वार =द्वाराणि) २८ २८ व्याप्तिमती (पतिव्रता. स्त्रिय) २ ३ ५ व्याप्तिमत्य (दिश) २० ६० शुभगुणेषु व्यापिका (जनय =जाया) २६ ३० [व्यचस्प्राति० प्रशसायामर्थे मतुबन्तान्डीप्। व्यचस्=वि+अञ्चु गति-पूजनयो (भ्वा०) धातोरसुन् औणा०। बहुलवचनात् किच्च]

व्यचस्वती सुखव्याप्तियुक्ते (अ०—विद्युदन्तरिक्षे) ११ ३० [व्यचस्वतीम् इति व्याख्यातम्। ततो द्विवचनस्य पूर्वसवर्णदीर्घ। व्यचस्वती व्यञ्चनवत्य नि० ८ १०]

व्यचस्वन्ता व्याप्नुवन्तौ (प्रजासेनाजनौ) ६ २५ ६. [व्यचस्प्राति० मतुबन्ताद् द्विवचनस्याकारादेश]

व्यच: शुभगुणव्याप्ति १५ ४ विविध जलादि-वस्त्वञ्चन्ति ता (भा०—अनेका क्रिया), प्र०—अत्र व्युपपदादचे क्विन् ततो जस् १ ३० ३ व्याप्ते १ ५२ १४ यो विविधतया सर्वं जगज्जानाति तस्य (ईश्वरस्य) ऋ० भू० १६२. [वि+अञ्चु गतिपूजनयो (भ्वा०) धातो: 'ऋत्विक्०' इति क्विन्]

व्यचिष्ठम् अतिशयेन व्याप्तम् (अग्निम्) २ १० ४ अतिशयेन विचितार प्रक्षेप्तारम् (वायुम्) ११ २३ **व्यचिष्ठे**=अतिशयेन व्याप्ते (स्वराज्ये) ५ ६६ ६ [वि+अञ्चु गतिपूजनयो (भ्वा०) धातोस्तृजन्तादतिशायन इष्ठन्। तृचो लोप। व्यचिष्ठ (यजु० ११ २३) व्यचिष्ठ-मन्नेरभस इत्यानमित्यवकाशवन्तमन्नेरन्नाद दीप्यमानमित्येतत् श० ६ ३ ३ १६]

व्यचेत् विचेतयति ४ २४ ८ [वि+चिती सज्ञाने (भ्वा०) धातोर्लङ्। 'बहुल छन्दसी' ति शपो लुक्। तत 'हल्ङ्याब्भ्य०' इति तिपो लोप]

व्यच्यमानम् विविधप्रकारेण पालनीयम् (गवादिक, वीर्यसेचक वृषभम्) १३ ४६ [वि+अञ्चु गतिपूजनयो (भ्वा०) धातो कर्मणि शानच। व्यच्यमान (यजु० १३ ४६) (उपजीव्यमान) व्यच्यमान सरिरस्य मध्यऽइतीमे वै लोका सरीरमुपजीव्यमानमेषु लोकेष्वित्येतत् श० ७ ५ २ ३४]

व्यजथ विशेषेण गच्छथ ५ ५५ ४ [वि+अज गति-क्षेपणयो (भ्वा०) धातोर्लट्]

व्यजन: विशेषेण जनयति २ १३ ७. [वि+जनी प्रादुर्भावे (दिवा०) धातोर्लङ्। व्यत्ययेन शप्, जादेशा-ऽभावश्च]

व्यजिहीत विविधतया प्राप्नोति २ २३ १८ [वि+ओहाङ् गतौ (जु०) धातोर्लङ्]

व्यञ्जते विशेषेण गच्छन्ति १ ६४ ४ [वि+अञ्जू व्यक्तिम्रक्षणकान्तिगतिषु (रुधा०) धातोर्लट्। व्यत्यये-नात्मनेपदम्]

व्यतिष्ठिप: विशेषतया सस्थापये १.५६ ५. [वि+ष्ठा गतिनिवृत्तौ (भ्वा०) धातोर्णिजन्ताल्लुङ्। 'तिष्ठतेरित्' अ० ७ ४ ५ सूत्रेणोपधाया इत्वम्]

व्यतीन् विशेषेण प्राप्तबलान् (योद्धृजनान्) १ १५५ ६ **व्यतीनाम्**=गमनकर्तॄणाम् (प्रजाजनानाम्) ४ ३२ १७ [वि+अत सातत्यगमने (भ्वा०) धातोर्बाहु० औणा० इन्]

व्यथते भय पीडा प्राप्नोति ५ ३७ ४ पीड्यते ५ ५४ ७ [व्यथ भयसञ्चलनयो (भ्वा०) धातोर्लट्]

व्यथमानाम् चलन्तीम् (पृथिवीम्) २ १२ २ [व्यथ भयसञ्चलनयो (भ्वा०) धातो शानजन्तात् स्त्रिया टाप्]

व्यथय पीडय ६ २५ २ [व्यथ भयसञ्चलनयो (भ्वा०) धातोर्णिजन्ताल्लोट्]

व्यथितात् भयात् सञ्चलनात् ५.६ [व्यथ भयसञ्चलन-यो (भ्वा०) धातो क्त। तत पञ्चमी]

व्यथिषत् व्यथते ६ १८ **व्यथेते**=स्वस्वपरिधेरित-स्ततो न चलत ३ ५४ ८ [व्यथ भयसञ्चलनयो (भ्वा०) धातोर्लेट्। अन्यत्र लट्]

व्यथि: या व्यथते सा (भूमि) ५ ५६ २ व्यथक शत्रु भा०—प्रजाभ्यो दु खप्रदो जन १३ ११. पीडा ४ ४ ३ व्यथा ६ २८ ३. [व्यथ भयसञ्चलनयो (भ्वा०) धातोरौणा० बाहु० इन्। व्यथि क्रोधनाम निघ० २ १२]

व्यदधात् विदधाति १७ ३२ विधत्तवान् ऋ० भू० ३६, ४० ८ वेदोपदेशेनोपदिष्टवान् प० वि० वेदद्वारा उपदेश करता है स० प्र० २७३, ४० ८ सिद्ध करे स० वि० १२१, अथर्व० १४ १ ५३ **व्यदधु:**=विविध-प्रकारेण धरन्ति ३ १ १० विविधसामर्थ्यकथनेनाऽदधुरर्थात् अनेकविध तस्य व्याख्यान कृतवन्त, कुर्वन्ति करिष्यन्ति च,

वोचतु=उपदिशतु ३ ५४ १९ **वोचन्**=उपदिशन्ति ४ १ १४ **वोचन्त**=उपदिशेयु ब्रुवन्ति ५ ५२ १६. **वोचम्**=उपदिशेयम्, प्र०—अत्र लिङर्थे लुङडभावञ्च १ ३२ १ उच्याम् १ १३६ ६ कथयेयम् १ ५६ ६ वच्मि २.१५.१ **वोचः**=उपदिशे ६ २ ११ ब्रूहि ६ १४ ६ प्रोक्तवान, प्र०—अत्र वचधातोर्वर्त्तमाने लुङडभावश्च १ २७ ४ उच्या, प्र०—अत्र लिङर्थे लुङ् 'छन्दस्यमाङ्योगेऽपि, इत्यडभाव ६ ३३ **वोचाम**=उपदिशेम १ १६६ १ वदेम २ ३० ७ **वोचावहै**=परस्परमुपदिशेव, प्र०—लेट्-प्रयोगोऽयम् १ २५ १७ **वोचासि**=उच्या, प्र०—अत्र लेटि मध्यमैकवचने 'वाच्छन्दसि सर्वे विधयो भवन्ति' इति उमागम २३ ५१ **वोचे**=वदेयमुपदिशेय वा ४ ५.११ वदामि ७ ३३ १ **वोचेत्**=गुणकर्मस्वभावत उपदिशेत् ३२ ६ **वोचेनम्**=ब्रूतम् १ १२० ३ **वोचेम**=उपदिशेम ७ २८ ५ वदेम ७ २६ ५ उच्याम, प्र०—अयमाशिषि लिङ्युत्तमबहुवचने प्रयोग 'लिङ्याशिष्यङ्' इत्यङि कृते 'छन्दस्युभयथा' इति सार्वधातुकमाश्रित्येयुस्कारलोपौ 'वच उम्' अ० ७ ४ २० इत्यङि उमागमश्च ३ ११ **वोचेमहि**=वदेम, प्र०—अत्राडभाव १ १६७ १० **वोचेय**=उपदिशेय ४ १ १९ कथयेयम् १ १२२ ५ **वोचेयम्**=उपदिशेयम् १ १२९ ६ **वोचेयुः**=सम्प्रीत्या सर्वा विद्या सर्वान् प्रत्युपदिश्यासु, प्र०—वचेराशिषि लिङि प्रथमस्य बहुवचने प्रयोग १ ४६ **वोचेः**=उच्या १ १६५ ३ वदे ३३ २७ ब्रूया १ १३२ ३ [ब्रूञ् व्यक्ताया वाचि (अदा०) धातोर्लुङ् । 'ब्रुवो वचि' इति वचिरादेश । 'अस्यतिवक्ति०' इत्यङ् । 'वच उम्' इत्युमागम । वच परिभाषणे (अदा०) धातोर्वा लुङ् । अन्यत्र लेट् लट् लिङ् च । वोच प्रब्रूहि नि० ८ २० वोचत् विवक्षयनीति नि० ७ ३० वोचे आह्वयामि नि० ५ ७ वोचेयम् प्रब्रवीमि नि० १० ४२ वचधातोर्लिङि तु 'लिङ्याशिष्यङ्' अ० ३ १ ८६ सूत्रेण अङ् । व्यत्ययेन चान्येषु लकारेषु अङ्]

वोचतात् उपदिशतु ५ ६१ १८ [वच परिभाषणे (अदा०) धातोर्लोट् । व्यत्ययेनात्राङ् । 'तुह्योस्तातङ्०' इति तातङ्]

वोढ्वम् स्वयवरविवाहविधिं प्राप्नुत, प्र०—अत्र 'वह प्रापणे' इत्यस्माल्लोटि मध्यमबहुवचने 'बहुल छन्दसि' इति शपो लुकि कृते 'सहिवहोरोदवर्णस्य' अ० ६ ३ ११२ इत्यनेनोकार, वर्त्तमाने च लोट् ६ १३ [वह प्रापणे (भ्वा०) धातोर्लोट् । 'बहुल छन्दसी' ति शपो लुक्]

वोढ्वे विद्याप्रापणाय १.४५ ६ वोढुम्, देशान्तरे वहनाय वा, प्र०—अत्र तुमर्थे तवेन्-प्रत्यय १ १३४ ३ वोढु प्राप्तु प्रापयितु वा ३४ १५ विमानादियानाना वाहनाय ६ ६० १२ [वह प्रापणे (भ्वा०) धातोस्तुमर्थे तवेन्]

वोढा विवाहिता (स्त्री) ६ ६४ ३ [वह प्रापणे (भ्वा०) धातो कर्त्तरि तृच्]

वोढुः वाहक याऽऽयाऽऽदे १ १४४ ३ [वह प्रापणे (भ्वा०) धातो कर्त्तरि तृच् । तत्र षष्ठी]

वोढम् वहत २४१ ६ वहतम् २० ८३ [वह प्रापणे (भ्वा०) धातोर्लुङ् । अडभावश्छान्दस]

वोढा वाहक (अनड्वान्=वृषभ) २२.२२ [वह प्रापणे (भ्वा०) धातो कर्त्तरि तृच्]

व्यकल्पयन् विशेषेण कथयन्ति ३१ १० सामर्थ्यगुणकल्पन कुर्वन्ति ऋ० भू० १२५, ३१ १० [वि+कृपू सामर्थ्ये (भ्वा०) धातोर्णिजन्ताल्लङ् सामान्यकाले]

व्यकृतः विविधतया कृन्तसि १ ६३ ४ [वि+कृती छेदने (तुदा०) धातोर्लङ् । विकरणव्यत्ययेन श]

व्यक्तम् प्रसिद्धम् (अवसान=अवकाशम्) ३५ १ **व्यक्तः**=विविधाभि पुष्टिभि प्रसिद्ध (वीर्यवान् पुरुष) १९ ८७ **व्यक्ताः**=विशेषेण प्रसिद्धा कमनीया (श्रेष्ठा मनुष्या) ७ ५६ १ [वि+अञ्जू व्यक्तिम्रक्षणकान्तिगतिषु (रुधा०) धातो क्त]

व्यक्रँस्त विविधसुखप्राप्तिहेतुना क्रमते, विविधतया क्रमते, प्र०—अत्र लडर्थे लुङ्, विविधतया गच्छति २ २५

व्यक्रामत्=विशेषेण व्याप्नोति, भा०—व्याप्य तिष्ठति ३१ ४ [वि+क्रमु पादविक्षेपे (भ्वा०) धातोर्लुङ् । व्यत्ययेनात्मनेपदम् । अन्यत्र लङ्]

व्यख्यत् विविधतया ख्यापयति, प्र०—अत्र लडर्थे लुङन्तर्गतो ण्यर्थश्च ३ ७ प्रख्याति १ ११३ ४ विख्याति १२ २१ विविधतया प्रसिद्धतया प्रकाशेत १ ४६ १० प्रकाशयति १२ ३ धर्म्यानुपदेशान् प्रकथय १२ ३३ प्रख्यापय १ १६१ १३ **व्यख्यन्**=विशेषेणोपदिशन्तु ४ १ १८ **व्यख्यम्**=विविधतयाऽन्यान् प्रति कथयेयम् १ १०९ १ **व्यख्यः**=विशेषेण प्रकाशयति ७ १३ ३ [वि+ख्या प्रकथने (अदा०) धातोर्लुङ् । 'अस्यतिवक्तिख्यातिभ्योऽङ्' इत्यङ्]

व्यचक्षयत् विविधतया दर्शयति २ २४ ३ [वि+चक्षिङ् व्यक्ताया वाचि, अय दर्शनेऽपि (अदा०) धातोर्णिजन्ताल् लङ्]

हिंसागत्योः (अदा०) धातोर्लुङ् । 'लुङि चे' ति धातोर्वधादेश.]

व्यवर्त्तयत् विशेषेण वर्त्तयति ६ ८.३. विविधतया वर्त्तमान कारयति ऋ० भू० १४१, ऋ० ४ ५ १० ३ [वि+वृतु वर्त्तने (भ्वा०) धातोर्णिजन्ताल्लङ्]

व्यवसाययात् निश्चयवत कुर्यात, प्र०—अत्र व्यवपूर्वात् 'षोऽन्त कर्मणि' इति णिजन्ताद्धातो प्रथमपुरुषैकवचने तिपि लेट्-प्रयोग ३ ५८

व्यवस्थिरन् विविधतया तिष्ठेरन्, प्र०—अत्र लिङर्थे लुङ् 'वा छन्दसि' इति झस्य रनादेश. 'छान्दसो वर्णलोपो वा' इति सिच सलोप १ ६४ ११ [वि+अव+ष्ठा गतिनिवृत्तौ (भ्वा०) धातोर्लुङ् । झस्य रन् छान्दस सिचो लोपश्च]

व्यव: विशेषेण रक्ष ५ ३१.३ विशेषतयाऽवति १ १५७ १ [वि+अव रक्षणगत्यादिषु (भ्वा०) धातोर्लङ्]

व्यवोचन्त विशिष्टतया वदन्ति ६ ३१ १. [वि+ब्रूञ् व्यक्तायां वाचि (अदा०) धातोर्लुङ् । धातोर्वचिरादेश']

व्यशाय: विशायय ६ ३३ १ [वि+शो तनूकरणे (दिवा०) धातोर्णिजन्ताल्लट्]

व्यशिश्रयु: विश्रयन्ति ७ २ ५ [वि+श्रिञ् सेवायाम् (भ्वा०) धातोर्लुङ् । 'णिश्रिद्रु०' अ० ३ १ ४८ सूत्रेण चङ्]

व्यशेम विविधतया प्राप्नुयाम, प्र०—अत्र अशूङ्धातो लिङ्याशिष्यङ्' इत्यङ् सार्वधातुकसंज्ञया 'लिङ सलोपो०' इति सकारलोप, आर्धधातुकसंज्ञया शपोऽभाव १.८६ ८ **व्यशेमहि**=प्राप्नुयाम २५ २१ विविध सुखपूर्वक प्राप्त हो आर्याभि० २ २७, २५.२१ **व्यश्नवै**=विविधतया प्राप्नुयाम्, प्र०—लेट्प्रयोगोऽयम् १६.३७. **व्यश्नुतम्**=प्राप्नुतम् ऋ० भू० २०६, ऋ० ८ ३ २८.२. **व्यश्नुहि**=विविधतया व्याप्नुहि १ ५४ ६ **व्यश्यु:**=विशेषेण प्राप्नुयु १ ७३.६. **व्यश्वैत्**=व्याप्नोति १.६२ १२. [वि+अशूङ् व्याप्तौ (स्वा०) धातोर्लिङ् । 'लिटचाशिष्यङ्' इत्यङ्-विकरण । अन्यत्र लेट् लोट् लट् च]

व्यश्नुविने=व्यापिने वीर्याय २२ ३२ [वि+अशूङ् व्याप्तौ (स्वा०) धातोर्बाहु० औणा० क्विन् । 'छन्दस्युभयथा' इति सार्वधातुकत्वात् श्नु]

व्यश्वम् विविधा विगता वा अश्वास्तुरङ्गा अस्यादयो वा यस्मिन् सैन्ये याने वा तम् १ ११२.१५ [वि-अश्वपदयो समास.]

व्यसन् विशेषेण प्रक्षिपन्ति ४ ३ ११ [वि+असु क्षेपणे (दिवा०) धातोर्लङ् । व्यत्ययेन शप् । आटोऽभावश्च]

व्यस्कभ्ना: विशेषतया प्रतिबध्नामि प्रतिबध्नाति वा ५ १६. [वि+स्कम्भु (सौत्रो धातु.) धातोर्लङ् । 'स्तम्भुस्तुम्भु०' इति श्नु]

व्यस्तभ्नात् विशेषेण स्तभ्नाति धरति ६ ८ ३ विस्तभितवान् ऋ० भू० १४१, ६ ८ ३ [वि+स्तम्भु (सौत्रो धातु) धातोर्लङ् । 'स्तम्भुस्तुम्भु०' इति श्नु]

व्यस्थात् विशेषेण तिष्ठेत् १ १० १ ७. विविधतया तिष्ठति १ ६५ ४. [वि+ष्ठा गतिनिवृत्तौ (भ्वा०) धातोर्लुङ् । गातिस्था०' इति सिचो लुक्]

व्यस्यताम् उत्क्षिपताम् १७.६४ **व्यस्यथ**=प्रचालयत ५ ५५ ६ [वि+असु क्षेपणे (दिवा०) धातोर्लोट् । व्यत्ययेनात्मनेपदम् । अन्यत्र लट्]

व्यस्यन् विविधतया प्रक्षिपन् (वैद्य) ११ ४७ [वि+असु क्षेपणे (दिवा०) धातो शतृ]

व्यहन् विशेषेण हन्ति १ १०३ २ [वि+हन् हिंसागत्यो (अदा०) धातोर्लङ्]

व्यंसम् विगता असा भुजमूलानि यस्य तम् (दुष्ट शत्रुम्) ३३ २६ छिन्नस्कन्धम् (वृत्रम्=मेघम्) ऋ० भू० २८४, १ ३२ ५ विगता असा स्कन्धा यस्य तम् (शत्रुम्) १ १०१ २ विगता असा स्कन्धवदवयवा यस्य तम् (शत्रुम्) १ ३२ ५. **व्यंस:**=विप्रकृष्टा असा बलादयो यस्य स (राजविरोधिजन) ४ १८ ६ [वि-असपदयो समास । अस = अम गत्यादिषु (भ्वा०) धातो 'अमे सन्' उ० ५ २१ सूत्रेण सन्]

व्याकरोत् व्याकरोति १६ ७७. भिन्न-भिन्न निश्चित करता है स० वि० १८७, १६.७७ [वि—आङ्+डुकृञ् करणे (तना०) धातोर्लङ्]

व्याघ्रम् यो विशेषेणाऽऽजिघ्रति तम् (पशुविशेषम्) १६ १० सिहम् २१ ३६ **व्याघ्र:**=यो विविधान् समन्ताज्जिघ्रति स (जन्तु) १४.६ [वि+आङ्+घ्रा गन्धोपादाने (भ्वा०) धातो. कर्त्तरि 'जिघ्रते सज्ञाया प्रतिषेधो वक्तव्य ' अ० ३ १ १३७ वा०सूत्रेण शस्य निषेधात् 'आतश्चोपसर्गे' इति क । व्याघ्र इति पूजायाम् नि० ३ १८. क्षत्र वा एतदारण्यानां पशूना यद् व्याघ्र ऐ० ८ ६ ऊवध्यादेवास्य मन्युरस्रवत् स व्याघ्रोऽभवदारण्याना पशूना राजा श० १२ ७ १ ८ व्याघ्रो व्याघ्राणाद् व्यादाय हन्तीति वा नि० ३ १८ पुरो व्याघ्रो जायते पश्चात् सिंह काठ०

ऋ० भू० १२५, ३१.१०. [वि+डुधाञ् धारणपोषणयो (जु०) धातोर्लङ्]

व्यदन्ति विविधतया विच्छिद्य भक्षयन्ति १ १०५ ८. [वि+अद भक्षणे (अदा०) धातोर्लट्]

व्यदर्दः पुन पुनर्भृश विदारयति २.२४ २ [वि+दृ विदारणे (क्र्या०) धातोर्यङ्लुगन्ताल्लङ्]

व्यदर्शि विविधतया दृश्यताम् १.४६.११ [वि+दृशिर् प्रेक्षणे (भ्वा०) धातो कर्मणि लुङ]

व्यदृश्रम् विशेषेण पश्येयम्, प्र०—अत्र लिङर्थे लुङ् ८ ४० [वि+दृशिर् प्रेक्षणे (भ्वा०) धातोर्लुङ् । 'इरितो वा' इति च्लेरङ् । 'बहुल छन्दसि' अ० ७ १ ८ सूत्रेण रुडागम । 'ऋदृशोऽङि' इति प्राप्तो गुणोऽपि छान्दसत्वादेव न भवति]

व्यद्यौत् विविधतया प्रकाशते ३ १ १८ प्रकाशयति ६ ५१ १ विद्योतयति १२ १ [वि+द्युत दीप्तौ (भ्वा०) धातोर्लुङ् । छान्दसत्वात् च्लेर्लुक्]

व्यधमत् विशेषेण धमति निराकरोति ४ ५०.४. [वि+धमति गतिकर्मा निघ० २ १४ वधकर्मा निघ० २ १९ ततो लङ्]

व्यध्वनः विरुद्धोऽध्वा यस्य सः (अग्ने रज =कण) १ १४१ ७ [वि+अध्वन्पदयो समास]

व्यनक् विशेषेण प्रकटीकरोति २ १५ ७ [वि+अञ्जू व्यक्तिम्रक्षणकान्तिगतिषु (रुधा०) धातोर्लङ् । आडागमस्तु न छन्दसि]

व्यनतः प्राप्नुवन्त्य (जनय =जाया) ४ ५ ५ [वि+अनिति गतिकर्मा निघ० २ १४ तत शतृ]

व्यनिनस्य=यत्प्रशस्त प्राणनिमित्त तस्य (विद्वज्जनस्य) १ १५० २ [वि+अन प्राणने (अदा०) धातोर्बाहु० औणा० इनच्]

व्यनुधिरे विशेषतयाऽनुदधिरे दधति, प्र०—अत्र छान्दसोऽभ्यासस्य लुक् १ १६६ १० [वि+अनु+डुधाञ् धारणपोषणयो (जु०) धातोर्लिट् । अभ्यासलोपश्छान्दस]

व्यन्तः वेदविद्यासु व्याप्नुवन्त. (ग्रहा =गृहाश्रमिण) ६ ४ व्याप्तविद्या क्रिया (विद्वज्जना) ६ १४ कामयमाना (प्रजाजना) १ १२७ ५ प्राप्नुवन्त (राजादिजना) ७ २७ ५ [वी गतिव्याप्त्यादिषु (अदा०) धातो शत्रन्ताज्जस् । व्यन्त इत्येषोऽनेककर्मा । 'पद देवस्य नमसा व्यन्त' इति पश्यतिकर्मा । 'वीहि शूर पुरोडाशम्' इति खादतिकर्मा नि० ४ १९]

व्यन्ता विविधवलोपेतौ (अध्यापकोपदेशकौ) १ १२२ ४ [वि गतिव्याप्त्यादिषु (अदा०) धातो शतृ । द्विवचनस्याकार]

व्यन्ति प्राप्नुवन्ति ५ २३ ३ कामयन्ताम्, प्र०—'वाच्छन्दसि सर्वे विधयो भवन्ति' इतीयङभावे यणादेश, लेट्प्रयोगोऽयम् १ १०५ ७ **व्यन्तु**=कामयन्ताम् ५ ४६ ८ व्याप्नुवन्तु प्राप्नुवन्तु वा ७ ५७ ६ व्यन्ति प्राप्नुवन्ति, अ०—गच्छन्ति, प्र०—अत्र लडर्थे लोट् २ १६ [वी गतिव्याप्तिप्रजनकान्त्यादिषु (अदा०) धातोर्लट् । लेट् वा । अन्यत्र लोट्]

व्यपिबत् गृह्णीयात् १९ ७८ विशेषेण पिबेत् १९ ७९ **व्यपिबः**=विविधतया पिब १० ३४ [वी+पा पाने (भ्वा०) धातोर्लङ् । शिति पिबादेश]

व्यप्रथयः विविधतया प्रथय १ ६२ ५ **व्यप्रथिष्ट**=विप्रथताम् २ ११ ७ [वि+प्रथ प्रख्याने (चुरा०) धातोर्लङ् । अथवा प्रथ प्रख्याने (भ्वा०) धातोर्णिजन्ताल्लङ् अन्यत्र लुङ्]

व्यब्रवीत् विशेषेणोपदिशति १ १४५ ५ [वि+ब्रूञ् व्यक्तायां वाचि (अदा०) धातोर्लङ् । 'ब्रुव ईट्' इतीडागम]

व्यमिमीत विशेषेण निर्मिमीते ६ ७ ७ विरचयति ६ ८.२ [वि+माङ् माने शब्दे च (जु०) धातोर्लङ्]

व्ययन्ताम् विशिष्टतया प्राप्नुवन्तु जानन्तु वा ६ ६ **व्ययस्व**=धरस्व ११ ४० व्यय कुरु ३ ५३ १९ [वि+अय गत्यर्थे (भ्वा०) धातोर्लोट्]

व्ययातम् प्राप्नुयातम् १ ११६ २० [वि+या प्रापणे (अदा०) धातोर्लङ्]

व्ययेयम् व्यय कुर्याम् २ २९ ६. [व्यय गतौ (भ्वा०) धातोर्लिङ्]

व्ययामसि प्राप्ता स्म १७ ४ सवृणोमि १७ ५ [व्यय गतौ (भ्वा०) धातोर्लट् । 'इदन्तो मसि' इति मस इदन्तत्वम्]

व्यरुजः विशेषतयाऽऽमर्दय १ ५६ ६ [वि+रुजो भङ्गे (तुदा०) धातोर्लङ्]

व्यर्दय विशेषेण नाशय २ २३ १४ **व्यर्दयत्**=विशेषतयाऽर्दयति नाशयति ३४ ७ [वि+अर्द हिंसायाम् (चुरा०) धातोर्लोट् । अन्यत्र लङ् । आटोऽभाव । अथवा वि+अर्द गतौ याचने च (भ्वा०) धातोर्णिजन्ताल्लोट्]

व्यवधीः विशिष्टतया हसि १ १०३ ८ [वि+हन

कुरु १ ११३ १६ विविधतया विवस १ ४८ १ **व्युच्छति**=विवासयति १ ६२.१४ **व्युच्छन्ति**=दुःख विवासयन्ति १ ११३ १८ **व्युच्छसि**=विविधप्रकारेण विवसमि १ ४६ १ **व्युच्छात्**=प्राप्नुयात् १ १२४ ११ विवसेत् १ ११३ १३ **व्युच्छान्**=निवसेयु ७ १८ २१ निवासयेयु ४ ५५ २ **व्यौच्छः**=विवासयति ५.७६ २ निवासितवती वर्त्तते ५ ७६ ३ [वि+उच्छी विवासे (भ्वा०) धातोर्लोट् अन्यत्र लट् लेट् लड् च]

व्युच्छन्ती निवास कुर्वन्ती (उपा) १.४८ ६ विविधानि तमांसि विवासयन्ती (उपा) १ ११३ ७. तमो नाशयन्ती (उपा) विविधतया वासयन्ती (उपा) १ ४६ ४ **व्युच्छन्तीम्**=निद्रा विवासयन्तीम् (उपसम्) १ ११३ ११ [वि+उच्छी विवासे (भ्वा०) धातो शत्रन्तात् ङीप्]

व्युच्छान् व्युच्छन्ति तान् (पदार्थान्) १.११३ १० विवासितान् (देवान्=विद्वज्जनान्) ७ ३० ३ [वि+उच्छी विवासे (भ्वा०) धातो कर्त्तरि मूलविभुजादित्वात् क]

व्युतम् विविधतयोत विस्तृत वस्त्रम् १ १२२ २ **व्युते**=विगताऽऽवरणे प्रसिद्धे (पथि=मार्गे) ३ ५४ ६ [वि-उतपदयो समास । उतम्=वेञ् तन्तुसन्ताने (भ्वा०) धातो क्त । यजादित्वात् किति सम्प्रसारणम्]

व्युद्यते विशेषेण क्लिद्यते १ १६४ ४७ [वि+उन्दी क्लेदने (रुधा०) धातो कर्मणि लट्]

व्युनत्ति विशेषेण क्लेदयति ५ ८५ ३ **व्युन्दन्ति**=विशिष्टतया क्लेदन्ति १ ८५ ५ **व्युन्धि**=विशेषेणोन्दयति क्लेदयति ५ ८३ ८ [वि+उन्दी क्लेदने (रुधा०) धातोर्लट् । अन्यत्र लोडपि]

व्युनोति विशेषेण प्रेरयति ५ ३१ १

व्युन्दनम् विविधानामोषध्यादीनामुन्दन क्लेदन येन तत् (यज्ञ-काण्डम्) २ २ [वि+उन्दी क्लेदने (रुधा०) धातोर्ल्युट्]

व्युप्तकेशाय विशेषतयोप्ताश्छेदिता केशा येन तस्मै सन्यासिने १६ २६ [व्युप्त-केशपदयो समास । व्युप्त=वि+डुवप् बीजसन्ताने (भ्वा०) धातो क्त । यजादित्वात् सम्प्रसारणम् । अथ छेदनेऽपि दृश्यते केशान् वपतीति]

व्युप्रथते विस्तृणोति १ १२४ ५ [वि+उ+प्रथ प्रख्याने (भ्वा०) धातोर्लट् । उ इति वितर्के]

व्यूर्णोति निष्पादयति १ १०५ १५ [वि+ऊर्णुञ् आच्छादने (अदा०) धातोर्लट्]

व्युषि सेवसे ५.३ ८. **व्यूषुः**=विवसन्ति ३ ५५.१ [व्युष विभागे (दिवा०) धातोर्लटि शपो लुकि सिप सलोपे च रूपम् । अन्यत्र वि+वस निवासे (भ्वा०) धातोर्लिट्]

व्युषि विशिष्टे विवासे ५ ४५ ८ विशेषेण दाहे ६ ६२ १ [व्युष दाहे (दिवा०) धातो. सम्पदादित्वात् क्विप्]

व्युष्टिषु विविधा उष्टय कामनाश्च तासु १ ४४ ३ विशिष्टासु कामनास्वव्योषितासु सतीषु १ ४४ ४ कामनासु १ ४४ ८ विविधासु सेवासु ४ ४५ २ विविधासु वसतिषु १ १७१ ५. विशेषेण दहन्ति यासु क्रियासु तासु ३ २० १ प्रतापेषु २ ३४ १२ **व्युष्टौ**=विविधरूपाया सेवायाम् ४ ३६ ३ विशेषेणोप्यन्ते दह्यन्ते यया कान्त्या तस्याम् १ ४८ ६ विशेषदीप्तौ ४ २३ ५ विशेषेण दाहे ४ १ ५ विशिष्टप्रतापे ४ १४४ विशिष्टे निवासे १ १२४ १२ प्रभातवेलायाम् ५ ३० १३ विविधैर्गुणै सेवमानायामुषसि ६ ४४ ६ विशेषेण काममाने समये १ ११८ १ **व्युष्ट्यै**=प्रदीप्तायै दाहक्रियायै २२ ३४ [वि-उष्टिपदयो समास । उष्टि=वश कान्तौ (अदा०) धातो स्त्रियां क्तिन् । ग्रहिज्यादिना सम्प्रसारणम् । अथवा वि+वस निवासे (भ्वा०) धातो क्तिन् । यजादित्वात् सम्प्रसारणम् । अथवा व्युष दाहे (दिवा०) धातोर्वा क्तिन् । व्युष विभागे (दिवा०) धातोर्वा क्तिन् । व्युष्टिर्वै दिवा, व्येवास्मै वासयति ता० ८ १ १३ व्युष्टिर्वा एष द्विरात्रो व्यवास्मै (यजमानाय) वासयति ता० १८ ११ ११ अहर्व्युष्टि तै० ३ ८.१६ ४ रात्रिर्वै व्युष्टि श० १३ २ १ ६]

व्यूर्णुते आच्छादयति ६ ५० ८. **व्यूर्णुषे**=स्वव्याप्त्याऽऽच्छादयसि ४ ५४ २ विस्तारयसि ३३ ५४ **व्यौर्णोत्**=विशेषेण स्वीकरोति १ ६८ ५ विविधतयोर्णुत आच्छादयति १७ १८ [वि+ऊर्णुञ् आच्छादने (अदा०) धातोर्लट् । अन्यत्र लड्]

व्यूर्ण्वती विविधान् पदार्थानाच्छादयन्ती (उपा) १ ६२ ११ विशेषेणाऽऽच्छादयन्ती (योषा) ५ ८० ६ [वि+ऊर्णुञ् आच्छादने (अदा०) धातो शत्रन्तात् ङीप्]

व्यृण्वति विशिष्टतया कर्माणि साध्नोति १ ५८ ३ [वि+ऋण्वति गतिकर्मा (निघ० २ १४) धातोर्लट्]

व्यृण्वन् विशेषेण हिंसन्ति १ ६६ ५ [वि+ऋणोति गतिकर्मा (निघ० २ १४) धातो शतृ]

२० १० व्याघ्रे णारण्यान् पशून् (अन्वाभवत्) काठ० ४३ ४]

व्याघ्रलोम व्याघ्रस्य लोम व्याघ्रलोम १९ ९२ [व्याघ्र-लोमन्नुपदयो समास]

व्याजानन् विशेषेणाऽभितो जानन्ति १ ७२ ८ [वि+ज्ञा अववोधने (क्र्या०) धातोर्लङ्]

व्यातिरत् उल्लङ्घयतु ३ ३४ १ [वि+आङ्+तॄ प्लवनसतरणयो (भ्वा०) धातोर्लङ् । व्यत्ययेन श]

व्यात्तम् विकासित मुखमिव, प्र०—अत्र वि आङ्-पूर्वकाद् डुदाञ्धातो त ३१ २२ विकाशितम् (मुखम्) ऋ० भू० १३४, ३१ २२ [वि+आङ्+डुदाञ् दाने (जु०) धातो क्त । 'अच उपसर्गात्त' इति तादेश]

व्याद्रवत् व्याधावन् (अग्नि =पावक इव विपश्चिज्जन) ७ १० २ [वि+आङ्+द्रु गतौ (भ्वा०) धातोर्लङ्]

व्याधिने रोगिणे (जनाय) १६ १८ [व्याधप्राति० सम्वन्धे (मत्वर्थे) इनि: । व्याध =वि+आङ्+डुधाञ् धारणपोषणयो (जु०) धातो 'आतश्चोपसर्गे' इति क]

व्यानञ्रे विशेषेणाऽजन्तुशत्रून् प्रक्षिपन्तु, प्र०—अत्र व्यत्ययेनाऽऽत्मनेपदम् १ ८७ १ [वि+अज गतिक्षेपणयो (भ्वा०) धातोर्लिट् । व्यत्ययेनात्मनेपदम् । 'इरयो रे' इति रे-आदेश]

व्यानट् व्याप्तोऽस्ति १२ १० २ विशेषेणाऽश्नोति व्याप्नोति ७ २८ २ [वि+अशूङ् व्याप्तौ (स्वा०) धातोर्लङ् । 'वहुल छन्दसी' ति विकरणलुक् । 'अश्नोतेश्चे' ति नुट् छान्दसत्वादनभ्यासादपि]

व्यानदा. या व्याप्तिविज्ञान ददति (हेतय =शस्त्रास्त्रोन्नतय १७ १५ [व्यानोपपदे डुदाञ् दाने (जु०) धातो क । ततष्टाप्]

व्यानम् यो विविवेपु शरीरसन्धिष्वनिति तम् (वायुम्) १४ ८ विविधमनन्ति येन तम् (प्राणम्) १९ ९० **व्यान:**=सर्वसन्धिपु व्याप्तश्चेष्टानिमित्त (वायु) २२ ३३ **व्यानाय**=विविधोत्तमव्यवहाराय १३ १९ विविधविद्याव्याप्तये १५ ६४ यो विविधेष्वङ्गेपु अनिति व्याप्नोति तस्मै (वायवे) २२ २३ व्यानिति सर्वान् शुभगुणकर्मस्वभावान् येन तस्मै (वायवे) १३ २४. विविधमन्यते व्याप्यते येन तस्मै सर्वेपा शुभगुणाना कर्मविद्याऽङ्गाना च व्याप्तिहेतवे (वायवे) १.२० सर्वशरीरगतवायवे ७ २७ विविधमानयति यस्मा इव (वायवे) ७ ३ **व्याना:**=चेष्टानिमित्ता. सर्वशरीरस्था वायव १७ ७१ [वि+अन प्राणने (अदा०) धातो 'हलश्चे' ति घञ् । व्यानो ह्युपाशुमवनोऽन्तरिक्ष ह्येव व्यनन्नभिव्यनिति श० ४ १ २ २७ (यज्ञस्य) व्यान उपाशु सवन: श० ४ १ १ १ व्यानो वरुण श० १२ ९ १.१६ व्यान प्रतिहर्त्ता कौ० १७ ७ गो० उ० ५.४ व्यानो वृहती ता० ७ ३ ८ आपो व्यान जै० उ० ४ २२ ९ (प्रजापति) व्यानादमु (द्यु-लोकम्) (प्रावृहत्) कौ० ६ १० (त सज्ञप्त पशुम्) दक्षिणा दिग्व्यानेत्यनुप्राणाद्व्यानमेवास्मिंस्तदधात् श० ११ ८ ३ ६ द्विर्ऋतुनेति (यजन्ति) उपरिष्टाद् व्यानमेव तद् यजमाने दधति कौ० १३ १९ निश्रीडित इव ह्यय व्यान प० २ २ व्यान शस्या (ऋक्) श० १४ ९ १ १२ व्यानस्त्रिष्टुप् मै० ३ ४ ४]

व्यानशि: व्याप्त (भग =ऐश्वर्ययोग) ३ ४९ ३ [वि+अशूङ् व्याप्तौ (स्वा०) धातो 'किकिनावुत्सर्गश्छन्दसि०' इति किर्लिड्वच्च । व्यानशि वहुनाम निघ० ३ १]

व्याप्रा: व्याप्नोति ४ १४ २ [वि+आङ्+प्रा पूरणे (अदा०) धातोर्लुङ् । 'मन्त्रे घसह्वर०' इति लेर्लुक्]

व्याभ्राजन्ते विशेषेण समन्तात् प्रकाशन्ते १ ८५.४ [वि+आङ्+भ्राजृ दीप्तौ (भ्वा०) धातोर्लट्]

व्याममे विशेषतया सर्वतो मिमीते १ ५८ १ [वि+आङ्+माङ् माने (जु०) धातोर्लिट्]

व्यार विशेषतया गच्छति ३ ३० १० [वि+ऋ गतिप्रापणयो (भ्वा०) धातोर्लिट्]

व्याव: विरक्ष ४ ५२ ६ विविधतया वृणोति १ ९२ ४ अभितो वृणोपि ,१ ६३ ५ विविध नियमो से पृथक् पृथक् यथायोग्य वर्त्ता रहे हो आर्याभि० २ २८, १३ ३ [वि+अव रक्षणगत्यादिपु (भ्वा०) धातोर्लङ् । अन्यत्र वि+वृञ् वरणे (स्वा०) धातोर्लुङ् । 'मन्त्रे घसह्वर०' अ० २ ४ ८० सूत्रेण लेर्लुक्]

व्याश व्यश्नाति ३ ३६ ८. [वि+अश भोजने (क्र्या०) धातोर्लिट्]

व्यास्यत् व्यसेच्छिन्द्यात् ४ ३० २० [वि+असु क्षेपणे (दिवा०) धातोर्लङ्]

व्याहृतायाम् उपदिष्टाया सत्याम् (वाचि=वेदवाण्याम्) ८ ५४ [वि+आङ्+हृञ् हरणे (भ्वा०)+क्त +स्त्रिया टाप्]

व्युच्छ दु खानि विवासय १ ११३ ७. सुखे स्थिरी-

वा पालक (अग्ने=स्वप्रकाशस्वरूपेश्वर), प्र०—व्रतमिति कर्म्मनाम निघ० २ १, २०.२४ व्रताना वेदादिविद्याना पालयित पालननिमित्तो वा (अग्ने=परब्रह्मन् विद्युद्वा) ५.६ नियमपालकेश्वर स० वि० १८६, २० २४ [व्रत-पतिपदयो समास.। व्रतमिति कर्मनाम निघ० २ १ अग्निर्वै देवाना व्रतपति गो० उ० १ १४]

व्रतनी: व्रत स्वकीयभ्रमणादिसत्यनियम प्रापयन्ती (गौ=पृथिवीगोल) ऋ० भू० १३८, ऋ० ८ २ १० १ [व्रतोपपदे णीञ् प्रापणे (भ्वा०) धातो क्विप्]

व्रतपा: यो व्रतानि कर्माणि रक्षति स (सूर्यरूप) ६ ८ २ सत्यनियमरक्षक (नर) १ ८३ ५ यो व्रत सत्य धर्माचरणनियम पाति रक्षतीति (ईश्वरोऽग्निर्वा) ४ १६ व्रतानि सत्यभाषणादीनि पाति यस्माद्यया वा, व्रतानि सुशीलादीनि पाति येन यया वा स (अग्नि=ईश्वरो-ऽध्यापको विद्युद्वा) ५ ६ यथा सत्यपालको विद्वास्तथा तत्सम्बुद्धौ (अग्ने=विज्ञानोन्नतविद्वन्) ५ ४० सुशील-रक्षका (विद्वज्जना) ३ ४ ७ सत्यनियमरक्षका (विद्वास) १.८३ ५ सत्याचाररक्षका (विद्वासो जना) ३ ७ ८ [व्रतोपपदे पा रक्षणे (अदा०) धातो क्विप्]

व्रतम् नियमपूर्वक धर्म्यानुचरणम् ४ ११ सत्यलक्षणम् २ २८ सत्यमान, सत्यभाषण, सत्यकरणञ्च १ ५ क्षमा न्यायप्रकाश वा कर्म्म ३ ५६ ३ सत्याचरणनियमपालनम् १८ २३ सत्यधर्मम् ऋ० भू० ६६, १ ५ सत्याचरणशीलम् १ १४४ १ सुशील सुशीलता वा १ १३६ ५ कर्म शील वा ५ ६६ १ शील नियम वा २ ३८ ३ सामर्थ्य शील वा १ १० १ ३ तत्तद्धर्म्यनियमम् १ ३१ २ ब्रह्मचर्य, गृहस्थ, वानप्रस्थ, सन्यासादि सत्याचार को आ० २ ४७, १ ५ ब्रह्मचर्यादि आश्रमो के धारण को स० वि० १८६, २० २४ **व्रतानि**=सत्यपालनादीनि कर्म्माणि १ ६१ ३ नियतधर्म-युक्तानि कर्म्माणि गुणस्वभावाश्च १ २२ ६. वर्त्तमानानि सत्यानि वस्तूनि कर्माणि वा १ १२४ २ ब्रह्मचर्यादीनि ५ ६ नियमानुगतानि धर्म्याणि कर्माणि १ ८४ १२ [व्रतम् इति कर्मनाम निघ० २ १ व्रत कर्मनाम वृणोतीति सत नि० २ १३ इदमपीतरद् व्रतमेतस्मादेव निवृत्तिकर्म वारयतीति सत । अन्नमपि व्रतमुच्यते यदावृणोति शरीरम् नि० २ १३ अन्न वै व्रतम् श० ७ ५ १ २५ ता० २२ ४ ५ अन्न व्रतम् ता० २३ २७ २ अन्न हि व्रतम् श० ६ ६ ४ ५ तदु हापाढ सावयसो ऽनशनमेव व्रत मेने श० १ १ १ ७ एतत् खलु वै व्रतस्य रूप यत् सत्यम् श० १२ ८ २ ४ सवत्सरो वै व्रत तस्य वसन्त ऋतुर्मुख ग्रीष्मश्च वर्पाश्च पक्षौ शरन्मध्य हेमन्त पुच्छम् ता० २१ १५ २ वीर्यं वै व्रतम् श० १३ ४ १ १५ अमानुप इव वाऽएतद् भवति यद् व्रतमुपैति श० १ ६.३ २३ न ह वा ऽअव्रतस्य देवा हविरश्नन्ति ऐ० ७ ११. कौ० ३ १. श्रीर्वै व्रतम् जै० २.४१४ एतत् खलु वै व्रतस्य रूप यत् सत्यम् श० १२ ८ २ ४ सवत्सर हि व्रत नाति तै० स० २ ५ ४ ४]

व्रता शरीरात्म-मनोजानि धर्म्याणि कर्म्माणि २ २७ ८ गुण-कर्म-शीलानि २.३८ ७ विद्या-धर्मानुष्ठान-शीलानि १.७० १ [व्रतप्राति० शेर्लोपश्छन्दसि । व्रतमिति व्याख्यातम्]

व्रतेभि· सत्कर्म्मभि ७.३५ ६ [व्रतप्राति० 'बहुल छन्दसी' ति सूत्रेण भिस ऐसादेशो न भवति]

व्रतेव कर्म्माणीव ५ ६६ २ [व्रता-इवपदयो समास]

व्रन् वृण्वन्ति ४ ५५ ६ वृणुयु ४ २.१६. अपवृणोति ४ ५ ८ [वृञ् वरणे (स्वा०) धातोर्लङ् । अटोऽभाव । 'बहुल छन्दसी' ति विकरणलुक्]

व्रन्दिन: निन्दिता व्रन्दा सन्ति येपा तान् दुष्टान् १ ५४ ५ निन्दिता व्रन्दा मनुष्यादिसमूहा विद्यन्ते येषा तान् (मायिन=शत्रून्) १ ५४ ४ [व्रन्दप्राति० निन्दाया मत्वर्थ इनि । व्रन्दी व्रन्दतेर्मृदुभावकर्मण नि० ५ १५]

व्रय: वर्जनीया (दुर्जना), प्र०—व्रय 'बहुलमेतन्नि-दर्शनम्' इति व्रीधातुर्ग्राह्य २ २३ १६ [व्री वर्जने 'बहुल-मेतन्निदर्शनम्' इत्यपठितोऽपि धातु । तत 'एरच्' इत्यच्]

व्राणा: आवृता (जलानि) १.६१ १० [वृञ् आवरणे (चुरा०) धातो क्तप्रत्यये पृषोदरादिना रूपम्]

व्रातपतिभ्य. मनुष्याणा पालकेभ्य (राजपुरुषेभ्य) १६ २५. [व्रात-पतिपदयो समास । व्राता मनुष्यनाम निघ० २ ३]

व्रातम् व्रताना सत्यभाषणादीना समूहस्तत् ३ ५५ [व्रतप्राति० 'तस्य समूह' इति समूहार्थेऽण्]

व्रातं व्रातम् वर्त्तमान वर्त्तमानम् (गण गण=समूह समूहम्) ३ २६ ६ [व्राता मनुष्यनाम निघ० २ ३]

व्रातसाहा: ये व्रातान् शत्रुसमूहान् सहन्ते ते (राज-पुरुपा) ६ ७५ ६ ये व्रातान् वीराणा समूहान् सहन्ते ते (पितर=पालनक्षमा राजपुरुषा) २६ ४६ [व्रातोपपदे षह मर्षणे (भ्वा०) धातो 'कर्मण्यण्' इत्यण् । व्राता मनुष्यनाम निघ० २ ३],

व्यृद्ध्यै विगता चाऽसौ ऋद्धिश्च व्यृद्धिस्तस्यै ३० १७ [वि ऋद्धिपदयो समास]

व्येति निस्सरति ३२ ८ **व्येतु**=व्याप्नोतु ऋ० भू० १५७ **व्येषि**=विशेषेण प्राप्तोऽसि १ ५० ७ [वि+इण् गतौ (अदा०) धातोर्लट् । अन्यत्र लोडपि]

व्येनसा विनष्टपापाचरणेन ३ ३३ १३. [वि-एनस्-पदयो समास]

व्येनी या विशिष्टा मृगीवद् वेगवती (उषा) ५ ८० ४ [वि-एनीपदयो समास । एनी=एतप्राति० 'वर्णादनुदात्तात्०' अ० ४ १ ३९ सूत्रेण ङीप् । तकारस्य च नकारादेश]

व्यैताम् विविधतया प्राप्नुत १४ ३० [वि+इण् गतौ (अदा०) धातोर्लङ्]

व्यैरत् विशिष्टतयैरयति २ १९ ६ **व्यैरम्**=प्रेरयेयम् ४ २६ ३ [वि+ईर गतौ कम्पने च (अदा०) धातोर्लङ् । वचनव्यत्यय]

व्यैरयत् विविधतया वीरयत्, वीरयत्यूर्ध्वमधोगमयति प्र०—अत्र लडर्थे लङ् १ ७ ३ विशेषेण प्रेरयति २ २० ७ विशिष्टतया गमयति १ ५१ ११ [वि+ईर गतौ कम्पने च (अदा०) धातोर्णिजन्ताल्लङ्]

व्योम स्थानम् २३ ६२ व्यापकमवकाशम् १ १६४ ३४ आकाशरूप स्थानम् २३ ६१ अवकाश १ १६४ ३५ **व्योमनः**=आकाशस्य १ ५२ १२ **व्योमनि**=व्योमेव प्रकाशिते व्यापके परमात्मनि ५ ६३ १ व्योमवद् व्यापके सर्वरक्षणादिगुणान्विते ब्रह्मणि १ १४३ २ [व्ययति सत्वृणोतीति विग्रहे व्यय गतौ (भ्वा०) धातो 'नामन्सीमन्व्योमन्०' उ० ४ १५१ सूत्रेण मनिन् निपातनाच्च रूपसिद्धि । व्योम अन्तरिक्षनाम निघ० १ ३ व्योमन् व्यवने नि० ११ ४० व्योम दिङ्नाम निघ० १ ६ उदकनाम निघ० १ १२ इमे वै लाका परम व्योम श० ७.५ २ १८ एष उ ह वै व्योमा ये ऽत्रीश्च प्रजापतेर् देवा जै० २ ८८]

व्योमन् व्योम्नि व्यापके परमेश्वरे १ १६४ ३९ व्योमवद् व्याप्तेऽक्षुव्वे (परमेश्वरे) १ १६४ ४१ बुद्ध्यवकाशे १९ ७ व्याप्तेऽन्तरिक्षे १३ ४९ [व्योमन् पूर्वपदे व्याख्यातम् । तत सप्तम्या 'सुपा सुलुक्०' इति लुक्]

व्योमसत् यो व्योमनि सीदति स (परमेश्वर) १० २४ यो व्योमवद् व्यापके परमेश्वरे सीदति स (जीव) १२ १४ **व्योमसदम्**=विमानैर्व्योमनि गच्छन्तम् (इन्द्र=सम्राजम्) ९ २ [व्योमन् इत्युपपदे षद्लृ विशरण-गत्यवसादनेषु (भ्वा०) धातो क्विप् । व्योमसद् एष (सूर्य) वै व्योमसद् व्योम वा एतत् सद्मना यस्मिन्नेष आसन्नस्तपति ऐ० ४ २०]

व्योमा व्योमवद् विस्तृत (भान्त=प्रकाश) १४ २३ [व्योमन् इति व्याख्यातम् । व्योमा (यजु० १४ २३) व्योमा हि सवत्सर श० ८ ४ १ ११ प्रजापतिर्वै व्योमा श० ८.४ १ ११]

व्रजनम् गमनम् ७ ३ २ [व्रज गतौ (भ्वा०) धातोर् भावे ल्युट्]

व्रजन्तीः गच्छन्ती (आप=प्राणा) ३ ५६ ४ [व्रज गतौ (भ्वा०) धातो शत्रन्तान् ङीप्]

व्रजम् व्रजन्ति जानन्ति जना येन त सत्सङ्गम्, व्रजन्ति विद्वासो यस्मिन् सन्मार्गे तम् १ २६ व्रजन्ति गच्छन्ति प्राप्नुवन्त्यापो यस्माद् यस्मिन् वा त व्रज मेघम् १ २५ निवासस्थानम् १ ६२ ४ गोस्थानम् १२ ८४ व्रजन्ति यस्मिस्तम् (गोष्ठम्) ६ ४५ २४ यो व्रजति तम् (अद्रि=मेघम्) ४ १ १५ प्राप्त देशम् १ १५६ ४ ज्ञातव्यम् (जनम्) १ १३२ ४ अधर्ममार्गम् १ १३२ ४ समूह ज्ञान वा १ १० ७ गोष्ठानम् २ ३८ ८ शस्त्राऽस्त्रम् ४ २० ८ **व्रजस्य**=व्रजितु गन्तु योग्यस्य (गव्यस्य) १ १३१ ३ व्रजन्ति घना यस्मिँस्तस्य मेघस्य ६ १० ३ **व्रजः**=यो व्रजति गच्छति स (इन्द्र=विद्वज्जन) ३ ३० १० **व्रजे**=गवा स्थित्यधिकरणे ५ ३४ ५ [व्रज गतौ (भ्वा०) धातो 'गोचरसचर०' अ० ३ ३ ११९ सूत्रेण करणाधिकरणयोर्घ । व्रज मेघनाम निघ० १ १० व्रज=व्रजत्यन्तरिक्षे नि० ६ २]

व्रजश्रितः व्रजान् गवादिस्थित्यर्थान् देशान् श्रियन्ति निवासयन्ति ते (राजपुरुषा) १० ४ [व्रजोपपदे श्रिञ् सेवायाम् (भ्वा०) धातो क्त]

व्रजा वेगान् ५ ६ ७ [व्रज गतौ (भ्वा०) धातो-र्घञर्थे क । तत 'सुपा सुलुक्०' इति शस आकारादेश]

व्रजिनीः वर्जनक्रिया ५ ४५ १ [व्रज गतौ (भ्वा०) धातोर्बाहु० औणा० इनि तत स्त्रिया ङीप्]

व्रजेव व्रजन्ति यया गत्या तद्वत् ५ ६४ १ [व्रजा-इव-पदयो समास]

व्रतपते व्रत नियत यन्न्याय कर्म्म तत्पतिस्तत्सम्बुद्धौ (अग्ने=सत्यस्वरूपेश्वर) २ २८ सत्यपते (परमेश्वर) ऋ० भू० ९९, १५ सत्यभाषणादीना व्रताना कर्मणा

शकुन्ते=शक्तिमन् (सदुपदेशक जन) २४२३ [शक्लृ शक्तौ (स्वा०) धातो 'शकेरुनोन्तोन्त्युनय.' उ० ३४६ सूत्रेण उन्ति]

शकुन्तिका अल्पा पक्षिणीव निर्बला, भा०—क्षीणा (प्रजा) २३ २२ कपिञ्जली ११६१११ [शकुन्तिप्राति० अल्पार्थे क, तत स्त्रिया टाप्। शकुन्तिरिनि पूर्वपदे व्याख्यातम्]

शकुलाविव ह्रस्वौ मत्स्याविव २३ २८ [शकुलौ-इवपदयो समास। शकुल =शक्नोति तरितुमिति विग्रहे शक्लृ शक्तौ (स्वा०) धातोर् 'मद्गुरादयश्च' उ० १४१ सूत्रेण उरच्। प्रत्ययरेफस्य लत्वम्]

शकृत् विष्ठेव ११६११० **शक्ना**=शकृता दुर्गन्धादिनिवारणसामर्थ्येन धूमादिना ३७ ९ [शक्लृ शक्तौ (स्वा०) धातो 'शकेर्ऋतिन्' उ० ४५८ सूत्रेण ऋतिन्। शक्ना' प्रयोगे शकृन्प्राति० तृतीयैकवचने 'पद्दन्नोमास्०' अ० ६१६३ सूत्रेण शकन् आदेश]

शक्तम् समर्थम् (क्षत्र=राज्य धन वा) ५६८.३ [शक्लृ शक्तौ (स्वा०) धातो क्त]

शक्तिम् तीक्ष्णाग्राम् २३९७ **शक्ति**=सामर्थ्यम् ४२२८ समर्थता १८३३ **शक्तीः**=सामर्थ्यानि ३३११४ **शक्त्या**=पाकविद्यासामर्थ्येन ११५७ योगबलोन्नत्या ऋ० भू० १५६, ११३ [शक्लृ शक्तौ (स्वा०) धातो स्त्रिया क्तिन्। शक्ति कर्मनाम निघ० २१]

शक्तिवन्तः सामर्थ्ययुक्ता (पितर=पालनक्षमा राजपुरुषा), प्र०—अत्र 'छन्दसीर' इति वत्वम् २९४६. प्रशस्ता बह्वी शक्ति सामर्थ्य विद्यते येषान्ते (राजपुरुषा) ६७५९ [शक्तिप्राति० भूमन्यर्थे मतुप्। 'छन्दसीर' इति मतोर्मस्य वकार। शक्तिभि कर्मभि नि० ७२८]

शक्ती आत्मसामर्थ्येन, प्र०—अत्र 'सुपा सुलुक्०' इति तृतीयैकवचनस्य पूर्वसवर्णादेश १३११८ [शक्लृ शक्तौ (स्वा०) धातो स्त्रिया क्तिन्। तत सुपा सुलुक्०' इति पूर्वसवर्णदीर्घादेश]

शक्तीवः शक्तिर्बहुविध सामर्थ्य विद्यते यस्य तत्सम्बुद्धौ (राजन्) ५३१६ [शक्तिप्राति० भूमन्यर्थे मतुप्। 'छन्दसीर' अ० ८२१४ सूत्रेण मतोर्मस्य वकार। शक्तिवन्प्राति० सम्बुद्धौ 'मतुवसो०' अ० ८३१ सूत्रेण रुत्वम्। पूर्वस्य दीर्घ संहितायाम्]

शक्म शक्यं कर्म्म २३८४ **शक्मना**=कर्मणा २२१८ [शक्लृ शक्तौ (स्वा०) धातो 'अत्तिशकिभ्या छन्दसि' ४१४७ सूत्रेण मनिन्। शक्म कर्मनाम निघ० २१.]

शक्र शक्नोति सर्वं व्यवहार कर्त्तु तत्सम्बुद्धौ (इन्द्र=सभापते) १.१०४८ शक्तिमन् (इन्द्र) ६३५५ समर्थ (पुत्र), आर्याभि० १४६, ऋ० १७१६८ **शक्रम्**=शक्तिमन्तम् (राजानम्) ऋ० भू० २२०, २०५०. मद्य सर्वजगत्कर्त्ताऽनन्तवीर्यवान् (ईश्वर) प० वि०। आयुकर्त्तारम् (इन्द्र=राजानम्) २०५०. **शक्रः**=समर्थ शक्तिमान् कृपायमाण सन् (जगदीश्वर) ११०५ दातु समर्थ (इन्द्र=परमात्मा) ११०६ [शक्लृ शक्तौ (स्वा०) धातो 'स्फायितञ्चि०' उ० २१३ सूत्रेण रक्]

शक्रा शक्तिनिमित्ता (मात्रा) ५४११५ [शक्रप्राति० स्त्रिया टाप्। शक्र =शक्लृ शक्तौ (स्वा०) धातोरौणा० रक्]

शक्रा शक्तिमन्तौ (अग्निवायू) २३९३ [शक्र इति व्याख्यातम्। ततो द्विवचनस्याकारादेश]

शक्वने शक्तिमद्वीरसैन्यप्राप्तये ५५ [शक्लृ शक्तौ (स्वा०) धातोर्मत्वर्थे 'छन्दसीवनिपौ' इति वा०सूत्रेण वनिप्]

शक्वरयः शक्तय १८२२ **शक्वरीषु**=शक्तिमतीषु सेनासु ७३३४ **शक्वरी**=शक्तिनिमित्ता गा २१२७ शक्तिमत्य (राजपुरुषाणा स्त्रिय) १०४ [शक्लृ शक्तौ (स्वा०) धातोर्मत्वर्थे 'छन्दसीवनिपौ' इति वनिप्। तत स्त्रिया 'वनो र च' सूत्रेण ङीप् रेफश्चान्तादेश। 'शक्वरय' प्रयोगे छान्दसो ह्रस्व। शक्वरी बाहुनाम निघ० २४ गोनाम निघ० २११ शक्वर्य ऋच शक्नोते। तद् यद् आभिर्वृत्रमशकद् हन्तु तच्छक्वरीणा शक्वरीत्वमिति विज्ञायते नि० १८ शक्लृ धातोर्वा 'स्नामदिपद्यर्त्तिपृशकिभ्यो वनिप्' उ० ४११३ सूत्रेण वनिप्। शक्वर्य (ऋच) यदिमाँल्लोकान् प्रजापति सृष्ट्वेद सर्वमशक्नोद् यदिद किं च तच्छक्वर्योऽभवँस्तच्छक्वरीणा शक्वरीत्वम् ऐ० ५७ इन्द्र प्रजापतिमुपाधावद् वृत्र हनानीति तस्मा एतच्छन्दोभ्य इन्द्रिय वीर्यं निर्माय प्रायच्छदेतेन शक्नुहीति तच्छक्वरीणा शक्वरीत्वम् ता० १३४१ एताभिर्वा इन्द्रो वृत्रमशकद् हन्तु तद् यदाभिर्वृत्रमशकद् हन्तु तस्माच्छक्वर्य कौ० २३२. एताभि (भूरिरिभि शक्वरीभि) वा इन्द्रो वृत्रमहन् क्षिप्र वा एताभि पाप्मान हन्ति क्षिप्र वसीयान् भवति ता० १२१३२३ पशव शक्वर्य ता० १३१३ पशवो वै

व्रातासः व्रतेषु सत्याचारेषु भवा (विद्वांसो जना) १ १६३ ८ मनुष्या २६ १६ वेगवन्ति यानानि ऋ० भू० १६६, ऋ० १ ६ ६ ४ [व्रातप्राति० जसोऽसुक्। व्रात = व्रतप्राति० भवार्थेऽण्। व्राता मनुष्यनाम निघ २ ३ विषम इव वै व्रात ता० १७ १ ५ ११]

व्रात्यम् असम्कृतम् (दुष्टजनम्) ३० ८ [व्रातात् समूहात् च्यवतीति विग्रहे व्रातप्राति० यत्। सावित्रीपतिता व्रात्या इति स्मृति]

व्रात्यः महोत्तमगुणविशिष्ट सेवनीयोऽतिथि ऋ० भू० २७१ [व्रातप्राति० 'तत्र साधु' रिति यत्]

व्राधतः अतिवृद्धान् शत्रून् १ १०० ९ विरोधिन (जनान्) १ १२२ १० [व्राधत् महन्नाम निघ० ३ ३]

व्राधन्त वर्धन्ते ५ ६ ७ [वृधु वृद्धौ (भ्वा०) धातो-र्लट्। पृषोदरादिना ऋकारस्य रेफोऽकारस्य चाऽऽकारादेश]

व्राधन्तम् व्याधमिव प्रजाहिंसकम् (शत्रुम्) ४ ३२ ३

व्राधन्तः=वर्धमाना, (जना) प्र०—अत्र पृषोदरादिना पूर्वस्याऽऽकारादेशो व्यत्ययेन परस्मैपदश्च १ १३५ ९ [वृधु वृद्धौ (भ्वा०) धातो शतृ। व्यत्ययेन परस्मैपदम्। पृषोदरा-दिना रूपम्। व्राधत् महन्नाम निघ० ३ ३]

व्राधन्तमः अतिशयेन वर्द्धमान (विद्वज्जन) १ १५० ३ [व्राधन् महन्नाम (निघ० ३ ३) ततोऽतिशायने तमप्। अथवा व्राधम् महन्नाम निघ० ३ ३ ततोऽतिशायने तमप्। नुडागमश्छान्दस]

व्राम् वरीतुमर्हाम् (मेना=वाचम्), प्र०—वृञ् धातो-र्घञर्थे क १ १२१ २ **व्राः**=या वृणोति सा (उषा) १ १२४ ८ ये व्रजन्ति ते (पश्वा=धनसम्पन्ना जना), प्र०—अत्र व्रजधातोर्बाहुलकादौणादिको ड प्रत्यय व्रा इति पदनाम निघ० ४ २, १ १२६ ५ या व्रियन्ते ता (वाणी) ४ १ १६ [वृञ् वरणे (स्वा०) धातोर्घञर्थे क। व्रज गतौ (भ्वा०) धातोर्वा बाहु० औणा० ड। व्रा व्रात्या नि० ५ ३]

व्रिशः प्रजा, प्र०—अत्र वर्णव्यत्ययेन वस्य स्थाने व्र १ १४४ ५ [विश मनुष्यनाम निघ० २ ३ वकारस्य व्रादेशो वर्णव्यत्ययेन। व्रिश अङ्गुलिनाम निघ० २ ५]

व्रीहयः तण्डुला १८ १२ [व्री वरणे (क्र्या०) धातोर्बाहु० औणा० हि। व्रीहय शक्वर्य जै० १ ३३३]

व्रेशीनाम् दिव्यानामपामिव निर्मलविद्या सुशीलव्या-प्तानाम् (अ०—पत्नीनाम्), प्र०—एता वै दैवीरापस्तद्या-श्चैव दैवीरापो याश्चेमा मानुष्यस्ताभिरेवास्मिन्नेतदुभयीभी रस दधाति श० ११ ५ ९ ८, ८ ४८

शकत् शक्नोति, प्र०—अत्र लडर्थे लुङडभावश्च १ १० ६ **शकः**=समन्ताच्छक्नुहि ७ २० ९ **शकेम**= समर्थयेम २ ५ १ शक्नुयाम, प्र०—अत्र विकरणव्यत्ययेन श ३ २७ ३ **शकेयम्**=शक्नुयाम ४४ यथा समर्थो भवेयम् १५ **शक्नवाम**=समर्था भवेम १ २७ १३ [शक्लृ शक्तौ (स्वा०) धातोर्लुङ्। 'अडभावश्छान्दस। लृदित्वादङ्। अन्यत्र लिङ् लेट् च। 'लिङ्याशिष्यङ्' अ० ३ १ ८६ सूत्रेण लिङ्यङ्]

शकपिण्डैः शक्ते सङ्घातै २५ ७ [शक-पिण्डपदयो समास। शक =शक्लृ शक्तौ (स्वा०) धातोर्घञर्थे क। शक उदकनाम निघ० १ १२]

शकमयम् शक्तिमयम् (धूमम्) १ १६४ ४३ [शक-प्राति०—'तत्प्रकृतवचने मयट्' अ० ५ ४ २१ सूत्रेण मयट्]

शका शक शक्तिमान् (पशुविशेष), प्र०—अत्र 'सुपा सुलुक्०' इत्याकारादेश २४ ३२ [शक्लृ शक्तौ (स्वा०) धातोर्घञर्थे क। तत 'सुपा सुलुक्०' इति सोराकारादेश]

शकुनः पक्षी ४ २६ ६ शक्तिमान् (विद्वान् सभेश) १८ ५३ [शक्लृ शक्तौ (स्वा०) धातो 'शकेरुनोन्तो-न्त्युनय' उ० ३ ४९ सूत्रेण उन प्रत्यय]

शकुनिसादेन येन शकुनीन् सादयन्ति तेन (व्यव-हारेण) २५ ३ [शकुन्युपपदे षद्लृ विशरणगत्यवसादनेषु (भ्वा०) धातोर्णिजन्तात् 'कृतो बहुल वे' ति वार्तिकेन करणे मूलविभुजादित्वात् क]

शकुनिः पक्षी २४ ४० **शकुने**=पक्षिवच्छक्तिमन् (वेदपाठिजन) २ ४३ २ शकुनिवद्वर्त्तमान (उपदेशक जन) २ ४२ १ वक्तृत्वशक्तियुक्त उपदेशक जन) २ ४३ २ सर्वशक्तिमन्नीश्वर आर्याभि० १ ५२, ऋ० २ ८ १२ २ [शक्लृ शक्तौ (स्वा०) धातो 'शकेरुनोन्तोन्त्युनय' उ० ३ ४९ सूत्रेण उनि। शकुनि शक्नोत्युन्नेतुमात्मान, शक्नोति नदितुम् इति वा, शक्नोति तकितुमिति वा, सर्वत शकरोऽस्त्विति वा शक्नोतेर्वा नि० ९ ३]

शकुन्तकः निर्बल पक्षीव (अध्वर्यु =राजा) २३ २३ [शकुन्तप्राति० अल्पार्थे ह्रस्वार्थे वा क। शकुन्त =शक्लृ शक्तौ (स्वा०) धातो शकेरुनोन्तोन्त्युनय' उ० ३ ४९ सूत्रेण उन्त]

शकुन्तयः शक्तिमन्त (वय =पक्षिण) २ ४३ १

सभाद्यध्यक्षाय) १ ५४ २ **शचीवः**=शची प्रशस्ता वाक्प्रज्ञा कर्म वा विद्यतेऽस्मिन् तत्सम्बुद्धौ (इन्द्र=सभाध्यक्ष) १ ६२ १२ शची बहुविध कर्म बह्वी प्रज्ञा वा विद्यते यस्य तत्सम्बुद्धौ (इन्द्र=न्यायाधीश), प्र०—शचीति प्रज्ञानामसु पठितम् निघ० ३ ९ कर्मनामसु च निघ० २ १ अत्र 'छन्दसीर' इति मतुपो मस्य व 'मतुवसो रु०' अ० ८ ३ १ इति रुत्वञ्च १ २९ २ **शचीवान्**=बहुप्रजावान् (राजा) ४ २२ २ [शचीति व्याख्यातम् । तत प्रशसायामर्थे मतुप् । 'छन्दसीर' इति वत्व मतोर्मस्य । शचीव कर्मवन् नि० ५ ११]

शचीवसू शची प्रज्ञा वासयितारौ (अध्यापकोपदेशकौ) १ १३९ ५ [शची-वसुपदयो समास । शचीति व्याख्यातम्]

शण्डः शमादिसहित (योगिजन) ७ १३ शमाऽन्वित, भा०—शमादिगुणप्रसक्त पुरुष ७ १२ [शमु उपशमने (दिवा०) धातोर्बाहु० औणा० ड]

शण्डिकानाम् शत्रूणा तस्याऽवयवभूतानाम् २ ३० ८

शतक्रतुम् असङ्ख्यप्रज्ञ बहुकर्माण वा (राजानम्) २१ ३९ अनेककर्मप्रज्ञायुक्तम् (इन्द्र=सेनेशम्) १ ५१ २ अमितप्रज्ञम् (इन्द्र=राजानम्) ३ ५१ २ **शतक्रतुः**=शतमसङ्ख्याता क्रतव प्रज्ञा कर्माणि वा यस्य स (सेनापति) ३३ ९६ अतुलप्रज्ञ (विद्वज्जन) २० ७५ **शतक्रतो**=शतान्यसङ्ख्याता क्रतव कर्माणि यस्य शूरवीरस्य सूर्यलोकस्य वा तत्सम्बुद्धौ, प्र०—शतमिति बहुनाम निघ० ३ १ क्रतुरिति कर्मनाम निघ० २ १, १ ४ ८ शत बहूनि कर्माणि प्रज्ञानानि वा यस्य तत्सम्बुद्धौ (इन्द्र=परमेश्वर) १ १० १ शतेष्वसख्यातेषु वस्तुषु क्रतु. प्रज्ञा यस्य तत्सम्बुद्धौ (इन्द्र), प्र०—क्रतुरिति प्रज्ञानाम निघ० ३ ९, १ ४ ९ असङ्ख्यप्रज्ञोत्तमकर्मन्त्रा (इन्द्र=रक्षक राजन्) ६ ४१ ५ शतविधप्रज्ञाकर्मयुक्त सभेश राजन् १ ३० १५ अमितवृद्धे (इन्द्र=राजन्) ३ ३७ ९ बहुप्रज्ञान (इन्द्र=राजन्) ३ ३७ ३ असङ्ख्यातोत्तमप्रज्ञ बहूत्तमकर्मन्वा न्यायाध्यक्ष १ १०५ ८ हे अनन्तक्रियेश्वर आर्याभि० १ ३५, ऋ० १ १ ३१ ९ शतमसख्यातानि क्रतव कर्माण्यनन्ता प्रज्ञा वा यस्य तत्सम्बुद्धौ सर्वकामप्रदेश्वर १ १६ ९ [शत-क्रतुपदयो समास । शत दशदशत नि० ३ १० शतम् बहुनाम निघ० ३ १ क्रतु कर्मनाम निघ० २ १ प्रज्ञानाम निघ० ३ ९ शतक्रतु इन्द्र आसीत् सीरपति शतक्रतु तै० २ ४ ८ ७]

शतग्विनम् शतग्वोऽसङ्ख्याता गावो विद्यन्ते यस्मिँस्तम् (रयिं=धनम्) ४ ४९ ४ शतानि गावो विद्यन्ते यस्मिँस्तम् (रयिम्) १ ५९ ५ [शतगुप्राति० . भूम्न्यर्थे इनि । शतगु =शत-गोपदयो समास]

शततमम् अतिशयेनाऽसङ्ख्यातम् (वेश्म=सर्वहित पदार्थम्) ४ २६ ३ [शतप्राति० अतिशायने तमप् । शतम् बहुनाम निघ० ३ १]

शततमा अतिशयेन शतानि (अब्दलानि) ७ १९ ५ [शततमम् इति व्याख्यातम् । तत शेर्लोपश्छन्दसि]

शततेजाः शतानि बहूनि तेजासि यस्मिन्त्स सूर्य, प्र०—शतमिति बहुनाम निघ० ३ १ १ २४ [शत-तेजस् पदयो समास]

शतदायम् असङ्ख्यदायभागिनम् (जनम्) २ ३२ ४ [शत-दायपदयो समास । दाय =डुदाञ् दाने (जु०) धातो 'ददातिदधात्योर्विभाषा' अ० ३ १ १३९ सूत्रेण ण । आतो युगागम]

शतदाव्नि असङ्ख्यदाने (राज्यपालनाख्ये व्यवहारे) ५ २७ ६ [शतोपपदे डुदाञ् दाने (जु०) धातो 'क्तनो बहुल वे' नि भावे वनिप्]

शतदुरेषु शतावरेषु मेघाऽवयवेषु घनेषु १ ५१ ३

शतद्वसुम् शतान्यसङ्ख्यातानि वसूनि यस्मिँस्तम् (रथ=यानम्), प्र०—अत्र पृषोदरादित्वात् पूर्वपदस्य तुगागम १ ११९ १ [शत-वसुपदयो समास । पूर्वपदस्य तुगागमश्छान्दस]

शतधन्यम् असङ्ख्ये धने साधुम् (सोमम्=ओषधिसारम्) ४ १८ ३ [शत-धनयो समासात् साध्वर्थे यत्]

शतधन्वने धनुर्विद्याद्यसङ्ख्यशास्त्रविद्याशिक्षकाय (विद्वज्जनाय) १६ २९ [शत-धन्वन्पदयो समास । धन्वन् धनुषि नि० ९ १८ धन्वान्तरिक्ष धन्वन्त्यस्मादाप नि० ५ ५]

शतधारम् शत बहुविधमसङ्ख्यात विश्व धरतीति तम्, अ०—शतधा (वसो =यज्ञ), प्र०—शतमिति बहुनाम निघ० ३ १, १ ३ शतधा धारा सुशिक्षिता वाग् यस्य तम् (विपश्चित=विद्वज्जनम्) ३ २६ ९ शतमसङ्ख्याता दुग्धधारा यस्मात्तम् (गवादिक वीर्यसेचक वृषभ वा) १३ ४९ **शतधारः**=शतशो धारा वाचो यस्य स (वीर्यवान् पुरुष) १९ ८७ **शतधारेण**=बहुविद्याधारकेण परमेश्वरेण वेदेन वा १ ३ [शतोपपदे धृञ् धारणे (भ्वा०) धातो 'कर्मण्यण्' इत्यण् । अथवा शतधारापदयो समास ।

शक्वर्य ता० १३ ४ १३ पशवो वै शक्वरी तै० १ ७ ५ ४ पशव शक्वरी ता० १६ ७ ६ श्री शक्वर्य ता० १३ २ २ शाक्वरो वज्र तै० २ १ ५ ११ वज्र शक्वर्य ता० १२ १३ १४ रथन्तरमेतत् परोक्ष यच्छक्वर्य ता० १३ २ ८ ब्रह्म शक्वर्य ता० १६ ५ १८ सप्तपदा वै तेपा (छन्दसा) परार्घ्या शक्वरी श० ३ ६ २ १७ सप्तपदा शक्वरी तै० २ १ ५ ११ ता० १६ ७ ६ स (प्रजापति) शक्वरीरसृजत तदपाङ्घोषोऽन्वसृज्यत ता० ७ ८ १२ व्रीहय =शक्वर्य जै० १ १३३ आपो वै शक्वर्य जै० ३ ६२]

शग्धि दातु शक्नुहि, प्र०—अत्र 'वाच्छन्दसि' इति विकरणलुक् २ २ १२ देहि ४ २१ १०. समर्थो भव ५ १७ ५ सुखदानाय समर्थोऽसि, प्र०—अत्र 'वहुल छन्दसि' इति श्नोर्लुक् १ ४२ ६ [शक्लृ शक्तौ (स्वा०) धातोर्लोट्। 'वहुल छन्दसि' सूत्रेण शपो लुकि तत्स्थानभूतस्य श्नोरपि लुक्]

शग्मम् सुखम्, भा०—चक्रवर्त्तिराज्यादिकमैहिक सुखम् ३ ४३ सासारिकमाभ्युदयिकम् (सुखम्) ऋ० भू० २४०, ३ ४३ [शग्मम् सुखनाम निघ० ३ ६ शग्म कर्मनाम निघ० २ १]

शग्मः शग्म सुख विद्यते यस्य स (सोम =ऐश्वर्यसमूह) प्र०—अत्र 'अर्श आदिभ्योऽच्' इत्यनेन मत्वर्थीयोऽच्प्रत्यय ६ ४४ २ **शग्मैः**=सुखप्रापकै (विद्वज्जनै) १ १४३ ८ [शग्मम् सुखनाम (निघ० ३ ६) । ततो मत्वर्थे 'अर्श आदिभ्योऽच्' इति सूत्रेणाच्]

शग्मया सुखरूपया (गातुमत्या=प्रशस्तवाग्भूमियुक्तया सभया) ७ ५४ ३ **शग्माम्**=सुखरूपाम् (तनू = शरीरम्) ४ २ सुखमयीम् (वाच=वाणीम्) ५ ४३ ११ [शग्मम् सुखनाम निघ० ३ ६ तत स्त्रिया टाप्]

शग्मानि सुखकारकाणि (इन्द्रियादीनि अष्टविंशानि) ऋ० भू० १६०, अथर्व० १६ १ ८ २ [शग्मम् सुखनाम निघ० ३ ६ ततो नपुसके प्रथमावहुवचनम्]

शग्मासः वहुसुखयुक्ता (पुत्रा) ७ ६० ५ [शग्मप्राति० जसोऽसुक् । शग्म =शग्मम् सुखनाम निघ० ३ ६ ततो मत्वर्थेऽच्]

शग्म्येन शग्मेपु सुखेपु भवेन (मनसा=अन्त करणेन) ३ ३१ १ [शग्ममिति व्याख्यातम् । ततो भवार्थे यत् । शग्म्यम् सुखनाम निघ० ३ ६]

शङ्कराय य सर्वेपा सुख करोति तस्मै (परमेश्वराय) सेनाधीशाय वा) १६ ४१ कल्याणकारकाय (ईश्वराय) प० वि० [शम् इत्युपपदे डुकृञ् करणे (तना०) धातो 'कृञो हेतुताच्छील्यानुलोम्येपु' अ० ३ २ २० सूत्रेण ताच्छील्ये ट । शम् सुखनाम निघ० ३ ६]

शङ्कव: कीला १ १६४ ४८ यन्त्रकला ऋ० भू० १६८ [शकि शङ्कायाम् (भ्वा०) धातो 'खरुशङ्कुपीयु०' उ० १ ३६ सूत्रेण कु-प्रत्ययान्तो निपात्यते । शङ्कु (साम) तद् (शकुमाम) उ सीदन्तीयमित्याहु ता० ११ १० १२ शकु भवत्यह्नो धृत्यै यद्वा अधृत शकुना तद् दाधार ता० ११ १० ११]

शङ्खध्मम् य शङ्खान् धमति तम् (पुरुषम्) ३० १६ [शखोपपदे ध्मा शब्दाग्निसयोगयो (भ्वा०) धातो क । शख =शमु उपशमने (दिवा०) धातो 'शमे ख' उ० १ १०२ सूत्रेण ख]

शङ्गय: श सुख गमयति स (राजा शिष्यो वा) २ १ ६ [शम् इत्युपपदे गम्लृ गतौ (भ्वा०) धातोर्वाहु० औणा० डि प्रत्यय । अन्तर्भावितो ण्यर्थ]

शङ्गवे श सुख गच्छति प्राप्नोति तस्मै (जनाय) १६ ४० [शम् इत्युपपदे गम्लृ गतौ (भ्वा०) धातो 'मितद्र्वादिभ्य उपसख्यानम्, अ० ३ २ १८० वा०सूत्रेण कर्त्तरि डु]

शचिष्ठया अतिशयितया क्रियया २७ ३६ अतिशयेन श्रेष्ठया वाचा प्रज्ञया कर्मणा वा ४ ३१ १ अतिशयेन शची प्रज्ञा तया वृता वर्त्तमानया (युक्तया) ३६ ४ [शचीति व्याख्यास्यते । ततोऽतिशायन इष्ठन् । तत स्त्रिया टाप्]

शचिष्ठः अतिशयेन प्राज्ञ (विद्वज्जन) ४ २० ६ [शचीप्राति० अतिशायन इष्ठन्]

शचीनाम् वाणीना सत्कर्म्मणा वा १ १७४ प्रज्ञाना वाचा वा ४ ४३ ३ **शचीभिः**=कर्मभि प्रज्ञाभिर्वा २७ ६ **शच्या**=प्रज्ञया प्रजया वा ६ १७ ६ [शच व्यक्ताया वाचि (भ्वा०) धातोरौणा० इन् । तत स्त्रिया 'कृदिकारादक्तिन' इति ङीष् । शची वाङ्नाम निघ० १ ११ कर्मनाम निघ० २.१ प्रज्ञानाम निघ० ३ ६ शचीभि =कर्मभि नि० १२ २७]

शचीपतिम् वेदवाच पालकम् (इन्द्र=शालाध्यक्षम्) १ १०६ ६ **शचीपतिः**=प्रजापतिर्वाक्पतिर्वा (इन्द्र = राजा) ४ ३० १७ **शचीपते**=प्रजास्वामिन् (उत्तमराजन्) ६ ४५ ६ वाच प्रज्ञाया पालक (राजन्) ४ ३१.७ [शची-पतिपदयो समास । शचीति व्याख्यातम्]

शचीवते प्रशस्ता प्रज्ञा विद्यते यस्य तस्मै (शक्राय=

शतविचक्षणाः शतमसङ्ख्या विचक्षणा गुणा यासु ता (ओषधी =सोमाद्या) १ ९ ९२ [शत-विचक्षणपदयो समास । विचक्षण =वि+चक्षिङ् व्यक्तायां वाचि (अदा०) धातोर्युच् । 'असनयोश्च प्रतिषेध' इति ख्याञ् न भवति]

शतव्रजा अपरिमितगतय (धारा) ४ ५८ ५ शतम-सङ्ख्याता व्रजा मार्गा यासा ता, भा०—अनेकमार्गा (वाच) १७ ६३ [शत-व्रजपदयो समास । व्रज =व्रज गतौ (भ्वा०) धातो 'गोचरसञ्चर०' इति घ]

शतशारदाय शत शरदो जीवनाय ३४ ५२ शत वर्ष पर्यन्त जीवन के लिए स० वि० १४०, अथर्व० १४ २ ७५ [शत-शारदपदयो समास । शारदम् =शरच्छब्दाद् भवार्थेऽण्]

शतसाः य शतानि सनति विभजति स (सभेशो राजा) ७ ८ ६. [शतोपपदे षण सम्भक्तौ (भ्वा०) धातो 'जनसनखन०' अ० ३ २ ६७ सूत्रेण विट् । 'विड्वनोरनु-नासिकस्यात' इत्याकारादेश । शतसा शतसानिनी नि० १० २९]

शतसेयाय शतादिसङ्ख्यापरिमितधनावसानाय ३.१८ ३ [शत-सेयपदयो समास । सेयम् =षोऽन्त-कर्मणि (दिवा०) धातोर्यत्]

शतस्वी शतमसङ्ख्य स्व धन विद्यते यस्य स (विप्र =मेधाविजन) ७ ५८ ४ [शत-स्वपदयो समासान् मत्वर्थ इनि]

शतहिमा शत हिमानि यस्या आयुषि सा (इडा= शास्त्रपारङ्गता वाणी) २ १ ११ **शतहिमाः**=यावच्छत वर्षाणि तावत् ६ ४ ८ शत हिमानि येषान्ते (सुवीरा जना) ६ १२ ६ शतवर्षजीविन (वीरपुरुषा) ६ १७ १५ शत हिमानि यासु समासु ता १ ७३ ९ शत हिमा हेमन्तर्त्तवो गच्छन्ति येषु सवत्सरेषु ते ऋ० भू० २४७, अथर्व० १९ ७४ [शत-हिमपदयो समासे स्त्रिया टाप् । हिमम्= हन हिंसागत्यो (अदा०) धातो 'हन्तेर्हि च' उ० १ १४७ सूत्रेण मक् । धातोश्च हिर देश]

शता शतान्यसङ्ख्यातानि वस्तूनि १ १२६ ६ [शत-प्राति० शेर्लोपश्छन्दसि]

शताऽऽत्मा शतेष्वसङ्ख्यातेषु पदार्थेष्वात्मा विज्ञान यस्य स (विद्वज्जन) १ १४९ ३ [शत-आत्मन्पदयो समास । आत्मन्=आत्माऽततेर्वाप्तेर्वा, अपि वाप्त इव स्याद् यावद् व्याप्तिभूत इति नि० ३ १५]

शतानीकाय शतान्यनीकानि सैनिकानि यस्य तस्मै (राज्ञे) ३४ ५२ [शत-अनीकपदयो समास । अनीकम्= अन प्राणने (अदा०) धातो 'अनिहृषिभ्या किच्च' उ० ४ १७ इति सूत्रेण ईकन्]

शतायुषम् शतवर्षजीविनम् (मनुष्यम्) ६ २.५ शतवर्षपरिमितजीवनम् (तनयम्) १३ ४१ **शतायुषा**= शत वर्षाणि यस्मिन्नायुषि तेन १९ ३० [शत-आयुष्-पदयो समास]

शतारित्राम् शतसङ्ख्याकान्यरित्राणि जलपरिमाण-ग्रहणार्थानि स्तम्भनानि वा यस्या ताम् (नावम्) १ ११६ ५ शतान्यरित्राणि लोहमयानि समुद्रस्थलान्तरिक्ष-मध्येस्तम्भ-नार्थानि गाधग्रहणार्थानि च भवन्ति यस्या ताम् (नावम्) ऋ० भू० १३३, १ ११६ ५ [शत-अरित्रपदयो समास । अरित्रम्=ऋ गतिप्रापणयो (भ्वा०) धातो करणे कारके 'अर्तिलूधू०' अ० ३ २ १८४ सूत्रेण इत्र प्रत्यय]

शतावयम् शतान्यवयवा यस्मिँस्तम् (पशुम्) ५ ६१ ५ [शत-अवयवपदयो समास । वलोपश्छान्दस]

शताश्रिम् य शतान्याश्रयति तम् (वज्रम्) ६ १७ १० [शतोपपदे आङ्पूर्वात् श्रिञ् सेवायाम् (भ्वा०) धातो कर्त्तरि क्विप्]

शतिनम् शतशो विद्यायुक्तम् (वाज=बोधम्) १ १२४ १३ अपरिमितमसङ्ख्यम् (पदार्थविज्ञानम्) २ २ ९ शतधा योद्धृसेनासहितम् (वाज=सङ्ग्रामम्) ६ ८ ६ **शतिनः**=प्रशस्तगुणै सह शतधा वर्त्तमानस्य (वाजस्य=अन्नस्य) १५ २१ शतमसङ्ख्यात बल येषा-मस्ति ते (मरुत =व्याप्तविद्या जना) ७ ५७ ७ शतम-सङ्ख्याता प्रशसिता विद्याकर्माणि वा विद्यन्ते येषा ते (विद्वासो मनुष्या), प्र०—अत्र प्रशसाऽर्थे इनि १ ३१ १० [शतम् बहुनाम निघ० ३ १ ततो भूम्न्यर्थे प्रशसाया वा मत्वर्थ इनि]

शतिनीभिः शतानि बहवो वीरा विद्यन्ते यासु सेनासु ताभि १ १३५ १ प्रशस्तसङ्ख्यातसेनाङ्गयुक्ताभि चमूभि १ १३५ ३ शतसङ्ख्याता प्रशस्ता गतयो यासु क्रियासु ताभि १ ५९ ७ शत बहूनि कर्माणि विद्यन्ते यासु ताभि (गतिभि) २७ २८ [शतप्राति० भूम्न्यर्थे मत्वर्थ इनि । तत स्त्रिया ङीप्]

शतेषुधे शतमसङ्ख्या शस्त्रास्त्रप्रकाशा यस्य तत्सम्बुद्धौ (अ०—सेनाध्यक्ष) १६ १३ [शत-इषुधिपदयो समास । इषुधि =इषूपपदे दधाते 'कर्मण्यधिकरणे च' ति कि]

धारा वाङ्नाम निघ० १ ११]

शतनीथम् शतं प्राप्तव्यम् (आजि=सङ्ग्रामम्) १ १७९ ३ **शतनीथः**=शतानि नीथानि यस्य स (इन्द्र=सेनाद्यधिपति) १ १०० १२ सैकडो असङ्ख्यात पदार्थों की प्राप्ति कराने वाला (ईश्वर) आर्याभि० १ ३४, ऋ० १ ७ १० १२ [शत-नीथपदयो समास:। नीथ=णीञ् प्रापणे (भ्वा०) धातो 'हनिकुषिनीरमि०' उ० २ २ सूत्रेण क्थन्]

शतपद्भिः शतैर्गमनशीलै पादवेगै (रथै) १ ११६ ४ शतेनाऽसङ्ख्यातेन वेगेन पद्भ्या यथा गच्छेत् तादृशैरत्यन्त-वेगवद्भि (यानै) ऋ० भू० १९०, १ ११६ ४. [शत-पादपदयो समासे 'पद्दन्नोमास्०' अ० ६ १ ६३ सूत्रेण पदादेश]

शतपयाः शतानि पयासि दुग्धादीनि वस्तूनि यस्य स (अ०—यजमान) १७ ५६ [शत-पयस्पदयो समास]

शतपर्वणा शतान्यसङ्ख्यातानि पर्वाण्यलङ्कर्माणि वा यस्मात्तेन (वज्रेण) १ ८० ६ शतस्याऽसङ्ख्यातस्य जीवजातस्य पर्व पालन यस्मात्तेन (वज्रेण) ३३ ९६ [शत-पर्वन्पदयो समास । पर्वन्=पॄ पालनपूरणयो. (जु०) धातो 'स्नामदिपद्यर्त्तिपॄशकिभ्यो वनिप्' उ० ४ ११३ सूत्रेण वनिप्]

शतपवित्राः शतैरुपायैर्ये शुद्धा (देवी=विदुष्य स्त्रिय) ७ ४७ ३ [शत-पवित्रपदयो समास । शतपवित्रा बहूदका नि० ५ ६]

शतभुजिः शतमसङ्ख्याता भुजय पालनानि यस्या सा (मही=राज्ञी) ७ १५ १४ **शतभुजिभिः**=शतम-सङ्ख्य सुख भोक्तु शील येषा तै (पूर्भि=नगरै) १ १६६ ८ [शत-भुजिपदयो समास । भुजि=भुज पालनाभ्यवहारयो (रुधा०) धातो 'इक् कृष्यादिभ्य' इति इक्]

शतम् शतसङ्ख्याकान् (हिमा=वर्षाणि) १ ६४ १४ शतवार्षिकम्, भा०—यदा शतवार्षिकमायुर्व्यतीत तदा शरीरस्य जराऽवस्था भवेत् २५ २२ असङ्ख्याना (प्राणा) १७ ७१ शतादधिकानि वा (हिमा=हेमन्तर्त्तव) २ २७ सौ (साल) स० वि० १२१, अथर्व० १४ १ ५२ असङ्ख्यम् (राध=धनम्) ४ ३१ ९ अनेकानि (धामानि=मर्मस्थानानि) १२ ७५ भा०-शतश (आवृत=क्रिया) १२ ८ **शतस्य**=शतेकेषाम् (यक्ष्माणा=महारोगाणाम्) १२ ९७ **शतानि**=बहूनि (आशून्=अश्वान्) ४ २९ ४ **शतैः**=शतमङ्ख्याकैरसङ्ख्यैर्वा (वधै=हननै) ६ २० ४ [शतम् बहुनाम निघ० ३ १ । एषा वाव यज्ञस्य मात्रा यच्छतम् ता० २० १५ १२]

शतमन्युः शतधा मन्यु क्रोधो यस्य स (इन्द्र=सेनापति) १७ ३९ [शत-मन्युपदयो समास । मन्यु क्रोधनाम निघ० २ १३.]

शतमानम् शतमसङ्ख्य मान यस्य तत् (आयु=जीवनम्) १९ ९३ [शत-मानपदयो समास । मानम्=माङ् माने शब्दे च (जु०) धातोर्ल्युट्]

शतमूतिः शतमसङ्ख्याता ऊतयो रक्षणादिका-क्रिया यस्य स (सेनापति), प्र०—अत्र 'वाच्छन्दसि सर्वे विधयो भवन्ति' इति सुपो लुगभाव १ १०२ ६. शतमसङ्ख्याता, ऊतयो रक्षा यस्मात् स (इन्द्र=राजा) १ १३०.८ **शतमूते**=असङ्ख्यरक्षाकर्त्त (इन्द्र=शूरवीर राजन्) ७ २१ ८ [शत-ऊतिपदयो समास । ऊति=अव रक्षणादिषु (भ्वा०) धातोः स्त्रियाम् 'ऊतियूतिजूति०' इति क्तिन् उदात्तश्च]

शतमूर्द्धन् शतेष्वसङ्ख्यातेषु मूर्द्धा मस्तक यस्य तत्सम्बुद्धौ (अ०—अग्ने=योगिराज) १७.७१ [शत-मूर्द्धन्पदयो समास । मूर्द्धन्=मूर्धा मूर्त्तमस्मिन् धीयते नि० ७ २७]

शतयातुः य शतं सह याति स (वीरसैनिक) ७.१८ २१ [शतोपपदे या प्रापणे (अदा०) धातो 'कमि-मनि०' उ० १ ७३ सूत्रेण तु]

शतरुद्रियाणाम् शताना रुद्राणा दुष्टरोदकानाम् (अवत्तानाम्=उदारचेतोजनानाम्) २१ ४५ बहूना मध्ये विद्वदधिष्ठातॄणाम् (जनानाम्) २१ ४४ शत रुद्रा शतरुद्रा, शतरुद्रा देवता येषा तेषाम् (अग्निष्वात्ताना=गृहीताऽग्नि-जनानाम्) २१ ४३ [शत-रुद्रपदयो समासे 'साऽस्य देवते' त्यर्थे 'शतरुद्राच्छश्च घश्च' अ० ४ २ २८ वा० सूत्रेण छ । अहोरात्रे (सवत्सरस्य) शतरुद्रीयम् तै० ३ ११ १० ३]

शतवन् शतानि वल्गानि विद्यन्ते यस्य तत्सम्बुद्धौ (इन्द्र=राजन्) ६ ४७ ९ [शतप्राति० मतुप्]

शतवल्शः शतानि वल्शा अङ्कुरा यस्य स (वटादि-वृक्षविशेष) ३ ८ ११ यथा बहुङ्कुरो वृक्षस्तथा ५ ४३ [शत-वल्शपदयो समास]

शतवल्शा शतमसङ्ख्याता वल्शा अङ्कुरा यस्या सा (ओषधी) १२ १०० [शतवल्श इति व्याख्यातम् । तत स्त्रिया टाप्]

कारिणी (स्त्री) १२.६२. सुखकारी, आरोग्यसुखद, शान्तिप्रद, ऐश्वर्यसौम्यप्रद, विद्याव्याप्तिप्रद (ईश्वरो विद्वज्जनो वा) १.९० ६ सुखकारक, सुखस्वरूप, सुखप्रचारक, सकल ऐश्वर्यदायक, विद्याप्रद, कल्याणकारक (परमात्मा) म० प्र० १६, ३६ ६ सुखरूपम् (राज्यम्) ७ ६ २ सुखकारिणौ, सुखकर्त्तारौ (सोमारुद्रौ=राजवैद्यौ) ६ ७४ १ सुखकारकौ (इन्द्राग्नी=विद्युत्पावकौ) ७ ३५ १ [शम् सुखनाम निघ० ३ ६ शम् सुखम् नि० ११.३०]

शमम् शाम्यन्ति येन तम् (शान्तिव्यवहारम्) १ ३३ १५ **शमस्य**=शाम्यन्ति येन तस्य शान्तियुक्तस्य मनुष्यस्य १ ३२ १५ [शमु उपशमने (दिवा०) धातोर्घञ् 'नोदात्तोपदेशस्य मान्तस्य०' अ० ७ ३ ३४ इति वृद्धिनिषेध]

शमाये शममिवाचरामि ३ ११ [शममिति व्याख्यातम्। आचारेऽर्थे क्यङन्ताल्लट्]

शमि कर्म्माणि ३ ५५ ३ कर्म्मणि, प्र०—अत्र वर्णव्यत्ययेन ह्रस्व 'सुपा सुलुक्०' इति सुलोप २ ३१ ६ **शमी**= उत्तम कर्म्म ४.२२ ८ [शमी कर्मनाम निघ० २ १ शमी= कर्माणि नि० ११ १६ शमी (वृक्ष) प्रजापतिरग्निमसृजत सो ऽबिभेत्प्र मा धक्ष्यतीति त शम्यागमयत्। तच्छम्यै शमीत्वम् तै० १ १ ३ ११ तद् यदेत शम्यागमयँस्तस्माच्छमी श० ९ २ ३ ३७ शमीमय (शकु) उत्तरत, श मेऽसदिति श० १३ ८ ४ १. श वै प्रजापति प्रजाभ्य शमीपलाशैरकुरुत श० २.५ २ १२ यया ते सृष्टस्याग्ने हेतिमशमयत्प्रजापति तामिमामप्रदाहाय शमी शान्त्यै हराम्यहम् तै० १ २ १ ६]

शमितम् उपशान्तम् (हवि) १७ ५७ [शमु उपशमने (दिवा०) धातोर्णिजन्तात् क्त। 'निष्ठाया सेटि' सूत्रेण णेर्लोप]

शमिता यज्ञ २० ४५ यज्ञस्य कर्त्ता (यजमान) २३ ३९ उपशमादिगुणयुक्त (गृहाश्रमी जन) १७ ५७ उपशमक (विद्वज्जन) २ ३ १० शान्तिप्रद, भा०—सर्वरोगप्रणाशक (सविता=सूर्य) २१ २१ यज्ञसम्बन्धी (अग्नि=पावक) २७ २१ शान्तिकर (देव=मेघ) २९ ३५ **शमितारम्**=शान्तिकरम् (वनस्पतिं=किरणपालक सूर्यम्) २८ ३३ यजमानम् २८ १०. **शमितारः**= अध्ययनाऽध्यापनाख्ये यज्ञे शमादिगुणाना प्रापका (भा०—ब्राह्मणा, क्षत्रिया, वैश्या) २३ ४० सन्नुताऽन्नस्य निष्पादिन ") (विद्वासो जना) १ १६२ १० **शमितुः**= यज्ञानुष्ठातु (जनस्य) १.१६२ ९ [शमु उपशमने (दिवा०) धातो कर्त्तरि तृच्। शमिता अध्रिगुश्चापापश्च। उभौ देवाना शमितारौ तै० ३ ६ ६ ४ मृत्युस्तदभवद्धाता शमितोग्रो विशा पति तै० ३ १२ ९ ६ मृत्यु शमिता ता० २५ १८ ४]

शमितारा शान्त्या यज्ञकर्मकर्त्तारौ (बाहू) ५.४३ ४ [शमु उपशमने (दिवा०)+तृच्। ततो द्विवचनस्याकारादेश]

शमितेव यथा यज्ञमय (यजमान) ५ ८५.१ [शमिता-इवपदयो समास]

शमी उत्तम कर्म्म ४.२२ ८ कर्माणि १ ११० ४ **शमीभिः**=क्रियाभि ४ १७ १८ श्रेष्ठै कर्म्मभि ४.३३ ४ **शमीम्**=कर्म्म ५ ४२ १० **शम्या**=शान्तियुक्तक्रियया १ ८३ ४ [शमी कर्मनाम निघ० २ १ शमी कर्माणि नि० ११ १६]

शमीष्व दुःखनिवृत्तये सुखसम्पादनार्थं कुरुष्व, प्र०—शमु उपशमे इत्यस्माद् 'बहुल छन्दसि' इति श्यनो लुक् 'तुरुस्तुशम्यम' सार्वधातुके अ० ७ ३ ९५. इतीडागमः। समीक्षा—महीधरेणाऽत्र शपो लुगित्यशुद्ध व्याख्यातम् १ १५ [शमु उपशमने (दिवा०) धातोर्लोट्। श्यनो लुक् छन्दसि। 'तुरुस्तु०' इतीडागम]

शम्बरम् श सुख वृणोति यस्मात्त मेघम् ४ ३० १४ बलम् १ ५१ ६ शङ्करम् (दास=सेवकम्) ६ २६ ५. अधर्मसम्बन्धिनम् (शत्रुम्), प्र०—अत्र शम्बधातोरौणादिकोऽरन् प्रत्यय १ १०१.२ श सुख वृणोति येन त मेघमिव शत्रुम् १ ५४ ४ **शम्बरस्य**=मेघस्य बलवत शत्रोर्वा, प्र०—शम्बर इति मेघनाम निघ० १ १० बलनामसु च निघ० २ ९, १ १०३ ८ **शम्बराणि**=शम्बरस्य मेघस्य सम्बन्धीनि अभ्राणि २ २४ २ [शम्बर मेघनाम निघ० १ १० शम्बरम् उदकनाम निघ० १ १२ बलनाम निघ० २ ९ शम् सुखनाम निघ० ३ ६ शम्-वरपदयो समास। वर=वृञ् वरणे (स्वा०) धातो 'ग्रहवृदृनिश्चिगमश्च' अ० ३ ३ ५८ सूत्रेणाप्। वकारस्य बकारो वर्णव्यत्ययेन। शम्ब सबन्धने (चुरा०) धातोर्वा बाहु० औणा० रन्। शम्बर मेघम् नि० ७ २३]

शम्बरहत्ये शम्बरस्य बलस्य हत्या हनन यस्मिन् युद्धादिव्यवहारे तस्मिन् १ ११२ १४. [शम्बर-हत्या-पदयो समास। हत्या=हन हिंसागत्यो (अदा०) धातोर्भावे 'हनस्त च' अ० ३ १.१०८ सूत्रेण क्यप्]

शम्भवाय श सुख भावयति तस्मै परमेश्वराय

शतोतिम् शतान्यूतयो येन तम् (रथ=किरणम्) ६ ६३ ५ [शत-ऊतिपदयो समास । ऊति =अव रक्षण-गत्यादिषु (भ्वा०) धातो स्त्रियाम् 'ऊतियूति०' इति क्तिन् । स चोदात्त]

शत्रवः अमित्रा (जना) १ ५ ४ **शत्रुम्**=विरोधिनम् (जनम्) १ १२९ ४ शातयितारम् (दुर्जनम्) २ २३ ११ वैरिणम् (दुर्जनम्) २ ३० ३ **शत्रून्**=सत्य-न्यायविरोधे प्रवर्त्तमानान् (कुपुरुषान्) ७ ३७ धर्मविरोधिन (असज्जनान्) ६ ४४ १७ अरीन् १३ ११ दुष्टकर्मकर्त्तॄन् (जनान्) ३ ३० ६ अस्माक शातकान् सुख-विच्छेदकान् (जनान्) २ ३० ८ मेघाऽवयवान् १ ३३ १३ [शद्लृ शातने (भ्वा०) धातो 'रु-शातिभ्या क्रुन्' उ० ४ १०३ सूत्रेण क्रुन् । शत्रु =शमयिता शातयिता वा नि० २ १६]

शत्रिम् दु खविच्छेदकम् (केतु=प्रज्ञाम्) ५ ३४ ९. [शद्लृ शातने (भ्वा०) धातो 'राशदिभ्या त्रिप्' उ० ४ ६७ सूत्रेण त्रिप्]

शत्रुतूर्याय शत्रूणा हिंसनाय ६.२२.१० [शत्रु-तूर्य-पदयो समास । तूर्यम्=तूरी गतित्वरणहिंसनयो (दिवा०) धातोर्ण्यत्]

शत्रूयतः आत्मन शत्रुमाचरत (पुरुषस्य) १२ ५ **शत्रूयताम्**=शत्रूणामिवाचरताम् (सैनिकानाम्) ५ ४ ५ शत्रुत्वमिच्छताम् (जनानाम्) ३३ १२ **शत्रूयन्तम्**= शत्रून् कामयमानम् (राजद्रोहिजनम्) ७ २० ३ [शत्रु-पदादाचारेऽर्थे, आत्मन इच्छायामर्थे वा क्यच्]

शन्तमम् अतिशयित सुखम् १ ४३ १ **शन्तमानि**= अतिशयेन कल्याणकराणि (वचासि) ६ ३२ १ अतिशयेन सुखकराणि (आचरणानि) ६ २३ ६ [शम् सुखनाम निघ० ३ ६ ततोऽतिशायने तमप्]

शन्तमया अतिशयेन सुखप्रापिकया, भा०—धर्म्यया (नीत्या) १९ २ **शन्तमा**=अतिशयेन सुखप्रापिका (प्रज्ञा) १ ७६ १. अतिशयेन सुखकरी (गी =वाक्) ५ ४२ १ अतिशयेन कल्याणकारिणी (गी) ५ ४३ ८. [शन्तमम् इति व्याख्यातम् । तत स्त्रिया टाप्]

शन्तमः अतिशयेन सुखकारी (जन) १ १३९ ४ अतिशयेनाऽऽनन्दप्रद (विद्वज्जन) १ ७७ २ श सुखमतिशयित यस्मिन्त्स (स्तोम) प्र०—शमिति सुखनाम निघ० ३ ६, १ १६ ७ **शन्तमेन**=अतिशयित श सुख तेन (अवसा=रक्षाद्येन) १९ ५५ अत्यन्तसुखरूपेण कर्म्मणा १३ १९. अतिशयसुखेन १५ ६४. अतिशयेन सुखकारकेण (विज्ञानेन) १४ १२ [शम् सुखनाम निघ० ३ ६ ततोऽतिशायने तमप् । ततो मत्वर्थे अर्श आदित्वाद् अच्]

शन्तमा अतिशयेन शङ्कराणि (शर्माणि), सुखकराणि (औषधानि) ३ १३ ४, २ ३३.१३ [शन्तमम् इति व्याख्यातम् । तत शेर्लोपश्छन्दसि]

शन्तमेभिः अतिशयेन सुखकारकै. (भेषजेभि = औषधै) २ ३३ २ [शन्तममिति व्याख्यातम् । ततो भिस ऐसादेशो न भवति छन्दसि]

शन्ताती श सुखस्य कर्त्तारौ (अश्विना=सभासेनेशौ), प्र०—अत्र 'शिवशमरिष्टस्य करे' अ० ४.४ १४३ इति तातिल्-प्रत्यय १ ११२ २० [शम् सुखनाम निघ० ३ ६ तत करोत्यर्थे 'शिवशमरिष्टस्य करे' सूत्रेण तातिल्]

शपथ्यात् शपथे भवात् कर्मण १२ ९० [शपथ-प्राति० भवार्थे यत् । शपथ =शप आक्रोशे (दिवा०) धातो 'शीङ्शपिरुगमि०' उ० ३ ११३ सूत्रेण अथ]

शपन्तम् आक्रोशन्तम् (मनुष्यम्) १ ४१ ८ [शप आक्रोशे (भ्वा०) धातो शतृ]

शपामहे उपालम्भामहे २० १८ शपामहे ६ २२ [शप आक्रोशे (भ्वा०) धातोर्लट्]

शफच्युतः शफेषु गवादिखुरचिह्नेषु च्युत पतित आसिक्तो य स (रेणु =धूलि) १ ३३ १४ [शफ-च्युत-पदयो समास]

शफवत् शफा विद्यन्ते यस्मिन् पदे तत् ३ ३९ ६ शफेन तुल्यम् ५ ८३ ५ [शफप्राति० मतुप् । शफप्राति० वा तुल्यार्थे वति]

शफात् खुरात्, श फणति प्रापयतीति शफो वेगस्त-स्माद्वा, प्र०—अत्र 'अन्येभ्योऽपि दृश्यते' इति ड , पृषोदरादि-त्वान्मलोपश्च १ ११७ ६ खुरादिव जलसेकस्थानात् १ ११६ ७ **शफानाम्**=श फणन्ति तेषाम् (वेगानाम्) १ १६३.५ [शम् उपपदे फण गतौ (भ्वा०) धातो 'अन्येभ्योऽपि दृश्यते' इति ड । पृषोदरादिना पूर्वस्य मलोप]

शफाविव यथा खुरौ परस्परेण सम्बद्धौ २ ३९ ३. [शफौ-इव-पदयो समास]

शबलाः किञ्चिच्छ्वेता (पश्वादय) २४ १० [शप आक्रोशे (भ्वा० दिवा०) धातो 'शमेर्बश्च' उ० १ १०५. सूत्रेण कल बकारश्चान्तादेश]

शम् कल्याणकारक ज्ञानम् ८ २६ रोगनिवारणम् ८ २६ सुख कल्याण वा ५ ७४ ९ सुखकर (भग = ऐश्वर्य्यम्) ७ ३५ २ सुखकरम् (वच) ५ ११ ५ कल्याण-

दिषु) ३.५५.४ [शीङ् स्वप्ने (अदा०) धातो 'सञ्ज्ञाया समजनिषदनिपत०' अ० ३ ३ ६६ सूत्रेण क्यप्। तत स्त्रिया टाप्। 'अयङ् यि क्ङिती' ति अयङ्। यलोपश्छान्दस। शीङ् स्वप्ने (अदा०) धातो 'एरच्' इत्यच्। ततष्टाप्]

शयुत्रा यौ शयून् शयानान् त्रायतस्तौ (अश्विनौ=शिल्पिजनौ) १ ११७ १२ [शयुत्रप्राति० द्विवचनस्याकारादेश शयुत्र =शयूपपदे त्रैङ् पालने (भ्वा०) धातोर्ड। शयुरिति व्याख्यातम्]

शयुत्रा शयनस्थानम् ऋ० भू० २१०, ऋ० ७ ८ १८ २ [शयुत्रा शयने नि० ३ १५]

शये शयन कुर्याम् ४ ३० ११ [शीङ् स्वप्ने (अदा०) धातोर्लटि उत्तमैकवचनम्]

शये शेते, प्र०—अत्र 'लोपस्त आत्मनेपदेषु' अ० ७ १ ४१ इति तलोप १ ३२ ६ गर्भाशय मे ठहरता है अथर्व० ६ ३ ६ स० वि० २०४, [शीङ् स्वप्ने (अदा०) धातोर्लट्। 'लोपस्त आत्मनेप्रदेषु' इति तलोप शये आशेते नि० ११ ४८]

शरणम् आश्रयितु योग्यम् (छर्दि गृहम्) ६ ४६ ६ आश्रयम् २ ३ ८ **शरणे**=शरणागतपालने कर्म्मणि ७ १६ ८ गृहे १ १५० १ **शरणैः**=दु खादीना हिसनै ३.६२ ३ [शरणम् गृहनाम निघ० ३ ४ शरणा शरणम् नि० ५ २२]

शरणा शरणो शत्रूणा हिंसकौ (वाहू=भुजौ) ६ ४७ ८. [शरणप्राति० द्विवचनस्याकारादेश। शरण = शॄ हिंसायाम् (क्र्या०) धातोर्बाहु० औणा० युच्]

शरणिम् अविद्यादिदोषहिंसिका विद्याम्, प्र०—अत्र शॄधातोर्बाहुलकादौणादिकोऽणि प्रत्यय १ ३१ १६ [शॄ हिंसायाम् (क्र्या०) धातोर्बाहु० औणा० अनि]

शरत् शृणाति येन सा (ऋतु) १३ ५७ शरदृतु १० १३ अर्द्धरात्र ३१ १४ **शरदः**=शरदृत्वन्तान् सवत्सरान् १ ७२ ३ शरदाद्यृतून् २ ४७ १७ शरदृतूपलक्षितान् सवत्सरान् १ ८६ ६ शरदृतव २ २७ १० शत वर्षाणि ३ ३६ १० शत वर्ष पर्यन्त स० वि० १२१, अथर्व० १४ १ ४२ **शरदे**=शरदृतौ सुखाय २४ ११ **शरद्भिः**=शरदादिभि ऋतुभि १ ८६ ६ [शॄ हिंसायाम् (क्र्या०) धातो 'शॄदृभसोऽदि उ० १ १३० सूत्रेणादि। शरद =शरच्छ्ना अस्यामोषधयो भवन्ति शीर्णा आप इति वा नि० ४ २५ शरद् वै बर्हिरिति हि शरद् वर्हियां इमा ओषधयो ग्रीष्महेमन्ताभ्या नित्यक्ता भवन्ति ता वर्षा वर्धन्ते ता शरदि वर्हिषो रूप प्रस्तीर्णा शेरे तस्माच्छरद् वर्हि श० १ ५ ३ १२ बर्हिर्यजति शरदमेव शरदि हि वर्हिष्ठा ओषधयो भवन्ति कौ० ३ ४ शरदि ह खलु वै भूयिष्ठा ओषधय पच्यन्ते जै० उ० १ ३५.५ तस्माच्छरदमोषधयो ऽभिसपच्यन्ते ता० २१ १५ ३ स्वधा वै शरद् श० १३ ८ १ ४ शरत् प्रतिहार प० ३ १ (प्रजापति) शरदम् प्रतिहारम् (अकरोत्) जै० उ० १ १२ ७ शरद् वै वैश्यस्यर्त्तु तै० १ १ २ ७ शरद्वा अस्य (रुद्रस्य) अम्बिका स्वसा तै० १ ६ १० ४ शरदुत्तर पक्ष (सवत्सरस्य) तै० ३ ११ १० ४ शरत्पुच्छम् (सवत्सरस्य) तै० ३ ११ १० ३ यद् विद्योतते तच्छरद (रूपम्) श० २ २ ३ ८ षड्भिर्मैत्रावरुणै (पशुभि) शरदि (यजते) श० १३ ५ ४ २८ वर्षा शरदौ सारस्वताभ्याम् (अवरुन्धे) श० १२ ८ २ ३४ शरद्ब्रह्मा तस्माद् यदा सस्य पच्यते ब्रह्मण्वत्य प्रजा इत्याहु श० ११ २ ७ ३२ शरदेव सर्वम् गो० पू० ५ १५. अन्न वै शरद् मै० १ ६ ६]

शरद्वान् शरदो या ऋतवस्ता विद्यन्ते यस्मिन् स (वृषभ =सूर्य) १ १८१ ६ [शरद्प्राति० मतुप्]

शरभम् शल्यकम्, अ०—शल्यकीम् १३ ५१ [शॄ हिंसायाम् (क्र्या०) धातो 'कॄशॄशलिकलिगर्दिभ्योऽभच्' ३ १२२ सूत्रेणाभच्]

शरवे हिसनाय ६ २७.६ दुष्टाना हिसकाय (सेनापतये) ४ ३ ७ **शरुः**=दुष्टाना हिंसका ऋष्टि १ १७२ २ हिंसक (सैनिकजन) १ १८६ ६ [शॄ हिसायाम् (क्र्या०) धातो 'शॄस्वृस्निहित्रपि०' उ० १ १० सूत्रेण उ]

शरव्यायै शराणा निर्माणाय ३० ७ शरवीषु कुशलायै (स्त्रियै) २४ ४० **शरव्ये**=ये शरान् व्याप्नुवन्ति तत्र साध्वि (सेने) ६ ७५ १६ शरेषु बाणेषु साध्वी स्त्री तत्सम्बुद्धौ (सेनानीपत्नि) १७ ४५ [शरवीप्राति० 'तत्र साधु' रित्यर्थे कुशलार्थे वा यत्। तत स्त्रिया टाप् शरवी =शरोपपदे वी गतिव्याप्त्यादिषु (अदा०) धातो क्विप् शरुप्राति० वा कुशलार्थे छान्दसो यत्। ततष्टाप् स्त्रियाम्]

शरसि तडागे ३६ ५ [शरस्प्राति० सप्तमी। सरस्-शॄ हिंसायाम् (क्र्या०) धातोरौणा० असुन्। सरस्प्राति० वा सप्तमी। वर्णव्यत्ययेन सकारस्य शकार]

शरसे हिंसकाय (पुरुषाय) ३८ १५ [शॄ हिसायाम् (क्र्या०) धातोरौणा० असुन्]

शरस्य हिंसकस्य (दुष्टजनस्य) सकाशात् १ ११६ २२ [शॄ हिसायाम् (क्र्या०) धातो पचाद्यच् कर्त्तरि]

सेनाधीशाय वा, प्र०—अत्राऽन्तर्भावितो ण्यर्थ १६ ४१ सुखस्वरूपाय (परमेश्वराय) प० वि०, १६ ४१ कल्याणस्वरूप, कल्याणकर, मोक्षसुखस्वरूप, मोक्षसुख के करने वाले (ईश्वर) के लिए आर्याभि० २ २६, १६ ४१ [शम् इत्युपपदे भू सत्तायाम् (भ्वा०) धातो कर्त्तरि पचाद्यच् । अन्तर्भावितो ण्यर्थ]

शम्भविष्ठः योऽतिशयेन श भावयति स (जन) ५ ४२.७. सुखस्य भावयितृतम (विद्वज्जन) १ १७१ ३ अतिशयेन कल्याणकारक (परमेश्वर) ४ ४३ २ [शम्-भविष्ठपदयो समास । भविष्ठ+भू सत्तायाम् (भ्वा०) धातोस्तृजन्तादतिशायन इष्ठन् । अन्तर्भावितो ण्यर्थ]

शम्भविष्ठा अतिशयेन सुख भावुकौ (जलाग्नी) २.३९ ५ अतिशयेन सुखस्य भावयितारौ (अश्विना+स्त्रीपुरुषौ) ५ ७६ २ [शम्भविष्ठ इति व्याख्यातम् । ततो द्विवचनस्याकारादेश]

शम्भु य श सुख भावयति स (पति स्वामीश्वरो राजा वा) ७ ३५ १० सुखसम्पादकम् (क्षोद =जलम्) १ ६५ ३ [शम्-उपपदे भू सत्तायाम् (भ्वा०) धातो 'मितद्र्वादिभ्य उपसख्यानम्' अ० ३ २ १८० वा०सूत्रेण डु । शम्भु सुखभू नि० ५ ३]

शम्भुवः ये श सुख भावयन्ति ते (आदित्या देवा) १ १०६ २ सुख भवति यस्मात्तस्य (विदुष), प्र०—अत्र 'कृतो वहुलम्०' इत्यपादाने क्विप् १ १०५ ३ [शम् उपपदे भू सत्तायाम् (भ्वा०) धातो क्विप्]

शम्भुवा यौ श सुख सम्भावयतस्तौ (स्त्रीपुरुषौ) २ ४१ १९. यौ सुख भावयतस्तौ (इन्द्राग्नी=सभासेनेशौ) ६ ६० ७. [शम्भूरिति व्याख्यातम् । ततो द्विवचनस्याकारादेश]

शम्भू श सुख भावुकौ (राजामात्यौ) ४ ४७ ७ [शम्भुरिति व्याख्यातम् । ततो द्विवचने रूपम्]

शम्भूः य श सुख भावयति स, श कल्याण भावयति स (विद्वज्जन) १८ ४५ सुख भावुक (छन्द =आनन्दकरोऽनुभव) १५ ४ सुखकर्त्ता (वरानना स्त्री) स० वि० १३८, अथर्व० १४ २ २६ [शम् उपपदे भू सत्तायाम् (भ्वा०) धातो क्विप् । अन्तर्भावितो ण्यर्थ]

शम्यति शाम्यति शम प्रापयति, प्र०—अत्र 'वाच्छन्दसि' इति दीर्घत्वाऽभाव २३ ३९ **शम्यन्तु**=भा०—शान्त्या जितेन्द्रियत्व प्रापयन्तु २३ ३५ अ०—शम प्रापयन्तु २३ ३४ आनन्दन्तु २३ ३७ [शमु उपशमने (दिवा०) धातोर्लट् । अन्यत्र लोट् । 'शमामष्टानाम्०' इति दीर्घत्व न भवति छान्दसत्वात्]

शम्यन्तः शान्ति प्रापयन्त (मरुत =मनुष्या.) २३ ४१ [शमु उपशमने (दिवा०) धातो शत्रन्ताज्जस् । दीर्घत्वाऽभावश्छान्दस]

शम्यन्तीः दुष्टस्वभाव निवारयन्त्य (मातर) २३ ४२ शम प्राप्नुवती प्रापयन्त्यो वा (स्त्रिय) २३ ३७ [शमु उपशमने (दिवा०) धातो शत्रन्तान् ङीप् । दीर्घत्वाऽभावश्छान्दस]

शम्याः शम्या कर्मणि भवा (आप =जलानि) ३ ३३ १३ [शमी कर्मनाम निघ० २ १ ततो भवार्थे यत् । ततष्टाप् । जिह्मेव शम्या श० १ २ १ १७]

शयते शेते, प्र०—अत्र 'वहुल छन्दसि' इति शपो लुङ् न १ ३२ ५ **शयथे**=शयन करोति ६ १७ ९ [शीङ् स्वप्ने (अदा०) धातोर्लट् । 'वहुल छन्दसी' ति शपो लुग् न भवति । शयथे प्रयोगे तकारस्य थकारो वर्णव्यत्ययेन]

शयथाय शयनाय ६ १८ ८ 'शीङ्शपि०' उ० ३ ११३ सूत्रेण [शीङ् शये (अदा०) धातोर् अथ प्रत्यय]

शयध्यै शयितुम् ६ ६२.३. [शीङ् स्वप्ने (अदा०) धातोस्तुमर्थेऽध्यैप्रत्यय]

शयवे शयानाय (जसुरये=हिंसकाय जनाय) १ ११६ २२ सुखेन शयनशीलाय (मनवे=राज्ञे) १ ११२ १६ **शयुम्**=य शेते तम् (पुत्रम्) ४ १८ १२ **शयुः**=योऽभिव्याप्य शेते (वरुण =परमात्मा) ३ ५५ ६ य प्रलये सर्वाणि भूतानि शाययति स (ईश्वर) [शीङ् स्वप्ने (अदा०) धातो 'भृमृशीङ्तॄचरि०' उ० १ ७ सूत्रेण उ]

शयाण्यकः पक्षिविशेष २४ ३३ [शीङ् स्वप्ने (अदा०) धातोर्वाहु० औणा० अण्डन् । अकारस्याकारश्छान्दस]

शयानम् कृतशयनमिव वर्त्तमानम् (अहि=मेघम्) २ १२ ११ शयानमिवाचरन्तम् (मेघम्) ५ ३२ २ **शयानाय**=यो शेते तस्मै (जनाय) २२ ७ **शयानेभ्यः**=प्राप्तनिद्रेभ्य (राजपुरुपेभ्य) १६ २३ [शीङ् स्वप्ने (अदा०) धातो शानच् । अथवा शयानप्राति० वा आचारे क्विप्]

शयाना यौ शयाते तौ (पितरा=पितरौ) ४ ३३ ३. [शयानमिति व्याख्यातम् । ततो द्विवचनस्याकारादेश]

शयासु शेरते यासु विद्युदादय पदार्थास्तासु (प्रकृत्या-

शर्यातम् शरो हिंसकान् प्राप्तम् (सेनाध्यक्षम्) १ ११२ १७ [शर्-यातपदयो समास । शर्=शॄ हिंसायाम् (क्र्या०) धातो 'अन्येभ्योऽपि दृश्यन्ते' इति विट् । यातम्=या प्रापणे (अदा०) धातो कर्त्तरि क्त]

शर्याभिः गतिभि ७ १७ **शर्याम्**=वायुताडनाऽऽख्या क्रियाम् १ १४८ ४ [शॄ हिंसायाम् (क्र्या०) धातोर्यत् तत. स्त्रिया टाप् । औणा० वा यत् । शर्या अङ्गुलिनाम निघ० २ ५ शर्या अङ्गुलयो भवन्ति । सृजन्ति कर्माणि । शर्या इषव शरमय्य नि० ५ ४]

शर्यैः हिंसतु ताडितुमर्हैर्यन्त्रै १ ११९ १० पुन पुनर्हननप्रेरणगुणै ऋ० भू० १९९, ऋ० १.८.२१.१०, [शॄ हिंसायाम् (क्र्या०) धातोर्यत्]

शर्वम् विज्ञातारम् (परमेश्वरम्) ३९ ८ **शर्वस्य**=सुखप्रापकस्य (जनस्य) ३९ ९ **शर्वाय**=दुष्टाना हिंसकाय (राजपुरुषाय) १६ २८ **शर्वाः**=हिंसका (जना) १६ ५७ [शॄ हिंसायाम् (क्र्या०) धातोर्वाहु० औणा० वन् प्रत्यय]

शर्वरीः रात्री ५ ५२ ३ [शॄ हिंसायाम् (क्र्या०) धातो 'कृगॄशॄ०' उ० २ १२१ सूत्रेण ष्वरच् । पित्त्वान् ङीप् स्त्रियाम् । शर्वरी रात्रिनाम निघ० १ ७]

शर्वा शासनवज्रेण २ १२ १० [शॄ हिंसायाम् (क्र्या०) धातो. कर्त्तरि वनिप् । 'सुपा सुलुक्०' सूत्रेण टास्थाने सु]

शर्वा सर्वदुःखहिंसक (सभाद्यध्यक्ष) १ १०० १८ [पूर्वपदे व्याख्यातम्]

शर्वा शर्वाणि हिंसनानि ४ २८ ३ [शर्वन् इति व्याख्यातम् । तत शेर्लोपश्छन्दसि]

शर्वाः हिंसका १६ ५७ [शॄ हिंसायाम् (क्र्या०) धातोर्वाहु० औणा० वन् । यच्छर्वोऽग्निस्तेन कौ० ६ ३ अग्निर्वै स देवस्तस्यैतानि नामानि । शर्व इति यथा प्राच्या आचक्षते भव इति यथा वाहीका, पशूना पती रुद्रोऽग्निरिति श० १ ७ ३ ८ आपो वै शर्व, अद्भ्यो हीद सर्व जायते श० ६ १ ३ ११ एतान्यष्टौ (रुद्र, शर्व, पशुपति, उग्र, अशनि, भव, महान्देव, ईशान) अग्निरूपाणि । कुमारो नवम श० ६ १ ३ १८]

शल्मलिः वृक्षविशेष २३ १३ **शल्मलौ**=शल्मलिवृक्षादौ ७ ५० ३ [शल्मलि सुशरो भवति शरवान् वा नि० १२ ८ शल्मलिर्वनस्पतीना वर्षिष्ठ वर्धते श० १३ २ ७ ४]

शल्यकः कण्टकपक्षयुक्त श्वावत् (पशु) २४ ३५. [शल्यप्राति० सज्ञाया कन् । शल्य =शल चलनसवरणयो. (भ्वा०) धातो 'सानसिवर्णसि०' उ० ४.१०७ सूत्रेण यत् निपात्यते । शल्यक तस्या (गायत्र्या) अनु विसृज्य कृशानु सोमपाल सव्यस्य पदो नखमच्छिदत् तच्छल्यकोऽभवत् तस्मात् स नखमिव ऐ० ३ २६]

शल्यानाम् शस्त्राणाम् १६ १३ [पूर्वपदे व्याख्यातम्]

शवसः अनन्तवलस्य प्रमितवलस्य वा १ ११ २. वलस्य सैन्यस्य ६.४४.४ वलवन्त (सूरय =विद्वज्जना) ४ ३४.६ **शवसा**=विद्यासुशिक्षावलेन १ ११० ७. शरीरात्मवलेन १.१०० १४ वलेन परिचरणेन वा, प्र०—शवतीति परिचरणकर्मा निघ० ३ ५ अस्मादसुनि कृति रूपसिद्धि ५ ११ ५ वलयुक्तेन सैन्येन १ १०० १२ **शवसे**=सैन्यबलाय १ ५७ १ **शवः**=वलमुदक वा ३३ ९७ वलहेतुम् (रसमन्न वा) ६ ४३ ४ गमनम् ५ ५८ ७ **शवोभिः**=सेनाद्यैर्वलै १ १३० ४ [शव गतौ (भ्वा०) शवति गतिकर्मा निघ० २ १४ परिचरणकर्मा निघ० ३ ५ तत औणा० असुन् । शव उदकनाम निघ० १ १२ धननाम निघ० २ १० वलनाम निघ० २ ९ शवसा वलेन नि० १० २९ शवसो महतो वलस्य । नि० १२ २१ (यजु० १२ १०६) वल वै शव श० ७ ३ १.२९]

शवलाः किञ्चिच्छ्वेता (पशव) २४ १० [शप आक्रोशे (भ्वा०) धातो 'शमेर्वश्च' उ० १ १०५ सूत्रेण कल । वकारश्चान्तादेश]

शवसान वलयुक्त (इन्द्र=सभाध्यक्ष) १ ६२ १३ **शवसानम्**=वलवन्तम् (इन्द्र=राजानम्) ६ ३७ ३ **शवसानाय**=विज्ञानाय ३४ १६ ज्ञानवते (सभाद्यध्यक्षाय) १ ६२ २ ज्ञानवलयुक्ताय (सभाद्यध्यक्षाय) १ ६२ १ ब्रह्मचर्यसुशिक्षाभ्या शरीरात्मवलयुक्ताय (पुरुपाय) ३४ १७ [शवस् वलनाम निघ० २ ९ ततस्तत्करोति इत्यर्थे क्विप् । तत क्विवन्तात् शवस्धातो शानच् । शवसानम् अभिबलायमानम् नि० १० ३ शव गतौ (भ्वा०) धातोर्वा 'छन्दस्य मानच् शुजृभ्याम्' उ० २ ८६ सूत्रेणासानच्]

शवसावन् वलयुक्त (सभापते) १ ६२ ११ [शवस् वलनाम निघ० २ ९ ततो मतुप्-प्रत्यये छान्दस रूपम्]

शवसिन् वहुविध शवो वल विद्यते यस्य तत्सम्बुद्धौ (इन्द्र=राजन्) ७ २८ २ [शवस् वलनाम निघ० २ ९. ततो मत्वर्थ इनि]

शवस्यानि शवसु धनेषु साधूनि वीरसैन्यानि

शरासः वेणुदण्डसदृशा अन्तश्छिद्रास्तृणविशेषस्था (दर्भास =कुशा) १ १९१ ३ [शरप्राति० जसोऽसुक्। शॄ हिंसायाम् (क्र्या०) धातो 'ऋदोरप्' त्यप्। कर्त्तरि वाऽच्। शर शृणाते नि० ५ ४]

शरिरस्य अन्तरिक्षस्य १३ ४६ [शॄ हिंसायाम् (क्र्या०) धातोर्बाहु० औणा० इरच्]

शरीतोः शरीतु दुष्टस्वभाव हिंसितु शक्नोति य (इन्द्र =ऐश्वर्यवान् राजा) ३ ५३ १७ [शॄ हिंसायाम् (क्र्या०) धातो- 'कृतो बहुल वा' इति कर्त्तरि तोसुन्। इटो दीर्घश्च छान्दस]

शरीरम् शीर्यते हिंस्यते यत्तत् (वपु) १ ३२ १० **शरीराणि**=आश्रयान् ३५ ५. देहा १८.३ [शॄ हिंसायाम् (क्र्या०) धातो 'कॄशॄपॄकटि०' उ० ४ ३० सूत्रेण ईरन्। शरीर शृणाते शम्नातेर्वा नि० २ १६ शरीरे आदित्ये नि० १२ ३७ अथ यत्सर्वमस्मिन्नश्रयन्त तस्मादु शरीरम् श० ६ १ १ ४ अशरीर वै रेतोऽशरीरा वपा यद्वै लोहित यन्मास तच्छरीरम् ऐ० २ १४ शरीर हृदये (श्रितम्) तै० ३ १० ८ ७]

शर्ध प्रशंसितबलयुक्त (विद्वज्जन) ५.२८ ३. दुष्टगुण-शत्रुनाशक बलम्, प्र०—अत्र 'सुपा सुलुक्०' इति सोर्लुक् ३३ १२ **शर्धम्**=बलयुक्तम् (धाम=स्थानम्) १ १२२ १२. बलहेतुम् (रेत) ३३ ११. बलिनम् (युवानम्) १ ७१ ८ **शर्धः**=शरीराऽऽत्मबलम् ७ ४४ ५ सैन्यम् १ ७ ४१ [शर्ध बलनाम निघ० २ ९ शृधु प्रसहने (चुरा०) धातो पचाद्यच्]

शर्धत् उत्सहेत् ७ २१ ५ [शर्धत्=उत्सहताम् नि० ४ १९ शृधु प्रसहने (चुरा०) धातोर्लेट्]

शर्धतः बलवत (दुर्जनस्य) २ २३ १२ **शर्धताम्**=बल कुर्वताम्, (वीरजनानाम्), प्र०—बलवाचिशर्धशब्दात् करोत्यर्थे क्विप् तत शतृ १५ ४०. **शर्धते**=य शर्द्धं करोति तस्मै (दुर्जनाय) २ १२.१० बलाय ६ २४ ८ **शर्धन्तम्**=बल कुर्वन्तम् (दुष्कर्म) ७ १८ ५ **शर्धन्तः**=बलयन्त (अर्य =अरयदशत्रव) ७ ३४ १८ [शर्ध बलनाम निघ० २ ९. तत करोत्यर्थे क्विवन्ताच्छतृ]

शर्धनीतिः शर्द्धस्य बलस्य नीतिर्नयन प्रापण यस्य स (सभेश) ३३ २६ बलस्य सैन्यस्य नीतिर्नायिक (सेनापति), प्र०—अत्र नीतौ कर्त्तरि क्तिच् ३ ३४ ३ [शर्ध-नीतिपदयो समास। शर्ध बलनाम निघ० २ ९ नीति =णीञ् प्रापणे (भ्वा०) धातो स्त्रिया क्तिन्। कर्त्तरि क्तिज् वा]

शर्धमानः सहमान (विद्वज्जन) २० ३८ [शृधु प्रसहने (चुरा०) धातो शानच्। व्यत्ययेनात्मनेपदम्]

शर्धस्तरः अतिशयेन बलवान् (शूरवीरो जन) १ १२२ १० [शर्ध बलनाम निघ० २ ९ ततोऽतिशायने तरप्]

शर्ध्यम् शर्द्धेषु बलेषु भवम् (रथ =यानम्) १ ११९ ५ [शर्ध बलनाम निघ० २ ९ ततो भवार्थे यत्]

शर्म शृण्वन्ति दुखानि यस्मिन् तद् गृहम् २६ १०. सर्वदुखरहित सुखम्, शृणाति हिनस्ति दुखानि यत्तत् (सुखम्) १ १७ ८ सुख निवास वा १ ४६ १५ गृहस्वरूप सुखकारक वा (यानम्) १ ३४ ६ श्रेष्ठ शरण सुख वा ३४ २८. सुखसाधक गृहम् १७ ४८. सुखहेतु, अ०—सुखद (यज्ञ) १ १९ **शर्मणा**=विग्रहेण ७.५१ १ गृहसम्बन्धि-सुखेन १ २२ ११ **शर्मणि**=नित्यसुखे, अ०—खल्वाज्ञा-पालनाख्ये व्यवहारे १ ४ ६ आश्रये ३३ १७ [शॄ हिंसायाम् (क्र्या०) धातो 'सर्वधातुभ्यो मनिन्' उ० ४ १४५ सूत्रेण मनिन्। शर्म गृहनाम निघ० ३ ४ सुखनाम निघ० ३ ६ शर्म शरणम् नि० ९ १९ चर्म वाऽएतत् कृष्णस्य (मृगस्य) तन्मानुष शर्म देवत्रा श० ३.२ १ ८ (ऋ० ३ १३ ४) वाग्वै शर्म ऐ० २ ४० (ऋ० ३ १३ ४) अग्निर्वै शर्माण्यन्ना-द्यानि यच्छति ऐ० २ ४१]

शर्म शर्माणि सुखानि १.८५ १२ गृहाणि ६ ४६ १२ [शर्मन् इति व्याख्यातम्। ततो जस 'सुपा सुलुग्०' इति लुक्]

शर्मन् न्यायगृहे, प्र०—अत्र 'सुपा सुलुक्०' अ० ७ १ ३९. इति ङेर्लुक् 'न ङि-सम्बुद्धचो' अ० ८ २ ८ इति नलोपाभाव ७ ३५ [शर्मन् इति व्याख्यातम्। तत 'सुपा सुलुग्०' इति ङेर्लुक्]

शर्मसदः ये शर्मणि सुखे सीदन्ति ते (वीरजना) १ ७३.३ ये गृहे सीदन्ति ते (वीरा =क्षात्रधर्मयुक्ता जना) ३ ५.५ २१ [शर्मन् इत्युपपदे पद्लृ विशरणगत्यवसादनेषु (भ्वा०) धातो कर्त्तरि क्विप्। शर्मन्निति व्याख्यातम्]

शर्यणावति शर्यणोऽन्तरिक्षदेशस्तस्याऽदूरभवे (स्थाने) १ ८४ १४ हिंसनीय पदार्थों से युक्त भूमितल मे स० वि० १९५, ९ ११३ १ [शर्यणप्राति० अदूरभवार्थे मतुप् छान्दस। पूर्वस्य च दीर्घ]

शर्यहा हन्ताऽव्यहन्ता (तिग्मश्रृङ्ग =सूर्य) ६ १६ ३९ [शर्योपपदे हन हिंसागत्यो. (अदा०) धातो क्विप्। शर्यम्=शॄ हिंसायाम् (क्र्या०) धातोर्यत्]

शश्रमाणः भृश श्रम कुर्वन् (बलाध्यक्षो न्यायाधीश) ४ १२ २ [श्रमु तपसि खेदे च (दिवा०) धातोर्यङ्-लुगन्ताच्छानच् । व्यत्ययेनात्मनेपदम्]

शश्रमाणा तपोऽन्विता (विदुषी स्त्री) १ १७९.१ [शश्रमाण इति व्याख्यातम् । तत स्त्रिया ङीष्]

शश्वचै परिष्वङ्गाय ३ ३३.१० [शश्वचै परिष्वजनाय नि० २.२७]

शश्वच्छश्वत् व्यापक व्यापक वस्तु ३ ३६ १. [शश्वत्पदस्य वीप्साया द्वित्वम् । शश्वदिति निपातश्चादिषु पठ्यते]

शश्वत् निरन्तरम् ६ २१ ८. अनादिरूपम् (क=सुख-सम्पादक ज्ञानम्) १ ४७ १० अनादिस्वरूपत्वाज्जगत्कारणात् १ ३० १६ **शश्वतः**=निरन्तरान् (पथिकान्) ५ ५२ २ सनातन जगत्कारण का स० प्र० २३८, १० ४८ १ सनातनविद्यायुक्तान् (विद्वज्जनान्) १ १३५ ७ अनादिभूतस्य (प्रजाजनस्य) ७ १९.१ अनादिस्वरूपान् पदार्थान् २ १२ १०. अनादिस्वरूपस्य परमेश्वरस्य सम्बन्धात् १ ७२ १ **शश्वता**=सनातनेन गुणेन १९ ४ **शश्वन्तम्**=अनादिभूत वेदविद्याविषयम् ६ ६ १ १ **शश्वन्तः**=निरन्तर वर्त्तमाना (वाजा=विज्ञानवन्तो जना) १७ ७६ अनादिभूता जीवा ५ १४ ३ अनादिभूता. प्रवाहेप्यनित्या पृथिव्यादय ७ १ ३ निरन्तरा (शत्रव) ७ १८ १८ [शश्वन्तौ शश्वद्गामिनौ विश्वगामिनौ बहुगामिनौ वा नि० १३ ३७ शश्वत् बहुनाम निघ० ३ १. शश्प्राति० मतुप् । शश्=शश प्लुतगतौ (भ्वा०) धातो क्विप्]

शश्वतः निरन्तरो व्याप्त धर्म ५ १२.४

शश्वतीनाम् अनादिभूताना घटिकानाम् १ ११३ १५ सनातनीनामुषसा प्रकृतीना वा १ १२४ २ प्रवाहरूपेणानादीनाम् (उषसाम्) १ ११३ ८ अनादिभूताना प्रकृति-जीवाख्याना प्रजानाम् ३ ५६ ३ **शश्वतीः**=सनातन्य (प्रजा) ३ ९ ४ अविनश्वरा (इष=प्रजा) ६ २९ अनादिस्वरूपा (प्रजा) १ २७ ७ [शश्वत्प्राति० स्त्रिया ङीप्]

शश्वत्तमम् अतिशयेनाऽनादिभूतम् (सोमम्=ऐश्वर्य-योगम्) ३ ३५ ६ अनादिस्वरूपमनुत्पन्न कारणम् २ ८ १ अतिशयितमनादिरूप वेदबोधम् १२ ५१ सदैव वर्त्तमानम् (विज्ञानम्) ३ ७ ११ [शश्वत्प्राति० अतिशायने तमप् । शश्वत्तमा शाश्वतिकतमा नि० ४ १९]

शश्वत्तमा याऽतिशयेन सनातनी (उषा) १ १२४ ४ [शश्वत्तममिति व्याख्यातम् । तत स्त्रिया टाप्]

शश्वधा शश्वदेव ३ ३३ ७

शश्वन्ता सनातनौ (जडचेतनौ) १ १६४ ३८ [शश्वन्तौ शश्वद्गामिनौ नि० १३ १७ द्विवचनस्याकारश्छान्दस]

शश्वान् शीघ्रगतिमान् (विद्वज्जन), प्र०—शश प्लुतगतौ इति धातो क्विबन्तान्मतुप् २.३८ ६ [शश प्लुतगतौ (भ्वा०) धातो क्विप्-प्रत्यये शश् इति रूपम् । ततो मतुप्]

शष्पाणि आहृत्य सशोध्य ग्राह्याणि धान्यानि १९ १३ **शष्पैः**=हिंसकै (जनै), प्र०—अत्रौणादिको बाहुलकात् कर्त्तरि प २१ ४२ हिंसनै २१ २९ दीर्घलोमभि १९ ८१ [शष हिंसायामर्थे (भ्वा०) धातो खष्पशिल्पशष्प०' उ० ३ २८ सूत्रेण प्रत्ययान्तो निपात्यते]

शष्पिञ्जराय पड्डुत्प्लुत पिञ्जर बन्धन येन तस्मै (सेनाधीशाय) १६ १७ **शष्पिञ्जराः**=पड्ढसक पिञ्जरो वर्णो येषान्ते (सर्पादय) १९ ५८ [शष् पिञ्जरपदयो समास । शष्=शश प्लुतगतौ (भ्वा०) शष हिंसायामर्थे (भ्वा०) धातोर्वा क्विप् । पिञ्जर=पिजि वर्णे (अदा०) धातोर् बाहु० औणा० अर]

शष्प्याय शष्पेषु तृणादिषु साधवे (पुरुषाय) १६ ४२ [शष्पप्राति० साध्वर्थे यत् । शष्पमिति व्याख्यातम्]

शसनम् हिंसन ताडनम् १ १६३ १२ शसन्ति हिंसन्ति यस्मिँस्तद् युद्धम् २९ २३ [शसु हिंसायाम् (भ्वा०) धातोरधिकरणे ल्युट्]

शसा प्रशसया ५ ४१ १८ [शसु प्रशसायाम् (भ्वा०) धातो सम्पदादित्वात् क्विप् । ततस्तृतीयैकवचनम्]

शस्त प्रशसत ४ ३७ ८ छिन्त २५ ४१ ताडयत हिंस्त १ १६२ १८ [शसु स्तुतौ (भ्वा०) धातोर्लोट् । 'बहुल छन्दसी' ति शपो लुक् । अथवा शसु हिंसायाम् (भ्वा०) धातोर्लोट् । शपो लुक्]

शस्तम् प्रशसनीयम् (श=सुखम्) ५ ४७ ७ प्रशसितम् (बर्हि=उत्तमस्थानम्) ३ ५३ ३ स्तुत्य कर्म ३३ २४ **शस्ते**=प्रशसिते (उक्थे=वक्तव्ये) ४ २० १० [शसु स्तुतौ (भ्वा०) धातो क्त]

शस्तिम् प्रशसाम् ४ ३ ३ [शसु स्तुतौ (भ्वा०) धातो स्त्रिया क्तिन्]

१.१०० ५ [शवस् धननाम निघ० २ १ तत साध्वर्थे यत्]

शविष्ठ बहु शवो बल विद्यते यस्य स शवस्वान् सोऽतिशयितस्तत्सम्बुद्धौ (सभापते), प्र०—अत्र शवशब्दाद् भूम्न्यर्थे मतुप् तत इष्ठन् 'विन्मतोर्लुक्' अ० ५ ३ ६५ इति मतुपो लुक् 'टे' अ० ६ ४ १५५ अनेन टिलोप ६.३७ अतिशयेन बलवत्, प्राप्तविद्य (विद्वज्जन) १ १२७ १. **शविष्ठाः**=अतिशयेन बलवन्त (अ०—राजपुरुषा) १० ४ [शवस् बलनाम निघ० २ ९ ततो मतुवन्तादतिशायन इष्ठन् । 'विन्मतोर्लुक्' अ० ५ ३ ६५ इति मतुपो लुक्]

शविष्ठा अतिशयेन नित्यबलसाधकौ (होतृयजमानौ) ८ ५९ अतिशयेन बलवन्तौ (सभासेनेशौ) ६ ६८ २ [शविष्ठ इति व्याख्यातम् । ततो द्विवचनस्याकारादेश]

शवीरया वेगवत्या (धिया=क्रियया प्रज्ञया वा), प्र०—शव गतौ इत्यस्माद्धातो रन्-प्रत्यये टापि च शवीरेति सिद्धम् १ ३ २ देशान्तरप्रापिकया गत्या, प्र०—शु गतौ इत्यस्माद्धातोर्बाहुलकादौणादिक ईरन्प्रत्यय १ ३० १७ [शव गतौ (भ्वा०) धातोर्बाहु० औणा० ईरन् । तत. स्त्रिया टाप्]

शशमते शाम्येत् ६ २ ४१ **शशमे**=शाम्यति निरुपद्रवो भवति, प्र०—अत्र एत्वाऽभ्यासलोपाऽभावश्छान्दस ३३ ८७ प्रशसामि, प्र०—शशमान इति अर्चतिकर्मा निघ० ३ १४, ६ १ ९ [शमु उपशमने (दिवा०) धातोर्लेट् । विकरणव्यत्ययेन शप् । द्वित्व छान्दसम् । अन्यत्र लिट् । 'अत एकहल्मध्ये०' इति प्राप्तावेत्वाऽभ्यासलोपौ न भवतश्छान्दसत्वात् । शशमान इति अर्चतिकर्मा निघ० ३ १४]

शशमानम् अन्यायमुल्लङ्घमानम् (सज्जनम्) २ २० ३ अधर्ममुल्लङ्घमानम् (सत्पुरुषम्) २ १२ १४ **शशमानस्य**=विज्ञातव्यस्य (विद्वज्जनस्य), प्र०—अत्र 'अधिगर्थ०' इति शेषत्वविवक्षाया षष्ठी १ ८६ ८ प्रशसितस्य (यज्यो=सत्यव्यवहारस्य) ४ २३ २ दु खमुल्लङ्घत (मेधाविजनस्य) १ १४२ २ **शशमानः**=प्रशसन् (देव=विद्वज्जन) ४ २३ ४ प्लवमान (मनुष्य) ४ २ १० प्राप्तप्रशस सन् (पुरुष) ४ ५ १ ७ स्तोतुमर्ह: (भग=धनसमूह) १ २४ ४ वर्द्धमान (वनस्पति) २०.६५ **शशमानाय**=विज्ञानवते (मनुष्याय) १ ८५ १२. अधर्ममाप्लुत्य धर्मं प्राप्नुवते (जनाय) १ १४१ १० सर्वेषा दु खानामुल्लङ्घकाय (वाघते=मेधाविजनाय) ४ २ १३ प्रशसिताय (विदुषे जनाय) ४ ३ १ ८ **शशमानाः**=अविद्या उल्लङ्घमाना (नर=नायका जना) ५.२९ १२ **शशमानेभ्यः**=प्रशसमानेभ्य (नृभ्य=मनुष्येभ्य) ४ ४१ ३ **शशमानेषु**=भोगाभ्यासोल्लङ्घमानेषु ३ १८ ४ [शश प्लुतगतौ (भ्वा०) धातो शानच् । व्यत्ययेनात्मनेपदम् । शशमान इति अर्चतिकर्मा निघ० ३ १४ शशमान शसमान नि० ६ ८]

शशमानासः शत्रुबलस्योल्लङ्घका (सेनाऽमात्यादिजना) ४ १९ १५ [शशमानमिति व्याख्यातम् । ततो जसो ऽसुक्]

शशयम् खशय मेघम्, प्र०—अत्र वर्णव्यत्ययेन खस्य श ३ ५७ २ **शशयः**=शेते यस्मिन् स (स्तन=दुग्धाधारमङ्गम्) ३८ ५ शयान इव (स्तन=शुद्धो व्यवहार) १ १६४ ४९ **शशयाः**=कुमारी अवस्था को उल्लङ्घन करने वाली (युवतय=स्त्रिया) स० प्र० ११०, ३ ५५.१६ शयाना इव (धेनव=वाच) ३ ५५ १६ [खोपपदे शीङ् स्वप्ने (अदा०) धातो 'अधिकरणे शेते' अ० ३ २.१४ सूत्रेणाऽच् । वर्णव्यत्ययेन खस्य शकार । अन्यत्र शीङ् स्वप्ने (अदा०) धातो 'एरच्' इत्यच् । 'वा छन्दसी' ति धातोर्द्वित्वम् । अथवा शश प्लुतगतौ (भ्वा०) धातोर्वाऽच् । द्वित्व छान्दसम्]

शशयानः कृतशयन (कुमार) ५ ७८ ९ [शीङ् स्वप्ने (अदा०) धातोर्लिट कानच् । 'वा छन्दसी' ति गुण । शशयाना शिश्याना नि० ९ ६]

शशः पशुविशेष इव वायु २३ ५६ [शश प्लुतगतौ (भ्वा०) धातो पचाद्यच्]

शशाधि शिक्षय ७ १ २० **शशास**=शाधि २ २९ ५ **शशासुः**=शासति ४ २ १२ अनुशासतु ३ १.२ [शासु अनुशिष्टौ(अदा०) धातोर्लोट् । द्वित्व छान्दसम् । अन्यत्र लिट् शशा=उत्प्लवस्व १ ८० १ [शश प्लुतगतौ (भ्वा०) धातोर्लङ् । अटोऽभाव]

षोडश षडधिका दश (सख्या) १८ २५ **षोडशम्**= प्रमाणादिपदार्थसमूहम् (स्तोमम्) ९ ३४ [षट्-दशन्-पदयो समासे 'षष उत्व' दतृदशधासूत्तरपदादेष्टुत्व च' अ० ६ ३ १०९ वा०सूत्रेण षकारस्योत्व ष्टुत्व च । षोडश (स्तोम) हीना वा एते हीयन्ते ये व्रात्या प्रवसन्ति न हि ब्रह्मचर्यञ्चरन्ति न कृषिन्न वाणिज्या षोडशो वा एतत् स्तोम समाप्तुमर्हति ता० १७ १ २. मरुत्स्तोमो वा एष (षोडश स्तोम) ता० १७ १ २]

षोडशाऽक्षरेण साम्न्यानुष्टुभा (छन्दसा) ९ ३४. [षोडश-अक्षरपदयो समास']

षोडशिने प्रशस्ता षोडश कला विद्यन्ते यस्मिँस्तस्मै (इन्द्राय=परमैश्वर्याय) ८ ३३ **षोडशी**=येन षोडश कला जगति रचितास्ता विद्यन्ते यस्मिन् यस्य वा स (परमेश्वर.) ऋ० भू० ४४, ८ ३६. प्रशस्ता षोडश कला विद्यन्ते यस्मिन् स (परमेश्वर), प्र० इच्छा, प्राण, श्रद्धा, पृथिव्यापोऽग्निर्वायुराकाशमिन्द्रियाणि, मनोऽन्न, वीर्य, तपो, मन्त्रो, लोको, नाम चैता कला प्रश्नोपनिषदि षष्ठे प्रश्ने प्रतिपादिता ८ ३६ सोलह कला (१ ईक्षण=विचार, २ प्राण, ३ श्रद्धा, ४ आकाश, ५ वायु, ६ अग्नि, ७ जल, ८ पृथिवी, ९ इन्द्रिय, १० अन्न, ११ मन, १२ वीर्य=पराक्रम, १३ तप=धर्मानुष्ठान, १४ मन्त्र= वेदविद्या, १५ कर्मलोक=चेष्टास्थान, १६ लोको के नाम) वाला ईश्वर आर्याभि० २ १४, ८ ३६ षोडशकला-युक्त (इन्द्र =राजा) २६ १० भा०—येन प्राणादीनि षोडश वस्तूनि सृष्टानि स (ईश्वर) ३२ ५ [षोडश इति व्याख्यातम् । ततो मत्वर्थ इनि । षोडशी (शस्त्र स्तोत्र ग्रह) अथो षोडश वा एतत् स्तोत्र षोडश शस्त्र तस्मात् षोडशीत्या-ख्यायते कौ० १७ १. षोडश स्तोत्राणा षोडश शस्त्राणा षोडशभिरक्षरैरादत्ते षोडशभि प्रणौति षोडशपदाम् निविद दधाति तत् षोडशिन षोडशित्वम् ऐ० ४ १ कि षोडशिन षोडशित्व षोडश स्तोत्राणि षोडश शस्त्राणि षोडशभिरक्ष-रैरादत्त गो० उ० ४ १९ वृषण्वद्वै षोडशिनो रूपम् ऐ० ४४ सर्वेभ्यो वा एष सवनेभ्य सन्निर्मितो यत् षोडशी ऐ० ४ ४ सर्वेभ्यो वा एष छन्दोभ्य सन्निर्मितो यत् षोडशी ऐ० ४ ३-४) सर्वेभ्यो वा एष लोकेभ्य सन्निर्मितो यत् षोडशी ऐ० ४ ४ त्रिवृद् वै षोडशी कौ० १७ ३ आनुष्टुभो वै षोडशी कौ० १७ २ ३ आनुष्टुभो वा एष वज्रो यत्-षोडशी कौ० १७ १ वज्रो वा एष यत् षोडशी ऐ० ४ १ वज्र षोडशी ता० १९ ६ ३ वज्रो वै षोडशी ता० १२ १३ १४ गो० उ० २ १३ वज्र षोडशी ष० ३.११ (इन्द्रिय वीर्यं षोडशी ता० २१ ५ ६ वीर्यं षोडशी श० १२ २ २ ७ अतिरिक्तो वै षोडशी ता० ६ १ ५ अपच्छि-दिव वा एतद् यज्ञकाण्ड यत् षोडशी (साम) ता० १८ ६ २३ एकविंशायतनो वा एष यत् षोडशी सप्त हि प्रात सवने होत्रा वषट् कुर्वन्ति सप्त माध्यन्दिने सवने सप्त तृतीये

श्वात्र शीघ्र कर्मविज्ञान वर्त्तते यासा ता (पत्नी =विदुष्य स्त्रिय), प्र०—अर्शादित्वादच्, श्वात्रमिति क्षिप्रनाम निघ० ५ ३, ६ ३४ श्वात्र प्रशस्त विज्ञान धन वा विद्यते यासा ता (आप =प्राणा), प्र०—अत्र अर्शादित्वात् प्रशसार्थेऽच् । श्वात्रमिति पदनामसु पठितम् निघ० ४ २, धननामसु च निघ० २ १०, ४.१२ **श्वात्रेण**=धनेन विज्ञानेन वा १ ३१ ४ [शूपपदे अत सातत्यगमने (भ्वा०) धातोर्बाहु० औणा० रक् बहुलवचनाच्च णित्वम् । शू क्षिप्रनाम निघ० २ १५ श्वात्रमिति क्षिप्रनामाशु अतन भवति नि० ५ ३ श्वात्रम् धननाम निघ० २.१० पदनाम निघ० ४ २ श्वात्रति गतिकर्मा निघ० २ १४ (यजु० ६ ३४) शिवा ह्यापस्तस्मादाह (हे आपो यूयम्) श्वात्रा स्थेति (श्वात्रा =शिवा) श० ३ ९ ४ १६]

श्वात्रास: श्वात्र प्रवृद्ध धन येभ्यस्ते (अग्न्यादय पदार्था), प्र०—श्वात्रमिति धननाम निघ० २ १०, ३३ १. [श्वात्र इति व्याख्यातम् । ततो जसोऽसुक्]

श्वानेव यथा चोरादिभ्यो रक्षको कुक्कुरौ २ ३९ ४. [श्वाना-इवपदयो समास । श्वाना=श्वन्प्राति० द्विवचन-स्याकारादेश]

श्वान्तम् श्रान्त परिपक्वज्ञानम् (विद्वज्जनम्), प्र०—अत्र वर्णव्यत्ययेन रेफस्य स्थाने व १ १४५ ४ [श्रमु तपसि खेदे च (दिवा०) धातो क्त । वर्णव्यत्ययेन रेफस्य वकार]

श्वावित् सेधा (पशुविशेष) २४ ३३ शल्यक , सेह, इति भाषायाम् २४ ३५ पशुविशेष २३ ५६ [शुना आविध्यत इति विग्रहे श्वन् इत्युपपदे आङ्पूर्वाद् व्यध ताडने (दिवा०) धातो क्विप् । ग्रहिज्यादिना सम्प्र-सारणम्]

श्वासय प्राणय २९ ५५ [श्वस प्राणने (अदा०) धातोर्णिजन्ताल्लोट्]

श्वितानः शुभ्रवर्ण (पावक) ६ ६ २ [श्विता वर्णे (भ्वा०) धातोर्बाहु० औणा० आनच् स च कित्]

श्वितीचय: ये श्विति श्वेतवर्णं चिन्वन्ति ते (अग्न्यादय पदार्था) ३ ३ १ [श्वित्युपपदे चिञ् चयने (स्वा०) धातो पचाद्यच् प्रत्यय । श्विति =श्विता वर्णे (भ्वा०) धातोरौणा० इन् किच्च]

श्वितीची या श्विर्ति श्वेतवर्णमञ्चति सा (उषा) १.१२३ ९ [श्वितीच् इति व्याख्यास्यते । तत स्त्रियाम् 'अञ्चतेश्चोपसख्यानम्' इति ङीप्]

श्वितीचे य श्वितिमावरणमञ्चति तस्मै (सद्वैद्याय) २ ३३ ८ **श्वित्यञ्च:**=ये श्विर्ति वृद्धमञ्चन्ति प्राप्नुवन्ति ते (अध्यापकाऽध्येतार) ७ ३३ १ [श्विति इत्युपपदे अञ्चु गतिपूजनयो (भ्वा०) धातो 'ऋत्विग्दधृक्०' इति क्विन् । 'अनिदिताम्०' इति नलोपे चतुर्थ्येकवचने भसज्ञा-याम् 'अच ' इत्यकारलोपे 'चौ' इति पूर्वस्य दीर्घे च रूपम्]

श्वित्न्येभि: श्वेतवर्णयुक्तैस्तेजस्विभि (सखिभि.) १ १०० १८ [श्विता वर्णे (भ्वा०) धातोर्बाहु० औणा० अन्यप्रत्यये कित्वेऽकारलोपे च रूपम्]

श्वित्र. विचित्र पशुविशेष २४ ३९ [श्विता वर्णे (भ्वा०) धातो 'स्फायितञ्चि०' उ० २ १३ सूत्रेण रक्]

श्वित्र्यम् श्वित्राया भूमेरावरणे साधु (वृषभ =मेघम्) १ ३३ १५ [श्वित्र व्याख्यातम् । तत स्त्रिया टापि श्वित्रा । तत साध्वर्थे यत्]

श्वेतनायै प्रकाशाय १ १२२ ४ [श्विता वर्णे (भ्वा०) धातोर्बाहु० औणा० युच् । तत स्त्रिया टाप्]

श्वेतम् वृद्धम्, भा०—बलादिगुणयुक्तम् (पुरुषम्) २७ २४ श्वेतवर्णम् (अरुषम्=अश्वम्) ३ १ ४. प्रवृद्धम् (अश्वम्=अग्निम्) १ ११६ ६ सतत गन्तु प्रवृद्धम् (विद्यु-द्यानम्) १ ११९ १० अग्निगुणविद्युन्मय शुद्धधातुनिर्मितम् (तारम्) ऋ० भू० १९९, ऋ० १ ८२११० **श्वेत:**= भास्वर-स्वरूपत्वाच्छुद्ध (अग्नि) १ ६६ ३, गन्ता वर्द्धको वा (अ०—वायु) २७ २३, [टुओश्वि गतिवृद्धचो (भ्वा०) धातोर्बाहु० औणा० त । अथवा श्विता वर्णे (भ्वा०) धातोर्घञ्]

श्वेत्या शुभ्रस्वरूपा (उषा) १ ११३ २ [श्वेत्या उषोनाम निघ० १ ८ श्वेत्या श्वेतते नि० २ २१. श्विता वर्णे (भ्वा०) धातो 'अघ्न्यादयश्च' उ० ४ ११२ सूत्रेण यक्]

श्वैतरीम् अतिशयेन शुद्धाम् (वेनु =धारणाम्) ४ ३३ १, [श्वेतप्राति० अतिशायने तरप्-प्रत्यये श्वेततर । तत 'तस्येदम्' (इत्यण्-प्रत्ययान्तात् स्त्रिया ङीप् । तलोप-श्छान्दस]

श्वैत्रेयस्य श्वित्रास्वन्तरिक्षस्थासु दिक्षु भवस्य जलस्य ५.१९ ३ **श्वैत्रेय:**=श्वित्राया वर्णकर्त्र्या भूमेरपत्य श्वैत्रेय (मेघ) १ ३३ १४ [श्वित्राप्राति० अपत्यार्थे 'स्त्रीभ्यो ढक्' अ० ४ १ १२० इति ढक् । ढस्यैयादेश । श्वित्रा= श्विता वर्णे (भ्वा०) धातो 'स्फायितञ्चि०' उ० २ १३ सूत्रेण रक् । तत स्त्रिया टाप्]

(राजप्रजाजन) १० ३१. सुहृत् (इन्द्र=राजपुरुष) ४.२५.६. सर्वदुःखविनाशनेन सहायकारी (अग्नि=जगदीश्वरः) १.३१.१ **सखायम्**=सर्वसुहृदम् (विद्वत्तम जनम्) ६ ४५ १६ सुहृद्वद्वर्त्तमानम् (पतिम्) २६ ४० सर्वहितकारी मित्र (ईश्वर) को प० वि०। सखाय=परस्पर सुहृद परोपकारका: (मनुष्या) १ २२ ८ परस्परस्य सहायिन (जना) १७ ३८ भा०—सर्वे सह मैत्रीमाचरन्त (सज्जना) ३४ १८. मित्रभाव रखने वाले (सज्जन) प० वि० **सखिभि:**=धर्मानुकूल-स्वाऽऽज्ञापालकैः मित्रैः १ १०० २ **सखिभ्य:**=मित्रभावेभ्य मित्रशीलेभ्य. (जनेभ्य) १.४४ [समान ख्यातीति विग्रहे समानोपपदे ख्या प्रकथने (अदा०) धातो 'समाने ख्य स चोदात्त' उ० ४.१३७ सूत्रेण इण्प्रत्यये यलोपे समानस्य च 'समानस्य छन्दसि०' इति सादेशे सखि इति रूपम्। सखिप्राति० सौ 'अनङ् सौ' इत्यनङादेशे सखेति रूपम् अन्यत्र 'सख्युरसम्बुद्धौ' अ० ७ १.९२ सूत्रेण सर्वनामस्थानस्य णिद्वद् भावे वृद्धौ च रूपाणि। सखाय समानख्याना नि० ७ ३० सखाय. सप्तपदा अभूम तै० ३ ७ ७ ११]

सखाया सुहृदौ (भिषजा=चिकित्सकौ) २८ ७. मित्रवद्वर्त्तमानौ (जीवेशौ) १ १६४.२०. परस्पर मित्रता युक्त (ब्रह्म और जीव) स० प्र० २८३, १ १६४ २० [सखिप्राति० प्रथमाद्विवचनस्याकारादेशे रूपम्। सखीति सखा-पदे व्याख्यातम्]

सखित्वनाय सख्युर्भावाय ६.५१ १४ [सखिप्राति० भावे त्वः। पृषोदरादिना रूप साधनीयम्]

सखित्वम् सख्युर्भावम् ३ १ १५ **सखित्वे**= सखीना सुखायाऽनुकूल वर्त्तमानाना कर्मणा भावस्तस्मिन् १ १० ६ [सखिप्राति० भावे त्व]

सखिवान् वहवो मरुत सखायो विद्यन्ते यस्य स (विष्णु=सूर्य) १ १२६ ४ [सखिप्राति० भूमन्यर्थे मतुप्। छन्दसीर इति मतोर्वत्वम्]

सखिविदम् सखीन् सुहृदो विदन्ति येन तम् (यज्ञम्) ११ ८ [सखीत्युपपदे विद ज्ञाने (अदा०) धातो करणे क्विप्]

सखीयत: सखेवाऽऽचरत (जनात्) १ १३१.५ **सखीयताम्**=सखेवाऽऽचरताम् (प्रजाजनानाम्) ४ १७ १८ [सखिप्राति० उपमानादाचारे इत्याचारे क्यजन्ताच्छतृ]

सखीयन् आत्मन सखायमिच्छन् (मर्य=मनुष्य) ३ ३१.७ सखेवाऽऽचरन् (जन) ५ ४९ १. [सखिप्राति० आत्मन इच्छायामर्थे क्यजन्ताच्छतृ। आचारे वा क्यजन्ताच्छतृ]

सख्यम् मित्रभावम् ८ २५.७. सख्युर्भाव कर्म वा ४.२३ ५ मित्रत्वम् १.६२.६ **सख्याय**=सखित्वाय ११३८ २. **सख्येषु**=सखीना कर्मसु, भावेषु, पुत्रस्त्रीभृत्यवर्गादिषु वा १.१०.५ **सख्यैः**=मित्रकर्मभि. ६.१६ १३. [सखिप्राति० भावे कर्मणि चार्थे 'सख्युर्य.' अ० ५ १.१२६ सूत्रेण य]

सख्या सख्यु कर्माणि ७ ३२ २ सख्यानि सख्यु: कर्माणि १ १०८ ५ मित्रभावकर्माणि १.७१ १०. [सख्यमिति व्याख्यातम्। तत शेर्लोपश्छन्दसि]

सख्येभि: सखिभि कृतै कर्मभि ३ १ १६. सखीना कर्मभि ३ ३१ १८ [सख्यमिति व्याख्यानम्। ततो भिस ऐस् न भवति 'बहुल छन्दसि' ति सूत्रेण]

सगण: गणैर्विद्यार्थिना समूहै सह वर्त्तमान (विद्वज्जन) १ १०१.६ गणेन वीरसमूहेन सहित (इन्द्र=राजा) ३ ४७ ४ गणेन सह वर्त्तमान (इन्द्र) ३ ३२ ३ गणेन स्वजनसेनापरिकरेण सहित: (इन्द्र=सेनापति) ७.३७ [गणै सहेति विग्रहे सह-गणपदयो समास। 'वोपसर्जनस्य' इति सह शब्दस्य सादेश.]

सगरा: सगरोऽन्तरिक्षमवकाशो येषान्ते (अग्नय= नेतारो विद्वज्जना), प्र०—अर्श आदित्वादच् ५ ३४ सगरोऽन्तरिक्ष विद्योपदेशावकाशो येषान्ते (अग्नय) ५ ३४. **सगरेण**=अन्तरिक्षेण सह ५ ३४ [सगरप्राति० अर्श आदित्वादच् सगर अन्तरिक्षनाम निघं० १ ३ सगरा रात्रि श० १.७ २ २६]

सगर्भ्य: समानश्चासौ गर्भ सगर्भस्तस्मिन् भव (भ्राता=बन्धु), प्र०—अत्र 'सगर्भसयूथसनुताद्यन्' अ० ४ ४ ११४ इति सूत्रेण भवाऽर्थे यन् प्रत्यय ४ २० सोदर (भ्राता=बन्धु) ६ ९ [समान-गर्भपदयो समासे 'समानस्य छन्दसि०' सूत्रेण समानस्य सादेशे सगर्भ इति रूपम्। ततो भवार्थे 'सगर्भसयूथसनुताद् यन्' अ० ४ ४ ११४ सूत्रेण यन्]

सग्धिम् समान भोजनम् २८ १६ **सग्धि:**=समान-भोजनम् १८ ९ [समाना-ग्धिपदयो समासे 'समानस्य छन्दसि०' सूत्रेण समानस्य सादेश। ग्धि=अद भक्षणे (अदा०) धातो स्त्रिया क्तिन्। 'बहुल छन्दसि' अ० २ ४ ३९ सूत्रेण घस्लृ-आदेश। 'घसिभसोर्हलि चे' त्युपधालोपे, 'झलो झलि' इति सलोपे, 'झषस्तथोर्धोऽध'

सवने ता० १२.१३८ असौ वै षोडशी योऽसौ (सूर्य) तपति कौ० १७ १]

षोढा षट् प्रकारा (देवा =विद्वांसो जना) ३ ५५ १८ [षष् सख्यावाचिन प्राति० 'सख्याया विधार्थे धा' अ० ५ ३ ४२ सूत्रेण धा । तत 'षष उत्व दतृदशधासूत्तरपदादेष्टुत्व च' इति धा प्रत्यय उत्व ष्टुत्व च]

सकलम् सम्पूर्ण (भद्र =आनन्द को) स० प्र० ३ समु०, नि० ११८ [कलया सहेति विग्रहे सह-कला पदयो समासे 'वोपसर्जनस्य' अ० ६ ३ ८२ सूत्रेण सहस्थाने सादेश]

सकामान् समानस्तुल्य कामो येषान्तान् (अध्वन = मार्गान्) २६ १ [समान-कामपदयो समासे 'समानस्य 'छन्दस्यमूर्द्ध०' अ० ६ ३ ८४ सूत्रेण समानस्य सादेश]

सकृत् एकवारम् ६ ४८ २२ [सख्यावाचिन एकशब्दस्य क्रियागणने 'एकस्य सकृच्च' अ० ५ ४ १९ सूत्रेण सकृदादेश]

सकृत्स्वम् या सकृदेकवार सूते ताम् (मही =भूमिम्) ३३ २८ [सकृदुपपदे षूङ् प्राणिगर्भविमोचने (अदा०) धातो क्विप्]

सकेता: समान केत प्रज्ञा येषान्ते (देवा =श्रोत्रादीनीन्द्रियाणि) ६ ९ ५ [समान-केतस्पदयो समास । 'समानस्य छन्दसि०' अ० ६ ३ ८४ सूत्रेण सादेश । केत प्रज्ञानाम निघ० ३ ९]

सक्तव: सत्तू इति भाषायाम् १९.२१ [सच्यन्ते समवेता क्रियन्ते इति विग्रहे षच समवाये (भ्वा०) धातो 'सितनिगमिमसि०' उ० १ ६९ सूत्रेण तुन् । सक्तु सचतेर्दुर्धावो भवति । कस्तेर्वा स्याद् विपरीतस्य विकसितो भवति नि० ४ ९ देवाना वा ऽएतद् रूप यत्सक्तव श० १३ २.१ ३ प्रजापतेर्वा एतद् रूप यत् सक्तव तै० ३ ८ १४ ५]

सक्तुमिव जैसे सत्तू को, प० वि० । [सक्तुम्-इवपदयो समास । सक्तुरिति व्याख्यातम्]

सक्तुश्री: य सक्तूनि समवेतानि द्रव्याणि श्रयति स (विद्युदादिपदार्थसमूह) ८ ५७ [सक्तूपपदे श्रिञ् सेवायाम् (भ्वा०) धातो 'क्विब्वचिप्रच्छि०' अ० ३ २ १७८ वा० सूत्रेण क्विप् दीर्घश्च]

सक्थानि सक्थीनि ५ ६१ ३ **सक्थ्ना**=शरीराऽवयवेन २३ २९ **सक्थ्यो:**=पादाऽवयवयो २४ १ [षञ्ज सङ्गे (भ्वा०) धातो. 'असिसञ्जिभ्या क्थिन्' उ० ३ १५४ सूत्रेण क्थिन् । सक्थिप्राति० तृतीयादौ विभक्तौ 'अस्थिदधि०' अ० ७ १ ७५ सूत्रेणानङ् । 'अल्लोपोऽन.' इत्यल्लोपे रूपाणि भवन्ति । सक्थि सचतेरासक्तोऽस्मिन् काय नि० ९ २०]

सक्मन् य सचति तत्सम्बुद्धौ (अग्ने =सेनापते) १ ३१ ६ [षच् समवाये (भ्वा०) धातो कर्त्तरि मनिन्]

सक्म्यम् सचति सयुनक्ति यस्मिँस्तत्र भवम् (असुर्यं= असुरस्य मेघस्य स्वम्) ३ ३८ ७ [षच् समवाये (भ्वा०) धातोर्मनिन् । ततो भवार्थे यत्]

सक्रतव: समाना क्रतु प्रज्ञा येषान्ते (आदित्यास = पूर्णविद्या अध्यापका) २ २७ २ **सक्रतू**=समानक्रियौ (भा०—वायुविद्युतौ) १ ९३ ५ [समान-क्रतुपदयो समासे 'समानस्य छन्दसि०' अ० ६ ३ ८४ सूत्रेण समानस्य सादेश]

सक्षण: सोढा (मेधाविजन) ५ ४१ ४ [षह मर्षणे (भ्वा०) धातो 'कृत्यल्युटो बहुलम्' इति कर्त्तरि ल्युट् । पृषोदरादित्वात् सकारागम]

सक्षणिम् सोढारम् (शत्रुम्) १ १११ ३ **सक्षणि:**= समवेता (सूर्य), प्र०—अत्र सच-धातोरनि प्रत्यय २ ३१ ४ [षह मर्षणे (भ्वा०) धातोर्बाहु० औणा० अनि । पृषोदरादिना सकारागम । षच समवाये (भ्वा०) धातोर्वाऽनि सकारोपजनश्च]

सक्षत् सम्बध्नीयात् १ १२९ १० समवैति ५ ३० ६ **सक्षि**=सम्बध्नासि ५ ३३ २ **सक्षीमहि**=सम्बध्नीयाम ७ ५४ ३ प्राप्नुयाम ७ ३९ ३ **सक्ष्व**=सक्तो भव १ ४२ १ [षच समवाये (भ्वा०) धातोर्लेट् । सिव्-विकरण । शपो लुक् च । अन्यत्र लट् लिङ् लोट् च । सक्षति गतिकर्मा निघ० २ १४]

सक्षन्त: सहन्त (स्त्रीपुरुषा). प्र०—अत्र सहधातो पृषोदरादिवत्सकारागम १ १३१ ३ [षह मर्षणे (भ्वा०) धातो शतृ । व्यत्ययेन परस्मैपदम् । पृषोदरादिना च सकारागम]

सक्षित: समाननिवासा (ऊनय =रक्षणादीनि कर्माणि) ६ ४४ ६ **सक्षितौ**=सह निवसन्त्यौ (मातरा= धात्रीजनन्यौ) १ १४० ३ [समान-क्षितपदयो समासे 'समानस्य छन्दसि०' अ० ६ ३ ८४ सूत्रेण समानस्य सादेश । क्षित.=क्षि निवासगत्यो (तुदा०) धातोर्भावे क्त]

सखा सुखप्रद (विद्वज्जन) १ ७५ ४ सर्वस्य मित्र सर्वसुखसम्पादकत्वात् (विष्णु =व्यापकेश्वर) १ २२ १९ सौहार्देन सुखप्रद (इन्द्र =परमेश्वर) १ ४ १० मित्र.

लिडि 'वाच्छन्दसि सर्वे विधयो भवन्ति' इतीडागम 'गमहन जन०' ग्र० ६ ४ ९८ इत्युपधालोपश्च ३ १९ [सम्+ गम्लृ गतौ (भ्वा०) धातोराशिषि लिङ्]

सङ्ग्रहीतृभ्यः ये युद्धार्थास्सामग्री सम्यग् गृह्णन्ति तेभ्य (राजपुरुषेभ्य) १६ २६ [सम्+ग्रह उपादाने (क्र्या०) धातो कर्त्तरि तृच्। 'ग्रहोऽलिटि दीर्घ' इतीटो दीर्घ]

सङ्घातं सङ्घातम् सम्यग्घन्यन्ते जना यस्मिन् त सङ्ग्राम सङ्ग्रामम् १ १६ [सङ्घातम्-पदस्य वीप्साया द्वित्वम्। सङ्घात इति सग्रामनाम निघ० २ १७ सम्+ हन हिसागत्यो (ग्रदा०) धातोर्घञ्]

सङ्घाते सम्बन्धे २८ १३ [पूर्वपदे व्याख्यातम्]

सचत प्राप्नुत ४ ५ ९ **सचताम्**=समवैतु १३ ३० समवेतान् करोतु ऋ० भू० १४९, २ १० समवैति, भा०—सेवताम् १३ ३० **सचते**=समवैति १ ९१ १४ प्राप्नोति १ १४० ९ सम्बध्नाति १ १८० ५ **सचन्त**=प्राप्नुत १ १५६ ४ सङ्गमयन्ति २ ५ ५ सेवन्ताम् १ ७३ ४ लभन्ते १ १६४ ५० समवयन्ति ३ १ १४ सम्बध्नन्ति ५ १७ ५ **सचन्ताम्**=सयुञ्जन्तु १७ ४४ समवयन्तु १३ १ समवेता: प्राप्ता भवन्तु २ १० **सचन्ते**=सेवन्ते १ १०० १३ समवयन्ति १ ६० २ **सचसे**=युनक्षि १५ २३ समवैषि १३ १५ सम्बध्नामि ४ ११ ६ **सचस्व**=समवेहि प्राप्नुहि १ १२९ ६ सयोजय ३ २४ **सचावहै**=सम्बध्नीयाव ६ ५५ १ **सचेत**=सम्बध्नीत ५ ५२ १५ **सचेताम्**=प्राप्नुताम् १ १८५ ६ **सचेते**=सम्बध्नीत २४१ ६ समवेत १ १३६ ३ **सचेथे**=सवेते १ १८० १ सङ्गच्छेथाम् १ ११६ १७ सयुङ्क्थ १ १८३ २ सङ्गच्छेथे १ १५२ १ सेवेथे १ १८० १ सम्बध्नीथ २ ३९ २ **सचेमहि**=समवेयाम ३ ५५ व्याप्नुयाम १ १३६ ६ सङ्गता भवेम २ ८ ६ सयुञ्ज्महि ५ ५० २ **सचेवहि**= कटिबद्ध सदा रहे स० वि० १४०, ग्रथर्व० १४ २ ७२ [षच् समवाये (भ्वा०) धातोर्लोट्। सचति गतिकर्मा निघ० २ १४ पच् सेचने सेवने च (भ्वा०) धातोर्वा लोट्। ग्रन्यत्र लट् लिङ् च। सचता ग्रासेवध्वम् नि० ९ २६ सचते द्विश उत्तरनाम निघ० ३ २९ सचन्ताम्= ससेव्यन्ताम् नि० ९ ३३ सचन्ते सेवन्ते नि० ७ २३ सचस्वा सेवस्व नि० ३ २१]

सचथाय प्राप्तसम्बन्धाय (विद्वज्जनाय) १ १५६ ५ [पच् समवाये (भ्वा०) धातोर्वाहु० ग्रौणा० ग्रथ]

सचथ्यैः सचयेषु समवायेषु भवै (जनै) ५.५०.२ [सचथ इति व्याख्यातम्। ततो भवार्थे यत्]

सचध्यै सचितु सयोक्तुम् १ १६७ ५ [पच् समवाये (भ्वा०) धातोस्तुमर्थेऽध्यैन्]

सचनस्य समवेतस्य (परमविद्वज्जनस्य) ६ ३९ १ **सचन:**=सर्वै सेनाङ्गै स्वाङ्गैश्च समवेत (रथ) १ ११९ १८ **सचना:**=समवैतु योग्या (राय=धनानि) १ १२७ ११ [पच् समवाये (भ्वा०) धातोर्ल्युट्]

सचमाना: सम्बध्नन्त (धनाढ्या जना) ५ ४२ ८ **सचमानौ**=सम्बद्धौ (रोहितौ=विद्युत्पावकौ) ५ ३६ ६ [षच् समवाये (भ्वा०) धातो शानच्। व्यत्ययेनात्मनेपदम्]

सचा ज्ञानेन, सत्कर्मसु समवायेन वा १ १० ४ शिष्टसमवायेन सह १ ६३ ३ सत्यसयोगेन ४ १ ३ सत्येन ४.५ १० सम्बन्धेन ३ ५४ २ प्रसङ्गेन ४ ३ ९ विज्ञानेन ३ ६० ४ समवेतेन सत्येन ६ ४५ २२ मुखसमवेतेन (बलेन) १ ८१ ८ सत्यसमवायेन ३४ ५६ सङ्गत्या १ ७१ ४ सत्याचारेण ४ ३२ ४ विज्ञानप्रापकेण गुणसमूहेन १ ५१ ११ ग्रत्यन्त प्रेम से ग्रार्याभि० १.९, ऋ० १ १ ९ २ [पच समवाये (भ्वा०) पच सेचने सेवने च (भ्वा०) ग्रथवा सचति गतिकर्मा (निघ० २ १४) धातो क्विप्। ततस्तृतीयैकवचने रूपम्]

सचा सचन्ति ये ते सचास्तान् सचानग्मान् विदुष', प्र०—ग्रत्र शस स्थाने 'सुपा सुलुक्०' इत्याकारादेश सचेति पदनामसु पठितम् निघ० ४ २ ग्रनेन ज्ञानप्राप्त्यर्थो गृह्यते १ ९ ३ समवेता (शुक्रा=शुद्धा किरणा) १ १३५ ३ सचयो समवेतयो (इन्द्रयो=वायुसूर्ययो) १ ७ २ समूहे ३ ५३ १० सम्बन्धी (जन) ५ ४४ १२ सम्बद्ध (विद्वज्जन) ५ १६ ५ समवेता (राजा) ६ २४ १ यज्ञविज्ञानयुक्तान् (विदुष) १ ९३ ११ सयुक्तान् (शिष्यान्) १ १६१.५ समवेतम् (सद्गुणसम्बद्धम्) १ १४० ७ सम्बन्धि (क्षय=निवासस्थानम्) ५ ४८ ४ समवाये ५ ७४ २ [षच् समवाये (भ्वा०) धातो कर्त्तरि पचाद्यच्। तत शसो जसो ङे सोश्च स्थाने 'सुपा सुलुक्०' सूत्रेणाकारादेश]

सचा सत्यसमवेतौ (ग्रश्विना=सभासेनेशौ) १० ३३ सयुक्तौ (ग्रश्विना=ग्रध्यापकोपदेशकौ) २० ६८. सम्बन्धिनौ (इन्द्राग्नी=ग्रध्यापकोपदेशकौ) ३ १२ २ सम्बद्धौ (रोदसी=भूमिसूर्यौ) ५ ५६ ८. [षच् समवाये (भ्वा०)

इनि धत्वे 'न पदान्तद्विर्वचन०' इत्युपधालोपस्य स्थानिवद्-भावनिषेधाद् 'झला जश् झशि' अ० ८ ४ ५३ सूत्रेण जश्त्वे ग्धिरिति रूपम् । सग्धिम् सहजग्धिम् नि० ६.४३]

सग्मे गच्छतीति ग्मा पृथिवी तया सह वर्त्तते तस्मिन् यज्ञे, भा०--परमेश्वरस्योपासनादिलक्षणे यज्ञे, प्र०--ग्मेति पृथिवीनामसु पठितम् निघ० १ १, ४ २६ [ग्मया सहेति विग्रहे सह-ग्मापदयो समासे 'वोपसर्जनस्ये' ति सादेशे रूपम् । ग्मा पृथिवीनाम निघ० १ १ सग्मन् सग्रामनाम निघ० २ १७]

सघत् हिंसन् (इन्द्र =जगदीश्वर), प्र०--अत्र 'बहुल छन्दसि' इति श्नोर्लुक् १ ५७.४ [षघ हिंसायाम् (स्वा०) धातो शतृ । विकरणव्यत्ययेन शप्]

सङ्काः सङ्ग्रामस्थान् (पृतना =शत्रुसेना) ६ ७५ ५ समवेता विकीर्णा वा (पृतना) २६ ४२ [सङ्का सग्राम-नाम निघ० २ १७ सङ्का सचते सम्पूर्वाद्वा किरते नि० ६ १४.]

सङ्किर सम्यग् विक्षिप ६ ४६ २ प्रापय २७ ३८ [सम्+कृ विक्षेपे (तुदा०) धातोर्लोट्]

सङ्क्रन्दनः सम्यक् शत्रूणा रोदयिता (इन्द्र =सेनेश) १७ ३३ [सम्+क्रदि आह्वाने रोदने च (भ्वा०) धातो नन्द्यादित्वाल् ल्यु]

सङ्क्रमः सम्यक् क्रमन्ते यस्मिँस्तस्य विज्ञापक (विद्वन्मनुष्य) १५ ६ **सङ्क्रमाय**=पदार्थज्ञानाय १५ ६. [सम्+क्रमु पादविक्षेपे (भ्वा०) धातोर्घञ्]

सङ्क्रोशमानाः आक्रोश कुर्वाणा (नद्य) ४ १८ ६ [सम्+क्रुश आह्वाने रोदने च (भ्वा०) धातो शानच् । व्यत्ययेनात्मनेपदम्]

सङ्क्रोशैः सम्यगाह्वानै २५ २ [सम्+क्रुश आह्वाने रोदने च (भ्वा०) धातोर्घञ्]

सङ्गच्छतु मिश्रीभावेन गच्छति २ २२ **सङ्गच्छ-ध्वम्**=सम्यक् प्राप्नुताऽर्थात् तत्प्राप्त्यर्थं सर्वविरोध विहाय परस्पर सङ्गता भवत ऋ० भू० ९२, १० १९१ २ सम्यक् मिलकर प्राप्त होवो स० वि० १८७, १० १९१ २ **सङ्गमे-महि**=सङ्गच्छेमहि ५ ५१ १५ [सम्+गम्लृ गतौ (भ्वा०) धातोर्लोट् । 'समो गम्यृच्छिभ्याम्' अ० १ ३.२९ सूत्रेण 'वा छन्दसि' इति विकल्पेनात्मनेपदम् । अन्यत्र लिङ्]

सङ्गच्छमाने सहगामिन्यौ (जामी=कन्ये) १.१८५.५. [सम्+गम्लृ गतौ (भ्वा०) धातो शानच् । ततष्टाप् स्त्रियाम् । 'समो गम्यृच्छिभ्याम्' इत्यात्मनेपदम्]

सङ्गत सम्यग् विजानीत ३७ १५ एकीभावेन प्राप्नुत प्र०--अत्र लोटि शपो लुक् ३७ १४ [सम्+गम्लृ गतौ (भ्वा०) धातोर्लोट् । 'बहुल छन्दसी' ति शपो लुक्]

सङ्गतेभ्यः योग्येभ्य (पुरुषेभ्य) २१ ६१ [सम्+गम्लृ गतौ (भ्वा०) धातो क्त]

सङ्गत्य एकीभूय १२ ६४ [सम्+गम्लृ गतौ (भ्वा०) क्त्वा । समासे क्त्वो ल्यप्]

सङ्गथे सङ्ग्रामे १ ६१ १६ [सगथे सग्रामनाम निघ० २ १७]

सङ्गमनः य सम्यग् गमयति स (परमेश्वर) १ ९६ ६ सम्यग् गन्ता (पुरुष) १२ ६६ [सम्+गम्लृ गतौ (भ्वा०) धातो 'कृत्यल्युटो बहुलम्' इति कर्त्तरि ल्युट्]

सङ्गमे सङ्ग्रामे समागमे वा ३३ ८६ मेलने २६ १५ [सगमे सग्रामनाम निघ० २ १७ सगमे सगमने नि० १०.३६]

सङ्गवे सङ्गच्छन्ति गावो यस्मिन् सायसमये तस्मिन् ५ ७६ ३ [सम्+गम्लृ गतौ (भ्वा०) धातोर्डु । सङ्गु-प्राति० चतुर्थी । विभक्तिव्यत्यय । अथवा सम्-गोपदयो समासे सङ्गु । ततश्चतुर्थी । विभक्तिव्यत्यय]

सङ्गृणीते सम्यगुपदिशति ४ २५ ७ [सम्+गॄ शब्दे (क्र्या०) धातोर्लट् । व्यत्ययेनात्मनेपदम्]

सङ्गृभाय सम्यग् गृहाण १ ८१ ७ **सङ्गृभायति**=सङ्गृह्णाति, प्र०--अत्र हस्य भ., श्न शायच् १ १४० ७ [सम्+ग्रह उपादाने (क्र्या०) धातोर्लोट् । 'छन्दसि शायजपि' इति श्न शायच् । अन्यत्र लटि श्न शायच् । 'हृग्रहोर्भश्छन्दसी' ति धातोर्हकारस्य भकार]

सङ्गृभीता सम्यग् गृहीतानि सेनाङ्गानि, प्र०--अत्र ग्रह-धातोर्हस्य भत्वम् १ १०० ६ [सम्+ग्रह उपादाने (क्र्या०) धातो क्तान्ताच्छेर्लोपश्छन्दसि । धातोर्हस्य भकार । 'ग्रहोऽलिटि दीर्घ' इतीटो दीर्घत्वम्]

सङ्गृभ्णाः सङ्गृह्णीया ३ ३० ५ [सम्+ग्रह उपादाने (क्र्या०) धातोर्लङ् । अटोऽभावो हस्य च भकार । सङ्गृभ्णा सङ्गृभ्णासि नि० ६ १]

सङ्गृभ्य सम्यग् गृहीत्वा ३ ५४ १५ [सम्+ग्रह उपादाने (क्र्या०) धातो क्त्वा । समासे क्त्वो ल्यप् । धातोर्हस्य भकार]

सङ्गे सह २० ४८ [सम्+गम्लृ गतौ (भ्वा०) धातोर्डश्छान्दस]

संगिमषीय सम्यक् प्राप्नुयाम्, प्र०--अत्राऽऽशिषि

समासे 'वोपसर्जनस्ये' ति सादेशे रूपम् । जित्वरी=जि जये (भ्वा०) धातोस्तच्छीलादिषु 'इण्नशजिसर्तिभ्य: क्वरप्' इति क्वरप् । तत स्त्रियाम् 'टिड्ढाणञ्०' अ० ४.१.१५ सूत्रेण ङीप्]

सजित्वानम् समानानां शत्रूणां विजयकारकम् (रयिं=धनम्), प्र०—अत्र 'अन्येभ्योऽपि दृश्यते' अ० ३ २ ७५ अनेन जि-धातोः क्वनिप् प्रत्ययः १ ८ १. [समान-जित्वन्पदयोः समासे समानस्य सादेशे रूपम् । जित्वन्=जि जये (भ्वा०) धातोः कर्त्तरि क्वनिप्]

सजित्वाना जयशीलैः वीरैः सह वर्त्तमानौ (इन्द्राग्नी=सभासेनेशौ) ३ १२ ४ [सजित्वन् इति पूर्वपदे व्याख्यातम् ततो द्विवचनस्याकारादेशः]

सजूः समानं सेवनं यस्य सः (इन्द्र:=विद्युदग्निः), प्र०—इदं जुषी इत्यस्य क्विबन्तं रूपम् 'समानस्य छन्दस्य०' इति समानस्य सकारादेशश्च १ २३ ७. यः समानं जुषते प्रीणाति सः (अग्नि:=भौतिकः) ३ १० समानप्रीतिसेवी (विद्वज्जनः) ५ ६० ८ यः समानान् जुषते सः (विद्वज्जनः) १ ४४ २ सह वर्त्तमानः (उषा:=प्रभातः) १२ ७४ सहितः (सूर:=सूर्यः) १२ ७४ सयुक्तः (विद्वज्जनः) ६.४७ १९ मित्रमिव ६ ११. [समान-जुष्पदयोः समासे समानस्य सादेशे च रूपम् । जुष्=जुषी प्रीतिसेवनयोः (तुदा०) धातोः क्विप् । सजुष्प्राति० सुलोपे रुत्वे च 'र्वोरुपधाया दीर्घ इकः' अ० ८ २ ७६ सूत्रेणोपधाया इको दीर्घः । सजूः=सह जोषेण नि० ६ १३ सजूः (यजु० १४ ७) अर्थैवैतद् यजमानः एताभिर्देवताभिः (ऋत्वादिभिः) सयुग्भूत्वैताः प्रजाः प्रजनयति तस्माद् सर्वास्वेव राजूः सजूरित्यनुवर्त्तते श० ८ २ २ ७]

सजोषस: समानप्रीतिसेविनः (विद्वांसो जनाः) ५ २१ ३ समानसेवाप्रीतयः, भा०—परस्परं प्रीतिमन्तः (अग्नयः=विद्वांसो जनाः) १२ ५० समानोत्तमगुणकर्मस्वभावसेविनः (ऋभवः=मेधाविनः) ४ ३४ ८ समानं धर्मं सेवमानाः (विद्वज्जनाः) १ १३६ ४ समानो जोषः प्रीतिः सेवनं वा येषान्ते (सर्वविद्वांसः) १ ४३ ३ **सजोषसौ**=समानसेवनौ (अश्विना=प्राणापानाविव दम्पती) १२ ७४. **सजोषा:**=समानप्रीतिसेवनः (विद्वज्जनः) १ १८६ २ समानप्रेमा (राजा) १ ११८ ११ समानप्रीतिसेवी (ईश्वर आप्तमनुष्यो वा) १ ६०.१. उत्तमप्रीतियुक्तः (ईश्वरः) आर्याभि० १ १८, ऋ० १ ६ १७ १. समानैः सेविता (इडा=स्ताविका वाक्) २९ ८ समानप्रीतिः (सप्तिः=शिल्पी विद्वज्जनः) २९.३ आत्मसमानप्रीतिं सेवमानः सन् (इन्द्र=दुःखविदारकः सज्जनः) ३ ३२.२ समानसेवनप्रीतिः ३ ४ ८ सह वर्त्तमानः (इन्द्र:=सूर्यः) २०.३९ व्याप्तः सन् प्रीतः प्रसन्नः (अग्नि:=जगदीश्वरः) ७ ५ ९. समानप्रीत्या सेवनीयः (मित्र:=प्राणः) ७ ६० ४ समानप्रीतिसेविका (कन्या=कमनीया पत्नी) ६ ४९ ७. स्वात्मवदन्येषां प्रीत्या सेवकः (यज्ञः=शिष्यः) ६ ६८ १. समानं जोषः प्रीतिर्यस्य सः (इन्द्र:=सेनापतिः) ७ ३७ समानप्रीतिसेवनी (धिषणा=प्रज्ञा) ५ ४१ ८ सहैव सेवमानः (विद्वज्जनः) ५ ४१ ४. समानप्रीतिसेविनः (देवास:=विद्वांसो जनाः), प्र०—अत्र वचनव्यत्ययेन जसः स्थाने सुः ७ ४८.४ सर्वत्र समानप्रीतिसेवनाः (धीरा जनाः) १ ६५ १. समानसुखदुःखप्रीतयः २ ३१ ४ सह वर्त्तमानः (इन्द्र:=सूर्यः) २० ३९ **सजोषोभ्याम्**=यौ जोषसा सेवनेन सह वर्त्तमानौ ताभ्याम् (इन्द्रवायूभ्याम्=विद्युत्प्राणाभ्याम्) ७ ८ [समान-जोषस्पदयोः समासे समानस्य सादेशे जसि रूपम् । जोषस्=जुषी प्रीतिसेवनयोः (तुदा०) धातोरौणा० असुन् । अथवा सह-जोषस्पदयोः समासे 'वोपसर्जनस्य' सूत्रेण सादेशे रूपम् । सजोषाः=सहजोषणः नि० ८ ८ सजोषसः=सहजोषणाः नि० ११ १५]

सजोषसा समानं जोषं सेवनं ययोस्तौ (अश्विना=अध्यापकोपदेशकौ) २० ९० समानप्रीतिकामौ (इन्द्रवायू=अध्यापकोपदेशकौ) ४ ४६.६ [सजोषस् इति व्याख्यातम् । ततो द्विवचनस्याकारादेशश्छान्दसः]

सजोष: समानप्रीतिसेविनः (नर:=नायकाः जनाः) ६ २ ३ [समान-जोष्पदयोः समासे समानस्य सादेशे च रूपम् । जोष्=जुषी प्रीतिसेवनयोः (तुदा०) धातोः 'अन्येभ्योऽपि दृश्यन्ते' अ० ३ २ ७५ सूत्रेण विच्]

सञ्चकान: सम्यक् कामयमानः (राजा) ५ ३० ७. [सम्+चक तृप्तौ प्रतिघाते च (भ्वा०) धातोः शानच्]

सञ्चक्षाण: सम्यक् कामयन्नुपदिशन्वा (देव:=विद्वज्जनः) ६.५८ २ [सम्+चक्षिङ् व्यक्तायां वाचि (अदा०) धातोः शानच्]

सञ्चक्षि समक्षे ६ १४ ४ [सम्+चक्षिङ् व्यक्तायां वाचि, अयं दर्शनेऽपि (अदा०) धातोः क्विप् भावे]

सञ्चक्षे सम्यक् प्रख्यातुम् ७ १८ २० सम्यगाख्यानाय १ १२७.११ [सम्+चक्षिङ् व्यक्तायां वाचि (अदा०) धातोस्तुमर्थे एश् छान्दसः]

सञ्चक्ष्य सम्यगध्याप्योपदिश्य वा १ १६५ १२.

धातो पचाद्यच् । ततो द्विवचनस्याकारादेश । सचा पदनाम निघ० ४.२]

सचा सहार्थे १ १३६ ७ [सचा सह नि० ५ ५.]

सचा समवेता (स्त्री) ५ ५६ ६ [पच् समवाये (भ्वा०) धातो पचाद्यच् । तत स्त्रिया टाप् । औणा० वा अन् प्रत्यय]

सचानः समवेत (सूर्य) ६ २० २ [पच् समवाये (भ्वा०) धातोर्बाहु० औणा० आनच्]

सचाभुवम् सचा विज्ञानादिना भावयन्तीम् (मातर=जननीम्) १ १११ १ य समवाये भवति तम्, सत्य भावुकम् (परमेश्वरम्) १ १३१ ३. **सचाभुवः**=ये सचा परस्पर सङ्गचनुपङ्गिनो भवन्ति ते (कर्मकृत=पुरुषार्थिजना) ३ ४७ [सचा पदनाम निघ० ४ २. षच् समवाये (भ्वा०) धातोर्भावे क्विबन्तात् टापि सचेति रूपम् । तदुपपदे भू सत्तायान् (भ्वा०) धातो क्विप्]

सचाभुवा यौ सत्येन पुरुषार्थेन सह भवतस्तौ (अश्विना=राजप्रजाजनौ) ३४ ४७ *यौ* सचा समवाय भावयतस्तौ (अश्विना=जलाग्नी), प्र०—अत्राऽन्तर्गतो ण्यर्थ १ ३४ ११. सहकारिणौ (अश्विना=अध्यापकोपदेशकौ) १ १५७ ४ सचेन गुणसमवायेन सह भवन्तौ (मित्रावरुणा=राजप्रजाजनौ) २ ३१ १ [सचा इत्युपपदे भू सत्तायाम् (भ्वा०) धातो क्विप् । ततो द्विवचनस्याकारादेश । सचा=पच् समवाये (भ्वा०) धातोः क्विप् । ततष्टाप्रत्यय । सचभुवा सहभुवौ नि० ५ ५]

सचिविदम् सब से प्रीति प्रेमभाव से सब को सुख प्राप्त कराने वाले (मित्र परमेश्वर) को प० वि० । [सचा इत्युपपदे विद्लृ लाभे (तुदा०) धातो क्विप् । पूर्वपदस्येत्व वर्णव्यत्ययेन]

सचेतसः ये चेतसा प्रज्ञया सह वर्त्तन्ते ते (देवा.=विद्वज्जना) १८ ७६ **सचेतसौ**=समान चेतस ज्ञान सज्ञापन ययोस्तौ (अध्येत्रध्यापकौ) ५ ३ समानसज्ञानौ (विवाहितस्त्रीपुरुषौ) १२ ६० **सचेताः**=समान चेतो विज्ञान सज्ञापन वा यस्य स (इन्द्र=सेनाधिपति) १ ६१ १० चेतसा प्रज्ञया सहित (सूर्यवद्राजा) ४ १६ ७ [समान-चेतस्पदयो समासे 'समानस्य छन्दसि०' इति समानस्य सादेशे रूपम् । चेतस् प्रज्ञानाम निघ० ३ ९]

सच्छन्दाः समानानि छन्दासि यासु ता (प्रजा) २३ ३४. [समान-छन्दस्पदयो समासे समानस्य सादेशे रूपम्]

सजन्या समानैर्जन्यै सह वर्त्तमानानि (अन्नानि) ४ ५० ६ [सजन्यप्राति० शेर्लोपश्छन्दसि । सजन्यम्=समान-जन्यपदयो समास । जन्यम्=जनी प्रादुर्भावे (दिवा०) धातो 'तकिशसिचतियनिजनीनाम्०' इनि वा० सूत्रेण यत्]

सजातवनि जात जात वनति स जातवनि, समानश्चाऽसौ जातवनिस्तम्, भा०—य समानजन्मभिर्मनुष्यैर्वन्यते ससेव्यते तम् (परमेश्वरम्), प्र०—'समानस्य छन्दस्यमूर्द्धप्रभृत्युदर्केषु' अ० ६ ३ ८४ अनेन समानस्य सकारादेश, अत्राऽसो लुक् व १ १७ समाना जाता विद्या, समान जात राज्य वा वनयति येन तम् (परमेश्वर भौतिकमग्नि वा) १ १८, समानान् जातान् वेदान्, क्षत्रधर्मान्, मूर्त्तान् जगत्स्थान् पदार्थान्वा वनयति प्रकाशयति तम् (परमेश्वर भौतिकमग्नि वा) १ १८ [समान-जातवनिपदयो समासे समानस्य सादेश । जातवनि=जातोपपदे वन सम्भक्तौ (भ्वा०) धातो 'छन्दसि वनसनरक्षिमथाम्' इतीन् । अथवा समान-जातपदयो समासे सजात । तदुपपदे वन सम्भक्तौ (भ्वा०) धातोरिन्]

सजातः सहैव जात (व्यक्ति) ५ २३ **सजातान्**=सहोत्पन्नान् (विद्यार्थिजनान्) १ १०९ १ समानात्प्रादुर्भावादुत्पन्नान् (पुत्रान्) ११ ५८ **सजातानाम्**=जातै सह वर्त्तमानानाम् (राजप्रजाजनानाम्) १० २९ समानजन्मनाम् (देवानाम्=विदुषा योद्धॄणाम्) १७ ५१ **सजाताः**=समानदेशे जाता उत्पन्ना (सखाय=सुहृज्जना) १७ ३८ [समान-जातपदयो, सह-जातपदयोर्वा समास । सह-समानयो स्थाने सादेश क्रमश 'वोपसर्जनस्य, 'समानस्य छन्दसि०' सूत्राभ्याम् । जात=जनी प्रादुर्भावे (दिवा०) धातो क्त । प्राणा वै सजाता प्राणैर्हि सह जायते श० १ ९ १ १५ भूमा वै सजाता श० १ २ १ ७]

सजात्यम् समानजातौ भवम् (नाम) ३ ५४ १६ समानासु जातिषु भवम् (प्रेम) २ १ ५ **सजात्यानाम्**=अस्मद्विधानाम् (मनुष्याणाम्) ३३ ४७ [समान-जातिपदयो समासे समानस्य सादेशे सजाति । ततो भवार्थे यत् । सजात्य समानजातिता नि० ६ १४]

सजामि सयुनज्मि १ १६१ १० [षञ्ज सङ्गे (भ्वा०) धातोर्लट् । 'दससञ्जस्वञ्जा शपि' अ० ६ ४ २५ सूत्रेणोपधाया नकारस्य लोप]

सजित्वरीः शरीरै सह सयुक्तान् रोगान् जेतु शीला (ओषधी=सोमादीन्) १२ ७७. [सह-जित्वरीपदयो

शत्रवो येन तम् (इन्द्रम्) ३ ३२ १७ सम्यग् जयति येन तम् (इन्द्र=विद्युतम्) ३ ३९ ९ **सञ्जितः**=सम्यग् जेता (इन्द्र=सूर्य.) ५ ४२ ५ [सम्+जि जये (भ्वा०) धातो क्त]

सञ्जिहानम् अधिकरण त्यजन्तम् (सज्जनम्) ७ ३३ १० [सम्+ओहाक् त्यागे (जु०) धातो शानच् व्यत्ययेनात्मनेपदम्]

सञ्जुषताम् भा०—युक्त्या सेवताम् ३८ १६ [सम्+जुषी प्रीतिसेवनयो (तुदा०) धातोर्लोट्]

सञ्ज्ञातरूपः सम्यग् ज्ञात येन स (विद्वज्जन) १ ६९ ५ [सम्-ज्ञातपदयो समास । तत 'प्रशसाया रूपप्' अ० ५ ३.६६ सूत्रेण रूपप्]

सञ्ज्ञानम् सम्यग्विज्ञानम् १२ ४६ अच्छे प्रकार चिताना स० वि० १४२, अथर्व० ३ ३० ४ **सञ्ज्ञानाय**= सम्यग् ज्ञान कामप्रबोध तरमै ३० ९ [सम्+ज्ञा अवबोधने (क्र्या०) धातोर्ल्युट्]

सत् प्रकृत्यात्मकमव्यक्त सत्सञ्ज्ञक जगत्कारणम् ऋ० भू० ११६ यद् वर्त्तते तत् (हवि) ५ ४४ ३ वर्त्तमानम् (ब्रह्म) ४ ५ १० प्रमादरहित सत्य ज्ञानम् ६ २७ २ नित्यम् (ईश्वरम्) ३२ ६. यथार्थम् ६ २७ २ विद्यमानम् (ब्रह्म) १ १६४ ४६ **सतः**=अनादिवर्त्तमानस्य विनाशरहितस्य कारणस्य १ ६६ ७ सत्पुरुषस्य ४ ६ ६ विद्यमानस्य व्यक्तस्य (कार्यजगत) १३ ३ विद्यमानानुत्तमान् पदार्थान् २.३२ सत्यस्वरूपस्य (ईश्वरस्य) ३३ ३६ [अस् भुवि (अदा०) धातो शतृ । सत् उदकनाम निघ० १ १२ तयो (सदसतो) यत् सत् तत् साम तन्मनस्स प्राण जै० उ० १ ५३ २ सदमृतम् श० १४ ४ १ ३१]

सतः सतः विद्यमानस्य विद्यमानस्य (कार्यकारणरूपाया सृष्टे) ३ ३१ ८ [सत पदस्य वीप्साया द्वित्वम् । सत =अस भुवि (अदा०) धातो शत्रन्तात् षष्ठी]

सती सद्गुणयुक्ता (स्त्री) ६ ३५ वर्त्तमाना (भूमि) ६ ४७ २० पतिव्रता (स्त्री) ४ ३ ६ **सतीः**=विद्यमाना प्रकृती ३ ३१ ५ विद्यासुशिक्षादिशुभगुणसहिता (स्त्रिय) १ १६४ १६ [सती=अस भुवि (अदा०) धातो शत्रन्तान् ङीप्]

सतीनकङ्कतः सतीनमिव चञ्चल (जन), १ १९१ २ [सतीन-कङ्कतपदयो समास । सतीनम् उदकनाम निघ० १ १२ कङ्कत =ककि गत्यर्थे (भ्वा०) धातोर्बाहु० औणा० अतच्]

सतीनसत्वा य सतीन जल सादयति स (इन्द्र= सूर्यलोक) १ १०० १ [सतीनोपपदे षद्लृ विशरणगत्यवसादनेषु (भ्वा०) धातोर्वनिप् । सतीनम् उदकनाम निघ० १ १२]

सतेन विभक्तेन कर्मणा १९ २७ उत्तमाऽवयवैर्विभक्तेन शिरसा १९ ८८ [सत इत्युत्तरनाम निघ० ३ ३९ सत इति प्राप्तस्य ··· सत ससृत भवति नि० ३ २०]

सतोवीराः सतो विद्यमानस्य सैन्यस्य मध्ये वीरा प्राप्तयुद्धविद्याशिक्षा राजपुरुषा. २९ ४६ सत्त्वबलोपेता. (राजपुरुषा) ६ ७५ ९ [सत-वीरपदयो समासे षष्ठ्या अलुक् छान्दस । सत =अस भुवि (अदा०) धातो शत्रन्तात् षष्ठी]

सत्तः अविद्यादिदोषान् हिंसित्वा विज्ञानप्रद (विद्वज्जन), प्र०—अत्र बाहुलकात् षद्लृधातोरौणादिक क्त प्रत्यय १ १०५ १३ निषण्ण (मनुष्य) ७ ४२ २ प्रतिष्ठित (होता=दातृजन) २ ३६ ६ विज्ञानवान् दुःखहन्ता (विद्वज्जन) १ १०५ १४ [षद्लृ विशरणगत्यवसादनेषु (भ्वा०) धातोर्बाहु० औणा० क्त]

सत्ता दत्त (विद्वज्जन) ३ १७.५ [षद्लृ विशरणगत्यवसादनेषु (भ्वा०) धातो तृच् । क्तो वा । तत्राकारस्याकारादेश]

सत्त्वभिः पदार्थै ५ ३४ ८ [सत्प्राति० भावे त्व । सत्=अस भुवि (अदा०) धातो शतृ । सत्त्वै कर्मभि नि० ६ ३० सत्त्व तु मध्ये विशुद्ध तिष्ठति नि० १३ १६]

सत्पतिम् सदीश्वरस्य वेदस्य धर्मस्य जनस्य वा पालकम् (इन्द्र=परमैश्वर्यम्) १२ ५६ सदविनाशी चाऽसौ पति पालकश्च तम्, यद्वा सतामविनाशिना कारणाना जीवानाञ्च पालकस्तम् (इन्द्र=परमात्मानम्) १७ ६१ य सता सद्व्यवहाराणा सत्पुरुषाणा वा पति पालकस्त न्यायाधीश राजानम् १ ११ १ सत्यस्य प्रचारेण पालकम् (इन्द्र=राजानम्) २७ ३७ सता पात्रम् (राजानम्) ६ २९ २ **सत्पतिः**—सता पालयिता जन १ ५४ ७ सतोऽविनाशिन कारणस्य, विद्यमानस्य, कार्यस्य, सत्यपथ्यकारिणा वा पालक (परमेश्वर ओषधिराजो वा) १ ९१ ५ सता धार्मिकाणा पति सत्याचाररक्षको वा (इन्द्र=राजा) १ १३० १ वेदाना सत्पुरुषाणा वा पालक (राजा) १ १७४ १ सत उदकस्य पालक (सूर्य), ६ १३ ३ सता पुरुषाणा वा पालक (इन्द्र =सेनापति) १ १०० ६ [सत्-पतिपदयो समास]

[सम्+चक्षिङ् व्यक्तायां वाचि (अदा०) धातो क्त्वा समासे क्त्वो ल्यप्]

सञ्चरणीः या सम्यक् चरन्ति ता भूमय ६ २४ ४ [सम्+चर गतौ (भ्वा०) धातोर्ल्युडन्तान् स्त्रिया डीप्]

सञ्चरणे सङ्गमने १ ५६ २ सम्यग् गमने ४ ५५ ६. [सम्+चर गतौ (भ्वा०) धातोर्ल्युट्]

सञ्चरन्ति सम्यग् गच्छन्ति, प्राप्नुवन्ति ५ १ ४ **सञ्चरन्तु**=सविलसन्तु ४ ८ ७ [सम्+चर गतौ (भ्वा०) धातोर्लट् । अन्यत्र लोट्]

सञ्चरन्ती सम्यग् गच्छन्ती (अ०—द्यावापृथिव्यौ) १ १४६ ३ सम्यग्गच्छन्त्यौ जानन्त्यौ (मातरा=मातृवद्वर्त्तमानेऽव्यापिकोपदेशिके) ३ ३३ ३ [सम्+चर गतौ (भ्वा०) धातो शत्रन्तात् डीप् । ततो द्विवचनस्य पूर्वसवर्णदीर्घश्छान्दस.]

सञ्चराः ये सम्यक् चरन्ति ते, भा०—नानादेशसञ्चारिण प्राणिन २४ १५ सञ्चरन्ति येषु ते मार्गा भा०—पश्वादिपालनमार्गा २४ १७ [सम्+चर गतौ (भ्वा०) धातो कर्त्तरि पचाद्यच् । अन्यत्राधिकरणे 'गोचरसचरवहव्रज०' अ० ३ ३ ११९ सूत्रेण घ]

सञ्चरेण्यम् सम्यक् चरितु ज्ञातु योग्यम् (चित्तम्) १ १७० १ [सम्+चर गतौ (भ्वा०) धातो कृत्यार्थे केन्य]

सञ्चिकित्वान् सम्यक् चिकीर्षक (विद्वज्जन) ४ ७ ८ [सम्+कित निवासे रोगापनयने च (भ्वा०) धातोर्लिट कानच् । धातूनामनेकार्थकत्वादत्र करोत्यर्थे कित]

सञ्चित्तानि सज्ञप्तानि धर्म्याणि कर्माणि १२ ५८ [सम्-चित्तपदयो समास । चित्तम्=चिती सञ्ज्ञाने (भ्वा०) धातो क्त]

सञ्चोदय सम्यक् प्रेरय प्रापय १ ९ ५ [सम्+चुद सञ्चोदने (चुरा०) धातोर्लोट्]

सञ्जग्मानः सङ्गतवान् (योगिजन) ७ १३ धीरतादिशुभगुणेष्वासक्त (न्यायाधीशो राजा) ७ १८ सम्यक् सङ्गत (वायु) १ ६ ७ [सम्+गम्लृ गतौ (भ्वा०) धातोर्लिट कानच्]

सञ्जग्मानासु सङ्गच्छन्तीषु (मनुष्यादिप्रजासु) १ ७४.१ [सम्+गम्लृ गतौ (भ्वा०) धातोर्लिट कानच् । ततष्टाप् स्त्रियाम्]

सञ्जग्मिरे सङ्गच्छन्ते ६ १९ ५ **सञ्जग्मुः**= सम्यग् जानीयु प्राप्नुयुर्वा ३ १ १३ **सञ्जग्मे**=सम्यक् सङ्गच्छते १ १६४ ८. [सम्+गम्लृ गतौ (भ्वा०) धातोर्लिट् । 'समो गम्यृच्छिभ्याम्' इत्यात्मनेपदम् । 'वा छन्दसी' ति क्वचिन्नाप्यात्मनेपदम्]

सञ्जनयन् सम्यक् कार्यरूपेण प्रकटयन् सन् (परमेश्वर) १७ १९ [सम्+जनी प्रादुर्भावे (दिवा०) धातोर्णिजन्ताच्छतृ]

संजितः सम्यग् जेता (इन्द्र=सूर्य) ५ ४२ ५ [सम्+जि जये (भ्वा०) धातो कर्त्तरि क्त औणादिक]

सञ्जभार सम्यग्धरति १ ११५ ४ सञ्जहार ३३ ३७ [सम्+हृञ् हरणे (भ्वा०) धातोर्लिट् । 'हृग्रहोर्भश्छन्दसी' ति हस्य भकार]

सञ्जर्भुराणः सम्यक् पालयन् धरन् (विद्वज्जन) ५ ४४ ५ [सम्+डुभृञ् धारणपोषणयो (जु०) धातोर्यङ्लुगन्तात् कानच् । अभ्यासस्य कुत्व छान्दसम् । जर्भरी भर्त्तारौ नि० १३.५]

सञ्जयामि सम्यग् विजय करने वाला हूं स० प्र० २३८, १० ४८.१ [सम्+जि जये (भ्वा०) धातोर्लट्]

सञ्जरताम् सस्तुयात् ४ ४ ८ [सम्+जरते अर्चतिकर्मा (निघ० ३ १४) धातोर्लोट्]

सञ्जानताम् आत्मा से धर्माऽधर्म, प्रियाऽप्रिय को सम्यग् जानने वाले (देवा=विद्वान् लोग) स० वि० १८६, १० १९१ २. [सम्+ज्ञा अवबोधने (क्र्या०) धातो शतृ । 'ज्ञाजनोर्जा' इति शित्प्रत्यये जादेश]

सञ्जानाथाम् सम्यग् जानीत, प्रादुर्भूतविद्यासाधिके भवत प्र०—अत्र व्यत्ययो लडर्थे लोट् च २ १६ [सम्+ज्ञा अवबोधने (क्र्या०) धातोर्लोट् । 'ज्ञाजनोर्जा' इति जादेश]

सञ्जानानाः सम्यग् ज्ञानवन्तो (देवा=विद्वासो जना) ऋ० भू० ९२, १० १९१ २ सम्यग् जानन्त (देवा), प्र०—अत्र व्यत्ययेनाऽऽत्मनेपदम् १ ७२ ५ सम्यग् जानने वाले (विद्वान् लोग) स० वि० १८६, १० १९१ २ [सम्+ज्ञा अवबोधने (क्र्या०) धातो शानच् । व्यत्ययेनात्मनेपदम्]

सञ्जिगीवान् सम्यग् विजेता सन् (अग्नि=विद्वान् राजपुरुष) ३ १५ ४. [सम्+जि जये (भ्वा०) धातोर्लिट क्वसु । 'सन्लिटोर्जे' इत्याभ्यासादुत्तरस्य कुत्व गकार]

सञ्जितम् सम्यग् जयशील शूरवीरम् (इन्द्र=राजानम्) ३ ३८ १० सम्यक् पालक दातार वा (इन्द्रम्) ३ ४८ ५ सम्यगुत्कर्षप्रापकम् (इन्द्रम्) ३ ३४ ११ सम्यग् जिता

सूर्येण च ऋ० भू० १४३, अथर्व० १४ १ १ अविनाशिस्वभावेन कारणेन १ २१ ६ **सत्यैः**=सत्यप्रकाशोज्ज्वलैर्नित्यैः (मन्त्रेभि=ज्ञानयुक्तैर्विचारैः) १ ६७ ३ [अस् भुवि (अदा०) धातो शतरि सदिति रूपम्। सत्प्राति० साध्वर्थे भवार्थे यत्। सत् उदकनाम (निघ० १ १२) ततो वा भवार्थे यत्। सत्यम् उदकनाम निघ० १ १२ सत्य कस्मात् सत्सु तायते सत्प्रभव भवतीति वा नि० ३.१३ सत्यम् तदेतत् त्र्यक्षर सत्यमिति स इत्येकमक्षर तीत्येकमक्षरमित्येकमक्षर प्रथमोत्तमे अक्षरे सत्य मध्यतोऽनृतम् श० १४ ८ ६ २ तद् यत् तत् सत्यम्। त्रयी सा विद्या श० ६ ५ १ १८ सत्य वा ऋतम् श० ७ ३ १ २३ तै० ३ ८ ३ ४ ऋतमिति (यजु० १२ १४) सत्यमित्येतत् श० ६ ७ ३ ११ यो वै सधर्म सत्य वै तत् तस्मात् सत्य वदन्तमाहुर्धर्मं वदतीति धर्मं वा वदन्त सत्य वदतीति श० १४ ४ २ २६ सत्य वै सुकृतस्य लोक तै० ३ ३ ६ ११ एतत् खलु वै व्रतस्य रूप यत्सत्यम् श० १२ ८ २ ४ एक ह वै देवा व्रत चरन्ति सत्यमेव ३.४ २ ८ एक ह वै देवा व्रत चरन्ति यत्सत्य तस्माद् सत्यमेव वदेत् श० १४ १ १ ३३ सत्यसहिता वै देवा ऐ० १ ६ सत्यमया उ देवा कौ० २ ८ सत्यमेव देवा अनृत मनुष्या. श० १ १ १ ४ सत्य देवा अनृत मनुष्या श० १.१ २ १७ एक ह वा ऽअस्य जितमनपजय्यमेव यशो भवति य एव विद्वान्त्सत्य वदति श० ३ ४ २ ८ स य सत्य वदति यथाग्नि समिद्ध त घृतेनाभिषिञ्चेदेव हैन स उद्दीपयति तस्य भूयो भूय एव तेजो भवति श्व श्व श्रेयान् भवत्यथ योऽनृत वदति यथाग्नि समिद्ध तमुदकेनाभिषिञ्चेदेव हैन स जासयति तस्य कनीय कनीय एव तेजो भवति श्व श्व पापीयान् भवति तस्माद् सत्यमेव वदेत् श० २ २ २ १९ तस्माद् हैतद् य आसक्ति सत्य वदत्यैषा वीरतर इवैव भवत्यनाढचतर इव सह त्वेवान्ततो भवति देवा ह्येवान्ततो भवन् श० ६ ५ १ १६ (उद्दालक) तस्मै (प्राचीनयोग्याय) हैता शोकतरा व्याहृतिमुवाच यत् सत्य तस्माद् सत्यमेव वदेत् श० ११ ५ ३ १३ स य सत्य वदति स दीक्षित कौ० ७ ३ सत्ये ह्येव दीक्षा प्रतिष्ठिता भवति श० १४ ६ ९ २४ तस्यै वाच सत्यमेव ब्रह्म श० २ १ ४ १० सत्य ब्रह्म श० १४ ८ ५ १ सत्य ब्रह्मणि (प्रतिष्ठितम्) ऐ० ३ ६ गो० उ० ३ २ आप सत्येन (प्रतिष्ठिता) ऐ० ३ ६ गो० उ० ३ २ तद् यत् तत् सत्यम् आप एव तदापो हि वै सत्यम् श० ७ ४ १ ६ सत्य वा एतत् यद् वर्षति तै० १ ७ ५ ३ असावादित्य सत्यम् तै० २ १ १ १ १ तद् यत् सत्यम्। असौ स आदित्य श० ६ ७ १ २ तद् यत् तत् सत्यम्। असौ स आदित्यो य एष एतस्मिन् मण्डले पुरुष श० १४ ८ ६.३. सत्यमेव य एष (आदित्य.) तपति श० १४ १ २.२२ (यजु० ११ ४७.) अय वा ऽअग्निर्ऋतमसावादित्य सत्य यदि वासो (आदित्य) ऋतमय (अग्नि) सत्य मुभयम्वेतदयममग्नि श० ६ ४ ४ १० सत्य वै शुक्रम् श० ३ ९ ३ २५. सत्य सत्य वै हिरण्यम् गो० उ० ३.१७ प्राणा वै सत्यम् श० १४ ५.१.२३ चक्षुर्वै सत्यम् तै० ३ ३ ५ २ एतद्ध मनुष्येषु सत्य यच्चक्षु गो० उ० २ २३ इय (पृथिवी) एव सत्यमिय ह्येवैषा लोकानामद्धा तमाम् श० ७.४ १.८ नामरूपे सत्यम् श० १४ ४ ४ ३. श्रद्धा पत्नी सत्य यजमान ऐ० ७ १० सत्य ह होतैषामासीत् यद् विश्वसृज आसत तै० ३ १२.९ ३]

सत्यमन्त्राः सत्यो यथार्थो मन्त्रो विचारो येषान्ते (ऋभव=मेधाविजना) १ २० ४ [सत्य-मन्त्रपदयो समास। मन्त्र=मत्रि गुप्तभाषणे (चुरा०) धातोर्घञ्]

सत्यमन्मा य सत्य मन्यते विजानाति विज्ञापयति स (पूर्णविद्यो जन) १ ७३ २ [सत्योपपदे मन ज्ञाने (दिवा०) धातो कर्त्तरि मनिन्]

सत्ययजम् य सत्यमेव यजति सङ्गच्छते तम् (अग्नि=सूर्यमिव राजानम्) ४ ३ १ यस्सत्य यजति सङ्गमयति तम् (अग्नि=परमात्मानम्) ६ १६.४६. [सत्योपपदे यज देवपूजासगतिकरणदानेषु (भ्वा०) धातो कर्त्तरि पचाद्यच्]

सत्ययोनिः सत्यमविनाशि योनि कारण गृह वा यस्य स (इन्द्र=महाराज) ४ १९ २ [सत्य-योनिपदयो समास.। योनि गृहनाम निघ० ३.४.]

सत्यराजन् सत्यप्रकाशक (सभेश) २० ४ हे सत्यप्रकाशक, सत्यराज्यप्रदेश्वर ऋ० भू० २१८, २० ४ सत्यकर्त्ता, पक्षपातरहित सबका न्यायकर्त्ता, धर्मराज परमात्मा स० प्र० ४८०, २० ४ [सत्य-राजन्पदयो समास]

सत्यराधसम् सत्य राध्नोति यया ताम् (सुमतिं=शोभना प्रज्ञाम्) २२ ११ **सत्यराधसे**=सत्य राधो धन यस्य तस्मै (सत्पुरुषाय) ७ ३१ २ **सत्यराधः**=सत्य राध प्रकृत्याख्य धन यस्य तत्सम्बुद्धौ (ईश्वर) ७ ४१ ३. सत्यानि राधासि विद्यादिधनानि यस्य तत्सम्बुद्धौ (विद्वज्जन) १ १०१ ८ सत्सु साधूनि राधासि धनानि यस्य तत्सम्बुद्धौ (ईश्वर) ३४ ३६ **सत्यराधाः**=न्यायोपार्जितसत्यधन (इन्द्र=राजा) ४ २४ २. सत्येन राधो धन यस्य स

सत्यकर्मन् सत्य वेदोक्त कर्म करने वाले सन्यासिन्, स० वि० १६५, ६ ११३ ४ [सत्य-कर्मन्पदयो समास]

सत्यगिर्वाहसम् सत्याया गिर प्रापकम् (पतिं=राजानम्) १ १२७ ८ [सत्य-गिर्पदयो समासे ततो वाहसपदेन समास । गी वाङ्नाम निघ० १ ११ वाहस=वह प्रापणे (भ्वा०) धातो 'वहियुभ्या णित्' उ० ३ ११६ सूत्रेणासच्]

सत्यजित् सत्य कारण धर्मञ्चोन्नयति, भा०—य सत्यकर्मोन्नयति स (गण=गणनीयो विद्वज्जन) १७ ८३ [सत्योपपदे जि जये (भ्वा०) धातो कर्त्तरि क्विप्]

सत्यज्योतिः सत्यमविनाशि ज्योति प्रकाशो यस्य स (ईश्वर) भा०—सत्योपदेश १७ ८० [सत्य-ज्योतिष्-पदयो समास]

सत्यतर अतिशयेन सत्यस्वरूप (परमात्मन् विद्वन्वा) १ ७६ ५ **सत्यतर**.=अतिशयेन सत्य (विद्वज्जन) ३ ४ १० य सत्येन दुख तरति स (वनस्पति=विद्वज्जन)- ७ २ १० [सत्यप्राति० अतिशायने तरप् । अथवा सत्योपपदे तॄ प्लवनसतरणयो (भ्वा०) धातो पचाद्यच् कर्त्तरि]

सत्यताते सत्याऽऽचरक (राजन्) ४ ४ १४ [सत्य-प्राति० भावे तातिल् छान्दस]

सत्यधर्मा सत्यो धर्मो यस्य स (देव=ईश्वर) १२ ६६ **सत्यधर्माणम्**=सत्यो नाशरहितो धर्मो यस्य तम् (अग्नि=परमेश्वर भौतिक वा) १ १२ ७ [सत्य-धर्म-पदयो समास । 'धर्मादनिच् केवलात्' अ० ५ ४ १२४ सूत्रेण समासान्तोऽनिच]

सत्यप्रसवसः सत्योऽविनाशी प्रसव प्रकटो बोधो यस्मात्तस्य (बृहस्पते=जगदीश्वरस्य) ६ १० सत्याना न्याय्यविजयादीना प्रसवो यस्मात्तस्य (इन्द्रस्य=सेनापते) ६ १० सत्यानि प्रसवासि जगत्स्थानि कारणरूपेण नित्यानि यस्य तस्य (देवस्य=जगदीश्वरस्य) ६ १३ सत्य प्रसव ऐश्वर्य जगत कारण कार्यं यस्य तस्य, सत्यन्याययुक्तस्य (परमेश्वरस्य) ६ १० [सत्य-प्रसवस्पदयो समास । प्रसवस्=प्र+षु प्रसवैश्वर्ययो (भ्वा०) धातोरौणा० असुन्]

सत्यप्रसवः सत्येन कर्मणा प्रसव ऐश्वर्य यस्य स (राजा) १० २८ [सत्य-प्रसवपदयो समास । प्रसव=प्र+षु प्रसवैश्वर्ययो (भ्वा०) धातो 'ऋदोरप्' त्यप्]

सत्यम् यद्वेदविद्यया, प्रत्यक्षादिभि प्रमाणै, सृष्टिक्रमेण विदुषा सङ्गेन, सुविचारेणाऽऽत्मशुद्ध्या वा निर्भ्रम, सर्वहित, तत्त्वनिष्ठ, सत्यप्रभव, सम्यक् परीक्ष्य निश्चीयते तत् (व्रत=सत्यमान, सत्यभाषण, सत्यकरणञ्च) १ ५ सत्सु पदार्थेषु सुखस्य विस्तारक, सत्प्रभव, सद्भिर्गुणैरुत्पन्न व्रतम् १ १६ जलम् १ १०५ १२ अव्यभिचारिकर्म १५ ६ यथार्थम् ४ ३३ ६ अव्यभिचारि सुपरीक्षित वेदचतुष्टय-जन्यञ्च (कर्म) १ ५२ १३ सत्सु धर्माचरणेषु साधु (इन्द्रिय=धनम्) १६ ७८ सतीष्वोषधीषु भवम् (रसम्) १६ ७६ सत्सु परमेश्वरादिपदार्थेषु साधु (इन्द्रिय=प्रज्ञानम्) १६ ७४. अविनश्वराम् (इन्द्रिय=दिव्या वाचम्) १६ ७३ वर्त्तमाने साधु (इन्द्रिय=जिह्वादिकम्) १६ ७६ सत्सु नित्येषु पदार्थेषु व्यवहारेषु वा साधुस्त परमेश्वर धर्म वा १६ ३० सत्यभाषणादिक्रियोज्ज्वलम् (महित्व=महिमानम्) ३ ३२ ६ सत्सु साधु वच, भा०—सत्यवचनम् ३ ६ ४ नित्यम् (अध्वर=यज्ञम्) ७ ५६ १२ अविनाशिनम् (इन्द्र=सूर्यम्) २ २२ १ अविनश्वरम् (भा०—ब्रह्म) ११ ४७ व्रतम् १ ६८ ३ त्रैकाल्याऽबाध्यम् (विद्यासुशिक्षा सत्यधर्माचरणम्) ४ ११८ मोक्षम्, ऋ० भू० १०० नाशरहित पदम् १ १५६ ३ सत्सु पुरुषेषु साधु सत्य मान भाषण कर्म च, भा०—अव्यवत, जीवाख्य, सत्यभाषणा-दिकम् ११ ४७ स्थूलस्य सूक्ष्मस्य जगत कारण त्रिगुणमय प्रकृत्यात्मकमव्यक्तम् प० वि० । यथार्थ जिसका कभी व्यभिचार विनाश नही होता उस विद्यादि लक्षण धर्म को आर्याभि० २ ४७, १ ५ अविनाशि गमनागमनाख्य कर्म १ ३८ ७ **सत्यः**=सन्तीति सन्त, सद्भ्यो हितस्तत्र साधुर्वा (अग्नि=परमेश्वर भौतिको वा) १ १ ५ सत्सु साधुर्जीवस्वरूपेणाऽनादिस्वरूपो वा (इन्द्र=सभाध्यक्ष) १ ६३ ३ सत्सु पुरुषेषु साधु (इन्द्र=महाराज) ४ २१ १० अस्तीति सत्, सति साधु सत्य सर्वदा विनाश-रहित (ईश्वर) वे० भा० न० १ १ ५ सत्पुरुषेषु भव (मित्र=सर्वसुहृज्जन) ६ ३६ सत्सु व्यवहारेषु विद्वत्सु वा साधु (सभेशो राजा) ३३ ८३ सता वेदाना सत्पुरुषाणा वा पालक (परमेश्वर) १ १७४ १ **सत्याय**=सति वर्त्तमाने भवाय स्थूलाय पदार्थसमूहाय, अ०—नित्यसुखाय १५ ६ **सत्ये**=वेदशास्त्रप्रतिपादिते, प्रत्यक्षादिभि प्रमाणै परीक्षिते पक्षपातरहिते न्याय्ये धर्मे ऋ० भू० ६७, १६ ७७ **सत्याः**=सत्सु कर्मसु साधव (आशिष=सिद्धा इच्छा) १ १७६.६ सत्सु धर्मेषु साधव (कामा=अभिलाषा) १२ ४४ ये प्रतिज्ञा कुर्वन्ति ते (विद्वासो जना) ६ ५० २ **सत्येन**=नित्यस्वरूपेण ब्रह्मणा, वायुना

वा) ५.२४. [सत्र व्याख्यातम्। तदुपपदे राजृ दीप्तौ (भ्वा०) धातोः कर्त्तरि क्विप्]

सत्रसदौ सता जीवात्मना त्राणं सत्रं, तत्र सीदतस्तौ, भा०—जीवात्मरक्षणतत्परौ (देवौ=प्राणापानौ) ३४ ५५ [सत्रसदौ च देवौ वाय्वादित्यौ नि० १२ ३७ सत्रसदौ च देवौ प्राज्ञश्चात्मा तैजसश्चेत्यात्मगतिमाचष्टे नि० १२ ३७ सत्रोपपदे षद्लृ विशरणगत्यवसादनेषु - (भ्वा०) धातोः कर्त्तरि क्विप्]

सत्रा नित्यानि सत्यार्थप्रतिपादकानि (काव्यानि) १ ७२ १ सत्यान् गुणकर्मस्वभावान् १ ७१ ६ सत्यकारणरूपेणाऽविनाशि (विश्वम्) १ ५७.६ सत्या (मदासः=आनन्दका प्रजाजना) ६ ३६ १. सत्यम् ७ ३२ १६ सत्येन कारणेन ६ ३४.४ सत्याचारस्य ४ ३० २ सत्यानि (नृम्णानि=धनानि) ४.२२ ९ सत्या (सभ्या जना) ४ १७ ६ [सत्रमिति व्याख्यातम्। ततः शेर्लोपश्छन्दसि]

सत्राकरः सत्रा सत्यं करोतीति (नायकः सेनेशः) १ १७८ ४ [सत्रोपपदे डुकृञ् करणे (तना०) धातोः 'कृञो हेतुताच्छील्य०' अ० ३ २ २० इति ताच्छील्ये ट.। अथवा कर्त्तरि पचाद्यच्। सत्रा सत्यनाम निघ० ३.१०]

सत्राचीम् या सत्रा सत्यमञ्चति प्रापयति ताम् (रातिं=दानम्) ७.५६ १८ [सत्रा सत्यनाम (निघ० ३.१०) तदुपपदे अञ्चु गतिपूजनयोः (भ्वा०) धातोः 'ऋत्विग्दधृक्०' इति क्विन्। ततः स्त्रियाम् अञ्चतेश्चोपसंख्यानम्' इति ङीप्]

सत्राजितम् सत्रा सत्यं जयत्युत्कर्षति येन तम् (यज्ञम्) ११ ८ **सत्राजिते**=यः सत्येनोत्कर्षति तस्मै (इन्द्राय=विदुषे सभासेनेशाय) २ २१ १ [सत्रोपपदे जि जये (भ्वा०) धातोः क्विप्। 'ह्रस्वस्य पिति कृति०' सूत्रेण तुगागमः। सत्रा सत्यनाम निघ० ३.१०]

सत्रादावन् सत्यं ददातीति तत्सम्बुद्धौ, सत्रं वृष्ट्याख्यं यज्ञं समन्ताद् ददातीति स वा (इन्द्र=परमेश्वर, सूर्यो वा) १ ७ ६ [सत्रेति व्याख्यातम्। तदुपपदे डुदाञ् दाने (जु०) धातोः कर्त्तरि 'आतो मनिन्क्वनिब्वनिपश्च' इति वनिप्]

सत्राषाट् यः सत्राणि बहून् यज्ञान् कर्त्तुं सहते सः (इन्द्र=राजा) ७ २० ३ [सत्रोपपदे षह मर्षणे (भ्वा०) धातोः 'छन्दसि सहः' अ० ३ २ ६३ सूत्रेण ण्वि.]

सत्रासाहम् सत्यसहम् (राजानम्) ३ ५१ ३ सत्यानि सह्यन्ते येन तम् (रयिम्) १ ७९ ८ यः सत्रा सत्यानि सहते तम् (इन्द्र=राजानम्) ३ ३४ ८ **सत्रासाहः**=यः सत्यं सहते सः (शुभकर्माचारिजनः) २.२१ ३. **सत्रासाहे**=यः सत्रा सत्येन सहते तस्मै (इन्द्राय=सभासेनेशाय) २ २१.२. [सत्रा सत्यनाम निघ० ३.१० तदुपपदे षह मर्षणे (भ्वा०) धातोः 'कर्मण्यण्' इत्यण्]

सत्राहणम् यः सत्येनाऽसत्यं हन्ति तम् (इन्द्र=राजानम्) ४ १७ ८. [सत्रोपपदे हन हिंसागत्योः (अदा०) धातोः कर्त्तरि क्विप्]

सत्राहम् सत्यधर्माचरणदिनम् ५ ३५ ४ [सत्रा-अहन्पदयोः समासः। 'राजाहःसखिभ्यष्टच्' इति समासान्तष्टच्]

सत्राहा सत्यदिनानि ६ ४६.३ [सत्रा-अहन्पदयोः समासे शेर्लोपश्छन्दसि]

सत्वनाम् सेनाया सीदतां प्राणिनाम् १ ७ ४२ प्राप्तानां पदार्थानाम् १९ २० **सत्वने**=शुद्धान्तःकरणाय (सज्जनाय) ६.४५ २२ **सत्वनैः**=रथादिद्रव्यैः ५.३३.४ **सत्वभिः**=विज्ञानवद्भिः (जनैः) १.१३३.६. पदार्थैः १ १३३.६. प्राणिभिः १.१४०.९ शत्रून् सीदयद्भिर्वीरैः सह ३.४९ २ **सत्वा**=सर्वत्र स्थितः (परमेश्वरः) ६ २२ १ सत्वगुणोपेतः (सूरिः=विद्वज्जनः) ६ ३७ ५ बलवान् (राजपुरुषः) ६ १८ २ गन्ता (सविता=सूर्यमण्डलम्) ४ १३ २ प्रापकः (राजा) ४.४० २ यः सीदति सः पुरुषार्थी (इन्द्रः=ईश्वरोपासको राजा) ६.२९ ६ बलिष्ठः (योद्धा) १.१७३ ५. **सत्वानः**=बलपराक्रमप्राणिभूतगणाः १ ६४ २. सत्त्वगुणबलोपेता (भा०—सेनास्था भृत्या) १६.८. [षुञ् अभिषवे (स्वा०) धातोः 'सुयजोर्ङ्वनिप्' अ० ३.२.१०३ सूत्रेण ङ्वनिप्। षद्लृ विशरणगत्यवसादनेषु (भ्वा०) धातोर्वा कर्त्तरि वनिप्। दकारस्य तकारश्छान्दसः]

सत्सि सभायाम् १ ७६ ४ **सदसः**=सीदन्ति यस्मिँस्तस्माद् गृहात् २ १७ ७. सभ्यान् (पुरुषान्) ४ ५१ ८ सभायां ३२ १३ सभासदः ४ १७ ४ सभा ३ ३६.६ सभातः १ १८२ ८ सीदन्ति विद्वांसो धार्मिका न्यायाधीशा यस्मिँस्तत्सदः सभा तस्य, प्र०—अत्राऽधिकरणेऽसुन् प्रत्ययः १ १८ ६ **सदसि**=सीदन्ति बुद्धिविषया यस्मिन्निति तत्सदोऽध्ययनाऽध्यापननिमित्ता सभा तत्र ६ २४ **सदः**=सीदन्ति प्राप्नुवन्ति सुखानि यस्मिँस्तद् गृहम्, सीदन्ति घ्नन्ति दुःखानि येन तदौषधसेवनं पथ्याचरणञ्च (तद्वस्तु) सीदति जानाति येन तद् ज्ञानं वा २ ६ रहने के लिए उत्तम घर स० वि० १६७, अथर्व०' ६ २ ३ १९ स्थापनम्

(इन्द्र) ४ २६ १ सत्याचरणेन सत्य वा राधो धन यस्य स (राजा) ५ ४० ७ [सत्योपपदे राध ससिद्धौ (स्वा०) धातोरौणा० असुन्। अथवा सत्य-राधस्पदयो समास। राधस् धननाम निघ० २ १०]

सत्यवाचम् सत्या वाग् यस्य तम् (विपश्चित=विद्वज्जनम्) ३ २६.६ सत्या यथार्था वाग् येषान्ते (विद्वज्जना) ३ ५४ ४ [सत्या-वाच्पदयो समास। पूर्वपदस्य ह्रस्वादेश]

सत्यशवसम् सत्य शवो वल यस्य तम् (ऋभ्वस=मेधाविजनम्) ५ ५२ ८ **सत्यशवसः**=नित्यदृढवलस्य (विदुष) १ ८६ ८ नित्य वल येषा तत्सम्बुद्धौ (सभाद्यध्यक्षादय) १ ८६ ६ [सत्य-शवस्पदयो समास। शवस् वलनाम निघ० २ ६ धननाम निघ० २ १० उदकनाम निघ० १ १२]

सत्यशुष्मः सत्यं शुष्म वल यस्मिन् स (विद्युदादिस्वरूपोऽग्नि) ४ ११ ४ सत्यवल (सत्याचारशीलो विद्वज्जन) ३ ३० २१ **सत्यशुष्माय**=सत्यमविनश्वर शुष्म वल यस्य तस्मै (अ०—जगदीश्वराय) १ ५१.१५ नित्यवलाय (इन्द्राय=सेनापतये) १ १०३ ६ [सत्य-शुष्मपदयो समास। शुष्म वलनाम निघ० २ ६]

सत्यश्रवसि सत्याना श्रवणे सत्येऽन्ने वा ५ ७६ १ सत्यस्य श्रवो यस्मिन् तस्मिन् (भा०—आनन्दयुक्ते गृहाश्रमे) ५ ७६ २ सत्येन व्यवहारेण प्राप्ताऽन्नाद्यैश्वर्ये (दुहित=विदुषि स्त्रि) ५ ७६ ३ [सत्य-श्रवस्पदयो समास। श्रव अन्ननाम निघ० २ ७ धननाम निघ० २ १०]

सत्यश्रुतः ये सत्य शृण्वन्ति ते (कवय=विद्वासो जना) ६ ४६ ६ ये सत्य श्रुतवन्त शृण्वन्ति वा ते (कवय) ५ ५७ ८ ये सत्य यथार्थं शृण्वन्ति ते (नर=नायका जना) ५ ५८ ८ [सत्योपपदे श्रु श्रवणे (भ्वा०) धातो कर्त्तरि क्विप्। ह्रस्वस्य पिति कृति तुगिति तुगागम]

सत्यसत्वन् सत्यानि सत्त्वान्यन्त करणादीनि यस्य तत्सम्बुद्धौ (राजन्) ६ ३१ ५. [सत्य-सत्त्वपदयो समासान् मतुप्। वलोपश्छान्दस। अथवा सत्य-सत्पदयो समासान् मतुप्]

सत्यसवम् सत्योऽविनाशी सव सामर्थ्ययोगो यस्य तम् (सवितार=परमात्मानम्) ५ ८२ ७ सत्य सव ऐश्वर्यं जगद्वा यस्मिन् यस्य वा तम् (ईश्वरम्) ४.२५ **सत्यसवसः**=सत्यन्याययुक्तस्य (इन्द्रस्य=सम्राज) ६ १० सत्य सव ऐश्वर्यं जगत कारण कार्यञ्च यस्य तस्य (सवितु=जगदीश्वरस्य) ६ १० [सत्य-सवपदयो समास। सव=पु प्रसवैश्वर्ययो (भ्वा०) धातो 'ऋदोरवि' त्यप्]

सत्या सत्सु साधूनि त्रैकाल्याबाध्यानि कर्म्माणि २७.१ अविनश्वराणि (कर्माणि) ४ १७ २० सत्यधर्मोज्ज्वलितानि (अपासि=कर्माणि) १ ७० ४ [सत्यमिति व्याख्यातम्। तत शेर्लोपश्छन्दसि]

सत्या सत्सु पदार्थेषु साध्वी (स्त्री) ६ ६५ ५ यथार्थोक्ता (सवाक्=राजनीतिनिष्ठा सम्यग् वाणी) ६.१२ **सत्याभिः**=सत्याचरणान्विताभि (आह्वानै) १ १२६ ७ **सत्याः**=सत्सु गुणकर्मस्वभावेषु भवा (कुमारिका) १ ७६ १ सिद्धा (आशिष=कामना) २ १० सत्सु साध्व्य (आशिष) ३५ २० **सत्ये**=सत्सु साध्व्यौ हिते कारणरूपे नित्ये वा, (सूर्यभूमी) ३ ६.१० [सत्यमिति व्याख्यातम्। तत स्त्रिया टाप्]

सत्यानि सत्स्वर्थेषु साधूनि (प्रवचनानि) ६ ६७ १० [सत्यप्राति० नपु० प्रथमाबहुवचने रूपम्]

सत्यानृते सत्यञ्चाऽनृतञ्च ते, भा०—धर्माधर्मौ १६ ७७ [सत्य-अनृतपदयो समास। सत्यानृते वाचो वा एतौ स्तनौ, सत्यानृते वाव ते (द्वे अक्षरे) गो० उ० ४ १६]

सत्योक्तिः सत्य आज्ञा आर्याभि० १ ४७, ऋ० ७ ८ १२ २ [सत्या-उक्तिपदयो समास। उक्ति=वच परिभाषणे (अदा०) धातो स्त्रिया क्तिन्]

सत्यौजाः सत्यमोजो वल यस्य स (राजा) १० २८ [सत्य-ओजस्पदयो समास]

समगच्छन्त सम्यक् प्राप्नुवन्ति १७ ३० **समगथाः**=समागमेन गच्छसि प्राप्नोति वा, अ०—सङ्गतो भूत्वा राजते, प्र०—अत्र पक्षे व्यत्यय, वर्त्तमाने लुङ् 'मन्त्रे घसह्वर०' अ० २ ४ ८० अनेन च्लेर्लुक् च ३ १९

समगन्महि=एकीभावेन प्राप्नुयाम ८ १६ सम्यक् प्राप्नुम २ २४ **समगस्महि**=सम्यक् सगच्छामहे, प्र०—अत्र लडर्थे लुङ्, वर्णव्यत्ययेन मकारस्थाने सकारादेशश्च १ २३ २३ **समग्मत**=प्राप्नुन १२ ८० प्राप्नुवन्तु ४ ३४ २ सगच्छत १ १११ ३ [सम्+गम्लृ गतौ (भ्वा०) धातोर्लङ् । 'समो गम्यृच्छिभ्याम्' इत्यात्मनेपदम् । अन्यत्र लुङि 'मन्त्रे घसह्वर०' इति च्लेर्लुक् च । 'समगन्महि' प्रयोगे 'म्वोश्च' अ० ८ २ ६५ सूत्रेण मकारस्य नकार 'समगस्महि' प्रयोगे मकार य सकारश्छान्दस । समग्मत= सङ्गच्छन्ताम् नि० १२ ३४]

समग्निः सम्यक् प्रकाशक (विद्वज्जन) ३७ १४. [सम्+अग्निपदयो समास]

समग्रभम् सम्यग् गृहीतवानस्मि ९ ४ [सम्+ग्रह उपादाने (क्र्या०) धातोर्लङ् । व्यत्ययेन शप् । हकारस्य भकारश्छान्दस]

समङ्क्ताम् एकीभावेन सयोजयतु, सयुक्तभावेन सयोजयतु २ २२ मेलनेन प्रकट सयोजयति २ २२ [सम्+अञ्जू व्यक्तिम्रक्षणकान्तिगतिपु (रुधा०) धातोर्लोट् । व्यत्ययेनात्मनेपदम्]

समङ्धि सम्यक् शोधय १३ ४१ [सम्+अञ्जू व्यक्तिम्रक्षणकान्तिगतिपु (रुधा०) धातोर्लोट्]

समच्यन्त सम्यक् प्राप्नुत ५ ५४ १२ [सम्+अञ्चु गतिपूजनयो (भ्वा०) धातो कर्मणि लङ्]

समज विज्ञापय ६ २५ ९ **समजाति**=सम्यक् प्राप्नुयात् ५ २ १२ सजानीयात् १ १०० ११ **समजासि**=सम्यक् प्राप्नुया ७ ३२ ७ [सम्+अज गति-क्षेपणयो (भ्वा०) धातोर्लोट् । अन्यत्र लेट्]

समजयत् सम्यग् जयेत् ४ १७ ११ [सम्+जि जये (भ्वा०) धातोर्लङ्] ... ... नच् । शपो लुक् ।

समजीगमम् सम्यक् प्राप्नुय गम्लृ गतौ (भ्वा०) धातोर्णिजन्तात् ... युवन्तु, प्र०—रिणातीति

समज्यताम् एकीभावेन ६, ६ १८ **समरिणीतम्**= **ज्यते**=सम्यग् व्यज्यते १ ... म्+रिणाति गतिकर्मा निघ० क्षेपणयो (भ्वा०) धातो क

समञ्जतः सम्यक् प्रकाशते ३७ १५ [सम्+रुच सम्यक् प्रकटीकुर्यु ... न्तात्लुङ्] करके जानें स० वि० भा०—युद्धे, प्र०—समर इति सम्यक् प्रकाशयत २ १७, १२ ६६. [सम्+ऋ गति-प्रकटयतम् ३३ ७३ धातो 'ऋदोरप्' इत्यप् । धातोर्वाहु० औणा० अर

समरोचिष्ट सम्यक् प्रकाशते ३७ १५ [सम्+रुच दीप्तावभिप्रीतौ च (भ्वा०) धातोर्लुङ्]

समर्थयस्व समर्थ कुरु २ १३ १३ सम्यगर्थं कुरु २ १४ १२ [सम्+अर्थ उपयाश्चायाम् (चुरा०) धातोर्लोट्। अथवा समर्थप्राति० 'तत्करोति तदाचष्टे' इति णिजन्ताल्लोट्]

समर्यजित् य समर्यान् सङ्ग्रामान् जयति स (मेधावी नर), प्र०—समर्य इति सङ्ग्रामनाम निघ० २ १७, १ १११ ५ [समर्योपपदे जि जये (भ्वा०) धातो क्विप्। समर्ये सग्रामनाम निघ० २ १७]

समर्यता समरमिच्छता (मनसा=चित्तेन) ५ ४४ ७ [समरपदाद् इच्छाया क्यजन्ताच्छतृ]

समर्यम् सङ्ग्रामम् ४ २४ ८ **समर्यः**=युद्धकुशल (राजा) ७ ८ १ सङ्ग्राममिच्छु (शूरो जन) ५ ३३ १ **समर्ये**=सम्यगर्य्ये वाणिजि १ १७८ ४ [समर्ये सग्रामनाम निघ० २ १७ समरप्राति० वा कुशलार्थे यत्। समरपदाद्वा इच्छायामर्थे क्यजन्तादच् कर्त्तरि। अथवा सम्+अर्य-पदयो समास। अर्य =='अर्य स्वामीवैश्ययो' सूत्रेण ऋधातोर्यत् निपात्यते वैश्येऽभिधेये]

समवदन्त परस्पर सवाद कुर्यु १२ ६६. [सम्+वद व्यक्ताया वाचि (भ्वा०) धातोर्लङ्। 'विभाषा विप्रलापे' इत्यात्मनेपदम्]

समवर्त्तत सम्यगुत्पन्न सन् वर्त्तते ऋ० भू० १२७, समभवत् १३ ४ सम्यगवर्त्तत २३ १ विद्यमान था स० प्र० २८२, १० १२ ११ वर्त्तमान था स० वि० ५, १३ ४ [सम्+वृतु वर्त्तने (भ्वा०) धातोर्लङ्]

समवावशीताम् सम्यग् भृश कामयेथाम्, प्र०—वश कान्तौ इत्यस्य यङ्लुगन्त लडि रूपम् १ १८१ ४ [सम्+वश कान्तौ (अदा०) धातोर्यङ्लुगन्ताल्लङ्]

समविन्दन्त सम्यग् विन्दन्ते प्राप्नुवन्ति १ ८३ ४ [सम्+विद्लृ लाभे (तुदा०) धातोर्लङ्]

समवृक्त सम्यग् वृङ्क्ते ७ ३ ४ [सम्+वृजी वर्जने (अदा०) धातोर्लङ्]

समवेत् प्राप्नुयात् ५ ३४ ८ [सम्+वी गतिव्याप्ति-प्रजनादिपु (अदा०) धातोर्लङ्]

समव्यत् सम्यग् व्याप्नोति, प्र०—अत्र 'बहुल छन्दसि' इति शपो लुक् २ ३८ ४ सर्वत् सवृणोति २ १७ ४ [सम्+व्येञ् सवरणे (भ्वा०) धातोर्लुङ्। व्यत्ययेनाड्]

समशीत सम्यग् व्याप्नुयात्, प्र०—अत्र 'बहुल छन्दसि' इति श्नोर्लुक् १ ५७ २ [सम्+अशूङ् व्याप्तौ (स्वा०) धातोर्लिङ्। श्नुविकरणस्य लुक् छन्दसि]

समश्रेत् सम्यगाश्रयेत्, प्र०—अत्र शपो लुक् ३ १६ २ [सम्+श्रिञ् सेवायाम् (भ्वा०) धातोर्लङ्। शपो लुक्]

समसुस्रोत् सम्यक् प्राप्नुयात्, प्र०—अत्र 'बहुल छन्दसि' इति शप श्लु १८ ५८ [सम्+स्रु गतौ (भ्वा०) धातोर्लङ्। शप श्लुः 'बहुल छन्दसि' सूत्रेण]

समसृक्ष्महि ससृजेम, प्र०—अत्र व्यत्ययेनात्मनेपदम् २० २२ **समसृजत्**=ससृजति २ १५ ४ [सम्+सृज विसर्गे (तुदा०) धातोर्लङ्। सिव्-विकरणो व्यत्ययेनात्मनेपदश्च]

समसृपत् ससर्पति १३ ३१ [सम्+सृप्लृ गतौ (भ्वा०) धातोर्लङ्। व्यत्ययेन श]

समस्पृशन्त अच्छी प्रकार स्पर्श करते है स० वि० १३६, अथर्व० १४ २ ३२ [सम्+स्पृश सस्पर्शने (तुदा०) धातोर्लङ्। व्यत्ययेनात्मनेपदम्]

समस्य तुल्यस्य (जगदीश्वरस्य) ६ २७ ३ [समस्य सर्वस्य नि० ५.२३. समशब्द सर्वनाम तुल्यवाची च]

समह सत्कारसहित (विद्वज्जन) ५ ५३.१५ यो महेन सत्कारेण सह वर्त्तते तत्सम्बुद्धौ (विद्वज्जन) १ १२० ११ [सह-महपदयो समास। सहस्य सादेश 'वोपसर्जनस्य' सूत्रेण। मह महन्नाम निघ० ३ ३]

समह्यन् सम्यग् व्याप्नुवन् (इन्द्र=राजा) ६ ४० २ [सम्+अह व्याप्तौ (स्वा०) धातो शतृ। व्यत्ययेन श्यन्]

समाकृणुष्व सम्यक्तया समन्तात् कुरुष्व ३३ १२ [सम्+आङ्+डुकृञ् करणे (तना०) धातोर्लोट्। व्यत्ययेन श्नु]

समागमेम सम्यक् प्राप्नुयाम ५ ४३ १७ [सम्+आङ्+गम्लृ गतौ (भ्वा०) धातोर्लिङ्]

समाचक्रे समाकरोति ३ ३६ ५ [सम्+आङ्+डुकृञ् करणे (तना०) धातोर्लिट्]

समादधिरे समादधति ५ ४४ ६ [सम्+आङ्+डुधाञ् धारणपोषणयो (जु०) धातोर्लिट्]

समानजे सम्यग् व्यक्तीकरोति १ १८८ ६ [सम्+अञ्जू व्यक्तिम्रक्षणकान्तिगतिपु (रुधा०) धातोर्लिट्। व्यत्ययेनात्मनेपदम्]

समानट् सम्यक्तया व्याप्नोति ३ ३० १२ **समानश**=सम्यग् व्याप्नुत ३ ६० २ **समानशुः**=

४ ५ ७. समनानि सङ्ग्रामान् २ ११ ७. समनस्कौ (अध्यापकोपदेशकौ) ४.४३.७ सान्त्वनादिगुणयुक्ता (सुमति) ४ ४४ ७ सङ्ग्रामान् २६ ४२ तुल्ये (व्यवहारे) ११६८ १ **समनाः**=समानगुणकर्मस्वभावा (उपम = प्रातर्वेला) ४ ५१ ८ [समनम् सग्रामनाम निघ० २ १७ समना समनसौ नि० ६.४० समना=समनस इव योषा । समन समननाद्वा सम्माननाद्वा नि० ७ १७. समना समानया नि० १० ५ समने सग्रामे नि० ६ १८]

समनुमार्ष्टु मिश्रीभावेन पश्चात् शोधयतु २ २४ [सम्+अनु+मृजूष् शुद्धौ (अदा०) धातोर्लोट्]

समनेव समानमना इव (माता), प्र०—अत्र छान्दसो वर्णलोपो वा इति सलोप ६ ७५.४ समान मनो यासा ता इव (योषा =स्त्रिय) १७ ६६ यथा युद्धे प्रवृत्ता सेना तथा ११०३ १ समानमनस्का पतिव्रतेव ४ ५८.८ सम्यक् प्राण इव प्रिया (योषा=विदुषी स्त्री) २६ ४१ [समना-इवपदयो समास । समना इति व्याख्यातम्]

समन्तम् सर्वतो दृढाङ्गम् (रथम्) ५ १ ११ [समन्तम् (साम) समन्तेन पशुकाम स्तुवीत, पुरोधाकाम समन्तेन स्तुवीत ता० १५ ४ ७]

समन्तशितिबाहुः समन्ताच्छितयो बाह्वोर्भुजस्थानयोर्यस्य स (पशु) २४ २ [समन्त-शिति-बाहुपदाना समास]

समन्तशितिरन्ध्रः समन्ततो रन्ध्राणीव शितय श्वेतचिह्नानि यस्य स (पशु) २४ २ [समन्त-शिति-रन्ध्र-पदाना समास]

समन्ते सम्यगन्तो ययोस्ते (स्वसारा=भगिन्यौ) ११८५ ५ [सम्+अन्तपदयो समास]

समन्यवः समानो मन्यु क्रोधो येषान्ते, भा०—ये दुष्टानामुपरि क्रोध कुर्युस्ते (देवास =विद्वज्जना) ३३ ६४ मन्युना सह वर्त्तमाना (राजजना) २ ३४ ३ [समान-मन्युपदयो समासे समानस्य सादेश । सह मन्युपदयोर्वा समासे सहस्य सादेश]

समपश्यन्त सम्यक् पश्यन्ति १७ २६ [सम्+दृशिर् प्रेक्षणे (भ्वा०) धातोर्लङ । 'दृशेश्चे ति वक्तव्यम्' अ० १ ३ २६ वा० सूत्रेणात्मनेपदम्]

समपृच्यन्त सम्पृच्यन्ति १ ११० ४ [सम्+पृची सम्पर्चने (अदा०) धातोर्लङ् । व्यत्ययेन श्यन्]

समभक्त सम्यग् भजेत ३ ३३.१२ [सम्+भज सेवायाम् (भ्वा०) धातोर्लुङ्]

समभूम अ०—सयुक्ता भवेम २ २५ [सम्+भू सत्तायाम् (भ्वा०) धातोर्लुङ् । 'गातिस्थाघुपाभूभ्य०' इति सिचो लुक्]

सममदः सम्यगानन्द १ ८२ ६ [सम्+मदी हर्षे (दिवा०) धातोर्लङ् । विकरणव्यत्ययेन शप्]

समयन्त सम्यक्तया प्राप्नुवन्ति ६ २६ १ [सम्+अय गतौ (भ्वा०) धातोर्लङ् । अडभावश्छान्दस]

समयंस्त सम्यग् यच्छत ११४४ ३ उपयच्छति ११३६ २ [सम्+यमु उपरमे (दिवा०) धातोर्लुङ् । व्यत्ययेनात्मनेपदम्]

समया यथासमयम् १ ५६ ६ काले १११३ १०. सामीप्ये १ ७३ ६ [सम्+इण् गतौ (अदा०) धातो 'आ समिण्निकपिभ्याम्' उ० ४ १७५ सूत्रेण आ प्रत्यय । स्वरादिपु पाठादव्ययम्]

समयोधयः सम्यग् योधयसि १ ८० १३ [सम्+युध सम्प्रहारे (दिवा०) धातोर्णिजन्ताल् लङ्]

समरणम् सम्यक्तया प्रापकम् (प्रकाशम्) १ १५५ २ [सम्+ऋ गतिप्रापणयो (भ्वा०) धातो 'कृत्यल्युटो बहुलमिति' कर्त्तरि ल्युट्]

समरणे सङ्ग्रामे १ १७० २. [समरण सग्रामनाम निघ० २ १७ समरणेपु सग्रामेपु नि० ६ २०]

समरन्त सरमन्ते ४ १६ ६ सम्यग् गच्छन्ति ७ २५ १ [सम्+रमु क्रीडायाम् (भ्वा०) धातोर्लङ् । शपो लुक् । वचनव्यत्ययश्च । अथवा सम्+ऋ गतिप्रापणयो (भ्वा०) धातोर्लुङ् । 'सर्तिशास्त्यर्तिभ्यश्चे' त्यङ् । 'अर्तिश्रुदृशिभ्यश्च' अ० १ ३ २६ वा०सूत्रेणात्मनेपदम्]

समराण सम्यक् प्राप्नुवन् (विद्वज्जन) ११६५.३ सम्यग् गच्छन् (इन्द्र =सभाध्यक्ष) ३३ २७ [सम्+ऋ गतिप्रापणयो (भ्वा०) धातो शानच् । शपो लुक् । 'अर्तिश्रुदृशिभ्यश्चे' त्यात्मनेपदम्]

समरिणन् सम्यक् प्राप्नुवन्तु, प्र०—रिणातीति गतिकर्मसु पठितम् निघ० २ १४, ६ १८ **समरिणीतम्**= सङ्गच्छतम् १ ११७ ११ [सम्+रिणाति गतिकर्मा निघ० २ १४. धातोर्लङ्]

समरुरुचत सम्यक् प्रकाशते ३७ १५ [सम्+रुच दीप्तौ (भ्वा०) धातोर्णिजन्तात्लुङ्]

समरे सङ्ग्रामे, भा०—युद्धे, प्र०—समर इति सङ्ग्रामनाम निघ० २ १७, १२ ६६. [सम्+ऋ गति-प्रापणयो (भ्वा०) धातो 'ऋदोरप्' इत्यप् । अथवा षम वैक्लव्ये (भ्वा०) धातोर्बाहु० औणा० अर. प्रत्यय]

६.८३ १ [सम्+अशूङ् व्याप्तौ (स्वा०) धातोर्लङ्। व्यत्ययेन शप्]

समाशिराम् सम्यगभित श्रियन्ते सेव्यन्ते सद्गुणैर्ये तेषाम् (पच्यमानाना, पदार्थानाम्), प्र०—अत्र 'श्रयते. स्वाङ्गे शिर किच्च' उ० ४ २०० अनेनाऽसुन्प्रत्यय. शिर आदेशश्चाऽसुनि १.३० २ [सम्+आङ्+श्रिञ् सेवायाम् (भ्वा०) धातो 'श्रयते स्वाङ्गे शिर किच्च' उ० ४ १९४. सूत्रेणासुन् शिरादेशश्च। प्रत्ययसकारस्य लोपश्छान्दस]

समासते सम्यगुपविशन्ति ३ ६ ७ सम्यक् प्राप्नुवन्ति ७ १ ४ सम्यगासते १ १६४ ३६ अच्छे प्रकार समाधियोग से स्थिर होते हैं म० वि० २१५, १.१६४.३९ [सम्+आस उपवेशने (अदा०) धातोर्लट्]

समासदसि समन्तात् सीदसि, प्र०—अत्र 'बहुल छन्दसि' इति शपो लुक् ३ ३० १८ [सम्+आङ्+षद्लृ विशरणगत्यवसादनेषु (भ्वा०) धातोर्लट्। शपो लुक्]

समाहितम् सम्यक् सर्वतो धृतम् (रस=सारम्) ६ ३ [सम्+आङ्+डुधाञ् धारणपोषणयो (जु०) धातो क्त। 'दधातेर्हि' रिति हिरादेश]

समाहुः सम्यक्तया कथयन्ति १५ २६ [सम्+ब्रूञ् व्यक्ताया वाचि (अदा०) धातोर्लट्। 'ब्रुव पञ्चानामादित आहो ब्रुव' सूत्रेणाहादेश]

समिङ्गयति सम्यक् चालयति ५ ७८ ७ [सम्+इगि गत्यर्थे (भ्वा०) धातोर्णिजन्ताल्लट्]

समिच्छन्त सम्यक्तयेच्छन्तु १ ६८ ४ [सम्+इषु इच्छायाम् (तुदा०) धातोर्लङ्। आडभावश्छान्दस। व्यत्ययेनात्मनेपदम्]

समिडाभिः एकीभावेन भूमिवाणीनीतिभि १ ४८ १६ [सम्+इडापदयो समास। इडा पृथिवीनाम निघ० १ १. वाङ्नाम निघ० १ ११ अन्ननाम निघ० २ ७. गोनाम निघ० २ ११]

समित् सम्यगिध्यते दीप्यतेऽनया सा विद्या काष्ठादिर्वा अ०—वेदविद्या २ १४ सम्यक् प्रदीप्तेव (ईश्वर) ३८ २५ अग्नेरिन्धनमिव मनुष्याणामात्मना प्रकाशक (जगदीश्वर) २० २३ सम्यक् प्रदीप्त (पति) ८ २७ सम्यगिध्यतेऽनयाऽनेन वा सा समिदग्निप्रदीपक काष्ठादिक वसन्त-ऋतुर्वा २ ५ प्रदीप्ता (भा०—अग्न्यादिविद्या) ५ ६ ४ यथा सम्यगिध्यते तथा (परमेश्वर) ५ ३५ **समिधम्**=समिध्यते प्रकाश्यतेऽर्थतत्त्वमनया क्रियया ताम् ८ २४ काष्ठमिव शत्रुम् ५ ४.४ इन्धनम् २ ६ १ प्रदीपिकाम् (विद्युदग्निम्) २ ३७ ६ काष्ठविशेषम् ७ २ १ **समिधः**=सम्यक् प्रदीपिका. (काष्ठादिसामग्री) २७.११ काष्ठादिसामग्री ३.४. शब्दार्थसम्बन्धै सम्यग् दीपिता (धारा=वाच) १७ ६६ समिध्यते प्रदीप्यते ज्ञान याभिरता (भा०—ज्ञानादिप्रकाशिकास्त्रिविधा विद्या) २३.५८ सामग्रीभूता (त्रि सप्तप्रकृत्यादीनि) ३१ १५ **समिधा**=ज्ञानप्रकाशेन २८ १ सम्यक्प्रदीप्तेन स्वभावेन प्रदीपकेनेन्धनादिना वा १ ६५ १ प्रदीपनसाधनेन ७ १४.१. सम्यक् प्रदीप्त्या नीत्या सह ४.४ १५ सम्यगिध्यते प्रदीप्यते यया तया, भा०—इन्धनेन, प्र०—अत्र सम्पूर्वादिन्धे. 'कृतो बहुलम्' इति करणे क्विप् ३ १ सम्यक् प्रकाशेन २१.१२. सम्यगग्निसस्कृतेनाऽन्नादिना १२ ३० सम्यक् प्रदीप्तेन स्वभावेन १ ६५ ११. **समिधे**=सम्यक् प्रदीपनाय १ ११३ ६ [सम्+ञिइन्धी दीप्तौ (रुधा०) धातो 'कृतो बहुलम्०' इति करणे क्विप्। समिध (यजु० १७ ३६) प्राणा वै समिध, प्राणा ह्येत समिन्धते श० ६ २ ३ ४४ प्राणा वै समिध ऐ० २ ४ श० १ ५ ४ १. यदेन समयच्छन् तत्समिध समित्त्वम् तै० २ १ ३.८ समिधो यजति वसन्तमेव वसन्ते वा इद सर्व समिध्यते कौ० ३ ४ वसन्तो वै समित् श० १ ५ ३ ६ गर्भ समित् श० ६ ६.२ १५ अस्थीनि वै समिध श० ६ २ ३.४६]

समितम् एकीभाव प्राप्नुतम् १२ ५७ [सम्+इण् गतौ (अदा०) धातो क्त]

समितिम् सङ्ग्राम को स० वि० १८२, अथर्व० १५ ६.२ **समितिः**=विज्ञानमर्यादा १ ६५ ८ सामाजिक-नियमव्यवस्थाद्यान्यायप्र चाराढ्या, सर्वमनुष्याणा मान्य-ज्ञानप्रदा, ब्रह्मचर्यविद्याभ्यासशुभगुणसाधिका शिष्टसभया राज्यप्रबन्धाद्याऽह्लादिना परमार्थव्यवहारशोधिका बुद्धि-शरीरबलारोग्यवर्धिनी शुभमर्यादा ऋ० भू० ६३, ऋ० ८ ८ ४६ ३ सङ्ग्रामादि की व्यवस्था स० प्र० १८२, अथर्व० १६ ७ ५५ ६ **समितौ**=सङ्ग्रामे १२ ८० [सम्+इण् गतौ (भ्वा०) धातो स्त्रिया क्तिन्। समिति सग्रामनाम निघ० २ १७]

समित्समित् प्रतिसमिधम् ३ ४ १ [समित् पदस्य वीप्साया द्विर्वचनम्। समित् इति व्याख्यातम्]

समिथानि सम्यग् यन्ति यानि विज्ञानानि तानि १ ५५ ५ **समिथे**=सङ्ग्रामे ६ २५ ६ [सम्+इण् गतौ (अदा०) धातो 'समीण' उ० २ ११ सूत्रेण थक्। समिथे सग्रामनाम निघ० २ १७]

सम्यक् प्राप्नुयु, प्र०—अत्र व्यत्ययेन परस्मैपदम् ३ ६०.३

समानश=सम्प्राप्नोति ४ २३ २ [सम्+अशूङ् व्याप्तौ (स्वा०) धातोर्लिट्। तप्रत्ययस्य 'लोपस्त आत्मनेपदेषु' अ० ७ १ ४१ सूत्रेण लोप। अन्यत्र व्यत्ययेन परस्मैपदम्]

समानत: सदृशेभ्य पतिभ्य ४ ५१ ८ [समानप्राति० पञ्चम्यन्तात् तसि]

समानदक्षा समान दक्षो वल विद्याचातुर्यं येषान्ते (पुत्रा) ७ २६ २ [समान-दक्षस्पदयो समास। दक्षस् वलनाम निघ० २ ९]

समानबन्धू यथा सह वर्त्तमानौ मित्रौ भ्रातरौ वा १ १३३ २ [समान-बन्धुपदयो समास। समानबन्धू समानबन्धने नि० २ २०]

समानम् तुल्यम् (वत्सम्=अहोरात्र) १ १४६ ३ पक्षपातरहितम् [पति=राजानम्) १ १२७ ८. सर्वत्रैव स्वव्याप्त्यैकरसम् (परमेश्वरम्) १ १३१ २ वैसा ही (वृक्षम्=अनादिमूलरूप कारण और शाखारूप कार्ययुक्त वृक्ष नामक जगत्) स० प्र० २८३, १ १६४ २० (राजा) ४ ३० २२ एक (राजा=सूर्य) ३ ५५ ४ सदृश (व्यक्ति) ५ २३ समानयति रस येन स (वायु) २२ ३३ **समाना:**=सदृग्गुणकर्मस्वभावा (जीवा) १९ ४६ [सह-मानपदयो समासे सहस्य सादेश। समान सम्मानमात्र भवति नि० ४ २५ दिश समान जै० उ० ४ २२ ९ निरुक्ता निरुक्त इव ह्यय समान ष० १.२ त (सञ्ज्ञप्त पशु) ऊर्ध्वा दिवसमानेत्यनुप्राणत् समानमेवास्मिँ-स्तदधात् श० ११ ८ ३ ६]

समानयोजन: समान तुल्य योजन सयोगकरण यस्मिन्त्स (रथ=नौकादियानम्) १ ३० १८. [समान-योजनपदयो समास। योजनम्=युजिर् योगे (रुधा०) धातोर्ल्युट्]

समानवर्चसा समान तुल्य वर्चो दीप्तिर्ययोस्तौ (वायुसूर्यौ) १ ६ ७ [समान-वर्चस्पदयो समासे द्विवचन-स्याकारादेशश्छान्दस]

समानस्मात् तुल्यात् (सदस=गृहात्) ५ ८७ ४. [समानप्राति० पञ्चमी। सर्वेषा वाचकत्वात् सर्वनामत्वम्]

समानी सर्वमनुष्यस्वतन्त्रदानसुखवर्धनायैकरसा (समिति) ऋ० भू० ९३, ऋ० ८ ८ ४९ ३ एकसी (प्रपा=जलपान स्नान आदि स्थानादि व्यवहार) स० वि० १४२, अथर्व० ३ ३० ६ **समान्या**=तुल्यया (क्रियया) ५ ४८ २ सम वर्त्तमानया (दिशा) १ १३२ ४ [सह-मानपदयो समासात् स्त्रिया ङीप्]

समानृचे सम्यक्तया स्तौमि १ १६० ४ [सम्+ऋच स्तुतौ (तुदा०) धातोर्लिट्। व्यत्ययेनात्मनेपदम्]

समान्या समानस्वभावे (द्यावापृथिव्यौ) ३ ५४ ७ [समानीशब्दात् प्रथमाद्विवचनस्याकारादेशश्छान्दस]

समाप्यते सम्यक् प्राप्यते १९.१७ [सम्+आप्लृ व्याप्तौ (स्वा०) धातो कर्मणि लट्]

समाभर सम्यक्तयाऽऽधर १ ५७ ३ [सम्+आङ्+भृञ् भरणे (भ्वा०) धातोर्लोट्]

समाभ्य: प्रजाभ्य ४० ८ जीवरूपाभ्य प्रजाभ्य, प० वि०। **समाम्**=शुद्धाम् (सीता=भूमिकर्षिकाम्) ४ ५७ ७ वेलाम् ३८ २८ **समा:**=वर्षाणि १४ १९ सवत्सरा १९ ४६ क्षणादय १८ १८ [समाना सवत्सरा-णाम् नि० ११ ५.]

समायजन्त सङ्गच्छेरन् १७ २८ [सम्+आङ्+यज देवपूजासगतिकरणदानेषु (भ्वा०) धातोर्लङ्]

समायन्ति सम्यक्तयाऽऽगच्छन्ति ५ ६ २ [सम्+आङ्+इण् गतौ (अदा०) धातोर्लट्]

समायुषा समीचीनेन जीवनेन ३ १९ [सम्+आयुष्पदयो समास]

समारत सम्यक् प्राप्नुत १ ५४ १ [सम्+ऋ गतौ (जु०) धातोर्लुङ्। 'सर्त्तिशास्त्यर्त्तिभ्यश्च' इत्यङ्। 'ऋदृशो ऽङि' इति गुण]

समारभेमहि सम्यक्तयाऽऽरम्भ कुर्वीमहि १ ५३ ४ [सम्+आङ्+रभ राभस्ये (भ्वा०) धातोर्लिङ्]

समाराणे सम्यक् समन्ताद्राण दान ययोस्ते (अध्या-पिकोपदेशिके) ३ ३३ २ [सम्+आङ्+राणपदाना समास। राणम्=रा दाने (अदा०) धातोर्ल्युट्]

समारिरीहि सम्यक् समन्तात्प्रापय ६ ४६ ८ [सम्+आङ्+री गतिरेषणयो (क्र्या०) धातोर्लोट्। 'बहुल छन्दसी ति' श्लु]

समावतम् सम्यग् रक्षतम् १ ११२ १८ [सम्+अव रक्षणगत्यादिषु (भ्वा०) धातोर्लोट्]

समाववर्त्ति सम्यगावर्तते, प्र०—अत्र व्यत्ययेन परस्मैपद, शप श्लुश्च २० २३ सम्यगववर्त्यते २ ३८ ६ [सम्+वृतु वर्त्तने (भ्वा०) धातोर्लट्। व्यत्ययेन शप श्लु परस्मैपदञ्च]

समाशत अच्छे प्रकार प्राप्त होते हैं स० प्र० ४२३,

प्रथमाद्विवचनस्य छन्दसीकारादेशे भसञ्ज्ञायाम् 'अच.' इत्यकारलोपे 'चौ' इति पूर्वस्य दीर्घत्वे रूपम्]

समीची ,या सम्यगञ्चति प्राप्नोति सा भूमि. १.६६.१ या दीप्ति सम्यगञ्चति सा (विदुषी स्त्री) २ २७ १५ **समीचीः**=याः समान सत्यमञ्चन्ति ता (गिरः= विविधविद्यायुक्ता वाण्य) ३ ३१.१३. या. सम्यगच्यन्ते ता (दिश) १४.२५. या सम्यगञ्चन्ति शिक्षा प्राप्नुवन्ति ता सेना ४ १७ ६ [सम्यक्+अञ्चु गतिपूजनयो. (भ्वा०) धातो क्विन् । 'अञ्चतेश्चोपसङ्ख्यानम्' इति स्त्रिया ङीप् । 'अनिदिताम्' इति नलोपे 'अच ' इत्यकारलोपे 'सम समि' इति सम्यादेशे, 'चौ' इति पूर्वस्य दीर्घत्वे रूपम्]

समीजमानः सम्यक्तया सङ्गच्छमान (सूरि = विद्वज्जन) ६ २६ ५ [सम्+यज देवपूजासगतिकरणदानेषु (भ्वा०) धातो शानच् । विकरणव्यत्ययेन श । तस्य ङित्वात् सम्प्रसारणम् । धातोरिकारस्य दीर्घश्छान्दस]

समीयसे सम्यक्तया व्याप्नोषि ६ १५ ६ [सम्+ ईङ् गतौ (दिवा०) धातोर्लट् । अथवा वी गतिव्याप्त्यादिषु धातावीकारप्रश्लेषो वा । तत कर्मणि लट्]

समीहसे सम्यक् चेष्टसे, भा०—सर्वत्राऽभिव्याप्तोऽसि ३६ १२ सम्यक् चेष्टा करते हो आर्याभि० २ ७, ३६.२२. [सम्+ईह चेष्टायाम् (भ्वा०) धातोर्लट्]

समुक्षितम् सम्यक् सिक्तम् (सोमम्=ऐश्वर्यम्) ३ ६० ५ **समुक्षितानाम्**=सम्यक् सेक्तॄणाम् (मनुष्याणाम्) ५ ५६.५. [सम्-उक्षितपदयो समास । उक्षितम्= उक्ष सेचने (भ्वा०) धातो क्त]

समुच्यसि सम्यक्तया वदसि ५ ८१ ४ [सम् वच परिभाषणे (अदा०) धातोर्लट् । विकरणव्यत्ययेन श्यन् । तस्य ङित्वात् सम्प्रसारणम्]

समुद्र इव समुद्रवन्त्यापो यस्मिँस्तद्वत् १ ८ ७ सागर इवान्तरिक्षमिव वा ३३ ८३. [समुद्र-इवपदयो समास]

समुद्रज्येष्ठाः समुद्र ज्येष्ठो यासा ता (आप = जलानि) ७ ४६ १ [समुद्र-ज्येष्ठपदयो समास । ज्येष्ठ = वृद्धप्राति० अतिशायन इष्ठन् । 'वृद्धस्य चे' ति ज्यादेश]

समुद्रतः अन्तरिक्षात् ५ ५५ ५ [समुद्रप्राति० पञ्चम्यन्तात् तसि]

समुद्रम् अर्णवम् १ ७१ ७ अन्तरिक्ष जलमय वा १ १६ ८ समुद्रवन्त्यापो यस्मिन् तदन्तरिक्षम् १ १६ ७ सागरम् १ ५६ १ मेघ सागर वा ३ ३ २ **समुद्रस्य**=सम्यग् द्रवन्त्यापो यस्मिँस्तस्यान्तरिक्षस्य १ ११६.४. **समुद्रः**= सम्यग् द्रवन्त्यापो यस्मात् स. (सागर) १७.६०. भा०— समुद्रवद् गम्भीरो रत्नाढ्य १ ८ ४५ सागर इव गाम्भीर्यम् १५ ४. सम्यगापो द्रवन्ति यस्मिँस्तदन्तरिक्ष मेघो वा ६.६६ ६ उदधि. ८ २८ समुद्रवन्त्यापो यस्मिन् स सागर ७ ३५.१३ सब भूत-मात्र जिसमे डूबे हैं, वह द्रवणीय स्वरूप सबका कारण (ईश्वर) आर्याभि० २.१८, ५ ३३ समुद्द्रवन्ति कामुका यस्मिन् व्यवहारे स. १३ १६. समुद्द्रवन्ति भूतानि यस्मात् स· (ईश्वर) ५ ३३ **समुद्रात्**= जलद्रावाऽऽधारात् (सागरात्) १ ११७.१४ **समुद्रान्**= समुद्द्रवन्ति पदार्था येषु तान् भूत-भविष्यद्वर्त्तमानान् समयान्, अ०—लोकान् १३ ३१ **समुद्राय**=महाजलाशयाय २४.२१ अन्तरिक्षे गमनाय ३८ ७ **समुद्राः**=शब्दार्णवा १ १६४ ४२ **समुद्रे**=अन्तरिक्षवद् व्याप्ते परमेश्वरे १८ ५५ आकाशमिव व्याप्तस्वरूपे (परमेश्वरे) १७ ६६ मनसि १३.५३. सम्यग् द्रवीभूते व्यवहारे ८ २५ [उन्दी क्लेदने (रुधा०) धातो सम्पूर्वकात् 'स्फायितञ्चि०' उ० २ १३ सूत्रेण रक् । 'अनिदिताम्०' इति नलोप । समुद्र अन्तरिक्षनाम निघ० १ ३ पदनाम निघ० ५ ६ समुद्र कस्मात् ? समुद्द्रवन्त्यस्मादाप समभिद्रवन्त्येनमाप सम्मोदन्तेऽस्मिन् भूतानि समुदको भवति समुनत्तीति वा नि० २ १० समुद्र आदित्य नि० १३ १६ समुद्रम्=समुदितारम् नि० १० ३२. समुद्र (यजु० ३८ ७) अय वै समुद्रो योऽय (वायु) पवतऽएतस्माद्वै समुद्रात् सर्वे देवा सर्वाणि भूतानि समुद्रवन्ति श० १४ २.२.२. य एवाय (वायु) पवत एष एव स समुद्र एत हि सद्रवन्त सर्वाणि भूतान्यनुसद्रवन्ति जै० उ० १ २५ ४. तद् यत् (आप) समुद्रवन्त तस्मात्समुद्र उच्यते गो० पू० १.७ तद् वस्तिमभिनत् । स समुद्रोऽभवत् । तस्मात् समुद्रस्य (जल) न पिबन्ति । प्रजननमिव हि मन्यन्ते तै० २ २ ६ २-३ आपो वै समुद्र श० ३ ८ ४.११. समुद्रो वाऽपा योनि श० ७ ५ २ ५८ समुद्रो वाऽवभृथ तै० २ १ ५ २ (यजु० १३ ५३) मनो वै समुद्र श० ७ ५ २ ५२. वाग्वै समुद्रो मन समुद्रस्य चक्षु ता० ६ ४.७ (ऋ० ४ ५८ १) वाग्वै समुद्रो न वै वाक् क्षीयते न समुद्र क्षीयते ऐ० ५ १६ वाग्वै समुद्र ता० ७ ७.६ पुरुषो वै समुद्र जै० उ० ३ ३५ ५. (यजु० १३ १६) रुक्मो वै समुद्र । श० ७ ४ २ ५ एष वाव स समुद्र यच्चात्वाल तै० १ ५ १० १. तेजोऽसि तपसि श्रितम् । समुद्रस्य प्रतिष्ठा तै० ३.११ १.३ समुद्रोऽसि तेजसि श्रित । अपा प्रतिष्ठा तै० ३ ११ १.४ समुद्र एवास्य (अश्वस्य मेध्यस्य) बन्धु समुद्रो योनि श० १०.६ ४ १.

समिद्धम् प्रदीप्तम् (अग्नि=पावकम्) ७ ४४ १ प्रदीपनीकृतम् (अग्निम्) ७ २ ३ **समिद्धस्य**=प्रकाशमानस्य (राज्ञ) ५ २८ ४ **समिद्धः**=सुप्रकाशित (अग्नि) १ ६४ १४ सम्यक् प्रदीप्त (अग्नि.) २१ १२ अग्निरिव प्रदीप्त (राजा) १ १८८ १ विद्यया प्रदीप्तोऽध्यापक १ १४२ १ सम्यक् प्रकाशित (मित्रमह=विद्वज्जन) २६.२५ **समिद्धे**=प्रसिद्धे (अग्नौ=पावके) ४ २५ १ [सम्+ञिइन्धी दीप्तौ (रुधा०) धातो क्त]

समिद्धः ज्ञानादिप्रकाशका समिद्रूपा (भा०—त्रिविधा विद्या), प्र०—अत्र छान्दसो वर्णागमस्तेन धस्य द्वित्व सम्पन्नम् २३ ५७ [सम्+ञिइन्धी दीप्तौ (रुधा०) धातो क्विप्। ततो जसि धस्य द्वित्वे रूपम्]

समिद्धाग्निः प्रदीप्त पावक ५ ३७ २ [समिद्ध-अग्निपदयो समास.। समिद्व=सम्+ञिइन्धी दीप्तौ (रुधा०)+क्त]

समिधान सम्यक् तेजस्विन् (अग्ने—सभाध्यक्ष राजन्) १३ १२ सम्यक् प्रकाशमान (अग्ने) ४ ४४ देदीप्यमान (अग्ने) ४ ६ ११ **समिधानम्**=सम्यक् प्रकाशमानम् (महद्यश=अतुला कीर्तिम्) २८ २४ **समिधानस्य**=सम्यक् प्रदी तस्य (विदुषो जनस्य) १.१४३ २ समिधान=शुभगुणैर्देदीप्यमान (अग्निरिव विद्वज्जन) ७ २ ११ **समिधाने**=समिध्यमाने (अग्नौ=पावके प्र०—अत्र यको लुक् ३४ १६ प्रदीप्यमाने (अग्नौ) ३ ३० २ [सम्+ञिइन्धी दीप्तौ (रुधा०) धातो शानच्]

समिधीमहि सम्यक् प्रकाशयेमहि, प्र०—अत्र 'बहुल छन्दसि०' इति श्नमो लुक् २ ४ सम्यक् प्रकाशयेम ३ २७ १५ प्रकाशितान् कुर्याम ५ २१ १ एकीभावेन दीपयेम १६ ७१ सम्यक्तया जीवेम वा, अ०—प्रकाशयेम ३ १८ **समिध्यस्व**=सम्यक् प्रदीप्तो भव २७ २ **समिन्धते**=सम्यक् प्रकाशयन्ते १ २२ २१ प्रदीपयन्ति ३ १० ६ प्रकाशयन्ति ३४ ४४ सम्यक् प्रदीप्यन्ते १ ४४ ७ सम्यक् प्रदीपयेयु ३ २७ ११ **समिन्धे**=सम्यक् प्रकाशयते ७ १ १६ **समीधिरे**=सम्यक् प्रदीपयेयु ५ ८ १ सम्यक् प्रदीपयन्ति ५ ८ ७ **समीधे**=प्रापयति ६ १६ १५ प्रदीपयेय ३.५ १० [सम्+ञिइन्धी दीप्तौ (रुधा०) धातोर्लिड्। श्नमो लुक् छान्दस। अन्यत्र लोट् विकरणव्यत्ययेन श्यन्। ततो लट्-लिटौ चापि]

समिध्यते सम्यक् प्रकाश्यते ३ २७ १४ प्रदीप्यते ४ १५ ४ **समिध्यसे**=सम्यक् प्रदीप्यसे १५ ३० [सम्+ञिइन्धी दीप्तौ (रुधा०) धातो कर्मणि लट्]

समिध्यमानः सम्यग् देदीप्यमान (विद्वज्जन) ५.२८ २ सम्यक्तया प्रदीप्यमान (अग्नि=विद्वज्जन) ३ २७ ४ [सम्+ञिइन्धी दीप्तौ (रुधा०) धातो कर्मणि शानच्]

समिन्व सम्यक्तया व्याप्नुहि ५ ४ ७ **समिन्वथः**=सम्यक् प्राप्नुतम् १ ११६ ७ **समिन्वतम्**=सम्यक्तया वर्द्धयतम् १ १६० ५ **समिन्वतु**=सम्यग् ददातु ४ ५३ ७ सम्+इवि व्याप्तौ (भ्वा०) धातोर्लोट्। अन्यत्र लट् चापि]

समिषा सम्यग् धर्मेच्छयाऽन्नादिना वा १ ५३ ५ सम्यगिष्यते या सा समिट् तया श्रद्धया ऋ० भू० २६८, अथर्व० १६ ७ ७ [सम्+इषु इच्छायाम् (तुदा०) धातो क्विप्। ततष्टाप्रत्यय। इषम् अन्ननाम निघ० २ ७]

समिष्टयजुषा सम्यगिष्ट येन भवति तेन (यजुकर्मणा) १६ २६ [सम्-इष्टपदयो समासे ततो यजुषा सह समास]

समीके सम्यक् प्राप्ते सङ्ग्रामे ४ २४ ३ समीपे ३ ३० ११ [समीके सग्रामनाम निघ० २ १७ [सम्+इण् गतौ (अदा०) धातोर्बाहु० औणा० ईकन्]

समीक्षन्ताम् सम्यक् प्रेक्षन्ता, पश्यन्तु ३६.१८ **समीक्षामहे**=हम देखते रहे स० वि० २१४, ३६.१८ सुखसम्पादनार्थं सदा वर्त्तामहे ऋ० भू० ६८, ३६ १८. **समीक्षे**=सम्यक् पश्येयम् ३६ १८ सम्यक् पश्यामि ऋ० भू० ६८, ३६ १८ अपने प्राणवत् प्रिय जानू आर्याभि० २ २३, ३६ १८ [सम्+ईक्ष दर्शने (भ्वा०) धातोर्लोट्। अन्यत्र लट्]

समीक्षयत् सम्यक्तया दर्शयेत् १ १३२ ५ [सम्+ईक्ष दर्शने (भ्वा०) धातोर्णिजन्ताल्लेट्]

समीची ये सम्यगञ्चत समान प्राप्नुतस्ते (द्यावापृथिव्यौ) ३ ३० ११ ये एकीभावमिच्छतस्ते (मातृधात्र्यौ) १७ ७० प्राप्तसङ्गती (द्यावाक्षामा=प्रकाशभूमी) १ ६६ ५ सम्यगञ्चन्त्यौ (मातरा=जनकजनन्यौ) ३ १ ७ सम्यगञ्चती (उपासानक्ता=रात्रिदिने) २ ३ ६ सम्यक् प्राप्ते (द्यावापृथिव्यौ) ३ ५५ २० सम्यक् प्राप्नुवत्यौ (रात्रिदिवसौ) ३ ५५ १२ [सम्=अञ्चु गतिपूजनयो (भ्वा०) धातो 'ऋत्विग्दधृक्०' इति क्विन्। 'अनिदिताम्०' इति नलोपे 'सम समि' अ० ६ ३ ६३ सूत्रेण सम्यादेशे

[सम्+ईर गतौ कम्पने च (अदा०) धातोर्लङ्। छन्दसि शपो लुङ् न। अन्यत्र=सम्+आङ्+ईर गतौ कम्पने च (अदा०) धातोर्णिजन्ताल्लोट् लङ् च]

समोकसः सम्यगोको निवासस्थान येभ्यस्ते (नर = नायका जना) १ ६४ १० **समोकाः**=सम्यगोकासि निवासस्थानानि यस्मिन् स (इन्द्र =सूर्यलोक) १ १०० १ एकस्थान (राजजन) ६ १८ ७ [सम्-ओकस्पदयो समास। ओकस्=वच परिभाषणे (अदा०) धातोर्बाहु० औणा० असुन्। न्यङ्क्वादित्वात् कुत्वम्

समोकसा समीचीनमोको निवसन ययोस्तौ (अध्यापकोपदेशकौ) १ १५६ ४ समानगृहेण सह वर्त्तमानौ (दम्पती) १ ११४ ४ [सम्-ओकस्पदयो समासे द्विवचनस्याकारादेश]

समोहम् सम्यग् गूढम् (रेणुम्=अपराधम्) ४ १७ १३ **समोहे**=सङ्ग्रामे १ ८ ६ [समोहे सग्रामनाम निघ० २ १७]

सम्पत् सम्यक् प्राप्यते या सा (सम्पत्ति) १५.८. **सम्पदे**=ऐश्वर्याय १५ ८ [सम्+पद गतौ (दिवा०) सम्पदादित्वात् क्विप्। श्रोत्र वै सम्पच्छ्रोत्रे हीमे सर्वे वेदा अभिसम्पन्ना श० १४ ६ २ ४]

सम्पर्यत एक दूसरे का हित सिद्ध किया करो स० वि० १४३ अथर्व० ३ ३० ६]

सम्पश्यन् सम्यक् प्रेक्षमाण (विद्वज्जन) १७ ५८ [सम्+दृशिर् प्रेक्षणे (भ्वा०) धातो शतृ। शिति पश्यादेश]

सम्पश्यमानाः सम्यक् प्रेक्षमाणा (सुविद्वासो जना) ३ ३१ १० [सम्+दृशिर् प्रेक्षणे (भ्वा०) धातो शानच्। 'दृशेश्चेति वक्तव्यम्' अ० १ ३ २९ वा०सूत्रेण सम्पूर्वकाद् दृशेरात्मनेपदम्]

सम्पारणम् सम्यग् दुःखस्य पार गच्छति येन तत् (वसु=धनम्) ३ ४५ ४ [सम्+पार कर्मसमाप्तौ (चुरा०) धातो करणे ल्युट्]

सम्पिणक् सपिनष्टि ४ ३० ६ सञ्चूर्णय ४ ३० १३ सम्यक् पिष्या ३ ३० ८ [सम्+पिष्लृ सञ्चूर्णने (रुधा०) धातोर्लङ् अडभावश्छान्दस। सपिणक् सम्पिण्ढि नि० ६ १]

सम्पिपृक्त सम्यक् प्राप्नुत ३ ५४ २१ [सम्+पृची सम्पर्चने (अदा०) धातोर्लोट्। 'बहुल छन्दसी' ति शप श्लु]

सम्पिपेश सम्पिनष्टि २ १५ ६ सम्पिष्यात् ३ ३४ ६. [सम्+पिष्लृ सञ्चूर्णने (रुधा०) धातोर्लिट्। पस्य शकारो वर्णव्यत्ययेन]

सम्पिष्टात् सञ्चूर्णितात् ४ ३० १० [सम्+पिष्लृ सञ्चूर्णने (रुधा०) धातो क्तान्तात् पञ्चमी]

सम्पृङ्क्त सम्बध्नीत १६ ११. [सम्+पृची सम्पर्के (रुधा०) धातोर्लोट्]

सम्पृचः ये सम्पृचन्ति ते (मनुष्या) १६ ११. सयुक्तात् (शत्रुजनात्) २ ३५ ६ सम्बन्ध करने वाले (स्त्री-पुरुष) स० वि० १०४, २ ३५ ६ **सम्पृचौ**=राजगृहाश्रमव्यवहाराणा सम्यक् पृङ्क्तारौ राजप्रजाजनौ ६ ४ [सम्+पृची सम्पर्के (रुधा०) धातो कर्त्तरि क्विप्]

सम्पृच्छसे सम्यक्तया पृच्छ, प्र०—अत्र लेट् ३३ २७ [सम्+प्रच्छ ज्ञीप्सायाम् (तुदा०) धातोर्लेट्। 'समो गमादिषु विदिप्रच्छिस्वरतीनामुपसख्यानम्' अ० १ ३ २९. वा०सूत्रेणात्मनेपदम्]

सम्पृच्यन्ताम् श्रेष्ठयुक्त्या वैद्यकशिल्पशास्त्ररीत्या मेल्यन्ताम् १.२१ सम्मेल्यन्ताम्, सम्पृच्यन्ते वा १.२१ [सम्+पृची सम्पर्के (रुधा०) धातो कर्मणि लोट्]

सम्पृञ्चानः सम्पर्क कुर्वन् कारयन् वा (कवि = क्रान्तदर्शन काल) १ ६५ ८ [सम्+पृची सम्पर्के (रुधा०) धातो शानच्। व्यत्ययेनात्मनेपदम्]

सम्पृणक्तु सम्बध्नातु ४ ३८ १० [सम्+पृची सम्पर्के (रुधा०) धातोर्लोट्]

सम्प्रच्यवध्वम् सम्यग् गच्छत १५ ५३ [सम्+प्र+च्युङ् गतौ (भ्वा०) धातोर्लोट्। धातोरुकारलोपश्छान्दस]

सम्प्रजया श्रेष्ठेन सन्तानेन राज्येन वा ३ १६. [सम्-प्रजापदयो समास। प्रजा=प्र+जनी प्रादुर्भावे (दिवा०) ड +टाप्]

सम्प्रयात सम्यक् प्राप्नुत १५ ५३ [सम्+प्र+या प्रापणे (अदा०) धातोर्लोट्]

सम्प्रश्नम् सम्यक् पृच्छन्ति यस्मिँस्तम् (ब्रह्म तत्सृष्टिश्च) १७ २७ [सम्+प्रच्छ ज्ञीप्सायाम् (तुदा०) धातो 'यजयाच०' इति नङ्। सम् प्रश्नपदयो समासो वा]

सम्प्रसारयाव विस्तारयाव २३ २० [सम्+प्र+सृ गतौ (भ्वा०) धातोर्णिजन्ताल्लोट्]

सम्प्रियेण एकीभावेन प्रसन्नताकारकेण (सवर्चसा= विद्याऽध्ययन-प्रकाशेन) ३ १६ **सम्प्रियौ**=परस्पर सम्यक् प्रीतियुक्तौ, भा०—अन्योऽन्यस्य प्रियाचरणे रतौ (स्त्री-पुरुषौ) १२ ५७ [सम्+प्रीञ् तर्पणे कान्तौ च (क्र्या०

तस्मादिम लोक (=पृथिवीम्) दक्षिणावत् समुद्र पर्येति श० ७ १ १ १ ३ तस्मादिमॉल्लोकान्दक्षिणावृत् समुद्र पर्येति श० ६ १ २ ३ तस्मादिम लोक (=पृथिवी) सर्वत समुद्र पर्येति श० ७.१ १ १ ३ तस्मादिमाँल्लोकान्त्सर्वत समुद्र पर्येति श० ६.१ २ ३]

समुद्रव्यचसम् समुद्रेऽन्तरिक्षे व्यचा व्याप्तिर्यस्य त सर्वव्यापिनमीश्वर समुद्रे नौकादिविजयगुणसाधनव्यापिन शूरवीर वा (इन्द्र=ईश्वर राजान वा) १ ११ १ समुद्रस्य व्यचसो व्याप्तय इव यस्मिँस्तम् (इन्द्र=परमैश्वर्यम्) १२ ५६ समुद्रस्यान्तरिक्षस्य व्यचा व्याप्तिरिव व्याप्तिर्यस्य तम् (इन्द्र=परमात्मानम्) १७ ६१ [समुद्र व्यचस्पदयो समास । व्यचस्=वि+अञ्चु गतौ (भ्वा०) धातो 'मिथुनेऽसि' उ० ४ २२३ सूत्रेणासि । बाहु० किच्च]

समुद्रसमम् समुद्रेण समानम्, भा०—मेघेन तुल्यम् (सर =तडाग) २३ ४८ [समुद्र-समपदयो समास]

समुद्रार्थाः समुद्रायेमा (आप =जलानि) ७ ४६ २ [समुद्र अर्थपदयो समास]

समुद्रियम् सागरे भवम् (सदनम्) १७ ८७ **समुद्रियः**=समुद्रे भवो नौसमूह १ ५५ २ समुद्रेऽन्तरिक्षे जलमये वा भव (स्वपुरुषार्थयुक्तो विद्वज्जन) प्र०=अत्र 'समुद्राभ्राद् घ' अ० ४ ४ ११८ इति समुद्रशब्दाद् घ प्रत्यय १ २५ ७ [समुद्रप्राति० भवार्थे 'समुद्राभ्राद् घ' अ० ४ ४ ११८ सूत्रेण भवार्थे घ । घस्येयादेश]

समुद्रियाणि समुद्राऽर्हाणि (अर्णांसि=उदकानि) ४ १६.७ [समुद्रप्राति० अर्हत्यर्थे घश्छान्दस]

समुनप् सम्यगुम्भति पूरयति २ १३ ६ [सम्+उम्भ पूरणे (तुदा०) धातोश्छान्दस रूपम्]

समुन्नयामि उत्कृष्टतया नयामि ६ २८ [सम्+उत्+णीञ् प्रापणे (भ्वा०) धातोर्लट्]

समुढ्धम् समत्वेन गूढम् (कुमारम्) ५ २ १

समूढम् यत् सम्यगुह्यते तर्क्यते तर्केण विज्ञायते तत् (पद=मध्यस्थ जगत्) १ २२ १७ मोहेन सह वर्त्तमान ज्ञानवर्जित्त जडम् (परमाणुमय जगत्) ऋ० भू० २६३, ५ १५ सम्यगुह्यतेऽनुनीयते शब्द्यते यत्तत् (परमाण्वादि-रूपम्) ५ १५ [सम्+ऊह वितर्के (भ्वा०) धातो क्त । अथवा=सह-मूढपदयो समास । मूढ =मुह वैचित्ये (दिवा०) धातो क्त]

समूहसि सम्यक् चेतयसि १ १३१ ३ [सम्+ऊह वितर्के (भ्वा०) धातोर्लट् । व्यत्ययेन परस्मैपदम्]

समृञ्जते सम्यक् प्रसाध्नुवन्ति, प्र०—ऋञ्जति प्रसाधनकर्मा नि० ६ २१, १ ६ ६ [सम्+ऋञ्जति प्रसाधनकर्मा (नि० ६ २१) धातोर्लट्]

समृण्वति सम्यक् प्राप्नोति, प्र०—ऋण्वतीति गति-कर्मा निघ० २ १४, ३ २ १ सम्यक्तया गच्छति जानाति वा ३ ११ २ [सम्+ऋण्वति गतिकर्मा (निघ० २ १४) धातोर्लट्]

समृतः सम्यक् सत्यस्वरूप (पूर्णकामो जन) ४ १४ ५ **समृते**=सम्यक् सत्ये व्यवहारे ३ ३८ ३ **समृतेषु**=सम्यक् सत्यन्यायप्रकाशचिह्नेषु (ध्वजेषु) १७ ४३ [सम्+ऋतपदयो समास । ऋतम् सत्यनाम निघ० ३ १० उदकनाम निघ० १ १२ धननाम निघ० २ १०]

समृता सम्यग् ऋत सत्य येषु तानि (अ० —कर्माणि) प्र०—शे स्थाने डादेश १ ३१ ६ [सम्-ऋतपदयो. समासे शेर्लोपश्छान्दस]

समृतिः सम्यक् सत्क्रियावान् (विद्वज्जन) ७ ६० १०. युद्धम् ४ १६ १७ **समृतौ**=सम्यक् ऋति प्राप्तिर्यया तस्याम् (सेनायाम्) १ १२७ ३ सम्यग् यथार्थबोधयुक्ताया प्रज्ञायाम् ५ ७ २ [सम्-ऋतिपदयो समास । ऋति = ऋ गतौ (जु०) धातो स्त्रिया क्तिन्]

समृधः सम्यगृधिमन्त (जना) ६ २ १० [सम्+ऋधु वृद्धौ (दिवा०) धातो कर्त्तरि क्विप्]

समेति सम्यग् गच्छति, भा०—नयति २५ ४१ सम्यगेति ७ १ १४ सम्यक् प्राप्नोति ऋ० भू० २०५, **समेतु**=सङ्गच्छेताम् १२ ११२ [सम्+इण् गतौ (अदा०) धातोर्लट् । अन्यत्र लोट्]

समेद्धारम् सम्यक् प्रकाशकम् (अग्निम्) ६ ४८ ८ य सम्यगिन्धयति प्रदीपयति तम् (यजमानम्) ७ १ १५ [सम्+ञिइन्धी दीप्तौ (रुधा०) धातो कर्त्तरि तृच् । धातोर्नलपोश्छान्दस]

समेयथुः सम्यक् प्राप्नुयातम्, प्र०—अत्र पुरुष-व्यत्यय ५ ७३ ४ [सम्+आङ्+इण् गतौ (अदा०) धातोर्लिट्]

समैरत् सम्यक्तया कम्पयति, यथाक्रम चालयति ४ ५६ ३ प्रेरयति ३ ५५ २० सम्यक् प्रेरयेत्, प्र०—अत्र व्यत्ययेन परस्मैपद 'बहुल छन्दसि' इति शपो लुङ् न ३ ३१ १५ **समैरयध्वम्**=सम्यक् समन्तात्प्रापयतम् ४.३४ २ **समैरयम्**=एकीभावेन प्रेरयेयम् ४ ४२ ३

सम्महेत् सम्यक्तया पूजयेत् १ १११ ३. **सम्महेम**=सम्यक् सत्कुर्याम १.६४ १ [सम्+मह पूजायाम् (भ्वा०) धातोर्लिङ्]

सम्माय सम्यङ्मान कृत्वा १ ६७ ५ [सम्+माङ् माने शब्दे च (जु०) धातो क्त्वा । समासे क्त्वो ल्यप्]

सम्मार्जिम सम्यक् प्रकारेण सशोधयामि २.३५ १२. सम्यक् शिक्षया शोधयामि १.२६ सम्यङ् मार्ष्टि वा, प्र०—अत्र पक्षे पुरुपव्यत्यय २ ७ सम्यक् शुद्धो भवामि शोधयामि वा २ १४ [सम्+मृजूष् शुद्धौ (अदा०) धातोर्लट्]

सम्मितः सम्यक् परिमित (अ०—पुरुप) १७.८१. [सम्-मितपदयो समास । मित =माङ् माने (जु०)+क्त]

सम्मितासः तुलावत् सत्यविवेचका (मरुत = विद्वज्जना) १७ ८४ [समितमिति व्याख्यातम् । ततो जसोऽसुक्]

सम्मिमिक्षिरे सम्यग् मेढुमिच्छन्ति १ ८७.६. **सम्मिमिक्षुः**=सम्यक्तया सिञ्चन्ति १ १६५ १. [सम्+मिह सेचने (भ्वा०) धातोरिच्छायामर्थे सन्नन्ताल् लिट् । व्यत्ययेनात्मनेपदम्]

सम्मिमीहि सम्मन्यस्व ६ १६ ३ सम्मिमीष्व ३ ५४ २२ सम्यग् विधेहि ५ ४ २ [सम्+माङ् माने शब्दे च (जु०) धातोर्लोट् । व्यत्ययेन परस्मैपदम्]

सम्मिश्लः पदार्थेपु सम्यक् मिश्रो मिलित सन् (इन्द्र =वायु) प्र०—'सञ्ज्ञाछन्दसोर्वा कपिलकादीनामिति वक्तव्यम्' अ० ८ २ १८ अनेन वार्त्तिकेन रेफस्य लत्वादेश १ ७ २ **सम्मिश्लाः**=सम्यक् मिश्रा (वायव) २ ३६ २ सम्यक् मित्रत्वेन मिश्रिता (पतिव्रता स्त्रिय) ७ ५६ ६ सम्मिश्रा सयुक्ता (पृषती =सेचननिमित्ता गती) ३ २६ ४ [सम्-मिश्रपदयो समास । रेफस्य लत्व कपिलकादित्वात्]

सम्मिश्लासः अग्न्यादितत्त्वै सम्यक् मिश्रा (नर = नायका जना) १ ६४.१० [सम्-मिश्रपदयो समासे जसोऽसुक् । रेफस्य लत्वम्]

सम्मील्य सम्यक् निमेपण कृत्वा १ १६१ १२ [सम्+मील निमेपणे (भ्वा०) धातो क्त्वा । समासे क्त्वो ल्यप्]

सम्मृण सम्यक्तया हिन्धि १.१३३ ५ [सम्+मृण हिंसायाम् (तुदा०) धातोर्लोट्]

सम्यक् यत्समीचीनमञ्चति तत् (क्षत्र=धन राज्य वा) ५ ६६ २ साधुरीत्या ४ ५८ ६ **सम्यञ्चम्**=य समीचीनमञ्चति तम् (इपम्=अन्नम्) १५.२९ समीचीनम् ५.७ १ **सम्यञ्चः**=सम्यक् प्राप्ति वाले (स्त्री पुरुषो) स० वि० १४३, अथर्व० ३ ३० ६. सम्यक् प्रेमादि गुणो से युक्त (भाई बहिन आदि) स० वि० १४१, अथर्व० २ ३० ३ [सम्+अञ्चु गतिपूजनयो' (भ्वा०) धातो 'ऋत्विग्दधृक्०' इति क्विन् । 'अनिदिताम्०' इति नलोपे 'सम समि' सूत्रेण च सम्यादेशे रूपम्]

सम्यञ्चा सम्यगञ्चतौ (मिथुनौ=स्त्रीपुरुषौ) १ १७९ ३ यथावद् विज्ञानयुक्तावविरुद्धौ (ब्रह्म क्षत्रञ्च=ब्राह्मणक्षत्रियौ) ऋ० भू० २१६, सम्यगेकीभावेनाऽञ्चतस्तौ (ब्रह्म च क्षत्रञ्च) २० २५ [सम्यक् इति व्याख्यातम् । ततो द्विवचनस्याकारादेश]

सम्राजम् भूगोलस्य राजानम् ६ ७ १ य सम्यग्राजते तम् (विद्युदाख्यमग्निम्) ३३ ८ चक्रवर्तिनमिव (अग्निम्) ७ २४ **सम्राजः**=सम्यग्राजमानश्चक्रवर्तिनो राजान ७ ३८ ४ **सम्राजे**=य. सम्यक् सूर्यवद् विद्याविनयाभ्या राजते तस्मै (राज्ञे) ६.६८.९ **सम्राजो**:=यौ सम्यग् राजेते दीप्येते तयो (इन्द्रावरुणयो =सूर्याचन्द्रमसो) १.१७ १ **सम्राट्**=य सूर्य सम्यग्राजते तद्वद् वर्त्तमानश्चक्रवर्त्ती राजा ७.५८ ४ सम्यक् प्रकाशमानम् (चक्षु = नेत्रम्) २० ५ यश्चक्रवर्त्तीव विद्यासु सम्यग्राजते स (विद्वज्जन) १ १८८ ५ या सम्यक् प्रदीप्यते सा (स्त्री) १५ १२ सम्यक् सुखे भूगोले राजमाना (स्त्री) १४ १३ सार्वभौमो राजा ४ २१ १० यो राजधर्मे सम्यग्राजते स (भा०—चक्रवर्त्ती राजा) ९ २४ सम्यक् प्रकाशक (अद्वितीय परमेश्वर) १२ ११७ [सम्+राजृ दीप्तौ (भ्वा०) धातो 'सत्सूद्विप०' इत्यादिना कर्त्तरि क्विप् । 'मो राजि सम क्वौ' सूत्रेण मकारस्य मकारोऽनुस्वारबाधनार्थ । सम्राट्=स यदाह सम्राडसीति सोम वा एतदाहैष ह वै वायुर्भूत्वान्तरिक्षलोके सम्राजति तद् यत् सम्राजति तस्मात् सम्राट् तत् सम्राज सम्राट्त्वम् । गो० पू० ५ १३ तस्य यो रसो व्यक्षरत्त पाणिभि सममृजुस्तस्मात् सम्राट् श० १४ १ १ ११ सम्राङ् वाजपेयेन (इष्ट्वा भवति) श० ५ १ १ १३ स वाजपेयेनेष्ट्वा सम्राडिति नामाधत्त गो० पू० ५ ८ यो वै वाजपेय स सम्राट्त्सव तै० २.७ ६ १ रथन्तर वै सम्राट् तै० १ ४ ४ ९]

धातो 'इगुपधज्ञाप्रीकिर क' इति कर्त्तरि क । ततस्तृतीयैकवचनम्]

सम्बभूव सम्भूतोऽस्ति २३ २ [सम्+भू सत्तायाम् (भ्वा०) धातोर्लिट्]

सम्बोधि सम्यक्तया बुध्यसे ५ ४ ६ [सम्+बुध अवगमने (भ्वा०) धातो कर्मणि लुड् । अडभाव]

सम्भरणम् सम्यग् धारण पोषण वा ७ २५ २ [सम्+भृञ् भरणे (भ्वा०), डुभृञ् धारणपोषणयो (जु०) धातोर्ल्युट्]

सम्भरणः सम्यग् धारक (गुण) १४.२३. [सम्+डुभृञ् धारणपोषणयो (जु०) धातो 'कृत्यल्युटो वहुलम्' इति कर्त्तरि ल्युट्]

सम्भरन्ति सम्यग् धारयन्ति पोषयन्ति वा १ १६२ ६ सम्यक्तया हरन्ति ३३ ३८ सम्यग् धरन्ति पुष्णन्ति वा २५ २६ [सम्+भृञ् भरणे (भ्वा०) धातोर्लट् । हृञ् हरणे (भ्वा०) धातोर्वा सम्पूर्वकाल्लट् । हस्य भकारश्छान्दस । अथवा सम्पूर्वकाद् डुभृञ् धारणपोषणयो (जु०) धातोर्लट् । व्यत्ययेन शप्]

सम्भर य. सम्भरति स (इन्द्र =राजा) ४ १७ ११ [सम्+भृञ् भरणे (भ्वा०) धातो कर्त्तर्यच्]

सम्भव अ०—एकीभव, न द्वैधमाचर ६ ११ अच्छे प्रकार हो स० वि० १३६, अथर्व० १४ २ ३२ सम्यग् भव ४.१७ सम्यक् सम्पद्यस्व ४ १३ सम्यक् निष्पद्यस्व ४ १७ [सम्+भू सत्तायाम् (भ्वा०) धातोर्लोट्]

सम्भवात् सयोगजन्यात् कार्य्यात् (जगत) ४० १० [सम्+भू सत्तायाम् (भ्वा०) धातो 'ऋदोरप्' इत्यप्]

सम्भाराः होम करने के साकल्य स० वि० २०८, अथर्व० ९ ६ १ [सम्+भृञ् भरणे (भ्वा०) धातोर्घञ्]

सम्भिदन्तः सम्यक्तया विदारयन्त' (अङ्गिरस = वायव) ४ ३ ११ [सम्+भिदिर् विदारणे (रुधा०) धातो शतृ । व्यत्ययेन श]

सम्भुजम् सम्भोक्तुम् २ १ ४ [सम्+भुज पालनाभ्यवहारयो (रुधा०) धातोर्घञर्थे क । 'भाववचनाश्चे' ति तुमुन्नपवादो घञ्]

सम्भूतिम् सम्भवन्ति यस्या ता कार्याख्या सृष्टिम् ४०.११ **सम्भूत्या**=शरीरेन्द्रियाऽन्त करणरूपयोत्पन्नया कार्यरूपया, धर्म्ये प्रवर्त्तयित्र्या सृष्ट्या ४० ११ **सम्भूत्याम्**=महत्तत्त्वादिस्वरूपेण परिणताया सृष्टौ, भा०—अनित्य सयोगजन्य कार्य कारणादुत्पन्न पृथिव्यादिस्थूल सूक्ष्म कार्यकारणाख्य जगत् ४० ९ जो कारण से उत्पन्न हुए कार्यरूप पृथिवी आदि भूत, पाषाण, वृक्षादि अवयव और मनुष्यादि के शरीर मे स० प्र० ४३२, ४० ९ [सम्+भू सत्तायाम् (भ्वा०) धातो स्त्रिया क्तिन् । सम्भूति (=प्राण) प्राण वा अनुप्रजा पशवम्सम्भवन्ति जै० उ० २४५ प्राणा उह वाव राजन् मनुष्यस्य सम्भूतिरेवेति जै० उ० ४७४]

सम्भृतक्रतो सम्भृता धारिता क्रतव क्रिया प्रज्ञा वा येन तत्सम्बुद्धौ (इन्द्र=सभेश) १ ५२ ८ [सम्भृत-क्रतुपदयो समास । सम्भृत =सम्+डुभृञ् धारणपोषणयो (जु०) धातो क्त । क्रतु =कर्मनाम निघ० २ १ प्रज्ञानाम निघ० ३ ९]

सम्भृतम् सम्यक् सिद्ध जातम् (पृषदाज्य=दध्याज्यादिभोज्यम्) ३१ ६ सम्यग् धृतम् (सत्यासत्यनिर्णयम्) १८ ५८ सम्यग् धृत पोषित वा (वस्तु) ३ ३० १४. **सम्भृतः**=सम्यक् पुष्ट (ससार) ३१ १७ सम्यक् पोषितो धृतो वा (प्रजापति =जीव) ३९ ५ [सम्+डुभृञ् धारणपोषणयो (जु०) धातो क्त]

सम्भ्रियमाणः सम्यक् पोषित (वायु =प्राण) ८ ५७ सम्यक् पोष्यमाणो भ्रियमाणो वा (प्रजापति = जीव) ३९ ५ [सम्+डुभृञ् धारणपोषणयो (जु०) धातो कर्मणि शानच्]

सम्भ्रियासम् सम्यक्तया धारयेयम्, भा०—पुष्कल भार सदा चयेयम् २ ८ [सम्+डुभृञ् धारणपोषणयो (जु०) धातोर्लिङ् आशिषि]

सम्मदथः सम्यगानन्दत ४ ३४ ११. **सम्मदन्ति**= सम्यग् हर्षन्ति १७ २६ **सम्मदेम**=सम्यक्तया सुखयेम प्र०—अत्र विकरणव्यत्यय ४ १ **सम्ममदः**=सम्यगानन्द ४ २० ४. [सम्+मदी हर्षे (दिवा०) धातोर्लट् । व्यत्ययेन शप् । अन्यत्र लिङ्]

सम्मदन्तः सम्यक्तया हर्षन्त (प्रजाजना) ११ ७५ [सम्+मदी हर्षे (दिवा०) धातो शतृ । व्यत्ययेन शप्]

सम्मनसः परस्पर के लिए हितैषी (स्त्रीपुरुष लोग) स० वि० १४३, अथर्व० ३ ३० ७ एक मति वाले स० वि० १४२, अथर्व० ३ ३० ५ **सम्मनाः**=सम्यक् प्रीतियुक्त मन वाला (पुत्र) स० वि० १४१, अथर्व० ३ ३० २ [सम्-मनस्पदयो समास]

सम्मनांसि एकस्मिन् धर्मे सङ्कल्पविकल्पाद्या अन्त -करणवृत्तय १२ ५८ [सम्-मनस्पदयो समास]

सरानाप्तान् मानयति सा (विदुषी स्त्री) ५ ४५ ८ यथा सरान् विद्याधर्मबोधान् मिमीते तथा (माता), प्र०—अत्र 'आतोऽनुपसर्गे क' इति क प्रत्यय १ ६२ ३ या सरति सा सरला नीति ४ १६ ८ समान रमा रमणमस्या सा (वैद्या स्त्री) ३३ ५६ या सरान् गतिमत पदार्थान् मिनाति सा (विदुषी स्त्री) ३ ३१ ६ [समान-रमापदयो समास । अथवा सरोपपदे माङ् माने (जु०) डुमिञ् प्रक्षेपणे (स्वा०) धातोर्वा क । तत स्त्रिया टाप् । सरमा सरणात् नि० ११ २५]

सरयन्ते सरयन्ति गमयन्ति ४ १७ २ [सृ गतौ (भ्वा०) धातोर्णिजन्तात्लट्]

सरया स्नेहेन २५ १२

सरयु. य सरति स (पदार्थ) ५ ५३ ९ [सृ गतौ (भ्वा०) धातो 'सरतेरयु' उ० ३ २२ सूत्रेणायु]

सरयो: गच्छतो (दुर्जनयो) ४ ३० १८ [सरयुरिति व्याख्यातम् । तत ओसि रूपम्]

सरश्मिभि: रश्मिभि प्रकाशै सह १ १३५ ३ **सरश्मि:**—रश्मिभि प्रकाशै सह वर्त्तमान (भाग) १ १३५ ३ [सह-रश्मिपदयो समासे सहस्य सादेश]

सरस्याय सरसि तडागे भवाय (पुरुषाय) १६ ३७ [सरस्प्राति० भवार्थे यत्]

सरस्वति प्रशस्त सरो विज्ञान गमन वा विद्यते यस्या तत्सम्बुद्धौ (विदुषि कन्ये) १ १८८ ८ बहुविज्ञानयुक्ते (स्त्रि) ३८ ५ बहुविद्यायुक्त मात. २० ६२ या प्रशस्त-विज्ञानयुक्ता प्रजा तत्सम्बुद्धौ २० ७६ विज्ञानवति (विदुषी राज्ञि) २ ३० ८ ब्रह्मविज्ञानयुक्ते (विदुषि स्त्रि) २ ४१ ८ परमविदुषि (स्त्रि) २ ४१ १७ वागिव वर्त्तमाने (विदुषि स्त्रि) १ १६४ ४९ **सरस्वती**—सरस प्रशसिता ज्ञानादयो गुणा विद्यन्ते यस्या सा सर्वविद्याप्रापिका वाक्, प्र०—'सर्वधातुभ्योऽसुन्' उ० ४ १८९ अनेन गत्यर्थात् सृधातो-रसुन् प्रत्यय । सरन्ति प्राप्नुवन्ति सर्वा विद्या येन तत्सर, अस्मात्प्रशसाया मतुप् 'सरस्वती अन्नैरन्नवती' नि० ११ २६, १ ३ १० विज्ञानाढ्या (विदुषी कन्या) ६ ४९ ७ अ०—वेदविद्या सस्कृता वाक् १ ३ ११ विज्ञानवती स्त्री २१ ४६ प्रशस्त सरो विज्ञान विद्यते यस्या सा (विदुषी स्त्री) १९ ८३ प्रशस्तज्ञानयुक्ता पत्नी १९ ८२ योगिनी स्त्री १९ ९३ प्रशस्तविज्ञानसम्बन्धिनी (वाणी) १ १४२ ९ विद्यासुशिक्षया युक्ता वागिव विदुषी स्त्री १ ८९ ३ विदुषी शिक्षिता माता २० ६४ शास्त्र-विज्ञानयुक्ता वाक् २० ५५ प्रशस्तविद्यासुशिक्षायुक्ता वाङ्-मती (स्त्री) २१ ५३ सर प्रशस्त-आयुर्वेदबोधो विद्यते यस्या सा (विदुषी स्त्री) १९ १२ शुद्धा वाणी ७.४० ३ प्रशस्त सरो वेगो यस्या सा नदी ६ ५२ ६. विद्यासुशिक्षिता वागिव पत्नी १०.३४ प्रशस्तविज्ञानकारिका वागिव स्त्री २ ३ ८ सकलविद्यायुक्ता वाणी ३ ५४ १३ सरो बहुविध विज्ञान विद्यते यस्या सा (नीति), प्र०—अत्र भूम्न्यर्थे मतुप् १ १३ ९ विज्ञानयुक्तया वाचाऽऽढ्या (देवी—विदुषी माता) ६ ६१ ४ सरो बह्वन्तरिक्ष सम्बद्ध विद्यते यस्या सा (सत्या वाक्) ६ ६१ १० विज्ञाननिमित्ता (स्त्री) २१ ५१ विशेषज्ञानवती (स्त्री) २१ ५२ प्रशस्तबोध शिक्षायुक्ता वाणी वा १८ १६ प्रशसिता गृहिणी तथा पुरुष २० ५९ सुसस्कृता वाक् २० ८४ वैद्यकशास्त्रवित् प्रशस्तज्ञानवित् स्त्री २१ ३६ प्रशस्तविद्यासुशिक्षायुक्ता, वाङ्मती (स्त्री) २१ ५३-५४ **सरस्वतीम्**—बहुविध सरो वेदादिशास्त्रविज्ञान विद्यते यस्यास्ता विज्ञानयुक्ता-मध्यापिका स्त्रियम् ९ २७ विज्ञानवती वाचम् २१ ४२ प्रशस्तविद्यायुक्ता स्त्रियम् १९ ३३ **सरस्वत्या**—प्रशस्त-विद्याविज्ञानयुक्तया पत्न्या १९ १५ सुशिक्षितया वाचा २१ ५५ प्रशस्तविज्ञानक्रियायुक्तया (वाचा—वेदवाण्या) १०.३० गतिमत्या नीत्या २१ ५६ उत्तमवाण्या २१ ५७ **सरस्वत्याम्**—विज्ञानवत्या वाचि २१ ४६ **सरस्वत्या:**—नद्या २१ ४६ वाण्या २१ ४७ **सरस्वत्यै**—सरन्ति जानन्ति येन तत्सरो ज्ञान तत्प्रशस्त विद्यते यस्या वाचि तस्यै २ २० विद्यासुशिक्षासहितायै वाचे ४ ७ विज्ञान सुशिक्षायुक्ताया (वाच—वेदवाण्या), प्र०—अत्र षष्ठ्यर्थे चतुर्थी ९ ३० विद्यासुशिक्षितवाणीयुक्तायै स्त्रियै १९ १ प्रशस्तगुणायै विदुष्यै २० ३३ वेदार्थसुशिक्षाविज्ञापिकायै वाचे १० ५ सरो विज्ञान विद्यते यस्यास्तस्या (वाच—वाण्या) १८ ३७ कृषिकर्मप्रचारिकायै वाचे १९ ६ नद्यै २४ ३३ प्रशस्तविज्ञानवत्यै वाचे २५ १ [सृ गतौ (भ्वा०) धातो 'सर्वधातुभ्योऽसुन्' इत्यसुन्प्रत्यये सरस् इति रूपम् । तत प्रशसायामर्थे भूम्नि वा मतुप् । तत स्त्रिया ङीप् । सरस्वती—सरस् इत्युदकनाम सर्त्तेस्तद्वती नि० ९ २६ सरस्वती वाङ्नाम निघ० १ ११ सरस्वत्य नदीनाम निघ० १ १३ सर वाङ्नाम निघ० १ ११ ततो मतुबन्तान् ङीप् । वाक् सरस्वती श० ७ ५ १ ३१ वाग्वै सरस्वती कौ० ५ २ ता० ६ ७ ७ श० २ ५ ४ ६ तै० १ ३ ४ ५ गो० उ० १ २० वाग्वै सरस्वती पावीरवी ऐ० ३ ३७ वागेव सरस्वती ऐ० २ २४ वाग्घि सरस्वती ऐ० ३ २.

सम्राजा सम्यग्राजमानौ चक्रवर्त्तिनृपवद्वर्त्तमानौ (सूर्याचन्द्रमसौ) २४१६ [सम्राज् इति व्याख्यातम्। ततो द्विवचनस्याकारादेशश्छान्दस]

सम्राज्ञी प्रीति मे प्रकाशमान (राजपत्नी) सम्यक् प्रकाशमान (चक्रवर्त्तिराजपत्नी स० वि० १३५, १० ८५४६ [सम्-राज्ञीपदयो समास । राज्ञी=राजन्-प्राति० स्त्रिया ङीप्]

सयावभिः ये समान यान्ति ते सयावानस्तै (देवै = विद्वज्जनै) १ ४४ १३ ये सह यान्ति तै (देवै =विद्वद्भि) ३३ ५ **सयावानम्**=सेनादिना सह गच्छन्तम् (रथम्) ५ ३५ ७ [समान-यावन्पदयो समासे समानस्य सादेश । सह-यावन्पदयोर्वा समासे सहस्य सादेश । यावन्=या प्रापणे (अदा०) धातो कर्त्तरि वनिप्]

सयावरी या सहैव याति सा (वाणी=सकलविद्यायुक्ता वाक्) ७ ३१ ८ **सयावरीः**=या समान यान्ति ता (गौर्य =शुभ्रा किरणा इवोद्यमयुक्ता सेना) १ ८४ १० [सयावन् इति व्याख्यातम् । तत स्त्रिया 'वनो र च' सूत्रेण स्त्रिया ङीप् रेफश्चान्तादेश]

सयुग्भिः ये सह युञ्जन्ते तै (वसु-रुद्राऽऽदित्यै) २८ ४ **सयुजः**=ये समान युञ्जते ते (प्रजाजना) ३ ३० ११ **सयुजा**=यत्समान युनक्ति तेन (स्वकीयेन सैन्येन) ११ १५ [सह-युज्पदयो समासे 'वोपसर्जनस्ये' ति सहस्य सादेश । युज्=युजिर् योगे (रुधा०) धातो 'सत्सूद्विष्०' सूत्रेण क्विप्]

सयुजा यौ सहैव युङ्क्तस्तौ (कवी=मेधाविजनौ) २८ ३० यौ समानसम्बन्धौ व्याप्यव्यापकभावेन सहैव युक्तौ वा तौ (जीवेशौ) १ १६४ २० [सयुज् इति व्याख्यातम् । ततो द्विवचनस्याकारादेश]

सयूथ्यः समानश्चाऽसौ यूथ समूहस्तस्मिन् भव (सखा=मित्र) ४ २० ससैन्य (सेनापति) ६ ६ [सयूथ-प्राति० भवार्थे 'सगर्भसयूथ०' अ० ४ ४ ११४ सूत्रेण यत्]

सयोनिः समानस्थान (जीव) १ १६४ ३८ **सयोनीः**=समाना योनिर्विद्या निमित्त वा तौ (अध्यापकोपदेशकौ) १ १५६ ४ [समान-योनिपदयो समासे समानस्य सादेश 'समानस्य छन्दसि०' अ० ६ ३ ८४ सूत्रेण]

सयोनीः समाना योनिर्यासा ता (युवतय स्त्रिय) ३ १ ६ [समान-योनिपदयो समासे स्त्रियाम् कृदिकाराद-क्तिन ' इति वा०सूत्रेण ङीप्]

सरङ्भ्यः युद्धे विजयकर्तृ सेनाजनादिभ्य १ ११२ २१ [सृ गतौ (भ्वा०) धातो 'सर्त्तेरटि' उ० १ १३४ सूत्रेणाटि]

सरण्यन् आत्मन सरण गमन विज्ञान वेच्छन् (इन्द्र =राजा) ३ ३१ १८ प्राप्नुवन् (विद्वज्जन) ३ १ १६ [सरणपदादात्मन इच्छायामर्थे क्यजन्ताच्छतृ । सरणम्=गतौ (भ्वा०) धातोर्ल्युट्]

सरण्यान् सरण प्राप्तान् (जनान्) ४ २१ ६ [सरणप्राति० भवार्थे यत् । सरणम्=सृ गतौ (भ्वा०) धातोर्यत्]

सरण्युभिः आत्मन सरण गमनमिच्छुभि (यज्ञै = व्यवहारै) ३ ३२ ५ सर्वेषु शास्त्रेषु विज्ञानगतिभि (विप्रै =मेधाविजनै) प्र०—अत्र 'मृयुवचि०' इति सूत्रेणान्युच्प्रत्यय १ ६२ ४ [सरणपदादात्मन इच्छायामर्थे क्यजन्तात् 'क्याच्छन्दसि' सूत्रेण उ । अथवा सृ गतौ (भ्वा०) धातो 'सृयुवचिभ्य०' उ० ३ ८१ सूत्रेणान्युच् सरण्यू सरणात् उ० १२ ११]

सरत् सरति ४ ३० १० **सरन्**=गच्छन्ति, प्र०—अत्राऽडभाव ४ १७ ३ [सृ गतौ (भ्वा०) धातोर्लङ् । अडभावश्छान्दस]

सरथम् रथै रमणीयै कर्मभिर्गुणैर्यानैर्वा सह वर्त्तमानस्तम् (मनुष्य रथ वा) १ ७१ ६ रथेन सह वर्त्तमानम् (राजानम्) ५ २६ ८ रथै सह वर्त्तमान सैन्यमुत्तमा सामग्री वा १ १०८.१ रथादिभि सहित सैन्यम् ४ १६ ११. समान यानम् ४ ५७ ३ रमणीयेन स्वरूपेण सह वर्त्तमानम् (सुखम्) ७ ११ १ रथेन यानसमूहेन सहितम् (विद्वज्जनम्) ५ ११.२ [सह-रथपदयो समासे 'वोपसर्जनस्य' सूत्रेण सहस्य सादेश]

सरथा रथादिभि सह वर्त्तमानौ (अश्विना= अध्यापकोपदेशकौ) ५ ४३ ८ [सरथमिति व्याख्यातम् । ततो द्विवचनस्याकार]

सरथिना रथिभि सह वर्त्तमानौ (देवौ=विद्वज्जनौ) २६ ७ [सह-रथिन्पदयो समासे द्विवचनस्याकारादेशः । रथिन्=रथप्राति० मत्वर्थ इनि]

सरपसः सराणि सृतान्यपासि पापानि येन तस्य (शिल्पिजनस्य) २ १३ १२ [सर-अपस्पदयो समास । शकन्धुन्यायेन पररूपम् । अप कर्मनाम निघ० २ १]

सरम् प्राप्तव्यम् (व्यक्त-शब्दम्) २२ २ [सृ गतौ (भ्वा०) धातोरच्]

सरमा समानरमणा (विदुषी स्त्री) ५ ४५ ७ या